# VEDIC CONCORDANCE OF MANTRAS AS PER ṚṢI AND DEVATĀ

# (वैदिक-ऋषि-देवतानुसारी मन्त्रानुक्रमकोषः)

(प्रथमो भागः)

Vol. 1

**(अकृष्टा माषा से ब्रह्मस्वयम्भूः तक)**

By

**Prof. Ravi Prakash Arya**
**Ram Narain Arya**

Amazon Books, USA

in association with

Indian Foundation for Vedic Science

H.O.1051, Sector-1, Rohtak, Haryana, India
Contact No. 09313033917; 09650183२60
**Email : vedicscience@gmail.com: vedicscience@hotmail.com**
**www.vedicscience.net**

Third Revised and Updated Edition
Kali era : 5127 (c. 2025)
Kalpa era : 1,97,29,49,127
Brahma era : 15,50,21,97,9,49,127

Price of Complete Set: Rs. 5000.00

ISBN 978-93-94724-76-1
978-93-94724-28-0 (Complete Set of 2 Vols.)

© Author

All rights are reserved. No part of this work may be reproduced or copied in any form or by any means without written permission from the author

Printed by

Indian Foundation for Vedic Science, 1051, Sector-1, Rohtak-124001, Haryana, India



To my esteemed father, Late Ram Narain Arya,
A paragon of Seership and Vedic scholarship, and a harbinger of rain.
His guidance and unwavering inspiration have been the cornerstone of this endeavor

# Introduction

Indian Foundation for Vedic Science was established with the sole objective of preserving the ancient Vedic heritage and culture by way of promoting scientific researches into Vedic philology, exegesis, and sciences. Now this work has been undertaken by Vedic Science Virtual Vishva Vidyapeeth, USA (VSVV).

The aims and objectives of the IFVS and VSVVare as under:

1. To preserve the ancient Vedic heritage and culture of India.

2. To unravel the mysteries of the Vedas and the Allied literature.

3. To promote and promulgate the rational and scientific outlook of Vedic seers and scholiasts of ancient India.

4. To conduct research into various aspects of Vedic learning and to seek its relevance to modern living.

5. To function as a nodal international agency for information about the current status of Vedic research, Vedic research scholars, and institutions and a liaison agency.

6. To be a competent body of scholars who can authoritatively proclaim decisions and evaluate research in the field of Vedic philology, Vedic exegesis, and Vedic sciences.

7. To bring together the Vedic scholars who evinced a great deal of interest for the promotion of Vedic studies on scientific lines and modern scientists or scholars interested in Vedic scientific vision to co-ordinate for the synthesis of modern scientific knowledge with the Vedic one so that it may diffuse following the Vedic vision for upkeep, advancement, safety, and development of mankind and not for ecological crisis, destruction, and extinction of mankind.

8. To disseminate the knowledge, information, and training scope for advanced research of direct and interdisciplinary nature for all those who are desirous of learning and contributing in the field of Vedic exegesis, Vedic philology, and Vedic sciences.

9. To construct a computer library and to prepare a computer concordance by computerizing the entire bulk of Vedic literature.

10. To undertake the publication of research work done from time to time by the scholars under the auspices of the foundation.

11. To promote such a vision (as discovered by the seers of this land in the times of yore) as could bring about social reforms leading to harmony, friendship, fraternity, and common culture to the present-day troubled world of mankind and help in the cause of national and international peace, thus suggesting the modern science for more and more active role for the upkeep and safety of living organisms and the planet.

In tune with the aims and objectives of the foundation, it was thought that a proper apparatus be produced first to facilitate the in-depth scientific studies and commentaries on the Vedas, since the presently available translations and commentaries on the Vedas and allied literature, leaving a few cases, are not able to present the actual and factual significance of this oldest literature of the world. Most of the translations are based on prejudices and preconceived notions of the translators, and so are misleading and far-fetched ones. The position is known to everyone. We need not elaborate upon this fact. In the absence of factual interpretation of the Vedas, no factual data can be collected, and

in the absence of the factual data, nobody, however reputed or eminent he may be in his field of studies, is able to do justice with the ancient most world of humanity or, say, Vedic life and thought. Under the circumstances, it becomes the paramount duty of an institute like the Indian Foundation For Vedic Science not only to preserve the ancient most intellectual and scientific heritage of the globe but also (1) to present it in the most modern terms and try to seek the relevance of this ancient most scientific treasure of the globe in the context of the modern scientific advancement and the modern living. (2) To see whether and to what extent Vedic scientific vision can contribute for the furtherance of modern science or, say, to seek the possibility of updating the modern scientific advancement with the help of Vedic scientific vision. (3) To find out the possible areas of collaboration between Vedic scientific vision and modern science. (4) To find the equivalence between Vedic scientific vision and modern science. (5) To present the state of the art of different disciplines in the Vedas and allied literature in terms of documentation, sources, and past and present experiments, etc. To pursue the work along the above-cited facts and to define the Vedic age and culture in the right perspective, it is imminent to have accurate interpretations of the Vedas and allied literature. Since the Vedas can best be interpreted with the help of the Vedas only, as the famous convention is, 'Vedas are homomensura or svataḥ pramāṇa.' On the other hand, to interpret the Vedas with the help of Vedas, it is highly essential to have the deep-rooted knowledge and understanding of the cultural and scientific background of the Vedic period. When we look out for such an apparatus as could help us best to interpret Vedas with the help of Vedas, we come across threefold apparatus designed to facilitate and deepen the study of the Vedas . First one among these is the Universal Word Index to the Vedas published in 16 vols. by Vishvabandhu et al. from VVRI Hoshiarpur, Punjab under the title 'Vedic Word Concordance' or वैदिक-पदानुक्रमकोषः Second is the Vedic Index of Names and Subjects by Macdonell. Third one is an index of each and every Mantra-pada to the Vedas consisting of the Published Vedic literature available by the time of its publication in 1966, published by Bloomfield under the title 'A Vedic Concordance'. On careful examination, it was found that only these threefold concordances available in the market are, though sufficient to facilitate the deep study of the Vedas, not enough to help pluck out the actual estimate of the Vedas. To interpret the Vedas with the help of Vedas, it is highly essential to have the deep-rooted knowledge and understanding of the cultural and scientific background of the Vedic period, which is only possible through the knowledge of the actual intention of the Vedic seers and the deities or the subject matter dealt with by them. A full detail of the Mantras compiled under a particular devate-head revealed to a particular seer in various Saṁhtās would also facilitate readers and researchers of the Vedas to make out the actual intention of the seer behind his revelation or visualization of various laws of nature known as various deities. Keeping in view the desideratum of such an apparatus as could help facilitate the readers and researchers make out the actual intention of the seers behind the visualization of various laws of nature at physical, astrophysical, and metaphysical levels, the foundation comes forward with the four-fold apparatus. Firstly named as 'A Vedic Concordance of Ṛṣis and Devatās' or वैदिक-ऋषि-देवतानुक्रम-कोषः- Secondly with 'A concordance of Vedic Mantras as per Ṛṣis and Devatās वैदिक-ऋषि-देवतानुसारी मन्त्रानुक्रम-कोषः- Thirdly, 'A Vedic Concordance of Devatās and Ṛṣis' or 'वैदिक-देवता ऋष्यानुक्रम-कोषः- Fourthly, 'A Concordance of Vedic Mantras as per Devatās and Ṛṣis or वैदिक-देवता-ऋष्यनुसारी मन्त्रानुक्रम-कोषः. Fifthly, it was also decided to produce Bloomfield's Vedic Concordance in Devanāgarī script in an updated, revised, and improved manner by including citations from the works not available by the time of publication of this work during his period so that Vedic researchers can find in the updated Devanāgarī version .

## Vedic Concordance of Mantras as per Ṛṣi and Devatā

It is a matter of great pleasure and pride that after completing the first three tasks of producing a

Concordance of Vedic Ṛṣis and Devatās' or वैदिक-ऋषि-देवतानुक्रम-कोषः.

A Concordance of Vedic Mantras as per Ṛṣis and Devatās' or ' वैदिक-ऋषि-देवतानुसारी मन्त्रानुक्रम-कोषः' ।

'A Vedic Concordance of Devatās and Ṛṣis' or 'वैदिक-देवता ऋष्यानुक्रम-कोषः' ।

We are coming out with the fourth most important work, i.e. 'A Concordance of Vedic Mantras as per Ṛṣis and Devatās' or वैदिक-ऋषि-देवतानुसारी मन्त्रानुक्रम-कोषः running into two vols. With the publication of this work, a long-felt need of an apparatus useful to comprehend the actual intention of the visionaries of the Vedas has been fulfilled. It is fervently hoped that this work will be welcomed by the entire community of Vedic scholars and researchers.

The foundation is also coming out soon with the fifth monumental work, i.e. 'A Vedic Concordance' or "वैदिक-मन्त्रपादानुक्रमकोषः", an updated and revised Devanāgarī version of Bloomfield's Vedic concordance running into २ŒŒŒ pages. The work is ready for publication.

### Introductory to the Present Concordance

In preparing the present Concordance, the following works have been used :

1. Ṛgveda Saṁhitā : Edited by Dr. Ravi Prakash Arya, Delhi, 1997.
2. Ṛgveda Saṁhitā (Mantras only) : Vaidika Yantralaya, Ajmer.
3. Yajurveda Saṁhitā ( Mantras only) : Vaidika Yantralaya, Ajmer.
4. Sāmaveda : Edited by Dr. Ravi Prakash, Delhi, 1996.
5. Sāmaveda : Edited by Sātavalekara [ Svādhyāya Maṇḍala] Paradi, 1985.
6. Sāmaveda : By R.T.H. Griffith, Delhi, 1978.
7. Sāmavedārṣeyadīpa of Bhaṭṭa Bhāskarādhvbarīndra: Edited by Ramachandra Sharma, Tirupati. Ś957.
8. Atharvaveda : Vaidika Yantrālaya, Ajmer.
9. Ṛksarvānukramaṇī of Sāyaṇa.

This work has been prepared by compiling various Devatās of the four Vedas. Under a particular Devatā head, the names of the various Ṛṣis along with the Mantra @ or Mantras revealed to them on the particular subject Devatā were also compiled. The names of Devatās and Ṛṣis have been arranged alphabetically. While compiling the names of various Devatās and Ṛṣis of particular Mantra @ or Mantrās, the author came across the variant readings regarding the names of Devatās and their Ṛṣis in the various works cited above. All those variant readings have been cited in the concordance with reference to the works that contain those readings. For instance,

१. विश्वेदेवाः (Viśvedevāḥ) - ऋ. (Rv.) १०.१२६.१-८

अंहोमुग् वामदेव्यः ; साग्री., सास्वा., सार्षेदी.) कुल्मल वर्हिर्षः शैलूषि अंहोमुग् वा वामदेव्यः ; ऋसर्व.

In the above cited entry Ṛgvedic mantrās of tenth Maṇḍala andŚ२6th sūkta have been recorded in various additions to have been revealed to varying seers. Sāyaṇabhāṣya of

Ṣāmaveda] Ṣāmaveda by Sātavalekara and Sāmvedārṣeyadīpa of Bhaṭṭa Bhāskarādhvarindra register अंहोमुग् वामदेव्यः as the seer] where as Ṛksarvānukramaṇī of Śaunaka registers कुल्मल वर्हिषः शैलूषि अंहोमुग् वा वामदेव्यः as the seer. These variant readings have been shown in the above cited entry quoting the original works] in their abbreviated form] containing these readings.

## Significance of the present work

Vedas represent the knowledge of the creation of the universe acquired first ever by humanity on the globe. The knowledge of creation came into being as soon as the creation got materialized. Vedic seers were the masters of vision. They visualized this knowledge and the laws of nature, creation, and de-creation beyond time and space in their Samādhi. They encoded all those secret laws revealed to them in the form of Mantras. Since those laws of nature, creation, and de-creation were visualized and encoded in the form of Mantras by the Vedic scholars, they were known as the seers or Ṛṣis of that or those particular Mantras or Mantras which revealed to them. The secret laws of nature that were encoded by way of the Mantras came to be known as the deities or the Devatās. Thus, the knowledge of the Vedas lies in the knowledge of the seers and the deities. We find that a particular phenomenon or deity was visualized and encoded in the form of Mantras by more than one seer. Consequent upon which, all the four SaŠhitās recorded various seers on a particular devatā, and various devatās visualized by one particular seer. Under the circumstances, it would be interesting to conduct a comparative and critical study of the nature and types of the various laws or deities of the nature visualized by various seers from their various subjective angles. This comparative analysis would provide a clear-cut picture as to what extent the various seers have differed or agreed in their visualization of a particular phenomenon. This study would also provide a great help in deducing the actual intention of the original seer while interpreting the Vedic texts. In addition, the comparative picture of the various seers and deities would also help solve the various riddles impregnating the actual names of the seers, their surnames, and the deities visualized by them.

To enable the readers and the researchers to carry out such comparative studies regarding the seers and their respective visualizations, this concordance has been prepared. This concordance is a ready reference to all the deities and the seers who worked on them, along with the mantras revealed to seers in the beginning of creation deity-wise as compiled in the four major Saṁhitās of the Vedas. This concordance has listed 951 Devatās underlying great laws of the spiritual, astronomical, and physical nature visualized by various high-spirited Ṛṣis in the beginning of the origin of the human civilization on this globe. The most distinctive characteristic of this concordance is its inclusion of names of Devatās, Ṛṣis, and Mantras in both Devanāgrī and Roman scripts. This accessibility enables users proficient in both scripts to utilize the concordance effectively.

**Prof. Ravi Prakash Arya**

**Fr. UGC Chair professor, MD University, Haryana, India**

**President: Vedic Science Virtual Vishva Vidyapeeth, USA**

Email : vedicscience@gmail.com

web : www.vedicscience.net

## ABBREVIATIONS

Following abbreviations have been used in this volume:

ऋ. (Rv.) *Ṛgveda*

सा. (Sv.) *Sāmaveda*

अ. (Av.) *Atharvaveda*

य. (Yv.) *Yajurveda of Vājasaneyī Saṁhitā*

सार्षेदी. [Sad.] *Sāmavedārṣeyadīpa of Bhaṭṭ Bhāskarādhvarindra*

सास्वा. [Sas.] *Sāmaveda of Svādhyāya Maṇḍala Pāraḍī edited by Sātavalekara*

साग्री. [Ssb.] Sāmaveda Sāyaṇa Bhāṣya or Sāmaveda edition of Griffith

ऋसर्व. [Rss.] *Ṛksarvānukramaṇī of Śaunaka*

अजमेर [Ajmer] *Ṛgveda edition of Vaidika Yantralaya Ajmer.*

# Contents


१. अकृष्टा माषा (Akṛṣṭā māṣā) ........ 1
२. अगस्त्यः (Agastyaḥ) ........ 2
३. अगस्त्यो मैत्रावरुणिः (Agastyo Maitrāvaruṇiḥ) ........ 6
४. अगस्त्यस्य स्वसा एषां माता (Agastyasya Svasā Eṣāṁ Mātā) ........ 24
५. अग्नयो (धिष्ण्या) ऐश्वराः (Agnayo [Dhiṣṇyā] Aiśvarāḥ) ........ 24
६. अग्नयो धिष्ण्या ऐश्वराः (Agnayo Dhiṣṇyā Aiśvarāḥ) ........ 25
७. अग्नयो धिष्ण्या ऐश्वराः (ऋसर्व. साग्री. सास्वा.); वाजिनः (सार्षेदी.); ऋण त्रसदस्यू (सास्वा.) (Agnayo Dhiṣṇyā Aiśvarāḥ [Rss. Ssb. Sas.]; Vājinaḥ [Sad.]; Ṛṇa Trasadasyū [Sas.]).. 26
८. अग्नयो धिष्ण्या ऐश्वराः; वामदेवः (सार्षेदी.); ऋण त्रसदस्यू (सास्वा.) (Agnayo Dhiṣṇyā Aiśvarāḥ; Vāmadevaḥ [Sad.]; Ṛṇa Trasadasyū [Sas.]) ........ 26
९. अग्निः (Agniḥ) ........ 26
१०. अग्निश् चाक्षुषः (Agniś Chākṣuṣaḥ) ........ 28
११. अग्निस् तापसः (Agnis Tāpasaḥ) ........ 29
१२. अग्निः पावकः (Agniḥ Pāvakaḥ) ........ 30
१३. अग्निः प्रजापतिः (सास्व.) (Agniḥ Prajāpatiḥ (Sāsva.) ........ 31
१४. अग्नियुतः स्थौरोऽग्नि यूपो वा स्थौर (Agniyutaḥ Sthauro'gni Yūpo Vā Sthaura) ........ 31
१५. अग्निवरुणसोमानां निहवः (Agnivaruṇasomānāṁ Nihavaḥ) ........ 32
१६. अग्निः सौचीकः (Agniḥ Sauchīkaḥ) ........ 33
१७. अग्निः सौचीको वैश्वानरो वा सप्तिर् वा वाजम्भरः (Agniḥ Sauchīko Vaiśvānaro Vā Saptir Vā Vājambharaḥ) ........ 34
१८. अधमर्षणो माधुच्छन्दसः (Adhamarṣaṇo Mādhuchchhandasaḥ) ........ 35
१९. अंग औरवः (Aṁga Auravaḥ) ........ 35
२०. अंगिरसः (Aṁgirasaḥ) ........ 36
२१. अंगिराः (Aṁgirāḥ) ........ 36
२२. अंगिराः प्रचेता यमश्च (Aṁgirāḥ Prachetā Yamaścha) ........ 42
२३. अजमीढः (Ajamīḍhaḥ) ........ 43
२४. अत्रिः (Atriḥ) ........ 43
२५. अत्रिर् भौमः (Atrir Bhaumaḥ) ........ 45
२६. अथर्वणः (Atharvaṇaḥ) ........ 57
२७. अथर्वा (Atharvā) ........ 58
२९. अथर्वा कृतिर्वा (Atharvā Kṛtirvā) ........ 170
३०. अथर्वा (अभयकामः) (Atharvā [Abhayakāmaḥ]) ........ 170
३१. अथर्वा (आयुष्कामः) (Atharvā [Āyuṣkāmaḥ]) ........ 170
३२. अथर्वा (द्विषोवर्चो हर्तुकामः) (Atharvā [Dviṣovarcho Hartukāmaḥ]) ........ 171
३२. अथर्वा (पण्यकामः) (Atharvā [Paṇyakāmaḥ]) ........ 171
३३. अथर्वा (ब्रह्मवर्चस् कामः) (Atharvā [Brahmavarchas Kāmaḥ]) ........ 172

३४. अथर्वा (यक्ष्मनाशन कामः) (Atharvā [Yakṣamanāśana Kāmaḥ]) ........................174
३५. अथर्वा (यशस्कामः) (Atharvā [Yaśaskāmaḥ]) ..................................................174
३६. अथर्वा (वर्चस्कामः) (Atharvā [Varchaskāmaḥ]) ...............................................174
३७. अथर्वा (वर्चस्कामो यशस्कामश्च) (Atharvā [Varchaskāmo Yaśaskāmaścha]) ............175
३८. अथर्वा (वृषकामः) (Atharvā [Vṛṣakāmaḥ]) .......................................................175
३९. अथर्वा (स्वस्त्ययनकामः) (Atharvā [Svastyayanakāmaḥ]) ...................................176
४०. अथर्वांगिरा (Atharvāṁgirā) ..............................................................................178
४१. अथर्वाचार्यः (Atharvāchāryaḥ) ...........................................................................181
४२. अनानतः पारुच्छेपिः (Anānataḥ Pāruchchhepiḥ) ..................................................184
४४. अन्धीगुः श्यावाश्विः (Andhīguḥ Śyāvāśviḥ) .........................................................186
४५. अपाला आत्रेयी (Apālā Ātreyī) ..........................................................................186
४६. अप्रतिरथः (Apratirathaḥ) ................................................................................187
४७. अप्रतिरथ ऐन्द्रः (Apratiratha Aindraḥ) ............................................................189
४८. अभितपाः सौर्यः (Abhitapāḥ Sauryaḥ) ...............................................................192
४९. अभीवर्तः (Abhīvartaḥ) ...................................................................................193
५०. अमहीयुः (Amahīyuḥ) ......................................................................................193
५१. अमहीयुर् आंगिरसः (Amahīyur Āṁgirasaḥ) .........................................................195
५२. अम्बरीष ऋजिष्वा च (Ambarīṣa Ṛjiṣvā Cha) .......................................................197
५३. अम्बरीषो वार्षागिरः ऋजिष्वा भारद्वाजश्च (Ambarīṣo Vārṣāgiraḥ Ṛjiṣvā Bhāradvājaścha)197
५४. अंहोमुग् वामदेव्यः (Aṁhomug Vāmadevyaḥ) .......................................................198
५५. अंहोमुग् वामदेव्यः (साग्री. सास्वा. सार्षेदी); कुल्मल वर्हिर्षः शैलूषि अंहोमुग् वा वामदेव्यः (ऋसर्व.) Aṁhomug Vāmadevyaḥ [Ssb. Sas. Sad.]; Kulmala Varhirṣaḥ Śailūṣi Aṁhomug vā Vāmadevyaḥ [Rss.]) ..................................................198
५६. अयास्यः (Ayāsyaḥ) .........................................................................................199
५७. अयास्य आंगिरसः (Ayāsya Āṁgirasaḥ) ................................................................204
५८. अरिष्टनेमिस् तार्क्ष्यः (Ariṣṭanemis Tārkṣayaḥ) .....................................................204
५९. अरुण त्रसदस्य (Aruṇa Trasadasya) ...................................................................205
६०. अरुणो वैतहव्यः (Aruṇo Vaitahavyaḥ) ...............................................................205
६१. अर्चनाना आत्रेयः (Archanānā Ātreyaḥ) ..............................................................207
६२. अर्चन् हैरण्यस्तूपः (Archan Hairaṇyastūpaḥ) .......................................................208
६३. अर्बुदः काद्रवेयः सर्पः (Arbudaḥ Kādraveyaḥ Sarpaḥ) ...........................................208
६४. अवत्सारः (Avatsāraḥ) .....................................................................................209
६५. अवत्सारः काश्यपः (Avatsāraḥ Kāśyapaḥ) ...........................................................211
६६. अवत्सारः काश्यपः अन्ये च दृष्टिलिंगाः (Avatsāra son of Kaśyapa and others who are visible in the mantras) ..............................................................................213
६७. अवस्युर् आत्रेयः (Avasyur Ātreyaḥ) ..................................................................214
६८. अश्विनौ (Aśvinau) ...........................................................................................217

६९. अश्विनौ वैवस्वतौ (Aśvinau Vaivasvatau) ........ 218
७०. अष्टकः (Aṣṭakaḥ) ........ 218
७१. अष्टको वैश्वामित्रः (Aṣṭako Vaiśvāmitraḥ) ........ 218
७३. अष्टादंष्ट्रो वैरूपः (Aṣṭādaṁṣṭro Vairūpaḥ) ........ 219
७४. असितः काश्यपो देवलो वा (ऋसर्व. साग्री.); असितः काश्यपः (सार्षेदी. ४७५; ७६; ८५; ८६) (Asitaḥ Kāśyapo Devalo Vā [Rss. Ssb.]; Asitaḥ Kāśyapaḥ [Sad. 475; 76; 85; 86]) ........ 220
७४. आगस्त्यः - अग्रे द्रष्टव्यम (Āgastyaḥ - Agre Draṣṭavyama) ........ 232
७५. आंगिरसः - द्र.अंगिरसः (Āṁgirasaḥ - See Aṁgirasaḥ) ........ 233
७६. आत्मा (Ātmā) ........ 233
७७. आत्रेयः - द्र. अत्रिः (Ātreyaḥ - See Atriḥ) ........ 234
७८. आत्रेयः (साग्री. सास्वा.); वामदेव (सार्षेदी.) (Ātreyaḥ [Ssb. Sas.]; Vāmadeva [Sad.]) 234
७९. आथर्वणः दध्यङ् (Ātharvaṇaḥ Dadhyaṅ) ........ 234
८०. आदित्या देवाः (Ādityā devāḥ) ........ 237
८१. आदित्या देवा वा (Ādityā Devā Vā) ........ 238
८२. आप्त्यस्त्रितः अंगिरसः कुत्सो वा (Āptyastritaḥ Aṁgirasaḥ Kutso Vā) ........ 238
८३. आभूतिः (Ābhūtiḥ) ........ 240
८४. आयुः (Āyuḥ) ........ 241
८५. आयुः काण्वः (वालखिल्यम) (Āyuḥ Kāṇvaḥ [Vālakhilyama] ........ 241
८६. आयुर्वर्चोबलकामः (Āyurvarchobalakāmaḥ) ........ 241
८७. आयुः काण्वः (Āyuḥ Kāṇvaḥ) ........ 241
८८. आसंगः प्लायोगिः (Āsaṁgaḥ Plāyogiḥ) ........ 242
८९. आसुरिः (Āsuriḥ) ........ 243
९०. इटो भार्गवः (Iṭo Bhārgavaḥ) ........ 243
९१. इध्मवाहो दार्ढच्युतः (Idhmavāho Dārḍhachyutaḥ) ........ 243
९२. इन्द्रः (Indraḥ) ........ 244
९३. इन्द्राणी (Indrāṇī) ........ 244
९४. इन्द्राग्नी (Indrāgnī) ........ 244
९५. इन्द्राबृहस्पती (indrābṛhaspatī) ........ 245
९६. इन्द्र प्रमतिर् वासिष्ठः (Indra Pramatir Vāsiṣṭhaḥ) ........ 245
९७. इन्द्र मातरो देवजामयः (Indra Mātaro Devajāmayaḥ) ........ 245
९८. आश्वतराश्विः (Āśvatarāśviḥ) ........ 246
९९. इन्द्रो मुष्कवान् (Indro Muṣkavān) ........ 246
१००. इन्द्र वसुक्रयोः संवादः ऐन्द्रः (Indra Vasukrayoḥ Saṁvādaḥ Aindraḥ) ........ 246
१०१. इन्द्रविश्वामित्रा (Indraviśvāmitrā) ........ 248
१०२. इन्द्रो वैकुण्ठः (Indro Vaikuṇṭhaḥ) ........ 248
१०३. इरिम्बिठिः (Irimbiṭhiḥ) ........ 250

१०४. इरिम्बिठिः काण्वः (Irimbiṭhiḥ Kāṇvaḥ) ........ 252
१०५. इरिम्बिठिः काण्वः (साग्री. सास्वा. ऋसर्व. ८.१८.७); पुरुमीढ (सार्षेदी.) (Irimbiṭhiḥ Kāṇvaḥ [Ssb. Sas. Rss. 8.18.7]; Purumīḍha [Sad.]) ........ 255
१०६. इरिम्बिठिः काण्वः (साग्री. सास्वा. ऋसर्व. ८.१६.१; ८.१७.११; ८.१७.१); इरिमीढः (सार्षेदी.) (Irimbiṭhiḥ Kāṇvaḥ [Ssb. Sas. Rss. 8.16.1; 8.17.11; 8.17.1]) ........ 255
१०७. इष आत्रेयः (Iṣa Ātreyaḥ) ........ 256
१०८. उचथ्यः (Uchathyaḥ) ........ 257
१०९. उचथ्य आङ्गिरस (Uchathya Āṅgirasa) ........ 258
११०. उच्छोचनः (Uchchhochanaḥ) ........ 258
१११. उत्कीलः (Utkīlaḥ) ........ 258
११२. उत्कीलः कात्यः (Utkīlaḥ Kātyaḥ) ........ 259
११३. उत्तरनारायणः (Uttaranārāyaṇaḥ) ........ 260
११४. उद्दालकः (Uddālakaḥ) ........ 261
११५. उन्मोचनः (Unmochanaḥ) ........ 262
११६. उन्मोचनः (आयुष्कामः) (Unmochanaḥ [Āyuṣkāmaḥ]) ........ 262
११७. उपमन्युः वासिष्ठः (Upamanyuḥ Vāsiṣṭhaḥ) ........ 263
११८. प्रमन्युर् वासिष्ठः (Pramanyur Vāsiṣṭhaḥ) ........ 263
११९. उपरिबभ्रवः (Uparibabhravaḥ) ........ 264
१२०. उपरिबभ्रवः सार्पराज्ञी वा (Uparibabhravaḥ Sārparājñī Vā) ........ 265
१२१. उपस्तुतो वार्हिषृव्यः (साग्री. सास्वा. ऋसर्व. १०.११५.१); त्वाष्ट्रीहव्यः (सार्षेदी.) (Upastuto Vārhiṣṛvyaḥ [Ssb. Sas. Rss. 10.115.1]; Tvāṣṭrīhavyaḥ [Sad.]) ........ 265
१२२. उपस्तुतो वार्ष्टिहव्यः (upastuto vārṣṭihavyaḥ) ........ 265
१२३. उरु (Uru) ........ 266
१२४. उरुर् आंगिरसः (Urur Āṁgirasaḥ) ........ 266
१२५. उरुक्षय आमहीयवः (Urukṣaya Āmahīyavaḥ) ........ 266
१२६. उरुचक्रिर् आत्रेयः (Uruchakrir Ātreyaḥ) ........ 267
१२७. उर्ध्व ग्रावार्बुदः (Urdhva Grāvārbudaḥ) ........ 268
१२८. उर्ध्वसद्मा (Urdhvasadmā) ........ 268
१२९. उर्वशी (Urvaśī) ........ 268
१३०. उलो वातायनः (Ulo Vātāyanaḥ) ........ 269
१३१. उशना (Uśanā) ........ 269
१३२. उशना काव्यः (Uśanā Kāvyaḥ) ........ 273
१३३. ऊर्ध्व सद्मा आंगिरसः (Ūrdhva Sadmā Āṁgirasaḥ) ........ 275
१३४. ऋण त्रसदस्यू (Ṛṇa Trasadasyū) ........ 275
१३५. ऋणंचयः (Ṛṇaṁchayaḥ) ........ 276
१३६. ऋणंचयो आंगिरसः (Ṛṇaṁchayo Āṁgirasaḥ) ........ 276
१३७. ऋणंचयो राजर्षिः (Ṛṇaṁchayo Rājarṣiḥ) ........ 276

१३८. ऋजिष्वा (Ṛjiṣvā) ........ 276
१३९. ऋजिश्वा भारद्वाजः (Ṛjiśvā Bhāradvājaḥ) ........ 282
१४०. ऋभुः (Ṛbhuḥ) ........ 282
१४१. ऋषभो वैराजः शाक्वरो वा (Ṛṣabho Vairājaḥ Śākvaro Vā) ........ 283
१४२. ऋषभो वैश्वामित्रः (Ṛṣabho Vaiśvāmitraḥ) ........ 283
१४३. ऋष्यश्रंगः (Ṛṣyaśraṁgaḥ) ........ 285
१४४. एतशः (Etaśaḥ) ........ 285
१४५. एवद्यूर्नौधसः (Evadyūrnaudhasaḥ) ........ 285
१४६. एवयामरुद् आत्रेयः (Evayāmarud Ātreyaḥ) ........ 286
१४७. और्णवाभः (Aurṇavābhaḥ) ........ 287
१४८. औतथ्यः दीर्घतमा - द्र. दीर्घतमा औतथ्य (Autathyaḥ Dīrghatamā - See Dīrghatamā Autathya) ........ 287
१४९. कक्षीवान (दैर्धतमसः औशिजः) (Kakṣīvāna (Dairdhatamasaḥ Auśijaḥ) ........ 287
१५०. कक्षीवान् दैर्घतमसः औशिजः (Kakṣīvān Dairghatamasaḥ Auśijaḥ) ........ 295
१५१. कण्वः (Kaṇvaḥ) ........ 301
१५२. कण्वो घौरः (Kaṇvo Ghauraḥ) ........ 302
१५३. कण्वो घौरः (साग्री. सास्वा. ऋसर्व.); त्रिशोकः काण्वः (सार्षेदी.) (Kaṇvo Ghauraḥ [Ssb. Sas. Rss.]; Triśokaḥ Kāṇvaḥ [Sad.]) ........ 309
१५४. कण्वो घौरः (सार्षेदी. ऋसर्व. १.३७.१०); प्रस्कण्वः काण्वः (साग्री. सास्वा.) (Kaṇvo Ghauraḥ [SAD. RSS. 1.37.10]; Praskaṇvaḥ Kāṇvaḥ [Ssb. Sas.]) ........ 309
१५५. कतो वैश्वामित्रः (Kato Vaiśvāmitraḥ) ........ 309
१५६. कद्रुः सर्पराज्ञी - द्र. सर्पराज्ञी (Kadruḥ Sarparājñī - See Sarparājñī) ........ 310
१५७. कपिंजलः (Kapiṁjalaḥ) ........ 310
१५८. कपोतो नैऋर्तः (Kapoto Nairṛtaḥ) ........ 311
१५९. कबन्धः (Kabandhaḥ) ........ 311
१६०. कर्णश्रुत् वासिष्ठः (Karṇaśrut Vāsiṣṭhaḥ) ........ 312
१६१. कर्णश्रुद् वासिष्ठः (साग्री. सास्वा. ऋसर्व.); दृढीको वासिष्ठः (सार्षेदी.) (Karṇaśrud Vāsiṣṭhaḥ [Ssb. Sas. Rss.]; Dṛḍhīko Vāsiṣṭhaḥ [Sad.] ........ 312
१६२. करिक्रतः (Karikrataḥ) ........ 312
१६३. कलिः (Kaliḥ) ........ 313
१६४. कलिः प्रागाथः (Kaliḥ Prāgāthaḥ) ........ 313
१६५. कवष ऐलूषः (Kavaṣa Ailūṣaḥ) ........ 315
१६६. कवष ऐलूषः (साग्री. सास्वा.); वामदेवः (सार्षेदी.) (Kavaṣa Ailūṣaḥ [Ssb. Sas.]; Vāmadevaḥ [Sad.]) ........ 318
१६७. कवष ऐलूषः अक्षो वा मौजवान् (Kavaṣa Ailūṣaḥ Akṣo Vā Maujavān) ........ 318
१६८. कविः (Kaviḥ) ........ 319
१६९. कविर् भार्गवः (Kavir Bhārgavaḥ) ........ 322

१७०. कश्यपः (Kaśyapaḥ) ........ 324
१७१. कश्यपः वत्सारः - द्र. वत्सारः काश्यपः (Kaśyapaḥ Vatsāraḥ - Dṛ. Vatsāraḥ Kāśyapaḥ) 337
१७२. काक्षीवत् सुकीर्ति (Kākṣīvat Sukīrti)........337
१७३. कश्यपो मारीचः (Kaśyapo Mārīchaḥ) ........337
१७४. काङ्कायनः (Kāṅkāyanaḥ)........338
१७५. काण्वः (Kāṇvaḥ)........341
१७६. कुत्सः (Kutsaḥ)........ 342
१७७. कुत्स आंगिरसः (Kutsa Āṁgirasaḥ) ........351
१७८. कुत्सीदिः (Kutsīdiḥ) ........ 369
१८०. कुमारो यामायनः (Kumāro Yāmāyanaḥ) ........371
१८१. कुमारहारितः (Kumārahāritaḥ)........371
१८२. कुरुस्तुतिः कुरुसुतिर्वा (Kurustutiḥ Kurusutirvā)........ 372
१८३. कुरुसुतिः काण्वः (Kurusutiḥ Kāṇvaḥ)........ 372
१८४. कुशिकः (Kuśikaḥ)........ 374
१८५. कुशिकः सौभरो , रात्रिर्वा भारद्वाजी (Kuśikaḥ Saubharo, Rātrirvā Bhāradvājī)........ 374
१८६. कुश्रिः (Kuśriḥ) ........ 374
१८७. कसीदी काण्वः (Kasīdī Kāṇvaḥ) ........ 374
१८८. कुसुरुबिन्दुः (Kusurubinduḥ)........ 376
१८९. कूर्मः (Kūrmaḥ)........ 376
१९०. कूर्मः गार्त्समदः (Kūrmaḥ Gārtsamadaḥ)........ 376
१९१. कूर्मः गार्त्समदः गृत्समदो वा (Kūrmaḥ Gārtsamadaḥ Gṛtsamado Vā)........ 376
१९२. कृतयशा आंगिरसः (Kṛtayaśā Āṁgirasaḥ)........ 379
१९३. कृत्नुर् भार्गवः (Kṛtnur Bhārgavaḥ)........ 380
१९४. कृशः काण्वः (Kṛśaḥ Kāṇvaḥ) ........ 380
१९५. कृष्णः (ऋसर्व. अ.); कृष्ण आंगिरसः (साग्री.) (Kṛṣṇaḥ [Rss. Av.), Kṛṣṇa Āṁgirasaḥ [Ssb.]) ........381
१९६. कृष्णो द्युम्नीको वा प्रियमेधो वा वासिष्ठः (Kṛṣṇo Dyumnīko Vā Priyamedho Vā Vāsiṣṭhaḥ) ........ 387
१९७. कृष्णो विश्वको वा कार्ष्णिः (Kṛṣṇo Viśvako Vā Kārṣṇiḥ)........ 387
१९८. केतुर् आग्नेयः (Ketur Āgneyaḥ)........388
१९९. कौण्डिन्यः (Kauṇḍinyaḥ)........388
२००. कौरुपथिः (Kaurupathiḥ) ........ 389
२०१. कौशिकः (Kauśikaḥ) ........391
२०२. कौशिकः (अनृणकामः) (Kauśikaḥ [Anṛṇakāmaḥ] ........393
२०३. गय आत्रेयः (Gaya Ātreyaḥ)........ 394
२०४. गयः प्लातः (Gayaḥ Plātaḥ) ........395
२०५. गयस्कानः (Gayaskānaḥ) ........ 398

२०६. गरुत्मान् (Garutmān) ........ 399
२०७. गर्गः (Gargaḥ) ........ 403
२०८. गातुर् आत्रेयः (Gātur Ātreyaḥ) ........ 406
२०९. गाथी कौशिकः (Gāthī Kauśikaḥ) ........ 407
२१०. गार्ग्यः (Gārgyaḥ) ........ 409
२११. गालवः (Gālavaḥ) ........ 410
२१२. गृत्समदः (Gṛtsamadaḥ) ........ 411
२१३. गार्त्समदः कूर्मः - द्र. कूर्म गार्त्समदः (Gārtsamadaḥ Kūrmaḥ - See Kūrma Gārtsamadaḥ) ........ 416
२१४. गृत्समदः शौनकः (Gṛtsamadaḥ Śaunakaḥ) ........ 416
२१७. गृत्समदः आंगिरसः शौनहोत्रो भार्गवः (Gṛtsamadaḥ Āṁgirasaḥ Śaunahotro Bhārgavaḥ) ........ 447
२१८. गोतमः (Gotamaḥ) ........ 449
२१९. गोतमो राहूगणः (Gotamo Rāhūgaṇaḥ) ........ 459
२२०. गोधा (Godhā) ........ 477
२२१. गोपथः (Gopathaḥ) ........ 477
२२२. गोपवन आत्रेयः (Gopavana Ātreyaḥ) ........ 480
२२३. गोपवन आत्रेयः सप्तवध्रिर् वा (Gopavana Ātreyaḥ Saptavadhrir Vā) ........ 481
२२४. गोरवीति शाक्त्यः (Goravīti Śāktyaḥ) ........ 482
२२५. गोषूक्त्यश्वसूक्तिनौ (Goṣūktyaśvasūktinau) ........ 482
२२६. गोषूक्त्यश्वसूक्तिनौ काण्वायनौ (Goṣūkti and Aśvasūkti of Kaṇvāyana) ........ 484
२२७. गौतमः (Gautamaḥ) ........ 486
२२८. गौतमः - नोधा - द्र.नोधा (Gautamaḥ - Nodhā - Seenodhā) ........ 486
२२९. गौर् आंगिरसः (Gaur Āṁgirasaḥ) ........ 486
२३०. गौरिवीतिः (Gaurivītiḥ) ........ 487
२३१. गौरिवीतिः शाक्त्यः (Gaurivītiḥ Śāktyaḥ) ........ 489
२३२. गर्गो भारद्वाजः (ऋसर्व. ६.४७.११); भारद्वाजः (साग्री. सास्वा. सार्षेदी.) (Gargo Bhāradvājaḥ [Rss. 6.47.11); Bhāradvājaḥ [Ssb. Sas. Sad.] ........ 490
२३३. घर्मः सौर्यः (Gharmaḥ Sauryaḥ) ........ 490
२३४. घोर आंगिरसः (Ghora Āṁgirasaḥ) ........ 490
२३५. घोषा काक्षीवती (Ghoṣā Kākṣīvatī) ........ 490
२३६. चक्षुर् मानवः (Chakṣur Mānavaḥ) ........ 493
२३७. चक्षुः सौर्यः (Chakṣuḥ Sauryaḥ) ........ 493
२३८. चातनः (Chātanaḥ) ........ 494
२३९. चित्रः (Chitraḥ) ........ 503
२४०. चित्रमहा वासिष्ठः (Chitramahā Vāsiṣṭhaḥ) ........ 503
२४१. जगद्वीजं पुरुषः (Jagadvījaṁ Puruṣaḥ) ........ 504

२४२. जमदग्निः (Jamadagniḥ) ........................................ 505
२४३. जमदग्निः (अभिसंमनस्कामः) (Jamadagniḥ (Abhisaṁmanaskāmaḥ) ........................................ 508
२४४. जमदग्निः भार्गवः (Jamadagniḥ Bhārgavaḥ) ........................................ 509
२४५. जमदग्नी रामो वा (Jamadagnī Rāmo Vā) ........................................ 513
२४६. जयः (Jayaḥ) ........................................ 514
२४७. जय ऐन्द्रः (Jaya Aindraḥ) ........................................ 514
२४८. जरिता (Jaritā) ........................................ 515
२४९. जाटिकायनः (Jāṭikāyanaḥ) ........................................ 515
२५०. जुहुर् ब्रह्मजाया ऊर्ध्वनाभा वा ब्राह्मः (Juhur Brahmajāyā Ūrdhvanābhā Vā Brāhmaḥ) 515
२५१. जूतिः (Jūtiḥ) ........................................ 516
२५२. जेता माधुच्छन्दसः (Jetā Mādhuchchhandasaḥ) ........................................ 516
२५३. तपुर्मूर्धा बार्हस्पत्यः (Tapurmūrdhā Bārhaspatyaḥ) ........................................ 517
२५४. तान्वः पार्थ्यः (Tānvaḥ Pārthyaḥ) ........................................ 517
२५५. तापसः (Tāpasaḥ) ........................................ 519
२५६. तिरश्चीर् आंगिरसः (Tiraśchīr Āṁgirasaḥ) ........................................ 520
२५७. तिरश्चीर् आंगिरसो द्युतानो वा (Tiraśchīr Āṁgiraso Dyutāno Vā) ........................................ 521
२५८. त्रय ऋषिगणाः (Traya Ṛṣigaṇāḥ) ........................................ 522
२५९. त्रसदस्युः (Trasadasyuḥ) ........................................ 523
२५९. त्रसदस्यू , अरुणः - द्र.अरुण त्रसदस्यू (Trasadasyū , Aruṇaḥ - Seearuṇa Trasadasyū) .523
२६०. त्रसदस्युः पौरुकुत्सः (Trasadasyuḥ Paurukutsaḥ) ........................................ 523
२६१. त्रसदस्युः पौरुकुत्सः (साग्री. सास्वा.); वामदेवः (सार्षेदी.) (Trasadasyuḥ Paurukutsaḥ [Ssb. Sas.]; Vāmadevaḥ [Sad.]) ........................................ 524
२६२. त्रितः (Tritaḥ) ........................................ 525
२६३. त्रित आप्त्यः (Trita Āptyaḥ) ........................................ 530
२६४. त्रित आप्त्यः (साग्री. सास्वा. सार्षेदी) (Trita Āptyaḥ [Ssb. Sas. Sad.]) ........................................ 533
२६५. त्रिशिराः (Triśirāḥ) ........................................ 535
२६६. त्रिशिराः त्वाष्ट्रः (Triśirāḥ Tvāṣṭraḥ) ........................................ 535
२६७. त्रिशिरास् त्वाष्ट्रः सिन्धुद्वीपो वा अम्बरीषः (Triśirās Tvāṣṭraḥ Sindhudvīpo Vā Ambarīṣaḥ) ........................................ 536
२६८. त्रिशोकः (Triśokaḥ) ........................................ 537
२६९. त्रिशोक काण्वः (Triśoka Kāṇvaḥ) ........................................ 537
२७०. त्र्यरुणस् त्रैवृष्णः त्रसदस्युः पौरुकुत्स्यः (Trayaruṇas Traivṛṣṇaḥ Trasadasyuḥ Paurukutsyaḥ) ........................................ 539
२७१. त्र्यरुणस् त्रैवृष्णः त्रसदस्युः पौरुकुत्स्यः अश्वमेधश्च भरतोऽत्रिर्वा (Trayaruṇas Traivṛṣṇaḥ Trasadasyuḥ Paurukutsyaḥ Aśvamedhaścha Bharato'trirvā) ........................................ 541
२७२. त्वष्टा गर्भकर्ता विष्णुर् वा प्राजापत्यः (Tvaṣṭā Garbhakartā Viṣṇur Vā Prājāpatyaḥ) .... 542
२७३. दक्षः (Dakṣaḥ) ........................................ 542

२७४. दधिक्रावा (Dadhikrāvā) ........ 543
२७५. दध्यङ् आथर्वणः (Dadhyaṅ Ātharvaṇaḥ) ........ 543
२७६. दमनः (Damanaḥ) ........ 546
२७७. दमनो यामायनः (Damano Yāmāyanaḥ) ........ 546
२७८. दिव्यो दक्षिणा वा प्राजापत्याः (Divyo Dakṣiṇā Vā Prājāpatyāḥ) ........ 548
२७९. दीर्घतमा (Dīrghatamā) ........ 549
२८०. दीर्घतमा औचथ्यः (Dīrghatamā Auchathyaḥ) ........ 556
२८१. दीर्घतमा औतथ्यः (Dīrghatamā Autathyaḥ) ........ 577
२८२. दुर्मित्रः (सूमित्रो वा) कौत्सः (Durmitraḥ (Sūmitro Vā) Kautsaḥ) ........ 578
२८३. देवस्युर् वान्दनः (Devasyur Vāndanaḥ) ........ 578
२८४. दृळहच्युतः आगस्त्यः (Dṛḷahachyutaḥ Āgastyaḥ) ........ 579
२८५. देवजामयः इन्द्रमातरः (Devajāmayaḥ Indramātaraḥ) ........ 580
२८६. देवमुनिर् ऐम्मदः (Devamunir Aimmadaḥ) ........ 580
२८७. देवलः (Devalaḥ) ........ 581
२८८. देववातः (Devavātaḥ) ........ 581
२८९. देववात भरतौ (Devavāta Bharatau) ........ 582
२९०. देवश्रवाः (Devaśravāḥ) ........ 582
२९१. देवश्रवा यामायनः (Devaśravā Yāmāyanaḥ) ........ 583
२९२. देवश्रवो देववातः (Devaśravā Yāmāyanaḥ) ........ 584
२९३. देवश्रव-देववातौ (Devaśrava-Devavātau) ........ 585
२९४. देवाः (Devāḥ) ........ 585
२९५. देवश्रवा देववातश्च भारतौ (Devaśravā Devavātaścha Bhāratau) ........ 591
२९६. देवातिथिः (Devātithiḥ) ........ 592
२९७. देवातिथिः काण्वः (Devātithiḥ Kāṇvaḥ) ........ 592
२९८. देवातिथिः काण्वः (Devātithiḥ Kāṇvaḥ) ........ 593
२९९. देवापिर् आर्ष्टिषेणः (Devāpir Ārṣṭiṣeṇaḥ) ........ 595
३००. द्युतानो मारुतः (साग्री. सास्वा. सार्षेदी.); तिरश्चीर् आंगिरसः (ऋसर्व. ८.९६.७; १३; १६) (Dyutāno Mārutaḥ [Ssb. Sas. Sad.]; Tiraśchīr Āṁgirasaḥ [Rss. 8.96.7; 13; 16]) ...... 596
३०१. द्युतानो मारुतः (साग्री. सार्षेदी.); तिरश्चीर् द्युतानो वा मारुतः (ऋसर्व.) (Dyutāno Mārutaḥ [Ssb. Sad.]; Tiraśchīr Dyutāno Vā Mārutaḥ [Rss.]) ........ 596
३०२. द्युम्नो विश्वचर्षणिः (Dyumno Viśvacharṣaṇiḥ) ........ 598
३०३. द्रविणोदाः (Draviṇodāḥ) ........ 599
३०४. द्रुह्वणः(आयुर्वर्चोबलकामः) (Druhnaṇaḥ [Āyurvarchobalakāmaḥ]) ........ 599
३०५. द्रोणः (Droṇaḥ) ........ 599
३०६. द्वित आप्त्यः (Dvita Āptyaḥ) ........ 600
३०७. द्वितो मृक्तवाहा आत्रेयः (Dvito Mṛktavāhā Ātreyaḥ) ........ 600
३०८. धरुण आंगिरसः (Dharuṇa Āṁgirasaḥ) ........ 601

३०९. ध्रुवः (Dhruvaḥ) ........ 601
३१०. नकुलः (Nakulaḥ) ........ 602
३११. नभः प्र्रभेदनो वैरूपः (Nabhaḥ Prrabhedano Vairūpaḥ) ........ 602
३१२. नरः (Naraḥ) ........ 603
३१३. नहुषो मानवः (Nahuṣo Mānavaḥ) ........ 604
३१४. नाभाकः काण्वः (Nābhākaḥ Kāṇvaḥ) ........ 604
३१५. नाभाकः काण्वः अर्चनाना वा (Nābhākaḥ Kāṇvaḥ Archanānā Vā) ........ 608
३१६. नाभानेदिष्टः (Nābhānediṣṭaḥ) ........ 608
३१७. नाभानेदिष्ठो मानवः (Nābhānediṣṭho Mānavaḥ) ........ 609
३१८. नारदः काण्वः (Nāradaḥ Kāṇvaḥ) ........ 612
३१९. नारायणः (Nārāyaṇaḥ) ........ 614
३२०. नारायणः (साग्री. सास्वा.); साध्यो नारायणः (सार्षेदी.) (Nārāyaṇaḥ [Ssb. Sas.]; Sādhyo Nārāyaṇaḥ [Sad.]) ........ 623
३२१. निध्रुविः काश्यपः (Nidhruviḥ Kāśyapaḥ) ........ 624
३२२. निपातिथिः काण्वः (Nipātithiḥ Kāṇvaḥ) ........ 626
३२३. नृमेधः (Nṛmedhaḥ) ........ 627
३२५. नृमेध आंगिरसः (प्रथमः पादः); इध्मवाहो दार्ढच्युतः (त्रयः पादाः) (Nṛmedha Āṁgirasaḥ [Prathamaḥ Pādaḥ]; Idhmavāho Dārḍhachyutaḥ [Trayaḥ Pādāḥ]) ........ 632
३२६. नृमेध पुरुमेधौ (Nṛmedha Purumedhau) ........ 632
३२७. नृमेध-पुरुमेधौ आंगिरसौ (Nṛmedha-Purumedhau Āṁgirasau) ........ 633
३२८. नृमेधः वामदेवो वा (Nṛmedhaḥ Vāmadevo Vā) ........ 634
३२९. नेमो भार्गवः (Nemo Bhārgavaḥ) ........ 635
३३०. नोधा (Nodhā) ........ 636
३३१. नोधा गौतमः (Nodhā Gautamaḥ) ........ 639
३३२. नोधा गौतमः (साग्री. सास्वा. ऋसर्व.); नृमेधा काक्षीवतः (सार्षेदी.) (Nodhā Gautamaḥ [Ssb. Sas. Rss.]; Nṛmedhā Kākṣīvataḥ [Sad.]) ........ 646
३३३. प्रणयः असुराः (Praṇayaḥ Asurāḥ) ........ 646
३३४. पतंगः प्राजापत्यः (Pataṁgaḥ Prājāpatyaḥ) ........ 647
३३५. प्रतिवेदनः (Prativedanaḥ) ........ 647
३३६. परमेष्ठी (Parameṣṭhī) ........ 648
३३७. परमेष्ठी वा कुत्सः (Parameṣṭhī Vā Kutsaḥ) ........ 655
३३८. परमेष्ठी प्रजापतिः (Parameṣṭhī Prajāpatiḥ) ........ 655
३३९. परमेष्ठी प्रजापतिर्वा देवाः (Parameṣṭhī Prajāpatirvā Devāḥ) ........ 661
३४०. पराशरः (Parāśaraḥ) ........ 663
३४१. पराशरः शाक्त्यः (Parāśaraḥ Śāktyaḥ) ........ 663
३४२. परुच्छेपः (Paruchchhepaḥ) ........ 670
३४३. परुच्छेपो दैवोदासिः (Paruchchhepo Daivodāsiḥ) ........ 671

३४४. पर्वतः काण्वः (Parvataḥ Kāṇvaḥ) ........ 685
३४५. पर्वतः नारदौ (Parvataḥ Nāradau) ........ 687
३४६. पर्वतनारदौ काण्वौ (Parvatanāradau Kāṇvau) ........ 688
३४७. पर्वतनारदौ काण्वौ शिखण्डिन्यौ अप्सरसौ काश्यपौ वा (Parvatanāradau Kāṇvau Śikhaṇḍinyau Apsarasau Kāśyapau Vā) ........ 688
३४८. पवित्रः (Pavitraḥ) ........ 689
३४९. पवित्र आंगिरसौ (Pavitra Āṁgirasau) ........ 690
३५०. पवित्र अंगिरसो वा वसिष्ठो वा उभौ वा (Pavitra Aṁgiraso Vā Vasiṣṭho Vā Ubhau Vā) 691
३५१. पायुः (Pāyuḥ) ........ 692
३५२. पायुर् भरद्वाजः (Pāyur Bharadvājaḥ) ........ 693
३५३. पावकाग्निः (Pāvakāgniḥ) ........ 696
३५४. पावकोऽग्निर् बार्हस्पत्यो वा गृहपतियविष्ठौ सहसः पुत्र-अन्यतरो वा (Pāvako'gnir Bārhaspatyo Vā Gṛhapatiyaviṣṭhau Sahasaḥ Putra-Anyataro Vā) ........ 696
३५५. पुनर्वत्सः काण्वः (Punarvatsaḥ Kāṇvaḥ) ........ 697
३५६. पुरुः आत्रेयः (Puruḥ Ātreyaḥ) ........ 698
३५७. पुरुमीढः (Purumīḍhaḥ) ........ 698
३५८. पुरुमीढ-अजमीढौ (Purumīḍha-Ajamīḍhau) ........ 699
३५९. पुरुमीळहौ अजमीळहौ सौहोत्रौ (Purumīḻahau Ajamīḻahau Sauhotrau) ........ 699
३६०. पुरुरवा ऐळः (Pururavā Aiḻaḥ) ........ 701
३६१. पुरुहन्मा (Puruhanmā) ........ 702
३६२. पुरुहन्मा आंगिरसः (Puruhanmā Āṁgirasaḥ) ........ 704
३६३. पुरोधाः (Purodhāḥ) ........ 705
३६४. पुष्टिगुः (Puṣṭiguḥ) ........ 705
३६५. पुष्टिगुः काण्वः (Puṣṭiguḥ Kāṇvaḥ) ........ 705
३६६. पूरणः (Pūraṇaḥ) ........ 706
३६७. पूरणो वैश्वामित्रः (Pūraṇo Vaiśvāmitraḥ) ........ 707
३६८. पूरुर् आत्रेयः (Pūrur Ātreyaḥ) ........ 707
३६९. पृथुर् वैन्यः (Pṛthur Vainyaḥ) ........ 708
३७०. पृश्नयो अजाः (Pṛśnayo Ajāḥ) ........ 709
३७१. पृषध्रः काण्वः (Pṛṣadhraḥ Kāṇvaḥ) ........ 710
३७२. पृषध्रः काण्वः (साग्री.सास्वा.ऋसर्व..८.५६.५); वामदेवः (सार्षेदी.) (Pṛṣadhraḥ Kāṇvaḥ [Ssb.Sas.Rss..8.56.5); Vāmadevaḥ [Sad.]) ........ 710
३७३. पौर आत्रेयः (Paura Ātreyaḥ) ........ 710
३७४. प्रगाथः (Pragāthaḥ) ........ 711
३७५. प्रगाथः काण्वः (Pragāthaḥ Kāṇvaḥ) ........ 712
३७६. प्रगाथः काण्वः (साग्री. सास्वा. ऋसर्व.८.६४.१); गाधः (सार्षेदी.) (Pragāthaḥ Kāṇvaḥ [Ssb. Sas. Rss.8.64.1); Gādhaḥ [SAD.]) ........ 716

३७७. प्रगाथो घौरः काण्वः (Pragātho Ghauraḥ Kāṇvaḥ) ............ 717
३७८. प्रगाथो घौरः काण्वो वा (Pragātho Ghauraḥ Kāṇvo Vā) ............ 717
३७९. प्रचेताः (Prachetāḥ) ............ 720
३८०. प्रजापतिः (Prajāpatiḥ) ............ 720
३८१. प्रजापतिः (साग्री.सास्वा.) इन्द्रः प्रजापतिः विष्णु र्विश्वामित्रो वा (सार्षेदी.) (Prajāpatiḥ [Ssb.Sas.] Indraḥ Prajāpatiḥ Viṣṇu Rviśvāmitro Vā [Sad.]) ............ 746
३८२. प्रजापतिः परमेष्ठी (Prajāpatiḥ Parameṣṭhī) ............ 747
३८३. प्रजापतिर्वाच्यः (Prajāpatirvāchyaḥ) ............ 749
३८४. प्रजापतिर् वैश्वामित्रः (साग्री. ५५३) प्रजापतिः (ऋसर्व.) (Prajāpatir Vaiśvāmitraḥ [Ssb. 553) Prrajāpatiḥ [Rss.]) ............ 749
३८५. प्रजापतिर् वैश्वामित्रो वाच्यो वा (Prajāpatir Vaiśvāmitro Vāchyo Vā) ............ 749
३८६. प्रजापतिर् वैश्वामित्रो वाच्यो वा (साग्री.सास्वा.) प्रजापतिः (सार्षेदी.ऋसर्व.) (Prajāpatir Vaiśvāmitro Vāchyo Vā [Ssb.Sas.] Prajāpatiḥ [Sad. Rss.]) ............ 754
३८७. प्रजापत्यो याः (Prajāpatyo Yāḥ) ............ 755
३८८. प्रजावान् प्राजापत्यः (Prajāvān Prājāpatyaḥ) ............ 755
३८९. प्रतर्दनः काशिराजः (Pratardanaḥ Kāśirājaḥ) ............ 755
३९०. प्रतर्दनो दैवोदासिः (Pratardano Daivodāsiḥ) ............ 755
३९१. प्रत्यङ्गिरसः (Pratyaṅgirasaḥ) ............ 758
३९२. प्रतिक्षत्रः (Pratikṣatraḥ) ............ 761
३९३. प्रतिक्षत्र आत्रेयः (Pratikṣatra Ātreyaḥ) ............ 761
३९४. प्रतिप्रभ आत्रेयः (Pratiprabha Ātreyaḥ) ............ 761
३९५. प्रतिभानुर् आत्रेयः (Pratibhānur Ātreyaḥ) ............ 762
३९६. प्रतिरथ आत्रेयः (Pratiratha Ātreyaḥ) ............ 762
३९७. प्रमोचनः (Pramochanaḥ) ............ 763
३९८. प्रथो वासिष्ठः (Pratho Vāsiṣṭhaḥ) ............ 763
३९९. प्रन्धीमुश्यावाश्विः (Prandhīmuśyāvāśviḥ) ............ 764
४००. प्रभूवसुः (Prrabhūvasuḥ) ............ 764
४०१. प्रभूवसुर् आंगिरसः (Prabhūvasur Āṁgirasaḥ) ............ 764
४०२. प्रयस्वन्त आत्रेयाः (Prayasvanta Ātreyāḥ) ............ 766
४०३. प्रयोगो भार्गवः (Prayogo Bhārgavaḥ) ............ 766
४०४. प्रयोगो भार्गवः पावकोऽग्निर् बार्हस्पत्यो वा गृहपतियविष्ठौ सहसः पुत्रो वा अन्यतरो वा (Prayogo Bhārgavaḥ Pāvako'gnir Bārhaspatyo Vā Gṛhapatiyaviṣṭhau Sahasaḥ Putro Vā Anyataro Vā) ............ 767
४०५. प्रशोचनः (Praśochanaḥ) ............ 768
४०६. प्रस्कण्वः (Praskaṇvaḥ) ............ 768
४०७. प्रस्कण्वः काण्वः (Praskaṇvaḥ Kāṇvaḥ) ............ 771
४०८. प्रस्कण्वः काण्वः (साग्री.सास्वा.सार्षेदी.); कण्वो घौरः (ऋसर्व.१.३७.१०) (Praskaṇvaḥ Kāṇvaḥ

[Ssb.Sas.Sad.]; Kaṇvo Ghauraḥ [Rss.1.37.10]) ........................................ 779
४०९. प्रस्कण्वः काण्वः (साग्री. सास्वा. ऋसर्व. ८.४९.१); वालखिल्याः (सार्षेदी.) (Praskaṇvaḥ Kāṇvaḥ [Ssb. Sas. Rss. 8.49.1]; Vālakhilyāḥ [Sad.]) ........................................ 779
४१०. प्रादुराक्षिः (Prādurākṣiḥ) ........................................ 779
४११. प्रियमेधः (Priyamedha) ........................................ 780
४१२. प्रियमेध आंगिरसः (Priyamedha Āṁgirasaḥ) ........................................ 781
४१३. प्रियमेध आंगिरसः (साग्री.३५४ य. ३६०); प्रियमेधः (ऋसर्व.) (Priyamedha Āṁgirasaḥ [Ssb.354; Yv. 360]; Priyamedhaḥ [Rss.]) ........................................ 782
४१४. प्रियमेध आंगिरसः (साग्री. सास्वा. सार्षेदी.); प्रियमेध अभिप्रपाच्यः (Priyamedha Āṁgirasaḥ [Ssb. Sas. Sad.]; Priyamedha Abhiprapāchyaḥ) ........................................ 784
४१५. प्रियमेध आंगिरसः (प्रथमः पादः); नृमेध आंगरिसः (त्रयःपादाः) (Priyamedha Āṁgirasaḥ [first quarter]; Nṛmedha Āṁgarisaḥ [three quarters]) ........................................ 785
४१६. प्रियमेधाः (Priyamedhāḥ) ........................................ 785
४१७. बन्धुः (Bandhuḥ) ........................................ 785
४१८. बन्धुः सुबन्धुः श्रुतबन्धुर् विप्र्रबन्धुश्च गौपायनाः (Bandhuḥ Subandhuḥ Śrutabandhur Viprrabandhuścha Gaupāyanāḥ) ........................................ 785
४१९. बन्धुः सुबन्धुः श्रुतबन्धुः विप्रबन्धुश्च क्रमेण गौपायना लौपायना वा (साग्री. सास्वा.); बन्धुः सुबन्धुः श्रुतबन्धुः विप्रबन्धुश्च गौपायना (ऋसर्व.); वर्द्धु गौपायनः (सार्षेदी.) (Bandhuḥ Subandhuḥ Śrutabandhuḥ Viprabandhuścha krameṇa Gaupāyanā Laupāyanā vā [Ssb. Sas.]; Bandhuḥ Subandhuḥ Śrutabandhuḥ Viprabandhuścha Gaupāyanā [Sad.]; Vardghu Gaupāyanaḥ [Sad.]) ........................................ 788
४२०. बन्धुः सुबन्धुः श्रुतबन्धुः विप्रबन्धुश्च क्रमेण गौपायना लौपायना वा (साग्री. सास्वा.); बन्धुःसुबन्धुः श्रुतबन्धुः विप्रबन्धुश्च गौपायना (ऋसर्व.); वामदेव (सार्षेदी.) (Bandhuḥ Subandhuḥ Śrutabandhuḥ Viprabandhuścha krameṇa Gaupāyanā Laupāyanā vā [Ssb. Sas.]; Bandhuḥ Subandhuḥ Śrutabandhuḥ Viprabandhuścha Gaupāyanā [Sad.]; Vardghu Gaupāyanaḥ [Sad.]) ........................................ 789
४२१. बन्धुः सुबन्धुः श्रुतबन्धुः विप्रबन्धुः क्रमेण गौपायना लौपायना वा (Bandhuḥ Subandhuḥ Śrutabandhuḥ Viprabandhuḥ Krameṇa Gaupāyanā Laupāyanā Vā) ........................................ 789
४२२. बभ्रुर् आत्रेयः (Babhrur Ātreyaḥ) ........................................ 789
४२३. बभ्रुपिङ्गलः (Babhrupiṅgalaḥ) ........................................ 791
४२४. बरुः सर्वहरिर् वा (Baruḥ Sarvaharir Vā) ........................................ 791
४२५. बरुः सर्वहरिर्वा ऐन्द्रः (Baruḥ Sarvaharirvā Aindraḥ) ........................................ 792
४२६. बादरायणिः (Bādarāyaṇiḥ) ........................................ 793
४२७. बाहुवृक्तः आत्रेयः (Bāhuvṛktaḥ Ātreyaḥ) ........................................ 796
४२८. बार्हस्पत्यः शम्युः - द्र.शम्युः (Bārhaspatyaḥ Śamyuḥ - Seeśamyuḥ) ........................................ 796
४२९. बिन्दुः (Binduḥ) ........................................ 796
४३०. बिन्दुः पूतदक्षो वा (ऋसर्व.); बिन्दुः पूतदक्षो वा आंगिरसः (सास्वा.) (Binduḥ Pūtadakṣo Vā

[Rss.]; Binduḥ Pūtadakṣo Vā Āṁgirasaḥ [Sas.]) ..................................... 796
४३१. बुधः (Budhaḥ) ........................................................................................ 797
४३२. बुधगविष्ठिरौ आत्रेयौ (Budhagaviṣṭhirau Ātreyau) ............................................. 797
४३३. बुधः सौम्यः (Budhaḥ Saumyaḥ) ............................................................................ 799
४३४. बृहद्दिवः (Bṛhaddivaḥ) .................................................................................... 800
४३५. बृहद्दिवोऽथर्वा (Bṛhaddivo'tharvā) .................................................................. 800
४३६. बृहद्दिव आथर्वणः (Bṛhaddiva Ātharvaṇaḥ) ........................................................ 801
४३७. बृहदुक्थो वामदेवः (Bṛhaduktho Vāmadevaḥ) ....................................................... 802
४३८. बृहदुक्थो वामदेव्यः (Bṛhaduktho Vāmadevyaḥ) .................................................. 803
४३९. बृहन्मतिर् आंगिरसः (Bṛhanmatir Āṁgirasaḥ) ..................................................... 805
४४०. बृहस्पतिः (Bṛhaspatiḥ) ..................................................................................... 805
४४१. बृहस्पतिर् नकुलो वा (साग्री.सास्वा.); वामदेवः (सार्षेदी.) (Bṛhaspatir Nakulo Vā [Ssb.Sas.]; Vāmadevaḥ [Sad.]) ........................................................................................... 810
४४२. बृहस्पतिर् वा लौक्य अदितिर् वा दाक्षायणी (Bṛhaspatir Vā Laukya Aditir Vā Dākṣāyaṇī) ........................................................................................................... 810
४४३. ब्रह्म स्वयम्भूः - द्र. स्वयम्भूर् ब्रह्म (Brahma Svayambhūḥ - See Svayambhūr Brahma) 811

# Vedic Concordance of Mantras as per Ṛṣi and Devatā (Part-I)

# वैदिक-ऋषि-देवतानुसारी मन्त्रानुक्रमकोषः (भाग-१)

## १. अकृष्टा माषा (Akṛṣṭā māṣā)

१. पवमानः सोमः (Pavamānaḥ Somaḥ) - ऋ. (Rv.) ९.८६.१-१०; सा. (Sv.) ८८६-८८७ ,९५५-९५७ ,१०३१-१०३३.

ऋ. (Rv.) ९.८६.१-१०

प्र त आषावः पवमान धीजवो मदा अर्षन्ति रघुजाइव त्मना ।
दिव्याः सुपर्णा मधुमन्तः इन्दवो मदिन्तमासः परि कोषमासते ॥१ ॥
प्र ते मदासो मदिरास आशवोऽसृक्षत रथ्यासो यथा पृथक् ।
धेनुर्न वत्सं पयसामि वज्रिणमिन्द्रमिन्दवो मधुमन्त ऊर्मयः ॥२ ॥
अत्यो न हियानो अभि वाजमर्ष स्वर्वित्कोशं दिवो अद्रिमातरम् ।
वृषा पवित्रे अधि सानो अव्यये सोमः पुनान इन्द्रियाय धायसे ॥३ ॥
प्र त आश्विनीः पवमान धीजुवो दिव्या असृग्रन्पयसा धरीमणि ।
प्रान्तऋर्षयः स्थाविरीरसृक्षत ये त्वा मृजन्त्यृषिषाण वेधसः ॥४ ॥
विश्वा धामानि विश्वचक्ष ऋभ्वसः प्रभोस्ते सतः परि यन्ति केतवः ।
व्यानशिः पवसे सोम धर्मभिः पतिर्विश्वस्य भुवनस्य राजसि ॥५ ॥
उभयतः पवमानस्य रश्मयो ध्रुवस्य सतः परिं यन्ति केतवः ।
यदी पवित्रे अधि मृज्यते हरिः सत्ता नि योना कलशेषु सीदति ॥६ ॥
यास्य केतुः पवते स्वध्वरः सोमो देवानामुप याति निष्कृतम् ।
सहस्रधारः परि कोशमर्षति वृषा पवित्रमत्येति रोरुवत् ॥७ ॥
राजा समुद्रं नद्यो३ वि गाहतेऽपामूर्मिं सचते सिन्धुषु श्रितः ।
अध्यस्थात्सानु पवमानो अव्ययं नाभा पृथिव्या धरुणो महो दिवः ॥८ ॥
दिवो न सानु स्तनयून्नचिक्रदद् द्यौश्च यस्य पृथिवी च धर्मभिः ।
इन्द्रस्य सख्यं पवते विवेविदत्सोमः पुनानः कलशेषु सीदति ॥९ ॥
ज्योतिर्यास्य पवते मधु प्रियं पिता देवानां जनिता विभूवसुः ।
दधाति रत्नं स्वधयोरपीच्यं मदिन्तमो मत्सर इन्द्रियो रसः ॥१० ॥

*pra ta āṣāvaḥ pavamāna dhījavo madā arṣanti raghujāiva tmanā* ।
*divyāḥ suparṇā madhumantaḥ indavo madintamāsaḥ pari koṣamāsate* ॥*1*॥
*pra te madāso madirāsa āśavo'sṛkṣata rathyāso yathā pṛthak* ।
*dhenurna vatsaṁ payasāmi vajriṇamindramindavo madhumanta ūrmayaḥ* ॥*2*॥
*atyo na hiyāno abhi vājamarṣa svarvitkośaṁ divo adrimātaram* ।
*vṛṣā pavitre adhi sāno avyaye somaḥ punāna indriyāya dhāyase* ॥*3*॥
*pra ta āśvinīḥ pavamāna dhījuvo divyā asṛgranpayasā dharīmaṇi* ।
*prāntarṛṣayaḥ sthāvirīrasṛkṣata ye tvā mṛjantyṛṣiṣāṇa vedhasaḥ* ॥*4*॥
*viśvā dhāmāni viśvachakṣa ṛbhvasaḥ prabhoste sataḥ pari yanti ketavaḥ* ।
*vyānaśiḥ pavase soma dharmabhiḥ patirviśvasya bhuvanasya rājasi* ॥*5*॥
*ubhayataḥ pavamānasya raśmayo dhruvasya sataḥ pariṁ yanti ketavaḥ* ।
*yadī pavitre adhi mṛjyate hariḥ sattā ni yonā kalaśeṣu sīdati* ॥*6*॥
*yāsya ketuḥ pavate svadhvaraḥ somo devānāmupa yāti niṣkṛtam* ।
*sahasradhāraḥ pari kośamarṣati vṛṣā pavitramatyeti roruvat* ॥*7*॥
*rājā samudraṁ nadyo3 vi gāhate'pāmūrmi sachate sindhuṣu śritaḥ* ।

*adhyasthātsānu pavamāno avyayaṁ nābhā pṛthivyā dharuṇo maho divaḥ ॥8॥*
*divo na sānu stanayūnnachikradad dyauścha yasya pṛthivī cha dharmabhiḥ ।*
*indrasya sakhyaṁ pavate vivevidatsomaḥ punānaḥ kalaśeṣu sīdati ॥9॥*
*jyotiryāsya pavate madhu priyaṁ pitā devānāṁ janitā vibhūvasuḥ ।*
*dadhāti ratnaṁ svadhayorapīchyaṁ madintamo matsara indriyo rasaḥ ॥10॥*

सा. (Sv.) ८८६-८८७

प्र त आश्विनीः पवमान धेनवो दिव्या असृग्रन्पयसा धरीमणि ।
प्रान्तरिक्षात्स्थाविरीस्ते असृक्षत ये त्वा मृजन्त्यृषिषाण वेधसः ॥१ ॥
उभयतः पवमानस्य रश्मयो ध्रुवस्य सतः परि यन्ति केतवः ।
यदी पवित्रे अधि मृज्यते हरिः सत्ता नि योनौ कलशेषु सीदति ॥२ ॥
*pra ta āśvinīḥ pavamāna dhenavo divyā asṛgranpayasā dharīmaṇi ।*
*prāntarikṣātsthāvirīste asṛkṣata ye tvā mṛjantyṛṣiṣāṇa vedhasaḥ ॥1॥*
*ubhayataḥ pavamānasya raśmayo dhruvasya sataḥ pari yanti ketavaḥ ।*
*yadī pavitre adhi mṛjyate hariḥ sattā ni yonau kalaśeṣu sīdati ॥2॥*

सा. (Sv.) ९५५-९५७

गोवित्पवस्व वसुविद्धिरण्यविद्रेतोधा इन्दो भुवनेष्वर्पितः ।
त्वं सुवीरो असि सोम विश्ववित्तं त्वा नर उप गिरेम आसते ॥१ ॥
त्वं नृचक्षा असि सोम विश्वतः पवमान वृषभ ता वि धावसि ।
स नः पवस्व वसुमद्धिरण्यवद्वयं स्याम भुवनेषु जीवसे ॥२ ॥
ईशान इमा भुवनानि ईयसे युजान इन्दो हरितः सुपर्ण्यः ।
तास्ते क्षरन्तु मधुमद्घृतं पयस्तव व्रते सोम तिष्ठन्तु कृष्टयः ॥३ ॥
*govitpavasva vasuviddhiraṇyavidretodhā indo bhuvaneṣvarpitaḥ ।*
*tvaṁ suvīro asi soma viśvavittaṁ tvā nara upa girema āsate ॥1॥*
*tvaṁ nṛchakṣā asi soma viśvataḥ pavamāna vṛṣabha tā vi dhāvasi ।*
*sa naḥ pavasva vasumaddhiraṇyavadvayaṁ syāma bhuvaneṣu jīvase ॥2॥*
*īśāna imā bhuvanāni īyase yujāna indo haritaḥ suparṇyaḥ ।*
*tāste kṣarantu madhumadghṛtaṁ payastava vrate soma tiṣṭhantu kṛṣṭayaḥ ॥3॥*

सा. (Sv.) १०३१-१०३३

ज्योतिर्यास्य पवते मधु प्रियं पिता देवानां जनिता विभूवसुः ।
दधाति रत्नं स्वधयोंरपीच्यं मदिन्तमो मत्सर इन्द्रियो रसः ॥१ ॥
अभिक्रन्दन्कलशं वाज्यर्षति पतिर्दिवः शतधारो विचक्षणः ।
हरिर्मित्रस्य सदनेषु सीदति मर्मृजानोऽविभिः सिन्धुभिर्वृषाः ॥२ ॥
अग्ने सिन्धूनां पवमानो अर्षस्यग्रे वाचो अग्रियो गोषु गच्छसि ।
अग्रे वाजस्य भजसे महद्धनं स्वायुधः सोतृभिः सोम सूयसे ॥३ ॥
*jyotiryāsya pavate madhu priyaṁ pitā devānāṁ janitā vibhūvasuḥ ।*
*dadhāti ratnaṁ svadhayoṁrapīchyaṁ madintamo matsara indriyo rasaḥ ॥1॥*
*abhikrandankalaśaṁ vājyarṣati patirdivaḥ śatadhāro vichakṣaṇaḥ ।*
*harirmitrasya sadaneṣu sīdati marmṛjāno'vibhiḥ sindhubhirvṛṣāḥ ॥2॥*
*agne sindhūnāṁ pavamāno arṣasyagre vācho agriyo goṣu gachchhasi ।*
*agre vājasya bhajase mahaddhanaṁ svāyudhaḥ sotṛbhiḥ soma sūyase ॥3॥*

## २. अगस्त्यः (Agastyaḥ)

### १. अग्निः (Agniḥ) - ऋ. (Rv.) १.१८९.१-८

अग्ने नय सुपथा राये अस्मान्विश्वानि देव वयुनानि विद्वान् ।
युयोध्य १ स्मज्जुहुराणमेनो भूयिष्ठां ते नमउक्तिं विधेम ॥१ ॥
अग्ने त्वं पारया नव्यो अस्मान्त्स्वस्तिभिरति दुर्गाणि विश्वा ।
पूश्च पृथ्वी बहुला न उर्वी भवा तोकाय तनयाय शं योः ॥२ ॥
अग्ने त्वमस्मद्युयोध्यमीवा अनग्नित्रा अभ्यमन्त कृष्टीः ।

पुनरस्मभ्य सुविताय देव क्षां विश्वेभिरमृतेभिर्यजत्र ॥३ ॥
पाहि नो अग्ने पायुभिरजस्रैरुत प्रिये सदन आ शुशुक्वान् ।
मा ते भय जरितारं यविष्ठ नूनं विदन्मापरं सहस्वः ॥४ ॥
मा नो अग्नेऽव सृजो अघायाविष्यवे रिपवे दुच्छुनायै ।
मा दत्वते दशते मादते नो मा रीषते सहसावन्परा दाः ॥५ ॥
वि घ त्वाँवा ऋतजात यंसद्गृणानो अग्ने तन्वे३ वरूथम् ।
विश्वाद्रिरिक्षोरुत वा निनित्सोरभिह्रुतामसि हि देव विष्पट् ॥६ ॥
त्वं ताँ अग्न उभयान्वि विद्वान्वेषि प्रपित्वे मनुषो यजत्र ।
अभिपित्वे मनवे शास्यो भूर्मर्मृजेन्य उशिग्भिर्नाक्रः ॥७ ॥
अवोचाम निवचनान्यस्मिन्मानस्य सूनुः सहसाने अग्नौ ।
वयं सहस्रमृषिभिः सनेम विद्यामेषं वृजनं जीरदानुम् ॥८ ॥

*agne naya supathā rāye asmānviśvāni deva vayunāni vidvān ।*
*yuyodhya 1 smajjuhurāṇameno bhūyiṣṭhāṁ te namauktiṁ vidhema ॥1 ॥*
*agne tvaṁ pārayā navyo asmāntsvastibhirati durgāṇi viśvā ।*
*pūścha pṛthvī bahulā na urvī bhavā tokāya tanayāya śaṁ yoḥ ॥2 ॥*
*agne tvamasdyuyodhyamīvā anagnitrā abhyamanta kṛṣṭīḥ ।*
*punarasmabhya suvitāya deva kṣāṁ viśvebhiramṛtebhiryajatra ॥3 ॥*
*pāhi no agne pāyubhirajasrairuta priye sadana ā śuśukvān ।*
*mā te bhaya jaritāraṁ yaviṣṭha nūnaṁ vidanmāparaṁ sahasvaḥ ॥4 ॥*
*mā no agne'va sṛjo aghāyāviṣyave ripave duchchhunāyai ।*
*mā datvate daśate mādate no mā rīṣate sahasāvanparā dāḥ ॥5 ॥*
*vi gha tvāṁ̐vā ṛtajāta yaṁsadgṛṇāno agne tanve3 varūtham ।*
*viśvādririkṣoruta vā ninitsorabhihrutāmasi hi deva viṣpaṭ ॥6 ॥*
*tvaṁ tāṁ̐ agna ubhayānvi vidvānveṣi prapitve manuṣo yajatra ।*
*abhipitve manave śāsyo bhūrmarmṛjenya uśigbhirnākraḥ ॥7 ॥*
*avochāma nivachanānyasminmānasya sūnuḥ sahasāne agnau ।*
*vayaṁ sahasramṛṣibhiḥ sanema vidyāmeṣaṁ vṛjanaṁ jīradānum ॥8 ॥*

२ अन्नम् (Annam) - य. (Yv.)३४.७

पितुं नु स्तोषं महो धमारणतविंषीम्। यस्य त्रितो व्योजसा वृत्रं विपर्वमर्दयत ॥७ ॥
*pituṁ nu stoṣaṁ maho dhamāraṇataviṁṣīm । yasya trito vyojasā vṛtraṁ viparvamarddayata ॥7 ॥*

३. अनुमतिः (Anumatiḥ) - य. (Yv.)३४.८-९

अन्विदनुमते त्वं मन्यासै शं च नस्कृधि। क्रत्वे दक्षाय नो हिनु प्रणऽआयूंषि तारिषः ॥८ ॥
अनु नोऽद्यानुमतिर्यान्देवेषु मन्यताम्। अग्निश्च हव्यवाहनो भवतं दाशुषे मयः ॥९ ॥
*anvidanumate tvaṁ manyāsai śaṁ cha naskṛdhi । kratve dakṣāya no hinu praṇa'āyūṁṣi tāriṣaḥ ॥8 ॥*
*anu no'dyānumatiryāndeveṣu manyatām । agniścha havyavāhano bhavataṁ dāśuṣe mayaḥ ॥9 ॥*

४. इन्द्रः (Indraḥ) - ऋ. (Rv.) १.१६६.१-१५; य. (Yv.)३३.२७; ७९

ऋ. (Rv.) १.१६६.१-१५

तन्नु वोचाम रभसाय जन्मने पूर्व महित्वं वृषभस्य केतवे ।
ऐधेव यामन्मरुतस्तुविष्वणो युधेव शक्रास्तविषाणि कर्तन ॥१ ॥
नित्यं न सूनुं मधु बिभ्रत उप क्रीळन्ति क्रीळा विदथेषु घृष्वयः ।
नक्षन्ति रुद्रा अवसा नमस्विनं न मर्द्धन्ति स्वतवसो हविष्कृतम् ॥२ ॥
यस्मा ऊमासो अमृता अरासत रायस्पोषं च हविषा ददाशुषे ।
उक्षन्त्यस्मै मरुतो हिता इव पुरू रजांसि पयसा मयोभुवः ॥३ ॥
आ ये रजांसि तविषीभिरवयत प्र व एवासः स्वयतासो अध्रजन् ।

भयन्ते विश्वा भुवनानि हर्म्या चित्राो वो यामः प्रयतास्वृष्टिषु ॥४ ॥
यत्त्वेषयामा नदयन्त पर्वतान्दिवो वा पृष्ठं नर्या अचुच्यवुः ।
विश्वो वो अज्मन्भयते वनस्पति रथीयन्तीव प्र जिहीत ओषधिः ॥५ ॥
यूयं न अग्रा मरुतः सुचेतुनारिष्टग्रामाः सुमतिं पिपर्तन ।
यत्रा वो दिद्युद्रदति क्रिविर्दती रिणाति पश्वः सुधितेव बर्हणा ॥६ ॥
प्र स्कम्भदेष्णा अनवभ्रराधसोऽलातृणासो विदथेषु सुष्टुताः ।
अर्चन्त्यर्क मदिररस्य पीतये विदुर्वीरस्य प्रथमानि पौंसया ॥७ ॥
शतभुजिभिस्तमभिह्रुतेरधात्पूर्भी रक्षता मरुतो यमावत ।
जनं यमुग्रास्तवसो विरप्शिनः पाथना शंसात्तनयस्य पुष्टिषु ॥८ ॥
विश्वानि भद्रा मरुतो रथेषु वो मिथस्पृध्येव तविषाण्याहिता ।
अंसेष्वा वः प्रपथेषु खादयोऽक्षो वश्चक्रा समया वि वावृते ॥९ ॥
भूरीणि भद्रा नर्येषु बाहुषु वक्षःसु रुक्मा रभसासो अंजयः ।
अंसेध्वेताः पविषु क्षुरा अधि व्यो न पक्षान्व्यनु श्रियो धिरे ॥१० ॥
महान्तो मह्ना विभ्वो३ विभूतयो दूरेदृशो ये दिव्याइव स्तृभिः ।
मन्द्राः सुजिह्वाः स्वरितार आसभिः संपिश्ला इन्द्रे मरुतः परिष्टुभः ॥११ ॥
तद्वः सुजाता मरुतो महित्वनं दीर्घ वो दात्रमदितेरिव व्रतम् ।
इन्द्रश्चन त्यजसा वि ह्रुणाति तज्जनाय यस्मै सुकृते अराध्वम् ॥१२ ॥
तद्वो जामित्वं मरुतः परे युगे पुरू यच्छंसममृतास आवत ।
अया धिया मनवे श्रुष्टिमाव्या साकं नरो दंसनैरा चिकित्रिरे ॥१३ ॥
येन दीर्घ मरुतः शूशवाम युष्माकेन परीणसा तुरासः ।
आ यत्ततनन्वृजने जनास एभिर्योभिस्तदभीष्टिमश्याम् ॥१४ ॥
एष वः स्तोमो मरुत इयंगीर्मान्दार्यस्य मान्यस्य कारोः ।
एषा यासीष्ट तन्वे वया विद्यामेषं वृजनं जीरदानुम् ॥१५ ॥

*tannu vochāma rabhasāya janmane pūrva mahitvaṁ vṛṣabhasya ketave /*
*aidheva yāmanmarutastuviṣvaṇo yudheva śakrāstaviṣāṇi kartana //1 //*
*nityaṁ na sūnuṁ madhu bibhrata upa krīḻanti krīḻā vidatheṣu ghṛṣvayaḥ /*
*nakṣanti rudrā avasā namasvinaṁ na marddhanti svatavaso haviṣkṛtam //2 //*
*yasmā ūmāso amṛtā arāsata rāyaspoṣaṁ cha haviṣā dadāśuṣe /*
*ukṣantyasmai maruto hitā iva purū rajāṁsi payasā mayobhuvaḥ //3 //*
*ā ye rajāṁsi taviṣībhiravayata pra va evāsaḥ svayatāso adhrajan /*
*bhayante viśvā bhuvanāni harmyā chitrāo vo yāmaḥ prayatāsvṛṣṭiṣu //4 //*
*yattveṣayāmā nadayanta parvatāndivo vā pṛṣṭhaṁ naryā achuchyavuḥ /*
*viśvo vo ajmanbhayate vanaspati rathīyantīva pra jihīta Oṣadhiḥ //5 //*
*yūyaṁ na agrā marutaḥ suchetunāriṣṭagrāmāḥ sumatiṁ pipartana /*
*yatrā vo didyudradati krivirdatī riṇāti paśvaḥ sudhiteva barhaṇā //6 //*
*pra skambhadeṣṇā anavabhrarādhaso'lātṛṇāso vidatheṣu sṛṣṭutāḥ /*
*archantyarka madirarasya pītaye vidurvīrasya prathamāni pauṁsayā //7 //*
*śatabhujibhistamabhihnuteradhātpūrbhī rakṣatā maruto yamāvata /*
*janaṁ yamugrāstavaso virapśinaḥ pāthanā śaṁsāttanayasya puṣṭiṣu //8 //*
*viśvāni bhadrā maruto ratheṣu vo mithaspṛdhyeva taviṣāṇyāhitā /*
*aṁseṣvā vaḥ prapatheṣu khādayo'kṣo vaśchakrā samayā vi vāvṛte //9 //*
*bhūrīṇi bhadrā naryeṣu bāhuṣu vakṣaḥsu rukmā rabhasāso aṁjayaḥ /*
*aṁsedhvetāḥ paviṣu kṣurā adhi vyo na pakṣānvyanu śriyo dhire //10 //*
*mahānto mahnā vibhvo3 vibhūtayo dūreddṛśo ye divyāiva stṛbhiḥ /*
*mandrāḥ sujihnāḥ svaritāra āsabhiḥ saṁpiślā indre marutaḥ pariṣṭubhaḥ //11 //*
*tadvaḥ sujātā maruto mahitvanaṁ dīrgha vo dātramaditeriva vratam /*
*indraśvana tyajasā vi hruṇāti tajjanāya yasmai sukṛte arādhvam //12 //*
*tadvo jāmitvaṁ marutaḥ pare yuge purū yachchhaṁsamamṛtāsa āvata /*

*ayā dhiyā manave śruṣṭimāvyā sākaṁ naro daṁsanairā chikitrire //13 //*
*yena dīrgha marutaḥ śūśavāma yuṣmākena parīṇasā turāsaḥ /*
*ā yattatananvṛjane janāsa ebhiryobhistadabhīṣṭimaśyām //14 //*
*eṣa vaḥ stomo maruta iyaṁgīrmāndāryasya mānyasya kāroḥ /*
*eṣā yāsīṣṭa tanve vayā vidyāmeṣaṁ vṛjanaṁ jīradānum //15 //*

य. (Yv.)३३.२७

कुतस्त्वमिन्द्र माहिनः सन्नेको यासि सत्पते किं तऽइत्था।
सं पृच्छसे समराराणः शुभानैर्वोचेस्तन्नो हरिवो यत्तेऽअस्मे।
महाँश्ऽइन्द्रो यऽओजसा।
कदा चन स्तरीरसि। कदा चन प्रयुच्छसि ॥२७॥

*kutastvamindra māhinaḥ sanneko yāsi satpate kiṁ ta'itthā /*
*saṁ pṛchchhase samarāraṇaḥ śubhānairvochestanno harivo yatte'asme /*
*mahāṁś'indro ya'Ojasā /*
*kadā chana starīrasi / kadā chana prayuchchhasi //27 //*

य. (Yv.)३३.७९

अनुत्तमा ते मघवन्नकिर्नु न त्वावाँश्ऽअस्ति देवता विदानः ।
न जायमानो नशते न जातो यानि करिष्या कृणुहि प्रवृद्ध ॥७९॥

*anuttamā te maghavannakirnu na tvāvāṁś'asti devatā vidānaḥ /*
*na jāyamāno naśate na jāto yāni kariṣyā kṛṇuhi pravṛddha //79 //*

५. इन्द्रामरुतौ (Indramarutau) - य. (Yv.)३३.७८

ब्रह्माणि मे मतयः शंसुतासः शुष्मऽइयर्ति प्रभृतो मेऽअद्रिः ।
आ शासते प्रति हर्य्यन्त्युक्थेमा हरी वहतस्ता नोऽअच्छ ॥७८॥

*brahmāṇi me matayaḥ śaṁsutāsaḥ śuṣma'iyarti prabhṛto me'adriḥ /*
*ā śāsate prati haryyantyukthemā harī vahatastā no'achchha //78 //*

६. मरुतः (Marutaḥ)- य. (Yv.)३४.४८

एष व स्तोमो मरुत इयं गीर्मान्दार्यस्य मान्यस्य कारोः ।
एषा यासीष्ट तन्वे वयां विद्यामेषं वृजनं जीरदानुम् ॥४८॥

*eṣa va stomo maruta iyaṁ gīrmāndāryasya mānyasya kāroḥ /*
*eṣā yāsīṣṭa tanve vayāṁ vidyāmeṣaṁ vṛjanaṁ jīradānum // 48 //*

७. मेखला (Mekhalā)- अ. (Av.) ६.१३३.१-५

य इमां देवो मेखलामाबबन्ध यः संननाह य उ नो युयोज ।
यस्य देवस्य प्रशिषा चरामः स पारमिच्छात् स उ नो वि मुंचात् ॥१॥
आहुतास्यभिहुत ऋषीणामस्यायुधम्। पूर्वा व्रतस्य प्राश्नती वीरध्नी भव मेखले ॥२॥
मृत्योरहं ब्रह्मचारी यदस्मि निर्याचन् भूतात् पुरुषं यमाय ।
तमहं ब्रह्मणा तपसा श्रमेणानयैनं मेखलया सिनामि ॥३॥
श्रद्धाया दुहिता तपसोऽधि जाता स्वसा ऋषीणां भूतकृतां बभूव ।
सा नो मेखले मतिमा धेहि मेधामथो नो धेहि तप इन्द्रियं च ॥४॥
यां त्वा पूर्वे भूतकृत ऋषयः परिबेधिरे। सा त्वं परि ष्वजस्व मां दीर्घायुत्वाय मेखले ॥५॥

*ya imāṁ devo mekhalāmābabandha yaḥ saṁnanāha ya u no yuyoja /*
*yasya devasya praśiṣā charāmaḥ sa pāramichchhāt sa u no vi muṁchāt //1 //*
*āhutāsyabhihuta ṛṣīṇāmasyāyudham / pūrvā vratasya prāśnatī vīradhnī bhava mekhale //2 //*
*mṛtyorahaṁ brahmachārī yadasmi niryāchan bhūtāt puruṣaṁ yamāya /*
*tamahaṁ brahmaṇā tapasā śrameṇānayinaṁ mekhalayā sināmi //3 //*
*śraddhāyā duhitā tapaso'dhi jātā svasā ṛṣīṇāṁ bhūtakṛtāṁ babhūva /*
*sā no mekhale matimā dhehi medhāmatho no dhehi tapa indriyaṁ cha //4 //*
*yāṁ tvā pūrve bhūtakṛta ṛṣayaḥ paribedhire / sā tvaṁ pari ṣvajasva māṁ*

*dīrghāyutvāya mekhale* ।।5 ।।

८. सविता (Savitā) - य. (Yv.)३३.३४

आ नऽइडाभिर्विदथे सुशस्ति विश्वानरः सविता देवऽएतु ।
अपि यथा युवानो मत्सथा नो विश्वं जगदाभिपित्वे मनीषा ।।३४ ।।
*ā na'iḍābhirvidathe suśasti viśvānaraḥ savitā deva'etu* ।
*api yathā yuvāno matsathā no viśvaṁ jagadābhipitve manīṣā* ।।34 ।।

## ३. अगस्त्यो मैत्रावरुणिः (Agastyo Maitrāvaruṇiḥ)

१. अप्रियः (Apriyaḥ) - ऋ. (Rv.) १.१८८.१-११

समिद्धो अद्य राजसि देवो देवैः सहस्रजित् । दूतो हव्या कविर्वह ।।१ ।।
तनूनपादृतं यते मध्वा याः समज्यते। दधत्सहस्रिणीरिषः ।।२ ।।
आजुह्वानोन ईड्यो देवाँ आ वक्षि यियान् । अग्ने सहस्रसा असि ।।३ ।।
प्राचीनं बर्हिरोजसा सहस्रवीरमस्तृणन् । यत्रादित्या विराजथ ।।४ ।।
विराट् सम्राड्विभ्वीः प्रभ्वीर्बह्वीश्च भूयसीश्च याः । दुरो घृतान्यक्षरन् ।।५ ।।
सुरुक्मे हि सुपेशसाधि श्रिया विराजतः। उषासावेह सीदताम् ।।६ ।।
प्रथमा हि सुवाचसा होतारा दैव्या कवी। यां नो यक्षतामिमम् ।।७ ।।
भारतीळे सरस्वती या वः सर्वा उपब्रुवे। ता नश्चोदयत् श्रिये ।।८ ।।
त्वष्टा रूपाणि हि प्रभुः पशून्विश्वान्त्समानजे। तेषां न स्फातिमा यज ।।९ ।।
उप त्मन्या वनस्पते पाथो देवेभ्यः सृज। अग्निर्हव्यानि सिष्वदत् ।।१० ।।
पुरोगा अग्निर्देवानां गायत्रेण समज्यते। स्वाहाकृतीषु रोचते ।।११ ।।
*samiddho adya rājasi devo devaiḥ sahasrajit* । *dūto havyā kavirvaha* ।।1 ।।
*tanūnapādṛtaṁ yate madhvā yāḥ samajyate* । *dadhatsahasriṇīriṣaḥ* ।।2 ।।
*ājuhnānona īḍyo devāṁ̐ ā vakṣi yiāyān* । *agne sahasrasā asi* ।।3 ।।
*prāchīnaṁ barhirojasā sahasravīramastṛṇan* । *yatrādityā virājatha* ।।4 ।।
*virāṭ samrāḍvibhvīḥ prabhvīrbahnīścha bhūyasīścha yāḥ* । *duro ghṛtānyakṣaran* ।।5 ।।
*surukme hi supeśasādhi śriyā virājataḥ* । *uṣāsāveha sīdatām* ।।6 ।।
*prathamā hi suvāchasā hotārā daivyā kavī* । *yāṁ no yakṣatāmimam* ।।7 ।।
*bhāratīḷe sarasvatī yā vaḥ sarvā upabruve* । *tā naśchodayat śriye* ।।8 ।।
*tvaṣṭā rūpāṇi hi prabhuḥ paśūnviśvāntsamānaje* । *teṣāṁ na sphātimā yaja* ।।9 ।।
*upa tmanyā vanaspate pātho devebhyaḥ sṛja* । *agnirhavyāni siṣvadat* ।।10 ।।
*purogā agnirdevānāṁ gāyatreṇa samajyate* । *svāhākṛtīṣu rochate* ।।11 ।।

२. अबोषधि सूर्याः (Aboṣadhi Sūryāḥ) - ऋ. (Rv.)१.१९१.१-१६

कङ्कतो न कङ्कतोऽथो सतीनकङ्कतः। द्वाविति प्लुषी इति न्य१दृष्टा अलिप्सत ।।१ ।।
अदृष्टान्हन्त्यायत्यथो हन्ति परायती। अथो अवघ्नती हन्त्यथो पिनष्टि पिंषती ।।२ ।।
शरासः कुशरासो दर्भासः सैर्या उत। मौंजा अदृष्टा बैरिणाः सर्वे साकं न्यलिप्सत ।।३ ।।
नि गावो गोष्ठे असदन्निमृगासो अविक्षत। नि केतवो जनानां न्य१दृष्टा अलिप्सत ।।४ ।।
एत उ त्ये प्रत्येदृश्रन्प्रदोषं तस्करा इव। अदृष्टा विश्वदृष्टाः प्रतिबुद्धा अभूतन ।।५ ।।
द्यौर्वः पिता पृथिवी माता सोमो भ्रातादितिः स्वसा।
अदृष्टा विश्वदृष्टास्तिष्ठतेलयता सु कम् ।।६ ।।
ये अंस्या ये अङ्ग्याः सूचीका ये प्रकङ्कताः।
अदृष्टाः किं चनेह वः सर्वे साकं निजस्यत ।।७ ।।
उत्पुरस्तात्सूर्य। एति विश्वदृष्टो अदृष्टहा। अदृष्टान्त्सर्वांजम्भयन्त्सर्वाश्च यातुधान्यः ।।८ ।।
उदपप्तदसौ सूर्यः पुरु विश्वानि जूर्वन्। आदित्यः पर्वतेभ्यो विश्वदृष्टो अदृष्टहा ।।९ ।।
सूर्ये विषमा सजामि दृतिं सुरावतो गृहे ।
सो चिन्नु न मराति नो वयं मरामारे अस्य योजनं हरिष्ठा मधु त्वा मधुला चकार ।।१० ।।
इयत्तिका शकुन्तिका सका जघास ते विषम् ।
सो चिन्नु न मराति नो वयं मरामारे अस्य योजनं हरिष्ठा मधु त्वा मधुला चकार ।।११ ।।

त्रिः सप्त विष्पुलिंगका विषस्य पुष्पमक्षन् ।
ताश्चिन्नु न मरन्ति नो वयं मरामार अस्य योजनं हरिष्ठा मधु त्वा मधुला चकार ॥१२॥
नवानां नवतीनां विषस्य रोपुषीणाम् ।
सर्वासामग्रभं नामारे अस्य योजनं हरिष्ठा मधु त्वा मघुला चकार ॥१३॥
त्रिः सप्त मयूर्यः सप्त स्वसारो अग्रुवः । तास्ते विषं वि जभ्रिर उदकं कुम्भिनीरिव ॥१४॥
इयत्तकः कुषुम्भकस्तकं भिनद्म्यश्मना । ततो विषं प्र वावृते पराचीरनु संवतः ॥ ॥१५॥
कुषुम्भकस्तदब्रवीद् गिरेः प्रवर्तमानकः । वृश्चिकस्यारसं विषमरसं वृश्चिक वृश्चिक ते विषम् ॥ १६॥

*kaṅkato na kaṅkato'tho satīnakaṅkataḥ | dvāviti pluṣī iti nya1dṛṣṭā alipsata ||1 ||*
*adṛṣṭānhantyāyatyatho hanti parāyatī | atho avaghnatī hantyatho pinaṣṭi piṁṣatī ||2 ||*
*śarāsaḥ kuśarāso darbhāsaḥ sairyā uta | mauṁjā addaṣṭā bairiṇāḥ sarve sākaṁ nyalipsata ||3 ||*
*ni gāvo goṣṭhe asadannimṛgāso avikṣata | ni ketavo janānāṁ nya1dṛṣṭā alipsata ||4 ||*
*eta u tye pratyeddaśranpradoṣaṁ taskarā iva | addaṣṭā viśvaddaṣṭāḥ pratibuddhā abhūtana ||5 ||*
*dyaurvaḥ pitā pṛthivī mātā somo bhrātāditiḥ svasā |*
*addaṣṭā viśvaddaṣṭāstiṣṭhatelayatā su kam ||6 ||*
*ye aṁsyā ye aṅgyāḥ sūchīkā ye prakaṅkatāḥ |*
*addaṣṭāḥ kiṁ chaneha vaḥ sarve sākaṁ nijasyata ||7 ||*
*utpurastātsūrya | eti viśvaddaṣṭo addaṣṭahā | addaṣṭāntsarvāṁjambhayantsarvāścha yātudhānyaḥ ||8 ||*
*udapaptadasau sūryaḥ puru viśvāni jūrvan | ādityaḥ parvatebhyo viśvaddaṣṭo addaṣṭahā ||9 ||*
*sūrye viṣamā sajāmi dṛtiṁ surāvato gṛhe |*
*so chinnu na marāti no vayaṁ marāmāre asya yojanaṁ hariṣṭhā madhu tvā madhulā chakāra ||10 ||*
*iyattikā śakuntikā sakā jaghāsa te viṣam |*
*so chinnu na marāti no vayaṁ marāmāre asya yojanaṁ hariṣṭhā madhu tvā madhulā chakāra ||11 ||*
*triḥ sapta viṣpuliṁgakā viṣasya puṣpamakṣan |*
*tāśchinnu na maranti no vayaṁ marāmāra asya yojanaṁ hariṣṭhā madhu tvā madhulā chakāra ||12 ||*
*navānāṁ navatīnāṁ viṣasya ropuṣīṇām |*
*sarvāsāmagrabhaṁ nāmāre asya yojanaṁ hariṣṭhā madhu tvā maghulā chakāra ||13 ||*
*triḥ sapta mayūryaḥ sapta svasāro agruvaḥ | tāste viṣaṁ vi jabhrira udakaṁ kumbhinīriva ||14 ||*
*iyattakaḥ kuṣumbhakastakaṁ bhinadmi-aśmanā | tato viṣaṁ pra vāvṛte parāchīranu saṁvataḥ ||15 ||*
*kuṣumbhakastadabravīd gireḥ pravartamānakaḥ | vṛśchikasyārasaṁ viṣamarasaṁ vṛśchika vṛśchika te viṣam || 16 ||*

३. अश्विनौ (Aśvinau) - ऋ. (Rv.) १.१८०.१-१०; १.१८१.१-९; १.१८२१-८; १.१८३.१-६; १.१८४.१-६

ऋ. (Rv.) १.१८०.१-१०

युवो रजांसि सुयमासो अश्वा रथो यद्वा पर्यर्णासि दीयत् ।
हिरण्यया वां पवयः प्रुषायन्मध्वः पिबन्ता उषसः सचेथे ॥१॥
युवमत्यस्याव नक्षथो यद्विपत्मनो नर्यस्य प्रयज्योः ।
स्वसा यद्वां विश्वगूर्ती भराति वाजायेट्टे मधुपाविषे च ॥२॥
युवं पय उस्रियायामधत्तं पक्वमामायामव पूर्व्यं गोः ।
अन्तर्यद्वनिनो वामृतप्सू ह्वारो न शुचिर्यजते हविष्मान् ॥३॥

युवं ह धर्मं मधुमन्तमत्रयेऽपो न क्षोदोऽवृणीतमेषे ।
तद्वां नरावश्विना पश्वइष्टी रथ्येव चक्रा प्रति यन्ति मध्वः ॥४॥
आ वा दानाय ववृतीय दस्रा गोरोहेण तौग्र्यो न जिर्विः ।
अपः क्षोणी सचते माहिना वा जूर्णो वामक्षुरंहसो यजत्रा ॥५॥
नि यद्युवेथे नियुतः सुदान् उप स्वधाभिः सृजथः पुरधिम् ।
प्रेषद्वेषद्वातो न सूरिरा महे ददे सुव्रतो न वाजम् ॥६॥
वयं चिद्धि वां जरितारः सत्या विपन्यामहे वि पणिर्हितावान् ॥७॥
अधा चिद्धि ष्माश्विनावनु द्यून्विरुद्रस्य प्रस्रवणस्य सातौ ।
अगस्त्यो नरां नृषु प्रशस्तः काराधुनीव चितयत्सहस्रैः ॥८॥
प्र यद्वहेथे महिना रथस्य प्र स्पन्द्रा याथो मनुषो न होता ।
धत्तं सूरिभ्य उत वा स्वश्व्यं नासत्या रयिषाचः स्याम ॥९॥
तं वां रथं वयमद्या हुवेम स्तोमैरश्विना सुविताय नव्यम् ।
अरिष्टनोमिं परि द्यामियानं विद्यामेषं वृजनं जीरदानुम् ॥१०॥

*yuvo rajāṁsi suyamāso aśvā ratho yadvā paryarṇāsi dīyat ।*
*hiraṇyayā vāṁ pavayaḥ pruṣāyanmadhvaḥ pibantā uṣasaḥ sachethe ॥1॥*
*yuvamatyasyāva nakṣatho yadvipatmano naryasya prayajyoḥ ।*
*svasā yadvāṁ viśvagūrtī bharāti vājāyeṭṭe madhupāviṣe cha ॥2॥*
*yuvaṁ paya usriyāyāmadhattaṁ pakvamāmāyāmava pūrvya goḥ ।*
*antaryadvanino vāmṛtapsū hnāro na śuchiryajate haviṣmān ॥3॥*
*yuvaṁ ha dharma madhumantamatrāye'po na kṣodo'vṛṇītameṣe ।*
*tadvāṁ narāvaśvinā paśvaiṣṭī rathyeva chakrā prati yanti madhvaḥ ॥4॥*
*ā vā dānāya vavṛtīya dasrā goroheṇa taugryo na jirviḥ ।*
*apaḥ kṣoṇī sachate māhinā vā jūrṇo vāmakṣuraṁhaso yajatrā ॥5॥*
*ni yadyuvethe niyutaḥ sudān upa svadhābhiḥ sṛjathaḥ puradhim ।*
*preṣadveṣadvāto na sūrirā mahe dade suvrato na vājam ॥6॥*
*vayaṁ chiddhi vāṁ jaritāraḥ satyā vipanyāmahe vi paṇirhitāvān ॥7॥*
*adhā chiddhi ṣmāśvināvanu dyūnvirudrasya prasravaṇasya sātau ।*
*agastyo narāṁ nṛṣu praśastaḥ kārādhunīva chitayatsahasraiḥ ॥8॥*
*pra yadvahethe mahinā rathasya pra spandrā yātho manuṣo na hotā ।*
*dhattaṁ sūribhya uta vā svaśvyaṁ nāsatyā rayiṣāchaḥ syāma ॥9॥*
*taṁ vāṁ rathaṁ vayamadyā huvema stomairaśvinā suvitāya navyam ।*
*ariṣṭanomiṁ pari dyāmiyānaṁ vidyāmeṣaṁ vṛjanaṁ jīradānum ॥10॥*

ऋ. (Rv.) १.१८१.१-९

कदु प्रष्ठाविषां रयीणामध्वर्यन्ता यदुन्निनीथो अपाम् ।
अयं वां यो अकृत प्रशस्तिं वसुधिती अवितारा जनानाम् ॥१॥
आ वामश्वासः शुचयः पयस्पा वातरंहसो दिव्यासो अत्याः ।
मनोजुवो वृषणो वीतपृष्ठा एह स्वराजो अश्विना वहन्तु ॥२॥
आ वां रथोऽवनिर्न प्रवत्वान्त्सृप्रवन्धुरः सुविताय गम्याः ।
वृष्ण स्थातारा मनसो जवीयानहम्पूर्वो यजनो धिष्ण्या यः ॥३॥
इहेह जाता समवावशीतापरेपसा तन्वा३ नामभिः स्वैः ।
जिष्णुर्वामन्यः सुमखस्य सूरिर्दिवो अन्यः सुभगः पुत्र ऊहे ॥४॥
प्र वां निचेरुः ककुहो वशाँ अनु पिशंगरूपः सदनानि गम्याः ।
हरी अन्यस्य पीपयन्त वाजैर्मथ्रा रजांस्यश्विना वि घोषैः ॥५॥
प्र वां शरद्वान्वृषभो न निष्षाट् पूर्वीरिषश्चरति मध्व इष्णन् ।
एवैरन्यस्य पीपयन्त वाजैर्वेषन्तीरूर्ध्वा नद्यो न आगुः ॥६॥
असर्जि वां स्थविरा वेधसा गीर्बाळ्हे अश्विना त्रेधा क्षरन्ती ।
उपस्तुताववतं नाधमानं यामन्नयोंछृणुतं हवं मे ॥७॥

उत स्या वां रुशतो वप्ससो गीस्त्रिबर्हिषि सदसि पिन्वते नॄन् ।
वृषा वा मेघो वृषणा पीपाय गोर्न सेके मनुषो दशस्यन् ॥८॥
युवां प्रूषेवाश्विना पुरन्धिरग्निमुषां न जरते हविष्मान् ।
हुवे यद्वां वरिवस्या गृणानो विद्यमेषं वृजनं जीरदानुम् ॥९॥
*kadu praṣṭhāviṣāṁ rayīṇāmadhvaryantā yadunninītho apām /*
*ayaṁ vāṁ yāo akṛta praśasiṁta vasudhitī avitārā janānām //1 //*
*ā vāmaśvāsaḥ śuchayaḥ payaspā vātaraṁhaso divyāso atyāḥ /*
*manojuvo vṛṣaṇo vītapṛṣṭhā eha svarājo aśvinā vahantu //2 //*
*ā vāṁ ratho'vanirna pravatvāntsṛpravandhuraḥ suvitāya gamyāḥ /*
*vṛṣṇa sthātārā manaso javīyānahampūrvo yajano dhiṣṇyā yaḥ //3 //*
*iheha jātā samavāvaśītāparepasā tanvā3 nāmabhiḥ svaiḥ /*
*jiṣraṇurvāmanyaḥ sumakhasya sūrirdivo anyaḥ subhagaḥ putra ūhe //4 //*
*pra vāṁ nicheruḥ kakuho vaśaṁ̐ anu piśaṁgarūpaḥ sadanāni gamyāḥ /*
*harī anyasya pīpayanta vājairmathrā rajāṁsyaśvinā vi ghoṣaiḥ //5 //*
*pra vāṁ śaradvānvṛṣabho na niṣṣāṭ pūrvīriṣaścharati madhva iṣṇan /*
*evairanyasya pīpayanta vājairveṣantīrūrdhvā nadyo na āguḥ //6 //*
*asarji vāṁ sthavirā vedhasā gīrbāḷahe aśvinā trodhā kṣarantī /*
*upastutāvavataṁ nādhamānaṁ yāmannayoṁchhṛṇutaṁ havaṁ me //7 //*
*uta syā vāṁ ruśato vapsaso gīstriṁbarhiṣi sadasi pinvate nṝn /*
*vṛṣā vā megho vṛṣaṇā pīpāya gorna seke manuṣo daśasyan //8 //*
*yuvāṁ prūṣevāśvinā purandhiragnimuṣāṁ na jarate haviṣmān /*
*huve yadvāṁ varivasyā gṛṇāno vidyameṣaṁ vṛjanaṁ jīradānum //9 //*

ऋ. (Rv.) १.१८२.१-८

अभ्रदिदं वयुनमो षु भूषता रथो वृषण्वान्मदता मनीषिणः ।
धियंजिन्वा धिष्ण्या विष्मलावसू दिवो नपाता सुकृते शुचिव्रता ॥१॥
इन्द्रतमा हि धिष्ण्या मरुत्तमा दस्रा दंसिष्ठा रथ्या रथीतमा ।
पूर्ण रथं वहेथे मध्व आचितं तेन दाश्वांसमुप याथो अश्विना ॥२॥
किमत्र दस्रा कृणुथः किमासाथे जनो यः कश्चिदहविर्महीयते ।
अति क्रमिष्टं जुरतं पणेरसुं ज्योतिर्विप्राय कृणुतं वचस्यवे ॥३॥
जम्भयतमभितो रायतः शुनो हतं मृधो विदथुस्तान्यश्विना ।
वाचंवाचं जरितृ रत्निनीं कृतमुभा शंसं नासत्यावतं मम ॥४॥
युवमेतं चक्रथुः सिन्धुषु प्लवमात्मन्वन्तं पक्षिणं तौग्र्याय कम् ।
येन देवत्रा मनसा निरूहथुः सुपप्तनी पेतथुः क्षोदसो महः ॥५॥
अवविद्धं तौग्र्यमप्स्व१न्तरनारम्भणे तमसि प्रविद्धम् ।
चतस्रो नावो जठलस्य जुष्टा उदश्विभ्यामिषिताः पारयन्ति ॥६॥
कः स्विद्वृक्षो निष्ठितो मध्ये अर्णसो यं तौग्र्यो नाधितः पर्यषस्वजत् ।
पर्णा मृगस्य पतरोरिवारभ उदश्विना ऊहथुः श्रोमताय कम् ॥७॥
तद्वां नरा नासत्यावनु ष्याद्यद्वां मानास उचथमवोचन् ।
अस्मादद्य सदसः सोम्यादा विद्यामेषं वृजनं जीरदानुम् ॥८॥
*abhradidaṁ vayunamo ṣu bhūṣatā ratho vṛṣaṇvānmadatā manīṣiṇaḥ /*
*dhiyaṁjinvā dhiṣṇyā viṣmalāvasū divo napātā sukṛte śuchivratā //1 //*
*indratamā hi dhiṣṇyā maruttamā dasrā daṁsiṣṭhā rathyā rathītamā /*
*pūrṇa rathaṁ vahethe madhva āchitaṁ tena dāśvāṁsamupa yātho aśvinā //2 //*
*kimatra dasrā kṛṇuthaḥ kimāsāthe jano yaḥ kaśchidahavirmahīyate /*
*ati kramiṣṭaṁ juratam paṇerasuṁ jyotirviprāya kṛṇutaṁ vachasyave //3 //*
*jambhayatamabhito rāyataḥ śuno hataṁ mṛdho vidathustānyaśvinā /*
*vāchaṁvāchaṁ jaritū ratninīṁ kṛtamubhā śaṁsaṁ nāsatyāvataṁ mama //4 //*
*yuvametaṁ chakrathuḥ sindhuṣu plavamātmanvantaṁ pakṣiṇaṁ taugryāya kam /*

*yena devatrā manasā nirūhathuḥ supaptanī petathuḥ kṣodaso mahaḥ //5 //*
*avaviddhaṁ taugryamapsva1ntaranārambhaṇe tamasi praviddham /*
*chatasro nāvo jaṭhalasya juṣṭā udaśvibhyāmiṣitāḥ pārayanti //6 //*
*kaḥ svidvṛkṣo niṣṭhito madhye arṇaso yaṁ taugryo nādhitaḥ paryaṣasvajat /*
*parṇā mṛgasya patarorivārabha udaśvinā ūhathuḥ śromatāya kam //7 //*
*tadvāṁ narā nāsatyāvanabu ṣyādyadvāṁ mānāsa uchathamavochan /*
*asmādadya sadasaḥ somyādā vidyāmeṣaṁ vṛjanaṁ jīradānum //8 //*

ऋ. (Rv.) १.१८३.१-६

तं युंजाथां मनसो यो जवीयान् त्रिवन्धुरो बृषणा यस्त्रिंचक्रः ।
येनोपयाथः सुकृतो दुरोणं त्रिधातुना पतथो विर्न पर्णैः ॥१॥
सुवृद्रथो वर्तते यन्नूभि क्षां यत्तिष्ठथः क्रतुमन्तानु पृक्षे ।
वपुर्वपुष्या सचतामियं गीर्दिवो दुहित्रोषसा सचेथे ॥२॥
आ तिष्ठतं सुवृतं यो रथो वामनु व्रतानि वर्तते हविष्मान् ।
येन नरा नासत्येषयध्यै वर्तिर्याथस्तनयाय त्मने च ॥३॥
मा वा वृको मा वृकीरा दधर्षीन्मा परिं वर्क्तमुत मातिं धक्तम् ।
अयं वा भागो निहितं इयं गीर्दस्राविमे वां निधयो मधूनाम् ॥४॥
युवां गोतमः पुरुमीळहो अत्रिर्दस्रा हवतेऽवसे हविष्मान् ।
दिशं न दिष्टामृजूयेव यन्ता मे हवं नासत्योप यातम् ॥५॥
अतारिष्म तमसस्पारमस्य प्रति वा स्तोमो अश्विनावधायि ।
एह यातं पथिभिर्देवयानैर्विद्यामेषं वृजनं जीरदानुम् ॥६॥

*taṁ yuṁjāthāṁ manaso yo javīyān trivandhuro bṛṣaṇā yastriṁchakraḥ /*
*yenopayāthaḥ sukṛto duroṇaṁ tridhātunā patatho virna parṇaiḥ //1 //*
*suvṛdratho vartate yannūbhi kṣāṁ yattiṣṭhathaḥ kratumantānu pṛkṣe /*
*vapurvapuṣyā sachatāmiyaṁ gīrdivo duhitroṣasā sachethe //2 //*
*ā tiṣṭhataṁ suvṛtaṁ yo ratho vāmanu vratāni vartate haviṣmān /*
*yena narā nāsatyeṣayadhyai vartiryāthastanayāya tmane cha //3 //*
*mā vā vṛko mā vṛkīrā dadharṣīnmā pariṁ varktamuta mātiṁ dhaktam /*
*ayaṁ vā bhāgo nihitaṁ iyaṁ gīrdasrāvime vāṁ nidhayo madhūnām //4 //*
*yuvāṁ gotamaḥ purumīḷaho atrirdasrā havate'vase haviṣmān /*
*diśaṁ na diṣṭāmṛjūyeva yantā me havaṁ nāsatyopa yātam //5 //*
*atāriṣma tamasaspāramasya prati vā stomo aśvināvadhāyi /*
*eha yātaṁ pathibhirdevayānairvidyāmeṣaṁ vṛjanaṁ jīradānum //6 //*

ऋ. (Rv.) १.१८४.१-६

ता वामद्य तावपरं हुवेमोच्छन्त्यामुषसि वह्निरुक्थैः ।
नासत्या कुह चित्सन्तावर्यो दिवो नपाता सुदास्तराय ॥१॥
अस्मे ऊ षु वृषणा मादयेथामुत्पणर्भँर्हतमूर्म्या मदन्ता ।
श्रुतं मे अच्छोक्तिभिर्मतीनामेष्टा नरा निचेतारा च कर्णैः ॥२॥
श्रिये पूषन्निषुकृतेव देवा नासत्या वहतुं सूर्यायाः ।
वच्यन्ते वां ककुहा अप्सु जाता युगा जूर्णेव वरुणस्यभूरेः ॥३॥
अस्मे सा वां माध्वी रातिरस्तु स्तोमं हिनोतं मान्यस्य कारोः ।
अनु यद्वां श्रवस्या सुदानू सुवीर्याय चर्षणयो मदन्ति ॥४॥
एष वा स्तोमो अश्विनावकारि मानेमिर्मघवाना सुवृक्ति ।
यातं वर्तिस्तनयाय त्मने चागस्त्ये नासत्या मदन्ता ॥५॥
अतारिष्म तमसस्पारमस्य प्रति वा स्तोमो अश्विनावधायि ।
एह यातं पथिभिर्देवयानैर्विद्यामेषं वृजनं जीरदानुम् ॥६॥

*tā vāmadya tāvaparaṁ huvemochchhantyāmuṣasi vahnirukthaiḥ /*
*nāsatyā kuha chitsantāvaryo divo napātā sudāstarāya //1 //*

*asme ū ṣu vṛṣaṇā mādayethāmutpaṇabhaṁrhatamūrmyā madantā ।*
*śrutaṁ me achchhoktibhirmatīnāmeṣṭā narā nichetārā cha karṇaiḥ ॥2 ॥*
*śriye pūṣanniṣukṛteva devā nāsatyā vahatuṁ sūryāyāḥ ।*
*vachyante vāṁ kakuhā apsu jātā yugā jūrṇeva varuṇasyabhūreḥ ॥3 ॥*
*asme sā vāṁ mādhvī rātirastu stomaṁ hinotaṁ mānyasya kāroḥ ।*
*anu yadvāṁ śravasyā sudānū suvīryāya charṣaṇayo madanti ॥4 ॥*
*eṣa vā stomo aśvināvakāri mānemirmaghavānā suvṛkti ।*
*yātaṁ vartistanayāya tmane chāgastye nāsatyā madantā ॥5 ॥*
*atāriṣma tamasaspāramasya prati vā stomo aśvināvadhāyi ।*
*eha yātaṁ pathibhirdevayānairvidyāmeṣaṁ vṛjanaṁ jīradānum ॥6 ॥*

५. इन्द्रः (Indraḥ) - ऋ. (Rv.)१.१६५.१-१५; १.१६९.१-८; १.१७०.१-५; १.१७३.१-१३; १.१७४१-१०; १.१७५.१-६; १.१७७.१-५; १.१७८.१-५

ऋ. (Rv.) १.१६५.१-१५

कया शुभा सवयसः सनीळाः समान्या मरुतः सं मिमिक्षुः ।
कया मती कुत एतास एतेऽर्चन्ति शुष्मं वृषणो वसूया ॥१ ॥
कस्य ब्रह्माणि जजुषुर्युवानः को अध्वरे मरुत आ ववर्त ।
श्येनाँ इव ध्रजतो अन्तरिक्षे केन महा मनसा रीरमाम ॥२ ॥
कुतस्त्वमिन्द्र माहिनः सन्नेको यासि सत्पते किं त इत्था ।
सं पृच्छसे समराणः शुभानैर्वोचेस्तन्नो हरिवो यत्ते अस्मे ॥३ ॥
ब्रह्माणि मे मतयः शं सुतासः शुष्म इयर्ति प्रभृतो मे अद्रिः ।
आ शास्ते प्रति हर्यन्त्युक्थेमा हरी वहतस्ता नो अच्छ ॥४ ॥
अतो वयमन्तमेभिर्युजानाः स्वक्षत्रेभिस्तन्वः१ शुम्भमानाः ।
महोभिरेताँ उप युज्महे न्विन्द्र स्वधामनु हि नो बभूथ ॥५ ॥
क्व१ स्या वो मरुतः स्वधासीद्यन्मामेकं समधत्ताहिहत्ये ।
अहं ह्यु१ग्रस्तविषस्तुविष्मान्विश्वस्य शत्रोरनमं वधस्नैः ॥६ ॥
भूरिं चकर्थ युज्योभिरस्मे समानेभिर्वृषभ पौंस्येभिः ।
भूरीणि हि कृणवामा शविष्ठेन्द्र क्रत्वा मरुतो यद्वशाम ॥७ ॥
वधीं वृत्रं मरुत इन्द्रियेण स्वेन भामेन तविषो बभूवान् ।
अहमेता मनवे विश्वश्चन्द्राः सुगा अपश्चकर वज्रबाहुः ॥८ ॥
अनुत्तमा ते मघवन्नकिर्नु न त्वावाँ अस्ति देवता विदानः ।
न जायमान नशते न जातो यानि करिष्या कृणुहि प्रवृद्ध ॥९ ॥
एकस्य चिन्मे विभ्व१ स्त्वोजो या नु दधृष्वान्कृणवै मनीषा ।
अहं ह्यु३ग्रो मरुतो विदानो यानि च्यवमिन्द्र इदीश एषाम् ॥१० ॥
अमन्दन्मा मरुतः स्तोमो अत्र यन्मे नरः श्रुत्यं ब्रह्म चक्र ।
इन्द्राय वृष्णे सुमखाय मह्यं सख्ये सखायस्तन्वे तनूभिंः ॥११ ॥
एवेदेते प्रति मा रोचमाना अनेद्यः श्रव एषो दधानाः ।
संचक्ष्या मरुतश्चन्द्रवर्णा अच्छान्त मे छदयाथा च नूनम् ॥१२ ॥
को न्वत्रा मरुतो मामहे वः प्र यातन सखीँरच्छा सखायः ।
मन्मानि चित्रा अपिवातयन्त एषां भूत नवेदा म ऋतानाम् ॥१३ ॥
आ यद्दुवस्याद्दुवसे न कारुरस्मांचक्रे मान्यस्य मेधा ।
ओ षु वर्त्त मरुतो विप्रमच्छेमा ब्रह्माणि जरिता वो अर्चत् ॥१४ ॥
एष वः स्तोमो मरुत इयं गीर्मान्दार्यस्य मान्यस्कय कारोः ।
एषा यासीष्ट तन्वे वयां विद्यामेषं वृजनं जीरदानुम् ॥१५ ॥

*kayā śubhā savayasaḥ sanīḷāḥ samānyā marutaḥ saṁ mimikṣuḥ ।*
*kayā matī kuta etāsa ete'rchanti śuṣmaṁ vṛṣaṇo vasūyā ॥1 ॥*
*kasya brahmāṇi jajuṣuryuvānaḥ ko adhvare maruta ā vavarta ।*
*śyenāṁ iva dhrajato antarikṣe kena mahā manasā rīramāma ॥2 ॥*

*kutastvamindra māhinaḥ sanneko yāsi satpate kiṁ ta itthā* ।
*saṁ pṛchchhase samarāṇaḥ śubhānairvechestanno harivo yatte asme* ॥3 ॥
*brahmāṇi me matayaḥ śaṁ sutāsaḥ śuṣma iyarti prabhṛto me adriḥ* ।
*ā śāste prati haryantyukthemā harī vahatastā no achchha* ॥4 ॥
*ato vayamantamebhiryujānāḥ svakṣatrebhistanvaḥ1 śumbhamānāḥ* ।
*mahobhiretām̐ upa yujmahe nvindra svadhāmanu hi no babhūtha* ॥5 ॥
*kva1 syā vo marutaḥ svadhāsīdyanmāmekaṁ samadhattāhihatye* ।
*ahaṁ hyu1grastaviṣastuviṁṣmānviśvasya śatroranamaṁ vadhasnaiḥ* ॥6 ॥
*bhūriṁ chakartha yujyobhirasme samānebhirvṛṣabha pauṁsyebhiḥ* ।
*bhūrīṇi hi kṛṇavāmā śaviṣṭhendra kratvā maruto yadvaśāma* ॥7 ॥
*vadhīṁ vṛtraṁ maruta indriyeṇa svena bhāmena taviṣo babhūvān* ।
*ahametā manave viśvaśchandāṁḥ sugā apaśchakara vajrabāhuḥ* ॥8 ॥
*anuttamā te maghavannakirnu na tvāvām̐ asti devatā vidānaḥ* ।
*na jāyamāna naśate na jāto yāni kariṣyā kṛṇuhi pravṛddha* ॥9 ॥
*ekasya chinme vibhva1 stvojo yā nu dadhṛṣvānkṛṇavai manīṣā* ।
*ahaṁ hyu3gro maruto vidāno yāni chyavamindra idīśa eṣām* ॥10 ॥
*amandanmā marutaḥ stomo atra yanme naraḥ śrutyaṁ brahma chakra* ।
*indrāya vṛṣṇe sumakhāya mahyaṁ sakhye sakhāyastanve tanūbhiṁḥ* ॥11 ॥
*evedete prati mā rochamānā anedyaḥ śrava eṣo dadhānāḥ* ।
*saṁchakṣayā marutaśchandravarṇā achchhānta me chhadayāthā cha nūnam* ॥12 ॥
*ko nvatrā maruto māmahe vaḥ pra yātana sakhīram̐chchhā sakhāyaḥ* ।
*manmāni chitrā apivātayanta eṣāṁ bhūta navedā ma ṛtānām* ॥13 ॥
*ā yadduvasyādduvase na kārurasmāṁchakre mānyasya medhā* ।
*O ṣu vartta maruto vipramachchhemā brahmāṇi jaritā vo archat* ॥14 ॥
*eṣa vaḥ stomo maruta iyaṁ gīrmāndāryasya mānyaskaya kāroḥ* ।
*eṣā yāsīṣṭa tanve vayāṁ vidyāmeṣaṁ vṛjanaṁ jīradānum* ॥15 ॥

ऋ. (Rv.) १.१६९.१-८

महश्चित्त्वमिन्द्र यत एतान्महश्चिदसि त्यजसो वरूता ।
स नो वेधो मरुतां चिकित्वान्त्सुम्ना वनुष्व तव हि प्रेष्ठा ॥१ ॥
अयुज्रन्त इन्द्र विश्वकृष्टीर्विदानासो निष्षिधो मर्त्यत्रा ।
मरुतां पृत्सुतिर्हासमाना स्वर्मीळ्हस्य प्रधनस्य सातौ ॥२ ॥
अम्यक्सा त इन्द्र ऋष्टिरस्मे सनेम्यभ्वं मरुतो जुनन्ति ।
अग्निश्चिद्धि ष्मातसे शुशुक्वानापो न द्वीपं दधति । प्रयांसि ॥३ ॥
त्वं तू न इन्द्र तं रयिं दा ओजिष्ठया दक्षिणयेव रातिम् ।
स्तुतश्च यास्ते चकनन्त वायोः स्तनं न मध्वः पपियन्त वाजैः ॥४ ॥
त्वे राय इन्द्र तोशतमाः प्रणेतारः कस्य चिदृतायोः ।
ते षु णो मरुतो मृळयन्तु ये स्मा पुरा गातूयन्तीव देवाः ॥५ ॥
प्रति प्र याहीन्द्र मीळ्हुषो नृन्महः पार्थिवे सदने यतस्व ।
अध यदेषां मृथुबुध्नास एतास्तीर्थे नायः पौंस्यानि तस्थुः ॥६ ॥
प्रतिं घोराणामेतानामयासां मरुतां श्रृण्व आयतामुपब्दिः ।
ये मर्त्यं पृतनायन्तमूमैऋर्णावानं न पतयन्त सर्गैः ॥७ ॥
त्वं मानेभ्य इन्द्र विश्वजन्या रदा मरुद्भिः शुरुधो गोअग्राः ।
स्तवानेभि स्तवसे देव देवैर्विद्यामेषं वृजनं जीरदानुम् ॥८ ॥

*mahaśchittvamindra yata etānmahaśchidasi tyajaso varūtā* ।
*sa no vedho marutāṁ chikitvāntsumnā vanuṣva tava hi preṣṭhā* ॥1 ॥
*ayujranta indra viśvakṛṣṭīrvidānāso niṣpidho martyatrā* ।
*marutāṁ pṛtsutirhāsamānā svarmīḷahasya pradhanasya sātau* ॥2 ॥
*amyakṣā ta indra ṛṣṭirasme sanemyabhvaṁ maruto junanti* ।

*agniśchiddhi ṣmātase śuśukvānāpo na dvīpaṁ dadhati | prayāṁsi ||3 ||*
*tvaṁ tū na indra taṁ rayiṁ dā Ojiṣṭhayā dakṣiṇayeva rātim |*
*stutaścha yāste chakananta vāyoḥ stanaṁ na madhvaḥ papiyanta vājaiḥ ||4 ||*
*tve rāya indra tośatamāḥ praṇetāraḥ kasya chiddatāyoḥ |*
*te ṣu ṇo maruto mṛḷayantu ye smā purā gātūyantīva devāḥ ||5 ||*
*prati pra yāhīndra mīḷahuṣo nṛnmahaḥ pārthive sadane yatasva |*
*adha yadeṣāṁ mṛthubudhnāsa etāstīrthe nāyaḥ pauṁsyāni tasthuḥ ||6 ||*
*pratiṁ ghorāṇāmetānāmayāsāṁ marutāṁ śṛṇva āyatāmupabdiḥ |*
*ye martya pṛtanāyantamūmairṛṇāvānaṁ na patayanta sargaiḥ ||7 ||*
*tvaṁ mānebhya indra viśvajanyā radā marudbhiḥ śurudho goagrāḥ |*
*stavānebhi stavase deva devairvidyāmeṣaṁ vṛjanaṁ jīradānum ||8 ||*

ऋ. (Rv.) १.१७०.१-५

न नूनमस्ति नो श्वः कस्तद्वेद यदद्भुतम्।
अन्यस्य चित्तमभि संचरेण्यमुताधीतं वि नश्यति ॥१ ॥
किं न इन्द्र जिघांससि भ्रातरो मरुतस्तव ।
तेभिः कल्पस्व साधुया मा नः सपरणे वधीः ॥२ ॥
किं नो भ्रातरगस्त्य सखासवति मन्यसे ।
विद्या हि ते यथा मनोऽस्मभ्यमिन्नदित्ससि ॥३ ॥
अरं कृण्वन्तु वेदिं समग्निमिन्धतां पुरः ।
तत्रामृतस्य चेतनं यां ते तनवावहै ॥४ ॥
त्वमीशिषे वसुपते वसूनां त्वं मित्राणां मित्रापते धेष्ठः ।
इन्द्र त्वं मरुद्भिः सं वदस्वाध प्राशान ऋतुथा हवींषि ॥५ ॥

*na nūnamasti no śvaḥ kastadveda yadadbhutam |*
*anyasya chittamabhi saṁchareṇyamutādhītaṁ vi naśyati ||1 ||*
*kiṁ na indra jighāṁsasi bhrātaro marutastava |*
*tebhiḥ kalpasva sādhuyā mā naḥ saparaṇe vadhīḥ ||2 ||*
*kiṁ no bhrātaragastya sakhāsavati manyase |*
*vidyā hi te yathā mano'smabhyaminnaditsasi ||3 ||*
*araṁ kṛṇvantu vediṁ samagnimindhatāṁ puraḥ |*
*tatrāmṛtasya chetanaṁ yāṁ te tanavāvahai ||4 ||*
*tvamīśiṣe vasupate vasūnāṁ tvaṁ mitrāṇāṁ mitrāpate dheṣṭhaḥ |*
*indra tvaṁ marudbhiḥ saṁ vadasvādha prāśāna ṛtuthā havīṁṣi ||5 ||*

ऋ. (Rv.) १.१७३.१-१३

गायत्साम नभन्यं१ यथा वेरर्चाम तद्वावृधानं स्वर्वत् ।
गावो धेनवो बर्हिष्यदब्धा आ यत्सद्मानं दिव्यं विवासान् ॥१ ॥
अर्चद्वृषा वृषभिः स्वेदुहव्यैर्मृगो नाश्नो अति यज्जुगुर्यात् ।
प्र मन्दयुर्मनां गूर्त होता भरते मर्यो मिथुना यजत्राः ॥२ ॥
नक्षद्धोता परि सद्म मिता यन्भरद्गर्भमा शरदः पृथिव्याः ।
क्रन्ददश्वो नयमानो रुवद्गौरन्तर्दूतो न रोदसी चरद्वाक् ॥३ ॥
ता कर्माषतरास्मै प्र च्यौत्नानि देवयन्तो भरन्ते ।
जुजोषदिन्द्रो दस्मवर्चा नासत्येव सुग्म्यो रथेष्ठाः ॥४ ॥
तमु ष्टुहीन्द्रं यो ह सत्वा यः शूरो मघवा यो रथेष्ठाः ।
प्रतीचश्चिद्योधीयान्वृषण्वान् ववव्रुषश्चित्तमसो विहन्ता ॥५ ॥
प्र यदित्था महिना नृभ्यो अस्त्यरं रोदसी कक्ष्ये३ नास्मै ।
सं विव्य इन्द्रो वृजनं न भूमा भर्ति स्वधावाँ ओपशमिव द्याम् ॥६ ॥
समत्सु त्वा शूर सतामुराणं प्रपथिन्तमं परितंसयध्यै ।
सजोषस इन्द्रं मदे क्षोणीः सूरिं चिद्ये अनुमदन्ति वाजैः ॥७ ॥

एवा हि ते शं सवना समुद्र आपो यत्त आसु मदन्ति देवीः ।
विश्वा ते अनु जोष्या भूद गौः सूरींश्चिद्यदि धिषा वेषि जनान् ॥८॥
असाम यथा सुषखय एन स्वभिष्टयो नरां न शसैः ।
असद्यथा न इन्द्रो वन्दनेष्ठास्तुरो न कर्म नयमान उक्था ॥९॥
विष्पर्धसो नरां न शंसैरस्माकासदिन्द्रो वज्रहस्तः ।
मित्रायुवो न पूर्पतिं सुशिष्टौ मध्यायुव उप शिक्षन्ति यौः ॥१०॥
याो हि ष्मन्द्र कश्चिद्दन्धंजुहुराणाश्चिन्मनसा परियन् ।
तीर्थे नाच्छा तातृषाणमोको दीर्घो न सिध्रमा कृणोत्यध्वा ॥११॥
मो षू ण इन्द्रात्रा पृत्सु देवैरस्ति हिं ष्मा ते शुष्मिन्नवयाः ।
महश्चिद्यस्य मीळ्हुषो यव्या हविष्मतो मरुतो वन्दते गीः ॥१२॥
एष स्तोम इन्द्र तुभ्यमस्मे एतेन गातुं हरिवो विदो नः ।
आ नो ववृत्याः सुविताय देव विद्याामेषं वृजनं जीरदानुम् ॥१३॥
*gāyatsāma nabhanyaṁ1 yathā verarchāma tadvāvṛdhānaṁ rsvat ।*
*gāvo dhenavo barhiṣyadabdhā ā yatsadyānaṁ divyaṁ vivāsān ॥1॥*
*archadvṛṣā vṛṣabhiḥ sveduhavyairmṛgo nāśno ati yajjuguryāt ।*
*pra mandayurmanāṁ gūrta hotā bharate maryo mithunā yajatrāḥ ॥2॥*
*nakṣaddhotā pari sadya mitā yanbharadgarbhamā śaradaḥ pṛthivyāḥ ।*
*krandadaśvo nayamāno ruvadgaurantardūto na rodasī charadvāk ॥3॥*
*tā karmāṣatarāsmai pra chyautnāni devayanto bharante ।*
*jujoṣadindro dasmavarchā nāsatyeva sugmyo ratheṣṭhāḥ ॥4॥*
*tamu ṣṭuhīndraṁ yo ha satvā yaḥ śūro maghavā yo ratheṣṭhāḥ ।*
*pratīchāśchidyodhīyānvṛṣaṇvān vavavruṣaśchittamaso vihantā ॥5॥*
*pra yaditthā mahinā nṛbhyo astyaraṁ rodasī kakṣaye3 nāsmai ।*
*saṁ vivya indro vṛjanaṁ na bhūmā bharti svadhāvām̐ Opaśamiva dyām ॥6॥*
*samatsu tvā śūra satāmurāṇaṁ prapathintamaṁ paritaṁsayadhyai ।*
*sajoṣasa indra made kṣoṇīḥ sūriṁ chidye anumadanti vājaiḥ ॥7॥*
*evā hi te śaṁ savanā samudra āpo yatta āsu madanti devīḥ ।*
*viśvā te anu joṣyā bhūda gauḥ sūrīm̐śchidyadi dhiṣā veṣi janān ॥8॥*
*asāma yathā suṣakhaya ena svabhiṣṭayo narāṁ na śasaiḥ ।*
*asadyathā na indro vandaneṣṭhāsturo na karma nayamāna ukthā ॥9॥*
*viṣpardhaso narāṁ na śaṁsairasmākāsadindro vajrahastaḥ ।*
*mitrāyuvo na pūrpatiṁ suśiṣṭau madhyāyuva upa śikṣanti yauḥ ॥10॥*
*yāo hi ṣmandra kaśchidṛndhaṁjuhurāṇāśchinmanasā pariyan ।*
*tīrthe nāchchhā tātṛṣāṇamoko dīrgho na sidhramā kṛṇotyadhvā ॥11॥*
*mo ṣū ṇa indrātrā pṛtsu devairasti hiṁ ṣmā te śuṣminnavayāḥ ।*
*mahaśchidyasya mīḷhuṣo yavyā haviṣmato maruto vandate gīḥ ॥12॥*
*eṣa stoma indra tubhyamasme etena gātuṁ harivo vido naḥ ।*
*ā no vavṛtyāḥ suvitāya deva vidyāāmeṣaṁ vṛjanaṁ jīradānum ॥13॥*

ऋ. (Rv.) १.१७४.१-१०

त्वं राजेन्द्र ये च देवा रक्षा नृन्पाह्यसुर त्वमस्मान् ।
त्वं सत्पतिर्मघवा नस्तरुत्रास्त्वं सत्यो वसवानः सहोदाः ॥१॥
दनो विश इन्द्र मृध्रवाचः सुप्त यत्पुरः शर्म शारदीर्दत् ।
ऋणोरपो अनवद्यार्णा यूने वृत्रं पुरुकुत्साय रन्धीः ॥२॥
अजा वृत इन्द्र शूरपत्नीर्द्या च येभिः पुरुहूत नूनम् ।
रक्षो अग्निमशुषं तूर्वयाणं सिंहो न दमे अपांसि वस्तोः ॥३॥
शेषन्नु त इन्द्र सस्मिन्योनौ प्रशस्तये पवीरवस्य मह्ना ।
सृजदर्णास्यव यद्युधा गास्तिष्ठद्धरी धृषता मृष्ट वाजान् ॥४॥
वह कृत्समिन्द्र यस्मिंचाकन्त्स्यूमन्यू ऋज्रा वातस्याश्वा ।

प्र सूरश्चक्रं वृहतादभीकेऽभि स्पृधो यासिषद्वज्रबाहुः ॥५॥
जघन्वाँ इन्द्र मित्रोरूंचोदप्रवृद्धो हरिवो अदाशून् ।
प्र ये पश्यन्नर्यमणं सचायोस्त्वया शूर्ता वहमाना अपत्यम् ॥६॥
रपत्कविरिन्द्रार्कसातौ क्षां दासायोपबर्हणीं कः ।
करत्तिस्रो मघवा दानुचित्रा नि दूर्योणे कुयवाचं मृधि श्रेत् ॥७॥
सना ता त इन्द्र नव्या आगुः सहो नभोऽविरणाय पूर्वीः ।
भिनत्पुरो न भिदो अदेवीर्ननमो वधरदेवस्य पीयोः ॥८॥
त्वं धुनिरिन्द्र धुनिमतीर्ऋणोरपः सीरा न स्रवन्तीः ।
प्र यत्समुद्रमतिं शूर पर्षि पारया तुर्वशं यदुं स्वस्ति ॥९॥
त्वमस्माकमिन्द्र विश्वध स्या अवृकतमो नरां नृपाता ।
सा नो विश्वासां स्पृधां सहोदा विद्यामेषं वृजनं जीरदानुम् ॥१०॥

*tvaṁ rājendra ye cha devā rakṣā nṛnpāhyasura tvamasmān /*
*tvaṁ satpatirmaghavā nastarutrāstvaṁ satyo vasavānaḥ sahodāḥ //1 //*
*dano viśa indra mṛdhravāchaḥ supta yatpuraḥ śarma śāradīrdat /*
*ṛṇorapo anavadyārṇā yūne vṛtraṁ purukutsāya randhīḥ //2 //*
*ajā vṛta indra śūrapatnīrdyā cha yebhiḥ puruhūta nūnam /*
*rakṣo agnimaśuṣaṁ tūrvayāṇaṁ siṁho na dame apāṁsi vastoḥ //3 //*
*śeṣannu ta indra sasminyonau praśastaye pavīravasya mahnā /*
*sṛjadarṇāsyava yadyudhā gāstiṣṭhaddharī dhṛṣatā mṛṣṭa vājān //4 //*
*vaha kṛtsamindra yasmiṁchākantsyūmanyū ṛjrā vātasyāśvā /*
*pra sūraśchakraṁ vṛhatādabhīke'bhi spṛdho yāsiṣadvajrabāhuḥ //5 //*
*jaghanvām̐ indra mitrorūṁchodapravṛddho harivo adāśūn /*
*pra ye paśyannaryamaṇaṁ sachāyostvayā śūrtā vahamānā apatyam //6 //*
*rapatkavirindrārkasātau kṣāṁ dāsāyopabarhaṇīṁ kaḥ /*
*karattisro maghavā dānuchitrā ni dūryoṇe kuyavāchaṁ mṛdhi śret //7 //*
*sanā tā ta indra navyā āguḥ saho nabho'viraṇāya pūrvīḥ /*
*bhinatpuro na bhido adevīrnanamo vadharadevasya pīyoḥ //8 //*
*tvaṁ dhunirindra dhunimatīrṛṇorapaḥ sīrā na sravantīḥ /*
*pra yatsamudramatiṁ śūra parṣi pārayā turvaśaṁ yaduṁ svasti //9 //*
*tvamasmākamindra viśvadha syā avṛkatamo narāṁ nṛpātā /*
*sā no viśvāsāṁ smṛdhāṁ sahodā vidyāmeṣaṁ vṛjanaṁ jīradānum //10 //*

ऋ. (Rv.) १.१७५.१-६

मत्स्यपायि ते मह-पात्रस्येव हरिवो मत्सरो मदः। वृषा ते वृष्ण इन्दुर्वाजी सहस्रसातमः ॥१॥
आ नस्ते गन्तु मत्सरो वृषा मदो वरेण्यः। सहावाँ इन्द्र सानसिः पृतनाषाळमर्त्यः ॥२॥
त्वं हि शूरः सनिता चोदयो मनुषो रथम्। सहावान्दस्युमव्रतमोषः पात्रं न शोचिषा ॥३॥
मुषाय सूर्य कवे चक्रमीशान ओजसा। वह शुष्णाय वधं कुत्सं वातस्याश्वैः ॥४॥
शुष्मिन्तमो हि ते मदो द्युम्निन्तम उत क्रतुः। वृत्रघ्ना वारिवोविदा मंसीष्ठा अश्वसातमः ॥५॥
यथा पूर्वेभ्यो जरितृभ्य इन्द्र मयइवापो न तृष्यते बभूथ ।
तामनु त्वा निविदं जोहवीमि बिद्यामेषं वृजनं जीरदानुम् ॥६॥

*matsyapāyi te maha-pātrasyeva harivo matsaro madaḥ / vṛṣā te vṛṣṇa indurvājī sahasrasātamaḥ //1 //*
*ā naste gantu matsaro vṛṣā mado vareṇyaḥ / sahāvām̐ indra sānasiḥ pṛtanāṣāḷamartyaḥ //2 //*
*tvaṁ hi śūraḥ sanitā chodayo manuṣo ratham / sahāvāndasyumavratamoṣaḥ pātraṁ na śochiṣā //3 //*
*muṣāya sūrya kave chakramīśāna Ojasā / vaha śuṣṇāya vadhaṁ kutsaṁ vātasyāśvaiḥ //4 //*
*śuṣmintamo hi te mado dyumnintama uta kratuḥ / vṛtraghnā vārivovidā maṁsīṣṭhā*

*aśvasātamaḥ //5 //*
*yathā pūrvebhyo jaritṛbhya indra mayaivāpo na tṛṣyate babhūtha /*
*tāmanu tvā nividaṁ johavīmi bidyāmeṣaṁ vṛjanaṁ jīradānum //6 //*

ऋ. (Rv.) १.१७७.१-५

आ चर्षणिप्रा वृषभो जनानां राजा कृष्टीनां पुरुहूत इन्द्रः ।
स्तुतः श्रवस्यन्नवसोप मद्रिग्युक्त्वा हरी वृषणा याह्यर्वाङ् ॥१॥
ये ते वृषणो वृषभास इन्द्र ब्रह्मयुजो वृषरथासो अत्याः ।
ताँ आ तिष्ठ तेभिरा याह्यर्वाङ् हवामहे त्वा सुत इन्द्र सोमे ॥२॥
आ तिष्ठ रथं वृषणं वृषा ते सुतः सोमः परिषिक्ता मधूनि ।
युक्त्वा वृषभ्यां वृषभ क्षितीनां हरिभ्यां याहि प्रवतोप मद्रिक् ॥३॥
अयं याो देवया अयं मियेध इमा ब्रह्मण्यमिन्द्र सोमः ।
स्तीर्ण बर्हिरा तु शक्र प्र याहि पिबा निषद्य वि मुचा हरी इह ॥४॥
ओ सुष्टुत इन्द्र याह्यर्वाङ्ग ब्रह्माणि मान्यस्य कारोः ।
विद्याम वस्तोरवसा गृणन्तो विद्यामेषं वृजनं जीरदानुम् ॥५॥
*ā charṣaṇiprā vṛṣabho janānāṁ rājā kṛṣṭīnāṁ puruhūta indraḥ /*
*stutaḥ śravasyannavasopa madrigyuktvā harī vṛṣaṇā yāhyarvāṅ //1 //*
*ye te vṛṣaṇo vṛṣabhāsa indra brahyayujo vṛṣarathāso atyāḥ /*
*tāṁ̐ ā tiṣṭha tebhirā yāhyarvāṅ havāmahe tvā suta indra some //2 //*
*ā tiṣṭha rathaṁ vṛṣaṇaṁ vṛṣā te sutaḥ somaḥ pariṣiktā madhūni /*
*yuktvā vṛṣabhyāṁ vṛṣabha kṣitīnāṁ haribhyāṁ yāhi pravatopa madrik //3 //*
*ayaṁ yāo devayā ayaṁ miyedha imā brahmaṇyamindra somaḥ /*
*stīrṇa barhirā tu śakra pra yāhi pibā niṣadya vi muchā harī iha //4 //*
*O suṣṭuta indra yāhyarvāṅpa brahmāṇi mānyasya kāroḥ /*
*vidyāma vastoravasā gṛṇanto vidyāmeṣaṁ vṛjanaṁ jīradānum //5 //*

ऋ. (Rv.) १.१७८.१-५

यद्ध स्या त इन्द्र श्रुष्टिरस्ति यया बभूथ जरितृभ्य ऊती ।
मा नः कामं महयन्तमा धग्विश्वा ते अश्यां पर्याप आयोः ॥१॥
न घा राजेन्द्र आ दभन्नो या नु स्वासारा कृणवन्त योनौ ।
आपश्चिदस्मै सुतुका अवेषन्गमन्न इन्द्रः सख्या वयश्च ॥२॥
जेता नृभिरिन्द्रः पृत्सु शूरः श्रोता हवं नाधमानस्य कारोः ।
प्रभर्ता रथं दाशुष उपाक उद्यनता गिरो यदि च त्मना भूत् ॥३॥
एवा नृभिरिन्द्रः सुश्रवस्या प्रखादः पृक्षो अभि मित्राणो भूत् ।
समर्य इषः स्तवते विवाचि सत्राकरो यजमानस्य शंसः ॥४॥
त्वया वयं मघवन्निन्द्र शत्रूनभि ष्याम महतो मन्यमानान् ।
त्वं त्राता त्वमु नो वृधे भूर्विद्यामेषं वृजनं जीरदानुम् ॥५॥
*yaddha syā ta indra śruṣṭirasti yayā babhūtha jaritṛbhya ūtī /*
*mā naḥ kāmaṁ mahayantamā dhagviśvā te aśyāṁ paryāpa āyoḥ //1 //*
*na ghā rājendra ā dabhanno yā nu svāsārā kṛṇavanta yonau /*
*āpaśchidasmai sutukā aveṣangamanna indraḥ sakhyā vayaścha //2 //*
*jetā nṛbhirindraḥ pṛtsu śūraḥ śrotā havaṁ nādhamānasya kāroḥ /*
*prabhartā rathaṁ dāśuṣa upāka udyanatā giro yadi cha tmanā bhūt //3 //*
*evā nṛbhirindraḥ suśravasyā prakhādaḥ pṛkṣo abhi mitrāṇo bhūt /*
*samarya iṣaḥ stavate vivāchi satrākaro yajamānasya śaṁsaḥ //4 //*
*tvayā vayaṁ maghavannindra śatrūnabhi ṣyāma mahato manyamānān /*
*tvaṁ trātā tvamu no vṛdhe bhūrvidyāmeṣaṁ vṛjanaṁ jīradānum //5 //*

सा. (Sv.) १४३२-३४

मत्स्यपायि ते महः पात्रास्येव हरिवो मत्सरो मदः। वृषा ते वृष्ण इन्दुर्वाजी महस्रसातमः ॥१॥

आ नस्ते गन्तु मत्सरो वृषा मदो वरेण्यः। सहावाँ इन्द्र सानसिः पृतनाषाडमर्त्यः ॥२॥
त्वं हि शूरः सनिता चोदयो मनुषो रथम्। सहावान्दस्युमव्रतमोषः पात्रां न शोचिषा ॥३॥
*matsyapāyi te mahaḥ pātrāsyeva harivo matsaro madaḥ / vṛṣā te vṛṣṇa indurvājī mahasrasātamaḥ //1 //*
*ā naste gantu matsaro vṛṣā mado vareṇyaḥ / sahāvām̐ indra sānasiḥ pṛtanāṣāḍamatyaḥ //2 //*
*tvaṁ hi śūraḥ sanitā chodayo manuṣo ratham / sahāvāndasyumavratamoṣaḥ pātrāṁ na śochiṣā //3 //*

५. इन्द्रो मरुत् च (Indro Marut Cha) - ऋ. (Rv.) १.१६७.१-११

सहस्रं त इन्द्रोतयो नः सहस्रमिषो हरिवो गूर्ततमाः ।
सहस्रं रायो मादयध्यै सहस्रिण उप नो यन्तु वाजाः ॥१॥
आ नोऽवोभिर्मरुतो यान्त्वच्छा ज्येष्ठेभिर्वा बृहद्दिवैः सुमायाः ।
अध यदेषां नियुतः परमाः समुद्रस्य चिद्धनयन्त पारे ॥२॥
मिम्यक्ष येषु सुधिता घृताची हिरण्यनिर्णिगुपरा न ऋष्टिः ।
गुहा चरन्ती मनुषो न योषा सभावती विदथ्येव सं वाक् ॥३॥
परा शुभ्रा अयासो यव्या साधारण्येव मरुतो मिमिक्षुः ।
न रोदसी अप नुदन्त घोरा जुषन्त वृधं सख्याय देवाः ॥४॥
जोषद्यदीमसुर्या सचध्यै विषितस्तुका रोदसी नृमणाः ।
आ सूर्येव विधतो रथं गात्त्वेषप्रतीका नभसो नेत्या ॥५॥
आस्थापयन्त युवतिं युवानः शुभे निमिश्लां विदथेषु प्रजाम् ।
अर्को यद्वो मरुतो हविष्मान्गायद्गाथं सुतसोमो दुवस्यन् ॥६॥
प्र तं विवक्मि वक्म्यो य एषां मरुतां महिमा सत्यो असित ।
सचा यदीं वृषमणा अहंयुः स्थिरा चिज्जनीर्वहते सुभागाः ॥७॥
पान्ति मित्रावरुणाववद्याच्चयत ईमर्यमो अप्रशस्तान् ।
उत च्यवन्ते अच्युता ध्रुवाणि वावृध ई मरुतो दातिवारः ॥८॥
नही नु वो मरुतो अन्त्यस्मे आरात्ताच्चिच्छवसो अन्तमापुः ।
ते धृष्णुना शवसा शूशुवांसोऽर्णो न द्वेषो धृषता परि ष्ठुः ॥९॥
वयमद्येन्द्रस्य प्रेष्ठा वयं श्वो वोचेमहि समर्ये ।
वयं पुरा महिं च नो अनु द्यून् तन्न ऋभुक्षा नरामनुष्यात् ॥१०॥
एष वः स्तोमो मरुत इयं गीर्मान्दार्यस्य मान्यस्य कारोः ।
एषा यासीष्ट तन्वे वयां विद्यामेषं वृजनं जीरदानुम् ॥११॥
*sahasraṁ ta indrotayo naḥ sahasramiṣo harivo gūrtatamāḥ /*
*sahasraṁ rāyo mādayadhyai sahasriṇa upa no yantu vājāḥ //1 //*
*ā no'vobhirmaruto yāntvachchhā jyeṣṭhebhirvā bṛhaddivaiḥ sumāyāḥ /*
*adha yadeṣāṁ niyutaḥ paramāḥ samudrasya chiddhanayanta pāre //2 //*
*mimyakṣa yeṣu sudhiṁtā ghṛtāchī hiraṇyanirṇigaparā na ṛṣṭiḥ /*
*guhā charantī manuṣo na yoṣā sabhāvatī vidathyeva saṁ vāk //3 //*
*parā śubhrā ayāso yavyā sādhāraṇyeva maruto mimikṣuḥ /*
*na rodasī apa nudanta ghorā juṣanta vṛdhaṁ sakhyāya devāḥ //4 //*
*joṣadyadīmasuryā sachadhyai viṣitastukā rodasī nṛmaṇāḥ /*
*ā sūryeva vidhato rathaṁ gāttveṣapratīkā nabhaso netyā //5 //*
*āsthāpayanta yuvatiṁ yuvānaḥ śubhe nimiślāṁ vidatheṣu prajām /*
*arko yadvo maruto haviṣmāngāyadgāthaṁ sutasomo duvasyan //6 //*
*pra taṁ vivakmi vakmyo ya eṣāṁ marutāṁ mahimā satyo asita /*
*sachā yadīṁ vṛṣamaṇā ahaṁyuḥ sthirā chijjanīrvahate subhāgāḥ //7 //*
*pānti mitrāvaruṇāvavadyāchchayata īmaryamo apraśastān /*
*uta chyavante achyutā dhruvāṇi vāvṛdha ī maruto dātivāraḥ //8 //*

*nahī nu vo maruto antyasme ārāttāchchichchhavso antamāpuḥ |*
*te dhṛṣṇunā śavasā śūśuvāṁso'rṇo na dveṣo dhṛṣatā pari ṣṭhuḥ ||9 ||*
*vayamadyendrasya preṣṭhā vayaṁ śvo vochemahi samarye |*
*vayaṁ purā mahiṁ cha no anu dyūn tannaṁ ṛbhukṣā narāmanuṣyāt ||10 ||*
*eṣa vaḥ stomo maruta iyaṁ gīrmāndāryasya mānyasya kāroḥ |*
*eṣā yāsīṣṭa tanve vayāṁ vidyāmeṣaṁ vṛjanaṁ jīradānum ||11 ||*

६. ओषधयः (Oṣadhayaḥ) - ऋ. (Rv.) १.१८७.१-११

पितुं नु स्तोषं महो धर्माणं तविंषीम्। यस्य त्रितो व्योजसा वृत्रं विपर्वमर्दयत् ॥१ ॥
स्वादो पितो मधो पितो वयं त्वा ववृमहे। अस्माकमविता भव ॥२ ॥
उप नः पितवा चर शिवः शिवाभिरूतिभिः। मयोभुरद्विषेण्यः सखा सुशेवो अद्वयाः ॥३ ॥
तव त्ये पितो रसा रजांस्यनु विष्ठिताः। दिवि वाता इव श्रिताः ॥४ ॥
तव त्ये पितो ददतस्तव स्वादिष्ठ ते पितो। प्र स्वा३नो रसानां तुविग्रीवा इवेरते ॥५ ॥
त्वे पितो महानां देवानां मनो हितम्। अकारि चारु केतुना तवाहिमवसावधीत् ॥६ ॥
यददो पितो अजगन्विवस्व पर्वतानाम्। अत्रो चिन्नो मधो पितोऽरं भक्षाय गम्याः ॥७ ॥
यदपामोषधीनां परिंशमारिशामहे। वातापे पीव इद्भव ॥८ ॥
यत्ते सोम गवाशिरो यवांशिरो भजामहे। वातापे पीव इद्भवः ॥९ ॥
करम्भ ओषधो भव पीवो वृक्क उदारथिः। वातापे पीव इद्भव ॥१० ॥
तं त्वा वयं पितो वचो भिर्गावो न हव्या सुषूदिम। देवेभ्यस्त्वा सधमादमस्मभ्यं त्वा सधमादम् ॥१ ॥

*pituṁ nu stoṣaṁ maho dharmāṇaṁ taviṁṣīm | yasya trito vyojasā vṛtraṁ viparvamardayat ||1 ||*
*svādo pito madho pito vayaṁ tvā vavṛmahe | asmākamavitā bhava ||2 ||*
*upa naḥ pitavā chara śivaḥ śivābhirūtibhiḥ | mayobhuradviṣeṇyaḥ sakhā suśevo advayāḥ ||3 ||*
*tava tye pito rasā rajāṁsyanu viṣṭhitāḥ | divi vātā iva śritāḥ ||4 ||*
*tava tye pito dadatastava svādiṣṭha te pito | pra svā3no rasānāṁ tuvigrīvā iverate ||5 ||*
*tve pito mahānāṁ devānāṁ mano hitam | akāri chāru ketunā tavāhimavasāvadhīt ||6 ||*
*yadado pito ajaganvivasva parvatānām | atro chinno madho pito'raṁ bhakṣāya gamyāḥ ||7 ||*
*yadapāmoṣadhīnāṁ pariṁśamāriśāmahe | vātāpe pīva idbhava ||8 ||*
*yatte soma gavāśiro yavāṁśiro bhajāmahe | vātāpe pīva idbhavaḥ ||9 ||*
*karambha Oṣadho bhava pīvo vṛkka udārathiḥ | vātāpe pīva idbhava ||10 ||*
*taṁ tvā vayaṁ pito vacho bhirgāvo na havyā suṣūdima | devebhyastvā sadhamādamasmamyaṁ tvā sadhamādam ||1 ||*

७. द्यावापृथिव्यौ (Dyāvāpṛthivyau) - ऋ. (Rv.) १.१८५.१-११

कतरा पूर्वा कतरापरायोः कथा जाते कवयः को वि वेद ।
विश्वं त्मना बिभृतो यद्ध नाम वि वर्तेते अहनी चक्रियेव ॥१ ॥
भूरिं द्वे अचरन्ती चरन्तं पद्वन्तं गभमपदी दधाते ।
नित्यं न सूनुं पित्रोरुपस्थे द्यावा रक्षतं पृथिवी नो अभ्वात् ॥२ ॥
अनेहो दात्रामदितेरनर्वं हुवे स्वर्वदवधं नमस्वत् ।
तद्रोदसी जनयतं जरित्रो द्यावा रक्षतं पृथिवी नो अभ्वात् ॥३ ॥
अतप्यमाने अवसावन्ती अनु ष्याम रोदसी देवपुत्रे ।
उभे देवानामुभयेभिरह्नां द्यावा रक्षतं पृथिवी नो अभ्वात् ॥४ ॥
संगच्छमाने युवती समन्ते स्वसारा जामी पित्रोरुपस्थे ।
अभिजिघ्रन्ती भुवनस्य नाभिं द्यावा रक्षतं पृथिवी नो अभ्वात् ॥५ ॥
उर्वी सद्मनी बृहती ऋतेन हुवे देवानामवसा जनित्री ।
दधाते ये अमृतं सुप्रतीके द्यावा रक्षतं पृथिवी नो अभ्वात् ॥६ ॥

उर्वी पृथ्वी बहुले दूरे अन्ते उप ब्रुवे नमसा यो अस्मिन् ।
दधाते ये सुभगे सुप्रतूर्ती द्यावा रक्षतं पृथिवी नो अभ्वात् ॥७ ॥
देवान्वा यच्चकृमा कच्चिदागः सखायं वा सदभिज्जास्पतिं वा ।
इयं धीर्भूया अवयानमेषां द्यावा रक्षतं पृथिवी नो अभ्वात् ॥८ ॥
उभां शंसा नर्या मामविष्टामुभे मामूती अवसा सचेताम् ।
भूरिं चिदर्यः सुदास्तरायेषा मदन्त इष्येम देवाः ॥९ ॥
ऋतं दिवे तदवोचं पृथिव्या अभिश्रावायं प्रथमं सुमेधाः ।
पातामवद्यादुरितादभीके पिता माता च रक्षतामवोभिः ॥१० ॥
इदं द्यावापृथिवी सत्यमस्तु पितर्मातर्यदिहोपब्रुवे वाम् ।
भूतं देवानामवमे अवोभिर्विद्यामेषं वृजनं जीरदानुम् ॥११ ॥

*katarā pūrvā katarāparāyoḥ kathā jāte kavayaḥ ko vi veda ।*
*viśvaṁ tmanā bibhṛto yaddha nāma vi vartete ahanī chakriyeva ॥1 ॥*
*bhūriṁ dve acharantī charantaṁ padvantaṁ gabhamapadī dadhāte ।*
*nityaṁ na sūnuṁ pitrorupasthe dyāvā rakṣataṁ pṛthivī no abhvāt ॥2 ॥*
*aneho dātrāmaditeranarva huve svarvadavadhaṁ namasvat ।*
*tadrodasī janayataṁ jaritro dyāvā rakṣataṁ pṛthivī no abhvāt ॥3 ॥*
*atapyamāne avasāvantī anu ṣyāma rodasī devaputre ।*
*ubhe devānāmubhayebhirahnāṁ dyāvā rakṣataṁ pṛthivī no abhvāt ॥4 ॥*
*saṁgachchhamāne yuvatī samante svasārā jāmī pitrorupasthe ।*
*abhijighrantī bhuvanasya nābhiṁ dyāvā rakṣataṁ pṛthivī no abhvāt ॥5 ॥*
*urvī sadyanī bṛhatī ṛtena huve devānāmavasā janitrī ।*
*dadhāte ye amṛtaṁ supratīke dyāvā rakṣataṁ pṛthivī no abhvāt ॥6 ॥*
*urvī pṛthvī bahule dūre ante upa bruve namasā yo asmin ।*
*dadhāte ye subhage supratūrtī dyāvā rakṣataṁ pṛthivī no abhvāt ॥7 ॥*
*devānvā yachchakṛmā kachchidāgaḥ sakhāyaṁ vā sadabhijjāspatiṁ vā ।*
*iyaṁ dhīrbhūyā avayānameṣāṁ dyāvā rakṣataṁ pṛthivī no abhvāt ॥8 ॥*
*ubhāṁ śaṁsā naryā māmaviṣṭāmubhe māmūtī avasā sachetām ।*
*bhūriṁ chidaryaḥ sudāstarāyeṣā madanta iṣyema devāḥ ॥9 ॥*
*ṛtaṁ dive tadavochaṁ pṛthivyā abhiśrāvāyaṁ prathamaṁ sumedhāḥ ।*
*pātāmavadyādduritādabhīke pitā mātā cha rakṣatāmavobhiḥ ॥10 ॥*
*idaṁ dyāvāpṛthivī satyamastu pitarmātaryadihopabruve vām ।*
*bhūtaṁ devānāmavame avobhirvidyāmeṣaṁ vṛjanaṁ jīradānum ॥11 ॥*

८. बृहस्पतिः (Bṛhaspatiḥ) - ऋ. (Rv.)१.१९०.१-८

अनर्वाणं वृषभं मन्द्रजिह्वं बृहस्पतिं वर्धया नव्यमर्कैः ।
गाथान्यः सुरुचो यस्य देवा आशृण्वन्ति नवमानस्य मर्ताः ॥१ ॥
तमृत्विया उप वाचः सचन्ते सर्गो न यो देवयतामसर्जि ।
बृहस्पतिः स हंजो वरांसि विभ्वाभवत्समृते मातरिश्वा ॥२ ॥
उपस्तुतिं नमस उद्यतिं च श्लोकं यंसत्सवितेव प्र बाहू ।
अस्य क्रत्वाहन्यो३ यो अस्ति मृगो न भीमो अरक्षसस्तुविष्मान् ॥३ ॥
अस्य श्लोको दिवीयते पृथिव्यमात्यो न यंसद्यक्षभृद्विचेताः ।
मृगाणां न हेतयो यन्ति चेमा बृहस्पतेरहिमायाँ अभि द्यून् ॥४ ॥
ये त्वा देवोस्रिकं मन्यमानाः पापा भद्रमुपजीवन्ति प्रजाः ।
न दूढ्ये३ अनु ददासि वामं बृहस्पते चयम इतिपयारुम् ॥५ ॥
सुप्रैतुः सूयवसो न पन्था दुर्नियन्तुः परिप्रीतो न मित्राः ।
अनर्वाणो अभि ये चक्षते नोऽपीवृता अपोर्णुवन्तो अस्थुः ॥६ ॥
सं यं स्तुभोऽवनयो न यन्ति समुद्रं न स्रवतो रोधचक्राः ।
स विद्वाँ उभयं चष्टे अन्तर्बृहस्पतिस्तर आपश्च गृध्रः ॥७ ॥

एवा महस्तुविजातस्तुविष्मान्बृहस्पतिवृषभो धायि देवः ।
स नः स्तुतो वीरवधातु गोमद्विद्यामेषं वृजनं जीरदानुम् ॥८॥
*anarvāṇaṁ vṛṣabhaṁ mandrajihnaṁ bṛhaspatiṁ vardhayā navyamarkaiḥ ।*
*gāthānyaḥ surucho yasya devā āśṛṇvanti navamānasya martāḥ ॥1॥*
*tamṛtviyā upa vāchaḥ sachante sargo na yo devayatāmasarji ।*
*bṛhaspatiḥ sa haṁjo varāṁsi vibhvābhavatsamṛte mātariśvā ॥2॥*
*upastutiṁ namasa udyatiṁ cha ślokaṁ yaṁsatsaviteva pra bāhū ।*
*asya kratvāhanyo3 yo asti mṛgo na bhīmo arakṣasastuviṣmān ॥3॥*
*asya śloko divīyate pṛthivyamātyo na yaṁsadyakṣabhṛdvichetāḥ ।*
*mṛgāṇāṁ na hetayo yanti chemā bṛhaspaterahimāyāṁ̐ abhi dyūn ॥4॥*
*ye tvā devosrikaṁ manyamānāḥ pāpā bhadramupajīvanti prajāḥ ।*
*na dūḍhye3 anu dadāsi vāmaṁ bṛhaspate chayama itipayārum ॥5॥*
*supraituḥ sūyavaso na panthā durniyantuḥ pariprīto na mitrāḥ ।*
*anarvāṇo abhi ye chakṣate no'pīvṛtā aporṇuvanto asthuḥ ॥6॥*
*saṁ yaṁ stubho'vanayo na yanti samudraṁ na sravato rodhachakrāḥ ।*
*sa vidvāṁ̐ ubhayaṁ chaṣṭe antarbṛhaspatistara āpaścha gṛdhraḥ ॥7॥*
*evā mahastuvijātastuviṣmānbṛhaspativṛṣabho dhāyi devaḥ ।*
*sa naḥ stuto vīravadhātu gomadvidyāmeṣaṁ vṛjanaṁ jīradānum ॥8॥*

९. मरुतः (Marutaḥ) - ऋ. (Rv.) १.१६६.१-१५; १.१६८.१-१०; १.१७१.१-६; १.१७२.१-३

ऋ. (Rv.) १.१६६.१-१५

तन्नु वोचाम रभसाय जन्मने पूर्वं महित्वं वृषभस्य केतवे ।
ऐधेव यामन्मरुतस्तुविष्वणो युधेव शक्रास्तविषाणि कर्तन ॥१॥
नित्यं न सूनुं मधु बिभ्रत उप क्रीळन्ति क्रीळा विदथेषु घृष्वयः ।
नक्षन्ति रुद्रा अवसा नमस्विनं न मर्धन्ति स्वतवसो हविष्कृतम् ॥२॥
यस्मा ऊमासो अमृता अरासत रायस्पोषं च हविषा ददाशुषे ।
उक्षन्त्यस्मै मरुतो हिता इव पुरू रजांसि पयसा मयोभुवः ॥३॥
आ ये रजांसि तविषीभिरव्यत प्र व एवासः स्वयतासो अध्रजन् ।
भयन्ते विश्वा भुवनानि हर्म्या चित्रो वो यामः प्रयतास्वृष्टिषु ॥४॥
यत्त्वेषयामा नदयन्त पर्वतान्दिवो वा पृष्ठं नर्या अचुच्यवुः ।
विश्वो वो अज्मन्भयते वनस्पति रथीयन्तीव प्र जिहीत ओषधिः ॥५॥
यूयं न उग्रा मरुतः सुचेतुनारिष्टग्रामाः सुमतिं पिपर्तन ।
यत्रा वो दिद्युद्रदति क्रिविर्दती रिणाति पश्वः सु धितेव बर्हणा ॥६॥
प्र स्कम्भदेष्णा अनवभ्रराधसोऽलातृणासो विदथेषु सुष्टुताः ।
अर्चन्त्यर्कं मदिरस्य पीतये विदुर्वीरस्य प्रथमानि पौंसया ॥७॥
शतभुजिभिस्तमभिह्रुतेरघात्पूर्भी रक्षता मरुतो यमावत ।
जनं यमुग्रास्तवसो विरप्शिनः पाथना शंसात्तनयस्य पुष्टिषु ॥८॥
विश्वानि भद्रा मरुतो रथेषु वो मिथस्पृध्येव तविषण्याहिता ।
अंसेष्वा वः प्रपथेषु खादयोऽक्षो वश्चक्रा समया वि वावृते ॥९॥
भूरीणि भद्रा नर्येषु बाहुषु वक्षःसु रुक्मा रभसासो अंजयः ।
अंसेष्वेताः पविषु क्षुरा अधि वयो न पक्षान्व्यनु श्रियो धिरे ॥१०॥
महान्तो मह्ना विभ्वो३ विभूतयो दूरेदृशो ये दिव्या इव स्तृभिः ।
मन्द्राः सुजिह्वाः स्वरितार आसभिः संमिश्ला इन्द्रे मरुतः रिष्टुभः ॥११॥
तद्वः सुजाता मरुतो मजित्वनं दीर्घं वो दात्रमदितेरिव व्रतम् ।
इन्द्रश्चन त्यजसा वि ह्रुणाति तज्जनाय यस्मै सुकृते अराध्वम् ॥१२॥
तद्वो जामित्वं मरुतः परे युगे पुरू यच्छंसममृतास आवत ।
अया धिया मनवे श्रुष्टिमाव्या साकं नरो दंसनैरा चिकित्रिरे ॥१३॥
येन दीर्घं मरुतः शूशवाम युष्माकेन परीणसा तुरासः ।

आ यत्ततनन्वृजने जनास एभिर्योभिस्तदभीष्टिमश्याम् ॥१४॥
एष वः स्तोमो मरुत इयं गीर्मान्दार्यस्य मान्यस्य कारोः ।
एषा यासीष्ट तन्वे वयां विद्यामेषं वृजनं जीरदानुम् ॥१५॥

*tannu vochāma rabhasāya janmane pūrva mahitvaṁ vṛṣabhasya ketave /*
*aidheya yāmanmarutastuviṣvaṇo yudheva śakrāstaviṣāṇi kartana //1 //*
*nityaṁ na sūnuṁ madhu bibhrata upa krīḻanti krīḻā vidatheṣu ghṛṣvayaḥ /*
*nakṣanti rudrā avasā namasvinaṁ na mardhanti svatavaso haviṣkṛtam //2 //*
*yasmā ūmāso amṛtā arāsata rāyaspoṣaṁ cha haviṣā dadāśuṣe /*
*ukṣantyasmai maruto hitā iva purū rajāṁsi payasā mayobhuvaḥ //3 //*
*ā ye rajāṁsi taviṣībhiravyata pra va evāsaḥ svayatāso adhrajan /*
*bhayante viśvā bhuvanāni harmyā chitro vo yāmaḥ prayatāsvṛṣṭiṣu //4 //*
*yattveṣayāmā nadayanta parvatāndivo vā pṛṣṭhaṁ naryā achuchyavuḥ /*
*viśvo vo ajmanbhayate vanaspati rathīyantīva pra jihīta Oṣadhiḥ //5 //*
*yūyaṁ na ugrā marutaḥ suchetunāriṣṭagrāmāḥ sumatiṁ pipartana /*
*yatrā vo didyudradati krivirdatī riṇāti paśvaḥ su dhiteva barhaṇā //6 //*
*pra skambhadeṣṇā anavabhrarādhaso'lātṛṇāso vidatheṣu suṣṭutāḥ /*
*archantyarka madidarasya pītaye vidurvīrasya prathamāni pauṁsayā //7 //*
*śatabhujibhistamabhihnuteraghātpūrbhī rakṣatā maruto yamāvata /*
*janaṁ yamugrāstavaso virapśinaḥ pāthanā śaṁsāttanayasya puṣṭiṣu //8 //*
*viśvāni bhadrā maruto ratheṣu vo mithaspṛdhyeva taviṣaṇyāhitā /*
*aṁseṣvā vaḥ prapatheṣu khādayo'kṣo vaśchakrā samayā vi vāvṛte //9 //*
*bhūrīṇi bhadrā naryeṣu bāhuṣu vakṣaḥsu rukmā rabhasāso aṁjayaḥ /*
*aṁseṣvetāḥ paviṣu kṣurā adhi vayo na pakṣānvyanu śriyo dhire //10 //*
*mahānto mahnā vibhvo3 vibhūtayo dūreddaśo ye divyā iva stṛbhiḥ /*
*mandrāḥ sujihnāḥ svaritāra āsabhiḥ saṁmiślā indre marutaḥ riṣṭubhaḥ //11 //*
*tadvaḥ sujātā maruto majitvanaṁ dīrgha vo dātramaditeriva vratam /*
*indraśchana tyajasā vi hruṇāti tajjanāya yasmai sukṛte arādhvam //12 //*
*tadvo jāmitvaṁ marutaḥ pare yuge purū yachchhaṁsamamṛtāsa āvata /*
*ayā dhiyā manave śruṣṭimāvyā sākaṁ naro daṁsanairā chikitrire //13 //*
*yena dīrgha marutaḥ śūśavāma yuṣmākena parīṇasā turāsaḥ /*
*ā yattatananvṛjane janāsa ebhiryobhistadabhīṣṭimaśyām //14 //*
*eṣa vaḥ stomo maruta iyaṁ gīrmāndāryasya mānyasya kāroḥ /*
*eṣā yāsīṣṭa tanve vayāṁ vidyāmeṣaṁ vṛjanaṁ jīradānum //15 //*

ऋ. (Rv.) १.१६८.१-१०

याया वः समना तुतुर्वणिर्धियन्धियं वो देवया उ दधिध्वे ।
आ वोऽर्वाचः सुविताय रोदस्योर्महे ववृत्यामवसे सुवृक्तिभिभिः ॥१॥
वव्रासो न ये स्वजाः स्वतवस इषं स्वरभिजायन्त धूतयः ।
सहस्रियासो अपां नोर्मय आसा गावो वन्द्यासो नोक्षणः ॥२॥
सोमासो न ये सुतास्तृप्तांशवो हृत्सु पीतासो दुवसो नासते ।
ऐषांमंसेषु रम्भिणीव रारभे हस्तेषु खादिश्च कृतिश्च सं दधे ॥३॥
अव स्वयुक्ता दिव आ वृथा ययुरमर्त्याः कशया चोदत त्मना ।
अरेणवस्तुविजाता अचुच्यवुर्दृळ्हानि चिन्मरुतो भ्राजदृष्टयः ॥४॥
को वोऽन्तर्मरुत ऋष्टिविद्युतो रेजति त्मना हन्वेव जिह्वया ।
धन्वच्युत इषां न यामनि पुरुप्रैषा अहन्यो३ नैतशः ॥५॥
क्व स्विदस्य रजसो महस्परं क्वावरं मरुतो यस्मिन्नायय ।
यच्च्यावयथ विथुरेव संहितं व्यद्रिणा पतथ त्वेषमर्णवम् ॥६॥
सातिर्न वोऽमवती स्वर्वती त्वेषा विपाका मरुतः पिपिष्वती ।
भद्रा वो रातिः पृणतो न दक्षिणा पृथुज्रयी असुर्येव जंजती ॥७॥

प्रति ष्टोभन्ति सिन्धवः पविभ्यो यदभ्रियां वाचमुदीरयन्ति ।
अव स्मयन्त विद्युतः पृथिव्यां यदी घृतं मरुतः प्रष्णुवन्ति ॥८॥
असूत पृश्निर्महते रणाय त्वेषमयासां मरुतामनीकम् ।
ते सप्सरासोऽजनयन्ताभ्वमादित्स्वधामिषिरां पर्यपश्यन् ॥९॥
एष वः स्तोमो मरुत इयं गीर्मान्दार्यस्य मान्यस्य कारोः ।
एषा यासीष्ट तन्वे वयां विद्यामेषं वृजनं जीरदानुम् ॥१०॥

*yāāyāā vaḥ samanā tuturvaṇirdhiyandhiyaṁ vo devayā u dadhidhve ।*
*ā vo'rvāchaḥ suvitāya rodasyormahe vavṛtyāmavase suvṛktibhibhiḥ ॥1॥*
*vavrāso na ye svajāḥ svatavasa iṣaṁ svarabhijāyanta dhūtayaḥ ।*
*sahasriyāso apāṁ normaya āsā gāvo vandyāso nokṣaṇaḥ ॥2॥*
*somāso na ye sutāstṛptāṁśavo hṛtsu pītāso duvaso nāsate ।*
*aiṣāṁmaṁseṣu rambhiṇīva rārabhe hasteṣu khādiścha kṛtiścha saṁ dadhe ॥3॥*
*ava svayuktā diva ā vṛthā yayuramartyāḥ kaśayā chodata tmanā ।*
*areṇavastuvijātā achuchyavurddvhāni chinmaruto bhrājadṛṣṭayaḥ ॥4॥*
*ko vo'ntarmaruta ṛṣṭividyuto rejati tmanā hanveva jihnayā ।*
*dhanvachyuta iṣāṁ na yāmani purupraiṣā ahanyo3 naitaśaḥ ॥5॥*
*kva svidasya rajaso mahasparaṁ kvāvaraṁ maruto yasminnāyaya ।*
*yachchyāvayatha vithureva saṁhitaṁ vyadriṇā patatha tveṣamarṇavam ॥6॥*
*sātirna vo'mavatī svarvatī tveṣā vipākā marutaḥ pipiṣvatī ।*
*bhadrā vo rātiḥ pṛṇato na dakṣiṇā pṛthujrayī asuryeva jaṁjatī ॥7॥*
*prati ṣṭobhanti sindhavaḥ pavibhyo yadabhriyāṁ vāchamudīrayanti ।*
*ava smayanta vidyutaḥ pṛthivyāṁ yadī ghṛtaṁ marutaḥ praṣṇuvanti ॥8॥*
*asūta pṛśnirmahate raṇāya tveṣamayāsāṁ marutāmanīkam ।*
*te sapsarāso'janayantābhvamāditsvadhāmiṣirāṁ paryapaśyan ॥9॥*
*eṣa vaḥ stomo maruta iyaṁ gīrmāndāryasya mānyasya kāroḥ ।*
*eṣā yāsīṣṭa tanve vayāṁ vidyāmeṣaṁ vṛjanaṁ jīradānum ॥10॥*

ऋ. (Rv.) १.१७१.१-६

प्रति व एना नमसाहमेमि सूक्तेन भिक्षे सुमतिं तुराणाम् ।
रराणताा मरुतो वेद्याभिर्नि हेळो धत्त वि मुचध्वमश्वान् ॥१॥
एष वः स्तोमो मरुतो नमस्वान्हृदा तष्टो मनसा धायि देवाः ।
उपेमा यात मनसा जुषाणा यूयं हि ष्ठा नमस इद्वृधासः ॥२॥
स्तुतासो नो मरुतो मृळयन्तूत स्तुतो मघवा शम्भविष्ठः ।
ऊर्ध्वा नः सन्तु कोम्या वनान्यहानि विश्वा मरुतो जिगीषा ॥३॥
अस्मादहं तविषादीषमाण इन्द्राद्भिया मरुतो रेजमानः ।
युष्मभ्यं हव्या निशितान्यासन्तान्यारे चकृमा मृळता नः ॥४॥
येन मानासश्चितयन्त उस्रा व्युष्टिषु शवसा शश्वतीनाम् ।
स नो मरुद्भिर्वृषभ श्रवो धा उग्र उग्रेभिः स्थविरः सहोदाः ॥५॥
त्वां पाहीन्द्र सहीयसो नॄन्भवा मरुद्भिरवयातहेळाः ।
सुप्रकेतेभिः सासहिर्दधानो विद्यामेषं वृजनं जीरदानुम् ॥६॥

*prati va enā namasāhamemi sūktena bhikṣe sumatiṁ turāṇām ।*
*rarāṇatāā maruto vedyābhirni heḷo dhatta vi muchadhvamaśvān ॥1॥*
*eṣa vaḥ stomo maruto namasvānhṛdā taṣṭo manasā dhāyi devāḥ ।*
*upemā yāta manasā juṣāṇā yūyaṁ hi ṣṭhā namasa idvṛdhāsaḥ ॥2॥*
*stutāso no maruto mṛḷayantūta stuto maghavā śambhaviṣṭhaḥ ।*
*ūrdhvā naḥ santu komyā vanānyahāni viśvā maruto jigīṣā ॥3॥*
*asmādahaṁ taviṣādīṣamāṇa indrādbhiyā maruto rejamānaḥ ।*
*yuṣmabhyaṁ havyā niśitānyāsantānyāre chakṛmā mṛḷatā naḥ ॥4॥*
*yena mānāsaśchitayanta usrā vyuṣṭiṣu śavasā śaśvatīnām ।*

*sa no marudbhirvṛṣabha śravo dhā ugra ugrebhiḥ sthaviraḥ sahodāḥ //5 //*
*tvāṁ pāhīndra sahīyaso nṝnbhavā marudbhiravayātaheḷāḥ /*
*supraketebhiḥ sāsahirdadhāno vidyāmeṣaṁ vrjanaṁ jīradānum //6 //*

ऋ. (Rv.) १.१७२.१-३

चित्रो वोऽस्तु यामश्चित्र ऊती सुदानवः । मरुतो अहिभानवः ॥१॥
आरे सा वः सुदानवो मरुत ऋंजती शरुः । आरे अश्मा यमस्यथ ॥२॥
तृणस्कन्दस्य नु विशः परिवृङ्क्त सुदानवः । ऊर्ध्वान्नः कर्त जीवसे ॥३॥
*chitro vo'stu yāmaśchitra ūtī sudānavaḥ / maruto ahibhānavaḥ //1 //*
*āre sā vaḥ sudānavo maruta ṛṁjatī śaruḥ / āre aśmā yamasyatha //2 //*
*tṛṇaskandasya nu viśaḥ parivṛdkta sudānavaḥ / ūrdhvānnaḥ karta jīvase //3 //*

१०. विश्वेदेवाः (Viśvedevāḥ) - ऋ. (Rv.)१.१८६.१-११

आ न इळभिर्विदथे सुशस्ति विश्वानरः सविता देव एतु ।
अपि यथा युवानो मत्सथा नो विश्वं जगदभिपित्वे मनीषा ॥१॥
आ नो विश्व आस्क्रा गमन्तु देवा मित्रो अर्यमा वरुणः सजोषाः ।
भुवन्यथा नो विश्वे वृधासः करन्त्सुषाहा विथुरं न शवः ॥२॥
प्रेष्ठं वो अतिथिं गृणीषेऽग्निं शस्तिभिस्तुर्वणिः सजोषाः ।
असद्यथा नो वरुणः सुकीर्तिरिषश्च पर्षदरिगूर्तः सूरिः ॥३॥
उप व एषे नमसा जिगीषोषासानक्ता सुदुघेव धेनुः ।
समाने अहन्विमिमानो अर्कं विषुरूपे पयसि सस्मिन्नूधन् ॥४॥
उत नोऽहिर्बुध्न्यो३ मयस्कः शिशुं नपिप्प्युषीवं वेति सिन्धुः ।
येन नपातमपां जुनाम मनोजुवो वृषणो यं वहन्ति ॥५॥
उत न ई त्वष्टा गन्त्वच्छा स्मत्सूरिभिरभिपित्वे सजोषाः ।
आ वृत्रहेन्द्रश्चर्षणिप्रास्तुविष्टमो नरां न इह गम्याः ॥६॥
उत न ई मतयोऽश्वयोगाः शिशुं न गावस्तरुणं रिहन्ति ।
तमीं गिरो जनयो न पत्नीः सुरभिष्टमं नरां नसन्त ॥७॥
उत न ई मरुतो वृद्धसेनाः स्मद्रोदसी समनसः सदन्तु ।
पृषदश्वासोऽवनयो न रथा रिशादसो मित्रायुजो न देवाः ॥८॥
प्र नु यदेषां महिना चिकित्रे प्र युंजते प्रयुजस्ते सुवृक्ति ।
अध यदेषां सुदिने न शरुर्विश्वमेरिणं प्रुषायन्त सेनाः ॥९॥
प्रो अश्विनाववसे कृणुध्वं प्र पूषणं स्वतवसो हि सन्ति ।
अद्वेषो विष्णुर्वात ऋभुक्षा अच्छा सुम्नाय ववृतीय देवान् ॥१०॥
इयं स वो अस्मे दीधिंतिर्यजत्रा अपिप्राणी च सदनी च भूयाः ।
नि या देवेषु यतते वसूयुर्विद्यामेषं वृजनं जीरदानुम् ॥११॥
*ā na iḷabhirvidathe suśasti viśvānaraḥ savitā deva etu /*
*api yathā yuvāno matsathā no viśvaṁ jagadabhipitve manīṣā //1 //*
*ā no viśva āskrā gamantu devā mitro aryamā varuṇaḥ sajoṣāḥ /*
*bhuvanyathā no viśve vṛdhāsaḥ karantsuṣāhā vithuraṁ na śavaḥ //2 //*
*preṣṭhaṁ vo atithiṁ gṛṇīṣe'gniṁ śastibhisturvaṇiḥ sajoṣāḥ /*
*asadyathā no varuṇaḥ sukīrtiriṣaścha parṣadarigūrtaḥ sūriḥ //3 //*
*upa va eṣe namasā jigīṣoṣāsānaktā sudugheva dhenuḥ /*
*samāne ahanvimimāno arka viṣurūpe payasi sasminnūdhan //4 //*
*uta no'hirbudhnyo3 mayaskaḥ śiśuṁ napippayuṣīvaṁ veti sindhuḥ /*
*yena napātamapāṁ junāma manojuvo vṛṣaṇo yaṁ vahanti //5 //*
*uta na ī tvaṣṭā gantvachchhā smatsūribhirabhipitve sajoṣāḥ /*
*ā vṛtrahendraścharṣaṇiprāstuviṣṭamo narāṁ na iha gamyāḥ //6 //*
*uta na ī matayo'śvayogāḥ śiśuṁ na gāvastaruṇaṁ rihanti /*
*tamīṁ giro janayo na patnīḥ surabhiṣṭamaṁ narāṁ nasanta //7 //*

*uta na ī maruto vṛddhasenāḥ smadrodasī samanasaḥ sadantu* ।
*pṛṣadaśvāso'vanayo na rathā riśādaso mitrāyujo na devāḥ ॥8॥*
*pra nu yadeṣāṁ mahinā chikitre pra yuṁjate prayujaste suvṛkti* ।
*adha yadeṣāṁ sudine na śarurviśvameriṇaṁ pruṣāyanta senāḥ ॥9॥*
*pro aśvināvavase kṛṇudhvaṁ pra pūṣaṇaṁ svatavaso hi santi* ।
*adveṣo viṣṇurvāta ṛbhukṣā achchhā sumnāya vavṛtīya devān ॥10॥*
*iyaṁ sa vo asme dīdhiṁtiryajatrā apiprāṇī cha sadanī cha bhūyāḥ* ।
*ni yā deveṣu yatate vasūyurvidyāmeṣaṁ vṛjanaṁ jīradānum ॥11॥*

## ४. अगस्त्यस्य स्वसा एषां माता (Agastyasya Svasā Eṣāṁ Mātā)

१. असमाती राजा (Asamātī Rājā) - ऋ. (Rv.) १०.६०.६

अगस्त्यस्य नद्भ्यः सप्ती युनक्षि रोहिता ।
पणीन्यक्रमीरभि विश्वान्राजन्नराधसः ॥६॥
*agastyasya nadbhyaḥ saptī yunakṣi rohitā* ।
*paṇīnnyakramīrabhi viśvānrājannarādhasaḥ ॥6॥*

## ५. अग्नयो (धिष्ण्या) ऐश्वराः (Agnayo [Dhiṣṇyā] Aiśvarāḥ)

१.पवमानः सोमः पवमानः सोमः (Pavamānaḥ Somaḥ Pavamānaḥ Somaḥ) - ऋ. (Rv.) ९.१०९.१-२२

परि प्र धन्वेन्द्राय सोम स्वादुर्मित्राय पूष्णे भगाय॥१॥
इन्द्रस्ते सोम सुतस्य पेयाः क्रत्वे दक्षाय विश्वे च देवाः ॥२॥
एवामृताय महे क्षयाय स शुक्रो अर्ष दिव्यः पीयूषः ॥३॥
पवस्व सोम महान्त्समुद्रः पिता देवानां विश्वाभि धाम ॥४॥
शुक्रः पवस्व देवेभ्यः सोम दिवे पृथिव्यै शं च प्रजायै ॥५॥
दिवो धर्तासि शुक्रः पीयूषः सत्ये विधर्मन्वाजी पवस्व ॥६॥
पवस्व सोम द्युम्नी सुधारो महामवीनामनु पूर्व्यः ॥७॥
नृभिर्येमानो जज्ञानः पूतः क्षरद्विश्वानि मन्द्रः स्वर्वित् ॥८॥
इन्दुः पुनानः प्रजामुरणः करद्विश्वानि द्रविणानि नः ॥९॥
पवस्व सोम क्रत्वे दक्षायोश्वो न निक्तो वाजी धनाय रिणन्नपः ॥१०॥
तं ते सोतारो रसं मदाय पुनन्ति सोमं महे द्युम्नाय ॥११॥
शिशुं जज्ञानं हरिं मृजन्ति पवित्रे सोमं देवेभ्य इन्दुम् ॥१२॥
इन्दुः पविष्ट चारुर्मदायापामुपस्थे कविर्भगाय ॥१३॥
बिभर्ति चार्विन्द्रस्य नाम येन विश्वानि वृत्रा जघान ॥१४॥
पिबन्त्यस्य विश्वे देवासो गोभिः श्रीतस्य नृभिः सुतस्य॥१५॥
प्र सुवानो अक्षाः सहस्रधारस्तिरः पवित्रं वि वारमव्यम्॥१६॥
स वाज्यक्षाः सहस्ररेता अद्भिर्मृजानो गोभिः श्रीणानः ॥१७॥
प्र सोम याहीन्द्रस्य कुक्षा नृभिर्येमानो अद्रिभिः सुतः ॥१८॥
असर्जि वाजी तिरः पवित्रमिन्द्राय सोमः सहस्रधारः ॥१९॥
अंजन्त्येनं मध्वो रसेनेन्द्राय वृष्ण इन्दुं मदाय ॥२०॥
देवेभ्यस्त्वा वृथा पाजसेऽपो वसानं हरिं मृजन्ति ॥२१॥
इन्दुरिन्द्राय तोशते नि तोशते श्रीणन्नुग्रो
*pari pra dhanvendrāya soma svādurmitrāya pūṣṇe bhagāya ॥1॥*
*indraste soma sutasya peyāḥ kratve dakṣāya viśve cha devāḥ ॥2॥*
*evāmṛtāya mahe kṣayāya sa śukro arṣa divyaḥ pīyūṣaḥ ॥3॥*
*pavasva soma mahāntsamudraḥ pitā devānāṁ viśvābhi dhāma ॥4॥*
*śukraḥ pavasva devebhyaḥ soma dive pṛthivyai śaṁ cha prajāyai ॥5॥*
*divo dhartāsi śukraḥ pīyūṣaḥ satye vidharmanvājī pavasva ॥6॥*
*pavasva soma dyumnī sudhāro mahāmavīnāmanu pūrvyaḥ ॥7॥*

*nṛbhiryemāno jāānaḥ pūtaḥ kṣaradviśvāni mandraḥ svarvit ॥8 ॥*
*induḥ punānaḥ prajāmuraṇaḥ karadviśvāni draviṇāni naḥ ॥9 ॥*
*pavasva soma kratve dakṣāyośvo na nikto vājī dhanāya riṇannapaḥ ॥10 ॥*
*taṁ te sotāro rasaṁ madāya punanti somaṁ mahe dyumnāya ॥11 ॥*
*śiśuṁ jāānaṁ hariṁ mṛjanti pavitre somaṁ devebhya indum ॥12 ॥*
*induḥ paviṣṭa chārurmadāyāpāmupasthe kavirbhagāya ॥13 ॥*
*bibharti chārvindrasya nāma yena viśvāni vṛtrā jaghāna ॥14 ॥*
*pibantyasya viśve devāso gobhiḥ śrītasya nṛbhiḥ sutasya ॥15 ॥*
*pra suvāno akṣāḥ sahasradhārastiraḥ pavitraṁ vi vāramavyam ॥16 ॥*
*sa vājyakṣāḥ sahasraretā adbhirmṛjāno gobhiḥ śrīṇānaḥ ॥17 ॥*
*pra soma yāhīndrasya kukṣā nṛbhiryemāno adribhiḥ sutaḥ ॥18 ॥*
*asarji vājī tiraḥ pavitramindrāya somaḥ sahasradhāraḥ ॥19 ॥*
*aṁjantyenaṁ madhvo rasenendrāya vṛṣṇa induṁ madāya ॥20 ॥*
*devebhyastvā vṛthā pājase'po vasānaṁ hariṁ mṛjanti ॥21 ॥*
*indurindrāya tośate ni tośate śrīṇannugro*

## ६. अग्नयो धिष्ण्या ऐश्वराः (Agnayo Dhiṣṇyā Aiśvarāḥ)

१. पवमानः सोमः (Pavamānaḥ Somaḥ) - सा. (Sv.) ४२८-३१; ११६०-६२; १२४१-४३; १३३२-३४; १३६७-६९

सा. (Sv.) ४२८-३१
परि प्र धन्वेन्द्राय सोम स्वादुर्मित्राय पूष्णे भगाय ॥१ ॥
पर्यू षु प्र धन्व वाजसातये परि वृत्राणि सक्षणिः ।
द्विषस्तरध्या ऋणया न ईरसे ॥२ ॥
पवस्व सोम महान्त्समुद्रः पिता देवानां विश्वाभि धाम ॥३ ॥
पवस्व सोम महे दक्षायाश्वो नि निक्तो वाजी धनाय ॥४ ॥
इन्दुः पविष्ट चारुर्मदायापामुपस्थे कविर्भगाय ॥५ ॥
*pari pra dhanvendrāya soma svādurmitrāya pūṣṇe bhagāya ॥1 ॥*
*paryū ṣu pra dhanva vājasātaye pari vṛtrāṇi sakṣaṇiḥ ।*
*dviṣastaradhyā ṛṇayā na īrase ॥2 ॥*
*pavasva soma mahāntsamudraḥ pitā devānāṁ viśvābhi dhāma ॥3 ॥*
*pavasva soma mahe dakṣāyāśvo ni nikto vājī dhanāya ॥4 ॥*
*induḥ paviṣṭa chārurmadāyāpāmupasthe kavirbhagāya ॥5 ॥*

सा. (Sv.) ११६०-६२
प्र वाज्यक्षाः सहस्रधारस्तिरः पवित्रां वि वारमव्यम् ॥१ ॥
स वाज्यक्षाः सहस्ररेता अद्भिर्मृजानो गोभिः श्रीणानः ॥२ ॥
प्र सोम याहीन्द्रस्य कुक्षा नृभिर्येमानो अद्रिभिः सुतः ॥३ ॥
*pra vājyakṣāḥ sahasradhārastiraḥ pavitrāṁ vi vāramavyam ॥1 ॥*
*sa vājyakṣāḥ sahasraretā adbhirmṛjāno gobhiḥ śrīṇānaḥ ॥2 ॥*
*pra soma yāhīndrasya kukṣā nṛbhiryemāno adribhiḥ sutaḥ ॥3 ॥*

सा. (Sv.) १२४१-४३
पवस्व सोम महान्त्समुद्रः पिता देवानां विश्वाभि धाम ॥१ ॥
शुक्रः पवस्व देवेभ्यः सोम दिवे पृथिव्यै शं च प्रजाभ्यः ॥२ ॥
दिवो धर्तासि शुक्रः पीयूषः सत्ये विधर्मन्वाजी पवस्व ॥३ ॥
*pavasva soma mahāntsamudraḥ pitā devānāṁ viśvābhi dhāma ॥1 ॥*
*śukraḥ pavasva devebhyaḥ soma dive pṛthivyai śaṁ cha prajābhyaḥ ॥2 ॥*
*divo dhartāsi śukraḥ pīyūṣaḥ satye vidharmanvājī pavasva ॥3 ॥*

सा. (Sv.) १३३२-३४
पवस्व सोम महे दक्षायाश्वो न निक्तो वाजी धनाय ॥१ ॥

प्र ते सोतारो रसं मदाय पुनन्ति सोमं महे द्युम्नाय ॥२ ॥
शिशुं जाानं हरिं मृजन्ति पवित्रो सोमं देवेभ्य इन्दुम् ॥३ ॥
*pavasva soma mahe dakṣāyāśvo na nikto vājī dhanāya //1 //*
*pra te sotāro rasaṁ madāya punanti somaṁ mahe dyumnāya //2 //*
*śiśuṁ jāānaṁ hariṁ mṛjanti pavitro somaṁ devebhya indum //3 //*

सा. (Sv.) १३६७-६९
परि प्र धन्वेन्द्राय सोम स्वादुर्मित्राय पूष्णे भगाय ॥१ ॥
एवामृताय महे क्षयाय स शुक्रो अर्ष दिव्य पीयूषः ॥२ ॥
इन्द्रस्ते सोम सुतस्य पेयात्क्रत्वे दक्षाय विश्वे च देवाः ॥३ ॥
*pari pra dhanvendrāya soma svādurmitrāya pūṣṇe bhagāya //1 //*
*evāmṛtāya mahe kṣayāya sa śukro arṣa divya pīyūṣaḥ //2 //*
*indraste soma sutasya peyātkratve dakṣāya viśve cha devāḥ //3 //*

७. **अग्नयो धिष्ण्या ऐश्वराः (ऋसर्व. साग्री. सास्वा.); वाजिनः (सार्षेदी.); ऋण त्रसदस्यू (सास्वा.) (Agnayo Dhiṣṇyā Aiśvarāḥ [Rss. Ssb. Sas.]; Vājinaḥ [Sad.]; Ṛṇa Trasadasyū [Sas.])**

१. पवमानः सोम (Pavamānaḥ Soma) - सा. (Sv.) ४३५
अविर्मर्या आ वाजं वाजिनो अग्मं देवस्य सवितुः सवम् । सवर्गा अर्वन्तो जयत ॥९ ॥
*avirmaryā ā vājaṁ vājino agmaṁ devasya savituḥ savam / savargā arvanto jayata //9 //*

८. **अग्नयो धिष्ण्या ऐश्वराः; वामदेवः (सार्षेदी.); ऋण त्रसदस्यू (सास्वा.) (Agnayo Dhiṣṇyā Aiśvarāḥ; Vāmadevaḥ [Sad.]; Ṛṇa Trasadasyū [Sas.])**

१. पवमानः सोमः (Pavamānaḥ Somaḥ) - सा. (Sv.) ४३६
पवस्व सोम द्युम्नी सुधारो महाँ अवीनामनुपूर्व्यः ॥१० ॥
*pavasva soma dyumnī sudhāro mahāṁ avīnāmanupūrvyaḥ //10 //*

## ९. अग्निः (Agniḥ)

१. अग्निः (Agniḥ) - ऋ. (Rv.) १०.१२४.२-४; य. (Yv.) २७.१; ३-७; ११; १८

ऋ. (Rv.) १०.१२४.२-४
अदेवाद्देवः प्रचता गुहा यन्प्रपश्यमानो अमृतत्वमेमि ।
शिवं यत्सन्तमिशिवो जहामि खात्सख्यादरणीं नाभिमेमि ॥२ ॥
पश्यन्नन्यस्या अतिथिं वयाया ऋतस्य धाम वि मिमे पुरूणि ।
शंसामि पित्रो असुराय शेवमयियाद्यियं भागमेमि ॥३ ॥
बह्वीः समा अकरमन्तरस्मिन्निन्द्रंवृणानः पितरं जहामि ।
अग्निः सोमो वरुणस्ते च्यवन्ते पर्यावर्द्राष्ट्रं तदवाम्यायन् ॥४ ॥
*adevāddevaḥ prachatā guhā yanprapaśyamāno amṛtatvamemi /*
*śivaṁ yatsantamiśiṁvo jahāmi khātsakhyādaraṇīṁ nābhimemi //2 //*
*paśyannanyasyā atithiṁ vayāyā ṛtasya dhāma vi mime purūṇi /*
*śaṁsāmi pitro asurāya śevamayiāyādyiāyaṁ bhāgamemi //3 //*
*bahnīḥ samā akaramantarasminnindraṁvṛṇānaḥ pitaraṁ jahāmi /*
*agniḥ somo varuṇaste chyavante paryāvardrāṣṭraṁ tadavāmyāyan //4 //*

य. (Yv.)२७.१
समास्त्वाग्नऽऋतवो वर्द्धयन्तु संवत्सरा ऽऋषयो यानि सत्या ।
सं दिव्येन दीदिहि रोचनेन विश्वाऽआ भाहि प्रदिशश्चतस्रः ॥१ ॥
*samāstvāgna'ṛtavo varddhayantu saṁvatsarā 'ṛṣayo yāni satyā /*
*saṁ divyena dīdihi rochanena viśvā'ā bhāhi pradiśaśchatasraḥ //1 //*

य. (Yv.)२७.३-७
त्वामग्ने वृणते ब्राह्मणा ऽइमे शिवो ऽअग्ने संवरणे भवा नः ।
सपत्नहा नोऽअभिमातिजिच्च स्वे गये जागृह्यप्रयुच्छन् ॥३ ॥

इहैवाग्ने ऽअधिं धारया रयिं मा त्वा नि क्रन् पूर्वचितो निकारिणः ।
क्षत्रमग्ने सुयममस्तु तुभ्यमुपसत्ता वर्द्धतां ते ऽअनिंष्टृतः ॥४॥
क्षत्रोणाग्ने स्वायुः संरभस्व मित्रोणाग्ने मित्राधेये यतस्व ।
सजातानां मध्यमस्थाऽएधि राामग्ने विहव्यो दीदिहीह ॥५॥
अति निहोऽअति स्रिधोऽत्यचित्तिमत्यरातिमग्ने ।
विश्वा ह्यग्ने दुरिता सहस्वाथास्मभ्यंसहवीरां यिं दाः ॥६॥
अनाधृष्यो जातवेदा ऽअनिष्टृतो विराडग्ने क्षत्राभृद्दीदिहीह ।
विश्वाऽआशाः प्रमुंचन्मानुषीर्भियः शिवोभिरद्य परिंपाहि नो वृधे ॥७॥

*tvāmagne vṛṇate brāhmaṇā 'ime śivo 'agne saṁvaraṇe bhavā naḥ /*
*sapatnahā no'abhimātijichcha sve gaye jāgṛhyaprayuchchhan //3 //*
*ihaivāgne 'adhiṁ dhārayā rayiṁ mā tvā ni kran pūrvachito nikāriṇaḥ /*
*kṣatramagne suyamamastu tubhyamupasattā varddhatāṁ te 'aniṁṣṭṛtaḥ //4 //*
*kṣatroṇāgne svāyuḥ saṁrabhasva mitroṇāgne mitrādheye yatasva /*
*sajātānāṁ madhyamasthā'edhi rāāāmagne vihavyo dīdihīha //5 //*
*ati niho'ati sridho'tyachittimatyarātimagne /*
*viśvā hyagne duritā sahasvāthāsmabhyaṁsahavīrāṁ yiṁ dāḥ //6 //*
*anādhṛṣyo jātavedā 'aniṣṭṛto virāḍagne kṣatrābhṛddīdihīha /*
*viśvā'āśāḥ pramuṁchanmānuṣīrbhiyaḥ śivobhiradya pariṁpāhi no vṛdhe //7 //*

य. (Yv.)२७.११

ऊर्ध्वा ऽअस्य समिधो भवन्त्यूर्ध्वा शुक्रा शोचीं ष्यग्नेः। द्युमत्तमा सुप्रतीकस्य सूनोः ॥११॥

*ūrdhvā 'asya samidho bhavantyūrdhvā śukrā śochīṁ ṣyagneḥ / dyumattamā supratīkasya sūnoḥ //11 //*

य. (Yv.)२७.१८

दैव्या होताराऽऊर्ध्वमध्वरं नोऽग्ने र्जिह्वामभि गृणीतम्। कृणुतं नः स्विष्टिम् ॥१८॥

*daivyā hotārā'ūrdhvamadhvaraṁ no'gne rjihnāmabhi gṛṇītam / kṛṇutaṁ naḥ sviṣṭim //18 //*

२. देव्यः (Devyaḥ) - य. (Yv.)२७.१६

द्वारो देवीरन्वस्य विश्वे व्रता ददन्तेऽअग्नेः। उरुव्यचसो धाम्ना पत्यमानाः ॥१६॥

*dvāro devīranvasya viśve vratā dadante'agneḥ / uruvyachaso dhāmnā patyamānāḥ //16 //*

३. पत्नी (Patnī) - य. (Yv.)१३.२०-२१

काण्डात्काण्डात्प्ररोहन्ती परुषःपरुषस्परि। एवा नो दूर्वे प्रतनु सहस्रेण शतेन च ॥२०॥
या शतेन प्रतनोषि सहस्रेण विरोहासि। तस्यास्ते देवीष्टके विधेम हविषा वयम् ॥२१॥

*kāṇḍātkāṇḍātprarohantī paruṣaḥparuṣaspari / evā no dūrve pratanu sahasreṇa śatena cha //20 //*
*yā śatena pratanoṣi sahasreṇa virohāsi / tasyāste devīṣṭake vidhema haviṣā vayam //21 //*

४. याः (Yāḥ) - य. (Yv.)२७.१३; १७

य. (Yv.)२७.१३

मध्वा यां नक्षसे प्रीणानो नराशं सोऽअग्ने। सुकृद्देवः सविता विश्ववारः ॥१३॥

*madhvā yāṁ nakṣase prīṇāno narāśaṁ so'agne / sukṛddevaḥ savitā viśvavāraḥ //13 //*

य. (Yv.)२७.१७

तेऽअस्य योषणे दिव्ये न योनाऽउषासानक्ता। इमं यामवातामध्वरं नः ॥१७॥

*te'asya yoṣaṇe divye na yonā'uṣāsānaktā / imaṁ yāmavātāmadhvaraṁ naḥ //17 //*

५. वह्निः (Vahniḥ)- य. (Yv.)२७.१४

अच्छायमेति शवसा घृतेनेडानो वह्निर्नमसा। अग्निंस्रुचोऽअध्वरेषु प्रयत्सु ॥१४॥

*achchhāyameti śavasā ghṛtenedāno vahnirnamasā । agniṁsrucho'adhvareṣu prayatsu ॥14 ॥*

६. वायुः (Vāyuḥ) - य. (Yv.)२७.१५

स यक्षदस्य महिमानमग्नेः सऽईं मन्द्रा सुप्रयसः । वसुश्चेतिष्ठो वसुधातमश्च ॥१५॥

*sa yakṣadasya mahimānamagneḥ sa'īṁ mandrā suprayasaḥ । vasuśchetiṣṭho vasudhātamaścha ॥15 ॥*

७. विश्वेदेवाः (Viśvedevāḥ) - य. (Yv.)२७.१२

तनूनपादसुरो विश्ववेदा देवो देवेषु देवः । पथो अनक्तु मध्वा घृतेन ॥१२॥

*tanūnapādasuro viśvavedā devo deveṣu devaḥ । patho anaktu madhvā ghṛtena ॥12 ॥*

८. सामिधेन्यः (Sāmidhenyaḥ) - य. (Yv.)२७.२

सं चेध्यस्वाग्ने प्र च बोधयैनमुच्च तिष्ठ महते सौभगाय ।
मा च रिषदुपसत्ता ते अग्ने ब्रह्माणस्ते यशसः सन्तु मान्ये ॥२॥

*saṁ chedhyasvāgne pra cha bodhayainamuchcha tiṣṭha mahate saubhagāya ।*
*mā cha riṣadupasattā te agne brahmāṇaste yaśasaḥ santu mānye ॥2 ॥*

९. सूर्यः (Sūryaḥ) - य. (Yv.)२७.१०

उद्वयन्तमसस्परि स्वः पश्यन्तऽउत्तरम् । देवं देवत्रा सूर्यमगन्म ज्योतिरुत्तम् ॥१०॥

*udvayantamasaspari svaḥ paśyanta'uttaram । devaṁ devatrā sūryamaganma jyotiruttam ॥10 ॥*

## १०. अग्निश् चाक्षुषः (Agniś Chākṣuṣaḥ)

१. पवमानः सोमः (Pavamānaḥ Somaḥ) - ऋ. (Rv.) ९.१०६.१-३; ९.१०६.१०-१४; सा. (Sv.) ५६६; ५७२; ५७६; ६९४; ६९५; ६९६; ७७२; ७७३; ९४०-९४२

ऋ. (Rv.) ९.१०६.१-३

इन्द्रमच्छ सुता इमे वृषणं यन्तु हरयः । श्रुष्टी जातास इन्दवः स्वर्विदः ॥१॥
अयं भराय सानसिरिन्द्राय पवते सुतः । सोमो जैत्रास्य चेतति यथा विदे ॥२॥
अस्येदिन्द्रो मदेष्वा ग्राभं गृभ्णीत सानसिम् । वज्रं च वृषणं भरत्समप्सुजित् ॥३॥

*indramachchha sutā ime vṛṣaṇaṁ yantu harayaḥ । śruṣṭī jātāsa indravaḥ svarvidaḥ ॥1 ॥*
*ayaṁ bharāya sānasirindrāya pavate sutaḥ । somo jaitrāsya chetati yathā vide ॥2 ॥*
*asyedindro madeṣvā grābhaṁ gṛbhṇīta sānasim । vajraṁ cha vṛṣaṇaṁ bharatsamapsujit ॥3 ॥*

ऋ. (Rv.) ९.१०६.१०-१४

सोमः पुनान ऊर्मिणाव्यो वारं वि धावति । अग्रे वाचः पवमानः कनिक्रदत् ॥१०॥
धीभिर्हिन्वन्ति वाजिनं वने क्रीळन्तमत्यविम् । अभि त्रिपृष्ठं मतयः समस्वरन् ॥११॥
असर्जि कलशाँ अभि मीळहे सप्तिर्न वाज्युः । पुनानो वाचं जनयन्नसिष्यदत् ॥१२॥
पवते हर्यतो हरिरति ह्वरांसि रंह्या । अभ्यर्षन्त्सतोतृभ्यो वीरवद्यशः ॥१३॥
अया पवस्व देवयुर्मधोर्धारा असृक्षत । रेभन्पवित्रां पर्येषि विश्वतः ॥१४॥

*somaḥ punāna ūrmiṇāvyo vāraṁ vi dhāvati । agre vāchaḥ pavamānaḥ kanikradat ॥10 ॥*
*dhībhirhinvanti vājinaṁ vane krīḻantamatyavim । abhi tripṛṣṭhaṁ matayaḥ samasvaran ॥11 ॥*
*asarji kalaśāṁ abhi mīḻahe saptirna vājyuḥ । punāno vāchaṁ janayannasiṣyadat ॥12 ॥*
*pavate haryato harirati hnarāṁsi raṁhyā । abhyarṣantsatotṛbhyo vīravadyaśaḥ ॥13 ॥*
*ayā pavasva devayurmadhordhārā asṛkṣata । rebhanpavitrāṁ paryeṣi viśvataḥ ॥14 ॥*

सा. (Sv.) ५६६

इन्द्रमुच्छ सुता इमे वृष्णं यन्तु हरयः । श्रुष्टे जातास इन्दवः स्वर्विदः ॥१॥

*indramuchchha sutā ime vṛṣṇaṁ yantu harayaḥ । śruṣṭe jātāsa indavaḥ svarvidaḥ ॥1 ॥*

सा. (Sv.) ५७२

सोम पुनान ऊर्मिणाव्यं वारं वि धावति। अग्रे वाचः पवमानः कनिक्रदत्॥७॥

*soma punāna ūrmiṇāvyaṁ vāraṁ vi dhāvati / agre vāchaḥ pavamānaḥ kanikradat //7 //*

सा. (Sv.) ५७६

पवते हर्यतो हरिरति ह्वरांसि रंह्या। अभ्यर्ष स्तोतृभ्यो वीरवद्यशः॥११॥

*pavate haryato harirati hnarāṁsi raṁhyā / abhyarṣa stotṛbhyo vīravadyaśaḥ //11 //*

सा. (Sv.) ६९४-६९६

इन्द्रमच्छ सुता इमे वृषणं यन्तु हरयः। श्रुष्टे जातास इन्दवः स्वर्विदः॥१॥
अयं भराय सानसिरिन्द्राय पवते सुतः। सोमो जैत्रास्य चेतति यथा विदे॥२॥
अस्येदिन्द्रो मदेष्वा ग्राभं गृभ्णाति सानसिम्। वज्रं च वृषणं भरत्समप्सुजित्॥३॥

*indramachchha sutā ime vṛṣaṇaṁ yantu harayaḥ / śruṣṭe jātāsa indavaḥ svarvidaḥ //1 //*
*ayaṁ bharāya sānasirindrāya pavate sutaḥ / somo jaitrāsya chetati yathā vide //2 //*
*asyedindro madeṣvā grābhaṁ gṛbhṇāti sānasim / vajraṁ cha vṛṣaṇaṁ bharatsamapsujit //3 //*

सा. (Sv.) ७७२-७७३

अया पवस्व देवयू रेभन्पवित्रां पर्येषि विश्वतः। मधोर्धारा असृक्षत॥१॥
पवते हर्यतो हरिरति ह्वरांसि रंह्या। अभ्यर्ष स्तोतृभ्यो वीरवद्यशः॥२॥

*ayā pavasva devayū rebhanpavitrāṁ paryeṣi viśvataḥ / madhordhārā asṛkṣata //1 //*
*pavate haryato harirati hnarāṁsi raṁhyā / abhyarṣa stotṛbhyo vīravadyaśaḥ //2 //*

सा. (Sv.) ९४०-९४२

सोम पुनान ऊर्मिणाव्यं वारं वि धावति।अग्रे वाचः पवमानः कनिक्रदत्॥१॥
धीभिर्मृजन्ति वाजिनं वने क्रीडन्तमत्यविम्। अभि त्रिपृष्ठं मतयः समस्वरन्॥२॥
असर्जि कलशाँ अभि मीढ्वांत्सप्तिर्न वाजयुः। पुनानो वाचं जनयन्नसिष्यदत्॥३॥

*soma punāna ūrmiṇāvyaṁ vāraṁ vi dhāvati /agre vāchaḥ pavamānaḥ kanikradat //1 //*
*dhībhirmṛjanti vājinaṁ vane krīḍantamatyavim / abhi tripṛṣṭhaṁ matayaḥ samasvaran //2 //*
*asarji kalaśām̐ abhi mīḍhvāṁtsaptirna vājayuḥ / punāno vāchaṁ janayannasiṣyadat //3 //*

## ११. अग्निस् तापसः (Agnis Tāpasaḥ)

१. विश्वेदेवाः (Viśvedevāḥ) - ऋ. (Rv.) १०.१४१.१-६; सा. (Sv.) ९१; १५०३-१५०५

ऋ. (Rv.) १०.१४१.१-६

अग्ने अच्छा वदेह नः प्रत्यङ् नः सुमना भव। प्र नो यच्छ विशस्पते धनदा असि नस्त्वम्॥१॥
प्र नो यच्छत्वर्यमा प्र भगः प्र बृहस्पतिः। प्र देवाः प्रोत सूनृता रायो देवी ददातु नः॥२॥
सोमं राजानमवसेऽग्निं गीर्भिर्हवामहे। यथा नः सर्व इज्जनः संगत्यां सुमना असत्॥३॥
इन्द्रवायू बृहस्पतिं सुहवेह हवामहे। यथा नः सर्व इज्जनः संगत्यां सुमना असत्॥४॥
अर्यमणं बृहस्पतिमिन्द्रं दानाय चोदय। वातं विष्णु सरस्वतीं सवितारं च वाजिनम्॥५॥
त्वं नो अग्ने अग्निभिर्ब्रह्म यां च वर्धय। त्वं नो देवतातये रायो दानाय चोदय॥६॥

*agne achchhā vadeha naḥ pratyaṅ naḥ sumanā bhava / pra no yachchha viśaspate dhanadā asi nastvam //1 //*
*pra no yachchhatvaryamā pra bhagaḥ pra bṛhaspatiḥ / pra devāḥ prota sūnṛtā rāyo devī dadātu naḥ //2 //*
*somaṁ rājānamavase'gniṁ gīrbhirhavāmahe / yathā naḥ sarva ijjanaḥ saṁgatyāṁ sumanā asat //3 //*
*indravāyū bṛhaspatiṁ suhaveha havāmahe / yathā naḥ sarva ijjanaḥ saṁgatyāṁ sumanā asat //4 //*
*aryamaṇaṁ bṛhaspatimindraṁ dānāya chodaya / vātaṁ viṣṇu sarasvatīṁ savitāraṁ*

*cha vājinam //5 //*

*tvaṁ no agne agnibhirbrahma yāṁ cha vardhaya / tvaṁ no devatātaye rāyo dānāya chodaya //6 //*

सा. (Sv.) ९१

सोमं राजानं वरुणमग्निमन्वारभामहे। आदित्यं विष्णु सूर्य ब्रह्मणं च बृहस्पतिम् ॥१ ॥

*somaṁ rājānaṁ varuṇamagnimanvārabhāmahe / ādityaṁ viṣṇu sūrya brahmaṇaṁ cha bṛhaspatim //1 //*

सा. (Sv.) १५०३-१५०५

अग्ने विश्वेभिरग्निभिर्जोषि ब्रह्म सहस्कृत। ये देवत्रा य आयुषु तेभिर्नो महया गिरः ॥१ ॥

प्र स विश्वेभिरग्निभिरग्निः स यस्य वाजिनः। तनये तोके अस्मदा सम्यङ्वाजैः परीवृतः ॥२ ॥

त्वं नो अग्ने अग्निभिर्ब्रह्म यां च वर्धय। त्वं नो देवतातये रायो दानाय चोदय ॥३ ॥

*agne viśvebhiragnibhirjoṣi brahma sahaskṛta / ye devatrā ya āyuṣu tebhirno mahayā giraḥ //1 //*

*pra sa viśvebhiragnibhiragniḥ sa yasya vājinaḥ / tanaye toke asmadā samyaṅvājaiḥ parīvṛtaḥ //2 //*

*tvaṁ no agne agnibhirbrahma yāṁ cha vardhaya / tvaṁ no devatātaye rāyo dānāya chodaya //3 //*

## १२. अग्निः पावकः (Agniḥ Pāvakaḥ)

१. अग्निः (Agniḥ) - ऋ. (Rv.) १०.१४०.१-६; सा. (Sv.) १८१६-१८२१

ऋ. (Rv.) १०.१४०.१-६

अग्ने तव श्रवो वयो महि भ्राजन्ते अर्चयो विभावसो ।
बृहद्भानो शवसा वाजमुक्थ्यं१ दधासि दाशुषे कवे ॥१ ॥
पावकवर्चाः शुक्रवर्चा अनूनवर्चा उदियर्षि भानुना ।
पुत्रो मातरा विचरन्नुपावसि पृणक्षि रोदसी उभे ॥२ ॥
ऊर्जो नपाज्जातवेदः सुशस्तिभिर्मन्दस्व धीतिभिर्हितः ।
त्वे इषः सं दधुर्भूरिवर्पसश्चित्रोतयो वामजाताः ॥३ ॥
इरज्यन्नग्ने प्रथयस्व जन्तुभिरस्मे रायो अमर्त्य ।
स दर्शतस्य वपुषो वि राजसि पृणाक्षि सानसिं क्रतुम् ॥४ ॥
इष्कर्तारमध्वरस्य प्रचेतसं क्षयन्तं राधसो महः ।
रातिं वामस्य सुभगां महीमिषं दधासि सानसिं रयिम् ॥५ ॥
ऋतावानं महिषं विश्वदर्शतमग्निं सुम्नाय दधिरे पुरो जनाः ।
श्रुत्कर्णं सप्रथस्तमं त्वा गिरा दैव्यं मानुषा युगा ॥६ ॥

*agne tava śravo vayo mahi bhrājante archayo vibhāvaso /*
*bṛhadbhāno śavasā vājamukthyaṁ1 dadhāsi dāśuṣe kave //1 //*
*pāvakavarchāḥ śukravarchā anūnavarchā udiyarṣi bhānunā /*
*putro mātarā vicharannupāvasi pṛṇakṣi rodasī ubhe //2 //*
*ūrjo napājjātavedaḥ suśastirbhindasva dhītibhirhitaḥ /*
*tve iṣaḥ saṁ dadhurbhūrivarpasaśchitrotayo vāmajātāḥ //3 //*
*irajyannagne prathayasva jantubhirasme rāyo amartya /*
*sa darśatasya vapuṣo vi rājasi pṛṇākṣi sānasiṁ kratum //4 //*
*iṣkartāramadhvarasya prachetasaṁ kṣayantaṁ rādhaso mahaḥ /*
*rātiṁ vāmasya subhagāṁ mahīmiṣaṁ dadhāsi sānasiṁ rayim //5 //*
*ṛtāvānaṁ mahiṣaṁ viśvadarśatamagiṁna sumnāya dadhire puro janāḥ /*
*śrutkaṇaṁ saprathastamaṁ tvā girā daivyaṁ mānuṣā yugā //6 //*

सा. (Sv.) १८१६-१८२१

अग्ने तव श्रवो वयो महि भ्राजन्ते अर्चयो विभावसो ।
बृहद्भानो शवसा वाजमुक्थ्यां ३ दधासि दाशुषे कवे ॥१ ॥

पावकवर्चाः शुक्रवर्चा अनूनवर्चा उदियर्षि भानुना ।
पुत्रो मातरा विचरन्नुपावसि पृणक्षि रोदसी उभे ॥२ ॥
ऊर्जो नपाज्जातवेदः सुशस्तिभिर्मन्दस्व धीतिभिर्हितः ।
त्वे इषः सं दधुर्भूरिवर्पसश्चित्रोतयो वामजाताः ॥३ ॥
इरज्यन्नग्ने प्रथयस्व जन्तुभिरस्मे रायो अमर्त्य ।
स दर्शतस्य वपुषो वि राजसि पृणक्षि दर्शतं क्रतुम् ॥४ ॥
इष्कर्तारमध्वरस्य प्रचेतसं क्षयन्तं राधसो महः ।
रातिं वामस्य सुभगां महीमिषं दधासि सानसिं रयिम् ॥५ ॥
ऋतावानं महिषं विश्वदर्शतमग्निं सुम्नाय दधिरे पुरो जनाः ।
श्रुत्कर्णं सप्रथस्तमं त्वा गिरा दैव्यं मानुषा युगा ॥६ ॥

*agne tava śravo vayo mahi bhrājante archayo vibhāvaso* ।
*bṛhadbhāno śavasā vājamukthyāṁ 3 dadhāsi dāśuṣe kave* ॥1 ॥
*pāvakavarchāḥ śukravarchā anūnavarchā udiyarṣi bhānunā* ।
*putro mātarā vicharannupāvasi pṛṇakṣi rodasī ubhe* ॥2 ॥
*ūrjo napājjātavedaḥ suśastibhirmandasva dhītibhirhitaḥ* ।
*tve iṣaḥ saṁ dadhurbhūrivarpasaśchitrotayo vāmajātāḥ* ॥3 ॥
*irajyannagne prathayasya jantubhirasme rāyo amartya* ।
*sa darśatasya vapuṣo vi rājasi pṛṇakṣi darśataṁ kratum* ॥4 ॥
*iṣkartāramadhvarasya prachetasaṁ kṣayantaṁ rādhaso mahaḥ* ।
*rātiṁ vāmasya subhagāṁ mahīmiṣaṁ dadhāsi sānasiṁ rayim* ॥5 ॥
*ṛtāvānaṁ mahiṣaṁ viśvadarśatamagniṁ sumnāya dadhire puro janāḥ* ।
*śrutkarṇa saprathastamaṁ tvā girā daivyaṁ mānuṣā yugā* ॥6 ॥

## १३. अग्निः प्रजापतिः (सास्व.) (Agniḥ Prajāpatiḥ (Sāsva.)

### १. अग्निः (Agniḥ) - सा. (Sv.) १८२५

अग्निरिन्द्राय पवते दिवि शुक्रो वि राजति । महिषीव वि जायते ॥१ ॥

*agnirindrāya pavate divi śukro vi rājati* । *mahiṣīva vi jāyate* ॥1 ॥

## १४. अग्नियुतः स्थौरोऽग्नि यूपो वा स्थौर (Agniyutaḥ Sthauro'gni Yūpo Vā Sthaura)

### १. इन्द्रः (Indraḥ) - ऋ. (Rv.) १०.११६.१-९

पिबा सोमं महत इन्द्रियाय पिबा वृत्राय हन्तवे शविष्ठ ।
पिब राये शसवे हूयमानः पिब मध्यवस्तृपदिन्द्रा वृषस्व ॥१ ॥
अस्य पिब क्षुमतः प्रस्थितस्येन्द्र सोमस्य वरमा सुतस्य ।
स्वस्तिदा मनसा मादयस्वार्वाचीनो रेवते सौभगाय ॥२ ॥
ममत्तु त्वा दिव्यः सोम इन्द्र ममत्तु यः सूयते पार्थिवेषु ।
ममत्तु येन वरिवश्चकर्थ ममत्तु येन निरिणासि शत्रा◌ून् ॥३ ॥
आ द्विबर्हा अमिनो यात्विन्द्रो वृषा हरिभ्यां परिषिक्तमन्धः ।
गव्या सुतस्य प्रभृतस्य मध्वः सत्रा खेदामरुशहा वृषस्व ॥४ ॥
नि तिग्मानि भ्राशयन्भ्राश्यान्यव स्थिरा तनुहि यातुजूनाम् ।
उग्राय ते सहो बलं ददामि प्रतीत्या शत्रून्विगदेषु वृश्च ॥५ ॥
व्य१र्य इन्द्र तनुहि श्रवांस्योजः स्थिरेव धन्वनोऽभिमातीः ।
अस्मद्र्यग्वावृधानः सहोभिरनिभृष्टस्तन्वं वावृधस्व ॥६ ॥
इदं हविर्मघवन्तुभ्यं रातं प्रति सम्राळहृणानो गृभाय ।
तुभ्यं सुतो मघवन्तुभ्यं पक्वोऽद्धीन्द्र पिब च प्रस्थितस्य ॥७ ॥
उद्धीदिन्द्र प्रस्थितेमा हवींषि चनो दधिष्व पचतोत सोमम् ।
प्रयस्वन्तः प्रति हर्यामसि त्वा सत्याः सन्तु यजमानस्य कामाः ॥८ ॥
प्रेन्द्राग्निभ्यां सुवचस्यामियर्मि सिन्धाविव प्रेरयं नावमर्कैः ।
अयाइव परि चरन्ति देवा ये अस्मभ्यं घनदा उद्भिदश्च ॥९ ॥

*pibā somaṁ mahata indriyāya pibā vṛtrāya hantave śaviṣṭha* ।
*piba rāye śasave hūyamānaḥ piba madhyavastṛpadindrā vṛṣasva* ॥1 ॥
*asya piba kṣumataḥ prasthitasyendra somasya varamā sutasya* ।
*svastidā manasā mādayasvārvāchīno revate saubhagāya* ॥2 ॥
*mamattu tvā divyaḥ soma indra mamattu yaḥ sūyate pārthiveṣu* ।
*mamattu yena varivaśchakartha mamattu yena niriṇāsi śatrāūn* ॥3 ॥
*ā dvibarhā amino yātvindro vṛṣā haribhyāṁ pariṣiktamandhaḥ* ।
*gavyā sutasya prabhṛtasya madhvaḥ satrā khedāmaruśahā vṛṣasva* ॥4 ॥
*ni tigmāni bhrāśayanbhrāśyānyava sthirā tanuhi yātujūnām* ।
*ugrāya te saho balaṁ dadāmi pratītyā śatrūnvigadeṣu vṛścha* ॥5 ॥
*vya1rya indra tanuhi śravāṁsyojaḥ sthireva dhanvano'bhimātīḥ* ।
*asmadryagvāvṛdhānaḥ sahobhiranibhṛṣṭastanvaṁ vāvṛdhasva* ॥6 ॥
*idaṁ havirmaghavantubhyaṁ rātaṁ prati samrāḷahṛṇāno gṛbhāya* ।
*tubhyaṁ suto maghavantubhyaṁ pakvo'ddhīndra piba cha prasthitasya* ॥7 ॥
*uddhīdindra prasthitemā havīṁṣi chano dadhiṣva pachatota somam* ।
*prayasvantaḥ prati haryāmasi tvā satyāḥ santu yajamānasya kāmāḥ* ॥8 ॥
*prendrāgnibhyāṁ suvachasyāmiyarmi sindhāviva prerayaṁ nāvamarkaiḥ* ।
*ayāiva pari charanti devā ye asmabhyaṁ ghanadā udbhidaścha* ॥9 ॥

## १५. अग्निवरुणसोमानां निहवः (Agnivaruṇasomānāṁ Nihavaḥ)

१. अग्निः (Agniḥ) - ऋ. (Rv.) १०.१२४.१

इमं नो अग्न उप यामेहि पंचयामं त्रिवृतं सप्तन्तुम् ।
असो हव्यवाळुत नः पुरोगा ज्योगेव दीर्घ तम आशयिष्ठाः ॥१ ॥
*imaṁ no agna upa yāmehi paṁchayāmaṁ trivṛtaṁ saptantum* ।
*aso havyavāḷuta naḥ purogā jyogeva dīrgha tama āśayiṣṭhāḥ* ॥1 ॥

२. इन्द्रः (Indraḥ) - ऋ. (Rv.) १०.१२४.९

बीभत्सूनां सयुजं हंसमाहुरपां दिव्यानां सख्ये चरन्तम् ।
अनुष्टुभमनु चर्चूर्यमाणमिन्द्र नि चिक्युः कवयो मनीषा ॥९ ॥
*bībhatsūnāṁ sayujaṁ haṁsamāhurapāṁ divyānāṁ sakhye charantam* ।
*anuṣṭubhamanu charchūryamāṇamindra ni chikyuḥ kavayo manīṣā* ॥9 ॥

३. वरुणः (Varuṇaḥ) - ऋ. (Rv.) १०.१२४.५ , ७ , ८

ऋ. (Rv.) १०.१२४.५

निर्माया उ त्ये असुरा अभवन्त्वं च मा वरुण कामयासे ।
ऋतेन राजन्ननृतं विविंचन्मम राष्ट्रस्याधिपत्यमेहि ॥५ ॥
*nirmāyā u tye asurā abhavantvaṁ cha mā varuṇa kāmayāse* ।
*ṛtena rājannanṛtaṁ viviṁchanmama rāṣṭrasyādhipatyamehi* ॥5 ॥

ऋ. (Rv.) १०.१२४.७-८

कविः कवित्वा दिवि रूपमासजदप्रभूति वरुणो निरपः सृजत् ।
क्षेमं कृण्वाना जनयो न सिन्धवस्ता अस्य वर्ण शुचयो भरिभ्रति ॥७ ॥
ता अस्य ज्येष्ठमिन्द्रियं सचन्ते ता ईमा क्षेति स्वधया मदन्तीः ।
ता ई विशो न राजानं वृणानां बीभत्सुवो अप वृत्रादतिष्ठन् ॥८ ॥
*kaviḥ kavitvā divi rūpamāsajadaprabhūti varuṇo nirapaḥ sṛjat* ।
*kṣemaṁ kṛṇvānā janayo na sindhavastā asya varṇa śuchayo bharibhrati* ॥7 ॥
*tā asya jyeṣṭhamindriyaṁ sachante tā īmā kṣeti svadhayā madantīḥ* ।
*tā ī viśo na rājānaṁ vṛṇānāṁ bībhatsuvo apa vṛtrādatiṣṭhan* ॥8 ॥

४. सोमः (Somaḥ) - ऋ. (Rv.) १०.१२४.६

इदं स्वरिदमिदास वाममयं प्रकाश उर्व१न्तरिक्षम् ।
हनाव वृत्रं निरेहि सोम हविष्ट्वा सन्तं हविषा यजाम ॥६ ॥

*idaṁ svaridamidāsa vāmamayaṁ prakāśa urva1ntarikṣam* ।
*hanāva vṛtraṁ nirehi soma haviṣṭvā santaṁ haviṣā yajāma* ॥6 ॥

## १६. अग्निः सौचीकः (Agniḥ Sauchīkaḥ)

१. देवाः (Devāḥ) - ऋ. (Rv.) १०.५१.२ , १०.५१.४; ६; ८; १०.५३.४; ५

ऋ. (Rv.) १०.५१.२

को मा ददर्श कतमः स देवो यो मे तन्वो बहुधा पर्यपश्यत् ।
क्वाह मित्रावरुणा क्षियन्त्यग्नेर्विश्वाः समिधो देवयानीः ॥२ ॥
*ko mā dadarśa katamaḥ sa devo yo me tanvo bahudhā paryapaśyat* ।
*kvāha mitrāvaruṇā kṣiyantyagnerviśvāḥ samidho devayānīḥ* ॥2 ॥

ऋ. (Rv.) १०.५१.४

होत्रादहं वरुण बिभ्यदायं नेदेव मा युनजन्नत्र देवाः ।
तस्य मे तन्वो बहुधा निविष्टा एतमर्थं न चिकेताहमग्निः ॥४ ॥
*hotrādahaṁ varuṇa bibhyadāyaṁ nedeva mā yunajannatra devāḥ* ।
*tasya me tanvo bahudhā niviṣṭā etamartha na chiketāhamagniḥ* ॥4 ॥

ऋ. (Rv.) १०.५१.६

अग्नेः पूर्वे भ्रातरो अर्थमेतं रथीवाध्वानमन्वावरीवुः ।
तस्माद्भिया वरुण दूरमायं गौरो न क्षेप्नोराविजे ज्यायाः ॥६ ॥
*agneḥ pūrve bhrātaro arthametaṁ rathīvādhvānamanvāvarīvuḥ* ।
*tasmādbhiyā varuṇa dūramāyaṁ gauro na kṣepnorāvije jyāyāḥ* ॥6 ॥

ऋ. (Rv.) १०.५१.८

प्रयाजान्मे अनुयाँजाश्च केवलानूर्जस्वन्तं हविषो दत्त भागम् ।
घृतं चापां पुरुषं चौषधीनामग्नेश्च दीर्घमायुरस्तु देवाः ॥८ ॥
*prayājānme anuyām̐jāścha kevalānūrjasvantaṁ haviṣo datta bhāgam* ।
*ghṛtaṁ chāpāṁ puruṣaṁ chauṣadhīnāmagneścha dīrghamāyurastu devāḥ* ॥8 ॥

ऋ. (Rv.) १०.५३.४-५

तदद्य वाचः प्रथमं मसीय येनासुराँ अभि देवा असाम ।
ऊर्जाद उत यियासः पंच जना मम होत्रं जुषध्वम् ॥४ ॥
पंच जना मम होत्रं जुषन्तां गोजाता उत ये यियासः ।
पृथिवी नः पार्थिवात्पात्वंहसोऽन्तरिक्षं दिव्यात्पात्वस्मान् ॥५ ॥
*tadadya vāchaḥ prathamaṁ masīya yenāsurām̐ abhi devā asāma* ।
*ūrjāda uta yiāyāsaḥ paṁcha janā mama hotraṁ juṣadhvam* ॥4 ॥
*paṁcha janā mama hotraṁ juṣantāṁ gojātā uta ye yiāyāsaḥ* ।
*pṛthivī naḥ pārthivātpātvaṁhaso'ntarikṣaṁ divyātpātvasmān* ॥5 ॥

२. विश्वेदेवाः (Viśvedevāḥ) - ऋ. (Rv.) १०.५२.१-६

विश्वे देवाः शास्तन मा यथेह होता वृतो मनवै न्नषिद्य ।
प्र मे ब्रूत भागधेयं यथा वो येन पथा हव्यमा वो वहानि ॥१ ॥
अहं होता न्यसीदं यजीयान् विश्वे देवा मरुतो मा जुनन्ति ।
अहरहरश्विनाध्वर्यवं वां ब्रह्मा समिद्भवति साहुतिर्वाम् ॥२ ॥
अयं यो होता किरु स यमस्य कमप्यूहे यत्समंजन्ति देवाः ।
अहरहर्जायते मासिमास्यथा देवा दधिरे हव्यवाहम् ॥३ ॥
मां देवा दधिरे हव्यवाहमपम्लुक्तं बहु कृच्छ्रा चरन्तम् ।
अग्निर्विद्वान्यां नः कल्पयाति पंचयामं त्रिवृतं सप्ततन्तुम् ॥४ ॥
आ वो यक्ष्यमृतत्वं सुवीरं यथा वो देवा वरिवः कराणि ।
आ बाह्वोर्वज्रमिन्द्रस्य धेयामथेमा विश्वाः पृतना जयाति ॥५ ॥
त्रीणि शता त्री सहस्राण्यग्निं त्रिंशच्च देवा नव चासपर्यन् ।
औक्षन्घृतैरस्तृणन्बर्हिरस्मा आदिद्धोतारं न्यसादयन्त ॥६ ॥

*viśve devāḥ śāstana mā yatheha hotā vṛto manavai nnaṣidya ।*
*pra me brūta bhāgadheyaṁ yathā vo yena pathā havyamā vo vahāni ॥1 ॥*
*ahaṁ hotā nyasīdaṁ yajīyān viśve devā maruto mā junanti ।*
*aharaharaśvinādhvaryavaṁ vāṁ brahmā samidbhavati sāhutirvām ॥2 ॥*
*ayaṁ yo hotā kiru sa yamasya kamapyūhe yatsamaṁjanti devāḥ ।*
*aharaharjāyate māsimāsyathā devā dadhire havyavāham ॥3 ॥*
*māṁ devā dadhire havyavāhamapamluktaṁ bahu kṛchchhrā charantam ।*
*agnirvidvānyāṁ naḥ kalpayāti paṁchayāmaṁ trivṛtaṁ saptatantum ॥4 ॥*
*ā vo yakṣayamṛtatvaṁ suvīraṁ yathā vo devā varivaḥ karāṇi ।*
*ā bāhnovrajramindrasya dheyāmathemā viśvāḥ pṛtanā jayāti ॥5 ॥*
*trīṇi śatā trī sahasrāṇyagniṁ triśachcha devā nava chāsaparyan ।*
*aukṣanghṛtairastṛṇanbarhirasmā ādiddhotāraṁ nyasādayanta ॥6 ॥*

**१७. अग्निः सौचीको वैश्वानरो वा सप्तिर् वा वाजम्भरः (Agniḥ Sauchīko Vaiśvānaro Vā Saptir Vā Vājambharaḥ)**

१. अग्निः (Agniḥ) - ऋ. (Rv.) १०.७९.१-७; १०.८०.१-७

ऋ. (Rv.) १०.७९.१-७

उपश्यमस्य महतो महित्वममर्त्यस्य मर्त्यासु विक्षु ।
नाना हनू विभृते सं भरेते असिन्वती बप्सती भूर्यत्तः ॥१ ॥
गुहा शिरो निहितमृधगक्षी असिन्वन्नत्ति जिह्वया वनानि ।
अत्राण्यस्मै पड्भिः सं भरन्त्युत्तानहस्ता नमसाधि विक्षु ॥२ ॥
प्र मातुः प्रतरं गुह्यमिच्छन्कुमारो न वीरुधः सर्पदुर्वीः ।
ससं न पक्वमविदच्छुचन्तं रिरिह्वांसं रिप उपस्थे अन्तः ॥३ ॥
तद्वामृतं रोदसी प्र ब्रवीमि जायमानो मातरा गर्भो अत्ति ।
नाहं देवस्य मर्त्यश्चिकेताग्निरंग विचेताः स प्रचेताः ॥४ ॥
यो अस्मा अन्नं तृष्वा३ दधात्याज्यैर्घृतैर्जुहोति पुष्यति ।
तस्मै सहस्रमक्षभिर्वि चक्षेऽग्ने विश्वतः प्रत्यङ्ङसि त्वम् ॥५ ॥
किं देवेषु त्यज एनश्चकर्थाग्ने पृच्छामि नु त्वामविद्वान् ।
अक्रीळन् क्रीळन्हरिरत्तवेऽदन्वि पर्वशश्चकर्त गामिवासिः ॥६ ॥
विषूचो अश्वान्युयुजे वनेजा ऋजीतिभिी रशनाभिर्गृभीतान् ।
चक्षदे मित्रो वसुभिः सुजातः समानृधे पर्वभिर्वावृधानः ॥७ ॥

*upaśyamasya mahato mahitvamamartyasya martyāsu vikṣu ।*
*nānā hanū vibhṛte saṁ bharete asinvatī bapsatī bhūryattaḥ ॥1 ॥*
*guhā śiro nihitamṛdhagakṣī asinvannati jihnayā vanāni ।*
*atrāṇyasmai paḍbhiḥ saṁ bharantyuttānahastā namasādhi vikṣu ॥2 ॥*
*pra mātuḥ prataraṁ guhyamichchhankumāro na vīrudhaḥ sarpadurvīḥ ।*
*sasaṁ na pakvamavidachchhuchantaṁ ririhnāṁsaṁ ripa upasthe antaḥ ॥3 ॥*
*tadvāmṛtaṁ rodasī pra bravīmi jāyamāno mātarā garbho atti ।*
*nāhaṁ devasya martyaśchiketāgniraṁga vichetāḥ sa prachetāḥ ॥4 ॥*
*yo asmā annaṁ tṛṣvā3 dadhātyājyairghṛtairjuhoti puṣyati ।*
*tasmai sahasramakṣabhirvi chakṣe'gne viśvataḥ pratyaṅṅsi tvam ॥5 ॥*
*kiṁ deveṣu tyaja enaśchakarthāgne pṛchchhāmi nu tvāmavidvān ।*
*akrīḻan krīḻanharirattave'danvi parvaśaśchakarta gāmivāsiḥ ॥6 ॥*
*viṣūcho aśvānyuyuje vanejā ṛjītibhiī raśanābhirgṛbhītān ।*
*chakṣade mitro vasubhiḥ sujātaḥ samānṛdhe parvabhirvāvṛdhānaḥ ॥7 ॥*

ऋ. (Rv.) १०.८०.१-७

अग्निः सप्तिं वाजंभरं ददात्यग्निर्वीरं श्रुत्यं कर्मनिष्ठाम् ।
अग्नी रोदसी वि चरत्समंजन्नग्निर्नारीं वीरकुक्षिं पुरन्धिम् ॥१ ॥

अग्नेरप्नसः समिदस्तु भद्राग्निर्मही रोदसी आ विवेश ।
अग्निरेकं चोदयत्समत्स्वग्निर्वृत्राणि दयते पुरूणि ॥२ ॥
अग्निर्ह त्यं जरतः कर्णमावाग्निरद्भ्यो निरदहज्जरूथम् ।
अग्निरत्रिं घर्म उरुष्यदन्तरग्निर्नृमेधं प्रज्यासृजत्सम् ॥३ ॥
अग्निर्दाद् द्रविणं वीरपेशा अग्निर्ऋषिं यः सहस्रा सनोति ।
अग्निर्दिवि हव्यमा ततानाग्नेर्धामानि विभृता पुरुत्रा ॥४ ॥
अग्निमुक्थैर्ऋषयो वि ह्वयन्तेऽग्निं नरो यामनि बाधितासः ।
अग्निं वयो अन्तरिक्षे पतन्तोऽग्निनः सहस्रा परि याति गोनाम् ॥५ ॥
अग्निं विश ईळते मानुषीर्या अग्निं मनुषो नहुषो वि जाताः ।
अग्निर्गान्धर्वी पथ्यामृतस्याग्नेर्गव्यूतिर्घृत आ निषत्ता ॥६ ॥
अग्नये ब्रह्म ऋभवस्तक्षुरग्निं महामवोचामा सुवृक्तिम् ।
अग्ने प्राव जरितारं यविष्ठाग्ने महि द्रविणमा यजस्व ॥७ ॥

*agniḥ saptiṁ vājaṁbharaṁ dadātyagnirvīraṁ śrutyaṁ karmaniṣṭhām /*
*agnī rodasī vi charatsamaṁjannagnirnārīṁ vīrakukṣiṁ purandhim //1 //*
*agnerapnasaḥ samidastu bhadrāgnirmahī rodasī ā viveśa /*
*agnirekaṁ chodayatsamatsvagnirvṛtrāṇi dayate purūṇi //2 //*
*agnirha tyaṁ jarataḥ karṇamāvāgniradbhyo niradahajjarūtham /*
*agniratriṁ gharma uruṣyadantaragnirnṛmedhaṁ prajyāsṛjatsam //3 //*
*agnirdād draviṇaṁ vīrapeśā agnirṛṣiṁ yaḥ sahasrā sanoti /*
*agnirdivi havyamā tatānāgnerdhāmāni vibhṛtā purutrā //4 //*
*agnimukthairṛṣayo vi hnayante'gniṁ naro yāmani bādhitāsaḥ /*
*agniṁ vayo antarikṣe patanto'ginaḥ sahasrā pari yāti gonām //5 //*
*agniṁ viśa īḷate mānuṣīryā agniṁ manuṣo nahuṣo vi jātāḥ /*
*agnirgāndharvī pathyāmṛtasyāgnergavyūtirghṛta ā niṣattā //6 //*
*agnaye brahma ṛbhavastatkṣuragniṁ mahāmavochāmā suvṛktim /*
*agne prāva jaritāraṁ yaviṣṭhāgne mahi draviṇamā yajasva //7 //*

## १८. अधमर्षणो माधुच्छन्दसः (Adhamarṣaṇo Mādhuchchhandasaḥ)

### १. भाववृत्तम (Bhāvavṛttama) - ऋ. (Rv.) १०.१९०.१-३

ऋतं च सत्यं चाभीधात्तपसोऽध्यजायत ।ततो रात्र्यजायत ततः समुद्रो अर्णवः ॥१ ॥
समुद्रादर्णवादधि संवत्सरो अजायत । अहोरात्राणि विदधद्विश्स्य मिषतो वशी ॥२ ॥
सूर्याचन्द्रमसौ धाता यथा पूर्वमकल्पयत् । दिवं च पृथिवीं चान्तरिक्षमथो स्वः ॥३ ॥

*ṛtaṁ cha satyaṁ chābhīdhāttapaso'dhyajāyata /tato rātrāyajāyata tataḥ samudro arṇavaḥ //1 //*
*samudrādarṇavādadhi saṁvatsaro ajāyata / ahorātrāṇi vidadhadviśsya miṣato vaśī //2 //*
*sūryāchandramasau dhātā yathā pūrvamakalpayat / divaṁ cha pṛthivīṁ chāntarikṣamatho svaḥ //3 //*

## १९. अंग औरवः (Aṁga Auravaḥ)

### १. इन्द्रः (Indraḥ) - ऋ. (Rv.) १०.१३८.१-६

तव त्य इन्द्र सख्येषु वह्नय ऋतं मन्वाना व्यदर्दिरुर्वलम् ।
यत्रा दशस्यन्नुषसो रिणन्नपः कुत्साय मन्मन्नह्यश्च दंसयः ॥१ ॥
अवासृजः प्रस्वः श्वंचयो गिरीनुदाज उस्रा अपिबो मधु प्रियम् ।
अवर्धयो वनिनो अस्य दंससा शुशोच सूर्य ऋतजातया गिरा ॥२ ॥
वि सूर्यो मध्ये अमुचद्रथं दिवो विदद्दासाय प्रतिमानमार्यः ।
दृळहानि पिप्रोरसुरस्य मायिन इन्द्रो व्यास्यच्चकृवाँ ऋजिश्वना ॥३ ॥
अनाधृष्टानि धृषितो व्यास्यन्निधीरदेवाँ अमृणदयास्यः ।
मासेव सूर्यो वसु पुर्यमा ददे गृणानः शत्रूँरश्र्णाद्विरुक्मता ॥४ ॥

अयुद्धसेनो विभ्वा विभिन्दता दाशद्वृत्राहा तुज्यानि तेजते ।
इन्द्रस्य वज्रादबिभेदभिश्नथः प्राक्रामच्छुन्ध्यूरजहादुपा अनः ॥५॥
एता तया ते श्रुत्यानि केवला यदेक एकमकृणोरयाम् ।
मासां विधानमदधा अधि द्यवि त्वया विभिन्नं भरति प्रधिं पिता ॥६॥

*tava tya indra sakhyeṣu vahnaya ṛtaṁ manvānā vyadardirurvalam /*
*yatrā daśasyannuṣaso riṇannapaḥ kutsāya manmannahyaścha daṁsayaḥ //1 //*
*avāsṛjaḥ prasvaḥ śvaṁchayo girīnudāja usrā apibo madhu priyam /*
*avardhayo vanino asya daṁsasā śuśocha sūrya ṛtajātayā girā //2 //*
*vi sūryo madhye amuchadrathaṁ divo vidaddāsāya pratimānamāryaḥ /*
*dṛḷahāni piprorasurasya māyina indro vyāsyachchakṛvāṁ̐ ṛjiśvanā //3 //*
*anādhṛṣṭāni dhṛṣito vyāsyannidhīradevāṁ̐ amṛṇadayāsyaḥ /*
*māseva sūryo vasu puryamā dade gṛṇānaḥ śatrūṁ̐raśṛṇādvirukmatā //4 //*
*ayuddhaseno vibhvā vibhindatā dāśadvṛtrāhā tujyāni tejate /*
*indrasya vajrādabibhedabhiśnathaḥ prākrāmachchhundhyūrajahādupā anaḥ //5 //*
*etā tayā te śrutyāni kevalā yadeka ekamakṛṇorayām /*
*māsāṁ vidhānamadadhā adhi dyavi tvayā vibhinnaṁ bharati pradhiṁ pitā //6 //*

## २०. अंगिरसः (Aṁgirasaḥ)

१. वायुः (Vāyuḥ) - य. (Yv.)२७.३४

तव वायवृतस्पते त्वष्टुर्जामातरद्भुत। अवां स्या वृणीमहे ॥३४॥

*Tava Vāyavṛtaspate Tvaṣṭurjāmātaradbhuta / Avāṁ Syā Vṛṇīmahe //34 //*

## २१. अंगिराः (Aṁgirāḥ)

१. अग्निः (Agniḥ) - अ. (Av.) ५.१२.१-११.

समिद्धो अद्य मनुषो दुरोणे देवो देवान् यजसि जातवेदः ।
आ च वह मित्रमहश्चिकित्वान् त्वं दूतः कविरसि प्रचेताः ॥१॥
तनूनपात् पथ ऋतस्य यानन् मध्वा समंजन्तरस्वदया सुजिह्व ।
मन्मानि धीभिरुत यामृन्धन् देवत्रा च कृणुह्यध्वरं नः ॥२॥
आजुह्वान् ईड्यो वन्द्यश्चा याह्यग्ने वसुभिः सुजोषाः ।
त्वं देवानामसि यह्व होता स एनान् यक्षीषितो यजीयान् ॥३॥
प्राचीनं बर्हिः प्रदिशा पृथिव्या वस्तोरस्या वृजयते अग्रे अह्नाम् ।
वयुप्रथते वितरं वरीयो देवेभ्यो अदितये स्योनम् ॥४॥
व्यचस्वतीरुर्विया वि श्रयन्तां पतिभ्यो न जनयः शुम्भमानाः ।
देवीर्द्वारो बृहतीर्विश्वमिन्वा देवेभ्यो भवत सुप्रायणाः ॥५॥
आ सुष्वयन्ती यजते उपाके उषासानक्ता सदतां नि योनौ ।
दिव्ये योषणे बृहती सुरुक्मे अधि श्रियं शुक्रपिशं दधाने दैव्या ॥६॥
होतारा प्रथमा सुवाचा मिमाना यां मनुषो यजध्यै ।
प्रचोदयन्ता विदथेषु कारू प्राचीनं ज्योतिः प्रदिशा दिशन्ता ॥७॥
आ नो यां भारती तूयमेत्विडा मनुष्वदिह चेतयन्ती ।
तिस्रो देवीर्बर्हिरेदं स्योनं सरस्वतीः स्वपसः सदन्ताम् ॥८॥
य इमे द्यावापृथिवी जनित्री रूपैरपिंशद् भुवनानि विश्वा ।
तपद्य होतरिषितो यजीयान् देवं त्वष्टारमिह यक्षि विद्वान् ॥९॥
उपावसृज त्मन्या समंजन देवानां पाथ ऋतुथा हवींशि ।
वनस्पतिः शमिता देवो अग्निः स्वदन्तु हव्यं मधुना घृतेन ॥१०॥
सद्यो जातो वयमिमीत यामग्निर्देवानामभवत् पुरोगः ।
अस्य होतुः प्रशिष्यृतस्य वाचि स्वाहाकृतं हविरदन्तु देवाः ॥११॥

*samiddho adya manuṣo duroṇe devo devān yajasi jātavedaḥ /*
*ā cha vaha mitramahaśchikitvān tvaṁ dūtaḥ kavirasi prachetāḥ //1 //*

*tanūnapāt patha ṛtasya yānan madhvā samaṁjantarasvadayā sujihna ।*
*manmāni dhībhiruta yāmṛndhan devatrā cha kṛṇuhyadhvaraṁ naḥ ॥2 ॥*
*ājuhnān īḍyo vandyaśchā yāhyagne vasubhiḥ sujoṣāḥ ।*
*tvaṁ devānāmasi yahna hotā sa enān yakṣīṣito yajīyān ॥3 ॥*
*prāchīnaṁ barhiḥ pradiśā pṛthivyā vastorasyā vṛjayate agre ahnām ।*
*vayuprathate vitaraṁ varīyo devebhyo aditaye syonam ॥4 ॥*
*vyachasvatīrurviyā vi śrayantāṁ patibhyo na janayaḥ śumbhamānāḥ ।*
*devīrdvāro bṛhatīrviśvaminvā devebhyo bhavata suprāyaṇāḥ ॥5 ॥*
*ā suṣvayantī yajate upāke uṣāsānaktā sadatāṁ ni yonau ।*
*divye yoṣaṇe bṛhatī surukme adhi śriyaṁ śukrapiśaṁ dadhāne daivyā ॥6 ॥*
*hotārā prathamā suvāchā mimānā yāṁ manuṣo yajadhyai ।*
*prachodayantā vidatheṣu kārū prāchīnaṁ jyotiḥ pradiśā diśantā ॥7 ॥*
*ā no yāṁ bhāratī tūyametviḍā manuṣvadiha chetayantī ।*
*tisro devīrbarhiredaṁ syonaṁ sarasvatīḥ svapasaḥ sadantām ॥8 ॥*
*ya ime dyāvāpṛthivī janitrāī rūpairapiṁśad bhuvanāni viśvā ।*
*tapadya hotariṣito yajīyān devaṁ tvaṣṭāramiha yakṣi vidvān ॥9 ॥*
*upāvasṛja tmanyā samaṁjana devānāṁ pātha ṛtuthā havīṁśi ।*
*vanaspatiḥ śamitā devo agniḥ svadantu havyaṁ madhunā ghṛtena ॥10 ॥*
*sadyo jāto vayamimīta yāmagnirdevānāmabhavat purogaḥ ।*
*asya hotuḥ praśiṣyṛtasya vāchi svāhākṛtaṁ haviradantu devāḥ ॥11 ॥*

२. आस्रावः (भेषजम्) (Āsrāvaḥ (Bheṣajam) - अ. (Av.) २.३.१-६

अदो यदवधावत्यवत्कमधि पर्वतात् । तत्ते कृणोमि भेषजं सुभेषजं यथाससि ॥१ ॥
आदंगा कुविदंगा शतं या भेषजानि ते । तेषामसि त्वमुत्तममनास्रावमरोगणम् ॥२ ॥
नीचैः खनन्त्यसुरा अरुःस्राणमिदं महत् । तदास्रावस्य भेषजं तदु रोगमनीनशत् ॥३ ॥
उपजीका उद्भरन्ति समुद्रादधि भेषजम् । तदास्रावस्य भेषजं तदु रोगमशीशमत् ॥४ ॥
अरुःस्राणमिदं महत् पृथिव्या अध्युदभृतम् । तदास्रावस्य भेषजं तदु रोगमनीनशत् ॥५ ॥
शं नो भवन्त्वप ओषध्यः शिवाः ।
इन्द्रस्य वज्रो अप हन्तु रक्षस आराद् विसृष्टा इषवः पतन्तु रक्षसाम् ॥६ ॥

*ado yadavadhāvatyavatkamadhi parvatāt । tatte kṛṇomi bheṣajaṁ subheṣajaṁ yathāsasi ॥1 ॥*
*ādaṁgā kuvidaṁgā śataṁ yā bheṣajāni te । teṣāmasi tvamuttamamanāsrāvamaroganam ॥2 ॥*
*nīchaiḥ khanantyasurā aruḥsrāṇamidaṁ mahat । tadāsrāvasya bheṣajaṁ tadu rogamanīnaśat ॥3 ॥*
*upajīkā udbharanti samudrādadhi bheṣajam । tadāsrāvasya bheṣajaṁ tadu rogamaśīśamat ॥4 ॥*
*aruḥsrāṇamidaṁ mahat pṛthivyā adhyudabhṛtam । tadāsrāvasya bheṣajaṁ tadu rogamanīnaśat ॥5 ॥*
*śaṁ no bhavantvapa Oṣadhyaḥ śivāḥ ।*
*indrasya vajro apa hantu rakṣasa ārād visṛṣṭā iṣavaḥ patantu rakṣasām ॥6 ॥*

३. इन्द्रः (Indraḥ) - अ. (Av.) ७.५०.१-९

यथा वृक्षमशनिर्विश्वाहा हन्त्यप्रति । एवाहमद्य कितवानक्षैर्बध्यासमप्रति ॥१ ॥
तरुणामतुराणां विशामवर्जुषीणम् । समैतु विश्वतो भगो अन्तर्हस्तं कृतं मम ॥२ ॥
ईडे अग्निं स्वावसुं नमोभिरिह प्रसक्तो वि चयत् कृतं नः ।
रथैरिव प्र भरे वाजयद्भिः प्रदक्षिणं मरुतां स्तोममृध्याम् ॥३ ॥
वयं जयेम त्वया युजा वृतमस्माकमंशमुदवा भरेभरे ।
अस्मभ्यमिन्द्र वरीयः सुगं कृधि प्र शत्रूणां मघवन् वृष्ण्या रुज ॥४ ।
अजैषं त्वा संलिखितमजैषमुत संरुधम् । अविं वृको यथा मथदेवा मथ्नामि ते कृतम् ॥५ ॥

उत प्रहामतिदीवा जयति कृतमिव श्वघ्नी वि चिनोति काले ।
यो देवकामो न धनं रुणदधि समित् तं रायः सृजति स्वधाभिः ॥६॥
गोभिष्टरेमामतिं दुरेवां यवेन वा क्षुधं मुरुहूत विश्वे ।
वयं राजसु प्रथमा धानान्यरिष्टासो वृजनीभिर्जयेम ॥७॥
कृतं मे दक्षिणे हस्ते जयो मे सव्य आहितः ।
गोजिद् भूयासमश्वजिद् धनंजयो हिरण्यजित् ॥८॥
अक्षाः फलवीतीं द्युवं दत्त गां क्षीरिणीमिव । सं मा कृतस्य धारया धनुः स्नाव्नेव नह्यत ॥९॥
*yathā vṛkṣamaśanirviśvāhā hantyaprati । evāhamadya*
*kitavānakṣaivradhyāsamaprati ॥1॥*
*taruṇāmaturāṇāṁ viśāmavarjuṣīṇam । samaitu viśvato bhago antarhastaṁ kṛtaṁ mama ॥2॥*
*īḍe agniṁ svāvasuṁ namobhiriha prasakto vi chayat kṛtaṁ naḥ ।*
*rathairiva pra bhare vājayadbhiḥ pradakṣiṇaṁ marutāṁ stomamṛdhyām ॥3॥*
*vayaṁ jayema tvayā yujā vṛtamasmākamaṁśamudavā bharebhare ।*
*asmabhyamindra varīyaḥ sugaṁ kṛdhi pra śatrūṇāṁ maghavan vṛṣṇyā ruja ॥4।*
*ajaiṣaṁ tvā saṁlikhitamajaiṣamuta saṁrudham । aviṁ vṛko yathā mathadevā mathnāmi te kṛtam ॥5॥*
*uta prahāmatidīvā jayati kṛtamiva śvaghnī vi chinoti kāle ।*
*yo devakāmo na dhanaṁ ruṇadadhi samit taṁ rāyaḥ sṛjati svadhābhiḥ ॥6॥*
*gobhiṣṭaremāmatiṁ durevāṁ yavena vā kṣudhaṁ muruhūta viśve ।*
*vayaṁ rājasu prathamā dhānānyariṣṭāso vṛjanībhirjayema ॥7॥*
*kṛtaṁ me dakṣiṇe haste jayo me savya āhitaḥ ।*
*gojid bhūyāsamaśvajid dhanaṁjayo hiraṇyajit ॥8॥*
*akṣāḥ phalavītīṁ dyuvaṁ datta gāṁ kṣīriṇīmiva । saṁ mā kṛtasya dhārayā dhanuḥ snāvneva nahyata ॥9॥*

४. इन्द्राबृहस्पतिः (Indrābṛhaspatiḥ) - अ. (Av.) ७.५१.१

बृहस्पतिर्नः परि पातु पश्चादुतोत्तरस्मादधरादघायोः ।
इन्द्रः पुरस्तादुत मध्यतो नः सखा सखिभ्यो वरीयः कृणोत ॥१॥
*bṛhaspatirnaḥ pari pātu paśchādutottarasmādadharādaghāyoḥ ।*
*indraḥ purastāduta madhyato naḥ sakhā sakhibhyo varīyaḥ kṛṇota ॥1॥*

५. जंगिडो वनस्पतिः (Jaṁgiḍo Vanaspatiḥ) - अ. (Av.) १९.३४.१-१०; १९.३५.१-५

अ. (Av.) १९.३४.१-१०

जंगिडोसि जंगिडो रक्षितासि जंगिडः । द्विपाच्चतुष्पादस्माकं सर्व रक्षतु जंगिडः ॥१॥
या गृत्स्यस्त्रिपंचाशीः शतं कृत्याकृतश्च ये । सर्वान् विनक्तु तेजसोऽरसांजंगिडस्करत् ॥२॥
अरसं कृत्रिमं नादमरसाः सप्त विस्रसः । अपेतो जंगिडामतिमिषुमस्तेव शातय ॥३॥
कृत्यादूषण एवायमथो अरातिदूषणः । अथो सहस्वांजंगिडः प्र ण आयूंषि तारिषत् ॥४॥
स जंगिडस्य महिमा परि णः पातु विश्वतः । विष्कन्धं येन सासह संस्कन्धमोज ओजसा ॥५॥
त्रिष्ट्वा देवा अजनयन् निष्ठितं भूम्यामधि । तमु त्वांगिरा इति ब्राह्मणाः पूर्व्या विदुः ॥६॥
न त्वा पूर्वा ओषधयो न त्वा तरन्ति या नवाः । विबाध उग्रो जंगिडः परिपाणः सुमंगलः ॥७॥
अथोपदान भगवो जंगिडामितवीर्य । पुरा ते उग्रा ग्रसत उपेन्द्रो वीर्यददौ ॥८॥
उग्र इत् ते वनस्पत इन्द्र ओजमानमा दधौ । अमीवाः सर्वाश्चातयंजहि रक्षांस्योषधे ॥९॥
आशरीकं विशरीकं बलासं पृष्ट्यामयम् । तक्मानं विश्वशारदमरसां जंगिडस्करत् ॥१०॥
*jaṁgiḍosi jaṁgiḍo rakṣitāsi jaṁgiḍaḥ । dvipāchchatuṣpādasmākaṁ sarva rakṣatu jaṁgiḍaḥ ॥1॥*
*yā gṛtsyastripaṁchāśīḥ śataṁ kṛtyākṛtaścha ye । sarvān vinaktu tejaso'rasāṁjaṁgiḍaskarat ॥2॥*
*arasaṁ kṛtrimaṁ nādamarasāḥ sapta visrasaḥ । apeto jaṁgiḍāmatimiṣumasteva*

*śātaya ॥3 ॥*
*kṛtyādūṣaṇa evāyamatho arātidūṣaṇaḥ । atho sahasvāṁjaṁgiḍaḥ pra ṇa āyūṁṣi tāriṣat ॥4 ॥*
*sa jaṁgiḍasya mahimā pari ṇaḥ pātu viśvataḥ । viṣkandhaṁ yena sāsaha saṁskandhamoja Ojasā ॥5 ॥*
*triṣṭvā devā ajanayan niṣṭhitaṁ bhūmyāmadhi । tamu tvāṁgirā iti brāhmaṇāḥ pūrvyā viduḥ ॥6 ॥*
*na tvā pūrvā Oṣadhayo na tvā taranti yā navāḥ । vibādha ugro jaṁgiḍaḥ paripāṇaḥ sumaṁgalaḥ ॥7 ॥*
*athopadāna bhagavo jaṁgiḍāmitavīrya । purā te ugrā grasata upendro vīryadadau ॥8 ॥*
*ugra it te vanaspata indra Ojamānamā dadhau । amīvāḥ sarvāśchātayaṁjahi rakṣāṁsyoṣadhe ॥9 ॥*
*āśarīkaṁ viśarīkaṁ balāsaṁ pṛṣṭyāmayam । takmānaṁ viśvaśāradamarasāṁ jaṁgiḍaskarat ॥10 ॥*

अ. (Av.) १९.३५.१-५

इन्द्रस्य नाम गृह्णन्त ऋषयो जंगिडं ददुः । देवा यं चक्रुर्भेषजमग्रे विष्कन्धदूष्णम् ॥१ ॥
स नो रक्षतु जंगिडो धनपालो धनेव । देवा यं चक्रुब्राह्मणाः परिपाणमरातिहम् ॥२ ॥
दुहार्दः संघोरं चक्षुः पापकृत्वानमागमम् ।
तांस्त्वं सहस्रचक्षो प्रतीबोधेन नाशय परिपाणोऽसि जंगिडः ॥३ ॥
परि मा दिवः परि मा पृथिव्याः पर्यन्तरिक्षात् परि मा वीरुद्भ्यः ।
परि मा भूतात् परि मोत भव्याद् दिशोदिशो जंगिडः पात्वस्मान् ॥४ ॥
य ऋष्णवो देवकृता य उतो ववृतेऽन्यः ।सर्वास्तान् विश्वभेषजोऽरसां जंगिडस्करत् ॥५ ॥

*indrasya nāma gṛhṇanta ṛṣayo jaṁgiḍaṁ daduḥ । devā yaṁ chakrurbheṣajamagre viṣkandhadūṣṇam ॥1 ॥*
*sa no rakṣatu jaṁgiḍo dhanapālo dhaneva । devā yaṁ chakrubrāhmaṇāḥ paripāṇamarātiham ॥2 ॥*
*duhārdaḥ saṁghoraṁ chakṣuḥ pāpakṛtvānamāgamam ।*
*tāṁstvaṁ sahasrachakṣo pratībodhena nāśaya paripāṇo'si jaṁgiḍaḥ ॥3 ॥*
*pari mā divaḥ pari mā pṛthivyāḥ paryantarikṣāt pari mā vīrudbhyaḥ ।*
*pari mā bhūtāt pari mota bhavyād diśodiśo jaṁgiḍaḥ pātvasmān ॥4 ॥*
*ya ṛṣṇavo devakṛtā ya uto vavṛte'nyaḥ ।sarvāstān viśvabheṣajo'rasāṁ jaṁgiḍaskarat ॥5 ॥*

६. दिवादित्यौ (Divādityau) - अ. (Av.) ४.३९.५-६

दिव्यादित्याय समनमन्त्स आर्ध्नोत् ।
यथा दिव्यादित्याय समनमन्नेवा मह्यं संनमः सं नमन्तु ॥५ ॥
द्यौर्धेनुस्तस्या आदित्यो वत्सः । सा म आदित्येन वत्सेनेषमूर्ज कामं दुहाम् ।
आयुः प्रथमं प्रजां पोषं रयिं स्वाहा ॥६ ॥

*divyādityāya samanamantsa ārdhnot ।*
*yathā divyādityāya samanamannevā mahyaṁ saṁnamaḥ saṁ namantu ॥5 ॥*
*dyaurdhenustasyā ādityo vatsaḥ । sā ma ādityena vatseneṣamūrja kāmaṁ duhām ।*
*āyuḥ prathamaṁ prajāṁ poṣaṁ rayiṁ svāhā ॥6 ॥*

७. दिव चन्द्रमसः (Diva Chandramasaḥ) - अ. (Av.) ४.३९.७-८

दिक्षु चन्द्राय समनमन्त्स आर्ध्नोत् ।
यथा दिक्षु चन्द्राय समनमन्नेवा मह्यं संनमः सं नमन्तु ॥७ ॥
दिशो धेनवस्तासां चन्द्रो वत्सः । ता मे चन्द्रेण वत्सेनेषमूर्ज कामं दुहाम् ।
आयुः प्रथमं प्रजां पोषं रयिं स्वाहा ॥८ ॥

*dikṣu chandrāya samanamantsa ārdhnot ।*

*yathā dikṣu chandrāya samanamannevā mahyaṁ saṁnamaḥ saṁ namantu ॥7॥*
*diśo dhenavastāsāṁ chandro vatsaḥ । tā me chandreṇa vatseneṣamūrja kāmaṁ duhām ।*
*āyuḥ prathamaṁ prajāṁ poṣaṁ rayiṁ svāhā ॥8॥*

८. पृथिव्यग्नी (Pṛthivyagnī) - अ. (Av.) ४.३९.१-२

पृथिव्यामग्नये समनमन्त्स आर्ध्नोत् ।
यथा पृथिव्यामग्नये समनमन्नेवा मह्यं संनमः सं नमन्तु ॥१॥
पृथिवी धेनुस्तस्या अग्निर्वत्सः । सा मेऽग्निना वत्सेनेषमूर्ज कामं दुहाम् ।
आयुः प्रथमं प्रजा पोषं रयिं स्वाहा ॥२॥
*pṛthivyāmagnaye samanamantsa ārdhnot ।*
*yathā pṛthivyāmagnaye samanamannevā mahmaṁ saṁnamaḥ saṁ namantu ॥1॥*
*pṛthivī dhenustasyā agnirvatsaḥ । sā me'gninā vatseneṣamūrja kāmaṁ duhām ।*
*āyuḥ prathamaṁ prajā poṣaṁ rayiṁ svāhā ॥2॥*

९. मन्त्रोक्ताः (Mantroktāḥ) - अ. (Av.) ७.९०.१-२; १९.२२.१-२१

अ. (Av.) ७.९०.१-२

अपि वृश्च पुराणवद् व्रततेरिव गुष्पितम्। ओजो दासस्य दम्भय ॥१॥
वयं तदस्य संभृतं वस्विन्द्रेण वि भजामहे। म्लापयामि भ्रजः शिभ्रं वरुणस्य व्रतेन ते ॥२॥
*api vṛścha purāṇavad vratateriva guṣpitam । Ojo dāsasya dambhaya ॥1॥*
*vayaṁ tadasya saṁbhṛtaṁ vasvindreṇa vi bhajāmahe । mlāpayāmi bhrajaḥ śibhraṁ varuṇasya vratena te ॥2॥*

अ. (Av.) १९.२२.१-२१

आंगिरसानामाद्यैः पंचानुवाकैः स्वाहा ॥१॥
षष्ठाय स्वाहा ॥२॥
सप्तमाष्टमाभ्यां स्वाहा ॥३॥
नीलनखेभ्यः स्वाहा ॥४॥
हरितेभ्यः स्वाहा ॥५॥
क्षुद्रेस्यः स्वाहा ॥६॥
पर्यायिकेभ्यः स्वाहा ॥७॥
प्रथमेभ्यः शंखेभ्यः स्वाहा ॥८॥
द्वितीयेभ्यः शंखेभ्यः स्वाहा ॥९॥
तृतीयेभ्यः शंखेभ्यः स्वाहा ॥१०॥
उपोत्तमेभ्यः स्वाहा ॥११॥
उत्तमेभ्यः स्वाहा ॥१२॥
उत्तरेभ्यः स्वाहा ॥१३॥
ऋषिभ्यः स्वाहा ॥१४॥
शिखिभ्यः स्वाहा ॥१५॥
गणेभ्यः स्वाहा ॥१६॥
महागणेभ्यः स्वाहा ॥१७॥
सर्वेभ्योऽगिंरोभ्यो विदगणेभ्यः स्वाहा ॥१८॥
पृथक्सहस्राभ्यां स्वाहा ॥१९॥
ब्रह्मणे स्वाहा ॥२०॥
ब्रह्मज्येष्ठा संभृता वीर्याणि ब्रह्मग्रे ज्येष्ठं दिवमा ततान ।
भूतानां ब्रह्मा प्रथमोत जो तेनार्हति ब्रह्मणा स्पर्धितुं कः ॥२१॥
*āṁgirasānāmādyaiḥ paṁchānuvākaiḥ svāhā ॥1॥*
*ṣaṣṭhāya svāhā ॥2॥*
*saptamāṣṭamābhyāṁ svāhā ॥3॥*

*nīlanakhebhyaḥ svāhā //4 //*
*haritebhyaḥ svāhā //5 //*
*kṣudresyaḥ svāhā //6 //*
*paryāyikebhyaḥ svāhā //7 //*
*prathamebhyaḥ śaṁkhebhyaḥ svāhā //8 //*
*dvitīyebhyaḥ śaṁkhebhyaḥ svāhā //9 //*
*tṛtīyebhyaḥ śaṁkhebhyaḥ svāhā //10 //*
*upottamebhyaḥ svāhā //11 //*
*uttamebhyaḥ svāhā //12 //*
*uttarebhyaḥ svāhā //13 //*
*ṛṣibhyaḥ svāhā //14 //*
*śikhibhyaḥ svāhā //15 //*
*gaṇebhyaḥ svāhā //16 //*
*mahāgaṇebhyaḥ svāhā //17 //*
*sarvebhyo'giṁrobhyo vidagaṇebhyaḥ svāhā //18 //*
*pṛthaksahasrābhyāṁ svāhā //19 //*
*brahmaṇe svāhā //20 //*
*brahmajyeṣṭhā saṁbhṛtā vīryāṇi brahmagre jyeṣṭhaṁ divamā tatāna /*
*bhūtānāṁ brahmā prathamota jo tenārhati brahmaṇā spardhituṁ kaḥ //21 //*

१०. मरुतः (Marutaḥ) - अ. (Av.) ७.७७.१-३

सांतपना इदं हविर्मरुतस्तज्जुजुष्टन । अस्माकोति रिशादसः ॥१॥
यो नो मर्तो मरुतो दुर्हृणायुस्तिरश्चित्तानिं वसवो जिघांसति ।
द्रुहः पाशान् प्रतिं मुंचतां स तपिष्ठेन तपसा हन्तना तम् ॥२॥
संवत्रीणा मरुतः सवर्का उरुक्षयाः सगणा मानुषासः ।
ते अस्मत् पाशान् प्र मुंचन्त्वेनसः सांतपना मत्सरा मादयिष्णवः ॥३॥
*sāṁtapanā idaṁ havirmarutastajjujuṣṭana / asmākoti riśādasaḥ //1 //*
*yo no marto maruto durhṛṇāyustiraśchittāniṁ vasavo jighāṁsati /*
*druhaḥ pāśān pratiṁ muṁchatāṁ sa tapiṣṭhena tapasā hantanā tam //2 //*
*saṁvatrīṇā marutaḥ savarkā urukṣayāḥ sagaṇā mānuṣāsaḥ /*
*te asmat pāśān pra muṁchantvenasaḥ sāṁtapanā matsarā mādayiṣṇavaḥ //3 //*

११. वाय्वन्तरिक्षे (Vāyvantarikṣe) - अ. (Av.) ४.३९.३-४

अन्तरिक्षे वायवे समनमन्त्स आर्ध्नोत् ।
यथान्तरिक्षे वायवे समनमन्नेवा मह्यं संनमः सं नमन्तु ॥३॥
अन्तरिक्षं धेनुस्तस्या वायुर्वत्सः । सा मे वायुना वत्सेनेषमूर्जं कामं दुहाम् ।
आयुः प्रथमं प्रजा पोषं रयिं स्वाहा ॥४॥
*antarikṣe vāyave samanamantsa ārdhnot /*
*yathāntarikṣe vāyave samanamannevā mahyaṁ saṁnamaḥ saṁ namantu //3 //*
*antarikṣaṁ dhenustasyā vāyurvatsaḥ / sā me vāyunā vatseneṣamūrja kāmaṁ duhām /*
*āyuḥ prathamaṁ prajā poṣaṁ rayiṁ svāhā //4 //*

१२. विश्वकर्मा (Viśvakarmā) - अ. (Av.) २.३५.१-५

ये भक्षयन्तो न वसून्यानृधुर्यानग्नयो अन्वतप्यन्त धिष्ण्याः ।
या तेषामवया दुरिष्टः सिवष्टिं नस्तां कृणवद् विश्वकमा ॥१॥
यापतिमृषय एनसाहुर्निर्भक्तं प्रजा अनुतप्यमानम् ।
मथव्यान्त्स्तोकानप यान् रराध सं नष्टेभिः सृजतु विश्वकर्मा ॥२॥
अदान्यान्त्सोमपान मन्यमानो यास्य विद्वान्त्समये न धीरः ।
यदेनश्चकृवान् बद्ध एष तं विश्वकर्मन् प्र मुंचा स्वस्तये ॥३॥
घोरा ऋषयो नमो अस्त्वेभ्यश्चक्षुर्यदेषां मनसश्च सत्यम् ।

बृहस्पतये महिष द्युमन्नमो विश्वकर्मन् नमस्ते पाह्य१स्मान् ॥४॥
यास्य चक्षुः प्रभृतिर्मुखं च वाचा श्रोत्रोण मनसा जुहोमि ।
इमं यां विततं विश्वकर्मणा देवा यन्तु सुमनस्यमानाः ॥५॥
*ye bhakṣayanto na vasūnyānṛdhuryānagnayo anvatapyanta dhiṣṇyāḥ /*
*yā teṣāmavayā duriṣṭaḥ sivaṣṭiṁ nastāṁ kṛṇavad viśvakamā //1 //*
*yāpatimṛṣaya enasāhurnirbhaktaṁ prajā anutapyamānam /*
*mathavyāntstokānapa yān rarādha saṁ naṣṭebhiḥ sṛjatu viśvakarmā //2 //*
*adānyāntsomapāna manyamāno yāsya vidvāntsamaye na dhīraḥ /*
*yadenaśchakṛvān baddha eṣa taṁ viśvakarman pra muṁchā svastaye //3 //*
*ghorā ṛṣayo namo astvebhyaśchakṣuryadeṣāṁ manasaścha satyam /*
*bṛhaspataye mahiṣa dyumannamo viśvakarman namaste pāhya1smān //4 //*
*yāsya chakṣuḥ prabhṛtirmukhaṁ cha vāchā śrotroṇa manasā juhomi /*
*imaṁ yāṁ vitataṁ viśvakarmaṇā devā yantu sumanasyamānāḥ //5 //*

१३. शकधूमः सोमः (Śakadhūmaḥ Somaḥ) - अ. (Av.) ६.१२८.१-४

शकधूमं नक्षत्राणि यद् राजानमकुर्वत। भद्राहमस्मै प्रायच्छन्निदं राष्ट्रमसादिति ॥१॥
भद्राहं नो मध्यंदिने भद्राहं सायमस्तु नः। भद्राहं नो अह्नां प्रातां रात्री भद्राहमस्तु नः ॥२॥
अहोरात्रभ्यां नक्षत्रेभ्यः सूर्याचन्द्रमसाभ्याम्। भद्राहमस्मभ्यं राजंछकधूम त्वं कृधि ॥३॥
यो नो भद्राहमकरः सायं नक्तमथो दिवा। तस्मै ते नक्षत्रराज शकधूमं सदा नमः ॥४॥
*śakadhūmaṁ nakṣatrāṇi yad rājānamakurvata / bhadrāhamasmai prāyachchhannidaṁ rāṣṭramasāditi //1 //*
*bhadrāhaṁ no madhyaṁdine bhadrāhaṁ sāyamastu naḥ / bhadrāhaṁ no ahnāṁ prātāṁ rātrī bhadrāhamastu naḥ //2 //*
*ahorātrabhyāṁ nakṣatrebhyaḥ sūryāchandramasābhyām / bhadrāhamasmabhyaṁ rājaṁchhakadhūma tvaṁ kṛdhi //3 //*
*yo no bhadrāhamakaraḥ sāyaṁ naktamatho divā / tasmai te nakṣatrarāja śakadhūmaṁ sadā namaḥ //4 //*

## २२. अंगिराः प्रचेता यमश्च (Aṁgirāḥ Prachetā Yamaścha)

१. अग्निः (Agniḥ) - अ. (Av.) ६.४७.१

अग्निः प्रातःसवने पात्वस्मान् वैश्वानरो विश्वकृद् विश्वशंभूः ।
स नः पावको द्रविणे दधात्वायुष्मन्तः सहभक्षाः स्याम ॥१॥
*agniḥ prātaḥsavane pātvasmān vaiśvānaro viśvakṛd viśvaśaṁbhūḥ /*
*sa naḥ pāvako draviṇe dadhātvāyuṣmantaḥ sahabhakṣāḥ syāma //1 //*

२. दुःष्वप्ननाशनम् (Duḥṣvapnanāśanam) - अ. (Av.) ६.४५.१-३; ६.४६.१-३

अ. (Av.) ६.४५.१-३

परोऽपेहि मनस्पाप किमशस्तानि शंससि ।
परेहि न त्वा कामये वृक्षां वनानि सं चर गृहेषु गोषु मे मनः ॥१॥
अवशसा निःशसा यत् पराशसोपारिस जाग्रतो यत् सवपन्तः ।
अग्निर्विश्वान्यप दुष्कतान्यजुष्टान्यारे अस्मद् दधातु ॥२॥
यदिन्द्र ब्रह्मणस्पतेऽपि मृषा चरामसि ।
प्रचेता न आङ्गिरसो दुरितात् पात्वंहसः ॥३॥
*paro'pehi manaspāpa kimaśastāni śaṁsasi /*
*parehi na tvā kāmaye vṛkṣāṁ vanāni saṁ chara gṛheṣu goṣu me manaḥ //1 //*
*avaśasā niḥśasā yat parāśasopārisa jāgrato yat savapantaḥ /*
*agnirviśvānyapa duṣkatānyajuṣṭānyāre asmad dadhātu //2 //*
*yadindra brahmaṇaspate'pi mṛṣā charāmasi /*
*prachetā na āṅriso duritāt pātvaṁhasaḥ //3 //*

अ. (Av.) ६.४६.१-३

यो न जीवोऽसि न मृतो देवानाममृतगर्भोऽसि स्वप्न ।
वरुणानी ते माता यमः पितारुर्नामासि ॥१॥
विद्मते स्वप्न जनित्रं देवजामीनां पुत्रोऽसि यमस्य करणः। अन्तकोऽसि मृत्युरसि ।
तं त्वा स्वप्न तथा सं विद्म स नः स्वप्न दुःष्वप्न्यात् पाहि ॥२।
यथा कलां यथा शफं यथर्णं संनयन्ति । एवा दुःष्वप्न्यं सर्वं द्विषते सं नयामसि ॥३॥

*yo na jīvo'si na mṛto devānāmamṛtagarbho'si svapna /*
*varuṇānī te mātā yamaḥ pitārarurnāmāsi //1 //*
*vidyate svapna janitraṁ devajāmīnāṁ putro'si yamasya karaṇaḥ / antako'si mṛtyurasi /*
*taṁ tvā svapna tathā saṁ vidya sa naḥ svapna duḥṣvapnyāt pāhi //2 /*
*yathā kalāṁ yathā śaphaṁ yatharṇa saṁnayanti / evā duḥṣvapnyaṁ sarva dviṣate saṁ nayāmasi //3 //*

३. मन्त्रोक्ताः (Mantroktāḥ) - अ. (Av.) ६.४८.१-३

श्येनोऽसि गायत्राच्छन्दा अनु त्वा रभे। स्वस्ति मा सं वहास्य यास्योद्दचि स्वाहा ॥१॥
ऋभुरसि जगच्छन्दा अनु त्वा रभे। स्वस्ति मा सं वहास्य यास्योद्दचि स्वाहा ॥२॥
वृषासि त्रिष्टुप्छन्दा अनु त्वा रभे। स्वस्ति मा सं वहास्य यास्योद्दचि स्वाहा ॥३॥

*śyeno'si gāyatrāchchhandā anu tvā rabhe /*
*svasti mā saṁ vahāsya yāsyoddachi svāhā //1 //*
*ṛbhurasi jagachchhandā anu tvā rabhe /*
*svasti mā saṁ vahāsya yāsyoddachi svāhā //2 //*
*vṛṣāsi triṣṭupchhandā anu tvā rabhe /*
*svasti mā saṁ vahāsya yāsyoddachi svāhā //3 //*

४. विश्वेदेवाः (Viśvedevāḥ) - अ. (Av.) ६.४७.२

विश्वे देवा मरुत इन्द्रो अस्मानस्मिन् द्वितीये सवने न जह्युः ।
आयुष्मन्तः प्रियमेषां वदन्तो वयं देवानां सुमतौ स्याम ॥२॥

*viśve devā maruta indro asmānasmin dvitīye savane na jahyuḥ /*
*āyuṣmantaḥ priyameṣāṁ vadanto vayaṁ devānāṁ sumatau syāma //2 //*

५. सुधन्वा (Sudhanvā) - अ. (Av.) ६.४७.३

इदं तृतीयं सवनं कवीनामृतेन ये चमसमैरयन्त ।
ते सौधन्वनाः स्वरानशानाः स्विष्टिं नो अभि वस्यो नयन्तु ॥३॥

*idaṁ tṛtīyaṁ savanaṁ kavīnāmṛtena ye chamasamairayanta /*
*te saudhanvanāḥ svarānaśānāḥ sviṣṭiṁ no abhi vasyo nayantu //3 //*

## २३. अजमीढः (Ajamīḍhaḥ)

१. वायुः (Vāyuḥ) - य. (Yv.)२७.३१

वायुरग्रेगा याप्रीः साकं गन्मनसा याम्। शिवो नियुद्भिः शिवाभिः ॥३१॥

*vāyuragregā yāprīḥ sākaṁ ganmanasā yām / śivo niyudbhiḥ śivābhiḥ //31 //*

## २४. अत्रिः (Atriḥ)

१. इन्द्रः (Indraḥ) - अ. (Av.) २०.१२.७

ऋजीषी वज्री वृषभस्तुराषाड्छुष्मी राजा वृत्रहा सोमपावा ।
युक्त्वा हरिभ्यामुप यासदर्वाङ् माध्यंदिने सवने मत्सदिन्द्रः ॥७॥

*ṛjīṣī vajrī vṛṣabhasturāṣāṭchhuṣmī rājā vṛtrahā somapāvā /*
*yuktvā haribhyāmupa yāsadarvāṅ mādhyaṁdine savane matsadindraḥ //7 //*

२. गृहपतयः (Gṛhapatayaḥ) - य. (Yv.)८.१५-१६; १८; २०-२२; २३-२६

य. (Yv.)८.१५-१६

समिन्द्र णो मनसा नेषि गोभिः संसूरिभिर्मघवन्त्संस्वस्त्या ।
सं ब्रह्मणा देवकृतं यदस्ति सं देवानां सुमतौ यियानां स्वाहा ॥१५॥
सं वर्च्चसा पयसा सं तनूभिरगन्महि मनसा संशिवेन ।
त्वष्टा सुदत्रो विदधातु रायोऽनुमार्ष्टु तन्वो यद्विलिष्टम् ॥१६॥

*samindra ṇo manasā neṣi gobhiḥ saṁsūribhirmaghavantsaṁsvastyā /*
*saṁ brahmaṇā devakṛtaṁ yadasti saṁ devānāṁ sumatau yiyānāṁ svāhā //15 //*
*saṁ varchchasā payasā saṁ tanūbhiraganmahi manasā saṁśivena /*
*tvaṣṭā sudatro vidadhātu rāyo'numārṣṭu tanvo yadviliṣṭam //16 //*

य. (Yv.)८.१८

सुगा वो देवाः सदनाऽअकर्म्म यऽआजग्मेदं सवनं जुषाणाः ।
भरमाणा वहमाना हवींष्यस्मे धत्त वसवो वसूनि स्वाहा ॥१८॥

*sugā vo devāḥ sadanā'akarmma ya'ājagmedaṁ savanaṁ juṣāṇāḥ /*
*bharamāṇā vahamānā havīṁṣyasme dhatta vasavo vasūni svāhā //18 //*

य. (Yv.)८.२०-२२

वयंहि त्वा प्रयति योऽअस्मिन्नग्ने होतारामवृणीमहीह ।
अृधगयाऽअृधगुताशमिष्ठाः प्रजानन् यामुपयाहि विद्वान्त्स्वाहा ॥२०॥
देवा गातुविदो गातुं वित्त्वा गातुमित ।
मनसस्पतऽइमं देव यांस्वाहा वाते धाः ॥२१॥
या यां गच्छ यापतिं गच्छ स्वां योनि गच्छ स्वाहा ।
एष ते याो यापते सहसूक्तवाकः सर्ववीरस्तं जुषस्व स्वाहा ॥२२॥

*vayaṁhi tvā prayati yo'asminnagne hotārāmavṛṇīmahīha /*
*aṛdhagayā'aṛdhagutāśamiṣṭhāḥ prajānan yāmupayāhi vidvāntsvāhā //20 //*
*devā gātuvido gātuṁ vittvā gātumita /*
*manasaspata'imaṁ deva yāṁsvāhā vāte dhāḥ //21 //*
*yā yāṁ gachchha yāpatiṁ gachchha svāṁ yoni gachchha svāhā /*
*eṣa te yāo yāpate sahasūktavākaḥ sarvavīrastaṁ juṣasva svāhā //22 //*

य. (Yv.)८.२३-२६

महिर्भूर्म्मा पृदाकुः। उरुंहि राजा वरुणश्चकार सूर्य्याय मन्थामन्वेतवाऽउ ।
अपदे पादा प्रतिधातवेऽकरुतापवक्ता हृदयाविधश्चित्।
नमो वरुणायाभिष्ठितो वरुणस्य पाशः ॥२३॥
अग्नेग्नीकमपऽआविवेशापान्नपात् प्रतिरक्षन्नसुर्य्यम् ।
दमेदमे समिधं यायग्ने प्रतिं ते जिह्ना घृतमुच्चरएयत् स्वाहा ॥२४॥
समुद्रे ते हृदयमप्म्वन्तः सं त्वा विशन्त्वोषधीरुतापः ।
यास्य त्वा यापते सूक्तोक्तौ नमोवाके विधेम यत् स्वाह ॥२५॥
देवीरापऽएष वो गर्भस्तं सुप्रीतंसुभृतं बिभृत ।
देव सोमैष ते लोकस्तस्मिंछंच वक्ष्व परि च वक्ष्व ॥२६॥

*mahirbhūrmmā pṛdākuḥ / uruṁhi rājā varuṇaśchakāra sūryyāya manthāmanvetavā'u /*
*apade pādā pratidhātave'karutāpavaktā hṛdayāvidhaśchit /*
*namo varuṇāyābhiṣṭhito varuṇasya pāśaḥ //23 //*
*agnegnīkamapa'āviveśāpānnapāt pratirakṣannasuryyam /*
*damedame samidhaṁ yāyagne pratiṁ te jihnā ghṛtamuchcharaeyat svāhā //24 //*
*samudre te hṛdayamapmvantaḥ saṁ tvā viśantvoṣadhīrutāpaḥ /*
*yāsya tvā yāpate sūktoktau namovāke vidhema yat svāha //25 //*
*devīrāpa'eṣa vo garbhastaṁ suprītaṁsubhṛtaṁ bibhṛta /*

*deva somaiṣa te lokastasmiṁchhaṁcha vakṣava pari cha vakṣava ॥26॥*

३. दम्पती (Dampatī) - य. (Yv.)८.२७-३०

अवभृथ निचुम्पुण निचेरुरसि निचुम्पुणाः ।
अव देवैर्देवकृतमेनोऽयासिषमव मर्त्यैम्नर्त्यकृतं पुरुराव्णो देव रिषस्पाहि ।
देवानां समिदसि ॥२७॥
एजतु दशमास्यो गर्भो जरायुणा सह। यथायं वायुरेजति यथा समुद्रऽएजति। एवायं दशमास्यो ऽअस्रज्जरायुणा सह॥२८॥
यस्यै ते यिायो गर्भो यस्यै योनिर्हिरण्ययी ।
अंगान्यह्रुता यस्य तं मात्रा समजीगमंस्वाहा ॥२९॥
पुरुदस्मो विषुरूपऽइन्दुरन्तर्महिमानमानंच धीरः ।
एकपदीं द्विपदीं त्रिपदीं चतुष्पदीमष्टपादीं भुवनानु प्रथन्तां स्वाहा ॥३०॥

*avabhṛtha nichumpuṇa nicherurasi nichumpuṇāḥ ।*
*ava devairdevakṛtameno'yāsiṣamava martyaimrartyakṛtaṁ pururāvṇo deva riṣaspāhi ।*
*devānāṁ samidasi ॥27॥*
*ejatu daśamāsyo garbho jarāyuṇā saha । yathāyaṁ vāyurejati yathā samudra'ejati । evāyaṁ daśamāsyo 'asrajjarāyuṇā saha ॥28॥*
*yasyai te yiāyo garbho yasyai yonirhiraṇyayī ।*
*aṁgānyahrutā yasya taṁ mātrā samajīgamaṁsvāhā ॥29॥*
*purudasmo viṣurūpa'indurantarmahimānamānaṁcha dhīraḥ ।*
*ekapadīṁ dvipadīṁ tripadīṁ chatuṣpadīmaṣṭapādīṁ bhuvanānu prathantāṁ svāhā ॥30॥*

४. विश्वेदेवाः गृहपतयः (Viśvedevāḥ Gṛhapatayaḥ) - य. (Yv.)८.१७, १९

य. (Yv.)८.१७

धाता रातिः सवितेदं जुषन्तां प्रजापतिर्निधिपा देवोऽग्निः ।
त्वष्टा विष्णुः प्रजया संरराणा यजमानाय द्रविणं दधात स्वाहा॥१७॥

dhātā rātiḥ savitedaṁ juṣantāṁ prajāpatirnidhipā devo'agniḥ ।
tvaṣṭā viṣṇuḥ prajayā saṁrarāṇā yajamānāya drarviṇaṁ dadhāta svāhā ॥17॥

य. (Yv.)८.१९

यँ श्ऽआवहऽउशतो देव देवाँस्तान् प्रेरय स्वे ऽअग्ने सधस्थे ।
जिवाँसः पपिवाँसश्च विश्वेऽसुं घर्म्मंस्वरातिष्ठतानु स्वाहा ॥१९॥

*yaṁ̐ ś'āvaha'uśato deva devāṁ̐stān preraya sve 'agne sadhasthe ।*
*jiāvāṁ̐saḥ papivāṁ̐saścha viśve'suṁ gharmmaṁsvarātiṣṭhatānu svāhā ॥19॥*

## २५. अत्रिर् भौमः (Atrir Bhaumaḥ)

१. अत्रिः (Atriḥ) - ऋ. (Rv.) ५.४०.६-९

स्वर्भानोरध यदिन्द्र माया अवो दिवो वर्त्तमाना अवाहन् ।
गूळहं सूर्य तमसापव्रतेन तुरीयेण ब्रह्मणाविन्ददत्रिः ॥६॥
मा मामिमं तव सन्तमत्रा इरस्या द्रुग्धो भियसा नि गारीत् ।
त्वं मित्रो असि सत्यराधास्तौ मेहावतं वरुणश्च राजा॥७॥
ग्राव्णो ब्रह्मा युयुजानः सपर्यन् कीरिणा देवान्नमसोपशिक्षन् ।
अत्रिः सूर्यस्य दिवि चक्षुराधात्स्वर्भानोरप माया अघुक्षत्॥८॥
यं वै सूर्य स्वर्भानुस्तमसाविध्यदासुरः। अत्रायस्तमन्वविन्दन्नह्य१न्ये अशक्नुवन् ॥९॥

*svarbhānoradha yadindra māyā avo divo varttamānā avāhan ।*
*gūḷahaṁ sūrya tamasāpavratena turīyeṇa brahmaṇāvindadatriḥ ॥6॥*
*mā māmimaṁ tava santamatrā irasyā drugdho bhiyasā ni gārīt ।*
*tvaṁ mitro asi satyarādhāstau mehāvataṁ varuṇaścha rājā ॥7॥*

*grāvṇo brahmā yuyujānaḥ saparyan kīriṇā devānnamasopaśikṣan ।*
*atriḥ sūryasya divi chakṣurādhātsvarbhānorapa māyā aghukṣat ॥8 ॥*
*yaṁ vai sūrya svarbhānustamasāvidhyadāsuraḥ । atrāyastamanvavindannahya1nye aśaknuvan ॥9 ॥*

२. अश्विनौ (Aśvinau) - ऋ. (Rv.) ५.७६.१-५; ५.७७.१-५; १०.१४३.१-६; सा. (Sv.) १७५२-५४

ऋ. (Rv.) ५.७६.१-५

आ भात्यग्निरुषसामनीकमुद्विप्राणां देवया वाचो अस्थुः ।
अर्वांचा नूनं रथ्येह यातं पीपिवांसमश्विना घर्ममच्छ ॥१ ॥
न संस्कृतं प्र मिमीतो गमिष्ठान्ति नूनमश्विनोपस्तुतेह ।
दिवाभिपित्वेऽवसागमिष्ठा प्रत्यवर्ति दाशुषे शंभविष्ठा ॥२ ॥
उता यातं संगवे प्रातरह्नो मध्यन्दिन उदिता सूर्यस्य ।
दिवा नक्तमवसा शंतमेन नेदानीं पीतिरश्विना ततान ॥३ ॥
इदं हि वां प्रदिवि स्थानमोक इमे गृहा अश्विनेदं दुरोणम् ।
आ नो दिवो बृहतः पर्वतादाद्भ्यो यातमिषमूर्ज वहन्ता ॥४ ॥
समश्विनोरवसा नूतनेन मयोभुवा सुप्रणीति गमेम ।
आ नो रयिं वहतमोत वीराना विश्वान्यमृता सौभगानि ॥५ ॥

*ā bhātyagniruṣasāmanīkamudviprāṇāṁ devayā vācho asthuḥ ।*
*arvāṁchā nūnaṁ rathyeha yātaṁ pīpivāṁsamaśvinā gharmamachchha ॥1 ॥*
*na saṁskṛtaṁ pra mimīto gamiṣṭhānti nūnamaśvinopastuteha ।*
*divābhipitve'vasāgamiṣṭhā pratyavarti dāśuṣe śaṁbhaviṣṭhā ॥2 ॥*
*utā yātaṁ saṁgave prātarahno madhyandina uditā sūryasya ।*
*divā naktamavasā śaṁtamena nedānīṁ pītiraśvinā tatāna ॥3 ॥*
*idaṁ hi vāṁ pradivi sthānamoka ime gṛhā aśvinedaṁ duroṇam ।*
*ā no divo bṛhataḥ parvatādādbhyo yātamiṣamūrja vahantā ॥4 ॥*
*samaśvinoravasā nūtanena mayobhuvā supraṇīti gamema ।*
*ā no rayiṁ vahatamota vīrānā viśvānyamṛtā saubhagāni ॥5 ॥*

ऋ. (Rv.) ५.७७.१-५

प्रातर्यावाणा प्रथमा यजध्वं पुरा गृध्रादररुषः पिबातः ।
प्रातर्हि यामश्विना दधाते प्र शंसन्ति कवयः पूर्वभाजः ॥१ ॥
प्रातर्यजध्वमश्विना हिनोत न सायमस्ति देवया अजुष्टम् ।
उतान्यो अस्मद्यजते वि चावः पूर्वः पूर्वो यजमानो वनीयान् ॥२ ।
हिरण्यत्वङ् मधुवर्णो घृतस्नुः पृक्षो वहन्नारथो वर्तते वाम् ।
मनोजवा अश्विना वातरंहा येनातियाथो दुरितानि विश्वा ॥३ ॥
योभूयिष्ठं नासत्याभ्यां विवेष चनिष्ठं पित्वो ररते विभागे ।
स तोकमस्य पीपरच्छमीभिरनूर्ध्वभासः सदमित्तुतुर्यात् ॥४ ॥
समश्विनोरवसा नूतनेन मयोभुवा सुप्रणीति गमेम ।
आ नो रयिं वहतमोत वीराना विश्वान्यमृता सौभगानि ॥५ ॥

*prātaryāvāṇā prathamā yajadhvaṁ purā gṛdhrādararuṣaḥ pibātaḥ ।*
*prātarhi yāmaśvinā dadhāte pra śaṁsanti kavayaḥ pūrvabhājaḥ ॥1 ॥*
*prātaryajadhvamaśvinā hinota na sāyamasti devayā ajuṣṭam ।*
*utānyo asmadyajate vi chāvaḥ pūrvaḥ pūrvo yajamāno vanīyān ॥2 ।*
*hiraṇyatvaṅ madhuvarṇo ghṛtasnuḥ pṛkṣo vahannāratho vartate vām ।*
*manojavā aśvinā vātaraṁhā yenātiyātho duritāni viśvā ॥3 ॥*
*yobhūyiṣṭhaṁ nāsatyābhyāṁ viveṣa chaniṣṭhaṁ pitvo rarate vibhāge ।*
*sa tokamasya pīparachchhamībhiranūrdhvabhāsaḥ sadamittuturyāt ॥4 ॥*
*samaśvinoravasā nūtanena mayobhuvā supraṇīti gamema ।*

*ā no rayiṁ vahatamota vīrānā viśvānyamṛtā saubhagāni //5 //*

ऋ. (Rv.) १०.१४३.१-६

त्यं चिदत्रिमृतजुरमर्थमश्वं न यातवे। कक्षीवन्तं यदी पुना रथं न कृणुथो नवम् ॥१ ॥
त्यं चिदश्वं न वाजिनमरेणवो यमत्नत। दृळहं ग्रन्थिं न वि ष्यतमत्रिं यविष्ठमा रजः ॥२ ॥
नरा दंसिष्ठावत्राये शुभ्रा सिषासतं धियः। अथा हि वां दिवो नरा पुन स्तोमो न विशसे ॥३ ॥
चिते तद्वां सुराधसा रातिः सुमतिरश्विना। आ यन्नः सदने पृथौ समने पर्षथो नरा ॥४ ॥
युवं भुज्यु समुद्र आ रजसः पार ईङ्खितम्। यातमच्छा पतत्रिभिर्नासत्या सातये कृतम् ॥५ ॥
आ वां सुम्नैः शंयू इव मंहिष्ठा विश्ववेदसा। समस्मे भूषतं नरोत्सं न पिप्युषीरिषः ॥६ ॥

*tyaṁ chidatrimṛtajuramarthamaśvaṁ na yātave / kakṣīvantaṁ yadī punā rathaṁ na kṛṇutho navam //1 //*
*tyaṁ chidaśvaṁ na vājinamareṇavo yamatnata / ddaḷahaṁ granthiṁ na vi ṣyatamatriṁ yaviṣṭhamā rajaḥ //2 //*
*narā daṁsiṣṭhāvatrāye śubhrā siṣāsataṁ dhiyaḥ / athā hi vāṁ divo narā puna stomo na viśase //3 //*
*chite tadvāṁ surādhasā rātiḥ sumatiraśvinā / ā yannaḥ sadane pṛthau samane parṣatho narā //4 //*
*yuvaṁ bhujyu samudra ā rajasaḥ pāra īṅkhitam / yātamachchhā patatribhirnāsatyā sātaye kṛtam //5 //*
*ā vāṁ sumnaiḥ śaṁyū iva maṁhiṣṭhā viśvavedasā / samasme bhūṣataṁ narotsaṁ na pipyuṣīriṣaḥ //6 //*

सा. (Sv.) १७५२-५४

आ भात्यग्निरुषसामनीकमुद्विप्राणां देवया वाचो अस्थुः ।
अर्वांचा नूनं रथ्येह यातं पीपिवांसमश्विना घर्मच्छ ॥१ ॥
न संस्कृतं प्र मिमीतो गिमष्ठान्ति नूनमश्विनोपस्तुतेह ।
दिवाभिपित्वेऽवसागमिष्ठा प्रत्यवर्ति दाशुषे शम्भविष्ठा ॥२ ॥
उता यातं संगवे प्रातरह्नो मध्यन्दिन उदिता सूर्यस्य ।
दिवा नक्तमवसा शन्तमेन नेदानीं पीतिरश्विना ततान ॥३ ॥

*ā bhātyagniruṣasāmanīkamudviprāṇāṁ devayā vācho asthuḥ /*
*arvāṁchā nūnaṁ rathyeha yātaṁ pīpivāṁsamaśvinā gharmachchha //1 //*
*na saṁskṛtaṁ pra mimīto gimaṣṭhānti nūnamaśvinopastuteha /*
*divābhipitve'vasāgamiṣṭhā pratyavarti dāśuṣe śambhaviṣṭhā //2 //*
*utā yātaṁ saṁgave prātarahno madhyandina uditā sūryasya /*
*divā naktamavasā śantamena nedānīṁ pītiraśvinā tatāna //3 //*

३. इन्द्रः (Indraḥ) - ऋ. (Rv.) ५.३७.१-५; ५.३८.१-५; ५.३९.१-५; ५.४०.१-४ सा. (Sv.) ३४५; ३६६; ११७२-७४

ऋ. (Rv.) ५.३७.१-५

सं भानुना यतते सूर्यस्याजुह्वानो घृतपृष्ठः स्वंचाः ।
तस्मा अमृध्रा उषसो व्युच्छान्य इन्द्राय सुनवामेत्याह ॥१ ॥
समिद्धाग्निर्वनवत्स्तीर्णबर्हियुक्तग्रावा सुतसोमो जराते ।
ग्रावाणो यस्येषिरं वदन्त्ययदध्वर्युर्हविषाव सिन्धुम् ॥२ ॥
वधूरियं पतिमिच्छन्त्येति य ई वहाते महिषीमिषिराम् ।
आस्य श्रवस्याद्रथ आ च घोषात्पुरू सहस्रा परि वर्तयाते ॥३ ॥
न स राजा व्यथते यस्मिन्निन्द्रस्तीव्रं सोमं पिबति गोसखायम् ।
आ सत्वनैरजति हन्ति वृत्रां क्षेति क्षितीः सुभागो नाम पुश्यन् ॥४ ॥
पुष्यात्क्षेमे अभि योगे भवात्युभे वृतौ संयती सं जयाति ।
प्रियः सूर्ये प्रियो अग्ना भवाति य इन्द्राय सुतसोमो ददाशत् ॥५ ॥

*saṁ bhānunā yatate sūryasyājuhnāno ghṛtapṛṣṭhaḥ svaṁchāḥ /*

*tasmā amṛdhrā uṣaso vyuchchhānya indrāya sunavāmetyāha ॥1 ॥*
*samiddhāgnirvanavatstīrṇabarhiyuktagrāvā sutasomo jarāte ।*
*grāvāṇo yasyeṣiraṁ vadantyayadadhvaryurhaviṣāva sindhum ॥2 ॥*
*vadhūriyaṁ patimichchhantyeti ya ī vahāte mahiṣīmiṣirām ।*
*āsya śravasyādratha ā cha ghoṣātpurū sahasrā pari vartayāte ॥3 ॥*
*na sa rājā vyathate yasminnindrastīvraṁ somaṁ pibati gosakhāyam ।*
*ā satvanairajati hanti vṛtrāṁ kṣeti kṣitīḥ subhāgo nāma puśyan ॥4 ॥*
*puṣyātkṣeme abhi yoge bhavātyubhe vṛtau saṁyatī saṁ jayāti ।*
*priyaḥ sūrye priyo agnā bhavāti ya indrāya sutasomo dadāśat ॥5 ॥*

ऋ. (Rv.) ५.३८.१-५

उरोष्ट इन्द्र राधसो विभवी रातिः शतक्रतो। अधा नो विश्वचर्षणे द्युम्ना सुक्षत्रा मंहय ॥१ ॥
यदीमिन्द्र श्रवाय्यमिषं शविष्ठ दधिषे। पप्रथे दीर्घश्रुत्तमं हिरण्यवर्ण दुष्टरम् ॥२ ॥
शुष्मासो ये ते अद्रिवो मेहना केतसापः। उभा देवावभिष्टये दिवश्च ग्मश्च राजथः ॥३ ॥
उतो नो अस्य कस्य चिद्दक्षस्य तव वृत्राहन्। अस्मभ्यं नृम्णमा भरास्मभ्यं नृमणस्यसे ॥४ ॥
नू त आभिरिभिष्टिभिस्त्व शर्मंछतक्रतो। इन्द्र स्याम सुगोपाः शूर स्याम सुगोपाः ॥५ ॥

*uroṣṭa indra rādhaso vibhavī rātiḥ śatakrato । adhā no viśvacharṣaṇe dyumnā sukṣatrā maṁhaya ॥1 ॥*
*yadīmindra śravāyyamiṣaṁ śaviṣṭha dadhiṣe । paprathe dīrghaśruttamaṁ hiraṇyavarṇa duṣṭaram ॥2 ॥*
*śuṣmāso ye te adrivo mehanā ketasāpaḥ । ubhā devāvabhiṣṭaye divaścha gmaścha rājathaḥ ॥3 ॥*
*uto no asya kasya chiddakṣasya tava vṛtrāhan । asmabhyaṁ nṛmṇamā bharāsmabhyaṁ nṛmaṇasyase ॥4 ॥*
*nū ta ābhiribhiṣṭibhistva śarmaṁchhatakrato । indra syāma sugopāḥ śūra syāma sugopāḥ ॥5 ॥*

ऋ. (Rv.) ५.३९.१-५

यदिन्द्र चित्र मेहनास्ति त्वादातमद्रिवः । राधस्तन्नो विदद्वस उभयाहस्त्या भर ॥१ ॥
यन्मन्यसे वरेण्यमिन्द्र द्युक्षं तदा भर । विद्याम तस्य ते वयमकूपारस्य दावने ॥२ ॥
यत्ते दित्सु प्रराध्यं मनो अस्ति श्रुतं बृहत् । तेन दृळहा चिदद्रिव आ वाजं दर्षि सातये ॥३ ॥
मंहिष्ठं वो मघोनां राजानं चर्षणीनाम् । इन्द्रमुप प्रशस्तये पूर्वीभिर्जुजुषे गिरः ॥४ ॥
अस्मा इत्काव्यं वच उक्थमिन्द्राय शंस्यम् ।
तस्मा उ ब्रह्मवाहसे गिरो वर्धन्त्यत्रायो गिरः शुम्भन्त्यत्रायः ॥५ ॥

*yadindra chitra mehanāsti tvādātamadrivaḥ । rādhastanno vidadvasa ubhayāhastyā bhara ॥1 ॥*
*yanmanyase vareṇyamindra dyukṣaṁ tadā bhara । vidyāma tasya te vayamakūpārasya dāvane ॥2 ॥*
*yatte ditsu prarādhyaṁ mano asti śrutaṁ bṛhat । tena ddaḷahā chidadriva ā vājaṁ darṣi sātaye ॥3 ॥*
*maṁhiṣṭhaṁ vo maghonāṁ rājānaṁ charṣaṇīnām । indramupa praśastaye pūrvībhirjujuṣe giraḥ ॥4 ॥*
*asmā itkāvyaṁ vacha ukthamindrāya śaṁsyam ।*
*tasmā u brahmavāhase giro vardhantyatrāyo giraḥ śumbhantyatrāyaḥ ॥5 ॥*

ऋ. (Rv.) ५.४०.१-४

आ याह्यद्रिभिः सुतं सोमं सोमपते पिब । वृषन्निन्द्र वृषभिर्वृत्राहन्तम् ॥१ ॥
वृषा ग्रावा वृषा मदो वृषा सोमो अयं सुतः। वृषन्निन्द्र वृषभिर्वृत्राहन्तम् ॥२ ॥
वृषा त्वा वृषणं हुवे वज्रिंश्चित्राभिरूतिभिः । वृषन्निन्द्र वृषभिर्वृत्राहन्तम ॥३ ॥
ऋजीषी वज्री वृषभस्तुराषाट्छुष्मी राजा वृत्रहा सोमपावा ।
युक्त्वा हरिभ्यामुप यासदर्वाङ्माध्यन्दिने सवने मत्सदिन्द्रः ॥४ ॥

*ā yāhyadribhiḥ sutaṁ somaṁ somapate piba । vṛṣannindra vṛṣabhirvṛtrāhantam ॥1 ॥*
*vṛṣā grāvā vṛṣā mado vṛṣā somo ayaṁ sutaḥ । vṛṣannindra vṛṣabhirvṛtrāhantam ॥2 ॥*
*vṛṣā tvā vṛṣaṇaṁ huve vajriṁśchitrābhirūtibhiḥ । vṛṣannindra vṛṣabhirvṛtrāhantama ॥3 ॥*
*ṛjīṣī vajrī vṛṣabhasturāṣāṭchhuṣmī rājā vṛtrahā somapāvā ।*
*yuktvā haribhyāmupa yāsadarvāṅmādhyandine savane matsadindraḥ ॥4 ॥*

सा. (Sv.) ३४५

यदिन्द्र चित्रा म इह नास्ति त्वादातमद्रिवः। राधस्तन्नो विदद्वस उभयाहस्त्या भर ॥४॥
*yadindra chitrā ma iha nāsti tvādātamadrivaḥ । rādhastanno vidadvasa ubhayāhastyā bhara ॥4 ॥*

सा. (Sv.) ३६६

विभोष्ट इन्द्र राधसो विभ्वी रातिः शतक्रतो। अथा नो विश्वचर्षणे द्युम्नं सुदत्रा मंहय ॥७॥
*vibhoṣṭa indra rādhaso vibhvī rātiḥ śatakrato । athā no viśvacharṣaṇe dyumnaṁ sudatrā maṁhaya ॥7 ॥*

सा. (Sv.) ११७२-७४

यदिन्द्र चित्र म इह नास्ति त्वादातमद्रिवः। राधस्तन्नो विदद्वस उभयाहस्त्या भर ॥४॥
यन्मन्यसे वरेण्यमिन्द्र द्युक्षं तदा भर। विद्याम तस्य ते वयमकूपारस्य दावनः ॥५॥
यत्ते दिक्षु प्रराध्यं मनो अस्ति श्रुतं बृहत्। तेन दृढा चिदद्रिव आ वाजं दर्षि सातये ॥६॥
*yadindra chitra ma iha nāsti tvādātamadrivaḥ । rādhastanno vidadvasa ubhayāhastyā bhara ॥4 ॥*
*yanmanyase vareṇyamindra dyukṣaṁ tadā bhara । vidyāma tasya te vayamakūpārasya dāvanaḥ ॥5 ॥*
*yatte dikṣu prarādhyaṁ mano asti śrutaṁ bṛhat । tena dṛḍhā chidadriva ā vājaṁ darṣi sātaye ॥6 ॥*

४. इन्द्राग्नी (Indrāgnī) - ऋ. (Rv.) ५.८६.१-६

इन्द्राग्नी यमवथ उभा बाजेषु मर्त्यम् । दृळहा चित्स प्र भेदति द्युम्ना वाणीरिव त्रितः ॥१॥
या पृतनासु दुष्टरा या वाजेषु श्रवाय्या । या पंच चर्षणीरभीन्द्राग्नी ता हवामहे ॥२॥
तयोरिदमवच्छवस्तिग्मा दिद्युन्मघोनोः । प्रति द्रुणा गभस्त्योर्गवां वृत्रघ्न एषते ॥३॥
ता वामेषे रथानामिन्द्राग्नी हवामहे । पती तुरस्य राधसो विद्वांसा गिर्वणस्तमा ॥४॥
ता वृधन्तावनु द्यून्मर्ताय देवावदभा । अर्हन्ता चित्पुरो दधेंऽशेव देवार्ववते ॥५॥
एवेन्द्राग्निभ्यामहा वि हव्यं शूष्यं घृतं न पूतमद्रिभिः ।
ता सूरिषु श्रवो वृहद्रयिं गृणत्सु दिधृतमिषं गृणत्सु दिधृतम् ॥६॥
*indrāgnī yamavatha ubhā bājeṣu martyam । ddaḷahā chitsa pra bhedati dyumnā vāṇīriva tritaḥ ॥1 ॥*
*yā pṛtanāsu duṣṭarā yā vājeṣu śravāyyā । yā paṁcha charṣaṇīrabhīndrāgnī tā havāmahe ॥2 ॥*
*tayoridamavachchhavastigmā didyunmaghonoḥ । prati druṇā gabhastyorgavāṁ vṛtraghna eṣate ॥3 ॥*
*tā vāmeṣe rathānāmindrāgnī havāmahe । patī turasya rādhaso vidvāṁsā girvaṇastamā ॥4 ॥*
*tā vṛdhantāvanu dyūnmartāya devāvadabhā । arhantā chitpuro dadheṁ'śeva devārvavate ॥5 ॥*
*evendrāgnibhyāmahā vi havyaṁ śūṣyaṁ ghṛtaṁ na pūtamadribhiḥ ।*
*tā sūriṣu śravo vṛhadrayiṁ gṛṇatsu didhṛtamiṣaṁ gṛṇatsu didhṛtam ॥6 ॥*

५. पर्जन्यः (Parjanyaḥ) - ऋ. (Rv.) ५.८३.१-१०

अच्छावद तवसं गीर्भिराभिः स्तुहि पर्जन्यं नमसा विवास ।
कनिक्रदद्वृषभो जीरदानू रेतो दधात्योषधीषु गर्भम् ॥१॥

वि वृक्षान् हन्त्युत हन्ति रक्षसो विश्वं बिभाय भुवनं महावधात् ।
उतानागा ईषते वृष्ण्यावतो यत्पर्जन्यः स्तनयन् हन्ति दुष्कृतः ॥२ ॥
रथीव कशयाश्वाँ अभिक्षिपन्नाविर्दूतान्कृणुते वर्ष्यँर् अह ।
दूरात्सिंहस्य स्तनथा उदीरते यत्पर्जन्यः कृणुते वर्ष्यं१नभः ॥३ ॥
प्र वाता वान्ति पतयन्ति , विद्युत उदोषधीर्जिहते पिन्वते स्वः ।
इरा विश्वस्मै भुवनाय जायते यत्पर्जन्यः पृथिवीं रेतसावति ॥४ ॥
यस्य व्रते पृथिवी नंनमीति यस्य व्रते शफवज्जर्भुरिति ।
यस्य व्रत ओषधीर्विश्वरूपाः स नः पर्जन्य महि शर्म यच्छ ॥५ ॥
दिवो नो वृष्टिं मरुतो ररीध्वं प्र पिन्वत वृष्णो अश्वस्य धाराः ।
अर्वाङ्गेन स्तनयित्नुनेह्यपो निषिंचन्नसुरः पिता नः ॥६ ॥
अभि क्रन्द स्तनय गर्भमा धा उदन्वता परि दीया रथेन ।
दृतिं सु कर्ष विषितं न्यंचं समा भवन्तूद्वतो निषादाः ॥७ ॥
महान्तं कोषमुदचा नि षिंच स्यन्दन्ता कुल्या विषिताः पुरस्तात् ।
घृतेन द्यावापृथिवी व्युन्धि सुप्रपाणं भवत्वघ्न्याभ्यः ॥८ ॥
यत्पर्जन्य कनिक्रदत्स्तनयन् हंसि दुष्कृतः । प्रतीदं विश्वं मोदते यत्किं च पृथिव्यामधि ॥९ ॥
अवर्षीर्वर्षमुदु षू गृभायाकर्धन्वान्यत्येतवा उ ।
अजीजन ओषधीर्भोजनाय कमुत प्रजाभ्योऽविदो मनीषाम् ॥१० ॥

*achchhāvada tavasaṁ gīrbhirābhiḥ stuhi parjanyaṁ namasā vivāsa /*
*kanikradadvṛṣabho jīradānū reto dadhātyoṣadhīṣu garbham //1 //*
*vi vṛkṣān hantyuta hanti rakṣaso viśvaṁ bibhāya bhuvanaṁ mahāvadhāt /*
*utānāgā īṣate vṛṣṇyāvato yatparjanyaḥ stanayan hanti duṣkṛtaḥ //2 //*
*rathīva kaśayāśvāṁ̐ abhikṣipannāvirdūtānkṛṇute varṣyam? aha /*
*dūrātiṁsahasya stanathā udīrate yatparjanyaḥ kṛṇute varṣya1 nabhaḥ //3 //*
*pra vātā vānti patayanti , vidyuta udoṣadhīrjihate pinvate svaḥ /*
*irā viśvasmai bhuvanāya jāyate yatparjanyaḥ pṛthivīṁ retasāvati //4 //*
*yasya vrate pṛthivī naṁnamīti yasya vrate śaphavajjarbhuriti /*
*yasya vrata Oṣadhīrviśvarūpāḥ sa naḥ parjanya mahi śarma yachchha //5 //*
*divo no vṛṣṭiṁ maruto rarīdhvaṁ pra pinvata vṛṣṇo aśvasya dhārāḥ /*
*arvāṅtena stanayitnunehyapo niṣiṁchannasuraḥ pitā naḥ //6 //*
*abhi kranda stanaya garbhamā dhā udanvatā pari dīyā rathena /*
*ddatiṁ su karṣa viṣitaṁ nyaṁchaṁ samā bhavantūdvato niṣādāḥ //7 //*
*mahāntaṁ koṣamudachā ni ṣiṁcha syandantā kulyā viṣitāḥ purastāt /*
*ghṛtena dyāvāpṛthivī vyundhi suprapāṇaṁ bhavatvaghnyābhyaḥ //8 //*
*yatparjanya kanikradatstanayan haṁsi duṣkṛtaḥ / pratīdaṁ viśvaṁ modate yatiṁka cha pṛthivyāmadhi //9 //*
*avarṣīrvarṣamudu ṣū gṛbhāyākardhanvānyatyetavā u /*
*ajījana Oṣadhīrbhojanāya kamuta prajābhyo'vido manīṣām //10 //*

६. पवमानः सोमः (Pavamānaḥ Somaḥ) - ऋ. (Rv.) ९.८६.४१-४५; सा. (Sv.) ५६४; १६१४; १६१६

ऋ. (Rv.) ९.८६.४१-४५

स भन्दना उदियर्ति प्रजावतीर्विश्वायुर्विश्वाः सुभरा अहर्दिवि ।
ब्रह्म प्रजावद्रयिमश्वपस्त्यं पीत इन्दविन्द्रमस्मभ्यं याजतात् ॥४१ ॥
सो अग्रे अह्नां हरिर्हर्यतो मदः प्र चेतसा चेतयते अनु द्युभिः ।
द्वा जना यातयन्नन्तरीयते नरा च शंसं दैव्यं च धर्तरि ॥४२ ॥
अंजते व्यंजते समंजते क्रतुं रिहन्ति मधुनाभ्यंजते ।
सिन्धोरुच्छवासे पतयन्तमुक्षणं हिरण्यपावाः पशुमासु गृभ्णते ॥४३ ॥
विपश्चिते पवमानाय गायत मही न धारात्यन्धो अर्षति ।

अहिर्न जूर्णामति सर्पति त्वचमत्यो न क्रीळन्नसरद्वृषा हरिः ॥४४॥
अग्रेगो राजाप्यस्तविष्यते विमानो अह्नां भुवनेष्वर्पितः ।
हरिर्घृतस्नुः सुदृशीको अर्णवो ज्योतीरथः पवते राय ओक्यः ॥४५॥
*sa bhandanā udiyarti prajāvatīrviśvāyurviśvāḥ subharā ahardivi /*
*brahma prajāvadrayimaśvapastyaṁ pīta indavindramasmabhyaṁ yājatāt //41 //*
*so agre ahnāṁ harirharyato madaḥ pra chetasā chetayate anu dyubhiḥ /*
*dvā janā yātayannantarīyate narā cha śaṁsaṁ daivyaṁ cha dhartari //42 //*
*aṁjate vyaṁjate samaṁjate ṛtuṁ rihanti madhunābhyaṁjate /*
*sindhoruchchhavāse patayantamukṣaṇaṁ hiraṇyapāvāḥ paśumāsu gṛbhṇate //43 //*
*vipaśchite pavamānāya gāyata mahī na dhārātyandho arṣati /*
*ahirna jūrṇāmati sarpati tvachamatyo na krīḷannasaradvṛṣā hariḥ //44 //*
*agrego rājāpyastaviṣyate vimāno ahnāṁ bhuvaneṣvarpitaḥ /*
*harirghṛtasnuḥ suddaśīko arṇavo jyotīrathaḥ pavate rāya Okyaḥ //45 //*

सा. (Sv.) ५६४
अंजते व्यंजते स्मंजते क्रतुं रिहन्ति मध्वाभ्यंजते ।
सिन्धोरुच्छ्वासे पतयन्तमुक्षणं हिरण्यपावाः पशुमप्सु गृभ्णते ॥११॥
*aṁjate vyaṁjate smaṁjate kratuṁ rihanti madhvābhyaṁjate /*
*sindhoruchchhvāse patayantamukṣaṇaṁ hiraṇyapāvāḥ paśumapsu gṛbhṇate //11 //*

सा. (Sv.) १६१४
अंजते वयंजते समंजते क्रतुं रिहन्ति मध्वाभ्यंजते ।
सिन्धोरुच्छ्वासे पतयन्तमुक्षणं हिरण्यपावाः पशुमप्सु गृभणते ॥१॥
*aṁjate vayaṁjate samaṁjate kratuṁ rihanti madhvābhyaṁjate /*
*sindhoruchchhvāse patayantamukṣaṇaṁ hiraṇyapāvāḥ paśumapsu gṛbhaṇate //1 //*

सा. (Sv.) १६१६
अग्रेगो राजाप्यस्तविष्यते विमानो अह्नां भुवनेष्वर्पितः ।
हरिर्घृतस्नुः सुदृशीको अर्णवो ज्योतीरथः पवते राय ओक्यः ॥३॥
*agrego rājāpyastaviṣyate vimāno ahrāṁ bhuvaneṣvarpitaḥ /*
*harirghṛtasnuḥ sudṛśīko arṇavo jyotīrathaḥ pavate rāya Okyaḥ //3 //*

७. पवमानः सोमः पूषा वा (Pavamānaḥ Somaḥ Pūṣā Vā) - ऋ. (Rv.) ९.६७.१०-१२

अविता नो अजाश्वः पूषा यामनियामनि। आ भक्षत्कन्यासु नः ॥१०॥
अयं सोमः कमर्दिने घृतं न पवते मधु। आ भक्षत्कन्यासु नः ॥११॥
अयं त आघृणे सुतो घृतं न पवते शुचि। आ भक्षत्कन्यासु नः ॥१२॥
*avitā no ajāśvaḥ pūṣā yāmaniyāmani / ā bhakṣatkanyāsu naḥ //10 //*
*ayaṁ somaḥ kamardine ghṛtaṁ na pavate madhu / ā bhakṣatkanyāsu naḥ //11 //*
*ayaṁ ta āghṛṇe suto ghṛtaṁ na pavate śuchi / ā bhakṣatkanyāsu naḥ //12 //*

८. पृथिवी (Pṛthivī) - ऋ. (Rv.) ५.८४.१-३

बळित्था पर्वतानां खिद्रं बिभर्षि पृथिवी। प्र या भूमिं प्रवत्वति मह्ना जिनोषि महिनि ॥१॥
स्तोमासस्त्वा विचारिणि प्रति ष्टोभन्त्युभिः। प्र या वाजं न हेषन्तं पेरुमस्यस्यर्जुनि ॥२॥
दृळ्हा चिद्या वनस्पीन्क्ष्मया दर्धर्ष्योजसा। यत्ते अभ्रस्य विद्युतो दिवो वर्षन्ति वृष्टयः ॥३॥
*baḷitthā parvatānāṁ khidraṁ bibharṣi pṛthivī / pra yā bhūmiṁ pravatvati mahnā jinoṣi mahini //1 //*
*stomāsastvā vichāriṇi prati ṣṭobhantyubhiḥ / pra yā vājaṁ na heṣantaṁ perumasyasyarjuni //2 //*
*ddaḷhā chidyā vanaspīnkṣamayā dardharṣyojasā / yatte abhrasya vidyuto divo varṣanti vṛṣṭayaḥ //3 //*

९. वरुणः (Varuṇaḥ) - ऋ. (Rv.) ५.८५.१-८

प्र सम्राजे बृहदर्चा गभीरं ब्रह्म प्रियं वरुणाय श्रुताय ।

वि यो जघान शमितेव चर्भोपस्तिरे पृथिवीं सूर्याय ॥१ ॥
वनेषु वय१न्तरिक्षं ततान वाजमर्वत्सु पय उस्रियासु ।
हृत्सु क्रतुं वरुणो अप्सव१ग्निं दिवि सूर्यमदधात्सोममद्रौ ॥२ ॥
नीचीनबारं वरुणः कबन्धं प्र ससर्ज रोदसी अन्तरिक्षम् ।
तेन विश्वस्य भुवनस्य राजा यवं न वृष्टिर्व्युनति भूम ॥३ ॥
उनत्ति भूमिं पृथिवीमुत द्यां यदा दुग्धं वरुणो वष्ट्यादित् ।
समभ्रेण वसत पर्वतासस्तविषीयन्तः श्रययन्त वीराः ॥४ ॥
इमामू ष्वासुरस्य श्रुतस्य महीं मायां वरुणस्य प्र वोचम् ।
मानेनेव तस्थिवाँ अन्तरिक्षे वि यो ममे पृथिवीं सूर्येण ॥५ ॥
इमामू नु कवितमस्य मायां मही देवस्य नकिरा दधर्ष ।
एकं यदुद्ना न पृणन्त्येनीरासिंचन्तीरवनयः समुद्रम् ॥६ ॥
अर्यम्यं वरुण मित्र्यं वा सखायं वा सदमिद् भ्रातरं वा ।
वेशं वा नित्यं वरुणारणंवा यत्सीमागश्चकृमा शिश्रथस्तत् ॥७ ॥
कितवासो यद्रिरिपुर्न दीवि यद्वा घा सत्यमुत यन्न विद्य ।
सर्वा ता वि ष्य शिथिरेव देवाधा ते स्याम वरुण प्रियासः ॥८ ॥

*pra samrāje bṛhadarchā gabhīraṁ brahma priyaṁ varuṇāya śrutāya |*
*vi yo jaghāna śamiteva charbhopastire pṛthivīṁ sūryāya ||1 ||*
*vaneṣu vaya1ntarikṣaṁ tatāna vājamarvatsu paya usriyāsu |*
*hṛtsu kratuṁ varuṇo apsava1giṁna divi sūryamadadhātsomamadrau ||2 ||*
*nīchīnabāraṁ varuṇaḥ kabandhaṁ pra sasarja rodasī antarikṣam |*
*tena viśvasya bhuvanasya rājā yavaṁ na vṛṣṭirvyunati bhūma ||3 ||*
*unatti bhūmiṁ pṛthivīmuta dyāṁ yadā dugdhaṁ varuṇo vaṣṭyādit |*
*samabhreṇa vasata parvatāsastaviṣīyantaḥ śrayayanta vīrāḥ ||4 ||*
*imāmū ṣvāsurasya śrutasya mahīṁ māyāṁ varuṇasya pra vocham |*
*mānenevа tasthivām̐ antarikṣe vi yo mame pṛthivīṁ sūryeṇa ||5 ||*
*imāmū nu kavitamasya māyāṁ mahī devasya nakirā dadharṣa |*
*ekaṁ yadudnā na pṛṇantyenīrāsiṁchantīravanayaḥ samudram ||6 ||*
*aryamyaṁ varuṇa mitrayaṁ vā sakhāyaṁ vā sadamid bhrātaraṁ vā |*
*veśaṁ vā nityaṁ varuṇāraṇaṁvā yatsīmāgaśchakṛmā śiśrathastat ||7 ||*
*kitavāso yadriripurna dīvi yadvā ghā satyamuta yanna vidya |*
*sarvā tā vi ṣya śithireva devādhā te syāma varuṇa priyāsaḥ ||8 ||*

१०. विश्वेदेवाः (Viśvedevāḥ) - ऋ. (Rv.) ५.४१.१-२०; ५.४२.१-१८; ५.४३.१-१७

ऋ. (Rv.) ५.४१.१-२०

को नु वां मित्रावरुणावृतायन्दिवो वा महः पार्थिवस्य वा दे ।
ऋतस्य वा सदसि त्रसीथां नो यायते वा पशुषो न वाजान् ॥१ ॥
ते नो मित्रो वरुणो अर्यमायुरिन्द्र ऋभुक्षा मरुतो जुषन्त ।
नमोभिर्वा ये दधते सुवृक्तिं स्तोमं रुद्राय मीळ्हुषे सजोषाः ॥२ ॥
आ वां येष्ठाश्विना हुवध्यै वातस्य पत्मन्रथ्यस्यपुष्टौ ।
उत वा दिवो असुराय मन्म प्रान्धांसीव यज्यवे भरध्वम् ॥३ ॥
प्र सक्षणो दिव्यः कण्वहोता त्रितो दिवः सजोषा वातो अग्निः ।
पूषा भगः प्रभृथे विश्वभोजा आजिं न जग्मुराश्वश्वतमाः ॥४ ॥
प्र वो रयिं युक्ताश्वं भरध्वं राय एषेऽवसे दधीत धीः ।
सुशेव एवैरौशिजस्य होता ये व एवा मरुतस्तुराणाम् ॥५ ॥
प्र वो वायुं रथयुजं कृणुध्वं प्र देवं विप्रं पनितारमर्कैः ।
इषुध्यव ऋतसापः पुरंधीर्वस्वीर्नो अत्र पत्नीरा धिये धुः ॥६ ॥
उप व एषे वन्द्येभिः शूषैः प्र यह्वी दिवश्चितयद्भिरर्कैः ।
उषासानक्ता विदुषीव विश्वमा हा वहतो मर्त्याय याम् ॥७ ॥

अभि वो अर्चे पोष्यावतो नृन्वास्तोष्पतिं त्वष्टारं रराणः ।
धन्या सजोषा धिष्णा नमोभिर्वनस्पतीँरोषधी राय एषे ॥८॥
तुजे नस्तने पर्वताः सन्तु स्वैतवो ये वसवो न वीराः ।
पनित आप्त्यो यजतः सदा नो वर्धान्नः शंसं नर्यो अभिष्टौ ॥९॥
वृष्णो अस्तोषि भूम्यस्य गर्भं त्रितो नपातमपां सुवृक्ति ।
गृणीते अग्निरेतरी न शूषैः शोचिष्केशो न रिणाति वना ॥१०॥
कथा महे रुद्रियाय ब्रवाम् कद्राये चिकितुषे भगाय ।
आप ओषधीरुत नोऽवन्तु द्यौर्वना गिरयो वृक्षकेशाः ॥११॥
श्रृणोतु न ऊर्जा पतिर्गिरः स नभस्तरीयाँ इषिरः परिज्मा ।
श्रृण्वन्त्वापः पुरो न शुभ्राः परि स्रुचो बबृहाणस्याद्रेः ॥१२॥
विदा चिन्नु महान्तो ये व एवा ब्रवाम दस्मा वार्यं दधानाः ।
वयश्चन सुभ्व१ आव यन्ति क्षुभा मर्तमनुयतं वधस्नैः ॥१३॥
आ दैव्यानि पार्थिवानि जन्मापश्चाच्छा सुमखाय वोचम् ।
वर्धन्तां द्यावो गिरश्चन्द्राग्रा उदा वर्धन्तामभिषाता अर्णाः ॥१४॥
पदेपदे मे जरिमा नि धायि वरूत्री वा शक्रा या पायुभिश्च ।
सिषक्तु माता मही रसा नः स्मत्सूरिभिर्ऋजुहस्त ऋजुवनिः ॥१५॥
कथा दाशेम नमसा सुदानूनेवया मरुतो अच्छोक्तौ प्रश्रवसो मरुतो अच्छोक्तौ ।
मा नोऽहिर्बुध्न्यो रिषे धादस्माकं भूदुपमातिवनिः ॥१६॥
इति चिन्नु प्रजायै पशुमत्यै देवासो वनते मर्त्यो व आ देवासो वनते मर्त्यो वः ।
अत्रा शिवां तन्वो धासिमस्या जरां चिन्मे निर्ऋतिर्जग्रसीत ॥१७॥
तां वो देवाः सुमतिमूर्जयन्तीमिषमश्याम वसवः शसा गोः ।
सा नः सुदानुर्मृळयन्ती देवी प्रति द्रवन्ती सुविताय गम्याः ॥१८॥
अभि न इळा यूथस्य माता स्मन्नदीभिरुर्वशी वा गृणातु ।
उर्वशी वा बृहद्दिवा गृणानाभ्यूर्ण्वाना प्रभृथस्यायोः ॥१९॥
सिषक्तु न ऊर्जव्यस्य पुष्टेः ॥२०॥

*ko nu vāṁ mitrāvaruṇāvṛtāyandivo vā mahaḥ pārthivasya vā de* ।
*ṛtasya vā sadasi trasīthāṁ no yāāyate vā paśuṣo na vājān* ॥1॥
*te no mitro varuṇo aryamāyurindra ṛbhukṣā maruto juṣanta* ।
*namobhirvā ye dadhate suvṛktiṁ stomaṁ rudrāya mīḻhuṣe sajoṣāḥ* ॥2॥
*ā vāṁ yeṣṭhāśvinā huvadhyai vātasya patmannathyasyapuṣṭau* ।
*uta vā divo asurāya manma prāndhāṁsīva yajyave bharadhvam* ॥3॥
*pra sakṣaṇo divyaḥ kaṇvahotā trito divaḥ sajoṣā vāto agniḥ* ।
*pūṣā bhagaḥ prabhṛthe viśvabhojā ājiṁ na jagmurāśvaśvatamāḥ* ॥4॥
*pra vo rayiṁ yuktāśvaṁ bharadhvaṁ rāya eṣe'vase dadhīta dhīḥ* ।
*suśeva evairauśijasya hotā ye va evā marutasturāṇām* ॥5॥
*pra vo vāyuṁ rathayujaṁ kṛṇudhvaṁ pra devaṁ vipraṁ panitāramarkaiḥ* ।
*iṣudhyava ṛtasāpaḥ puraṁdhīrvasvīrno atra patnīrā dhiye dhuḥ* ॥6॥
*upa va eṣe vandyebhiḥ śūṣaiḥ pra yahnī divaśchitayadbhirarkaiḥ* ।
*uṣāsānaktā viduṣīva viśvamā hā vahato martyāya yām* ॥7॥
*abhi vo arche poṣyāvato nṛnvāstoṣpatiṁ tvaṣṭāraṁ rarāṇaḥ* ।
*dhanyā sajoṣā dhiṣṇā namobhirvanaspatīm̐roṣadhī rāya eṣe* ॥8॥
*tuje nastane parvatāḥ santu svaitavo ye vasavo na vīrāḥ* ।
*panita āptyo yajataḥ sadā no vardhānnaḥ śaṁsaṁ naryo abhiṣṭau* ॥9॥
*vṛṣṇo astoṣi bhūmyasya garbha trito namātamapāṁ suvṛkti* ।
*gṛṇīte agniretarī na śūṣaiḥ śochiṣkeśo na riṇāti vanā* ॥10॥
*kathā mahe rudriyāya bravām kadrāye chikituṣe bhagāya* ।
*āpa Oṣadhīruta no'vantu dyaurvanā girayo vṛkṣakeśāḥ* ॥11॥
*śṛṇotu na ūrjā patirgiraḥ sa nabhastarīyām̐ iṣiraḥ parijmā* ।

*śṛṇvantvāpaḥ puro na śubhrāḥ pari srucho babṛhāṇasyādreḥ ॥12 ॥*
*vidā chinnu mahānto ye va evā bravāma dasmā vārya dadhānāḥ ।*
*vayaśchana subhva1 āva yanti kṣubhā martamanuyataṁ vadhasraiḥ ॥13 ॥*
*ā daivyāni pārthivāni janmāpaśchāchchhā sumakhāya vocham ।*
*vardhantāṁ dyāvo giraśchandrāgnā udā vardhantāmabhiṣātā arṇāḥ ॥14 ॥*
*padepade me jarimā ni dhāyi varūtrī vā śakrā yā pāyubhiścha ।*
*siṣaktu mātā mahī rasā naḥ smatsūribhirṛjuhasta ṛjuvaniḥ ॥15 ॥*
*kathā dāśema namasā sudānūnevayā maruto achchhoktau praśravaso maruto achchhoktau ।*
*mā no'hirbudhnyo riṣe dhādasmākaṁ bhūdupamātivaniḥ ॥16 ॥*
*iti chinnu prajāyai paśumatyai devāso vanate martyo va ā devāso vanate martyo vaḥ ।*
*atrā śivāṁ tanvo dhāsimasyā jarāṁ chinme nirṛtirjagrasīta ॥17 ॥*
*tāṁ vo devāḥ sumatimūrjayantīmiṣamaśyāma vasavaḥ śasā goḥ ।*
*sā naḥ sudānurmṛḷayantī devī prati dravantī suvitāya gamyāḥ ॥18 ॥*
*abhi na iḷā yūthasya mātā smannadībhirurvaśī vā gṛṇātu ।*
*urvaśī vā bṛhaddivā gṛṇānābhyūrṇvānā prabhṛthasyāyoḥ ॥19 ॥*
*siṣaktu na ūrjavyasya puṣṭeḥ ॥20 ॥*

ऋ. (Rv.) ५.४२.१-१८

प्र शंतमा वरुणं दीधिति गीर्मित्रं भगमदितिं नूनमश्याः ।
पृषद्योनिः पंचहोता श्रृणोत्वतूर्तपन्था असुरो मयोभुः ॥१ ॥
प्रति मे स्तोममदितिर्जगृभ्यात्सूनुं न माता हृद्यं सुशेवम् ।
ब्रह्म प्रियं देवहितं यदस्त्यहं मित्रे वरुणे यन्मयोभु ॥२ ॥
उदीरय कवितमं कवीनामुनत्तैनमभि मध्वा घृतेन ।
स नो वसूनि प्रयता हितानि चन्द्राणि देवः सविता सुवाति ॥३ ॥
समिन्द्र णो मनसा नेषि गोभिः सं सूरिभिर्हरिवः सं स्वस्ति ।
सं ब्रह्मणा देवहितं यदस्ति सं देवानां सुमत्या यियानाम् ॥४ ॥
देवो भगः सविता रायो अंश इन्द्रो वृत्रस्य संजितो धनानाम् ।
ऋभुक्षा वाज उत वा पुरंधिरवन्तु नो अमृतासस्तुरासः ॥५ ॥
मरुत्वतो अप्रतीतस्य जिष्णोरजूर्यतः प्र ब्रवामा कृतानि ।
न ते पूर्वे मघवन्नापरासो न वीर्य१ नूतनः कश्चनाप ॥६ ॥
उप स्तुहि प्रथमं रत्नधेयं बृहस्पतिं सनितारं धनानाम् ।
यः शंसते स्तुवते शंभविष्ठः पुरूवसुरागमज्जोहुवानम् ॥७ ॥
तवोतिभिः सचमाना अरिष्टा बृहस्पते मघवानः सुवीराः ।
ये अश्वदा उत वा सन्ति गोदा ये वस्त्रदाः सुभगास्तेषु रायः ॥८ ॥
विसर्माणं कृणुहि वित्तमेषां ये भुंजते अपृणन्तो न उक्थैः ।
अपव्रतान्प्रसवे वावृधानान्ब्रह्मद्विषः सूर्याद्यावयस्व ॥९ ॥
य ओहते रक्षसो देववीतावचक्रेभिस्तं मरुतो नि यात ।
यो वः शमीं शशमानस्य निन्दात्तुच्छ्यान्कामान्करते सिष्विदानः ॥१० ॥
तमु ष्टुहि यः स्विषुः सुधन्वा यो विश्वस्य क्षयति भेषजस्य ।
यक्ष्वा महे सौमनसाय रुद्रं नमोभिर्देवमसुरं दुवस्य ॥११ ॥
दमूनसो अपसो ये सुहस्ता वृष्णाः पत्नीर्नद्यो विभ्वतष्टाः ।
सरस्वती बृहद्दिवोत राका दशस्यन्तीर्वरिवस्यन्तु शुभ्राः ॥१२ ॥
प्र सू महे सुशरणाय मेधां गिरं भरे नव्यसीं जायमानाम् ।
य आहना दुहितुर्वक्षणासु रूपा मिनानो अकृणोदिदं नः ॥१३ ॥
प्र सुष्टुतिः स्तनयन्तं रुवन्तमिळस्पतिं जरितर्नूनमश्याः ।
यो अब्दिमाँ उदनिमाँ इयर्ति प्र विद्युता रोदसी उक्षमाणः ॥१४ ॥

एषः स्तोमो मारुतं शर्धो अच्छा रुद्रस्य सूनूँर्युवन्यूँरुदश्याः ।
कामो राये हवते मा स्वस्त्युप स्तुहि पृषदश्वाँ अयासः ॥१५॥
प्रैष स्तोमः पृथिवीमन्तरिक्षं वनस्पतींरोषधी राये अश्याः ।
देवोदेवः सुहवो भूतु मह्यं मा नो माता पृथिवी दुर्मतौ धात् ॥१६॥
उरौ देवा अनिबाधे स्याम ॥१७॥
समश्विनोरवसा नूतनेन मयोभुवा सुप्रणीति गमेम ।
आ नो रयिं वहतमोत वीराना विश्वान्यमृता सौभगानि ॥१८॥
*pra śaṁtamā varuṇaṁ dīdhiti gīrmitraṁ bhagamaditiṁ nūnamaśyāḥ ।*
*pṛṣadyoniḥ paṁchahotā śṛṇotvatūrtapanthā asuro mayobhuḥ ॥1॥*
*prati me stomamaditirjagṛbhyātsūnuṁ na mātā hṛdyaṁ suśevam ।*
*brahma priyaṁ devahitaṁ yadastyahaṁ mitre varuṇe yanmayobhu ॥2॥*
*udīraya kavitamaṁ kavīnāmunattainamabhi madhvā ghṛtena ।*
*sa no vasūni prayatā hitāni chandrāṇi devaḥ savitā suvāti ॥3॥*
*samindra ṇo manasā neṣi gobhiḥ saṁ sūribhirharivaḥ saṁ svasti ।*
*saṁ brahmaṇā devahitaṁ yadasti saṁ devānāṁ sumatyā yiāyānām ॥4॥*
*devo bhagaḥ savitā rāyo aṁśa indro vṛtrasya saṁjito dhanānām ।*
*ṛbhukṣā vāja uta vā puraṁdhiravantu no amṛtāsasturāsaḥ ॥5॥*
*marutvato apratītasya jiṣṇorajūryataḥ pra bravāmā kṛtāni ।*
*na te pūrve maghavannāparāso na vīrya1 nūtanaḥ kaśchanāpa ॥6॥*
*upa stuhi prathamaṁ ratnadheyaṁ bṛhaspatiṁ sanitāraṁ dhanāānām ।*
*yaḥ śaṁsate stuvate śaṁbhaviṣṭhaḥ purūvasurāgamajjohuvānam ॥7॥*
*tavotibhiḥ sachamānā ariṣṭā bṛhaspate maghavānaḥ suvīrāḥ ।*
*ye aśvadā uta vā santi godā ye vastradāḥ subhagāsteṣu rāyaḥ ॥8॥*
*visarmāṇaṁ kṛṇuhi vittameṣāṁ ye bhuṁjate apṛṇanto na ukthaiḥ ।*
*apavratānprasave vāvṛdhānānbrahmadviṣaḥ sūryādyāvayasva ॥9॥*
*ya Ohate rakṣaso devavītāvachakrebhistaṁ maruto ni yāta ।*
*yo vaḥ śamīṁ śaśamānasya nindāttuchchhyānkāmānkarate siṣvidānaḥ ॥10॥*
*tamu ṣṭuhi yaḥ sviṣuḥ sudhanvā yo viśvasya kṣayati bheṣajasya ।*
*yakṣavā mahe saumanasāya rudaṁ namobhirdevamasuraṁ duvasya ॥11॥*
*damūnaso apaso ye suhastā vṛṣṇāḥ patnīrnadyo vibhvataṣṭāḥ ।*
*sarasvatī bṛhaddivota rākā daśasyantīrvarivasyantu śubhrāḥ ॥12॥*
*pra sū mahe suśaraṇāya medhāṁ giraṁ bhare navyasīṁ jāyamānām ।*
*ya āhanā duhiturvakṣaṇāsu rūpā mināno akṛṇodidaṁ naḥ ॥13॥*
*pra suṣṭutiḥ stanayantaṁ ruvantamiḷaspatiṁ jaritarnūnamaśyāḥ ।*
*yo abdimām̐ udanimām̐ iyarti pra vidyutā rodasī ukṣamāṇaḥ ॥14॥*
*eṣaḥ stomo mārutaṁ śardho achchhā rudrasya sūnūm̐ryuvanyūm̐rudaśyāḥ ।*
*kāmo rāye havate mā svastyupa stuhi pṛṣadaśvām̐ ayāsaḥ ॥15॥*
*praiṣa stomaḥ pṛthivīmantarikṣaṁ vanaspatīm̐roṣadhī rāye aśyāḥ ।*
*devodevaḥ suhavo bhūtu mahyaṁ mā no mātā pṛthivī durmatau dhāt ॥16॥*
*urau devā anibādhe syāma ॥17॥*
*samaśvinoravasā nūtanena mayobhuvā supraṇīti gamema ।*
*ā no rayiṁ vahatamota vīrānā viśvānyamṛtā saubhagāni ॥18॥*

ऋ. (Rv.) ५.४३.१-१७

आ धेनवः पयसा तूर्ण्यर्था अमर्धन्तीरुप नो यन्तु मध्वा ।
महो राये बृहतीः सप्त विप्रो मयोभुवो जरिता जोहवीति ॥१॥
आ सुष्टुती नमसा वर्तयध्यै द्यावा वाजाय पृथिवी अमृध्रे ।
पिता माता मधुवचाः सुहस्ता भरेभरे नो यशसावविष्टाम् ॥२॥
अध्वर्यवश्चकृवांसो मधूनि प्र वायवे भरत चारु शुक्रम् ।

होतेव नः प्रथमः पाह्यस्य देव मध्वो ररिमा ते मदाय ॥३ ॥
दश क्षिपो युंजते बाहू अद्रिं सोमस्य या शमितारा सुहस्ता ।
मध्वो रसं सुगभस्तिर्गिरिष्ठां चनिश्चदद् दुदुहे शुक्रमंशुः ॥४ ॥
असावि ते जुजुषाणाय सोमः ऋत्वे दक्षाय बृहते मदाय ।
हरी रथे सुधुरा योगे अर्वागिन्द्रं प्रिया कृणुहि हूयमानः ॥५ ॥
आ नो महीमरमतिं सजोषा ग्नां देवी नमसा रातहव्याम् ।
मधोर्मदाय बृहतीमृतजामाग्ने वह पथिभिर्देवयानैः ॥६ ॥
अंजन्ति यं प्रथयन्तो न बिप्रा वपावन्तं नाग्निना तपन्तः ।
पितुर्न पुत्र उपसि प्रेष्ठ आ घर्मो अग्निमृतयन्नसादि ॥७ ॥
अच्छा मही बृहती शंतमा गीर्दूतो न गन्त्वश्विना हुवध्यै ।
मयोभुवा सरथा यातमर्वाग्गन्तं निधिंधुरमाणिर्न नाभिम् ॥८ ॥
प्र तवयसो नमउक्तिं तुरस्याहं पूष्ण उत वायोरदिक्षि ।
या राधसा चोदितारा मतीनां या वाजस्य द्रविणोदा उत त्मन् ॥९ ॥
आ नामभिर्मरुतो वक्षि विश्वानां रूपेभिर्जातवेदो हुवानः ।
यां गिरो जरितुः सुष्टुतिं च विश्वे गन्त मरुतो विश्व ऊती ॥१० ॥
नो दिवो बृहतः पर्वतादा सरस्वती यजता गन्तु याम् ।
हवं देवी जजुषाणा घृताची शग्मां नो वाचमुशती श्रृणोतु ॥११ ॥
आ वेधसं नीलपृष्ठं बृहन्तं बृहस्पतिं सदने सादयध्वम् ।
सादद्योनिं दम आ दीदिवांसं हिरण्यवर्णमरुषं सपेम ॥१२ ॥
आ धर्णसिर्बृहद्दिवो रराणो विश्वेभिर्गन्त्वोमभिर्हुवानः ।
ग्ना वसान ओषधीरमृध्रस्त्रिधातुश्रृंगो वृषभो वयोधाः ॥१३ ॥
मातुष्पदे परमे शुक्र आयोर्विपन्यवो रास्पिरासो अग्मन् ।
सुशेव्यं नमसा रातहव्याः शिशुं मृजन्त्यायवो न वासे ॥१४ ॥
बृहद्वयो बृहते तुभ्यमग्ने धियाजुरो मिथुनासः सचन्त ।
देवोदेवः सुहवो भूतु मह्यं मा नो माता पृथिवी दुर्मतौ धात् ॥१५ ॥
उरौ देवा अनिबाधे स्याम ॥१६ ॥
समश्विनोरवसा नूतनेन मयोभुवा सुप्रणीती गमेम ।
आ नो रयिं वहतमोत वीराना विश्वान्यमृता सौभगानि ॥१७ ॥

*ā dhenavaḥ payasā tūrṇyarthā amardhantīrupa no yantu madhvā /*
*maho rāye bṛhatīḥ sapta vipro mayobhuvo jaritā johavīti //1 //*
*ā suṣṭutī namasā vartayadhyai dyāvā vājāya pṛthivī amṛdhre /*
*pitā mātā madhuvachāḥ suhastā bharebhare no yaśasāvaviṣṭām //2 //*
*adhvaryavaśchakṛvāṁso madhūni pra vāyave bharata chāru śukram /*
*hoteva naḥ prathamaḥ pāhyasya deva madhvo rarimā te madāya //3 //*
*daśa kṣipo yuṁjate bāhū adriṁ somasya yā śamitārā suhastā /*
*madhvo rasaṁ sugabhastirgiriṣṭhāṁ chaniśchadad duduhe śukramaṁśuḥ //4 //*
*asāvi te jujuṣāṇāya somaḥ ṛtve dakṣāya bṛhate madāya /*
*harī rathe sudhurā yoge arvāgindraṁ priyā kṛṇuhi hūyamānaḥ //5 //*
*ā no mahīmaramatiṁ sajoṣā gnāṁ devī namasā rātahavyām /*
*madhormadāya bṛhatīmṛtajāmāgne vaha pathibhirdevayānaiḥ //6 //*
*aṁjanti yaṁ prathayanto na biprā vapāvantaṁ nāgninā tapantaḥ /*
*piturna putra upasi preṣṭha ā gharmo agnimṛtayannasādi //7 //*
*achchhā mahī bṛhatī śaṁtamā gīrdūto na gantvaśvinā huvadhyai /*
*mayobhuvā sarathā yātamarvāggantaṁ nidhiṁdhuramāṇirna nābhim //8 //*
*pra tavayaso namauktiṁ turasyāhaṁ pūṣṇa uta vāyoradikṣi /*
*yā rādhasā choditārā matīnāṁ yā vājasya draviṇodā uta tman //9 //*
*ā nāmabhirmaruto vakṣi viśvānāṁ rūpebhirjātavedo huvānaḥ /*
*yāṁ giro jarituḥ suṣṭutiṁ cha viśve ganta maruto viśva ūtī //10 //*

*no divo bṛhataḥ rpavatādā sarasvatī yajatā gantu yām* ।
*havaṁ devī jajuṣāṇā ghṛtāchī śagmāṁ no vāchamuśatī śṛṇotu ॥11 ॥*
*ā vedhasaṁ nīlapṛṣṭhaṁ bṛhantaṁ bṛhaspatiṁ sadane sādayadhvam* ।
*sādadyoniṁ dama ā dīdivāṁsaṁ hiraṇyavarṇamaruṣaṁ sapema ॥12 ॥*
*ā dharṇasirbṛhaddivo rarāṇo viśvebhirgantvomabhirhuvānaḥ* ।
*gnā vasāna Oṣadhīramṛdhrastridhātuśṛṁgo vṛṣabho vayodhāḥ ॥13 ॥*
*mātuṣpade parame śukra āyorvipanyavo rāspirāso agman* ।
*suśevyaṁ namasā rātahavyāḥ śiśuṁ mṛjantyāyavo na vāse ॥14 ॥*
*bṛhadvayo bṛhate tumyamagne dhiyājuro mithunāsaḥ sachanta* ।
*devodevaḥ suhavo bhūtu mahyaṁ mā no mātā pṛthivī durmatau dhāt ॥15 ॥*
*urau devā anibādhe syāma ॥16 ॥*
*samaśvinoravasā nūtanena mayobhuvā supraṇītī gamema* ।
*ā no rayiṁ vahatamota vīrānā viśvānyamṛtā saubhagāni ॥17 ॥*

११. सूर्यः (Sūryaḥ) - ऋ. (Rv.) ५.४०.५

यत्त्वा सूर्य स्वर्भानुस्तमसाविध्यदासुरः । अक्षेत्रविद्यथा मुग्धो भुवनान्यदीधयुः ॥५॥
*yattvā sūrya svarbhānustamasāvidhyadāsuraḥ । akṣetravidyathā mugdho bhuvanānyadīdhayuḥ ॥5 ॥*

## २६. अथर्वणः (Atharvaṇaḥ)

१. ईश्वरः (Īśvaraḥ) - य. (Yv.)३७.१९-२१

हृदे त्वा मनसे त्वा दिवे त्वा सूर्य्याय त्वा । ऊर्ध्वोऽअध्वरं दिवि देवेषु धेहि ॥१९॥
पिता नोऽसि पिता नो बोधि नमस्तेऽअस्तु मा मा हिंसीः ।
त्वष्ढन्तस्त्वा सपेम पुत्रान् पशून् मयिं धेहि प्रजामस्मासु धेह्यरिष्टाहं सह पत्या भूयासम् ॥२०।
अहः केतुना जुषतांसुजयोतिर्ज्योतिषा स्वाहा । रात्रिः केतुनां जुषतांसुज्योतिर्ज्योतिषा स्वाहा ॥२१॥
*hṛde tvā manase tvā dive tvā sūryyāya tvā । ūrdhvo'adhvaraṁ divi deveṣu dhehi ॥19 ॥*
*pitā no'si pitā no bodhi namaste'astu mā mā hiṁsīḥ* ।
*tvaṣṭmantastvā sapema putrān paśūn mayiṁ dhehi prajāmasmāsu dhehyariṣṭāhaṁ saha patyā bhūyāsam ॥20 ।*
*ahaḥ ketunā juṣatāṁsujayotirjyotiṣā svāhā । rātriḥ ketunāṁ juṣatāṁsujyotirjyotiṣā svāhā ॥21 ॥*

२. पूषा (Pūṣā) - य. (Yv.)३८.३

अदित्यै राम्नासीन्द्राणयाऽउष्णीषः । पूषांसि धर्माय दीष्व ॥३॥
*adityai rāmnāsīndrāṇayā'uṣṇīṣaḥ । pūṣāṁsi dharmāya dīṣva ॥3 ॥*

३. सरस्वती (Sarasvatī) - य. (Yv.)३८.२ , ४

य. (Yv.)३८.२

इडऽएह्यदितऽएहि सरस्वत्येहि । असावेह्यसावेह्यसावेहि ॥२॥
*iḍa'ehyadita'ehi sarasvatyehi । asāvehyasāvehyasāvehi ॥2 ॥*

य. (Yv.)३८.४

अश्विभ्यां पिन्वस्व सरस्वत्यै पिन्वस्वेन्द्राय पिन्वस्व । स्वाहेन्द्रवत् स्वाहेन्द्रवत् स्वाहेन्द्रवत् ॥४॥
*aśvibhyāṁ pinvasva sarasvatyai pinvasvendrāya pinvasva । svāhendravat svāhendravat svāhendravat ॥4 ॥*

४. सविता (Savitā) - य. (Yv.)३८.१

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम । आ ददऽदित्यै रास्नासि ॥१॥
*devasya tvā savituḥ prasave'śvinorbāhubhyāṁ pūṣṇo hastābhyāma । ā dada'dityai rāsnāsi ॥1 ॥*

## २७. अथर्वा (Atharvā)

१. अक्षिः मनः (Akṣiḥ Manaḥ) - अ. (Av.) ७.३६.१

अक्षयौनौ मधुसंकाशे अनीकं नौ समंजनम्। अन्तः कृणुष्व मां हृदि मन इन्नौ सहासति ॥१।

२. अग्निः (Agniḥ) - अ. (Av.) १.९.३-४; २.१३.१; २.१९.१-५; २.२९.१-७; ३.१.१; ३.२.१-२; ४.४.६; ४.१५.१०; ५.६.१०; ५.८.१; २; ५.२४.२; ६.११०.१-३; ६.१११.१-४; ६.११२.१-३; ७.६१.१-२; ७.७१.१; ७.७८.१-२; १८.२.४; ३४; १८.३.५-६; १८.४.८८; १९.३७.१-३; १९.२६.१-४

अ. (Av.) १.९.३-४

येनेन्द्राय समभरः पयांस्युत्तमेन ब्रह्मणा जातवेदः ।
तेन त्वमग्न इह वर्धयेमं सजातानां श्रैष्ठ्य आ धेह्येनम् ॥३।
ऐषां यामुत वर्चो ददेऽहं रायस्पोषमुत चित्तान्यग्ने ।
सपत्ना अस्मदधरे भवन्तूत्तमं नाकमधि रोहयेमम् ॥४॥

*yenendrāya samabharaḥ payāṁsyuttamena brahmaṇā jātavedaḥ ।*
*tena tvamagna iha vardhayemaṁ sajātānāṁ śraiṣṭhya ā dhehyenam ॥3 ।*
*aiṣāṁ yāmuta varcho dade'haṁ rāyaspoṣamuta chittānyagne ।*
*sapatnā asmadadhare bhavantūttamaṁ nākamadhi rohayemam ॥4 ॥*

अ. (Av.) २.१३.१

आयुर्दा अग्ने जरसं वृणानो घृतप्रतीको घृतपृष्ठो अग्ने ।
घृतं पीत्वा मधु चारु गव्यं पितेव पुत्रनभि रक्षतादिमम् ॥१॥

*āyurdā agne jarasaṁ vṛṇāno ghṛtapratīko ghṛtapṛṣṭho agne ।*
*ghṛtaṁ pītvā madhu chāru gavyaṁ piteva putranabhi rakṣatādimam ॥1 ॥*

अ. (Av.) २.१९.१-५

अग्ने यत् ते तपस्तेन तं प्रति तप योऽस्मान् द्वेष्टि यं वयं द्विष्मः ॥१॥
अग्ने यत् ते हरस्तेन तं प्रति हर योऽस्मान् द्वेष्टि यं वयं द्विषमः ॥२॥
अग्ने यत् तेऽर्चिस्तेन तं प्रत्यर्च योऽस्मान् द्वेष्टि यं वयं द्विष्मः ॥३॥
अग्ने यत् ते शोचिस्तेन तं प्रति शोच योऽस्मान् द्वेष्टि यं वयं द्विष्मः ॥४॥
अग्ने यत् ते तेजस्तेन तमतेजसं कृणु योऽस्मान् द्वेष्टि यं वयं द्विष्मः ॥५॥

*agne yat te tapastena taṁ prati tapa yo3smān dveṣṭi yaṁ vayaṁ dviṣmaḥ ॥1 ॥*
*agne yat te harastena taṁ prati hara yo3smān dveṣṭi yaṁ vayaṁ dviṣamaḥ ॥2 ॥*
*agne yat te'rchistena taṁ pratyarcha yo3smān dveṣṭi yaṁ vayaṁ dviṣmaḥ ॥3 ॥*
*agne yat te śochistena taṁ prati śocha yo3smān dveṣṭi yaṁ vayaṁ dviṣmaḥ ॥4 ॥*
*agne yat te tejastena tamatejasaṁ kṛṇu yo3smān dveṣṭi yaṁ vayaṁ dviṣmaḥ ॥5 ॥*

अ. (Av.) २.२९.१-७

पार्थिवस्य रसे देवा भगस्य तन्वो३ बले ।
आयुष्यमस्मा अग्निः सूर्यो वर्च आ धाद् बृहस्पतिः ॥१॥
आयुरस्मै धेहि जातवेदः प्रजां त्वष्टरधिनिधेह्यस्मै ।
रायस्पोषं सवितरा सुवास्मै शतं जीवाति शरदस्तवायम् ॥२॥
आशीर्ण ऊर्जमुत सौप्रजास्त्वं दक्षं धत्तं द्रविणं सचेतसौ ।
जयं क्षेत्राणि सहसायमिन्द्र कृण्वानो अन्यानधरान्त्सपत्नान् ॥३॥
इन्द्रेण दत्ते वरुणेन शिष्टो मरुद्भिरुग्रः प्रहितो न आगन् ।
एष वां द्यावापृथिवी उपस्थे मा क्षुधन्मा तृषत् ॥४॥
ऊर्जमस्मा ऊर्जस्वती धत्तं पयो अस्मै पयस्वती धत्तम् ।
ऊर्जमस्मै द्यावापृथिवी अधातां विश्वे देवा मरुत ऊर्जमापः ॥५॥
शिवाभिष्टे हृदयं तर्पयाम्यनमीवो मोदिषीष्ठाः सुवर्चाः ।
सवासिनौ पिबतां मन्थमेतमश्विनो रूपं परिधाय मायाम् ॥६॥
इन्द्र एतां ससृजे विद्धो अग्र ऊर्जा स्वधामजरां सा त एषा ।
तया त्वं जीव शदः सुवर्चा मा त आ सुस्रोद् भिषजस्ते अक्रन् ॥७॥

*pārthivasya rase devā bhagasya tanvo3 bale ।*
*āyuṣyamasmā agniḥ sūryo varcha ā dhād bṛhaspatiḥ ॥1 ॥*
*āyurasmai dhehi jātavedaḥ prajāṁ tvaṣṭaradhinidhehyasmai ।*
*rāyaspoṣaṁ savitarā suvāsmai śataṁ jīvāti śaradastavāyam ॥2 ॥*
*āśīrṇa ūrjamuta sauprajāstvaṁ dakṣaṁ dhattaṁ draviṇaṁ sachetasau ।*
*jayaṁ kṣetrāṇi sahasāyamindra kṛṇvāno anyānadharāntsapatnān ॥3 ॥*
*indreṇa datte varuṇena śiṣṭo marudbhirugraḥ prahito na āgan ।*
*eṣa vāṁ dyāvāpṛthivī upasthe mā kṣudhanmā tṛṣat ॥4 ॥*
*ūrjamasmā ūrjasvatī dhattaṁ payo asmai payasvatī dhattam ।*
*ūrjamasmai dyāvāpṛthivī adhātāṁ viśve devā maruta ūrjamāpaḥ ॥5 ॥*
*śivābhiṣṭe hṛdayaṁ tarpayāmyanamīvo modiṣīṣṭhāḥ suvarchāḥ ।*
*savāsinau pibatāṁ manthametamaśvino rūpaṁ paridhāya māyām ॥6 ॥*
*indra etāṁ sasṛje viddho agra ūrjā svadhāmajarāṁ sā ta eṣā ।*
*tayā tvaṁ jīva śadaḥ suvarchā mā ta ā susrod bhiṣajaste akran ॥7 ॥*

अ. (Av.) ३.१.१

अग्निर्नः शत्रून् प्रत्येतु विद्वान् प्रतिदहन्नभिषस्तिमरातिम् ।
स सेनां मोहयतु परेषां निर्हस्तांश्च कृणवज्जातवेदाः ॥१ ॥
*agnirnaḥ śatrūn pratyetu vidvān pratidahannabhiṣastimarātim ।*
*sa senāṁ mohayatu pareṣāṁ nirhastāṁścha kṛṇavajjātavedāḥ ॥1 ॥*

अ. (Av.) ३.२.१-२

अग्निर्नोदूतः प्रत्येतु विद्वान् प्रतिदहन्नाभिशस्तिमरातिम् ।
स चित्तानि मोहयतु परेषां निर्हस्ताश्च कृणवज्जातवेदाः ॥१ ॥
अयमग्निरमूमुहद् यानि चित्तानि वो हृदि ।
वि वो धमत्वोकसः प्र वो धमतु सर्वतः ॥२ ॥
*agnirnodūtaḥ pratyetu vidvān pratidahannābhiśastimarātim ।*
*sa chittāni mohayatu pareṣāṁ nirhastāścha kṛṇavajjātavedāḥ ॥1 ॥*
*ayamagniramūmuhad yāni chittāni vo hṛdi ।*
*vi vo dhamatvokasaḥ pra vo dhamatu sarvataḥ ॥2 ॥*

अ. (Av.) ४.१५.१०

अपामग्निस्तनूभिः संविदानो य ओषधीनामधिपा बभूव ।
स नो वर्षं वनूतां जातवेदाः प्राणं प्रजाभ्यो अमृतं दिवस्परि ॥१ ॥
*apāmagnistanūbhiḥ saṁvidāno ya Oṣadhīnāmadhipā babhūva ।*
*sa no varṣaṁ vanūtāṁ jātavedāḥ prāṇaṁ prajābhyo amṛtaṁ divaspari ॥1 ॥*

अ. (Av.) ५.६.१०

यो३स्मांश्चक्षुषा मनसा चित्त्याकूत्या च यो अघायुरभिदासात् ।
त्वं तानग्ने मेन्यामेनीन् कृणु स्वाहा ॥ १० ॥
*yo3smāṁśchakṣuṣā manasā chittyākūtyā cha yo aghāyurabhidāsāt ।*
*tvaṁ tānagne menyāmenīn kṛṇu svāhā ॥ 10 ॥*

अ. (Av.) ५.८.१-२

वैकङ्कतेनेध्मेन देवेभ्य आज्यं वह ।
अग्ने ताँ इह मादय सर्व आ यन्तु मे हवम् ॥१ ॥
इन्द्रा याहि मे हवमिदं करिष्यामि तच्छृणु ।
इम ऐन्द्रा अतिसारा आकूतिं सं नमन्तु मे ॥
तेभिः शकेम वीर्य१ जातवेदस्तनूवशिन् ॥२ ॥
*vaikaṅkatenedhmena devebhya ājyaṁ vaha ।*
*agne tāṁ̐ iha mādaya sarva ā yantu me havam ॥1 ॥*
*indrā yāhi me havamidaṁ kariṣyāmi tachchhṛṇu ।*

*ima aindrā atisārā ākūtiṁ saṁ namantu me //*
*tebhiḥ śakema vīrya1 jātavedastanūvaśin //2 //*

अ. (Av.) ५.२४.२

अग्निर्वनस्पतीनामधिपतिः स मावतुः अस्मिन् ब्रह्मण्यस्मिन् कर्मण्यस्यां ।
पुरोधायामस्यां प्रतिष्ठायमस्यां चित्त्यामस्यामाकूत्यामस्यामाशिष्यस्या देवहूत्यां स्वाहा ॥२ ॥
*agnirvanaspatīnāmadhipatiḥ sa māvatuḥ asmin brahmaṇyasmin karmaṇyasyāṁ /*
*purodhāyāmasyāṁ pratiṣṭhāyamasyāṁ chittyāmasyāmākūtyāmasyāmāśiṣyasyā devahūtyāṁ svāhā //2 //*

अ. (Av.) ६.११०.१-३

प्रत्नो हि कमीड्यो अध्वरेषु सनाच्च होता नव्यश्च सत्सि ।
स्वां चाग्ने तन्वंपिप्रायस्वास्मभ्यं च सौभगमा यजस्व ॥१ ॥
ज्येष्ठघ्न्यां जातो विचृतोर्यमस्य मूलबर्हणात् परि पाह्येनम् ।
अत्येनं नेषद् दुरितानि विश्वा दीर्घायुत्वाय शतशारदाय ॥२ ॥
व्याघ्रेऽह्न्यजनिष्ट वीरो नक्षत्रजा जायमानः सुवीरः ।
स मा वधीत् पितरं वर्धमानो मा मातरं प्र मिनीज्जनित्रीम् ॥३ ॥
*pratno hi kamīḍyo adhvareṣu sanāchcha hotā navyaścha satsi /*
*svāṁ chāgne tanvaṁpiprāyasvāsmabhyaṁ cha saubhagamā yajasva //1 //*
*jyeṣṭhadhnyāṁ jāto vichṛtoryamasya mūlabarhaṇāt pari pāhyenam /*
*atyenaṁ neṣad duritāni viśvā dīrghāyutvāya śataśāradāya //2 //*
*vyāghre'hnyajaniṣṭa vīro nakṣatrajā jāyamānaḥ suvīraḥ /*
*sa mā vadhīt pitaraṁ vardhamāno mā mātaraṁ pra minījjanitrīm //3 //*

अ. (Av.) ६.१११.१-४

इमं मे अग्ने पुरुषं मुमुग्ध्ययं यो बद्धः सुयतो लालपीति ।
अतोऽधिं ते कृणवद् भागधेयं यदानुन्मदितोऽसति ॥१ ॥
अग्निष्टे नि शमयतु यदि ते मन उद्युतम् ।
कृणोमि विद्वान् भेषजं यथानुन्मदितोऽससि ॥२ ॥
देवैनसादुन्मदितमुन्मत्तं रक्षसस्परि ।
कुणोमि विद्वान् भेषजं यदानुन्मदितोऽसति ॥३ ॥
पुनस्त्वा दुरप्सरसः पुनरिन्द्रः पुनर्भगः ।
पुनस्त्वा दुर्विश्वे देवा यथानुन्मदितोऽससि ॥४ ॥
*imaṁ me agne puruṣaṁ mumugdhyayaṁ yo baddhaḥ suyato lālapīti /*
*ato'dhiṁ te kṛṇavad bhāgadheyaṁ yadānunmadito'sati //1 //*
*agniṣṭe ni śamayatu yadi te mana udyutam /*
*kṛṇomi vidvān bheṣajaṁ yathānunmadito'sasi //2 //*
*devainasādunmaditamunmattaṁ rakṣasaspari /*
*kuṇomi vidvān bheṣajaṁ yadānunmadito'sati //3 //*
*punastvā durapsarasaḥ punarindraḥ punarbhagaḥ /*
*punastvā durviśve devā yathānunmadito'sasi //4 //*

अ. (Av.) ६.११२.१-३

मा ज्येष्ठं वधीदयमग्न एषा मूलबर्हणात् पाह्येनम् ।
स ग्राह्याः पाशान् वि चृत प्रजानन् तुभ्यं देवा अनु जानन्तु विश्वे ॥१ ॥
उन्मुंच पाशांस्त्वमग्न एषां त्रयस्त्रिभिरुत्सिता येभिरासन् ।
स ग्राह्याः पाशान् वि चृत प्रजानन् पितापुत्रौ मातरं मुंच सर्वान् ॥२ ॥
येभिः पाशैः परिवित्तो विबद्धोंऽगे अंग आर्पित उत्सितश्च ।
वि ते मुच्यन्तां विमुचो हि सन्ति भ्रूणघ्नि पूषन् दुरितानि मुक्ष्व ॥३ ॥
*mā jyeṣṭhaṁ vadhīdayamagna eṣā mūlabarhaṇāt pāhyenam /*
*sa grāhyāḥ pāśān vi chṛta prajānan tubhyaṁ devā anu jānantu viśve //1 //*

*unmuṁcha pāśāṁstvamagna eṣāṁ trayastribhirutsitā yebhirāsan* ।
*sa grāhyāḥ pāśān vi chṛta prajānan pitāputrau mātaraṁ muṁcha sarvān* ॥2 ॥
*yebhiḥ pāśaiḥ parivitto vibaddhoṁ'ge aṁga ārpita utsitaścha* ।
*vi te muchyantāṁ vimucho hi santi bhrūṇaghni pūṣan duritāni mukṣava* ॥3 ॥

अ. (Av.) ७.६१.१-२

यदग्ने तपसा तप उपतप्यामहे तपः । प्रियाः श्रुतस्य भूयास्मायुष्मन्तः सुमेधसः ॥१ ॥
अग्ने तपस्तप्यामह उप तप्यामहे तपः । श्रुतानिं शृण्वन्तो वयमायुष्मन्तः सुमेधसः ॥२ ॥
*yadagne tapasā tapa upatapyāmahe tapaḥ । priyāḥ śrutasya bhūyāsmāyuṣmantaḥ sumedhasaḥ* ॥1 ॥
*agne tapastapyāmaha upa tapyāmahe tapaḥ । śrutāniṁ śṛṇvanto vayamāyuṣmantaḥ sumedhasaḥ* ॥2 ॥

अ. (Av.) ७.७१.१

परि त्वाग्ने पुरं वयं विप्रं सहस्य धीमहि । धृषद्वर्ण दिवेदिवे इन्तारं भंगुरावतः ॥ १ ॥
*pari tvāgne puraṁ vayaṁ vipraṁ sahasya dhīmahi । dhṛṣadvarṇa divedive intāraṁ bhaṁgurāvataḥ* ॥ 1 ॥

अ. (Av.) ७.७८.१-२

वि ते मुंचामि रशनां वि योक्त्रं वि नियोजनम् ।
इहैव त्वमजस्र एध्यग्ने ॥१ ॥
अस्मै क्षत्राणि धारयन्तमग्ने युनजिम त्वा ब्रह्मणा दैव्येन ।
दीदिह्य१स्मभ्यं द्रविणेह भद्रं प्रेमं वोचो हविर्दा देवतासु ॥२ ॥
*vi te muṁchāmi raśanāṁ vi yoktraṁ vi niyojanam* ।
*ihaiva tvamajasra edhyagne* ॥1 ॥
*asmai kṣatrāṇi dhārayantamagne yunajima tvā brahmaṇā daivyena* ।
*dīdihya1smabhyaṁ draviṇeha bhadraṁ premaṁ vocho havirdā devatāsu* ॥2 ॥

अ. (Av.) १८.२.४

मैनमग्ने वि दहो माभि शूशुचो मास्य त्वचं चिक्षिपो मा शरीरम् ।
श्रृतं यदा करसि जातवेदोऽथेममेनं प्र हिणुतात् पितॄँरुप ॥४ ॥
*mainamagne vi daho mābhi śūśucho māsya tvachaṁ chikṣipo mā śarīram* ।
*śṛtaṁ yadā karasi jātavedo'themamenaṁ pra hiṇutāt pitṝṁrupa* ॥4 ॥

अ. (Av.) १८.२.३४

ये निखाता ये परोप्ता ये दग्धा ये चोद्धिताः । सर्वास्तानग्न आ वह पितृन हविषे उत्तवे ॥३४ ॥
*ye nikhātā ye paroptā ye dagdhā ye choddhitāḥ । sarvāstānagna ā vaha pitṛna haviṣe uttave* ॥34 ॥

अ. (Av.) १८.३.५-६

उप द्यामुप वेतसमवत्तरो नदीनाम् । अग्ने पित्तमपामसि ॥५ ॥
यं त्वमग्ने समदहस्तमु निर्वापया पुनः । क्याम्बूरत्र रोहतु शाण्डदूर्वा व्यल्कशा ॥६ ॥
*upa dyāmupa vetasamavattaro nadīnām । agne pittamapāmasi* ॥5 ॥
*yaṁ tvamagne samadahastamu nirvāpayā punaḥ । kyāmbūratra rohatu śāṇḍadūrvā vyalkaśā* ॥6 ॥

अ. (Av.) १८.४.८८

आ त्वाग्न इधीमहि द्युमन्तं देवाजरम् ।
यद् घ सा ते पनीयसी समिद् दीदयति द्यवि । इषं स्तोतृभ्य आ भर ॥८८ ॥
*ā tvāgna idhīmahi dyumantaṁ devājaram* ।
*yad gha sā te panīyasī samid dīdayati dyavi । iṣaṁ stotṛbhya ā bhara* ॥88 ॥

अ. (Av.) १९.३७.१-३

इदं वर्चो अग्निना दत्तमागन् भर्गो यशः सह ओजो वयो बलम् ।
त्रयस्त्रिंशद् यानि च वीर्याणि तान्यग्निः प्र ददातु मे ॥१ ॥

वर्च आ धेहि मे तन्वां३ सह ओजो वयो बलम् ।
इन्द्रियाय तवा कर्मणे वीर्याय प्रति गृह्णामि शतशारदाय ॥२ ॥
ऊर्जे त्वा बलाय त्वौजसे सहसे त्वा ।
अभिभूयाय तवा राष्ट्रभृत्याय पर्यूहामि शतशारदाय ॥३ ॥
*idaṁ varcho agninā dattamāgan bhargo yaśaḥ saha Ojo vayo balam /*
*trayastriṁśad yāni cha vīryāṇi tānyagniḥ pra dadātu me //1 //*
*varcha ā dhehi me tanvāṁ3 saha Ojo vayo balam /*
*indriyāya tavā karmaṇe vīryāya prati gṛhṇāmi śataśāradāya //2 //*
*ūrje tvā balāya tvaujase sahase tvā /*
*abhibhūyāya tavā rāṣṭrabhṛtyāya paryūhāmi śataśāradāya //3 //*

अ. (Av.) १९.२६.१-४

अग्नेः प्रजातं परि यद्धिरण्यममृतं दध्रे अधि मर्त्येषु ।
य एनद् वेद स इदेनमर्हति जरामृत्युर्भवति यो बिभति ॥१ ॥
यद्धिरण्यं सूर्येण सुवर्ण प्रजावन्तो मनवः पूर्व ईषिरे ।
तत् त्वा चन्द्रं वर्चसा सं सृजत्यायुष्मान् भवति यो बिभति ॥२ ॥
आयुषे त्वा वर्चसे त्वौजसे च बलाय च ।
यथा हिरण्यतेजसा विभासासि जनाँ अनु ॥३ ॥
यद् वेद राजा वरुणो वेद देवो बृहस्पतिः ।
इन्द्रो यद् वृत्रहा वेद तत् त आयुष्यंभुवत् तत् ते वर्चस्यंभुवत् ॥४ ॥
*agneḥ prajātaṁ pari yaddhiraṇyamamṛtaṁ dadhre adhi martyeṣu /*
*ya enad veda sa idenamarhati jarāmṛtyurbhavati yo bibhati //1 //*
*yaddhiraṇyaṁ sūryeṇa suvarṇa prajāvanto manavaḥ pūrva īṣire /*
*tat tvā chandraṁ varchasā saṁ sṛjatyāyuṣmān bhavati yo bibhati //2 //*
*āyuṣe tvā varchase tvaujase cha balāya cha /*
*yathā hiraṇyatejasā vibhāsāsi janāṁ̐ anu //3 //*
*yad veda rājā varuṇo veda devo bṛhaspatiḥ /*
*indro yad vṛtrahā veda tat ta āyuṣyaṁbhuvat tat te varchasyaṁbhuvat //4 //*

३. अग्नि, सूर्यः बृहस्पतिः (Agni, Sūryaḥ Bṛhaspatiḥ) - अ. (Av.) २.२९.१

पार्थिवस्य रसे देवा भगस्य तन्वो३ बले ।
आयुष्यमिस्मा अग्निः सूर्यो वर्च आ धाद् बृहस्पतिः ॥१ ॥
*pārthivasya rase devā bhagasya tanvo3 bale /*
*āyuṣyamismā agniḥ sūryo varcha ā dhād bṛhaspatiḥ //1 //*

४. अग्नीन्द्रादयः (Agnīndrādayaḥ) - अ.३.१६.१

प्रातरग्निं प्रातरिन्द्रं हवामहे प्रातर्मित्रावरुणा प्रातरश्विना ।
प्रातभ्रगं पूषणं ब्रह्मणस्पतिं प्रातः सोममुत रुद्रं हवामहे ॥१ ॥
*prātaragniṁ prātarindraṁ havāmahe prātarmitrāvaruṇā prātaraśvinā /*
*prātabhragaṁ pūṣaṇaṁ brahmaṇaspatiṁ prātaḥ somamuta rudraṁ havāmahe //1 //*

५. अग्नि विश्वकर्मा (Agni Viśvakarmā) - अ.२.३४.३

ये वध्यमानमनु दीध्याना अन्वैक्षन्त मनसा चक्षुषा च ।
अग्निष्टानग्रे प्र मुमोक्तु देवो विश्वकर्मा प्रजया संरराणः ॥३ ॥
*ye vadhyamānamanu dīdhyānā anvaikṣanta manasā chakṣuṣā cha /*
*agniṣṭānagre pra mumoktu devo viśvakarmā prajayā saṁrarāṇaḥ //3 //*

६. अग्न्यादयो मन्त्रोक्ताः (Agnyādayo Mantroktāḥ) - अ.३.३.१-६

अचिक्रदत् स्वपा इह भुवदग्ने व्यचस्व रोदसी उरूची ।
युंजन्तु त्वा मरुतो विश्ववेदस आमुं नय नमसा रातहव्यम् ॥१ ॥
दूरे चित् सन्तमरुषास इन्द्रमा च्यावयन्तु सख्याय विप्रम् ।

यद् गायत्रीं बृहतीमर्कमस्मै सौत्रामण्या दधृषन्त देवाः ॥२ ॥
अद्भ्यस्त्वा राजा वरुणो ह्वयतु सोमस्त्वा ह्वयतु पर्वतेभ्यः ।
इन्द्रस्त्वा ह्वयतु विड्भ्य आभ्यः श्येनो भूत्वा विश आ पतेमाः ॥३ ॥
श्येनो हव्यं नयत्वा परस्मादन्यक्षेत्रे अपरुद्धं चरन्तम् ।
अश्विना पन्थां कृणुतां सुगं त इमं सजाता अभिसंविशध्वम् ॥४ ॥
ह्वयन्तु त्वा प्रतिजनाः प्रति मित्रा अवृषत ।
इन्द्राग्नी विश्वे देवास्ते विशि क्षेममदीधरन् ॥५ ॥
यस्ते हवं विवदत् सजातो यश्च निष्ट्यः ।
अपांचमिन्द्र तं कृत्वाथेममिहाव गमय ॥६ ॥

*achikradat svapā iha bhuvadagne vyachasva rodasī urūchī /*
*yuṁjantu tvā maruto viśvavedasa āmuṁ naya namasā rātahavyam //1 //*
*dūre chit santamaruṣāsa indramā chyāvayantu sakhyāya vipram /*
*yad gāyatrīṁ bṛhatīmarkamasmai sautrāmaṇyā dadhṛṣanta devāḥ //2 //*
*adbhyasvā rājā varuṇo hnayatu somastvā hnayatu parvatebhyaḥ /*
*indrastvā hnayatu viḍbhya ābhyaḥ śyeno bhūtvā viśa ā patemāḥ //3 //*
*śyeno havyaṁ nayatvā parasmādanyakṣetre aparuddhaṁ charantam /*
*aśvinā panthāṁ kṛṇutāṁ sugaṁ ta imaṁ sajātā abhisaṁviśadhvam //4 //*
*hnayantu tvā pratijanāḥ prati mitrā avṛṣata /*
*indrāgnī viśve devāste viśi kṣemamadīdharan //5 //*
*yaste havaṁ vivadat sajāto yaścha niṣṭyaḥ /*
*apāṁchamindra taṁ kṛtvāthemamihāva gamaya //6 //*

७. अनुमतिः (Anumatiḥ) - अ. (Av.) ७.२०.१-६

अन्वद्य नोऽनुमतिर्यां देवेषु मन्यताम् ।
अग्निश्च हव्यवाहनो भवतां दाशुषे मम ॥१ ॥
अन्विदनुमते त्वं मंससे शं च नस्कृधि ।
जुषस्व हव्यमाहुतं प्रजां देवि ररास्वनः ॥२ ॥
अनु मन्यतामनुमन्यमानः प्रजावन्त रयिमक्षीयमाणम् ।
तस्य वयं हेडसि मापि भूम सुमृडीके अस्य सुमतौ स्याम ॥३ ॥
यत् ते नाम सुहवं सुप्रणीतेऽनुमते अनुमतं सुदानु ।
तेना नो यां पिपृहि विश्वारे रयिं नो धेहि सुभगे सुवीरम् ॥४ ॥
एमं यामनुमतिर्जगाम सुक्षेत्रतायै सुवीरतायै सुजातम् ।
भद्रा ह्यस्याः प्रमतिर्बभूव सेमं यामवतु देवगोपा ॥५ ॥
अनुमतिः सर्वमिदं बभूव यत् तिष्ठति चरति यदु च विश्वमेजति ।
तस्यास्ते देवि सुमतौ स्यामानुमते अनु हि मंससे नः ॥६ ॥

*anvadya no'numatiryāṁ deveṣu manyatām /*
*agniścha havyavāhano bhavatāṁ dāśuṣe mama //1 //*
*anvidanumate tvaṁ maṁsase śaṁ cha naskṛdhi /*
*juṣasva havyamāhutaṁ prajāṁ devi rarāsvanaḥ //2 //*
*anu manyatāmanumanyamānaḥ prajāvanta rayimakṣīyamāṇam /*
*tasya vayaṁ heḍasi māpi bhūma sumṛḍīke asya sumatau syāma //3 //*
*yat te nāma suhavaṁ supraṇīte'numate anumataṁ sudānu /*
*tenā no yāṁ pipṛhi viśvāre rayiṁ no dhehi subhage suvīram //4 //*
*emaṁ yāmanumatirjagāma sukṣetratāyai suvīratāyai sujātam /*
*bhadrā hyasyāḥ pramatirbabhūva semaṁ yāmavatu devagopā //5 //*
*anumatiḥ sarvamidaṁ babhūva yat tiṣṭhati charati yadu cha viśvamejati /*
*tasyāste devi sumatau syāmānumate anu hi maṁsase naḥ //6 //*

८. अपचिद् भैषज्यम् (Apachid Bhaiṣajyam) - अ. (Av.) ७.७६.१-२

आ सुस्रमः सुस्रसो असतीभ्यो असत्तराः। सेहोररसतरा लवणाद् विक्लेदीयसीः ॥१॥
या ग्रैव्या अपचितोऽथो या उपपक्ष्याः। विजाम्नि या अपचितः स्वयंस्रसः ॥२॥
*ā susramaḥ susraso asatībhyo asattarāḥ । sehorarasatarā lavaṇād vikledīyasīḥ ॥1॥*
*yā graivyā apachito'tho yā upaparkṣayāḥ । vijāmni yā apachitaḥ svayaṁsrasaḥ ॥2॥*

९. अमावस्याः (Amāvasyāḥ) - अ. (Av.) ७.७९.१-४

यत् ते देवा अकृण्वन् भागधेयममावास्ये संवसन्तो महित्वा ।
तेना नो यां पिपृहि विश्वारे रयिं नो धेहि सुभगे सुवीरम् ॥१॥
अहमेवास्म्यमावास्या३ मामा वसन्ति सुकृतो मयीमे ।
मयि देवा उभये साध्याश्चेन्द्रज्येष्ठाः समगच्छन्त सर्वे ॥२॥
आगन् रात्री संगमनी वसूनामूर्ज पुष्टं वस्वावेशयन्ती ।
अमावास्यायै हविषा विधेमोर्ज दुहाना पयसा न आगन् ॥३॥
अपावस्ये न त्वदेतान्यन्यो विश्वा रूपाणि परिभूर्जजान ।
यत्कामास्ते जुहुमस्तन्नो अस्तु वयं स्याम पतयो रयीणाम् ॥४॥
*yat te devā akṛṇvan bhāgadheyamamāvāsye saṁvasanto mahitvā ।*
*tenā no yāṁ pipṛhi viśvāre rayiṁ no dhehi subhage suvīram ॥1॥*
*ahamevāsmyamāvāsyā3 māmā vasanti sukṛto mayīme ।*
*mayi devā ubhaye sādhyāśchendrajyeṣṭhāḥ samagachchhanta sarve ॥2॥*
*āgan rātrī saṁgamanī vasūnāmūrja puṣṭaṁ vasvāveśayantī ।*
*amāvāsyāyai haviṣā vidhemorja duhānā payasā na āgan ॥3॥*
*apāvasye na tvadetānyanyo viśvā rūpāṇi paribhūrjajāna ।*
*yatkāmāste juhumastanno astu vayaṁ syāma patayo rayīṇām ॥4॥*

१०. अरातयः (Arātayaḥ) - अ. (Av.) ५.७.६-१०

मा वनिं मा वाचं नो वीर्त्सीरुभाविन्द्राग्नी आ भरतां नो वसूनि ।
सर्वे नो अद्य दित्सन्तोऽरातिं प्रति हर्यत ॥६॥
परोऽपेह्यसमृदधे वि ते हेतिं नयामसि ।
वेद त्वाहं निमीवन्तीं नितुदन्तीमराते ॥७॥
उत नग्ना बोभुवती स्वप्नया सचसे जनम् ।
अराते चित्तं वीर्त्सन्त्याकूतिं पुरुषस्य च ॥८॥
या महती महोन्माना विश्वा आशा व्यानशे ।
तस्यै हिरण्यकेश्यै निर्ऋत्या अकरं नमः ॥९॥
हिरण्यवर्णा सुभगा हिरण्यकशिपुर्महो ।
तस्यै हिरण्यद्रापयेऽरात्या अकरं नमः ॥१०॥
*mā vaniṁ mā vāchaṁ no vīrtsīrubhāvindrāgnī ā bharatāṁ no vasūni ।*
*sarve no adya ditsanto'rātiṁ prati haryata ॥6॥*
*paro'pehyasamṛdadhe vi te hetiṁ nayāmasi ।*
*veda tvāhaṁ nimīvantīṁ nitudantīmarāte ॥7॥*
*uta nagnā bobhuvatī svapnayā sachase janam ।*
*arāte chittaṁ vīrtsantyākūtiṁ puruṣasya cha ॥8॥*
*yā mahatī mahonmānā viśvā āśā vyānaśe ।*
*tasyai hiraṇyakeśyai nirṛtyā akaraṁ namaḥ ॥9॥*
*hiraṇyavarṇā subhagā hiraṇyakaśipurmahī ।*
*tasyai hiraṇyadrāpaye'rātyā akaraṁ namaḥ ॥10॥*

११. अरुन्धत्यादयोः (Arundhatyādayoḥ) - अ. (Av.) ६.५९.१-३

अनडुद्भ्यस्त्वं प्रथमं धेनुभ्यस्त्वमरुन्धति। अधेनवे वयसे शर्म यच्छ चतुष्पदे ॥१॥
शर्म यच्छत्वोषधिः सह देवीररुन्धती। करत् पयस्वन्तं गोष्ठमयक्ष्माँ उत पूरुषान् ॥२॥
विश्वरूपां सुभगामच्छावदामि जीवलाम्। सा नो रुद्रस्यास्तां हेतिं दूरं नयतु गोभ्यः ॥३॥

*anaḍudbhyastvaṁ prathamaṁ dhenubhyastvamarundhati I adhenave vayase śarma yachchha chatuṣpade II1 II*
*śarma yachchhatvoṣadhiḥ saha devīrarundhatī I karat payasvantaṁ goṣṭhamayakṣamām̐ uta pūruṣān II2 II*
*viśvarūpāṁ subhagāmachchhāvadāmi jīvalām I sā no rudrasyāstāṁ hetiṁ dūraṁ nayatu gobhyaḥ II3 II*

१२. अर्यमा (Aryamā) - अ. (Av.) ६.६०.१-३

अयमा यात्यर्यमा पुरस्ताद् विषितस्तुपः । अस्या इच्छन्नग्रुवै पतिमुत जायमजानये ॥१ ॥
अश्रमदियमर्यमन्नन्यासां समनं यती । अंगो न्वर्यमन्नस्या अन्याः समनमायति ॥२ ॥
धाता दाधार पृथिवीं धाता द्यामुत सूर्यम् । धातास्या अग्रुवै पतिं दधातु प्रतिकाम्यम् ॥३ ॥
*ayamā yātyaryamā purastād viṣitastupaḥ I asyā ichchhannagruvai patimuta jāyamajānaye II1 II*
*aśramadiyamaryamannanyāsāṁ samanaṁ yatī I aṁgo nvaryamannasyā anyāḥ samanamāyati II2 II*
*dhātā dādhāra pṛthivīṁ dhātā dyāmuta sūryam I dhātāsyā agruvai patiṁ dadhātu pratikāmyam II3 II*

१३. अव्युक्ता वैराजः (Avyuktā Vairājaḥ) - अ. (Av.) ३.२६.३

ये३स्यां स्थ प्रतीच्यां दिशि वैराजा नाम देवास्तेषां व आप इषवः ।
ते नो मृडत ते नोऽधि ब्रूत तेभ्यो वो नमस्तेभ्यो वः स्वाहा ॥३ ॥
*ye3syāṁ stha pratīchyāṁ diśi vairājā nāma devāsteṣāṁ va āpa iṣavaḥ I*
*te no mṛḍata te no'dhi brūta tebhyo vo namastebhyo vaḥ svāhā II3 II*

१४. अश्विनौ (Aśvinau) - अ. (Av.) २.२९.६

शिवाभिष्टे हृदयं तर्पयाम्यनमीवो मोदिषीष्ठाः सुवर्चाः ।
सवासिनौ पिबतां मन्थमेतमश्विनो रूपं परिधाय मायाम् ॥६ ॥
*śivābhiṣṭe hṛdayaṁ tarpayāmyanamīvo modiṣīṣṭhāḥ suvarchāḥ I*
*savāsinau pibatāṁ manthametamaśvino rūpaṁ paridhāya māyām II6 II*

१५. अष्टका (Aṣṭakā) - अ. (Av.) ३.१०.१-१३

प्रथमा ह व्युवास सा धेनुरभवद् यमे ।
सा नः पयस्वती दुहामुत्तरामुत्तरां समाम् ॥१ ॥
यां देवाः प्रति नन्दन्ति रात्रिं धेनुमुपायतीम् ।
संवत्सरस्य या पत्नी सा नो अस्तु सुमंगली ॥२ ॥
संवत्सरस्य प्रतिमां यां त्वा रात्र्युपास्महे ।
सा न आयुष्मतीं प्रजां रायस्पोषेण सं सृज ॥३ ॥
इयमेव सा या प्रथमा वयौच्छदास्वितरासु चरति प्रविष्टा ।
महान्तो अस्यां महिमानो अन्तर्वधूर्जिगाय नवगज्जनित्री ॥४ ॥
वानस्पत्या ग्रावाणो घोषमक्रत हविष्कृण्वन्तः परिवत्सरीणम् ।
एकाष्टके सुप्रजसः सुवीरा वयं स्याम पतयो रयीणाम् ॥५ ॥
इडायास्पदं घृतवत् सरीसृपं जातवेदः प्रति हव्या गृभाय ।
ये ग्राम्याः पशवो विश्वरूपास्तेषां सप्तानां मयि रन्तिरस्तु ॥६ ॥
आ मा पुष्टे च पोषे च रात्रि देवानां सुमतौ स्याम् ।
पूर्णा दर्वे परा पत सुपूर्णा पुनरापत ।
सर्वान् यान्त्संभुंजतीषमूर्जं न आ भर ॥७ ॥
आयमगन्त्संवत्सरः पतिरेकाष्टके तव ।
सा न आयुष्मतीं प्रजां रायस्पोषेण सं सृज ॥८ ॥
ऋतून् यज ऋतुपतीनार्तवानुत हायनान् ।
समाः संवत्सरान् मासान् भूतस्य पतये यजे ॥९ ॥

ऋतुभ्यष्ट्वार्तवेभ्यो माद्भ्यः संवत्सरेभ्यः ।
धात्रे विधात्रे समृधे भूतस्य पतये यजे ॥१० ॥
इडया जुह्वतो वयं देवान् घृतवता यजे ।
गृहानलुभ्यतो वयं सं विशेमोप गोमतः ॥११ ॥
एकाष्टका तपसा तप्यमाना जजान गर्भमहिमानमिन्द्रम् ।
तेन देवा व्यसहन्त शत्रून् हन्ता दस्यूनामभवच्छचीपतिः ॥१२ ॥
इन्द्रपुत्रे सोमपुत्रे दुहितासि प्रजापतेः ।
कामानस्माकं पूरय प्रति गृह्णाहि नो हविः ॥१३ ॥
*prathamā ha vyuvāsa sā dhenurabhavad yame* /
*sā naḥ payasvatī duhāmuttarāmuttarāṁ samām* //1 //
*yāṁ devāḥ prati nandanti rātriṁ dhenumupāyatīm* /
*saṁvatsarasya yā patnī sā no astu sumaṁgalī* //2 //
*saṁvatsarasya pratimāṁ yāṁ tvā rātrayupāsmahe* /
*sā na āyuṣmatīṁ prajāṁ rāyaspoṣeṇa saṁ sṛja* //3 //
*iyameva sā yā prathamā vayauchchhadāsvitarāsu charati praviṣṭā* /
*mahānto asyāṁ mahimāno antarvadhūrjigāya navagajjanitrī* //4 //
*vānaspatyā grāvāṇo ghoṣamakrata haviṣkṛṇvantaḥ parivatsarīṇam* /
*ekāṣṭake suprajasaḥ suvīrā vayaṁ syāma patayo rayīṇām* //5 //
*iḍāyāspadaṁ ghṛtavat sarīsṛpaṁ jātavedaḥ prati havyā gṛbhāya* /
*ye grāmyāḥ paśavo viśvarūpāsteṣāṁ saptānāṁ mayi rantirastu* //6 //
*ā mā puṣṭe cha poṣe cha rātri devānāṁ sumatau syām* /
*pūrṇā darve parā pata supūrṇā punarāpata* /
*sarvān yaāntsaṁbhuṁjatīṣamūrja na ā bhara* //7 //
*āyamagantsaṁvatsaraḥ patirekāṣṭake tava* /
*sā na āyuṣmatīṁ prajāṁ rāyaspoṣeṇa saṁ sṛja* //8 //
*ṛtūn yaja ṛtupatīnārtavānuta hāyanān* /
*samāḥ saṁvatsarān māsān bhūtasya pataye yaje* //9 //
*ṛtubhyaṣtvārtavebhyo mādbhyaḥ saṁvatsarebhyaḥ* /
*dhātre vidhātre samṛdhe bhūtasya pataye yaje* //10 //
*iḍayā juhnato vayaṁ devān ghṛtavatā yaje* /
*gṛhānalubhyato vayaṁ saṁ viśemopa gomataḥ* //11 //
*ekāṣṭakā tapasā tapyamānā jajāna garbhamahimānamindram* /
*tena devā vyasahanta śatrūn hantā dasyūnāmabhavachchhachīpatiḥ* //12 //
*indraputre somaputre duhitāsi prajāpateḥ* /
*kāmānasmākaṁ pūraya prati gṛhṇāhi no haviḥ* //13 //

१६. असुरः (Asuraḥ) - अ. (Av.) १.१०.१

अयं देवानामसुरो वि राजति वशा हि सत्या वरुणस्य राः ।
ततस्परि ब्रह्मणा शाशदान उग्रस्य मन्योरुदिमं नयामि ॥१ ॥
*ayaṁ devānāmasuro vi rājati vaśā hi satyā varuṇasya rāāḥ* /
*tataspari brahmaṇā śāśadāna ugrasya manyorudimaṁ nayāmi* //1 //

१७. आदित्यः (Ādityaḥ) - अ. (Av.) ६.८१.१-३

यन्तासि यच्छसे हस्तावप रक्षांसि सेधसि। प्रजां धनं च गृह्णान्ः परिहस्तो अभूदयम् ॥१ ॥
परिहस्त वि धारय योनिं गर्भाय धातवे। मर्यादे पुत्रमा धेहि तं त्वमा गमयागमे ॥२ ॥
यं परिहस्तमबिभरदितिः पुत्रकाम्या। त्वष्टा तमस्या आ बध्नाद् यथा पुत्रं जनादिति ॥३ ॥
*yantāsi yachchhase hastāvapa rakṣāṁsi sedhasi* / *prajāṁ dhanaṁ cha gṛhṇāṇḥ parihasto abhūdayam* //1 //
*parihasta vi dhāraya yoniṁ garbhāya dhātave* / *maryāde putramā dhehi taṁ tvamā gamayāgame* //2 //

*yaṁ parihastamabibharaditiḥ putrakāmyā । tvaṣṭā tamasyā ā badhnād yathā putraṁ janāditi ॥3 ॥*

१८. आपः (Āpaḥ) - अ. (Av.) २.२३.१-५; १८.३.५६

अ. (Av.) २.२३.१-५

आपो यद् वस्तपस्तेन तं प्रति तपत् यो३स्मान द्वेष्टि यं वयं द्विष्मः ॥१ ॥
आपो यद वो हरस्तेन तं प्रति हरत् यो३स्मान् द्वेष्टि यं वयं द्विष्मः ॥२ ॥
आपो यद् वोऽर्चिस्तेन तं प्रत्यर्चत यो३स्मान् द्वेष्टि यं वयं द्विष्मः ॥३ ॥
आपो यद् वः शोचिस्तेन तं प्रति शोचत यो३स्मान् द्वेष्टि यं वयं द्विष्मः ॥४ ॥
आपो यद् वस्तेजस्तेन तमतेजसं कृणुत यो३स्मान् द्वेष्टि यं वयं द्विष्मः ॥५ ॥

*āpo yad vastapastena taṁ prati tapat yo3smāna dveṣṭi yaṁ vayaṁ dviṣmaḥ ॥1 ॥*
*āpo yada vo harastena taṁ prati harat yo3smān dveṣṭi yaṁ vayaṁ dviṣmaḥ ॥2 ॥*
*āpo yad vo'rchistena taṁ pratyarchata yo3smān dveṣṭi yaṁ vayaṁ dviṣmaḥ ॥3 ॥*
*āpo yad vaḥ śochistena taṁ prati śochata yo3smān dveṣṭi yaṁ vayaṁ dviṣmaḥ ॥4 ॥*
*āpo yad vastejastena tamatejasaṁ kṛṇuta yo3smān dveṣṭi yaṁ vayaṁ dviṣmaḥ ॥5 ॥*

अ. (Av.) १८.३.५६

पयस्वतीरोषध्यः पयस्वन्मामकं पयः । अपां पयसो यत् पयस्तेन मा सह शुम्भतु ॥५६ ॥

*payasvatīroṣadhyaḥ payasvanmāmakaṁ payaḥ । apāṁ payaso yat payastena mā saha śumbhatu ॥56 ॥*

१९. आशीः (Āśīḥ) - अ. (Av.) २.३४.५

प्रजानन्तः प्रति गृह्णन्तु पूर्वे प्राणमंगेभ्यः पर्याचरन्तम् ।
दिवं गच्छ प्रति तिष्ठा शरीरैः स्वर्ग याहि पथिभिर्देवयानैः ॥५ ॥

*prajānantaḥ prati gṛhṇantu pūrve prāṇamaṁgebhyaḥ paryācharantam ।*
*divaṁ gachchha prati tiṣṭhā śarīraiḥ svarga yāhi pathibhirdevayānaiḥ ॥5 ॥*

२०. इन्द्रः (Indraḥ) - सा. (Sv.) १८७१ अ. (Av.) १.२०.४; १.२१.१-४; २.२९.३; ७; ३.१.३-६; ३.२.३; ४; ३.४.१-७; ५.२४.११; ५.८.४-९; ६.६६.१-३; ६.६७.१-३; ६.९८.१-३; ६.९९.१-२; ३; ७.७२.१-३; ७.७६.६; ९.१५.१-४; १८.३.५४

सा. (Sv.) १८७१

अन्धा अमित्रा भवताशीर्षाणोऽहय इव । तेषां वो अग्निूनानामिन्द्रो हन्तु वरंवरम् ॥२ ॥

*andhā amitrā bhavatāśīrṣāṇo'haya iva । teṣāṁ vo agniunnānāmindro hantu varaṁvaram ॥2 ॥*

अ. (Av.) १.२०.४

शास इत्था महाँ अस्यमित्रसाहो अस्तृतः । न यस्य हन्यते सखा न जीयते कदा चन ॥४ ॥

*śāsa itthā mahām̐ asyamitrasāho astṛtaḥ । na yasya hanyate sakhā na jīyate kadā chana ॥4 ॥*

अ. (Av.) १.२१.१-४

स्वस्तिदा विशां पतिर्वृत्रहा विमृधो वशी । वृषेन्द्रः पुर एतु नः सोमपा अभयकङ्रः ॥१ ॥
वि न इन्द्र मृधो जहि नीचा यच्छ पृतन्यतः । अधमं गमया तमो यो अस्माँ अभिदासति ॥२ ॥
वि रक्षो वि मृधो जहि वि वृत्रस्य हनू रुज । वि मन्युमिन्द्र वृत्रहन्नमित्रस्याभिदासतः ॥३ ॥
अपेन्द्र द्विषतो मनोऽप जिज्यासतो वधम् । वि महच्छर्म यच्छ वरीयो यावया वधम् ॥४ ॥

*svastidā viśāṁ patirvṛtrahā vimṛdho vaśī । vṛṣendraḥ pura etu naḥ somapā abhayakaṅraḥ ॥1 ॥*
*vi na indra mṛdho jahi nīchā yachchha pṛtanyataḥ । adhamaṁ gamayā tamo yo asmām̐ abhidāsati ॥2 ॥*
*vi rakṣo vi mṛdho jahi vi vṛtrasya hanū ruja । vi manyumindra vṛtrahannamitrasyābhidāsataḥ ॥3 ॥*
*apendra dviṣato mano'pa jijyāsato vadham । vi mahachchharma yachchha varīyo*

*yāvayā vadham //4 //*

अ. (Av.) २.२९.३

आशीर्ण ऊर्जमुत सौप्रजास्त्वं दक्षं धत्तं द्रविणं सचेतसौ ।
जयं क्षेत्राणि सहसायमिन्द्र कृण्वानो अन्यानधरान्त्सपत्नान् ॥३ ॥

*āśīrṇa ūrjamuta sauprajāstvaṁ dakṣaṁ dhattaṁ draviṇaṁ sachetasau /*
*jayaṁ kṣetrāṇi sahasāyamindra kṛṇvāno anyānadharāntsapatnān //3 //*

अ. (Av.) २.२९.७

इन्द्र एतां ससृजे विद्धो अग्र ऊर्जा स्वधामजरां सा त एषा ।
तया त्वं जीव शरदः सुवर्चा मा त आ सुस्रोद् भिषजस्ते अक्रन् ॥७ ॥

*indra etāṁ sasṛje viddho agra ūrjā svadhāmajarāṁ sā ta eṣā /*
*tayā tvaṁ jīva śaradaḥ suvarchā mā ta ā susrod bhiṣajaste akran //7 //*

अ. (Av.) ३.१.३-६

अमित्रसेनां मघवन्नस्मांछत्रूयतीमभि । युवं तानिन्द्र वृत्रहन्नग्निश्च दहतं प्रति ॥३ ॥
प्रसूत इन्द्र प्रवता हरिभ्यां प्र ते वज्रः प्रमृणन्नेतु शत्रून् ।
जहि प्रतीचो अनूचः पराचो विष्वक् सत्यं कृणुहि चित्तमेषाम् ॥४ ॥
इन्द्र सेनां मोहयामित्राणाम् । अग्नेर्वातस्य ध्राज्या तान् विषूचो वि नाशय ॥५ ॥
इन्द्रः सेनां मोहयतु मरुतो घ्नन्त्वोजसा । चक्षूंष्यग्निरा दत्तां पुनरेतु पराजिता ॥६ ॥

*amitrasenāṁ maghavannasmāṁchhatrūyatīmabhi / yuvaṁ tānindra vṛtrahannagniścha dahataṁ prati //3 //*
*prasūta indra pravatā haribhyāṁ pra te vajraḥ pramṛṇannetu śatrūn /*
*jahi pratīcho anūchaḥ parācho viṣvak satyaṁ kṛṇuhi chittameṣām //4 //*
*indra senāṁ mohayāmitrāṇām / agnervātasya dhrājyā tān viṣūcho vi nāśaya //5 //*
*indraḥ senāṁ mohayatu maruto ghnantvojasā / chakṣūṣyagnirā dattāṁ punaretu parājitā //6 //*

अ. (Av.) ३.२.३-४

इन्द्र चित्तानि मोहयन्नर्वाङकूत्या चर। अग्नेर्वातस्य ध्राज्या तान् विषूचो वि नाशय ॥३ ॥
व्याकूतय एषामिताथो चित्तानि मुह्यत। अथो यदद्यैषा हृदि तदेषां परि निर्जहि ॥४ ॥

*indra chittāni mohayannarvāṅakūtyā chara / agnervātasya dhrājyā tān viṣūcho vi nāśaya //3 //*
*vyākūtaya eṣāmitātho chittāni muhyata / atho yadadyaiṣā hṛdi tadeṣāṁ pari nirjahi //4 //*

अ. (Av.) ३.४.१-७

आ त्वा गन् राष्ट्रं सह वर्चसोदिहि प्राङ् विशां पतिरेकराट् त्वं वि राज ।
सर्वास्त्वा राजन् प्रदिशो ह्वयन्तूपसद्यो नमस्योभवेह ॥१ ॥
त्वां विशो वृणतां राज्याय त्वामिमाः प्रदिशः पंच देवीः ।
वर्ष्मन् राष्ट्रस्य ककुदि श्रयस्व ततो न उग्रो वि भजा वसूनि ॥२ ॥
अच्छ त्वा यन्तु हविनः सजाता अग्निर्दूतो अजिरः सं चरातै ।
जायाः पुत्राः सुमनसो भवन्तु बहुं बलिं प्रति पश्यासा उग्रः ॥३ ॥
अश्विना त्वाग्रे मित्रावरुणोभा विश्वे देवा मरुतस्त्वा ह्वयन्तु ।
अधा मनो वसुदेयाय कृणुष्व ततो न उग्रो वि भजा वसूनि ॥४ ॥
आ प्र द्रव परमस्याः परावतः शिवे ते द्यावापृथिवी उभे स्ताम् ।
तदयं राजा वरुणस्तथाह स त्वायमह्वत् स उपेदमेहि ॥५ ॥
इन्द्रेन्द्र मनुष्या३ परेहि सं ह्यास्था वरुणैः संविदानः ।
स त्वायमह्वत् स्वे सधस्थे स देवान् यक्षत् स उ कल्पयाद् विशः ॥६ ॥
पथ्यारेवतीर्बहुधा विरूपाः सर्वाः संगत्य वरीयस्ते अक्रन् ।
तास्त्वा सर्वाः संविदाना ह्वयन्तु दशमीमुग्रः सुमना वशेह ॥७ ॥

*ā tvā gan rāṣṭraṁ saha varchasodihi prāṅ viśāṁ patirekarāṭ tvaṁ vi rāja /*

*sarvāstvā rājan pradiśo hnayantūpasadyo namasyobhaveha ॥1॥*
*tvāṁ viśo vṛṇatāṁ rājyāya tvāmimāḥ pradiśaḥ paṁcha devīḥ ।*
*varṣman rāṣṭrasya kakudi śrayasva tato na ugro vi bhajā vasūni ॥2॥*
*achchha tvā yantu havinaḥ sajātā agnirdūto ajiraḥ saṁ charātai ।*
*jāyāḥ putrāḥ sumanaso bhavantu bahuṁ baliṁ prati paśyāsā ugraḥ ॥3॥*
*aśvinā tvāgre mitrāvaruṇobhā viśve devā marutastvā hnayantu ।*
*adhā mano vasudeyāya kṛṇuṣva tato na ugro vi bhajā vasūni ॥4॥*
*ā pra drava paramasyāḥ parāvataḥ śive te dyāvāpṛthivī ubhe stām ।*
*tadayaṁ rājā varuṇastathāha sa tvāyamahnat sa upedamehi ॥5॥*
*indrendra manuṣyā3 parehi saṁ hyāāsthā varuṇaiḥ saṁvidānaḥ ।*
*sa tvāyamahnat sve sadhasthe sa devān yakṣat sa u kalpayād viśaḥ ॥6॥*
*pathyārevatīrbahudhā virūpāḥ sarvāḥ saṁgatya varīyaste akran ।*
*tāstvā sarvāḥ saṁvidānā hnayantu daśamīmugraḥ sumanā vaśeha ॥7॥*

अ. (Av.) ५.२४.११

इन्द्रो दिवोऽधिपतिः स मावतु। अस्मिन् ब्रह्मण्यस्मिन् कर्मण्यस्यां पुरोधायामस्यां प्रतिष्ठायामस्यां चित्त्यामस्यामाकूत्यामस्यामाशिष्यस्यां देवहूत्यां स्वाहा ॥११॥

*indro divo'dhipatiḥ sa māvatu । asmin brahmaṇyasmin karmaṇyasyāṁ purodhāyāmasyāṁ pratiṣṭhāyāmasyāṁ chittyāmasyāmākūtyāmasyāmāśiṣyasyāṁ devahūtyāṁ svāhā ॥11॥*

अ. (Av.) ५.८.४-९

अति धावतातिसरा इन्द्रस्य वचसा इत ।
अविं वृकइव मथ्नीत स वो जीवन् मा मोचि प्राणमस्यापि नह्यत ॥४॥
यममी पुरोदधिरे ब्रह्माणमपभूतये । इन्द्र स ते अध्स्पदं तं प्रत्यस्यामि मृत्यवे ॥५॥
यदि प्रेयुर्देवपुरा ब्रह्म वर्माणि चक्रिरे ।
तनूपानं परिपाणं कृण्वाना यदुपोचिरे सर्व तदरसं कृधि ॥६॥
यानसावतिसरांश्चकार कृणवच्च यान् ।
त्वं तानिन्द्र वृत्रहन् प्रतीचः पुनरा कृधि यथामुं तणहां जनम् ॥७॥
यथेन्द्र उद्वाचनं लब्ध्वा चक्रे अधस्पदम् ।
कृत्वे३हमधरांस्तथामुंशश्वतीभ्यः समाभ्यः ॥८॥
अत्रैनानिन्द्र वृत्रहन्नुग्रो मर्मणि विध्य ।
अत्रैवैनानभि तिष्ठेन्द्र मेद्य१ हं तव अनु त्वेन्द्रा रभामहे स्याम सुमतौ तव ॥९॥

*ati dhāvatātisarā indrasya vachasā ita ।*
*aviṁ vṛkaiva mathnīta sa vo jīvan mā mochi prāṇamasyāpi nahyata ॥4॥*
*yamamī purodadhire brahmāṇamapabhūtaye । indra sa te adhspadaṁ taṁ pratyasyāmi mṛtyave ॥5॥*
*yadi preyurdevapurā brahma varmāṇi chakrire ।*
*tanūpānaṁ paripāṇaṁ kṛṇvānā yadupochire sarva tadarasaṁ kṛdhi ॥6॥*
*yānasāvatisarāṁśchakāra kṛṇavachcha yān ।*
*tvaṁ tānindra vṛtrahan pratīchaḥ punarā kṛdhi yathāmuṁ taṇahāṁ janam ॥7॥*
*yathendra udvāchanaṁ labdhvā chakre adhaspadam ।*
*kṛtve3hamadharāṁstathāmuṁśaśvatībhyaḥ samābhyaḥ ॥8॥*
*atrainānindra vṛtrahannugro marmaṇi vidhya ।*
*atraivainānabhi tiṣṭhendra medya1 haṁ tava anu tvendrā rabhāmahe syāma sumatau tava ॥9॥*

अ. (Av.) ६.६६.१-३

निर्हस्तः शत्रुरभिदासन्नस्तु ये सेनाभिर्युधमायन्त्यस्मान् ।
समर्पयेन्द्र महता वधेन द्रात्वेषामघहारो विविंद्धः ॥१॥
आतन्वाना आयच्छन्तोऽस्यन्तो ये च धावथ ।

निर्हस्ताः शत्रवः स्थनेन्द्रो वोऽद्य पराशरीत् ॥२ ॥
निर्हस्ताः सन्तु शत्रवोंऽगैषां म्लापयामसि ।
अथैषामिन्द्र वेदांसि शतशो वि भजामहै ॥३ ॥
*nirhastaḥ śatrurabhidāsannastu ye senābhiryudhamāyantyasmān /*
*samarpayendra mahatā vadhena drātveṣāmaghahāro viviṁddhaḥ //1 //*
*ātanvānā āyachchhanto'syanto ye cha dhāvatha /*
*nirhastāḥ śatravaḥ sthanendro vo'dya parāśarīt //2 //*
*nirhastāḥ santu śatravoṁ'gaiṣāṁ mlāpayāmasi /*
*athaiṣāmindra vedāṁsi śataśo vi bhajāmahai //3 //*

अ. (Av.) ६.६७.१-३

परि वर्त्मानि सर्वत इन्द्रः पूषा च सस्रतुः। मुह्यन्त्वद्यामूः सेना अमित्राणां परस्तराम् ॥१ ॥
मूढा अमित्राश्चरताशीर्षाणइवाहयः। तेषां वो अग्निमूढानामिन्द्रो हन्तु वरंवरम् ॥२ ॥
ऐषु नह्य वृषाजिनं हरिणस्या भियं कृधि। पराङ्मित्र एषत्वर्वाची गौरुपेषतु ॥३ ॥
*pari vartmāni sarvata indraḥ pūṣā cha sasratuḥ / muhyantvadyāmḥ senā amitrāṇāṁ parastarām //1 //*
*mūḍhā amitrāścharatāśīrṣāṇaivāhayaḥ / teṣāṁ vo agnimūḍhānāmindro hantu varaṁvaram //2 //*
*aiṣu nahya vṛṣājinaṁ hariṇasyā bhiyaṁ kṛdhi / parāṅmitra eṣatvarvāchī gaurupeṣatu //3 //*

अ. (Av.) ६.९८.१-३

इन्द्रो जयाति न परा जयाता अधिराजो राजसु राजयातै ।
चर्कृत्य ईड्यो वन्द्यश्चोपसद्यो नमस्योभवेह ॥१ ॥
त्वमिन्द्राधिराजः श्रवस्युस्त्वं भूरभिभूतिर्जनानाम् ।
त्वं दैवीर्विश इमा वि राजायुष्मत् क्षत्रमजरं ते अस्तु ॥२ ॥
प्रच्या दिशस्त्वमिन्द्रासि राजोतोदीच्या दिशो वृत्रहंछत्रुहोसि ।
यत्र यन्ति स्रोत्यास्तज्जितं ते दक्षिणतो वृषभ एषि हव्यः ॥३ ॥
*indro jayāti na parā jayātā adhirājo rājasu rājayātai /*
*charkṛtya īḍyo vandyaśchopasadyo namasyobhaveha //1 //*
*tvamindrādhirājaḥ śravasyustvaṁ bhūrabhibhūtirjanānām /*
*tvaṁ daivīrviśa imā vi rājāyuṣmat kṣatramajaraṁ te astu //2 //*
*prachyā diśastvamindrāsi rājotodīchyā diśo vṛtrahaṁchhatruhosi /*
*yatra yanti srotyāstajjitaṁ te dakṣiṇato vṛṣabha eṣi havyaḥ //3 //*

अ. (Av.) ६.९९.१-३

अभि त्वेन्द्र वरिमतः पुरा त्वांहूरणाद्धुवे। ह्वयाम्युग्रं चेत्तारं पुरुणामानमेकजम् ॥१ ॥
यो अद्य सेन्यो वधो जिघांसन् न उदीरते। इन्द्रस्य तत्र बाहू समन्तं परि दध्मः ॥२ ॥
परि दध्म इन्द्रस्य समन्तं त्रातुस्त्रायतां नः।
देव सवितः सोम राजन्त्सुमनसं मा कृणु स्वस्तये ॥३ ॥
*abhi tvendra varimataḥ purā tvāṁhūraṇāddhuve / hnayāmyugraṁ chettāraṁ puruṇāmānamekajam //1 //*
*yo adya senyo vadho jighāṁsan na udīrate / indrasya tatra bāhū samantaṁ pari dadhmaḥ //2 //*
*pari dadhma indrasya samantaṁ trātustrāāyatāṁ naḥ /*
*deva savitaḥ soma rājantsumanasaṁ mā kṛṇu svastaye //3 //*

अ. (Av.) ७.७२.१-३

उत तिष्ठताव पश्यतेन्द्रस्य भागमृत्वियम् ।
यदि श्रातं जुहोतन यद्यश्रातं ममत्तन ॥१ ॥
श्रातं हविरो ष्विन्द्र प्र याहि जगाम सूरो अध्वनो वि मध्यम् ।

परि त्वासते निधिभिः सखायः कुलपा न व्राजपतिं चरन्तम् ॥२।
श्रातं मन्य ऊधनि श्रातमग्नौ सुश्रृतं मन्ये तदृतं नवीयः ।
माध्यन्दिनस्य सवनस्य दध्नः पिबेन्द्र वज्रिन् पुरुकृज्जुषाणः ॥३ ॥
*uta tiṣṭhatāva paśyatendrasya bhāgamṛtviyam ।*
*yadi śrātaṁ juhotana yadyaśrātaṁ mamattana ॥1 ॥*
*śrātaṁ haviro ṣvindra pra yāhi jagāma sūro adhvano vi madhyam ।*
*pari tvāsate nidhibhiḥ sakhāyaḥ kulapā na vrājapatiṁ charantam ॥2 ।*
*śrātaṁ manya ūdhani śrātamagnau susṛtaṁ manye tadṛtaṁ navīyaḥ ।*
*mādhyandinasya savanasya dadhnaḥ pibendra vajrin purukṛjjuṣāṇaḥ ॥3 ॥*

अ. (Av.) ७.७६.६
धृषत् पिब कलशे सोममिन्द्र वृत्रहा शूर समरे वसूनाम् ।
माध्यन्दिने सवन आ वृषस्व आ रयिष्ठानो रयिमस्मासु धेहि ॥६ ॥
*dhṛṣat piba kalaśe somamindra vṛtrahā śūra samare vasūnām ।*
*mādhyandine savana ā vṛṣasva ā rayiṣṭhāno rayimasmāsu dhehi ॥6 ॥*

अ. (Av.) ९.१५.१-४
यद् गायत्रे अधि गायत्रमाहितं त्रैष्टुभं वा त्रैष्टुभान्निरतक्षत ।
यद्वा जगज्जगत्याहितं पदं य इत् तद् विदुस्ते अमृतत्वमानशुः ॥१ ॥
गायत्रेण प्रति मिमीते अर्कमर्केण साम त्रैष्टुभेन वाकम् ।
वाकेन वाकं द्विपदा चतुष्पदाक्षरेण मिमते सप्त वाणीः ॥२ ॥
जगता सिन्धुं दिव्यस्कभायद् रथंतरे सूर्यं पर्यपश्यत् ।
गायत्रस्य समिधस्तिस्र आहुस्ततो मह्ना प्र रिरिचे महित्वा ॥३ ॥
उप ह्वये सुदुघां धेनुमेतां सुहस्तो गोधुगुत दोहदेनाम् ।
श्रेष्ठं सवं सविता साविषन्नोऽभीद्धो घर्मस्तदु षु प्र वोचत् ॥४ ॥
*yad gāyatre adhi gāyatramāhitaṁ traiṣṭubhaṁ vā traiṣṭubhānniratakṣata ।*
*yadvā jagajjagatyāhitaṁ padaṁ ya it tad viduste amṛtatvamānaśuḥ ॥1 ॥*
*gāyatreṇa prati mimīte arkamarkeṇa sāma traiṣṭubhena vākam ।*
*vākena vākaṁ dvipadā chatuṣpadākṣareṇa mimate sapta vāṇīḥ ॥2 ॥*
*jagatā sindhuṁ divyaskabhāyad rathaṁtare sūrya paryapaśyat ।*
*gāyatrasya samidhastisra āhustato mahnā pra ririche mahitvā ॥3 ॥*
*upa hnaye sudughāṁ dhenumetāṁ suhasto godhuguta dohadenām ।*
*śreṣṭhaṁ savaṁ savitā sāviṣanno'bhīddho gharmastadu ṣu pra vochat ॥4 ॥*

अ. (Av.) १८.३.५४
अथर्वा पूर्णं चमसं यमिन्द्रायाबिभर्वाजिनीवते ।
तस्मिन् कृणोति सुकृतस्य भक्षं तस्मिन्निन्दुः पवते विश्वदानीम् ॥५४ ॥
*atharvā pūrṇa chamasaṁ yamindrāyābibharvājinīvate ।*
*tasmin kṛṇoti sṛkṛtasya bhakṣaṁ tasminninduḥ pavate viśvadānīm ॥54 ॥*

२१. इन्द्राग्नी (Indrāgnī) - अ. (Av.) ७.९७.१-८
यदद्य त्वा प्रयति यो अस्मिन् होतश्चिकित्वन्नवृणीमहीह ।
ध्रुवमयो ध्रुवमुता शविष्ठ प्रविद्वान् यामुप याहि सोमम् ॥१ ॥
समिन्द्र नो मनसा नेष गोभिः सं सूरिभिर्हरिवन्त्सं स्वस्त्या ।
सं ब्रह्मणा देवहितं यदस्ति सं देवानां सुमतौ यियानाम् ॥२ ॥
यानावह उशतो देव देवांस्तान् प्रेरय स्वे अग्ने सधस्थे ।
जक्षिवांसः पपिवांसो मधून्यस्मै धत्त वसवो वसूनि ॥३ ॥
सुगा वो देवाः सदना अकर्म य आजग्म सवने मा जुषाणाः ।
वहमाना भरमाणाः स्वा वसूनि वसुं धर्मं दिवमा रोहतानु ॥४ ॥
या यां गच्छ यापतिं गच्छ। स्वां योनिं गच्छ स्वाहा ॥५ ॥
एष ते यो यापते सहसूक्तवाकः। सुवीर्यः स्वाहा ॥६ ॥

वषड्डुतेभ्यो वषडहुतेभ्यः। देवा गातुविदो गातुं वित्त्वा गातुमित ॥७॥
मनमस्पत इमं नो दिवि देवेषु याम् ।
स्वाहा दिवि स्वाहा पृथिव्यां स्वाहान्तरिक्षे स्वाहा वाते धां स्वाहा ॥८॥
*yadadya tvā prayati yo asmin hotaśchikitvannavṛṇīmahīha /*
*dhruvamayo dhruvamutā śaviṣṭha pravidvān yāmupa yāhi somam //1 //*
*samindra no manasā neṣa gobhiḥ saṁ sūribhirharivantsaṁ svastyā /*
*saṁ brahmaṇā devahitaṁ yadasti saṁ devānāṁ sumatau yiāyānām //2 //*
*yānāvaha uśato deva devāṁstān preraya sve agne sadhasthe /*
*jakṣivāṁsaḥ papivāṁso madhūnyasmai dhatta vasavo vasūni //3 //*
*sugā vo devāḥ sadanā akarma ya ājagma savane mā juṣāṇāḥ /*
*vahamānā bharamāṇāḥ svā vasūni vasuṁ dharma divamā rohatānu //4 //*
*yā yāṁ gachchha yāpatiṁ gachchha / svāṁ yoni gachchha svāhā //5 //*
*eṣa te yāo yāpate sahasūktavākaḥ / suvīryaḥ svāhā //6 //*
*vaṣaḍḍhutebhyo vaṣaḍahutebhyaḥ / devā gātuvido gātuṁ vittvā gātumita //7 //*
*manamaspata imaṁ no divi deveṣu yām /*
*svāhā divi svāhā pṛthivyāṁ svāhāntarikṣe svāhā vāte dhāṁ svāhā //8 //*

२२. ईर्ष्याविनाशनम् (Īrṣyāvināśanam) - अ. (Av.) ६.१८.१-३

ईर्ष्याया ध्राजिं प्रथमां प्रथमस्या उतापराम्। अग्निं हृदय्यं१ शोकं तं ते निर्वापयामसि ॥१॥
यथा भूमिर्मृतमना मृतान्मृतमनस्तरा। यथोत मम्रुषो मन एवेर्ष्योर्मृतं मनः ॥२॥
अदो यत् ते हृदि श्रितं मनस्कं पतयिष्णुकम्। ततस्त ईर्ष्यां मुंचामि निरूष्माणं दृतेरिव ॥३॥
*īrṣyāyā dhrājiṁ prathamāṁ prathamasyā utāparām / agniṁ hṛdayyaṁ1 śokaṁ taṁ te nirvāpayāmasi //1 //*
*yathā bhūmirmṛtamanā mṛtānmṛtamanastarā / yathota mamruṣo mana everṣyormṛtaṁ manaḥ //2 //*
*ado yat te hṛdi śritaṁ manaskaṁ patayiṣṇukam / tatasta īrṣyā muṁchāmi nirūṣmāṇaṁ ddateriva //3 //*

२३. उच्छिष्टः (Uchchhiṣṭaḥ) - अ. (Av.) ११.७.१-२७

उचिछष्टे नाम रूपं चोचिछिष्टे लोक आहितः ।
उच्छिष्ट इन्द्रश्चाग्निश्च विश्वमन्तः समाहितम् ॥१॥
उच्छिष्टे द्यावापृथिवी विश्वं भूतं समाहितम् ।
आपः समुद्र उच्छिष्टे चन्द्रमा वात आहितः ॥२॥
सन्नुचिछष्टे असंश्चोभौ मृत्युर्वाजः प्रजापतिः ।
लौक्या उच्छिष्ट आयत्ता व्रश्च द्रश्चापि श्रीर्मयि ॥३॥
दृढो दृंहस्थिरो न्यो ब्रह्म विश्वसृजो दश ।
नाभिमिव सर्वतश्चक्रमुच्छिष्टे देवताः श्रिताः ॥४॥
ऋक् साम यजुरुच्छिष्ट उद्गीथः प्रस्तुतं स्तुतम् ।
हिङ्कार उच्छिष्टे स्वरः साम्नो मेडिश्च तन्मयि ॥५॥
ऐन्द्राग्नं पावमानं महानाम्नीर्महाव्रतम् । उच्छिष्टे यास्यांगान्यन्तर्गर्भइव मातरि ॥६॥
राजसूयं वाजपेयमाग्निष्टोमस्तदध्वरः । अर्काश्वमेधावुचिछष्टे जीवबर्हिर्मदिन्तमः ॥७॥
अग्न्याधेयमथो दीक्षा कामप्रश्छन्दसा सह । उत्सन्ना याः सत्राण्युच्छिष्टेऽधि समाहिताः ॥८॥
अग्निहोत्रं च श्रद्धा च वष्कारो व्रतं तपः । दक्षिणेष्टं पूर्त चोच्छिष्टेऽधिं समाहिताः ॥९॥
एकरात्रो द्विरात्रः सद्यः क्रीः प्रक्रीरुक्थ्यः । ओतं निहितमुच्छिष्टे यास्याणूनि विद्यया ॥१०॥
चतूरात्रः पंचरात्रः षड्रात्रश्चोभयः सह ।
षोडशी सप्तरात्रश्चोच्छिष्टाज्जिरे सर्वे ये याा अमृते हिताः ॥११॥
प्रतीहारो निधनं विश्वजिच्चाभिजिच्च यः । साह्नातिरात्रावुच्छिष्टे द्वादशाहोऽपि तन्मयि ।१२॥
सूनृता संनतिः क्षेमः स्वधोर्जामृतं सहः । उच्छिष्टे सर्वे प्रत्यंचः कामाः कामेन तातृपुः ॥१३॥
नव भूमीः समुद्रा उच्छिष्टेऽधि श्रिता दिवः। आ सूर्यो भत्युच्छिष्टेऽहोरात्रे अपि तन्मयि ॥१४॥

उपहव्यं विषूवन्तं ये च याा गुहा हिताः । विभर्ति भर्ता विश्वस्योच्छिष्टो जानितुः पिता ॥१५॥
पिता जनितुरुच्छिष्टोऽसोः पौत्रः पितामहः । स क्षियति विश्वस्येशानो वृषा भूम्यामतिध्न्यः ॥१६॥
ऋतं सत्यं तपो राष्ट्रं श्रमो धर्मश्च कर्म च । भूतं भविष्यदुच्छिष्टे वीर्यलक्ष्मीर्बलं बले ॥१७॥
समृद्धिरोज आकूतिः क्षत्रं राष्ट्रं षडुर्व्यः । संवत्सरोऽध्युच्छिष्ट इडा प्रैषा ग्रहा हविः ॥१८॥
चतुर्होतार आप्रियश्चातुर्मास्यानि नीविदः । उच्छिष्टे याा होत्राः पशुबन्धास्तदिष्टस्यः ॥१९॥
अर्धमासाश्च मासाश्चार्तवा ऋतुभिः सह । उच्छिष्टे घोषिणीरापः स्तनयित्नुः श्रुतिर्मही ॥२०॥
शर्कराः सिकता अश्मान ओषधयो वीरुधस्तृणा ।
अभ्राणि विद्युतो वर्षमुच्छिष्टे संश्रिता श्रिता ॥२१॥
राद्धिः प्राप्तिः समाप्तिर्व्याप्तिर्मह एधतुः । अत्याप्तिरुच्छिष्टे भूतिश्चाहिता निहिता हिता ॥२२॥
यच्क्ष्प्राणति प्राणेन यच्च पश्यति चक्षुषा ।
उच्छिष्टाज्जिारे सर्वे दिवि देवा दिविश्रितः ॥२३॥
ऋचः सामानि च्छन्दांसि पुराणं यजुषा सह ।
उच्छिष्टाज्जिारे सर्वे दिवि देवा दिविश्रितः ॥२४॥
प्राणापानौ चक्षुः श्रोत्रमक्षितिश्च क्षितिश्च या ।
उच्छिष्टाज्जिारे सर्वे दिवि देवा दिविश्रितः ॥२५॥
आनन्दा मोदाः प्रमुदोऽभीमोदमुदश्च ये ।
उच्छिष्टाज्जिारे सर्वे दिवि देवा दिविश्रितः ॥२६॥
देवाः पितरो मनुष्यागन्धर्वाप्सरसश्च ये ।
उच्छिष्टाज्जिारे सर्वे दिवि देवा दिविश्रितः ॥२७॥

*uchichhaṣṭe nāma rūpaṁ chochichhiṣṭe loka āhitaḥ ।*
*uchchhiṣṭa indraśchāgniścha viśvamantaḥ samāhitam ॥1॥*
*uchchhiṣṭe dyāvāpṛthivī viśvaṁ bhūtaṁ samāhitam ।*
*āpaḥ samudra uchchhiṣṭe chandramā vāta āhitaḥ ॥2॥*
*sannuchichhaṣṭe asaṁśchobhau mṛtyurvājaḥ prajāpatiḥ ।*
*laukyā uchchhiṣṭa āyattā vraścha draśchāpi śrīrmayi ॥3॥*
*ddaḍho ddaṁhasthiro nyo brahma viśvasṛjo daśa ।*
*nābhimiva sarvataśchakramuchchhiṣṭe devatāḥ śritāḥ ॥4॥*
*ṛk sāma yajuruchchhiṣṭa udgīthaḥ prastutaṁ stutam ।*
*hiṅkāra uchchhiṣṭe svaraḥ sāmno meḍiścha tanmayi ॥5॥*
*aindrāgnaṁ pāvamānaṁ mahānāmnīrmahāvratam । uchchhiṣṭe yāsyāṁgānyantargarbhaiva mātari ॥6॥*
*rājasūyaṁ vājapeyamāgniṣṭomastadadhvaraḥ । arkāśvamedhāvuchichhaṣṭe jīvabarhirmadintamaḥ ॥7॥*
*agnyādheyamatho dīkṣā kāmapraśchhandasā saha । utsannā yāāḥ sattrāṇyuchchhiṣṭe'dhi samāhitāḥ ॥8॥*
*agnihotraṁ cha śraddhā cha vaṣṭkāro vrataṁ tapaḥ । dakṣiṇeṣṭaṁ pūrta chochchhiṣṭe'dhiṁ samāhitāḥ ॥9॥*
*ekarātro dvirātraḥ sadyaḥ krīḥ prakrīrukthyaḥ । Otaṁ nihitamuchchhiṣṭe yāsyāṇūni vidyayā ॥10॥*
*chatūrātraḥ paṁcharātraḥ ṣaḍrātraśchobhayaḥ saha ।*
*ṣoḍaśī saptarātraśchochchhiṣṭājjiāre sarve ye yāā amṛte hitāḥ ॥11॥*
*pratīhāro nidhanaṁ viśvajichchābhijichcha yaḥ । sāhnātirātrāvuchchhiṣṭe dvādaśāho'pi tanmayi ।12॥*
*sūnṛtā saṁnatiḥ kṣemaḥ svadhorjāmṛtaṁ sahaḥ । uchchhiṣṭe sarve pratyaṁchaḥ kāmāḥ kāmena tātṛpuḥ ॥13॥*
*nava bhūmīḥ samudrā uchchhiṣṭe'dhi śritā divaḥ । ā sūryo bhatyuchchhiṣṭe'horātre api tanmayi ॥14॥*
*upahavyaṁ viṣūvantaṁ ye cha yāā guhā hitāḥ । vibharti bhartā viśvasyochchhiṣṭo*

*jānituḥ pitā ॥15 ॥*
*pitā janituruchchhiṣṭo'soḥ pautraḥ pitāmahaḥ । sa kṣiyati viśvasyeśāno vṛṣā bhūmyāmatidhnyaḥ ॥16 ॥*
*ṛtaṁ satyaṁ tapo rāṣṭraṁ śramo dharmaścha karma cha । bhṛtaṁ bhaviṣyaduchchhiṣṭe vīryalakṣamīrbalaṁ bale ॥17 ॥*
*samṛddhiroja ākūtiḥ kṣatraṁ rāṣṭraṁ ṣaḍurvyaḥ । saṁvatsaro'dhyuchchhiṣṭa iḍā praiṣā grahā haviḥ ॥18 ॥*
*chaturhotāra āpriyaśchāturmāsyāni nīvidaḥ । uchchhiṣṭe yāā hotrāḥ paśubandhāstadiṣṭasyaḥ ॥19 ॥*
*ardhamāsāścha māsāśchārtavā ṛtubhiḥ saha । uchchhiṣṭe ghoṣiṇīrāpaḥ stanayitnuḥ śrutirmahī ॥20 ॥*
*śarkarāḥ sikatā aśmāna Oṣadhayo vīrudhastṛṇā ।*
*abhrāṇi vidyuto varṣamuchchhiṣṭe saṁśritā śritā ॥21 ॥*
*rāddhiḥ prāptiḥ samāptirvyāptirmaha edhatuḥ । atyāptiruchchhiṣṭe bhūtiśchāhitā nihitā hitā ॥22 ॥*
*yachkṣaprāṇati prāṇena yachcha paśyati chakṣuṣā ।*
*uchchhiṣṭājjiāre sarve divi devā diviśritaḥ ॥23 ॥*
*ṛchaḥ sāmāni chchhandāṁsi purāṇaṁ yajuṣā saha ।*
*uchchhiṣṭājjiāre sarve divi devā diviśritaḥ ॥24 ॥*
*prāṇāpānau chakṣuḥ śrotramakṣitiścha kṣitiścha yā ।*
*uchchhiṣṭājjiāre sarve divi devā diviśritaḥ ॥25 ॥*
*ānandā modāḥ pramudo'bhīmodamudaścha ye ।*
*uchchhiṣṭājjiāre sarve divi devā diviśritaḥ ॥26 ॥*
*devāḥ pitaro manuṣyāgandharvāpsarasaścha ye ।*
*uchchhiṣṭājjiāre sarve divi devā diviśritaḥ ॥27 ॥*

२४. उदीची सोमः स्वजः अशनिः (Udīchī Somaḥ Svajaḥ Aśaniḥ) - अ. (Av.) ३.२७.४

उदीची दिक् सोमोऽधिपतिः स्वजो रक्षिताशनिरिषवः ।
तेभ्यो नमोऽधिपतिभ्यो नमो रक्षितृभ्यो नम इषुभ्यो नम एभ्यो अस्तु ।
यो३स्मान् द्वेष्टि यं वयं द्विष्मस्तं वो जम्भे दध्मः ॥४ ॥
*udīchī dik somo'dhipatiḥ svajo rakṣitāśanirişavaḥ ।*
*tebhyo namo'dhipatibhyo namo rakṣitṛbhyo nama iṣubhyo nama ebhyo astu ।*
*yo3smān dveṣṭi yaṁ vayaṁ dviṣmastaṁ vo jambhe dadhmaḥ ॥4 ॥*

२५. उषा (Uṣā) - अ. (Av.) ३.१६.७

अश्वावतीर्गोमतीर्न उषासो वीरवतीः सदमुच्छन्तु भद्राः ।
घृतं दुहाना विश्वतः प्रपीता यूयं पात स्वस्तिभिः सदा नः ॥७ ॥
*aśvāvatīrgomatīrna uṣāso vīravatīḥ sadamuchchhantu bhadrāḥ ।*
*ghṛtaṁ duhānā viśvataḥ prapītā yūyaṁ pāta svastibhiḥ sadā naḥ ॥7 ॥*

२६. ऊर्ध्वा बृहस्पतिः श्वित्र वर्षः (Ūrdhvā Bṛhaspatiḥ Śvitra Varṣaḥ) - अ. (Av.) ३.२७.६

तेभ्यो नमोऽधिपतिभ्यो नमो रक्षितृभ्यो नम इषुभ्यो नम एभ्यो अस्तु ।
यो३स्मान् द्वेष्टि यं वयं द्विष्मस्तं वो जम्भे दध्मः ॥६ ॥
*tebhyo namo'dhipatibhyo namo rakṣitṛbhyo nama iṣubhyo nama ebhyo astu ।*
*yo3smān dveṣṭi yaṁ vayaṁ dviṣmastaṁ vo jambhe dadhmaḥ ॥6 ॥*

२७. कर्माणि (Karmāṇi) - अ. (Av.) ५.६.२

अनाप्ता ये वः प्रथमा यानि कर्माणि चक्रिरे ।
वीरान् नो अत्र मा दभन् तद् व एतत् पुरो दधे ॥२ ॥
*anāptā ye vaḥ prathamā yāni karmāṇi chakrire ।*
*vīrān no atra mā dabhan tad va etat puro dadhe ॥2 ॥*

२८. कामः (Kāmaḥ) - अ. (Av.) ९.२.१-२५

सपत्नहनमृषभं घृतेन कामं शिक्षामि हविषाज्येन ।
नीचैः सपत्नान् मम पादय त्वमभिष्टुतो महता वीर्येण ॥१॥
यन्मे मनसो न प्रियं न चक्षुषो यन्मे बभस्ति नाभिनन्दति ।
तद् दुःष्वप्न्यं प्रति मुंचामि सपत्ने कामं स्तुत्वोदहं भिदेयम् ॥२॥
दुःष्वप्न्यं काम दुरितं च कामप्रजस्तामस्वगतामवर्तिम् ।
उग्र ईशानः प्रति मुंच तस्मिन् यो अस्मभ्यमंहूरणा चिकित्सात् ॥३॥
नुदस्व काम प्र णुदस्व कामावर्ति यन्तु मम ये सपत्नाः ।
तेषां नुत्तानामधमा तमांस्यग्ने वास्तूनि निर्दह त्वम् ॥४॥
सा ते काम दुहिता धेनुरुच्यते यामाहुर्वाचं कवयो विराजम् ।
तया सपत्नान् परि वृङ्धि ये मम पर्येनान् प्राणः पशवो जीवनं वृणक्तु ॥५॥
कामस्येन्द्रस्य वरुणस्य राज्ञो विष्णोर्बलेन सवितुः सवेन ।
अग्नेर्होत्रेण प्र णुदे सपत्नांछम्बीव नावमुदकेषु धीरः ॥६॥
अध्यक्षो वाजी मम काम उग्रः कृणोतु मह्यमसपत्नमेव ।
विश्वे देवा मम नाथं भवन्तु सर्वे देवा हवमा यन्तु म इमम् ॥७॥
इदमाज्यं घृतवज्जुषाणाः कामज्येष्ठा इह मादयध्वम् । कृण्वन्तो मह्यमसपत्नमेव ॥८॥
इन्द्राग्नी काम सरथं हि भूत्वा नीचैः सपत्नान् मम पादयाथः ।
तेषां पन्नानामधमा तमांस्यग्ने वास्तून्यनुनिर्दह त्वम् ॥९॥
जहि त्वं काम मम ये सपत्ना अन्धा अमांस्यव पादयैनान ।
निरिन्द्रिया अरसाः सन्तु सर्वे मा ते जीविषुः कतमच्चनाहः ॥१०॥
अवधीत् कामो मम ये सपत्ना उरुं लोकमकरन्मह्यमेधतुम् ।
मह्यं नमन्तां प्रदिशश्चतस्रो मह्यं षडुर्वीर्घृतमा वहन्तु ॥११॥
तेऽधरांचः प्र प्लवन्तां छिन्ना नौरिव बन्धनात् ।
न सायकप्रणुत्तानां पुनरस्ति निवर्तनम् ॥१२॥
अग्निर्यव इन्द्रो यवः सोमो यवः । यवयावानो देवा यावयन्त्वेनम् ॥१३॥
असर्ववीरश्चरतु प्रणुत्तो द्वेष्यो मित्राणां परिवर्ग्यः१ स्वानाम् ।
उत पृथिव्यामव स्यन्ति विद्युत उग्रो वो देवः प्र मृणत् सपत्नान् ॥१४॥
च्युता चेयं बृहत्यच्युता च विद्युत् बिभर्ति स्तनयित्नूंश्च सर्वान् ।
उद्यन्नादित्यो द्रविणेन तेजसा नीचैः सपत्नान् नुदतां मे सहस्वान् ॥१५॥
यत् ते काम शर्म त्रिवरूथमुद्भु ब्रह्म वर्म विततमनतिव्याध्यंकृतम् ।
तेन सपत्नान् परि वृङ्धि ये मम पर्येनान् प्राणः पशवो जीवनं वृणक्तु ॥१६॥
येन देवा असुरान् प्राणुदन्त येनेन्द्रो दस्यूनधमं तमो निनाय ।
तेन त्वं काम मम ये सपत्नास्तानस्माल्लोकात् प्र णुदस्व दूरम् ॥१७॥
यथा देवा असुरान् प्राणुदन्त यथेन्द्रो दस्यूनधमं तमो बबाधे ।
तथा त्वं काम मम ये सपत्नास्तानस्माल्लोकात् प्र णुदस्व दूरम् ॥१८॥
कामो जो प्रथमो नैनं देवा आपुः पितरो न मर्त्याः ।
ततस्त्वमसि ज्यायान् विश्वहा महांस्तस्मै ते काम नम इत् कृणोमि ॥१९॥
यावती द्यावापृथिवी वरिम्णा यावदापः सिष्यदुर्यावदग्निः ।
ततस्त्वमसि ज्यायान् विश्वहा महांस्तस्मै ते काम नम इत् कृणोमि ॥२०॥
यावतीर्दिशः प्रदिशो विषूचीर्यावतीराशा अभिचक्षणा दिवः ।
ततस्त्वमसि ज्यायान् विश्वहा महांस्तस्मै ते काम नम इत् कृणोमि ॥२१॥
यावतीर्भृंगा जत्वः कुरूरवो यावतीर्वघा वृक्षसर्प्योबभूवुः ।
ततस्त्वमसि ज्यायान् विश्वहा महांस्तस्मै ते काम नम इत् कृणोमि ॥२२॥
ज्यायान् निमिषतोऽसि तिष्ठतो ज्यायान्त्समुद्रादसि काम मन्योर ।
ततस्त्वमसि ज्यायान् विश्वहा महांस्तस्मै ते काम नम इत् कृणोमि ॥२३॥
न वै वातश्चन काममाप्नोति नाग्निः सूर्यो नोत चन्द्रमाः ।

ततस्त्वमसि ज्यायान् विश्वहा महांस्तस्मै ते काम नम इत् कृणोमि ॥२४॥
यास्ते शिवास्तन्वः काम भद्रा याभिः सत्यं भवति यद् वृणीषे ।
ताभिष्ट्वमस्माँ अभिसंविशस्वान्यत्र पापीरप वेशया धियः ॥२५॥
*sapatnahanamṛṣabhaṁ ghutena kāmaṁ śikṣāmi haviṣājyena /*
*nīchaiḥ sapatnān mama pādaya tvamabhiṣṭuto mahatā vīryeṇa //1 //*
*yanme manaso na priyaṁ na chakṣuṣo yanme babhasti nābhinandati /*
*tad duḥṣvapnyaṁ prati muṁchāmi sapatne kāmaṁ stutvodahaṁ bhideyam //2 //*
*duḥṣvapnyaṁ kāma duritaṁ cha kāmaprajastāmasvagatāmavartim /*
*ugra īśānaḥ prati muṁcha tasmin yo asmabhyamaṁhūraṇā chikitsāt //3 //*
*nudasva kāma pra ṇudasva kāmāvarti yantu mama ye sapatnāḥ /*
*teṣāṁ nuttānāmadhamā tamāṁsyagne vāstūni nirdaha tvam //4 //*
*sā te kāma duhitā dhenuruchyate yāmāhurvāchaṁ kavayo virājam /*
*tayā sapattnān pari vṛṅgdhi ye mama paryenān prāṇaḥ paśavo jīvanaṁ vṛṇaktu //5 //*
*kāmasyendrasya varuṇasya rāāo viṣṇorbalena savituḥ savena /*
*agnerhotreṇa pra ṇude sapatnāṁchhambīva nāvamudakeṣu dhīraḥ //6 //*
*adhyakṣo vājī mama kāma ugraḥ kṛṇotu mahyamasapatnameva /*
*viśve devā mama nāthaṁ bhavantu sarve devā havamā yantu ma imam //7 //*
*idamājyaṁ ghṛtavajjuṣāṇāḥ kāmajyeṣṭhā iha mādayadhvam / kṛṇvanto mahyamasapatnameva //8 //*
*indrāgnī kāma sarathaṁ hi bhūtvā nīchaiḥ sapatnān mama pādayāthaḥ /*
*teṣāṁ pannānāmadhamā tamāṁsyagne vāstūnyanunirdaha tvam //9 //*
*jahi tvaṁ kāma mama ye sapatnā andhā amāṁsyava pādayaināna /*
*nirindriyā arasāḥ santu sarve mā te jīviṣuḥ katamachchanāhaḥ //10 //*
*avadhīt kāmo mama ye sapatnā uruṁ lokamakaranmahyamedhatum /*
*mahyaṁ namantāṁ pradiśaśchatasro mahyaṁ ṣaḍurvīrghṛtamā vahantu //11 //*
*te'dharāṁchaḥ pra plavantāṁ chhinnā nauriva bandhanāt /*
*na sāyakapraṇuttānāṁ punarasti nivartanam //12 //*
*agniryava indro yavaḥ somo yavaḥ / yavayāvāno devā yāvayantvenam //13 //*
*asarvavīraścharatu praṇutto dveṣyo mitrāṇāṁ parivargyaḥ? svānām /*
*uta pṛthivyāmava syanti vidyuta ugro vo devaḥ pra mṛṇat sapatnān //14 //*
*chyutā cheyaṁ bṛhatyachyutā cha vidyut bibharti stanayitnūśchaṁ sarvān /*
*udyannādityo draviṇena tejasā nīchaiḥ sapatnān nudatāṁ me sahasvān //15 //*
*yat te kāma śarma trivarūthamudbhu brahma varma vitatamanativyādhyaṁkṛtam /*
*tena sapatnān pari vṛṅgdhi ye mama paryenān prāṇaḥ paśavo jīvanaṁ vṛṇaktu //16 //*
*yena devā asurān prāṇudanta yenendro dasyūnadhamaṁ tamo nināya /*
*tena tvaṁ kāma mama ye sapatnāstānasmāllokāt pra ṇudasva dūram //17 //*
*yathā devā asurān prāṇudanta yathendro dasyūnadhamaṁ tamo babādhe /*
*tathā tvaṁ kāma mama ye sapatnāstānasmāllokāt pra ṇudasva dūram //18 //*
*kāmo jo prathamo nainaṁ devā āpuḥ pitaro na martyāḥ /*
*tatastvamasi jyāyān viśvahā mahāṁstasmai te kāma nama it kṛṇomi //19 //*
*yāvatī dyāvāpṛthivī varimṇā yāvadāpaḥ siṣyaduryāvadagniḥ /*
*tatastvamasi jyāyān viśvahā mahāṁstasmai te kāma nama it kṛṇomi //20 //*
*yāvatīrdiśaḥ pradiśo viṣūchīryāvatīrāśā abhichakṣaṇā divaḥ /*
*tatasvamasi jyāyān viśvahā mahāṁstasmai te kāma nama it kṛṇomi //21 //*
*yāvatīrbhṛṁgā jatvaḥ kurūravo yāvatīrvaghā vṛkṣasarpyobabhūvuḥ /*
*tatastvamasi jyāyān viśvahā mahāṁstasmai te kāma nama it kṛṇomi //22 //*
*jyāyān nimiṣato'si tiṣṭhato jyāyāntsamudrādasi kāma manyora /*
*tatastvamasi jyāyān viśvahā mahāṁstasmai te kāma nama it kṛṇomi //23 //*
*na vai vātaśchana kāmamāpnoti nāgniḥ sūryo nota chandramāḥ /*

*tatastvamasi jyāyān viśvahā mahāṁstasmai te kāma nama it kṛṇomi ॥24॥*
*yāste śivāstanvaḥ kāma bhadrā yābhiḥ satyaṁ bhavati yad vṛṇīṣe ।*
*tābhiṣṭvamasmāṁ̐ abhisaṁviśasvānyatra pāpīrapa veśayā dhiyaḥ ॥25॥*

२९. कुहुः (Kuhuḥ) - अ. (Av.) ७.४७.१-२

कुहूं देवीं सुकृतं विद्मनापसस्मिन् यो सुहवा जोहवीमि ।
सा नो रयिं विश्वारं नि यच्छाद् ददातु वीरं शतदायमुक्थ्यम् ॥१॥
कुहूर्देवानाममृतस्य पत्नी हव्या नो अस्य हविषो जुषेत ।
श्रृणोतु यामुशती नो अद्य रायस्पोषं चिकितुषी दधातु ॥२॥
*kuhūṁ devīṁ sukṛtaṁ vidyanāpasasmin yo suhavā johavīmi ।*
*sā no rayiṁ viśvāraṁ ni yachchhād dadātu vīraṁ śatadāyamukthyam ॥1॥*
*kuhūrdevānāmamṛtasya patnī havyā no asya haviṣo juṣeta ।*
*śṛṇotu yāmuśatī no adya rāyaspoṣaṁ chikituṣī dadhātu ॥2॥*

३०. गर्भदृंहणम् (Garbhadṛṁhaṇam) - अ. (Av.) ६.१७.१-४

यथेयं पृथिवी मही भूतानां गर्भमादधे। एवा ते ध्रियतां गर्भो अनु सूतुं सवितवे ॥१॥
यथेयं पृथिवी मही दाधारेमान् वनस्पतीन्। एवा ते ध्रियतां गर्भो अनु सूतुं सवितवे ॥२॥
यथेयं पृथिवी मही दाधार पर्वतान् गिरीन्। एवा ते ध्रियतां गर्भो अनु सूतुं सवितवे ॥३॥
यथेयं पृथिवी मही दाधार विष्ठितं जगत्। एवा ते ध्रियतां गर्भो अनु सूतुं सवितवे ॥४॥
*yatheyaṁ pṛthivī mahī bhūtānāṁ garbhamādadhe । evā te dhriyatāṁ garbho anu sūtuṁ savitave ॥1॥*
*yatheyaṁ pṛthivī mahī dādhāremān vanaspatīn । evā te dhriyatāṁ garbho anu sūtuṁ savitave ॥2॥*
*yatheyaṁ pṛthivī mahī dādhāra parvatān girīn । evā te dhriyatāṁ garbho anu sūtuṁ savitave ॥3॥*
*yatheyaṁ pṛthivī mahī dādhāra viṣṭhitaṁ jagat । evā te dhriyatāṁ garbho anu sūtuṁ savitave ॥4॥*

३१. गुल्गलः (Gulgalaḥ) - अ. (Av.) १९.३८.१-३

न तं यक्ष्मा अरुन्धते नैनं शपथो अश्नुते ।
यं भेषजस्य गुल्गुलोः सुरभिर्गन्धो अश्नुते ॥१॥
विष्वंचस्तस्माद्यक्ष्मा मृगा अश्वा इवेरते ।
यद् गुल्गुलु सैन्धवं यद्वाप्यासि समुद्रियम् ॥२॥
उभयोरग्रभं नामास्मा अरिष्टतातये ॥३॥
*na taṁ yakṣamā arundhate nainaṁ śapatho aśnute ।*
*yaṁ bheṣajasya gulguloḥ surabhirgandho aśnute ॥1॥*
*viṣvaṁchastasmādyakṣamā mṛgā aśvā iverate ।*
*yad gulgulu saindhavaṁ yadvāpyāsi samudriyam ॥2॥*
*ubhayoragrabhaṁ nāmāsmā ariṣṭatātaye ॥3॥*

३२. चन्द्रः (Chandraḥ) - अ. (Av.) २.२२.१-५

चन्द्र यत् ते तपस्तेन तं प्रति तप यो३स्मान् द्वेष्टि यं वयं द्विष्मः ॥१॥
चन्द्र यत् ते हरस्तेन तं प्रति हर यो३स्मान द्वेष्टि यं वयं द्विष्मः ॥२॥
चन्द्र यत् तेऽर्चिस्तेन तं प्रत्यर्च यो३स्मान् द्वेष्टि यं वयं द्विष्मः ॥३॥
चन्द्र यत् ते शोचिस्तेन तं प्रति शोच यो३स्मान् द्वेष्टि यं वयं द्विष्मः ॥४॥
चन्द्र यत् ते तेजस्तेन तमतेजसं कृणु यो३स्मान द्वेष्टि यं वयं द्विष्मः ॥५॥
*chandra yat te tapastena taṁ prati tapa yo3smān dveṣṭi yaṁ vayaṁ dviṣmaḥ ॥1॥*
*chandra yat te harastena taṁ prati hara yo3smāna dveṣṭi yaṁ vayaṁ dviṣmaḥ ॥2॥*
*chandra yat te'rchistena taṁ pratyarcha yo3smān dveṣṭi yaṁ vayaṁ dviṣmaḥ ॥3॥*
*chandra yat te śochistena taṁ prati śocha yo3smān dveṣṭi yaṁ vayaṁ dviṣmaḥ ॥4॥*
*chandra yat te tejastena tamatejasaṁ kṛṇu yo3smāna dveṣṭi yaṁ vayaṁ dviṣmaḥ ॥5॥*

३३. चन्द्रमा (Chandramā) - अ. (Av.) ५.२४.१०; ६.८०.१-३; ६.७८.१; २; ७.९१.१; ७.९२.१; १८.४.८९

अ. (Av.) ५.२४.१०

चन्द्रमा नक्षत्राणामधिपतिः स मावतु ।
अस्मिन् ब्रह्मण्यस्मिन् कर्मण्यस्यां पुरोधायामस्यां प्रतिष्ठायामस्यां चित्त्यामस्यामाकूत्यामस्यामाशिष्यस्यां देवहूत्यां स्वाहा ॥१०॥

*chandramā nakṣatrāṇāmadhipatiḥ sa māvatu ।*
*asmin brahmaṇyasmin karmaṇyasyāṁ purodhāyāmasyāṁ pratiṣṭhāyāmasyāṁ chittyāmasyāmākūtyāmasyāmāśiṣyasyāṁ devahūtyāṁ svāhā ॥10॥*

अ. (Av.) ६.८०.१-३

अन्तरिक्षेण पतति विश्वा भूतावचाकशत् ।
शुनो दिव्यस्य यन्महस्तेना ते हविषा विधेम ॥१॥
ये त्रयः कालकांजा दिवि देवा इव श्रिताः । तान्त्सर्वानह्व ऊतयेऽस्मा अरिष्टतातये ॥२॥
अप्सु ते जन्म दिवि ते सधस्थं समुद्रे अन्तर्महिमा ते पृथिव्याम् ।
शुनो दिव्यस्य यन्महस्तेना ते हविषा विधेम ॥३॥

*antarikṣeṇa patati viśvā bhūtāvachākaśat ।*
*śuno divyasya yanmahastenā te haviṣā vidhema ॥1॥*
*ye trayaḥ kālakāṁjā divi devā iva śritāḥ । tāntsarvānahna ūtaye'smā ariṣṭatātaye ॥2॥*
*apsu te janma divi te sadhasthaṁ samudre antarmahimā te pṛthivyām ।*
*śuno divyasya yanmahastenā te haviṣā vidhema ॥3॥*

अ. (Av.) ६.७८.१-२

तेन भूतेन हविषायमा प्यायतां पुनः । जायां यामस्मा आवाक्षुस्तां रसेनाभि वर्धताम् ॥१॥
अभि वर्धतां पयसाभि राष्ट्रेण वर्धताम् । रय्या सहस्रवर्चसेमौ स्तामनुपक्षितौ ॥२॥

*tena bhūtena haviṣāyamā pyāyatāṁ punaḥ । jāyāṁ yāmasmā āvākṣustāṁ rasenābhi vardhatām ॥1॥*
*abhi vardhatāṁ payasābhi rāṣṭreṇa vardhatām । rayyā sahasravarchasemau stāmanupakṣitau ॥2॥*

अ. (Av.) ७.९१.१

इन्द्रः सुत्रामा स्ववाँ अवोभिः सुमृडीको भवतु विश्ववेदाः ।
बाधतां द्वेषो अभयं नः कृणोतु सुवीर्यस्य पतयः स्याम ॥१॥

*indraḥ sutrāmā svavām̐ avobhiḥ sumṛḍīko bhavatu viśvavedāḥ ।*
*bādhatāṁ dveṣo abhayaṁ naḥ kṛṇotu suvīryasya patayaḥ syāma ॥1॥*

अ. (Av.) ७.९२.१

स सुत्रामा स्ववाँ इन्द्रो अस्मदाराच्चिद् द्वेषः सनुतर्युयोतु ।
तस्य वयं सुमतौ यियस्यापि भद्रे सौमनसे स्याम ॥१॥

*sa sutrāmā svavām̐ indro asmadārāchchid dveṣaḥ sanutaryuyotu ।*
*tasya vayaṁ sumatau yiāyasyāpi bhadre saumanase syāma ॥1॥*

अ. (Av.) १८.४.८९

चन्द्रमा अप्स्व१न्तरा सुपर्णो धावते दिवि ।
न वो हिरण्यनेमयः पदं विन्दन्ति विद्युतो वित्तं मे अस्य रोदसी ॥८९॥

*chandramā apsva1ntarā suparṇo dhāvate divi ।*
*na vo hiraṇyanemayaḥ padaṁ vindanti vidyuto vittaṁ me asya rodasī ॥89॥*

३४. जंगिडमणिः (Jaṁgiḍamaṇiḥ) - अ. (Av.) २.४.१-६

दीर्घायुत्वाय बृहते रणायारिष्यन्तो दक्षमाणाः सदैव ।
मणिं विष्कन्धदूषणं जंगिडं बिभृमो वयम् ॥१॥
जंगिडो जम्भाद् विशराद् विष्कन्धादभिशोचनात् । मणिः सहस्रवीर्यः परि णः पातु विश्वतः ॥२॥

अयं विष्कन्धं सहतेऽयं बाधते अत्त्रिणः । अयं नो विश्वभेषजो जंगिडः पात्वंहसः ॥३ ॥
देवैर्दत्तेन मणिना जंगिडेन मयोभुवा । विष्कन्धं सर्वा रक्षांसि व्यायामे सहामहे ॥४ ॥
शणश्च मा जंगिडश्च विष्कन्धादभि रक्षताम् । अरण्यादन्य आभृतः कृष्या अन्यो रसेभ्यः ॥५ ॥
कृत्यादूषिरयं मणिरथो अरातिदूषिः । अथा सहस्वांजंगिडः प्र ण आयूंषि तारिषत् ॥६ ॥
*dīrghāyutvāya bṛhate raṇāyāriṣyanto dakṣamāṇāḥ sadaiva /*
*maṇiṁ viṣkandhadūṣaṇaṁ jaṁgiḍaṁ bibhṛmo vayam //1 //*
*jaṁgiḍo jambhād viśarād viṣkandhādabhiśochanāt / maṇiḥ sahasravīryaḥ pari ṇaḥ pātu viśvataḥ //2 //*
*ayaṁ viṣkandhaṁ sahate'yaṁ bādhate attriṇaḥ / ayaṁ no viśvabheṣajo jaṁgiḍaḥ pātvaṁhasaḥ //3 //*
*devairdattena maṇinā jaṁgiḍena mayobhuvā / viṣkandhaṁ sarvā rakṣāṁsi vyāyāme sahāmahe //4 //*
*śaṇaścha mā jaṁgiḍaścha viṣkandhādabhi rakṣatām / araṇyādanya ābhṛtaḥ kṛṣyā anyo rasebhyaḥ //5 //*
*kṛtyādūṣirayaṁ maṇiratho arātidūṣiḥ / athā sahasvāṁjaṁgiḍaḥ pra ṇa āyūṁṣi tāriṣat //6 //*

३५. जातवेदाः (Jātavedāḥ) - अ. (Av.) ७.३४.१; ७.३५.१-३; ७.१०६.१; १८.२.५

अ. (Av.) ७.३४.१

अग्ने जातान् प्र णुदा मे सपत्नान् प्रत्यजातांजातवेदो नुदस्व ।
अधस्पदं कृणुष्व ये पृतन्यवोऽनागसस्ते वयमदितये स्याम ॥१ ॥
*agne jātān pra ṇudā me sapatnān pratyajātāṁjātavedo nudasva /*
*adhaspadaṁ kṛṇuṣva ye pṛtanyavo'nāgasaste vayamaditaye syāma //1 //*

अ. (Av.) ७.३५.१-३

प्राज्यान्त्सपत्नान्त्सहसा सहस्व प्रत्यजातांजातवेदो नुदस्व ।
इदं राष्ट्रं पिपृहि सौभगाय विश्व एनमनु मदन्तु देवाः ॥१ ॥
इमा यास्ते शतं हिराः सहस्र धमनीरुत । तासां ते सर्वासामहमश्मना बिलमप्यधाम् ॥२ ॥
परं योनेरवरं ते कृणोमि मा त्वा प्रजाभि भून्मोत सूनुः ।
अस्वं१ त्वाप्रजसं कृणोम्पश्मानं ते अपिधानं कृणोमि ॥३ ॥
*prājyāntsapatnāntsahasā sahasva pratyajātāṁjātavedo nudasva /*
*idaṁ rāṣṭraṁ pipṛhi saubhagāya viśva enamanu madantu devāḥ //1 //*
*imā yāste śataṁ hirāḥ sahasra dhamanīruta / tāsāṁ te sarvāsāmahamaśmanā bilamapyadhām //2 //*
*paraṁ yoneravaraṁ te kṛṇomi mā tvā prajābhi bhūnmota sūnuḥ /*
*asvaṁ1 tvāprajasaṁ kṛṇompaśmānaṁ te apidhānaṁ kṛṇomi //3 //*

अ. (Av.) ७.१०६.१

यदस्मृति चकृम किं चिदग्न उपाररिम चरणे जातवेदः ।
ततः पाहि त्वं नः प्रचेतः शुभे सखिभ्यो अमृतत्वमस्तु नः ॥१ ॥
*yadasmṛti chakṛma kiṁ chidagna upārarima charaṇe jātavedaḥ /*
*tataḥ pāhi tvaṁ naḥ prachetaḥ śubhe sakhibhyo amṛtatvamastu naḥ //1 //*

अ. (Av.) १८.२.५

यदा श्रृतं कृणवो जातवेदोऽथेममेनं परि दत्तात् पितृभ्यः ।
यदो गच्छात्यसुनीतिमेतामथ देवानां वशनीर्भवाति ॥५ ॥
*yadā śṛtaṁ kṛṇavo jātavedo'themamenaṁ pari dattāt pitṛbhyaḥ /*
*yado gachchhātyasunītimetāmatha devānāṁ vaśanīrbhavāti //5 //*

३६. जातवेदाः त्वष्टा सविता (Jātavedāḥ Tvaṣṭā Savitā) - अ. (Av.) २.२९.२

आयुरस्मै धेहि जातवेदः प्रजां त्वष्टरधिनिधेह्यस्मै ।
रायस्पोषं सवितरा सुवास्मै शतं जीवाति शरदस्तवायम् ॥२ ॥

*āyurasmai dhehi jātavedaḥ prajāṁ tvaṣṭaradhinidhehyasmai* ।
*rāyaspoṣaṁ savitarā suvāsmai śataṁ jīvāti śaradastavāyam* ॥2॥

३७. जायान्याः (Jāyānyāḥ) - अ. (Av.) ७.७६.३-५

यः कीकसाः प्रश्रृणाति तलीद्यमवतिष्ठति। निरास्तं सर्व जायान्यं यः कश्च ककुदि श्रितः ॥३॥
पक्षी जायान्यः पतति स आ विशति पूरुषम्। तदक्षितस्य भेषजमुभयोः सुक्षतस्य च ॥४॥
विद्यवै ते जायान्य जानं यतो जायान्य जायसे। कथं ह तत्र त्वं हनो यस्य कृण्मो हविर्गृहे ॥५॥
*yaḥ kīkasāḥ praśṛṇāti talīdyamavatiṣṭhati । nirāstaṁ sarva jāyānyaṁ yaḥ kaścha kakudi śritaḥ* ॥3॥
*pakṣī jāyānyaḥ patati sa ā viśati pūruṣam । tadakṣitasya bheṣajamubhayoḥ sukṣatasya cha* ॥4॥
*vidyavai te jāyānya jānaṁ yato jāyānya jāyase । kathaṁ ha tatra tvaṁ hano yasya kṛṇmo havirgṛhe* ॥5॥

३८. तताः (Tatāḥ) - अ. (Av.) ५.२४.१६

तता अवरे ते मावन्तु। अस्मिन् ब्रह्मण्यस्मिन् कर्मण्यस्यां पुरोधायामस्यां प्रतिष्ठायामस्यां चित्त्यामस्यामाकूत्यामस्यामाशिष्यस्यां देवहूत्यां स्वाहा ॥१६॥
*tatā avare te māvantu । asmin brahmaṇyasmin karmaṇyasyāṁ purodhāyāmasyāṁ pratiṣṭhāyāmasyāṁ chittyāmasyāmākūtyāmasyāmāśiṣyasyāṁ devahūtyāṁ svāhā* ॥16॥

३९. ततामहाः (Tatāmahāḥ) - अ. (Av.) ५.२४.१७

ततस्ततामहास्ते मावन्तु। अस्मिन् ब्रह्मण्यस्मिन् कर्मण्यस्यां पुरोधायामस्यां प्रतिष्ठायामस्यां चित्त्यामस्यामाकूत्यामस्यामाशिष्यस्यां देवहूत्यां स्वाहा ॥१७॥
*tatastatāmahāste māvantu । asmin brahmaṇyasmin karmaṇyasyāṁ purodhāyāmasyāṁ pratiṣṭhāyāmasyāṁ chittyāmasyāmākūtyāmasyāmāśiṣyasyāṁ devahūtyāṁ svāhā* ॥17॥

४०. त्वष्टा (Tvaṣṭā) - अ. (Av.) ६.७८.३

त्वष्टा जायामजनयत् त्वष्टास्यै त्वां पतिम्। त्वष्टा सहस्रमायूंषि दीर्घमायुष्कृणोतु वाम् ॥३॥
*tvaṣṭā jāyāmajanayat tvaṣṭāsyai tvāṁ patim । tvaṣṭā sahasramāyūṁṣi dīrghamāyuṣkṛṇotu vām* ॥3॥

४१. त्रिवृत् (अग्न्यादयः) (Trivṛt (Agnyādayaḥ) - अ. (Av.) ५.२८.१-१४

नव प्राणान्नभिः सं मिमीते दीर्घायुतवाय शतशारदाय ।
हरिते त्रीणि रजते त्रीण्ययसि त्रीणि तपसाविष्ठितानि ॥१॥
अग्निः सूर्यश्चन्द्रमा भूमिरापो द्यौरन्तरिक्षं प्रदिशो दिशश्च ।
आर्तवा ऋतुभिः संविदाना अनेन मा त्रिवृता पारयन्तु ॥२॥
त्रयः पोषास्त्रिवृति श्रयन्तामनक्तु पूषा पयसा घृतेन ।
अन्नस्य भूमा पुरुषस्य भूमा भूमा पशूनां त इह श्रयन्ताम् ॥३॥
इममादित्या वसुना समुक्षतेममग्ने वर्धय वावृधानः ।
इममिन्द्र सं सृज वीर्येणास्मिन् त्रिवृच्छ्रयतां पोषयिष्णुः ॥४॥
भूमिष्ट्वा पातु हरितेन विश्वभृदग्निः पिपर्त्वयसा सजोषाः ।
वीरुद्भिष्टे अर्जुनं संविदानं दक्षं दधातु सुमनस्यमानम् ॥५॥
त्रेधा जातं जन्मनेदं हिरण्यमग्नेरेकं प्रियतमं बभूव सोमस्यैक हिंसितस्यपरापतत्।
अपामेकं वेधसां रेत आहुस्तत् ते हिरण्यं त्रिवृदस्त्वायुषे ॥६॥
त्र्यायुषं जमदग्नेः कश्यपस्य त्र्यायुषम् । त्रेधामृतस्य चक्षणं त्रीण्यायूंषि तेऽकरम् ॥७॥
त्रयः सुपर्णास्त्रिवृता यदायन्नेकाक्षरमभिसंभूय शक्राः ।
प्रत्यौहन्मृत्युममृतेन साकमन्तर्दधाना दुरितानि विश्वा ॥८॥
दिवस्त्वा पातु हरितं मध्यात् त्वा पात्वर्जुन्म् । भूम्या अयस्मयं पातु प्रागाद् देवपुरा अयम् ॥९॥
इमास्तिस्रो देवपुरास्तास्त्वा रक्षन्तु सर्वतः । तास्त्वं बिभ्रद् वर्चस्वयुत्तरो द्विषतां भव ॥१०॥
पुरं देवानाममृतं हिरण्यं य आबेधे प्रथमो देवो अग्रे ।
तस्मै नमो दश प्राचीः कृणोम्यनु मन्यतां त्रिवृदाबधे मे ॥११॥

आ त्व चृतत्वर्यमा पूषा बृहस्पतिः। अहर्जातस्य यन्नाम तेन त्वाति चृतामसि ॥१२॥
ऋतुभिष्टवार्तवैरायुषे वर्चसे त्वा। संवत्सरस्य तेजसा तेन संहनु कृण्मसि ॥१३॥
घृतादुल्लुप्तं मधुना समक्तं भूमिदृंहमच्युतं पारयिष्णु ।
भिन्दत् सपत्नानधरांश्च कृण्वदा मा रोह महते सौभागाय ॥१४॥

*nava prāṇānnabhiḥ saṁ mimīte dīrghāyutavāya śataśāradāya /*
*harite trīṇi rajate trīṇyayasi trīṇi tapasāviṣṭhitāni //1 //*
*agniḥ sūryaśchandramā bhūmirāpo dyaurantarikṣaṁ pradiśo diśaścha /*
*ārtavā ṛtubhiḥ saṁvidānā anena mā trivṛtā pārayantu //2 //*
*trayaḥ poṣāstrivṛti śrayantāmanaktu pūṣā payasā ghṛtena /*
*annasya bhūmā puruṣasya bhūmā bhūmā paśūnāṁ ta iha śrayantām //3 //*
*imamādityā vasunā samukṣatemamagne vardhaya vāvṛdhānaḥ /*
*imamindra saṁ sṛja vīryeṇāsmin trivṛchchhrayatāṁ poṣayiṣṇuḥ //4 //*
*bhūmiṣṭvā pātu haritena viśvabhṛdagniḥ pipartvayasā sajoṣāḥ /*
*vīrudbhiṣṭe arjunaṁ saṁvidānaṁ dakṣaṁ dadhātu sumanasyamānam //5 //*
*tredhā jātaṁ janmanedaṁ hiraṇyamagnerekaṁ priyatamaṁ babhūva somasyaika hiṁsitasyaparāpatat /*
*apāmekaṁ vedhasāṁ reta āhustat te hiraṇyaṁ trivṛdastvāyuṣe //6 //*
*trayāyuṣaṁ jamadagneḥ kaśyapasya trayāyuṣam / tredhāmṛtasya chakṣaṇaṁ trīṇyāyūṁṣi te'karam //7 //*
*trayaḥ suparṇāstrivṛtā yadāyannekākṣaramabhisaṁbhūya śakrāḥ /*
*pratyauhanmṛtyumamṛtena sākamantardadhānā duritāni viśvā //8 //*
*divastvā pātu haritaṁ madhyāt tvā pātvarjunm / bhūmyā ayasmayaṁ pātu prāgād devapurā ayam //9 //*
*imāstisro devapurāstāstvā rakṣantu sarvataḥ / tāstvaṁ bibhrad varchasvayuttaro dviṣatāṁ bhava //10 //*
*puraṁ devānāmamṛtaṁ hiraṇyaṁ ya ābedhe prathamo devo agre /*
*tasmai namo daśa prāchīḥ kṛṇomyanu manyatāṁ trivṛdābadhe me //11 //*
*ā tva chṛtatvaryamā pūṣā bṛhaspatiḥ / aharjātasya yannāma tena tvāti chṛtāmasi //12 //*
*ṛtubhiṣṭavārtavairāyuṣe varchase tvā / saṁvatsarasya tejasā tena saṁhanu kṛṇmasi //13 //*
*ghṛtādulluptaṁ madhunā samaktaṁ bhūmiddaṁhamachyutaṁ pārayiṣṇu /*
*bhindat sapatnānadharāṁścha kṛṇvadā mā roha mahate saubhāgāya //14 //*

४२. दिव्या आपः (Divyā Āpaḥ) - अ. (Av.) ६.१२४.१-३

दिवो नु मां बृहतो अन्तरिक्षादपां स्तोको अभ्यपप्तद् रसेन ।
समिन्द्रियेण पयसाहमग्ने छन्दोभिर्यौः सुकृतां कृतेन ॥१॥
यदि वृक्षादभ्यपप्तत् फलं तद् यद्यन्तरिक्षात् स उ वायुरेव ।
यत्रास्पृक्षत् तन्वो३ यच्च वासस आपो नुदन्तु निर्ऋतिं पराचैः ॥२॥
अभ्यंजनं सुरभि सा समृदधिर्हिरण्यं वर्चस्तदु पूत्रिममेव ।
सर्वा पवित्रा वितताध्यस्मत् तन्मा तारीर्न्निर्ऋतिर्मो अरातिः ॥३॥

*divo nu māṁ bṛhato antarikṣādapāṁ stoko abhyapaptad rasena /*
*samindriyeṇa payasāhamagne chhandobhiryauḥ sukṛtāṁ kṛtena //1 //*
*yadi vṛkṣādabhyapaptat phalaṁ tad yadyantarikṣāt sa u vāyureva /*
*yatrāspṛkṣat tanvo3 yachcha vāsasa āpo nudantu nirṛtiṁ parāchaiḥ //2 //*
*abhyaṁjanaṁ surabhi sā samṛdadhirhiraṇyaṁ varchastadu pūtrimameva /*
*sarvā pavitrā vitatādhyasmat tanmā tārīrnnirṛtirmo arātiḥ //3 //*

४३. दिशः (Diśaḥ) - अ. (Av.) ४.१५.१

समुत्पतन्तु प्रदिशो नभस्वतीः समभ्राणि वातजूतानि यन्तु ।
महऋषभस्य नदतो नभस्वतो वाश्रा आपः पृथिवीं तर्पयन्तु ॥१॥

*samutpatantu pradiśo nabhasvatīḥ samabhrāṇi vātajūtāni yantu /*
*mahaṛṣabhasya nadato nabhasvato vāśrā āpaḥ pṛthivīṁ tarpayantu //1 //*

४४. दुन्दुभिः (Dundubhiḥ) - अ. (Av.) ६.१२६.१-३

उप श्वासय पृथिवीमुत द्यां पुरुत्रा ते वन्वतां विषिठतं जगत् ।
स दुन्दुभे सजूरिन्द्रेण देवैर्दूराद् दवीयो अप सेध शत्रून् ॥१॥
आ क्रन्दय बलभोजो न आ धा अभि ष्टन दुरिता बाधमानः ।
अप सेध दुन्दुभे दुच्छुनामित इन्द्रस्य मुष्टिरसि वीडयस्व ॥२॥
प्रामूं जयाभी३मे जयन्तु केतुमद् दुन्दुभिर्वावदीतु ।
समश्वपर्णाः पतन्तु नो नरोऽस्माकमिन्द्र रथिनो जयन्तु ॥३॥

*upa śvāsaya pṛthivīmuta dyāṁ purutrā te vanvatāṁ viṣiṭhataṁ jagat /*
*sa dundubhe sajūrindreṇa devairdūrād davīyo apa sedha śatrūn //1 //*
*ā krandaya balabhojo na ā dhā abhi ṣṭana duritā bādhamānaḥ /*
*apa sedha dundubhe duchchhunāmita indrasya muṣṭirasi vīḍayasva //2 //*
*prāmūṁ jayābhī3me jayantu ketumad dundubhirvāvadītu /*
*samaśvaparṇāḥ patantu no naro'smākamindra rathino jayantu //3 //*

४५. देवाः (Devāḥ) - अ. (Av.) २.३४.२; ६.९७.१; ३

अ. (Av.) २.३४.२

प्रमुंचन्तो भुवनस्य रेतो गातुं धत्त यजमानाय देवाः ।
उपाकृतं शशमानं यदस्थात् प्रियं देवानामप्येतु पाथः ॥२॥

*pramuṁchanto bhuvanasya reto gātuṁ dhatta yajamānāya devāḥ /*
*upākṛtaṁ śaśamānaṁ yadasthāt priyaṁ devānāmapyetu pāthaḥ //2 //*

अ. (Av.) ६.९७.१

अभिभूर्यो अभिभूरग्निरभिभूः सोमो अभिभूरिन्द्रः ।
अभय१हं विश्वाः पृतना यथासान्येवा विधेमाग्निहोत्रा इदं हविः ॥१॥

*abhibhūryāo abhibhūragnirabhibhūḥ somo abhibhūrindraḥ /*
*abhaya1haṁ viśvāḥ pṛtanā yathāsānyevā vidhemāgnihotrā idaṁ haviḥ //1 //*

अ. (Av.) ६.९७.३

इमं वीरमनु हर्षध्वमुग्रमिन्द्रं सखायो अनु सं रभध्वम् ।
ग्रामजितं गोजितं वज्रबाहुं जयन्तमज्म प्रमृणन्तमोजसा ॥३॥

*imaṁ vīramanu harṣadhvamugramindraṁ sakhāyo anu saṁ rabhadhvam /*
*grāmajitaṁ gojitaṁ vajrabāhuṁ jayantamajma pramṛṇantamojasā //3 //*

४६. देवपत्न्यः (Devapatnyaḥ) - अ. (Av.) ७.४९.१-२

देवानां पत्नीरुशतीरवन्तु नः प्रावन्तु नस्तुजये वाजसातये ।
याः पार्थिवासो या अपामपि व्रते ता नो देवीः सुहवाः शर्म यच्छन्तु ॥१॥
उत ग्रा वयन्तु देवपत्नीरिन्द्राण्य१ग्नाय्यश्विनी राट् ।
आ रोदसी वरुणानी श्रृणोतु व्यन्तु देवीर्य ऋतुर्जनीनाम् ॥२॥

*devānāṁ patnīruśatīravantu naḥ prāvantu nastujaye vājasātaye /*
*yāḥ pārthivāso yā apāmapi vrate tā no devīḥ suhavāḥ śarma yachchhantu //1 //*
*uta gnā vayantu devapatnīrindrāṇya1gnāyyaśvinī rāṭ /*
*ā rodasī varuṇānī śṛṇotu vyantu devīrya ṛturjanīnām //2 //*

४७. धर्मः अश्विनौ पृत्यृचं मन्त्रोक्ता वा (Dharmaḥ Aśvinau Pṛtyṛchaṁ Mantroktā Vā) - अ. (Av.) ७.७३.१-११

समिद्धो अग्निर्वृषणा रथी दिवस्तप्तो घर्मो दुह्यते वामिषे मधुः ।
वयं हि वां पुरुदमासो अश्विना हवामहे सधमादेषु कारवः ॥१॥
समिद्धो अग्निराश्विना तप्तो वां घर्म आ गतम् ।
दुह्यन्ते नूनं वृषणेह धेनवो दस्रा मदन्ति वेधसः ॥२॥

स्वाहाकृतः शुचिर्देवेषु याो यो अश्विनोश्चमसो देवपानः ।
तमु विश्वे अमृतासो जुषाणा गन्धर्वस्य प्रत्यास्ना रिहन्ति ॥३॥
यदुस्रियास्वाहुतं घृतं पयोऽयं स वामश्विना भाग आ गतम् ।
माध्वी धर्तारा विदथस्य सत्पती तप्तं घर्मं पिबतं रोचने दिवः ॥४॥
तप्तो वां घर्मो नक्षतु स्वहोता प्र वामध्वर्युश्चरतु पयस्वान् ।
मधोर्दुग्धस्याश्विना तनाया वीतं पातं पयस उस्रियायाः ॥५॥
उप द्रव पयसा गोधुगोषमा घर्मे सिंच मय उस्रियायाः ।
वि नाकमख्यत् सविता वरेण्योऽनुप्रयाणमुषसो वि राजति ॥६॥
उप ह्वये सुदुघां धेनुमेतां सुहस्तो गोधुगुत दोहदेनाम् ।
श्रेष्ठं सवं सविता साविषन्नोऽभीदधो घर्मस्तदु षु प्र वोचत् ॥७॥
हिङ्कृण्वती वसुपत्नी वसूनां वत्समिच्छन्ती मनसा न्यागन् ।
दुहामश्विभ्यां पयो अघ्न्येयं सा वर्धतां महते सौभगाय ॥८॥
जुष्टो दमूना अतिथिर्दुरोण इमं नो यामुप याहि विद्वान् ।
विश्वा अग्ने अभियुजो विहत्य शूत्रयतामा भरा भोजनानि ॥९॥
अग्ने शर्ध महते सौभगाय तव द्युम्नान्युत्तमानि सन्तु ।
सं जास्पत्यं सुयममा कृणुष्व शत्रूयतामभि तिष्ठा महांसि ॥१०॥
सूयवसाद् भगवति हि भूया अध वयं भगवन्तः स्याम ।
अद्धि तृणमघ्न्ये विश्वदानीं पिब शुद्धमुदकमाचरन्ती ॥११॥

*samiddho agnirvṛṣaṇā rathī divastapto gharmo duhyate vāmiṣe madhuḥ /*
*vayaṁ hi vāṁ purudamāso aśvinā havāmahe sadhamādeṣu kāravaḥ //1 //*
*samiddho agnirāśvinā tapto vāṁ gharma ā gatam /*
*duhyante nūnaṁ vṛṣaṇeha dhenavo dasrā madanti vedhasaḥ //2 //*
*svāhākṛtaḥ śuchirdeveṣu yāo yo aśvinośchamaso devapānaḥ /*
*tamu viśve amṛtāso juṣāṇā gandharvasya pratyāsnā rihanti //3 //*
*yadusriyāsvāhutaṁ ghṛtaṁ payo'yaṁ sa vāmaśvinā bhāga ā gatam /*
*mādhvī dhartārā vidathasya satpatī taptaṁ gharma pibataṁ rochane divaḥ //4 //*
*tapto vāṁ gharmo nakṣatu svahotā pra vāmadhvaryuścharatu payasvān /*
*madhordugdhasyāśvinā tanāyā vītaṁ pātaṁ payasa usriyāyāḥ //5 //*
*upa drava payasā godhugoṣamā gharme siṁcha maya usriyāyāḥ /*
*vi nākamakhyat savitā vareṇyo'nuprayāṇamuṣaso vi rājati //6 //*
*upa hnaye sudughāṁ dhenumetāṁ suhasto godhuguta dohadenām /*
*śreṣṭhaṁ savaṁ savitā sāviṣanno'bhīdadho gharmastadu ṣu pra vochat //7 //*
*hiṅkṛṇvatī vasupatnī vasūnāṁ vatsamichchhantī manasā nyāgan /*
*duhāmaśvibhyāṁ payo adhnyeyaṁ sā vardhatāṁ mahate saubhagāya //8 //*
*juṣṭo damṛnā atithirduroṇa imaṁ no yāmupa yāhi vidvān /*
*viśvā agne abhiyujo vihatya śūtrayatāmā bharā bhojanāni //9 //*
*agne śardha mahate saubhagāya tava dyumnānyuttamāni santu /*
*saṁ jāspatyaṁ suyamamā kṛṇuṣva śatrūyatāmabhi tiṣṭhā mahāṁsi //10 //*
*sūyavasād bhagavati hi bhūyā adha vayaṁ bhagavantaḥ syāma /*
*addhi tṛṇamaghnye viśvadānīṁ piba śuddhamudakamācharantī //11 //*

४८. ध्रुवः (Dhruvaḥ) - अ. (Av.) ६.८८.१-३;

अ. (Av.) ६.८८.१-३

ध्रुवा द्यौर्ध्रुवा पृथिवी ध्रुवं विश्वमिदं जगत् ।
ध्रुवासः पर्वता इमे ध्रुवा राजा विशामयम् ॥१॥
ध्रुवं ते राजा वरुणो ध्रुवं देवो बृहस्पतिः ।
ध्रुवं त इन्द्रश्चाग्निश्च राष्ट्रं धारयतां ध्रुवम् ॥२॥
ध्रुवोऽच्युतः प्र मृणीहि शत्रूंछत्रूयतोऽधरान् पादयस्व ।

सर्वा दिशः संमनसः सध्रीचीर्ध्रुवाय ते समितिः कल्पतामिह ॥३॥
*dhruvā dyaudhrurvā pṛthivī dhruvaṁ viśvamidaṁ jagat /*
*dhruvāsaḥ parvatā ime dhruvā rājā viśāmayam //1 //*
*dhruvaṁ te rājā varuṇo dhruvaṁ devo bṛhaspatiḥ /*
*dhruvaṁ ta indraśchāgniścha rāṣṭraṁ dhārayatāṁ dhruvam //2 //*
*dhruvo'chyutaḥ pra mṛṇīhi śatrūṁchhatrūyato'dharān pādayasva /*
*sarvā diśaḥ saṁmanasaḥ sadhrīchīrdhruvāya te samitiḥ kalpatāmiha //3 //*

४९. ध्रुवा, विष्णु कल्माषग्रीवः वीरुधः (Dhruvā, Viṣṇu Kalmāṣagrīvaḥ Vīrudhaḥ) - अ. (Av.) ३.२७.५

तेभ्यो नमोऽधिपतिभ्यो नमो रक्षितृभ्यो नम इषुभ्यो नम एभ्यो अस्तु ।
योऽस्मान् द्वेष्टि यं वयं द्विष्मस्तं वो जम्भे दध्मः ॥५॥
*tebhyo namo'dhipatibhyo namo rakṣitṛbhyo nama iṣubhyo nama ebhyo astu /*
*yo3smān dveṣṭi yaṁ vayaṁ dviṣmastaṁ vo jambhe dadhmaḥ //5 //*

५०. द्यावापृथिवी (Dyāvāpṛthivī) - अ. (Av.) ५.२४.३

द्यावापृथिवी दातृणामधिपत्नीते मावताम्।
अस्मिन् ब्रह्मण्यस्मिन् कर्मण्यस्यां पुरोधायामस्यां प्रतिष्ठायामस्यां चित्यामस्यामाकूत्यामस्यामाशिष्यस्यां देवहूत्यां स्वाहा ॥३॥
*dyāvāpṛthivī dātṝṇāmadhipatnīte māvatām /*
*asmin brahmaṇyasmin karmaṇyasyāṁ purodhāyāmasyāṁ pratiṣṭhāyāmasyāṁ chittyāmasyāmākūtyāmasyāmāśiṣyasyāṁ devahūtyāṁ svāhā //3 //*

५१. द्यावापृथिव्यौ विश्वेदेवाः (Viśvedevāḥ) मरुतः आपः - अ. (Av.) २.२९.४-५

इन्द्रेण दत्तो वरुणेन शिष्टो मरुद्भिरुग्रः प्रहितो न आगन् ।
एष वां द्यावापृथिवी उपस्थे मा क्षुधन्मा तृषत् ॥४॥
ऊर्जमस्मा ऊर्जस्वती धत्तं पयो अस्मै पयस्वती धत्तम् ।
ऊर्जस्मै द्यावापृथिवी अधातां विश्वे देवा मरुत ऊर्जमापः ॥५॥
*eṣa vāṁ dyāvāpṛthivī upasthe mā kṣudhanmā tṛṣat //4 //*
*ūrjamasmā ūrjasvatī dhattaṁ payo asmai payasvatī dhattam /*
*ūrjasmai dyāvāpṛthivī adhātāṁ viśve devā maruta ūrjamāpaḥ //5 //*

५२. द्यौ (Dyau) - अ. (Av.) ३.२.५

अमीषां चित्तानि प्रतिमोहयन्ती ग्रहाणांगान्यप्वे परेहि ।
अभि प्रेहि निर्दह हृत्सु शोकैर्ग्राह्यामित्रांस्तमसा विध्य शत्रून् ॥५॥
*amīṣāṁ chittāni pratimohayantī grahāṇāṁgānyapve parehi /*
*abhi prehi nirdaha hṛtsu śokairgrāhyāmitrāṁstamasā vidhya śatrūn //5 //*

५३. पराशरः इन्द्रः (Parāśaraḥ Indraḥ) - अ. (Av.) ६.६५.१-३

अव वमन्युरवायताव बाहू मनोयुजा।
पराशर त्वं तेषां परांचं शुष्ममर्दयाधा नो रयिमा कृधि ॥१॥
निर्हस्तेभ्यो नैर्हस्तं यं देवाः शरुमस्यथ। वृश्चामि शत्रूणां बाहूननेन हविषाहम् ॥२॥
इन्द्रश्चकार प्रथमं नैर्हस्तमसुरेभ्यः। जयन्तु सत्वानो मम स्थिरेणेन्द्रेण मेदिना ॥३॥
*ava vamanyuravāyatāva bāhū manoyujā /*
*parāśara tvaṁ teṣāṁ parāṁchaṁ śuṣmamardayādhā no rayimā kṛdhi //1 //*
*nirhastebhyo nairhastaṁ yaṁ devāḥ śarumasyatha / vṛśchāmi śatrūṇāṁ bāhūnanena haviṣāham //2 //*
*indraśchakāra prathamaṁ nairhastamasurebhyaḥ / jayantu satvāno mama sthireṇendreṇa medinā //3 //*

५४. पर्जन्यः (Parjanyaḥ) - अ. (Av.) १.२.१-४

विद्मा शरस्य पितरं पर्जन्यं भूरिधायसम्। विद्मो ष्वस्य मातरं पृथिवीं भूरिवर्पसम् ॥१॥

ज्याके परि णो नमाश्मानं तन्वंकृधि। वीडुर्वरीयोऽरातीरप द्वेषांस्या कृधि ॥२ ॥
वृक्षं यद्गावः परिषस्वजाना अनुस्फुरं शरमर्चन्त्यृभुम्। शरुमस्मद् यावय दिद्युमिन्द्र ॥३ ॥
यथा द्यां च पृथिवीं चान्तस्तिष्ठति तेजनम्। एवा रोगं चास्रावं चान्तस्तिष्ठतु मुंज इत् ॥४ ॥
*vidyā śarasya pitaraṁ parjanyaṁ bhūridhāyasm । vidyo ṣvasya mātaraṁ pṛthivīṁ bhūrivarpasam ॥1 ॥*
*jyāke pari ṇo namāśmānaṁ tanvaṁkṛdhi । vīḍurvarīyo'rātīrapa dveṣāṁsyā kṛdhi ॥2 ॥*
*vṛkṣaṁ yadgāvaḥ pariṣasvajānā anusphuraṁ śaramarchantyṛbhum । śarumasmad yāvaya didyumindra ॥3 ॥*
*yathā dyāṁ cha pṛthivīṁ chāntastiṣṭhati tejanam । evā rogaṁ chāsrāvaṁ chāntastiṣṭhatu muṁja it ॥4 ॥*

५५. पर्जन्यादयो मन्त्रोक्ताः (Parjanyādayo Mantroktāḥ) - अ. (Av.) १.३.१-९

विद्या शरस्य पितरं पर्जन्यं शतवृष्णयम् ।
तेना ते तन्वे३शं करं पृथिव्यां ते निषेचनं बहिष्टे अस्तु बालिति ॥१ ॥
विद्या शरस्य पितरं मित्रं शतवृष्ण्यम् ।
तेना ते तन्वे३ शं करं पृथिव्यां ते निषेचनं बहिष्टे अस्तु बालिति ॥२ ॥
विद्या शरस्य पितरं वरुणं शतवृष्ण्यम् ।
तेना ते तन्वे३ शं करं पृथिव्यां ते निषेचनं बहिष्टे अस्तु बालिति ॥३ ॥
विद्या शरस्य पितरं चन्द्र शतवृष्ण्यम् ।
तेना ते तन्वे३ शं करं पृथिव्यां ते निषेचनं बहिष्टे अस्तु बालिति ॥४ ॥
विद्या शरस्य पितरं सूर्य शतवृष्ण्यम् ।
तेना ते तन्वे३ शं करं पृथिव्यां ते निषेचनं बहिष्टे अस्तु बालिति ॥ ।५ ॥
यदान्त्रेषु गवीन्योर्यद् वस्तावधि संश्रितम् । एवा ते मूत्रं मुच्यतां बहिर्बालिति सर्वकम् ॥६ ॥
प्र ते भिनद्मि मेहनं वर्त्र वेशन्त्याइव । एवा ते मूत्रं मुच्यतां बहिर्बालिति सर्वकम् ॥७ ॥
विषितं ते वस्तिबिलं समुद्रस्योदधेरिव । एवा ते मूत्रं मुच्यतां बहिर्बालिति सर्वकम् ॥८ ॥
यथेषुका परापतदवसृष्टाधि धन्वनः । एवा ते मूत्रं मुच्यतां बहिर्बालिति सर्वकम् ॥९ ॥
*vidyā śarasya pitaraṁ parjanyaṁ śatavṛṣṇayam ।*
*tenā te tanve3śaṁ karaṁ pṛthivyāṁ te niṣechanaṁ bahiṣṭe astu bāliti ॥1 ॥*
*vidyā śarasya pitaraṁ mitraṁ śatavṛṣṇyam ।*
*tenā te tanve3 śaṁ karaṁ pṛthivyāṁ te niṣechanaṁ bahiṣṭe astu bāliti ॥2 ॥*
*vidyā śarasya pitaraṁ varuṇaṁ śatavṛṣṇyam ।*
*tenā te tanve3 śaṁ karaṁ pṛthivyāṁ te niṣechanaṁ bahiṣṭe astu bāliti ॥3 ॥*
*vidyā śarasya pitaraṁ chandra śatavṛṣṇyam ।*
*tenā te tanve3 śaṁ karaṁ pṛthivyāṁ te niṣechanaṁ bahiṣṭe astu bāliti ॥4 ॥*
*vidyā śarasya pitaraṁ sūrya śatavṛṣṇyam ।*
*tenā te tanve3 śaṁ karaṁ pṛthivyāṁ te niṣechanaṁ bahiṣṭe astu bāliti ॥ ।5 ॥*
*yadāntreṣu gavīnyoryad vastāvadhi saṁśritam ।*
*evā te mūtraṁ muchyatāṁ bahirbāliti sarvakam ॥6 ॥*
*pra te bhinadyi mehanaṁ vartra veśantyāiva ।*
*evā te mūtraṁ muchyatāṁ bahirbāliti sarvakam ॥7 ॥*
*viṣitaṁ te vastibilaṁ samudrasyodadheriva ।*
*evā te mūtraṁ muchyatāṁ bahirbāliti sarvakam ॥8 ॥*
*yatheṣukā parāpatadavasṛṣṭādhi dhanvanaḥ ।*
*evā te mūtraṁ muchyatāṁ bahirbāliti sarvakam ॥9 ॥*

५६. पशुपतिः (Paśupatiḥ) - अ. (Av.) २.३४.१

य ईशे पशुपतिः पशूनां चतुष्पदामुत यो द्विपदाम् ।
निष्क्रीतः स यियं भागमेतु रायस्पोषा यजमानं सचन्ताम् ॥१ ॥

*ya īśe paśupatiḥ paśūnāṁ chatuṣpadāmuta yo dvipadām* ।
*niṣkrītaḥ sa yiāyaṁ bhāgametu rāyaspoṣā yajamānaṁ sachantām* ॥1॥

५७. पितरः (Pitaraḥ) - अ. (Av.) ४.१५.१५; ५.२४.१५; १८.१.४४-४६; ५१; ५२; १८.२.२९; १८.४.८१.८७

अ. (Av.) ४.१५.१५

खण्वखा३इ खैमखा३इ मध्ये तदुरि। वर्ष वनुध्वं पितरो मरुतां मन इच्छत॥१५॥
*khaṇvakhā3i khaimakhā3i madhye taduri* । *varṣa vanudhvaṁ pitaro marutāṁ mana ichchhata* ॥15॥

अ. (Av.) ५.२४.१५

पितरः परे ते भावन्तु अस्मिन् ब्रह्मण्यस्मिन् कर्मण्यस्यां पुरोधायामस्यां प्रतिष्ठायामस्यां चित्त्यामस्यामाकूत्यामस्यामाशिष्यस्यां देवहूत्यां स्वाहा ॥१५॥
*pitaraḥ pare te bhāvantu asmin brahmaṇyasmin karmaṇyasyāṁ purodhāyāmasyāṁ pratiṣṭhāyāmasyāṁ chittyāmasyāmākūtyāmasyāmāśiṣyasyāṁ devahūtyāṁ svāhā* ॥15॥

अ. (Av.) १८.१.४४-४६

उदीरतामवर उत् परास उन्मध्यमाः पितरः सोम्यासः ।
असुं य ईयुरवृका ऋतास्ते नोऽवन्तु पितरो हवेषु॥४४॥
आहं पितॄन्त्सुविदत्राँ अवित्सि नपातं च विक्रमणं च विष्णोः ।
बर्हिषदो य स्वधया सुतस्य भजन्त पित्वस्त इहागमिष्ठा॥४५॥
इदं पितृभ्यो नमो अस्त्वद्य ये पूर्वासो ये अपरास ईयुः ।
ये पार्थिवे रजस्या निषत्ता ये वा नूनं सुवृजनासु दिक्षु ॥४६॥
*udīratāmavara ut parāsa unmadhyamāḥ pitaraḥ somyāsaḥ* ।
*asuṁ ya īyuravṛkā ṛtāāste no'vantu pitaro haveṣu* ॥44॥
*āhaṁ pitṝntsuvidatrām̐ avitsi napātaṁ cha vikramaṇaṁ cha viṣṇoḥ* ।
*barhiṣado ya svadhayā sutasya bhajanta pitvasta ihāgamiṣṭhā* ॥45॥
*idaṁ pitṛbhyo namo astvadya ye pūrvāso ye aparāsa īyuḥ* ।
*ye pārthive rajasyā niṣattā ye vā nūnaṁ suvṛjanāsu dikṣu* ॥46॥

अ. (Av.) १८.१.५१-५२

बर्हिषदः पितर ऊत्य१र्वागिमा वो हव्या चकृमा जुषध्वम् ।
त आ गतावसा शंतमेनाधा नः शं योररपो दधात॥५१॥
आच्या जानु दक्षिणतो निषद्येदं नो हविरभि गृणन्तु विश्वे ।
मा हिंसिष्ट पितरः केन चिन्नो यद् व आगः पुरुषता कराम ॥५२॥
*barhiṣadaḥ pitara ūtya1rvāgimā vo havyā chakṛmā juṣadhvam* ।
*ta ā gatāvasā śaṁtamenādhā naḥ śaṁ yorarapo dadhāta* ॥51॥
*āchyā jānu dakṣiṇato niṣadyedaṁ no havirabhi gṛṇantu viśve* ।
*mā hiṁsiṣṭa pitaraḥ kena chinno yad va āgaḥ puruṣatā karāma* ॥52॥

अ. (Av.) १८.२.२९

सं विशन्त्विह पितरः स्वा नः स्योनं कृण्वन्तः प्रतिरन्तु आयुः ।
तेभ्यः शकेम हविषा नक्षमाणा ज्योग् जीवन्तः शदः पुरूचीः ॥२९॥
*saṁ viśantviha pitaraḥ svā naḥ syonaṁ kṛṇvantaḥ pratirantu āyuḥ* ।
*tebhyaḥ śakema haviṣā nakṣamāṇā jyog jīvantaḥ śadaḥ purūchīḥ* ॥29॥

अ. (Av.) १८.४.८१-८७

नमो वः पितर ऊर्जे नमो वः पितरो रसाय ॥८१॥
नमो वः पितरो भामाय नमो वः पितरो मन्यवे ॥८२॥
नमो वः पितरो यद् घोरं तस्मै नमो वः पितरो यत् क्रूरं तस्मै ॥८३॥
नमो वः पितरो यच्छिवं तस्मै नमो वः पितरो यत् स्योनं तस्मै ॥८४॥
नमो वः पितरः स्वधा वः पितरः ॥८५॥

येऽत्र पितरः पितरो येऽत्र यूयं स्थ युष्माँस्तेऽनु यूयं तेषां श्रेष्ठा भूयास्थ ॥८६॥
य इह पितरो जीवा इह वयं स्मः। अस्माँस्तेऽनु वयं तेषां श्रेष्ठा भूयास्म ॥८७॥
*namo vaḥ pitara ūrje namo vaḥ pitaro rasāya //81 //*
*namo vaḥ pitaro bhāmāya namo vaḥ pitaro manyave //82 //*
*namo vaḥ pitaro yad ghoraṁ tasmai namo vaḥ pitaro yat krūraṁ tasmai //83 //*
*namo vaḥ pitaro yachchhivaṁ tasmai namo vaḥ pitaro yat syonaṁ tasmai //84 //*
*namo vaḥ pitaraḥ svadhā vaḥ pitaraḥ //85 //*
*ye'tra pitaraḥ pitaro ye'tra yūyaṁ stha yuṣmāṁste'nu yūyaṁ teṣāṁ śreṣṭhā bhūyāstha //86 //*
*ya iha pitaro jīvā iha vayaṁ smaḥ / asmāṁste'nu vayaṁ teṣāṁ śreṣṭhā bhūyāsma //87 //*

५८. पूषाः (Pūṣāḥ) - अ. (Av.) ६.११३.१-३

त्रिते देवा अमृजतैतदेनस्त्रित एनन्मनुष्येषु ममृजे ।
ततो यदि त्वा ग्राहिरानशे तां ते देवा ब्रह्मणा नाशयन्तु ॥१॥
मरीचीर्धूमान् प्र विशानु पाप्मन्नुदारान् गच्छोत वा नीहारान् ।
नदीनां फेनाँ अनु तान् वि नश्य भ्रूणघ्नि पूषन् दुरितानि मृक्ष्व ॥२॥
द्वादशधा निहितं त्रितस्यापमृष्टं मनुष्यैनसानि ।
ततो यदि त्वा ग्राहिरानशे तां ते देवा ब्रह्मणा नाशयन्तु ॥३॥
*trite devā amṛjataitadenastrita enanmanuṣyeṣu mamṛje /*
*tato yadi tvā grāhirānaśe tāṁ te devā brahmaṇā nāśayantu //1 //*
*marīchīrdhūmān pra viśānu pāpmannudārān gachchhota vā nīhārān /*
*nadīnāṁ phenāṁ anu tān vi naśya bhrūṇaghni pūṣan duritāni mṛkṣava //2 //*
*dvādaśadhā nihitaṁ tritasyāpamṛṣṭaṁ manuṣyainasāni /*
*tato yadi tvā grāhirānaśe tāṁ te devā brahmaṇā nāśayantu //3 //*

५९. पूषादयो मन्त्रोक्ताः (Pūṣādayo Mantroktāḥ) - अ. (Av.) १.११.१-६

वषट् ते पूषन्नस्मिन्त्सूतावर्यमा होता कृणोतु वेधाः ।
सिस्रतां नार्यृतप्रजाता वि पर्वाणि जिहतां सूतवा उ ॥१॥
चतस्रो दिवः प्रदिशश्चतस्रो भूम्या उत । देवा गर्भं समैरयन् तं व्यूर्णुवन्तु सूतवे ॥२॥
सूषा व्यूर्णोतु वि योनिं हापयामसि । श्रथया सूषणे त्वमव त्वं बिष्कले सृज ॥३॥
नेव मांसे न पीबसि नेव मज्जस्वाहतम् ।
अवैतु पृश्नि शेवलं शुने जराय्वत्तवेऽव जरायु पद्यताम् ॥४॥
वि ते भिनद्मि मेहनं वि योनिं वि गवीनिके ।
वि मातरं च पुत्रं च वि कुमारं जरायुणाव जरायु पद्यताम् ॥५॥
यथा वातो यथा मनो यथा पतन्ति पक्षिणः ।
एवा त्वं दशमास्य साकं जरायुणा पताव जरायु पद्यताम् ॥६॥
*vaṣaṭ te pūṣannasmintsūtāvaryamā hotā kṛṇotu vedhāḥ /*
*sisratāṁ nāryṛtaprajātā vi parvāṇi jihatāṁ sūtavā u //1 //*
*chatasro divaḥ pradiśaśchatasro bhūmyā uta / devā garbha samairayan taṁ vyūrṇuvantu sūtave //2 //*
*sūṣā vyūrṇotu vi yoniṁ hāpayāmasi / śrathayā sūṣaṇe tvamava tvaṁ biṣkale sṛja //3 //*
*neva māṁse na pībasi neva majjasvāhatam /*
*avaitu pṛśni śevalaṁ śune jarāyvattave'va jarāyu padyatām //4 //*
*vi te bhinadyi mehanaṁ vi yoniṁ vi gavīnike /*
*vi mātaraṁ cha putraṁ cha vi kumāraṁ jarāyuṇāva jarāyu padyatām //5 //*
*yathā vāto yathā mano yathā patanti pakṣiṇaḥ /*
*evā tvaṁ daśamāsya sākaṁ jarāyuṇā patāva jarāyu padyatām //6 //*

६०. पृथिवी पर्जन्यः (Pṛthivī Parjanyaḥ) - अ. (Av.) ७.१८.१-२

प्र नभस्व पृथिवी भिन्द्धी३दं दिव्यं नभः ।
उद्नो दिव्यस्य नो धातरीशानो वि ष्या दृतिम् ॥१॥
न घ्रंस्तताप न हिमो जघान प्र नभतां पृथिवी जीरदानुः ।
आपश्चिदस्मै घृतमित् क्षरन्ति यत्र सोमः सदमित् तत्र भद्रम् ॥२॥
*pra nabhasva pṛthivī bhinddhī3daṁ divyaṁ nabhaḥ ।*
*udno divyasya no dhātarīśāno vi ṣyā ddatim ॥1॥*
*na ghraṁstatāpa na himo jaghāna pra nabhatāṁ pṛthivī jīradānuḥ ।*
*āpaśchidasmai ghṛtamit kṣaranti yatra somaḥ sadamit tatra bhadram ॥2॥*

६१. पौर्णमासी (Paurṇamāsī) - अ. (Av.) ७.८०.१-२; ४

अ. (Av.) ७.८०.१-२

पूर्णा पश्चादुत पूर्णा पुरस्तादुन्मध्यतः पौर्णमासी जिगाय ।
तस्यां देवैः संवसन्तो महित्वा नाकस्य पृष्ठे समिषा मदेम ॥१॥
वृषभं वाजिनं वयं पौर्णमासं यजामहे । स नो ददात्वक्षितां रयिमनुपदस्वतीम् ॥२॥
*pūrṇā paśchāduta pūrṇā purastādunmadhyataḥ paurṇamāsī jigāya ।*
*tasyāṁ devaiḥ saṁvasanto mahitvā nākasya pṛṣṭhe samiṣā madema ॥1॥*
*vṛṣabhaṁ vājinaṁ vayaṁ paurṇamāsaṁ yajāmahe । sa no dadātvakṣitāṁ rayimanupadasvatīm ॥2॥*

अ. (Av.) ७.८०.४

पौर्णमासी प्रथमा यियासीदहूनां रात्रीणामतिशर्वरेषु ।
ये त्वां यौर्यिये अर्धयन्त्यमी ते नाके सुकृतः प्रविष्टाः ॥४॥
*paurṇamāsī prathamā yiāyāsīdahūnāṁ rātrīṇāmatiśarvareṣu ।*
*ye tvāṁ yauryiāye ardhayantyamī te nāke sukṛtaḥ praviṣṭāḥ ॥4॥*

६२. प्रजापतिः स्तनयित्नुः (Prajāpatiḥ Stanayitnuḥ) - अ. (Av.) ४.१५.११; ७.८०.३; १६.१.१-१३

अ. (Av.) ४.१५.११

प्रजापतिः सलिलादा समुद्रादाप ईरयन्नुदधिमर्दयाति ।
प्र प्यायतां वृष्णो अश्वस्य रेतोऽर्वाङ्गेन स्तनयित्नुनेहि ॥११॥
*prajāpatiḥ salilādā samudrādāpa īrayannudadhimardayāti ।*
*pra pyāyatāṁ vṛṣṇo aśvasya reto'rvāṅtena stanayitnunehi ॥11॥*

अ. (Av.) ७.८०.३

प्रजापते न त्वेदेतान्यन्यो वि वा रूपाणि परिभूर्जजान ।
यत्कमास्ते जुहुमस्तन्नो अस्तु वयं स्याम पतयो रयीणाम् ॥३॥
*prajāpate na tvedetānyanyo vi vā rūpāṇi paribhūrjajāna ।*
*yatkamāste juhumastanno astu vayaṁ syāma patayo rayīṇām ॥3॥*

अ. (Av.) १६.१.१-१३

अतिसृष्टो अपां वृषभोतिसृष्टा अग्नयो दिव्याः ॥१॥
रुजन् परिरुजन् मृणन् प्रमृणन् ॥२॥
म्रोको मनोहा खनो निर्दाह आत्मदूषिस्तनूदूषिः ॥३॥
इदं तमति सृजामि तं माभ्यवनिक्षि ॥४॥
तेन तमभ्यतिसृजामो यो३स्मान् द्वेष्टि यं वयं द्विष्मः ॥५॥
अपामग्रमसि समुद्रं वोऽभ्यवसृजामि ॥६॥
यो३प्स्व१ग्निरति तं सृजामि म्रोकं खनिं तनूदूषिम् ॥७॥
यो व आपोऽग्निराविवेष स एष यद् वो घोरं तदेतत् ॥८॥
इन्द्रस्य व इन्द्रियेणाभि षिंचेत ॥९॥
अरिप्रा आपो अप रिप्रमस्मत् ॥१०॥

प्रास्मदेनो वहन्तु प्र दुःष्वप्न्यं वहन्तु ॥११॥
शिवेन मा चक्षुषा पश्यतापः शिवया तन्वोप स्पृशत त्वचं मे ॥१२॥
शिवानग्नीनप्सुषदो हवामहे मयि क्षत्रं वर्च आ धत्त देवीः ॥१३॥
*atisṛṣṭo apāṁ vṛṣabhotisṛṣṭā agnayo divyāḥ //1 //*
*rujan parirujan mṛṇan pramṛṇan //2 //*
*mroko manohā khano nirdāha ātmadūṣistanūdūṣiḥ //3 //*
*idaṁ tamati sṛjāmi taṁ mābhyavanikṣi //4 //*
*tena tamabhyatisṛjāmo yo3smān dveṣṭi yaṁ vayaṁ dviṣmaḥ //5 //*
*apāmagramasi samudraṁ vo'bhyavasṛjāmi //6 //*
*yo3psva1gnirati taṁ sṛjāmi mrokaṁ khaniṁ tanūdūṣim //7 //*
*yo va āpo'gnirāviveṣa sa eṣa yad vo ghoraṁ tadetat //8 //*
*indrasya va indriyeṇābhi ṣiṁcheta //9 //*
*ariprā āpo apa ripramasmat //10 //*
*prāsmadeno vahantu pra duḥṣvapnyaṁ vahantu //11 //*
*śivena mā chakṣuṣā paśyatāpaḥ śivayā tanvopa spṛśata tvachaṁ me //12 //*
*śivānagnīnapsuṣado havāmahe mayi kṣatraṁ varcha ā dhatta devīḥ //13 //*

६३. प्रतीची वरुणः - प्रदाकु अन्नम् (Pratīchī Varuṇaḥ - Pradāku Annam) - अ. (Av.) ३.२७.३

प्रतीची दिग् वरुणोऽधिपतिः प्रदाकू रक्षितान्नमिषवः ।
तेभ्यो नमोऽधिपतिभ्यो नमो रक्षितृभ्यो नम इषुभ्यो नम एभ्यो अस्तु ।
यो३स्मान् द्वेष्टि यं वयं द्विष्मस्तं वो जम्भे दध्मः ॥३॥
*pratīchī dig varuṇo'dhipatiḥ pradākū rakṣitānnamiṣavaḥ /*
*tebhyo namo'dhipatibhyo namo rakṣitṛbhyo nama iṣubhyo nama ebhyo astu /*
*yo3smān dveṣṭi yaṁ vayaṁ dviṣmastaṁ vo jambhe dadhmaḥ //3 //*

६४. प्राची अग्निः असितः आदित्या दक्षिण, इन्द्रः तिरश्चिराजिः पितरः (Prāchī Agniḥ Asitaḥ Ādityā Dakṣiṇa, Indraḥ Tiraśchirājiḥ Pitaraḥ) - अ. (Av.) ३.२७.१

प्राची दिगग्निरधिपतिरसितो रक्षितादित्या इषवः ।
तेभ्यो नमोऽधिपतिभ्यो रमो रक्षितृभ्यो नम इषुभ्यो नम एभ्यो अस्तु ।
यो३स्मान् द्वेष्टि यं वयं द्विष्मस्तं वो जम्भे दध्मः ॥१॥
*prāchī digagniradhipatirasito rakṣitādityā iṣavaḥ /*
*tebhyo namo'dhipatibhyo ramo rakṣitṛbhyo nama iṣubhyo nama ebhyo astu /*
*yo3smān dveṣṭi yaṁ vayaṁ dviṣmastaṁ vo jambhe dadhmaḥ //1 //*

६५. दक्षिण, इन्द्रः तिरश्चिराजिः पितरः (Dakṣiṇa, Indraḥ Tiraśchirājiḥ Pitaraḥ) - अ. (Av.) ३.२७.२

दक्षिणा दिगिन्द्रोऽधिपतिस्तिरश्चिराजी रक्षिता पितर इषवः ।
तेभ्यो नमोऽधिपतिभ्यो नमो रक्षितृभ्यो नम इषुभ्यो नम एभ्यो अस्तु ।
योऽस्मान् द्वेष्टि यं वयं द्विष्मस्तं वो जम्भे दध्मः ॥२॥
*dakṣiṇā digindro'dhipatistiraśchirājī rakṣitā pitara iṣavaḥ /*
*tebhyo namo'dhipatibhyo namo rakṣitṛbhyo nama iṣubhyo nama ebhyo astu /*
*yo'smān dveṣṭi yaṁ vayaṁ dviṣmastaṁ vo jambhe dadhmaḥ //2 //*

६६. बृहस्पतिः (Bṛhaspatiḥ) - अ. (Av.) २.१३.२-३

परि धत्त धत्त नो वर्चसेमं जरामृत्यु कृणुत दीर्घमायुः ।
बृहस्पतिः प्रायच्छद् वास एतत् सोमाय रो परिधातवा उ ॥२॥
परीदं वासो अधिथाः स्वस्तयेऽभूर्गृष्टीनामभिशस्तिपा उ ।
शतं च जीव शदः पुरूची रायश्च पोषमुपसंव्ययस्व ॥३॥
*pari dhatta dhatta no varchasemaṁ jarāmṛtyu kṛṇuta dīrghamāyuḥ /*
*bṛhaspatiḥ prāyachchhad vāsa etat somāya rāo paridhātavā u //2 //*

*parīdaṁ vāso adhithāḥ svastaye'bhūrgṛṣṭīnāmabhiśastipā u* /
*śataṁ cha jīva śadaḥ purūchī rāyaścha poṣamupasaṁvyayasva* //3 //

६७. बृहस्पति युक्ता अवस्वन्तः (Bṛhaspati Yuktā Avasvantaḥ) - अ. (Av.) ३.२६.६
येऽ३स्यां स्थोर्ध्वायां दिश्यवस्वन्तो नाम देवास्तेषां वो बृहस्पतिरिषवः ।
ते नो मृडत ते नोऽधि ब्रूत तेभ्यो वो नमस्तेभ्यो वः स्वाहा ॥६ ॥
*ye3syāṁ sthordhvāyāṁ diśyavasvanto nāma devāsteṣāṁ vo bṛhaspatiriṣavaḥ* /
*te no mṛḍata te no'dhi brūta tebhyo vo namastebhyo vaḥ svāhā* //6 //

६८. ब्रह्म आदित्यः (Ādityaḥ) - अ. (Av.) ५.६.१
ब्रह्म जाानं प्रथमं पुरस्ताद् वि सीमतः सुरुचो वेन आवः ।
स बुध्न्याउपमा अस्य विष्ठाः सतश्च योनिमसतश्च वि वः ॥१ ॥
*brahma jāānaṁ prathamaṁ purastād vi sīmataḥ surucho vena āvaḥ* /
*sa budhnyāupamā asya viṣṭhāḥ sataścha yonimasataścha vi vaḥ* //1 //

६९. ब्रह्मादित्यौ (Brahmādityau) - अ. (Av.) १६.३.१-६; १६.४.१-७
अ. (Av.) १६.३.१-६
मूर्धाहं रयीणां मूर्धा समानानां भूयासम् ॥१ ॥
रुजश्च मा वेनश्च मा हासिष्टां मूर्धा च मा विधर्मा च मा हासिष्टाम् ॥२ ॥
उर्वश्च मा चमसश्च सा हासिष्टां धर्ता च मा धरुणश्च मा हासिष्टाम् ॥३ ॥
विमोकश्च मार्द्रपविश्च मा हासिष्टामार्द्रदानुश्च मा मातरिश्वा च मा हासिष्टाम् ॥४ ॥
बृहस्पतिर्म आत्मा नृमणा नाम हृद्यः ॥५ ॥
असंतापं मे हृदयमुर्वी गव्यूतिः समुद्रो अस्मि विधर्मणा ॥६ ॥
*mūrdhāhaṁ rayīṇāṁ mūrdhā samānānāṁ bhūyāsam* //1 //
*rujaścha mā venaścha mā hāsiṣṭāṁ mūrdhā cha mā vidharmā cha mā hāsiṣṭām* //2 //
*urvaścha mā chamasaścha sā hāsiṣṭāṁ dhartā cha mā dharuṇaścha mā hāsiṣṭām* //3 //
*vimokaścha mārdrapaviścha mā hāsiṣṭāmārdradānuścha mā mātariśvā cha mā hāsiṣṭām* //4 //
*bṛhaspatirma ātmā nṛmaṇā nāma hṛdyaḥ* //5 //
*asaṁtāpaṁ me hṛdayamurvī gavyūtiḥ samudro asmi vidharmaṇā* //6 //
अ. (Av.) १६.४.१-७
नाभिरहं रयीणां नाभिः समानानां भूयासम् ॥१ ॥
स्वासदसि सूषा अमृतो मर्त्येष्वा ॥२ ॥
मा मां प्राणो हासीन्मो अपानोऽवहाय परा गात् ॥३ ॥
सूर्यो माह्नः पात्वग्निः पृथिव्या वायुरन्तरिक्षाद् यमो मनुष्येभ्यः सरस्वती पार्थिवेभ्यः ॥४ ॥
प्राणापानौ मा मा हासिष्टं मा जने प्र मेषि ॥५ ॥
स्वस्त्य१द्योषसो दोषसश्च सर्व आपः सर्वगणो अशीय ॥६ ॥
शक्वरी स्थ पशवो मोप स्थेषुर्मित्रावरुणौ मे प्राणापानावग्निर्मे दक्षं दधातु ॥७ ॥
*nābhirahaṁ rayīṇāṁ nābhiḥ samānānāṁ bhūyāsam* //1 //
*svāsadasi sūṣā amṛto martyeṣvā* //2 //
*mā māṁ prāṇo hāsīnmo apāno'vahāya parā gāt* //3 //
*sūryo māhnaḥ pātvagniḥ pṛthivyā vāyurantarikṣād yamo manuṣyebhyaḥ sarasvatī pārthivebhyaḥ* //4 //
*prāṇāpānau mā mā hāsiṣṭaṁ mā jane pra meṣi* //5 //
*svastya1dyoṣaso doṣasaścha sarva āpaḥ sarvagaṇo aśīya* //6 //
*śakvarī stha paśavo mopa stheṣurmitrāvaruṇau me prāṇāpānāvagnirme dakṣaṁ dadhātu* //7 //

७०. ब्रह्मणस्पतिः (Brahmaṇaspatiḥ) - अ. (Av.) ६.६.१
योऽ३स्मान् ब्रह्मणस्पतेऽदेवो अभिमन्यते। सर्वं तं रन्धयासि मे यजमानाय सुन्वते ॥१ ॥

*yo3smān brahmaṇaspate'devo abhimanyate । sarva taṁ randhayāsi me yajamānāya sunvate ॥1 ॥*

७१. ब्रह्मणस्पतिः दन्ता (Brahmaṇaspatiḥ Dantā) - अ. (Av.) ६.१४०.१-३

यौ व्याघ्रावववरूढौ जिघत्सतः पितरं मातरं च ।
तौ दन्तौ ब्रह्मणस्पते शिवौ कृणु जातवेदः ॥१ ॥
व्रीहिमत्तं यवमत्तमथो माषमथो तिलम् ।
एष वां भागो निहितो रत्नधेयाय दन्तौ मा हिंसिष्टं पितरं मातरं च ॥२ ॥
अपहूतौ सयुजौ स्योनौ दन्तौ सुमंगलौ ।
अन्यत्र वां घोरं तन्व१ परैतु दन्तौ मा हिंसिष्टं पितरं मातरं च ॥३ ॥
*yau vyāghrāvavarūḍhau jighatsataḥ pitaraṁ mātaraṁ cha ।*
*tau dantau brahmaṇaspate śivau kṛṇu jātavedaḥ ॥1 ॥*
*vrīhimattaṁ yavamattamatho māṣamatho tilam ।*
*eṣa vāṁ bhāgo nihito ratnadheyāya dantau mā hiṁsiṣṭaṁ pitaraṁ mātaraṁ cha ॥2 ॥*
*apahūtau sayujau syonau dantau sumaṁgalau ।*
*anyatra vāṁ ghoraṁ tanva1 paraitu dantau mā hiṁsiṣṭaṁ pitaraṁ mātaraṁ cha ॥3 ॥*

७२. ब्रह्मणस्पतिः (विषभैषज्यं) (Brahmaṇaspatiḥ (Viṣabhaiṣajyaṁ) - अ. (Av.) ७.५६.४

अयं यो वक्रो विपरुर्व्यंगो मुखानि वक्रा वृजिना कृणोषि ।
तानि त्वं ब्रह्मणस्पत इषीकामिव सं नमः ॥४ ॥
*ayaṁ yo vakro viparurvyaṁgo mukhāni vakrā vṛjinā kṛṇoṣi ।*
*tāni tvaṁ brahmaṇaspata iṣīkāmiva saṁ namaḥ ॥4 ॥*

७३. ब्रह्मणस्पत्यादयः (Brahmaṇaspatyādayaḥ) - अ. (Av.) ६.७४.१-३

सं वः पृच्यन्तां तन्व१ सं मनांसि समु व्रता ।
सं वोऽयं ब्रह्मणस्पतिर्भगः सं वो अजीगमत् ॥१ ॥
सांपनं वो मनसोथो सांपनं हृदः ।
अथो भगस्य यच्छ्रान्तं तेन सांपयामि वः ॥२ ॥
यथादित्या वसुभिः संबभूवुमरुद्भिरुग्रा अहृणीयमानाः ।
एवा त्रिणामन्नहृणीयमान इमान् जनान्त्संमनसस्कृधीह ॥३ ॥
*saṁ vaḥ pṛchyantāṁ tanva1 saṁ manāṁsi samu vratā ।*
*saṁ vo'yaṁ brahmaṇaspatirbhagaḥ saṁ vo ajīgamat ॥1 ॥*
*sāṁpanaṁ vo manasotho sāṁpanaṁ hṛdaḥ ।*
*atho bhagasya yachchhrāntaṁ tena sāṁpayāmi vaḥ ॥2 ॥*
*yathādityā vasubhiḥ saṁbabhūvumarudbhirugrā ahṛṇīyamānāḥ ।*
*evā triṇāmannahṛṇīyamāna imān janāntsaṁmanasaskṛdhīha ॥3 ॥*

७४. बार्हस्पत्यौदनः (Bārhaspatyaudanaḥ) - अ. (Av.) ११.३(१).१-३१

तस्यौदनस्य बृहस्पतिः शिरो ब्रह्म मुखम् ॥१ ॥
द्यावापृथिवी श्रोत्रे सूर्याचन्द्रमसावक्षिणी सप्तऋषयः प्राणापानाः ॥२ ॥
चक्षुर्मुसलं काम उलूखलम् ॥३ ॥
दितिः शूर्पमदितिः शूर्पग्राहि वातोऽपाविनक् ॥४ ॥
अश्वाः कणा गावस्तण्डुला मशकास्तुषाः ॥५ ॥
कब्रु फलीकरणाः शरोऽभ्रम् ॥६ ॥
श्याममयोऽस्य मांसानि लोहितमस्य लोहितम् ॥७ ॥
त्रपु भसा हरितं वर्णः पुष्करमस्य गन्धः ॥८ ॥
खलः पात्रं स्फयावंसावीषे अनूक्ये ॥९ ॥
आन्त्राणिं जत्रवो गुदा वरत्राः ॥१० ॥
इयमेव पृथिवी कुम्भी भवति राध्यमानस्यौदनस्य द्यौरपिधानम् ॥११ ॥
सीताः पर्शवः सिकता ऊबध्यम् ॥१२ ॥

ऋतं हस्तावनेजनं कुल्योपसेचनम्। ॥१३॥
ऋचा कुम्भ्यधिहितात्त्विर्वज्येन प्रेषिता ॥१४॥
ब्रह्मणा परिगृहीता साम्ना पर्यूढा ॥१५॥
बृहदायवनं रथन्तरं दर्विः ॥१६॥
ऋतवः पक्तार आर्तवाः समिन्धते ॥१७॥
चरुं पंचबिलमुखं घर्मो३भीन्धे ॥१८॥
ओदनेन यावचः सर्वे लोकाः समाप्याः ॥१९॥
यस्मिन्त्समुद्रो द्यौर्भूमिस्त्रयोऽवरपरं श्रिताः ॥२०॥
यस्य देवा अकल्पन्तोच्छिष्टे षडशीतयः ॥२१॥
तं त्वौदनस्य पृच्छामि यो अस्य महिमा महान् ॥२२॥
स य ओदनस्य महिमानं विद्यात् ॥२३॥
नाल्प इति ब्रूयान्ननुपसेचन इति नेदं च किं चेति ॥२४॥
यावद् दाताभिमनस्येत तन्नाति वदेत् ॥२५॥
ब्रह्मवादिनो वदन्ति परांचमोदनं प्राशी३ प्रत्यंचा३मिति ॥२६॥
त्वमोदनं प्राशी३स्त्वामोदना३ इति ॥२७॥
परांचं चैनं प्राशीः प्राणास्त्वा हास्यन्तीत्येनमाह ॥२८॥
प्रत्यंचं चैनं प्राशीरपानास्त्वा हास्यन्तीत्येनमाह ॥२९॥
नैवाहमोदनं न मामोदनः ॥३०॥
ओदन एवौदनं प्राशीत्॥३१॥

*tasyaudanasya bṛhaspatiḥ śiro brahma mukham //1 //*
*dyāvāpṛthivī śrotre sūryāchandramasāvakṣiṇī saptarṣayaḥ prāṇāpānāḥ //2 //*
*chakṣurmusalaṁ kāma ulūkhalam //3 //*
*ditiḥ śūrpamaditiḥ śūrpagrāhi vāto'pāvinak //4 //*
*aśvāḥ kaṇā gāvastaṇḍulā maśakāstuṣāḥ //5 //*
*kabru phalīkaraṇāḥ śaro'bhram //6 //*
*śyāmamayo'sya māṁsāni lohitamasya lohitam //7 //*
*trapu bhasā haritaṁ varṇaḥ puṣkaramasya gandhaḥ //8 //*
*khalaḥ pātraṁ sphayāvaṁsāvīṣe anūkye //9 //*
*āntrāṇiṁ jatravo gudā varatrāḥ //10 //*
*iyameva pṛthivī kumbhī bhavati rādhyamānasyaudanasya dyaurapidhānam //11 //*
*sītāḥ parśavaḥ sikatā ūbadhyam //12 //*
*ṛtaṁ hastāvanejanaṁ kulyopasechanam / //13 //*
*ṛchā kumbhyadhihitātirvajyena preṣitā //14 //*
*brahmaṇā parigṛhītā sāmnā paryūḍhā //15 //*
*bṛhadāyavanaṁ rathantaraṁ darviḥ //16 //*
*ṛtavaḥ paktāra ārtavāḥ samindhate //17 //*
*charuṁ paṁchabilamukhaṁ gharmo3bhīndhe //18 //*
*Odanena yāvachaḥ sarve lokāḥ samāpyāḥ //19 //*
*yasmintsamudro dyaurbhūmistrayo'varaparaṁ śritāḥ //20 //*
*yasya devā akalpantochchhiṣṭe ṣaḍaśītayaḥ //21 //*
*taṁ tvaudanasya pṛchchhāmi yo asya mahimā mahān //22 //*
*sa ya Odanasya mahimānaṁ vidyāt //23 //*
*nālpa iti brūyānnanupasechana iti nedaṁ cha kiṁ cheti //24 //*
*yāvad dātābhimanasyeta tannāti vadet //25 //*
*brahmavādino vadanti parāṁchamodanaṁ prāśī3 pratyaṁchā3miti //26 //*
*tvamodanaṁ prāśī3stvāmodanā3 iti //27 //*
*parāṁchaṁ chainaṁ prāśīḥ prāṇāstvā hāsyantītyenamāha //28 //*
*pratyaṁchaṁ chainaṁ prāśīrapānāstvā hāsyantītyenamāha //29 //*

*naivāhamodanaṁ na māmodanaḥ //30 //*
*Odana evaudanaṁ prāśīt //31 //*

७५. भगः (Bhagaḥ) - अ. (Av.) ३.१६.२-६; ६.१२९.१-३

अ. (Av.) ३.१६.२-६

प्रातर्जितं भगमुग्रं हवामहे वयं पुत्रमदितेर्यो विधर्ता ।
आध्रश्चिद् यं मन्यमानस्तुरश्चिद् राजा चिद् यं भगं भक्षीत्याह ॥२ ॥
भग प्रणेतर्भग सत्यराधो भगेमां धियमुदवा ददन्नः ।
भग प्र णो जनय गोभिरश्वैर्भग प्र नृभिर्नृवन्तः स्याम ॥३ ॥
उतेदानीं भगवन्तः स्यामोत प्रपित्व उत मध्ये अह्नाम् ।
उतोदितौ मघवन्त्सूर्यस्य वयं देवानां सुमतौ स्याम ॥४ ॥
भग एव भगवाँ अस्तु देवस्तेना वयं भगवन्तः स्याम ।
तं त्वा भग सर्व इज्जोहवीमि सनो भग पुर एता भवेह ॥५ ॥
समध्वरायोषमो नमन्त दधिक्रावेव शुचये पदाय ।
अर्वाचीनं वसुविदं भगं मे रथमिवाश्वा वाजिन आ वहन्तु ॥६ ॥

*prātarjitaṁ bhagamugraṁ havāmahe vayaṁ putramaditeryo vidhartā /*
*ādhraśchid yaṁ manyamānasturaśchid rājā chid yaṁ bhagaṁ bhakṣītyāha //2 //*
*bhaga praṇetarbhaga satyarādho bhagemāṁ dhiyamudavā dadannaḥ /*
*bhaga pra ṇo janaya gobhiraśvairbhaga pra nṛbhirnṛvantaḥ syāma //3 //*
*utedānīṁ bhagavantaḥ syāmota prapitva uta madhye ahnām /*
*utoditau maghavantsūryasya vayaṁ devānāṁ sumatau syāma //4 //*
*bhaga eva bhagavām̐ astu devastenā vayaṁ bhagavantaḥ syāma /*
*taṁ tvā bhaga sarva ijjohavīmi sano bhaga pura etā bhaveha //5 //*
*samadhvarāyoṣamo namanta dadhikrāveva śuchaye padāya /*
*arvāchīnaṁ vasuvidaṁ bhagaṁ me rathamivāśvā vājina ā vahantu //6 //*

अ. (Av.) ६.१२९.१-३

भगेन मा शंशपेन साकमिन्द्रेण मेदिना । कृणोभि भागिनं माप द्रान्त्वरातयः ॥१ ॥
येन वृक्षाँ अभयभवो भगेन वर्चसा सह । तेन मा भगिनं कृण्वप द्रान्त्वरातयः ॥२ ॥
यो अन्धो यः पुनः सरो भगो वृक्षेष्वाहितः । तेन मा भगिनं कृण्वप द्रान्त्वरातयः ॥३ ॥

*bhagena mā śaṁśapena sākamindreṇa medinā / kṛṇobhi bhāginaṁ māpa drāntvarātayaḥ //1 //*
*yena vṛkṣām̐ abhayabhavo bhagena varchasā saha / tena mā bhaginaṁ kṛṇvapa drāntvarātayaḥ //2 //*
*yo andho yaḥ punaḥ saro bhago vṛkṣeṣvāhitaḥ / tena mā bhaginaṁ kṛṇvapa drāntvarātayaḥ //3 //*

७६. भूमिः (Bhūmiḥ) - अ. (Av.) १२.१.१-६३; १८.३.५०

अ. (Av.) १२.१.१-६३

सत्यं बृहदृतमुग्रं दीक्षा तपो ब्रह्म याः पृथिवीं धारयन्ति ।
सा नो भूतस्य भव्यस्य पत्न्युरुं लोकं पृथिवी नः कृणोतु ॥१ ॥
असंबाधं मध्यतो मानवानां यस्या उद्वतः प्रवतः समं बहु ।
नानावीर्या ओषधीर्या बिभर्ति पृथिवी नः प्रथतां राध्यतां नः ॥२ ॥
यस्यां समुद्र उत सिन्धुरापो यस्यामन्नं कृष्टयः संबभूवुः ।
यस्यामिदं जिन्वति प्राणदेजत् सा नो भूमिः गोष्वप्यन्ने दधातु ॥३ ॥
यस्याश्चतस्रः प्रादिशः पृथिव्या यस्यामन्नं कृष्टयः संबभूवुः ।
या बिभर्ति बहुधा प्राणदेजत् सा नो भूमिर्गोष्वप्यन्ने दधातु ॥४ ॥
यस्यां पूर्वे पूर्वजना विचक्रिरे यस्यां देवा असुरानभ्यवर्तयन् ।
गवामश्वानां वयसश्च विष्ठा भगं वर्चः पृथिवी नो दधातु ॥५ ॥

विश्वंभरा वसुधानी प्रतिष्ठा हिरण्यवक्षा जगतो निवेशनी ।
वैश्वानरं बिभ्रती भूमिरग्निमिन्द्रऋषभा द्रविणे नो दधातु ॥६॥
यां रक्षन्त्यस्वप्ना विश्वदानीं देवा भूमिं पृथिवीमप्रमादम् ।
सा नो मधु प्रियं दुहामथो उक्षतु वर्चसा ॥७॥
यार्णवेऽधि सलिलमग्र आसीद् यां मायाभिरन्वचरन् मनीषिणः ।
यस्या हृदयं परमे वयोमन्त्सत्येनावृतममृतं पृथिव्याः ।
सा नो भूमिस्त्विषिं बलं राष्ट्रे दधातूत्तमे ॥८॥
यस्यामापः परिचराः समानीरहोरात्रे अप्रमादं क्षरन्ति ।
सा नो भूमिर्भूरिधारा पयो दुहामथो उक्षतु वर्चसा ॥९॥
यामश्विनावमिमातां विष्णुर्यस्यां विचक्रमे ।
इन्द्रो यां चक्र आत्मनेऽनमित्रां शचीपतिः ।
सा नो भूमिर्वि सृजतां माता पुत्राय मे पयः ॥१०॥
गिरयस्ते पर्वता हिमवन्तोऽरण्यं ते पृथिवी स्योनमस्तु ।
बभ्रुं कृष्णां रोहिणीं विश्वरूपां ध्रुवां भूमिं पृथिवीमिन्द्रगुप्ताम् ।
अजीतोऽहतो अक्षतोऽध्यष्ठां पृथिवीमहम् ॥११॥
यत् ते मध्यं पृथिवि यच्च नभ्यं यास्त ऊर्जस्तन्वः संबभूवुः ।
तासु नो धेह्यभि नः पवस्व माता भूमिः पुत्रो अहं पृथिव्याः ।
पर्जन्यः पिता स उ नः पिपर्तु ॥१२॥
यस्यां वेदिं परिगृह्णन्ति भूम्यां यस्यां यां तन्वते विश्वकर्माणः ।
यस्यां मीयन्ते स्वरवः पृथिव्यामूर्ध्वाः शुक्रा आहुत्याः पुरस्तात् ।
सा नो भूमिर्वर्धयद् वर्धमाना ॥१३॥
यो नो द्वेषत् पृथिवि यः पृतन्याद् योऽभिदासान्मनसा यो वधेन ।
तं नो भूमे रन्धय पूर्वकृत्वरि ॥१४॥
त्वज्जातास्त्वयि चरन्ति भर्त्यास्त्वं बिभर्षि द्विपदस्त्वं चतुष्पदः ।
तवेमे पृथिवि पंच मानवा येभ्यो ज्योतिरमृतं मर्त्येभ्य उद्यन्त्सूर्यो रश्मिभिरातनोति ॥१५॥
ता नः प्रजाः सं दुह्रतां समग्रा वाचो मधु पृथिवि धेहि मह्यम् ॥१६॥
विश्वस्वंमातरमोषधीनां ध्रुवां भूमिं पृथिवीं धर्मणा धृताम् ।
शिवां स्योनामनु चरेम विश्वहा ॥१७॥
महत् सधस्थं महती बभूविथ महान् वेग एजथुर्वेपथुष्टे। महांस्त्वेन्द्रो रक्षत्यप्रमादम् ।
सा नो भूमे प्र रोचय हिरण्यस्येव संदृशि मा नो द्विक्षत कश्चन॥१८॥
अग्निर्भूम्यामोषधीष्वग्निमापो बिभ्रत्यग्निरश्मसु। अग्निरन्तः पुरुषेषु गोष्वश्वेष्वग्नयः ॥१९॥
अग्निर्दिव आ तपत्यग्नेर्देवस्योर्व१न्तरिक्षम्।अग्निं मर्तास इन्धते हव्यवाहं घृतप्रियम् ॥२०॥
अग्निवासाः पृथिव्यसितास्त्विषीमन्तं संशितं मा कृणोतु ॥२१॥
भूम्यां देवेभ्यो ददति यां हव्यमरंकृतम्। भूम्यां मनुष्याजीवन्ति स्वधयान्नेन मर्त्याः ।
सा नो भूमिः प्राणमायुर्दधातु जरदष्टिं मा पृथिवी कृणोतु ॥२२॥
यस्ते गन्धः पृथिवि संबभूव यं विभ्रत्योषधयो यमापः ।
यं गन्धर्वा अप्सरसश्च भेजिरे तेन मा सुरभिं कृणु मा नो द्विक्षत कश्चन॥२३॥
यस्ते गन्धः पुष्करमाविवेश यं संजभ्रुः सूर्याया विवाहे ।
अमर्त्याः पृथिवि गन्धमग्रे तेन मा सुरभिं कृणु मा नो द्विक्षत कश्चन॥२४॥
यस्ते गन्धः पुरुषेषु स्त्रीषु पुंसु भगो रुचिः। यो अश्वेषु वीरेषु यो मृगेषूत हस्तिषु ।
कन्यायां वर्चो यद् भूमे तेनास्माँ अपि सं सृज मा नो द्विक्षत कश्चन ॥२५॥
शिला भूमिरश्मा पांसुः सा भूमिः संधृता धृता। तस्यै हिरण्यवक्षसे पृथिव्या अकरं नमः ॥२६॥
यस्यां वृक्षा वानस्पत्या ध्रुवास्तिष्ठन्ति विश्वहा। पृथिवीं विश्वधायसं धृतामच्छावदामसि॥२७॥
उदीराणा उतासीनास्तिष्ठन्तः प्रक्रामन्तः।
पदभ्यां दक्षिणसव्याभ्यां मा व्यथिष्महि भूम्याम्।२८॥
विमृग्वरीं पृथिवीमा वदामि क्षमां भूमिं ब्रह्मणा वावृधानाम् ।

ऊर्ज पुष्टं बिभ्रतीमन्नभागं घृतं त्वाभि नि षीदेम भूमे ॥२९॥
शुद्धा न आपस्तन्वेक्षरन्तु यो नः सेदुरप्रिये तं नि दध्मः। पवित्रेण पृथिवी मोत् पुनामि ॥३०॥
यास्ते प्राचीः प्रदिशो या उदीचीर्यास्ते भूमे अधराद् याश्च पश्चात् ।
स्योनास्ता मह्यं चरते भवन्तु मा नि पप्तं भुवने शिश्रियाणः ॥३१॥
मा नः पश्चान्मा पुरस्तान्नुदिष्ठा मोत्तरादधरादुत ।
स्वस्ति भूमे नो भव मा विदन् परिपन्थिनो वरीयो यावया वधम्॥३२॥
यावत् तेऽभि विपश्यामि भूमे सूर्येण मेदिना। तावन्मे चक्षुर्मा मेष्टोत्तरामुत्तरां समाम् ॥३३॥
यच्छयानः पर्यावर्ते दक्षिणं सव्यमभि भूमे पार्श्वम्। उत्तानास्त्वा प्रतीचीं यत् पृष्टीभिरधिशेमहे ।
मा हिंसीस्तत्र नो भूमे सर्वस्य प्रतिशीवरि ॥३४॥
यत् ते भूमे विखनामि क्षिप्रं तदपि रोहतु। मा ते मर्म विमृग्वरि मा ते हृदयमर्पिपम् ॥३५॥
ग्रीष्मस्ते भूमे वर्षाणि शरद्धेमन्तः शिशिरो वसन्तः ।
ऋतवस्ते विहिता हायनीरहोरात्रे पृथिवि नो दुहाताम् ॥३६॥
याप सर्प विजमाना विमृग्वरी यस्यामासन्नग्नयो ये अप्स्वश्न्तः ।
परा दस्यून् ददती देवपीयूनिन्द्रं वृणाना पृथिवी न वृत्रम्। शक्राय दध्रे वृषभाय वृष्णे ॥३७॥
यस्यां सदोहविर्धाने यूपो यस्यां निमीयते। ब्रह्माणे यस्यामर्चन्त्यृग्भिः साम्ना यजुर्विदः ।
युज्यन्ते यस्यामृत्विजः सोममिन्द्राय पातवे ॥३८॥
यस्यां पूर्वे भूतकृत ऋषयो गा उदानृचुः। सप्त सत्रेण वेधसो योन तपसा सह ॥३९॥
सा नो भूमिरा दिशतु यद्धनं कामयामहे। भगो अनुप्रयुङ्क्तामिन्द्र एतु पुरोगवः ॥४०॥
यस्यां गायन्ति नृत्यन्ति भूम्यां मर्त्या व्यैलबाः। युध्यन्ते यस्यामाक्रन्दो यस्यां वदति दुन्दुभिः ।
सा नो भूमिः प्र णुदतां सपत्नानसपत्नं मा पृथिवी कृणोतु ॥४१॥
यस्यामन्नं व्रीहियवौ यस्या इमाः पंच कृष्टयः। भूम्यै पर्जन्यपत्न्यै नमोऽस्तु वर्षमेदसे ॥४२॥
यस्याः पुरो देवकृताः क्षेत्रे यस्या विर्कुवते ।
प्रजापतिः पृथिवीं विश्वगर्भामाशामाशां रण्यां नः कृणोतु ॥४३॥
निधिं बिभ्रति बहुधा गुहा वसु मणिं हिरण्यं पृथिवी ददातु मे ।
वसूनि नो वसुदा रासमाना देवी दधातु सुमनस्यमाना ॥४४॥
जनं बिभ्रति बहुधा विवाचसं नानाधर्माणं पृथिवी यथौकसम् ।
सहस्रं धारा द्रविणस्य मे दुहां ध्रुवेव धेनुरनपस्फुरन्ती ॥४५॥
यस्ते सर्पो वृश्चिकस्तृष्टदंश्मा हेमन्तजब्धो भृमलो गुहा शये ।
क्रिमिर्जिन्वत् पृथिवि यद्यदेजति प्रावृषि तन्नः सर्पन्मोप सृपद् यच्छिवं तेन नो मृड ॥४६॥
ये ते पन्थानो बहवो जनायना रथस्य वर्त्मानसश्च यातवे ।
यैः संचरन्त्युभये भद्रपापास्तं पन्थानं ज्येमानमित्रमतस्करं यच्छिवं तेन नो मृड ॥४७॥
मलवं बिभ्रती गुरुभृद् भद्रपापस्य निधनं तितिक्षुः ।
वराहेण पृथिवी संविदाना सूकराय वि जिहीते मृगाय ॥४८॥
ये त आरण्याः पशवो मृगा वने हिताः सिंहा व्याघ्राः पुरुषादश्चरन्ति ।
उलं वृकं पृथिवि दुच्छुनामित ऋक्षीकां रक्षो अप बाधयास्मत्॥४९॥
ये गन्धर्वा अप्सरसो ये चारायाः किमीदिनः। पिशाचान्त्सर्वा रक्षांसि तानस्मद् भूमे यावय।५०।
यां द्विपादः पक्षिणः संपतन्ति हंसाः सुपर्णाः शकुना वयांसि ।
यस्यां वातो मातरिश्वेयते रजांसि कृण्वंश्च्यावंयंश्च वृक्षान्। वातस्यं प्रवामुपवामनु वात्यर्चिः।५१
यस्यां कृष्णमरुणं च संहिते अहोरात्रे विहिते भूम्यामधि ।
वर्षेण भूमिः पृथिवी वृतावृता सा नो दधातु भद्रया प्रिये धामनिधामनि॥५२॥
द्यौश्च म इदं पृथिवी च मे व्यचः। अग्निः सूर्य आपो मेधां विश्वे देवाश्च सं ददुः ॥५३॥
अहमस्मि सहमान उत्तरो नाम भूम्याम्। अभीषडस्मि विश्वाषाडाशामाशां विषामहिः ॥५४॥
अदो यद् देवि प्रथमाना पुरस्ताद् देवैरुक्ता व्यसर्पो महित्वम् ।
अ त्वा सुभूतमविशत् तदानीमकल्पयथाः प्रदिशश्चतस्रः ॥५५॥
ये ग्रामा यदरण्यं याः सभा अधि भूम्याम्। ये संग्रामाः समितयस्तेषु चारु वदेम ते ॥५६॥
अश्वइव रजो दुधुवे वि तान् जनान् य आक्षियन् पृथिवीं यादजायत ।

मन्द्राग्रेत्वरी भुवनस्य गोपा वनस्पतीनां गृभिरोषधीनाम् ॥५७॥
यद् वदामि मधुमत् तद् वदामि यदीक्षे तद् वनन्ति मा ।
त्विषीमानस्मि जूतिमानवान्यान् हन्मि दोधतः ॥५८॥
शन्तिवा सुरभिः स्योना कीलालोध्नी पयस्वती। भूमिरधि ब्रवीतु मे पृथिवी पयसा सह ॥५९॥
यामन्वैच्छद्धविषा विश्वकर्मान्तरर्णवे रजसि प्रविष्टाम् ।
भुजिष्यं१ पात्रं निहितं गुहा यदाविर्भोगे अभवन्मातृमद्भ्यः ॥६०॥
त्वमस्यावपनी जनानामदितिः कामदुघा पप्रथाना ।
यत् त ऊनं तत् त आ पूरयाति प्रजापतिः प्रथमजा ऋतस्य ॥६१॥
उपस्थास्ते अनमीवा अयक्ष्मा अस्मभ्यं सन्तु पृथिवि प्रसूताः ।
दीर्घं न आयुः प्रतिबुध्यमाना वयं तुभ्यं बलिहृतः स्याम ॥६२॥
भूमे मातर्नि धेहि मा भद्रया सुप्रतिष्ठितम्। संविदाना दिवा कवे श्रियां मा धेहि भूत्याम्॥६३॥

*satyaṁ bṛhaddatamugraṁ dīkṣā tapo brahma yāḥ pṛthivīṁ dhārayanti /*
*sā no bhūtasya bhavyasya patnyuruṁ lokaṁ pṛthivī naḥ kṛṇotu //1 //*
*asaṁbādhaṁ madhyato mānavānāṁ yasyā udvataḥ pravataḥ samaṁ bahu /*
*nānāvīryā Oṣadhīryā bibharti pṛthivī naḥ prathatāṁ rādhyatāṁ naḥ //2 //*
*yasyāṁ samudra uta sindhurāpo yasyāmannaṁ kṛṣṭayaḥ saṁbabhūvuḥ /*
*yasyāmidaṁ jinvati prāṇadejat sā no bhūmiḥ goṣvapyanne dadhātu //3 //*
*yasyāśchatasraḥ prādiśaḥ pṛthivyā yasyāmannaṁ kṛṣṭayaḥ saṁbabhūvuḥ /*
*yā bibharti bahudhā prāṇadejat sā no bhūmirgoṣvapyanne dadhātu //4 //*
*yasyāṁ pūrve pūrvajanā vichakrire yasyāṁ devā asurānabhyavartayan /*
*gavāmaśvānāṁ vayasaścha viṣṭhā bhagaṁ varchaḥ pṛthivī no dadhātu //5 //*
*viśvaṁbharā vasudhānī pratiṣṭhā hiraṇyavakṣā jagato niveśanī /*
*vaiśvānaraṁ bibhratī bhūmiragnimindraṛṣabhā draviṇe no dadhātu //6 //*
*yāṁ rakṣantyasvapnā viśvadānīṁ devā bhūmiṁ pṛthivīmapramādam /*
*sā no madhu priyaṁ duhāmatho ukṣatu varchasā //7 //*
*yārṇave'dhi salilamagra āsīd yāṁ māyābhiranvacharan manīṣiṇaḥ /*
*yasyā hṛdayaṁ parame vayomantsatyenāvṛtamamṛtaṁ pṛthivyāḥ /*
*sā no bhūmistviṣiṁ balaṁ rāṣṭre dadhātūttame //8 //*
*yasyāmāpaḥ paricharāḥ samānīrahorātre apramādaṁ kṣaranti /*
*sā no bhūmirbhūridhārā payo duhāmatho ukṣatu varchasā //9 //*
*yāmaśvināvamimātāṁ viṣṇuryasyāṁ vichakrame /*
*indro yāṁ chakra ātmane'namitrāṁ śachīpatiḥ /*
*sā no bhūmirvi sṛjatāṁ mātā putrāya me payaḥ //10 //*
*girayaste parvatā himavanto'raṇyaṁ te pṛthivī syonamastu /*
*babhruṁ kṛṣṇāṁ rohiṇīṁ viśvarūpāṁ dhruvāṁ bhūmiṁ pṛthivīmindraguptām /*
*ajīto'hato akṣato'dhyaṣṭhāṁ pṛthivīmaham //11 //*
*yat te madhyaṁ pṛthivi yachcha nabhyaṁ yāsta ūrjastanvaḥ saṁbabhūvuḥ /*
*tāsu no dhehyabhi naḥ pavasva mātā bhūmiḥ putro ahaṁ pṛthivyāḥ /*
*parjanyaḥ pitā sa u naḥ pipartu //12 //*
*yasyāṁ vediṁ parigṛhṇanti bhūmyāṁ yasyāṁ yāṁ tanvate viśvakarmāṇaḥ /*
*yasyāṁ mīyante svaravaḥ pṛthivyāmūrdhvāḥ śukrā āhutyāḥ purastāt /*
*sā no bhūmirvardhayad vardhamānā //13 //*
*yo no dveṣat pṛthivi yaḥ pṛtanyād yo'bhidāsānmanasā yo vadhena /*
*taṁ no bhūme randhaya pūrvakṛtvari //14 //*
*tvajjātāstvayi charanti bhartyāstvaṁ bibharṣi dvipadastvaṁ chatuṣpadaḥ /*
*taveme pṛthivi paṁcha mānavā yebhyo jyotiramṛtaṁ martyebhya udyantsūryo raśmibhirātanoti //15 //*
*tā naḥ prajāḥ saṁ duhratāṁ samagrā vācho madhu pṛthivi dhehi mahyam //16 //*
*viśvasvaṁmātaramoṣadhīnāṁ dhruvāṁ bhūmiṁ pṛthivīṁ dharmaṇā dhṛtām /*

*śivāṁ syonāmanu charema viśvahā  ||17 ||*
*mahat sadhasthaṁ mahatī babhūvitha mahān vega ejathurvepathuṣṭe |*
*mahāṁstvendro rakṣatyapramādam   |*
*sā no bhūme pra rochaya hiraṇyasyeva saṁddaśi mā no dvikṣata kaśchana ||18 ||*
*agnirbhūmyāmoṣadhīṣvagnimāpo bibhratyagniraśmasu | agnirantaḥ puruṣeṣu goṣvaśveṣvagnayaḥ  ||19 ||*
*agnirdiva ā tapatyagnerdevasyorva1ntarikṣam |agniṁ martāsa indhate havyavāhaṁ ghṛtapriyam  ||20 ||*
*agnivāsāḥ pṛthivyasitāūstviṣīmantaṁ saṁśitaṁ mā kṛṇotu  ||21 ||*
*bhūmyāṁ devebhyo dadati yāṁ havyamaraṁkṛtam | bhūmyāṁ manuṣyājīvanti svadhayānnena martyāḥ   |*
*sā no bhūmiḥ prāṇamāyurdadhātu jaradaṣṭiṁ mā pṛthivī kṛṇotu  ||22 ||*
*yaste gandhaḥ pṛthivi saṁbabhūva yaṁ vibhratyoṣadhayo yamāpaḥ  |*
*yaṁ gandharvā apsarasaścha bhejire tena mā surabhiṁ kṛṇu mā no dvikṣata kaśchana ||23 ||*
*yaste gandhaḥ puṣkaramāviveśa yaṁ saṁjabhruḥ sūryāyā vivāhe  |*
*amartyāḥ pṛthivi gandhamagre tena mā surabhiṁ kṛṇu mā no dvikṣata kaśchana ||24 ||*
*yaste gandhaḥ puruṣeṣu strāīṣu puṁsu bhago ruchiḥ | yo aśveṣu vīreṣu yo mṛgeṣūta hastiṣu   |*
*kanyāyāṁ varcho yad bhūme tenāsmāṁ̆ api saṁ sṛja mā no dvikṣata kaśchana  ||25 ||*
*śilā bhūmiraśmā pāṁsuḥ sā bhūmiḥ saṁdhṛtā dhṛtā | tasyai hiraṇyavakṣase pṛthivyā akaraṁ namaḥ  ||26 ||*
*yasyāṁ vṛkṣā vānaspatyā dhruvāstiṣṭhanti viśvahā | pṛthivīṁ viśvadhāyasaṁ dhṛtāmachchhāvadāmasi ||27 ||*
*udīrāṇā utāsīnāstiṣṭhantaḥ prakrāmantaḥ |*
*padabhyāṁ dakṣiṇasavyābhyāṁ mā vyathiṣmahi bhūmyām |28 ||*
*vimṛgvarīṁ pṛthivīmā vadāmi kṣamāṁ bhūmiṁ brahmaṇā vāvṛdhānām  |*
*ūrja puṣṭaṁ bibhratīmannabhāgaṁ ghṛtaṁ tvābhi ni ṣīdema bhūme  ||29 ||*
*śuddhā na āpastanvekṣarantu yo naḥ sedurapriye taṁ ni dadhmaḥ | pavitreṇa pṛthivī mot punāmi  ||30 ||*
*yāste prāchīḥ pradiśo yā udīchīryāste bhūme adharād yāścha paśchāt   |*
*syonāstā mahyaṁ charate bhavantu mā ni paptaṁ bhuvane śiśriyāṇaḥ  ||31 ||*
*mā naḥ paśchānmā purastānnudiṣṭhā mottarādadharāduta  |*
*svasti bhūme no bhava mā vidan paripanthino varīyo yāvayā vadham ||32 ||*
*yāvat te'bhi vipaśyāmi bhūme sūryeṇa medinā | tāvanme chakṣurmā meṣṭottarāmuttarāṁ samām  ||33 ||*
*yachchhayānaḥ paryāvarte dakṣiṇaṁ savyamabhi bhūme pārśvam | uttānāstvā pratīchīṁ yat pṛṣṭībhiradhiśemahe  |*
*mā hiṁsīstatra no bhūme sarvasya pratiśīvari  ||34 ||*
*yat te bhūme vikhanāmi kṣipraṁ tadapi rohatu | mā te marma vimṛgvari mā te hṛdayamarpipam  ||35 ||*
*grīṣmaste bhūme varṣāṇi śaraddhemantaḥ śiśiro vasantaḥ  |*
*ṛtavaste vihitā hāyanīrahorātre pṛthivi no duhātām  ||36 ||*
*yāpa sarpa vijamānā vimṛgvarī yasyāmāsannagnayo ye apsvaśntaḥ  |*
*parā dasyūn dadatī devapīyūnindraṁ vṛṇānā pṛthivī na vṛtram | śakrāya dadhre vṛṣabhāya vṛṣṇe  ||37 ||*
*yasyāṁ sadohavirdhāne yūpo yasyāṁ nimīyate | brahmāṇe yasyāmarchantyṛgbhiḥ sāmnā yajurvidaḥ   |*
*yujyante yasyāmṛtvijaḥ somamindrāya pātave  ||38 ||*

*yasyāṁ pūrve bhūtakṛta ṛṣayo gā udānṛchuḥ । sapta satreṇa vedhaso yona tapasā saha ॥39 ॥*
*sā no bhūmirā diśatu yaddhanaṁ kāmayāmahe । bhago anuprayuṅktāmindra etu purogavaḥ ॥40 ॥*
*yasyāṁ gāyanti nṛtyanti bhūmyāṁ martyā vyailabāḥ । yudhyante yasyāmākrando yasyāṁ vadati dundubhiḥ ।*
*sā no bhūmiḥ pra ṇudatāṁ sapatnānasapatnaṁ mā pṛthivī kṛṇetu ॥41 ॥*
*yasyāmannaṁ vrīhiyavau yasyā imāḥ paṁcha kṛṣṭayaḥ । bhūmyai parjanyapatnyai namo'stu varṣamedase ॥42 ॥*
*yasyāḥ puro devakṛtāḥ kṣetre yasyā virkuvate ।*
*prajāpatiḥ pṛthivīṁ viśvagarbhāmāśāmāśāṁ raṇyāṁ naḥ kṛṇotu ॥43 ॥*
*nidhiṁ bibhrati bahudhā guhā vasu maṇiṁ hiraṇyaṁ pṛthivī dadātu me ।*
*vasūni no vasudā rāsamānā devī dadhātu sumanasyamānā ॥44 ॥*
*janaṁ bibhrati bahudhā vivāchasaṁ nānādharmāṇaṁ pṛthivī yathaukasam ।*
*sahasraṁ dhārā draviṇasya me duhāṁ dhruveva dhenuranapasphurantī ॥45 ॥*
*yaste sarpo vṛśchikastṛṣṭadaṁśmā hemantajabdho bhṛmalo guhā śaye ।*
*krimirjinvat pṛthivi yadyadejati prāvṛṣi tannaḥ sarpanmopa sṛpad yachchhivaṁ tena no mṛḍa ॥46 ॥*
*ye te panthāno bahavo janāyanā rathasya vartmānasaścha yātave ।*
*yaiḥ saṁcharantyubhaye bhadrapāpāstaṁ panthānaṁ jyemānamitramataskaraṁ yachchhivaṁ tena no mṛḍa ॥47 ॥*
*malavaṁ bibhratī gurubhṛd bhadrapāpasya nidhanaṁ titikṣuḥ ।*
*varāheṇa pṛthivī saṁvidānā sūkarāya vi jihīte mṛgāya ॥48 ॥*
*ye ta āraṇyāḥ paśavo mṛgā vane hitāḥ siṁhā vyāghrāḥ puruṣādaścharanti ।*
*ulaṁ vṛkaṁ pṛthivi duchchhunāmita ṛkṣīkāṁ rakṣo apa bādhayāsmat ॥49 ॥*
*ye gandharvā apsaraso ye chārāyāḥ kimīdinaḥ । piśāchāntsarvā rakṣāṁsi tānasmad bhūme yāvaya ।50 ।*
*yāṁ dvipādaḥ pakṣiṇaḥ saṁpatanti haṁsāḥ suparṇāḥ śakunā vayāṁsi ।*
*yasyāṁ vāto mātariśveyate rajāṁsi kṛṇvaṁśchyāvaṁyaṁścha vṛkṣān । vātasyaṁ pravāmupavāmanu vātyarchiḥ ।51*
*yasyāṁ kṛṣṇamaruṇaṁ cha saṁhite ahorātre vihite bhūmyāmadhi ।*
*varṣeṇa bhūmiḥ pṛthivī vṛtāvṛtā sā no dadhātu bhadrayā priye dhāmanidhāmani ॥52 ॥*
*dyauścha ma idaṁ pṛthivī cha me vyachaḥ । agniḥ sūrya āpo medhāṁ viśve devāścha saṁ daduḥ ॥53 ॥*
*ahamasmi sahamāna uttaro nāma bhūmyām । abhīṣaḍasmi viśvāṣāḍāśāmāśāṁ viṣāmahiḥ ॥54 ॥*
*ado yad devi prathamānā purastād devairuktā vyasarpo mahitvam ।*
*a tvā subhūtamaviśat tadānīmakalpayathāḥ pradiśaśchatasraḥ ॥55 ॥*
*ye grāmā yadaraṇyaṁ yāḥ sabhā adhi bhūmyām । ye saṁgrāmāḥ samitayasteṣu chāru vadema te ॥56 ॥*
*aśvaiva rajo dudhuve vi tān janān ya ākṣiyan pṛthivīṁ yādajāyata ।*
*mandrāgretvarī bhuvanasya gopā vanaspatīnāṁ gṛbhiroṣadhīnām ॥57 ॥*
*yad vadāmi madhumat tad vadāmi yadīkṣe tad vananti mā ।*
*tviṣīmānasmi jūtimānavānyān hanmi dodhataḥ ॥58 ॥*
*śantivā surabhiḥ syonā kīlālodhnī payasvatī । bhūmiradhi bravītu me pṛthivī payasā saha ॥59 ॥*
*yāmanvaichchhaddhaviṣā viśvakarmāntararṇave rajasi praviṣṭām ।*
*bhujiṣyaṁ1 pātraṁ nihitaṁ guhā yadāvirbhoge abhavanmātṛmadbhyaḥ ॥60 ॥*
*tvamasyāvapanī janānāmaditiḥ kāmadughā paprathānā ।*

*yat ta ūnaṁ tat ta ā pūrayāti prajāpatiḥ prathamajā ṛtasya ॥61॥*
*upasthāste anamīvā ayakṣamā asmabhyaṁ santu pṛthivi prasūtāḥ ।*
*dīrgha na āyuḥ pratibudhyamānā vayaṁ tubhyaṁ balihṛtaḥ syāma ॥62॥*
*bhūme mātarni dhehi mā bhadrayā supratiṣṭhitam । saṁvidānā divā kave śriyāṁ mā dhehi bhūtyām ॥63॥*

अ. (Av.) १८.३.५०

उच्छ्वंचस्व पृथिवि मा नि बाधथाः सूपायनास्मै भव सूपसर्पणा ।
माता पुत्रं यथा सिचाभ्येनं भूम ऊर्णुहि ॥५०॥
*uchchhvaṁchasva pṛthivi mā ni bādhathāḥ sūpāyanāsmai bhava sūpasarpaṇā ।*
*mātā putraṁ yathā sichābhyenaṁ bhūma ūrṇuhi ॥50॥*

७७. भूवादयो मन्त्रोक्ताः (Bhūvādayo Mantroktāḥ) - अ. (Av.) ११.२.१-३

भवाशर्वौ मृडतं माभि यातं भूपती पशुपती नमो वाम् ।
प्रतिहितामायतां मा वि स्राष्टं मा नो हिंसिष्टं द्विपदो मा चतुष्पदः ॥१॥
शुने क्रोष्ट्रे मा शरीराणि कर्तमलिक्लवेभ्यो गृध्रेभ्यो ये च कृष्णा अविष्यवः ।
मक्षिकास्ते पशुपते वयांसि ते विघसे मा विदन्त ॥२॥
क्रनदाय ते प्राणाय याश्च ते भव रोपयः । नमस्ते रुद्र कृण्मः सहस्राक्षायामर्त्य ॥३॥
*bhavāśarvau mṛḍataṁ mābhi yātaṁ bhūpatī paśupatī namo vām ।*
*pratihitāmāyatāṁ mā vi srāṣṭaṁ mā no hiṁsiṣṭaṁ dvipado mā chatuṣpadaḥ ॥1॥*
*śune kroṣṭre mā śarīrāṇi kartamaliklavebhyo gṛdhrebhyo ye cha kṛṣṇā aviṣyavaḥ ।*
*makṣikāste paśupate vayāṁsi te vighase mā vidanta ॥2॥*
*kranadāya te prāṇāya yāścha te bhava ropayaḥ । namaste rudra kṛṇmḥ sahasrākṣāyāmartya ॥3॥*

७८. भैषज्य आयुष्यं ओषधयः (Bhaiṣajya Āyuṣyaṁ Oṣadhayaḥ) - अ. (Av.) ८.७.१-२८

या बभ्रवो याश्च शुक्रा रोहिणीरुत पृश्नयः । असिक्नीः कृष्णा ओषधीः सर्वा अच्छावदामसि ॥१॥
त्रायन्तामिमं पुरुषं यक्ष्माद् देवेषितादधि ।
यासां द्यौष्पिता पृथिवी माता समुद्रो मूलं वीरुधां बभूव ॥२॥
आपो अग्रं दिव्या ओषध्यः । तास्ते यक्ष्ममेनस्य१मंगदंगादनीनशन् । ॥३॥
प्रस्तृणती स्तम्बिनीरेकशुंगाः प्रतन्वतीरोषधीरा वदामि ।
अंशुमतीः काण्डिनीर्या विशाखा ह्वयामि ते वीरुधो वैश्वदेवीरुग्राः । पुरुषजीवनीः ॥४॥
यद् वः सहः सहमाना वीर्य१ यच्च वो बलम् ।
तेनममस्माद् यक्ष्मात् पुरुषं मुंचतौषधीरथो कृणोमि भेषजम् ॥५॥
जीवलां नघारिषां जीवन्तीमोषधीमहम् ।
अरुन्धतीमुन्नयन्तीं पुष्पां मधुमतीमिह हुवेऽस्मा अरिष्टतातये ॥६॥
इहा यन्तु प्रचेतसो मेदिनीर्वचसो मम । यथेमं पारयामसि पुरुषं दुरितादधि ॥७॥
अग्नेर्वासो अपां गर्भो या रोहन्ति पुनर्णवाः । ध्रुवाः सहस्रनाम्नीर्भेषजीः सन्त्वाभृताः ॥८॥
अवकोल्बा उदकात्मान ओषधयः । व्यृषन्तु दुरितं तीक्ष्णश्रृंगयः ॥९॥
उन्मुंचन्तीर्विवरुणा उग्रा या विषदूषणीः ।
अथो बलासनाशनीः कृत्यादूषणीश्च यास्ता इहा यन्त्वोषधीः ॥१०॥
अपक्रीताः सहीयसीर्वीरुधो या अभिष्टुताः । त्रायन्तामस्मिन् ग्रामे गामश्वं पुरुषं पशुम् ॥११॥
मधुमन्मूलं मधुमदग्रमासां मधुमन्मध्यं वीरुधां बभूव । मधुमत् पर्ण मधुमत् पुपमासां मधोः संभक्ता अमृतस्य भक्षो घृतमन्नं दुह्रतां गोपुरोगवम् ॥१२॥
यावतीः कियतीश्चेमाः पृथिव्यामध्योषधीः । ता मा सहस्रपर्ण्योमृत्योर्मुंचन्त्वंहसः ॥१३॥
वैयाघ्रो मणिर्वीरुधां त्रायमाणोऽभिशस्तिपाः । अमीवाः सर्वा रक्षांस्यप हन्त्वधि दूरमस्मत् ॥१४॥
सिंहस्येव स्तनथोः सं विजन्तेऽग्नेरिव विजन्त आभृताभ्यः ।
गवां यक्ष्मः पुरुषाणां वीरुद्भिरतिनुत्तो नावयाएतु स्रोत्याः ॥१५॥
मुमुचाना ओषधयोऽग्नेवैश्वानरादधि । भूमि संतन्वतीरितं यासां राजा वनस्पतिः ॥१६॥

या रोहन्त्याङ्गिरसीः पर्वतेषु समेषु च । ता नः पयस्वतीः शिवा अषिधीः सन्तु शं हृदे ॥१७॥
याश्चाहं वेद वीरुधो याश्च पश्यामि चक्षुषा। आता जानीमश्च या यासु विद्म च संभृतम् ॥१८॥
सर्वाः समग्रा ओषधीर्बोधन्तु वचसो मम । यथेमं पारयामसि पुरुषं दुरितादधि ॥१९॥
अश्वत्थो दर्भो वीरुधां सोमो राजामृतं हविः। व्रीहिर्यवश्च भेषजौ दिवस्पत्रावमर्त्यौ ॥२०॥
उज्जिहीध्वे स्तनयत्यभिक्रन्दत्योषधीः । यदा वः पृश्निमातरः पर्जन्यो रेतसावति ॥२१॥
तस्यामृतस्येमं बलं पुरुषं पाययामसि । अथो कृणोमि भेषजं यथासच्छतहायनः ॥२२॥
वराहो वेद वीरुधं नकुलो वेद भेषजीम् ।
सर्पा गन्धर्वा या विदुस्ता अस्मा अवसे हुवे ॥२३॥
याः सुपर्णा आङ्गिरसीर्दिव्या या रघटो विदुः ।
वयांसि हंसा या विदुर्याश्च सर्वे पतत्रिणः ।
मृगा या विदुरोषधीस्ता अस्मा अवसे हुवे ॥२४॥
यावतीनामोषधीनां गावः प्राश्नन्त्यघ्न्या यावतीनामजावयः ।
तावतीस्तुभ्यमोषधीः शर्म यच्छन्त्वाभृताः ॥२५॥
यावतीषु मनुष्याभेषजं भिषजो विदुः । तावतीर्विश्वभेषजीरा भरामि त्वामभि ॥२६॥
पुष्पवतीः प्रसूमतीः फलिनीरफला उत । संमातरइव दुह्रामस्मा अरिष्टतातये ॥२७॥
उत् त्वाहार्ष पंचशलादथो दशशलादुत ।
अथो यमस्य पड्वीशाद् विश्वस्माद् देवकिल्बिषात् ॥२८॥

*yā babhravo yāścha śukrā rohiṇīruta pṛśnayaḥ । asiknīḥ kṛṣṇā Oṣadhīḥ sarvā achchhāvadāmasi ॥1॥*
*trāyantāmimaṁ puruṣaṁ yakṣamād deveṣitādadhi ।*
*yāsāṁ dyauṣpitā pṛthivī mātā samudro mūlaṁ vīrudhāṁ babhūva ॥2॥*
*āpo agraṁ divyā Oṣadhyaḥ । tāste yakṣamamenasya1maṁgadaṁgādanīnaśan । ॥3॥*
*prastṛṇatī stambinīrekaśuṁgāḥ pratanvatīroṣadhīrā vadāmi ।*
*aṁśumatīḥ kāṇḍinīryā viśākhā hnayāmi te vīrudho vaiśvadevīrugrāḥ । puruṣajīvanīḥ ॥4॥*
*yad vaḥ sahaḥ sahamānā vīrya1 yachcha vo balam ।*
*tenamamasmād yakṣamāt puruṣaṁ muṁchatauṣadhīratho kṛṇomi bheṣajam ॥5॥*
*jīvalāṁ naghāriṣāṁ jīvantīmoṣadhīmaham ।*
*arundhatīmunnayantīṁ puṣpāṁ madhumatīmiha huve'smā ariṣṭatātaye ॥6॥*
*ihā yantu prachetaso medinīrvachaso mama । yathemaṁ pārayāmasi puruṣaṁ duritādadhi ॥7॥*
*agnervāso apāṁ garbho yā rohanti punarṇavāḥ । dhruvā: sahasranāmnīrbheṣajīḥ santvābhṛtāḥ ॥8॥*
*avakolbā udakātmāna Oṣadhayaḥ । vyṛṣantu duritaṁ tīkṣaṇaśṛṁgayaḥ ॥9॥*
*unmuṁchantīrvivaruṇā ugrā yā viṣadūṣaṇīḥ ।*
*atho balāsanāśanīḥ kṛtyādūṣaṇīścha yāstā ihā yantvoṣadhīḥ ॥10॥*
*apakrītāḥ sahīyasīrvīrudho yā abhiṣṭutāḥ । trāyantāmasmin grāme gāmaśvaṁ puruṣaṁ paśum ॥11॥*
*madhumanmūlaṁ madhumadagramāsāṁ madhumanmadhyaṁ vīrudhāṁ babhūva । madhumat parṇa madhumat pupamāsāṁ madhoḥ saṁbhaktā amṛtasya bhakṣo ghṛtamannaṁ duhratāṁ gopurogavam ॥12॥*
*yāvatīḥ kiyatīśchemāḥ pṛthivyāmadhyoṣadhīḥ । tā mā sahasraparṇyomṛtyormuṁchantvaṁhasaḥ ॥13॥*
*vaiyāghro maṇirvīrudhāṁ trāyamāṇo'bhiśastipāḥ । amīvāḥ sarvā rakṣāṁsyapa hantvadhi dūramasmat ॥14॥*
*siṁhasyeva stanathoḥ saṁ vijante'gneriva vijanta ābhṛtābhyaḥ ।*
*gavāṁ yakṣamaḥ puruṣāṇāṁ vīrudbhiratinutto nāvayāetu srotyāḥ ॥15॥*
*mumuchānā Oṣadhayo'gnevaiśvānarādadhi । bhūmi saṁtanvatīritaṁ yāsāṁ rājā*

*vanaspatiḥ //16 //*
*yā rohantyāṅrisīḥ parvateṣu sameṣu cha / tā naḥ payasvatīḥ śivā aṣidhīḥ santu śaṁ hṛde //17 //*
*yāśchāhaṁ veda vīrudho yāścha paśyāmi chakṣuṣā / ātā jānīmaścha yā yāsu vidya cha saṁbhṛtam //18 //*
*sarvāḥ samagrā Oṣadhīrbodhantu vachaso mama / yathemaṁ pārayāmasi puruṣaṁ duritādadhi //19 //*
*aśvattho darbho vīrudhāṁ somo rājāmṛtaṁ haviḥ / vrīhiryavaścha bheṣajau divaspatrāvamartyau //20 //*
*ujhiīdhve stanayatyabhikrandatyoṣadhīḥ / yadā vaḥ pṛśnimātaraḥ parjanyo retasāvati //21 //*
*tasyāmṛtasyemaṁ balaṁ puruṣaṁ pāyayāmasi / atho kṛṇomi bheṣajaṁ yathāsachchhatahāyanaḥ //22 //*
*varāho veda vīrudhaṁ nakulo veda bheṣajīm /*
*sarpā gandharvā yā vidustā asmā avase huve //23 //*
*yāḥ suparṇā āṅrisīrdivyā yā raghaṭo viduḥ /*
*vayāṁsi haṁsā yā viduryāścha sarve patatriṇaḥ /*
*mṛgā yā viduroṣadhīstā asmā avase huve //24 //*
*yāvatīnāmoṣadhīnāṁ gāvaḥ prāśnantyaghnyā yāvatīnāmajāvayaḥ /*
*tāvatīstubhyamoṣadhīḥ śarma yachchhantvābhṛtāḥ //25 //*
*yāvatīṣu manuṣyābheṣajaṁ bhiṣajo viduḥ / tāvatīrviśvabheṣajīrā bharāmi tvāmabhi //26 //*
*puṣpavatīḥ prasūmatīḥ phalinīraphalā uta / saṁmātaraiva duhrāmasmā ariṣṭatātaye //27 //*
*ut tvāhārṣa paṁchaśalādatho daśaśalāduta /*
*atho yamasya paṅvīśād viśvasmād devakilbiṣāt //28 //*

७९. मण्डूकाः (Maṇḍūkāḥ) - अ. (Av.) ४.१५.१३-१५

संवत्सरं शशयाना ब्राह्मणा व्रतचारिणः। वाचं पर्जन्यजिन्वितां प्र मण्डूका अवादिषुः ॥१३॥
अपप्रवद् मण्डूकि वर्षमा वद तादुरि। मध्ये ह्रदस्य प्लवस्व विगृह्य चतुरः पदः ॥१४॥
खण्वखा३इ खैमखा३इ मध्ये तदुरि। वर्ष वनुध्वं पितरो मरुतां मन इच्छत ॥१५॥
*saṁvatsaraṁ śaśayānā brāhmaṇā vratachāriṇaḥ / vāchaṁ parjanyajinvitāṁ pra maṇḍūkā avādiṣuḥ //13 //*
*apapravad maṇḍūki varṣamā vada tāduri / madhye hradasya plavasva vigṛhya chaturaḥ padaḥ //14 //*
*khaṇvakhā3i khaimakhā3i madhye taduri / varṣa vanudhvaṁ pitaro marutāṁ mana ichchhata //15 //*

८०. मधुवनस्पतिः (Madhuvanaspatiḥ) - अ. (Av.) १.३४.१-५

इयं वीरुन्मधुजाता मधुना त्वा खनामसि। मधोरधि प्रजातासि सा नो मधुमतस्कृधि ॥१॥
जिह्वाया अग्रे मधु मे जिह्वामूले मधूलकम्। ममेदह क्रतावसो मम चित्तमुपायसि ॥२॥
मधुमन्मे निक्रमणं मधुमन्मे परायणम्। वाचा वदामि मधुमद् भूयासं मधुसन्दृशः ॥३॥
मधोरस्मि मधुतरो मदुघान्मधुमत्तरः। मामित् किल त्वं वनाः शाखं मधुमतीमिव ॥४॥
परि त्वा परितत्नुनेक्षुणागामविद्विषे। यथा मां कामिन्यसो यथा मन्नापगा असः ॥५॥
*iyaṁ vīrunmadhujātā madhunā tvā khanāmasi / madhoradhi prajātāsi sā no madhumataskṛdhi //1 //*
*jihnāyā agre madhu me jihnāmūle madhūlakam / mamedaha kratāvaso mama chittamupāyasi //2 //*
*madhumanme nikramaṇaṁ madhumanme parāyaṇam / vāchā vadāmi madhumad bhūyāsaṁ madhusanddaśaḥ //3 //*

*madhorasmi madhutaro madughānmadhumattaraḥ / māmit kila tvaṁ vanāḥ śākhaṁ madhumatīmiva //4 //*
*pari tvā paritatnunekṣuṇāgāmavidviṣe / yathā māṁ kāminyaso yathā mannāpagā asaḥ //5 //*

८१. मनः (Manaḥ) - अ. (Av.) ३.८.५-६

संं वो मनांसि सं व्रता समाकूतीर्नमामसि । अमी ये विव्रता स्थन तान् वः सं नमयामसि ॥५॥
अहं गृभ्णामि मनसा मनांसि मम चित्तमनु चित्तेभिरेत ।
मम वशेषु हृदयानि वः कृणोमि मम यातमनुवर्त्मान एत ॥६॥
*saṁ vo manāṁsi saṁ vratā samākūtīrnamāmasi / amī ye vivratā sthana tān vaḥ saṁ namayāmasi //5 //*
*ahaṁ gṛbhṇāmi manasā manāṁsi mama chittamanu chittebhireta /*
*mama vaśeṣu hṛdayāni vaḥ kṛṇomi mama yātamanuvartmāna eta //6 //*

८२. मन्त्रोक्ता (Mantroktā) - अ. (Av.) ६.८९.१-३; ७.९८.१; ७.१०५.१; ८.९.१-२६; ११.३(२).३२-३९; ११.३(३).५०-५६; १९.२४.१-८; १९.२३.१-३०

अ. (Av.) ६.८९.१-३

इदं यत् प्रेण्यः शिरो दत्तं सोमेन वृष्ण्यम्। ततः परि प्रजातेन हार्दि ते शोचयामसि॥१॥
*idaṁ yat preṇyaḥ śiro dattaṁ somena vṛṣṇyam / tataḥ pari prajātena hārdi te śochayāmasi //1 //*

अ. (Av.) ७.९८.१

सं बर्हिरक्तं हविषा घृतेन समिन्द्रेण वसुना सं मरुद्भिः ।
सं देवैर्विश्वदेवेभिरक्तमिन्द्रं गच्छतु हविः स्वाहा ॥१॥
*saṁ barhiraktaṁ haviṣā ghṛtena samindreṇa vasunā saṁ marudbhiḥ /*
*saṁ devairviśvadevebhiraktamindraṁ gachchhatu haviḥ svāhā //1 //*

अ. (Av.) ७.१०५.१

अपक्रामन् पौरुषेयाद् वृणानो दैव्यं वचः। प्रणीतीरभ्यावर्तस्व विश्वेभिः सखिभिः सह ॥१॥
*apakrāman pauruṣeyād vṛṇāno daivyaṁ vachaḥ / praṇītīrabhyāvartasva viśvebhiḥ sakhibhiḥ saha //1 //*

अ. (Av.) ८.९.१-२६

कुतस्तौ जातौ कतमः सो अर्धः कस्माल्लोकात् कतमस्याः पृथिव्याः ।
वत्सौ विराजः सलिलादुदैतां तौ त्वा पृच्छामि कतरेण दुग्धा ॥१॥
यो अक्रन्दयत् सलिलं महित्वा योनिं कृत्वा त्रिभुजं शयानः ।
वत्सः कामदुघो विराजः स गुहा चक्रे तन्वः पराचैः ॥२॥
यानि त्रीणि बृहन्ति येषां चतुर्थं वियुनक्ति वाचम् ।
ब्रह्मैनद् विद्यात् तपसा विपश्चिद् यस्मिन्नेकं युज्यते यस्मिन्नेकम्॥३॥
बृहतः परि सामानि पष्ठात् पंचाधि निर्मिता ।
बृहद बृहत्या निर्मितं कुतोऽधि बृहती मिता ॥४॥
बृहती परि मात्राया मातुर्मात्राधि निर्मिता । माया ह जो मायाया मायाया मातली परि ॥५॥
वैशवानरस्य प्रतिमोपरि द्यौर्यावद् रोदसी विबबाधे अग्निः ।
ततः षष्ठादामुतो यन्ति स्तोमा उदितो यन्त्यभि षष्ठमह्नः ॥६॥
षट् त्वा पृच्छाम ऋषयः कश्यपेमे त्वं हि युक्तं युयुक्षे योग्यं च ।
विराजमाहुर्ब्रह्मणः पितरं तां नो वि धेहि यतिधा सखिभ्यः ॥७॥
यां प्रच्युतामनु याः प्रच्यवन्त उपतिष्ठन्त उपतिष्ठमानाम् ।
यस्या व्रते प्रसवे यक्षमेजति सा विराड्ऋषयः परमे व्योमन् ॥८॥
अप्राणैति प्राणेन प्राणतीनां विराट् स्वराजमभ्येति पश्चात् ।
विश्वं मृशन्तीमभिरूपां विराजं पश्यन्ति त्वे न त्वे पश्यन्त्येनाम्॥९॥
को विराजो मिथुनत्वं प्र वेद क ऋतून् क उ कल्पमस्याः ।

क्रमान् को अस्याः कतिधा विदुग्धान् को अस्या धाम कतिधा व्युष्टीः ॥१० ॥
इयमेव सा या प्रथमा व्यौच्छदास्वितरासु चरति प्रविष्टा ।
महान्तो अस्यां महिमानो अन्तर्वधूर्जिगाय नवगज्जनित्री ॥११ ॥
छन्दःपक्षे उषसा पेपिशाने समानं योनिमनु सं चरेते ।
सूर्यपत्नी सं चरतः प्रजानती केतुमती अजरे भूरि रेतसा ॥१२ ॥
ऋतस्य पन्थामनु तिस्र आगुस्त्रायो घर्मा अनु रेत आगुः ।
प्रजामेका जिन्वत्यूर्जमेका राष्ट्रमेका रक्षति देवयूनाम् ॥१३ ॥
अनीषोमावदधुर्या तुरीयासीद् यास्य पक्षावृषयः कल्पयन्तः ।
गायत्रीं त्रिष्टुभं जगतीमनुष्टुभं बृहदर्की यजमानाय स्वराभरन्तीम् ॥१४ ॥
पंच व्युष्टीरनु पंच दोहा गां पंचनाम्नीमृतवोऽनु पंच ।
पंच दिशः पंचदशेन क्लृप्तास्ता एकमूधर्नीरभि लोकमेकम् ॥१५ ॥
षड् जाता भूता प्रथमज ऋतस्य षडु सामानि षडहं वहन्ति ।
षड्योगं सीरमनु सामसाम षडाहुर्द्यावापृथिवीः षडुर्वीः ॥१६ ॥
षडाहुः शीतान् षडु मास उष्णानृतुं नो ब्रूत यतमोऽतिरिक्त ॥
सप्त सुपर्णाः कवयो नि षेदुः सप्त च्छन्दांस्यनु सप्त दीक्षाः ॥१७ ॥
सप्त होमाः समिधो ह सप्त मधूनि सप्त ऋतवो ह सप्त ।
सप्ताज्यानि परि भूतमायन् ताः सप्तगृध्रा इति शुश्रुमा वयम् ॥१८ ॥
सप्त च्छन्दांसि चतुरुत्तराण्यन्यो अन्यस्मिन्नध्यार्पितानि ।
कथं स्तोमाः प्रति तिष्ठन्ति तेषु तानि स्तोमेषु कथमार्पितानि ॥१९ ॥
कथं गायत्री त्रिवृतं व्याप कथं त्रिष्टुप् पंचदशेन कल्पते ।
त्रयस्त्रिंशेन जगती कथमनुष्टुप् कथमेकविंशः ॥२० ॥
अष्ट जाता भूता प्रथमज ऋतस्याष्टेन्द्र ऋत्विजो दैव्या ये ।
अष्टयोनिरदितिरष्टपुत्राष्टमीं रात्रिमभि हव्यमेति ॥२१ ॥
इत्थं श्रेयो मन्यमानेदमागमं युष्माकं सख्ये अहमस्मि शेवा ।
समानजन्मा क्रतुरस्ति वः शिवः स वः सर्वाः सं चरति प्रजानन् ॥२२ ॥
अष्टेन्द्रस्य षड् यमस्य ऋषीणां सप्त सप्तधा ।
अपो मनुष्या३नोषधीस्ताँ उ पंचानु सेचिरे ॥२३ ॥
केवलीन्द्राय दुदुहे हि गृष्टिर्वशं पीयूषं प्रथमं दुहाना ।
अथातर्पयच्चतुरश्चतुर्धा देवान् मनुष्याँ३ असुरानुत ऋषीन् ॥२४ ॥
को नु गौः क एक ऋषिः किमु धाम का आशिषः ।
यक्षं पृथिव्यामेकवृदेकऋतुः कतमो नु सः ॥२५ ॥
एको गौरेक एकऋषिरेकं धामेकधाशिषः । यक्षं पृथिव्यामेकवृदेकऋतुर्नातिरिच्यते ॥२६ ॥

*kutastau jātau katamaḥ so ardhaḥ kasmāllokāt katamasyāḥ pṛthivyāḥ ।*
*vatsau virājaḥ salilādudaitāṁ tau tvā pṛchchhāmi katareṇa dugdhā ॥1 ॥*
*yo akrandayat salilaṁ mahitvā yoniṁ kṛtvā tribhujaṁ śayānaḥ ।*
*vatsaḥ kāmadugho virājaḥ sa guhā chakre tanvaḥ parāchaiḥ ॥2 ॥*
*yāni trīṇi bṛhanti yeṣāṁ chaturtha viyunakti vācham ।*
*brahmainad vidyāt tapasā vipaśchid yasminnekaṁ yujyate yasminnekam ॥3 ॥*
*bṛhataḥ pari sāmāni paṣṭhāt paṁchādhi nirmitā ।*
*bṛhada bṛhatyā nirmitaṁ kuto'dhi bṛhatī mitā ॥4 ॥*
*bṛhatī pari mātrāyā māturmātrādhi nirmitā । māyā ha jo māyāyā māyāyā mātalī pari ॥5 ॥*
*vaiśavānarasya pratimopari dyauryāvad rodasī vibabādhe agniḥ ।*
*tataḥ ṣaṣṭhādāmuto yanti stomā udito yantyabhi ṣaṣṭhamahnaḥ ॥6 ॥*
*ṣaṭ tvā pṛchchhāma ṛṣayaḥ kaśyapeme tvaṁ hi yuktaṁ yuyukṣe yogyaṁ cha ।*
*virājamāhurbrahmaṇaḥ pitaraṁ tāṁ no vi dhehi yatidhā sakhibhyaḥ ॥7 ॥*
*yāṁ prachyutāmanu yāāḥ prachyavanta upatiṣṭhanta upatiṣṭhamānām ।*

*yasyā vrate prasave yakṣamejati sā virāḍṛṣayaḥ parame vyoman* //8 //
*aprāṇaiti prāṇena prāṇatīnāṁ virāṭ svarājamabhyeti paśchāt* /
*viśvaṁ mṛśantīmabhirūpāṁ virājaṁ paśyanti tve na tve paśyantyenām* //9 //
*ko virājo mithunatvaṁ pra veda ka ṛtūn ka u kalpamasyāḥ* /
*kramān ko asyāḥ katidhā vidugdhān ko asyā dhāma katidhā vyuṣṭīḥ* //10 //
*iyameva sā yā prathamā vyauchchhadāsvitarāsu charati praviṣṭā* /
*mahānto asyāṁ mahimāno antarvadhūrjigāya navagajjanitrī* //11 //
*chhandaḥpakṣe uṣasā pepiśāne samānaṁ yonimanu saṁ charete* /
*sūryapatnī saṁ charataḥ prajānatī ketumatī ajare bhūri retasā* //12 //
*ṛtasya panthāmanu tisra āgustrāyo gharmā anu reta āguḥ* /
*prajāmekā jinvatyūrjamekā rāṣṭramekā rakṣati devayūnām* //13 //
*anīṣomāvadadhuryā turīyāsīd yāsya pakṣāvṛṣayaḥ kalpayantaḥ* /
*gāyatrīṁ triṣṭubhaṁ jagatīmanuṣṭubhaṁ bṛhadarkī yajamānāya svarābharantīm* //14 //
*paṁcha vyuṣṭīranu paṁcha dohā gāṁ paṁchanāmnīmṛtavo'nu paṁcha* /
*paṁcha diśaḥ paṁchadaśena klṛptāstā ekamūdharnīrabhi lokamekam* //15 //
*ṣaḍ jātā bhūtā prathamaja ṛtasya ṣaḍu sāmāni ṣaḍahaṁ vahanti* /
*ṣaḍyogaṁ sīramanu sāmasāma ṣaḍāhurdyāvāpṛthivīḥ ṣaḍurvīḥ* //16 //
*ṣaḍāhuḥ śītān ṣaḍu māsa uṣṇānṛtuṁ no brūta yatamo'tirikta* //
*sapta suparṇāḥ kavayo ni ṣeduḥ sapta chchhandāṁsyanu sapta dīkṣāḥ* //17 //
*sapta homāḥ samidho ha sapta madhūni sapta ṛtavo ha sapta* /
*saptājyāni pari bhūtamāyan tāḥ saptagṛdhrāā iti śuśrumā vayam* //18 //
*sapta chchhandāṁsi chaturuttarāṇyanyo anyasminnadhyārpitāni* /
*kathaṁ stomāḥ prati tiṣṭhanti teṣu tāni stomeṣu kathamārpitāni* //19 //
*kathaṁ gāyatrī trivṛtaṁ vyāpa kathaṁ triṣṭup paṁchadaśena kalpate* /
*trayastriṁśena jagatī kathamanuṣṭup kathamekaviṁśaḥ* //20 //
*aṣṭa jātā bhūtā prathamaja ṛtasyāṣṭendra ṛtvijo daivyā ye* /
*aṣṭayoniraditiraṣṭaputrāṣṭamīṁ rātrimabhi havyameti* //21 //
*itthaṁ śreyo manyamānedamāgamaṁ yuṣmākaṁ sakhye ahamasmi śevā* /
*samānajanmā kraturasti vaḥ śivaḥ sa vaḥ sarvāḥ saṁ charati prajānan* //22 //
*aṣṭendrasya ṣaḍ yamasya ṛṣīṇāṁ sapta saptadhā* /
*apo manuṣyā3noṣadhīstāṁ̐ u paṁchānu sechire* //23 //
*kevalīndrāya duduhe hi gṛṣṭirvaśaṁ pīyūṣaṁ prathamaṁ duhānā* /
*athātarpayachchaturaśchaturdhā devān manuṣyāṁ̐3 asurānuta ṛṣīn* //24 //
*ko nu gauḥ ka eka ṛṣiḥ kimu dhāma kā āśiṣaḥ* /
*yakṣaṁ pṛthivyāmekavṛdekartuḥ katamo nu saḥ* //25 //
*eko gaureka ekarṣirekaṁ dhāmekadhāśiṣaḥ / yakṣaṁ*
*pṛthivyāmekavṛdekarturnātirichyate* //26 //

अ. (Av.) ११.३ (२).३२-३९

ततश्चैनमन्येन शीषर्णा प्राशीर्येन चैतं पूर्व ऋषयः प्राश्नन् ।
ज्येष्ठतस्ते प्रजा मरिष्यतीत्येनमाह ।
तं वा अहं नावांचं नन परांचं न प्रत्यंचम् ।
बृहस्पतिना शीर्ष्णा। तेनैनं प्राशिषं तेनैनमजीगमम् ।
एष वा ओदनः सर्वांगः सर्वपरुः सर्वतनूः ।
सर्वांग एव सर्वपरुः सर्वतनूः सं भवति य एवं वेद ॥३२॥
ततश्चैनमन्याभ्यां श्रोत्राभ्यां प्राशीर्याभ्यां चैतं पूर्व ऋषयः प्राश्नन् ।
बधिरो भविष्यसीत्येनमाह ।
तं वा अहं नार्वांचं न परांचं न प्रत्यंचम् ।
द्यावापृथिवीभ्यां श्रोत्राभ्याम्। ताभ्यामेनं प्राशिषं ताभ्यामेनमजीगमम् ।
एष वा ओदनः सर्वांगः सर्वपरुः सर्वतनूः ।

सर्वांग एव सर्वपरुः सर्वतनूः सं भवति य एवं वेद ॥३३॥
ततश्चैनमन्याभ्यामक्षीभ्यां प्राशीर्याभ्यां चैतं पूर्व ऋषयः प्राश्नन् ।
अन्धो भविष्यसीत्येनमाह । तं वा अहं नार्वांचं न परांचं न प्रत्यंचम् ।
सूर्याचन्द्रमसाभ्यामक्षीभ्याम्। ताभ्यामेनं प्राशिषं ताभ्यामेनमजीगमम् ।
एष वा ओदनः सर्वांगः सर्वपरुः सर्वतनूः ।
सर्वांग एव सर्वपरुः सर्वतनूः सं भवति य एवं वेद ॥३४॥
ततश्चैनमन्येन मुखेन प्राशीर्येन चैतं पूर्व ऋषयः प्राश्नन् ।
मुखतस्ते प्रजा मरिष्यतीत्येनमाह । तं वा अहं नार्वांचं न परांचं न प्रत्यंचम् ।
बह्माणा मुखेन। तेनैनं प्राशिषं तेनैनमजीगमम् । एषवा ओदनः सर्वांगः सर्वपरुः सर्वतनूः ।
सवाङ्ंगं एव सर्वपरुः सर्वतनूः सं भवति य एवं वेद ॥३५॥
ततश्चैनमन्यया जिह्वया प्राशीर्यया चैतं पूर्व ऋषयः प्राश्नन् ।
जिह्वा ते मरिष्यतीत्येनमाह । तं वा अहं नार्वांचं न परांचं न प्रत्यंचम् ।
अग्नेर्जिह्वया। तयैनं प्राशिषं तयैनमजीगमम् । एष वा ओदनः सर्वांगः सर्वपरुः सर्वतनूः ।
सवाङ् एव सर्वपरुः सर्वतनूः सं भवति य एवं वेद ॥३६॥
ततश्चैनमन्यैर्दन्तैः प्राशीर्यैश्चैतं पूर्व ऋषयः प्राश् ।
दन्तास्ते शत्सयन्तीत्येनमाह । तं वा अहं नार्वांचं न परांचं न प्रत्यंचम् ।
ऋतुभिर्दन्तैः। तैरेनं प्राशिषं तैरेनमजीगमम् । एष वा ओदनः सर्वांगः सर्वपरुः सर्वतनूः ।
सर्वांग एव सर्वपरुः सर्वतनूः सं भवति य एवं वेद ॥३७॥
ततश्चैनमन्यैः प्राणापानैः प्राशीर्यैश्चैतं पूर्व ऋषयः प्राश्नन् ।
प्राणापानास्त्वा हास्यन्तीत्येनमाह । तं वा अहं नार्वांचं न परांचं न प्रत्यंचम् ।
सप्तऋषिभिः प्राणापानैः। तैरेनं प्राशिषं तैरेनमजीगमम् ।
एष वा ओदनः सर्वांगः सर्वपरुः सर्वतनूः ।
सर्वांग एव सर्वपरुः सर्वतनूः सं भवति य एवं वेद ॥३८॥
ततश्चैनमन्येन व्यचसा प्राशीर्येन चैतं पूर्व ऋषयः प्राश्नन् ।
राजयक्ष्मस्त्वा हनिष्यतीत्येनमाह । तं वा अहं नार्वांचं न परांचं न प्रत्यंचम् ।
अन्तरिक्षेण व्यचसा। तेनैनं प्राशिषं तेनैनमजीगमम् । एष वा ओदनः सर्वांगः सर्वपरुः सर्वतूनः ।
सर्वांग एव सर्वपरुः सर्वतनूः सं भवति य एवं वेद ॥३९॥

*tataśchainamanyena śīṣarṇā prāśīryena chaitaṁ pūrva ṛṣayaḥ prāśnan ।*
*jyeṣṭhataste prajā mariṣyatītyenamāha ।*
*taṁ vā ahaṁ nāvāṁchaṁ nana parāṁchaṁ na pratyaṁcham ।*
*bṛhaspatinā śīrṣṇā । tenainaṁ prāśiṣaṁ tenainamajīgamam ।*
*eṣa vā Odanaḥ sarvāṁgaḥ sarvaparuḥ sarvatanūḥ ।*
*sarvāṁga eva sarvaparuḥ sarvatanūḥ saṁ bhavati ya evaṁ veda ॥32॥*
*tataśchainamanyābhyāṁ śrotrābhyāṁ prāśīryābhyāṁ chaitaṁ pūrva ṛṣayaḥ prāśnan ।*
*badhiro bhaviṣyasītyenamāha ।*
*taṁ vā ahaṁ nārvāṁchaṁ na parāṁchaṁ na pratyaṁcham ।*
*dyāvāpṛthivībhyāṁ śrotrābhyām । tābhyāmenaṁ prāśiṣaṁ tābhyāmenamajīgamam ।*
*eṣa vā Odanaḥ sarvāṁgaḥ sarvaparuḥ sarvatanūḥ ।*
*sarvāṁga eva sarvaparuḥ sarvatanūḥ saṁ bhavati ya evaṁ veda ॥33॥*
*tataśchainamanyābhyāmakṣībhyāṁ prāśīryābhyāṁ chaitaṁ pūrva ṛṣayaḥ prāśnan ।*
*andho bhaviṣyasītyenamāha । taṁ vā ahaṁ nārvāṁchaṁ na parāṁchaṁ na pratyaṁcham ।*
*sūryāchandramasābhyāmakṣībhyām । tābhyāmenaṁ prāśiṣaṁ tābhyāmenamajīgamam ।*
*eṣa vā Odanaḥ sarvāṁgaḥ sarvaparuḥ sarvatanūḥ ।*
*sarvāṁga eva sarvaparuḥ sarvatanūḥ saṁ bhavati ya evaṁ veda ॥34॥*
*tataśchainamanyena mukhena prāśīryena chaitaṁ pūrva ṛṣayaḥ prāśnan ।*
*mukhataste prajā mariṣyatītyenamāha । taṁ vā ahaṁ nārvāṁchaṁ na parāṁchaṁ*

*na pratyaṁcham* /
*bahmāṇā mukhena* / *tenainaṁ prāśiṣaṁ tenainamajīgamam* / *eṣavā Odanaḥ sarvāṁgaḥ sarvaparuḥ sarvatanūḥ* /
*savāṅṁgaṁ eva sarvaparuḥ sarvatanūḥ saṁ bhavati ya evaṁ veda* //*35* //
*tataśchainamanyayā jihnayā prāśīryayā chaitaṁ pūrva ṛṣayaḥ prāśnan* /
*jihnā te mariṣyatītyenamāha* / *taṁ vā ahaṁ nārvāṁchaṁ na parāṁchaṁ na pratyaṁcham* /
*agnerjihnayā* / *tayainaṁ prāśiṣaṁ tayainamajīgamam* / *eṣa vā Odanaḥ sarvāṁgaḥ sarvaparuḥ sarvatanūḥ* /
*savārṁ eva sarvaparuḥ sarvatanūḥ saṁ bhavati ya evaṁ veda* //*36* //
*tataśchainamanyairdantaiḥ prāśīryaiśchaitaṁ pūrva ṛṣayaḥ prāśn* /
*dantāste śatsayantītyenamāha* / *taṁ vā ahaṁ nārvāṁchaṁ na parāṁchaṁ na pratyaṁcham* /
*ṛtubhirdantaiḥ* / *tairenaṁ prāśiṣaṁ tairenamajīgamam* / *eṣa vā Odanaḥ sarvāṁgaḥ sarvaparuḥ sarvatanūḥ* /
*sarvāṁga eva sarvaparuḥ sarvatanūḥ saṁ bhavati ya evaṁ veda* //*37* //
*tataśchainamanyaiḥ prāṇāpānaiḥ prāśīryaiśchaitaṁ pūrva ṛṣayaḥ prāśnan* /
*prāṇāpānāstvā hāsyantītyenamāha* / *taṁ vā ahaṁ nārvāṁchaṁ na parāṁchaṁ na pratyaṁcham* /
*saptaṛṣibhiḥ prāṇāpānaiḥ* / *tairenaṁ prāśiṣaṁ tairenamajīgamam* /
*eṣa vā Odanaḥ sarvāṁgaḥ sarvaparuḥ sarvatanūḥ* /
*sarvāṁga eva sarvaparuḥ sarvatanūḥ saṁ bhavati ya evaṁ veda* //*38* //
*tataśchainamanyena vyachasā prāśīryena chaitaṁ pūrva ṛṣayaḥ prāśnan* /
*rājayakṣamastvā haniṣyatītyenamāha* / *taṁ vā ahaṁ nārvāṁchaṁ na parāṁchaṁ na pratyaṁcham* /
*antarikṣeṇa vyachasā* / *tenainaṁ prāśiṣaṁ tenainamajīgamam* / *eṣa vā Odanaḥ sarvāṁgaḥ sarvaparuḥ sarvatūnaḥ* /
*sarvāṁga eva sarvaparuḥ sarvatanūḥ saṁ bhavati ya evaṁ veda* //*39* //

अ. (Av.) ११.३ (३).५०-५६

एतद् वै ब्रधनस्य विष्टपं यदोदनः ॥५०॥
ब्रध्नलोको भवति ब्रध्नस्य विष्टपि श्रयते य एवं वेद ॥५१॥
एतस्माद् वा ओदनात् त्रयत्रिंशतं लोकान् निरमिमीत प्रजापतिः ॥५२॥
तेषां प्राानाय यामसृजत ॥५३॥
स य एवं विदुष उपद्रष्टा भवति प्राणं रुणद्धि ॥५४॥
न च प्राणं रुणद्धि सर्वज्यानिं जीयते ॥५५॥
न च सर्वज्यानिं जीयते पुरैनं जरसः प्राणो जहाति ॥५६॥

*etad vai bradhanasya viṣṭapaṁ yadodanaḥ* //*50* //
*bradhnaloko bhavati bradhnasya viṣṭapi śrayate ya evaṁ veda* //*51* //
*etasmād vā Odanāt trayatriṁśataṁ lokān niramimīta prajāpatiḥ* //*52* //
*teṣāṁ prāānāya yāmasṛjata* //*53* //
*sa ya evaṁ viduṣa upadraṣṭā bhavati prāṇaṁ ruṇaddhi* //*54* //
*na cha prāṇaṁ ruṇaddhi sarvajyāniṁ jīyate* //*55* //
*na cha sarvajyāniṁ jīyate purainaṁ jarasaḥ prāṇo jahāti* //*56* //

अ. (Av.) १९.२४.१-८

येन देवं सवितारं परि देवा अधारयन् । तेनमं ब्रह्मणस्पते परि राष्ट्राय धत्तन ॥१॥
परीममिन्द्रमायुषे महे क्षत्राय धत्तन । यथैनं जरसे नयां ज्योक् क्षत्रेऽधि जागरत् ॥२॥
परीमं सोममायुषे महे श्रोत्राय धत्तन । यथैनं जरसे नयां ज्योक् श्रोत्रेऽधि जागरत् ॥३॥
परि धत्त धत्त नो वर्चसेमं जरामृत्युं कृणुत दीर्घमायुः ।

बृहस्पतिः प्रायच्छद् वास एतत् सोमाय रो परिधातवा उ ॥४॥
जरां सु गच्छ परि धत्स्व वासो भवा गृष्टीनामभिशस्तिपा उ ।
शतं च जीव शदः पुरूची गायश्च पोषमुपसंव्ययस्व ॥५॥
परीदं वासो अधिथाः स्वस्तयेऽभूर्वापीनामभिशस्तिपा उ ।
शतं च जीव शदः पुरूचीर्वसूनि चारुर्वि भजासि जीवन् ॥६॥
योगेयोगे तवस्तरं वाजेवाजे हवामहे। सखाय इन्द्रमूतये ॥७॥
हिरण्यवर्णो अजरः सुवीरो जरामृत्युः प्रजया सं विशस्व ।
तदग्निराह तदु सोम आह बृहस्पतिः सविता तदिन्द्रः ॥८॥

*yena devaṁ savitāraṁ pari devā adhārayan / tenamaṁ brahmaṇaspate pari rāṣṭāya dhattana //1 //*
*parīmamindramāyuṣe mahe kṣatrāya dhattana / yathainaṁ jarase nayāṁ jyok kṣatre'dhi jāgarat //2 //*
*parīmaṁ somamāyuṣe mahe śrotrāya dhattana / yathainaṁ jarase nayāṁ jyok śrotre'dhi jāgarat //3 //*
*pari dhatta dhatta no varchasemaṁ jarāmṛtyuṁ kṛṇuta dīrghamāyuḥ /*
*bṛhaspatiḥ prāyachchhad vāsa etat somāya rāo paridhātavā u //4 //*
*jarāṁ su gachchha pari dhatsva vāso bhavā gṛṣṭīnāmabhiśastipā u /*
*śataṁ cha jīva śadaḥ purūchī gāyaścha poṣamupasaṁvyayasva //5 //*
*parīdaṁ vāso adhithāḥ svastaye'bhūrvāpīnāmabhiśastipā u /*
*śataṁ cha jīva śadaḥ purūchīrvasūni chārurvi bhajāsi jīvan //6 //*
*yogeyoge tavastaraṁ vājevāje havāmahe / sakhāya indramūtaye //7 //*
*hiraṇyavarṇo ajaraḥ suvīro jarāmṛtyuḥ prajayā saṁ viśasva /*
*tadagnirāha tadu soma āha bṛhaspatiḥ savitā tadindraḥ //8 //*

अ. (Av.) १९.२३.१-३०

आथर्वणानां चतुऋचेभ्यः स्वाहा ॥१॥
पंचर्चेभ्यः स्वाहा ॥२॥
षड्चेभ्यः स्वाहा ॥३॥
सप्तर्चेभ्यः स्वाहा ॥४॥
अष्टर्चेभ्यः स्वाहा ॥५॥
नवर्चेभ्यः स्वाहा ॥६॥
दशर्चेभ्यः स्वाहा ॥७॥
एकादशर्चेभ्यः स्वाहा ॥८॥
द्वादशर्चेभ्यः स्वाहा ॥९॥
त्रयोदशर्चेभ्यः स्वाहा ॥१०॥
चतुर्दशर्चेभ्यः स्वाहा ॥११॥
पंचदशर्चेभ्यः स्वाहा ॥१२॥
षोडशर्चेभ्यः स्वाहा ॥१३॥
सप्तदशर्चेभ्यः स्वाहा ॥१४॥
अष्टादशर्चेभ्यः स्वाहा ॥१५॥
एकोनविंशतिः स्वाहा ॥१६॥
विंशतिः स्वाहा ॥१७॥
महत्काण्डाय स्वाहा ॥१८॥
तृचेभ्यः स्वाहा ॥१९॥
एकर्चेभ्यः स्वाहा ॥२०॥
क्षुद्रेभ्यः स्वाहा ॥२१॥
एकानृचेभ्यः स्वाहा ॥२०॥
रोहितेभ्यः स्वाहा ॥२३॥

सूर्याभ्यां स्वाहा ॥२४॥
व्रात्याभ्यां स्वाहा ॥२५॥
प्राजापत्याभ्यां स्वाहा ॥२६॥
विषासह्यै स्वाहा ॥२७॥
मंगलिकेभ्यः स्वाहा ॥२८॥
ब्रह्मणे स्वाहा ॥२९॥
ब्रह्मज्येष्ठा संभृता वीर्याणि ब्रह्माग्रे ज्येष्ठं दिवमा ततान ।
भूतानां ब्रह्मा प्रथमोत जो तेनार्हति ब्रह्मणा स्पर्धितुं कः ॥३०॥
*ātharvaṇānāṁ chaturchebhyaḥ svāhā //1 //*
*paṁcharchebhyaḥ svāhā //2 //*
*ṣaḍchebhyaḥ svāhā //3 //*
*saptarchebhyaḥ svāhā //4 //*
*aṣṭarchebhyaḥ svāhā //5 //*
*navarchebhyaḥ svāhā //6 //*
*daśarchebhyaḥ svāhā //7 //*
*ekādaśarchebhyaḥ svāhā //8 //*
*dvādaśarchebhyaḥ svāhā //9 //*
*trayodaśarchebhyaḥ svāhā //10 //*
*chaturdaśarchebhyaḥ svāhā //11 //*
*paṁchadaśarchebhyaḥ svāhā //12 //*
*ṣoḍaśarchebhyaḥ svāhā //13 //*
*saptadaśarchebhyaḥ svāhā //14 //*
*aṣṭādaśarchebhyaḥ svāhā //15 //*
*ekonaviṁśatiḥ svāhā //16 //*
*viṁśatiḥ svāhā //17 //*
*mahatkāṇḍāya svāhā //18 //*
*tṛchebhyaḥ svāhā //19 //*
*ekarchebhyaḥ svāhā //20 //*
*kṣudrebhyaḥ svāhā //21 //*
*ekānṛchebhyaḥ svāhā //20 //*
*rohitebhyaḥ svāhā //23 //*
*sūryābhyāṁ svāhā //24 //*
*vrātyābhyāṁ svāhā //25 //*
*prājāpatyābhyāṁ svāhā //26 //*
*viṣāsahyai svāhā //27 //*
*maṁgalikebhyaḥ svāhā //28 //*
*brahmaṇe svāhā //29 //*
*brahmajyeṣṭhā saṁbhṛtā vīryāṇi brahmāgre jyeṣṭhaṁ divamā tatāna /*
*bhūtānāṁ brahmā prathamota jo tenārhati brahmaṇā spardhituṁ kaḥ //30 //*

८३. मरुतः (Marutaḥ) - अ. (Av.) ३.१.२; ३.२.६; ४.१५.५-९

अ. (Av.) ३.१.२

यूयमुग्रा मरुत ईदृशे स्थाभि प्रेत मृणत सहध्वम ।
अमीमृणन् वसवो नाथिता इमे अग्निर्ह्येषां दूतः प्रत्येतु विद्वान् ॥२॥
*yūyamugrā maruta īdṛśe sthābhi preta mṛṇata sahadhvama /*
*amīmṛṇan vasavo nāthitā ime agnirhyeṣāṁ dūtaḥ pratyetu vidvān //2 //*

अ. (Av.) ३.२.६

असौ या सेना मरुतः परेषामस्मानैत्यभ्योजसा स्पर्धमाना ।
तां विध्यत तमसापव्रतेन यथैषामन्यो अन्यं न जानात् ॥६॥

*asau yā senā marutaḥ pareṣāmasmānaityabhyojasā spardhamānā* ।
*tāṁ vidhyata tamasāpavratena yathaiṣāmanyo anyaṁ na jānāt* ॥6॥

अ. (Av.) ४.१५.५-९

उदीरयत मरुतः समुद्रतस्त्वेषो अर्को नभ उत् पातयाथ ।
महऋषभस्य नदतो नभस्वतो वाश्रा आपः पृथिवी तर्पयन्तु ॥५॥
अभि क्रन्द स्तनयार्दयोदधिं भूमिं पर्जन्य पयसा समङ्धि ।
त्वया सृष्टं बहुलमैतु वर्षमाशरैषी कृशगुरेत्वस्तम् ॥६॥
सं वोऽवन्तु सुदानव उत्सा अजगरा उत ।
मरुदभिः प्रच्युता मेघा वर्षन्तु पृथिवीमनु ॥७॥
आशामाशां वि द्योततां वाता वान्तु दिशोदिशः ।
मरुदभिः प्रच्युता मेघाः सं यन्तु पृथिवीमनु ॥८॥
आपो विद्युदभ्रं वर्ष सं वोऽवन्तु सुदानव उत्सा अजगरा उत ।
मरुद्भिः प्रच्युता मेघाः प्रावन्तु पृथिवीमनु ॥९॥

*udīrayata marutaḥ samudratastveṣo arko nabha ut pātayātha* ।
*mahaṛṣabhasya nadato nabhasvato vāśrā āpaḥ pṛthivī tarpayantu* ॥5॥
*abhi kranda stanayārdayodadhiṁ bhūmiṁ parjanya payasā samaṅgdhi* ।
*tvayā sṛṣṭaṁ bahulamaitu varṣamāśaraiṣī kṛśaguretvastam* ॥6॥
*saṁ vo'vantu sudānava utsā ajagarā uta* ।
*marudabhiḥ prachyutā meghā varṣantu pṛthivīmanu* ॥7॥
*āśāmāśāṁ vi dyotatāṁ vātā vāntu diśodiśaḥ* ।
*marudabhiḥ prachyutā meghāḥ saṁ yantu pṛthivīmanu* ॥8॥
*āpo vidyudabhraṁ varṣa saṁ vo'vantu sudānava utsā ajagarā uta* ।
*marudbhiḥ prachyutā meghāḥ prāvantu pṛthivīmanu* ॥9॥

८४. मरुतां पिता (Marutāṁ Pitā) - अ. (Av.) ५.२४.१२

मरुतां पिता पशूनामधिपतिः स मावतु ।
अस्मिन् ब्रह्मण्यस्मिन् कर्मण्यस्यां पुरोधायामस्यां प्रतिष्ठायामस्यां चित्त्यामस्यामाकूत्यामस्यामाशिष्यस्यां देवहूत्यां स्वाहा ॥१२॥

*marutāṁ pitā paśūnāmadhipatiḥ sa māvatu* ।
*asmin brahmaṇyasmin karmaṇyasyāṁ purodhāyāmasyāṁ pratiṣṭhāyāmasyāṁ chittyāmasyāmākūtyāmasyāmāśiṣyasyāṁ devahūtyāṁ svāhā* ॥12॥

८५. मारुतपर्जन्यौ (Mārutaparjanyau) - अ. (Av.) ४.१५.४

गणास्त्वोप गायन्तु मारुताः पर्जन्य घोषिणः पृथक् ।
सर्गा वर्षस्य वर्षतो वर्षन्तु पृथिवीमनु ॥४॥

*gaṇāstvopa gāyantu mārutāḥ parjanya ghoṣiṇaḥ pṛthak* ।
*sargā varṣasya varṣato varṣantu pṛthivīmanu* ॥4॥

८६. मित्रादयो विश्वेदेवाः (Viśvedevāḥ)

अ. (Av.) ३.८.१-४

आ यातु मित्र ऋतुभिः कल्पमानः संवेशयन् पृथिवीमुस्रियाभिः ।
अथास्मभ्यं वरुणो वायुरग्निर्बृहद् राष्ट्रं संवेश्यंदधातु ॥१॥
धाता रातिः सवितेदं जुषन्तामिन्द्रस्त्वष्टा प्रति हर्यन्तु मे वचः ।
हुवे देवीमदितिं शूरपुत्रां सजातानां मध्यमेष्ठा यथासानि ॥२॥
हुवे सोमं सवितारं नमोभिर्विश्वानादित्याँ अहमुत्तरत्वे ।
अयमग्निर्दीदायाद् दीर्घमेव सजातैरिद्धोऽप्रतिब्रुवद्भिः ॥३॥
इहेदसाथ न परो गमाथेर्यो गोपाः पुष्टपतिर्व आजत् ।
अस्मै कामायोप कामिनीर्विश्वे वो देवा उपसंयन्तु ॥४॥

*vā yātu mitra ṛtubhiḥ kalpamānaḥ saṁveśayan pṛthivīmusriyābhiḥ* ।

*athāsmabhyaṁ varuṇo vāyuragnirbṛhad rāṣṭrṁ saṁveśyaṁdadhātu //1 //*
*dhātā rātiḥ savitedaṁ juṣantāmindrastvaṣṭā prati haryantu me vachaḥ /*
*huve devīmaditiṁ śūraputrāṁ sajātānāṁ madhyameṣṭhā yathāsāni //2 //*
*huve somaṁ savitāraṁ namobhirviśvānādityāṁ̐ ahamuttaratve /*
*ayamagnirdīdāyād dīrghameva sajātairiddho'pratibruvadbhiḥ //3 //*
*ihedasātha na paro gamātheryo gopāḥ pṛṣṭapatirva ājat /*
*asmai kāmāyopa kāminīrviśve vo devā upasaṁyantu //4 //*

८७. मित्रावरुणौ (Mitrāvaruṇau) - अ. (Av.) १.२०.२; ५.२४.५; ६.३२.३; ६.९८.१-३

अ. (Av.) १.२०.२

यो अद्य सेन्यो वधोऽघायूनामुदीरते। युवं तं मित्रावरुणावस्मद् यावयतं परि ॥२॥
*yo adya senyo vadho'ghāyūnāmudīrate / yuvaṁ taṁ mitrāvaruṇāvasmad yāvayataṁ pari //2 //*

अ. (Av.) ५.२४.५

मित्रावरुणौ वृष्ट्या अधिपती तौ मावताम्।
अस्मिन् ब्रह्मण्यस्मिन् कर्मण्यस्यां पुरोधायामस्यां प्रतिष्ठायामस्यां चित्त्यामस्यामाकूत्यामस्यामाशिष्यस्यां देवहूत्यां स्वाहा ॥५॥

अ. (Av.) ६.३२.३

अभयं मित्रावरुणाविहास्तु नोऽर्चिषात्त्रिणो नुदतं प्रतीचः ।
मा दातारं मा प्रतिष्ठां विदन्त मिथो विघ्नाना उप यन्तु मृत्युम् ॥३॥
*abhayaṁ mitrāvaruṇāvihāstu no'rchiṣāttriṇo nudataṁ pratīchaḥ /*
*mā dātāraṁ mā pratiṣṭhāṁ vidanta mitho vighnānā upa yantu mṛtyum //3 //*

अ. (Av.) ६.९८.१-३

इन्द्रो जयाति न परा जयाता अधिराजो राजसु राजयातै ।
चर्कृत्य ईड्यो वन्द्यश्चोपसद्यो नमस्योभवेह ॥१॥
त्वमिन्द्राधिराजः श्रवस्युस्त्वं भूरभिभूतिर्जनानाम् ।
त्वं दैवीर्विश इमा वि राजायुष्मत् क्षत्रमजरं ते अस्तु ॥२॥
प्राच्या दिशस्त्व मिन्द्रासि राजोतोदीच्या दिशो वृत्रहंछत्रुहोसि ।
यत्र यनित स्रोत्यास्तज्जितं ते दक्षिणतो वृषभ एषि हव्यः ॥३॥
*indro jayāti na parā jayātā adhirājo rājasu rājayātai /*
*charkṛtya īḍyo vandyaśchopasadyo namasyobhaveha //1 //*
*tvamindrādhirājaḥ śravasyustvaṁ bhūrabhibhūtirjanānām /*
*tvaṁ daivīrviśa imā vi rājāyuṣmat kṣatramajaraṁ te astu //2 //*
*prāchyā diśastva mindrāsi rājotodīchyā diśo vṛtrahaṁchhatruhosi /*
*yatra yanita srotyāstajjitaṁ te dakṣiṇato vṛṣabha eṣi havyaḥ //3 //*

८८. मृत्युः (Mṛtyuḥ) - अ. (Av.) ५.२४.१३

मृत्युः प्रजानामधिपतिः स मावतु ।
अस्मिन् ब्रह्मण्यस्मिन् कर्मण्यस्यां पुरोधायामस्यां प्रतिष्ठायामस्यां चित्त्यामस्यामाकूत्यामस्यामाशिष्यस्यां देवहूत्यां स्वाहा ॥१३॥
*mṛtyuḥ prajānāmadhipatiḥ sa māvatu /*
*asmin brahmaṇyasmin karmaṇyasyāṁ purodhāyāmasyāṁ pratiṣṭhāyāmasyāṁ chittyāmasyāmākūtyāmasyāmāśiṣyasyāṁ devahūtyāṁ svāhā //13 //*

८९. यमः (Yamaḥ) - अ. (Av.) १८.१.१-३९; ४३; ४७-५०; ५३-६१; १८.२.१-३; ६-२८; ३०-३३; ३५-६०; १८.३.
१-७३; १८.४.१-८०

अ. (Av.) १८.१.१-३९

ओ चित् सखायं सख्या ववृत्यां तिरः पुरू चिदर्णवं जगन्वान् ।

पितुर्नपातमा दधीत वेधा अधि क्षमि प्रतरं दीध्यानः ॥१॥
न ते सखा सख्यं वष्ट्येतत् सलक्ष्मा यद् विषुरूपा भवाति ।
महस्पुत्रासो असुरस्य वीरा दिवो धर्तार उर्विया परि ख्यन् ॥२॥
उशन्तिं घा ते अमृतास एतदेकस्य चित् त्यजसं मर्त्यस्य ।
नि ते मनो मनसि धाय्यस्मे जन्युः पतिस्तन्व१मा विविश्याः ॥३॥
न यत् पुरा चकृमा कद्ध नूनमृतं वदन्तो अनृतं रपेम ।
गन्धर्वो अप्स्वप्या च योषा सा नौ नाभिः परमं जामि तन्नौ ॥४॥
गर्भे नु नौ जनिता दम्पती कर्देवस्त्वष्टा सविता विश्वरूपः ।
नकिरस्य प्र मिनन्ति व्रतानि वेद नावस्य पृथिवी उत द्यौः ॥५॥
को अद्य युङ्क्ते धुरि गा ऋतस्य शिमीवतो भामिनो दुर्हृणायून् ।
आसन्निषून् हृत्स्वसो मयोभून् य एषां भृत्यामृणधत् स जीवात् ॥६॥
को अस्य वेद प्रथमस्याह्नः क ईं ददर्श क इह प्र वोचत् ।
बृहन्मित्रस्य वरुणस्य धाम कदु ब्रव आहनो वीच्या नॄन् ॥७॥
यमस्य मा यम्यं१ काम आगन्त्समाने योनौ सहशेय्याय ।
जायेव पत्ये तन्वंरिरिच्यां वि चिद् वृहेव रथ्येव चक्रा ॥८॥
न तिष्ठन्ति न नि मिषन्त्येते देवानां स्पश इह ये चरन्ति ।
अन्येन मदाहनो याहि तूयं तेन वि वृह रथ्येव चक्रा ॥९॥
रात्रीभिरस्मा अहभिर्दशस्येत् सूर्यस्य चक्षुर्मुहुरुन्मिमीयात् ।
दिवा पृथिव्या मिथुना सबन्धू यमीर्यमस्य विवृहादजामि ॥१०॥
आ घा ता गच्छानुत्तरा युगानि यत्र जामयः कृणवन्नजामि ।
उप बर्बृहि वृषभाय बाहुमन्यमिच्छस्व सुभगे पतिं मत् ॥११॥
किं भ्रातासद् यदनाथ भवाति किमु स्वसा यन्निरृर्तिर्निगच्छात् ।
काममूता बह्वे३तद् रपामि तन्वामे तन्वं१ सं पिपृग्धि ॥१२॥
न ते नाथं यम्यत्राहमस्मि न ते तनूं तन्वा३ सं पपृच्याम् ।
अन्येन मत् प्रमुदः कल्पयस्व न ते भ्राता सुभगे वष्ट्येतत् ॥१३॥
न वा उ ते तनूं तन्वा३ सं पपृच्यां पापमाहुर्यः स्वसारं निगच्छात् ।
असंयदेतन्मनसो हृदो मे भ्राता स्वसुः शयने यच्छयीय ॥१४॥
बतो बतासि यम नैव ते मनो हृदयं चाविदाम ।
अन्या किल त्वां कक्ष्येव युक्तं परि ष्वजातै लिबुजेव वृक्षम् ॥१५॥
अन्यमू षु यम्यन्य उ त्वां परि ष्वजातै लिबुजेव वृक्षम् ।
तस्य वा त्वं मन इच्छा स वा तवाधा कृणुष्व संविदं सुभद्राम् ॥१६॥
त्रीणिच्छन्दांसि कवयो वि येतिरे पुरुरूपं दर्शतं विश्वचक्षणम् ।
आपो वाता ओषधयस्तान्येकस्मिन् भुवन आर्पितानि ॥१७॥
वृषा वृष्णे दुदुहे दोहसा दिवः पयांसि यह्वो अदितेरदाभ्यः ।
विश्वं स वेद वरुणो यथा धिया स यियो यजति यियाँ ऋतून् ॥१८॥
रपद् गन्धर्वीरप्या च योषणा नदस्य नादे परि पातु नो मनः ।
इष्टस्य मध्ये अदितिर्नि धातु नो भ्राता नो ज्येष्ठः प्रथमो वि वोचति ॥१९॥
सो चिन्नु भद्रा क्षुमती यशस्वत्युषा उवास मनवे स्वर्वति ।
यदीमुशन्तमुशतामनु ऋतुमग्निं होतारं विदथाय जीजनन् ॥२०॥
अध त्यं द्रप्सं विभ्वंविचक्षणं विराभरदिषिरः श्येनो अध्वरे ।
यदी विशो वृणते तदस्ममार्या अग्निं होतारमध धीरजायत ॥२१॥
सदासि रण्वो यवसेव पुष्यते होत्राभिरग्ने मनुषः स्वध्वरः ।
विप्रस्य वा यच्छशमान उक्थ्योऽ वाजं ससवाँ उपयासि भूरिभिः ॥२२॥
उदीरय पितरा जार आ भगमियक्षति हर्यतो हृत्त इष्यति ।
विवक्ति वह्निः स्वपस्यते मखस्तविष्यते असुरो वेपते मती ॥२३॥
यस्ते अग्ने सुमतिं मर्तो अख्यत् सहसः सूनो अति स प्र शृण्वे ।

इषं दधानो वहमानो अश्वैरा स द्युमाँ अमवान् भूषति द्यून् ॥२४॥
श्रुधी नो अग्ने सदने सधस्थे युक्ष्वा रथममृतस्य द्रवित्नुम् ।
आ नो वह रोदसी देवपुत्रे माकिर्देवानामप भूरिह स्याः ॥२५॥
यदग्न एषा समितिर्भवाति देवी देवेषु यजता यजत्र ।
रत्ना च यद् विभजासि स्वधावो भागं नो अत्र वसुमन्तं वीतात्॥२६॥
अग्वग्निरुषसामग्रमख्यदन्वहानि प्रथमो जातवेदाः ।
अनु सूर्य उषसो अनु रश्मीननु द्यावापृथिवी आ विवेश ॥२७॥
प्रत्यग्निरुषसामग्रमख्यत् प्रत्यहानि प्रथमो जातवेदाः ।
प्रति सूर्यस्य पुरुधा च रश्मीन् प्रति द्यावापृथिवी आ ततान ॥२८॥
द्यावा ह क्षामा प्रथमे ऋतेनाभिश्रावे भवतः सत्यवाचा ।
देवो यन्मर्तान् यजथाय कृण्वन्त्सीदद्धोता प्रत्यङ् स्वमसुं यन् ॥२९॥
देवो देवान् परिभूर्ऋतेन वहा नो हव्यं प्रथमश्चिकित्वान् ।
धूमकेतुः समिधा भाऋजीको मन्द्रो होता नित्यो वाचा यजीयान्॥३०॥
अर्चामि वा वर्धयापो घृतस्नू द्यावाभूमी श्रृणुतं रोदसी मे ।
अहा यद् देवा असुनीतिमायन् मध्वा नो अत्र पितरा शिशीताम्॥३१॥
स्वावृग् देवस्यामृतं यदी गोरतो जातासो धारयन्त उर्वी ।
विश्वे देवा अनु तत् ते यजुर्गुर्दुहे यदेनी दिव्यं घृतं वाः ॥३२॥
किं स्विन्नो राजा जगृहे कदस्याति व्रतं चकृमा को वि वेद ।
मित्रश्चिद्धि ष्मा जुहुराणो देवांछ्लोको न यातामपि वाजो अस्ति॥३३॥
दुर्मन्त्वत्रामृतस्य नाम सलक्ष्मा यद् विषुरूपा भवति ।
यमस्य यो मनवते सुमन्त्वग्ने तमृष्व पाह्यप्रयुच्छन् ॥३४॥
यस्मिन् देवा विदथे मादयन्ते विवस्वतः सदने धारयन्ते ।
सूर्ये ज्योतिरदधुर्मास्य१क्तून् परि द्योतनिं चरतो अजस्रा ॥३५॥
यस्मिन् देवा मन्मनि संचरन्त्यपीच्ये३ न वयमस्य विद्म ।
मित्रो नो अत्रादितिरनागान्त्सविता देवो वरुणाय वोचत् ॥३६॥
सखाय आ शिषामहे ब्रह्मेन्द्राय वज्रिणे। स्तुष ऊ षु नृतमाय धृष्णवे ॥३७॥
शवसा ह्यसि श्रुतो वृत्रहत्येन वृत्रहा। मघैर्मघोनो अति शूर दाशसि ॥३८॥
स्तेगो न क्षमत्येषि पृथिवीं मही नो वाता इह वान्तु भूमौ ।
मित्रो नो अत्र वरुणो युज्यमानो अग्निर्वने न व्यसृष्ट शोकम् ॥३९॥
*O chit sakhāyaṁ sakhyā vavṛtyāṁ tiraḥ purū chidarṇavaṁ jaganvān* /
*piturnapātamā dadhīta vedhā adhi kṣami pratarаṁ dīdhyānaḥ* //1 //
*na te sakhā sakhyaṁ vaṣṭyetat salakṣamā yad viṣurūpā bhavāti* /
*mahasputrāso asurasya vīrā divo dhartāra urviyā pari khyan* //2 //
*uśantiṁ ghā te amṛtāsa etadekasya chit tyajasaṁ martyasya* /
*ni te mano manasi dhāyyasme janyuḥ patistanva1mā viviśyāḥ* //3 //
*na yat purā chakṛmā kaddha nūnamṛtaṁ vadanto anṛtaṁ rapema* /
*gandharvo apsvapyā cha yoṣā sā nau nābhiḥ paramaṁ jāmi tannau* //4 //
*garbhe nu nau janitā dampatī kardevastvaṣṭā savitā viśvarūpaḥ* /
*nakirasya pra minanti vratāni veda nāvasya pṛthivī uta dyauḥ* //5 //
*ko adya yuṅkte dhuri gā ṛtasya śimīvato bhāmino durhṛṇāyūn* /
*āsanniṣūn hṛtsvaso mayobhūn ya eṣāṁ bhṛtyāmṛṇadhat sa jīvāt* //6 //
*ko asya veda prathamasyāhnaḥ ka ī dadarśa ka iha pra vochat* /
*bṛhakinmatrasya varuṇasya dhāma kadu brava āhano vīchyā nṝn* //7 //
*yamasya mā yamyaṁ1 kāma āgantsamāne yānau sahaśeyyāya* /
*jāyeva patye tanvaṁririchyāṁ vi chid vṛheva rathyeva chakrā* //8 //
*na tiṣṭhanti na ni miṣantyete devānāṁ spaśa iha ye charanti* /
*anyena madāhano yāhi tūyaṁ tena vi vṛha rathyeva chakrā* //9 //
*rātrībhirasmā ahabhirdaśasyet sūryasya chakṣurkuhurunmimīyāt* /

*divā pṛthivyā mithunā sabandhū yamīryamasya vivṛhādajāmi //10 //*
*ā ghā tā gachchhānuttarā yugāni yatra jāmayaḥ kṛṇavannajāmi /*
*upa barbṛhi vṛṣabhāya bāhumanyamichchhasva subhage patiṁ mat //11 //*
*kiṁ bhrātāsad yadanātha bhavāti kimu svasā yannirṛtirnigachchhāt /*
*kāmamūtā bahne3tad rapāmi tanvāme tanvaṁ1 saṁ pipṛgdhi //12 //*
*na te nāthaṁ yamyatrāhamasmi na te tanūṁ tanvā3 saṁ papṛchyām /*
*anyena mat pramudaḥ kalpayasva na te bhrātā subhage vaṣṭyetat //13 //*
*na vā u te tanūṁ tanvā3 saṁ papṛchyāṁ pāpamāhuryaḥ svasāraṁ nigachchhāt /*
*asaṁyadetanmanaso hṛdo me bhrātā svasuḥ śayane yachchhayīya //14 //*
*bato batāsi yama naiva te mano hṛdayaṁ chāvidāma /*
*anyā kila tvāṁ kakṣayeva yuktaṁ pari ṣvajātai libujeva vṛkṣam //15 //*
*anyamū ṣu yamyanya u tvāṁ pari ṣvajātai libujeva vṛkṣam /*
*tasya vā tvaṁ mana ichchhā sa vā tavādhā kṛṇuṣva saṁvidaṁ subhadrām //16 //*
*trīṇichchhandāṁsi kavayo vi yetire pururūpaṁ darśataṁ viśvachakṣaṇam /*
*āpo vātā Oṣadhayastānyekasmin bhuvana ārpitāni //17 //*
*vṛṣā vṛṣṇe daduhe dohasā divaḥ payāṁsi yahno aditeradābhyaḥ /*
*viśvaṁ sa veda varuṇo yathā dhiyā sa yiāyo yajati yiāyām̐ ṛtūn //18 //*
*rapad gandharvīrapyā cha yoṣaṇā nadasya nāde pari pātu no manaḥ /*
*iṣṭasya madhye aditirni dhātu no bhrātā no jyeṣṭhaḥ prathamo vi vochati //19 //*
*so chinnu bhadrā kṣumatī yaśasvatyuṣā uvāsa manave svarvati /*
*yadīmuśantamuśatāmanu ṛtumagniṁ hotāraṁ vidathāya jījanan //20 //*
*adha tyaṁ drapsaṁ vibhvaṁvichakṣaṇaṁ virābharadiṣiraḥ śyeno adhvare /*
*yadī viśo vṛṇate tadasmamāryā agniṁ hotāramadha dhīrajāyata //21 //*
*sadāsi raṇvo yavaseva puṣyate hotrābhiragne manuṣaḥ svadhvaraḥ /*
*viprasya vā yachchhaśamāna ukthyo' vājaṁ sasavām̐ upayāsi bhūribhiḥ //22 //*
*udīraya pitarā jāra ā bhagamiyakṣati haryato hṛtta iṣyati /*
*vivakti vahniḥ svapasyate makhastaviṣyate asuro vepate matī //23 //*
*yaste agne sumatiṁ marto akhyat sahasaḥ sūno ati sa pra śṛṇve /*
*iṣaṁ dadhāno vahamāno aśvairā sa dyumām̐ amavān bhūṣati dyūn //24 //*
*śrudhī no agne sadane sadhasthe yukṣavā rathamamṛtasya dravitnum /*
*ā no vaha rodasī devaputre mākirdevānāmapa bhūriha syāḥ //25 //*
*yadagna eṣā samitirbhavāti devī deveṣu yajatā yajatra /*
*ratnā cha yad vibhajāsi svadhāvo bhāgaṁ no atra vasumantaṁ vītāt //26 //*
*agvagniruṣasāmagramakhyadanvahāni prathamo jātavedāḥ /*
*anu sūrya uṣaso anu raśmīnanu dyāvāpṛthivī ā viveśa //27 //*
*pratyagniruṣasāmagramakhyat pratyahāni prathamo jātavedāḥ /*
*prati sūryasya purudhā cha raśmīn prati dyāvāpṛthivī ā tatāna //28 //*
*dyāvā ha kṣāmā prathame ṛtenābhiśrāve bhavataḥ satyavāchā /*
*devo yanmartān yajathāya kṛṇvantsīdaddhotā pratyaṅ svamasuṁ yan //29 //*
*devo devān paribhūrṛtena vahā no havyaṁ prathamaśchikitvān /*
*dhūmaketuḥ samidhā bhāṛjīko mandro hotā nityo vāchā yajīyān //30 //*
*archāmi vā vardhayāpo ghṛtasnū dyāvābhūmī śṛṇutaṁ rodasī me /*
*ahā yad devā asunītimāyan madhvā no atra pitarā śiśītām //31 //*
*svāvṛg devasyāmṛtaṁ yadī gorato jātāso dhārayanta urvī /*
*viśve devā anu tat te yarjurgurduhe yadenī divyaṁ ghṛtaṁ vāḥ //32 //*
*kiṁ svinno rājā jagṛhe kadasyāti vrataṁ chakṛmā ko vi veda /*
*mitrāśchidbhi ṣmā juhurāṇo devāṁchhaloko na yātāmapi vājo asti //33 //*
*durmantvatrāmṛtasya nāma salakṣamā yad viṣurūpā bhavati /*
*yamasya yo manavate sumantvagne tamṛṣva pāhyaprayuchchhan //34 //*
*yasmin devā vidathe mādayante vivasvataḥ sadane dhārayante /*

*sūrye jyotiradadhurmāsya1ktūn pari dyotanim charato ajasrā //35 //*
*yasmin devā manmani saṁcharantyapīchye3 na vayamasya vidya /*
*mitro no atrāditiranāgāntsavitā devo varuṇāya vochat //36 //*
*sakhāya ā śiṣāmahe brahmendrāya vajriṇe / stuṣa ū ṣu nṛtamāya dhṛṣṇave //37 //*
*śavasā hyasi śruto vṛtrahatyena vṛtrahā / maghairmaghono ati śūra dāśasi //38 //*
*stego na kṣamatyeṣi pṛthivīṁ mahī no vātā iha vāntu bhūmau /*
*mitro no atra varuṇo yujyamāno agnirvane na vyasṛṣṭa śokam //39 //*

अ. (Av.) १८.१.४३

सरस्वती या सरथं ययाथोक्थैः स्वधाभिर्देवि पितृभिर्मदन्ती ।
सहस्रार्घमिडो अत्र भागं रायस्पोषं यजमानय धेहि ॥४३॥
*sarasvatī yā sarathaṁ yayāthokthaiḥ svadhābhirdevi pitṛbhirmadantī /*
*sahasrārghamiḍo atra bhāgaṁ rāyaspoṣaṁ yajamānaya dhehi //43 //*

अ. (Av.) १८.१.४७-५०

मातली कव्यैर्यमो अंगिरोभिर्बृहस्पतिर्ऋक्वभिर्वावृधानः ।
यांश्च देवा वावृधुर्ये च देवांस्ते नोऽवन्तु पितरो हवेषु ॥४७॥
स्वादुष्किलायं मधुमाँ उतायं तीव्रः किलायं रसवाँ उतायम् ।
उतो न्व१स्य पपिवांसमिन्द्र न कश्चन सहत आहवेषु ॥४८॥
परेयिवांसं प्रवतो महीरिति बहुभ्यः पन्थामनुपस्पशानम् ।
वैवस्वतं संगमनं जनानां यमं राजानं हविषा सपर्यत ॥४९॥
यमो नो गातुं प्रथमो विवेद नैषा गव्यूतिरपभर्तवा उ ।
यत्रा नः पूर्वे पितरः परेता एना जाानाः पथ्या३ अनु स्वाः ॥ ५०॥
*mātalī kavyairyamo aṁgirobhirbṛhaspatirṛkvabhirvāvṛdhānaḥ /*
*yāṁścha devā vāvṛdhurye cha devāṁste no'vantu pitaro haveṣu //47 //*
*svāduṣkilāyaṁ madhumām̐ utāyaṁ tīvraḥ kilāyaṁ rasavām̐ utāyam /*
*uto nva1sya papivāṁsamindra na kaśchana sahata āhaveṣu //48 //*
*pareyivāṁsaṁ pravato mahīriti bahubhyaḥ panthāmanupaspaśānam /*
*vaivasvataṁ saṁgamanaṁ janānāṁ yamaṁ rājānaṁ haviṣā saparyata //49 //*
*yamo no gātuṁ prathamo viveda naiṣā gavyūtirapabhartavā u /*
*yatrā naḥ pūrve pitaraḥ paretā enā jāānāḥ pathyā3 anu svāḥ // 50 //*

अ. (Av.) १८.१.५३-६१

त्वष्टा दुहित्रे वहतुं कृणोति तेनेदं विश्वं भुवनं समेति ।
यमस्य माता पर्युह्यमाना महो जाया विवस्वतो ननाश ॥५३॥
प्रेहि प्रेहि पथिभिः पूर्याणैर्येना ते पूर्वे पितरः परेताः ।
उभा राजानौ स्वध्या मदन्तौ यमं पश्यासि वरुणं च देवम् ॥५४॥
अपेत वीत वि च सर्पतातोऽस्मा एतं पितरो लोकमक्रन् ।
अहोभिरद्भिरक्तुभिर्व्यक्तं यमो ददात्यवसानमस्मै ॥५५॥
उशन्तस्त्वेधीमह्युशन्तः समिधीमहि। उशन्नुशत आ वह पितृन् हविषे अत्तवे ॥५६॥
द्युमन्तस्त्वेधीमहि द्युमन्तः समिधीमहि। द्युमान् द्युमत आ वह पितृन् हविषे अत्तवे॥५७॥
अंगिरसो नः पितरो नवग्वा अथर्वाणो भृगवः सोम्यासः ।
तेषां वयं सुमतौ यियानामपि भद्रे सैमनसे स्याम ॥५८॥
अंगिरोभिर्यियैरा गहीह यम वैरूपैरिह मादयस्व ।
विवस्वन्तं हुवे यः पिता तेऽस्मिन् बर्हिष्या निषद्य ॥५९॥
इमं यम प्रस्तरमा हि रोहांगिरोभिः पितृभिः संविदानः ।
आ त्वा मन्त्राः कविशस्ता वहन्त्वेना राजन्हविषो मादयस्व ॥६०॥
इत एत उदारुहन् दिवस्पृष्ठान्यारुहन्। प्र भूर्जयो यथा पथा द्यामंगिरसो ययुः ॥६१॥
*tvaṣṭā duhitre vahatuṁ kṛṇoti tenedaṁ viśvaṁ bhuvanaṁ sameti /*
*yamasya mātā paryuhyamānā maho jāyā vivasvato nanāśa //53 //*

*prehi prehi pathibhiḥ pūryāṇairyenā te pūrve pitaraḥ paretāḥ* ।
*ubhā rājānau svadhyā madantau yamaṁ paśyāsi varuṇaṁ cha devam* ॥54॥
*apeta vīta vi cha sarpatāto'smā etaṁ pitaro lokamakran* ।
*ahobhiradbhiraktubhirvyaktaṁ yamo dadātyavasānamasmai* ॥55॥
*uśantastvedhīmahyuśantaḥ samidhīmahi* । *uśannuśata ā vaha pitṝn haviṣe attave* ॥56॥
*dyumantastvedhīmahi dyumantaḥ samidhīmahi* । *dyumān dyumata ā vaha pitṝn haviṣe attave* ॥57॥
*aṁgiraso naḥ pitaro navagvā atharvāṇo bhṛgavaḥ somyāsaḥ* ।
*teṣāṁ vayaṁ sumatau yiāyānāmapi bhadre saimanase syāma* ॥58॥
*aṁgirobhiryiāyairā gahīha yama vairūpairiha mādayasva* ।
*vivasvantaṁ huve yaḥ pitā te'smin barhiṣyā niṣadya* ॥59॥
*imaṁ yama prastaramā hi rohāṁgirobhiḥ pitṛbhiḥ saṁvidānaḥ* ।
*ā tvā mantrāḥ kaviśastā vahantvenā rājanhaviṣo mādayasva* ॥60॥
*ita eta udāruhan divaspṛṣṭhānyāruhan* । *pra bhūrjayo yathā pathā dyāmaṁgiraso yayuḥ* ॥61॥

अ. (Av.) १८.२.१-३

यमाय सोमः पवते यमाय क्रियते हविः ।
यमं ह याो गच्छत्यग्निदूतो अरकृतः ॥१॥
यमाय मधुमत्तमं जुहोता प्र च तिष्ठत ।
इदं नम ऋषिभ्यः पूर्वजेभ्यः पूर्वेभ्यः पथिकृद्भ्यः ॥२॥
यमाय घृतवत् पयो राो हविर्जुहोतन ।
स नो जीवेष्वा यमेद दीर्घमायुः प्र जीवसे ॥३॥

*yamāya somaḥ pavate yamāya kriyate haviḥ* ।
*yamaṁ ha yāo gachchhatyagnidūto arakṛtaḥ* ॥1॥
*yamāya madhumattamaṁ juhotā pra cha tiṣṭhata* ।
*idaṁ nama ṛṣibhyaḥ pūrvajebhyaḥ pūrvebhyaḥ pathikṛdbhyaḥ* ॥2॥
*yamāya ghṛtavat payo rāo havirjuhotana* ।
*sa no jīveṣvā yameda dīrghamāyuḥ pra jīvase* ॥3॥

अ. (Av.) १८.२.६-२८

त्रिकद्रुकेभिः पवते षडुर्वीरेकमिद् बृहत् ।
त्रिष्टुब् गायत्री छन्दांसि सर्वा ता यम आर्पिता ॥६॥
सूर्यं चक्षुषा गच्छ वातमात्मना दिवं च गच्छ पृथिवीं च धर्मभिः ।
अपो वा गच्छ यदि तत्र ते हितमोषधीषु प्रति तिष्ठा शरीरैः ॥७॥
अजो भागस्तपसस्तं तपस्व तं ते शोचिस्तपतु तं ते अर्चिः ।
यास्ते शिवास्तन्वोजातवेदस्ताभिर्वहैनं सुकृतामु लोकम् ॥८॥
यास्ते शोचयो रंहयो जातवेदो याभिरापृणासि दिवमन्तरिक्षम् ।
अजं यन्तमनु ताः समृण्वतामथेतराभिः शिवतमाभिः श्टतं कृधि ॥९॥
अव सृज पुनरग्ने पितृभ्यो यस्त आहुतश्चरति स्वधावान् ।
आयुर्वसान् उप यातु शेषः सं गच्छतां तन्वासुवर्चाः ॥१०॥
अति द्रव श्वानौ सारमेयौ चतुरक्षौ शबलौ साधुना पथा ।
अधा पितृन्त्सुविदत्राँ अपीहि यमेन ये सधमादं मदन्ति ।११॥
यौ ते श्वानौ यम रक्षितारौ चतुरक्षौ पथिषदी नृचक्षसा ।
ताभ्यां राजन् परि धेह्येनं स्वस्त्यस्मा अनमीवं च धेहि ॥१२॥
उरूणसावसुतृपावुदुम्बलौ यमस्य दूतौ चरतो जनाँ अनु ।
तावस्मभ्यं दृशये सूर्याय पुनर्दातामसुमद्येह भद्रम् ॥१३॥
सोम एकेभ्यः पवते घृतमेक उपासते ।
येभ्यो मधु प्रधावति तांश्चिदेवापि गच्छतात् ॥१४॥

ये चित् पूर्व ऋतसाता ऋतजाता ऋतावृधः ।
ऋषीन् तपस्वतो यम तपोजाँ अपि गच्छतात् ॥१५॥
तपसा ये अनाधृष्यास्तपसा ये स्वर्ययुः ।
तपो ये चक्रिरे महस्तांश्चिदेवापि गच्छतात् ॥१६॥
ये युध्यन्ते प्रधनेषु शूरासो ये तनूत्यजः ।
ये वा सहस्रदक्षिणास्तांश्चिदेवापि गच्छतात् ॥१७॥
सहस्रणीथाः कवयो ये गोपायन्ति सूर्यम् ।
ऋषीन् तपस्वतो यम तपोजाँ अपि गच्छतात् ॥१८॥
स्योनास्मै भव पृथिव्यनृक्षरा निवेशनी। यच्छास्मै शर्म सप्रथाः ॥१९॥
असंबाधे पृथिव्या उरौ लोके नि धीरयस्व ।
स्वधा याश्चकृषे जीवन् तास्ते सन्तु मधुश्चतुः ॥२०॥
ह्वयामि ते मनसा मन इहेमान् गृहाँ उप जुजुषाण एहि ।
सं गच्छस्व पितृभिः सं यमेन स्योनास्त्वा वाता उप वान्तु शग्माः ॥२१॥
उत् त्वा वहन्तु मरुत उदवाहा उदप्रुतः ।
अजेन कृण्वन्तः शीतं वर्षेणोक्षन्तु बालिति ॥२२॥
उदह्वमायुरायुषे क्रत्वे दक्षाय जीवसे ।
स्वान् गच्छतु ते मनो अधा पितॄँरुप द्रव ॥२३॥
मा ते मनो मासोर्मांगानां मा रसस्य ते ।
मा ते हास्त तन्वः१ किं चनेह ॥२४॥
मा त्वा वृक्षः सं बाधिष्ट मा देवी पृथिवी मही ।
लोकं पितुषु वित्त्वैधस्व यमराजसु ॥२५॥
यत् ते अंगमतिहितं पराचैरपानः प्राणो य उ वा ते परेतः ।
तत् ते स्रगत्य पितरः सनीडा घासाद् घसं पुनरा वेशयन्तु ॥२६॥
अपेमं जीवा अरुधन् गृहेभ्यस्तं निर्वहत परि ग्रामादितः ।
मृत्युर्यमस्यासीद् दूतः प्रचेता असून् पितृभ्यो गमयां चकार ॥२७॥
ये दस्यवः पितृषु प्रविष्टा ज्ञातिमुखा आहुतादश्चरन्ति ।
पुरापुरो निपुरो ये भरन्त्यग्निष्टानस्मात् प्र धमाति यात् ॥२८॥
*trikadrukebhiḥ pavate ṣaḍurvīrekamid bṛhat* ।
*triṣṭub gāyatrī chhandāṁsi sarvā tā yama ārpitā* ॥6॥
*sūrya chakṣuṣā gachchha vātamātmanā divaṁ cha gachchha pṛthivīṁ cha dharmabhiḥ* ।
*apo vā gachchha yadi tatra te hitamoṣadhīṣu prati tiṣṭhā śarīraiḥ* ॥7॥
*ajo bhāgastapasastaṁ tapasva taṁ te śochistapatu taṁ te archiḥ* ।
*yāste śivāstanvojātavedastābhirvahainaṁ sukṛtāmu lokam* ॥8॥
*yāste śochayo raṁhayo jātavedo yābhirāpṛṇāsi divamantarikṣam* ।
*ajaṁ yantamanu tāḥ samṛṇvatāmathetarābhiḥ śivatamābhiḥ śṛtaṁ kṛdhi* ॥9॥
*ava sṛja punaragne pitṛbhyo yasta āhutaścharati svadhāvān* ।
*āyurvasān upa yātu śeṣaḥ saṁ gachchhatāṁ tanvāsuvarchāḥ* ॥10॥
*ati drava śvānau sārameyau chaturakṣau śabalau sādhunā pathā* ।
*adhā pitṝntsuvidatrāṁ apīhi yamena ye sadhamādaṁ madanti* ॥11॥
*yau te śvānau yama rakṣitārau chaturakṣau pathiṣadī nṛchakṣasā* ।
*tābhyāṁ rājan pari dhehyenaṁ svastyasmā anamīvaṁ cha dhehi* ॥12॥
*urūṇasāvasutṛpāvudumbalau yamasya dūtau charato janāṁ anu* ।
*tāvasmabhyaṁ ddaśaye sūryāya punardātāmasumadyeha bhadram* ॥13॥
*soma ekebhyaḥ pavate ghṛtameka upāsate* ।
*yebhyo madhu pradhāvati tāṁśchidevāpi gachchhatāt* ॥14॥
*ye chit pūrva ṛtasātā ṛtajātā ṛtāvṛdhaḥ* ।
*ṛṣīn tapasvato yama tapojāṁ api gachchhatāt* ॥15॥

*tapasā ye anādhṛṣyāstapasā ye svaryayuḥ* ।
*tapo ye chakrire mahastāṁśchidevāpi gachchhatāt* ॥16॥
*ye yudhyante pradhaneṣu śūrāso ye tanūtyajaḥ* ।
*ye vā sahasradakṣiṇāstāṁśchidevāpi gachchhatāt* ॥17॥
*sahasraṇīthāḥ kavayo ye gopāyanti sūryam* ।
*ṛṣīn tapasvato yama tapojām̐ api gachchhatāt* ॥18॥
*syonāsmai bhava pṛthivyanṛkṣarā niveśanī* । *yachchhāsmai śarma saprathāḥ* ॥19॥
*asaṁbādhe pṛthivyā urau loke ni dhīrayasva* ।
*svadhā yāśchakṛṣe jīvan tāste santu madhuśchatuḥ* ॥20॥
*hnayāmi te manasā mana ihemān gṛhām̐ upa jujuṣāṇa ehi* ।
*saṁ gachchhasva pitṛbhiḥ saṁ yamena syonāstvā vātā upa vāntu śagmāḥ* ॥21॥
*ut tvā vahantu maruta udavāhā udaprutaḥ* ।
*ajena kṛṇvantaḥ śītaṁ varṣeṇokṣantu bāliti* ॥22॥
*udahnamāyurāyuṣe kratve dakṣāya jīvase* ।
*svān gachchhatu te mano adhā pitṝm̐rupa drava* ॥23॥
*mā te mano māsormāṁgānāṁ mā rasasya te* ।
*mā te hāsta tanvaḥ१ kiṁ chaneha* ॥24॥
*mā tvā vṛkṣaḥ saṁ bādhiṣṭa mā devī pṛthivī mahī* ।
*lokaṁ pituṣu vittvaidhasva yamarājasu* ॥25॥
*yat te aṁgamatihitaṁ parāchairapānaḥ prāṇo ya u vā te paretaḥ* ।
*tat te sragatya pitaraḥ sanīḍā ghāsād ghasaṁ punarā veśayantu* ॥26॥
*apemaṁ jīvā arudhan gṛhebhyastaṁ nirvahata pari grāmāditaḥ* ।
*mṛtyuryamasyāsīd dūtaḥ prachetā asūn pitṛbhyo gamayāṁ chakāra* ॥27॥
*ye dasyavaḥ pitṛṣu praviṣṭā jñātimukhā āhutādaścharanti* ।
*purāpuro nipuro ye bharantyagniṣṭānasmāt pra dhamāti yāāt* ॥28॥

अ. (Av.) १८.२.३०-३३

यां ते धेनुं निपृणामि यमु ते क्षीर ओदनम् ।
तेना जनस्यामो भर्ता योऽत्रासदजीवनः ॥३०॥
अश्वावतीं प्र तर या सुशेवार्क्षाकं वा प्रतरं नवीयः ।
यस्त्वा जघान वध्यः सो अस्तु मा सो अन्यद् विदत भागधेयम् ॥३१॥
यमः परोऽवरो विवस्वान् ततः परं नाति पश्यामि किं चन ।
यमे अध्वरो अधि मे निवष्टो भुवो विवस्वानन्वाततान ॥३२॥
अपागूहन्नमृतां मर्त्येभ्यः कृत्वा सवर्णामदधुर्विवस्वते ।
उताश्विनावभरद् यत् तदासीदजहादु द्वा मिथुना सरण्यूः ॥३३॥

*yāṁ te dhenuṁ nipṛṇāmi yamu te kṣīra Odanam* ।
*tenā janasyāmo bhartā yo'trāsadajīvanaḥ* ॥30॥
*aśvāvatīṁ pra tara yā suśevārkṣākaṁ vā prataraṁ navīyaḥ* ।
*yastvā jaghāna vadhyaḥ so astu mā so anyad vidata bhāgadheyam* ॥31॥
*yamaḥ paro'varo vivasvān tatḥ paraṁ nāti paśyāmi kiṁ chana* ।
*yame adhvaro adhi me nivaṣṭo bhuvo vivasvānanvātatāna* ॥32॥
*apāgūhannamṛtāṁ martyebhyaḥ kṛtvā savarṇāmadadhurvivasvate* ।
*utāśvināvabharad yat tadāsīdajahādu dvā mithunā saraṇyūḥ* ॥33॥

अ. (Av.) १८.२.३५-६०

ये अग्निदग्धा ये अनग्निदग्धा मध्ये दिवः स्वधया मादयन्ते ।
त्वं तान् वेत्थ यदि ते जातवेदः स्वधया यां स्वधितिं जुषन्ताम् ॥३५॥
शं तप माति तपो अग्ने मा तन्वं१ तपः ।
वनेषु शुष्मो अस्तु ते पृथिव्यामस्तु यद्धरः ॥३६॥
ददाम्यस्मा अवसानमेतद् य एष आगन् मम चेदभूदिह ।

यमश्चिकित्वान् प्रत्येतदाह ममैष राय उप तिष्ठतामिह ॥३७॥
इमां मात्रां मिमीमहे यथापरं न मासातै। शते शरत्सु नो पुरा ॥३८॥
प्रेमां मात्रां मिमीमहे यथापरं न मासातै। शते शरत्सु नो पुरा ॥३९॥
अपेमां मात्रां मिमीमहे यथापरं न मासातै। शते शरत्सु नो पुरा ॥४०॥
वी३मां मात्रां मिमीमहे यथापरं न मासातै। शते शरत्सु नो पुरा ॥४१॥
निरिमां मात्रां मिमीमहे यथापरं न मासातै। शते शरत्सु नो पुरा ॥४२॥
उदिमां मात्रां मिमीमहे यथापरं न मासातै। शते शरत्सु नो पुरा ॥४३॥
समिमां मात्रां मिमीमहे यथापरं न मासातै। शते शरत्सु नो पुरा ॥४४॥
अमासि मात्रां स्वरगामायुष्मान् भूयासम् ।
यथापरं न मासातै शते शरत्सु नो पुरा ॥४५॥
प्राणो अपानो व्यान् आयुश्चक्षुर्दृशये सूर्याय ।
अपरिपरेण पथा यमराज्ञः पितॄन् गच्छ ॥४६॥
ये अग्रवः शशमानाः परेयुर्हित्वा द्वेषांस्यनपत्यवन्तः ।
ते द्यामुदित्याविदन्त लोकं नाकस्य पृष्ठे अधि दीध्यानाः ॥४७॥
उदन्वती द्यौरवमा पीलुमतीति मध्यमा ।
तृतीया ह प्रद्यौरिति यस्यां पितर आसते ॥४८॥
ये नः पितुः पितरो ये पितामहा य आविविशुरुर्व१न्तरिक्षम् ।
य आक्षियन्ति पृथिवीमुत द्यां तेभ्यः पितृभ्यो नमसा विधेम ॥४९॥
इदमिद् वा उ नापरं दिवि पश्यसि सूर्यम् ।
माता पुत्रं यथा सिचाभ्येनं भूम ऊर्णुहि ॥५०॥
इदमिद् वा उ नापरं जरस्यन्यदितोऽपरम् ।
जाया पतिमिव वासासाभ्येनं भूम ऊर्णुहि ॥५१॥
अभि त्वोर्णोमि पृथिव्या मातुर्वस्त्रेण भद्रया ।
जीवेषु भद्रं तन्मयि स्वधा पितृषु सा त्वयि ॥५२॥
अग्नीषोमा पथिकृता स्योनं देवेभ्यो रत्नं दधथुर्वि लोकम् ।
उप प्रेष्यन्तं पूषणं यो वहात्यंजोयानैः पथिभिस्तत्र गच्छतम् ॥५३॥
पूषा त्वेतश्च्यावयतु प्र विद्वाननष्टपशुर्भुवनस्य गोपाः ।
स त्वैतेभ्यः परिं ददत् पितृभ्योऽग्निर्देवेभ्यः सुविदत्रियेभ्यः ॥५४॥
आयुर्विश्वायुः परि पातु त्वा पूषा त्वा पातु प्रपथे पुरस्तात् ।
यत्रासते सुकृतो यत्र त ईयुस्तत्र त्वा देवः सविता दधातु ॥५५॥
इमौ युनज्मि ते वह्नी असुनीताय वोढवे ।
ताभ्यां यमस्य सादनं समितीश्चाव गच्छतात् ॥५६॥
एतत् त्वा वासः प्रथमं न्वागन्नपैतदूह यदिहाबिभः पुरा ।
इष्टापूर्तमनुसंक्राम विद्वान् यत्र ते दत्तं बहुधा विबन्धुषु ॥५७॥
अग्नेर्वर्म परि गोभिर्व्ययस्व सं प्रोर्णुष्व मेदसा पीवसा च ।
नेत् त्वा धृष्णुर्हरसा जर्हृषाणो दधृग् विधक्षन् परीङ्खयातै ॥५८॥
दण्डं हस्तादाददानो गतासोः सह श्रोत्रेण वर्चसा बलेन ।
अत्रैव त्वमिह वयं सुवीरा विश्वा मृधो अभिमातीर्जयेम ॥५९॥
धनुर्हस्तादाददानो मृतस्य सह क्षत्रेण वर्चसा बलेन ।
समागृभाय वसु भूरि पुष्टमर्वाङ् त्वमेह्युप जीवलोकम् ॥६०॥

*ye agnidagdhā ye anagnidagdhā madhye divaḥ svadhayā mādayante /*
*tvaṁ tān vettha yadi te jātavedaḥ svadhayā yāṁ svadhitiṁ juṣantām //35 //*
*śaṁ tapa māti tapo agne mā tanvaṁ1 tapaḥ /*
*vaneṣu śuṣmo astu te pṛthivyāmastu yaddharaḥ //36 //*
*dadāmyasmā avasānametad ya eṣa āgan mama chedabhūdiha /*
*yamaśchikitvān pratyetadāha mamaiṣa rāya upa tiṣṭhatāmiha //37 //*
*imāṁ mātrāṁ mimīmahe yathāparaṁ na māsātai / śate śaratsu no purā //38 //*

*premāṁ mātrāṁ mimīmahe yathāparaṁ na māsātai | śate śaratsu no purā ||39 ||*
*apemāṁ mātrāṁ mimīmahe yathāparaṁ na māsātai | śate śaratsu no purā ||40 ||*
*vī3māṁ mātrāṁ mimīmahe yathāparaṁ na māsātai | śate śaratsu no purā ||41 ||*
*nirimāṁ mātrāṁ mimīmahe yathāparaṁ na māsātai | śate śaratsu no purā ||42 ||*
*udimāṁ mātrāṁ mimīmahe yathāparaṁ na māsātai | śate śaratsu no purā ||43 ||*
*samimāṁ mātrāṁ mimīmahe yathāparaṁ na māsātai | śate śaratsu no purā ||44 ||*
*amāsi mātrāṁ svaragāmāyuṣmān bhūyāsam |*
*yathāparaṁ na māsātai śate śaratsu no purā ||45 ||*
*prāṇo apāno vyān āyuśchakṣuddaśaye sūryāya |*
*apariparеṇa pathā yamarāāḥ pitṝn gachchha ||46 ||*
*ye agravaḥ śaśamānāḥ pareyurhitvā dveṣāṁsyanapatyavantaḥ |*
*te dyāmudityāvidanta lokaṁ nākasya pṛṣṭhe adhi dīdhyānāḥ ||47 ||*
*udanvatī dyauravamā pīlumatīti madhyamā |*
*tṛtīyā ha pradyauriti yasyāṁ pitara āsate ||48 ||*
*ye naḥ pituḥ pitaro ye pitāmahā ya āviviśururva1ntarikṣam |*
*ya ākṣiyanti pṛthivīmuta dyāṁ tebhyaḥ pitṛbhyo namasā vidhema ||49 ||*
*idamid vā u nāparaṁ divi paśyasi sūryam |*
*mātā putraṁ yathā sichābhyenaṁ bhūma ūrṇuhi ||50 ||*
*idamid vā u nāparaṁ jarasyanyadito'param |*
*jāyā patimiva vāsāsābhyenaṁ bhūma ūrṇuhi ||51 ||*
*abhi tvorṇomi pṛthivyā māturvastroṇa bhadrayā |*
*jīveṣu bhadraṁ tanmayi svadhā pitṛṣu sā tvayi ||52 ||*
*agnīṣomā pathikṛtā syonaṁ devebhyo ratnaṁ dadhathurvi lokam |*
*upa preṣyantaṁ pūṣaṇaṁ yo vahātyaṁjoyānaiḥ pathibhistatra gachchhatam ||53 ||*
*pūṣā tvetaśchyāvayatu pra vidvānanaṣṭapaśurbhuvanasya gopāḥ |*
*sa tvaitebhyaḥ pariṁ dadat pitṛbhyo'gnirdevebhyaḥ suvidatriyebhyaḥ ||54 ||*
*āyurviśvāyuḥ pari pātu tvā pūṣā tvā pātu prapathe purastāt |*
*yatrāsate sukṛto yatra ta īyustatra tvā devaḥ savitā dadhātu ||55 ||*
*imau yunajmi te vahnī asunītāya voḍhave |*
*tābhyāṁ yamasya sādanaṁ samitīśchāva gachchhatāt ||56 ||*
*etat tvā vāsaḥ prathamaṁ nvāgannapaitadūha yadihābibhaḥ purā |*
*iṣṭāpūrtamanusaṁkrāma vidvān yatra te dattaṁ bahudhā vibandhuṣu ||57 ||*
*agnervarma pari gobhirvyayasva saṁ prorṇuṣva medasā pīvasā cha |*
*net tvā dhṛṣṇurharasā jarhṛṣāṇo dadhṛg vidhakṣan parīṅkhyātai ||58 ||*
*daṇḍaṁ hastādādadāno gatāsoḥ saha śrotreṇa varchasā balena |*
*atraiva tvamiha vayaṁ suvīrā viśvā mṛdho abhimātīrjayema ||59 ||*
*dhanurhastādādādāno mṛtasya saha kṣatreṇa varchasā balena |*
*samāgṛbhāya vasu bhūri puṣṭamarvāṅ tvamehyupa jīvalokam ||60 ||*

अ. (Av.) १८.३.१-७३

इयं नारी पतिलोकं वृणाना नि पद्यत उप त्वा मर्त्य प्रेतम् ।
धर्मं पुराणमनुपालयन्ती तस्यै प्रजां द्रविणं चेह धेहि ॥१॥
उदीर्ष्व नार्यभि जीवलोकं गतासुमेतमुप शेष एहि ।
हस्तग्राभस्य दिधिषोस्तवेदं पत्युर्जनित्वमभि सं बभूथ ॥२॥
अपश्यं युवतिं नीयमानां जीवां मृतेभ्यः परिणीयमानाम् ।
अन्धेन यत् तमसा प्रावृतासीत् प्राक्तो अपाचीमनयं तदेनाम् ॥३॥
प्रजानत्यध्न्ये जीवलोकं देवानां पन्थामनुसंचरन्ती ।
अयं ते गोपतिस्तं जुषस्व स्वर्गं लोकमधि रोहयैनम् ॥४॥
उप द्यामुप वेतसमवत्तरो नदीनाम्। अग्ने पित्तमपामसि। ॥५॥
यं त्वमग्ने समदहस्तमु निर्वापया पुनः ।

क्याम्बूरत्र रोहतु शाण्डदूर्वा व्यल्कशा ॥६॥
इदं त एकं पर ऊ त एकं तृतीयेन ज्योतिषा सं विशस्व ।
संवेशने तन्वा३ चारुरेधि प्रियो देवानां परमे सधस्थे ॥७॥
उत्तिष्ठ प्रेहि प्र द्रवौकः कृणुष्व सलिले सधस्थे ।
तत्र त्वं पितृभिः संविदानः सं सोमेन मदस्व सं स्वधाभिः ॥८॥
प्र च्यवस्व तन्वं१ सं भरस्व मा ते गात्रा वि हायि मो शरीरम् ।
मनो निविष्टमनुसंविशस्व यत्र भूमेर्जुषसे तत्र गच्छ ॥९॥
वर्चसा मां पितरः सोम्यासो अंजन्तु देवा मधुना घृतेन ।
चक्षुषे मा प्रतरं तारयन्तो जरसे मा जरदष्टिं वर्धन्तु ॥१०॥
वर्चसा मां समनक्त्वग्निर्मेधां मे विष्णुर्न्यनक्त्वासन् ।
रयिं मे विश्वे नि यच्छन्तु देवाः स्योना मापः पवनैः पुनन्तु ॥११॥
मित्रावरुणा परि मामधातामादित्या मा स्वरवो वर्धयन्तु ।
वर्चो म इन्द्रो न्यनक्तु हस्तयोर्जरदष्टिं मा सविता कृणोतु ॥१२॥
यो ममार प्रथमो मर्त्यानां यः प्रेयाय प्रथमो लोकमेतम् ।
वैवस्वतं संगमनं जनानां यमं राजानं हविषा सपर्यत ॥१३॥
परा यात पितर आ च यातायं वो यो मधुना समक्तः ।
दत्तो अस्मभ्यं द्रविणेह भद्रं रयिं च नः सर्ववीरं दधात ॥१४॥
कण्वः कक्षीवान् पुरुमीढो अगस्त्यः श्यावाश्वः सोभर्यर्चनानाः ।
विश्वामित्रोऽयं जमदग्निरत्रिरवन्तु नः कश्यपो वामदेवः ॥१५॥
विश्वामित्र जमदग्ने वसिष्ठ भरद्वाज गोतम वामदेव ।
शर्दिर्नो अत्रिरग्रभीन्नमोभिः सुसंशासः पितरो मृडता नः ॥१६॥
कस्ये मृजाना अति यन्ति रिप्रमायुर्दधानाः प्रतरं नवीयः ।
आप्यायमानाः प्रजया धनेनाध स्याम सुरभयो गृहेषु ॥१७॥
अंजते व्यंजते समंजते ऋतुं रिहन्ति मधुनाभ्यंजते ।
सिन्धोरुच्छ्वासे पतयन्तमुक्षणं हिरण्यपावाः पशुमासु गृह्णते ॥१८॥
यद् वो मुद्रं पितरः सोम्यं च तेनो सचध्वं स्वयशसो हि भूत ।
ते अर्वाणः कवय आ शृणोत सुविदत्रा विदथे हूयमानाः ॥१९॥
ये अत्रयो अंगिरसो नवग्वा इष्टावन्तो रातिषाचो दधानाः ।
दक्षिणावन्तः सुकृतो य उ स्थासद्यास्मिन् बर्हिषि मादयध्वम् ॥२०॥
अधा यथा नः पितरः परासः प्रत्नासो अग्न ऋतमाशशानाः ।
शुचीदयन् दीध्यत उक्थशासः क्षामा भिन्दन्तो अरुणीरप व्रन् ॥२१॥
सुकर्माणः सुरुचो देवयन्तो अयो न देवा जनिमा धमन्तः ।
शुचन्तो अग्निं वावृधन्त इन्द्रमुर्वी गव्यां परिषदं नो अक्रन् ॥२२॥
आ यूथेव क्षुमति पश्वो अख्यद् देवानां जनिमान्त्युग्रः ।
मर्तासश्चिदुर्वशीरकृप्रन् वृधे चिदर्य उपरस्यायोः ॥२३॥
अकर्म ते स्वपसो अभूम ऋतमवस्रन्नुषसो विभातीः ।
विश्वं तद् भद्रं यदवन्ति देवा बृहद् वदेम विदथे सुवीराः ॥२४॥
इन्द्रो मा मरुत्वान् प्राच्या दिशः पातु बाहुच्युता पृथिवी द्यामिवोपरि ।
लोककृतः पथिकृतो यजामहे ये देवानां हुतभागा इह स्थ ॥२५॥
धाता मा निर्ऋत्या दक्षिणाया दिशः पातु बाहुच्युता पृथिवी द्यामिवोपरि ।
लोककृतः पथिकृतो यजामहे ये देवानां हुतभागा इह स्थ ॥२६॥
अदितिर्मादित्यै प्रतीच्या दिशः पातु बाहुच्युता पृथिवी द्यामिवोपरि ।
लोककृतः पथिकृतो यजामहे ये देवानां हुतभागा इह स्थ ॥२७॥
सोमो मा विश्वैर्देवैरुदीच्या दिशः पातु बाहुच्युता पृथिवी द्यामिवोपरि ।
लोककृतः पथिकृतो यजामहे ये देवानां हुतभागा इह स्थ ॥२८॥
धर्ता ह त्वा धरुणौ धारयाता ऊर्ध्वं भानुं सविता द्यामिवोपरि ।

लोककृतः पथिकृतो यजामहे ये देवानां हुतभागा इह स्थ ॥२९॥
प्राच्यां त्वा दिशि पुरा संवृतः स्वधायामा दधामि बाहुच्युता पृथिवी द्यामिवोपरि ।
लोककृतः पथिकृतो यजामहे ये देवानां हुतभागा इह स्थ ॥३०॥
दक्षिणायां त्वा दिशि पुरा संवृतः स्वधायामा दधामि बाहुच्युता पृथिवी द्यामिवोपरि।
लोककृतः पथिकृतो यजामहे ये देवानां हुतभागा इह स्थ ॥३१॥
प्रतीच्यां त्वा दिशि पुरा संवृतः स्वधायामा दधामि बाहुच्युतां पृथिवी द्यामिवोपरि ।
लोककृतः पथिकृतो यजमहे ये देवानां हुतभागा इह स्थ ॥३२॥
उदीच्यां त्वा दिशि पुरा संवृतः स्वधायामा दधामि बाहुच्युता पृथिवी द्यामिवोपरि ।
लोककृतः पथिकृतो यजामहे ये देवानां हुतभागा इह स्थ ॥३३॥
ध्रुवायां त्वा दिशि पुरा संवृतः स्वधायामा दधामि बाहुच्युता पृथिवी द्यामिवोपरि ।
लोककृतः पथिकृतो यजामहे ये देवानां हुतभागा इह स्थ ॥३४॥
ऊर्ध्वायां त्वा दिशि पुरा संवृतः स्वधायामा दधामि बाहुच्युता पृथिवी द्यामिवोपरि ।
लोककृतः पथिकृतो यजामहे ये देवानां हुतभागा इह स्थ ॥३५॥
धर्तासि धरुणोऽसि वंसगोऽसि ॥३६॥
उदपूरसि मधुपूरसि वातपूरसि ॥३७॥
इतश्च मामुतश्चावतां यमेइव यतमाने यदैतम् ।
प्र वां भरन् मानुषा देवयन्तो आ सीदतां स्वमु लोकं विदाने ॥३८॥
स्वासस्थे भवतमिन्दवे नो युजे वां ब्रह्म पूवर्य नमोभिः ।
वि श्लोक एति पथ्येव सूरिः श्रृण्वन्तु विश्वे अमृतास एतत् ॥३९॥
त्रीणि पदानि रुपो अन्वरोहच्चचतुष्पदीमन्वैद् व्रतेन ।
अक्षरेण प्रति मिमीते अर्कमृतस्य नाभावभि सं पुनाति ॥४०॥
देवेभ्यः कमवृणीत मृत्यु प्रजायै किममृतं नावृणीत ।
बृहस्पतिर्यामतनुत ऋषिः प्रियां यमस्तन्व१मा रिरेच ॥४१॥
त्वमग्न ईडितो जातवेदोऽवाड्व्यानि सुरभीणि कृत्वा ।
प्रादाः पितृभ्यः स्वधया ते अक्षन्नद्धि त्वं देव प्रयता हवींषि ॥४२॥
आसीनासो अरुणीनामुपस्थे रयिं धत्त दाशुषे मर्त्याय ।
पुत्रेभ्यः पितरस्तस्य वस्वः प्र यच्छत त इहोर्ज दधात ॥४३॥
अग्निष्वात्ताः पितर एह गच्छत सदः सदः सदत सुप्रणीतयः ।
अत्तो हवींषि प्रयतानि बर्हिषि रयिं च नः सर्ववीरं दधात ॥४४॥
उपहूता नः पितरः सोम्यासो बर्हिष्येषु निधिषु प्रियेषु ।
त आ गमन्तु त इह श्रुवन्त्वधि ब्रुवन्तु तेऽवन्त्वस्मान् ॥४५॥
ये नः पितुः पितरो ये पितामहा अनूजिहरे सोमपीथं वसिष्ठाः ।
तेभिर्यमः संरराणोहवींष्युशन्नुशद्भिः प्रतिकाममत्तु ॥४६॥
ये तातृषुर्देवत्रा जेहमाना होत्राविदः स्तोमतष्टासो अर्कैः ।
आग्ने याहि सहस्रं देववन्दैः सत्यैः कविभिऋर्षिभिर्घर्मसद्भिः ॥४७॥
ये सत्यासो हविरदो हविष्पा इन्द्रेणदेवैः सरथं तुरेण ।
आग्ने याहि सुविदत्रेभिरर्वाङ् परैः पूर्वै ऋर्षिभिर्घर्मसद्भिः ॥४८॥
अप सर्प मातरं भूमिमेतामुरुव्यचसं पृथिवीं सुशेवाम् ।
ऊर्णम्रदाः पृथिवी दक्षिणावत एषा त्वा पातु प्रपथे पुरस्तात् ॥४९॥
उच्छ्वंचस्व पृथिवि मा नि बाधथाः सूपायनास्मै भव सूपसर्पणा ।
माता पुत्रं यथा सिचाभ्येनं भूम ऊर्णुहि ॥५०॥
उच्छ्वंचमाना पृथिवी तु तिष्ठतु सहस्रं मित उप हि श्रयन्ताम् ।
ते गृहासो घृतश्चुतः स्योना विश्वाहास्मै शरणाः सन्त्वत्र ॥५१॥
उत्ते स्तभ्नामि पृथिवीं त्वत् परीमं लोगं निदधन्मो अहं रिषम् ।
एतां स्थूणां पितरो धारयन्ति ते तत्र यमः सादना ते कृणोतु ॥५२॥
इममग्ने चमसं मा वि जिह्वरः प्रियो देवानामुत सोम्यानाम् ।

अयं यश्चमसो देवपानस्तस्मिन् देवा अमृता मादयन्ताम् ॥५३॥
अथर्वा पूर्ण चमसं यमिन्द्रायाबिभर्वाजिनीवते ।
तस्मिन् कृणोति सुकृतस्य भक्षं तस्मिन्निन्दुः पवते विश्वदानीम्॥५४॥
यत् ते कृष्णः शकुन आतुतोद पिपीलः सर्प उत वा श्वापदः ।
अग्निष्टद् विश्वादगदं कृणोतु सोमश्च यो ब्राह्मणाँ आविवेश ॥५५॥
पयस्वतीरोषधयः पयस्वन्मामकं पयः ।
अपां पयसो यत् पयस्तेन मा सह शुम्भतु ॥५६॥
इमा नारीरविधवाः सुपत्नीरांजनेन सर्पिषा सं स्पृशन्ताम् ।
अनश्रवो अनमीवाः सुरत्ना आ रोहन्तु जनयो योनिमग्रे ॥५७॥
सं गच्छस्व पितृभिः सं यमेनेष्टापूर्तेन परमे व्योमन् ।
हित्वावद्यं पुनरस्तमेहि सं गच्छतां तन्वासुवर्चाः ॥५८॥
ये नः पितुः पितरो ये पितामहा य आविविशुरुर्व१न्तरिक्षम् ।
तेभ्यः स्वराडसुनीतिर्नो अद्य यथावशं तन्वः कल्पयाति ॥५९॥
शं ते नीहारो भवतु शं ते प्रुष्वाव शीयताम् ।
शीतिके शीतिकावति ह्लादिके ह्लादिकावति ।
मण्डूक्य१प्सु शं भुव इमं स्व१ग्निं शमय ॥६०॥
विवस्वान् नो अभयं कृणोतु यः सुत्रामा जीरदानुः सुदानुः ।
इहेमे वीरा बहवो भवन्तु गोमदश्ववन्मय्यस्तु पुष्टम् ॥६१॥
विवस्वान् नो अमृतत्वे दधातु परैतु मृत्युरमृतं न ऐतु ।
इमान् रक्षतु पुरुषाना जरिम्णो मो ष्वेषामसवो यमं गुः ॥६२॥
यो दध्रे अन्तरिक्षे न मह्ना पितृणां कविः प्रभतिर्मतीनाम् ।
तमर्चत विश्वमित्रा हाविर्भिः स नो यमः प्रतरं जीवसे धात् ॥६३॥
आ रोहत दिवमुत्तमामृषयो मा बिभीतन् ।
सोमपाः सोमपायिन इदं वः क्रियते हविरगन्म ज्योतिरुत्तमम् ॥६४॥
प्र केतुना बृहता भत्यग्निरा रोदसी वृषभो रोरवीति ।
दिवश्चिन्दतादुपमामुदानडपामुपस्थे महिषो ववर्ध ॥६५॥
नाके सुपर्णमुप यत् पतन्तं हृदा वेनन्तो अभ्यचक्षत त्वा ।
हिरण्यपक्षं वरुणस्य दूतं यमस्य योनौ शकुनं भुरण्युम् ॥६६॥
इन्द्र क्रतुं न आ भर पिता पुत्रेभ्यो यथा ।
शिक्षा णो अस्मिन् पुरुहूत यामनि जीवा ज्योतिरशीमहि ॥६७॥
अपूपापिहितान् कुम्भान् यांस्ते देवा अधारयन् ।
ते ते सन्तु स्वधावन्तो मधुमन्तो घृतश्चुतः ॥६८॥
यास्ते धाना अनुकिरामि तिलमिश्राः स्वधावतीः ।
तास्ते सन्तु विभ्वीः प्रभ्वीस्तास्ते यमो राजानु मन्यताम् ॥६९॥
पुनर्देहि वनस्पते य एष निहितस्त्वयि ।
यथा यमस्य सादन आसातै विदथा वदन् ॥७०॥
आ रभस्व जातवेदस्तेजस्वद्धरो अस्तु ते ।
शरीरामस्य सं दहाथैनं धेहि सुकृतामु लोके ॥७१॥
ये ते पूर्वे परागता अपरे पितरश्च ये ।
तेभ्यो घृतस्य कुल्यैतु शतधारा व्युन्दती ॥७२॥
एतदा रोह वय उन्मृजानः स्वा इह बृहदु दीदयन्ते ।
अभि प्रेहि मध्यतो माप हास्थाः पितृणां लोकं प्रथमो यो अत्र ॥७३॥
*iyaṁ nārī patilokaṁ vṛṇānā ni padyata upa tvā martya pretam* /
*dharma purāṇamanupālayantī tasyai prajāṁ draviṇaṁ cheha dhehi* //1//
*udīrṣva nāryabhi jīvalokaṁ gatāsumetamupa śeṣa ehi* /
*hastagrābhasya didhiṣostavedaṁ patyurjanitvamabhi saṁ babhūtha* //2//
*apaśyaṁ yuvatiṁ nīyamānāṁ jīvāṁ mṛtebhyaḥ pariṇīyamānām* /

*andhena yat tamasā prāvṛtāsīt prākto apāchīmanayaṁ tadenām ॥3 ॥*
*prajānatyadhnye jīvalokaṁ devānāṁ panthāmanusaṁcharantī ।*
*ayaṁ te gopatistaṁ juṣasva svarga lokamadhi rohayainam ॥4 ॥*
*upa dyāmupa vetasamavattaro nadīnām । agne pittamapāmasi । ॥5 ॥*
*yaṁ tvamagne samadahastamu nirvāpayā punaḥ ।*
*kyāmbūratra rohatu śāṇḍadūrvā vyalkaśā ॥6 ॥*
*idaṁ ta ekaṁ para ū ta ekaṁ tṛtīyena jyotiṣā saṁ viśasva ।*
*saṁveśane tanvā3 chāruredhi priyo devānāṁ parame sadhasthe ॥7 ॥*
*uttiṣṭha prehi pra dravaukaḥ kṛṇuṣva salile sadhasthe ।*
*tatra tvaṁ pitṛbhiḥ saṁvidānaḥ saṁ somena madasva saṁ svadhābhiḥ ॥8 ॥*
*pra chyavasva tanvaṁ1 saṁ bharasva mā te gātrā vi hāyi mo śarīram ।*
*mano niviṣṭamanusaṁviśasva yatra bhūmerjuṣase tatra gachchha ॥9 ॥*
*varchasā māṁ pitaraḥ somyāso aṁjantu devā madhunā ghṛtena ।*
*chakṣuṣe mā prataraṁ tārayanto jarase mā jaradaṣṭiṁ vardhantu ॥10 ॥*
*varchasā māṁ samanaktvagnirmedhāṁ me viṣṇurnyanaktvāsan ।*
*rayiṁ me viśve ni yachchhantu devāḥ syonā māpaḥ pavanaiḥ punantu ॥11 ॥*
*mitrāvaruṇā pari māmadhātāmādityā mā svaravo vardhayantu ।*
*varcho ma indro nyanaktu hastayorjaradaṣṭiṁ mā savitā kṛṇotu ॥12 ॥*
*yo mamāra prathamo martyānāṁ yaḥ preyāya prathamo lokametam ।*
*vaivasvataṁ saṁgamanaṁ janānāṁ yamaṁ rājānaṁ haviṣā saparyata ॥13 ॥*
*parā yāta pitara ā cha yātāyaṁ vo yāo madhunā samaktaḥ ।*
*datto asmabhyaṁ draviṇeha bhadraṁ rayiṁ cha naḥ sarvavīraṁ dadhāta ॥14 ॥*
*kaṇvaḥ kakṣīvān purumīḍho agastyaḥ śyāvāśvaḥ sobharyarchanānāḥ ।*
*viśvāmitro'yaṁ jamadagniratriravantu naḥ kaśyapo vāmadevaḥ ॥15 ॥*
*viśvāmitra jamadagne vasiṣṭha bharadvāja gotama vāmadeva ।*
*śardirno atriragrabhīnnamobhiḥ susaṁśāsaḥ pitaro mṛḍatā naḥ ॥16 ॥*
*kasye mṛjānā ati yanti ripramāyurdadhānāḥ prataraṁ navīyaḥ ।*
*āpyāyamānāḥ prajayā dhanenādha syāma surabhayo gṛheṣu ॥17 ॥*
*aṁjate vyaṁjate samaṁjate ṛtuṁ rihanti madhunābhyaṁjate ।*
*sindhoruchchhvāse patayantamukṣaṇaṁ hiraṇyapāvāḥ paśumāsu gṛhṇate ॥18 ॥*
*yad vo mudraṁ pitaraḥ somyaṁ cha teno sachadhvaṁ svayaśaso hi bhūta ।*
*te arvāṇaḥ kavaya ā śṛṇota suvidatrā vidathe hūyamānāḥ ॥19 ॥*
*ye atrayo aṁgiraso navagvā iṣṭāvanto rātiṣācho dadhānāḥ ।*
*dakṣiṇāvantaḥ sukṛto ya u sthāsadyāsmin varhiṣi mādayadhvam ॥20 ॥*
*adhā yathā naḥ pitaraḥ parāsaḥ pratnāso agna ṛtamāśaśānāḥ ।*
*śuchīdayan dīdhyata ukthaśāsaḥ kṣāmā bhindanto aruṇīrapa vran ॥21 ॥*
*sukarmāṇaḥ surucho devayanto ayo na devā janimā dhamantaḥ ।*
*śuchanto agniṁ vāvṛdhanta indramurvī gavyāṁ pariṣadaṁ no akran ॥22 ॥*
*ā yūtheva kṣumati paśvo akhyad devānāṁ janimāntyugraḥ ।*
*martāsaśchidurvaśīrakṛpran vṛdhe chidarya uparasyāyoḥ ॥23 ॥*
*akarma te svapaso abhūma ṛtamavasrannuṣaso vibhātīḥ ।*
*viśvaṁ tad bhadraṁ yadavanti devā bṛhad vadema vidathe suvīrāḥ ॥24 ॥*
*indro mā marutvān prāchyā diśaḥ pātu bāhuchyutā pṛthivī dyāmivopari ।*
*lokakṛtaḥ pathikṛto yajāmahe ye devānāṁ hutabhāgā iha stha ॥25 ॥*
*dhātā mā nirṛtyā dakṣiṇāyā diśaḥ pātu bāhuchyutā pṛthivī dyāmivopari ।*
*lokakṛtaḥ pathikṛto yajāmahe ye devānāṁ hutabhāgā iha stha ॥26 ॥*
*aditirmādityai pratīchyā diśaḥ pātu bāhuchyutā pṛthivī dyāmivopari ।*
*lokakṛtaḥ pathikṛto yajāmahe ye devānāṁ hutabhāgā iha stha ॥27 ॥*
*somo mā viśvairdevairudīchyā diśaḥ pātu bāhuchyutā pṛthivī dyāmivopari ।*
*lokakṛtaḥ pathikṛto yajāmahe ye devānāṁ hutabhāgā iha stha ॥28 ॥*

*dhartā ha tvā dharuṇau dhārayātā ūrdhva bhānuṁ savitā dyāāmivopari |*
*lokakṛtaḥ pathikṛto yajāmahe ye devānāṁ hutabhāgā iha stha ||29 ||*
*prāchyāṁ tvā diśi purā saṁvṛtaḥ svadhāyāmā dadhāmi bāhuchyutā pṛthivī dyāmivopari |*
*lokakṛtaḥ pathikṛto yajāmahe ye devānāṁ hutabhāgā iha stha ||30 ||*
*dakṣiṇāyāṁ tvā diśi purā saṁvṛtaḥ svadhāyāmā dadhāmi bāhuchyutā pṛthivī dyāmivopari |*
*lokakṛtaḥ pathikṛto yajāmahe ye devānāṁ hutabhāgā iha stha ||31 ||*
*pratīchyāṁ tvā diśi purā saṁvṛtaḥ svadhāyāmā dadhāmi bāhuchyutāṁ pṛthivī dyāmivopari |*
*lokakṛtaḥ pathikṛto yajamahe ye devānāṁ hutabhāgā iha stha ||32 ||*
*udīchyāṁ tvā diśi purā saṁvṛtaḥ svadhāyāmā dadhāmi bāhuchyutā pṛthivī dyāmivopari |*
*lokakṛtaḥ pathikṛto yajāmahe ye devānāṁ hutabhāgā iha stha ||33 ||*
*dhruvāyāṁ tvā diśi purā saṁvṛtaḥ svadhāyāmā dadhāmi bāhuchyutā pṛthivī dyāmivopari |*
*lokakṛtaḥ pathikṛto yajāmahe ye devānāṁ hutabhāgā iha stha ||34 ||*
*ūrdhvāyāṁ tvā diśi purā saṁvṛtaḥ svadhāyāmā dadhāmi bāhuchyutā pṛthivī dyāmivopari |*
*lokakṛtaḥ pathikṛto yajāmahe ye devānāṁ hutabhāgā iha stha ||35 ||*
*dhartāsi dharuṇo'si vaṁsago'si ||36 ||*
*udapūrasi madhupūrasi vātapūrasi ||37 ||*
*itaścha māmutaśchāvatāṁ yameiva yatamāne yadaitam |*
*pra vāṁ bharan mānuṣā devayanto ā sīdatāṁ svamu lokaṁ vidāne ||38 ||*
*svāsasthe bhavatamindave no yuje vāṁ brahma pūvarya namobhiḥ |*
*vi śloka eti pathyeva sūriḥ śṛṇvantu viśve amṛtāsa etat ||39 ||*
*trīṇi padāni rupo anvarohachchachatuṣpadīmanvaid vratena |*
*akṣareṇa prati mimīte arkamṛtasya nābhāvabhi saṁ punāti ||40 ||*
*devebhyaḥ kamavṛṇīta mṛtyu prajāyai kimamṛtaṁ nāvṛṇīta |*
*bṛhaspatiryāmatanuta ṛṣiḥ priyāṁ yamastanva1mā rirecha ||41 ||*
*tvamagna īḍito jātavedo'vāḍḍhavyāni surabhīṇi kṛtvā |*
*prādāḥ pitṛbhyaḥ svadhayā te akṣannaddhi tvaṁ deva prayatā havīṁṣi ||42 ||*
*āsīnāso aruṇīnāmupasthe rayiṁ dhatta dāśuṣe martyāya |*
*putrebhyaḥ pitarastasya vasvaḥ pra yachchhata ta ihorja dadhāta ||43 ||*
*agniṣvāttāḥ pitara eha gachchhata sadaḥ sadaḥ sadata supraṇītayaḥ |*
*atto havīṁṣi prayatāni barhiṣi rayiṁ cha naḥ sarvavīraṁ dadhāta ||44 ||*
*upahūtā naḥ pitaraḥ somyāso barhiṣyeṣu nidhiṣu priyeṣu |*
*ta ā gamantu ta iha śruvantvadhi bruvantu te'vantvasmān ||45 ||*
*ye naḥ pituḥ pitaro ye pitāmahā anūjihare somapīthaṁ vasiṣṭhāḥ |*
*tebhiryamaḥ saṁrarāṇo havaṁīṣyuśannuśadbhiḥ pratikāmamattu ||46 ||*
*ye tātṛṣurdevatrā jehamānā hotrāvidaḥ stomataṣṭāso arkaiḥ |*
*āgne yāhi sahasraṁ devavandaiḥ satyaiḥ kavibhirṛṣibhirgharmasadbhiḥ ||47 ||*
*ye satyāso havirado haviṣpā indreṇadevaiḥ sarathaṁ tureṇa |*
*āgne yāhi suvidatrebhirarvāṅ paraiḥ pūrvai ṛrṣibhirgharmasadbhiḥ ||48 ||*
*apa sarpa mātaraṁ bhūmimetāmuruvyachasaṁ pṛthivīṁ suśevām |*
*ūrṇamradāḥ pṛthivī dakṣiṇāvata eṣā tvā pātu prapathe purastāt ||49 ||*
*uchchhvaṁchasva pṛthivi mā ni bādhathāḥ sūpāyanāsmai bhava sūpasarpaṇā |*
*mātā putraṁ yathā sichābhyenaṁ bhūma ūrṇuhi ||50 ||*
*uchchhvaṁchamānā pṛthivī tu tiṣṭhatu sahasraṁ mita upa hi śrayantām |*
*te gṛhāso ghṛtaśchutaḥ syonā viśvāhāsmai śaraṇāḥ santvatra ||51 ||*

*utte stabhnāmi pṛthivīṁ tvat parīmaṁ logaṁ nidadhanmo ahaṁ riṣam* ।
*etāṁ sthūṇāṁ pitaro dhārayanti te tatra yamaḥ sādanā te kṛṇotu* ॥52॥
*imamagne chamasaṁ mā vi jihnaraḥ priyo devānāmuta somyānām* ।
*ayaṁ yaśchamaso devapānastasmin devā amṛtā mādayantām* ॥53॥
*atharvā pūrṇa chamasaṁ yamindrāyābibharvājinīvate* ।
*tasmin kṛṇoti sṛkṛtasya bhakṣaṁ tasminninduḥ pavate viśvadānīm* ॥54॥
*yat te kṛṣṇaḥ śakuna ātutoda pipīlaḥ sarpa uta vā śvāpadaḥ* ।
*agniṣṭad viśvādagadaṁ kṛṇotu somaścha yo brāhmaṇām̐ āviveśa* ॥55॥
*payasvatīroṣadhayaḥ payasvanmāmakaṁ payaḥ* ।
*apāṁ payaso yat payastena mā saha śumbhatu* ॥56॥
*imā nārīravidhavāḥ supatnīrāṁjanena sarpiṣā saṁ spṛśantām* ।
*anaśravo anamīvāḥ suratnā ā rohantu janayo yonimagre* ॥57॥
*saṁ gachchhasva pitṛbhiḥ saṁ yameneṣṭāpūrtena parame vyoman* ।
*hitvāvadyaṁ punarastamehi saṁ gachchhatāṁ tanvāsuvarchāḥ* ॥58॥
*ye naḥ pituḥ pitaro ye pitāmahā ya āviviśururva1ntarikṣam* ।
*tebhyaḥ svarāḍasunītirno adya yathāvaśaṁ tanvaḥ kalpayāti* ॥59॥
*śaṁ te nīhāro bhavatu śaṁ te pruṣvāva śīyatām* ।
*śītike śītikāvati hlādike hlādikāvati* ।
*maṇḍūkya1psu śaṁ bhuva imaṁ sva1giṁna śamaya* ॥60॥
*vivasvān no abhayaṁ kṛṇotu yaḥ sutrāmā jīradānuḥ sudānuḥ* ।
*iheme vīrā bahavo bhavantu gomadaśvavanmayyastu puṣṭam* ॥61॥
*vivasvān no amṛtatve dadhātu paraitu mṛtyuramṛtaṁ na aitu* ।
*imān rakṣatu puruṣānā jarimṇo mo ṣveṣāmasavo yamaṁ guḥ* ॥62॥
*yo dadhre antarikṣe na mahnā pitṝṇāṁ kaviḥ prabhatirmatīnām* ।
*tamarchata viśvamitrā hāvirbhiḥ sa no yamaḥ prataraṁ jīvase dhāt* ॥63॥
*ā rohata divamuttamāmṛṣayo mā bibhītan* ।
*somapāḥ somapāyina idaṁ vaḥ kriyate haviraganma jyotiruktam* ॥64॥
*pra ketunā bṛhatā bhatyagnirā rodasī vṛṣabho roravīti* ।
*divaśchindatādupamāmudānaḍapāmupasthe mahiṣo vavardha* ॥65॥
*nāke suparṇamupa yat patantaṁ hṛdā venanto abhyachakṣata tvā* ।
*hiraṇyapakṣaṁ varuṇasya dūtaṁ yamasya yonau śakunaṁ bhuraṇyum* ॥66॥
*indra kratuṁ na ā bhara pitā putrebhyo yathā* ।
*śikṣā ṇo asmin puruhūta yāmani jīvā jyotiraśīmahi* ॥67॥
*apūpāpihitān kumbhān yāṁste devā adhārayan* ।
*te te santu svadhāvanto madhumanto ghṛtaśchutaḥ* ॥68॥
*yāste dhānā anukirāmi tilamiśrāḥ svadhāvatīḥ* ।
*tāste santu vibhvīḥ prabhvīstāste yamo rājānu manyatām* ॥69॥
*punardehi vanaspate ya eṣa nihitastvayi* ।
*yathā yamasya sādana āsātai vidathā vadan* ॥70॥
*ā rabhasva jātavedastejasvaddharo astu te* ।
*śarīrāmasya saṁ dahāthainaṁ dhehi sukṛtāmu loke* ॥71॥
*ye te pūrve parāgatā apare pitaraścha ye* ।
*tebhyo ghṛtasya kulyaitu śatadhārā vyundatī* ॥72॥
*etadā roha vaya unmṛjānaḥ svā iha bṛhadu dīdayante* ।
*abhi prehi madhyato māpa hāsthāḥ pitṝṇāṁ lokaṁ prathamo yo atra* ॥73॥

अ. (Av.) १८.४.१-८०

आ रोहत जनित्रीं जातवेदसः पितृयाणैः सं व आ रोहयामि ।
अवाड्ढव्येषितो हव्यवाह ईजानं युक्ताः सुकृतां धत्त लोके ॥१॥
देवा यामृतवः कल्पयन्ति हविः पुरोडाशं स्रुचो यायुधानि ।

तेभिर्याहि पथिभिर्देवयानैर्यैरीजानाः स्वर्ग यन्ति लोकम् ॥२॥
ऋतस्य पन्थामनु पश्य साध्वंगिरसः सुकृतो येन यन्ति ।
तेभिर्याहि पथिभिः स्वर्ग यत्रादित्या मधु भक्षयन्ति तृतीये नाके अधि वि श्रयस्व ॥३॥
त्रयः सुपर्ण उपरस्य मायू नाकस्य पृष्ठे अधि विष्टपि श्रिताः ।
स्वर्गा लोका अमृतेन विष्ठा इषमूर्ज यजमानाय दुह्राम् ॥४॥
जुहूर्दाधार द्यामुपभृदन्तरिक्षं ध्रुवा दाधार पृथिवीं प्रतिष्ठाम् ।
प्रतीमां लोका घृतपृष्ठाः स्वर्गाः कामंकामं यजमानाय दुह्राम् ॥५॥
ध्रुव आ रोह पृथिवीं विश्वभोजसमन्तरिक्षमुपभृदा क्रमस्व ।
जुहु द्यां गच्छ यजमानेन साकं स्रुवेण वत्सेन दिशः प्रपीनाः सर्वा धुक्ष्वाहृणीयमानः ॥६॥
तीर्थैस्तरन्ति प्रवतो महीरिति याकृतः सुकृतो येन यन्ति ।
अत्रादधुर्यजमानाय लोकं दिशो भूतानि यदकल्पयन्त ॥७॥
अंगिरसामयनं पूर्वो अग्निरादित्यानामयनं गार्हपत्यो दक्षिणानामयनं दक्षिणाग्निः ।
माहिमानमग्नेर्विहितस्य ब्रह्मणा समंगः सर्व उप याहि शग्मः ॥८॥
पूर्वो अग्निष्ट्वा तपतु शं पुरस्ताच्छं पश्चात् तपतु गार्हपत्यः ।
दक्षिणाग्निष्टे तपतु शर्म वर्मोत्तरतो मध्यतो अन्तरिक्षाद् दिशोदिशो अग्ने परि पाहि घोरात्।९।
यूयमग्ने शंतमाभिस्तनूभिरीजानमभि लोकं स्वर्गम् ।
अश्वा भूत्वा पृष्टिवाहो वहाथ यत्र देवैः सधमादं मदन्ति ॥१०॥
शमग्ने पश्चात तप शं पुरस्ताच्छमुत्तराच्छमधरात् तपैनम् ।
एकस्त्रेधा विहितो जातवेदः सम्यगेनं धेहि सुकृतामु लोके ॥११॥
शमग्नयः समिद्धा आ रभन्तां प्राजापत्यं मेध्यं जातवेदसः ।
श्रृतं कृण्वन्त इह माव चिक्षिपन् ॥१२॥
या एति विततः कल्पमान ईजानमभि लोकं स्वर्गम् ।
तमग्नयः सर्वहुतं जुषन्तां प्राजापत्यं मेध्यं जातवेदसः। श्रृतं कृण्वन्त इह माव चिक्षिपन्॥१३॥
ईजानश्चितमारुक्षदग्निं नाकस्य पृष्ठाद् दिवमुत्पतिष्यन् ।
तस्मै प्र भाति नभसो ज्योतिषीमान्त्स्वर्गः पन्थाः सुकृते देवयानः ॥१४॥
अग्निर्होताध्वर्युष्टे बृहस्पतिरिन्द्रो ब्रह्मा दक्षिणतस्ते अस्तु ।
हुतोऽयं संस्थितो या एति यत्र पूर्वमयनं हुतानाम् ॥१५॥
अपूपवान् क्षीरवांश्चरुरेह सीदतु।
लोककृतः पथिकृतो यजामहे ये देवानां हुतभागा इहस्थ॥१६॥
अपूपवान् दधिवांश्चरुरेह सीदतु।
लोककृत पथिकृतो यजामहे ये देवानां हुतभागा इह स्थ ॥१७॥
अपूपवान् द्रप्सवांश्चरुरेह सीदतु।
लोककृतः पथिकृतो यजामहे ये देवानां हुतभागा इह स्थ॥१८॥
अपूपवान् घृतवांश्चरुरेह सीदतु।
लोककृतः पथिकृतो यजामहे ये देवानां हुतभागा इह स्थ॥१९॥
अपूपवान् मांसवांश्चरुरेह सीदतु। लोककृतः पथिकृतो यजामहे ये देवानां हुतभागा इह स्थ ॥२०॥
अपूपवानन्नवांश्चरुरेह सीदतू। लोककृतः पथिकृतो यजामहे ये देवानां हुतभागा इह स्थ॥२१॥
अपूपवान् मधुमांश्चरुरेह सीदतु।
लोककृतः पथिकृतो यजामहे ये देवानां हुतभागा इह स्थ॥२२॥
अपूपवान् रसवांश्चरुरेह सीदतु।
लोककृतः पथिकृतो यजामहे ये देवानां हुतभागा इह स्थ ॥२३॥
अपूपवानपवांश्चरुरेह सीदतु।
लोककृतः पथिकृतो यजामहे ये देवानां हुतभागा इह स्थ ॥२४॥
अपूपापिहितान् कुम्भान् यांस्ते देवा अधारयन्।
ते ते सन्तु स्वधावन्तो मधुमन्तो घृतश्चुतः ॥२५॥
यास्ते धाना अनुकिरामि तिलमिश्राः स्वधावतीः ।

तास्ते सन्तूद्धीः प्रभ्वीस्तास्ते यमो राजानु मन्यताम् ॥२६॥
अक्षितिं भूयसीम् ॥२७॥
द्रप्सश्चस्कन्द पृथिवीमनु द्यामिमं च योनिमनु यश्च पूर्वः ।
समानं योनिमनु संचरन्तं द्रप्सं जुहोम्यनु सप्त होत्राः ॥२८॥
शतधारं वायुमर्कं स्वर्विदं नृचक्षसस्ते अभि चक्षते रयिम् ।
ये पृणन्ति प्र च यच्छन्ति सर्वदा ते दुह्रते दक्षिणां सप्तमातरम् ॥२९॥
कोशं दुहन्ति कलशं चतुर्बिलमिडां धेनुं मधुमतीं स्वस्तये ।
ऊर्जं मदन्तीमदितिं जनेष्वग्ने मा हिंसीः परमे व्योमन् ॥३०॥
एतत् ते देवः सविता वासो ददाति भर्तवे। तत्त्वं यमस्य राज्ये वसानस्तार्प्यंचर ॥३१॥
धाना धेनुरभवद् वत्सो अस्यास्तिलोऽभवत्। तां वै यमस्य राज्ये अक्षितामुप जीवति ॥३२॥
एतास्ते असौ धेनवः कामदुघा भवन्तु ।
एनीः श्येनीः सरूपा विरूपास्तिलवत्सा उप तिष्ठन्तु त्वात्र ॥३३॥
एनीर्धाना हरिणीः श्येनीरस्य कृष्णा धाना रोहिणीर्धेनवस्ते ।
तिलवत्सा ऊर्जमस्मै दुहाना विश्वाहा सन्त्वनपस्फुरन्तीः ॥३४॥
वैश्वानरे हविरिदं जुहोमि साहस्रं शतधारमुत्सम् ।
स सबिभर्ति पितरं पितामहान् प्रपितामहान् बिभर्ति पिन्वमानः ॥३५॥
सहस्रधारं शतधारमुत्समक्षितं व्यच्यमानं सलिलस्य पृष्ठे ।
ऊर्जं दुहानमनपस्फुरन्तमुपासते पितरः स्वधाभिः ॥३६॥
इदं कसाम्बु चयनेन चितं तत् सजाता अव पश्यतेत ।
मर्त्योऽयममृतत्वमेति तस्मै गृहान् कृणुत यावत्सबन्धु ॥३७॥
इहैवैधि धनसनिरिहचित्त इहक्रतुः। इहैधि वीर्यवत्तरो वयोधा अपराहतः ॥३८॥
पुत्रं पौत्रमभितर्पयन्तीरापो मधुमतीरिमाः ।
स्वधां पितृभ्यो अमृतं दुहाना आपो देवीरुभयांस्तर्पयन्तु ॥३९॥
आपो अग्निं प्र हिणुत पितॄँरुपेमं यां पितरो मे जुषन्ताम् ।
आसीनामूर्जमुप ये सचन्ते ते नो रयिं सर्ववीरं नि यच्छान् ॥४०॥
समिन्धते अमर्त्यं हव्यवाहं घृतप्रियम्। स वेद निहितान् निधीन् पितॄन् परावतो गतान् ॥४१॥
यं ते मन्थं यमोदनं यन्मांसं निपृणामि ते। ते ते सन्तु स्वधावन्तो मधुमन्तो घृतश्चुतः ॥४२॥
यास्ते धाना अनुकिरामि तिलमिश्राः स्वधावतीः ।
तास्ते सन्तूद्धीः प्रभ्वीस्तास्ते यमो राजानु मन्यताम् ॥४३॥
इदं पूर्वमपरं नियानं येना ते पूर्वे पितरः परेताः ।
पुरोगवा ये अभिशाची अस्य ते त्वा वहन्ति सुकृतामु लोकम् ॥४४॥
सरस्वतीं देवयन्तो हवन्ते सरस्वतीमध्वरे तायमाने ।
सरस्वतीं सुकृतो हवन्ते सरस्वती दाशुषे वार्यं दात् ॥४५॥
सरस्वतीं पितरो हवन्ते दक्षिणा यामभिनक्षमाणाः ।
आसद्यास्मिन् बर्हिषि मादयध्वमनमीवा इष आ धेह्यस्मे ॥४६॥
सरस्वति या सरथं ययाथोक्थैः स्वधाभिर्देवि पितृभिर्मदन्ती ।
सहस्रार्घमिडो अत्र भागं रायस्पोषं यजमानाय धेहि ॥४७॥
पृथिवीं त्वा पृथिव्यामा वेशयामि देवो नो धाता प्र तिरात्यायुः ।
परापरैता वसुविद् वो अस्त्वधा मृताः पितुषु सं भवन्तु ॥४८॥
आ प्र च्यवेथामप तन्मृजेथां यद् वामभिभा अत्रोचुः ।
अस्मादेतमघ्न्यौ तद् वशीयो दातुः पितृष्विहभोजनौ मम ॥४९॥
एयमगन् दक्षिणा भद्रतो नो अनेन दत्ता सुदुघा वयोधाः ।
यौवने जीवानुपपृंचती जरा पितृभ्य उपसंपराणयादिमान् ॥५०॥
इदं पितृभ्यः प्र भरामि बर्हिर्जीवं देवेभ्य उत्तरं स्तृणामि ।
तदा रोह पुरुष मेध्यो भवन् प्रति त्वा जानन्तु पितरः परेतम् ॥५१॥
एदं बर्हिरसदो मेध्योऽभूः प्रति त्वा जानन्तु पितरः परेतम् ।

यथापरु तन्वं१ सं भरस्व गात्राणि ते ब्रह्मणा कल्पयामि ॥५२॥
पर्णो राजापिधानं चरूणामूर्जो बलं सह ओजो न आगन् ।
आयुर्जीवेभ्यो विदधद् दीर्घायुत्वाय शतशारदाय ॥५३॥
ऊर्जो भागो य इमं जजानाश्मान्नानामाधिपत्यं जगाम ।
तमर्चत विश्वामित्रा हविर्भिः स नो यमः प्रतरं जीवसे धात् ॥५४॥
यथा यमाय हर्म्यमवपन् पंच मानवाः। एवा वपामि हर्म्यं यथा मे भूरयोऽसत ॥५५॥
इदं हिरण्यं बिभृहि यत्ते पिताबिभः पुरा। स्वर्गं यतः पितुर्हस्तं निर्मृड्ढि दक्षिणम् ॥५६॥
ये च जीवा ये च मृता ये जाता ये च यियाः ।
तेभ्यो घृतस्य कुल्यैतु मधुधारा व्युन्दती ॥५७॥
वृषा मतीनां पवते विचक्षणः सूरो अह्नां प्रतरीतोषसां दिवः ।
प्राणः सिन्धूनां कलशाँ अचिक्रददिन्द्रस्य हार्दिमाविशन्मनीषया ॥५८॥
त्वेषस्ते धूम ऊर्णोतु दिवि षंछुक्र आततः। सूरो न हि द्युता त्वं कृपा पावक रोचसे ॥५९॥
प्र वा एतीन्दुरिन्द्रस्य निष्कृतिं सखा सख्युर्न प्र मिनाति संगिरः ।
मर्य इस योषाः समर्षसे सोमः कलशे शतयामना पथा ॥६०॥
अक्षन्नमीमदन्त ह्यव प्रियाँ अधूषत। अस्तोषत स्वभानवो विप्रा यविष्ठा ईमहे ॥६१॥
आ यात पितरः सोम्यासो गम्भीरै पथिभिः पितृयाणैः ।
आयुरस्मभ्यं दधतः प्रजां च रायश्च पौषैरभि नः सचध्वम् ॥६२॥
परा यात पितरः सोम्यासो गम्भीरैः पथिभिः पूर्याणैः ।
अधा मासि पुनरा यात नो गृहान् हविरत्तुं सुप्रजसः सुवीराः ॥६३॥
यद् वो अग्निरजहादेकमंगं पितृलोकं गमयंजातवेदाः ।
तद् व एतत् पुनरा प्याययामि सांगाः स्वर्गे पितरो मादयध्वम् ॥६४॥
अभूद् दूतः प्रहितो जातवेदाः सायं न्यह्न उपवन्द्यो नृभिः ।
प्रादाः पितृभ्यः स्वधया ते अक्षन्नद्धि त्वं देव प्रयता हवींषि ॥६५॥
असौ हा इह ते मनः ककुत्सलमिव जामयः। अभ्येनं भूम ऊर्णुहि ॥६६॥
शुम्भन्तां लोकाः पितृषदनाः पितृषदने त्वा लोक आ सादयामि ॥६७॥
येऽस्माकं पितरस्तेषां बर्हिरसि ॥६८॥
उदुत्तमं वरुण पाशमस्मदवाधमं वि मध्यमं श्रथाय ।
अधा वयमादित्य व्रते तवानागसो अदितये स्याम ॥६९॥
प्रास्मत् पाशान् वरुण मुंच सर्वान् यैः समामे बध्यते यैर्व्यामे ।
अधा जीवेम शरदं शतानि त्वया राजन् गुपिता रक्षमाणाः ॥७०॥
अग्नये कव्यवाहनाय स्वधा नमः ॥७१॥
सोमाय पितृमते स्वधा नमः ॥७२॥
पितृभ्यः सोमवद्भ्यः स्वधा नमः ॥७३॥
यमाय पितृमते स्वधा नमः ॥७४॥
एतत् ते प्रततामह स्वधा ये च त्वामनु ॥७५॥
एतत् ततामह स्वधा ये च त्वामनु ॥७६॥
एतत् ते तत स्वधा ॥७७॥
स्वधा पितृभ्यः पृथिविषद्भ्य ॥७८॥
स्वधा पितृभ्यो अन्तरिक्षसद्भ्यः ॥७९॥
स्वधा पितृभ्यो दिविषद्भ्यः ॥८०॥

*ā rohata janitrīṁ jātavedasaḥ pitṛyāṇaiḥ saṁ va ā rohayāmi /*
*avāḍḍhavyeṣito havyavāha ījānaṁ yuktāḥ sukṛtāṁ dhattaṁ loke //1 //*
*devā yāmṛtavaḥ kalpayanti haviḥ puroḍāśaṁ srucho yāāyudhāni /*
*tebhiryāhi pathibhirdevayānairyairījānāḥ svarga yanti lokam //2 //*
*ṛtasya panthāmanu paśya sādhvaṅgirasaḥ sukṛto yena yanti /*
*tebhiryāhi pathibhiḥ svarga yatrādityā madhu bhakṣayanti tṛtīye nāke adhi vi śrayasva //3 //*

*trayaḥ suparṇa uparasya māyū nākasya pṛṣṭhe adhi viṣṭapi śritāḥ ।*
*svargā lokā amṛtena viṣṭhā iṣamūrja yajamānāya duhrām ॥4 ॥*
*juhūrdādhāra dyāmupabhṛdantarikṣaṁ dhruvā dādhāra pṛthivīṁ pratiṣṭhām ।*
*pratīmāṁ lokā ghṛtapṛṣṭhāḥ svargāḥ kāmaṁkāmaṁ yajamānāya duhrām ॥5 ॥*
*dhruva ā roha pṛthivīṁ viśvabhojasamantarikṣamupabhṛdā kramasva ।*
*juhu dyāṁ gachchha yajamānena sākaṁ sruveṇa vatsena diśaḥ prapīnāḥ sarvā dhukṣavāhṛṇīyamānaḥ ॥6 ॥*
*tīrthaistaranti pravato mahīriti yākṛtaḥ sukṛto yena yanti ।*
*atrādadhuryajamānāya lokaṁ diśo bhūtāni yadakalpayanta ॥7 ॥*
*aṁgirasāmayanaṁ pūrvo agnirādityānāmayanaṁ gārhapatyo dakṣiṇānāmayanaṁ dakṣiṇāgniḥ ।*
*māhimānamagnervihitasya brahmaṇā samaṁgaḥ sarva upa yāhi śagmaḥ ॥8 ॥*
*pūrvo agniṣṭvā tapatu śaṁ purastāchchhaṁ paśchāt tapatu gārhapatyaḥ ।*
*dakṣiṇāgniṣṭe tapatu śarma varmottarato madhyato antarikṣād diśodiśo agne pari pāhi ghorāt ।9 ।*
*yūyamagne śaṁtamābhistanūbhirījānamabhi lokaṁ svargam ।*
*aśvā bhūtvā pṛṣṭivāho vahātha yatra devaiḥ sadhamādaṁ madanti ॥10 ॥*
*śamagne paśchāta tapa śaṁ purastāchchhamuttarāchchhamadharāt tapainam ।*
*ekastredhā vihito jātavedaḥ samyagenaṁ dhehi sukṛtāmu loke ॥11 ॥*
*śamagnayaḥ samiddhā ā rabhantāṁ prājāpatyaṁ medhyaṁ jātavedasaḥ ।*
*śṛtaṁ kṛṇvanta iha māva chikṣipan ॥12 ॥*
*yā eti vitataḥ kalpamāna ījānamabhi lokaṁ svargam ।*
*tamagnayaḥ sarvahutaṁ juṣantāṁ prājāpatyaṁ medhyaṁ jātavedasaḥ । śṛtaṁ kṛṇvanta iha māva chikṣipan ॥13 ॥*
*ījānaśchitamārukṣadagiṁna nākasya pṛṣṭhād divamutpatiṣyan ।*
*tasmai pra bhāti nabhaso jyotiṣīmāntsvargaḥ panthāḥ sukṛte devayānaḥ ॥14 ॥*
*agnirhotādhvaryuṣṭe bṛhaspatirindro brahmā dakṣiṇataste astu ।*
*huto'yaṁ saṁsthito yā eti yatra pūrvamayanaṁ hutānām ॥15 ॥*
*apūpavān kṣīravāṁścharureha sīdatu ।*
*lokakṛtaḥ pathikṛto yajāmahe ye devānāṁ hutabhāgā ihastha ॥16 ॥*
*apūpavān dadhivāṁścharureha sīdatu ।*
*lokakṛta pathikṛto yajāmahe ye devānāṁ hutabhāgā iha stha ॥17 ॥*
*apūpavān drapsavāṁścharureha sīdatu ।*
*lokakṛtaḥ pathikṛto yajāmahe ye devānāṁ hutabhāgā iha stha ॥18 ॥*
*apūpavān ghṛtavāṁścharureha sīdatu ।*
*lokakṛtaḥ pathikṛto yajāmahe ye devānāṁ hutabhāgā iha stha ॥19 ॥*
*apūpavān māṁsavāṁścharureha sīdatu । lokakṛtaḥ pathikṛto yajāmahe ye devānāṁ hutabhāgā iha stha ॥20 ॥*
*apūpavānannavāṁścharureha sīdatū । lokakṛtaḥ pathikṛto yajāmahe ye devānāṁ hutabhāgā iha stha ॥21 ॥*
*apūpavān madhumāṁścharureha sīdatu ।*
*lokakṛtaḥ pathikṛto yajāmahe ye devānāṁ hutabhāgā iha stha ॥22 ॥*
*apūpavān rasavāṁścharureha sīdatu ।*
*lokakṛtaḥ pathikṛto yajāmahe ye devānāṁ hutabhāgā iha stha ॥23 ॥*
*apūpavānapavāṁścharureha sīdatu ।*
*lokakṛtaḥ pathikṛto yajāmahe ye devānāṁ hutabhāgā iha stha ॥24 ॥*
*apūpāpihitān kumbhān yāṁste devā adhārayan ।*
*te te santu svadhāvanto madhumanto ghṛtaśchutaḥ ॥25 ॥*
*yāste dhānā anukirāmi tilamiśrāḥ svadhāvatīḥ ।*
*tāste santūdbhvīḥ prabhvīstāste yamo rājānu manyatām ॥26 ॥*

*akṣitiṁ bhūyasīm //27 //*
*drapsaśchaskanda pṛthivīmanu dyāmimaṁ cha yonimanu yaścha pūrvaḥ /*
*samānaṁ yonimanu saṁcharantaṁ drapsaṁ juhomyanu sapta hotrāḥ //28 //*
*śatadhāraṁ vāyumarka svarvidaṁ nṛchakṣasaste abhi chakṣate rayim /*
*ye pṛṇanti pra cha yachchhanti sarvadā te duhrate dakṣiṇāṁ saptamātaram //29 //*
*kośaṁ duhanti kalaśaṁ chaturbilamiḍāṁ dhenuṁ madhumatīṁ svastaye /*
*ūrja madantīmaditi janeṣvagne mā hiṁsīḥ parame vyoman //30 //*
*etat te devaḥ savitā vāso dadāti bhartave / tattvaṁ yamasya rājye vasānastārpyachara //31 //*
*dhānā dhenurabhavad vatso asyāstilo'bhavat / tāṁ vai yamasya rājye akṣitāmupa jīvati //32 //*
*etāste asau dhenavaḥ kāmadughā bhavantu /*
*enīḥ śyenīḥ sarūpā virūpāstilavatsā upa tiṣṭhantu tvātra //33 //*
*enīrdhānā hariṇīḥ śyenīrasya kṛṣṇā dhānā rohiṇīrdhenavaste /*
*tilavatsā ūrjamasmai duhānā viśvāhā santvanapasphurantīḥ //34 //*
*vaiśvānare haviridaṁ juhomi sāhasraṁ śatadhāramutsam /*
*sa sabibharti pitaraṁ pitāmahān prapitāmahān bibharti pinvamānaḥ //35 //*
*sahasradhāraṁ śatadhāramutsamakṣitaṁ vyachyamānaṁ salilasya pṛṣṭhe /*
*ūrja duhānamanapasphurantamupāsate pitaraḥ svadhābhiḥ //36 //*
*idaṁ kasāmbu chayanena chitaṁ tat sajātā ava paśyateta /*
*martyo'yamamṛtatvameti tasmai gṛhān kṛṇuta yāvatsabandhu //37 //*
*ihaivaidhi dhanasanirihachinta ihakratuḥ / ihaidhi vīryavattaro vayodhā aparāhataḥ //38 //*
*putraṁ pautramabhitarpayantīrāpo madhumatīrimāḥ /*
*svadhāṁ pitṛbhyo amṛtaṁ duhānā āpo devīrubhayāṁstarpayantu //39 //*
*āpo agiṁna pra hiṇuta pitṝṁrupemaṁ yāṁ pitaro me juṣantām /*
*āsīnāmūrjamupa ye sachante te noā rayiṁ sarvavīraṁ ni yachchhān //40 //*
*samindhate amartya havyavāhaṁ ghṛtapriyam / sa veda nihitān nidhīn pitṝn parāvato gatān //41 //*
*yaṁ te manthaṁ yamodanaṁ yanmāṁsaṁ nipṛṇāmi te / te te santu svadhāvanto madhumanto ghṛtaśchutaḥ //42 //*
*yāste dhānā anukirāmi tilamiśrāḥ svadhāvatīḥ /*
*tāste santūdbhvīḥ prabhvīstāste yamo rājānu manyatām //43 //*
*idaṁ pūrvamaparaṁ niyānaṁ yenā te pūrve pitaraḥ paretāḥ /*
*purogavā ye abhiśāchī asya te tvā vahanti sukṛtāmu lokam //44 //*
*sarasvatīṁ devayanto havante sarasvatīmadhvare tāyamāne /*
*sarasvatīṁ sukṛto havante sarasvatī dāśuṣe vārya dāt //45 //*
*sarasvatīṁ pitaro havante dakṣiṇā yāmabhinakṣamāṇāḥ /*
*āsadyāsmin barhiṣi mādayadhvamanamīvā iṣa ā dhehyasme //46 //*
*sarasvati yā sarathaṁ yayāthokthaiḥ svadhābhirdevi pitṛbhirmadantī /*
*sahasrārghamiḍo atra bhāgaṁ rāyaspoṣaṁ yajamānāya dhehi //47 //*
*pṛthivīṁ tvā pṛthivyāmā veśayāmi devo no dhātā pra tirātyāyuḥ /*
*parāparaitā vasuvid vo astvadhā mṛtāḥ pituṣu saṁ bhavantu //48 //*
*ā pra chyavethāmapa tanmṛjethāṁ yad vāmabhibhā atrochuḥ /*
*asmādetamaghnyau tad vaśīyo dātuḥ pitṛṣvihabhojanau mama //49 //*
*eyamagan dakṣiṇā bhadrato no anena dattā sudughā vayodhāḥ /*
*yauvane jīvānupapṛṁchatī jarā pitṛbhya upasaṁparāṇayādimān //50 //*
*idaṁ pitṛbhyaḥ pra bharāmi barhirjīvaṁ devebhya uttaraṁ stṛṇāmi /*
*tadā roha puruṣa medhyo bhavan prati tvā jānantu pitaraḥ paretam //51 //*
*edaṁ barhirasado medhyo'bhūḥ prati tvā jānantu pitaraḥ paretam /*

*yathāparu tanvaṁ1 saṁ bharasva gātrāṇi te brahmaṇā kalpayāmi ॥52 ॥*
*parṇo rājāpidhānaṁ charūṇāmūrjo balaṁ saha Ojo na āgan ।*
*āyurjīvebhyo vidadhad dīrghāyutvāya śataśāradāya ॥53 ॥*
*ūrjo bhāgo ya imaṁ jajānāśmānnānāmādhipatyaṁ jagāma ।*
*tamarchata viśvāmitrā havirbhiḥ sa no yamaḥ prataraṁ jīvase dhāt ॥54 ॥*
*yathā yamāya harmyamavapan paṁcha mānavāḥ । evā vapāmi harmya yathā me bhūrayo'sata ॥55 ॥*
*idaṁ hiraṇyaṁ bibhṛhi yatte pitābibhaḥ purā । svarga yataḥ piturhastaṁ nirmṛḍḍhi dakṣiṇam ॥56 ॥*
*ye cha jīvā ye cha mṛtā ye jātā ye cha yiāyāḥ ।*
*tebhyo ghṛtasya kulyaitu madhudhārā vyundatī ॥57 ॥*
*vṛṣā matīnāṁ pavate vichakṣaṇaḥ sūro ahnāṁ pratarītoṣasāṁ divaḥ ।*
*prāṇaḥ sindhūnāṁ kalaśāṁ̐ achikradadindrasya hārdimāviśanmanīṣayā ॥58 ॥*
*tveṣaste dhūma ūrṇotu divi ṣaṁchhukra ātataḥ । sūro na hi dyutā tvaṁ kṛpā pāvaka rochase ॥59 ॥*
*pra vā etīndurindrasya niṣkṛtiṁ sakhā sakhyurna pra mināti saṁgiraḥ ।*
*marya isa yoṣāḥ samarṣase somaḥ kalaśe śatayāmanā pathā ॥60 ॥*
*akṣannamīmadanta hyava priyāṁ̐ adhūṣata । astoṣata svabhānavo viprā yaviṣṭhā īmahe ॥61 ॥*
*ā yāta pitaraḥ somyāso gambhīrai pathibhiḥ pitṛyāṇaiḥ ।*
*āyurasmabhyaṁ dadhataḥ prajāṁ cha rāyaścha pauṣairabhi naḥ sachadhvam ॥62 ॥*
*parā yāta pitaraḥ somyāso gambhīraiḥ pathibhiḥ pūryāṇaiḥ ।*
*adhā māsi punarā yāta no gṛhān havirattuṁ suprajasaḥ suvīrāḥ ॥63 ॥*
*yad vo agnirajahādekamaṁgaṁ pitṛlokaṁ gamayaṁjātavedāḥ ।*
*tad va etat punarā pyāyayāmi sāṁgāḥ svarge pitaro mādayadhvam ॥64 ॥*
*abhūd dūtaḥ prahito jātavedāḥ sāyaṁ nyahna upavandyo nṛbhiḥ ।*
*prādāḥ pitṛbhyaḥ svadhayā te akṣanniddhi tvaṁ deva prayatā havīṁṣi ॥65 ॥*
*asau hā iha te manaḥ kakutsalamiva jāmayaḥ । abhyenaṁ bhūma ūrṇuhi ॥66 ॥*
*śumbhantāṁ lokāḥ pitṛṣadanāḥ pitṛṣadane tvā loka ā sādayāmi ॥67 ॥*
*ye3smākaṁ pitarasteṣāṁ barhirasi ॥68 ॥*
*uduttamaṁ varuṇa pāśamasmadavādhamaṁ vi madhyamaṁ śrathāya ।*
*adhā vayamāditya vrate tavānāgaso aditaye syāma ॥69 ॥*
*prāsmat pāśān varuṇa muṁcha sarvān yaiḥ samāme badhyate yairvyāme ।*
*adhā jīvema śaradaṁ śatāni tvayā rājan gupitā rakṣamāṇāḥ ॥70 ॥*
*agnaye kavyavāhanāya svadhā namaḥ ॥71 ॥*
*somāya pitṛmate svadhā namaḥ ॥72 ॥*
*pitṛbhyaḥ somavadbhyaḥ svadhā namaḥ ॥73 ॥*
*yamāya pitṛmate svadhā namaḥ ॥74 ॥*
*etat te pratatāmaha svadhā ye cha tvāmanu ॥75 ॥*
*etat tatāmaha svadhā ye cha tvāmanu ॥76 ॥*
*etat te tata svadhā ॥77 ॥*
*svadhā pitṛbhyaḥ pṛthiviṣadbhya ॥78 ॥*
*svadhā pitṛbhyo antarikṣasadbhyaḥ ॥79 ॥*
*svadhā pitṛbhyo diviṣadbhyaḥ ॥80 ॥*

९०. यक्ष्मनाशनम् (Yakṣamanāśanam) - अ. (Av.) ७.९१.१

इन्द्रः सुत्रामा स्ववाँ अवोभिः सुमृडीको भवतु विश्ववेदाः ।
बाधतां द्वेषो अभयं नः कुणोतु सुवीर्यस्य पतयः स्याम ॥१ ॥
*indraḥ sutrāmā svavāṁ̐ avobhiḥ sumṛḍīko bhavatu viśvavedāḥ ।*
*bādhatāṁ dveṣo abhayaṁ naḥ kuṇotu suvīryasya patayaḥ syāma ॥1 ॥*

९१. राका (Rākā) - अ. (Av.) ७.४८.१-२

राकामहं सुहवा सुष्टुती हुवे श्रृणोतु नः सुभगा बोधतु त्मना ।
सीव्यत्वपः सूच्याच्छिद्यमानया ददातु वीरं शतदायमुक्थ्यम् ॥१॥
यास्ते राके सुमतयः सुपेशसो याभिर्ददासि दाशुषे वसूनि ।
ताभिर्नो अद्य सुमना उपागहि सहस्रापोषं सुभगे रराणा ॥२॥
*rākāmahaṁ suhavā suṣṭutī huve śṛṇotu naḥ subhagā bodhatu tmanā* ।
*sīvyatvapaḥ sūchyāchchhidyamānayā dadātu vīraṁ śatadāyamukthyam* ॥1॥
*yāste rāke sumatayaḥ supeśaso yābhirdadāsi dāśuṣe vasūni* ।
*tābhirno adya sumanā upāgahi sahasrāpoṣaṁ subhage rarāṇā* ॥2॥

९२. रुद्रः (Rudraḥ) - अ. (Av.) ६.९०.१-३; ७.८७.१; १५.५.१-१६; १८.१.४०

अ. (Av.) ६.९०.१-३

या ते रुद्र इषुमास्यदंगेभ्यो हृदयाय च। इदं तामद्य त्वद् वयं विषूचीं वि वृहमसि ॥१॥
यास्ते शतं धमनयोऽङ्गान्यनु विष्ठिताः। तासां ते सर्वासां वयं निर्विषाणि ह्वयामसि ॥२॥
नमस्ते रुद्रास्यते नमः प्रतिहितायै। नमो विसृज्यमानायै नमो निपतितायै ॥३॥
*yā te rudra iṣumāsyadaṁgebhyo hṛdayāya cha । idaṁ tāmadya tvad vayaṁ viṣūchīṁ vi vṛhamasi* ॥1॥
*yāste śataṁ dhamanayo'ṅgānyanu viṣṭhitāḥ । tāsāṁ te sarvāsāṁ vayaṁ nirviṣāṇi hnayāmasi* ॥2॥
*namaste rudrāsyate namaḥ pratihitāyai । namo visṛjyamānāyai namo nipatitāyai* ॥3॥

अ. (Av.) ७.८७.१

यो अग्नौ रुद्रा यो अप्स्वऽन्तर्य ओषधीर्वीरुध आविवेश ।
य इमा विश्वा भुवनानि चाक्लृपे तस्मै रुद्राय नमो अस्त्वग्नये ॥१॥
*yo agnau rudrā yo apsva1ntarya Oṣadhīrvīrudha āviveśa* ।
*ya imā viśvā bhuvanāni chāklṛpe tasmai rudrāya namo astvagnaye* ॥1॥

अ. (Av.) १५.५.१-१६

तस्मै प्राच्या दिशो अन्तर्देशाद् भवमिष्वासमनुष्ठातारमकुर्वन् ॥१॥
भव एनमिष्वासः प्राच्या दिशो अन्तर्देशादनुष्ठातानुतिष्ठति नैनं शर्वो न भवो नेशानः ॥२॥
नास्य पशून् न समानान् हिनस्ति य एवं वेद ॥३॥
तस्मै दक्षिणाया दिशो अन्तर्देशाच्छर्वमिष्वासमनुष्ठातारमकुर्वन् ॥४॥
शर्वएनमिष्वासो दक्षिणाया दिशो अन्तर्देशादनुष्ठातानुतिष्ठति नैनं शर्वो न भवो नेशानः ।
नास्य पशून् न समानान् हिनस्ति य एवं वेद ॥५॥
तस्मै प्रतीच्या दिशो अन्तर्देशात् पशुपतिमिष्वासमनुष्ठातारमकुर्वन ॥६॥
पशुपतिरेनमिष्वासः प्रतीच्या दिशो अन्तर्देशादनुष्ठातानु तिष्ठति नैनं शर्वो न भवो नेशानः ।
नास्य पशून् न समानान् हिनस्ति य एवं वेद ॥७॥
तस्मा उदीच्या दिशो अन्तर्देशादुग्रं देवमिष्वासमनुष्ठातारमकुर्वन्॥८॥
उग्र एनं देव इष्वास उदीच्या दिशो अन्तर्देशादनुष्ठातानु तिष्ठति नैनं शर्वो न भवो नेशानः ।
नास्य पशून् न समानान् हिनस्ति य एवं वेद ॥९॥
तस्मै ध्रुवाया दिशो अन्तर्देशाद् रुद्रमिष्वासमनुष्ठातारमकुर्वन् ॥१०॥
रुद्र एनमिष्वासो ध्रुवाया दिशो अन्तर्देशादनुष्ठातानु तिष्ठति नैनं शर्वो न भवो नेशानः ।
नास्य पशून् न समानान् हिनस्ति य एवं वेद ॥११॥
तस्मा ऊर्ध्वाया दिशो अन्तर्देशान्महादेवमिष्वासमनुष्ठातारमकुर्वन्॥१२॥
महादेव एनमिष्वास ऊर्ध्वाया दिशो अन्तर्देशादनुष्ठातानु तिष्ठति नैनं शर्वो न भवो नेशानः ।
नास्य पशून् न संमानान् हिंस्ति य एवं वेद ॥१३॥
तस्मै सर्वेभ्यो अन्तर्देशेभ्य ईशानमिष्वासमनुष्ठातारमकुर्वन् ॥१४॥
ईशान एनमिष्वासः सर्वेभ्यो अन्तर्देशेभ्योऽनुष्ठातानु तिष्ठति नैनं शर्वो न भवो नेशनः ॥१५॥
नास्य पशून न समानान् हिनस्ति य एवं वेद ॥१६॥

*tasmai prāchyā diśo antardeśād bhavamiṣvāsamanuṣṭhātāramakurvan* ॥1॥
*bhava enamiṣvāsaḥ prāchyā diśo antardeśādanuṣṭhātānutiṣṭhati nainaṁ śarvo na bhavo neśānaḥ* ॥2॥
*nāsya paśūn na samānān hinasti ya evaṁ veda* ॥3॥
*tasmai dakṣiṇāyā diśo antardeśāchchharvamiṣvāsamanuṣṭhātāramakurvan* ॥4॥
*śarvaenamiṣvāso dakṣiṇāyā diśo antardeśādanuṣṭhātānutiṣṭhati nainaṁ śarvo na bhavo neśānaḥ* ।
*nāsya paśūn na samānān hinasti ya evaṁ veda* ॥5॥
*tasmai pratīchyā diśo antardeśāt paśupatimiṣbāsamanuṣṭhātāramakurvana* ॥6॥
*paśupatirenamiṣvāsaḥ pratīchyā diśo antardeśādanuṣṭhātānu tiṣṭhati nainaṁ śarvo na bhavo neśānaḥ* ।
*nāsya paśūn na samānān hinasti ya evaṁ veda* ॥7॥
*tasmā udīchyā diśo antardeśādugraṁ devamiṣvāsamanuṣṭhātāramakurvan* ॥8॥
*ugra enaṁ deva iṣvāsa udīchyā diśo antardeśādanuṣṭhātānu tiṣṭhati nainaṁ śarvo na bhavo neśānaḥ* ।
*nāsya paśūn na samānān hinasti ya evaṁ veda* ॥9॥
*tasmai dhruvāyā diśo antardeśād rudramiṣvāsamanuṣṭhātāramakurvan* ॥10॥
*rudra enamiṣvāso dhruvāyā diśo antardeśādanuṣṭhātānu tiṣṭhati nainaṁ śarvo na bhavo neśānaḥ* ।
*nāsya paśūn na samānān hinasti ya evaṁ veda* ॥11॥
*tasmā ūrdhvāyā diśo antardeśānmahādevamiṣvāsamanuṣṭhātāramakurvan* ॥12॥
*mahādeva enamiṣvāsa ūrdhvāyā diśo antardeśādanuṣṭhātānu tiṣṭhati nainaṁ śarvo na bhavo neśānaḥ* ।
*nāsya paśūn na saṁmānān hiṁsti ya evaṁ veda* ॥13॥
*tasmai sarvebhyo antardeśebhya īśānamiṣvāsamanuṣṭhātāramakurvan* ॥14॥
*īśāna enamiṣvāsaḥ sarvebhyo antardeśebhyo'nuṣṭhātānu tiṣṭhati nainaṁ śarvo na bhavo neśanaḥ* ॥15॥
*nāsya paśūna na samānān hinasti ya evaṁ veda* ॥16॥

अ. (Av.) १८.१.४०

स्तुहि श्रुतं गर्तसदं जनानां राजानं भीममुपहत्नुमुग्रम् ।
मृडा जरित्रे रुद्र स्तवानो अन्यमस्मत् ते नि वपन्तु सेन्यम् ॥४०॥
*stuhi śrutaṁ gartasadaṁ janānāṁ rājānaṁ bhīmamupahatnumugram* ।
*mṛḍā jaritre rudra stavāno anyamasmat te ni vapantu senyam* ॥40॥

९३. रुद्रः गणाः (Rudraḥ Gaṇāḥ) - अ. (Av.) ५.६.३-४

सहस्रधार एव ते समस्वरन् दिवो नाके मधुजिह्वा असश्चतः ।
तस्य स्पशो न नि मिषन्ति भूर्णयः पदेपदे पाशिनः सन्ति सेतवे ॥३॥
पर्यू षु प्र धन्वा वाजसातये परि वृत्राणि सक्षणिः ।
द्विषस्तदध्यर्णवेनेयसे सनिस्रसो नामासि त्रयोदशो मास इन्द्रस्य गृहः ॥४॥
*sahasradhāra eva te samasvaran divo nāke madhujihnā asaśchataḥ* ।
*tasya spaśo na ni miṣanti bhūrṇayaḥ padepade pāśinaḥ santi setave* ॥3॥
*paryū ṣu pra dhanvā vājasātaye pari vṛtrāṇi sakṣaṇiḥ* ।
*dviṣastadadhyarṇaveneyase sanisraso nāmāsi trayodaśo māsa indrasya gṛhaḥ* ॥4॥

९४. वनस्पतिः (Vanaspatiḥ) - अ. (Av.) ६.१२५.१-३; ६.१३८.१-५; ६.१३९.१-५; ७.५६.२

अ. (Av.) ६.१२५.१-३

वनस्पते वीड्वंगो हि भूया अस्मत्सखा प्रतरणः सुवीरः ।
गोभिः संनद्धो असि वीडयस्वास्थाता ते जयतु जेत्वानि ॥१॥
दिवस्पृथिव्याः पर्योज उद्भृतं वनस्पतिभ्यः पर्याभृतं सहः ।
अपामोज्मानं परि गोभिराभृतमिन्द्रस्य वज्रं हविषा रथं यज ॥२॥

इन्द्रस्यौजो मरुतामनीकं मित्रस्य गर्भो वरुणस्य नाभिः ।
स इमां नो हव्यदातिं जुषाणो देव रथ प्रति हव्या गृभाय ॥३॥
*vanaspate vīḍvaṁgo hi bhūyā asmatsakhā prataraṇaḥ suvīraḥ /*
*gobhiḥ saṁnaddho asi vīḍayasvāsthātā te jayatu jetvāni //1 //*
*divaspṛthivyāḥ paryoja udbhṛtaṁ vanaspatibhyaḥ paryābhṛtaṁ sahaḥ /*
*apāmojmānaṁ pari gobhirābhṛtamindrasya vajraṁ haviṣā rathaṁ yaja //2 //*
*indrasyaujo marutāmanīkaṁ mitrasya garbho varuṇasya nābhiḥ /*
*sa imāṁ no havyadātiṁ juṣāṇo deva ratha prati havyā gṛbhāya //3 //*

अ. (Av.) ६.१३८.१-५

त्वं वीरुधां श्रेष्ठतमाभिश्रुतास्योषधे ।
इमं मे अद्य पूरुषं क्लीबमोपशिनं कृधि ॥१॥
क्लीब कृध्योपशिनमथो कुरीरिणं कृधि ।
अथास्येन्द्रो ग्रावभ्यामुभे भिनत्त्वाण्ड्यौ ॥२॥
क्लीब क्लीबं त्वाकरं वध्रे वध्रिं त्वाकरमरसारसं त्वाकरम् ।
कुरीरमस्य शीर्षाणि कुम्बं चाधिनिदध्मसि ॥३॥
ये ते नाड्यौदेवकृते ययोस्तिष्ठति वृष्ण्यम् ।
ते ते भिनद्मि शम्ययामुष्या अधि मुष्कयोः ॥४॥
यथा नडं कशिपुने स्त्रियो भिन्दन्त्यश्मना ।
एवा भिनद्मि ते शेपोऽमुष्या अधि मुष्कयोः ॥५॥
*tvaṁ vīrudhāṁ śreṣṭhatamābhiśrutāsyoṣadhe /*
*imaṁ me adya pūruṣaṁ klībamopaśinaṁ kṛdhi //1 //*
*klība kṛdhyopaśinamatho kurīriṇaṁ kṛdhi /*
*athāsyendro grāvabhyāmubhe bhinattvāṇḍyau //2 //*
*klība klībaṁ tvākaraṁ vadhre vadhriṁ tvākaramarasārasaṁ tvākaram /*
*kurīramasya śīrṣāṇi kumbaṁ chādhinidadhmasi //3 //*
*ye te nāḍyaudevakṛte yayostiṣṭhati vṛṣṇyam /*
*te te bhinadyi śamyayāmuṣyā adhi muṣkayoḥ //4 //*
*yathā naḍaṁ kaśipune striyo bhindantyaśmanā /*
*evā bhinadyi te śepo'muṣyā adhi muṣkayoḥ //5 //*

अ. (Av.) ६.१३९.१-५

न्यस्तिका रुरोहिथ सुभागंकरणी मम ।
शतं तव प्रतानास्त्रायस्त्रिंशन्नितानाः ।
तया सहस्रपर्ण्या हृदयं शोषयामि ते ॥१॥
शुष्यतु मयि ते हृदयमथो शुष्यत्वास्यम् ।
अथो नि शुष्य मां कामेनाथो शुष्कास्या चर ॥२॥
संवननी समुष्पला बभ्रु कल्याणि सं नुद ।
अमूं च मां चे सं नुद समानं हृदयं कृधि ॥३॥
यथोदकमपपुषोऽपशुष्यत्यास्यम् ।
एवा नि शुष्य मां कामेनाथो शुष्कास्या चर ॥४॥
यथा नकुलो विच्छिन्न्नं संदधात्यहिं पुनः ।
एवा कामस्य विच्छिन्नं सं धेहि वीर्यावति ॥५॥
*nyastikā rurohitha subhāgaṁkaraṇī mama /*
*śataṁ tava pratānāstrāyastriṁśannitānāḥ /*
*tayā sahasraparṇyā hṛdayaṁ śoṣayāmi te //1 //*
*śuṣyatu mayi te hṛdayamatho śuṣyatvāsyam /*
*atho ni śuṣya māṁ kāmenātho śuṣkāsyā chara //2 //*
*saṁvananī samuṣpalā babhru kalyāṇi saṁ nuda /*
*amūṁ cha māṁ che saṁ nuda samānaṁ hṛdayaṁ kṛdhi //3 //*

*yathodakamapapuṣo'paśuṣyatyāsyam* ।
*evā ni śuṣya māṁ kāmenātho śuṣkāsyā chara* ॥4॥
*yathā nakulo vichchhinnaṁ saṁdadhātyahiṁ punaḥ* ।
*evā kāmasya vichchhinnaṁ saṁ dhehi vīryāvati* ॥5॥

अ. (Av.) ७.५६.२

इयं वीरुन्मधुजाता मधुश्चुन्मधुला मधूः। सा विहुतस्य भेषज्यथो मशकजम्भनी ॥२॥
*iyaṁ vīrunmadhujātā madhuśchunmadhulā madhūḥ । sā vihrutasya bheṣajyatho maśakajambhanī* ॥2॥

९५. वनस्पतिः (आसुरीः) (Vanaspatiḥ (Āsurīḥ) - अ. (Av.) ७.३८.१-५

इदं खनामि भेषजं मांपश्यमभिरोरुदम्। परायतो निवर्तनमायतः प्रतिनन्दनम् ॥१॥
येना निचक्र आसुरीन्द्रं देवेभ्यस्परि। तेना नि कुर्वे त्वामहं यथा तेऽसानि सुप्रिया ॥२॥
प्रतीची सोममसि प्रतीच्युत सूर्यम्। प्रतीची विश्वान् देवान् तां त्वाच्छावदामसि ॥३॥
अहं वदामि नेत् त्वं सभायामह त्वं वद। ममेदसस्त्वं केवलो नान्यासां कीर्तयाश्चन ॥४॥
यदि वासि तिरोजनं यदि वा नद्यस्तिरः। इयं ह मह्यं त्वामोषधिर्बद्ध्वेव न्यानयत् ॥५॥
*idaṁ khanāmi bheṣajaṁ māṁpaśyamabhirorudam । parāyato nivartanamāyataḥ pratinandanam* ॥1॥
*yenā nichakra āsurīndraṁ devebhyaspari । tenā ni kurve tvāmahaṁ yathā te'sāni supriyā* ॥2॥
*pratīchī somamasi pratīchyuta sūryam । pratīchī viśvān devān tāṁ tvāchchhāvadāmasi* ॥3॥
*ahaṁ vadāmi net tvaṁ sabhāyāmaha tvaṁ vada । mamedasastvaṁ kevalo nānyāsāṁ kīrtayāśchana* ॥4॥
*yadi vāsi tirojanaṁ yadi vā nadyastiraḥ । iyaṁ ha mahyaṁ tvāmoṣadhirbadadhveva nyānayat* ॥5॥

९६. वनस्पतिः (उच्छुष्मोषधिः) (Vanaspatiḥ (Uchchhuṣmoṣadhiḥ) - अ. (Av.) ४.४.१-२

यां त्वा गन्धर्वो अखनद् व३णाय मृतभ्रजे। तां त्वा वयं खनामस्योषधिं शेपर्हषणीम् ॥१॥
उदुषा उदु सूर्य उदिदं मामकं वचः । उदेजतु प्रजापतिर्वृषा शुष्मेण वाजिना ॥२॥
*yāṁ tvā gandharvo akhanad va3ṇāya mṛtabhraje । tāṁ tvā vayaṁ khanāmasyoṣadhiṁ śeparhaṣaṇīm* ॥1॥
*uduṣā udu sūrya udidaṁ māmakaṁ vachaḥ । udejatu prajāpatirvṛṣā śuṣmeṇa vājinā* ॥2॥

९७. वनस्पतिः (दूर्वा) (Vanaspatiḥ (Dūrvā) - अ. (Av.) २.७.१-५

अघद्विष्टा देवजाता वीरुच्छपथयोपनी ।
आपो मलमिव प्राणैक्षीत् सर्वान् मच्छपथाँ अधि ॥१॥
यश्च सापत्नः शपथो जाम्याः शपथश्च यः ।
ब्रह्मा यन्मन्युतः शपात् सर्व तन्नो अधस्पदम् ॥२॥
दिवो मूलमवततं पृथिव्या अध्युत्ततम् ।
तेन सहस्रकाण्डेन परि णः पाहि विश्वतः ॥३॥
परि मां परि मे प्रजां परि णः पाहि यद् धनम् ।
अरातिर्नो मा तारीन्मा नस्तारिषुरभिमातयः ॥४॥
शप्तारमेतु शपथो यः सुहार्त् तेन नः सह ।
चक्षुर्मन्त्रस्य दुर्हार्दः पृष्टीरपि श्रृणीमसि ॥५॥
*aghadviṣṭā devajātā vīruchchhapathayopanī* ।
*āpo malamiva prāṇaikṣīt sarvān machchhapathām̐ adhi* ॥1॥
*yaścha sāpatnaḥ śapatho jāmyāḥ śapathaścha yaḥ* ।
*brahmā yanmanyutaḥ śapāt sarva tanno adhaspadam* ॥2॥
*divo mūlamavatataṁ pṛthivyā adhyuttatam* ।

*tena sahasrakāṇḍena pari ṇaḥ pāhi viśvataḥ* ॥3॥
*pari māṁ pari me prajāṁ pari ṇaḥ pāhi yad dhanam* ।
*arātirno mā tārīnmā nastāriṣurabhimātayaḥ* ॥4॥
*śaptārametu śapatho yaḥ suhārt tena naḥ saha* ।
*chakṣurmantrasya durhārdaḥ pṛṣṭīrapi śṛṇīmasi* ॥5॥

९८. वनस्पतिः (वरणमणिः) (Vanaspatiḥ (Varaṇamaṇiḥ) - अ. (Av.) १०.३.१-२५

अयं मे वरणो मणिः सपत्नक्षयणो वृषा ।
तेना रभस्व त्वं शत्रून् प्र मृणीहि दुरस्यतः ॥१॥
प्रैणांछृणीहि प्र मृणा रभस्व मणिस्ते अस्तु पुरएता पुरस्तात् ।
अवारयन्त वरणेन देवा अभ्याचारमसुराणां श्वः श्वः ॥२॥
अयं मणिर्वरणो विश्वभेषजः सहस्राक्षो हरितो हिरण्ययः ।
स ते शत्रूनधरान् पादयाति पूर्वस्तान् दभ्नुहि ये त्वा द्विषन्ति ॥३॥
अयं ते कृत्यां विततां पौरुषेयादयं भयात् ।
अयं त्वा सर्वस्मात् पापाद् वरणो वारयिष्यते ॥४॥
वरणो वारयाता अयं देवो वनस्पतिः ।
यक्ष्मो यो अस्मिन्नाविष्टस्तमु देवा अवीवरन् ॥५॥
स्वप्नं सुप्त्वा यदि पश्यासि पापं मृगः सृतिं यदि धावादजुष्टाम् ।
परिक्षवाच्छकुनेः पापवादादयं मणिर्वरणो वारयिष्यते ॥६॥
अरात्यास्त्वा निर्ऋत्या अभिचारादथो भयात् ।
मृत्योरोजीयसो वधाद् वरणो वारयिष्यते ॥७॥
यन्मे माता यन्मे पिता भ्रातरो यच्च मे स्वा यदेनश्चकृमा वयम् ।
ततो नो वारयिष्यतेऽयं देवो वनस्पतिः ॥८॥
वरणेन प्रव्यथिता भ्रातृव्या मे सबन्धवः ।
असूर्त रजो अप्यगुस्ते यन्त्वधमं तमः ॥९॥
अरिष्टोऽहमरिष्टगुरायुष्मान्त्सर्वपूरुषः ।
तं मायं वरणो मणिः परिं पातु दिशोदिशः ॥१०॥
अयं मे वरण उरसि राजा देवो वनस्पतिः ।
स मे शत्रून् वि बाधतामिन्द्रो दस्यूनिवासुरान् ॥११॥
इमं बिभर्मि वरणमायुष्मांछतशारदः ।
स मे राष्ट्रं च क्षत्रं च पशूनोजश्च मे दधत् ॥१२॥
यथा वातो वनस्पतीन् वृक्षान् भनक्त्योजसा ।
एवा सपत्नान् मे भङ्धि पूर्वांजातॉं उतापरान् वरणस्त्वाभि रक्षतु ॥१३॥
यथा वातश्चाग्निश्च वृक्षान् प्सातो वनस्पतीन् ।
एवा सपत्नान् मे प्साहि पूर्वांजातॉं उतापरान् वरणस्त्वाभि रक्षतु ॥१४॥
यथा वातेन प्रक्षीणा वृक्षाः शेरे न्यर्पिताः ।
एवा सपत्नांस्त्वं मम प्र क्षिणीहि न्यर्पय पूर्वांजातॉं उतापरान् वरणस्त्वाभि रक्षतु ॥१५॥
तास्त्वं प्र च्छिन्धि वरण पुरा दिष्टात् पुरायुषः ।
य एनं पशुषु दिप्सन्ति ये चास्य राष्ट्रदिप्सवः ॥१६॥
यथा सूर्यो अतिभाति यथास्मिन् तेज आहितम् ।
एवा मे वरणो मणिः कीर्तिं भूतिं नि यच्छतु तेजसा मा समुक्षतु यशसा समनक्तु मा ॥१७॥
यथा यशश्चन्द्रमस्यादित्ये च नृचक्षसि ।
एवा मे वरणो मणिः कीर्तिं भूतिं नि यच्छतु तेजसा मा समुक्षतु यशसा समनक्तु मा ॥१८॥
यथा यशः पृथिव्यां यथास्मिंजातवेदसि ।
एवा मे वरणो मणिः कीर्तिं भूतिं नि यच्छतु तेजसा मा समुक्षतु यशसा समनक्तु मा ॥१९॥
यथा यशः कन्यायां यथास्मिन्त्संभृते रथे ।
एवा मे वरणो मणिः कीर्तिं भूतिं नि यच्छतु तेजसा मा समुक्षतु यशसा समनक्तु मा ॥२०॥

यथा यशः सोमपीथे मधुपर्के यथा यशः ।
एवा मे वरणो मणिः कीर्तिं भूतिं नि यच्छतु तेजसा मा समुक्षतु यशसा समनक्तु मा ॥२१॥
यथा यशोऽग्निहोत्रे वषट्कारे यथा यशः ।
एवा मे वरणो मणिः कीर्तिं भूतिं नि यच्छतु तेजसा मा समक्षतु यशसा समनक्तु मा ॥२२॥
यथा यशो यजमाने यथास्मिन् या आहितम् ।
एवा मे वरणो मणिः कीर्तिं भूतिं नि यच्छतु तेजसा मा समुक्षतु यशसा समनक्तु मा ॥२३॥
यथा यशः प्रजापतौ यथास्मिन् परमेष्ठिनि ।
एवा मे वरणो मणिः कीर्तिं भूतिं नि यच्छतु तेजसा मा समुक्षतु यशसा समनक्तु मा ॥२४॥
यथा देवेष्वमृतं यथैषु सत्यमाहितम् ।
एवा मे वरणो मणिः कीर्तिं भूतिं नि यच्छतु तेजसा मा समुक्षतु यशसा समनक्तु मा ॥२५॥

*ayaṁ me varaṇo maṇiḥ sapatnakṣayaṇo vṛṣā /*
*tenā rabhasva tvaṁ śatrūn pra mṛṇīhi durasyataḥ //1 //*
*praiṇāṁchhṛṇīhi pra mṛṇā rabhasva maṇiste astu puraetā purastāt /*
*avārayanta varaṇena devā abhyāchāramasurāṇāṁ śvaḥ śvaḥ //2 //*
*ayaṁ maṇirvaraṇo viśvabheṣajaḥ sahasrākṣo harito hiraṇyayaḥ /*
*sa te śatrūnadharān pādayāti pūrvastān dabhnuhi ye tvā dviṣanti //3 //*
*ayaṁ te kṛtyāṁ vitatāṁ pauruṣeyādayaṁ bhayāt /*
*ayaṁ tvā sarvasmāt pāpād varaṇo vārayiṣyate //4 //*
*varaṇo vārayātā ayaṁ devo vanaspatiḥ /*
*yakṣamo yo asminnāviṣṭastamu devā avīvaran //5 //*
*svapnaṁ suptvā yadi paśyāsi pāpaṁ mṛgaḥ sṛtiṁ yadi dhāvādajuṣṭām /*
*parikṣavāchchhakuneḥ pāpavādādayaṁ maṇirvaraṇo vārayiṣyate //6 //*
*arātyāstvā nirṛtyā abhichārādatho bhayāt /*
*mṛtyorojīyaso vadhād varaṇo vārayiṣyate //7 //*
*yanme mātā yanme pitā bhrātaro yachcha me svā yadenaśchakṛmā vayam /*
*tato no vārayiṣyate'yaṁ devo vanaspatiḥ //8 //*
*varaṇena pravyathitā bhrātṛvyā me sabandhavaḥ /*
*asūrta rajo apyaguste yantvadhamaṁ tamaḥ //9 //*
*ariṣṭo'hamariṣṭagurāyuṣmāntsarvapūruṣaḥ /*
*taṁ māyaṁ varaṇo maṇiḥ pariṁ pātu diśodiśaḥ //10 //*
*ayaṁ me varaṇa urasi rājā devo vanaspatiḥ /*
*sa me śatrūn vi bādhatāmindro dasyūnivāsurān //11 //*
*imaṁ bibharmi varaṇamāyuṣmāṁchhataśāradaḥ /*
*sa me rāṣṭraṁ cha kṣatraṁ cha paśūnojaścha me dadhat //12 //*
*yathā vāto vanaspatīn vṛkṣān bhanaktyojasā /*
*evā sapatnān me bhaṅgdhi pūrvāṁjātāṁ̐ utāparān varaṇastvābhi rakṣatu //13 //*
*yathā vātaśchāgniścha vṛkṣān psāto vanaspatīn /*
*evā sapatnān me psāhi pūrvāṁjātāṁ̐ utāparān varaṇastvābhi rakṣatu //14 //*
*yathā vātena prakṣīṇā vṛkṣāḥ śere nyarpitāḥ /*
*evā sapatnāṁstvaṁ mama pra kṣiṇīhi nyarpaya pūrvāṁjātāṁ̐ utāparān varaṇastvābhi rakṣatu //15 //*
*tāstvaṁ pra chchhinddhi varaṇa purā diṣṭāt purāyuṣaḥ /*
*ya enaṁ paśuṣu dipsanti ye chāsya rāṣṭradipsavaḥ //16 //*
*yathā sūryo atibhāti yathāsmin teja āhitam /*
*evā me varaṇo maṇiḥ kīrti bhūtiṁ ni yachchhatu tejasā mā samukṣatu yaśasā samanaktu mā //17 //*
*yathā yaśaśchandramasyāditye cha nṛchakṣasi /*
*evā me varaṇo maṇiḥ kīrti bhūtiṁ ni yachchhatu tejasā mā samukṣatu yaśasā samanaktu mā //18 //*

*yathā yaśaḥ pṛthivyāṁ yathāsmiṁjātavedasi* ।
*evā me varaṇo maṇiḥ kīrti bhūtiṁ ni yachchhatu tejasā mā samukṣatu yaśasā samanaktu mā* ॥19॥
*yathā yaśaḥ kanyāyāṁ yathāsmintsaṁbhṛte rathe* ।
*evā me varaṇo maṇiḥ kīrti bhūtiṁ ni yachchhatu tejasā mā samukṣatu yaśasā samanaktu mā* ॥20॥
*yathā yaśaḥ somapīthe madhuparke yathā yaśaḥ* ।
*evā me varaṇo maṇiḥ kīrti bhūtiṁ ni yachchhatu tejasā mā samukṣatu yaśasā samanaktu mā* ॥21॥
*yathā yaśo'gnihotre vaṣaṭkāre yathā yaśaḥ* ।
*evā me varaṇo maṇiḥ kīrti bhūtiṁ ni yachchhatu tejasā mā samakṣatu yaśasā samanaktu mā* ॥22॥
*yathā yaśo yajamāne yathāsmin yā āhitam* ।
*evā me varaṇo maṇiḥ kīrti bhūtiṁ ni yachchhatu tejasā mā samukṣatu yaśasā samanaktu mā* ॥23॥
*yathā yaśaḥ prajāpatau yathāsmin parameṣṭhini* ।
*evā me varaṇo maṇiḥ kīrti bhūtiṁ ni yachchhatu tejasā mā samukṣatu yaśasā samanaktu mā* ॥24॥
*yathā deveṣvamṛtaṁ yathaiṣu satyamāhitam* ।
*evā me varaṇo maṇiḥ kīrti bhūtiṁ ni yachchhatu tejasā mā samukṣatu yaśasā samanaktu mā* ॥25॥

९९. वनस्पतिः (वाणपर्णी) (Vanaspatiḥ (Vāṇaparṇī) - अ. (Av.) ३.१८.१-६

इमां खनाम्योषधिं वीरुधां बलवत्तमाम्। यया सपत्नीं बाधते यया संविन्दते पतिम् ॥१॥
उत्तानपर्णे सुभगे देवजूते सहस्वति। सपत्नीं मे परा णुद पतिं मे केवलं कृधि ॥२॥
नहि ते नाम जग्राह नो अस्मिन् रमसे पतौ। परामेव परावतं सपत्नीं गमयामसि ॥३॥
उत्तराहमुत्तर उत्तरेदुत्तराभ्यः। अधः सपत्नी या ममाधरा साधराभ्यः ॥४॥
अहमस्मि सहमानाथो त्वमसि सासहिः। उभे सहस्वती भूत्वा सपत्नीं मे सहावहै ॥५॥
अभि तेऽधां सहमानामुप तेऽधां सहीयसीम् ।
मामनु प्र ते मनो वत्सं गौरिव धावतु पथा वारिव धावतु ॥६॥
*imāṁ khanāmyoṣadhiṁ vīrudhāṁ balavattamām । yayā sapatnīṁ bādhate yayā saṁvindate patim* ॥1॥
*uttānaparṇe subhage devajūte sahasvati । sapatnīṁ me parā ṇuda patiṁ me kevalaṁ kṛdhi* ॥2॥
*nahi te nāma jagrāha no asmin ramase patau । parāmeva parāvataṁ sapatnīṁ gamayāmasi* ॥3॥
*uttarāhamuttara uttareduttarābhyaḥ । adhaḥ sapatnī yā mamādharā sādhārābhyaḥ* ॥4॥
*ahamasmi sahamānātho tvamasi sāsahiḥ । ubhe sahasvatī bhūtvā sapatnīṁ me sahāvahai* ॥5॥
*abhi te'dhāṁ sahamānāmupa te'dhāṁ sahīyasīm* ।
*māmanu pra te mano vatsaṁ gauriva dhāvatu pathā vāriva dhāvatu* ॥6॥

१००. वनस्पतयः (रामाकृष्णा असिवनी च) (Vanaspatayaḥ (Rāmākṛṣṇā Asivanī Cha) - अ. (Av.) १.२३.१-४

नक्तंजातास्योषधे रामे कृष्णे असिक्नि च । इदं रजनि रजय किलासं पलितं च यत् ॥१॥
किलासं च पलितं च निरितो नाशया पृषत्।
आ त्वा स्वो विशतां वर्णः परा शुक्लानि पातय ॥२॥
असितं ते प्रलयनमास्थानमसितं तव । असिक्न्यस्योषधे निरितो नाशया पृषत् ॥३॥
अस्थिजस्य किलासस्य तनूजस्य च यत् त्वचि।

दृश्या कृतस्य ब्रह्मणा लक्ष्म श्वेतमनीनशम् ॥४॥

*naktaṁjātāsyoṣadhe rāme kṛṣṇe askni cha । idaṁ rajani rajaya kilāsaṁ palitaṁ cha yat ॥1॥*

*kilāsaṁ cha palitaṁ cha nirito nāśayā pṛṣat ।*

*ā tvā svo viśatāṁ varṇaḥ parā śuklāni pātaya ॥2॥*

*asitaṁ te pralayanamāsthānamasitaṁ tava । asiknyasyoṣadhe nirito nāśayā pṛṣat ॥3॥*

*asthijasya kilāsasya tanūjasya cha yat tvachi ।*

*dṛśyā kṛtasya brahmaṇā lakṣama śvetamanīnaśam ॥4॥*

१०१. वरुणः (Varuṇaḥ) - अ. (Av.) १.१०.२-४; १.२०.३; ४.१५.१२; ५.११.१-११; ५.२४.४

अ. (Av.) १.१०.२-४

नमस्ते राजन् वरुणास्तु मन्यवे विश्वं ह्युग्र निचिकेषि द्रुग्धम् ।

सहस्रमन्यान् प्र सुवामि साकं शतं जीवाति शरदस्तवायम् ॥२॥

यदुवक्थानृतं जिह्वया वृजिनं बहु । रास्त्वा सत्यधर्मणो मुंचामि वरुणादहम् ॥३॥

मुंचामि त्वा वैश्वानरादर्णवान् महतस्परि । सजातानुग्रेहा वद ब्रह्म चाप चिकीहि नः ॥४॥

*namaste rājan varuṇāstu manyave viśvaṁ hyugra nichikeṣi drugdham ।*

*sahasramanyān pra suvāmi sākaṁ śataṁ jīvāti śaradastavāyam ॥2॥*

*yaduvakthānṛtaṁ jihnayā vṛjinaṁ bahu । rāāstvā satyadharmaṇo muṁchāmi varuṇādaham ॥3॥*

*muṁchāmi tvā vaiśvānarādarṇavān mahataspari । sajātānugrehā vada brahma chāpa chikīhi naḥ ॥4॥*

अ. (Av.) १.२०.३

इतश्च यदमुतश्च वधं वरुण यावय। वि महच्छर्म यच्छ वरीयो यावया वधम् ॥३॥

*itaścha yadamutaścha vadhaṁ varuṇa yāvaya । vi mahachchharma yachchha varīyo yāvayā vadham ॥3॥*

अ. (Av.) ४.१५.१२

अपो निषिंचन्नसुरः पिता नः श्वसन्तु गर्गरा अपां वरुणाव नीचीरपः सृज ।

वदन्तु पृश्निबाहवो मण्डूका इरिणानु ॥१२॥

*apo niṣiṁchannasuraḥ pitā naḥ śvasantu gargarā apāṁ varuṇāva nīchīrapaḥ sṛja ।*

*vadantu pṛśnibāhavo maṇḍūkā iriṇānu ॥12॥*

अ. (Av.) ५.११.१-११

कथं महे असुरायाब्रवीरिह कथं पित्रे हरये त्वेषनृम्णः ।

पृश्निं वरुण दक्षिणां ददावान् पुनर्मघ त्वं मनसाचिकित्सीः ॥१॥

न कामेन पुनर्मघो भवामि सं चक्षे कं पृश्निमेतामुपाजे ।

केन नु त्वमथर्वन् काव्येन केन जातेनासि जातवेदाः ॥२॥

सत्यमहं गभीरः काव्येन सत्यं जातेनास्मि जातवेदाः ।

न मे दासो नार्यो महित्वा व्रतं मीमाय यदहं धरिष्ये ॥३॥

न त्वदन्यः कवितरो न मेधया धीरतरो वरुण स्वधावन् ।

त्वं ता विश्वा भुवनानि वेत्थ स चिन्नु त्वज्जनो मायी बिभाय ॥४॥

त्वं ह्यं१ग वरुण स्वधवान् विश्वा वेत्थ जनिमा सुप्रणीते ।

किं रजस एना परो अन्यदस्त्येना किं परेणावरममुर ॥५॥

एकं रजस एना परा अन्यदस्त्येना पर एकेन दुर्णशं चिदर्वाक् ।

तत् ते विद्वान् वरुण प्र ब्रवीम्यधोवचसः पणयो भवन्तु नीचैर्दासा उप सर्पन्तु भूमिम् ॥६॥

त्वं ह्यंग वरुण ब्रवीषि पुनर्मघेष्ववद्यानि भूरि ।

मो षु पर्णीँरभ्ये३तावतो भून्मा त्वा वोचन्नराधसं जनासः ॥७॥

मा मा वोचन्नराधसं जनासः पुनस्ते पृश्निं जरितर्ददामि ।

स्तोत्रं मे विश्वमा याहि शचीभिरन्तर्विश्वासु मानुषीषु दिक्षु ॥८॥

आ ते स्तोत्राण्युद्यतानि यन्त्वन्तर्विश्वासु मानुषीषु दिक्षु ।

देहि नु मे यन्मे अदत्तो असि युज्यो मे सप्तपदः सखासि ॥९॥
समा नौ बन्धुर्वरुण समा जा वेदाहं तद्यन्नावेषा समा जा ।
ददामि तद् यत् ते अदत्तो अस्मि युज्यस्ते सप्तपदः सखास्मि ॥१०॥
देवो देवाय गृणते वयोधा विप्रो विप्राय स्तुवते सुमेधाः ।
अजीजनो हि वरुण स्वधावन्नथर्वाणं पितरं देवबन्धुम् ।
तस्मा उ राधः कृणुहि सुप्रशस्तं सखा नो असि परमं च बन्धुः ॥११॥

*katham mahe asurāyābravīriha katham pitre haraye tveṣanṛmṇaḥ /*
*pṛśimna varuṇa dakṣiṇāṁ dadāvān punarmagha tvaṁ manasāchikitsīḥ //1 //*
*na kāmena punarmagho bhavāmi saṁ chakṣe kaṁ pṛśnimetāmupāje /*
*kena nu tvamatharvan kāvyena kena jātenāsi jātavedāḥ //2 //*
*satyamahaṁ gabhīraḥ kāvyena satyaṁ jātenāsmi jātavedāḥ /*
*na me dāso nāryo mahitvā vrataṁ mīmāya yadahaṁ dhariṣye //3 //*
*na tvadanyaḥ kavitaro na medhayā dhīrataro varuṇa svadhāvan /*
*tvaṁ tā viśvā bhuvanāni vettha sa chinnu tvajjano māyī bibhāya //4 //*
*tvaṁ hyaṁ1ga varuṇa svadhavān viśvā vettha janimā supraṇīte /*
*kiṁ rajasa enā paro anyadastyenā kiṁ pareṇāvaramamura //5 //*
*ekaṁ rajasa enā parā anyadastyenā para ekena durṇaśaṁ chidarvāk /*
*tat te vidvān varuṇa pra bravīmyadhovachasaḥ paṇayo bhavantu nīchairdāsā upa sarpantu bhūmim //6 //*
*tvaṁ hyaṁga varuṇa bravīṣi punarmagheṣvavadyāni bhūri /*
*mo ṣu paṇīm̐rabhye3tāvato bhūnmā tvā vochannarādhasaṁ janāsaḥ //7 //*
*mā mā vochannarādhasaṁ janāsaḥ punaste pṛśniṁ jaritardadāmi /*
*stotraṁ me viśvamā yāhi śachībhirantarviśvāsu mānuṣīṣu dikṣu //8 //*
*ā te stotrāṇyudyatāni yantvantarviśvāsu mānuṣīṣu dikṣu /*
*dehi nu me yanme adatto asi yujyo me saptapadaḥ sakhāsi //9 //*
*samā nau bandhurvaruṇa samā jā vedāhaṁ tadyannāveṣā samā jā /*
*dadāmi tad yat te adatto asmi yujyaste saptapadaḥ sakhāsmi //10 //*
*devo devāya gṛṇate vayodhā vipro viprāya stuvate sumedhāḥ /*
*ajījano hi varuṇa svadhāvannatharvāṇaṁ pitaraṁ devabandhum /*
*tasmā u rādhaḥ kṛṇuhi supraśastaṁ sakhā no asi paramaṁ cha bandhuḥ //11 //*

अ. (Av.) ५.२४.४

वरुणोऽपामधिपतिः स मावतु ।
अस्मिन् ब्रह्मण्यस्मिन् कर्मण्यस्यां पुरोधायामस्यां प्रतिष्ठायामस्यां चित्त्यामस्यामाकूत्यामस्यामाशिष्यस्यां देवहूत्यां स्वाहा ॥४॥

*varuṇo'pāmadhipatiḥ sa māvatu /*
*asmin brahmaṇyasmin karmaṇyasyāṁ purodhāyāmasyāṁ pratiṣṭhāyāmasyāṁ chittyāmasyāmākūtyāmasyāmāśiṣyasyāṁ devahūtyāṁ svāhā //4 //*

१०२. वरुणादयः (Varuṇādayaḥ) - अ. (Av.) ६.७३.१-३

एह यातु वरुणः सोमो अग्निर्बृहस्पतिर्वसुभिरेह यातु ।
अस्य श्रियमुपसंयात सर्व उग्रस्य चेत्तुः संमनसः सजाताः ॥१॥
यो वः शुष्मो हृदयेष्वन्तराकूतिर्या वो मनसि प्रविष्टा ।
तान्त्सीवयामि हविषा घृतेन मयि सजाता रमतिर्वो अस्तु ॥२॥
इहैव स्त मापं याताध्यस्मत् पूषा परस्तादपथं वः कृणोतु ।
वास्तोष्पतिरनु वो जोहवीतु मयि सजाता रमतिर्वो अस्तु ॥३॥

*eha yātu varuṇaḥ somo agnirbṛhaspatirvasubhireha yātu /*
*asya śriyamupasaṁyāta sarva ugrasya chettuḥ saṁmanasaḥ sajātāḥ //1 //*
*yo vaḥ śuṣmo hṛdayeṣvantarākūtiryā vo manasi praviṣṭā /*
*tāntsīvayāmi haviṣā ghṛtena mayi sajātā ramatirvo astu //2 //*

*ihaiva sta māpa yātādhyasmat pūṣā parastādapathra vaḥ kṛṇotu* ।
*vāstoṣpatiranu vo johavītu mayi sajātā ramatirvo astu* ॥3 ॥

१०३. वस्वादयः (Vasvādayaḥ) - अ. (Av.) १.९.१; २

अस्मिन् वसु वसवो धारयन्त्विन्द्रः पूषा वरुणो मित्रो अग्निः ।
इममादित्या उत विश्वे च देवा उत्तरस्मिंज्योतिषि धारयन्तु ॥१ ॥
अस्य देवाः प्रदिशि जयोतिरस्तु सूर्यो अग्निरुत वा हिरण्यम् ।
सपत्ना अस्मदधरे भवन्तूत्तमं नाकमधि रोहयेमम् ॥२ ॥
*asmin vasu vasavo dhārayantvindraḥ pūṣā varuṇo mitro agniḥ* ।
*imamādityā uta viśve cha devā uttarasmiṁjyotiṣi dhārayantu* ॥1 ॥
*asya devāḥ pradiśi jayotirastu sūryo agniruta vā hiraṇyam* ।
*sapatnā asmadadhare bhavantūttamaṁ nākamadhi rohayemam* ॥2 ॥

१०४. वाक् (Vāk) - अ. (Av.) १६.२.१-६

निर्दुरर्मण्यऊर्जा मधुमती वाक् ॥१ ॥
मधुमती स्थ मधुमतीं वाचमुदेयम् ॥२ ॥
उपहूतो मे गोपा उपहूतो गोपीथः ॥३ ॥
सुश्रुतौ कर्णौ भद्रश्रुतौ कर्णौ भद्रं श्लोकं श्रूयासम् ॥४ ॥
सुश्रुतिश्च मोपश्रुतिश्च मा हासिष्टां सौपर्णं चक्षुरजस्रं जयोतिः ॥५ ॥
ऋषीणां प्रस्तरोऽसि नमोऽस्तु दैवाय प्रस्तराय ॥६ ॥
*nirdurarmaṇyaūrjā madhumatī vāk* ॥1 ॥
*madhumatī stha madhumatīṁ vāchamudeyam* ॥2 ॥
*upahūto me gopā upahūto gopīthaḥ* ॥3 ॥
*suśrutau karṇau bhadraśrutau karṇau bhadraṁ ślokaṁ śrūyāsam* ॥4 ॥
*suśrutiścha mopaśrutiścha mā hāsiṣṭāṁ sauparṇa chakṣurajasraṁ jayotiḥ* ॥5 ॥
*ṛṣīṇāṁ prastaro'si namo'stu daivāya prastarāya* ॥6 ॥

१०५. वाचस्पतिः (Vāchaspatiḥ) - अ. (Av.) १.१.१-४

ये त्रिषप्ताः परियन्ति विश्वा रूपाणि बिभ्रतः ।
वाचस्पतिर्बला तेषां तन्वोअद्य दधातु मे ॥१ ॥
पनरेहिं वाचस्पते देवेन मनसा सह ।
वसोष्पते नि रमय मय्येवास्तु मयिं श्रुतम् ॥२ ॥
इहैवाभि वि तनूभे आर्त्नीइव ज्यया ।
वाचस्पतिर्नि यच्छतु मय्येवास्तु मयि श्रुतम् ॥३ ॥
उपहूतो वाचस्पीतरुपास्मान् वाचपतिर्ह्वयताम् ।
सं श्रुतेन गमेमहि मा श्रुतेन वि राधिषि ॥४ ॥
*ye triṁṣaptāḥ pariyanti viśvā rūpāṇi bibhrataḥ* ।
*vāchaspatirbalā teṣāṁ tanvoadya dadhātu me* ॥1 ॥
*panarehiṁ vāchaspate devena manasā saha* ।
*vasoṣpate ni ramaya mayyevāstu mayiṁ śrutam* ॥2 ॥
*ihaivābhi vi tanūbhe ārtnīīva jyayā* ।
*vāchaspatirni yachchhatu mayyevāstu mayi śrutam* ॥3 ॥
*upahūto vāchaspītarupāsmān vāchapatirhnayatām* ।
*saṁ śrutena gamemahi mā śrutena vi rādhiṣi* ॥4 ॥

१०६. वाजी (Vājī) - अ. (Av.) ६.९२.१-३

वातरंहा भव वाजिन् युज्यमान इन्द्रस्य याहि प्रसवे मनोजवाः ।
युंजन्तु त्वा मरुतो विश्ववेदस आ ते त्वष्टा पत्सु जवं दधातु ॥१ ॥
जवस्ते अर्वन् निहितो गुहा यः श्येने वात उत यो चरत् परीत्तः ।
तेन त्वं वाजिन् बलवान् बलेनाजिं जय समने पारयिष्णुः ॥२ ॥

तनूष्टे वाजिन् तन्वं१नयन्ती वाममस्मभ्यं धावतु शर्म तुभ्यम् ।
अह्रुतो महो धरुणाय देवो दिवीव जयोतिः स्वमा मिमीयात् ॥३॥
*vātaraṁhā bhava vājin yujyamāna indrasya yāhi prasave manojavāḥ /*
*yuṁjantu tvā maruto viśvavedasa ā te tvaṣṭā patsu javaṁ dadhātu //1 //*
*javaste arvan nihito guhā yaḥ śyene vāta uta yo charat parīttaḥ /*
*tena tvaṁ vājin balavān balenājiṁ jaya samane pārayiṣṇuḥ //2 //*
*tanūṣṭe vājin tanvaṁ1nayantī vāmamasmabhyaṁ dhāvatu śarma tubhyam /*
*ahruto maho dharuṇāya devo divīva jayotiḥ svamā mimīyāt //3 //*

१०७. वातः (Vātaḥ) - अ. (Av.) ४.१५.१६

महान्तं कोषमुदचाभि षिंच सविद्युतं भवतु वातु वातः ।
तन्वतां यां बहुधा विसृष्टा आनन्दिनीरोषधयो भवन्तु ॥१६॥
*mahāntaṁ koṣamudachābhi ṣiṁcha savidyutaṁ bhavatu vātu vātaḥ /*
*tanvatāṁ yāṁ bahudhā visṛṣṭā ānandinīroṣadhayo bhavantu //16 //*

१०८. वायुः (Vāyuḥ) - अ. (Av.) २.२०.१-५; २.३४.४; ५.२४.८

अ. (Av.) २.२०.१-५

वायो यत् ते तपस्तेन तं प्रति तप योऽ३स्मान् द्वेष्टि यं वयं द्विष्मः ॥१॥
वायो यत् ते हरस्तेन तं प्रति हर योऽ३स्मान् द्वेष्टि यं वयं द्विष्मः ॥२॥
वायो यत् तेऽर्चिस्तेन तं प्रत्यर्च योऽ३स्मान् द्वेष्टि यं वयं द्विष्मः ॥३॥
वायो यत् ते शोचिस्तेन तं प्रति शोच योऽ३स्मान् द्वेष्टि यं वयं द्विष्मः ॥४॥
वायो यत् ते तेजस्तेन तमतेजसं कृणु योऽ३स्मान् द्वेष्टि यं वयं द्विष्मः ॥५॥
*vāyo yat te tapastena taṁ prati tapa yo3smān dveṣṭi yaṁ vayaṁ dviṣmaḥ //1 //*
*vāyo yat te harastena taṁ prati hara yo3smān dveṣṭi yaṁ vayaṁ dviṣmaḥ //2 //*
*vāyo yat te'rchistena taṁ pratyarcha yo3smān dveṣṭi yaṁ vayaṁ dviṣmaḥ //3 //*
*vāyo yat te śochistena taṁ prati śocha yo3smān dveṣṭi yaṁ vayaṁ dviṣmaḥ //4 //*
*vāyo yat te tejastena tamatejasaṁ kṛṇu yo3smān dveṣṭi yaṁ vayaṁ dviṣmaḥ //5 //*

अ. (Av.) २.३४.४

ये ग्राम्याः पशवो विश्वरूपा विरूपाः सन्तो बहुधैकरूपाः ।
वायुष्टानग्रे प्र मुमोक्तु देवः प्रजापतिः प्रजया संरराणः ॥४॥
*ye grāmyāḥ paśavo viśvarūpā virūpāḥ santo bahudhaikarūpāḥ /*
*vāyuṣṭānagre pra mumoktu devaḥ prajāpatiḥ prajayā saṁrarāṇaḥ //4 //*

अ. (Av.) ५.२४.८

वायुरन्तरिक्षस्याधिपतिः स मावतु ।
अस्मिन् ब्रह्मण्यस्मिन् कर्मण्यस्यां पुरोधायामस्यां प्रतिष्ठायामस्यां चित्त्यामस्यामाकूत्यामस्यामाशिष्यस्यां देवहूत्यां स्वाहा ॥८॥
*vāyurantarikṣasyādhipatiḥ sa māvatu /*
*asmin brahmaṇyasmin karmaṇyasyāṁ purodhāyāmasyāṁ pratiṣṭhāyāmasyāṁ chittyāmasyāmākūtyāmasyāmāśiṣyasyāṁ devahūtyāṁ svāhā //8 //*

१०९. वायु प्रजापतिः (Vāyu Prajāpatiḥ) - अ. (Av.) २.३४.४

ये ग्राम्याः पशवो विश्वरूपा विरूपाः सन्तो बहुधैकरूपाः ।
वायुष्टानग्रे प्रमुमोक्तु देवः प्रजापतिः प्रजया संरराणः ॥४॥
*ye grāmyāḥ paśavo viśvarūpā virūpāḥ santo bahudhaikarūpāḥ /*
*vāyuṣṭānagre pramumoktu devaḥ prajāpatiḥ prajayā saṁrarāṇaḥ //4 //*

११०. वासः (Vāsaḥ) - अ. (Av.) ७.३७.१

अक्ष्यौनौ मधुसंकाशे अनीकं नौ समंजनम् ।
अन्तः कृणुष्व मां हृदि मन इन्नौ सहासति ॥१॥
*akṣayaunau madhusaṁkāśe anīkaṁ nau samaṁjanam /*

*antaḥ kṛṇuṣva māṁ hṛdi mana innau sahāsati //1 //*

१११. विश्वेदेवाः (Viśvedevāḥ) - अ. (Av.) २.१३.४-५; ५.८.३; ६.७.३

अ. (Av.) २.१३.४-५

एह्यश्मानमा तिष्ठाश्मा भवतु ते तनूः ।
कृण्वन्तु विश्वे देवा आयुष्टे शरदः शतम् ॥४॥
यस्य ते वासः प्रथमवास्यं१ हरामस्तं त्वा विश्वेऽवन्तु देवाः ।
तं त्वा भ्रातरः सुवृधा वर्धमानमनु जायन्तां बहवः सुजातम् ॥५॥

*ehyaśmānamā tiṣṭhāśmā bhavatu te tanūḥ /*
*kṛṇvantu viśve devā āyuṣṭe śaradaḥ śatam //4 //*
*yasya te vāsaḥ prathamavāsyaṁ1 harāmastaṁ tvā viśve'vantu devāḥ /*
*taṁ tvā bhrātaraḥ suvṛdhā vardhamānamanu jāyantāṁ bahavaḥ sujātam //5 //*

अ. (Av.) ५.८.३

यदसावमुतो देवा अदेवः संश्चिकीर्षति ।
मा तस्याग्निर्हव्यं वाक्षीद्धवं देवा अस्य मोप गुर्ममैव हवमेतन ॥३॥

*yadasāvamuto devā adevaḥ saṁśchikīrṣati /*
*mā tasyāgnirhavyaṁ vākṣīddhavaṁ devā asya mopa gurmamaiva havametana //3 //*

अ. (Av.) ६.७.३

येन देवा असुराणामोजांस्यवृणीध्वम्। तेना नः शर्म यच्छत ॥३॥

*yena devā asurāṇāmojāṁsyavṛṇīdhvam / tenā naḥ śarma yachchhata //3 //*

११२. वीरुधः (Vīrudhaḥ) - अ. (Av.) ४.१५.२-३

समीक्षयन्तु तविषाः सुदानवोऽपां रसा ओषधीभिः सचन्ताम् ।
वर्षस्य सर्गा महयन्तु भूमिं पृथग् जायन्तामोषधयो विश्वरूपाः ॥२॥
समीक्षयस्व गायतो नभांस्यपां वेगासः पृथगुद् विजन्ताम् ।
वर्षस्य सर्गा महयन्तु भूमिं पृथग् जायन्तां वीरुधो विश्वरूपाः ॥३॥

*samīkṣayantu taviṣāḥ sudānavo'pāṁ rasā Oṣadhībhiḥ sachantām /*
*varṣasya sargā mahayantu bhūmiṁ pṛthag jāyantāmoṣadhayo viśvarūpāḥ //2 //*
*samīkṣayasva gāyato nabhāṁsyapāṁ vegāsaḥ pṛthagud vijantām /*
*varṣasya sargā mahayantu bhūmiṁ pṛthag jāyantāṁ vīrudho viśvarūpāḥ //3 //*

११३. वृश्चिकादयः (Vṛśchikādayaḥ) - अ. (Av.) ७.५६.१; ३; ५-८

अ. (Av.) ७.५६.१

तिरश्चिराजेरसितात् पृदाकोः परि संभृतम्। तत् कङ्कपर्वणो विषमियं वीरुदनीनशत् ॥१॥

*tiraśchirājerasitāt pṛdākoḥ pari saṁbhṛtam / tat kaṅkaparvaṇo viṣamiyaṁ vīrudanīnaśat //1 //*

अ. (Av.) ७.५६.३

यतो दष्टं यतो धीतं ततस्ते निर्ह्वयामसि। अर्भस्य तृप्रदंशिनो मशकस्यारसं विषम् ॥३॥

*yato daṣṭaṁ yato dhītaṁ tataste nirhnayāmasi / arbhasya tṛpradaṁśino maśakasyārasaṁ viṣam //3 //*

अ. (Av.) ७.५६.५-८

अरसस्य शर्कोटस्य नीचीनस्योपसर्पतः। विषं ह्य१स्यादिष्यथो एनमजीजभम् ॥५॥
न ते बाह्वोर्बलमस्ति न शीर्षे नोत मध्यतः। अथ किं पापयामुया पुच्छे बिभर्ष्यर्भकम् ॥६॥
अदन्तिं त्वा पिपीलिका वि वृश्चन्ति मयूर्यः। सर्वे भल ब्रवाथ शर्कोटमरसं विषम् ॥७॥
य उभाभ्यां प्रहरसि पुच्छेन चास्येन च। आस्ये३ न ते विषं किमु ते पुच्छधावसत् ॥८॥

*arasasya śarkoṭasya nīchīnasyopasarpataḥ / viṣaṁ hya1syādiṣyatho enamajījabham //5 //*
*na te bāhnorbalamasti na śīrṣe nota madhyataḥ / atha kiṁ pāpayāmuyā puchchhe bibharṣyarbhakam //6 //*

*adantiṁ tvā pipīlikā vi vṛśchanti mayūryaḥ । sarve bhala bravātha śarkoṭamarasaṁ viṣam ॥7॥*
*ya ubhābhyāṁ praharasi puchchhena chāsyena cha । āsye3 na te viṣaṁ kimu te puchchhadhāvasat ॥8॥*

११४. वेदिः (Vediḥ) - अ. (Av.) ७.९९.१

परि स्तृणीहि परि धेहि वेदिं मा जामिं मोषीरमुया शयानाम् ।
होतृषदनं हरितं हिरण्ययं निष्का एते यजमानस्य लोके ॥१॥
*pari stṛṇīhi pari dhehi vediṁ mā jāmiṁ moṣīramuyā śayānām ।*
*hotṛṣadanaṁ haritaṁ hiraṇyayaṁ niṣkā ete yajamānasya loke ॥1॥*

११५. वैश्वानरादयः (Vaiśvānarādayaḥ) - अ. (Av.) ६.६२.१

वैश्वानरो रशिमभिर्नः पुनातु वातः प्राणेनेषिरो नभोभिः ।
द्यावापृथिवी पयसा पयस्वती ऋतावरी यिाये नः पुनीताम् ॥१॥
वैश्वानरीं सूनृतामा रभध्वं यस्या आशास्तन्वोवीतपृष्ठाः ।
तया गृणन्तः सधमादेषु वयं स्याम् पतयो रयीणाम् ॥२॥
वैश्वानरीं वर्चस आ रभध्वं शुद्धा भवन्तः शुचयः पावकाः ।
इहेडया सधमादं मदन्तो ज्योक् पश्येम सूर्यमुच्चरन्तम् ॥३॥
*vaiśvānaro raśimabhirnaḥ punātu vātaḥ prāṇeneṣiro nabhobhiḥ ।*
*dyāvāpṛthivī payasā payasvatī ṛtāvarī yiāye naḥ punītām ॥1॥*
*vaiśvānarīṁ sūnṛtāmā rabhadhvaṁ yasyā āśāstanvovītapṛṣṭhāḥ ।*
*tayā gṛṇantaḥ sadhamādeṣu vayaṁ syām patayo rayīṇām ॥2॥*
*vaiśvānarīṁ varchasa ā rabhadhvaṁ śuddhā bhavantaḥ śuchayaḥ pāvakāḥ ।*
*iheḍayā sadhamādaṁ madanto jyok paśyema sūryamuchcharantam ॥3॥*

११६. व्रात्यः (अध्यातमम्) (Vrātyaḥ (Adhyātamam) - अ. (Av.) १५.१.१-८; १५.२.१-२८; १५.३.१-११; १५.४.१-१८; १५.६.१-२६; १५.७.१-५; १५.८.१-३; १५.९.१-३; १५.१०.१-११; १५.११.१-११; १५.१२.१-११; १५.१३.१-१४; १५.१४.१-२४; १५.१५.१-९; १५.१६.१-७; १५.१७.१-१०; १५.१८.१-५

अ. (Av.) १५.१.१-८

व्रात्य आसीदीयमान एव स प्रजापतिं समैरयत्॥१॥
स प्रजापतिः सुवर्णमात्मन्नपश्यत तत् प्राजनयत् ॥२॥
तदेकमभवत् तल्ललाममभवत् तन्महदभवत् तज्जयेष्ठमभवत् तद् ब्रह्माभवत् तत् तपोऽभवत् तत् सत्यमभवत् तेन प्राजायत ॥३॥
सोऽवर्धत स महानभवत् स महादेवोऽभवत् ॥४॥
स देवानामीशां पर्यैत् स ईशानोऽभवत् ॥५॥
स एकव्रात्योऽभवत् स धनुरादत्त तदेवेन्द्रधनुः ॥६॥
नीलमस्योदरं लोहितं पृष्ठम ॥७॥
*vrātya āsīdīyamāna eva sa prajāpatiṁ samairayat ॥1॥*
*sa prajāpatiḥ suvarṇamātmannapaśyata tat prājanayat ॥2॥*
*tadekamabhavat tallalāmamabhavat tanmahadabhavat tajjayeṣṭhamabhavat tad brahmābhavat tat tapo'bhavat tat satyamabhavat tena prājāyata ॥3॥*
*so'vardhata sa mahānabhavat sa mahādevo'bhavat ॥4॥*
*sa devānāmīśāṁ paryait sa īśāno'bhavat ॥5॥*
*sa ekavrātyo'bhavat sa dhanurādatta tadevendradhanuḥ ॥6॥*
*nīlamasyodaraṁ lohitaṁ pṛṣṭhama ॥7॥*

अ. (Av.) १५.२.१-२८

नीलेनैवाप्रियं भ्रातृव्यं प्रोर्णोति लोहितेन द्विषन्तं विध्यतीति ब्रह्मवादिनो वदन्ति॥८॥
स उदतिष्ठत् स प्राचीं दिशमनु व्यचलत्। ॥१॥
तं बृहच्च रथन्तरं चादित्याश्च विश्वे च देवा अनुव्यचलन् ॥२॥

बृहते च वै स रथन्तराय चादित्येभ्यश्च विश्वेभ्यश्च देवेभ्य आ वृश्चते
य एवं विद्वांसं व्रात्यमुपवदति ॥३॥
बृहतश्च वै स रथन्तरस्य चादित्यानां च विश्वेषां च
देकनां प्रियं धाम भवति तस्य प्राच्यां दिशि ॥४॥
श्रद्धा पुंश्चली मित्रो मागधो विाानं वासोऽहरुष्णीषं
रात्री केशा हरितौ प्रवर्तौ कल्मलिर्मणिः ॥५॥
भूतं च भविष्यच्च परिष्कन्दौ मनो विपथम् ॥६॥
मातरिश्वा च पवमानश्च विपथवाहौ वातः सारथी रेष्मा प्रतोदः ॥७॥
कीर्तिश्च यशश्च पुरः सरावैनं कीर्तिर्गच्छत्या यशो गच्छति य एवं वेद ॥८॥
स उदतिष्ठत् स दक्षिणां दिशमनु व्यचलत् ॥९॥
तं याायियं च वामदेव्यं च याश्च यजमानश्च पशवश्चानुव्यचलन् ॥१०॥
याायियाय च वै स वामदेव्याय च याय च यजमानाय च पशुभ्यश्चा वृश्चते य एवं विद्वांसं व्रात्यमुपवदति ॥११॥
याायियस्य च वै स वामदेव्यस्य च यास्य च यजमानस्य च पशूनां च प्रियं धाम भवति तस्यदक्षिणायां दिशि ॥१२॥
उषाः पुंश्चली मन्त्रो मागधो विाानं वासोऽहरुष्णीषं
रात्री केशा हरितौ प्रवर्तौ कल्मलिर्मणिः ॥१३॥
अमावास्याच पौर्णमासी च परिष्कन्दौ मनो विपथम् ।
मातरिश्वा च पवमानश्च विपथवाहौ वातः सारथी रेष्मा प्रतोदः ।
कीर्तिश्च यशश्च पुरः सरावैनं कीर्तिर्गच्छत्या यशो गच्छति य एवं वेद ॥१४॥
स उदतिष्ठत् स प्रतीचीं दिशमनु व्यचलत् ॥१५॥
तं वैरूपं च वैराजं चापश्च वरुणश्च राजानुव्यचलन् ॥१६॥
वैरूपाय च वै स वैराजाय चाद्भ्यश्च वरुणाय च रा
आ वृश्चते य एवं विद्वांसं व्रात्यमुपवदति ॥१७॥
वैरूपस्य च वै स वैराजस्य चापां च वरुणस्य च
राः प्रियं धाम भवति तस्य प्रतीच्यां दिशि ॥१८॥
इरा पुंश्चली हसो मागधो विाानं वासोऽहरुष्णीषं
रात्री केशा हरितौ प्रवर्तौ कल्मलिर्मणिः ॥१९॥
अहश्च रात्री च परिष्कन्दौ मनो विपथम् ।
मातरिश्वा च पवमानश्च विपथवाहौ वातः सारथीरेष्मा प्रतोदः ।
कीर्तिश्च यशश्च पुरःसरावैन कीर्तिर्गच्छत्या यशो गच्छति य एवं वेद ॥२०॥
स उदतिष्ठत् स उदीचीं दिशमनु व्यचलत् ॥२१॥
तं श्यैतं च नौधसं च सप्तर्षयश्च सोमश्च राजानुव्यचलन् ॥२२॥
श्यैताय च वै स नौधसाय च सप्तर्षिभ्यश्च सोमाय
च रा आ वृश्चते य एवं विद्वांसं व्रात्यमुपवदति ॥२३॥
श्यैतस्य च वै स नौधसस्य च सप्तर्षीणां च सोमस्य च
राः प्रियं धाम भवति तस्योदीच्यां दिशि ॥२४॥
विद्युत् पुंश्चली स्तनयित्नुर्मागधो विाानं वासोऽहरुष्णीषं रात्री
केशा हरितौ प्रवर्तौ कल्मलिर्मणिः ॥२५॥
श्रुतं च विश्रुतं च परिष्कन्दौ मनो विपथम् ॥२६॥
मातरिश्वा च पवमानश्च विपथवाहौ वातः सारथी रेष्मा प्रतोदः ॥२७॥
कीर्तिश्च यशश्च पुरःसरावैनं कीर्तिर्गच्छत्या यशो गच्छति य एवं वेद ॥२८॥

*nīlenaivāpriyaṁ bhrātṛvyaṁ prorṇoti lohitena dviṣantaṁ vidhyatīti brahmavādino vadanti //8 //*
*sa udatiṣṭhat sa prāchīṁ diśamanu vyachalat / //1 //*
*taṁ bṛhachcha rathantaraṁ chādityāścha viśve cha devā anuvyachalan //2 //*
*bṛhate cha vai sa rathantarāya chādityebhyaścha viśvebhyaścha devebhya ā vṛśchate*

*ya evaṁ vidvāṁsaṁ vrātyamupavadati* //3 //
*bṛhataścha vai sa rathantarasya chādityānāṁ cha viśveṣāṁ cha*
*dekanāṁ priyaṁ dhāma bhavati tasya prāchyāṁ diśi* //4 //
*śraddhā puṁśchalī mitro māgadho viāānaṁ vāso'haruṣṇīṣaṁ*
*rātrī keśā haritau pravartau kalmalirmaṇiḥ* //5 //
*bhūtaṁ cha bhaviṣyachcha pariṣkandau mano vipatham* //6 //
*mātariśvā cha pavamānaścha vipathavāhau vātaḥ sārathī reṣmā pratodaḥ* //7 //
*kīrtiścha yaśaścha puraḥ sarāvainaṁ kīrtirgachchhatyā yaśo gachchhati ya evaṁ veda* //8 //
*sa udatiṣṭhat sa dakṣiṇāṁ diśamanu vyachalat* //9 //
*taṁ yāāyiāyaṁ cha vāmadevyaṁ cha yāścha yajamānaścha paśavaśchānuvyachalan* //10 //
*yāāyiāyāya cha vai sa vāmadevyāya cha yāāya cha yajamānāya cha paśubhyaśchā vṛśchate ya evaṁ vidvāṁsaṁ vrātyamupavadati* //11 //
*yāāyiāyasya cha vai sa vāmadevyasya cha yāsya cha yajamānasya cha paśūnāṁ cha priyaṁ dhāma bhavati tasyadakṣiṇāyāṁ diśi* //12 //
*uṣāḥ puṁśchalī mantro māgadho viāānaṁ vāso'haruṣṇīṣaṁ*
*rātrī keśā haritau pravartau kalmalirmaṇiḥ* //13 //
*amāvāsyācha paurṇamāsī cha pariṣkandau mano vipatham* /
*mātariśvā cha pavamānaścha vipathavāhau vātaḥ sārathī reṣmā pratodaḥ* /
*kīrtiścha yaśaścha puraḥ sarāvainaṁ kīrtirgachchhatyā yaśo gachchhati ya evaṁ veda* //14 //
*sa udatiṣṭhat sa pratīchīṁ diśamanu vyachalat* //15 //
*taṁ vairūpaṁ cha vairājaṁ chāpaścha varuṇaścha rājānuvyachalan* //16 //
*vairūpāya cha vai sa vairājāya chādbhyaścha varuṇāya cha rāā*
*ā vṛśchate ya evaṁ vidvāṁsaṁ vrātyamupavadati* //17 //
*vairūpasya cha vai sa vairājasya chāpāṁ cha varuṇasya cha*
*rāāḥ priyaṁ dhāma bhavati tasya pratīchyāṁ diśi* //18 //
*irā puṁśchalī haso māgadho viāānaṁ vāso'haruṣṇīṣaṁ*
*rātrī keśā haritau pravartau kalmalirmaṇiḥ* //19 //
*ahaścha rātrī cha pariṣkandau mano vipatham* /
*mātariśchā cha pavamānaścha vipathavāhau vātaḥ sārathīreṣmā pratodaḥ* /
*kīrtiścha yaśaścha puraḥsarāvaina kītirgachchhatyā yaśo gachchhati ya evaṁ veda* //20 //
*sa udatiṣṭhat sa udīchīṁ diśamanu vyachalat* //21 //
*taṁ śyaitaṁ cha naudhasaṁ cha saptarṣayaścha somaścha rājānuvyachalan* //22 //
*śyaitāya cha vai sa naudhasāya cha saptarṣibhyaścha somāya*
*cha rāā ā vṛśchate ya evaṁ vidvāṁsaṁ vrātyamupavadati* //23 //
*śyaitasya cha vai sa naudhasasya cha saptarṣīṇāṁ cha somasya cha*
*rāāḥ priyaṁ dhāma bhavati tasyodīchyāṁ diśi* //24 //
*vidyut puṁśchalī stanayitnurmāgadho viāānaṁ vāso'haruṣṇīṣaṁ rātrī keśā haritau pravartau kalmalirmaṇiḥ* //25 //
*śrutaṁ cha viśrutaṁ cha pariṣkandau mano vipatham* //26 //
*mātariśvā cha pavamānaścha vipathavāhau vātaḥ sārathī reṣmā pratodaḥ* //27 //
*kīrtiścha yaśaścha puraḥsarāvainaṁ kīrtirgachchhatyā yaśo gachchhati ya evaṁ veda* //28 //

अ. (Av.) १५.३.१-११

स संवत्सरमूर्ध्वोऽतिष्ठत् तं देवा अब्रुवन् व्रात्य किं नु तिष्ठसीति ॥१ ॥
सोऽब्रवीदासन्दीं मे सं भरन्त्विति ॥२ ॥

तस्मै व्रात्यायासन्दीं समभरन् ॥३॥
तस्या ग्रीष्मश्च वसन्तश्च द्वौ पादावास्तां शरच्च वर्षाश्च द्वौ ॥४॥
बृहच्च रथन्तरं चानूच्ये३ आस्तां याायियं च वामदेव्यं च तिरश्च्ये॥५॥
ऋचः प्रांचस्तन्तवो यजूंषि तिर्यंचः ॥६॥
वेद आस्तरणं ब्रह्मोपबर्हणम् ॥७॥
सामासाद उद्गीथोऽपश्रयः ॥८॥
तामासन्दीं व्रात्य आरोहत् ॥९॥
तस्य देवजनाः परिष्कन्दा आसन्त्संकल्पाः
प्रहाय्या३ विश्वानि भूतान्युपसदः ॥१०॥
विश्वान्येवास्य भूतान्युपसदो भवन्ति य एवं वेद ॥११॥

*sa saṁvatsaramūrdhvo'tiṣṭhat taṁ devā abruvan vrātya kiṁ nu tiṣṭhasīti* //1 //
*so'bravīdāsandīṁ me saṁ bharantviti* //2 //
*tasmai vrātyāyāsandīṁ samabharan* //3 //
*tasyā grīṣmaścha vasantaścha dvau pādāvāstāṁ śarachcha varṣāścha dvau* //4 //
*bṛhachcha rathantaraṁ chānūchye3 āstāṁ yāāyiāyaṁ cha vāmadevyaṁ cha tiraśchye* //5 //
*ṛchaḥ prāṁchastantavo yajūṁṣi tiryaṁchaḥ* //6 //
*veda āstaraṇaṁ brahmopabarhaṇam* //7 //
*sāmāsāda udgītho'paśrayaḥ* //8 //
*tāmāsandīṁ vrātya ārohat* //9 //
*tasya devajanāḥ pariṣkandā āsantsaṁkalpāḥ*
*prahāyyā3 viśvāni bhūtānyupasadaḥ* //10 //
*viśvānyevāsya bhūtānyupasado bhavanti ya evaṁ veda* //11 //

अ. (Av.) १५.४.१-१८

तस्मै प्राच्या दिशः ॥१॥
वासन्तौ मासौ गोप्तारावकुर्वन् बृहच्च रथन्तरं चानुष्ठातारौ ॥२॥
वासन्तावेनं मासौ प्राच्या दिशो गोपायतो बृहच्च रथन्तरं चानु तिष्ठतो य एवं वेद ॥३॥
तस्मै दक्षिणाया दिशः ॥४॥
ग्रैष्मौ मासौ गोप्तारावकुर्वन् याायियं च वामदेव्यं चानुष्ठातारौ ॥५॥
ग्रैष्मावेनं मासौ दक्षिणाया दिशो गोपायतो याययिं च वामदेव्यं चानु तिष्ठतो य एवं वेद॥६॥
तस्मै प्रतीच्या दिशः ॥७॥
वार्षिकौ मासौ गोप्तारावकुर्वन् वैरूपं च वैराजं चानुष्ठातारौ ॥८॥
वार्षिकावेनं मासौ प्रतीच्या दिशो गोपायतो वैरूपं च वैराजं चानु तिष्ठतो य एवं वेद ॥९॥
तस्मा उदीच्या दिशः ॥१०॥
शरदौ मासौ गोप्तारावकुर्वंछ्यैतं च नौधसं चानुष्ठातारौ ॥११॥
शारदावेनं मासावुदीच्या दिशो गोपायतः श्यैतं च नौधसं चानु तिष्ठतो य एवं वेद ॥१२॥
तस्मै ध्रुवाया दिशः ॥१३॥
हैमनौ मासौ गोप्तारावकुर्वन् भमिं चाग्निं चानुष्ठातारौ ॥१४॥
हेमनावेनं मासौ ध्रुवाया दिशो गोपायतो भूमिश्चाग्निश्चानु तिष्ठतो य एवं वेद ॥१५॥
तस्मा ऊर्ध्वाया दिशः ॥१६॥
शैशिरौ मासौ गोप्तारावकुर्वन् दिवं चादित्यं चानुष्ठातारौ ॥१७॥
शैशिरावेनं मासावूर्ध्वाया दिशो गोपायतो द्यौश्चादित्यश्चानु तिष्ठतो य एवं वेद ॥१८॥

*tasmai prāchyā diśaḥ* //1 //
*vāsantau māsau goptārāvakurvan bṛhachcha rathantaraṁ chānuṣṭhātārau* //2 //
*vāsantāvenaṁ māsau prāchyā diśo gopāyato bṛhachcha rathantaraṁ chānu tiṣṭhato ya evaṁ veda* //3 //
*tasmai dakṣiṇāyā diśaḥ* //4 //

*greṣmau māsau goptārāvakurvan yāāyiāyaṁ cha vāmadevyaṁ chānuṣṭhātārau* //5 //
*graiṣmāvenaṁ māsau dakṣiṇāyā diśo gopāyato yāyayiṁ cha vāmadevyaṁ chānu tiṣṭhato ya evaṁ veda* //6 //
*tasmai pratīchyā diśaḥ* //7 //
*vārṣikau māsau goptārāvakurvan vairūpaṁ cha vairājaṁ chānuṣṭhātārau* //8 //
*vārṣikāvenaṁ māsau pratīchyā diśo gopāyato vairūpaṁ cha vairājaṁ chānu tiṣṭhato ya evaṁ veda* //9 //
*tasmā udīchyā diśaḥ* //10 //
*śaradau māsau goptārāvakurvaṁchhyaitaṁ cha naudhasaṁ chānuṣṭhātārau* //11 //
*śāradāvenaṁ māsāvudīchyā diśo gopāyataḥ śyaitaṁ cha naudhasaṁ chānu tiṣṭhato ya evaṁ veda* //12 //
*tasmai dhruvāyā diśaḥ* //13 //
*haimanau māsau goptārāvakurvan bhamiṁ chāgniṁ chānuṣṭhātārau* //14 //
*hemanāvenaṁ māsau dhruvāyā diśo gopāyato bhūmiśchāgniśchānu tiṣṭhato ya evaṁ veda* //15 //
*tasmā ūrdhvāyā diśaḥ* //16 //
*śaiśirau māsau goptārāvakurvan divaṁ chādityaṁ chānuṣṭhātārau* //17 //
*śaiśirāvenaṁ māsāvūrdhvāyā diśo gopāyato dyauśchādityaśchānu tiṣṭhato ya evaṁ veda* //18 //

अ. (Av.) १५.६.१-२६

स ध्रुवां दिशमनु व्यचलत् ॥१॥
तं भूमिश्चाग्निश्चौषधयश्च वनस्पत्यश्च वानस्पत्यश्च वीरुधश्चानुव्यचलन् ॥२॥
भूमेश्च वै सो३ग्नेश्चौषधीनां च वनस्पतीनां च वानस्पत्यानां च वीरुधां च प्रियं धाम भवति यएवं वेद ॥३॥
स ऊर्ध्वां दिशमनु व्यचलत् ॥४॥
तमृतं च सत्यं च सूर्यश्च चन्द्रश्च नक्षत्राणि चानुव्यचलन् ॥५॥
ऋतस्य च वै स सत्यस्य च सूर्यस्य च चन्द्रस्य च नक्षत्राणां च प्रियं धाम भवति य एवं वेद ॥६॥
स उत्तमां दिशमनु व्यचलत् ॥७॥
तमृचश्च सामानि च यजूंषि च ब्रह्म चानुव्यचलन् ॥८॥
ऋचां च वै स साम्नां च यजुषां च ब्रह्मणश्च प्रियं धाम भवति य एवं वेद ॥९॥
स बृहतीं दिशमनु व्यचलत् ॥१०॥
तमितिहासश्च पुराणं च गाथाश्च नाराशंसीश्चानुव्यचलन् ॥११॥
इतिहासस्य च वै स पुराणस्य च गाथानां च नाराशंसीनां च प्रियं धाम भवति य एवं वेद ॥१२॥
स परमां दिशमनु व्यचलत् ॥१३॥
तमाहवनीयश्च गार्हपत्यश्च दक्षिणाग्निश्च याश्च यजमानश्च पशवश्चानुव्यचलन् ॥१४॥
आहवनीयस्य च वै स गार्हपत्यस्य च दक्षिणाग्नेश्च यास्य च यजमानस्य च पशूनां च प्रियं धाम भवति य एवं वेद ॥१५॥
सोऽनादिष्टां दिशमनु व्यचलत् ॥१६॥
तमृतवश्चार्तवाश्च लोकाश्च लौकयाश्च मासाश्चार्धमासाश्चाहोरात्रे चानुव्यचलन् ॥१७॥
ऋतूनां च वै स आर्तवानां च लोकानां च लौक्यानां च मासानां
चार्धमासानां चाहोरात्रयोश्च प्रियं धाम भवति य एवं वेद ॥१८॥
सोऽनावृत्तां दिशमनु व्यचलत् ततो नावर्त्स्यन्नमन्यत ॥१९॥
तं दितिश्चादितिश्चेडा चेन्द्राणी चानुव्यचलन् ॥२०॥
दितेश्च वै सोऽदितेश्चेडायाश्चेन्द्राण्याश्च प्रियं धाम भवति य एवं वेद ॥२१॥
स दिशोऽनु व्यचलत् तं विराडनु व्यचलत् सर्वे च देवाः सर्वाश्च देवताः ॥२२॥
विराजश्च वै स सर्वेषां च देवानां सर्वासां च देवातानां प्रियं धाम भवति य एवं वेद ॥२३॥
स सर्वानन्तर्देशाननु व्यचलत् ॥२४॥
तं प्रजापतिश्च परमेष्ठी च पिता च पितामहश्चानुव्यचलन् ॥२५॥

प्रजापतेश्च वै स परमेष्ठिनश्च पितुश्च पितामहस्य च प्रियं धाम भवति य एवं वेद ॥२६॥

*sa dhruvāṁ diśamanu vyachalat ॥1॥*
*taṁ bhūmiśchāgniśchauṣadhayaścha vanaspatyaścha vānaspatyaścha vīrudhaśchānuvyachalan ॥2॥*
*bhūmeścha vai so3gneśchauṣadhīnāṁ cha vanaspatīnāṁ cha vānaspatyānāṁ cha vīrudhāṁ cha priyaṁ dhāma bhavati yaevaṁ veda ॥3॥*
*sa ūrdhvā diśamanu vyachalat ॥4॥*
*tamṛtaṁ cha satyaṁ cha sūryaścha chandraścha nakṣatrāṇi chānuvyachalan ॥5॥*
*ṛtasya cha vai sa satyasya cha sūryasya cha chandrasya cha nakṣatrāṇāṁ cha priyaṁ dhāma bhavati ya evaṁ veda ॥6॥*
*sa uttamāṁ diśamanu vyachalat ॥7॥*
*tamṛchaścha sāmāni cha yajūṁṣi cha brahma chānuvyachalan ॥8॥*
*ṛchāṁ cha vai sa sāmnāṁ cha yajuṣāṁ cha brahmaṇaścha priyaṁ dhāma bhavati ya evaṁ veda ॥9॥*
*sa bṛhatīṁ diśamanu vyachalat ॥10॥*
*tamitihāsaścha purāṇaṁ cha gāthāścha nārāśaṁsīśchānuvyachalan ॥11॥*
*itihāsasya cha vai sa purāṇasya cha gāthānāṁ cha nārāśaṁsīnāṁ cha priyaṁ dhāma bhavati ya evaṁ veda ॥12॥*
*sa paramāṁ diśamanu vyachalat ॥13॥*
*tamāhavanīyaścha gārhapatyaścha dakṣiṇāgniścha yāścha yajamānaścha paśavaśchānuvyachalan ॥14॥*
*āhavanīyasya cha vai sa gārhapatyasya cha dakṣiṇāgneścha yāsya cha yajamānasya cha paśūnāṁ cha priyaṁ dhāma bhavati ya evaṁ veda ॥15॥*
*so'nādiṣṭāṁ diśamanu vyachalat ॥16॥*
*tamṛtavaśchārtavāścha lokāścha laukayāścha māsāśchārdhamāsāśchāhorātre chānuvyachalan ॥17॥*
*ṛtūnāṁ cha vai sa ārtavānāṁ cha lokānāṁ cha laukyānāṁ cha māsānāṁ chārdhamāsānāṁ chāhorātrayoścha priyaṁ dhāma bhavati ya evaṁ veda ॥18॥*
*so'nāvṛttāṁ diśamanu vyachalat tato nāvartsyannamanyata ॥19॥*
*taṁ ditiśchāditiśchedā chendrāṇī chānuvyachalan ॥20॥*
*diteścha vai so'diteśchedāyāśchendrāṇyāścha priyaṁ dhāma bhavati ya evaṁ veda ॥21॥*
*sa diśo'nu vyachalat taṁ virāḍanu vyachalat sarve cha devāḥ sarvāścha devatāḥ ॥22॥*
*virājaścha vai sa sarveṣāṁ cha devānāṁ sarvāsāṁ cha devātānāṁ priyaṁ dhāma bhavati ya evaṁ veda ॥23॥*
*sa sarvānantardeśānanu vyachalat ॥24॥*
*taṁ prajāpatiścha parameṣṭhī cha pitā cha pitāmahaśchānuvyachalan ॥25॥*
*prajāpateścha vai sa parameṣṭhinaścha pituścha pitāmahasya cha priyaṁ dhāma bhavati ya evaṁ veda ॥26॥*

अ. (Av.) १५.७.१-५

स महिमा सद्रुर्भूत्वान्तं पृथिव्या अगच्छत् स समुद्रोऽभवत् ॥१॥
तं प्रजापतिश्च परमेष्ठी च पिता च पितामहश्चापश्च श्रद्धा च वर्षं भूत्वानुव्यवर्तयन्त ॥२॥
ऐनमापो गच्छत्यैनं श्रद्धा गच्छन्त्यैनं वर्षं गच्छति य एवं वेद ॥३॥
तं श्रद्धा च याश्च लोकश्चान्नं चान्नाद्यं च भूत्वाभिपर्यावर्तन्त ॥४॥
ऐनं श्रद्धा गच्छत्यैनं याो गच्छत्यैनं लोको गच्छत्यैनमन्नं
गच्छत्यैनमन्नाद्यं गच्छति य एवं वेद ॥५॥

*sa mahimā sadrurbhūtvāntaṁ pṛthivyā agachchhat sa samudro'bhavat ॥1॥*
*taṁ prajāpatiścha parameṣṭhī cha pitā cha pitāmahaśchāpaścha śraddhā cha varṣa bhūtvānuvyavartayanta ॥2॥*

*ainamāpo gachchhatyainaṁ śraddhā gachchhantyainaṁ varṣa gachchhati ya evaṁ veda ॥3 ॥*
*taṁ śraddhā cha yāścha lokaśchānnaṁ chānnādyaṁ cha bhūtvābhiparyāvartanta ॥4 ॥*
*ainaṁ śraddhā gachchhatyainaṁ yāo gachchhatyainaṁ loko gachchhatyainamannaṁ*
*gachchhatyainamannādyaṁ gachchhati ya evaṁ veda ॥5 ॥*

अ. (Av.) १५.८.१-३
सोऽरज्यत ततो राज्न्योऽजायत ॥१ ॥
स विशः सबन्धूनन्नमन्नाद्यमभ्युदतिष्ठत् ॥२ ॥
विशां च वै स सबन्धूनां चान्नस्य चान्नाद्यस्य च प्रियं धाम भवति य एवं वेद ॥३ ॥
*so'rajyata tato rājnyo'jāyata ॥1 ॥*
*sa viśaḥ sabandhūnannamannādyamabhyudatiṣṭhat ॥2 ॥*
*viśāṁ cha vai sa sabandhūnāṁ chānnasya chānnādyasya cha priyaṁ dhāma bhavati ya evaṁ veda ॥3 ॥*

अ. (Av.) १५.९.१-३
स विशोऽनु व्यचलत् ॥१ ॥
तं सभा च समितिश्च सेना च सुरा चानुव्यचलन् ॥२ ॥
सभायाश्च वै स समितेश्च सेनायाश्च सुरायाश्च प्रियं धाम भवति य एवं वेद ॥३ ॥
*sa viśo'nu vyachalat ॥1 ॥*
*taṁ sabhā cha samitiścha senā cha surā chānuvyachalan ॥2 ॥*
*sabhāyāścha vai sa samiteścha senāyāścha surāyāścha priyaṁ dhāma bhavati ya evaṁ veda ॥3 ॥*

अ. (Av.) १५.१०.१-११
तद् यस्यैवं विद्वान् व्रात्यो राज्ञोऽतिथिर्गृहानागच्छेत् ॥१ ॥
श्रेयांसमेनमात्मनो मानयेत् तथा क्षत्राय ना वृश्चते तथा राष्ट्राय ना वृश्चते ॥२ ॥
अतो वै ब्रह्म च क्षत्रं चोदतिष्ठतां ते अब्रूतां कं प्र विशावेति ॥३ ॥
अतो वै बृहस्पतिमेव ब्रह्म प्र विशत्विन्द्रं क्षत्रं तथा वा इति ॥४ ॥
अतो वै बृहस्पतिमेव ब्रह्म प्राविशदिन्द्रं क्षत्रम् ॥५ ॥
इयं वा उ पृथिवी बृहस्पतिर्द्यौरेवेन्द्रः ॥६ ॥
अयं वा उ अग्निर्ब्रह्मासावादित्यः क्षत्रम् ॥७ ॥
ऐनं ब्रह्म गच्छति ब्रह्मवर्चसी भवति ॥८ ॥
यः पृथिवीं बृहस्पतिमग्निं ब्रह्म वेद ॥९ ॥
ऐनमिन्द्रियं गच्छतीन्द्रियवान् भवति ॥१० ॥
य आदित्यं क्षत्रं दिवमिन्द्रं वेद ॥११ ॥
*tad yasyaivaṁ vidvān vrātyo rāāo'tithirgṛhānāgachchhet ॥1 ॥*
*śreyāṁsamenamātmano mānayet tathā kṣatrāya nā vṛśchate tathā rāṣṭrāya nā vṛśchate ॥2 ॥*
*ato vai brahma cha kṣatraṁ chodatiṣṭhatāṁ te abrūtāṁ kaṁ pra viśāveti ॥3 ॥*
*ato vai bṛhaspatimeva brahma pra viśatvindraṁ kṣatraṁ tathā vā iti ॥4 ॥*
*ato vai bṛhaspatimeva brahma prāviśadindraṁ kṣatram ॥5 ॥*
*iyaṁ vā u pṛthivī bṛhaspatirdyaurevendraḥ ॥6 ॥*
*ayaṁ vā u agnirbrahmāsāvādityaḥ kṣatram ॥7 ॥*
*ainaṁ brahma gachchhati brahmavarchasī bhavati ॥8 ॥*
*yaḥ pṛthivīṁ bṛhaspatimagniṁ brahma veda ॥9 ॥*
*ainamindriyaṁ gachchhatīndriyavān bhavati ॥10 ॥*
*ya ādityaṁ kṣatraṁ divamindraṁ veda ॥11 ॥*

अ. (Av.) १५.११.१-११

तद् यस्यैवं विद्वान् व्रात्योऽतिथिर्गृहानागच्छेत् ॥१॥
स्वयमेनमभ्युदेत्य ब्रूयाद् व्रात्य क्वाऽवात्सीर्व्रात्योकदं व्रात्य तर्पयन्तु व्रात्य यथा ते प्रियं तथास्तु व्रात्य यथा ते वशस्तथास्तु व्रात्य यथा ते निकमस्तथास्त्विति ॥२॥
यदेनमाह व्रात्य क्वाऽवात्सीरिति पथ एव तेन देवयानानव रुन्द्धे ॥३॥
यदेनमाह व्रात्योदकमित्यय एव तेनाव रुन्द्धे ॥४॥
यदेनमाह व्रात्य तर्पयन्त्विति प्राणमेव तेन वर्षीयांसं कुरुते ॥५॥
यदेनमाह व्रात्य यथा ते प्रियं तथास्त्विति प्रियमेव तेनाव रुन्द्धे ॥६॥
ऐनं प्रियं गच्छति प्रियः प्रियस्य भवति य एवं वेद ॥७॥
यदेनमाह व्रात्य यथा ते वशस्तथास्त्विति वशमेव तेनाव रुन्द्धे ॥८॥
ऐनं वशो गच्छति वशी वशिनां भवति य एवं वेद ॥९॥
यदेनमाह व्रात्य यथा ते निकामस्तथास्त्विति निकाममेव तेनाव रुन्द्धे ॥१०॥
ऐनं निकामो गच्छति निकामे निकामस्य भवति य एवं वेद ॥११॥

*tad yasyaivaṁ vidvān vrātyo'tithirgṛhānāgachchhet //1 //*
*svayamenamabhyudetya brūyād vrātya kvā'vātsīrvrātyokadaṁ vrātya tarpayantu vrātya yathā te priyaṁ tathāstu vrātya yathā te vaśastathāstu vrātya yathā te nikamastathāstviti //2 //*
*yadenamāha vrātya kvā'vātsīriti patha eva tena devayānānava runddhe //3 //*
*yadenamāha vrātyodakamityaya eva tenāva runddhe //4 //*
*yadenamāha vrātya tarpayantviti prāṇameva tena varṣīyāṁsaṁ kurute //5 //*
*yadenamāha vrātya yathā te priyaṁ tathāstviti priyameva tenāva runddhe //6 //*
*ainaṁ priyaṁ gachchhati priyaḥ priyasya bhavati ya evaṁ veda //7 //*
*yadenamāha vrātya yathā te vaśastathāstviti vaśameva tenāva runddhe //8 //*
*ainaṁ vaśo gachchhati vaśī vaśināṁ bhavati ya evaṁ veda //9 //*
*yadenamāha vrātya yathā te nikāmastathāstviti nikāmameva tenāva runddhe //10 //*
*ainaṁ nikāmo gachchhati nikāme nikāmasya bhavati ya evaṁ veda //11 //*

अ. (Av.) १५.१२.१-११

तद् यस्यैवं विद्वान् व्रात्य उद्धृतेष्वग्निष्वधिश्रितेऽग्निहोत्रेऽतिथिर्गृहानागच्छेत् ॥१॥
स्वयमेनमभ्युदेत्य ब्रूयाद् व्रात्याति सृज होष्यामीति ॥२॥
स चातिसृजेज्जुहुयान्न चातिसृजेन्न जुहुयात् ॥३॥
स य एवं विदुषा व्रात्येनातिसृष्टो जुहोति ॥४॥
प्र पितृयाणं पन्थां जानाति प्र देवयानम् ॥५॥
न देवेष्वा वृश्चते हुतमस्य भवति ॥६॥
पर्यस्यास्मिँल्लोक आयतनं शिष्यते य एवं विदुषा व्रात्येनातिसृष्टो जुहोति ॥७॥
अथ य एवं विदुषा व्रात्येनानतिसृष्टो जुहोति ॥८॥
न पितृयाणं पन्थां जानाति न देवयानम् ॥९॥
आ देवेषु वृश्चते अहुतमस्य भवति ॥१०॥
नास्यास्मिँल्लोक आयतनं शिष्यते य एवं विदुषा व्रात्येनानतिसृष्टो जुहोति ॥११॥

*tad yasyaivaṁ vidvān vrātya uddhṛteṣvagniṣvadhiśrite'gnihotre'tithirgṛhānāgachchhet //1 //*
*svayamenamabhyudetya brūyād vrātyāti sṛja hoṣyāmīti //2 //*
*sa chātisṛjejjuhuyānna chātisṛjenna juhuyāt //3 //*
*sa ya evaṁ viduṣā vrātyenātisṛṣṭho juhoti //4 //*
*pra pitṛyāṇaṁ panthāṁ jānāti pra devayānam //5 //*
*na deveṣvā vṛśchate hutamasya bhavati //6 //*
*paryasyāsiṁmalloka āyatanaṁ śiṣyate ya evaṁ viduṣā vrātyenātisṛṣṭo juhoti //7 //*
*atha ya evaṁ viduṣā vrātyenānatisṛṣṭo juhoti //8 //*
*na pitṛyāṇaṁ panthāṁ jānāti na devayānam //9 //*

*ā deveṣu vṛśchate ahutamasya bhavati* ॥10॥
*nāsyāsiṁmalloka āyatanaṁ śiṣyate ya evaṁ viduṣā vrātyenānatisṛṣṭo juhoti* ॥11॥

अ. (Av.) १५.१३.१-१४

तद् यस्यैवं विद्वान् व्रात्य एकां रात्रिमितिथिर्गृहे वसति ॥१॥
ये पृथिव्यां पुण्या लोकास्तानेव तेनाव रुन्द्धे ॥२॥
तद् यस्यैवं विद्वान् व्रात्यो द्वितीयां रात्रिमतिथिर्गृहे वसति ॥३॥
येऽन्तरिक्षे पुण्या लोकास्तानेव तेनाव रुन्द्धे ॥४॥
तद् यस्यैवं विद्वान् व्रात्यस्तृतीयां रात्रिमतिथिर्गृहे वसति ॥५॥
ये दिवि पुण्या लोकास्तानेव तेनाव रुन्द्धे ॥६॥
तद् यस्यैवं विद्वान् व्रात्यश्चतुर्थी रात्रिमतिथिर्गृहे वसति ॥७॥
ये पुण्यानां पुण्या लोकास्तानेव तेनाव रुन्द्धे ॥८॥
तद् यस्यैवं विद्वान् व्रात्योऽपरिमिता रात्रीरतिथिर्गृहे वसति ॥९॥
य एवापरिमिताः पुण्या लोकास्तानेव तेनाव रुन्द्धे ॥१०॥
अथ यस्याव्रात्यो व्रात्यब्रुवो नामबिभ्रत्यतिथिर्गृहानागच्छेत् ॥११॥
कर्षेदेनं न चैनं कर्षेत् ॥१२॥
अस्यै देवताया उदकं याचामीमां देवतां वासय इमामिमां देवता
परि वेवेष्मीत्येनं परि वेविष्यात् ॥१३॥
तस्यामेवास्य तद् देवतायां हुतं भवति य एवं वेद ॥१४॥

*tad yasyaivaṁ vidvān vrātya ekāṁ rātrimitithirgṛhe vasati* ॥1॥
*ye pṛthivyāṁ puṇyā lokāstāneva tenāva runddhe* ॥2॥
*tad yasyaivaṁ vidvān vrātyo dvitīyāṁ rātrimatithirgṛhe vasati* ॥3॥
*ye'ntarikṣe puṇyā lokāstāneva tenāva runddhe* ॥4॥
*tad yasyaivaṁ vidvān vrātyastṛtīyāṁ rātrimatithirgṛhe vasati* ॥5॥
*ye divi puṇyā lokāstāneva tenāva runddhe* ॥6॥
*tad yasyaivaṁ vidvān vrātyaśchaturthī rātrimatithirgṛhe vasati* ॥7॥
*ye puṇyānāṁ puṇyā lokāstāneva tenāva runddhe* ॥8॥
*tad yasyaivaṁ vidvān vrātyo'parimitā rātrīratithirgṛhe vasati* ॥9॥
*ya evāparimitāḥ puṇyā lokāstāneva tenāva runddhe* ॥10॥
*atha yasyāvrātyo vrātyabruvo nāmabibhratyatithirgṛhānāgachchhet* ॥11॥
*karṣedenaṁ na chainaṁ karṣet* ॥12॥
*asyai devatāyā udakaṁ yāchāmīmāṁ devatāṁ vāsaya imāmimāṁ devatā*
*pari veveṣmītyenaṁ pari veviṣyāt* ॥13॥
*tasyāmevāsya tad devatāyāṁ hutaṁ bhavati ya evaṁ veda* ॥14॥

अ. (Av.) १५.१४.१-२४

स यत् प्राचीं दिशमनु व्यचलन्मारुतं शर्धो भूत्वानुव्यचलन्मनोऽन्नादं कृतवा ॥१॥
मनसान्नादेनान्नमत्ति य एवं वेद ।२॥
स यद् दक्षिणां दिशमनु व्यचलदिन्द्रो भूत्वानुव्यचलद् बलमन्नादं कृत्वा ॥३॥
बलेनान्नादेनान्नमत्ति य एवं वेद ॥४॥
स यत् प्रतीचीं दिशमनु व्यचलद् वरुणो राजा भूत्वानुव्यचलदपोऽन्नादीः कृतवा ॥५॥
अद्भिरन्नादीभिरन्नमत्ति य एवं वेद ॥६॥
स यदुदीचीं दिशमनु व्यचलत् सोमो राजा भूत्वानुव्यचलत् सप्तर्षिभिर्हुत आहुतिमन्नादीं कृतवा ।७।
आहुत्यान्नाद्यन्नमत्ति य एवं वेद ॥८॥
स यद् ध्रुवां दिशमनु व्यचलद् विष्णुर्भूत्वानुव्यचलद् विराजमन्नादीं कृत्वा ॥९॥
विराजान्नाद्यन्नमत्ति य एवं वेद ॥१०॥
स यत् पशूननु व्यचलद् रुद्रो भूत्वानुव्यचलदोषधीरन्नादीः कृतवा ॥११॥
ओषधीभिरन्नादीभिरन्नमत्ति य एवं वेद ॥१२॥
स यत् पितृननु व्यचलद् यमो राजा भूत्वानुव्यचलत् स्वधाकारमन्नादं कृत्वा ॥१३॥

स्वधाकारेणान्नादेनान्नमत्ति य एवं वेद ॥१४॥
स यन्मनुष्या३ननु व्यचलदग्निर्भूत्वानुव्यचलत् स्वाहाकारमन्नादं कृत्वा ॥१५॥
स्वाहाकारेणान्नादेनान्नमत्ति य एवं वेद ॥१६॥
स यदूर्ध्वा दिशमनु व्यचलद् बृहस्पतिर्भूत्वानुव्यचलद् वषट्कारमन्नादं कृत्वा ॥१७॥
वषट्कारेणान्नादेनान्नमत्ति य एवं वेद ॥१८॥
स यद् देवाननु व्यचलदीशानो भूत्वानुव्यचलन्मन्युमन्नादं कृत्वा ॥१९॥
मन्युनान्नादेनान्नमत्ति य एवं वेद ॥२०॥
स यत् प्रजा अनु व्यचलत् प्रजापतिर्भूत्वानुव्यचलत् प्राणमन्नादं कृत्वा ॥२१॥
प्राणेनान्नादेनान्नमत्ति य एवं वेद ॥२२॥
स यत् सर्वानन्तर्देशाननु व्यचलत् परमेष्ठी भूत्वानुव्यचलद् ब्रह्मन्नादं कृत्वा ॥२३॥
ब्रह्मणान्नादेनान्नमत्ति य एवं वेद ॥२४॥

*sa yat prāchīṁ diśamanu vyachalanmārutaṁ śardho bhūtvānuvyachalanmano'nnādaṁ kṛtavā ॥1॥*
*manasānnādenānnamatti ya evaṁ veda ।2॥*
*sa yad dakṣiṇāṁ diśamanu vyachaladindro bhūtvānuvyachalad balamannādaṁ kṛtvā ॥3॥*
*balenānnādenānnamatti ya evaṁ veda ॥4॥*
*sa yat pratīchīṁ diśamanu vyachalad varuṇo rājā bhūtvānuvyachaladapo'nnādīḥ kṛtavā ॥5॥*
*adbhirannādībhirannamatti ya evaṁ veda ॥6॥*
*sa yadudīchīṁ diśamanu vyachalat somo rājā bhūtvānuvyachalat saptarṣibhirhuta āhutimannādīṁ kṛtavā ।7।*
*āhutyānnādyannamatti ya evaṁ veda ॥8॥*
*sa yad dhruvāṁ diśamanu vyachalad viṣṇurbhūtvānuvyachalad virājamannādīṁ kṛtvā ॥9॥*
*virājānnādyannamatti ya evaṁ veda ॥10॥*
*sa yat paśūnanu vyachalad rudro bhūtvānuvyachaladoṣadhīrannādīḥ kṛtavā ॥11॥*
*Oṣadhībhirannādībhirannamatti ya evaṁ veda ॥12॥*
*sa yat pitṝnanu vyachalad yamo rājā bhūtvānuvyachalat svadhākāramannādaṁ kṛtvā ॥13॥*
*svadhākāreṇānnādenānnamatti ya evaṁ veda ॥14॥*
*sa yanmanuṣyā3nanu vyachaladagnirbhūtvānuvyachalat svāhākāramannādaṁ kṛtvā ॥15॥*
*svāhākāreṇānnādenānnamatti ya evaṁ veda ॥16॥*
*sa yadūrdhvā diśamanu vyachalad bṛhaspatirbhūtvānuvyachalad vaṣaṭkāramannādaṁ kṛtvā ॥17॥*
*vaṣaṭkāreṇānnādenānnamatti ya evaṁ veda ॥18॥*
*sa yad devānanu vyachaladīśāno bhūtvānuvyachalanmanyumannādaṁ kṛtvā ॥19॥*
*manyunānnādenānnamatti ya evaṁ veda ॥20॥*
*sa yat prajā anu vyachalat prajāpatirbhūtvānuvyachalat prāṇamannādaṁ kṛtvā ॥21॥*
*prāṇenānnādenānnamatti ya evaṁ veda ॥22॥*
*sa yat sarvānantardeśānanu vyachalat parameṣṭhī bhūtvānuvyachalad brahmannādaṁ kṛtvā ॥23॥*
*brahmaṇānnādenānnamatti ya evaṁ veda ॥24॥*

अ. (Av.) १५.१५.१-९

तस्य व्रात्यस्य ॥१॥
सप्त प्राणाः सप्तापानाः सप्त व्यानाः ॥२॥
तस्य व्रात्यस्य। योऽस्य प्रथमः प्राण ऊर्ध्वो नामायं सो अग्निः ॥३॥

तस्य व्रात्यस्य। योऽस्य द्वितीयः प्राणः प्रौढो नामासौ स आदित्यः ॥४॥
तस्य व्रात्यस्य। योऽऽस्य तृतीयः प्राणो३भ्यूढो नामसौ स चन्द्रमाः ॥५॥
तस्य व्रात्यस्य। योऽस्य चतुर्थः प्राणो विभूर्नामायं स पवमानः ॥६॥
तस्य व्रात्यस्य। योऽस्य पंचमः प्राणो योनिर्नाम ता इमा आपः ॥७॥
तस्य व्रात्यस्य। योऽस्य षष्ठः प्राणः प्रियो नाम त इमे पशवः ॥८॥
तस्य व्रात्यस्य। योऽस्य सप्तमः प्राणोऽपरिमितो नाम ता इमाः प्रजाः ॥९॥

*tasya vrātyasya ॥1॥*
*sapta prāṇāḥ saptāpānāḥ sapta vyānāḥ ॥2॥*
*tasya vrātyasya । yo'sya prathamaḥ prāṇa ūrdhvo nāmāyaṁ so agniḥ ॥3॥*
*tasya vrātyasya । yo'sya dvitīyaḥ prāṇaḥ prauḍho nāmāsau sa ādityaḥ ॥4॥*
*tasya vrātyasya । yo''sya tṛtīyaḥ prāṇo3bhyūḍho nāmasau sa chandramāḥ ॥5॥*
*tasya vrātyasya । yo'sya chaturthaḥ prāṇo vibhūrnāmāyaṁ sa pavamānaḥ ॥6॥*
*tasya vrātyasya । yo'sya paṁchamaḥ prāṇo yonirnāma tā imā āpaḥ ॥7॥*
*tasya vrātyasya । yo'sya ṣaṣṭhaḥ prāṇaḥ priyo nāma ta ime paśavaḥ ॥8॥*
*tasya vrātyasya । yo'sya saptamaḥ prāṇo'parimito nāma tā imāḥ prajāḥ ॥9॥*

अ. (Av.) १५.१६.१-७

तस्य व्रात्यस्य। योऽस्य प्रथमोऽपानः सा पौर्णमासी ॥१॥
तस्य व्रात्यस्य। योऽस्य द्वितीयोऽपानः साष्टका ॥२॥
तस्य व्रात्यस्य। योऽस्य तृतीयोऽपानः सामावास्या ॥३॥
तस्य व्रात्यस्य। योऽस्य चतुर्थोऽपान्ः सा श्रद्धा ॥४॥
तस्य व्रात्यस्य। योऽस्य पंचमोऽपानः सा दीक्षा ॥५॥
तस्य व्रात्यस्य। योऽस्य षष्ठोऽपानः स याः ॥६॥
तस्य व्रात्यस्य। योऽस्य सप्तमोऽपानस्ता इमा दक्षिणाः ॥७॥

*tasya vrātyasya । yo'sya prathamo'pānaḥ sā paurṇamāsī ॥1॥*
*tasya vrātyasya । yo'sya dvitīyo'pānaḥ sāṣṭakā ॥2॥*
*tasya vrātyasya । yo'sya tṛtīyo'pānaḥ sāmāvāsyā ॥3॥*
*tasya vrātyasya । yo'sya chaturtho'pānḥ sā śraddhā ॥4॥*
*tasya vrātyasya । yo'sya paṁchamo'pānaḥ sā dīkṣā ॥5॥*
*tasya vrātyasya । yo'sya ṣaṣṭho'pānaḥ sa yāḥ ॥6॥*
*tasya vrātyasya । yo'sya saptamo'pānastā imā dakṣiṇāḥ ॥7॥*

अ. (Av.) १५.१७.१-१०

तस्य व्रात्यस्य। योऽस्य प्रथमो व्यानः सेयं भूमिः ॥१॥
तस्य व्रात्यस्य। योऽस्य द्वितीयो व्यानस्तदन्तरिक्षम् ॥२॥
तस्य व्रात्यस्य। योऽस्य तृतीयो व्यानः सा द्यौः ॥३॥
तस्य व्रात्यस्य। योऽस्य चतुर्थो व्यानस्तानि नक्षत्राणि ॥४॥
तस्य व्रात्यस्य। योऽस्य पंचमो व्यानस्त ऋतवः ॥५॥
तस्य व्रात्यस्य। योऽस्य षष्ठो व्यानस्त आर्तवाः ॥६॥
तस्य व्रात्यस्य। योऽस्य सप्तमो व्यानः स संवत्सरः ॥७॥
तस्य व्रात्यस्य। समानमर्थं परि यन्ति देवाः संवत्सरं वा एतदृतवोऽनुपरियन्ति व्रात्यं च ॥८॥
तस्य व्रात्यस्य। यदादित्यमभिसंविशन्त्यमावामयांचैव तत् पौर्णमासीं च ॥९॥
तस्य व्रात्यस्य। एकं तदेषाममृतत्वमित्याहुतिरेव ॥१०॥

*tasya vrātyasya । yo'sya prathamo vyānaḥ seyaṁ bhūmiḥ ॥1॥*
*tasya vrātyasya । yo'sya dvitīyo vyānastadantarikṣam ॥2॥*
*tasya vrātyasya । yo'sya tṛtīyo vyānaḥ sā dyauḥ ॥3॥*
*tasya vrātyasya । yo'sya chaturtho vyānastāni nakṣatrāṇi ॥4॥*
*tasya vrātyasya । yo'sya paṁchamo vyānasta ṛtavaḥ ॥5॥*
*tasya vrātyasya । yo'sya ṣaṣṭho vyānasta ārtavāḥ ॥6॥*
*tasya vrātyasya । yo'sya saptamo vyānaḥ sa saṁvatsaraḥ ॥7॥*

*tasya vrātyasya । samānamartha pari yanti devāḥ saṁvatsaraṁ vā etaddatavo'nupariyanti vrātyaṁ cha ॥8 ॥*

*tasya vrātyasya । yadādityamabhisaṁviśantyamāvāmayāṁchaiva tat paurṇamāsīṁ cha ॥9 ॥*

*tasya vrātyasya । ekaṁ tadeṣāmamṛtatvamityāhutireva ॥10 ॥*

अ. (Av.) १५.१८.१-५

तस्य व्रात्यस्य ॥१॥

यदस्य दक्षिणमक्ष्यसौ स आदित्यो यदस्य सव्यमक्ष्यसौ स चन्द्रमाः ॥२॥

योऽस्य दक्षिणः कर्णोऽयं सो अग्निर्योऽस्य सव्यः कर्णोऽयं स पवमानः ॥३॥

अहोरात्रे नासिके दितिश्चादितिश्च शीर्षकपाले संवत्सरः शिरः ॥४॥

अह्ना प्रत्यङ् व्रात्यो रात्र्या प्राङ् नमो व्रात्याय ॥५॥

*tasya vrātyasya ॥1 ॥*

*yadasya dakṣiṇamakṣayasau sa ādityo yadasya savyamakṣayasau sa chandramāḥ ॥2 ॥*

*yo'sya dakṣiṇaḥ karṇo'yaṁ so agniryo'sya savyaḥ karṇo'yaṁ sa pavamānaḥ ॥3 ॥*

*ahorātre nāsike ditiśchāditiścha śīrṣakapāle saṁvatsaraḥ śiraḥ ॥4 ॥*

*ahnā pratyaṅ vrātyo rātrayā prāṅ namo vrātyāya ॥5 ॥*

११७. शंखमणिः कृशनः (Śaṁkhamaṇiḥ Kṛśanaḥ) - अ. (Av.) ४.१०.१-७

वाताज्जातो अन्तरिक्षाद् विद्युतो ज्योतिषस्परि ।
स नो हिरण्यजाः शंखः कृशनः पात्वंहसः ॥१॥
यो अग्रतो रोचनानां समुद्रादधि जिाषे ।
शंखेन हत्वा रक्षांस्यत्त्रिणो वि षहामहे ॥२॥
शंखेनाभीवाममतिं शंखेनोत सदान्वाः ।
शंखो नो विश्वभेषजः कृशनः पात्वंहसः ॥३॥
दिवि जातः समुद्रजः सिन्धुतस्पर्याभृतः ।
स नोहिरण्यजाः शंख आयुष्प्रतरणो मणिः ॥४॥
समुद्राज्जातो मणिर्वृत्राज्जातो दिवाकरः ।
सो अस्मान्त्सर्वतः पातु हेत्या देवासुरेभ्यः ॥५॥
हिरण्यानामेकोऽसि सोमात् त्वमधि जिाषे ।
रथे त्वमसि दर्शत इषुधौ रोचनस्त्वं प्र ण आयूंषि तारिषत् ॥६॥
देवानामस्थि कृशनं बभूव तदात्मन्वच्चरत्यप्स्व१न्तः ।
तत् ते बध्नाम्यायुषे वर्चसे बलाय दीर्घायुत्वायशतशारदाय कार्शनस्त्वाभि रक्षतु ॥७॥

*vātājjāto antarikṣād vidyuto jyotiṣaspari ।*
*sa no hiraṇyajāḥ śaṁkhaḥ kṛśanaḥ pātvaṁhasaḥ ॥1 ॥*
*yo agrato rochanānāṁ samudrādadhi jiāṣe ।*
*śaṁkhena hatvā rakṣāṁsyattriṇo vi ṣahāmahe ॥2 ॥*
*śaṁkhenābhīvāmamatiṁ śaṁkhenota sadānvāḥ ।*
*śaṁkho no viśvabheṣajaḥ kṛśanaḥ pātvaṁhasaḥ ॥3 ॥*
*divi jātaḥ samudrajaḥ sindhutasparyābhṛtaḥ ।*
*sa nohiraṇyajāḥ śaṁkha āyuspratarаṇo maṇiḥ ॥4 ॥*
*samudrājjāto maṇirvṛtrājjāto divākaraḥ ।*
*so asmāntsarvataḥ pātu hetyā devāsurebhyaḥ ॥5 ॥*
*hiraṇyānāmeko'si somāt tvamadhi jiāṣe ।*
*rathe tvamasi darśata iṣudhau rochanastvaṁ pra ṇa āyūṁṣi tāriṣat ॥6 ॥*
*devānāmasthi kṛśanaṁ babhūva tadātmanvachcharatyapsva1ntaḥ ।*
*tat te badhnāmyāyuṣe varchase balāya dīrghāyutvāyaśataśāradāya kārśanastvābhi rakṣatu ॥7 ॥*

११८. शतौदनाः (Śataudanāḥ) - अ. (Av.) १०.९.१-२७

अघायतामपि नह्या मुखानि सपत्नेषु वज्रमर्पयैतम् ।
इन्द्रेण दत्ता प्रथमा शतौदना भ्रातृव्यघ्नी यजमानस्य गातुः ॥१॥
वेदिष्टे चर्म भवतु बर्हिर्लोमानि यानि ते ।
एषा त्वा रशनाग्रभीद् ग्रावा त्वैषोऽधि नृत्यतु ॥२॥
बालास्ते प्रोक्षणीः सन्तु जिह्वा सं मार्ष्ट्वघ्न्ये ।
शुद्धा त्वं यिया भूतवा दिवं प्रेहि शतौदने ॥३॥
यः शतौदनां पचति कामप्रेण स कल्पते ।
प्रीता ह्यस्य ऋत्विजः सर्वे यन्ति यथा यथम् ॥४॥
स स्वर्गमा रोहति यत्रादस्त्रिदिवं दिवः ।
अपूपनाभि कृत्वा यो ददाति शतौदनाम् ॥५॥
स ताल्लौँकान्त्समाप्नोति ये दिव्या ये च पार्थिवाः ।
हिरण्यज्योतिषं कृत्वा यो ददाति शतौदनाम् ॥६॥
ये ते देवि शमितारः पक्तारो ये च ते जनाः ।
ते त्वा सर्वे गोप्स्यन्ति मैभ्यो भैषीः शतौदने ॥७॥
वसवस्त्वा दक्षिणत उत्तरान्मरुतस्त्वा ।
आदित्याः पश्चाद् गोप्स्यन्ति साग्निष्टोममति द्रव ॥८॥
देवाः पितरो मनुष्यागन्धर्वाप्सरसश्च ये ।
ते त्वा सर्वे गोप्स्यन्ति सातिरात्रमतिं द्रव ॥९॥
अन्तरिक्षं दिवं भूमिमादित्यान् मरुतो दिशः ।
लोकान्त्स सर्वानाप्नोति यो ददाति शतौदनाम् ॥१०॥
घृतं प्रोक्षन्ती सुभगा देवी देवान् गमिष्यति ।
पक्तारमघ्न्ये मा हिंसीर्दिवं प्रेहि शतौदने ॥११॥
ये देवा दिविषदो अन्तरिक्षसदश्च ये ये चेमे भूम्यामधि ।
तेभ्यस्त्वं धुक्ष्व सर्वदा क्षीरं सर्पिरथो मधु ॥१२॥
यत् ते शिरो यत् ते मुखं यौ कर्णौ ये च ते हनू ।
आमिक्षां दुह्रतां दात्रे क्षीरं सर्पिरथो मधु ॥१३॥
यौ त ओष्ठौ ये नासिके ये श्रृंगे ये च तेऽक्षिणी ।
आमिक्षां दुह्रतां दात्रे क्षीरं सर्पिरथो मधु ॥१४॥
यत्ते क्लोमा यद्धृदयं पुरीतत् सहकण्ठिका ।
आमिक्षां दुह्रतां दात्रे क्षीरं सर्पिरथो मधु ॥१५॥
यत् ते यकृद्ये मतस्ने यदान्त्रं याश्च ते गुदाः ।
आमिक्षां दुह्रतां दात्रे क्षीरं सर्पिरथो मधु ॥१६॥
यस्ते प्लाशिर्यो वनिष्ठुर्यौ कुक्षी यच्च चर्म ते ।
आमिक्षां दुह्रतां दात्रे क्षीरं सर्पिरथो मधु ॥१७॥
यत्ते मज्जा यदस्थि यन्मांसं यच्च लोहितम् ।
आमिक्षां दुह्रतां दात्रे क्षीरं सर्पिरथो मधु ॥१८॥
यौ ते बाहू ये दोषणी यावंसौ या च ते ककुत् ।
आमिक्षां दुह्रतां दात्रे क्षीरं सर्पिरथो मधु ॥१९॥
यास्ते ग्रीवा ये स्कन्धा याः पृष्टीर्याश्च पर्शवः ।
आमिक्षां दुह्रतां दात्रे क्षीरं सर्पिरथो मधु ॥२०॥
यौ त ऊरू अष्ठीवन्तौ ये श्रोणी या च ते भसत् ।
आमिक्षां दुह्रतां दात्रे क्षीरं सर्पिरथो मधु ॥२१॥
यत् ते पुच्छं ये ते बाला यदूधो ये च ते स्तनाः ।
आमिक्षां दुह्रतां दात्रे क्षीरं सर्पिरथो मधु ॥२२॥
यास्ते जङ्घा याः कुष्ठिका ऋच्छरा ये च ते शफाः ।

आमिक्षां दुह्रतां दात्रे क्षीरं सर्पिरथो मधु ॥२३॥
यत् ते चर्म शतौदने यानि लोमान्यघ्न्ये ।
आमिक्षां दुह्रतां दात्रे क्षीरं सर्पिरथो मधु ॥२४॥
क्रोडौ ते स्तां पुरोडाशावाज्येनाभिघारितौ ।
तौ पक्षौ देवि कृतवा सा पक्तारं दिवं वह ॥२५॥
उलूखले मुसले यश्च चर्मणि यो वा शूर्पे तण्डुलः कणः ।
यं वा वातो मातरिश्वा पवमानो ममाथाग्निष्टद्धोता सुहुतं कृणोतु॥२६॥
अपो देवीर्मधुमतीर्घृतश्चतुतो ब्रह्मणां हस्तेषु प्रपृथक् सादयामि ।
यत्काम इदमभिषिंचामि वोऽहं तन्मे सर्वर् सं पद्यतां वयं स्याम पतयो रयीणाम्॥२७।

*aghāyātāmapi nahyā mukhāni sapatneṣu vajramarpayaitam /*
*indreṇa dattā prathamā śataudanā bhrātṛvyaghnī yajamānasya gātuḥ //1 //*
*vediṣṭe charma bhavatu barhirlomāni yāni te /*
*eṣā tvā raśanāgrabhīd grāvā tvaiṣo'dhi nṛtyatu //2 //*
*bālāste prokṣaṇīḥ santu jihnā saṁ mārṣṭvaghnye /*
*śuddhā tvaṁ yiāyā bhūtavā divaṁ prehi śataudane //3 //*
*yaḥ śataudanāṁ pachati kāmapreṇa sa kalpate /*
*prītā hyasya ṛtvijaḥ sarve yanti yathā yatham //4 //*
*sa svargamā rohati yatrādastridivaṁ divaḥ /*
*apūpanābhi kṛtvā yo dadāti śataudanām //5 //*
*sa tāllom̐kāntsamāpnoti ye divyā ye cha pārthivāḥ /*
*hiraṇyajyotiṣaṁ kṛtvā yo dadāti śataudanām //6 //*
*ye te devi śamitāraḥ paktāro ye cha te janāḥ /*
*te tvā sarve gopsyanti maibhyo bhaiṣīḥ śataudane //7 //*
*vasavastvā dakṣiṇata uttarānmarutastvā /*
*ādityāḥ paśchād gopsyanti sāgniṣṭomamati drava //8 //*
*devāḥ pitaro manuṣyāgandharvāpsarasaścha ye /*
*te tvā sarve gopsyanti sātirātramatiṁ drava //9 //*
*antarikṣaṁ divaṁ bhūmimādityān maruto diśaḥ /*
*lokāntsa sarvānāpnoti yo dadāti śataudanām //10 //*
*ghṛtaṁ prokṣantī subhagā devī devān gamiṣyati /*
*paktāramaghnye mā hiṁsīrdivaṁ prehi śataudane //11 //*
*ye devā diviṣado antarikṣasadaścha ye ye cheme bhūmyāmadhi /*
*tebhyastvaṁ dhukṣava sarvadā kṣīraṁ sarpiratho madhu //12 //*
*yat te śiro yat te mukhaṁ yau karṇau ye cha te hanū /*
*āmikṣāṁ duhratāṁ dātre kṣīraṁ sarpiratho madhu //13 //*
*yau ta Oṣṭhau ye nāsike ye śṛṅge ye cha te'kṣiṇī /*
*āmikṣāṁ duhratāṁ dātre kṣīraṁ sarpiratho madhu //14 //*
*yatte klomā yaddhṛdayaṁ purītat sahakaṇṭhikā /*
*āmikṣāṁ duhratāṁ dātre kṣīraṁ sarpiratho madhu //15 //*
*yat te yakṛdye matasne yadāntraṁ yāścha te gudāḥ /*
*āmikṣāṁ duhratāṁ dātre kṣīraṁ sarpiratho madhu //16 //*
*yaste plāśiryo vaniṣṭhuryau kukṣī yachcha charma te /*
*āmikṣāṁ duhratāṁ dātre kṣīraṁ sarpiratho madhu //17 //*
*yatte majjā yadasthi yanmāṁsaṁ yachcha lohitam /*
*āmikṣāṁ duhratāṁ dātre kṣīraṁ sarpiratho madhu //18 //*
*yau te bāhū ye doṣaṇī yāvaṁsau yā cha te kakut /*
*āmikṣāṁ duhratāṁ dātre kṣīraṁ sarpiratho madhu //19 //*
*yāste grīvā ye skandhā yāḥ pṛṣṭīryāścha parśavaḥ /*
*āmikṣāṁ duhratāṁ dātre kṣīraṁ sarpiratho madhu //20 //*

*yau ta ūrū aṣṭhīvantau ye śroṇī yā cha te bhasat /*
*āmikṣāṁ duhratāṁ dātre kṣīraṁ sarpiratho madhu //21 //*
*yat te puchchhaṁ ye te bālā yadūdho ye cha te stanāḥ /*
*āmikṣāṁ duhratāṁ dātre kṣīraṁ sarpiratho madhu //22 //*
*yāste jaṅghā yāḥ kuṣṭhikā ṛchchharā ye cha te śaphāḥ /*
*āmikṣāṁ duhratāṁ dātre kṣīraṁ sarpiratho madhu //23 //*
*yat te charma śataudane yāni lomānyaghnye /*
*āmikṣāṁ duhratāṁ dātre kṣīraṁ sarpiratho madhu //24 //*
*kroḍau te stāṁ puroḍāśāvājyenābhighāritau /*
*tau pakṣau devi kṛtavā sā paktāraṁ divaṁ vaha //25 //*
*ulūkhale musale yaścha charmaṇi yo vā śūrpe taṇḍulaḥ kaṇaḥ /*
*yaṁ vā vāto mātariśvā pavamāno mamāthāgniṣṭaddhotā suhutaṁ kṛṇotu //26 //*
*apo devīrmadhumatīrghṛtaśchatuto brahmaṇāṁ hasteṣu prapṛthak sādayāmi /*
*yatkāma idamabhiṣiṁchāmi vo'haṁ tanme sarvar saṁ padyatāṁ vayaṁ syāma patayo rayīṇām //27 /*

११९. श्येनादयः (Śyenādayaḥ) - अ. (Av.) ७.७०.१-५

यत् किं चासौ मनसा यच्च वाचा योर्जुहोति हविषा यजुषा ।
तन्मृत्युना निऋर्तिः संविदाना पुरा सत्यादाहुतिं हन्त्वस्य ॥१॥
यातुधाना निऋर्तिरादु रक्षस्ते अस्य घ्नन्त्वनृतेन सत्यम् ।
इन्द्रेषिता देवा आज्यमस्य मथ्नन्तु मा तत् सं पादि यदसौ जुहोति ॥२॥
आजिराधिराजौ श्येनौ संपातिनाविव ।
आज्यं पृतन्यतो हतां यो नः कश्चाभ्यघायति ॥३॥
अपांचौ त उभौ बाहू अपि नह्याम्यास्यम् ।
अग्नेर्देवस्य मन्युना तेन तेऽवधिषं हविः ॥४॥
अपि नह्यामि ते बाहू अपि नह्याम्यास्यम् । अग्नेर्घोरस्य मन्युना तेन तेऽवधिषं हविः ॥५॥
*yat kiṁ chāsau manasā yachcha vāchā yorjuhoti haviṣā yajuṣā /*
*tanmṛtyunā nirṛtiḥ saṁvidānā purā satyādāhutiṁ hantvasya //1 //*
*yātudhānā nirṛtirādu rakṣaste asya ghnantvanṛtena satyam /*
*indreṣitā devā ājyamasya mathnantu mā tat saṁ pādi yadasau juhoti //2 //*
*ājirādhirājau śyenau saṁpātināviva /*
*ājyaṁ pṛtanyato hatāṁ yo naḥ kaśchābhyaghāyati //3 //*
*apāṁchau ta ubhau bāhū api nahyāmyāsyam /*
*agnerdevasya manyunā tena te'vadhiṣaṁ haviḥ //4 //*
*api nahyāmi te bāhū api nahyāmyāsyam / agnerghorasya manyunā tena te'vadhiṣaṁ haviḥ //5 //*

१२०. सकामा अविष्यवः (Sakāmā Aviṣyavaḥ) - अ. (Av.) ३.२६.२

येऽस्यां स्थ दक्षिणायां दिश्यविष्यवो नाम देवास्तेषां वः काम इषवः ।
ते नो मृडत ते नोऽधि ब्रूत तेभ्यो वो नमस्तेभ्यो वः स्वाहा ॥२॥
*ye3syāṁ stha dakṣiṇāyāṁ diśyaviṣyavo nāma devāsteṣāṁ vaḥ kāma iṣavaḥ /*
*te no mṛḍata te no'dhi brūta tebhyo vo namastebhyo vaḥ svāhā //2 //*

१२१. सरस्वतीः (Sarasvatīḥ) - अ. (Av.) ५.७.४-५; १८.१.४१-४२

अ. (Av.) ५.७.४-५

सरस्वतीमनुमतिं भगं यन्तो हवामहे। वाचं जुष्टां मधुमतीमवादिषं देवानां देवहूतिषु ॥४॥
यं याचाम्यहं वाचा सरस्वत्या मनोयुजा। श्रद्धा तमद्य विन्दतु दत्ता सोमेन बभ्रुणा ॥५॥
*sarasvatīmanumatiṁ bhagaṁ yanto havāmahe / vāchaṁ juṣṭāṁ madhumatīmavādiṣaṁ devānāṁ devahūtiṣu //4 //*
*yaṁ yāchāmyahaṁ vāchā sarasvatyā manoyujā / śraddhā tamadya vindatu dattā*

*somena babhruṇā ॥5 ॥*

अ. (Av.) १८.१.४१-४२

सरस्वतीं देवयन्तो हवन्ते सरस्वतीमध्वरे तायमाने ।
सरस्वतीं सुकृतो हवन्ते सरस्वती दाशुषे वार्यं दात् ॥४१ ॥
सरस्वतीं पितरो हवन्ते दक्षिणा यामभिनक्षमाणाः ।
आसद्यास्मिन् बर्हिषि मादयध्वमनमीवा इष आ धेह्यस्मे ॥४२ ॥

*sarasvatīṁ devayanto havante sarasvatīmadhvare tāyamāne ।*
*sarasvatīṁ sukṛto havante sarasvatī dāśuṣe vārya dāt ॥41 ॥*
*sarasvatīṁ pitaro havante dakṣiṇā yāmabhinakṣamāṇāḥ ।*
*āsadyāsmin barhiṣi mādayadhvamanamīvā iṣa ā dhehyasme ॥42 ॥*

१२२. सवाता प्रविध्यन्तः (Savātā Pravidhyantaḥ) - अ. (Av.) ३.२६.४

येऽस्यां स्थोदीच्यां दिशि प्रविध्यन्तो नाम देवास्तेषां वो वात इषवः।
ते नो मृडत ते नोऽधि ब्रूत तेभ्यो वो नमस्तेभ्यो वः स्वाहा ॥४ ॥

*ye3syāṁ sthodīchyāṁ diśi pravidhyanto nāma devāsteṣāṁ vo vāta iṣavaḥ ।*
*te no mṛḍata te no'dhi brūta tebhyo vo namastebhyo vaḥ svāhā ॥4 ॥*

१२३. सविता (Savitā) - अ. (Av.) ५.२४.१; ७.१४.१-४

अ. (Av.) ५.२४.१

सविता प्रसवानामधिपतिः स मावतु। अस्मिन् ब्रह्मण्यस्मिन् कर्मण्यस्यां पुरोधायामस्यां प्रतिष्ठायामस्यां चित्त्यामस्यामाकूत्यामस्यामाशिष्यस्यां देवहूत्यां स्वाहा ॥१ ॥

*savitā prasavānāmadhipatiḥ sa māvatu । asmin brahmaṇyasmin karmaṇyasyāṁ purodhāyāmasyāṁ pratiṣṭhāyāmasyāṁ chittyāmasyāmākūtyāmasyāmāśiṣyasyāṁ devahūtyāṁ svāhā ॥1 ॥*

अ. (Av.) ७.१४.१-४

अभि त्यं देवं सवितारमोण्योः कविक्रतुम् ।
अर्चामि सत्यसवं रत्नधामभि प्रियं मतिम् ॥१ ॥
ऊर्ध्वा यस्यामतिर्भा अदिद्युतत् सवीमनि ।
हिरण्यपाणिरमिमीत सुक्रतुः कृपात् स्वः ॥२ ॥
सावीर्हि देव प्रथमाय पित्रे वर्ष्माणमस्मै वरिमाणमस्मै ।
अथास्मभ्यं सवितर्वार्याणि दिवोदिव आ सुवा भूरि पश्वः ॥३ ॥
दमूना देवः सविता वरेण्यो दधद् रत्नं दक्षं पितृभ्य आयूंषि ।
पिबात् सोमं ममददेनमिष्टे परिज्मा चित् क्रमते अस्य धर्मणि ॥४ ॥

*abhi tyaṁ devaṁ savitāramoṇyoḥ kavikratum ।*
*archāmi satyasavaṁ ratnadhāmabhi priyaṁ matim ॥1 ॥*
*ūrdhvā yasyāmatirbhā adidyutat savīmani ।*
*hiraṇyapāṇiramimīta sukratuḥ kṛpāt svaḥ ॥2 ॥*
*sāvīrhi deva prathamāya pitre varṣmāṇamasmai varimāṇamasmai ।*
*athāsmabhyaṁ savitarvāryāṇi divodiva ā suvā bhūri paśvaḥ ॥3 ॥*
*damūnā devaḥ savitā vareṇyo dadhad ratnaṁ dakṣaṁ pitṛbhya āyūṁṣi ।*
*pibāt somaṁ mamadadenamiṣṭe parijmā chit kramate asya dharmaṇi ॥4 ॥*

१२४. सविता , अग्निः सरस्वती ब्रह्मणस्पतिः (Savitā, Agniḥ Sarasvatī Brahmaṇaspatiḥ) - अ. (Av.) ४.४.६

अद्याग्ने अद्य सवितरद्य देवि सरस्वति। अद्यास्य ब्रह्मणस्पते धनुरिबा तानया पसः ॥६ ॥

*adyāgne adya savitaradya devi sarasvati । adyāsya brahmaṇaspate dhanuribā tānayā pasaḥ ॥6 ॥*

१२५. सवित्रादयः (Savitrādayaḥ) - अ. (Av.) ६.६८.१-३

आयमगन्त्सविता क्षुरेणोष्णेन वाय उदकेनेहि ।

आदित्या रुद्रा वसव उन्दन्तु सचेतसः सोमस्य राो वपत प्रचेतसः ॥१॥
अदितिः शमश्रु वपत्वाप उन्दन्तु वर्चसा ।
चिकित्सतु प्रजापतिर्दीर्घायुत्वाय चक्षसे ॥२॥
येनावपत् सविता क्षुरेण सोमस्य राो वरुणस्य विद्वान् ।
तेन ब्राह्मणो वपतेदमस्य गोमानश्ववानयमस्तु प्रजावान् ॥३॥
*āyamagantsavitā kṣureṇoṣṇena vāya udakenehi ।*
*ādityā rudrā vasava undantu sachetasaḥ somasya rāāo vapata prachetasaḥ ॥1॥*
*aditiḥ śamaśru vapatvāpa undantu varchasā ।*
*chikitsatu prajāpatirdīrghāyutvāya chakṣase ॥2॥*
*yenāvapat savitā kṣureṇa somasya rāāo varuṇasya vidvān ।*
*tena brāhmaṇo vapatedamasya gomānaśvavānayamastu prajāvān ॥3॥*

१३५. सर्वरुपा सर्वात्मिका सर्वदेवमयी वाक्: (Sarvarupā Sarvātmikā Sarvadevamayī Vākḥ) - अ. (Av.) ४.३०.१-८

अहं रुद्रेभिर्वसुभिश्चराम्यहमादित्यैरुत विश्वदेवैः ।
अहं मित्रावरुणोभा बिभर्म्यहमिन्द्राग्नी अहमश्विनोभा ॥१॥
अहं राष्ट्री संगमनी वसूनां चिकितुषी प्रथमा यियानाम् ।
तां मा देवा व्यदधुः पुरुत्रा भूरिस्थात्रां भूर्यावेशयन्तः ॥२॥
अहमेव स्वयमिदं वदामि जुष्टं देवानामुत मानुषाणाम् ।
यं कामये तंतमुग्रं कृणोमि तं ब्रह्मणं तमृषिं तं सुमेधाम् ॥३॥
मया सोऽन्नमत्ति यो विपश्यति यः प्राणति य ई श्रृणोत्युक्तम् ।
अमन्तवो मां त उप क्षियन्ति श्रुधि श्रुत श्रद्धेयं ते वदामि ॥४॥
अहं रुद्राय धनुरा तनोमि ब्रह्मद्विषे शरवे हन्तवा उ ।
अहं जनाय समदं कृणोम्यहं द्यावापृथिवी आ विवेश ॥५॥
अहं सोममाहनसं बिभर्म्यहं त्वष्टारमुत पूषणं भगम् ।
अहं दधामि द्रविणा हविष्मते सुप्राव्या३ यजमानाय सुन्वते ॥६॥
अहं सुवे पितरमस्य मूर्धन्मम योनिरप्स्व१न्तः समुद्रे ।
ततो वि तिष्ठे भुवनानि विश्वोतामूं द्यां वर्ष्मणोप स्पृशामि ॥७॥
अहमेव वातइव प्र वाम्यारभमाणा भुवनानि विश्वा ।
परो दिवा पर एना पृथिव्यैतावती महिम्ना सं बभूव ॥८॥
*ahaṁ rudrebhirvasubhiścharāmyahamādityairuta viśvadevaiḥ ।*
*ahaṁ mitrāvaruṇobhā bibharmyahamindrāgnī ahamaśvinobhā ॥1॥*
*ahaṁ rāṣṭrī saṁgamanī vasūnāṁ chikituṣī prathamā yiāyānām ।*
*tāṁ mā devā vyadadhuḥ purutrā bhūristhātrāṁ bhūryāveśayantaḥ ॥2॥*
*ahameva svayamidaṁ vadāmi juṣṭaṁ devānāmuta mānuṣāṇām ।*
*yaṁ kāmaye taṁtamugraṁ kṛṇomi taṁ brahmaṇaṁ tamṛṣiṁ taṁ sumedhām ॥3॥*
*mayā so'nnamatti yo vipaśyati yaḥ prāṇati ya ī śṛṇotyuktam ।*
*amantavo māṁ ta upa kṣiyanti śrudhi śruta śraddheyaṁ te vadāmi ॥4॥*
*ahaṁ rudrāya dhanurā tanomi brahmadviṣe śarave hantavā u ।*
*ahaṁ janāya samadaṁ kṛṇomyahaṁ dyāvāpṛthivī ā viveśa ॥5॥*
*ahaṁ somamāhanasaṁ bibharmyahaṁ tvaṣṭāramuta pūṣaṇaṁ bhagam ।*
*ahaṁ dadhāmi draviṇā haviṣmate suprāvyā3 yajamānāya sunvate ॥6॥*
*ahaṁ suve pitaramasya mūrdhanmama yonirapsva1ntaḥ samudre ।*
*tato vi tiṣṭhe bhuvanāni viśvotāmūṁ dyāṁ varṣmaṇopa spṛśāmi ॥7॥*
*ahameva vātaiva pra vāmyārabhamāṇā bhuvanāni viśvā ।*
*paro divā para enā pṛthivyaitāvatī mahimnā saṁ babhūva ॥8॥*

१२७. सर्वात्मको रुद्रः (Sarvātmako Rudraḥ) - अ. (Av.) ५.६.११-१४

इन्द्रस्य गृहोऽसि। तं त्वा प्र पद्ये तं त्वा प्र विशामि

सर्वगुः सर्वपूरुषः सर्वातमा सर्वतनूः सह यन्मेऽस्ति तेन ॥११॥
इन्द्रस्य शर्मासि। तं त्वा प्र पद्ये तं त्वा प्र विशामि
सर्वगुः सर्वपूरुषः सर्वात्मा सर्वतनूः सह यन्मेऽस्ति तेन ॥१२॥
इन्द्रस्य वर्मासि। तं त्वा प्र पद्ये तं त्वा प्र विशामि
सर्वगुः सर्वपूरुषः सर्वात्मा सर्वतनूः सह यन्मेऽस्ति तेन ॥१३॥
इन्द्रस्य वरूथमसि। तं त्वा प्र पद्ये तं त्वा प्र विशामि
सर्वगुः सर्वपूरुषः सर्वात्मा सर्वतनूः सह यन्मेऽस्ति तेन ॥१४॥
*indrasya gṛho'si | taṁ tvā pra padye taṁ tvā pra viśāmi*
*sarvaguḥ sarvapūruṣaḥ sarvātamā sarvatanūḥ saha yanme'sti tena ||11 ||*
*indrasya śarmāsi | taṁ tvā pra padye taṁ tvā pra viśāmi*
*sarvaguḥ sarvapūruṣaḥ sarvātmā sarvatanūḥ saha yanme'sti tena ||12 ||*
*indrasya varmāsi | taṁ tvā pra padye taṁ tvā pra viśāmi*
*sarvaguḥ sarvapūruṣaḥ sarvātmā sarvatanūḥ saha yanme'sti tena ||13 ||*
*indrasya varūthamasi | taṁ tvā pra padye taṁ tvā pra viśāmi*
*sarvaguḥ sarvapūruṣaḥ sarvātmā sarvatanūḥ saha yanme'sti tena ||14 ||*

१२८. साग्नयो हेतयः (Sāgnayo Hetayaḥ) - अ. (Av.) ३.२६.१

येऽ३स्यां स्थ प्राच्यां दिशि हेतयो नाम देवास्तेषां वो अग्निरिषवः ।
ते नो मृडत ते नोऽधि ब्रूत तेभ्यो नमस्तेभ्यो वः स्वाहा ॥१॥
*ye3syāṁ stha prāchyāṁ diśi hetayo nāma devāsteṣāṁ vo agniriṣavaḥ |*
*te no mṛḍata te no'dhi brūta tebhyo namastebhyo vaḥ svāhā ||1 ||*

१२९. सामनस्यम् (Sāmanasyam) - अ. (Av.) ६.६४.१-३

सं जानीध्वं सं पृच्यध्वं सं वो मनांसि जानताम् ।
देवा भागं यथा पूर्वे संजानाना उपासते ॥१॥
समानो मन्त्रः समितिः समानी समानं व्रतं सह चित्तमेषाम् ।
समानेन वो हविषा जुहोमि समानं चेतो अभिसंविशध्वम् ॥२॥
समानी व आकूतिः समाना हृदयानि वः ।
समानमस्तु वो मनो यथा वः सुसहासति ॥३॥
*saṁ jānīdhvaṁ saṁ pṛchyadhvaṁ saṁ vo manāṁsi jānatām |*
*devā bhāgaṁ yathā pūrve saṁjānānā upāsate ||1 ||*
*samāno mantraḥ samitiḥ samānī samānaṁ vrataṁ saha chittameṣām |*
*samānena vo haviṣā juhomi samānaṁ cheto abhisaṁviśadhvam ||2 ||*
*samānī va ākūtiḥ samānā hṛdayāni vaḥ |*
*samānamastu vo mano yathā vaḥ susahāsati ||3 ||*

१३०. सामनस्यम् अश्विनौ: (Sāmanasyam Aśvinau:) - अ. (Av.) ७.५२.१-२

साांनं नः स्वेभिः साांनमरणेभिः ।
साांनमश्विना युवमिहास्मासु नि यच्छतम् ॥१॥
सं जानामहै मनसा सं चिकित्वा मा युत्स्महि मनसा दैव्येन ।
मा घोषा उत्थुर्बहुले विनिर्हते मेषुः पप्तदिन्द्रस्याहन्यागते ॥२॥
*sāāṁnaṁ naḥ svebhiḥ sāāṁnamaraṇebhiḥ |*
*sāāṁnamaśvinā yuvamihāsmāsu ni yachchhatam ||1 ||*
*saṁ jānāmahai manasā saṁ chikitvā mā yutsmahi manasā daivyena |*
*mā ghoṣā utthurbahule vinirhate meṣuḥ paptadindrasyāhanyāgate ||2 ||*

१३१. सावित्री सूर्य चन्द्रश्च (Sāmanasyam Aśvinau:) - अ. (Av.) ७.८१.१-६

पूर्वापरं चरतो माययैतौ शिशू क्रीडन्तौ परि यातोऽर्णवम् ।
विश्वान्यो भुवना विचष्ट ऋतूँरन्यो विदधज्जायसे नवः ॥१॥
नवोनवो भवसि जायमानोऽह्नां केतुरुषसामेष्यग्रम् ।

भागं देवेभ्यो वि दधास्यायन् प्र चन्द्रमस्तिरसे दीर्घमायुः ॥२॥
सोमस्यांशो युधां पुतेऽनूनो नाम वा असि ।
अनूनं दर्शमा कृधि प्रजया च धनेन च ॥३॥
दर्शोऽसि दर्शतोऽसि समग्रोऽसि समन्तः ।
समग्रः समन्तो भूयासं गोभिरश्वैः प्रजया पशुभिर्गृहैर्धनेन ॥४॥
यो३स्मान् द्वेष्टि यं वयं द्विष्मस्तस्य त्वं प्राणेना प्यायस्व ।
आ वयं प्यासिषीमहि गोभिरश्वैः प्रजया पशुभिर्गृहैर्धनेन ॥५॥
यं देवा अंशुमाप्याययन्ति यमक्षितमक्षिता भक्षयन्ति ।
तेनास्मानिन्द्रो वरुणो बृहस्पतिरा प्यायन्तु भुवनस्य गोपाः ॥६॥
*pūrvāparaṁ charato māyayaitau śiśū krīḍantau pari yāto'rṇavam /*
*viśvānyo bhuvanā vichaṣṭa ṛtūm̐ranyo vidadhajjāyase navaḥ //1 //*
*navonavo bhavasi jāyamāno'hnāṁ keturuṣasāmepyagram /*
*bhāgaṁ devebhyo vi dadhāsyāyan pra chandramastirase dīrghamāyuḥ //2 //*
*somasyāṁśo yudhāṁ pute'nūno nāma vā asi /*
*anūnaṁ darśamā kṛdhi prajayā cha dhanena cha //3 //*
*darśo'si darśato'si samagro'si samantaḥ /*
*samagraḥ samanto bhūyāsaṁ gobhiraśvaiḥ prajayā paśubhirgṛhairdhanena //4 //*
*yo3smān dveṣṭi yaṁ vayaṁ dviṣmastasya tvaṁ prāṇenā pyāyasva /*
*ā vayaṁ pyāsiṣīmahi gobhiraśvaiḥ prajayā paśubhirgṛhairdhanena //5 //*
*yaṁ devā aṁśumāpyāyayanti yamakṣitamakṣitā bhakṣayanti /*
*tenāsmānindro varuṇo bṛhaspatirā pyāyantu bhuvanasya gopāḥ //6 //*

१३२. सिन्ध्वादयः (Sindhvādayaḥ) - अ. (Av.) १.१५.१-४

सं सं स्रवन्तु सिन्धवः सं वाताः सं पतत्रिणः ।
इमं यां प्रदिवो मे जुषन्तां संस्राव्येण हविषा जुहोमि ॥१॥
इहैव हवमा यात म इह संस्रावणा उतेमं वर्धयता गिरः ।
इहैतु सर्वो यः पशुरस्मिन् तिष्ठतु या रयिः ॥२॥
ये नदीनां संस्रवन्त्युत्सासः सदमक्षिताः ।
तेभिर्मे सर्वैः संस्रावैर्धनं सं स्रावयामसि ॥३॥
ये सर्पिषः संस्रवन्ति क्षीरस्य चोदकस्य च ।
तेभिर्मे सर्वैः संस्रावैर्धनं सं स्रावयामसि ॥४॥
*saṁ saṁ sravantu sindhavaḥ saṁ vātāḥ saṁ patatriṇaḥ /*
*imaṁ yāṁ pradivo me juṣantāṁ saṁsrāvyeṇa haviṣā juhomi //1 //*
*ihaiva havamā yāta ma iha saṁsrāvaṇā utemaṁ vardhayatā giraḥ /*
*ihaitu sarvo yaḥ paśurasmin tiṣṭhatu yā rayiḥ //2 //*
*ye nadīnāṁ saṁsravantyutsāsaḥ sadamakṣitāḥ /*
*tebhirme sarveḥ saṁsrāvairdhanaṁ saṁ srāvayāmasi //3 //*
*ye sarpiṣaḥ saṁsravanti kṣīrasya chodakasya cha /*
*tebhirme sarvaiḥ saṁsrāvairdhanaṁ saṁ srāvayāmasi //4 //*

१३३. सिनीवाली (Sinīvālī) - अ. (Av.) ७.४६.१-३

सिनीवालि पृथुष्टुके या देवानामसि स्वसा ।
जुषस्व हवयमाहुतं प्रजां देवि दिदिड्ढि नः ॥१॥
या सुबाहुः स्वंगुरिः सुषूमा बहुसूवरी । तस्य विश्पत्न्यै हविः सिनीवाल्यै जुहोतन ॥२॥
या विश्पत्नीन्द्रमसि प्रतीची सहस्रस्तुकाभियन्ती देवी ।
विष्णोः पत्नि तुभ्यं राता हवींषि पतिं देवि राधसे चोदयस्व ॥३॥
*sinīvāli pṛthuṣṭuke yā devānāmasi svasā /*
*juṣasva havayamāhutaṁ prajāṁ devi didiḍḍhi naḥ //1 //*
*yā subāhuḥ svaṁguriḥ suṣūmā bahusūvarī / tasya viśpatnyai haviḥ sinīvālyai*

*juhotana ॥2॥*
*yā viśpatnīndramasi pratīchī sahasrastukābhiyantī devī ।*
*viṣṇoḥ patni tubhyaṁ rātā havīṁṣi patiṁ devi rādhase chodayasva ॥3॥*

१३४. सूर्यः (Sūryaḥ) - अ. (Av.) २.२१.१-५; ५.२४.९

अ. (Av.) २.२१.१-५

सूर्य यत् ते तपस्तेन तं प्रति तप योऽस्मान् द्वेष्टि यं वयं द्विष्मः ॥१॥
सूर्य यत् ते हरस्तेन तं प्रति हर योऽस्मान् द्वेष्टि यं वयं द्विष्मः ॥२॥
सूर्य यत् तेऽर्चिस्तेन तं प्रत्यर्च योऽस्मान् द्वेष्टि यं वयं द्विष्मः ॥३॥
सूर्य यत् ते शोचिस्तेन तं प्रति शोच योऽस्मान् द्वेष्टि यं वयं द्विष्मः ॥४॥
सूर्य यत् ते तेजस्तेन तमतेजसं कृणु योऽस्मान् द्वेष्टि यं वयं द्विष्मः ॥५॥
*sūrya yat te tapastena taṁ prati tapa yo3smān dveṣṭi yaṁ vayaṁ dviṣmaḥ ॥1॥*
*sūrya yat te harastena taṁ prati hara yo3smān dveṣṭi yaṁ vayaṁ dviṣmaḥ ॥2॥*
*sūrya yat te'rchistena taṁ pratyarcha yo3smān dveṣṭi yaṁ vayaṁ dviṣmaḥ ॥3॥*
*sūrya yat te śochistena taṁ prati śocha yo3smān dveṣṭi yaṁ vayaṁ dviṣmaḥ ॥4॥*
*sūrya yat te tejastena tamatejasaṁ kṛṇu yo3smān dveṣṭi yaṁ vayaṁ dviṣmaḥ ॥5॥*

अ. (Av.) ५.२४.९

सूर्यश्चक्षुषामधिपतिः स मावतु। अस्मिन् ब्रह्मण्यस्मिन् कर्मण्यस्यां पुरोधायामस्यां
प्रतिष्ठायामस्यां चित्त्यामस्यामाकूत्यामस्यामाशिष्यस्यां देवहूत्यां स्वाहा ॥९॥
*sūryaśchakṣuṣāmadhipatiḥ sa māvatu । asmin brahmaṇyasmin karmaṇyasyāṁ purodhāyāmasyāṁ*
*pratiṣṭhāyāmasyāṁ chittyāmasyāmākūtyāmasyāmāśiṣyasyāṁ devahūtyāṁ svāhā ॥9॥*

१३५. सोमः (Somaḥ) - अ. (Av.) ६.६.२-३; ६.७.१-२; ७.९४.१

अ. (Av.) ६.६.२-३

यो नः सोम सुशंसिनो दुःशंस आदिदेशति। वज्रेणास्य मुखे जहि स संपिष्टो अपायति ॥२॥
यो नः सोमाभिदासति सनाभिर्यश्च निष्ट्यः। अप तस्य बलं तिर महीव द्यौर्वधत्मना ॥३॥
*yo naḥ soma suśaṁsino duḥśaṁsa ādideśati । vajreṇāsya mukhe jahi sa saṁpiṣṭo apāyati ॥2॥*
*yo naḥ somābhidāsati sanābhiryaścha niṣṭyaḥ । apa tasya balaṁ tira mahīva dyaurvadhatmanā ॥3॥*

अ. (Av.) ६.७.१-२

येन सोमादितिः पथा मित्रा वा यन्त्यद्रुहः। तेना नोवसा गहि ॥१॥
येन सोम साहन्त्यासुरान् रन्धयासि नः। तेना नो अधि वोचत ॥२॥
*yena somāditiḥ pathā mitrā vā yantyadruhaḥ । tenā novasā gahi ॥1॥*
*yena soma sāhantyāsurān randhayāsi naḥ । tenā no adhi vochata ॥2॥*

अ. (Av.) ७.९४.१

ध्रुवं ध्रुवेण हविषाव सोमं नयामसि। यथा न इन्द्रः केवलीर्विशः संमनसस्करत् ॥१॥
*dhruvaṁ dhruveṇa haviṣāva somaṁ nayāmasi । yathā na indraḥ kevalīrviśaḥ saṁmanasaskarat ॥1॥*

१३६. सोमः पर्णमणिः (Somaḥ Parṇamaṇiḥ) - अ. (Av.) ३.५.१-८

आयमगन् पर्णमणिर्बली बलेन प्रमृणन्त्सपत्नान् ।
ओहोदेवानां पय ओषधीनां वर्चसा मा जिन्वत्वप्रयावन् ॥१॥
मयि क्षत्रं पर्णमणे मयि धारयताद् रयिम् । अहं राष्ट्रस्याभीवर्गे निजो भूयासमुत्तमः ॥२॥
यं निदधुर्वनस्पतौ गुह्यं देवाः प्रियं मणिम् । तमस्मभ्यं सहायुषा देवा ददतु भर्तवे ॥३॥
सोमस्य पर्णः सह उग्रमागन्निन्द्रेण दत्तो वरुणेन शिष्टः ।
तं प्रियासं बहु रोचमानो दीर्घायुत्वाय शतशारदाय ॥४॥
आ मारुक्षत् पर्णमणिर्मह्या अरिष्टतातये । यथाहमुत्तरोऽसान्यर्यम्ण उत संविदः ॥५॥

ये धीवानो रथकाराः कर्मारा ये मनीषिणः ।
उपस्तीन् पर्ण मह्यं त्वं सर्वान् कृण्वभितो जनान् ॥६॥
ये राजानो राजकृतः सूताग्रामण्यश्च ये ।
उपस्तीन् पर्ण मह्यं त्वं सर्वान् कृण्वभितो जनान् ॥७॥
पर्णोऽसि तनूपानः सयोनिर्वीरो वीरेण मया । संवत्सरस्य तेजसा तेन बध्नामि त्वा मणे ॥८॥
*āyamagan parṇamaṇirbalī balena pramṛṇantsapatnān ।*
*Ohodevānāṁ paya Oṣadhīnāṁ varchasā mā jinvatvaprayāvan ॥1॥*
*mayi kṣatraṁ parṇamaṇe mayi dhārayatād rayim । ahaṁ rāṣṭrasyābhīvarge nijo bhūyāsamuttamaḥ ॥2॥*
*yaṁ nidadhurvanaspatau guhyaṁ devāḥ priyaṁ maṇim । tamasmabhyaṁ sahāyuṣā devā dadatu bhartave ॥3॥*
*somasya parṇaḥ saha ugramāgannindreṇa datto varuṇena śiṣṭaḥ ।*
*taṁ priyāsaṁ bahu rochamāno dīrghāyutvāya śataśāradāya ॥4॥*
*ā mārukṣat parṇamaṇirmahyā ariṣṭatātaye । yathāhamuttaro'sānyaryamṇa uta saṁvidaḥ ॥5॥*
*ye dhīvāno rathakārāḥ karmārā ye manīṣiṇaḥ ।*
*upastīn parṇa mahyaṁ tvaṁ sarvān kṛṇvabhito janān ॥6॥*
*ye rājāno rājakṛtaḥ sūtāgrāmaṇyaścha ye ।*
*upastīn parṇa mahyaṁ tvaṁ sarvān kṛṇvabhito janān ॥7॥*
*parṇo'si tanūpānaḥ sayonirvīro vīreṇa mayā । saṁvatsarasya tejasā tena badhnāmi tvā maṇe ॥8॥*

१३७. सोमः मरुतश्च (Somaḥ Marutaścha) - अ. (Av.) १.२०.१

अदारसृद् भवतु देव सोमास्मिन् यो मरुतो मृडता नः ।
मा नो विददभिर्मा नो अशस्तिर्मा नो विदद् वृजिना द्वेष्या या ॥१॥
*adārasṛd bhavatu deva somāsmin yo maruto mṛḍatā naḥ ।*
*mā no vidadabhirmā no aśastirmā no vidad vṛjinā dveṣyā yā ॥1॥*

१३८. सोमारुद्रौ (Somārudrau) - अ. (Av.) ५.६.५-८

न्वे३तेनारात्सीरसौ स्वाहा । तिग्मायुधौ तिग्महेती सुशेवौ सोमारुद्राविह सु मृडतं नः ॥५॥
अवैतेनारात्सीरसौ स्वाहा । तिग्मायुधौ तिग्महेति सुशेवौ सोमारुद्राविह सु मृडतं नः ॥६॥
अपैतेनारात्सीरसौ स्वाहा । तिग्मायुधौ तिग्महेति सुशेवौ सोमारुद्राविह सु मृडतं नः ॥७॥
मुमुक्तमस्मान्दुरितादवद्याज्जुषेथां याममृतमस्मासु धत्तम् ॥८॥
*nve3tenārātsīrasau svāhā । tigmāyudhau tigmahetī suśevau somārudrāviha su mṛḍataṁ naḥ ॥5॥*
*avaitenārātsīrasau svāhā । tigmāyudhau tigmaheti suśevau somārudrāviha su mṛḍataṁ naḥ ॥6॥*
*apaitenārātsīrasau svāhā । tigmāyudhau tigmaheti suśevau somārudrāviha su mṛḍataṁ naḥ ॥7॥*
*mumuktamasmānduritādavadyājjuṣethāṁ yāmamṛtamasmāsu dhattam ॥8॥*

१३९. सोमोवनस्पतिः (Somovanaspatiḥ) - अ. (Av.) ६.२.१-३

इन्द्राय सोममृत्विजः सुनोता च धावत। स्तोतुर्यो वचः श्रृणवद्धवं च मे ॥१॥
आ यं विशन्तीन्दवो वयो न वृक्षमन्धसः। विरप्शिन्वि मृधो जहि रक्षस्विनीः ॥२॥
सुनोता सोमपाव्ने सोममिन्द्राय वज्रिणे। युवा जेतेशानः स पुरुष्टुतः ॥३॥
*indrāya somamṛtvijaḥ sunotā cha dhāvata । stoturyo vachaḥ śṛṇavaddhavaṁ cha me ॥1॥*
*ā yaṁ viśantīndavo vayo na vṛkṣamandhasaḥ । virapśinvi mṛdho jahi rakṣasvinīḥ ॥2॥*
*sunotā somapāvne somamindrāya vajriṇe । yuvā jeteśānaḥ sa puruṣṭutaḥ ॥3॥*

१४०. सोषधिका निलिम्पाः (Soṣadhikā Nilimpāḥ) - अ. (Av.) ३.२६.५

येऽस्यां स्थ ध्रुवायां दिशि निलिम्पा नाम देवास्तेषां वः ओषधीरिषवः ।
ते नो मृडत ते नोऽधि ब्रूत तेभ्यो वो नमस्तेभ्यो वः स्वाहा ॥५॥
*ye3syāṁ stha dhruvāyāṁ diśi nilimpā nāma devāsteṣāṁ vaḥ Oṣadhīriṣavaḥ /*
*te no mṛḍata te no'dhi brūta tebhyo vo namastebhyo vaḥ svāhā //5 //*

१४१. संस्फानम् (Saṁsphānam) - अ. (Av.) ६.७९.१-३

अयं नो नभसस्पतिः संस्फानो अभि रक्षतु। असमातिं गृहेषु नः ॥१॥
त्वं नो नभसस्पत ऊर्जं गृहेषु धारय। आ पुष्टमेत्वा वसु ॥२॥
देव संस्फान सहस्रापोषस्येशिषे। तस्य नो रास्व तस्य नो धेहि तस्य ते भक्तिवांसः स्याम ॥३॥
*ayaṁ no nabhasaspatiḥ saṁsphāno abhi rakṣatu / asamātiṁ gṛheṣu naḥ //1 //*
*tvaṁ no nabhasaspata ūrja gṛheṣu dhāraya / ā puṣṭametvā vasu //2 //*
*deva saṁsphāna sahasrāpoṣasyeśiṣe / tasya no rāsva tasya no dhehi tasya te bhaktivāṁsaḥ syāma //3 //*

१४२. स्कम्भः (अध्यात्मम्) (Skambhaḥ (Adhyātmam) - अ. (Av.) १०.७.१-४४

कस्मिन्नंगो तपो अस्याधि तिष्ठति कस्मिन्नंग ऋतमस्याध्याहितम् ।
क्वव्रतं क्वऋद्धास्य तिष्ठति कस्मिन्नंगे सत्यमस्य प्रतिष्ठितम् ॥१॥
कस्मादंगाद् दीप्यते अग्निरस्य कस्मादंगात् पवते मातरिश्वा ।
कस्मादंगाद् वि मिमीतेऽधि चन्द्रमा मह स्कम्भस्य मिमानो अंगम् ॥२॥
कस्मिन्नंगे तिष्ठति भूमिरस्य कस्मिन्नंगे तिष्ठत्यन्तरिक्षम् ।
कस्मिन्नंगे तिष्ठत्याहिता द्यौः कस्मिन्नंगे तिष्ठत्युत्तरं दिवः ॥३॥
क्व१ प्रेप्सन् दीप्यत ऊर्ध्वो अग्निः क्व१ प्रेप्सन् पवते मातरिश्वा ।
यत्र प्रेप्सन्तीरभियन्त्यावृतः स्कम्भं तं ब्रूहि कतमः स्विदेव सः ॥४॥
क्वार्धमासाः क्वयन्ति मासाः संवत्सरेण सह संविदानाः ।
यत्र यन्त्यृतवो यत्रार्तवाः स्कम्भं तं ब्रूहि कतमः स्विदेव सः ॥५॥
क्व१ प्रेप्सन्ती युवती विरूपे अहोरात्रे द्रवतः संविदाने ।
यत्र प्रेप्सन्तीरभियन्त्यापः स्कम्भं तं ब्रूहि कतमः स्विदेव सः ॥६॥
यस्मिन्स्तब्ध्वा प्रजापतिर्लोकान्सँर्वा अधारयत् ।
स्कम्भं तं ब्रूहि कतमः स्विदेव सः ॥७॥
यत् परममवमं यच्च मध्यमं प्रजापतिः ससृजे विश्वरूपम् ।
कियता स्कम्भः प्र विवेश तत्र यन्न प्राविशत् कियत् तद् बभूव ॥८॥
कियता स्कम्भः प्र विवेश भूतं कियद् भविष्यदन्वाशयेऽस्य ।
एकं यदंगमकृणोत् सहस्रधा कियता स्कम्भः प्र विवेश तत्र ॥९॥
यत्र लोकांश्च कोशांश्चापो ब्रह्म जना विदुः ।
असच्च यत्र सच्चान्तः स्कम्भं तं ब्रूहि कतमः स्विदेव सः ॥१०॥
यत्र तपः पराक्रम्य व्रतं धारयत्युत्तरम्।
ऋतं च यत्र श्रद्धा चापो ब्रह्म समाहिताः स्कम्भं तं ब्रूहि कतमः स्विदेव सः ॥११॥
यस्मिन् भूमिरन्तरिक्षं द्यौर्यस्मिन्नध्याहिता।
यत्राग्निश्चन्द्रमाः सूर्यो वातस्तिष्ठन्त्यार्पिताः स्कम्भं तं ब्रूहि कतमः स्विदेव सः ॥१२॥
यस्य त्रयस्त्रिंशद् देवा अंगे सर्वे समाहिताः ।
स्कम्भं तं ब्रूहि कतमः स्विदेव सः ॥१३॥
यत्र ऋषयः प्रथमजा ऋचः साम यजुर्मही ।
एकर्षिर्यस्मिन्नार्पितः स्कम्भं तं ब्रूहि कतमः स्विदेव सः ॥१४॥
यत्रामृतं च मृत्युश्च पुरुषेऽधि समाहिते।
समुद्रो यस्य नाड्यः१ पुरुषेऽधि समाहिताः स्कम्भं तं ब्रहि कतमः स्विदेव सः ॥१५॥
यस्य चतस्रः प्रदिशो नाड्य१स्तिष्ठन्ति प्रथमाः ।
याो यत्र पराक्रान्तः स्कम्भं तं ब्रूहि कतमः स्विदेव सः ॥१६॥

ये पुरुषे ब्रह्म विदुस्ते विदुः परमेष्ठिनम्।
यो वेद परमेष्ठिनं यश्च वेद प्रजापतिम्। ज्येष्ठं ये ब्राह्मणं विदुस्ते स्कम्भमनुसंविदुः ॥१७॥
यस्य शिरो वैश्वानरश्चक्षुरंगिरसोऽभवन् ।
अंगानि यस्य यातवः स्कम्भं तं ब्रूहि कतमः स्विदेव सः ॥१९॥
यस्माद्दचो अपातक्षन् यजुर्यस्मादपाकषन्।
सामानि यस्य लोमान्यथर्वांगिरसो मुखं स्कम्भं तं ब्रूहि कतमः स्विदेव सः ॥२०॥
असच्छाखां प्रतिष्ठन्तीं परममिव जना विदुः ।
उतो सन्मन्यन्तेऽवरे ये ते शाखमुपासते ॥२१॥
यत्रादित्याश्च रुद्राश्च वसवश्च समाहिताः।
भूतं च यत्र भवयं च सर्वे लोकाः प्रतिष्ठिताः स्कम्भं तं ब्रूहि कतमः स्विदेव सः ॥२२॥
यस्य त्रयस्त्रिंशद् देवा निधिं रक्षन्ति सर्वदा ।
निधिं तमद्य को वेद यं देवा अभिरक्षथ ॥२३॥
यत्र देवा ब्रह्मविदो ब्रह्म ज्येष्ठमुपासते ।
यो वै तान् विद्यात् प्रत्यक्षं स ब्रह्मा वेदिता स्यात् ॥२४॥
बृहन्तो नाम ते देवा येऽसतः परि जिरे ।
एकं तदंगं स्कम्भस्यासदाहुः परो जनाः ॥२५॥
यत्र स्कम्भः प्रजनयन् पुराणं व्यवर्तयत् ।
एकं तदंगं स्कम्भस्य पुराणमनुसंविदुः ॥२६॥
यस्य त्रयस्त्रिंशद् देवा अंगे गात्रा विभेजिरे ।
तान् वै त्रयस्त्रिंशद् देवानेके ब्रह्मविदो विदुः ॥२७॥
हिरण्यगर्भ परममनत्युद्यं जना विदुः ।
स्कम्भस्तदग्रे प्रासिंचद्धिरण्यं लोके अन्तरा ॥२८॥
स्कम्भे लोकाः स्कम्भे तपः स्कम्भेऽध्यृतमाहितम् ।
स्कम्भं त्वा वेद प्रत्यक्षमिन्द्रे सर्व समाहितम् ॥२९॥
इन्द्रे लोका इन्द्रे तप इन्द्रेऽध्यृतमाहितम् ।
इन्द्रं त्वा वेद प्रत्यक्षं स्कम्भे सर्व प्रतिष्ठितम् ॥३०॥
नाम नाम्ना जोहवीति पुरा सूर्यात् पुरोषसः।
यदजः प्रथमं संबभूव स ह तत् स्वराज्यमियाय यस्मान्नान्यत् परमस्ति भूतम् ॥३१॥
यस्य भूमिः प्रमान्तरिक्षमुतोदरम् ।
दिवं यश्चक्रे मूर्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ॥३२॥
यस्य सूर्यश्चक्षुश्चन्द्रमाश्च पुनर्णवः ।
अग्निं यश्चक्र आस्यं१ तस्मै ज्येष्ठाय ब्रह्मणे नमः ॥३३॥
यस्य वातः प्राणापानौ चक्षुरंगिरसोऽभवन् ।
दिशो यश्चक्रे प्राानीस्तस्मै ज्येष्ठाय ब्रह्मणे नमः ॥३४॥
स्कम्भो दाधार द्यावापृथिवी उभे इमे स्कम्भो दाधरोर्व१न्तरिक्षम् ।
स्कम्भो दाधार प्रदिशः षडुर्वीः स्कम्भ इदं विश्वं भुवनमा विवेश॥३५॥
यः श्रमात् तपसो जातो लोकान्त्सर्वान्त्समानशे ।
सोमं यश्चक्रे केवलं तस्मै ज्येष्ठाय ब्रह्मणे नमः ॥३६॥
कथं वातो नेलयति कथं न रमते मनः ।
किमापः सत्यं प्रेप्सन्तीर्नेलयन्ति कदा चन ॥३७॥
महद् यक्षं भुवनस्य मध्ये तपसि क्रान्तं सलिलस्य पृष्ठे ।
तस्मिंछ्रयन्ते य उ के च देवा वृक्षस्य स्कन्धः परितइव शाखाः॥३८॥
यस्मै हस्ताभ्यां पादाभ्यां वाचा श्रोत्रेण चक्षुषा।
यस्मै देवाः सदा बलिं प्रयच्छन्ति विमितेऽमितं स्कम्भं तं ब्रूहि कतमः स्विदेव सः ॥३९॥
अप तस्य हतं तमो व्यावृत्तः स पाप्मना ।
सर्वाणि तस्मिंज्योतींषि यानि त्रीणि प्रजापतौ ॥४०॥

यो वेतसं हिरण्ययं तिष्ठन्तं सलिले वेद ।
स वै गुह्यः प्रजापतिः ॥४१॥
तन्त्रमेके युवती विरूपे अभ्याक्रामं वयतः षण्मयूखम् ।
प्रान्या तन्तूंस्तिरते धत्ते अन्या नाप वृंजाते न गमातो अन्तम् ॥४२॥
तयोरहं परिनृत्यन्त्योरिव न वि जानामि यतरा परस्तात् ।
पुमानेनद् वयत्युद् गृणात्ति पुमानेनद् वि जभाराधि नाके ॥४३॥
इमे मयूखा उप तस्तभुर्दिवं सामानि चक्रुस्तसराणि वातवे ॥४४॥

*kasminnaṁgo tapo asyādhi tiṣṭhati kasminnaṁga ṛtamasyādhyāhitam ।*
*kvavrataṁ kvaṛddhāsya tiṣṭhati kasminnaṁge satyamasya pratiṣṭhitam ॥1॥*
*kasmādaṁgād dīpyate agnirasya kasmādaṁgāt pavate mātariśvā ।*
*kasmādaṁgād vi mimīte'dhi chandramā maha skambhasya mimāno aṁgam ॥2॥*
*kasminnaṁge tiṣṭhati bhūmirasya kasminnaṁge tiṣṭhatyantarikṣam ।*
*kasminnaṁge tiṣṭhatyāhitā dyauḥ kasminnaṁge tiṣṭhatyuttaraṁ divaḥ ॥3॥*
*kva1 prepsan dīpyata ūrdhvo agniḥ kva1 prepsan pavate mātariśvā ।*
*yatra prepsantīrabhiyantyāvṛtaḥ skambhaṁ taṁ brūhi katamaḥ svideva saḥ ॥4॥*
*kvārdhamāsāḥ kvayanti māsāḥ saṁvatsareṇa saha saṁvidānāḥ ।*
*yatra yantyṛtavo yatrārtavāḥ skambhaṁ taṁ brūhi katamaḥ svideva saḥ ॥5॥*
*kva1 prepsantī yuvatī virūpe ahorātre dravataḥ saṁvidāne ।*
*yatra prepsantīrabhiyantyāpaḥ skambhaṁ taṁ brūhi katamaḥ svideva saḥ ॥6॥*
*yasmintstabdhavā prajāpatirlokāntsaṁ̐rvā adhārayat ।*
*skambhaṁ taṁ brūhi katamaḥ svideva saḥ ॥7॥*
*yat paramamavamaṁ yachcha madhyamaṁ prajāpatiḥ sasṛje viśvarūpam ।*
*kiyatā skambhaḥ pra viveśa tatra yanna prāviśat kiyat tad babhūva ॥8॥*
*kiyatā skambhaḥ pra viveśa bhūtaṁ kiyad bhaviṣyadanvāśaye'sya ।*
*ekaṁ yadaṁgamakṛṇot sahasradhā kiyatā skambhaḥ pra viveśa tatra ॥9॥*
*yatra lokāṁścha kośāṁśchāpo brahma janā viduḥ ।*
*asachcha yatra sachchāntaḥ skambhaṁ taṁ brūhi katamaḥ svideva saḥ ॥10॥*
*yatra tapaḥ parākramya vrataṁ dhārayatyuttaram ।*
*ṛtaṁ cha yatra śraddhā chāpo brahma samāhitāḥ skambhaṁ taṁ brūhi katamaḥ svideva saḥ ॥11॥*
*yasmin bhūmirantarikṣaṁ dyauryasminnadhyāhitā ।*
*yatrāgniśchandramāḥ sūryo vātastiṣṭhantyārpitāḥ skambhaṁ taṁ brūhi katamaḥ svideva saḥ ॥12॥*
*yasya trayastriāṁśad devā aṁge sarve samāhitāḥ ।*
*skambhaṁ taṁ brūhi katamaḥ svideva saḥ ॥13॥*
*yatra ṛṣayaḥ prathamajā ṛchaḥ sāma yajurmahī ।*
*ekarṣiryasminnārpitaḥ skambhaṁ taṁ brūhi katamaḥ svideva saḥ ॥14॥*
*yatrāmṛtaṁ cha mṛtyuścha puruṣe'dhi samāhite ।*
*samudro yasya nāḍyaḥ1 puruṣe'dhi samāhitāḥ skambhaṁ taṁ brahi katamaḥ svideva saḥ ॥15॥*
*yasya chatasraḥ pradiśo nāḍya1stiṣṭhanti prathamāḥ ।*
*yāo yatra parākrāntaḥ skambhaṁ taṁ brūhi katamaḥ svideva saḥ ॥16॥*
*ye puruṣe brahma viduste viduḥ parameṣṭhinam ।*
*yo veda parameṣṭhinaṁ yaścha veda prajāpatim । jyeṣṭhaṁ ye brāhmaṇaṁ viduste skambhamanusaṁviduḥ ॥17॥*
*yasya śiro vaiśvānaraśchakṣuraṁgiraso'bhavan ।*
*aṁgāni yasya yātavaḥ skambhaṁ taṁ brūhi katamaḥ svideva saḥ ॥19॥*
*yasmāddacho apātakṣan yajuryasmādapākaṣan ।*
*sāmāni yasya lomānyatharvāṁgiraso mukhaṁ skambhaṁ taṁ brūhi katamaḥ*

*svideva saḥ ॥20॥*
*asachchhākhāṁ pratiṣṭhantīṁ paramamiva janā viduḥ ।*
*uto sanmanyante'vare ye te śākhamupāsate ॥21॥*
*yatrādityāścha rudrāścha vasavaścha samāhitāḥ ।*
*bhūtaṁ cha yatra bhavayaṁ cha sarve lokāḥ pratiṣṭhitāḥ skambhaṁ taṁ brūhi katamaḥ svideva saḥ ॥22॥*
*yasya trayastriṁśad devā nidhiṁ rakṣanti sarvadā ।*
*nidhiṁ tamadya ko veda yaṁ devā abhirakṣatha ॥23॥*
*yatra devā brahmavido brahma jyeṣṭhamupāsate ।*
*yo vai tān vidyāt pratyakṣaṁ sa brahmā veditā syāt ॥24॥*
*bṛhanto nāma te devā ye'sataḥ pari jiāre ।*
*ekaṁ tadaṁgaṁ skambhasyāsadāhuḥ paro janāḥ ॥25॥*
*yatra skambhaḥ prajanayan purāṇaṁ vyavartayat ।*
*ekaṁ tadaṁgaṁ skambhasya purāṇamanusaṁviduḥ ॥26॥*
*yasya trayastriṁśad devā aṁge gātrā vibhejire ।*
*tān vai trayastriṁśad devāneke brahmavido viduḥ ॥27॥*
*hiraṇyagarbha paramamanatyudyaṁ janā viduḥ ।*
*skambhastadagre prāsiṁchaddhiraṇyaṁ loke antarā ॥28॥*
*skambhe lokāḥ skambhe tapaḥ skambhe'dhyṛtamāhitam ।*
*skambhaṁ tvā veda pratyakṣamindre sarva samāhitam ॥29॥*
*indre lokā indre tapa indre'dhyṛtamāhitam ।*
*indraṁ tvā veda pratyakṣaṁ skambhe sarva pratiṣṭhitam ॥30॥*
*nāma nāmnā johavīti purā sūryāt puroṣasaḥ ।*
*yadajaḥ prathamaṁ saṁbabhūva sa ha tat svarājyamiyāya yasmānnānyat paramasti bhūtam ॥31॥*
*yasya bhūmiḥ pramāntarikṣamutodaram ।*
*divaṁ yaśchakre mūrdhānaṁ tasmai jyeṣṭhāya brahmaṇe namaḥ ॥32॥*
*yasya sūryaśchakṣuśchandramāścha punarṇavaḥ ।*
*agniṁ yaśchakra āsyaṁ1 tasmai jyeṣṭhāya brahmaṇe namaḥ ॥33॥*
*yasya vātaḥ prāṇāpānau chakṣuraṁgiraso'bhavan ।*
*diśo yaśchakre prāānīstasmai jyeṣṭhāya brahmaṇe namaḥ ॥34॥*
*skambho dādhāra dyāvāpṛthivī ubhe ime skambho dādharorva1ntarikṣam ।*
*skambho dādhāra pradiśaḥ ṣaḍurvīḥ skambha idaṁ viśvaṁ bhuvanamā viveśa ॥35॥*
*yaḥ śramāt tapaso jāto lokāntsarvāntsamānaśe ।*
*somaṁ yaśchakre kevalaṁ tasmai jyeṣṭhāya brahmaṇe namaḥ ॥36॥*
*kathaṁ vāto nelayati kathaṁ na ramate manaḥ ।*
*kimāpaḥ satyaṁ prepsantīrnelayanti kadā chana ॥37॥*
*mahad yakṣaṁ bhuvanasya madhye tapasi krāntaṁ salilasya pṛṣṭhe ।*
*tasmiṁchhrayante ya u ke cha devā vṛkṣasya skandhaḥ paritaiva śākhāḥ ॥38॥*
*yasmai hastābhyāṁ pādābhyāṁ vāchā śrotreṇa chakṣuṣā ।*
*yasmai devāḥ sadā baliṁ prayachchhanti vimite'mitaṁ skambhaṁ taṁ brūhi katamaḥ svideva saḥ ॥39॥*
*apa tasya hataṁ tamo vyāvṛttaḥ sa pāpmanā ।*
*sarvāṇi tasmiṁjyotīṁṣi yāni trīṇi prajāpatau ॥40॥*
*yo vetasaṁ hiraṇyayaṁ tiṣṭhantaṁ salile veda ।*
*sa vai guhyaḥ prajāpatiḥ ॥41॥*
*tantrameke yuvatī virūpe abhyākrāmaṁ vayataḥ ṣaṇmayūkham ।*
*prānyā tantūṁstirate dhatte anyā nāpa vṛṁjāte na gamāto antam ॥42॥*
*tayorahaṁ parinṛtyantyoriva na vi jānāmi yatarā parastāt ।*
*pumānenad vayatyud gṛṇātti pumānenad vi jabhārādhi nāke ॥43॥*

*ime mayūkhā upa tastabhurdivaṁ sāmāni chakrustasarāṇi vātave //44 //*

१४३. स्मरः (Smaraḥ) - अ. (Av.) ६.१३०.१-४; ६.१३१.१-३; ६.१३२.१-५

अ. (Av.) ६.१३०.१-४

रथजितां राथजितेयीनामप्सरसामयं स्मरः। देवाः प्र हिणुत स्मरमसौ मामनु शोचतु ॥१॥
असौ मे स्मरतादिति प्रियो मे स्मरतादिति। देवाः प्र हिणुत स्मरमसौ मामनु शोचतु ॥२॥
यथा मम स्मरादसौ नामूष्याहं कदा चन। देवाः प्र हिणुत स्मरमसौ मामनु शोचतु ॥३॥
उन्मादयत मरुत उदन्तरिक्ष मादय। अग्न उन्मादया त्वमसौ मामनु शोचतु ॥४॥

*rathajitāṁ rāthajiteyīnāmapsarasāmayaṁ smaraḥ / devāḥ pra hiṇuta smaramasau māmanu śochatu //1 //*

*asau me smaratāditi priyo me smaratāditi / devāḥ pra hiṇuta smaramasau māmanu śochatu //2 //*

*yathā mama smarādasau nāmūṣyāhaṁ kadā chana / devāḥ pra hiṇuta smaramasau māmanu śochatu //3 //*

*unmādayata maruta udantarikṣa mādaya / agna unmādayā tvamasau māmanu śochatu //4 //*

अ. (Av.) ६.१३१.१-३

नि शीर्षतो नि पत्तत आध्यो३ नि तिरामि ते। देवाः प्र हिणुत स्मरमसौ मामनु शोचतु ॥१॥
अनुमतेऽन्विदं मन्यस्वाकूते समिदं नमः। देवाः प्र हिणुत स्मरमसौ मामनु शोचतु ॥२॥
यद् धावसि त्रियोजनं पंचयोजनमाश्विनम्। ततस्त्वं पुनरायसि पुत्राणां नो असः पिता ॥३॥

*ni śīrṣato ni pattata ādhyo3 ni tirāmi te / devāḥ pra hiṇuta smaramasau māmanu śochatu //1 //*

*anumate'nvidaṁ manyasvākūte samidaṁ namaḥ / devāḥ pra hiṇuta smaramasau māmanu śochatu //2 //*

*yad dhāvasi triyojanaṁ paṁchayojanamāśvinam / tatastvaṁ punarāyasi putrāṇāṁ no asaḥ pitā //3 //*

अ. (Av.) ६.१३२.१-५

य देवाः स्मरमसिंचन्नप्स्व१न्तः शोशुचानं सहाध्या। तं ते तपामि वरुणस्य धर्मणा ॥१॥
यं विश्वे देवाः स्मरमसिंचन्नप्स्व१न्तः शोशुचानं सहाध्या। तं ते तपामि वरुणस्य धर्मणा ॥२॥
यमिन्द्राणी स्मरमसिंचदप्स्व१न्तः शोशुचानं सहाध्या। तं ते तपामि वरुणस्य धर्मणा ॥३॥
यमिन्द्राग्नी स्मरमसिंचतामप्स्व१न्तः शोशुचानं सहाध्या। तं ते तपामि वरुणस्य धर्मणा ॥४॥
यं मित्रावरुणौ स्मरमसिंचतामप्स्व१न्तः शोशुचानं सहाध्या। तं ते तपामि वरुणस्य धर्मणा ॥५॥

*ya devāḥ smaramasiṁchannapsva1ntaḥ śośuchānaṁ sahādhyā / taṁ te tapāmi varuṇasya dharmaṇā //1 //*

*yaṁ viśve devāḥ smaramasiṁchannapsva1ntaḥ śośuchānaṁ sahādhyā / taṁ te tapāmi varuṇasya dharmaṇā //2 //*

*yamindrāṇī smaramasiṁchadapsva1ntaḥ śośuchānaṁ sahādhyā / taṁ te tapāmi varuṇasya dharmaṇā //3 //*

*yamindrāgnī smaramasiṁchatāmapsva1ntaḥ śośuchānaṁ sahādhyā / taṁ te tapāmi varuṇasya dharmaṇā //4 //*

*yaṁ mitrāvaruṇau smaramasiṁchatāmapsva1ntaḥ śośuchānaṁ sahādhyā / taṁ te tapāmi varuṇasya dharmaṇā //5 //*

१४४. हेमिः (Hemiḥ) - अ. (Av.) ५.६.९

चक्षुषो हेते मनसो हेते ब्रह्मणो हेते तपसश्च हेते ।
मेन्या मेनिरस्यमेनयस्ते सन्तु येऽ३स्माँ अभ्यघयन्ति ॥९॥

*chakṣuṣo hete manaso hete brahmaṇo hete tapasaścha hete /*
*menyā menirasyamenayaste santu ye3smām̐ abhyaghayanti //9 //*

## २९. अथर्वा कृतिर्वा (Atharvā Kṛtirvā)

१. आपः (Āpaḥ) - अ १.६.१-४.

शं नो देवीरभिष्टय आपो भवन्तु पीतये। शं योरभि स्रवन्तु नः ॥१॥
अप्सु मे सोमो अब्रवीदन्तर्विश्वानि भेषजा। अग्निं च विश्वशम्भुवम् ॥२॥
आपः पृणीत भेषजं वरूथं तन्वे३ मम। ज्योक् च सूर्य दृशे ॥३॥
शं न आपो धन्वन्या३ शमु सन्त्वनूप्याः ।
शं नः खनित्रिमा आपः शमु याः कुम्भ आभृताः शिवा नः सन्तु वार्षिकीः ॥४॥

*śaṁ no devīrabhiṣṭaya āpo bhavantu pītaye । śaṁ yorabhi sravantu naḥ ॥1॥*
*apsu me somo abravīdantarviśvāni bheṣajā । agniṁ cha viśvaśambhuvam ॥2॥*
*āpaḥ pṛṇīta bheṣajaṁ varūthaṁ tanve3 mama । jyok cha sūrya ddaśe ॥3॥*
*śaṁ na āpo dhanvanyā3 śamu santvanūpyāḥ ।*
*śaṁ naḥ khanitrimā āpaḥ śamu yāḥ kumbha ābhṛtāḥ śivā naḥ santu vārṣikīḥ ॥4॥*

## ३०. अथर्वा (अभयकामः) (Atharvā [Abhayakāmaḥ])

१. अश्विनौ (Aśvinau) - अ. (Av.) ६.५०.१-३

हतं तर्द समङ्कमाखुमश्विना छिन्तं शिरो अपि पृष्टीः श्रृणीतम् ।
यवान्नेददानपि नह्यतं मुखमथाभयं कृणुतं धान्याय ॥१॥
तर्द है पतंग है जभ्य हा उपक्वस ।
ब्रह्मेवासंस्थितं हविरनदन्त इमान् यवानहिंसन्तो अपोदित ॥२॥
तर्दापते वघापते तृष्टजम्भा आ श्रृणोत मे ।
अ आरण्या व्यद्वरा ये के च स्थ व्यद्वरास्तान्त्सर्वांजम्भयामसि ॥३॥

*hataṁ tarda samaṅkamākhumaśvinā chhintaṁ śiro api pṛṣṭīḥ śṛṇītam ।*
*yavānnedadānapi nahyataṁ mukhamathābhayaṁ kṛṇutaṁ dhānyāya ॥1॥*
*tarda hai pataṁga hai jabhya hā upakvasa ।*
*brahmevāsaṁsthitaṁ haviranadanta imān yavānahiṁsanto apodita ॥2॥*
*tardāpate vaghāpate tṛṣṭajambhā ā śṛṇota me ।*
*a āraṇyā vyadvarā ye ke cha stha vyadvarāstāntsarvāṁjambhayāmasi ॥3॥*

२. मन्त्रोक्ताः (Mantroktāḥ) - अ. (Av.) ६.४०.१-२

अभयं द्यावापृथिवी इहास्तु नोऽभयं सोमः सविता नः कृणोतु ।
अभयं नोऽस्तूर्व१न्तरिक्षं सप्तऋषीणां च हविषाभयं नो अस्तु ॥१॥
अस्मै ग्रामाय प्रदिशश्चतस्र ऊर्ज सुभूतं स्वस्ति सविता नः कृणोतु ।
अशत्रिविन्द्रो अभयं नः कृणोत्वन्यत्र राााामभि यातु मन्युः ॥२॥

*abhayaṁ dyāvāpṛthivī ihāstu no'bhayaṁ somaḥ savitā naḥ kṛṇotu ।*
*abhayaṁ no'stūrva1ntarikṣaṁ saptarṣīṇāṁ cha haviṣābhayaṁ no astu ॥1॥*
*asmai grāmāya pradiśaśchatasra ūrja subhūtaṁ svasti savitā naḥ kṛṇotu ।*
*aśatravindro abhayaṁ naḥ kṛṇotvanyatra rāāāmabhi yātu manyuḥ ॥2॥*

## ३१. अथर्वा (आयुष्कामः) (Atharvā [Āyuṣkāmaḥ])

१. विश्वेदेवाः (Viśvedevāḥ) - अ. (Av.) १.३०.१-४

विश्वे देवा वसवो रक्षतेममुतादित्या जागृत यूयमस्मिन् ।
मेमं सनाभिरुत वान्यनाभिर्मेमं प्रापत् पौरुषेयो वधो यः ॥१॥
ये वो देवाः पितरो ये च पुत्राः सचेतसो मे शुणुतेदमुक्तम् ।
सर्वेभ्यो वः परि ददाम्येतं स्वस्त्येनं जरसे वहाथ ॥२॥
ये देवा दिवि ष्ठ ये पृथिव्यां ये अन्तरिक्ष ओषधीषु पशुष्वप्स्व१न्तः ।
ते कृणुत जरसमायुरस्मै शतमन्यान् परि वृणक्तु मृत्यून् ॥३॥
येषां प्रयाजा उत वानुयाजा हुतभागा अहुतादश्च देवाः ।
येषां वः पंच प्रदिशो विभक्तास्तान् वो अस्मै सत्रसदः कृणोमि ॥४॥

*viśve devā vasavo rakṣatemamutādityā jāgṛta yūyamasmin ।*

*memaṁ sanābhiruta vānyanābhirmemaṁ prāpat pauruṣeyo vadho yaḥ ॥1॥*
*ye vo devāḥ pitaro ye cha putrāḥ sachetaso me śuṇutedamuktam ।*
*sarvebhyo vaḥ pari dadāmyetaṁ svastyenaṁ jarase vahātha ॥2॥*
*ye devā divi ṣtha ye pṛthivyāṁ ye antarikṣa Oṣadhīṣu paśuṣvapsva1ntaḥ ।*
*te kṛṇuta jarasamāyurasmai śatamanyān pari vṛṇaktu mṛtyūn ॥3॥*
*yeṣāṁ prayājā uta vānuyājā hutabhāgā ahutādaścha devāḥ ।*
*yeṣāṁ vaḥ paṁcha pradiśo vibhaktāstān vo asmai satrasadaḥ kṛṇomi ॥4॥*

२. हिरण्यम् (Hiraṇyam) - अ. (Av.) १.३५.१-४

हिरण्यमंयदाबध्नन् दाक्षायणा हिरण्यं शतानीकाय सुमनस्यमानाः ।
तत् ते बध्नाम्यायुषे वर्चसे बलाय दीर्घायुत्वाय शतशारदाय ॥१॥
नैनं रक्षांसि न पिशाचाः सहन्ते देवानामोजः प्रथमजं ह्येऽ३तत् ।
योबिभर्ति दाक्षायणं हिरण्यं स जीवेषु कृणुते दीर्घमायुः ॥२॥
अपां तेजो ज्योतिरोजो बलं च वनस्पतीनामुत वीर्याणि ।
इन्द्रइवेन्द्रियाण्यधि धारयामो अस्मिन् तद् दक्षमाणो विभरद्धिरण्यम् ॥३॥
समानां मासामृतुभिष्टवा वयं संवत्सरस्य पयसा पिपर्मि ।
इन्द्राग्नी विश्वे देवास्तेऽनु मन्यन्तामहृणीयमानाः ॥४॥
*hiraṇyamaṁyadābadhnan dākṣāyaṇā hiraṇyaṁ śatānīkāya sumanasyamānāḥ ।*
*tat te badhnāmyāyuṣe varchase balāya dīrghāyutvāya śataśāradāya ॥1॥*
*nainaṁ rakṣāṁsi na piśāchāḥ sahante devānāmojaḥ prathamajaṁ hye3tat ।*
*yobibharti dākṣāyaṇaṁ hiraṇyaṁ sa jīveṣu kṛṇute dīrghamāyuḥ ॥2॥*
*apāṁ tejo jyotirojo balaṁ cha vanaspatīnāmuta vīryāṇi ।*
*indraivendriyāṇyadhi dhārayāmo asmin tad dakṣamāṇo vibharaddhiraṇyam ॥3॥*
*samānāṁ māsāmṛtubhiṣṭavā vayaṁ saṁvatsarasya payasā piparmi ।*
*indrāgnī viśve devāste'nu manyantāmahṛṇīyamānāḥ ॥4॥*

## ३२. अथर्वा (द्विषोवर्चो हर्तुकामः) (Atharvā [Dviṣovarcho Hartukāmaḥ])

१. सूर्यः (Sūryaḥ) - अ. (Av.) ७.१३.१-२

यथा सूर्यो नक्षत्राणामुद्यंस्तेजांस्यादद। एवा स्त्राीणां च पुंसां च द्विषतां वर्च आ ददे ॥१॥
यावन्तो मा सपत्नानामायन्तं प्रतिपश्यथ। उद्यन्त्सूर्यइव सुप्तानां द्विषतां वर्च आ ददे ॥२॥
*yathā sūryo nakṣatrāṇāmudyaṁstejāṁsyādade । evā strāāīṇāṁ cha puṁsāṁ cha dviṣatāṁ varcha ā dade ॥1॥*
*yāvanto mā sapatnānāmāyantaṁ pratipaśyatha । udyantsūryaiva suptānāṁ dviṣatāṁ varcha ā dade ॥2॥*

## ३२. अथर्वा (पण्यकामः) (Atharvā [Paṇyakāmaḥ])

१. अग्निः (Agniḥ) - अ. (Av.) ३.१५.३

इध्मेनाग्न इच्छमानो घृतेन जुहोमि हव्यं तरसे बलाय ।
यावदीशे ब्रह्मणा वन्दमान इमां धियं शतसेयाय देवीम् ॥३॥
*idhmenāgna ichchhamāno ghṛtena juhomi havyaṁ tarase balāya ।*
*yāvadīśe brahmaṇā vandamāna imāṁ dhiyaṁ śataseyāya devīm ॥3॥*

२. इन्द्रः (Indraḥ) - अ. (Av.) ३.१५.१

इन्द्रमहं वणिजं चोदयामि सन ऐतु पुरएता नो अस्तु ।
नुदन्न रातिं परिपन्थिनं मृगं स ईशानो धनदा अस्तु मह्यम् ॥२॥
*indramahaṁ vaṇijaṁ chodayāmi sana aitu puraetā no astu ।*
*nudanna rātiṁ paripanthinaṁ mṛgaṁ sa īśāno dhanadā astu mahyam ॥2॥*

३. जातवेदा (Jātavedā) - अ. (Av.) ३.१५.८

विश्वाहा ते सदमिद्भरेमाश्वायेव तिष्ठते जातवेदः ।
रायस्पोषेण समिषा मदन्तो मा ते अग्ने प्रतिवेशा रिषम ॥८॥

*viśvāhā te sadamidbharemāśvāyeva tiṣṭhate jātavedaḥ /*
*rāyaspoṣeṇa samiṣā madanto mā te agne prativeśā riṣama //8 //*

४. देवाः (अग्निः) (Devāḥ [Agniḥ] - अ. (Av.) ३.१५.५

येन धनेन प्रपणं चरामि धनेन देवा धनमिच्छमानः ।
तन्मे भूयो भवतु मा कनीयोऽग्ने सातघ्नो देवान् हविषा नि षेध ॥५॥
*yena dhanena prapaṇaṁ charāmi dhanena devā dhanamichchhamānaḥ /*
*tanme bhūyo bhavatu mā kanīyo'gne sātadhno devān haviṣā ni ṣedha //5 //*

५. देवाः (इन्द्रः प्रजापतिः सविता सोमः अग्निः) (Devāḥ [Indraḥ Prajāpatiḥ Savitā Somaḥ Agniḥ] )- अ. (Av.) ३.१५.६

येन धनेन प्रपणं चरामि धनेन देवा धनमिच्छमानः ।
तस्मिन् म इन्द्रो रुचिमा दधातु प्रजापतिः सविता सोमो अग्निः ॥६॥
*yena dhanena prapaṇaṁ charāmi dhanena devā dhanamichchhamānaḥ /*
*tasmin ma indro ruchimā dadhātu prajāpatiḥ savitā somo agniḥ //6 //*

६. पन्थानः (Panthānaḥ) - अ. (Av.) ३.१५.२

ये पन्थानो बहवो देवयाना अन्तरा द्यावापृथिवी संचरन्ति ।
ते मा जुषन्तां पयसा घृतेन यथा क्रीत्वा धनमाहराणि ॥२॥
*ye panthāno bahavo devayānā antarā dyāvāpṛthivī saṁcharanti /*
*te mā juṣantāṁ payasā ghṛtena yathā krītvā dhanamāharāṇi //2 //*

७. प्रपणः विक्रयश्च (Prapaṇaḥ Vikrayaścha) - अ. (Av.) ३.१५.४

शुनं नो अस्तु प्रपणो विक्रयश्च प्रतिपणः फलिनं मा कृणोतु ।
इदं हव्यं संविदानौ जुषेथां शुनं नो अस्तु चरितमुत्थितं च ॥४॥
*śunaṁ no astu prapaṇo vikrayaścha pratipaṇaḥ phalinaṁ mā kṛṇotu /*
*idaṁ havyaṁ saṁvidānau juṣethāṁ śunaṁ no astu charitamutthitaṁ cha //4 //*

८. वैश्वानरः (Vaiśvānaraḥ) - अ. (Av.) ३.१५.७

उप त्वा नमसा वयं होतर्वैश्वानर स्तुमः । स नः प्रजास्वात्मसु गोषु प्राणेषु जागृहि ॥७॥
*upa tvā namasā vayaṁ hotarvaiśvānara stumaḥ / sa naḥ prajāsvātmasu goṣu prāṇeṣu jāgṛhi //7 //*

**३३. अथर्वा (ब्रह्मवर्चस् कामः) (Atharvā [Brahmavarchas Kāmaḥ])**

१. अदितिः (Aditiḥ) - अ. (Av.) ७.६.१-४; ७.७.१

अ. (Av.) ७.६.१-४

पुमान् पुंसः परिजातोऽश्वत्थः खदिरादधि । स हन्तु शत्रून् मामकान् यानहं द्वेष्मि ये च माम् ।१ ।
तानश्वत्थ निः शृणीहि शत्रून् वैबाध दोधतः । इन्द्रेण वृत्रघ्ना मेदी मित्रेण वरुणेन च ॥२॥
यथाश्वत्थ निरभनोऽन्तर्महत्यर्णवे । एवा तान्त्सर्वान्निर्भङ्न्धि यानहं द्वेष्मि ये च माम् ॥३॥
यः सहमानश्चरसि सासहान इस ऋषभः । तेनाश्वत्थ त्वया वयं सापत्नान्त्सहिषीमहि ॥४॥
*pumān puṁsaḥ parijāto'śvatthaḥ khadirādadhi /*
*sa hantu śatrūn māmakān yānahaṁ dveṣmi ye cha mām /1 /*
*tānaśvattha niḥ śṛṇīhi śatrūn vaibādha dodhataḥ /*
*indreṇa vṛtraghnā medī mitreṇa varuṇena cha //2 //*
*yathāśvattha nirabhano'ntarmahatyarṇave /*
*evā tāntsarvānnirbhaṅndhi yānahaṁ dveṣmi ye cha mām //3 //*
*yaḥ sahamānaścharasi sāsahāna isa ṛṣabhaḥ /*
*tenāśvattha tvayā vayaṁ sāpatnāntsahiṣīmahi //4 //*

अ. (Av.) ७.७.१

दितेः पुत्राणामदितेरकार्षमव देवानां बृहतामनर्मणाम् ।
तेषां हि धाम गभिषक् समुद्रियं नैनान् नमसा परो अस्ति कश्चन ॥१॥
*diteḥ putrāṇāmaditerakārṣamava devānāṁ bṛhatāmanarmaṇām /*

*teṣāṁ hi dhāma gabhiṣak samudriyaṁ naināṅ namasā paro asti kaśchana //1 //*

२. आत्मा (Ātmā) - अ. (Av.) ७.१.१-२; ७.२.१; ७.३.१; ७.५.१-५; ७.६.१-४

अ. (Av.) ७.१.१-२

धीती वा ये अनयन् वाचो अग्रं मनसा वा येऽवदन्नृतानि ।
तृतीयेन ब्रह्मणा वावृधनास्तुरीयेणामन्वत नाम धेनोः ॥१॥
स वेद पुत्रः पितरं स मातरं स सूनुर्भुवत् स भुवत् पुनर्मघः ।
स द्यामौर्णोदन्तरिक्षं स्वः१ स इदं विश्वमभवत् स आभवत् ॥२॥

*dhītī vā ye anayan vācho agraṁ manasā vā ye'vadannṛtāni /*
*tṛtīyena brahmaṇā vāvṛdhanāsturīyeṇāmanvata nāma dhenoḥ //1 //*
*sa veda putraḥ pitaraṁ sa mātaraṁ sa sūnurbhuvat sa bhuvat punarmaghaḥ /*
*sa dyāmaurṇodantarikṣaṁ svaḥ1 sa idaṁ viśvamabhavat sa ābhavat //2 //*

अ. (Av.) ७.२.१

अथर्वाणं पितरं देवबन्धुं मातुर्गर्भं पितुरसुं युवानम् ।
य इमं यां मनसा चिकेत प्र णो वोचस्तमिहेह ब्रवः ॥१॥

*atharvāṇaṁ pitaraṁ devabandhuṁ māturgarbha piturasuṁ yuvānam /*
*ya imaṁ yāṁ manasā chiketa pra ṇo vochastamiheha bravaḥ //1 //*

अ. (Av.) ७.३.१

अया विष्ठा जनयन् कर्वराणि स हि घृणिरुरुर्वराय गातुः ।
स प्रत्युदैद धरुणं मध्वो अग्रं स्वया तन्वातन्वमैरयत ॥१॥

*ayā viṣṭhā janayan karvarāṇi sa hi ghṛṇirururvarāya gātuḥ /*
*sa pratyudaida dharuṇaṁ madhvo agraṁ svayā tanvātanvamairayata //1 //*

अ. (Av.) ७.५.१-५

योन यामयजन्त देवास्तानि धर्माणि प्रथमान्यासन् ।
ते ह नाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः ॥१॥
याो बभूव स आ बभूव स प्र जो स उ वावृधे पुनः ।
स देवानामधिपतिर्बभूव सो अस्मासु द्रविणमा दधातु ॥२॥
यद् देवा देवान् हविषायजन्तामर्त्यान् मनसामर्त्येन ।
मदेम तत्र परमे व्योमन् पश्येम तदुदितौ सूर्यस्य ॥३॥
यत् पुरुषेण हविषा यां देवा अतन्वत ।
अस्तिु नु तस्मादोजीयो यद् विहव्येनोजिरे ॥४॥
मुग्धा देवा उत् शुनायजन्तोत गोरंगैः पुरुधायजन्त ।
य इमं यां मनसा चिकेत प्र णो वोचस्तमिहेह ब्रवः ॥५॥

*yona yāmayajanta devāstāni dharmāṇi prathamānyāsan /*
*te ha nākaṁ mahimānaḥ sachanta yatra pūrve sādhyāḥ santi devāḥ //1 //*
*yāo babhūva sa ā babhūva sa pra jo sa u vāvṛdhe punaḥ /*
*sa devānāmadhipatirbabhūva so asmāsu draviṇamā dadhātu //2 //*
*yad devā devān haviṣāyajantāmartyān manasāmartyena /*
*madema tatra parame vyoman paśyema taduditau sūryasya //3 //*
*yat puruṣeṇa haviṣā yāṁ devā atanvata /*
*astiu nu tasmādojīyo yad vihavyenojire //4 //*
*mugdhā devā ut śunāyajantota goraṁgaiḥ purudhāyajanta /*
*ya imaṁ yāṁ manasā chiketa pra ṇo vochastamiheha bravaḥ //5 //*

अ. (Av.) ७.६.१-४

अदितिर्द्यौरदितिरन्तरिक्षमदितिर्माता स पिता स पुत्रः ।
विश्वे देवा अदितिः पंच जना अदितिर्जातमदितिर्जनित्वम् ॥१॥
महीमू षु मातरं सुव्रतानामृतस्य पत्नीमवसे हवामहे ।
तुविक्षत्रामजरन्तीमुरूचीं सुशर्माणमदितिं सुप्रणीतिम् ॥२॥

सुत्रामाणं पृथिवीं द्यामनेहसं सुशर्माणमदितिं सुप्रणीतिम् ।
दैवीं नावं स्वरित्रामनागसो अस्रवन्तीमा रुहेमा स्वस्तये ॥३ ॥
वाजस्य नु प्रसवे मातरं महीमदितिं नाम वचसा करामहे ।
यस्या उपस्थ उर्व१न्तरिक्षं सा नः शर्म त्रिवरूथं नि यच्छात् ॥४ ॥
*aditirdyauraditirantarikṣamaditirmātā sa pitā sa putraḥ /*
*viśve devā aditiḥ paṁcha janā aditirjātamaditirjanitvam //1 //*
*mahīmū ṣu mātaraṁ suvratānāmṛtasya patnīmavase havāmahe /*
*tuvikṣatrāmajarantīmurūchīṁ suśarmāṇamaditiṁ supraṇītim //2 //*
*sutrāmāṇaṁ pṛthivīṁ dyāmanehasaṁ suśarmāṇamaditiṁ supraṇītim /*
*daivīṁ nāvaṁ svaritrāmanāgaso asravantīmā ruhemā svastaye //3 //*
*vājasya nu prasave mātaraṁ mahīmaditiṁ nāma vachasā karāmahe /*
*yasyā upastha urva1ntarikṣaṁ sā naḥ śarma trivarūthaṁ ni yachchhāt //4 //*

३. वायुः (Vāyuḥ) - अ. (Av.) ७.४.१

एकया च दशभिश्चा सुहुते द्वाभ्यामिष्टये विंशत्या च ।
तिसृभिश्च वहसे त्रिंशता च वियुग्भिर्वाय इह ता वि मुंच ॥१ ॥
*ekayā cha daśabhiśchā suhute dvābhyāmiṣṭaye viśatyā cha /*
*tisṛbhiścha vahase triṁśatā cha viyugbhirvāya iha tā vi muṁcha //1 //*

## ३४. अथर्वा (यक्ष्मनाशन कामः) (Atharvā [Yakṣamanāśana Kāmaḥ])

१. वनस्पतिः (Vanaspatiḥ) - अ. (Av.) ६.८५.१-३

वरणो वारयाता अयं देवो वनस्पतिः । यक्ष्मो यो अस्मिन्नाविष्टस्तमु देवा अवीवरन् ॥१ ॥
इन्द्रस्य वचसा वयं मित्रस्य वरुणस्य च । देवानां सर्वेषां वाचा यक्ष्मं ते वारयामहे ॥२ ॥
यथा वृत्र इमा आपस्तस्तम्भ विश्वधा यतीः । एवा ते अग्निना यक्ष्मं वैश्वानरेण वारये ॥३ ॥
*varaṇo vārayātā ayaṁ devo vanaspatiḥ / yakṣamo yo asminnāviṣṭastamu devā avīvaran //1 //*
*indrasya vachasā vayaṁ mitrasya varuṇasya cha / devānāṁ sarveṣāṁ vāchā yakṣamaṁ te vārayāmahe //2 //*
*yathā vṛtra imā āpastastambha viśvadhā yatīḥ / evā te agninā yakṣamaṁ vaiśvānareṇa vāraye //3 //*

## ३५. अथर्वा (यशस्कामः) (Atharvā [Yaśaskāmaḥ])

१. इन्द्रादयः (Indrādayaḥ) - अ. (Av.) ६.५८.१-३

यशसं मेन्द्रो मघवान् कृणोतु यशसं द्यावापृथिवी उभे इमे ।
यशसं मा देवः सविता कृणोतु प्रियो दातुर्दक्षिणाया इह स्याम् ॥१ ॥
यथेन्द्रो द्यावापृथिव्योर्यशस्वान् यथाप ओषधीषु यशस्वतीः ।
एवा विश्वेषु देवेषु वयं सर्वेषु यशसः स्याम ॥२ ॥
यशा इन्द्रो यशा अग्निर्यशाः सोमो अजायत ।
यशा विश्वस्य भूतस्याहमस्मि यशस्तमः ॥३ ॥
*yaśasaṁ mendro maghavān kṛṇotu yaśasaṁ dyāvāpṛthivī ubhe ime /*
*yaśasaṁ mā devaḥ savitā kṛṇotu priyo dāturdakṣiṇāyā iha syām //1 //*
*yathendro dyāvāpṛthivyoryaśasvān yathāpa Oṣadhīṣu yaśasvatīḥ /*
*evā viśveṣu deveṣu vayaṁ sarveṣu yaśasaḥ syāma //2 //*
*yaśā indro yaśā agniryaśāḥ somo ajāyata /*
*yaśā viśvasya bhūtasyāhamasmi yaśastamaḥ //3 //*

## ३६. अथर्वा (वर्चस्कामः) (Atharvā [Varchaskāmaḥ])

१. त्विषिः बृहस्पतिः (Tviṣiḥ Bṛhaspatiḥ) - अ. (Av.) ६.३८.१-४

सिंहे व्याघ्र उत या पृदाकौ त्विषिरग्नौ ब्राह्मणे सूर्ये या ।
इन्द्र या देवी सुभगा जजान सा न ऐतु वर्चसा संविदाना ॥१ ॥

या हस्तिनि द्वीपिनि या हिरण्ये त्विषिरप्सु गोषु या पुरुषेषु ।
इन्द्र या देवी सुभगा जजान सा न ऐतु वर्चसा संविदाना ॥२ ॥
रथे अक्षेण्वृषभस्य वाजे वाते पर्जन्ये वरुणस्य शुष्मे ।
इन्द्र या देवी सुभगा जजान सा न ऐतु वर्चसा संविदाना ॥३ ॥
राजन्येदुन्दुभावायतायामश्वस्य वाजे पुरुषस्य मायौ ।
इन्द्रं या देवी सुभगा जजान सा न ऐतु वर्चसा संविदाना ॥४ ॥
*siṁhe vyāghra uta yā pṛdākau tviṣiragnau brāhmaṇe sūrye yā /*
*indra yā devī subhagā jajāna sā na aitu varchasā saṁvidānā //1 //*
*yā hastini dvīpini yā hiraṇye tviṣirapsu goṣu yā puruṣeṣu /*
*indra yā devī subhagā jajāna sā na aitu varchasā saṁvidānā //2 //*
*rathe akṣeṇvṛṣabhasya vāje vāte parjanye varuṇasya śuṣme /*
*indra yā devī subhagā jajāna sā na aitu varchasā saṁvidānā //3 //*
*rājanyedundubhāvāyatāyāmaśvasya vāje puruṣasya māyau /*
*indraṁ yā devī subhagā jajāna sā na aitu varchasā saṁvidānā //4 //*

२. बृहस्पतिः (Bṛhaspatiḥ) - अ. (Av.) ६.३९.१-३

यशो हविर्वर्धतामिन्द्रजूतं सहस्रवीर्य सुभृतं सहस्कृतम् ।
प्रसर्स्राणमनु दीर्घाय चक्षसे हविष्मन्तं मा वर्धय ज्येष्ठतातये ॥१ ।
अच्छा न इन्द्र यशसं यशोभिर्पशस्विनं नमसाना विधेम ।
स नो रास्व राष्ट्रमिन्द्रजूतं तस्य ते रातौ यशसः स्याम ॥२ ॥
यशा इन्द्रो यशा अग्निर्यशाः सोमो अजायत ।
यशा विश्वस्य भूतस्याहमस्मि यशस्तमः ॥३ ॥
*yaśo havirvardhatāmindrajūtaṁ sahasravīrya subhṛtaṁ sahaskṛtam /*
*prasarsrāṇamanu dīrghāya chakṣase haviṣmantaṁ mā vardhaya jyeṣṭhatātaye //1 /*
*achchhā na indra yaśasaṁ yaśobhirpaśasvinaṁ namasānā vidhema /*
*sa no rāsva rāṣṭramindrajūtaṁ tasya te rātau yaśasaḥ syāma //2 //*
*yaśā indro yaśā agniryaśāḥ somo ajāyata /*
*yaśā viśvasya bhūtasyāhamasmi yaśastamaḥ //3 //*

## ३७. अथर्वा (वर्चस्कामो यशस्कामश्च) (Atharvā [Varchaskāmo Yaśaskāmaścha])

१. बृहस्पतिः अश्विनौ (Bṛhaspatiḥ Aśvinau) - अ. (Av.) ६.६९.१-३

गिरावरगराटेषु हिरण्ये गोषु यद् यशः। सुरायां सिच्यमानाया कीलाले मधु तन्मयि ॥१ ॥
अश्विना सारघेण मा मधुनाङ्क्तं शुभस्पती। यथा गर्भस्वतीं वाचमावदानि जनाँ अनु ॥२ ॥
मयिवर्चो अथो यशोऽथो यास्य यत् पयः। तन्मयि प्रजापतिर्दिवि द्यामिव दृंहतु ॥३ ॥
*girāvaragarāṭeṣu hiraṇye goṣu yad yaśaḥ / surāyāṁ sichyamānāyā kīlāle madhu tanmayi //1 //*
*aśvinā sāragheṇa mā madhunāṅktaṁ śubhaspatī / yathā garbhasvatīṁ vāchamāvadāni janāṁ̐ anu //2 //*
*mayivarcho atho yaśo'tho yāsya yat payaḥ / tanmayi prajāpatirdivi dyāmiva dṛṁhatu //3 //*

## ३८. अथर्वा (वृषकामः) (Atharvā [Vṛṣakāmaḥ])

१. एक वृषः - अ. (Av.) ६.८६.१-३

वृषेन्द्रस्य वृषा दिवो वृषा पृथिव्या अयम्। वृषा विश्वस्य भूतस्य त्वमेकवृषो भव ॥१ ॥
समुद्र ईशे स्रवतामग्निः पृथिव्या वशी। चन्द्रमा नक्षत्राणामीशे त्वमेकवृषो भव ॥२ ॥
सम्राडस्यसुराणां कुकुन्मनुष्याणाम्। देवानामर्धभागसि त्वमेकवृषो भव ॥३ ॥
*vṛṣendrasya vṛṣā divo vṛṣā pṛthivyā ayam / vṛṣā viśvasya bhūtasya tvamekavṛṣo bhava //1 //*
*samudra īśe sravatāmagniḥ pṛthivyā vaśī / chandramā nakṣatrāṇāmīśe tvamekavṛṣo*

*bhava //2 //*
*samrāḍasyasurāṇāṁ kukunmanuṣyāṇām / devānāmardhabhāgasi tvamekavṛṣo bhava //3 //*

३९. **अथर्वा (स्वस्त्ययनकामः) (Atharvā [Svastyayanakāmaḥ])**

१. अग्निः (Agniḥ) - अ. (Av.) ६.३६.१-३; ६.५.१; ३

अ. (Av.) ६.३६.१-३

ऋतावनं वैश्वानरमृतजस्य ज्योतिषस्पतिम्। अजस्रं घर्ममीमहे ॥१॥
स विश्व प्रति चाक्लृप ऋतूंरुत सृजते वशी। यास्य वय उत्तिरन् ॥२॥
अग्निः परेषु धामसु कामो भूतस्य भव्यस्य। सम्राडेको वि राजति ॥३॥
*ṛtāvanaṁ vaiśvānaramṛtajasya jyotiṣaspatim / ajasraṁ gharmamīmahe //1 //*
*sa viśva prati chāklṛpa ṛtūṁruta sṛjate vaśī / yāsya vaya uttiran //2 //*
*agniḥ pareṣu dhāmasu kāmo bhūtasya bhavyasya / samrāḍeko vi rājati //3 //*

अ. (Av.) ६.५.१

उदेनमुत्तरं नयाग्ने घृतेनाहुत। समेनं वर्चसा सृज प्रजया च बहुं कृधि ॥१॥
*udenamuttaraṁ nayāgne ghṛtenāhuta / samenaṁ varchasā sṛja prajayā cha bahuṁ kṛdhi //1 //*

अ. (Av.) ६.५.३

यस्य कृण्मो हवि र्गृहे तमग्ने वर्धया त्वम्। तस्मै सोमो अधि ब्रवदयमं च ब्रह्मणस्पतिः ॥३॥
*yasya kṛṇmo havi rgṛhe tamagne vardhayā tvam / tasmai somo adhi bravadayamaṁ cha brahmaṇaspatiḥ //3 //*

२. इन्द्रः (Indraḥ) - अ. (Av.) ६.५.२; ६.४०.३; ७.८६.१

अ. (Av.) ६.५.२

इन्द्रेमं प्रतरं कृधि सजातानमसद् वशी। रायस्पोषेण सं सृज जीवातवे जरसे नय ॥२॥
*indremaṁ prataraṁ kṛdhi sajātānamasad vaśī / rāyaspoṣeṇa saṁ sṛja jīvātave jarase naya //2 //*

अ. (Av.) ६.४०.३

अनमित्रं नो अधरादनमित्रं न उत्तरात्। इन्द्रानमित्रं नः पश्चादनमित्रं पुरस्कृधि ॥३॥
*anamitraṁ no adharādanamitraṁ na uttarāt / indrānamitraṁ naḥ paśchādanamitraṁ puraskṛdhi //3 //*

अ. (Av.) ७.८६.१

त्रातारमिन्द्रमवितारमिन्द्रं हवेहवे सुहवं शूरमिन्द्रम् ।
हुवे न शुक्रं पुरुहूतमिन्द्रं स्वस्ति न इन्द्रो मघवान् कृणोतु ॥१॥
*trātāramindramavitāramindraṁ havehave suhavaṁ śūramindram /*
*huve na śukraṁ puruhūtamindraṁ svasti na indro maghavān kṛṇotu //1 //*

३. इन्द्रापूषादयः (Indrāpūṣādayaḥ) - अ. (Av.) ६.३.१-३

पातं न इन्द्रापूषणादितिः पान्तु मरुतः ।
अपां नपात् सिन्धवः सप्त पातन पातु नो विष्णुरुत द्यौः ॥१॥
पातां नो द्यावापृथिवी अभिष्टये पातु ग्रावा पातु सोमो नो अंहसः ।
पातु नो देवी सुभगा सरस्वती पात्वग्निः शिवा ये अस्य पायवः ॥२॥
पातां नो देवाश्विनां शुभस्पतीं उषसानक्तोत न उरुष्यताम् ।
अपां नपादभिह्रुती गयस्य चिद् देव त्वष्टर्वर्धय सर्वतातये ॥३॥
*pātaṁ na indrāpūṣaṇāditiḥ pāntu marutaḥ /*
*apāṁ napāt sindhavaḥ sapta pātana pātu no viṣṇuruta dyauḥ //1 //*
*pātāṁ no dyāvāpṛthivī abhiṣṭaye pātu grāvā pātu somo no aṁhasaḥ /*
*pātu no devī subhagā sarasvatī pātvagniḥ śivā ye asya pāyavaḥ //2 //*
*pātāṁ no devāśvināṁ śubhaspatīṁ uṣasānaktota na uruṣyatām /*

*apāṁ napādabhihrutī gayasya chid deva tvaṣṭarvardhaya sarvatātaye //3 //*

४. इन्द्राणी (Indrāṇī) - अ. (Av.) १.२७.१-४

अमूः पारे पृदाक्वस्त्रिषप्ता निर्जरायवः ।
तासां जरायुभिर्वयमक्ष्या३वपि व्ययामस्यघायोः परिपन्थिनः ॥१ ॥
विषूच्येतु कृन्तती पिनाकमिव बिभ्रती ।
विष्वक् पुनर्भुवा मनोऽसमृद्धा अघायवः ॥२ ॥
न बहवः समशकन् नार्भका अभि दाधृषु ।
वेणोरद्गाइवाभितोऽसमृद्धा अघायवः ॥३ ॥
प्रेतं पादौ प्र स्फुरतं वहतं पुणतो गृहान् ।
इन्द्राण्येतु प्रथमाजीतामुषिता पुरः ॥४ ॥
*amūḥ pāre pṛdākvastriṣaptā nirjarāyavaḥ /*
*tāsāṁ jarāyubhirvayamakṣayā3vapi vyayāmasyaghāyoḥ paripanthinaḥ //1 //*
*viṣūchyetu kṛntatī pinākamiva bibhratī /*
*viṣvak punarbhuvā mano'samṛddhā aghāyavaḥ //2 //*
*na bahavaḥ samaśakan nārbhakā abhi dādhṛṣu /*
*veṇoradgāivābhito'samṛddhā aghāyavaḥ //3 //*
*pretaṁ pādau pra sphuratam vahataṁ puṇato gṛhān /*
*indrāṇyetu prathamājītāmuṣitā puraḥ //4 //*

५. चन्द्रमा (Chandramā) - अ. (Av.) ६.३७.१-३

उप प्रागात् सहस्राक्षो युक्त्वा शपथो रथम। शप्तारमन्विच्छन् मम वृकइवाविमतो गहम् ॥१ ॥
परि णो वृङ्धि शपथ ह्रदमग्निरिवा दहन्। सप्तारमत्र नो जहि दिवो वृक्षमिवाशनिः ॥२ ॥
यो नः शपादशपतः शपतो यश्च नः शपात्। शुने पेष्ट्रमिवावक्षामं तं प्रत्यस्यामि मृत्यवे ॥३ ॥
*upa prāgāt sahasrākṣo yuktvā śapatho rathama / śaptāramanvichchhan mama vṛkaivāvimato gaham //1 //*
*pari ṇo vṛṅgdhi śapatha hradamagnirivā dahan / saptāramatra no jahi divo vṛkṣamivāśaniḥ //2 //*
*yo naḥ śapādaśapataḥ śapato yaścha naḥ śapāt / śune peṣṭramivāvakṣāmaṁ taṁ pratyasyāmi mṛtyave //3 //*

६. तार्क्ष्यः (Tārkṣayaḥ) - अ. (Av.) ७.८५.१

त्यमू षु वाजिनं देवजूतं सहोवानं तरुतारं रथानाम् ।
अरिष्टनेमिं पृतनाजिमाशुं स्वस्तये तार्क्ष्यमिहा हुवेम ॥१ ॥
*tyamū ṣu vājinaṁ devajūtaṁ sahovānaṁ tarutāraṁ rathānām /*
*ariṣṭanemiṁ pṛtanājimāśuṁ svastaye tārkṣayamihā huvema //1 //*

७. त्वष्ट्रादयः (Tvaṣṭrādayaḥ) - अ. (Av.) ६.४.१-३

त्वष्टा मे दैव्यं वचः पर्जन्यो ब्रह्मणस्पतिः ।
पुत्रैर्भ्रातृभिरदितिर्नु पातु नो दुष्टरं त्रायमाणं सहः ॥१ ॥
अंशो भगो वरुणो मित्रो अर्यमादितिः पुनातु मरुतः ।
अप तस्य द्वेषो गमेदभिह्रुतो यावयच्छत्रुमन्तितम् ॥२ ॥
धिये समश्विना प्रावतं न उरुष्या ण उरुज्मन्नप्रयुच्छन् ।
द्यौ३ष्पितर्यावय दुच्छुना या ॥३ ॥
*tvaṣṭā me daivyaṁ vachaḥ parjanyo brahmaṇaspatiḥ /*
*putrerbhrātṛbhiraditirnu pātu no duṣṭaraṁ trāyamāṇaṁ sahaḥ //1 //*
*aṁśo bhago varuṇo mitro aryamāditiḥ punātu marutaḥ /*
*apa tasya dveṣo gamedabhihnuto yāvayachchhannumantitam //2 //*
*dhiye samaśvinā prāvataṁ na uruṣyā ṇa urujmannaprayuchchhan /*
*dyau3ṣpitaryāvaya duchchhunā yā //3 //*

८. मृत्युः (Mṛtyuḥ) - अ. (Av.) ६.१३.१-३

नमो देववधेभ्यो नमो राजवधेभ्यः। अथो ये विश्यानां वधास्तेभ्यो मृत्यो नमोऽस्तु ते॥१॥
नमस्ते अधिवाकाय परावाकाय ते नमः। सुमत्यै मृत्यो ते नमो दुर्मत्यै त इदं नमः ॥२॥
नमस्ते यातुधानेभ्यो नमस्ते भेषजेभ्यः। नमस्ते मृत्यो मूलेभ्यो ब्राह्मणेभ्य इदं नमः ॥३॥

*namo devavadhebhyo namo rājavadhebhyaḥ | atho ye viśyānāṁ vadhāstebhyo mṛtyo namo'stu te ||1 ||*
*namaste adhivākāya parāvākāya te namaḥ | sumatyai mṛtyo te namo durmatyai ta idaṁ namaḥ ||2 ||*
*namaste yātudhānebhyo namaste bheṣajebhyaḥ | namaste mṛtyo mūlebhyo brāhmaṇebhya idaṁ namaḥ ||3 ||*

९. सविता (Savitā) - अ. (Av.) ६.१.१-३

दोषो गाय बृहद् गाय द्युमद्धेह्याथर्वण। स्तुहि देवं सवितारम् ॥१॥
तमु ष्टुहि यो अन्तः सिन्धौ सूनुः सत्यस्य युवानम्। अद्राघवाचं सुशेवम् ॥२॥
स घा नो देवः सविता साविषदमृतानि मूरि। उभे सुष्टुती सुगातवे ॥३॥

*doṣo gāya bṛhad gāya dyumaddhehyātharvaṇa | stuhi devaṁ savitāram ||1 ||*
*tamu ṣṭuhi yo antaḥ sindhau sūnuḥ satyasya yuvānam | adrāghavāchaṁ suśevam ||2 ||*
*sa ghā no devaḥ savitā sāviṣadamṛtāni mūri | ubhe suṣṭutī sugātave ||3 ||*

## ४०. अथर्वांगिरा (Atharvāṁgirā)

१. अग्निः (Agniḥ) - अ. (Av.) १९.३.१-४; १९.४.१-४

अ. (Av.) १९.३.१-४

दिव्स्पृथिव्याः पर्यन्तरिक्षाद् वनस्पतिभ्यो अध्योषधीभ्यः ।
यत्रयत्र विभृतो जातवेदास्तत स्तुतो जुषमणो न एहि ॥१॥
यस्ते अप्सु महिमा यो वनेषु य ओषधीषु पशुष्वप्स्व१न्तः ।
अग्ने सर्वास्तन्वः१ सं रभस्व ताभिर्न एहि द्रविणोदा अजस्रः ॥२॥
यस्ते देवेषु महिमा स्वर्गो या ते तनूः पितृष्वाविश ।
पुष्टिर्या ते मनुष्येषु पप्रथेऽग्ने तया रयिमस्मासु धेहि ॥३॥
श्रुत्कर्णाय कवये वेद्याय वचोभिर्वाकैरुप यामि रातिम् ।
यतो भयमभयं तन्नो अस्त्वव देवानां यज हेडो अग्ने ॥४॥

*divspṛthivyāḥ paryantarikṣād vanaspatibhyo adhyoṣadhībhyaḥ |*
*yatrayatra vibhṛto jātavedāstata stuto juṣamaṇo na ehi ||1 ||*
*yaste apsu mahimā yo vaneṣu ya Oṣadhīṣu paśuṣvapsva1ntaḥ |*
*agne sarvāstanvaḥ1 saṁ rabhasva tābhirna ehi draviṇodā ajasraḥ ||2 ||*
*yaste deveṣu mahimā svargo yā te tanūḥ pitṛṣvāvieśa |*
*puṣṭiryā te manuṣyeṣu paprathe'gne tayā rayimasmāsu dhehi ||3 ||*
*śrutkarṇāya kavaye vedyāya vachobhirvākairupa yāmi rātim |*
*yato bhayamabhayaṁ tanno astvava devānāṁ yaja heḍo agne ||4 ||*

अ. (Av.) १९.४.१-४

यामाहुतिं प्रथमामथर्वा या जाता या हव्यमकृणोज्जातवेदाः ।
तां त एतां प्रथमो जोहवीमि ताभिष्टुप्तो वहतु हव्यमग्निरग्नये स्वाहा॥१॥
आकूतिं देवीं सुभगां पुरो दधे चित्तस्य माता सुहवा नो अस्तु ।
यामाशामेमि केवली सा मे अस्तु वदेयमेनां मनसि प्रविष्टाम् ॥२॥
अकूत्या नो बृहस्पत आकूत्या न उपा गहि ।
अथो भगस्य नो धेह्यथो नः सुहवो भव ॥३॥
बृहस्पतिर्म आकूतिमांगिरसः प्रति जानातु वाजमेताम् ।
यस्य देवा देवताः संबभूवुः स सुप्रणीताः कामो अन्वेत्वस्मान्॥४॥

*yāmāhutiṁ prathamāmatharvā yā jātā yā havyamakṛṇojjātavedāḥ |*

*tāṁ ta etāṁ prathamo johavīmi tābhiṣṭupto vahatu havyamagniragnaye svāhā //1 //*
*ākūtiṁ devīṁ subhagāṁ puro dadhe chittasya mātā suhavā no astu /*
*yāmāśāmemi kevalī sā me astu vadeyamenāṁ manasi praviṣṭām //2 //*
*akūtyā no bṛhaspata ākūtyā na upā gahi /*
*atho bhagasya no dhehyatho naḥ suhavo bhava //3 //*
*bṛhaspatirma ākūtimāṁgirasaḥ prati jānātu vājametām /*
*yasya devā devatāḥ saṁbabhūvuḥ sa supraṇītāḥ kāmo anvetvasmān //4 //*

२. इन्द्रः (Indraḥ) - अ. (Av.) ७.११७.१; १९.५.१

अ. (Av.) ७.११७.१

आ मन्द्रैरिन्द्र हरिभिर्याहि मयूररोमभिः ।
मा त्वा के चिद् वि यमन् विं न पाशिनोऽति धन्वेव ताँ इहि ॥१ ॥
*ā mandrairindra haribhiryāhi mayūraromabhiḥ /*
*mā tvā ke chid vi yaman viṁ na pāśino'ti dhanveva tām̐ ihi //1 //*

अ. (Av.) १९.५.१

इन्द्रो राजा जगतश्चर्षणीनामधि क्षमि विषुरूपं यदस्ति ।
ततो ददाति दाशुषे वसूनि चोदद राध उपस्तुतश्चिदर्वाक् ॥१ ॥
*indro rājā jagataścharṣaṇīnāmadhi kṣami viṣurūpaṁ yadasti /*
*tato dadāti dāśuṣe vasūni chodada rādha upastutaśchidarvāk //1 //*

३. चन्द्रमा (Chandramā) - अ. (Av.) ७.११६.१

नमो रूराय च्यवनाय चोदनाय धृष्णवे । नमः शीताय पूर्वकामकृत्वने ॥१ ॥
*namo rūrāya chyavanāya chodanāya dhṛṣṇave / namaḥ śītāya pūrvakāmakṛtvane //1 //*

४. ज्वरः (Jvaraḥ) - अ. (Av.) ७.११६.२

यो अन्येद्युरुभयद्युरभ्येतीमं मण्डूकमभ्येत्वव्रतः ॥२ ॥
*yo anyedyurubhayadyurabhyetīmaṁ maṇḍūkamabhyetvavrataḥ //2 //*

५. जातवेदा (Jātavedā) - अ. (Av.) ७.७४.४

व्रतेन त्वं व्रतपते समक्तो विश्वाहा सुमना दीदिहीह ।
तं त्वा वयं जातवेदः समिद्धं प्रजावन्त उप सदेम सर्वे ॥४ ॥
*vratena tvaṁ vratapate samakto viśvāhā sumanā dīdihīha /*
*taṁ tvā vayaṁ jātavedaḥ samiddhaṁ prajāvanta upa sadema sarve //4 //*

६. ब्रह्मणस्पतिः (Brahmaṇaspatiḥ) - अ. (Av.) ६.१०१.१-३

आ वृषायस्व श्वसिहि वर्धस्व प्रथयस्व च । यथांग वर्धतां शेपस्तेन योषितमिज्जहि ॥१ ॥
येन कृशं वाजयन्ति येन हिन्वन्त्यातुरम् । तेनास्य ब्रह्मणस्पते धनुरिवा तानया पसः ॥२ ॥
आहं तनोमि ते पसो अधि ज्यामिव धन्वनि । क्रमस्वर्श इव रोहितमनवग्लायता सदा ॥३ ॥
*ā vṛṣāyasva śvasihi vardhasva prathayasva cha / yathāṁga vardhatāṁ śepastena yoṣitamijjahi //1 //*
*yena kṛśaṁ vājayanti yena hinvantyāturam / tenāsya brahmaṇaspate dhanurivā tānayā pasaḥ //2 //*
*āhaṁ tanomi te paso adhi jyāmiva dhanvani / kramasvarśa iva rohitamanavaglāyatā sadā //3 //*

७. मन्त्रोक्ताः (Mantroktāḥ) - अ. (Av.) ७.७४.१-३

अपचितां लोहिनीनां कृष्णा मातेति शुश्रुम । मनुर्देवस्य मूलेन सर्वा विध्यामि ता अहम् ॥१ ॥
विध्याम्यासां प्रथमां विध्याम्युत मध्यमाम् । इदं जघन्यामासामा च्छिनद्मि स्तुकामिव ॥२ ॥
त्वाष्ट्रेणाहं वचसा वि त ईर्ष्याममीमदम् । अथो यो मन्युस्ते पते तमु ते शमयामसि ॥३ ॥
*apachitāṁ lohinīnāṁ kṛṣṇā māteti śuśruma / manurdevasya mūlena sarvā vidhyāmi tā aham //1 //*
*vidhyāmyāsāṁ prathamāṁ vidhyāmyuta madhyamām / idaṁ jaghanyāmāsāmā*

*chchhinadmi stukāmiva //2 //*
*tvāṣṭreṇāhaṁ vachasā vi ta īrśyāmamīmadam / atho yo manyuste pate tamu te śamayāmasi //3 //*

८. राज्यभिषेक आपः (Rājyabhiṣeka Āpaḥ) - अ. (Av.) ४.८.१-७

भूतो भूतेषु पय आ दधाति स भूतानामधिपतिर्बभूव ।
तस्य मृत्युश्चरति राजसूयं स राजा राज्यमनु मन्यतामिदम् ॥१॥
अभि प्रेहि माप वेन उग्रश्चेत्ता सपत्नहा ।
आ तिष्ठ मित्रवर्धन तुभ्यं देवा अधि ब्रवन् ॥२॥
अतिष्ठन्तं परि विश्वे अभूषिंछ्रयं वसानश्चरति स्वरोचिः ।
महत् तद् वृष्णो असुरस्य नामा विश्वरूपो अमृतानि तस्थौ ॥३॥
व्याघ्रो अधि वैयाघ्रे वि क्रमस्व दिशो महीः ।
विशस्त्वा सर्वा वांछन्त्वापो दिव्याः पयस्वतीः ॥४॥
या आपो दिव्याः पयसा मदन्त्यन्तरिक्ष उत वा पृथिव्याम् ।
तासां त्वा सर्वासापामभि षिंचामि वर्चसा ॥५॥
अभि त्वा वर्चसासिचन्नापो दिव्याः पयस्वतीः ।
यथासो मित्रवर्धनस्तथा त्वा सविता करत् ॥६॥
एना व्याघ्रं परिषस्वजानाः सिहं हिन्वन्ति महते सौभाग्य ।
समुद्रं न सुभुवस्तस्थिवांसं मर्मृज्यन्ते द्वीपिनमप्स्व१न्तः ॥७॥

*bhūto bhūteṣu paya ā dadhāti sa bhūtānāmadhipatirbabhūva /*
*tasya mṛtyuścharati rājasūyaṁ sa rājā rājyamanu manyatāmidam //1 //*
*abhi prehi māpa vena ugraśchettā sapatnahā /*
*ā tiṣṭha mitravardhana tubhyaṁ devā adhi bravan //2 //*
*atiṣṭhantaṁ pari viśve abhūṣiṁchhrayaṁ vasānaścharati svarochiḥ /*
*mahat tad vṛṣṇo asurasya nāmā viśvarūpo amṛtāni tasthau //3 //*
*vyāghro adhi vaiyāghre vi kramasva diśo mahīḥ /*
*viśastvā sarvā vāṁchhantvāpo divyāḥ payasvatīḥ //4 //*
*yā āpo divyāḥ payasā madantyantarikṣa uta vā pṛthivyām /*
*tāsāṁ tvā sarvāsāpāmabhi ṣiṁchāmi varchasā //5 //*
*abhi tvā varchasāsichannāpo divyāḥ payasvatīḥ /*
*yathāso mitravardhanastathā tvā savitā karat //6 //*
*enā vyāghraṁ pariṣasvajānāḥ sihaṁ hinvanti mahate saubhāgya /*
*samudraṁ na subhuvastasthivāṁsaṁ marmṛjyante dvīpinamapsva1ntaḥ //7 //*

९. शेपोऽर्कः (Śepo'rkaḥ) - अ. (Av.) ६.७२.१-३

यथासितः प्रथयते वशाँ अनु वपूंषि कृण्वन्नसुरस्य मायया ।
एवा ते शेपः सहसायमर्कोऽङ्गेनांगं संसमकं कृणोतु ॥१॥
यथा पसस्तायादरं वातेन स्थूलभं कृतम् ।
यावत् परस्वतः पसस्तावत् ते वर्धतां पसः ॥२॥
यावदंगीनं पारस्वतं हास्तिनं गार्दभं च यत् ।
यावदश्वस्य वाजिनस्तावत् ते वर्धतां पसः ॥३॥

*yathāsitaḥ prathayate vaśām̐ anu vapūṁṣi kṛṇvannasurasya māyayā /*
*evā te śepaḥ sahasāyamarko'ṅgenāṁgaṁ saṁsamakaṁ kṛṇotu //1 //*
*yathā pasastāyādaraṁ vātena sthūlabhaṁ kṛtam /*
*yāvat parasvataḥ pasastāvat te vardhatāṁ pasaḥ //2 //*
*yāvadaṁgīnaṁ pārasvataṁ hāstinaṁ gārdabhaṁ cha yat /*
*yāvadaśvasya vājinastāvat te vardhatāṁ pasaḥ //3 //*

१०. सरस्वती (Sarasvatī) - अ. (Av.) ६.९४.१-३

सं वो मनांसि सं व्रता समाकूतीर्नमामसि ।

अमी ये विव्रता स्थन तान् व सं नमयामसि ॥१॥
अहं गृभ्णामि मनसा मनांसि मम चित्तमनु चित्तेभिरेत
मम वशेषु हृदयानि वः कृणोमि मम यातमनुवर्त्मान एत ॥२॥
ओते मे द्यावापृथिवी ओता देवी सरस्वती ।
ओतौ म इन्द्रश्चाग्निश्चर्ध्यास्मेदं सरस्वति ॥३॥
*saṁ vo manāṁsi saṁ vratā samākūtīrnamāmasi /*
*amī ye vivratā sthana tān va saṁ namayāmasi //1 //*
*ahaṁ gṛbhṇāmi manasā manāṁsi mama chittmanu chittebhireta*
*mama vaśeṣu hṛdayāni vaḥ kṛṇomi mama yātamanuvartmāna eta //2 //*
*Ote me dyāvāpṛthivī Otā devī sarasvatī /*
*Otau ma indraśchāgniśchardhyāsmedaṁ sarasvati //3 //*

११. सविता जातवेदा (Savitā Jātavedā) - अ. (Av.) ७.११५.१-४

प्र पतेतः पापि लक्ष्मि नश्येतः प्रामुतः पत। अयस्मयेनांकेन द्विषते त्वा सजामसि ॥१॥
या मा लक्ष्मीः पतयालूरजुष्टाभिचस्कन्द वन्दनेव वृक्षम् ।
अन्यत्रास्मत् सवितस्तामितो धा हिरण्यहस्तो वसु नो रराणः ॥२॥
एकशतं लक्ष्म्यो३ मर्त्यस्य साकं तन्वाजनुषोऽधिं जाताः ।
तासां पापिष्ठा निरितः प्र हिण्मः शिवा अस्मभ्यं जातवेदो नि यच्छ ॥३॥
एता एना व्याकरं खिले गा विष्ठिताइव। रमन्ता पुण्या लक्ष्मीर्याः पापीस्ता अनीनशम् ॥४॥
*pra patetaḥ pāpi lakṣami naśyetaḥ prāmutaḥ pata / ayasmayenāṁkena dviṣate tvā sajāmasi //1 //*
*yā mā lakṣamīḥ patayālūrajuṣṭābhichaskanda vandaneva vṛkṣam /*
*anyatrāsmat savitastāmito dhā hiraṇyahasto vasu no rarāṇaḥ //2 //*
*ekaśataṁ lakṣamyo3 martyasya sākaṁ tanvājanuṣo'dhiṁ jātāḥ /*
*tāsāṁ pāpiṣṭhā niritaḥ pra hiṇmaḥ śivā asmabhyaṁ jātavedo ni yachchha //3 //*
*etā enā vyākaraṁ khile gā viṣṭhitāiva / ramantā puṇyā lakṣamīryāḥ pāpīstā anīnaśam //4 //*

१२. सोमः वरुणः देवश्च (Somaḥ Varuṇaḥ Devaścha) - अ. (Av.) ७.११८.१

मर्माणि ते वर्मणा छादयामि सोमस्त्वा राजामृतेनानु वस्ताम् ।
उरोर्वरीयो वरुणस्पते कृणोतु जयन्तं त्वानु देवा मदन्तु ॥१॥
*marmāṇi te varmaṇā chhādayāmi somastvā rājāmṛtenānu vastām /*
*urorvarīyo varuṇaspate kṛṇotu jayantaṁ tvānu devā madantu //1 //*

## ४१. अथर्वाचार्यः (Atharvāchāryaḥ)

१. विराट् (Virāṭ) - अ. (Av.) ८.१०(१).१-१३; ८.१०(२).१-१०; ८.१०(३).१-८; ८.१०(४).१-१६; ८.१०(५).१-१६; ८.१०(६).१-४

अ. (Av.) ८.१०(१).१-१३

विराड् वा इदमग्र आसीत् तस्या जातायाः सर्वमबिभेदियमेवेदं भविष्यतीति ॥१॥
सोदक्रामत् सा गार्हपत्ये न्यक्रामत् ॥२॥
गृहमेधी गृहपतिर्भवति य एवं वेद ॥३॥
सोदक्रामत् साहवनीये न्यक्रामत् ॥४॥
यन्त्यस्य देवा देवहूतिं प्रियो देवानां भवति य एवं वेद ॥५॥
सोदक्रामत् सा दक्षिणाग्नौ न्यक्रामत् ॥६॥
यार्तो दक्षिणीयो वासतेयो भवति य एवं वेद ॥७॥
सोदक्रामत् सा सभायां न्यक्रामत् ॥८॥
यन्तयस्य सभा सभ्यो भवति य एंव वेद ॥९॥
सोदक्रामत् सा समितौ न्यक्रामत् ॥१०॥
यन्त्यस्य समितिं सामित्यो भवति य एवं वेद ॥११॥

सोदक्रामत् सामन्त्रणे न्यक्रामत् ॥१२॥
यन्त्यस्यामन्त्रणमामन्त्रणीयो भवति य एवं वेद ॥१३॥
*virāḍ vā idamagra āsīt tasyā jātāyāḥ sarvamabibhediyamevedaṁ bhaviṣyatīti ॥1॥*
*sodakrāmat sā gārhapatye nyakrāmat ॥2॥*
*gṛhamedhī gṛhapatirbhavati ya evaṁ veda ॥3॥*
*sodakrāmat sāhavanīye nyakrāmat ॥4॥*
*yantyasya devā devahūtiṁ priyo devānāṁ bhavati ya evaṁ veda ॥5॥*
*sodakrāmat sā dakṣiṇāgnau nyakrāmat ॥6॥*
*yārto dakṣiṇīyo vāsateyo bhavati ya evaṁ veda ॥7॥*
*sodakrāmat sā sabhāyāṁ nyakrāmat ॥8॥*
*yantayasya sabhā sabhyo bhavati ya eṁva veda ॥9॥*
*sodakrāmat sā samitau nyakrāmat ॥10॥*
*yantyasya samitiṁ sāmityo bhavati ya evaṁ veda ॥11॥*
*sodakrāmat sāmantraṇe nyakrāmat ॥12॥*
*yantyasyāmantraṇamāmantraṇīyo bhavati ya evaṁ veda ॥13॥*

अ. (Av.) ८.१०(२).१-१०

सोदक्रामत् सान्तरिक्षे चतुर्धा विक्रान्तातिष्ठत् ॥१॥
तां देवमनुष्याअब्रुवान्नियमेव तद् वेद यदुभय उपजीवेमेमामुप ह्वयामहा इति ॥२॥
तामुपाह्वयन्त ॥३॥
ऊर्ज एहि स्वध एहि सूनृत एहीरावत्येहीति ॥४॥
तस्या इन्द्रो वत्स आसीद् गायत्र्यभिधान्यभ्रमूधः ॥५॥
बृहच्च रथन्तरं च द्वौ स्तनावास्तां यायियं च वामदेव्यं च द्वौ ॥६॥
ओषधीरेव रथन्तरेण देवा अदुह्रन् व्यचो बृहता ॥७॥
अपो वामदेव्येन यां यायियेन ॥८॥
ओषधीरेवास्मै रथंतरं दुहे व्यचो बृहत् ॥९॥
अपो वामदेव्यं यां यायियं य एवं वेद ॥१०॥
*sodakrāmat sāntarikṣe chaturdhā vikrāntātiṣṭhat ॥1॥*
*tāṁ devamanuṣyāabruvānniyameva tad veda yadubhaya upajīvememāmupa hnayāmahā iti ॥2॥*
*tāmupāhnayanta ॥3॥*
*ūrja ehi svadha ehi sūnṛta ehīrāvatyehīti ॥4॥*
*tasyā indro vatsa āsīd gāyatrayabhidhānyabhramūdhaḥ ॥5॥*
*bṛhachcha rathantaraṁ cha dvau stanāvāstāṁ yāāyiāyaṁ cha vāmadevyaṁ cha dvau ॥6॥*
*Oṣadhīreva rathantareṇa devā aduhran vyacho bṛhatā ॥7॥*
*apo vāmadevyena yāṁ yāāyiāyena ॥8॥*
*Oṣadhīrevāsmai rathaṁtaraṁ duhe vyacho bṛhat ॥9॥*
*apo vāmadevyaṁ yāṁ yāāyiāyaṁ ya evaṁ veda ॥10॥*

अ. (Av.) ८.१०(३).१-८

सोदक्रामत् सा वनस्पतीनागच्छत् तां वनस्पतयोऽघ्नत सा संवत्सरे सम्भवत् ॥१॥
तस्माद् वनस्पतीनां संवत्सरे वृक्णमपि रोहति वृश्चतेऽस्याप्रियो भ्रातृव्यो य एवं वेद ॥२॥
सोदक्रामत् सा पितॄनागच्छत् तां पितरोऽघ्नत सा मासि समभवत् ॥३॥
तस्मात् पितृभ्यो मास्युपमास्यं ददति प्र पितृयाणं पन्थां जानाति य एवं वेद ॥४॥
सोदक्रामत् सा देवानागच्छत् तां देवा अघ्नत सार्धमासे समभवत् ॥५॥
तस्माद् देवेभ्योऽर्धमासे वषट् कुर्बन्ति प्र देवयानं पन्थां जानाति य एवं वेद ॥६॥
सोदक्रामत् सा मनुष्या३नागच्छत् तां मनुष्याअघ्नत सा सद्यः समभवत् ॥७॥
तस्मान्मनुष्येभ्य उभयद्युरुप हरन्त्युपास्य गृहे हरन्ति य एवं वेद ॥८॥
*sodakrāmat sā vanaspatīnāgachchhat tāṁ vanaspatayo'ghnata sā saṁvatsare*

*sambhavat //1 //*
*tasmād vanaspatīnāṁ saṁvatsare vṛkṇamapi rohati vṛśchate'syāpriyo bhrātṛvyo ya evaṁ veda //2 //*
*sodakrāmat sā pitṝnāgachchhat tāṁ pitaro'ghnata sā māsi samabhavat //3 //*
*tasmāt pitṛbhyo māsyupamāsyaṁ dadati pra pitṛyāṇaṁ panthāṁ jānāti ya evaṁ veda //4 //*
*sodakrāmat sā devānāgachchhat tāṁ devā aghnata sārdhamāse samabhavat //5 //*
*tasmād devebhyo'rdhamāse vaṣaṭ kurbanti pra devayānaṁ panthāṁ jānāti ya evaṁ veda //6 //*
*sodakrāmat sā manuṣyā3nāgachchhat tāṁ manuṣyāaghnata sā sadyaḥ samabhavat //7 //*
*tasmānmanuṣyebhya ubhayadyurupa harantyupāsya gṛhe haranti ya evaṁ veda //8 //*

अ. (Av.) ८.१०(४).१-१६

सोदक्रामत् सासुरानागच्छत् तामसुरा उपाह्वयन्त माय एहीति ॥१॥
तस्या विरोचनः प्राह्रादिर्वत्स आसीदयस्पात्रं पात्रम् ॥२॥
तां द्विमूर्धार्त्व्योऽधोक् तां मायामेवाधोक् ॥३॥
तां मायामसुरा उप जीवन्त्युपजीवनीयो भवति य एवं वेद ॥४॥
सोदक्रामत् सा पितृनागच्छत् तां पितर उपाह्वयन्त स्वध एहीति ॥५॥
तस्या यमो राजा वत्स आसीद् रजतपात्रं पात्रम् ॥६॥
तामन्तको मार्त्यवोऽधोक् तां स्वधामेवाधोक् ॥७॥
तां स्वधां पितर उप जीवन्त्यु पजीवनीयो भवति य एवं वेद ॥८॥
सोदक्रामत् सा मनुष्या३नागच्छत् तां मनुष्या३ उपाह्वयन्तेरावत्येहीति ॥९॥
तस्या मनुर्वैवस्वतो वत्स आसीत् पृथिवी पात्रम् ॥१०॥
तां पृथी वैन्योऽधोक् तां कृषिं च सस्यं चाधोक् ॥११॥
ते कृषिं च सस्यं च मनुष्या३ उप जीवन्ति कृष्टराधिरुपजीवनीयो भवति य एवं वेद ॥१२॥
सोदक्रामत् सा सप्तऋषीनागच्छत् तां सप्तऋषय उपाह्वयन्त ब्रह्मण्वत्येहीति ॥१३॥
तस्याः सोमो राजा वत्स आसीच्छन्दः पात्रम् ॥१४॥
तां बृहस्पतिरांगिरसोऽधोक् तां ब्रह्म च तपश्चाधोक् ॥१५॥
तद् ब्रह्म च तपश्च सप्तऋषय उप जीवन्ति ब्रह्मवर्चस्युपजीवनीयो भवति य एवं वेद॥१६॥

*sodakrāmat sāsurānāgachchhat tāmasurā upāhnayanta māya ehīti //1 //*
*tasyā virochanaḥ prāhrādirvatsa āsīdayaspātraṁ pātram //2 //*
*tāṁ dvimūrdhārtvyo'dhok tāṁ māyāmevādhok //3 //*
*tāṁ māyāmasurā upa jīvantyupajīvanīyo bhavati ya evaṁ veda //4 //*
*sodakrāmat sā pitṛnāgachchhat tāṁ pitara upāhnayanta svadha ehīti //5 //*
*tasyā yamo rājā vatsa āsīd rajatapātraṁ pātram //6 //*
*tāmantako mārtyavo'dhok tāṁ svadhāmevādhok //7 //*
*tāṁ svadhāṁ pitara upa jīvantyu pajīvanīyeā bhavati ya evaṁ veda //8 //*
*sodakrāmat sā manuṣyā3nāgachchhat tāṁ manuṣyā3 upāhnayanterāvatyehīti //9 //*
*tasyā manuvairvasvato vatsa āsīt pṛthivī pātram //10 //*
*tāṁ pṛthī vainyo'dhok tāṁ kṛṣiṁ cha sasyaṁ chādhok //11 //*
*te kṛṣiṁ cha sasyaṁ cha manuṣyā3 upa jīvanti kṛṣṭarādhirupajīvanīyo bhavati ya evaṁ veda //12 //*
*sodakrāmat sā saptaṛṣīnāgachchhat tāṁ saptaṛṣaya upāhnayanta brahmaṇvatyehīti //13 //*
*tasyāḥ somo rājā vatsa āsīchchhandaḥ pātram //14 //*
*tāṁ bṛhaspatirāṁgiraso'dhok tāṁ brahma cha tapaśchādhok //15 //*
*tad brahma cha tapaścha saptaṛṣaya upa jīvanti brahmavarchasyupajīvanīyo bhavati ya evaṁ veda //16 //*

अ. (Av.) ८.१०(५).१-१६

सोदक्रामत् सा देवानागच्छत् तां देवा उपाह्वयन्तोर्ज एहीति ॥१॥
तस्या इन्द्रो वत्स आसीच्चमसः पात्रम् ॥२॥
तां देवः सविताधोक् तामूर्जामेवाधोक् ॥३॥
तमूर्जा देवा उप जीवन्त्युपजीवनीयो भवति य एवं वेद ॥४॥
सोदक्रामत् सा गन्धर्वाप्सरस आगच्छत् तां गन्धर्वाप्सरस उपाह्वयन्त पुण्यगन्ध एहीति ॥५॥
तस्याश्चित्ररथः सौर्यवर्चसो वत्स आसीत् पुष्करपर्णं पात्रम् ॥६॥
तां वसुरुचिः सौर्यवर्चसोऽधोक् तां पुण्यमेव गन्धमधोक् ॥७॥
तं पुण्यं गन्धं गन्धर्वाप्सरस उप जीवन्ति पुण्यगन्धिरुपजीवनीयो भवति य एवं वेद ॥८॥
सोदक्रामत् सेतरजनानागच्छत् तामितरजना उपाह्वयन्त तिरोध एहीति ॥९॥
तस्याः कुबेरो वैश्रवणो वत्स आसीदामपात्रं पात्रम् ॥१०॥
तां रजतनाभिः कारबेरकोऽधोक् तां तिरोधामेवाधोक् ॥११॥
तां तिरोधमितरजना उप जीवन्ति तिरो धत्ते सर्व पाप्मानमुपजीवनीयो भवति य एवं वेद ।१२।
सोदक्रमात् सा सर्पानागच्छत् तां सर्पा उपाह्वयन्त विषवत्येहीति ॥१३॥
तस्यास्तक्षको वैशालेयो वत्स आसीदलाबुपात्रं पात्रम् ॥१४॥
तां धृतराष्ट्रएरावतोधोक् तां विषमेवाधोक् ॥१५॥
तद् विषं सर्पा उप जीवन्त्युपजीवनीयो भवति य एवं वेद ॥१६॥

*sodakrāmat sā devānāgachchhat tāṁ devā upāhnayantorja ehīti ॥1॥*
*tasyā indro vatsa āsīchchamasaḥ pātram ॥2॥*
*tāṁ devaḥ savitādhok tāmūrjāmevādhok ॥3॥*
*tamūrjā devā upa jīvantyupajīvanīyo bhavati ya evaṁ veda ॥4॥*
*sodakrāmat sā gandharvāpsarasa āgachchhat tāṁ gandharvāpsarasa upāhnayanta puṇyagandha ehīti ॥5॥*
*tasyāśchitrarathaḥ sauryavarchaso vatsa āsīt puṣkaraparṇa pātram ॥6॥*
*tāṁ vasuruchiḥ sauryavarchaso'dhok tāṁ puṇyameva gandhamadhok ॥7॥*
*taṁ puṇyaṁ gandhaṁ gandharvāpsarasa upa jīvanti puṇyagandhirupajīvanīyo bhavati ya evaṁ veda ॥8॥*
*sodakrāmat setarajanānāgachchhat tāmitarajanā upāhnayanta tirodha ehīti ॥9॥*
*tasyāḥ kubero vaiśravaṇo vatsa āsīdāmapātraṁ pātram ॥10॥*
*tāṁ rajatanābhiḥ kāraberako'dhok tāṁ tirodhāmevādhok ॥11॥*
*tāṁ tirodhamitarajanā upa jīvanti tiro dhatte sarva pāpmānamupajīvanīyo bhavati ya evaṁ veda ।12।*
*sodakramāt sā sarpānāgachchhat tāṁ sarpā upāhnayanta viṣavatyehīti ॥13॥*
*tasyāstakṣako vaiśāleyo vatsa āsīdalābupātraṁ pātram ॥14॥*
*tāṁ dhṛtarāṣṭraerāvatodhok tāṁ viṣamevādhok ॥15॥*
*tad viṣaṁ sarpā upa jīvantyupajīvanīyo bhavati ya evaṁ veda ॥16॥*

अ. (Av.) ८.१०(६).१-४

तद् यस्मा एव विदुषेऽलाबुनाभिषिंचेत् प्रतयाहन्यात् ॥१॥
न च प्रत्याहन्यान्मनसा त्वा प्रत्याहन्मीति प्रत्याहन्यात् ॥२॥
यत् प्रतयाहन्ति विषमेव तत् प्रत्याहन्ति ॥३॥
विषमेवास्याप्रियं भ्रातृव्यमनुविषिच्यते य एवं वेद ॥४॥

*tad yasmā eva viduṣe'lābunābhiṣiṁchet pratayāhanyāt ॥1॥*
*na cha pratyāhanyānmanasā tvā pratyāhanmīti pratyāhanyāt ॥2॥*
*yat pratayāhanti viṣameva tat pratyāhanti ॥3॥*
*viṣamevāsyāpriyaṁ bhrātṛvyamanuviṣichyate ya evaṁ veda ॥4॥*

## ४२. अनानतः पारुच्छेपिः (Anānataḥ Pāruchchhepiḥ)

१. पवमानः सोमः (Pavamānaḥ Somaḥ) - ऋ. (Rv.) ९.१११.१-३; सा. (Sv.) ४६३; १५९०-

९२

ऋ. (Rv.) ९.१११.१-३

अया रुचा हरिण्या पुनानो विश्वा द्वेषांसि तरति स्वयुग्वभिः सूरो न स्वयुग्वभिः ।
धारा सुतस्य रोचते पुनानो अरुषो हरिः ।
विश्व यद्रूपा परियात्यृक्वभिः सप्तास्येभिऋर्क्वभिः ॥११ ॥
त्वं त्यपणीनां विदो वसु सं मातृभिर्मर्जयसि स्व आ दम ऋतस्य धीतिभिर्दमे ।
परावतो न साम तद्यत्रा रणन्ति धीतयः ।
त्रिधातुभिररुषीभिर्वयो दधे रोचमानो वयो दधे ॥२ ॥
पूर्वमनु प्रदिशं याति चेकितत्सं रश्मिभिर्यतते दर्शतो रथो दैव्यो दर्शतो रथः ।
अग्मन्नुक्थानि पौंस्येन्द्रं जैत्राय हर्षयन्। वज्रश्चयद्भवथो अनपुच्युता समत्स्वनपच्युता ॥३ ॥

*ayā ruchā hariṇyā punāno viśvā dveṣāṁsi tarati svayugvabhiḥ sūro na svayugvabhiḥ ।*
*dhārā sutasya rochate punāno aruṣo hariḥ ।*
*viśva yadrūpā pariyātyṛkvabhiḥ saptāsyebhiṛrkvabhiḥ ॥11 ॥*
*tvaṁ tyapaṇīnāṁ vido vasu saṁ mātṛbhirmarjayasi sva ā dama ṛtasya dhītibhirdame ।*
*parāvato na sāma tadyatrā raṇanti dhītayaḥ ।*
*tridhātubhiraruṣībhirvayo dadhe rochamāno vayo dadhe ॥2 ॥*
*pūrvamanu pradiśaṁ yāti chekitatsaṁ raśmibhiryatate darśato ratho daivyo darśato rathaḥ ।*
*agmannukthāni pauṁsyendraṁ jaitrāya harṣayan । vajraśchayadbhavatho anapuchyutā samatsvanapachyutā ॥3 ॥*

सा. (Sv.) ४६३

अया रुचा हरिण्या पुरानो विश्वा द्वेषांसि तरति सयुग्वभिः सूरो न सयुग्वभिः ।
धारा पृष्ठस्य रोचते पुनानो अरुषो हरिः। विश्वा यद्रूपा परियास्यृक्वभिःसप्तास्येभिऋक्वभिः ।७।

*ayā ruchā hariṇyā purāno viśvā dveṣāṁsi tarati sayugvabhiḥ sūro na sayugvabhiḥ ।*
*dhārā pṛṣṭhasya rochate punāno aruṣo hariḥ । viśvā yadrūpā pariyāsyṛkvabhiḥsaptāsyebhiṛkvabhiḥ ।7 ।*

सा. (Sv.) १५९०-९२

अया रुचा हरिण्या पुनानो विश्वा द्वेषांसि तरति सयुग्वभिः सूरो न सयुग्वभिः ।
धारा पृष्ठस्य रोचते पुनानो अरुषो हरिः ।
विश्व यद्रूपा परियास्यृक्वभिः सप्तास्येभिऋर्क्वभिः ॥१ ॥
प्राचीमनु प्रदिशं याति चेकितत्सं रश्मिभिर्यतते दर्शतो रथो दैव्यो दर्शतो रथः ।
अग्मन्नुक्थानि पौंस्येन्द्रं जैत्राय हर्षयन् ।
वज्रश्च यद्भवथो अनपच्युता समत्स्वनपच्युता ॥२ ॥
त्वं ह त्यत्पणीनां विदो वसु सं मातृभिर्मर्जयसि स्व आ दम ऋतस्य धीतिभिर्दमे ।
परावतो न साम नद्यत्रा रणन्ति धीतयः ।
त्रिधातु भिररुषीभिर्वयो दधे रोचमानो वयो दधे ॥३ ॥

*ayā ruchā hariṇyā punāno viśvā dveṣāṁsi tarati sayugvabhiḥ sūro na sayugvabhiḥ ।*
*dhārā pṛṣṭhasya rochate punāno aruṣo hariḥ ।*
*viśva yadrūpā pariyāsyṛkvabhiḥ saptāsyebhiṛrkvabhiḥ ॥1 ॥*
*prāchīmanu pradiśaṁ yāti chekitatsaṁ raśmibhiryatate darśato ratho daivyo darśato rathaḥ ।*
*agmannukthāni pauṁsyendraṁ jaitrāya harṣayan ।*
*vajraścha yadbhavatho anapachyutā samatsvanapachyutā ॥2 ॥*
*tvaṁ ha tyatpaṇīnāṁ vido vasu saṁ mātṛbhirmarjayasi sva ā dama ṛtasya dhītibhirdame ।*
*parāvato na sāma nadyatrā raṇanti dhītayaḥ ।*

*tridhātu bhiraruṣībhirvayo dadhe rochamāno vayo dadhe //3 //*

४३. अनिलो वातायनः (Anilo Vātāyanaḥ)

१. वायुः (Vāyuḥ) - ऋ. (Rv.) १०.१६८.१-४

वातस्य नु महिमानं रथस्य रुजन्नेति स्तनयन्नस्य घोषः ।
दिविस्पृग्यात्यरुणानि कृण्वन्नुतो एति पृथिव रेणुमस्यन् ॥१॥
संप्रेरते अनु वातस्य विष्ठा एनं गच्छन्ति समनं न योषाः ।
ताभिः संयुक्सरथं देव ईयतेऽस्य विश्वस्य भुवनस्य राजा ॥२॥
अन्तरिक्षे पथिभिरीयमानो न नि विशते कतमच्चनाहः ।
अपां सखा प्रथमजा ऋतावा क्व स्विज्जातः कुत आ बभूव ॥३॥
आत्मा देवानां भुवनस्य गर्भो यथावशं चरति देव एषः ।
घोषा इदस्य श्रृण्विरे न रूपं तस्मै वाताय हविषा विधेम ॥४॥

*vātasya nu mahimānaṁ rathasya rujanneti stanayannasya ghoṣaḥ /*
*divispṛgyātyaruṇāni kṛṇvannuto eti pṛthiva reṇumasyan //1 //*
*saṁprerate anu vātasya viṣṭhā enaṁ gachchhanti samanaṁ na yoṣāḥ /*
*tābhiḥ saṁyuksarathaṁ deva īyate'sya viśvasya bhuvanasya rājā //2 //*
*antarikṣe pathibhirīyamāno na ni viśate katamachchanāhaḥ /*
*apāṁ sakhā prathamajā ṛtāvā kva svijjātaḥ kuta ā babhūva //3 //*
*ātmā devānāṁ bhuvanasya garbho yathāvaśaṁ charati deva eṣaḥ /*
*ghoṣā idasya śṛṇvire na rūpaṁ tasmai vātāya haviṣā vidhema //4 //*

## ४४. अन्धीगुः श्यावाश्विः (Andhīguḥ Śyāvāśviḥ)

१. पवमानः सोमः (Pavamānaḥ Somaḥ) - सा. (Sv.) ५४५; ६९७-९९

सा. (Sv.) ५४५

पुरोजिती वो अन्धसः सुताय मादयित्नवे। अपश्वानं श्नथिष्टन सखायो दीर्घजिह्व्यम् ॥१॥

*purojitī vo andhasaḥ sutāya mādayitnave / apaśvānaṁ śnathiṣṭana sakhāyo dīrghajihnyam //1 //*

सा. (Sv.) ६९७-९९

पुरोजिती वो अन्धसः सुताय मादयित्नवे । अपश्वानं श्नथिष्टन सखायो दीर्घजिह्व्यम् ॥१॥
यो धारया पावकया परिप्रस्यन्दते सुतः इन्दुरश्वो न कृत्व्यः ॥२॥
तं दुरोषमभी नरः सोमं विश्वाच्या धिया। याग्य सन्त्वद्रयः ॥३॥

*purojitī vo andhasaḥ sutāya mādayitnave / apaśvānaṁ śnathiṣṭana sakhāyo dīrghajihnyam //1 //*
*yo dhārayā pāvakayā pariprasyandate sutaḥ induraśvo na kṛtvyaḥ //2 //*
*taṁ duroṣamabhī naraḥ somaṁ viśvāchyā dhiyā / yāāya santvadrayaḥ //3 //*

## ४५. अपाला आत्रेयी (Apālā Ātreyī)

१. इन्द्रः (Indraḥ) - ऋ. (Rv.) ८.९१.१-७

कन्या३ वारवायती सोममपि स्रुताविदत् ।
अस्तं भरन्त्यब्रवीदिन्द्राय सुनवै त्वा शक्राय सुनवै त्वा ॥१॥
असौ य एषि वीरको गृहंगृहं विचाकशत् ।
इमं जम्भसुतं पिब धानावन्तं करम्भिणमपूपवन्तमुक्थिनम् ॥२॥
आ चन त्वा चिकित्सामोऽधि चन त्वा नेमसि ।
शनैरिव शनकैरिवेन्द्रायेन्दो परि स्रव ॥३॥
कुविच्छकत्कुवित्करत्कुविन्नो वस्यसस्करत् ।
कुवित्पतिद्विषो यतीरिन्द्रेण संगमामहै ॥४॥
इमानि त्रीणि विष्टपा तानीन्द्र वि रोहय ।
शिरस्ततस्योर्वरामादिदं म उपोदरे ॥५॥

असौ च या न उर्वरादिमां तन्वं१ मम । अथो ततस्य यच्छिरः सर्वा ता रोमशा कृधि ॥६॥
खे रथस्य खेऽनसः खे युगस्य शतक्रतो । अपालामिन्द्र त्रिष्पूत्व्यकृणोः सूर्यत्वचम् ॥७॥
*kanyā3 vāravāyatī somamapi srutāvidat /*
*astaṁ bharantyabravīdindrāya sunavai tvā śakrāya sunavai tvā //1 //*
*asau ya eṣi vīrako gṛhaṁgṛhaṁ vichākaśat /*
*imaṁ jambhasutaṁ piba dhānāvantaṁ karambhiṇamapūpavantamukthinam //2 //*
*ā chana tvā chikitsāmo'dhi chana tvā nemasi /*
*śanairiva śanakairivendrāyendo pari srava //3 //*
*kuvichchhakatkuvitkaratkuvinno vasyasaskarat /*
*kuvitpatidviṣo yatīrindreṇa saṁgamāmahai //4 //*
*imāni trīṇi viṣṭapā tānīndra vi rohaya /*
*śirastatasyorvarāmādidaṁ ma upodare //5 //*
*asau cha yā na urvarādimāṁ tanvaṁ1 mama / atho tatasya yachchhiraḥ sarvā tā romaśā kṛdhi //6 //*
*khe rathasya khe'nasaḥ khe yugasya śatakrato / apālāmindra trispūtvyakṛṇoḥ sūryatvacham //7 //*

## ४६. अप्रतिरथः (Apratirathaḥ)

१. अग्निः (Agniḥ) - य. (Yv.)१७.५०; ५२; ५३; ५५; ५६; ५८

य. (Yv.)१७.५०

उदेनमुत्तरां नयाग्ने घृतेनाहुत। रायस्पोषेण सं सृज प्रजया च बहुं कृधि ॥५०॥
*udenamuttarāṁ nayāgne ghṛtenāhuta / rāyaspoṣeṇa saṁ sṛja prajayā cha bahuṁ kṛdhi //50 //*

य. (Yv.)१७.५२-५३

यस्य कुर्मो गृहे हविस्तमग्ने वर्द्धया त्वम्। तस्मै देवाऽअधि ब्रुवन्नयं च ब्रह्मणस्पतिः ॥५२॥
उदु त्वा विश्वे देवाऽअग्ने भरन्तु चित्तिभिः। स नो भ्व शिवस्त्वंसुप्रतीको विभावसुः ॥५३॥
*yasya kurmo gṛhe havistamagne varddhayā tvam / tasmai devā'adhi bruvannayaṁ cha brahmaṇaspatiḥ //52 //*
*udu tvā viśve devā'agne bharantu chittibhiḥ / sa no bhva śivastvaṁsupratīko vibhāvasuḥ //53 //*

य. (Yv.)१७.५५-५६

समिद्धेऽअग्नावधि मामहानऽउक्थपत्र ऽईड्यो गृभीतः ।
तप्तं घर्म्मं परिगृह्यायजन्तोर्जा यद्यामयजन्त देवाः ॥५५॥
देव्याय घर्त्रे जोष्टे देवश्री श्रीमनाः शतपयाः ।
परिगृह्य देवा यामायन देवा दैंवभ्योऽअध्वर्य्यन्तोऽअस्थुः ॥५६॥
*samiddhe'agnāvadhi māmahāna'ukthapatra 'īḍyo gṛbhītaḥ /*
*taptaṁ gharmma parigṛhyāyajantorjā yadyāmayajanta devāḥ //55 //*
*devyāya ghartre joṣṭe devaśrī śrīmanāḥ śatapayāḥ /*
*parigṛhma devā yāmāyana devā rdaivabhyo'adhvaryyanto'asthuḥ //56 //*

य. (Yv.)१७.५८

सूर्यरश्मिर्हरिकेशः पुरस्तात्सविता ज्योतिरुदयाँश्ऽ अजस्रम् ।
तस्य पूषा प्रसवे याति विद्वान्त्सम्पश्यन्विश्वा भुवनानि गोपाः ॥५८॥
*sūryaraśmirharikeśaḥ purastātsavitā jyotirudayām̐ś' ajasram /*
*tasya pūṣā prasave yāti vidvāntsampaśyanviśvā bhuvanāni gopāḥ //58 //*

२. आदित्यः (Ādityaḥ) - य. (Yv.)१७.५७

वीतंहविः शमितंशमिता यजध्यै तुरीयो याो यत्र हव्यमेति ॥
ततो वाकाऽआशिषो नो जुषन्ताम् ॥५७॥
*vītaṁhaviḥ śamitaṁśamitā yajadhyai turīyo yāo yatra havyameti //*

*tato vākā'āśiṣo no juṣantām //57 //*

३. इन्द्रः (Indraḥ) - य. (Yv.)१७.३३-४४; ५१

य. (Yv.)१७.३३-४४

आशुः शिशानो वृषभो न भीमो घनाघनः क्षोभणश्चर्षणीनाम् ।
संक्रन्दनोऽनिमिषऽएकवीरः शतंसेनाऽअजयत्साकमिन्द्रः ॥३३॥
संक्रन्दनेनानिमिषेण जिष्णुना युत्कारेण दुश्च्यवनेन धृष्णुना ।
तदिन्देण जयत तत्सहध्वं युधो नर इषुहस्तेन वृष्णा ॥३४॥
स इषुहस्तैः स निषंगिभिर्वशी सं स्रष्टा स युध इन्द्रो गणेन ।
सं सृष्टजित्सोमपा बाहुशर्ध्युग्रधन्वा प्रतिहिताभिरस्ता ॥३५॥
बृहस्पते परि दीया रथेन रक्षोहाऽमित्राँश् अपबाधमानः ।
प्रभंजन्त्सेनाः प्रमृणो युधा जयन्नस्माकमेध्यविता रथानाम् ॥३६॥
बलविाय स्थविरः प्रवीरः सहस्वान् वाजी सहमान उग्रः ।
अभिवीरो अभिसत्वा सहोजा जैत्रमिन्द्र रथमा तिष्ठ गोवित् ॥३७॥
गोत्रभिदं गोविदं वज्रबाहुं जयन्तमज्म प्रमृणन्तमोजसा ।
इमंसजाता अनु वीरयध्वमिन्द्रंसखायो अनु संरभध्वम् ॥३८॥
अभि गोत्राणि सहसा गाहमानोऽदयो वीरः शतमन्युरिन्द्रः ।
दुश्च्यवनः पृतनाषाडयुध्योऽस्माकंसेना अवतु प्र युत्सु ॥३९॥
इन्द्र आसां नेता बृहस्पतिर्दक्षिणा याः पुर एतु सोमः ।
देवसेनानामभिभंजतीनां जयन्तीनां मरुतो यन्त्वग्रम् ॥४०॥
इन्द्रस्य वृष्णो वरुणस्य रा आदित्यानां मरुतांशर्ध उग्रम् ।
महामनसां भुवनच्यवानां घोषो देवानां जयतामुदस्थात् ॥४१॥
उद्धर्षय मघवन्नायुधान्युत्सत्वनां मामकानां मनां सि ।
उद्वृत्रहन् वाजिनां वाजिनान्युद्रथानां जयतां यन्तु घोषाः ॥४२॥
अस्माकमिन्द्रः समृतेषु ध्वजेष्वस्माकं या इषवस्ता जयन्तु ।
अस्माकं वीरा उत्तरे भवन्त्वस्माँश् उ देवा अवता हवेषु ॥४३॥
अमीषां चित्तं प्रतिलोभयन्ती गृहाणांगान्यप्वे परेहि ।
अभि प्रेहि निर्दह हृत्सु शोकैरन्धेनामित्रास्तमसा सचन्ताम् ॥४४॥

*āśuḥ śiśāno vṛṣabho na bhīmo ghanāghanaḥ kṣobhaṇaścharṣaṇīnām /*
*saṁkrandano'nimiṣa'ekavīraḥ śataṁsenā'ajayatsākamindraḥ //33 //*
*saṁkrandanenānimiṣeṇa jiṣṇunā yutkāreṇa duśchyavanena dhṛṣṇunā /*
*tadindeṇa jayata tatsahadhvaṁ yudho nara iṣuhastena vṛṣṇā //34 //*
*sa iṣuhastaiḥ sa niṣaṁgibhirvaśī saṁ sraṣṭā sa yudha indro gaṇena /*
*saṁ sṛṣṭajitsomapā bāhuśardhyugradhanvā pratihitābhirastā //35 //*
*bṛhaspate pari dīyā rathena rakṣohā'mitrām̐ś apabādhamānaḥ /*
*prabhaṁjantsenāḥ pramṛṇo yudhā jayannasmākamedhyavitā rathānām //36 //*
*balaviāāya sthaviraḥ pravīraḥ sahasvān vājī sahamāna ugraḥ /*
*abhivīro abhisatvā sahojā jaitramindra rathamā tiṣṭha govit //37 //*
*gotrabhidaṁ govidaṁ vajrabāhuṁ jayantamajma pramṛṇantamojasā /*
*imaṁsajātā anu vīrayadhvamindraṁsakhāyo anu saṁrabhadhvam //38 //*
*abhi gotrāṇi sahasā gāhamāno'dayo vīraḥ śatamanyurindraḥ /*
*duśchyavanaḥ pṛtanāṣāḍayudhyo'smākaṁsenā avatu pra yutsu //39 //*
*indra āsāṁ netā bṛhaspatirdakṣiṇā yāḥ pura etu somaḥ /*
*devasenānāmabhibhaṁjatīnāṁ jayantīnāṁ maruto yantvagram //40 //*
*indrasya vṛṣṇo varuṇasya rāā ādityānāṁ marutāṁśardha ugram /*
*mahāmanasāṁ bhuvanachyavānāṁ ghoṣo devānāṁ jayatāmudasthāt //41 //*
*uddharṣaya maghavannāyudhānyutsatvanāṁ māmakānāṁ manāṁ si /*
*udvṛtrahan vājināṁ vājinānyudrathānāṁ jayatāṁ yantu ghoṣāḥ //42 //*

*asmākamindraḥ samṛteṣu dhvajeṣvasmākaṁ yā iṣavastā jayantu /*
*asmākaṁ vīrā uttare bhavantvasmāṁ̐ u devā avatā haveṣu //43 //*
*amīṣāṁ chittaṁ pratilobhayantī gṛhāṇāṁgānyapve parehi /*
*abhi prehi nirdaha hṛtsu śokairandhenāmitrāstamasā sachantām //44 //*

य. (Yv.)१७.५१

इन्द्रेमं प्रतरां नय सजातानामसद्वशी। समेनं वर्चसा सृज देवानां भागदाऽअसत् ॥५१॥
*indremaṁ prataraṁ naya sajātānāmasadvaśī / samenaṁ varchasā sṛja devānāṁ bhāgadā'asat //51 //*

४. इन्द्र बृहस्पत्यादयः (Indra Bṛhaspatyādayaḥ) - य. (Yv.)१७.४८

यत्र बाणाः सम्पतन्ति कुमारा विशिखा ऽइव ।
तन्नऽइन्द्रो बृहस्पतिरदितिः शर्म्म यच्छतु विश्वहा शर्म्म यच्छतु ॥४८॥
*yatra bāṇāḥ sampatanti kumārā viśikhā 'iva /*
*tanna'indro bṛhaspatiradititiḥ śarmma yachchhatu viśvahā śarmma yachchhatu //48 //*

५. इषुः (Iṣuḥ) - य. (Yv.)१७.४५

अवसृष्टा परा पत शरव्ये ब्रह्मसं शिते। गच्छामित्रान् ग्र पद्यस्व मामीषां कंचनोच्छिषः ॥४५॥
*avasṛṣṭā parā pata śaravye brahmasaṁ śite / gachchhāmitrān gra padyasva māmīṣāṁ kaṁchanochchhiṣaḥ //45 //*

६. दिग् (Dig) - य. (Yv.)१७.५४

पंच दिशो दैवीर्यामवन्तु देवीरपामति दुर्मतिं बाधमानाः ।
रायस्पोषे यापतिमाभजन्ती रायस्पोषे ऽअधि योऽअस्थात् ॥५४॥
*paṁcha diśo daivīryāmavantu devīrapāmati durmatiṁ bādhamānāḥ /*
*rāyaspoṣe yāpatimābhajantī rāyaspoṣe 'adhi yāo'asthāt //54 //*

७. मरुतः (Marutaḥ) - य. (Yv.)१७.४७

असौ या सेना मरुतः परेषामभ्यैति नऽओजसा स्पर्द्धमाना ।
तां गूहत तमसापव्रतेन यथामीऽअन्योऽअन्यन्न जानन् ॥४७॥
*asau yā senā marutaḥ pareṣāmabhyaiti na'Ojasā sparddhamānā /*
*tāṁ gūhata tamasāpavratena yathāmī'anyo'anyanna jānan //47 //*

८. याः (Yāḥ) - य. (Yv.)१७.५७

वीतंहविः शमितंशमिता यजध्यै तुरीयो याो यत्र हव्यमेति।
ततो वाकाऽआशिषो नो जुषन्ताम् ॥५७॥
*vītaṁhaviḥ śamitaṁśamitā yajadhyai turīyo yāo yatra havyameti /*
*tato vākā'āśiṣo no juṣantām //57 //*

९. योद्धा (Yoddhā) - य. (Yv.)१७.४६

प्रेता जयता नरऽइन्द्रो वः शर्म्म यच्छतु। उग्रा वः सन्तु बाहवो ऽनाधृष्या यथासथ ॥४६॥
*pretā jayatā nara'indro vaḥ śarmma yachchhatu / ugrā vaḥ santu bāhavo 'nādhṛṣyā yathāsatha //46 //*

१०. सोम-वरुण-देवाः (Soma-Varuṇa-Devāḥ) - य. (Yv.)१७.४९

मर्माणि ते वर्मणा छादयामि सोमस्त्वा राजामतेनानु वस्ताम् ।
उरोर्वरीयो वरुणस्ते कृणोतु जयन्तं त्वानु देवा मदन्तु ॥४९॥
*marmāṇi te varmaṇā chhādayāmi somastvā rājāmatenānu vastām /*
*urorvarīyo varuṇaste kṛṇotu jayantaṁ tvānu devā madantu //49 //*

## ४७. अप्रतिरथ ऐन्द्रः (Apratiratha Aindraḥ)

१. अप्वा (Apvā) - ऋ. (Rv.) १०.१०३.१२; सा. (Sv.) १८६१

ऋ. (Rv.) १०.१०३.१२

अमीषां चित्तं प्रतिलोभयन्ती गृहाणांगान्यप्वे परेहि ।

अभि प्रेहि निर्दह हृत्सु शोकैरन्धेनामित्रास्तमसा सचन्ताम् ॥१२॥
*amīṣāṁ chittaṁ pratilobhayantī gṛhāṇāṁgānyaṣve parehi* ।
*abhi prehi nirdaha hṛtsu śokairandhenāmitrāstamasā sachantām* ॥12॥

सा. (Sv.) १८६१

अमीषां चित्तं प्रतिलोभयन्ती गृहाणांगान्यप्वे परेहि ।
अभि प्रेहि निर्दह हृत्सु शोकैरन्धेनामित्रास्तमसा सचन्ताम् ॥१॥
*amīṣāṁ chittaṁ pratilobhayantī gṛhāṇāṁgānyapve parehi* ।
*abhi prehi nirdaha hṛtsu śokairandhenāmitrāstamasā sachantām* ॥1॥

२. इन्द्रः (Indraḥ) - ऋ. (Rv.) १०.१०३.१-३; ५-११; सा. (Sv.) १८५०; ५३; ५५-५६; ५८-५९

ऋ. (Rv.) १०.१०३.१-३

आशुः शिशानो वृषभो न भीमो घनाघनः क्षेमणश्चर्षणीनाम् ।
संक्रन्दनोऽनिमिष एकवीरः शतं सेना अजयत्साकमिन्द्रः ॥१॥
संक्रन्दनेनानिमिषेण जिष्णुना युत्कारेण दुश्चयवनेन धृष्णुना ।
तदिन्द्रेण जयत तत्सहध्वं युधो नर इषुहस्तेन वृष्णा ॥२॥
स इषुहस्तैः स निषंगिभिर्वशी संस्रष्टा स युध इन्द्रो
गणेन संसृष्टजित्सोमपा बाहुशर्ध्युग्रधन्वा प्रतिहिताभिरस्ता ॥३॥
*āśuḥ śiśāno vṛṣabho na bhīmo ghanāghanaḥ kṣemaṇaścharṣaṇīnām* ।
*saṁkrandano'nimiṣa ekavīraḥ śataṁ senā ajayatsākamindraḥ* ॥1॥
*saṁkrandanenānimiṣeṇa jiṣṇunā yutkāreṇa duśchayavanena dhṛṣṇunā* ।
*tadindreṇa jayata tatsahadhvaṁ yudho nara iṣuhastena vṛṣṇā* ॥2॥
*sa iṣuhastaiḥ sa niṣaṁgibhirvaśī saṁsraṣṭā sa yudha indro*
*gaṇena saṁsṛṣṭajitsomapā bāhuśardhyu1gradhanvā pratihitābhirastā* ॥3॥

ऋ. (Rv.) १०.१०३.५-११

बलविाायः स्थविरः प्रवीरः सहस्वान्वाजी सहमान उग्रः ।
अभिवीरो अभिसत्वा सहोजा जैत्रमिन्द्र रथमा तिष्ठ गोवित् ॥५॥
गोत्रभिदं गोविदं वज्रबाहुं जयन्तमज्म प्रमृणन्तमोजसा ।
इमं सजाता अनु वीरयध्वमिन्द्रं सखायो अनु सं रभध्वम् ॥६॥
अभि गोत्राणि सहसा गाहमानोऽदयो वीरः शतमन्युरिन्द्रः ।
दुश्च्यवनः पृतनाशाळयुध्यो३ऽस्माकं सेना अवतु प्र युत्सु ॥७॥
इन्द्र आसां नेता बृहस्पतिर्दक्षिणा याः पुर एतु सोमः ।
देवसेनानामभिभंजतीनां जयन्तीनां मरुतो यन्त्वग्रम् ॥८॥
इन्द्रस्य वृष्णो वरुणस्य रा आदित्यानां मरुतां शर्ध उग्रम् ।
महामनसां भुवनच्यवानां घोषो देवानां जयतामुदस्थात् ॥९॥
उद्धर्षय मघवन्नायुधान्युत्सत्वनां मामकानां मनांसि ।
उद्वृत्रहन्वाजिनां वाजिनान्युद्रथानां जयतां यन्तु घोषाः ॥१०॥
अस्माकमिन्द्रः समृतेषु ध्वजेष्वस्माकं या इषवस्ता जयन्तु ।
अस्माकं वीरा उत्तरे भवन्त्वस्माँ उ देवा अवता हवेषु ॥११॥
*balaviāāyaḥ sthaviraḥ pravīraḥ sahasvānvājī sahamāna ugraḥ* ।
*abhivīro abhisatvā sahojā jaitramindra rathamā tiṣṭha govit* ॥5॥
*gotrabhidaṁ govidaṁ vajrabāhuṁ jayantamajma pramṛṇantamojasā* ।
*imaṁ sajātā anu vīrayadhvamindraṁ sakhāyo anu saṁ rabhadhvam* ॥6॥
*abhi gotrāṇi sahasā gāhamāno'dayo vīraḥ śatamanyurindraḥ* ।
*duśchyavanaḥ pṛtanāśāḷayudhyo3'smākaṁ senā avatu pra yutsu* ॥7॥
*indra āsāṁ netā bṛhaspatirdakṣiṇā yāḥ pura etu somaḥ* ।
*devasenānāmabhibhaṁjatīnāṁ jayantīnāṁ maruto yantvagram* ॥8॥
*indrasya vṛṣṇo varuṇasya rāā ādityānāṁ marutāṁ śardha ugram* ।
*mahāmanasāṁ bhuvanachyavānāṁ ghoṣo devānāṁ jayatāmudasthāt* ॥9॥

*uddharṣaya maghavannāyudhānyutsatvanāṁ māmakānāṁ manāṁsi* ।
*udvṛtrahanvājināṁ vājinānyudrathānāṁ jayatāṁ yantu ghoṣāḥ* ॥10 ॥
*asmākamindraḥ samṛteṣu dhvajeṣvasmākaṁ yā iṣavastā jayantu* ।
*asmākaṁ vīrā uttare bhavantvasmāṁ̐ u devā avatā haveṣu* ॥11 ॥

सा. (Sv.) १८५०

सङ्क्रन्दनेनानिमिषेण जिष्णुना युत्कारेण दुश्च्यवनेन धृष्णुना ।
तदिन्द्रेण जयत तत्सहध्वं युधो नर इषुहस्तेन वृष्णा ॥२ ॥
*saṅkrandanenānimiṣeṇa jiṣṇunā yutkāreṇa duśchayavanena dhṛṣṇunā* ।
*tadindreṇa jayata tatsahadhvaṁ yudho nara iṣuhastena vṛṣṇā* ॥2 ॥

सा. (Sv.) १८५३

बलविाायः स्थविरः प्रवीरः सहस्वान्वाजी सहमान उग्रः ।
अभिवीरो अभिसत्वा सहोजा जैत्रमिन्द्र रथमा तिष्ठ गोवित् ।२ ॥
*balaviāāyaḥ sthaviraḥ pravīraḥ sahasvānvājī sahamāna ugraḥ* ।
*abhivīro abhisatvā sahojā jaitramindra rathamā tiṣṭha govit* ।2 ॥

सा. (Sv.) १८५५-५६

अभि गोत्राणि सहसा गाहमानोऽदयो वीरः शतमन्युरिन्द्रः ।
दुश्च्यवनः पृतनाषाडयुध्यो३स्माकं सेना अवतु प्र युत्सु ॥१ ॥
इन्द्र आसां नोता बृहस्पतिर्दक्षिणा याः पुर एतु सोमः ।
देवसेनानामभिभंजतीनां जयन्तीना मरुतो यन्त्वग्रम् ॥२ ॥
*abhi gotrāṇi sahasā gāhamāno'dayo vīraḥ śatamanyurindraḥ* ।
*duśchyavanaḥ pṛtanāṣāḍayudhyo3smākaṁ senā avatu pra yutsu* ॥1 ॥
*indra āsāṁ notā bṛhaspatirdakṣiṇā yāḥ pura etu somaḥ* ।
*devasenānāmabhibhaṁjatīnāṁ jayantīnā maruto yantvagram* ॥2 ॥

सा. (Sv.) १८५८-५९

उद्वर्षय मघवन्नायुधन्युत्सत्वनां मामकानां मनां सि ।
उद्वृत्रहन्वाजिनां वाजिनान्युद्रथानां जयतो यन्तु घोषाः ॥१ ॥
अस्माकमिन्द्रः समृतेषु ध्वजेष्वस्माकं या इषवस्ता जयन्तु ।
अस्माकं वीरा उत्तरे भवन्त्वस्माँ उ देवा अवता हवेषु ॥२ ॥
*udvṛrṣaya maghavannāyudhanyutsatvanāṁ māmakānāṁ manāṁ si* ।
*udvṛtrahanvājināṁ vājinānyudrathānāṁ jayato yantu ghoṣāḥ* ॥1 ॥
*asmākamindraḥ samṛteṣu dhvajeṣvasmākaṁ yā iṣavastā jayantu* ।
*asmākaṁ vīrā uttare bhavantvasmāṁ̐ u devā avatā haveṣu* ॥2 ॥

३. इन्द्र मरुतो वा (Indra Maruto Vā) - ऋ. (Rv.) १०.१०३.१३; सा. (Sv.) १८६२

ऋ. (Rv.) १०.१०३.१३

प्रेता जयता नर इन्द्रो वः शर्म यच्छतु। उग्रा वः सन्तु बाहवोऽनाधृष्या यथासथ ॥१३ ॥
*pretā jayatā nara indro vaḥ śarma yachchhatu* । *ugrā vaḥ santu bāhavo'nādhṛṣyā yathāsatha* ॥13 ॥

सा. (Sv.) १८६२

प्रेता जयता नर इन्द्रो वः शर्म यच्छतु। उग्रा वः सन्तु बाहवोऽनाधृष्या यथासथ ॥२ ॥
*pretā jayatā nara indro vaḥ śarma yachchhatu* । *ugrā vaḥ santu bāhavo'nādhṛṣyā yathāsatha* ॥2 ॥

४. बृहस्पतिः (Bṛhaspatiḥ) - ऋ. (Rv.) १०.१०.३-४; सा. (Sv.) १८५२

ऋ. (Rv.) १०.१०.३-४

उशन्ति घा ते अमृतास एतदेकस्य चित्त्यजसं मर्त्यस्य ।
नि ते मनो मनसि धाय्यस्मे जन्युः पतिंस्तन्व१मा विविश्याः ॥३ ॥
न यत्पुरा चकृमा कद्ध नूनमृता वदन्तो अनृतं रपेम ।

गन्धर्वो अप्स्वप्या च योषा सा नो नाभिः परमं जामि तन्नौ ॥४॥
*uśanti ghā te amṛtāsa etadekasya chittyajasaṁ martyasya /*
*ni te mano manasi dhāyyasme janyuḥ patiṁstanva1mā viviśyāḥ //3 //*
*na yatpurā chakṛmā kaddha nūnamṛtā vadanto anṛtaṁ rapema /*
*gandharvo apsvapyā cha yoṣā sā no nābhiḥ paramaṁ jāmi tannau //4 //*

सा. (Sv.) १८५२

बृहस्पते परि दीया रथेन रक्षोहामित्राँ अपबाधमानः ।
प्रभंजन्त्सेनाः प्रमृणो युधा जयन्नस्माकमेध्यविता रथानाम् ॥१॥
*bṛhaspate pari dīyā rathena rakṣohāmitrām̐ apabādhamānaḥ /*
*prabhaṁjantsenāḥ pramṛṇo yudhā jayannasmākamedhyavitā rathānām //1 //*

## ४८. अभितपाः सौर्यः (Abhitapāḥ Sauryaḥ)

१. सूर्यः (Sūryaḥ) - ऋ. (Rv.) १०.३७.१-१२

नमो मित्रस्य वरुणस्य चक्षसे महो देवाय तदृतं सपर्यत ।
दूरेदृशे देवजाताय केतवे दिस्पुत्राय सूर्याय शंसत ॥१॥
सा मा सत्योक्तिः परि पातु विश्वतो द्यावा च यत्र ततनन्नहानि च ।
विश्वमन्यन्नि विशते यदेजति विश्वाहापो विश्वाहोदेति सूर्यः ॥२॥
न ते अदेवः प्रदिवो नि वासते यदेतशेभिः पतरै रथर्यसि ।
प्राचीनमन्यदनु वर्तते रज उदन्येन ज्योतिषा यासि सूर्य ॥३॥
येन सूर्य ज्योतिषा बाधसे तमो जगच्च विश्वमुदियर्षि भानुना ।
तेनास्मद्विश्वामनिरामनाहुतिमपामीवामप दुःष्वप्न्यं सुव ॥४॥
विश्वस्य हि प्रेषितो रक्षसि व्रतमहेळयन्नुच्चरसि स्वधा अनु ।
यदद्य त्वा सूर्योपब्रवामहै तं नो देवा अनु मंसीरत क्रतुम् ॥५॥
तं नो द्यावापृथिवी तन्न आप इन्द्रः शृण्वन्तु मरुतो हवं वचः ।
मा शूने भूम सूर्यस्य संदृशि भद्रं जीवन्तो जरणामशीमहि ॥६॥
विश्वाहा त्वा सुमनसः सुचक्षसः प्रजावन्तो अनमीवा अनागसः ।
उद्यन्त त्वा मित्रमहो दिवेदिवे ज्योग्जीवाः प्रति पश्येम सूर्य ॥७॥
महि ज्योतिर्बिभ्रतं त्वा विचक्षण भास्वन्तं चक्षुषे चक्षुषे मयः ।
आरोहन्तं बृहतः पाजसस्परि वयं जीवाः प्रति पश्येम सूर्य ॥८॥
यस्य ते विश्वा भुवनानि केतुना प्र चेरते नि च विशन्ते अक्तुभिः ।
अनागास्त्वेन हरिकेश सूर्याह्नाह्ना नो वस्यसावस्यसोदिहि ॥९॥
शं नो भव चक्षसा शं नो अह्ना शं भानुना शं हिमा शं घृणेन ।
यथा शमध्वंछमसद्दुरोणे तत्सूर्य द्रविणं धेहि चित्रम् ॥१०॥
अस्माकं देवा उभयाय जन्मने शर्म यच्छत द्विपदे चतुष्पदे ।
अदतिपबदूर्जयमानमाशितं तदस्मे शं योररपो दधातन ॥११॥
यद्वो देवाश्चकृम जिह्वया गुरु मनसो वा प्रयुती देवहेळनम् ।
अरावा यो नो अभि दुच्छुनायते तस्मिन्तदेनो वसवो नि धेतन ॥१२॥
*namo mitrasya varuṇasya chakṣase maho devāya tadṛtaṁ saparyata /*
*dūredṛśe devajātāya ketave disputrāya sūryāya śaṁsata //1 //*
*sā mā satyoktiḥ pari pātu viśvato dyāvā cha yatra tatanannahāni cha /*
*viśvamanyanni viśate yadejati viśvāhāpo viśvāhodeti sūryaḥ //2 //*
*na te adevaḥ pradivo ni vāsate yadetaśebhiḥ patarai ratharyasi /*
*prāchīnamanyadanu vartate raja udanyena jyotiṣā yāsi sūrya //3 //*
*yena sūrya jyotiṣā bādhase tamo jagachcha viśvamudiyarṣi bhānunā /*
*tenāsmadviśvāmanirāmanāhutimapāmīvāmapa duḥpvaṣnyaṁ suva //4 //*
*viśvasya hi preṣito rakṣasi vratamaheḷayannuchcharasi svadhā anu /*
*yadadya tvā sūryopabravāmahai taṁ no devā anu maṁsīrata kratum //5 //*
*taṁ no dyāvāpṛthivī tanna āpa indraḥ śṛṇvantu maruto ivaṁ vachaḥ /*

*mā śūne bhūma sūryasya saṁdṛśi bhadraṁ jīvanto jaraṇāmaśīmahi ॥6॥*
*viśvāhā tvā sumanasaḥ suchakṣasaḥ prajāvanto anamīvā anāgasaḥ ।*
*udyanta tvā mitramaho divedive jyogjīvāḥ prati paśyema sūrya ॥7॥*
*mahi jyotirbibhrataṁ tvā vichakṣaṇa bhāsvantaṁ chakṣuṣe chakṣuṣe mayaḥ ।*
*ārohantaṁ bṛhataḥ pājasaspari vayaṁ jīvāḥ prati paśyema sūrya ॥8॥*
*yasya te viśvā bhuvanāni ketunā pra cherate ni cha viśante aktubhiḥ ।*
*anāgāstvena harikeśa sūryāhnāhnā no vasyasāvasyasodihi ॥9॥*
*śaṁ no bhava chakṣasā śaṁ no ahnā śaṁ bhānunā śaṁ himā śaṁ ghṛṇena ।*
*yathā śamadhvaṁchhamasadduroṇe tatsūrya draviṇaṁ dhehi chitram ॥10॥*
*asmākaṁ devā ubhayāya janmane śarma yachchhata dvipade chatuṣpade ।*
*adatipabadūrjayamānamāśitaṁ tadasme śaṁ yorarapo dadhātana ॥11॥*
*yadvo devāśchakṛma jihnayā guru manaso vā prayutī devaheḷanam ।*
*arāvā yo no abhi duchchhunāyate tasmintadeno vasavo ni ghetana ॥12॥*

## ४९. अभीवर्तः (Abhīvartaḥ)

१. राः स्तुतिः (Rāāḥ Stutiḥ) - ऋ. (Rv.) १०.१७४.१-५

अभीवर्तेन हविषा येनेन्द्रो अभिवावृते। तेनास्मान्ब्रह्मणस्पतेऽभि राष्ट्राय वर्तय ॥१॥
अभिवृत्य सपत्नानभि या नो अरातयः अभिपृतन्यन्तं तिष्ठाभि यो न इरस्यति ॥२॥
अभि त्वा देवः सविताभि सोमो अवीवृतत्। अभि त्वा विश्वा भूतान्यभीवर्तो यथाससि ॥३॥
येनेन्द्रो हविषा कृत्व्यभवद् द्युम्न्युत्तमः। इदं तदक्रि देवा असपत्नः किलाभुवम् ॥४॥
असपत्नः सपत्नहाभिराष्ट्रो विषासहिः। यथाहमेषां भूतानां विराजानि जनस्य च ॥५।

*abhīvartena haviṣā yenendro abhivāvṛte । tenāsmānbrahmaṇaspate'bhi rāṣṭrāya vartaya ॥1॥*
*abhivṛtya sapatnānabhi yā no arātayaḥ abhipṛtanyantaṁ tiṣṭhābhi yo na irasyati ॥2॥*
*abhi tvā devaḥ savitābhi somo avīvṛtat । abhi tvā viśvā bhūtānyabhīvarto yathāsasi ॥3॥*
*yenendro haviṣā kṛtvyabhavad dyumnyuttamaḥ । idaṁ tadakri devā asapatnaḥ kilābhuvam ॥4॥*
*asapatnaḥ sapatnahābhirāṣṭro viṣāsahiḥ । yathāhameṣāṁ bhūtānāṁ virājāni janasya cha ॥5।*

## ५०. अमहीयुः (Amahīyuḥ)

१. पवमानः सोमः (Pavamānaḥ Somaḥ) - ऋ. (Rv.) ९.६१.१-३०.

अया वीती परि स्रव यस्त इन्दो मदेष्वा। अवाहन्नवतीर्नव ॥१॥
पुरः सद्य इत्थाधिये दिवोदासाय शम्बरम्। अध त्यं तुर्वशं यदुम्॥२॥
परि णो अश्वमश्वविद्गोमदिन्दो हिरण्यवत्। क्षरा सहस्रिणीरिषः ॥३॥
पवमानस्य ते वयं पवित्रमभ्युन्दतः। सखित्वमा वृणीमहे ॥४॥
ये ते पवित्रमूर्मयोऽभिक्षरन्ति धारया। तेभिर्नः सोम मृळय ॥५॥
स नः पुनान आ भर रयिं वीरवतीमिषम्। ईशानः सोम विश्वतः ॥६॥
एतमु त्यं दश क्षिपो मृजन्ति सिन्धुमातरम्। समादित्येभिरख्यत ॥७॥
समिन्द्रेणोत वायुना सुत एति पवित्र आ। सं सूर्यस्य रश्मिभि ॥८॥
स नो भगाय वायवे पूष्णे पवस्व मधुमान। चारुर्मित्रे वरुणे च ॥९॥
उच्चा ते जातमन्धसो दिवि षदूभूम्या ददे। उग्रं शर्म महि श्रवः ॥१०॥
एना विश्वान्यर्य आ द्युम्नानि मानुषाणाम्। सिषासन्तो वनामहे ॥११॥
स न इन्द्राय यज्यवे विरुणाय मरुद्भ्यः। वरिवोवित्परि स्रव ॥१२॥
उपो षु जातमप्तुरं गोभिर्भंगं परिष्कृतम्। इन्दुं देवा अयासिषुः ॥१३॥
तमिद्वर्धन्तु नो गिरो वत्सं संशिश्वरीरिव। य इन्द्रस्य हृदंसनिः ॥१४॥
अर्षा णः सोम शं गवे धुक्षस्व पिप्युषीमिषम्। वर्धा समुद्रमुक्थ्यम् ॥१५॥
पवमानो अजीजनद्दिवशिचत्रं न तन्यतुम्। ज्योतिर्वैश्वनरं बृहत् ॥१६॥

पवमानस्य ते रसो मदो राजन्नदुच्छुनः। वि वारमव्यमर्षति ॥१७॥
पवमान रसस्तव दक्षो वि राजति द्युमान। ज्योतिर्विश्वं स्वर्दृशे ॥१८॥
यस्ते मदो वरेण्यस्तेना पवस्वान्धसा। देवावीरघशंसहा ॥१९॥
जघ्निर्वृत्रममित्रियं सस्निर्वाजं दिवेदिवे। गोषा उ अश्वसा असि ॥२०॥
संमिश्लो अरुषो भव सूपस्थाभिर्न धेनुभिः। सीदंछ्येनो न योनिमा ॥२१॥
स पवस्व य आविथेन्द्रं वृत्राय हन्तवे। वव्रिवांसं महीरपः ॥२२॥
सुवीरासो वयं धना जयेम सोम मीढ्वः। पुनानो वर्ध नो गिरः ॥२३॥
त्वोतासस्तवावसा स्याम वन्वन्त आमुरः। सोम व्रतेषु जागृहि ॥२४॥
अपघ्नन्पवते मृधोऽप सोमो अराव्णः। गच्छन्निन्द्रस्य निष्कृतम् ॥२५॥
महो नो राय आ भर पवमान जही मृधः। रास्वेन्दो वीरवद्यशः ॥२६॥
न त्वा शतं चन ह्रुतो राधो दित्सन्तमा मिनन्। यत्पुनानो मखस्यसे ॥२७॥
पवस्वेन्दो वृषा सुतः कृधी नो यशसो जने। विश्वा अप द्विषो जहि ॥२८॥
अस्य ते सख्ये वयं तवेन्दो द्युम्न उत्तमे। सासह्याम पृतन्यतः ॥२९॥
या ते भीमान्यायुधा तिग्मानि सन्ति धूर्वणे। रक्षा समस्य नो निदः ॥३०॥
*ayā vītī pari srava yasta indo madeṣvā | avāhannavatīrnava ||1 ||*
*puraḥ sadya itthādhiye divodāsāya śambaram | adha tyaṁ turvaśaṁ yadum ||2 ||*
*pari ṇo aśvamaśvavidgomadindo hiraṇyavat | kṣarā sahasriṇīriṣaḥ ||3 ||*
*pavamānasya te vayaṁ pavitramabhyundataḥ | sakhitvamā vṛṇīmahe ||4 ||*
*ye te pavitramūrmayo'bhikṣaranti dhārayā | tebhirnaḥ soma mṛḷaya ||5 ||*
*sa naḥ punāna ā bhara rayiṁ vīravatīmiṣam | īśānaḥ soma viśvataḥ ||6 ||*
*etamu tyaṁ daśa kṣipo mṛjanti sindhumātaram | samādityebhirakhyata ||7 ||*
*samindreṇota vāyunā suta eti pavitra ā | saṁ sūryasya raśmibhi ||8 ||*
*sa no bhagāya vāyave pūṣṇe pavasva madhumāna | chārurmitre varuṇe cha ||9 ||*
*uchchā te jātamandhaso divi ṣadūbhūbhyā dade | ugraṁ śarma mahi śravaḥ ||10 ||*
*enā viśvānyarya ā dyumnāni mānuṣāṇām | siṣāsanto vanāmahe ||11 ||*
*sa na indrāya yajyave viruṇāya marudbhyaḥ | varivovitpari srava ||12 ||*
*upo ṣu jātamapturaṁ gobhirbhaṁgaṁ pariṣkṛtam | induṁ devā ayāsiṣuḥ ||13 ||*
*tamidvardhantu no giro vatsaṁ saṁśiśvarīriva | ya indrasya hṛdaṁsaniḥ ||14 ||*
*arṣā ṇaḥ soma śaṁ gave dhukṣasva pipyuṣīmiṣam | vardhā samudramukthyam ||15 ||*
*pavamāno ajījanaddivaśichatraṁ na tanyatum | jyotirvaiśvanaraṁ bṛhat ||16 ||*
*pavamānasya te raso mado rājannaduchchhunaḥ | vi vāramavyamarṣati ||17 ||*
*pavamāna rasastava dakṣo vi rājati dyumāna | jyotirviśvaṁ svardṛśe ||18 ||*
*yaste mado vareṇyastenā pavasvāndhasā | devāvīraghaśaṁsahā ||19 ||*
*jaghnirvṛtramamitriyaṁ sasnirvājaṁ divedive | goṣā u aśvasā asi ||20 ||*
*saṁmiślo aruṣo bhava sṛpasthābhirna dhenubhiḥ | sīdaṁchhyeno na yonimā ||21 ||*
*sa pavasva ya āvithendraṁ vṛtrāya hantave | vavrivāsaṁ mahīrapaḥ ||22 ||*
*suvīrāso vayaṁ dhanā jayema soma mīḍhvaḥ | punāno vardha no giraḥ ||23 ||*
*tvotāsastavāvasā syāma vanvanta āmuraḥ | soma vrateṣu jāgṛhi ||24 ||*
*apaghnanpavate mṛdho'pa somo arāvṇaḥ | gachchhannindrasya niṣkṛtam ||25 ||*
*maho no rāya ā bhara pavamāna jahī mṛdhaḥ | rāsvendo vīravadyaśaḥ ||26 ||*
*na tvā śataṁ chana hruto rādho ditsantamā minan | yatpunāno makhasyase ||27 ||*
*pavasvendo vṛṣā sutaḥ kṛdhī no yaśaso jane | viśvā apa dviṣo jahi ||28 ||*
*asya te sakhye vayaṁ tavendo dyumna uttame | sāsahyāma pṛtanyataḥ ||29 ||*
*yā te bhīmānyāyudhā tigmāni santi dhūrvaṇe | rakṣā samasya no nidaḥ ||30 ||*

## ५१. अमहीयुर् आंगिरसः (Amahīyur Āṁgirasaḥ)

१. पवमानः सोमः (Pavamānaḥ Somaḥ) - सा. (Sv.) ४६७; ४७०; ४७९; ४८४; ४८७; ४९४; ४९५; ५१०; ५९२ ; ५९३; ६७२-७४; ७६२; ७७८-८० ७८७-८९; ८१५-१७; ८८९-९१; १०८१-८३; १२१०-१५; १३३५-३७

सा. (Sv.) ४६७

उच्चा ते जातमन्धसो दिवि सद्भूम्या ददे। उग्रं शर्म महि श्रवः ॥१॥

*uchchā te jātamandhaso divi sadbhūmyā dade | ugraṁ śarma mahi śravaḥ ||1 ||*

सा. (Sv.) ४७०

यस्ते मदो वरेण्यस्तेना पवस्वान्धसा। देवावीरघशंसहा ॥४॥

*yaste mado vareṇyastenā pavasvāndhasā | devāvīraghaśaṁsahā ||4 ||*

सा. (Sv.) ४७९

पवस्वेन्दो वृषा सुतः कृधी नो यशसो जने। विश्वा अप द्विषो जहि ॥३॥

*pavasvendo vṛṣā sutaḥ kṛdhī no yaśaso jane | viśvā apa dviṣo jahi ||3 ||*

सा. (Sv.) ४८४

पवमानो अजीजनद्दिविश्चित्रं न तन्यतुम्। ज्योतिर्वैश्वानरं बृहत् ॥८॥

*pavamāno ajījanaddiviśchitraṁ na tanyatum | jyotirvaiśvānaraṁ bṛhat ||8 ||*

सा. (Sv.) ४८७

उपो षु जातमप्तुरं गोभिर्भंगं परिष्कृतम्। इन्दुं देवा अयासिषुः ॥१॥

*upo ṣu jātamapturaṁ gobhirbhaṁgaṁ pariṣkṛtam | induṁ devā ayāsiṣuḥ ||1 ||*

सा. (Sv.) ४९४-९५

स पवस्व य आविथेन्द्रं वृत्राय हन्तवे। वव्रिवां सं महीरपः ॥८॥
अया वीती परि स्रव यस्त इन्दो मदेष्वा। अवाहन्नवतीर्नव ॥९॥

*sa pavasva ya āvithendraṁ vṛtrāya hantave | vavrivāṁ saṁ mahīrapaḥ ||8 ||*
*ayā vītī pari srava yasta indo madeṣvā | avāhannavatīrnava ||9 ||*

सा. (Sv.) ५१०

उपघ्नन्पवते मृधोऽप सोमो अराव्णः। गच्छन्निन्द्रस्य निष्कृतम् ॥१४॥

*upaghnanpavate mṛdho'pa somo arāvṇaḥ | gachchhannindrasya niṣkṛtam ||14 ||*

सा. (Sv.) ५९२-९३

स न इन्द्राय यज्यवे वरुणाय मरुद्भ्यः वरिवोवित्परिस्रव ॥७॥
एना विश्वान्यर्य आ द्युम्नानि मानुषाणाम्। सिषान्सतो वनामहे ॥८॥

*sa na indrāya yajyave varuṇāya marudbhyaḥ varivovitparisrava ||7 ||*
*enā viśvānyarya ā dyumnāni mānuṣāṇām | siṣānsato vanāmahe ||8 ||*

सा. (Sv.) ६७२-७४

उच्चा ते जातमन्धसो दिवि सद्भूम्या ददे। उग्रं शर्म महि श्रवः ॥१॥
स न इन्द्राय यज्यवे वरुणाय मरुद्भ्यः। वरिवोवित्परि स्रव ॥२॥
एना विश्वन्यर्य आ द्युम्नानि मानुषाणाम्। सिषासन्तो वनामहे ॥३॥

*uchchā te jātamandhaso divi sadbhūmyā dade | ugraṁ śarma mahi śravaḥ ||1 ||*
*sa na indrāya yajyave varuṇāya marudbhyaḥ | varivovitpari srava ||2 ||*
*enā viśvanyarya ā dyumnāni mānuṣāṇām | siṣāsanto vanāmahe ||3 ||*

सा. (Sv.) ७६२

उपो षु जातमप्तुरं गोभिर्भंग परिष्कृतम्। इन्दुं देवा अयासिषुः ॥२॥

*upo ṣu jātamapturaṁ gobhirbhaṁga pariṣkṛtam | induṁ devā ayāsiṣuḥ ||2 ||*

सा. (Sv.) ७७८-८०

पवस्वेन्दो वृषा सुतः कृधी नो यशसो जने। विश्वा अप द्विषा जहि ॥१॥
यस्य ते सख्ये वयं सासह्याम पृतन्यतः। तवेन्दो द्युम्न उत्तमे ॥२॥

या ते भीमान्यायुधा तिग्मानि सन्ति धूर्वणे। रक्षा समस्य नो निदः ॥३॥
*pavasvendo vṛṣā sutaḥ kṛdhī no yaśaso jane । viśvā apa dviṣeā jahi ॥1 ॥*
*yasya te sakhye vayaṁ sāsahyāma pṛtanyataḥ । tavendo dyumna uttame ॥2 ॥*
*yā te bhīmānyāyudhā tigmāni santi dhūrvaṇe । rakṣā samasya no nidaḥ ॥3 ॥*

सा. (Sv.) ७८७-८९

पवमानस्य ते वयं पवित्रमभ्युन्दतः। सखित्वमा वृणीमहे ॥१॥
ये ते पवित्रमूर्मयोऽभिक्षरन्ति धारया। तेभिर्नः सोम मृडय ॥२॥
स नः पुनान आ भर रयिं वीरवतीमिषम्। ईशानः सोम विश्वतः ॥३॥
*pavamānasya te vayaṁ pavitramabhyundataḥ । sakhitvamā vṛṇīmahe ॥1 ॥*
*ye te pavitramūrmayo'bhikṣaranti dhārayā । tebhirnaḥ soma mṛḍaya ॥2 ॥*
*sa naḥ punāna ā bhara rayiṁ vīravatīmiṣam । īśānaḥ soma viśvataḥ ॥3 ॥*

सा. (Sv.) ८१५-१७

यस्ते मदो वरेण्यस्तेना पवस्वान्धसा। देवावीरघशंसहा ॥१॥
जघ्निर्वृत्रममित्रियं सस्निर्वाजं दिवेदिवे। गोषातिरश्वसा असि ॥२॥
सम्मिश्लो अरुषो भुवः सूपस्थाभिर्न धेनुभिः। सीदं च्छ्येनो न योनिमा ॥३॥
*yaste mado vareṇyastenā pavasvāndhasā । devāvīraghaśaṁsahā ॥1 ॥*
*jaghnirvṛtramamitriyaṁ sasnirvājaṁ divedive । goṣātiraśvasā asi ॥2 ॥*
*sammiślo aruṣo bhuvaḥ sūpasthābhirna dhenubhiḥ । sīdaṁ chchhyeno na yonimā ॥3 ॥*

सा. (Sv.) ८८९-९१

पवमानो अजीजनद्दिवश्चित्रं न तन्यतुम्। ज्योतिर्वैश्वानरं बृहत् ॥१॥
पवमान रसस्तव मदो राजन्नदुच्छुनः। वि वारमव्यमर्षति ॥२॥
पवमानस्य ते रसो दक्षो वि राजति द्युमान्। ज्योतिर्विश्वं - स्वर्दृशे ॥३॥
*pavamāno ajījanaddivaśchitraṁ na tanyatum । jyotirvaiśvānaraṁ bṛhat ॥1 ॥*
*pavamāna rasastava mado rājannaduchchhunaḥ । vi vāramavyamarṣati ॥2 ॥*
*pavamānasya te raso dakṣo vi rājati dyumān । jyotirviśvaṁ - svardṛśe ॥3 ॥*

सा. (Sv.) १०८१-८३

एतमु त्यं दश क्षिपो मृजन्ति सिन्धुमातरम्। समादित्येभिरख्यत ॥१॥
समिन्द्रेणोत वायुना सुत एति पवित्र आ। सं सूर्यस्य रश्मिभिः ॥२॥
स नो भगाय वायवे पूष्णे पवस्व मधुमान्। चारुर्मित्रे वरुणे च ॥३॥
*etamu tyaṁ daśa kṣipo mṛjanti sindhumātaram । samādityebhirakhyata ॥1 ॥*
*samindreṇota vāyunā suta eti pavitra ā । saṁ sūryasya raśmibhiḥ ॥2 ॥*
*sa no bhagāya vāyave pūṣṇe pavasva madhumān । chārurmitre varuṇe cha ॥3 ॥*

सा. (Sv.) १२१०-१५

अया वीती परि स्रव यस्त इन्दो मदेष्वा। अवाहन्नवतीर्नव ॥१॥
पुरः सद्य इत्थाधिये दिवोदासाय शंबरम्। अध त्यं तुर्वशं यदुम् ॥२॥
परि णो अश्वमश्वविद्गोमदिन्दो हिरण्यवत्। क्षरा सहस्रिणीरिषः ॥३॥
अपघ्नन्पवते मृधोऽप सोमो अराव्णः। गच्छन्निन्द्रस्य निष्कृतम् ॥१॥
महो नो राय आ भर पवमान जही मृधः। रास्वेन्दो वीरवद्यशः ॥२॥
न त्वा शतं च न ह्रुतो राधो दित्सन्तमा मिनन्। यत्पुनानो मखस्यसे ॥३॥
*ayā vītī pari srava yasta indo madeṣvā । avāhannavatīrnava ॥1 ॥*
*puraḥ sadya itthādhiye divodāsāya śaṁbaram । adha tyaṁ turvaśaṁ yadum ॥2 ॥*
*pari ṇo aśvamaśvavidgomadindo hiraṇyavat । kṣarā sahasriṇīriṣaḥ ॥3 ॥*
*apaghnanpavate mṛdho'pa somo arāvṇaḥ । gachchhannindrasya niṣkṛtam ॥1 ॥*
*maho no rāya ā bhara pavamāna jahī mṛdhaḥ । rāsvendo vīravadyaśaḥ ॥2 ॥*
*na tvā śataṁ cha na hruto rādho ditsantamā minn । yatpunāno makhasyase ॥3 ॥*

सा. (Sv.) १३३५-३७

उपो षु जातमप्तुरं गोभिर्भंगं परिष्कृतम्। इन्दुं देवा अयासिषुः ॥१॥
तमिद्वर्धन्तु नो गिरो वत्सं सं शिश्वरीरिव। य इन्द्रस्य हृदं सनिः ॥२॥
अर्षा नः सोम शं गवे धुक्षस्व पिप्युषीमिषम्। वर्धा समुद्रमुक्थ्य ॥३॥
*upo ṣu jātamapturaṁ gobhirbhaṁgaṁ pariṣkṛtam I induṁ devā ayāsiṣuḥ II1 II*
*tamidvardhantu no giro vatsaṁ saṁ śiśvarīriva I ya indrasya hṛdaṁ saniḥ II2 II*
*arṣā naḥ soma śaṁ gave dhukṣasva pipyuṣīmiṣam I vardhā samudramukthya II3 II*

## ५२. अम्बरीष ऋजिष्वा च (Ambarīṣa Ṛjiṣvā Cha)

१. पवमानः सोमः (Pavamānaḥ Somaḥ)- ऋ. (Rv.) ९.९८.१-१२

अभि नो वाजसातमं रयिमर्ष मुरुस्पृहम्। इन्दो सहस्रमर्णसं तुविद्युम्नं विभवासहम् ॥१॥
परि ष्य सुवानो अव्ययं रथे न वर्माव्यत। इन्दुरभि द्रुणा हितो हियानो धाराभिरक्षाः ॥२॥
परि ष्य सुवानो अक्षा इन्दुरव्ये मदच्युतः। धारा य ऊर्ध्वो अध्वरे भ्राजा नैति गव्ययुः ॥३॥
स हि त्वं देव शश्वते वसु मर्ताय दाशुषे। इन्दो सहस्रिणं रयिं शतात्मानं विवाससि ॥४॥
वयं ते अस्य वृत्रहन्वसो वस्वः पुरुस्पृहः। नि नेदिष्ठतमा इषः स्याम सुम्नस्याध्रिगो ॥५॥
द्विर्य पंच स्वयशसं स्वसारो अद्रिसंहतम्। प्रियमिन्द्रस्य काम्यं प्रस्नापयन्त्यूर्मिणम् ॥६॥
परि त्यं हर्यतं हरि बभ्रुं पुनन्ति वारेण। यो देवान्विश्वाँ इत्परि मदेन सह गछति ॥७॥
अस्य वो ह्यवसा पान्तो दक्षसाधनम्। यः सूरिषु श्रवो बृहद्दधे स्व१र्ण हर्यतः ॥८॥
स वां योषु मानवी इन्दुर्जनिष्ट रोदसी। देवो देवी गिरिष्ठा अस्रेधन्तं तुविष्वणि ॥९॥
इन्द्राय सोम पातवे वृत्रघ्ने परि पिच्यसे। नरे च दक्षिणावते देवाय सदनासदे ॥१०॥
ते प्रत्नासो व्युष्टिपु सोमाः पवित्रे अक्षरन्। अपप्रोथन्तः सनुतर्हुरश्चितः प्रातस्ताँ अप्रचेतसः।११।
तं सखायः पुरोरुचं यूयं वयं च सूरयः। अश्याम वाजगन्ध्यं सनेम वाजपस्त्यम् ॥१२॥
*abhi no vājasātamaṁ rayimarṣa muruspṛham I indo sahasramarṇasaṁ tuvidyumnaṁ vibhavāsaham II1 II*
*pari ṣya suvāno avyayaṁ rathe na varmāvyata I indurabhi druṇā hito hiyāno dhārābhirakṣāḥ II2 II*
*pari ṣya suvāno akṣā induravye madachyutaḥ I dhārā ya ūrdhvo adhvare bhrājā naiti gavyayuḥ II3 II*
*sa hi tvaṁ deva śaśvate vasu martāya dāśuṣe I indo sahasriṇaṁ rayiṁ śatātmānaṁ vivāsasi II4 II*
*vayaṁ te asya vṛtrahanvaso vasvaḥ puruspṛhaḥ I ni nediṣṭhatamā iṣaḥ syāma sumnasyādhrigo II5 II*
*dvirya paṁcha svayaśasaṁ svasāro adrisaṁhatam I priyamindrasya kāmyaṁ prasnāpayantyūrmiṇam II6 II*
*pari tyaṁ haryataṁ hari babhruṁ punanti vāreṇa I yo devānviśvāṁ̐ itpari madena saha gachhati II7 II*
*asya vo hyavasā pānto dakṣasādhanam I yaḥ sūriṣu śravo bṛhaddadhe sva1rṇa haryataḥ II8 II*
*sa vāṁ yoṣu mānavī indurjaniṣṭa rodasī I devo devī giriṣṭhā asredhantaṁ tuviṣvaṇi II9 II*
*indrāya soma pātave vṛtraghne pari pichyase I nare cha dakṣiṇāvate devāya sadanāsade II10 II*
*te pratnāso vyuṣṭipu somāḥ pavitre akṣaran I apaprothantaḥ sanutarhuraśchitaḥ prātastāṁ̐ aprachetasaḥ I11 I*
*taṁ sakhāyaḥ purorucham yūyaṁ vayaṁ cha sūrayaḥ I aśyāma vājagandhyaṁ sanema vājapastyam II12 II*

## ५३. अम्बरीषो वार्षागिरः ऋजिष्वा भारद्वाजश्च (Ambarīṣo Vārṣāgiraḥ Ṛjiṣvā Bhāradvājaścha)

१. पवमानः सोमः (Pavamānaḥ Somaḥ)- सा. (Sv.) ५४९; ५५२; १२३८-४०; १३२९-३१;

१६७९-८१

सा. (Sv.) ५४९

अभी नो वाजसातमं रयिमर्ष शतस्पृहम्। इन्दो सहस्रभर्णसं तुविद्युम्नं विभासहम् ॥५॥

*abhī no vājasātamaṁ rayimarṣa śataspṛham । indo sahasrabharṇasaṁ tuvidyumnaṁ vibhāsaham ॥5॥*

सा. (Sv.) ५५२

परि त्यं हर्यतं हरिं बभ्रुं पुनन्ति वारेण। यो देवान्विश्वा इत्परि मदेन सह गच्छति ॥८॥

*pari tyaṁ haryataṁ hariṁ babhruṁ punanti vāreṇa । yo devānviśvā itpari madena saha gachchhati ॥8॥*

सा. (Sv.) १२३८-४०

अभी नो वाजसातमं रयिमर्ष शतस्पृहम्। इन्दो सहस्रभर्णसं तुविद्युम्नं विभासहम् ॥१॥

वयं ते अस्य राधसो वसोर्वसो पुरुस्पृहः। नि नेदिष्ठतमा इषः स्याम सुम्ने ते अध्रिगो ।२॥

परि स्य स्वानो अक्षरदिन्दुरव्ये मदच्युतः। धारा य ऊर्ध्वो अध्वरे भ्राजा न याति गव्ययुः ॥३॥

*abhī no vājasātamaṁ rayimarṣa śataspṛham । indo sahasrabharṇasaṁ tuvidyumnaṁ vibhāsaham ॥1॥*

*vayaṁ te asya rādhaso vasorvaso puruspṛhaḥ । ni nediṣṭhatamā iṣaḥ syāma sumne te adhrigo ।2॥*

*pari sya svāno akṣaradinduravye madachyatuḥ । dhārā ya ūrdhvo adhvare bhrājā na yāti gavyayuḥ ॥3॥*

सा. (Sv.) १३२९-३१

परि त्यं हर्यतं हरिं बभ्रुं पुनन्ति वारेण। यो देवान्विश्वाँ इत्परि मदेन सह गच्छति ॥१॥

द्विर्य पंच स्वयशसं सखायो अद्रिसं हतम्। प्रियमिन्द्रस्य काम्यं प्रस्नापयन्त ऊर्मयः ॥२॥

इन्द्राय सोम पातवे वृत्रघ्ने परि षिच्यसे। नरे च दक्षिणावते वीराय सदनासदे ॥३॥

*pari tyaṁ haryataṁ hariṁ babhruṁ punanti vāreṇa । yo devānviśvām̐ itpari madena saha gachchhati ॥1॥*

*dvirya paṁcha svayaśasaṁ sakhāyo adrisaṁ hatam । priyamindrasya kāmyaṁ prasnāpayanta ūrmayaḥ ॥2॥*

*indrāya soma pātave vṛtraghne pari ṣichyase । nare cha dakṣiṇāvate vīrāya sadanāsade ॥3॥*

सा. (Sv.) १६७९-८१

इन्द्राय सोम पात्वे वृत्रघ्ने परि षिच्यसे। नरे च दक्षिणावते वीराय सदनासदे ॥१॥

तं सखायः पुरूरुचं वयं यूयं च सूरयः। अश्याम वाजगन्ध्यं सनेम वाजपस्त्यम् ॥२॥

परि त्यं हर्यतं हरि बभ्रुं पुनन्ति वारेण। यो देवान् विश्वाँ इत् परि मदेन सह गच्छति ॥३॥

*indrāya soma pātve vṛtraghne pari ṣichyase । nare cha dakṣiṇāvate vīrāya sadanāsade ॥1॥*

*taṁ sakhāyaḥ purūruchaṁ vayaṁ yūyaṁ cha sūrayaḥ । aśyāma vājagandhyaṁ sanema vājapastyam ॥2॥*

*pari tyaṁ haryataṁ hari babhruṁ punanti vāreṇa । yo devān viśvām̐ it pari madena saha gachchhati ॥3॥*

## ५४. अंहोमुग् वामदेव्यः (Aṁhomug Vāmadevyaḥ)

१. विश्वेदेवाः (Viśvedevāḥ) - सा. (Sv.) ४२६

न तमंहो न दुरितं देवासो अष्ट मर्त्यम्।सजोषसो यमर्यमा मित्रो नयति वरुणो अति द्विषः।८।

*na tamaṁho na duritaṁ devāso aṣṭa martyam ।sajoṣaso yamaryamā mitro nayati varuṇo ati dviṣaḥ ।8।*

## ५५. अंहोमुग् वामदेव्यः (साग्री. सास्वा. सार्षेदी); कुल्मल वर्हिर्षः शैलूषि अंहोमुग् वा वामदेव्यः (ऋसर्व.) Aṁhomug Vāmadevyaḥ [Ssb. Sas. Sad.]; Kulmala Varhirṣaḥ Śailūṣi

Aṁhomug vā Vāmadevyaḥ [Rss.])

१. विश्वेदेवाः (Viśvedevāḥ) - ऋ. (Rv.) १०.१२६.१-८

न तमंहो दुरितं देवासां अष्ट मर्त्यम् ।
सजोषसो यमर्यमा मित्रो नयन्ति वरुणो अति द्विषः ॥१॥
तद्धि वयं वृणीमहे वरुण मित्रार्यमन् ।
येना निरंहसो यूयं पाथ नेथा च मर्त्यमति द्विषः ॥२॥
ते नूनं नोऽयमूतये वरुणो मित्रो अर्यमा ।
नयिष्ठा उ नो नेषणि पर्षिष्ठा उ नः पर्षण्यति द्विषः ॥३॥
यूयं विश्वं परि पाथ वरुणो मित्रो अर्यमा ।
युयष्माकं शर्मणि प्रिये स्याम सुप्रणीतयोऽति द्विषः ॥४॥
आदित्यासो अति स्रिधो वरुणो मित्रो अर्यमा ।
उग्र मरुद्भ रुद्रं हुवेमेन्द्रमग्निंन स्वस्तयेऽति द्विषः ॥५॥
नेतार ऊ षु णस्तिरो वरुणो मित्रो अर्यमा ।
अति विश्वानि दुरिता राजानश्चर्षणीनामति द्विषः ॥६॥
शुनमस्मभ्यमूतये वरुणो मित्रो अर्यमा ।
शर्म यच्छन्तु सप्रथ आदित्यासो यदीमहे अति द्विषः ॥७॥
यथा ह त्यद्वसवो गौर्य चित्पदि षितामुमुंचता यजत्राः ।
एवो ष्व१ स्मन्मुंचता व्यंहः प्र तार्यग्ने प्रतरं न आयुः ॥८॥

*na tamaṁho duritaṁ devāsāṁ aṣṭa martyam* ।
*sajoṣaso yamaryamā mitro nayanti varuṇo ati dviṣaḥ* ॥1॥
*taddhi vayaṁ vṛṇīmahe varuṇa mitrāryaman* ।
*yenā niraṁhaso yūyaṁ pātha nethā cha martyamati dviṣaḥ* ॥2॥
*te nūnaṁ no'yamūtaye varuṇo mitro aryamā* ।
*nayiṣṭhā u no neṣaṇi parṣiṣṭhā u naḥ parṣaṇyati dviṣaḥ* ॥3॥
*yūyaṁ viśvaṁ pari pātha varuṇo mitro aryamā* ।
*yuyaṣmākaṁ śarmaṇi priye syāma supraṇītayo'ti dviṣaḥ* ॥4॥
*ādityāso ati sridho varuṇo mitro aryamā* ।
*ugra marudbha rudraṁ huvemendramagiṁna svastaye'ti dviṣaḥ* ॥5॥
*netāra ū ṣu ṇastiro varuṇo mitro aryamā* ।
*ati viśvāni duritā rājānaścharṣaṇīnāmati dviṣaḥ* ॥6॥
*śunamasmabhyamūtaye varuṇo mitro aryamā* ।
*śarma yachchhantu sapratha ādityāso yadīmahe ati dviṣaḥ* ॥7॥
*yathā ha tyadvasavo gaurya chitpadi ṣitāmamuṁchatā yajatrāḥ* ।
*evo ṣva1 smanmuṁchatā vyaṁhaḥ pra tāryagne prataraṁ na āyuḥ* ॥8॥

## ५६. अयास्यः (Ayāsyaḥ)

१. पवमानः सोमः (Pavamānaḥ Somaḥ)- ऋ. (Rv.) ९.४४.१-६; ९.४५.१-६; ९.४६.१-६

ऋ. (Rv.) ९.४४.१-६

प्र ण इन्दो महे तन ऊर्मि न बिभ्रदर्षसि। अभि देवाँ अयास्यः ॥१॥
मती जुष्टो धिया हितः सोमो हिन्वे परावति। विप्रस्य धारया कविः ॥२॥
अयं देवेषु जागृविः सुत एति पवित्र आ। सोमो याति विचर्षणिः ॥३॥
स नः पवस्व वाजयुश्चक्राणश्चारुमध्वरम्। बर्हिष्माँ आ विवासति ॥४॥
स नो भगाय वायवे विप्रवीरः सदावृधः। सोमो देवेष्वा यमत् ॥५॥
स नो अद्य वसुत्तये क्रतुविद् गातुवित्तमः। वाजं जेषि श्रवो बृहत् ॥६॥

*pra ṇa indo mahe tana ūrmi na bibhradarṣasi* । *abhi devāṁ ayāsyaḥ* ॥1॥
*matī juṣṭo dhiyā hitaḥ somo hinve parāvati* । *viprasya dhārayā kaviḥ* ॥2॥
*ayaṁ deveṣu jāgṛviḥ suta eti pavitra ā* । *somo yāti vicharṣaṇiḥ* ॥3॥

*sa naḥ pavasva vājayuśchakrāṇaśchārumadhvaram । barhiṣmām̐ ā vivāsati ॥4॥*
*sa no bhagāya vāyave vipravīraḥ sadāvṛdhaḥ । somo deveṣvā yamat ॥5॥*
*sa no adya vasuttaye kratuvid gātuvittamaḥ । vājaṁ jeṣi śravo bṛhat ॥6॥*

ऋ. (Rv.) ९.४५.१-६

स पवस्व मदाय कं नृचक्षा देववीतये। इन्दविन्द्राय पीतये ॥१॥
स नो अर्षाभि दूत्यं१त्वमिन्द्राय तोशसे। देवान्त्सखिभ्य आ वरम् ॥२॥
उत त्वामरुणं वयं गोभिरंजमो मदाय कम्। वि नो राये दुरो वृधि ॥३॥
अत्यू पवित्रक्रमीद्वाजी धुरं न यामनि। इन्दुर्देवेषु पत्यते ॥४॥
समी सखायो अस्वरन्वने क्रीळन्तमत्यविम्। इन्दुं नावा अनूषत ॥५॥
तया पवस्व धारया यया पीतो विचक्षसे। इन्दो स्तोत्रे सुवीर्यम् ॥६॥

*sa pavasva madāya kaṁ nṛchakṣā devavītaye । indavindrāya pītaye ॥1॥*
*sa no arṣābhi dūtyaṁ1tvamindrāya tośase । devāntsakhibhya ā varam ॥2॥*
*uta tvāmaruṇaṁ vayaṁ gobhiraṁjamo madāya kam । vi no rāye duro vṛdhi ॥3॥*
*atyū pavitrakramīdvājī dhuraṁ na yāmani । indurdeveṣu patyate ॥4॥*
*samī sakhāyo asvaranvane krīḻantamatyavim । induṁ nāvā anūṣata ॥5॥*
*tayā pavasva dhārayā yayā pīto vichakṣase । indo stotre suvīryam ॥6॥*

ऋ. (Rv.) ९.४६.१-६

असृग्रन्देववीतयेऽत्यासः कृत्व्याइव। क्षरन्तः पर्वतावृधः ॥१॥
परिष्कृतास इन्दवो योषेव पित्र्यावती। वायुं सोमा असृक्षत ॥२॥
एते सोमास इन्दवः प्रयस्वन्तश्चमू सुताः। इन्द्रं वर्धन्ति कर्मभिः ॥३॥
आ धावता सुहस्त्यः शुक्रा गृभ्णीत मन्थिना। गोभिः श्रीणीत मत्सरम् ॥४॥
स पवस्व धनंजय प्रयन्ता राधसो महः। अस्मभ्यं सोम गातुवित् ॥५॥
एतं मृजन्ति मर्ज्य पवमानं दश क्षिपः। इन्द्राय मत्सरं मदम् ॥६॥

*asṛgrandevavītaye'tyāsaḥ kṛtvyāiva । kṣarantaḥ parvatāvṛdhaḥ ॥1॥*
*pariṣkṛtāsa indavo yoṣeva pitrayāvatī । vāyuṁ somā asṛkṣata ॥2॥*
*ete somāsa indavaḥ prayasvantaśchamū sutāḥ । indraṁ vardhanti karmabhiḥ ॥3॥*
*ā dhāvatā suhastyaḥ śukrā gṛbhṇīta manthinā । gobhiḥ śrīṇīta matsaram ॥4॥*
*sa pavasva dhanaṁjaya prayantā rādhaso mahaḥ । asmabhyaṁ soma gātuvit ॥5॥*
*etaṁ mṛjanti marjya pavamānaṁ daśa kṣipaḥ । indrāya matsaraṁ madam ॥6॥*

२. बृहस्पतिः (Bṛhaspatiḥ) - ऋ. (Rv.) १०.६७.१-१२; १०.६८.१-१२; अ. (Av.) २०.१६.१-१२; २०.९१.१-१२

ऋ. (Rv.) १०.६७.१-१२

इमां धियं सप्तशीर्ष्णी पिता न ऋतप्रजातां बृहतीमविन्दत् ।
तुरीयं सिवज्जनयद्विश्वजन्योऽयास्य उक्थमिन्द्राय शंसन् ॥१॥
ऋतं शंसन्त ऋजु दीध्याना दिवस्पुत्रासो असुरस्य वीराः ।
विप्रं पदमंगिरसो दधाना यास्य धाम प्रथमं मनन्त ॥२॥
हंसैरिव सखिभिर्वावदद्भिरश्मन्मयानि नहना व्यस्यन् ।
बृहस्पतिरभिकनिक्रदद्गा उत प्रास्तौदुच्च विद्वाँ अगायत् ॥३॥
अवो द्वाभ्यां पर एकया गा गुहा तिष्ठन्तीरनृतस्य सेतौ ।
बृहस्पतिस्तमसि ज्योतिरिच्छन्नुदुस्रा आकर्वि हि तिस्र आवः ॥४॥
विभिद्या पुरं शयथेमपाचीं तिस्त्रीणि साकमुदधेरकृन्तत् ।
बृहस्पतिरुषसं सूर्य गामर्कं विवेद स्तनयन्निव द्यौः ॥५॥
इन्द्रो वलं रक्षितारं दुघानां करेणेव वि चकर्ता वि रवेण ।
स्वेदाञ्जिभिराशिरमिच्छभानोऽरोदयत्पणिमा गा अमुष्णात् ॥६॥
स ई सत्येभिः सखिभिः शुचद्भिर्गोधायसं वि धनसैरदर्दः ।
ब्रह्मणस्पतिर्वृषभिर्वराहैर्घर्मस्वदेभिर्द्रविणं व्यानट् ॥७॥
ते सत्येन मनसा गोपतिं गा इयानास इषणयन्त धीभिः ।

बृहस्पतिर्मिथो अवद्यपेभिरुदुस्रिया असृजत स्वयुग्भिः ॥८॥
तं वर्धयन्तो मतिभिः शिवाभिः सिंहमिव नानदंत सधस्थे ।
बृहस्पतिं वृषणं शूरसातौ भरेभरे अनु मदेम जिष्णुम् ॥९॥
यदा वाजमसनद्विश्वरूपमा द्यामरुक्षदुत्तराणि सद्म ।
बृहस्पतिं वृषणं वर्धयन्तो नाना सन्तो बिभ्रतो ज्योतिरासा ॥१०॥
सत्यामाशिषं कृणुता वयोधै कीरिं चिद्ध्यवथ स्वेभिरेवैः ।
पश्चा मृधो अप भवन्तु विश्वास्तद्रोदसी शृणुतं विश्वमिन्वे ॥११॥
इन्द्रो मह्ना महतो अर्णवस्य वि मूर्धनमभिन्दर्बुदस्य ।
अहन्नहिमरिणात्सप्त सिन्धून्देवैर्द्यावापृथिवी प्रावतं नः ॥१२॥

*imāṁ dhiyaṁ saptaśīrṣṇī pitā na ṛtaprajātāṁ bṛhatīmavindat /*
*turīyaṁ sivajjanayadviśvajanyo'yāsya ukthamindrāya śaṁsan //1 //*
*ṛtaṁ śaṁsanta ṛju dīdhyānā divasputrāso asurasya vīrāḥ /*
*vipraṁ padamaṁgiraso dadhānā yāsya dhāma prathamaṁ mananta //2 //*
*haṁsairiva sakhibhirvāvadadbhiraśmanmayāni nahanā vyasyan /*
*bṛhaspatirabhikanikradadgā uta prāstauduchcha vidvāṁ̐ agāyat //3 //*
*avo dvābhyāṁ para ekayā gā guhā tiṣṭhantīranṛtasya setau /*
*bṛhaspatistamasi jyotirichchhannudusrā ākarvi hi tisra āvaḥ //4 //*
*vibhidyā puraṁ śayathemapāchīṁ tistrīṇi sākamudadherakṛntat /*
*bṛhaspatiruṣasaṁ sūrya gāmarka viveda stanayanniva dyauḥ //5 //*
*indro valaṁ rakṣitāraṁ dughānāṁ kareṇeva vi chakartā vi raveṇa /*
*svedāñjabhirāśiramichchhabhāno'rodayatpaṇimā gā amuṣṇāt //6 //*
*sa ī satyebhiḥ sakhibhiḥ śuchadbhirgodhāyasaṁ vi dhanasairadardaḥ /*
*brahmaṇaspatirvṛṣabhirvarāhairgharmasvadebhirdraviṇaṁ vyānaṭ //7 //*
*te satyena manasā gopatiṁ gā iyānāsa iṣaṇayanta dhībhiḥ /*
*bṛhaspatirmitho avadyapebhirudusriyā asṛjata svayugbhiḥ //8 //*
*taṁ vardhayanto matibhiḥ śivābhiḥ siṁhamiva nānadaṁta sadhasthe /*
*bṛhaspatiṁ vṛṣaṇaṁ śūrasātau bharebhare anu madema jiṣṇum //9 //*
*yadā vājamasanadviśvarūpamā dyāmarukṣaduttarāṇi sadma /*
*bṛhaspatiṁ vṛṣaṇaṁ vardhayanto nānā santo bibhrato jyotirāsā //10 //*
*satyāmāśiṁṣaṁ kṛṇutā vayodhai kīriṁ chiddhyavatha svebhirevaiḥ /*
*paśchā mṛdho apa bhavantu viśvāstadrodasī śṛṇutaṁ viśvaminve //11 //*
*indro mahnā mahato arṇavasya vi mūrdhanamabhindarbudasya /*
*ahannahimariṇātsapta sindhūndevairdyāvāpṛthivī prāvataṁ naḥ //12 //*

ऋ. (Rv.) १०.६८.१-१२

उदप्रुतो न वयो रक्षमाणा वावदतो अभियस्येव घोषाः ।
गिरिभ्रजो नोर्मयो मदन्तो बृहस्पतिमभ्य१र्का अनावन् ॥१॥
सं गोभिरांगिरसो नक्षमाणो भग इवेदर्यमणं निनाय ।
जने मित्रो न दम्पती अनक्ति बृहस्पते वाजयाशूँरिवाजौ ॥२॥
साध्वर्या अतिथिनीरिषिराः स्पार्हाः सुवर्णा अनवद्यरूपाः ।
बृहस्पतिः पर्वतेभ्यो वितूर्या निर्गा ऊपे यवमिव स्थिविभ्य ॥३॥
आप्रुषायन्मधुन ऋतस्य योनिमवक्षिपन्नर्क उल्कामिव द्योः ।
बृहस्पतिरुद्धरन्नश्मनो गा भूम्या उद्नेव वि त्वचं बिभेद ॥४॥
अप ज्योतिषा तमो अन्तरिक्षादुद्नः शीपालमिव वात आजत् ।
बृहस्पतिरनुमृश्या बलस्याभ्रमिव वात आ चक्र आ गाः ॥५॥
यदा वलस्य पीयतो जसुं भेद् बृहस्पतिरग्नितपोभिरर्कैः ।
दद्भिर्न जिह्वा परिविष्टमाददाविर्निधीँरकृणोदुस्रियाणाम् ॥६॥
बृहस्पतिरमत हि त्यदासां नाम स्वरीणां सदने गुहा यत् ।
आण्डेव भित्त्वा शकुनस्य गर्भमुदुस्रियाः पर्वतस्य त्मनाजत् ॥७॥

अश्नापिनद्धं मधु पर्यपश्यन्मत्स्यं न दीन उदनि क्षियन्तम् ।
निष्टज्जभार चमसं न वृक्षाद् बृहस्पतिर्विरवेणा विकृत्य ॥८॥
सोषामविन्दत्स स्वः१ सो अग्निं सो अर्केण वि बबाधे तमांसि ।
बृहस्पतिर्गोवपुषो वलस्य निर्मज्जानं न पर्वणो जभार ॥९॥
हिमेव पर्णा मुषिता वनानि बृहस्पतिनाकृपयद्वलो गाः ।
अनानुकृत्यमपुनश्चकार यात्सूर्यामासा मिथ उच्चरातः ॥१०॥
अभि श्यावं न कृशनेभिरश्वं नक्षत्रेभिः पितरो द्यामपिंशन् ।
रात्र्यां तमो अदधुर्ज्योतिरहन्बृहस्पतिर्भिनदद्रिं विदद्राः ॥११॥
इदमकर्म नमो अभ्रियाय यः पूर्वीरन्वानोनवीति ।
बृहस्पतिः स हि गोभिः सो अश्वैः स वीरेभिः स नृभिर्नो वयो धात् ॥१२॥

*udapruto na vayo rakṣamāṇā vāvadato abhiyasyeva ghoṣāḥ /*
*giribhrajo normayo madanto bṛhaspatimabhya1rkā anāvan //1 //*
*saṁ gobhirāṁgiraso nakṣamāṇo bhaga ivedaryamaṇaṁ nināya /*
*jane mitro na dampatī anakti bṛhaspate vājayāśūm̐rivājau //2 //*
*sādhvaryā atithinīriṣirāḥ spārhāḥ suvarṇā anavadyarūpāḥ /*
*bṛhaspatiḥ parvatebhyo vitūryā nirgā ūpe yavamiva sthivibhya //3 //*
*āpruṣāyanmadhuna ṛtasya yonimavakṣipannarka ulkāmiva dyoḥ /*
*bṛhaspatiruddharannaśmano gā bhūmyā udneva vi tvachaṁ bibheda //4 //*
*apa jyotiṣā tamo antarikṣādudnaḥ śīpālamiva vāta ājat /*
*bṛhaspatiranumṛśyā balasyābhramiva vāta ā chakra ā gāḥ //5 //*
*yadā valasya pīyato jasuṁ bhed bṛhaspatiragnitapobhirarkaiḥ /*
*dadbhirna jihnā pariviṣṭamādadāvirnidhīm̐rakṛṇodusriyāṇām //6 //*
*bṛhaspatiramata hi tyadāsāṁ nāma svarīṇāṁ sadane guhā yat /*
*āṇḍeva bhittvā śakunasya garbhamudusriyāḥ parvatasya tmanājat //7 //*
*aśnāpinaddhaṁ madhu paryapaśyanmatsyaṁ na dīna udani kṣiyantam /*
*niṣṭajjabhāra chamasaṁ na vṛkṣād bṛhaspatirviraveṇā vikṛtya //8 //*
*soṣāmavindatsa svaḥ1 so agniṁ so arkeṇa vi babādhe tamāṁsi /*
*bṛhaspatirgovapuṣo valasya nirmajjānaṁ na parvaṇo jabhāra //9 //*
*himeva parṇā muṣitā vanāni bṛhaspatinākṛpayadvalo gāḥ /*
*anānukṛtyamapunaśchakāra yātsūryāmāsā mitha uchcharātaḥ //10 //*
*abhi śyāvaṁ na kṛśanebhiraśvaṁ nakṣatrebhiḥ pitaro dyāmapiṁśan /*
*rātrayāṁ tamo adadhurjyotirahanbṛhaspatirbhinadadriṁ vidadrāḥ //11 //*
*idamakarma namo abhriyāya yaḥ pūrvīranvānonavīti /*
*bṛhaspatiḥ sa hi gobhiḥ so aśvaiḥ sa vīrebhiḥ sa nṛbhirno vayo dhāt //12 //*

अ. (Av.) २०.१६.१-१२

उदप्रुतो न वयो रक्षमाणा वावदतो अभ्रियस्येव घोषाः ।
गिरिभ्रजो नोर्मयो मदन्तो बृहस्पतिमभ्य१र्का अनावन् ॥१॥
सं गोभिरांगिरसो नक्षमाणो भगइवेदर्यमणं निनाय ।
जने मित्रो न दम्पती अनक्ति बृहस्पते वाजयाशूँरिवाजौ ॥२॥
साध्वर्या अतिथिनीरिषिरा स्पार्हाः सुवर्णा अनवद्यरूपाः ।
बृहस्पतिः पर्वतेभ्यो वितूर्या निर्गा ऊपे यवमिव स्थिविभ्यः ॥३॥
आप्रुषायन् मधुन ऋतस्य योनिमवक्षिपन्नर्क उल्कामिव द्योः ।
बृहस्पतिरुद्धरन्नश्मनो गा भूम्या उदनेव वि त्वचं बिभेद ॥४॥
अप जयोतिषा तमो अन्तरिक्षादुदनः शीपालमिव वात आजत् ।
बृहस्पतिरनुमृश्या वलस्याभ्रमिव वात आ चक्र आ गाः ॥५॥
यदा वलस्य पीयतो जसुं भेद बृहस्पतिरग्नितपोभिरर्कैः ।
दद्भिर्न जिह्वा परिविष्टमाददाविर्निधीँरकृणोदुस्रियाणाम् ॥६॥
बृहस्पतिरमत हि त्यदासां नाम स्वरीणां सदने गुहा यत् ।

आण्डेव भित्त्वा शकुनस्य गर्भमुदुस्रियाः पर्वतस्य त्मनाजत् ॥७॥
अश्नापिनद्धं मधु पर्यपश्यन्मत्स्यं न दीन उदनि क्षियन्तम् ।
निष्टज्जभार चमसं न वृक्षाद् बृहस्पतिर्विरवेणा विकृत्य ॥८॥
सोषामविन्दत्स स्वः सो अग्निं सो अर्केण वि बबाधे तमांसि
बृहस्पतिर्गोवपुषो वलस्य निर्मज्जानं न पर्वणो जभार ॥९॥
हिमेव पर्णा मुषिता वनानि बृहस्पतिनाकृपयद् वलो गाः ।
अनानुकृत्यमपुनश्चकार यात् सूर्यामासा मिथ उच्चरातः ॥१०॥
अभि श्यावं न कृषनेभिरश्वं नक्षत्रेभिः पितरो द्यामपिंशन् ।
रात्र्यां तमो अदधुर्ज्योतिरहन् बृहस्पतिर्भिनदद्रिं विदद् गाः ॥११॥
इदमकर्म नमो अभ्रियाय यः पूर्वीरन्वानोनवीति ।
बृहस्पतिः स हि गोभिः सो अश्वैः स वीरेभिः स नृभिर्नो वयो धात् ॥१२॥

*udapruto na vayeā rakṣamāṇā vāvadato abhriyasyeva ghoṣāḥ /*
*giribhrajo normayo madanto bṛhaspatimabhya1rkā anāvan //1 //*
*saṁ gobhirāṁgiraso nakṣamāṇeā bhagaivedaryamaṇaṁ nināya /*
*jane mitro na dampatī anakti bṛhaspate vājayāśūm̐rivājau //2 //*
*sādhvaryā atithinīriṣirā spārhāḥ suvarṇā anavadyarūpāḥ /*
*bṛhaspatiḥ parvatebhyeā vitūryā nirgā ūpe yavamiva sthivibhyaḥ //3 //*
*āpruṣāyan madhuna ṛtasya yonimavakṣipannarka ulkāmiva dyoḥ /*
*bṛhaspatiruddharannaśmano gā bhūmyā udaneva vi tvachaṁ bibheda //4 //*
*apa jayotiṣā tamo antarikṣādudanaḥ śīpālamiva vāta ājat /*
*bṛhaspatiranumṛśyā valasyābhramiva vāta ā chakra ā gāḥ //5 //*
*yadā valasya pīyato jasuṁ bheda bṛhaspatiragnitapobhirarkaiḥ /*
*dadbhirna jihnā pariviṣṭamādadāvirnidhīm̐rakṛṇodusriyāṇām //6 //*
*bṛhaspatiramata hi tyadāsāṁ nāma svarīṇāṁ sadane guhā yat /*
*āṇḍeva bhittvā śakunasya garbhamudusriyāḥ parvatasya tmanājat //7 //*
*aśnāpinaddhaṁ madhu paryapaśyanmatsyaṁ na dīna udani kṣiyantam /*
*niṣṭajjabhāra chamasaṁ na vṛkṣād bṛhaspatirviraveṇā vikṛtya //8 //*
*soṣāmavindat sa sva1ḥ so agiṁna so arkeṇa vi babādhe tamāṁsi /*
*bṛhaspatirgovapuṣo valasya nirmajjānaṁ na parvaṇo jabhāra //9 //*
*himeva parṇā muṣitā vanāni bṛhaspatinākṛpayad valo gāḥ /*
*anānukṛtyamapunaśchakāra yāt sūryāmāsā mitha uchcharātaḥ //10 //*
*abhi śyāvaṁ na kṛṣanebhiraśvaṁ nakṣatrebhiḥ pitaro dyāmapiṁśan /*
*rātrayāṁ tamo adadhurjyotirahan bṛhaspatirbhinadadriṁ vidad gāḥ //11 //*
*idamakarma namo abhriyāya yaḥ pūrvīranvānonavīti /*
*bṛhaspatiḥ sa hi gobhiḥ so aśvaiḥ sa vīrebhiḥ sa nṛbhirno vayo dhāt //12 //*

अ. (Av.) २०.९१.१-१२

इमां धियं सप्तशीर्ष्णी पिता न ऋतप्रजातां बृहतीमविन्दत् ।
तुरीयं स्विज्जतयद् विश्वजन्योऽयास्य उक्थमिन्द्राय शंसन् ॥१॥
ऋतं शंसन्त ऋजु दीध्याना दिवस्पुत्रासो असुरस्य वीराः ।
विप्रं पदमंगिरसो दधाना यास्य धाम प्रथमं मनन्त ॥२॥
हंसैरिव सखिभिर्वावदद्भिरश्मन्मयानि नहना व्यस्यन् ।
बृहस्पतिरभिकनिक्रदद् गा उत प्रास्तोदुच्च विद्वाँ अगायत् ॥३॥
अवो द्वाभ्यां पर एकया गा गुहा तिष्ठन्तीरनृतस्य सेतौ ।
बृहस्पतिस्तमसि ज्योतिरिच्छन्नुदुस्रा आकर्वि हि तिस्र आवः ॥४॥
विभिद्या पुरं शयथेमपाचीं निस्त्रीणि साकमुदधेरकृन्तत् ।
बृहस्पतिरुषसं सूर्यं गामर्कं विवेद स्तनयन्निव द्यौः ॥५॥
इन्द्रो वलं रक्षितारं दुघानां करेणेव वि चकर्ता रवेण ।
स्वेदाञ्जिभिराशिरमिच्छमानोऽरोदयत् पणिमा गा अमुष्णात् ॥६॥

स ई सत्येभिः सखिभिः शुचद्भिर्गोधायसं वि धनसैरदर्दः ।
ब्रह्मणस्पतिर्वृषभिर्वराहैर्घर्मस्वेदोभिर्द्रविणं व्यानट् ॥७॥
ते सत्येन मनसा गोपतिं गा इयानास इषणयन्त धीभिः ।
बृहस्पतिर्मिथोअवद्यपेभिरुदुस्रिया असृजत स्वयुग्भिः ॥८॥
तं वर्धयन्तो मातिभिः शिवाभिः सिंहमिव नानदतं सधस्थे ।
बृहस्पतिं वृषणं शूरसातौ भरेभरे अनु मदेम जिष्णुम् ॥९॥
यदा वाजमसनद् विश्वरूपमा द्यामरुक्षदुत्तराणि सद्म ।
बृहस्पतिं वृषणं वर्धयन्तो नाना सन्तो बिभ्रतो ज्योतिरासा ॥१०॥
सत्यामाशिंषं कृणुता वयोधै कीरिं चिद्ध्यवथ स्वेभिरेवैः ।
पश्चा मृधो अप भवन्तु विश्वास्तद् रोदसी शृणुतं विश्वमिन्वे ॥११॥
इन्द्रो मह्ना महतो अर्णवस्य वि मूर्धानमभिनदर्बुदस्य ।
अहन्नहिमरिणात् सप्त सिन्धून् देवैर्द्यावापृथिवी प्रावतं नः ॥१२॥

*imāṁ dhiyaṁ saptaśīrṣṇī pitā na ṛtaprajātāṁ bṛhatīmavindat /*
*turīyaṁ svijjatayad viśvajanyo'yāsya ukthamindrāya śaṁsan //1 //*
*ṛtaṁ śaṁsanta ṛju dīdhyānā divasputrāso asurasya vīrāḥ /*
*Vipraṁ padamaṁgiāraso dadhānā yāsya dhāma prathamaṁ mananta //2 //*
*haṁsairiva sakhibhirvāvadadbhiraśmanmayāni nahanā vyasyan /*
*bṛhaspatirabhikanikradad gā uta prāstoduchcha vidvāṁ agāyat //3 //*
*avo dvābhyāṁ para ekayā gā guhā tiṣṭhantīranṛtasya setau /*
*bṛhaspatistamasi jyotirichchhannudusrā ākarvi hi tisra āvaḥ //4 //*
*vibhidyā puraṁ śayathemapāchīṁ nistrīṇi sākamudadherakṛntat /*
*bṛhaspatiruṣasaṁ sūrya gāmarka viveda stanayanniva dyauḥ //5 //*
*indro valaṁ rakṣitāraṁ dughānāṁ kareṇeva vi chakartā raveṇa /*
*svedāñjibhirāśiramichchhamāno'rodayat paṇimā gā amuṣṇāt //6 //*
*sa ī satyebhiḥ sakhibhiḥ śuchadbhirgodhāyasaṁ vi dhanasairadardaḥ /*
*brahmaṇaspatirvṛṣabhirvarāhairgharmasvedobhirdraviṇaṁ vyānaṭ //7 //*
*te satyena manasā gopatiṁ gā iyānāsa iṣaṇayanta dhībhiḥ /*
*bṛhaspatirmithoavadyapebhirudusriyā asṛjata svayugbhiḥ //8 //*
*taṁ vardhayanto mātibhiḥ śivābhiḥ siṁhamiva nānadataṁ sadhasthe /*
*bṛhaspatiṁ vṛṣaṇaṁ śūrasātau bharebhare anu madema jiṣṇum //9 //*
*yadā vājamasanad viśvarūpamā dyāmarukṣaduttarāṇi sadma /*
*bṛhaspatiṁ vṛṣaṇaṁ vardhayanto nānā santo bibhrato jyotirāsā //10 //*
*satyāmāśiṁṣaṁ kṛṇutā vayodhai kīriṁ chiddhyavatha svebhirevaiḥ /*
*paśchā mṛdho apa bhavantu viśvāstad rodasī śṛṇutaṁ viśvaminve //11 //*
*indro mahnā mahato arṇavasya vi mūrdhānamabhinadarbudasya /*
*ahannahimariṇāt sapta sindhūn devairdyāvāpṛthivī prāvataṁ naḥ //12 //*

## ५७. अयास्य आंगिरसः (Ayāsya Āṁgirasaḥ)

१. पवमानः सोमः (Pavamānaḥ Somaḥ)- सा. (Sv.) ५०९

प्र न इन्दो महे तु न ऊर्मिं न बिभ्रद सि। अभि देवौ आयास्यः ॥१३॥

*pra na indo mahe tu na ūrmi na bibhrada si / abhi devau āyāsyaḥ //13 //*

## ५८. अरिष्टनेमिस् तार्क्ष्यः (Ariṣṭanemis Tārkṣayaḥ)

१. इन्द्रः (Indraḥ) - सा. (Sv.) ३३२

त्यमू षु वाजिनं देवजूतं सहोवानं तरुतारं रथनाम् ।
अरिष्टनेमिं पृतनाजमाशुं स्वस्तये नार्क्ष्यमिहा हुवेम ॥१॥

*tyamū ṣu vājinaṁ devajūtaṁ sahovānaṁ tarutāraṁ rathanām /*
*ariṣṭanemiṁ pṛtanājamāśuṁ svastaye nārkṣayamihā huvema //1 //*

२. तार्क्ष्यः (Tārkṣayaḥ) - ऋ. (Rv.) १०.१७८.१-३

त्यमू षु वाजिनं देवजूतं सहावानं तरुतारं रथानाम् ।
अरिष्टनेमिं पृतनाजमाशुं स्वस्तये तार्क्ष्यमिहा हुवेम ॥१॥
इन्द्रस्येव रातिमाजोहुवानाः स्वस्तये नावमिवा रुहेम ।
उर्वी न पृथ्वी बहुले गभीरे मा वामेतौ मा परेतौ रिषाम ॥२॥
सद्यश्चिद्यः शवसा पंच कृष्टीः सूर्यइव ज्योतिषापस्ततान ।
सहस्रसाः शतसा अस्य रंहिर्न स्मा वरन्ते युवतिं न शर्याम् ॥३॥
*tyamū ṣu vājinaṁ devajūtaṁ sahāvānaṁ tarutāraṁ rathānām* ।
*ariṣṭanomiṁ pṛtanājamāśuṁ svastaye tārkṣayamihā huvema* ॥1॥
*indrasyeva rātimājohuvānāḥ svastaye nāvamivā ruhema* ।
*urvī na pṛthvī bahule gabhīre mā vāmetau mā paretau riṣāma* ॥2॥
*sadyaśchidyaḥ śavasā paṁcha kṛṣṭīḥ sūryaiva jyotiṣāpastatāna* ।
*sahasrasāḥ śatasā asya raṁhirna smā varante yuvatiṁ na śaryām* ॥3॥

## ५९. अरुण त्रसदस्य (Aruṇa Trasadasya)

१. पवमानः (Pavamānaḥ) - य. (Yv.)२२.१८

अजीजनो हि पवमान सूर्य्य विधारे शक्मना पयः। गोजीरया रं हमाणः पुरन्ध्या ॥१८॥
*ajījano hi pavamāna sūryya vidhāre śakmanā payaḥ* । *gojīrayā raṁ hamāṇaḥ purandhyā* ॥18॥

## ६०. अरुणो वैतहव्यः (Aruṇo Vaitahavyaḥ)

१. अग्निः (Agniḥ) - ऋ. (Rv.) १०.९१.१-१५; सा. (Sv.) ९८२-८४; १८२४

ऋ. (Rv.) १०.९१.१-१५

सं जागृवद्भिर्जरमाण इध्यते दमे दमूना इषयन्निळस्पदे ।
विश्वस्य होता हविषो वरेण्यो विभुर्विभावा सुषखा सखीयते ॥१॥
स दर्शतश्रीरतिथिगृहेगृहे वनेवने शिश्रिये तक्वीरिव ।
जनंजनं जन्यो नाति मन्यते विश आ क्षेति विश्योः३ विशंविशम् ॥२॥
सुदक्षो दक्षैः क्रतुनासि सुक्रतुरग्ने कविः काव्येनासि विश्ववित् ।
वसुर्वसूनां क्षयसि त्वमेक इद् द्यावा च यानि पृथिवी च पुष्यतः ॥३॥
प्रजानन्नग्ने तव योनिमृत्वियमिळायास्पदे घृतवन्तमासदः ।
आ ते चिकित्र उषसामिवेतयोऽरेपसवः सूर्यस्येव रश्मयः ॥४॥
तव श्रियो वर्ष्यस्येव विद्युताश्चित्राश्चिकित्र उषसां न केतवः ।
यदोषधीरभिसृष्टो वनानि च परि स्वयं चिनुषे अन्नमास्ये ॥५॥
तमोषधीर्दधिरे गर्भमृत्वियं तमापो अग्निं जनयन्त मातरः ।
तमित्समानं वनिनश्च वीरुधोऽन्तर्वतीश्च सुवते च विश्वहा ॥६॥
वातोपधूत इषितो वशाँ अनु तृषु यदन्ना वेविषद्वितिष्ठसे ।
आ ते यतन्ते रथ्योः३ यथा पृथक् शर्धस्यग्ने अजराणि धक्षतः ॥७॥
मेधाकारं विदथस्य प्रसाधनमग्निं होतारं परिभूतमं मतिम् ।
तमिदर्भे हंविष्या समानमित्तमिन्महे वृणते नान्यं त्वत् ॥८॥
त्वामिदत्र वृणते त्वायवो होतारमग्ने विदथेषु वेधसः ।
यद्देवयन्तो दधति प्रयांसि ते हविष्मन्तो मनवो वृक्तबर्हिषः ॥९॥
त्वाग्ने होत्रं तव पोत्रमृत्वियं तव नेष्ट्रं त्वमग्निद्दतायतः ।
तव प्रशास्त्रं त्वमध्वरयिसि ब्रह्मा चासि गृहपतिश्च नो दमे ॥१०॥
यस्तुभ्यमग्ने अमृताय मर्त्यः समिधा दाशदुत वा हविष्कृति ।
तस्य होता भवसि यासि दूत्य१मुप ब्रूषे यजस्ध्वरीयसि ॥११॥
इमा अस्मै मतयो वाचो अस्मदाँ ऋचो गिरः सुष्टुतयः समग्मत ।
वसूयवो वसवे जातवेद से वृद्धासु चिद्वर्धनो यासु चाकनत् ॥१२॥

इमां प्रत्नाय सुष्टुतिं नवीयसीं वेचोयमस्या उशते श्रृणोतु नः ।
भूया अन्तरा हृद्यस्य निस्पृशे जायेव पत्य उशती सुवासाः ॥१३॥
यस्मिन्नश्वास ऋषभास उक्षणो वशा मेषा अवसृष्टास आहुताः ।
कीलालपे सोमपृष्ठाय वेधसे हृदा मतिं जनये चारुमग्नये ॥१४॥
अहाव्यग्ने हविरास्ये ते स्रुचीव घृतं चम्वीव सोमः ।
वाजसनिं रयिमस्मे सुवीरं प्रशस्तं धेहि यशसं बृहन्तम् ॥१५॥

*saṁ jāgṛvadbhirjaramāṇa idhyate dame damūnā iṣayanniḷaspade /*
*viśvasya hotā haviṣo vareṇyo vibhurvibhāvā suṣakhā sakhīyate //1 //*
*sa darśataśrīratithigṛhegṛhe vanevane śiśriye takvavīriva /*
*janaṁjanaṁ janyo nāti manyate viśa ā kṣeti viśyo3 viśaṁviśam //2 //*
*sudakṣo dakṣaiḥ kratunāsi sukraturagne kaviḥ kāvyenāsi viśvavit /*
*vasurvasūnāṁ kṣayasi tvameka id dyāvā cha yāni pṛthivī cha puṣpataḥ //3 //*
*prajānannagne tava yonimṛtviyamiḷāyāspade ghṛtavantamāsadaḥ /*
*ā te chikitra uṣasāmivetayo'repasavaḥ sūryasyeva raśmayaḥ //4 //*
*tava śriyo varṣyasyeva vidyutāśchitrāśchikitra uṣasāṁ na ketavaḥ /*
*yadoṣadhīrabhisṛṣṭo vanāni cha pari svayaṁ chinuṣe annamāsye //5 //*
*tamoṣadhīrdadhire garbhamṛtviyaṁ tamāpo agniṁ janayanta mātaraḥ /*
*tamitsamānaṁ vaninaścha vīrudho'ntarvatīścha suvate cha viśvahā //6 //*
*vātopadhūta iṣito vaśām̐ anu tṛṣu yadannā veviṣadvitiṣṭhase /*
*ā te yatante rathyo3 yathā pṛthak śardhasyagne ajarāṇi dhakṣataḥ //7 //*
*medhākāraṁ vidathasya prasādhanamagniṁ hotāraṁ paribhūtamaṁ matim /*
*tamidarbhe haṁviṣyā samānamittaminmahe vṛṇate nānyaṁ tvat //8 //*
*tvāmidatra vṛṇate tvāyavo hotāramagne vidatheṣu vedhasaḥ /*
*yaddevayanto dadhati prayāṁsi te haviṣmanto manavo vṛktabarhiṣaḥ //9 //*
*tvāgne hotraṁ tava potramṛtviyaṁ tava neṣṭraṁ tvamagnidṛtāyataḥ /*
*tava praśāstraṁ tvamadhvarayisi brahmā chāsi gṛhapatiścha no dame //10 //*
*yastubhyamagne amṛtāya martyaḥ samidhā dāśaduta vā haviṣkṛti /*
*tasya hotā bhavasi yāsi dūtya1mupa brūṣe yajasdhvarīyasi //11 //*
*imā asmai matayo vācho asmadām̐ ṛcho giraḥ suṣṭutayaḥ samagmata /*
*vasūyavo vasave jātaveda se vṛddhāsu chidvardhano yāsu chākanat //12 //*
*imāṁ pratnāya suṣṭutiṁ navīyasīṁ vechoyamasyā uśate śṛṇotu naḥ /*
*bhūyā antarā hṛdyasya nispṛśe jāyeva patya uśatī suvāsāḥ //13 //*
*yasminnaśvāsa ṛṣabhāsa ukṣaṇo vaśā meṣā avasṛṣṭāsa āhutāḥ /*
*kīlālape somapṛṣṭhāya vedhase hṛdā matiṁ janaye chārumagnaye //14 //*
*ahāvyagne havirāsye te sruchīva ghṛtaṁ chamvīva somaḥ /*
*vājasaniṁ rayimasme suvīraṁ praśastaṁ dhehi yaśasaṁ bṛhantam //15 //*

सा. (Sv.) ९८२-८४

तव श्रियो वर्ष्यस्येव विद्युतोऽग्नेश्चिकित्र उषसामिवेतयः ।
यदोषधीरभिसृष्टो वनानि च परि स्वयं चिनुषे अन्नमासनि ॥१॥
वातोपजूत इषितो वशाँ अनु तृषु यदन्ना वेविषद्वितिष्ठसे
आ ते यतन्ते रथ्योऽयथा पृथक् शर्धास्यग्ने अजरस्य धक्षतः ॥२॥
मेधाकारं विदथस्य प्रसाधनमग्निं होतारं परिभूतरं मतिम् ।
त्वामर्भस्य हविषः समानमित्त्वां महो वृणते नान्यं त्वत् ॥३॥

*tava śriyo varṣyasyeva vidyuto'gneśchikitra uṣasāmivetayaḥ /*
*yadoṣadhīrabhisṛṣṭo vanāni cha pari svayaṁ chinuṣe annamāsani //1 //*
*vātopajūta iṣito vaśām̐ anu tṛṣu yadannā veviṣadvitiṣṭhase*
*ā te yatante rathyo3yathā pṛthak śardhāsyagne ajarasya dhakṣataḥ //2 //*
*medhākāraṁ vidathasya prasādhanamagniṁ hotāraṁ paribhūtaraṁ matim /*
*tvāmarbhasya haviṣaḥ samānamittvāṁ maho vṛṇate nānyaṁ tvat //3 //*

सा. (Sv.) १८२४

तमोषधीर्दधिरे गर्भमृत्वियं तमापो अग्निं जनयन्त मातरः ।
तमित्समानं वनिनश्च वीरुधोऽन्तर्वतीश्च सुवते च विश्वहा ॥१॥
*tamoṣadhīrdadhire garbhamṛtviyaṁ tamāpo agniṁ janayanta mātaraḥ* ।
*tamitsamānaṁ vaninaścha vīrudho'ntarvatīścha suvate cha viśvahā* ॥1॥

## ६१. अर्चनाना आत्रेयः (Archanānā Ātreyaḥ)

१. मित्रावरुणौ (Mitrāvaruṇau) - ऋ. (Rv.) ५.६३.१-७; ५.६४.१-७

ऋ. (Rv.) ५.६३.१-७

ऋतस्य गोपावधि तिष्ठथो रथं सत्यधर्माणा परमे व्योमनि ।
यमत्र मित्रावरुणावथो युवं तस्मै वृष्टिर्मधुमत्पिन्वते दिवः ॥१॥
सम्राजावस्य भुवनस्य राजथो मित्रावरुणा विदथे स्वर्दृशाः ।
वृष्टिं वा राधो अमृतत्वमीमहे द्यावापृथिवी वि चरन्ति तन्यवः ॥२॥
सम्राजा उग्रा वृषभा दिवस्पती पृथिव्या मित्रावरुणा विचर्षणी ।
चित्रेभिरभ्रैरुप तिष्ठथो रवं द्यां वर्षयथो असुरस्य मायया ॥३॥
माया वां मित्रावरुणा दिवि श्रिता सूर्यो ज्योतिश्चरति चित्रमायुधम् ।
तमभ्रेण वृष्ट्या गूहथो दिवि पर्जन्य द्रप्सा मधुमन्त ईरते ॥४॥
रथं युंजते मरुतः शुभे सुखं शूरो न मित्रावरुणा गविष्टिषु ।
रजांसि चित्रा वि चरन्ति तन्यवो दिवः सम्राजा पयसा न उक्षतम् ॥५॥
वाचं सु मित्रावरुणाविरावतीं पर्जन्यश्चित्रां वदति त्विषीमतीम् ।
अभा्र वसत मरुतः सु मायाया द्यां वर्षयतमरुणापरेपसम् ॥६॥
धर्मणा मित्रावरुणा विपश्चिता व्रता रक्षेथे असुरस्य मायया ।
ऋतेन विश्वं भुवनं वि राजथः सूर्यमा धत्थो दिवि चित्र्यं रथम् ॥७॥
*ṛtasya gopāvadhi tiṣṭhatho rathaṁ satyadharmāṇā parame vyomani* ।
*yamatra mitrāvaruṇāvatho yuvaṁ tasmai vṛṣṭirmadhumatpinvate divaḥ* ॥1॥
*samrājāvasya bhuvanasya rājatho mitrāvaruṇā vidathe svardṛśāḥ* ।
*vṛṣṭiṁ vā rādho amṛtatvamīmahe dyāvāpṛthivī vi charanti tanyavaḥ* ॥2॥
*samrājā ugrā vṛṣabhā divaspatī pṛthivyā mitrāvaruṇā vicharṣaṇī* ।
*chitrebhirabhrairupa tiṣṭhatho ravaṁ dyāṁ varṣayatho asurasya māyayā* ॥3॥
*māyā vāṁ mitrāvaruṇā divi śritā sūryo jyotiścharati chitramāyudham* ।
*tamabhreṇa vṛṣṭyā gūhatho divi parjanya drapsā madhumanta īrate* ॥4॥
*rathaṁ yuṁjate marutaḥ śubhe sukhaṁ śūro na mitrāvaruṇā gaviṣṭiṣu* ।
*rajāṁsi chitrā vi charanti tanyavo divaḥ samrājā payasā na ukṣatam* ॥5॥
*vāchaṁ su mitrāvaruṇāvirāvatīṁ parjanyaśchitrāṁ vadati tviṣīmatīm* ।
*abhāra vasata marutaḥ su māyāyā dyāāṁ varṣayatamaruṇāparepasam* ॥6॥
*dharmaṇā mitrāvaruṇā vipaśchitā vratā rakṣethe asurasya māyayā* ।
*ṛtena viśvaṁ bhuvanaṁ vi rājathaḥ sūryamā dhattho divi chitrayaṁ ratham* ॥7॥

ऋ. (Rv.) ५.६४.१-७

वरुणं वो रिशादसमृचा मित्रं हवामहे। परि व्रजेव बाह्वोर्जगन्वासां स्वर्णरम्॥१॥
ता बाहवा सुचेतुना प्र यन्तमस्मा अर्चते। शेवं हि जार्य वां विश्वासु क्षासु जोगुवे ॥२॥
यन्नूनमश्यां गतिं मित्रस्य यायां पथा। अस्य प्रियस्य शर्मण्यहिंसानस्य सश्चिरे ॥३॥
युवाभ्यां मित्रावरुणोपमं धेयामृचा। यद्ध क्षये मघोनां स्तोतृणां च स्पूर्धसे ॥४॥
आ नो मित्र सुदीतिभिर्वरुणश्च सधस्थ आ। स्वे क्षये मघोनां सखीनां च वृधसे ॥५॥
युवं नो येषु वरुण क्षत्रं बृहच्च बिभृथः। उरु णो वाजसातये कृतं राये स्वस्तये ॥६॥
उच्छन्त्यां मे यजता देवक्षत्रे रुशद्गवि। सुतं सोमं न हस्तिभिरा पडिभर्धावतं नरा विभ्रतावर्चनानसम्॥७॥
*varuṇaṁ vo riśādasamṛchā mitraṁ havāmahe* । *pari vrajeva bāhnorjaganvāsāṁ svarṇaram* ॥1॥
*tā bāhavā suchetunā pra yantamasmā archate* । *śevaṁ hi jārya vāṁ viśvāsu kṣāsu*

*joguve ॥2 ॥*
*yannūnamaśyāṁ gatiṁ mitrasya yāyāṁ pathā । asya priyasya śarmaṇyahiṁsānasya saśchire ॥3 ॥*
*yuvābhyāṁ mitrāvaruṇopamaṁ dheyāmṛchā । yaddha kṣaye maghonāṁ stotṝṇāṁ cha spūrdhase ॥4 ॥*
*ā no mitra sudītibhirvaruṇaścha sadhastha ā । sve kṣaye maghonāṁ sakhīnāṁ cha vṛdhase ॥5 ॥*
*yuvaṁ no yeṣu varuṇa kṣatraṁ bṛhachcha bibhṛthaḥ । uru ṇo vājasātaye kṛtaṁ rāye svastaye ॥6 ॥*
*uchchhantyāṁ me yajatā devakṣatre ruśadgavi । sutaṁ somaṁ na hastibhirā paḍibhardhāvataṁ narā vibhratāvarchanānasam ॥7 ॥*

## ६२. अर्चन् हैरण्यस्तूपः (Archan Hairaṇyastūpaḥ)

१. सविता (Savitā) - ऋ. (Rv.) १०.१४९.१-५

सविता यन्त्रैः पृथिवीमरम्णादस्कम्भने सविता द्यामदृंहत् ।
अश्वमिवाधुक्षद्धुनिमन्तरिक्षमतूर्ते बद्धं सविता समुद्रम् ॥१ ॥
यत्रा समुद्रः स्कभितो व्यौनदपां नपात्सविता तस्य वेद ।
अतो भूरत आ उत्थितं रजोऽतो द्यावापृथिवी अप्रथेताम् ॥२ ॥
पश्चेदमन्यदभवद्यजत्रममर्त्यस्य भुवनस्य भूना ।
सुपर्णो अंग सवितुर्गरुत्मान्पूर्वो जातः स उ अस्यानु धर्म ॥३ ॥
गाव इव ग्रामं यूयुधिरिवाश्वान्वाश्रेव वत्सं सुमना दुहाना ।
पतिरिव जायामभि नो न्येतु धर्ता दिवः सविता विश्ववारः ॥४ ॥
हिरण्स्तूपः सवितर्यथा त्वांगिरसो जुह्वे वाजे अस्मिन् ।
एवा त्वार्चन्नवसे वन्दमानः सोमस्येवांशुं प्रति जागराहम् ॥५ ॥

*savitā yantraiḥ pṛthivīmaramṇādaskambhane savitā dyāāmadṛṁhat ।*
*aśvamivādhukṣaddhunimantarikṣamatūrte baddhaṁ savitā samudram ॥1 ॥*
*yatrā samudraḥ skabhito vyaunadapāṁ napātsavitā tasya veda ।*
*ato bhūrata ā utthitaṁ rajo'to dyāvāpṛthivī aprathetām ॥2 ॥*
*paśchedamanyadabhavadyajatramamartyasya bhuvanasya bhūnā ।*
*suparṇo aṁga saviturgarutmānmūrvo jātaḥ sa u asyānu dharma ॥3 ॥*
*gāva iva grāmaṁ yūyudhirivāśvānvāśreva vatsaṁ sumanā duhānā ।*
*patiriva jāyāmabhi no nyetu dhartā divaḥ savitā viśvavāraḥ ॥4 ॥*
*hiraṇstūpaḥ savitaryathā tvāṁgiraso juhne vāje asmin ।*
*evā tvārchannavase vandamānaḥ somasyevāṁśuṁ prati jāgarāham ॥5 ॥*

## ६३. अर्बुदः काद्रवेयः सर्पः (Arbudaḥ Kādraveyaḥ Sarpaḥ)

१. ग्रावाणः (Grāvāṇaḥ) - ऋ. (Rv.) १०.९४.१-१४

प्रैते वदन्तु प्र वयं वदाम ग्रावभ्यो वाचं वदता वदद्भ्यः ।
यदद्रयः पर्वताः साकमाशवः श्लोकं घोषं भरथेन्द्राय सोमिनः ॥१ ॥
एते वदन्ति शतवत्सहस्रवदभि क्रन्दन्ति हरितेभिरासभिः ।
विष्ट्वी ग्रावाणः सुकृतः सुकृत्यया होतुश्चित्पूर्वे हविरद्यमाशत ॥२ ॥
एते वदन्त्यविदन्नना मधु न्यूंखयन्ते अधि पक्व अमिषि ।
वृक्षस्य शाखामरुणस्य बप्सतस्ते सूभर्वा वृषभाः प्रेमराविषुः ॥३ ॥
बृहद्वदन्ति मदिरेण मन्दिनेन्द्र क्रोशन्तोऽविदन्नना मधु ।
संरभ्या धीराः स्वसृभिरनर्तिषुराघोषयन्तः पृथिवीमुपब्दिभिः ॥४ ॥
सुपर्णा वाचमक्रतोप द्यव्याखरे कृष्णा इषिरा अनर्तिषुः ।
न्यङ्‌ङि यन्त्युपरस्य निष्कृतं पुरू रेतो दधिरे सूर्यश्वितः ॥५ ॥
उग्राइव प्रवहन्तः समायमुः साकं युक्ता वृष्णो बिभ्रतो धुरः ।
यच्छ्वसन्तो जग्रसाना अराविषुः श्रृण्व एषां प्रोथथो अर्वतामिव ॥६ ॥

दशावनिभ्यो दशकक्ष्येभ्यो दशयोक्रेभ्यो दशयोजनेभ्यः ।
दशाभीषुभ्यो अर्चताजरेभ्यो दश धुरो दश युक्ता वहद्भ्यः ॥७॥
ते अद्रयो दशयन्त्रास आशवस्तेषामाधानं पर्येति हर्यतम् ।
त ऊसुतस्य सोम्यस्यान्धसोंऽशोः पीयूषं प्रथमस्य भेजिरे ॥८॥
ते सोमादो हरी इन्द्रस्य निंसतेंऽशुं दुहन्तो अध्यासते गवि ।
तेभिर्दुग्धं पपिवान्त्सोम्यं मध्विन्द्रो वर्धते प्रथते वृषायते ॥९॥
वृषा वो अंशुर्न किला रिषाथनेळावन्तः सदमित्स्थनाशिताः ।
रैवत्येव महसा चारवः स्थन यस्य ग्रावाणो अजुषध्वमध्वरम् ॥१०॥
तृदिला अतृदिलासो अद्रयोऽश्रमणा अश्रथिता अमृत्यवः ।
अनातुरा अजराः स्थामविष्णवः सुपीवसो अतृषिता अतृष्णजः ॥११॥
ध्रुवा एव वः पितरो युगेयुगे क्षेमकामासः सदसो न युंजते ।
अजुर्यासो हरिषाचौ हरिद्रव आ द्यां रवेण पृथिवीमशुश्रवुः ॥१२॥
तद्विदन्त्यद्रयो विमोचने यामन्नंजस्पा इव घेदुपब्दिभिः ।
वपन्तो बीजमिव धान्याकृतः पृंचन्ति सोमं न मिनन्ति बप्सतः ॥१३॥
सुते अध्वरे अधि वाचमक्रता क्रीळयो न मातरं तुदन्तः ।
वि षु मुंचा सुषुवुषो मनीषां वि वर्तन्तामद्रयश्चायमानाः ॥१४॥

*praite vadantu pra vayaṁ vadāma grāvabhyo vāchaṁ vadatā vadadbhyaḥ /*
*yadadrayaḥ parvatāḥ sākamāśavaḥ ślokaṁ ghoṣaṁ bharathendrāya sominaḥ //1 //*
*ete vadanti śatavatsahasravadabhi krandanti haritebhirāsabhiḥ /*
*viṣṭvī grāvāṇaḥ sukṛtaḥ sukṛtyayayā hotuśchitpūrve haviradyamāśata //2 //*
*ete vadantyavidannanā madhu nyūṁkhayante adhi pakva amiṣi /*
*vṛkṣasya śākhāmaruṇasya bapsataste sūbharvā vṛṣabhāḥ premarāviṣuḥ //3 //*
*bṛhadvadanti madireṇa mandinendra krośanto'vidannanā madhu /*
*saṁrabhyā dhīrāḥ svasṛbhiranartiṣurāghoṣayantaḥ pṛthivīmupabdibhiḥ //4 //*
*suparṇā vāchamakratopa dyavyākhare kṛṣṇā iṣirā anartiṣuḥ /*
*nya1ṅni yantyuparasya niṣkṛtaṁ purū reto dadhire sūryaśvitaḥ //5 //*
*ugrāiva pravahantaḥ samāyamuḥ sākaṁ yuktā vṛṣṇo bibhrato dhuraḥ /*
*yachchhvasanto jagrasānā arāviṣuḥ śṛṇva eṣāṁ prothatho arvatāmiva //6 //*
*daśāvanibhyo daśakakṣayebhyo daśayoktrebhyeā daśayojanebhyaḥ /*
*daśābhīṣubhyeā archatājarebhyo daśa dhuro daśa yuktā vahadbhyaḥ //7 //*
*te adrayo daśayantrāsa āśavasteṣāmādhānaṁ paryeti haryatam /*
*ta ūsutasya somyasyāndhasoṁ'śoḥ pīyūṣaṁ prathamasya bhejire //8 //*
*te somādo harī indrasya niṁsateṁ'śuṁ duhanto adhyāsate gavi /*
*tebhirdugdhaṁ papivāntsomyaṁ madhvindro vardhate prathate vṛṣāyate //9 //*
*vṛṣā vo aṁśurna kilā riṣāthaneḻāvantaḥ sadamitsthanāśitāḥ /*
*raivatyeva mahasā chāravaḥ sthana yasya grāvāṇo ajuṣadhvamadhvaram //10 //*
*tṛdilā atṛdilāso adrayo'śramaṇā aśṛthitā amṛtyavaḥ /*
*anāturā ajarāḥ sthāmaviṣṇavaḥ supīvaso atṛṣitā atṛṣṇajaḥ //11 //*
*dhruvā eva vaḥ pitaro yugeyuge kṣemakāmāsaḥ sadaso na yuṁjate /*
*ajuryāso hariṣāchau haridrava ā dyāṁ raveṇa pṛthivīmaśuśravuḥ //12 //*
*tadvidantyadrayo vimochane yāmannaṁjaspā iva ghedupabdibhiḥ /*
*vapanto bījamiva dhānyākṛtaḥ pṛṁchanti somaṁ na minanti bapsataḥ //13 //*
*sute adhvare adhi vāchamakratā krīḻayo na mātaraṁ tudantaḥ /*
*vi ṣu muṁchā suṣuvuṣo manīṣāṁ vi vartantāmadrayaśchāyamānāḥ //14 //*

## ६४. अवत्सारः (Avatsāraḥ)

### १. अग्निः (Agniḥ) - य. (Yv.)३.१६-१९

अस्य प्रत्नामनु द्युतंशुक्रं दुदुहेऽअह्रयः। पयः सहस्रसामृषिम् ॥१६॥
तनूपा ऽअग्नेऽसि तन्वं मे पाह्यायुर्दाऽअग्नेऽस्यायुर्मे देहि वर्च्चोदाऽअग्नेऽसि वर्च्चो मे देहि ।

अग्ने यन्मे तन्वाऽऊनं तन्म ऽआपृण ॥१७॥
इन्धानास्त्वा शतंहिमा द्युमन्तंसमिधीमहि। वयस्वन्तो वयस्कृतंसहस्वन्तः सहस्कृतम् ।
अग्ने सपत्नदम्भनमदब्धासोऽअदाभ्यम्। चित्रावसो स्वस्ति ते पारमशीय ॥१८॥
सं त्वमग्ने सूर्यस्य वर्च्चसागथाः समृषीणां स्तुतेन ।
सं प्रियेण धाम्ना समहमायुषा स वर्च्चसा सं प्रजया संरायस्पोषेण ग्मिषीय ॥१९॥
*asya pratnāmanu dyutaṁśukraṁ daduhre'ahrayaḥ । payaḥ sahasrasāmṛṣim ॥16॥*
*tanūpā 'agne'si tanvaṁ me pāhyāyurdā'agne'syāyurme dehi varchchodā'agne'si varchcho me dehi ।*
*agne yanme tanvā'ūnaṁ tanma 'āpṛṇa ॥17॥*
*indhānāstvā śataṁhimā dyumantaṁsamidhīmahi । vayasvanto vayaskṛtaṁsahasvantaḥ sahaskṛtam ।*
*agne sapatnadambhanamadabdhāso'adābhyam । chitrāvaso svasti te pāramaśīya ॥18॥*
*saṁ tvamagne sūryasya varchchasāgathāḥ samṛṣīṇāṁ stutena ।*
*saṁ priyeṇa dhāmnā samahamāyuṣā sa varchchasā saṁ prajayā saṁrāyaspoṣeṇa gmiṣīya ॥19॥*

२. पवमानः सोमः (Pavamānaḥ Somaḥ)- ऋ. (Rv.) ९.५३.१-४; ९.५४.१-४; ९.५५.१-४; ९.५६.१-४; ९.५७.१-४; ९.५८.१-४; ९.५९.१-४; ९.६०.१-४

ऋ. (Rv.) ९.५३.१-४
उत्ते शुष्मासो रक्षोभिन्दन्तो अद्रिवः। नुदस्व या परिस्पृधः ॥१॥
अया निजघ्निरोजसा रथसंगे धने हिते। स्तवा अबिभ्युषा हृदा ॥२॥
अस्य व्रतानि नाधृषे पवमानस्य दूढ्या। रुज यस्त्वा पृतन्यति ॥३॥
तं हिन्वन्ति मदच्युतं हरिं नदीषु वाजिनम्। इन्दुमिन्द्राय मत्सरम् ॥४॥
*utte śuṣmāso rakṣobhindanto adrivaḥ । nudasva yā parispṛdhaḥ ॥1॥*
*ayā nijaghnirojasā rathasaṁge dhane hite । stavā abibhyuṣā hṛdā ॥2॥*
*asya vratāni nādhṛṣe pavamānasya ḍhūḍhyā । ruja yastvā pṛtanyati ॥3॥*
*taṁ hinvanti madachyutaṁ hariṁ nadīṣu vājinam । indumindrāya matsaram ॥4॥*

ऋ. (Rv.) ९.५४.१-४
अस्य प्रतनामनु द्युतं शुक्रं दुदुह्रे अह्रयः। पयः सहस्रामृषिम् ॥१॥
अयं सूर्य इवोपदृगयं सरांसि धावति। सप्त प्रवत आ दिवम् ॥२॥
अयं विश्वानि तिष्ठति पुनानो भुवनोपरि। सोमो देवो न सूर्यः ॥३॥
परि णो देववीतये वाजाँ अर्षसि गोमतः। पुनान इन्दविन्द्रयुः ॥४॥
*asya pratanāmanu dyutaṁ śukraṁ duduhne ahrayaḥ । payaḥ sahasrāmṛṣim ॥1॥*
*ayaṁ sūrya ivopadṛgayaṁ sarāṁsi dhāvati । sapta pravata ā divam ॥2॥*
*ayaṁ viśvāni tiṣṭhati punāno bhuvanopari । somo devo na sūryaḥ ॥3॥*
*pari ṇo devavītaye vājāṁ arṣasi gomataḥ । punāna indavindrayuḥ ॥4॥*

ऋ. (Rv.) ९.५५.१-४
यवयवं नो अन्धसा पुष्टंपुष्टं परि स्रव। सोम विश्वा च सौभगा ॥१॥
इन्दो यथा तव स्तवो यथा ते जातमन्धसः। नि बर्हिषि प्रिये सदः ॥२॥
उत नो गोविदश्ववित्पवस्व सोमान्धसा। मक्षूतमेभिरहभिः ॥३॥
यो जिनाति न जीयते हन्ति शत्रुमभीत्य। स पवस्व सहस्रजित् ॥४॥
*yavayavaṁ no andhasā puṣṭaṁpuṣṭaṁ pari srava । soma viśvā cha saubhagā ॥1॥*
*indo yathā tava stavo yathā te jātamandhasaḥ । ni barhiṣi priye sadaḥ ॥2॥*
*uta no govidaśvavitpavasva somāndhasā । makṣūtamebhirahabhiḥ ॥3॥*
*yo jināti na jīyate hanti śatrumabhītya । sa pavasva sahasrajit ॥4॥*

ऋ. (Rv.) ९.५६.१-४
परि सोम ऋतं बृहदाशुः पवित्रे अर्षति। विघ्नन् रक्षांसि देवयुः ॥१॥
यत्सोमो वाजमर्षति शतं धारा अपस्युवः। इन्द्रस्य सख्यमाविशन् ॥२॥

अभि त्वा योषणो दश जारं न कन्यानूषत। मृज्यसे सोम सातये ॥३॥
त्वमिन्द्राय विष्णवे स्वादुरिन्दो परि स्रव। नृन्त्सतोतॄन्पाह्यंहसः ॥४॥
*pari soma ṛtaṁ bṛhadāśuḥ pavitre arṣati | vighnan rakṣāṁsi devayuḥ ||1 ||*
*yatsomo vājamarṣati śataṁ dhārā apasyuvaḥ | indrasya sakhyamāviśan ||2 ||*
*abhi tvā yoṣaṇo daśa jāraṁ na kanyānūṣata | mṛjyase soma sātaye ||3 ||*
*tvamindrāya viṣṇave svādurindo pari srava | nṝntsatotṝnpāhyaṁhasaḥ ||4 ||*

ऋ. (Rv.) ९.५७.१-४
प्र ते धारा असश्चतो दिवो न यन्ति वृष्टयः। अच्छा वाजं सहस्रिणम् ॥१॥
अभि प्रियाणि काव्या विश्वा चक्षाणो अर्षति हरिस्तुंजान आयुधा ॥२॥
स मर्मृजान आयुभिरिभो राजेव सुव्रतः। श्येनो न वंसु षीदति ॥३॥
स नो विश्वा दिवो वसूतो पृथिव्या अधि। पुनान इन्दवा भर ॥४॥
*pra te dhārā asaśchato divo na yanti vṛṣṭayaḥ | achchhā vājaṁ sahasriṇam ||1 ||*
*abhi priyāṇi kāvyā viśvā chakṣāṇo arṣati haristuṁjāna āyudhā ||2 ||*
*sa marmṛjāna āyubhiribho rājeva suvrataḥ | śyeno na vaṁsu ṣīdati ||3 ||*
*sa no viśvā divo vasūto pṛthivyā adhi | punāna indavā bhara ||4 ||*

ऋ. (Rv.) ९.५८.१-४
तरत्स मन्दी धावति धारा सुतस्यान्धसः। तरत्स मन्दी धावति ॥१॥
उस्रा वेद वसूनां मर्तस्य देव्यवसः। तरत्स मन्दी धावति ॥२॥
ध्वस्रयोः पुरुषन्त्योरा सहस्राणि दद्महे। तरत्स मन्दी धावति ॥३॥
आ ययोस्त्रिंशतं तना सहस्राणि च दद्महे। तरत्स मन्दी धावति ॥४॥
*taratsa mandī dhāvati dhārā sutasyāndhasaḥ | taratsa mandī dhāvati ||1 ||*
*usrā veda vasūnāṁ martasya devyavasaḥ | taratsa mandī dhāvati ||2 ||*
*dhvasrayoḥ puruṣantyorā sahasrāṇi dadmahe | taratsa mandī dhāvati ||3 ||*
*ā yayostriṁśataṁ tanā sahasrāṇi cha dadmahe | taratsa mandī dhāvati ||4 ||*

ऋ. (Rv.) ९.५९.१-४
पवस्व गोजिदश्वजिद्विश्वजित्सोम रण्यजित्। प्रजावद्रत्नमा भर ॥१॥
पवस्वाद्भ्यो अदाभ्यः पवस्वौषधीभ्यः। पवस्व धिष्णाभ्यः ॥२॥
त्वं सोम पवमानो विश्वानि दुरिता तर। कविः सीद नि बर्हिषि ॥३॥
पवमान स्वर्विदो जायमानोऽभवो महान्। इन्दो विश्वाँ अभीदसि ॥४॥
*pavasva gojidaśvajidviśvajitsoma raṇyajit | prajāvadratnamā bhara ||1 ||*
*pavasvādbhyo adābhyaḥ pavasvauṣadhībhyaḥ | pavasva dhiṣṇābhyaḥ ||2 ||*
*tvaṁ soma pavamāno viśvāni duritā tara | kaviḥ sīda ni barhiṣi ||3 ||*
*pavamāna svarvido jāyamāno'bhavo mahān | indo viśvāṁ abhīdasi ||4 ||*

ऋ. (Rv.) ९.६०.१-४
प्र गायत्रेण गायत पवमानं विचर्षणिम्। इन्दुं सहस्रचक्षसम् ॥१॥
तं त्वा सहस्रचक्षसमथो सहस्रभर्णसम्। अति वारमपाविषुः ॥२॥
अति वारान्पवमानो असिष्यदत्कलशाँ अभि धावति। इन्द्रस्य हार्द्याविशन् ॥३॥
इन्द्रस्य सोम राधसे शं पवस्व विचर्षणे। प्रजावद्रेत आ भर ॥४॥
*pra gāyatreṇa gāyata pavamānaṁ vicharṣaṇim | induṁ sahasrachakṣasam ||1 ||*
*taṁ tvā sahasrachakṣasamatho sahasrabharṇasam | ati vāramapāviṣuḥ ||2 ||*
*ati vārānpavamāno asiṣyadatkalaśāṁ abhi dhāvati | indrasya hārdyāviśan ||3 ||*
*indrasya soma rādhase śaṁ pavasva vicharṣaṇe | prajāvadreta ā bhara ||4 ||*

## ६५. अवत्सारः काश्यपः (Avatsāraḥ Kāśyapaḥ)

### १. अग्निः (Agniḥ) - सा. (Sv.) १८३१-३३
अग्निर्ज्योतिर्ज्योतिरग्निरिन्द्रो ज्योतिर्ज्योतिरिन्द्रः। सूर्यो ज्योतिर्ज्योतिः सूर्यः ॥१॥
पुनरूर्जा नि वर्तस्व पुनरग्न इषायुषा। पुनर्नः पाह्यंहसः ॥२॥

सह रय्या नि वर्तस्वाग्ने पिन्वस्य धारया। विश्वप्स्न्या विश्वतस्परि ॥३॥

*agnirjyotirjyotiragnirindro jyotirjyotirindraḥ । sūryo jyotirjyotiḥ sūryaḥ ॥1॥*
*punarūrjā ni vartasva punaragna iṣāyuṣā । punarnaḥ pāhyaṁhasaḥ ॥2॥*
*saha rayyā ni vartasvāgne pinvasya dhārayā । viśvapsnyā viśvataspari ॥3॥*

२. पवमानः सोमः (Pavamānaḥ Somaḥ)- सा. (Sv.) ५००; ७५५-५७; ९७५-७८; १०५७-६०; १७१४-१७; १७६१-६४

सा. (Sv.) ५००

तरत्स मन्दी धवति धारा सुतस्यान्धसः। तरत्स मन्दी धावति ॥४॥

*taratsa mandī dhavati dhārā sutasyāndhasaḥ । taratsa mandī dhāvati ॥4॥*

सा. (Sv.) ७५५-५७

अस्य प्रत्नामनु द्युतं शुक्रं दुदुहे अह्रयः। पयः सहस्रसामृषिम् ॥१॥
अयं सूर्य इवोपदृगयं सरांसि धावति। सप्त प्रवत आ दिवम् ॥२॥
अयं विश्वानि तिष्ठति पुनानो भुवनोपरि। सोमो देवो न सूर्यः ॥३॥

*asya pratnāmanu dyutaṁ śukraṁ duduhe ahrayaḥ । payaḥ sahasrasāmṛṣim ॥1॥*
*ayaṁ sūrya ivopadṛgayaṁ sarāṁsi dhāvati । sapta pravata ā divam ॥2॥*
*ayaṁ viśvāni tiṣṭhati punāno bhuvanopari । somo devo na sūryaḥ ॥3॥*

सा. (Sv.) ९७५-७८

यवयवं नो अन्धसा पुष्टंपुष्टं परि स्रव। विश्वा च सोम सौभगा ॥१॥
इन्दो यथा तव स्तवो यथा ते जातमन्धसः। नि बर्हिषि प्रिये सदः ॥२॥
उत नो गोविदश्ववित्पवस्व सोमान्धसा। मक्षूतमेभिरहभिः ॥३॥
यो जिनाति न जीयते हन्ति शत्रुमभीत्य। स पवस्व सहस्रजित् ॥४॥

*yavayavaṁ no andhasā puṣṭaṁpuṣṭaṁ pari srava । viśvā cha soma saubhagā ॥1॥*
*indo yathā tava stavo yathā te jātamandhasaḥ । ni barhiṣi priye sadaḥ ॥2॥*
*uta no govidaśvavitpavasva somāndhasā । makṣūtamebhirahabhiḥ ॥3॥*
*yo jināti na jīyate hanti śatrumabhītya । sa pavasva sahasrajit ॥4॥*

सा. (Sv.) १०५७-६०

तरत्स मन्दी धवति धारा सुतस्यान्धसः। तरत्स मन्दी धावति ॥१॥
उस्रा वेद वसूनां मर्तस्य देव्यवसः। तरत्स मन्दी धावति ॥२॥
ध्वस्रयोः पुरुषन्त्योरा सहस्राणि दद्महे। तरत्स मन्दी धावति ॥३॥
आ ययोस्त्रिं शतं तना सहस्राणि च दद्महे। तरत्स मन्दी धावति ॥४॥

*taratsa mandī dhavati dhārā sutasyāndhasaḥ । taratsa mandī dhāvati ॥1॥*
*usrā veda vasūnāṁ martasya devyavasaḥ । taratsa mandī dhāvati ॥2॥*
*dhvasrayoḥ puruṣantyorā sahasrāṇi dadmahe । taratsa mandī dhāvati ॥3॥*
*ā yayostriṁ śataṁ tanā sahasrāṇi cha dadmahe । taratsa mandī dhāvati ॥4॥*

सा. (Sv.) १७१४-१७

उत्ते शुष्मासो अस्थू रक्षो भिन्दन्तो अद्रिवः। नुदस्व याः परिस्पृधः ॥१॥
अया निजघ्निरोजसा रथसंगेः धने हिते। स्तवा अबिभ्युषा हृदा ॥२॥
अस्य व्रतानि नाधृषे पवमानस्य दूढ्या। रुज यस्त्वा पृतन्यति ॥३॥
तं हिन्वन्ति मदच्युतं हरिं नदीषु वाजिनम्। इन्दु मिन्द्राय मत्सरम् ॥४॥

*utte śuṣmāso asthū rakṣo bhindanto adrivaḥ । nudasva yāḥ parispṛdhaḥ ॥1॥*
*ayā nijaghnirojasā rathasaṁgeḥ dhane hite । stavā abibhyuṣā hṛdā ॥2॥*
*asya vratāni nādhṛṣe pavamānasya dūḍhyā । ruja yastvā pṛtanyati ॥3॥*
*taṁ hinvanti madachyutaṁ hariṁ nadīṣu vājinam । indu mindrāya matsaram ॥4॥*

सा. (Sv.) १७६१-६४

प्र ते धारा असश्चते दिवो न यन्ति वृष्टयः। अच्छा बाजं सहस्रिणम् ॥१॥
अभि प्रियाणि काव्या विश्वा चक्षाणो अर्षति। हिरस्तुंजन आयुधा ॥२॥

स ममृजान् आयुभिरिभो राजेव सुव्रतः। श्येनो न वं सु षीदति ॥३॥
स नो विश्व दिवो वसूतो पृथिव्या अधि। पुनान इन्दवा भर ॥४॥
*pra te dhārā asaśchate divo na yanti vṛṣṭayaḥ / achchhā bājaṁ sahasriṇam //1 //*
*abhi priyāṇi kāvyā viśvā chakṣāṇo arṣati / hirastuṁjana āyudhā //2 //*
*sa mamṛjān āyubhiribho rājeva suvrataḥ / śyeno na vaṁ su ṣīdati //3 //*
*sa no viśva divo vasūto pṛthivyā adhi / punāna indavā bhara //4 //*

३. विश्वेदेवाः (Viśvedevāḥ) - सा. (Sv.) १८२६-२७

यो जागार तमृचः कामयन्ते यो जागार तमु सामानि यन्ति ।
यो जागार तमयंसोम आह तवाहमस्मि सख्ये न्योकाः ॥५॥
अग्निर्जागार तमृचः कामयन्तेऽग्निर्जागार तमु सामानि यन्ति ।
अग्निर्जागार तमयंसोम आह तवाहमस्मि सख्ये न्योकाः ॥६॥
*yo jāgāra tamṛchaḥ kāmayante yo jāgāra tamu sāmāni yanti /*
*yo jāgāra tamayaṁsoma āha tavāhamasmi sakhye nyokāḥ //5 //*
*agnirjāgāra tamṛchaḥ kāmayante'gnirjāgāra tamu sāmāni yanti /*
*agnirjāgāra tamayaṁsoma āha tavāhamasmi sakhye nyokāḥ //6 //*

## ६६. अवत्सारः काश्यपः अन्ये च दृष्टिलिंगाः (Avatsāra son of Kaśyapa and others who are visible in the mantras)

१. विश्वेदेवाः (Viśvedevāḥ) - ऋ. (Rv.) ५.४४.१-१५

तं प्रत्नथा पूर्वथा बिश्वथेमथा ज्येष्ठतातिं बर्हिषदं स्वर्विदम् ।
प्रतीचीनं वृजनं दोहसे गिराशुं जयन्तमनु यासु वर्धसे ॥१॥
श्रिये सुदृशीरुपरस्य याः स्वर्विरोचमानः ककुभामचोदते ।
सुगोपा असि न दभाय सुक्रतो परो मायाभिर्ऋत आस नाम ते ॥२॥
अत्यं हविः सचते सच्च धातु चरिष्टगातुः स होता सहोभरिः ।
प्रसस्राणो अनु बर्हिर्वृषा शिशुर्मध्ये युवाजरो विस्रुहा हितः ॥३॥
प्र व एते सुयुजो यामन्निष्टये नीचीरमुष्मै यम्य ऋतावृधः ।
सुयन्तुभिः सर्वशासैरभीषुभिः क्रिविर्नामानि प्रवणे मुषायति ॥४॥
संजर्भुराणस्तरुभिः सुतेगृभं वयाकिनं चित्तगर्भासु सुस्वरुः ।
धारवाकेष्वृजुगाथ शोभसे वर्धस्व पत्नीरभि जीवो अध्वरे ॥५॥
यादृगेव ददृशे तादृगुच्यते सं छायया दधिरे सिध्रयाप्स्वा ।
महीमस्मभ्यमुरुषामुरु ज्रयो बृहत्सुवीरमनपच्युतं सहः ॥६॥
वेत्यग्रुर्जनिवान्वा अति स्पृधः समर्यता मनसा सूर्यः कविः ।
घ्रंसं रक्षन्तं परि विश्वतो गयमस्माकं शर्म वनवत्स्वावसुः ॥७॥
ज्यायांसमस्य यतुनस्य केतुन ऋषिस्वरं चरति यासु नाम ते ।
यादृश्मिन्धायि तमपस्यया विदद्य उ स्वयं वहते सो अरं करत् ॥८॥
समुद्रमासामव तस्थे अग्रिमा न रिष्यति सवनं यस्मिन्नायता ।
अत्रा न हार्दि क्रवणस्य रेजते यत्रा मतिर्विद्यते पूतबन्धनी ॥९॥
स हि क्षत्रस्य मनसस्य चित्तिभिरेवावदस्य यजतस्य सध्रेः ।
अवत्साररस्य स्पृणवाम रण्वभिः शविष्ठं वाजं विदुषा चिदर्ध्यम् ॥१०॥
श्येन आसामदितिः कक्ष्यो३ मदो विश्ववारस्य यजतस्य मायिनः ।
समन्यमन्यमर्थयन्त्येतवे विदुर्विषाणं परिपानमन्ति ते ॥११॥
सदापृणो यजतो वि द्विषो वधीद्बाहुवृक्तः श्रुतवित्तर्यो वः सचा ।
उभा स वरा प्रतयेति भाति च यदी गणं भजते सुप्रयावभिः ॥१२॥
सुतंभरो यजमानस्य सत्पतिर्विश्वासामूधः स धियामुदंचनः ।
भरद्धेनू रसवच्छिश्रिये पयोऽनुब्रवाणो अध्येति न स्वपन् ॥१३॥
यो जागार् तमृचः कामयन्ते यो जागार तमु सामनि यन्ति ।
यो जागार तमयं सोम आह तवाहमस्मि सख्ये न्योकाः ॥१४॥

अग्निर्जागार तमृचः कामयन्तेऽतिग्नर्जागार तमु सामानि यन्ति ।
अग्निर्जागार तमयं सोम आह तवाहमस्मि सख्ये न्योकाः ॥१५॥

*taṁ pratnathā pūrvathā biśvathemathā jyeṣṭhatātiṁ barhiṣadaṁ svarvidam /*
*pratīchīnaṁ vṛjanaṁ dohase girāśuṁ jayantamanu yāsu vardhase //1 //*
*śriye sudṛśīruparasya yāḥ svarvirochamānaḥ kakubhāmachodate /*
*sugopā asi na dabhāya sukrato paro māyābhirṛta āsa nāma te //2 //*
*atyaṁ haviḥ sachate sachcha dhātu chariṣṭagātuḥ sa hotā sahobhariḥ /*
*prasasrāṇo anu barhirvṛṣā śiśurmadhye yuvājaro visruhā hitaḥ //3 //*
*pra va ete suyujo yāmanniṣṭaye nīchīramuṣmai yamya ṛtāvṛdhaḥ /*
*suyantubhiḥ sarvaśāsairabhīṣubhiḥ krivirnāmāni pravaṇe muṣāyati //4 //*
*saṁjarbhurāṇastarubhiḥ sutegṛbhaṁ vayākinaṁ chittagarbhāsu susvaruḥ /*
*dhāravākeṣvṛjugātha śobhase vardhasva patnīrabhi jīvo adhvare //5 //*
*yādṛgeva dadṛśe tādṛguchyate saṁ chhāyayā dadhire sidhrayāpsvā /*
*mahīmasmabhyamuruṣāmuru jrayo bṛhatsuvīramanapachyutaṁ sahaḥ //6 //*
*vetyagrurjanivānvā ati spṛdhaḥ samaryatā manasā sūryaḥ kaviḥ /*
*ghraṁsaṁ rakṣantaṁ pari viśvato gayamasmākaṁ śarma vanavatsvāvasuḥ //7 //*
*jyāyāṁsamasya yatunasya ketuna ṛṣisvaraṁ charati yāsu nāma te /*
*yādṛśmindhāyi tamapasyayā vidadya u svayaṁ vahate so araṁ karat //8 //*
*samudramāsāmava tasthe agrimā na riṣyati savanaṁ yasminnāyatā /*
*atrā na hārdi kravaṇasya rejate yatrā matirvidyate pūtabandhanī //9 //*
*sa hi kṣatrasya manasasya chittibhirevāvadasya yajatasya sadhreḥ /*
*avatsārarasya spṛṇavāma raṇvabhiḥ śaviṣṭhaṁ vājaṁ viduṣā chidardhyam //10 //*
*śyena āsāmaditiḥ kakṣayo3 mado viśvavārasya yajatasya māyinaḥ /*
*samanyamanyamarthayantyetave vidurviṣāṇaṁ paripānamanti te //11 //*
*sadāpṛṇo yajato vi dviṣo vadhīdbāhuvṛktaḥ śrutavittaryo vaḥ sachā /*
*ubhā sa varā pratayeti bhāti cha yadī gaṇaṁ bhajate suprayāvabhiḥ //12 //*
*sutaṁbharo yajamānasya satpatirviśvāsāmūdhaḥ sa dhiyāmudaṁchanaḥ /*
*bharaddhenū rasavachchhiśriye payo'nubravāṇo adhyeti na svapan //13 //*
*yo jāgār tamṛchaḥ kāmayante yo jāgāra tamu sāmani yanti /*
*yo jāgāra tamayaṁ soma āha tavāhamasmi sakhye nyokāḥ //14 //*
*agnirjāgāra tamṛchaḥ kāmayante'tignarjāgāra tamu sāmāni yanti /*
*agnirjāgāra tamayaṁ soma āha tavāhamasmi sakhye nyokāḥ //15 //*

## ६७. अवस्युर् आत्रेयः (Avasyur Ātreyaḥ)

१. अश्विनौ (Aśvinau) - ऋ. (Rv.) ५.७५.१-९; सा. (Sv.) ४१८; १७४३-४५

ऋ. (Rv.) ५.७५.१-९

प्रति प्रियतमं रथं वृष्णं वसुवाहनम् ।
स्तोता वामश्विनावृषिः स्तोमेन प्रति भूषति माध्वी मम श्रुतं हवम् ॥१॥
अत्यायातमश्विना तिरो विश्वा अहं सना ।
दस्रा हिरण्यवर्तनी सुषुम्ना सिन्धुवाहसा माध्वी मम श्रुतं हवम् ॥२॥
आ नो रत्नानि बिभ्रतावश्विना गच्छतं युवम् ।
रुद्रा हिरण्यवर्तनी जुषाणा वाजिनीवसू माध्वी मम श्रुतं हवम् ॥३॥
सुष्टुभो वां वृषण्वसू रथे वाणीच्याहिता ।
उत वां ककुहो मृगः पृक्षः कृणोति वापुषो माध्वी मम श्रुतं हवम् ॥४॥
बोधिन्मनसा रथ्येषिरा हवनश्रुता ।
विभिश्च्यवानमश्विना नि याथो अद्वयाविनं माध्वी मम श्रुतं हवम् ॥५॥
आ वां नरा मनोयुजोऽश्वासः प्रुषितप्सवः ।
वयो वहन्तु पीतये सह सुम्नेभिरश्विना माध्वी मम श्रुतं हवम् ॥६॥
अश्विनावेह गच्छतं नासत्या मा वि वेनतम् ।

तिरश्चिदर्यया परि वर्तिर्यातमदाभ्या माध्वी मम श्रुतं हवम् ॥७॥
अस्मिन्यो अदाभ्या जरितारं शुभस्पती ।
अवस्युमश्विना युवं गृणन्तमुप भूषथो माध्वी मम श्रुतं हवम् ॥८॥
अभूदुषा रुशत्पशुराग्निरधाय्यृत्वियः ।
अयोजि वां वृषण्वसू रथो दस्रावमर्त्यो माध्वी मम श्रुतं हवम् ॥९॥
*prati priyatamaṁ rathaṁ vṛṣṇaṁ vasuvāhanam* ।
*stotā vāmaśvināvṛṣiḥ stomena prati bhūṣati mādhvī mama śrutaṁ havam ॥1॥*
*atyāyātamaśvinā tiro viśvā ahaṁ sanā* ।
*dasrā hiraṇyavartanī suṣumnā sindhuvāhasā mādhvī mama śrutaṁ havam ॥2॥*
*ā no ratnāni bibhratāvaśvinā gachchhataṁ yuvam* ।
*rudrā hiraṇyavartanī juṣāṇā vājinīvasū mādhvī mama śrutaṁ havam ॥3॥*
*suṣṭubho vāṁ vṛṣaṇvasū rathe vāṇīchyāhitā* ।
*uta vāṁ kakuho mṛgaḥ pṛkṣaḥ kṛṇoti vāpuṣo mādhvī mama śrutaṁ havam ॥4॥*
*bodhinmanasā rathyeṣirā havanaśrutā* ।
*vibhiśchyavānamaśvinā ni yātho advayāvinaṁ mādhvī mama śrutaṁ havam ॥5॥*
*ā vāṁ narā manoyujo'śvāsaḥ pruṣitapsavaḥ* ।
*vayo vahantu pītaye saha sumnebhiraśvinā mādhvī mama śrutaṁ havam ॥6॥*
*aśvināveha gachchhataṁ nāsatyā mā vi venatam* ।
*tiraśchidaryayā pari vartiryātamadābhyā mādhvī mama śrutaṁ havam ॥7॥*
*asminyo adābhyā jaritāraṁ śubhaspatī* ।
*avasyumaśvinā yuvaṁ gṛṇantamupa bhūṣatho mādhvī mama śrutaṁ havam ॥8॥*
*abhūduṣā ruśatpaśurāgniradhāyyṛtviyaḥ* ।
*ayoji vāṁ vṛṣaṇvasū ratho dasrāvamartyo mādhvī mama śrutaṁ havam ॥9॥*

सा. (Sv.) ४१८

प्रति प्रियतमं रथं वृष्णं वसुवाहनम् ।
स्तोता वामश्विनावृषि स्तोमेभिर्भूषति प्रति माध्वी मम श्रुतं हवम् ॥१०॥
*prati priyatamaṁ rathaṁ vṛṣṇaṁ vasuvāhanam* ।
*stotā vāmaśvināvṛṣi stomebhirbhūṣati prati mādhvī mama śrutaṁ havam ॥10॥*

सा. (Sv.) १७४३-४५

प्रति प्रियतमं रथं वृषणं वसुवाहनम् ।
स्तोता वामश्विनावृषि स्तोमेभिर्भूषति प्रति माध्वी मम श्रुतं हवम् ॥१॥
अत्यायातमश्विना तिरो विश्वा अहं सना ।
दस्रा हिरण्यवर्तनी सुषुम्णा सिन्धुवाहसा माध्वी मम श्रुतं हवम् ॥२॥
आ नो रत्नानि बिभ्रतावश्विना गच्छतं युवम् ।
रुद्रा हिरण्यवर्तनी जुषाणा वाजिनीवसू माध्वी मम श्रुतं हवम् ॥३॥
*prati priyatamaṁ rathaṁ vṛṣaṇaṁ vasuvāhanam* ।
*stotā vāmaśvināvṛṣi stomebhirbhūṣati prati mādhvī mama śrutaṁ havam ॥1॥*
*atyāyātamaśvinā tiro viśvā ahaṁ sanā* ।
*dasrā hiraṇyavartanī suṣumṇā sindhuvāhasā mādhvī mama śrutaṁ havam ॥2॥*
*ā no ratnāni bibhratāvaśvinā gachchhataṁ yuvam* ।
*rudrā hiraṇyavartanī juṣāṇā vājinīvasū mādhvī mama śrutaṁ havam ॥3॥*

२. इन्द्रः (INDRAḤ) - ऋ. (Rv.) ५.३१.१-७; ८२

इन्द्रो रथाय प्रवतं कृणोति यमध्यस्थान्मघवा वाजयन्तम् ।
यूथेव पश्वो व्युनोति गापो अरिष्टो याति प्रथमः सिषासन् ॥१॥
आ प्र द्रव हरिवो मा वि वेनः पिशंगराते अभि नः सचस्व ।
नहि त्वदिन्द्र वस्यो अन्यदस्त्यमेनाँश्चिज्जनिवतश्चकर्थ ॥२॥
उद्यत्सहः सहस आजनिष्ट देदिष्ट इन्द्र इन्द्रियाणि विश्वा ।

प्राचोदयत्सुदुघा वव्रे अन्तर्वि ज्योतिषा संववृत्वत्तमोऽवः ॥३॥
अनवस्ते रथमश्वाय तक्षन्त्वष्टा वज्रं पुरुहूत द्युमन्तम् ।
ब्रह्माण इन्द्रं महयन्तो अर्कैरवर्धयन्नहये हन्त्वा उ ॥४॥
वृष्णे यत्ते वृष्णो अर्कमर्चानिन्दं ग्रावाणे अदितिः सजोषाः ।
अनश्वासो ये पवयोऽरथा इन्द्रेषिता अभ्यवर्तन्त दस्यून् ॥५॥
प्र ते पूर्वाणि करणानि वोचं प्र नूतना मघवन्या चकर्थ ।
शक्तीवो यद्विभरा रोदसी उभे जयन्नपो मनवे दानुचित्राः ॥६॥
तदिन्नु ते करणं दस्म विप्राहिं यद् घ्नन्नोजो अत्रामिमीथाः ।
शुष्णस्य चित्परि माया अगृभ्णाः प्रपित्वं यन्नप दस्यूँरसेधः ॥७॥

*indro rathāya pravataṁ kṛṇoti yamadhyasthānmaghavā vājayantam /*
*yūtheva paśvo vyunoti gāpo ariṣṭo yāti prathamaḥ siṣāsan //1 //*
*ā pra drava harivo mā vi venaḥ piśaṁgarāte abhi naḥ sachasva /*
*nahi tvadindra vasyo anyadastyamenāṁśchijjanivataśchakartha //2 //*
*udyatsahaḥ sahasa ājaniṣṭa dediṣṭa indra indriyāṇi viśvā /*
*prāchodayatsudughā vavre antarvi jyotiṣā saṁvavṛtvattamo'vaḥ //3 //*
*anavaste rathamaśvāya takṣantvaṣṭā vajraṁ puruhūta dyumantam /*
*brahmāṇa indraṁ mahayanto arkairavardhayannahaye hantvā u //4 //*
*vṛṣṇe yatte vṛṣṇo arkamarchānindaṁ grāvāṇe aditiḥ sajoṣāḥ /*
*anaśvāso ye pavayo'rathā indreṣitā abhyavartanta dasyūn //5 //*
*pra te pūrvāṇi karaṇāni vochaṁ pra nūtanā maghavanyā chakartha /*
*śaktīvo yadvibharā rodasī ubhe jayannapo manave dānuchitrāḥ //6 //*
*tadinnu te karaṇaṁ dasma viprāhiṁ yad ghnannojo atrāmimīthāḥ /*
*śuṣṇasya chitpari māyā agṛbhṇāḥ prapitvaṁ yannapa dasyūṁrasedhaḥ //7 //*

ऋ. (Rv.) ५.३१.८२

त्वमपो यदवे तुर्वशायारमयः सुदुघाः पार इन्द्र ।
उग्रमयातमवहो ह कुत्सं सं ह यद्वामुशनारन्त देवाः ॥८॥

*tvamapo yadave turvaśāyāramayaḥ sudughāḥ pāra indra /*
*ugramayātamavaho ha kutsaṁ saṁ ha yadvāmuśanāranta devāḥ //8 //*

३. इन्द्र उशना वा (Indra Uśanā Vā)

ऋ. (Rv.) ५.३१.८४

त्वमपो यदवे तुर्वशायारमयः सुदुघाः पार इन्द्र ।
उग्रमयातमवहो ह कुत्सं सं ह यद्वामुशनारन्त देवाः ॥८॥

*tvamapo yadave turvaśāyāramayaḥ sudughāḥ pāra indra /*
*ugramayātamavaho ha kutsaṁ saṁ ha yadvāmuśanāranta devāḥ //8 //*

४. इन्द्रः कुत्सश्च (Indraḥ Kutsaścha) - ऋ. (Rv.) ५.३१.९

इन्द्राकुत्सा वहमाना रथेना वामत्या अपि कर्णे वहन्तु ।
निः षीमद्भ्यो धमथो निः षधस्थान्मघोनो हृदो वरथस्तमांसि ॥९॥

*indrākutsā vahamānā rathenā vāmatyā api karṇe vahantu /*
*niḥ ṣīmadbhyo dhamatho niḥ ṣadhasthānmaghono hṛdo varathastamāṁsi //9 //*

५. इन्द्रः कुत्सो वा (Indraḥ Kutso Vā) - ऋ. (Rv.) ५.३१.८३

त्वमपो यदवे तुर्वशायारमयः सुदुघाः पार इन्द्र ।
उग्रमयातमवहो ह कुत्सं सं ह यद्वामुशनारन्त देवाः ॥८॥

*tvamapo yadave turvaśāyāramayaḥ sudughāḥ pāra indra /*
*ugramayātamavaho ha kutsaṁ saṁ ha yadvāmuśanāranta devāḥ //8 //*

## ६८. अश्विनौ (Aśvinau)

१. अग्निः (Agniḥ) - य. (Yv.)२८.२२-२३

देवोऽअग्निः स्विष्टकृद्देवमिन्द्रमवर्द्धयत्।
स्विष्टं कुर्वन्त्स्विष्टकृत् स्विष्टमद्य करोतु नो वसुवने वसुधेयस्य वेतु यज ॥२२॥
अग्निमद्य होतारमवृणीतायं यजमानः पचन् पक्तीः पचन् पुरोडाशं बध्नन्निन्द्राय छागम्। सूपस्थाऽअद्य देवो वनस्पतिरभवदिन्द्राय छागेन ।
अघत्तं मेदस्तः प्रति पचताग्रभीदवीवृधत्पुरोडाशेन त्वामद्यऽऋषे ॥२३॥

*devo'agniḥ sviṣṭakṛddevamindramavarddhayat |*
*sviṣṭaṁ kurvantsviṣṭakṛt sviṣṭamadya karotu no vasuvane vasudheyasya vetu yaja ||22 ||*
*agnimadya hotāramavṛṇītāyaṁ yajamānaḥ pachan pakvavīḥ pachan puroḍāśaṁ badhnannindrāya chhāgam | sūpasthā'adya devo vanaspatirabhavadindrāya chhāgena |*
*aghattaṁ medastaḥ prati pachatāgrabhīdavīvṛdhatpuroḍāśena tvāmadya'ṛṣe ||23 ||*

२. अश्विनौ (Aśvinau) - य. (Yv.)२८.१७

देवा दैव्या होतारा देवमिन्द्रमवर्द्धताम्।
हताघशं सावाभार्ष्टा वसु वार्याणि यजमानाय शिक्षितौ वसुवने वसुधेयस्य वीतां यजा ॥१७॥

*devā daivyā hotārā devamindramavarddhatām |*
*hatāghaśaṁ sāvābhārṣṭā vasu vāryāṇi yajamānāya śikṣitau vasuvane vasudheyasya vītāṁ yajā ||17 ||*

३. अहोरात्रे (Ahorātre) - य. (Yv.)२८.१४

देवी उषासानक्तेन्द्रं यो प्रयत्यह्नेताम्। दैवीर्विशः ।
प्रायासिष्टाँ सुप्रीते सुधिते वसुवने वसुधेयस्य वीतां यज ॥१४॥

*devī uṣāsānaktendraṁ yo prayatyahnetām | daivīrviśaḥ |*
*prāyāsiṣṭām̐ suprīte sudhite vasuvane vasudheyasya vītāṁ yaja ||14 ||*

४. इन्द्रः (Indraḥ) - य. (Yv.)२८.१२-१३; १५-१६

य. (Yv.)२८.१२-१३

देवं बर्हिरिन्द्रंसुदेवं देवैर्वीरवत् स्तीर्णं वेद्यामवर्द्धयत् ।
वस्तोर्वृतं प्राक्तोर्भृतंराया बर्हिष्मतोऽत्यगाद्वसुवने वसुधेयस्य वेतु यज ॥१२॥
देवीर्द्वार ऽइन्द्रंसङ्घाते वीड्वीर्यामन्न वर्द्धयन्। आ वत्सेन तरुणेन कुमारेण च
मीवतापार्वाणंरेणुककाटं नुदन्तां वसुवने वसुधेयस्य व्यन्तु यज ॥१३॥

*devaṁ barhirindraṁsudevaṁ devairvīravat stīrṇa vedyāmavarddhayat |*
*vastorvṛtaṁ prāktorbhṛtaṁrāyā barhiṣmato'tyagādvasuvane vasudheyasya vetu yaja ||12 ||*
*devīrdvāra 'indraṁsaṅghāte vīḍvīryāmanna varddhayan | ā vatsena taruṇena kumāreṇa cha*
*mīvatāpārvāṇaṁreṇukakāṭaṁ nudantāṁ vasuvane vasudheyasya vyantu yaja ||13 ||*

य. (Yv.)२८.१५-१६

देवी जोष्टीवसुधिति देवमिन्द्रमवर्द्धताम्। अयाव्यन्याघा द्वेषां स्यान्या वक्षद्वसु वार्याणि यजमानाय शिक्षिते वसुवने वसुधेयस्य वीतां यज ॥१५॥
देवीऽऊर्जाहुती दुघे सुदुघे पयसेन्द्रमवर्द्धताम्। इषमूर्जमन्या वक्षत्सग्धिंसपीतिमन्या नवेन पूर्व दयामाने पुराणेन नवमधातामूर्जमूर्जाहुतीऽऊर्जयमाने वसु वार्याणि यजमानाय शिक्षिते वसुवने वसुधेयस्य वीतां यज ॥१६॥

*devī joṣṭīvasudhiti devamindramavarddhatām | ayāvyanyāghā dveṣāṁ syānyā vakṣadvasu vāryāṇi yajamānāya śikṣite vasuvane vasudheyasya vītāṁ yaja ||15 ||*
*devī'ūrjāhutī dughe sudughe payasendramavarddhatām | iṣamūrjamanyā vakṣatsagdhiṁsapītimanyā navena pūrva dayāmāne purāṇena*

*navamadhātāmūrjamūrjāhuti'ūrjayamāne vasu vāryāṇi yajamānāya śikṣite vasuvane vasudheyasya vītāṁ yaja ॥16॥*

५. सभेशः (Sabheśaḥ) - य. (Yv.)२०.३

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम्। श्विनोर्भैषज्येन तेजसे ब्रह्मवर्चसायाभि षिंचामि सरस्वत्यै भैषज्येन वीर्यायान्नाद्यायाभि षिंचामीन्द्रस्येन्द्रियेण बलाय श्रियै यशसेऽभि षिंचामि ॥३॥

*devasya tvā savituḥ prasave'śvinorbāhubhyāṁ pūṣṇo hastābhyām । śvinorbhaiṣajyena tejase brahmavarchasāyābhi ṣiṁchāmi sarasvatyai bhaiṣajyena vīryāyānnādyāyābhi ṣiāṁchāmīndrasyendriyeṇa balāya śriyai yaśase'bhi ṣiṁchāmi ॥3॥*

## ६९. अश्विनौ वैवस्वतौ (Aśvinau Vaivasvatau)

१. अश्विनौ (Aśvinau) - सा. (Sv.) ३०५

कुष्ठः को वामश्विना तपानो देवा मर्त्यः। घ्नता वामश्नया क्षपमाणोंऽशुनेत्थमु आद्वन्यथा ॥३॥

*kuṣṭhaḥ ko vāmaśvinā tapāno devā martyaḥ । ghnatā vāmaśnayā kṣapamāṇoṁ'śunetthamu ādvanyathā ॥3॥*

## ७०. अष्टकः (Aṣṭakaḥ)

१. इन्द्रः (Indraḥ) - अ. (Av.) २०.२५.७; २०.३३.१-३

अ. (Av.) २०.२५.७

प्रोग्रां पीतिं वृष्णं इयर्मि सतयां प्रयै सुतस्य हर्यश्व तुभ्यम् ।
इन्द्र धेनाभिरिह मादयस्व धीभिर्विश्वभिः शच्या गृणानः ॥७॥

*progrāṁ pītiṁ vṛṣṇaṁ iyarmi satayāṁ prayai sutasya haryaśva tubhyam ।*
*indra dhenābhiriha mādayasva dhībhirviśvabhiḥ śachyā gṛṇānaḥ ॥7॥*

अ. (Av.) २०.३३.१-३

अप्सु धूतस्य हरिवः पिबेह नृभिः सुतस्य जठरं पृणस्व ।
मिमिक्षुर्यमद्रय इन्द्र तुभ्यं तेभिर्वर्धस्व मदमुक्थवाहः ॥१॥
प्रोग्रां पीतिं वृष्ण इयर्मि सत्यां प्रयै सुतस्य हर्यश्व तुभ्यम् ।
इन्द्र धेनाभिरिह मादयस्व धीभिर्विश्वाभिः शच्या गृणानः ॥२॥
ऊती शचीवस्तव वीर्येण वयो दधाना उशिज ऋताः ।
प्रजावदिन्द्र मनुषो दुरोणे तस्थुर्गृणन्तः सधमाद्यासः ॥३॥

*apsu dhūtasya harivaḥ pibeha nṛbhiḥ sutasya jaṭharaṁ pṛṇasva ।*
*mimikṣuryamadraya indra tubhyaṁ tebhirvardhasva madamukthavāhaḥ ॥1॥*
*progrāṁ pītiṁ vṛṣṇa iyarmi satyāṁ prayai sutasya haryaśva tubhyam ।*
*indra dhenābhiriha mādayasva dhībhirviśvābhiḥ śachyā gṛṇānaḥ ॥2॥*
*ūtī śachīvastava vīryeṇa vayo dadhānā uśija ṛtāāḥ ।*
*prajāvadindra manuṣo duroṇe tasthurgṛṇantaḥ sadhamādyāsaḥ ॥3॥*

## ७१. अष्टको वैश्वामित्रः (Aṣṭako Vaiśvāmitraḥ)

१. इन्द्रः (Indraḥ) - १०.१०४.१-११

असावि सोमः पुरुहूत तुभ्यं हरिभ्यां यामुप याहि तूयम् ।
तुभ्यं गिरो विप्रवीरा इयाना दधन्विर इन्द्र पिबा सुतस्य ॥१॥
अप्सु धूतस्य हरिवः पिबेह नृभिः सुतस्य जठरं पृणस्व ।
मिमिक्षुर्यमद्रय इन्द्र तुभ्यं तेभिर्वर्धस्व मदमुक्थवाहः ॥२॥
प्रोग्रां पीतिं वृष्ण इयर्मि सत्यां प्रयै सुतस्य हर्यश्व तुभ्यम् ।
इन्द्र धेनाभिरिहि मादयस्व धीभिर्विश्वाभिः शच्या गृणानः ॥३॥
ऊती शचीवस्तव वीर्यण वयो दधाना उशिज ऋताः ।
प्रजावदिन्द्र मनुषो दुरोणे तस्थुर्गृणन्तः सधमाद्यासः ॥४॥
प्रणीतिभिष्टे हर्यश्व सुष्टोः सुषुम्नस्य पुरुरुचो जनासः ।
मंहिष्ठामूतिं वितिरे दधानाः स्तोतार इन्द्र तव सूनृताभिः ॥५॥

उप ब्रह्माणि हरिवो हरिभ्यां सोमस्य याहि पीतये सुतस्य ।
इन्द्र त्वा याः क्षममाणमानड् दाश्वाँ अस्यध्वरस्य प्रकेतः ॥६॥
सहस्रवाजमभिमातिषाहं सुतेरणं मघवानं सुवृक्तिम् ।
उप भूषन्ति गिरो अप्रतीतमिन्द्रं नमस्या जरितुः पनन्त ॥७॥
सप्तापो देवीः सुरणा अमृक्ता याभिः सिन्धुमतर इन्द्र पूर्भित् ।
नवतिं स्रोत्या नव च स्रवन्तीर्देवेभ्यो गातुं मनुषे च विन्दः ॥८॥
अपो महीरभिशस्तेरमुंचोऽजागरास्वधि देव एकः ।
इन्द्र यास्त्वं वृत्रतूर्ये चकर्थ ताभिर्विश्वयुस्तन्वं पुपुष्याः ॥९॥
वीरेण्यः क्रतुरिन्द्रः सुशस्तिरुतापि धेना पुरुहूतमीट्टे ।
आर्दयद्वृत्रमकृणोदु लोकं ससाहे शक्रः पृतना अभिष्टिः ॥१०॥
शुनं हुवेम मघवानमिन्द्रमस्मिन्भरे नृतमं वाजसातौ ।
श्रृण्वन्तमुग्रमूतये समत्सु घ्नन्तं वृत्राणि संजितं धनानाम् ॥११॥

*asāvi somaḥ puruhūta tubhyaṁ haribhyāṁ yāmupa yāhi tūyam /*
*tubhyaṁ giro vipravīrā iyānā dadhanvira indra pibā sutasya //1 //*
*apsu dhūtasya harivaḥ pibeha nṛbhiḥ sutasya jaṭharaṁ pṛṇasva /*
*mimikṣuryamadraya indra tubhyaṁ tebhirvardhasva madamukthavāhaḥ //2 //*
*progrāṁ pītiṁ vṛṣṇa iyarmi satyāṁ prayai sutasya haryaśva tubhyam /*
*indra dhenābhirihi mādayasva dhībhirviśvābhiḥ śachyā gṛṇānaḥ //3 //*
*ūtī śachīvastava vīryaṇa vayo dadhānā uśija ṛtāāḥ /*
*prajāvadindra manuṣo duroṇe tasthurgṛṇantaḥ sadhamādyāsaḥ //4 //*
*praṇītibhiṣṭe haryaśva suṣṭoḥ suṣumnasya pururucho janāsaḥ /*
*maṁhiṣṭhāmūtiṁ vitire dadhānāḥ stotāra indra tava sūnṛtābhiḥ //5 //*
*upa brahmāṇi harivo haribhyāṁ somasya yāhi pītaye sutasya /*
*indra tvā yāḥ kṣamamāṇamānaḍ dāśvām̐ asyadhvarasya praketaḥ //6 //*
*sahasravājamabhimātiṣāhaṁ suteraṇaṁ maghavānaṁ suvṛktim /*
*upa bhūṣanti giro apratītamindraṁ namasyā jarituḥ pananta //7 //*
*saptāpo devīḥ suraṇā amṛktā yābhiḥ sindhumatara indra pūrbhit /*
*navatiṁ srotyā nava cha sravantīrdevebhyo gātuṁ manuṣe cha vindaḥ //8 //*
*apo mahīrabhiśasteramuṁcho'jāgarāsvadhi deva ekaḥ /*
*indra yāstvaṁ vṛtratūrye chakartha tābhirviśvayustanvaṁ pupuṣyāḥ //9 //*
*vīreṇyaḥ kraturindraḥ suśastirutāpi dhenā puruhūtamīṭṭe /*
*ārdayadvṛtramakṛṇodu lokaṁ sasāhe śakraḥ pṛtanā abhiṣṭiḥ //10 //*
*śunaṁ huvema maghavānamindramasminbhare nṛtamaṁ vājasātau /*
*śṛṇvantamugramūtaye samatsu ghnantaṁ vṛtrāṇi saṁjitaṁ dhanānām //11 //*

## ७३. अष्टादंष्ट्रो वैरूपः (Aṣṭādaṁṣṭro Vairūpaḥ)

१. इन्द्रः (Indraḥ) - ऋ. (Rv.) १०.१११.१-१०

मनीषिणः प्र भरध्वं मनीषां यथायथा मतयः सन्ति नृणाम् ।
इन्द्रं सत्यैरेरयामा कृतेभिः स हि वीरो गिर्वणस्युर्विदानः ॥१॥
ऋतस्य हि सदसो धीतिरद्यौत्सं गार्ष्टेयो वृषभो गोभिरानट् ।
उदतिष्ठत्तविषेणा रवेण महान्ति चित्सं विव्याचा रजांसि ॥२॥
इन्द्रः किल श्रुत्या अस्य वेद स हि जिष्णुः पथिकृत्सूर्याय ।
अन्मेनां कृण्वन्नच्युतो भुवदगोः पतिर्दिवः सनजा अप्रतीतः ॥३॥
इन्द्रो मह्ना महतो अर्णवस्य व्रतामिनादंगिरोभिर्गृणानः ।
पुरूणि चिन्नि तताना रजांसि दाधार यो धरुणं सत्यताता ॥४॥
इन्द्रो दिवः प्रतिमानं पृथिव्या विश्वा वेद सवना हन्ति शुष्णम् ।
महीं चिद् द्यामातनोत्सूर्येण चास्कम्भ चित्कम्भनेन स्कभीयान् ॥५॥
वज्रेण हि वृत्रहा वृत्रमस्तरदेवस्य शूशुवानस्य मायाः ।

वि धृष्णो अत्र धृषता जघन्थाथाभवो मघवन्बाह्वोजाः ॥६॥
सचन्त यदुषसः सूर्येण चित्रामस्य केतवो रामविन्दन् ।
आ यन्नक्षत्रं ददृशे दिवो न पुनर्यतो नाकिरद्धा नु वेद ॥७॥
दूरं किल प्रथमा जग्मुरासामिन्द्रस्य याः प्रसवे सस्रुरापः ।
क्व स्विदग्रं क्व बुध्न आसामापो मध्यं क्व वो नूनमन्तः ॥८॥
सुजः सिन्धूँरहिना जग्रसानाँ आदिदेताः प्र विविज्रे जवेन ।
मुमुक्षमाणा उत या मुमुच्रेऽधेदेता न रमन्ते नितिक्ताः ॥१॥
सध्राचीः सिन्धुमुशतीरिवायन्त्सनाज्जार आरितः पूर्भिदासाम् ।
अस्तमा ते पार्थिवा वसून्यस्मे जग्मुः सूनृता इन्द्र पूर्वीः ॥१०॥

*manīṣiṇaḥ pra bharadhvaṁ manīṣāṁ yathāyathā matayaḥ santi nṛṇām /*
*indraṁ satyairerayāmā kṛtebhiḥ sa hi vīro girvaṇasyurvidānaḥ //1 //*
*ṛtasya hi sadaso dhītiradyautsaṁ gārṣṭeyo vṛṣabho gobhirānaṭ /*
*udatiṣṭhattaviṣeṇā raveṇa mahānti chitsaṁ vivyāchā rajāṁsi //2 //*
*indraḥ kila śrutyā asya veda sa hi jiṣṇuḥ pathikṛtsūryāya /*
*anmenāṁ kṛṇvannachyuto bhuvadagoḥ patirdivaḥ sanajā apratītaḥ //3 //*
*indro mahnā mahato arṇavasya vratāminādaṁgirobhirgṛṇānaḥ /*
*purūṇi chinni tatānā rajāṁsi dādhāra yo dharuṇaṁ satyatātā //4 //*
*indro divaḥ pratimānaṁ pṛthivyā viśvā veda savanā hanti śuṣṇam /*
*mahīṁ chid dyāmātanotsūryeṇa chāskambha chitkambhanena skabhīyān //5 //*
*vajreṇa hi vṛtrahā vṛtramastaradevasya śūśuvānasya māyāḥ /*
*vi dhṛṣṇo atra dhṛṣatā jaghanthāthābhavo maghavanbāhnojāḥ //6 //*
*sachanta yaduṣasaḥ sūryeṇa chitrāmasya ketavo rāmavindan /*
*ā yannakṣatraṁ dadṛśe divo na punaryato nākiraddhā nu veda //7 //*
*dūraṁ kila prathamā jagmurāsāmindrasya yāḥ prasave sasrurāpaḥ /*
*kva svidagraṁ kva budhna āsāmāpo madhyaṁ kva vo nūnamantaḥ //8 //*
*sujaḥ sindhūm̐rahinā jagrasānām̐ ādidetāḥ pra vivijre javena /*
*mumukṣamāṇā uta yā mumuchre'dhedetā na ramante nitiktāḥ //1 //*
*sadhrāchīḥ sindhumuśatīrivāyantsanājjāra āritaḥ pūrbhidāsām /*
*astamā te pārthivā vasūnyasme jagmuḥ sūnṛtā indra pūrvīḥ //10 //*

**७४. असितः काश्यपो देवलो वा (ऋसर्व. साग्री.); असितः काश्यपः (सार्षदी. ४७५; ७६; ८५; ८६) (Asitaḥ Kāśyapo Devalo Vā [Rss. Ssb.]; Asitaḥ Kāśyapaḥ [Sad. 475; 76; 85; 86])**

१. आप्रियः (Āpriyaḥ) - ऋ. (Rv.) ९.५.१-११

समिद्धो विश्वतस्पतिः पवमानो वि राजति। प्रीणन् वृषा कनिक्रदत् ॥१॥
तनूनपात पवमानः शृंगे शिशानो अर्षति। अन्तरिक्षेण रारजत ॥२॥
ईळेन्यः पवमानो रयिर्वि राजति द्युमान्। मधेर्धाराभिरोजसा ॥३॥
बर्हिः प्राचीनमोजसा पवमान स्तृणन् हरिः। देवेषु देव ईयते ॥४॥
उदातैर्जिहते बृहद् द्वारो देवीर्हिरण्ययीः। पवमानेन सुष्टुताः ॥५॥
सुशिल्पे बृहती मही पवमानो वृषण्यती। नक्तोषासा न दर्शते ॥६॥
उभा देवा नृचक्षसा होतारा दैव्या हुवे। पवमान इन्द्रो वृषा ॥७॥
भारती पवमानस्य सरस्वतीळा मही। इमं नो यामा गमन्तिस्रो देवीः सुपेशसः ॥८॥
त्वष्टारमग्रजां गोपां पुरोयावानमा हुवे। इन्दुरिन्द्रो वृषा हरिः पवमानः प्रजापतिः ॥९॥
वनस्पतिं पवमान मध्वा समङ्धि धारया। सहस्रवल्शं हरितं भ्राजमानं हिरण्ययम् ॥१०॥
विश्वे देवाः स्वाहाकृतिं पवमानस्या गत। वायुर्बृहस्पतिः सूर्योऽग्निरिन्द्रः सजोषसः ॥११॥

*samiddho viśvataspatiḥ pavamāno vi rājati / prīṇan vṛṣā kanikradat //1 //*
*tanūnapāta pavamānaḥ śṛṁge śiśāno arṣati / antarikṣeṇa rārajata //2 //*
*īḻenyaḥ pavamāno rayirvi rājati dyumān / madherdhārābhirojasā //3 //*

*barhiḥ prāchīnamojasā pavamāna stṛṇan hariḥ । deveṣu deva īyate ॥4 ॥*
*udātairjihate bṛhad dvāro devīrhiraṇyayīḥ । pavamānena suṣṭutāḥ ॥5 ॥*
*suśilpe bṛhatī mahī pavamāno vṛṣaṇyatī । naktoṣāsā na darśate ॥6 ॥*
*ubhā devā nṛchakṣasā hotārā daivyā huve । pavamāna indro vṛṣā ॥7 ॥*
*bhāratī pavamānasya sarasvatīḷā mahī । imaṁ no yāmā gamantisro devīḥ supeśasaḥ ॥8 ॥*
*tvaṣṭāramagrajāṁ gopāṁ puroyāvānamā huve । indurindro vṛṣā hariḥ pavamānaḥ prajāpatiḥ ॥9 ॥*
*vanaspatiṁ pavamāna madhvā samaṅgdhi dhārayā । sahasravalśaṁ haritaṁ bhrājamānaṁ hiraṇyayam ॥10 ॥*
*viśve devāḥ svāhākṛtiṁ pavamānasyā gata । vāyubṛrhaspatiḥ sūryo'gnirindraḥ sajoṣasaḥ ॥11 ॥*

२. पवमानः सोमः (Pavamānaḥ Somaḥ)- ऋ. (Rv.) ९.६.१-९; ९.७.१-९; ९.८.१-९; ९.९.१-९; ९.१०.१-९; ९.११.१-९; ९.१२.१-९; ९.१३.१-९; ९.१४.१-८; ९.१५.१-८; ९.१६.१-८; ९.१७.१-८; ९.१८.१-७; ९.१९.१-७; ९२०.१-७; ९.२१.१-७; ९.२२.१-७; ९.२३.१-७; ९.२४.१-७; सा ४७५; ४७६; ४८५-८६; ५०२; ५०६; ६५१; ६५२; ६५३; ७६१; ७६३; ९३५-९३७; ९६१-७४; ९९९; १०००-१००१; १०९३-९५; ११११-३६; ११७८-१२०४; १२६६-७३

ऋ. (Rv.) ९.६.१-९

मन्द्रया सोम धारया वृषा पवस्व देवयुः । अव्यो वारेष्वस्मयुः ॥१ ॥
अभित्यं मद्यं मदमिन्दविन्द्र इति क्षर । अभि वाजिनो अर्वतः ॥२ ॥
अभि त्यं पूवर्य मदं सुवानो अर्ष पवित्र आ । अभि वाजमुत श्रवः ॥३ ॥
अनु द्रप्सास इन्दव आपो न प्रवतासरन् । पुनाना इन्द्रमाशत ॥४ ॥
यमत्यमिव वाजिनं मृजन्ति योषणो दश । वने क्रीळन्तमत्यविम् ॥५ ॥
तं गोभिर्वृषणं रसं मदाय देववीतये । सुतं भराय सं सृज ॥६ ॥
देवो देवाय धारयेन्द्राय पवते सुतः । पयो यदस्य पीपयत् ॥७ ॥
आत्मा यास्य रंह्या सुष्वाणः पवते सुतः । प्रत्नं नि पाति काव्यम् ॥८ ॥
एवा पुनान इन्द्रयुर्मदं मदिष्ठ वीतये । गुहा चिद्दधिषे गिरः ॥९ ॥

*mandrayā soma dhārayā vṛṣā pavasva devayuḥ । avyo vāreṣvasmayuḥ ॥1 ॥*
*abhityaṁ madyaṁ madamindavindra iti kṣara । abhi vājino arvataḥ ॥2 ॥*
*abhi tyaṁ pūvarya madaṁ suvāno arṣa pavitra ā । abhi vājamuta śravaḥ ॥3 ॥*
*anu drapsāsa indava āpo na pravatāsaran । punānā indramāśata ॥4 ॥*
*yamatyamiva vājinaṁ mṛjanti yoṣaṇo daśa । vane krīḷantamatyavim ॥5 ॥*
*taṁ gobhirvṛṣaṇaṁ rasaṁ madāya devavītaye । sutaṁ bharāya saṁ sṛja ॥6 ॥*
*devo devāya dhārayendrāya pavate sutaḥ । payo yadasya pīpayat ॥7 ॥*
*ātmā yāsya raṁhyā suṣvāṇaḥ pavate sutaḥ । pratnaṁ ni pāti kāvyam ॥8 ॥*
*evā punāna indrayurmadaṁ madiṣṭha vītaye । guhā chiddadhiṣe giraḥ ॥9 ॥*

ऋ. (Rv.) ९.७.१-९

असृग्रमिन्दवः पथा धर्मन्नृतस्य सुश्रियः । विदाना अस्य योजनम् ॥१ ॥
प्र धारा मध्वो अग्रियो महीरपो वि गाहते । हविर्हविष्षु वन्द्यः ॥२ ॥
प्र युजो वाचो अग्रियो वृषाव चक्रदद्वने । सदमाभि सत्यो अध्वरः ॥३ ॥
परि यत्काव्या कविर्नृम्णा वसानो अर्षति । स्वर्वाजी सिषसति ॥४ ॥
पवमानो अभि स्पृधो विशो राजेव सीदति । यदीमृण्वन्ति वेधसः ॥५ ॥
अव्यो वारे परि प्रियो हरिर्वनेषु सीदति । रेभो वनुष्यते मती ॥६ ॥
स वायुमिन्द्रमश्विना साकं मदेन गच्छति । रणा यो धर्मभिः ॥७ ॥
आ मित्रावरुणा भगं मध्वः पवन्त ऊर्मयः । विदाना अस्य शक्मभिः ॥८ ॥
अस्मभ्यं रोदसी रयिं मध्वो वाजस्य सातये । श्रवो वसूनि सं जितम् ॥९ ॥

*asṛgramindavaḥ pathā dharmannṛtasya suśriyaḥ । vidānā asya yojanam ॥1 ॥*

*pra dhārā madhvo agriyo mahīrapo vi gāhate | havirhaviṣṣu vandyaḥ ||2 ||*
*pra yujo vācho agriyo vṛṣāva chakradadvane | sadamābhi satyo adhvaraḥ ||3 ||*
*pari yatkāvyā kavirnṛmṇā vasāno arṣati | svarvājī siṣasati ||4 ||*
*pavamāno abhi spṛdho viśo rājeva sīdati | yadīmṛṇvanti vedhasaḥ ||5 ||*
*avyo vāre pari priyo harirvaneṣu sīdati | rebho vanuṣyate matī ||6 ||*
*sa vāyumindramaśvinā sākaṁ madena gachchhati | raṇā yo dharmabhiḥ ||7 ||*
*ā mitrāvaruṇā bhagaṁ madhvaḥ pavanta ūrmayaḥ | vidānā asya śakmabhiḥ ||8 ||*
*asmabhyaṁ rodasī rayiṁ madhvo vājasya sātaye | śravo vasūni saṁ jitam ||9 ||*

ऋ. (Rv.) ९.८.१-९

एते सोमा अभि प्रियमिन्द्रस्य काममक्षरन्। वर्धन्तो अस्य वीर्यम् ॥१॥
पुनानासश्चमूषदो गच्छन्तो वायमश्विना। ते नो धान्तु सुवीर्यम् ॥२॥
इन्द्रस्य सोम राधसे पुनानो हार्दि चोदय। ऋतस्य योनिमासदम् ॥३॥
मृजन्ति त्वा दश क्षिपो हिन्वन्ति सप्त धीतयः। अनु विप्रा अमादिषुः ॥४॥
देवेभ्यस्त्वा मदाय कं सृजानमति मेष्यः। सं गोभिर्वासयामसि ॥५॥
पुनानः कलशेष्वा वस्त्राण्यरुषो हरिः। परि गव्यान्यव्यत ॥६॥
मघोन आ पवस्व नो जहि विश्वा अप द्विषः। इन्दो सखायमा विश ॥७॥
वृष्टिं दिवः परि स्रव द्युम्नं पृथिव्या अधि। सहो नः सोम पृत्सु धाः ॥८॥
नृचक्षसं त्वा वयमिन्द्रपीतं स्वर्विदम्। भक्षीमहि प्रजामिषम् ॥९॥

*ete somā abhi priyamindrasya kāmamakṣaran | vardhanto asya vīryam ||1 ||*
*punānāsaśchamūṣado gachchhanto vāyamaśvinā | te no dhāntu suvīryam ||2 ||*
*indrasya soma rādhase punāno hārdi chodaya | ṛtasya yonimāsadam ||3 ||*
*mṛjanti tvā daśa kṣipo hinvanti sapta dhītayaḥ | anu viprā amādiṣuḥ ||4 ||*
*devebhyastvā madāya kaṁ sṛjānamati meṣyaḥ | saṁ gobhirvāsayāmasi ||5 ||*
*punānaḥ kalaśeṣvā vastrāṇyaruṣo hariḥ | pari gavyānyavyata ||6 ||*
*maghona ā pavasva no jahi viśvā apa dviṣaḥ | indo sakhāyamā viśa ||7 ||*
*vṛṣṭiṁ divaḥ pari srava dyumnaṁ pṛthivyā adhi | saho naḥ soma pṛtsu dhāḥ ||8 ||*
*nṛchakṣasaṁ tvā vayamindrapītaṁ svarvidam | bhakṣīmahi prajāmiṣam ||9 ||*

ऋ. (Rv.) ९.९.१-९

परि प्रिया दिवः कविर्वयांसि नप्त्योर्हितः। सुवानो याति कविक्रतुः ॥१॥
प्रप्र क्षयाय पन्यसे जनाय जुष्टो अद्रुहे। वीत्यर्ष चनिष्ठया ॥२॥
स सूनुर्मातरा शुचिर्जातो जाते अरोचयत्। महान्मही ऋतावृधा ॥३॥
स सप्त धीतिभिर्हितो नद्यो अजिन्वदद्रुहः। या एकमक्षि वावृधुः ॥४॥
ता अभि सन्तमस्तृतं महे युवानमा दधुः। इन्दुमिन्द्र तव व्रते ॥५॥
अभि वह्निरमर्त्यः सप्त पश्यति वावहिः। क्रिविर्देवीरतर्पयत् ॥६॥
अवा कल्पेषु नः पुमस्तमांसि सोम योध्या। तानि पुनान जङ्घनः ॥७॥
नू नव्यसे नवीयसे सूक्ताय साधया पथः। प्रत्नवद्रोचया रुचः ॥८॥
पवमान महि श्रवो गामश्वं रसि वीरवत्। सना मेधां सना स्वः ॥९॥

*pari priyā divaḥ kavirvayāṁsi naptyorhitaḥ | suvāno yāti kavikratuḥ ||1 ||*
*prapra kṣayāya panyase janāya juṣṭo adruhe | vītyarṣa chaniṣṭhayā ||2 ||*
*sa sūnurmātarā śuchirjāto jāte arochayat | mahānmahī ṛtāvṛdhā ||3 ||*
*sa sapta dhītibhirhito nadyo ajinvadadruhaḥ | yā ekamakṣi vāvṛdhuḥ ||4 ||*
*tā abhi santamastṛtaṁ mahe yuvānamā dadhuḥ | indumindra tava vrate ||5 ||*
*abhi vahniramartyaḥ sapta paśyati vāvahiḥ | krivirdevīratarpayat ||6 ||*
*avā kalpeṣu naḥ pumastamāṁsi soma yodhyā | tāni punāna jaṅghanaḥ ||7 ||*
*nū navyase navīyase sūktāya sādhayā pathaḥ | pratnavadrochayā ruchaḥ ||8 ||*
*pavamāna mahi śravo gāmaśvaṁ rasi vīravat | sanā medhāṁ sanā svaḥ ||9 ||*

ऋ. (Rv.) ९.१०.१-९

प्र स्वानासो रथ इवार्वन्तो न श्रवस्यवः। सोमासो राये अक्रमुः ॥१॥

हिन्वानासो रथा इव दधन्विरे गभस्त्योः । भरासः कारिणामिव ॥२ ॥
राजानो न प्रशस्तिभिः सोमासो गोभिरंजते । याो न सप्त धातृभिः ॥३ ॥
परि सुवानासस इन्दवो मदाय बर्हणा गिरा । सुता अर्षन्ति धारया ॥४ ॥
आपानासो विवस्वतो जनन्त उषसो भगम् । सूरा अण्वं वि तन्वते ॥५ ॥
अप द्वारा मतीनां प्रत्ना ऋण्वन्ति कारवः । वृष्णो हरस आयवः ॥६ ॥
समीचीनास आसते होतारः सप्तजामयः । पदमेकस्य पिप्रतः ॥७ ॥
नाभ नाभि न आ ददे चक्षुश्चित्सूर्ये सचा । कवेरपत्यमा दुहे ॥८ ॥
अभि प्रिया दिवस्पदमध्वर्युभिर्गुहा हितम् । सूरः पश्यति चक्षसा ॥९ ॥

*pra svānāso ratha ivārvanto na śravasyavaḥ | somāso rāye akramuḥ ||1 ||*
*hinvānāso rathā iva dadhanvire gabhastyoḥ | bharāsaḥ kāriṇāmiva ||2 ||*
*rājāno na praśastibhiḥ somāso gobhiraṁjate | yāo na sapta dhātṛbhiḥ ||3 ||*
*pari suvānāsasa indavo madāya barhaṇā girā | sutā arṣanti dhārayā ||4 ||*
*āpānāso vivasvato jananta uṣaso bhagam | sūrā aṇvaṁ vi tanvate ||5 ||*
*apa dvārā matīnāṁ pratnā ṛṇvanti kāravaḥ | vṛṣṇo harasa āyavaḥ ||6 ||*
*samīchīnāsa āsate hotāraḥ saptajāmayaḥ | padamekasya piprataḥ ||7 ||*
*nābha nābhi na ā dade chakṣuśchitsūrye sachā | kaverapatyamā duhe ||8 ||*
*abhi priyā divaspadamadhvaryubhirguhā hitam | sūraḥ paśyati chakṣasā ||9 ||*

ऋ. (Rv.) ९.११.१-९

उपास्मै गायता नरः पवमानाये दवे । अभि देवाँ इयक्षते ॥१ ॥
अभि ते मधुना पयोऽथर्वाणो अशिश्रयुः । देवं देवाय देवयु ॥२ ॥
स नः पवस्व शं गवे शं जनाय शर्मवते । शं राजन्नोषधीभ्यः ॥३ ॥
बभ्रवे नु स्वतवसेऽरुणाय दिविस्पृशे । सोमाय गाथमर्चत ॥४ ॥
हस्तच्युतेभिरद्रिभिः सुतं सोमं पुनीतन । मधावा धावता मधु ॥५ ॥
नमसेदुप सीदत दध्नेदभि श्रीणीतन । इन्दुमिन्द्रे दधातन ॥६ ॥
अमित्रहा विचर्षणिः पवस्व सोम शं गवे । देवेभ्यो अनुकामकृत् ॥७ ॥
इन्द्राय सोम पातवे मदाय परि षिच्यसे । मनश्चिन्मनसस्पतिः ॥८ ॥
पवमान सुवीर्य रयि सोम रिरीहि नः । इन्दविन्द्रेण नो युजा ॥९ ॥

*upāsmai gāyatā naraḥ pavamānāye dave | abhi devām̐ iyakṣate ||1 ||*
*abhi te madhunā payo'tharvāṇo aśiśrayuḥ | devaṁ devāya devayu ||2 ||*
*sa naḥ pavasva śaṁ gave śaṁ janāya śarmavate | śaṁ rājannoṣadhībhyaḥ ||3 ||*
*babhrave nu svatavase'ruṇāya divispṛśe | somāya gāthamarchata ||4 ||*
*hastachyutebhiradribhiḥ sutaṁ somaṁ punītana | madhāvā dhāvatā madhu ||5 ||*
*namasedupa sīdata dadhnedabhi śrīṇītana | indumindre dadhātana ||6 ||*
*amitrahā vicharṣaṇiḥ pavasva soma śaṁ gave | devebhyo anukāmakṛt ||7 ||*
*indrāya soma pātave madāya pari ṣichyase | manaśchinmanasaspatiḥ ||8 ||*
*pavamāna suvīrya rayi soma rirīhi naḥ | indavindreṇa no yujā ||9 ||*

ऋ. (Rv.) ९.१२.१-९

सोमा असृग्रमिन्दवः सुता ऋतस्य सादने । इन्द्राय मधुमत्तमाः ॥१ ॥
अभि विप्रा अनूषत गावो वत्सं न मातरः । इन्द्रं सोमस्य पीतये ॥२ ॥
मदच्युत्क्षेति सादने सिन्धोरूर्मा विपश्चित् । सोमो गौरी अधि श्रितः ॥३ ॥
दिवो नाभा विचक्षणोऽव्यो वारे महीयते । सोमो यः सुक्रतुः कविः ॥४ ॥
यः सोमः कलशेष्वाँ अन्तः पवित्र आहितः । तमिन्दुः परि षस्वजे ॥५ ॥
प्र वाचमिन्दुरिष्यति समुद्रस्याधि विष्टपि । जिन्वन् कोशं मधुश्चुतम् ॥६ ॥
नित्यस्तोत्रो वनस्पतिर्धीनामन्तः सबर्दुघः । हिन्वानो मानुषा युगा ॥७ ॥
अभि प्रिया दिवस्पदा सोमो हिन्वानो अर्षति । विप्रस्य धारया कविः ॥८ ॥
आ पवमान धारय रयिं सहस्रवर्चसम् । अस्मे इन्दो स्वाभुवम् ॥९ ॥

*somā asṛgramindavaḥ sutā ṛtasya sādane | indrāya madhumattamāḥ ||1 ||*

*abhi viprā anūṣata gāvo vatsaṁ na mātaraḥ । indraṁ somasya pītaye ॥2 ॥*
*madachyutkṣeti sādane sindhorūrmā vipaśchit । somo gaurī adhi śritaḥ ॥3 ॥*
*divo nābhā vichakṣaṇo'vyo vāre mahīyate । somo yaḥ sukratuḥ kaviḥ ॥4 ॥*
*yaḥ somaḥ kalaśeṣvām̐ antaḥ pavitra āhitaḥ । taminduḥ pari ṣasvaje ॥5 ॥*
*pra vāchaminduriṣyati samudrasyādhi viṣṭapi । jinvan kośaṁ madhuśchutam ॥6 ॥*
*nityastotro vanaspatirdhīnāmantaḥ sabardughaḥ । hinvāno mānuṣā yugā ॥7 ॥*
*abhi priyā divaspadā somo hinvāno arṣati । viprasya dhārayā kaviḥ ॥8 ॥*
*ā pavamāna dhāraya rayiṁ sahasravarchasam । asme indo svābhuvam ॥9 ॥*

ऋ. (Rv.) ९.१३.१-९

सोमः पुनानो अर्षति सहस्रधारो अत्यविः । वायोरिन्द्रस्य निष्कृतम् ॥१ ॥
पवमानमवस्यवो विप्रमभि प्र गायत । सुष्वाणं देववीतये ॥२ ॥
पवन्ते वाजसातये सोमाः सहस्रपाजसः । गृणाना देववीतये ॥३ ॥
उत नो वाजसातये पवस्व बृहतीरिषः । द्युमदिन्दो सुवीर्यम् ॥४ ॥
ते नः सहस्रिणं रयिं पवन्तामा सुवीर्यम् । सुवाना देवास इन्दवः ॥५ ॥
अत्या हियाना न हेतृभिरसृग्रं वाजसातये । वि वारमव्यमाशवः ॥६ ॥
वाश्रा अर्षन्तीन्दवोऽभि वत्सं न धेनवः । दधन्विरे गभस्त्योः ॥७ ॥
जुष्ट इन्द्राय मत्सरः पवमान कनिक्रदत् । विश्वा अप द्विषो जहि ॥८ ॥
अपघ्नन्तो अरावणः पवमानाः स्वर्दृशः । योनावृतस्य सीदत ॥९ ॥

*somaḥ punāno arṣati sahasradhāro atyaviḥ । vāyorindrasya niṣkṛtam ॥1 ॥*
*pavamānamavasyavo vipramabhi pra gāyata । suṣvāṇaṁ devavītaye ॥2 ॥*
*pavante vājasātaye somāḥ sahasrapājasaḥ । gṛṇānā devavītaye ॥3 ॥*
*uta no vājasātaye pavasva bṛhatīriṣaḥ । dyumadindo suvīryam ॥4 ॥*
*te naḥ sahasriṇaṁ rayiṁ pavantāmā suvīryam । suvānā devāsa indavaḥ ॥5 ॥*
*atyā hiyānā na hetṛbhirasṛgraṁ vājasātaye । vi vāramavyamāśavaḥ ॥6 ॥*
*vāśrā arṣantīndavo'bhi vatsaṁ na dhenavaḥ । dadhanvire gabhastyoḥ ॥7 ॥*
*juṣṭa indrāya matsaraḥ pavamāna kanikradat । viśvā apa dviṣo jahi ॥8 ॥*
*apaghnanto arāvaṇaḥ pavamānāḥ svardṛśaḥ । yonāvṛtasya sīdata ॥9 ॥*

ऋ. (Rv.) ९.१४.१-८

परि प्रासिष्यदत्कविः सिन्धोरूर्मावधि श्रितः । कारं बिभ्रत् पुरुस्पृहम् ॥१ ॥
गिरा यदी सबन्धवः पंच व्राता अपस्यवः । परिष्कृण्वन्ति धर्णसिम् ॥२ ॥
आदस्य शुष्मिणो रसे विश्वे देवा अमत्सत । यदी गोभिर्वसायते ॥३ ॥
निरिणानो वि धावति जहच्छर्याणि तान्वा । अत्रा सं जिघ्रते युजा ॥४ ॥
नप्तीभिर्यो विवस्वतः शुभ्रो न मामृजे युवा । गाः कृण्वानो न निर्णिजम् ॥५ ॥
अति श्रिती तिरश्चता गव्या जिगात्यण्व्या । वग्नुमियर्ति यं विदे ॥६ ॥
अभि क्षिपः समग्मत मर्जयन्तीरिषस्पतिम् । पृष्ठा गृभ्णत वाजिनः ॥७ ॥
परि दिव्यानि मर्मृशद्विश्वनि सोम पार्थिवा । वसूनि याह्यस्मयुः ॥८ ॥

*pari prāsiṣyadatkaviḥ sindhorūrmāvadhi śritaḥ । kāraṁ bibhrat puruspṛham ॥1 ॥*
*girā yadī sabandhavaḥ paṁcha vrātā apasyavaḥ । pariṣkṛṇvanti dharṇasim ॥2 ॥*
*ādasya śuṣmiṇo rase viśve devā amatsata । yadī gobhirvasāyate ॥3 ॥*
*niriṇāno vi dhāvati jahachchharyāṇi tānvā । atrā saṁ jighrate yujā ॥4 ॥*
*naptībhiryo vivasvataḥ śubhro na māmṛje yuvā । gāḥ kṛṇvāno na nirṇijam ॥5 ॥*
*ati śritī tiraśchatā gavyā jigātyaṇvyā । vagnumiyarti yaṁ vide ॥6 ॥*
*abhi kṣipaḥ samagmata marjayantīriṣaspatim । pṛṣṭhā gṛbhṇata vājinaḥ ॥7 ॥*
*pari divyāni marmṛśadviśvani soma pārthivā । vasūni yāhyasmayuḥ ॥8 ॥*

ऋ. (Rv.) ९.१५.१-८

एष धिया यात्यण्व्या शूरो रथेभिराशुभिः । गच्छन्निन्द्रस्य निष्कृतम् ॥१ ॥
एष पुरू धियायते बृहते देवतातये । यत्रामृतास आसते ॥२ ॥
एष हितो वि नीयतेऽन्तः शुभ्रावता पथा । यदी तुंजन्ति भूर्णयः ॥३ ॥

एष श्रृंगाणि दोधुवच्छिशीते यूथ्यो३ वृषा। नुम्णा दधान ओजसा ॥४॥
एष रुक्मिभिरीयते वाजी शुभ्रेभिरंशुभिः। पतिः सिन्धूनां भवन् ॥५॥
एष वसूनि पिब्दना परुषा ययिवाँ अति। अव शादेषु गच्छति ॥६॥
एतं मृजन्ति मर्ज्यमुप द्रोणेष्वायवः। प्रचक्राणं महीरिषः ॥७॥
एतमु त्यं दश क्षिपो मृजन्ति सप्त धीतयः। स्वायुधं मदिन्तमम् ॥८॥

*eṣa dhiyā yātyaṇvyā śūro rathebhirāśubhiḥ | gachchhannindrasya niṣkṛtam ||1||*
*eṣa purū dhiyāyate bṛhate devatātaye | yatrāmṛtāsa āsate ||2||*
*eṣa hito vi nīyate'ntaḥ śubhrāvatā pathā | yadī tuñjanti bhūrṇayaḥ ||3||*
*eṣa śṛṁgāṇi dodhuvachchhiśīte yūthyo3 vṛṣā | numṇā dadhāna Ojasā ||4||*
*eṣa rukmibhirīyate vājī śubhrebhiraṁśubhiḥ | patiḥ sindhūnāṁ bhavan ||5||*
*eṣa vasūni pibdanā paruṣā yayivāṁ̐ ati | ava śādeṣu gachchhati ||6||*
*etaṁ mṛjanti marjyamupa droṇeṣvāyavaḥ | prachakrāṇaṁ mahīriṣaḥ ||7||*
*etamu tyaṁ daśa kṣipo mṛjanti sapta dhītayaḥ | svāyudhaṁ madintamam ||8||*

ऋ. (Rv.) ९.१६.१-८

प्र ते सोतार ओण्यो३ रसं मदाय घृष्वये। सर्गो न तक्त्येतशः ॥१॥
क्रत्वा दक्षस्य रथ्यमपो वसानमन्धसा। गोषमण्वेषु सश्चिम ॥२॥
अनप्तमप्सु दुष्टरं सोमं पवित्र आ सृज। पुनीहीन्द्राय पातवे ॥३॥
प्र पुनानस्य चेतसा सोमः पवित्रे अर्षति। क्रत्वा सधस्थमासदत् ॥४॥
प्र त्वा नमोभिरिन्दव इन्द्र सोमा असृक्षत। महे भराय कारिणः ॥५॥
पुनानो रूपे अव्यये विश्वा अर्षन्नभि श्रियः। शूरो न गोषु तिष्ठति ॥६॥
दिवो न सानु पिप्युषी धारा सुतस्य वेधसः। वृथा पवित्रे अर्षति ॥७॥
त्वं सोम विपश्चितं तना पुनान आयुषु। अव्यो वारं वि धावसि ॥८॥

*pra te sotāra Oṇyo3 rasaṁ madāya ghṛṣvaye | sargo na taktyetaśaḥ ||1||*
*kratvā dakṣasya rathyamapo vasānamandhasā | goṣamaṇveṣu saśchima ||2||*
*anaptamapsu duṣṭaraṁ somaṁ pavitra ā sṛja | punīhīndrāya pātave ||3||*
*pra punānasya chetasā somaḥ pavitre arṣati | kratvā sadhasthamāsadat ||4||*
*pra tvā namobhirindava indra somā asṛkṣata | mahe bharāya kāriṇaḥ ||5||*
*punāno rūpe avyaye viśvā arpannabhi śriyaḥ | śūro na goṣu tiṣṭhati ||6||*
*divo na sānu pipyuṣī dhārā sutasya vedhasaḥ | vṛthā pavitre arṣati ||7||*
*tvaṁ soma vipaśchitaṁ tanā punāna āyuṣu | avyo vāraṁ vi dhāvasi ||8||*

ऋ. (Rv.) ९.१७.१-८

प्र निम्नेनेव सिन्धवो घ्नन्तो वृत्राणि भूर्णयः। सोमा असृग्रमाशवः ॥१॥
अभि सुवानास इन्दवो वृष्टयः पृथिवीमिव। इन्द्रं सोमासो अक्षरन् ॥२॥
अत्यूर्मिर्मतसरो मदः सोमः पवित्रे अर्षति। विघ्नन् रक्षांसि देवयुः ॥३॥
आ कलशेषु धावति पवित्रे परि षिच्यते। उक्थैर्योषु वर्धते ॥४॥
अति त्री सोम रोचना रोहन्न भ्राजसे दिवम्। इष्णन्त्सूर्यं न चोदयः ॥५॥
अभि विप्रा अनूषत मूर्धन्यास्य कारवः। दधानाश्चक्षसि प्रियम् ॥६॥
तमु त्वा वाजिनं नरो धीभिर्विप्रा अवस्यवः। मृजन्ति देवतातये ॥७॥
मधोधारामनु क्षर तीव्रः सधस्थमामदः। चारुऋताय पीतये ॥८॥

*pra nimneneva sindhavo ghnanto vṛtrāṇi bhūrṇayaḥ | somā asṛgramāśavaḥ ||1||*
*abhi suvānāsa indavo vṛṣṭayaḥ pṛthivīmiva | indraṁ somāso akṣaran ||2||*
*atyūrmirmatasaro madaḥ somaḥ pavitre arṣati | vighnan rakṣāṁsi devayuḥ ||3||*
*ā kalaśeṣu dhāvati pavitre pari ṣichyate | ukthairyoṣu vardhate ||4||*
*ati trī soma rochanā rohanna bhrājase divam | iṣṇantsūrya na chodayaḥ ||5||*
*abhi viprā anūṣata mūrdhanyāsya kāravaḥ | dadhānāśchakṣasi priyam ||6||*
*tamu tvā vājinaṁ naro dhībhirviprā avasyavaḥ | mṛjanti devatātaye ||7||*
*madhodhārāmanu kṣara tīvraḥ sadhasthamāmadaḥ | chāruṛtāya pītaye ||8||*

ऋ. (Rv.) ९.१८.१-७

परि सुवानो गिरिष्ठाः पवित्रे सोमो अक्षाः। मदेषु सर्वधा असि ॥१॥
त्वं विप्रस्त्वं कविर्मधु प्र जातमन्धसः। मदेषु सर्वधा असि ॥२॥
तव विश्वे सजोषसो देवासः पीतिमाशत। मदेषु सर्वधा असि ॥३॥
आ यो विश्वानि वार्या वसूनि हस्तयोर्दधे। मदेषु सर्वधा असि ॥४॥
य इमे रोदसी मही सं मातरेव दोहते। मदेषु सर्वधा असि ॥५॥
परि यो रोदसी उभे सद्यो वाजेभिर्षति। मदेषु सर्वधा असि ॥६॥
स शुष्मी कलशेष्वा पुनानो अचिक्रदत्। मदेषु सर्वधा असि ॥७॥

*pari suvāno giriṣṭhāḥ pavitre somo akṣāḥ | madeṣu sarvadhā asi ||1 ||*
*tvaṁ viprastvaṁ kavirmadhu pra jātamandhasaḥ | madeṣu sarvadhā asi ||2 ||*
*tava viśve sajoṣaso devāsaḥ pītimāśata | madeṣu sarvadhā asi ||3 ||*
*ā yo viśvani vāryā vasūni hastayordadhe | madeṣu sarvadhā asi ||4 ||*
*ya ime rodasī mahī saṁ mātareva dohate | madeṣu sarvadhā asi ||5 ||*
*pari yo rodasī ubhe sadyo vājebhirṣati | madeṣu sarvadhā asi ||6 ||*
*sa śuṣmī kalaśeṣvā punāno achikradat | madeṣu sarvadhā asi ||7 ||*

ऋ. (Rv.) ९.१९.१-७

यत्सोम चित्रमुक्थ्यं दिव्यं पार्थिवं वसु। तन्नः पुनान आ भर ॥१॥
युवं हि स्थः स्वर्पती इन्द्रश्च सोम गोपती। ईशाना पिप्यतं धियः ॥२॥
वृषा पुनान आयुषु स्तनयन्नधि बर्हिषि। हरिः सन्योनिमासदत् ॥३॥
अवावशन्त धीतयो वृषभस्याधि रेतसि। सूनोर्वत्सस्य मातरः ॥४॥
कुविद्वृषण्यन्तीभ्यः पुनानो गर्भमादधत्। याः शुक्रं दुहते पयः ॥५॥
उप शिक्षापतस्थुषो भियसमा धेहि शत्रुषु। पवमान विदाा रयिम् ॥६॥
नि शत्रोः सोम वृष्ण्यं नि शुष्मं नि वयस्तिर। दूरे वा सतो अन्ति वा ॥७॥

*yatsoma chitramukthyaṁ divyaṁ pārthivaṁ vasu | tannaḥ punāna ā bhara ||1 ||*
*yuvaṁ hi sthaḥ svarpatī indraścha soma gopatī | īśānā pipyataṁ dhiyaḥ ||2 ||*
*vṛṣā punāna āyuṣu stanayannadhi barhiṣi | hariḥ sanyonimāsadat ||3 ||*
*avāvaśanta dhītayeā vṛṣabhasyādhi retasi | sūnorvatsasya mātaraḥ ||4 ||*
*kuvidvṛṣaṇyantībhyaḥ punāno garbhamādadhat | yāḥ śukraṁ duhate payaḥ ||5 ||*
*upa śikṣāpatasthuṣo bhiyasamā dhehi śatruṣu | pavamāna vidāā rayim ||6 ||*
*ni śatroḥ soma vṛṣṇyaṁ ni śuṣmaṁ ni vayastira | dūre vā sato anti vā ||7 ||*

ऋ. (Rv.) ९२०.१-७

प्र कविर्देववीतये ऽव्यो वारेभिरर्षति। साह्वान्विश्वा अभि स्पृधः ॥१॥
स हि ष्मा जारितृभ्य आ वाजं गोमन्तमिन्वति। पवमानः सहस्रिणम् ॥२॥
परि विश्वानि चेतसा मृशसे पवसे मती। स नः सोम श्रवो विदः ॥३॥
अभ्यर्ष बृहद्यशो मघवद्भ्यो ध्रुवं रयिम्। इषं स्तोतृभ्य आ भर ॥४॥
त्वं राजेव सुव्रतो गिरः सोमा विवेशिथ। पुनानो वह्ने अद्भुत ॥५॥
स वह्निरप्सु दुष्टरो मृज्यमानो गभस्त्योः। सोमश्चमूषु सीदति ॥६॥
क्रीळर्मखो न मंहयुः पवित्रं सोम गच्छसि। दधत्सतोत्रे सुवीर्यम् ॥७॥

*pra kavirdevavītaye 'vyo vārebhirarṣati | sāhnānviśvā abhi spṛdhaḥ ||1 ||*
*sa hi ṣmā jāritṛbhya ā vājaṁ gomantaminvati | pavamānaḥ sahasriṇam ||2 ||*
*pari viśvani chetasā mṛśase pavase matī | sa naḥ soma śravo vidaḥ ||3 ||*
*abhyarṣa bṛhadyaśo maghavadbhyo dhruvaṁ rayim | iṣaṁ stotṛbhya ā bhara ||4 ||*
*tvaṁ rājeva suvrato giraḥ somā viveśitha | punāno vahne adbhuta ||5 ||*
*sa vahnirapsu duṣṭaro mṛjyamāno gabhastyoḥ | somaśchamūṣu sīdati ||6 ||*
*krīḻarmakho na maṁhayuḥ pavitraṁ soma gachchhasi | dadhatsatotre suvīryam ||7 ||*

ऋ. (Rv.) ९.२१.१-७

एते धावन्तीन्दवः सोमा इन्द्राय घृष्वयः। मत्सरासः स्वर्विदः ॥१॥

प्रवृण्वन्तो अभियुजः सुष्वये वरिवोविदः। स्वयं स्तोत्रे वयस्कृतः ॥२॥
वृथा क्रीळन्त इन्दवः सधस्थमभ्येकमित्। सिन्धोरूर्मा व्यक्षरन् ॥३॥
एते विश्वानि वार्या पवमानास आशत। हिता न सप्तयो रथे ॥४॥
आस्मिन्पिशंगमिन्दवो दधाता वेनमादिशे। यो अस्मभ्यमरावा ॥५॥
ऋभुर्न रथ्यं नवं दधाता केतमादिशे। शुक्राः पवध्वमर्णसा ॥६॥
एत उ त्ये अवीवशन्काष्ठां वाजिनो अक्रत। सतः प्रसाविषुर्मतिम् ॥७॥

*ete dhāvantīndavaḥ somā indrāya ghṛṣṇyaḥ / matsarāsaḥ svarvidaḥ //1 //*
*pravṛṇvanto abhiyujaḥ susvaye varivovidaḥ / svayaṁ stotre vayaskṛtaḥ //2 //*
*vṛthā krīḻanta indavaḥ sadhasthamabhyekamit / sindhorūrmā vyakṣaran //3 //*
*ete viśvāni vāryā pavamānāsa āśata / hitā na saptayo rathe //4 //*
*āsminpiśaṁgamindavo dadhātā venamādiśe / yo asmabhyamarāvā //5 //*
*ṛbhurna rathyaṁ navaṁ dadhātā ketamādiśe / śukrāḥ pavadhvamarṇasā //6 //*
*eta u tye avīvaśankāṣṭhāṁ vājino akrata / sataḥ prasāviṣurmatim //7 //*

ऋ. (Rv.) ९.२२.१-७

एते सोमास आशवो रथाइव प्र वाजिनः। सर्गाः सृष्टा अहेषत ॥१॥
एते वाताइवारेवः पर्जन्यस्येव वृष्टयः। अग्नेरिव भ्रमा वृथा ॥२॥
एते पूता विपश्चितः सोमासो दध्याशिरः। विपा व्यानशुर्धियः ॥३॥
एते मृष्टा अमर्त्याः ससृवांसो न शश्रमुः। इयक्षन्तः पथो रजः ॥४॥
एते पृष्ठानि रोदसोर्विप्रयन्तो व्यानशुः। उतेदमुत्तमं रजः ॥५॥
तन्तुं तन्वानमुत्तममनु प्रवत आशत। उतेदमुत्तमाय्यम् ॥६॥
त्वं सोम पणिभ्य आ वसु गव्यानि धारयः। ततं तन्तुमचिक्रदः ॥७॥

*ete somāsa āśavo rathāiva pra vājinaḥ / sargāḥ sṛṣṭā aheṣata //1 //*
*ete vātāivārevaḥ parjanyasyeva vṛṣṭayaḥ / agneriva bhramā vṛthā //2 //*
*ete pūtā vipaśchitaḥ somāso dadhyāśiraḥ / vipā vyānaśurdhiyaḥ //3 //*
*ete mṛṣṭā amartyāḥ sasṛvāṁso na śaśramuḥ / iyakṣantaḥ patho rajaḥ //4 //*
*ete pṛṣṭhāni rodasorviprayanto vyānaśuḥ / utedamuttamaṁ rajaḥ //5 //*
*tantuṁ tanvānamuttamamanu pravata āśata / utedamuttamāyyam //6 //*
*tvaṁ soma paṇibhya ā vasu gavyāni dhārayaḥ / tataṁ tantumachikradaḥ //7 //*

ऋ. (Rv.) ९.२३.१-७

सोमा असृग्रमाशवो मधोर्मदस्य धारया। अभि विश्वानि काव्या ॥१॥
अनु प्रत्नास आयवः पदं नवीयो अक्रमुः। रुचे जनन्त सूर्यम् ॥२॥
आ पवमान नो भरार्यो अदाशुषो गयम्। कृधि प्रजावतीरिषः ॥३॥
अभि सोमास आयवः पवन्ते मद्यं मदम्। अभि कोशं मधुश्चुतम् ॥४॥
सोमो अर्षति धर्णसिर्दधान इन्द्रियं रसम्। सुवीरो अभिशस्तिपाः ॥५॥
इन्द्राय सोम पवसे देवेभ्यः सधमाद्यः। इन्द्रो वाजं सिषाससि ॥६॥
अस्य पीत्वा मदानामिन्द्रो वृत्राण्यप्रति। जघान जघनच्च नु ॥७॥

*somā asṛgramāśavo madhormadasya dhārayā / abhi viśvāni kāvyā //1 //*
*anu pratnāsa āyavaḥ padaṁ navīyo akramuḥ / ruche jananta sūryam //2 //*
*ā pavamāna no bharāryo adāśuṣo gayam / kṛdhi prajāvatīriṣaḥ //3 //*
*abhi somāsa āyavaḥ pavante madyaṁ madam / abhi kośaṁ madhuśchutam //4 //*
*somo arṣati dharṇasirdadhāna indriyaṁ rasam / suvīro abhiśastipāḥ //5 //*
*indrāya soma pavase devebhyaḥ sadhamādyaḥ / indro vājaṁ siṣāsasi //6 //*
*asya pītvā madānāmindro vṛtrāṇyaprati / jaghāna jaghanachcha nu //7 //*

ऋ. (Rv.) ९.२४.१-७

प्र सोमासो अधन्विषुः पवमानास इन्दवः। श्रीणाना अप्सु मृंजत ॥१॥
अभि गावो अधन्विषुरापो न प्रवता यतीः। पुनाना इन्द्रमाशत ॥२॥
प्र पवमान धन्वसि सोमेन्द्राय पातवे। नृभिर्यतो वि नीयसे ॥३॥

त्वं सोम नृमादनः पवस्व चर्षणीसहे। सस्निर्यो अनुमाद्यः ॥४॥
इन्दो यदद्रिभिः सुतः पवित्रं परिधावसि। अरमिन्द्रस्य धाम्ने ॥५॥
पवस्व वृत्रहन्तमोक्थेभिरनुमाद्यः। शुचिः पावको अदभुतः ॥६॥
शुचिः पावक उच्यते सोमः सुतस्य मध्वः। देवावीरघशंसहा ॥७॥
*pra somāso adhanviṣuḥ pavamānāsa indavaḥ / śrīṇānā apsu mṛṁjata //1 //*
*abhi gāvo adhanviṣurāpo na pravatā yatīḥ / punānā indramāśata //2 //*
*pra pavamāna dhanvasi somendrāya pātave / nṛbhiryato vi nīyayase //3 //*
*tvaṁ soma nṛmādanaḥ pavasva charṣaṇīsahe / sasniryo anumādyaḥ //4 //*
*indo yadadribhiḥ sutaḥ pavitraṁ paridhāvasi / aramindrasya dhāmne //5 //*
*pavasva vṛtrahantamokthebhiranumādyaḥ / śuchiḥ pāvako adabhutaḥ //6 //*
*śuchiḥ pāvaka uchyate somaḥ sutasya madhvaḥ / devāvīraghaśaṁsahā //7 //*

सा. (Sv.) ४७५

परि स्वानो गिरिष्ठाः पवित्रे सोमो अक्षरत्। मदेषु सर्वधा असि ॥९॥
*pari svāno giriṣṭhāḥ pavitre somo akṣarat / madeṣu sarvadhā asi //9 //*

सा. (Sv.) ४७६

परि प्रिया दिवः कविर्वयांसि नप्त्योर्हितः। स्वानैर्याति कविक्रतु ॥१०॥
*pari priyā divaḥ kavirvayāṁsi naptyorhitaḥ / svānairyāti kavikratu //10 //*

सो.४८५-८६

परि स्वानास इन्दवो मदाय बर्हणा गिरा। मधो अर्षन्ति धारया ॥९॥
परि प्रासिष्यदत्कविः सिन्धोरूर्मावधि श्रितः। कारुं विभ्रत्पुरुस्पृहम् ॥१०॥
*pari svānāsa indavo madāya barhaṇā girā / madho arṣanti dhārayā //9 //*
*pari prāsiṣyadatkaviḥ sindhorūrmāvadhi śritaḥ / kāruṁ vibhratpuruspṛham //10 //*

सो.५०२

अनु प्रत्नास आयवः पदं नवीयो अक्रमुः। रुचे जनन्त सूर्यम् ॥६॥
*anu pratnāsa āyavaḥ padaṁ navīyo akramuḥ / ruche jananta sūryam //6 //*

सो.५०६

मन्द्रया सोम धारया वृषा पवस्व देवयुः। अवया वारेभिरस्मयुः ॥१०॥
*mandrayā soma dhārayā vṛṣā pavasva devayuḥ / avayā vārebhirasmayuḥ //10 //*

सो.६५१-५३

उपास्मै गायता नरः पवमानायेन्दवे। अभि देवाँ इयक्षते ॥१॥
अभि ते मधुना पयोऽथर्वाणो अशिश्रयुः। देवं देवाय देवयु ॥२॥
स नः पवस्व शं गवे शं जनाय शमर्वते। शं राजन्नोषधीभ्यः ॥३॥
*upāsmai gāyatā naraḥ pavamānāyendave / abhi devāṁ̐ iyakṣate //1 //*
*abhi te madhunā payo'tharvāṇo aśiśrayuḥ / devaṁ devāya devayu //2 //*
*sa naḥ pavasva śaṁ gave śaṁ janāya śamarvate / śaṁ rājannoṣadhībhyaḥ //3 //*

सो.७६१

उप शिक्षापतस्थुषो भियसमा धेहि शत्रवे। पवमान विदा रयिम् ॥१॥
*upa śikṣāpatasthuṣo bhiyasamā dhehi śatrave / pavamāna vidā rayim //1 //*

सो.७६३

उपास्मै गायता नरः पवमानायेन्दवे। अभि देवाँ इयक्षते ॥३॥
*upāsmai gāyatā naraḥ pavamānāyendave / abhi devāṁ̐ iyakṣate //3 //*

सो.९३५-९३७

परि प्रिया दिवः कविर्वयांसि नप्त्योर्हितः। स्वानैर्याति कविक्रतुः ॥१॥
स सूनुर्मातरा शुचिर्जातो जाते अरोचयत्। महान्मही ऋतावृधा ॥२॥
प्रप्र क्षयाय पन्यसे जनाय जुष्टो अद्रुहः। वीत्यर्ष पनिष्टये ॥३॥
*pari priyā divaḥ kavirvayāṁsi naptyorhitaḥ / svānairyāti kavikratuḥ //1 //*

*sa sūnurmātarā śuchirjāto jāte arochayat | mahānmahī ṛtāvṛdhā ||2 ||*
*prapra kṣayāya panyase janāya juṣṭo adruhaḥ | vītyarṣa paniṣṭaye ||3 ||*

सा. (Sv.) ९६१-९७४

प्र सोमासो अधन्विषुः पवमानास इन्दवः । श्रीणाना अप्सु वृंजते ॥१॥
अभि गावो अधन्विषुरापो न प्रवता यतीः । पुनाना इन्द्रमाशत ॥२॥
प्र पवमान धन्वसि सोमेन्द्राय मादनः । नृभिर्यतो वि नीयसे ॥३॥
इन्दो यदद्रिभिः सुतः पवित्रं परिदीयसे । अरमिन्द्रस्य धाम्ने ॥४॥
त्वं सोम नृमादनः पवस्व चर्षणीधृतिः । सस्निर्यो अनुमाद्यः ॥५॥
पवस्व वृत्रहन्तम् उक्थेभिरनुमाद्यः । शुचिः पावको अद्भुतः ॥६।
शुचिः पावक उच्यते सोमः सुतः स मधुमान् । देवावीरघशंसहा ॥७॥
प्र कविर्देववीतयेऽव्या वारेभिरव्यत । साह्वान्विश्वा अभि स्पृधः ॥१॥
स हि ष्मा जरितृभ्य आ वाजं गोमन्तमिन्वति । पवमानः सहस्रिणम् ॥२॥
परि विश्वानि चेतसा मृज्यसे पवसे मती । स नः सोम श्रवो विदः ॥३॥
अभ्यर्ष बृहद्यशो मघवद्भ्यो ध्रुवं रयिम् । इषं स्तोतृभ्य आ भर ॥४॥
त्वं राजेव सुव्रतो गिरः सोमा विवेशिथ । पुनानो वह्ने अद्भुत ॥५॥
स वह्निरप्सु दुष्टरो मृज्यमानो गभस्त्योः । सोमश्चमूषु सीदति ॥६॥
क्रीडुर्मखो न मंहयुः पवित्रं सोम गच्छसि । दधत्स्तोत्रे सुवीर्यम् ॥७॥

*pra somāso adhanviṣuḥ pavamānāsa indavaḥ | śrīṇānā apsu vṛṁjate ||1 ||*
*abhi gāvo adhanviṣurāpo na pravatā yatīḥ | punānā indramāśata ||2 ||*
*pra pavamāna dhanvasi somendrāya mādanaḥ | nṛbhiryato vi nīyase ||3 ||*
*indo yadadribhiḥ sutaḥ pavitraṁ paridīyase | aramindrasya dhāmne ||4 ||*
*tvaṁ soma nṛmādanaḥ pavasva charṣaṇīdhṛtiḥ | sasniryo anumādyaḥ ||5 ||*
*pavasva vṛtrahantam ukthebhiranumādyaḥ | śuchiḥ pāvako adbhutaḥ ||6 |*
*śuchiḥ pāvaka uchyate somaḥ sutaḥ sa madhumān | devāvīraghaśaṁsahā ||7 ||*
*pra kavirdevavītaye'vyā vārebhiravyata | sāhnānviśvā abhi spṛdhaḥ ||1 ||*
*sa hi ṣmā jaritṛbhya ā vājaṁ gomantaminvati | pavamānaḥ sahasriṇam ||2 ||*
*pari viśvāni chetasā mṛjyase pavase matī | sa naḥ soma śravo vidaḥ ||3 ||*
*abhyarṣa bṛhadyaśo maghavadbhyo dhruvaṁ rayim | iṣaṁ stotṛbhya ā bhara ||4 ||*
*tvaṁ rājeva suvrato giraḥ somā viveśitha | punāno vahne adbhuta ||5 ||*
*sa vahniśrapsu duṣṭaro mṛjyamāno gabhastyoḥ | somaśchamūṣu sīdati ||6 ||*
*krīḍurmakho na maṁhayuḥ pavitraṁ soma gachchhasi | dadhtstotre suvīryam ||7 ||*

सा. (Sv.) ९९९

यत्सोम चित्रमुक्थ्य दिव्यं पार्थिवं वसु । तन्नः पुनान आ भर ॥१॥

*yatsoma chitramukthya divyaṁ pārthivaṁ vasu | tannaḥ punāna ā bhara ||1 ||*

सा. (Sv.) १०००-१००१

वृषा पुनान आयुंषि स्तनयन्नधि बर्हिषि । हरिः सन्योनिमासदः ॥२॥
युवं हि स्थः स्वः पती इन्द्रश्च सोम गोपती । ईशाना पिप्यतं धियः ॥३॥

*vṛṣā punāna āyuṁṣi stanayannadhi barhiṣi | hariḥ sanyonimāsadaḥ ||2 ||*
*yuvaṁ hi sthaḥ svaḥ patī indraścha soma gopatī | īśānā pipyataṁ dhiyaḥ ||3 ||*

सा. (Sv.) १०९३-१०९५

परि स्वानो गिरिष्ठाः पवित्रे सोमो अक्षरत् । मदेषु सर्वधा असि ॥१॥
त्वं विप्रस्त्वं कविर्मधु प्र जातमन्धसः । मदेषु सर्वधा असि ॥२॥
त्वे विश्वे सजोषसो देवासः पीतिमाशत । मदेषु सर्वधा असि ॥३॥

*pari svāno giriṣṭhāḥ pavitre somo akṣarat | madeṣu sarvadhā asi ||1 ||*
*tvaṁ viprastvaṁ kavimradhu pra jātamandhasaḥ | madeṣu sarvadhā asi ||2 ||*
*tve viśve sajoṣaso devāsaḥ pītimāśata | madeṣu sarvadhā asi ||3 ||*

सा. (Sv.) ११९९-११३६

प्र स्वानासो रथा इवार्वन्तो न अवस्यवः। सोमासो राये अक्रमुः ॥४॥
हिन्वानासो रथा इव दधन्विरे गभस्त्योः। भरासः कारिणामिव ॥५॥
राजानो न प्रशस्तिभिः सोमासो गोभिरंजते। याो न सप्त धातृभिः ॥६॥
परि स्वानास इन्दवो मदाय बर्हणा गिरा। मधो अर्षन्ति धारया ॥७॥
आपानासो विवस्वतो जिन्वन्त उषसो भगम्। सूरा अण्वं वि तन्वते ॥८॥
अप द्वारा मतीनां प्रत्ना ऋण्वन्ति कारवः। वृष्णा हरस आयवः ॥९॥
समीचीनास आशत होतारः सप्तजानयः। पदमेकस्य पिप्रतः ॥१०॥
नाभा नाभिं न आ दधे चक्षुषा सूर्यं दृशे। कवेरपत्यमा दुहे ॥११॥
अभि प्रियं दिवस्पदमध्वर्युभिर्गुहा हितम्। सूरः पश्यति चक्षसा ॥१२॥
असृग्रमिन्दवः पथा धर्मन्नृतस्य सुश्रियः। विदाना अस्य योजना ॥१॥
प्र धारा मधो अग्रियो महीरपो वि गाहते। हविर्हविःषु वन्द्य ॥२॥
प्र युजा वाचो अग्रियो वृषो अचिक्रदद्वने। सद्माभि सत्यो अध्वरः ॥३॥
परि यत्काव्या कविर्नृम्णा पुनानो अर्षति। स्वर्वाजी सिषासति ॥४॥
पवमानो अभि स्पृधो विशो राजेव सीदति। यदीमृण्वन्ति वेधसः ॥५॥
अव्या वारे परि प्रियो हरिर्वनेषु सीदति। रेभो वनुष्यते मती ॥६॥
स वायुमिन्द्रमश्विना साकं मदेन गच्छति। रणा ये अस्य धर्मणा ॥७॥
आ मित्रे वरुणे भगे मधो पवन्त ऊर्मयः। विदाना अस्य शक्मभिः ॥८॥
अस्मभ्यं रोदसी रयिं मध्वो वाजस्य सातये। श्रवो वसूनि सिंजतम् ॥९॥

*pra svānāso rathā ivārvanto na avasyavaḥ । somāso rāye akramuḥ ॥4॥*
*hinvānāseā rathā iva dadhanvire gabhastyoḥ । bharāsaḥ kāriṇāmiva ॥5॥*
*rājāno na praśastibhiḥ somāso gobhiraṁjate । yāo na sapta dhātṛbhiḥ ॥6॥*
*pari svānāsa indavo madāya barhaṇā girā । madho arṣanti dhārayā ॥7॥*
*āpānāso vivasvato jinvanta uṣaso bhagam । sūrā aṇvaṁ vi tanvate ॥8॥*
*apa dvārā matīnāṁ pratnā ṛṇvanti kāravaḥ । vṛṣṇā harasa āyavaḥ ॥9॥*
*samīchīnāsa āśata hotāraḥ saptajānayaḥ । padamekasya pipratah ॥10॥*
*nābhā nābhiṁ na ā dadhe chakṣuṣā sūrya dṛśe । kaverapatyamā duhe ॥11॥*
*abhi priyaṁ divaspadamadhvaryubhirguhā hitam । sūraḥ paśyati chakṣasā ॥12॥*
*asṛgramindavaḥ pathā dharmannṛtasya suśriyaḥ । vidānā asya yojanā ॥1॥*
*pra dhārā madho agriyo mahīrapo vi gāhate । havirhaviḥṣu vandya ॥2॥*
*pra yujā vācho agriyo vṛṣo achikradadvane । sadmābhi satyo adhvaraḥ ॥3॥*
*pari yatkāvyā kavirnṛmṇā punāno arṣati । svarvājī siṣāsati ॥4॥*
*pavamāno abhi spṛdho viśo rājeva sīdati । yadīmṛṇvanti vedhasaḥ ॥5॥*
*avyā vāre pari priyo harirvaneṣu sīdati । rebho vanuṣyate matī ॥6॥*
*sa vāyumindramaśvinā sākaṁ madena gachchhati । raṇā yeā asya dharmaṇā ॥7॥*
*ā mitre varuṇe bhage madho pavanta ūrmayaḥ । vidānā asya śakmabhiḥ ॥8॥*
*asmabhyaṁ rodasī rayiṁ madhvo vājasya sātaye । śravo vasūni siṁjatam ॥9॥*

सा. (Sv.) ११७८-१२०४

एते सोमा अभि प्रियमिन्द्रस्य काममक्षरन्। वर्धन्तो अस्य वीर्यम् ॥१॥
पुनानासश्चमूषदो गच्छन्तो वायु मश्विना। ते नो धत्त सुवीर्यम् ॥२॥
इन्द्रस्य सोम राधसे पुनानो हार्दि चोदय। देवानां योनिमासदम् ॥३॥
मृजन्ति त्वा दश क्षिपो हिन्वन्ति सप्त धीतयः। अनु विप्रा अमादिषुः ॥४॥
देवेभ्यस्त्वा मदाय कं सृजानमति मेष्यः। सं गोभिर्वासयामसि ॥५॥
पुनानः कलशेष्वा वस्त्राण्यरुषो हरिः। परि गव्यान्यव्यत ॥६॥
मघोन आ पवस्व नो जाहि विश्वा अप द्विषः। इन्दो सखायमा विश ॥७॥
नृचक्षसं त्वा वयमिन्द्रपीतं स्वर्विदम्। भक्षीमहि प्रजामिषम् ॥८॥
वृष्टिं दिवः परि स्रव द्युम्नं पृथिव्या अधि। सहो नः सोम पृत्सु धाः ॥९॥

सोमः पुनानो अर्षति सहस्रधारो अत्यविः। वायोरिन्द्रस्य निष्कृतम् ॥१॥
पवमानभवस्यवो विप्रमभि प्र गायत। सुष्वाणं देववीतये ॥२॥
पवन्ते वाजसातये सोमाः सहस्रपाजसः। गृणाना देववीतये ॥३॥
उत नो वाजसातये पवस्व बृहतीरिषः। द्युमदिन्दो सुवीर्यम् ॥४॥
अत्या हियाना न हेतृभिरसृग्रं वाजसातये। वि वारमव्यमाशवः ॥५॥
ते नः सहस्रिणं रयिं पवन्तामा सुवीर्यम्। स्वाना देवास इन्दवः ॥६॥
वाश्राा अर्षन्तीन्दवोऽभि वत्सं न मातरः। दधन्विरे गभस्त्योः ॥७॥
जुष्ट इन्द्राय मत्सरः पवमानः कनिक्रदत्। विश्वा अप द्विषो जहि ॥८॥
अपघ्नन्तो अरावणः पवमानाः स्वर्दृशः। योनावृतस्य सीदत ॥९॥
सोमा असृग्रमिन्दवः सुता ऋतस्य धारया। इन्द्राय मधुमत्तमाः ॥१॥
अभि विप्रा अनूषत गावो वत्सं न धेनवः। इन्द्रं सोमस्य पीतये ॥२॥
मदच्युत्क्षेति सादने सिन्धोरूर्मा विपश्चित्। सोमो गौरी अधि श्रितः ॥३॥
दिवो नाभा विचक्षणोऽव्या वारे महीयते। सोमो यः सुक्रतुः कविः ॥४॥
यः सोमः कलशेष्वा अन्तः पवित्र आहितः। तमिन्दुः परि षस्वजे ॥५॥
प्र वाचमिन्दुरिष्यति समुद्रस्याधि विष्टपि। जिन्वन्कोशं मधुश्चुतम् ॥६॥
नित्यस्तोत्रो वनस्पतिर्धेनामन्तः सबर्दुघाम्। हिन्वानो मानुषा युजा ॥७॥
अ पवमान धारया रयिं सहस्रवर्चसम्। अस्मे इन्दो स्वाभुवम् ॥८॥
अभि प्रिया दिवः कविर्विप्रः स धारया सुतः। सोमो हिन्वे परावति ॥९॥

*ete somā abhi priyamindrasya kāmamakṣaran । vardhanto asya vīryam ॥1॥*
*punānāsaśchamūṣado gachchhanto vāyu maśvinā । te no dhatta suvīryam ॥2॥*
*indrasya soma rādhase punāno hārdi chodaya । devānāṁ yonimāsadam ॥3॥*
*mṛjanti tvā daśa kṣipo hinvanti sapta dhītayaḥ । anu viprā amādiṣuḥ ॥4॥*
*devebhyastvā madāya kaṁ sṛjānamati meṣyaḥ । saṁ gobhirvāsayāmasi ॥5॥*
*punānaḥ kalaśeṣvā vastrāṇyaruṣo hariḥ । pari gavyānyavyata ॥6॥*
*maghona ā pavasva no jāhi viśvā apa dviṣaḥ । indo sakhāyamā viśa ॥7॥*
*nṛchakṣasaṁ tvā vayamindrapītaṁ svarvidam । bhakṣīmahi prajāmiṣam ॥8॥*
*vṛṣṭiṁ divaḥ pari srava dyumnaṁ pṛthivyā adhi । saho naḥ soma pṛtsu dhāḥ ॥9॥*
*somaḥ punāno arṣati sahasradhāro atyaviḥ । vāyorindrasya niṣkṛtam ॥1॥*
*pavamānabhavasyavo vipramabhi pra gāyata । suṣvāṇaṁ devavītaye ॥2॥*
*pavante vājasātaye somāḥ sahasrapājasaḥ । gṛṇānā devavītaye ॥3॥*
*uta no vājasātaye pavasva bṛhatīriṣaḥ । dyumadindo suvīryam ॥4॥*
*atyā hiyānā na hetṛbhirasṛgraṁ vājasātaye । vi vāramavyamāśavaḥ ॥5॥*
*te naḥ sahasriṇaṁ rayiṁ pavantāmā suvīryam । svānā devāsa indavaḥ ॥6॥*
*vāśrāā arṣantīndavo'bhi vatsaṁ na mātaraḥ । dadhanvire gabhastyoḥ ॥7॥*
*juṣṭa indrāya matsaraḥ pavamānaḥ kanikradat । viśvā apa dviṣo jahi ॥8॥*
*apaghnanto arāvaṇaḥ pavamānāḥ svardṛśaḥ । yonāvṛtasya sīdata ॥9॥*
*somā asṛgramindavaḥ sutā ṛtasya dhārayā । indrāya madhumattamāḥ ॥1॥*
*abhi viprā anūṣata gāvo vatsaṁ na dhenavaḥ । indraṁ somasya pītaye ॥2॥*
*madachyutkṣeti sādane sindhorūrmā vipaśchit । somo gaurī adhi śritaḥ ॥3॥*
*divo nābhā vichakṣaṇo'vyā vāre mahīyate । somo yaḥ sukratuḥ kaviḥ ॥4॥*
*yaḥ somaḥ kalaśeṣvā antaḥ pavitra āhitaḥ । taminduḥ pari ṣasvaje ॥5॥*
*pra vāchaminduriṣyati samudrasyādhi viṣṭapi । jinvankośaṁ madhuśchutam ॥6॥*
*nityastotro vanaspatirdhenāmantaḥ sabardughām । hinvāno mānuṣā yujā ॥7॥*
*a pavamāna dhārayā rayiṁ sahasravarchasam । asme indo svābhuvam ॥8॥*
*abhi priyā divaḥ kavirvipraḥ sa dhārayā sutaḥ । somo hinve parāvati ॥9॥*

सा. (Sv.) १२६६-१२७३

एष धिया यात्यण्व्या शूरो रथेभिराशुभिः। गच्छन्निन्द्रस्य निष्कृतम् ॥१॥
एष पुरू धियायते बृहते देवतातये। यत्रामृतास आशत ॥२॥

एतं मृजन्ति मर्ज्यमुप द्रोणेष्वायवः। प्रचक्राणं महीरिषः ॥३॥
एष हितो वि नीयतेऽनतः शुन्ध्यावता पथा। यदी तुंजन्ति भूर्णयः ॥४॥
एष रुक्मिभिरीयते वाजी शुभ्रेभिरंशुभिः। पति सिन्धूनां भवन् ॥५॥
एष शृंगाणि दोधवच्छिशीते यूथ्यो३ वृषा। नृम्णा दधान ओजसा ॥६॥
एष वसूनि पिब्दनः परुषा ययिवाँ अति। अव शादेषु गच्छति ॥७॥
एतमुत्यं दश क्षिपो हरिं हिन्वन्ति यातवे। स्वायुधं मदिन्तमम् ॥८॥

*eṣa dhiyā yātyaṇvyā śūro rathebhirāśubhiḥ | gachchhannindrasya niṣkṛtam ||1 ||*
*eṣa purū dhiyāyate bṛhate devatātaye | yatrāmṛtāsa āśata ||2 ||*
*etaṁ mṛjanti marjyamupa droṇeṣvāyavaḥ | prachakrāṇaṁ mahīriṣaḥ ||3 ||*
*eṣa hito vi nīyate'nataḥ śundhyāvatā pathā | yadī tuṁjanti bhūrṇayaḥ ||4 ||*
*eṣa rukmibhirīyate vājī śubhrebhiraṁśubhiḥ | pati sindhūnāṁ bhavan ||5 ||*
*eṣa śṛṁgāṇi dodhavachchhiśīte yūthyo3 vṛṣā | nṛmṇā dadhāna Ojasā ||6 ||*
*eṣa vasūni pibdanaḥ paruṣā yayivām̐ ati | ava śādeṣu gachchhati ||7 ||*
*etamutyaṁ daśa kṣipo hariṁ hinvanti yātave | svāyudhaṁ madintamam ||8 ||*

## ७४. आगस्त्यः - अग्रे द्रष्टव्यम (Āgastyaḥ - Agre Draṣṭavyama)

१. अग्निः (Agniḥ) - य. (Yv.)३.४७; ५.३६; ३७; ४०; ४२; ४३

य. (Yv.)३.४७

अक्रन् कर्म कर्मकृतः सह वाचा मयोभुवा। देवेभ्यः कर्म कृत्वासतं प्रेत सचाभुवः ॥४७॥

*akran karma karmakṛtaḥ saha vāchā mayobhuvā | devebhyaḥ karma kṛtvāsataṁ preta sachābhuvaḥ ||47 ||*

य. (Yv.)५.३६-३७

अग्ने नय सुपथा रायेऽअस्मान्विश्वनि देव वयुनानि विद्वान् ।
युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नमऽउक्तिं विधेम ॥३६॥
अयं नो ऽअग्निर्वरिवस्कृणोत्वयं मृधः पुरऽएतु प्रभिन्दन् ।
अयं वाजांजयतु वाजसातावयंशत्रूंजयतु जर्हृपाणः स्वाहा ॥३७॥

*agne naya supathā rāye'asmānviśvani deva vayunāni vidvān |*
*yuyodhyasmajjuhurāṇameno bhūyiṣṭhāṁ te nama'uktiṁ vidhema ||36 ||*
*ayaṁ no 'agnirvarivaskṛṇotvayaṁ mṛdhaḥ pura'etu prabhindan |*
*ayaṁ vājāṁjayatu vājasātāvayaṁśatrūṁjayatu jarhṛpāṇaḥ svāhā ||37 ||*

य. (Yv.)५.४०

अग्ने व्रतपास्ते व्रतपा या तव तनूर्मय्यभूदेषा सा त्वयि यो मम तनूस्त्वय्यभूदियंसा मयि ।
यथायथं नौ व्रतपते व्रतान्यनु मे दीक्षां दीक्षापतिरमं स्तानु तपस्तपस्पतिः ॥४०॥

*agne vratapāste vratapā yā tava tanūrmayyabhūdeṣā sā tvayi yo mama tanūstvayyabhūdiyaṁsā mayi |*
*yathāyathaṁ nau vratapate vratānyanu me dīkṣāṁ dīkṣāpatiramaṁ stānu tapastapaspatiḥ ||40 ||*

य. (Yv.)५.४२-४३

अत्यन्याँश्ऽअगां नान्याँश्ऽउपागामर्वाक् त्वा परेभ्योऽविंद परोऽवरेभ्यः ।
तं त्वा जुषामहे देव वनस्पते देवयज्यायै देवास्त्वा देवयज्यायै जुषन्तां विष्णवे त्वा।
ओषधे त्रयस्व स्वधिते मैनंहिं सीः ॥४२॥
द्यां मा लोखीरन्तरिक्षं मा हिं सीः पृथिव्या संभव ।
अयंहि त्वा स्वधितिस्तेतिजानः प्रणिनाय महते सौभगाय ।
अतस्त्वं देव वनस्पते शतवल्शो विरोह सहस्रवल्शा वि वयंरुहेम ॥४३॥

*atyanyām̐ś'agāṁ nānyām̐ś'upāgāmarvāk tvā parebhyo'viṁda paro'varebhyaḥ |*
*taṁ tvā juṣāmahe deva vanaspate devayajyāyai devāstvā devayajyāyai juṣantāṁ viṣṇave tvā |*
*Oṣadhe trayasva svadhite mainaṁhiṁ sīḥ ||42 ||*

*dyāṁ mā lokhīrantarikṣaṁ mā hiṁ sīḥ pṛthivyā saṁbhava /*
*ayaṁhi tvā svadhitistetijānaḥ praṇināya mahate saubhagāya /*
*atastvaṁ deva vanaspate śatavalśo viroha sahasravalśā vi vayaṁruhema //43 //*

२. इन्द्रावरुणौ (Indrāvaruṇau) - य. (Yv.)३.४६

मो षू णऽइन्द्रात्र पृत्सु देवैरस्ति हि ष्मा ते शुष्मिन्नवयाः ।
महश्चिद्यस्य मीढुषो यव्या हविष्मतो मरुतो वन्दते गीः ॥४६॥
*mo ṣū ṇa'indrātra pṛnsu devairasti hi ṣmā te śuṣminnavayāḥ /*
*mahaśchidyasya mīḍhuṣo yavyā haviṣmato maruto vandate gīḥ //46 //*

३. विष्णुः (Viṣṇuḥ) - य. (Yv.)५.३८; ४१

य. (Yv.)५.३८

उरु विष्णो विक्रमस्वोरु क्षयाय नस्कृधि। घृतं घृतयोने पिब प्रप्र यापतिं तिर स्वाहा ॥३८॥
*uru viṣṇo vikramasvoru kṣayāya naskṛdhi / ghṛtaṁ ghṛtayone piba prapra yāpatiṁ tira svāhā //38 //*

य. (Yv.)५.४१

उरु विष्णो विक्रमस्वोरु क्षयाय नस्कृधि। घृतं घृतयोने पिब प्रप्र यापतिं तिर स्वाहा ॥४१॥
*uru viṣṇo vikramasvoru kṣayāya naskṛdhi / ghṛtaṁ ghṛtayone piba prapra yāpatiṁ tira svāhā //41 //*

४. सविता (Savitā) - य. (Yv.)६.१

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम्। आददे नार्यसीदमहंरक्षसां ग्रीवाऽअपिकृन्तामि। यवोऽसि यवयास्मद्द्वेषो यवयारराती र्दिवे त्वाऽनतरिक्षाय त्वा पृथिव्यै त्वा शुन्धन्ताँल्लोकाः पितृषदनाः पितृषदनमसि ॥१॥
*devasya tvā savituḥ prasave'śvinorbāhubhyāṁ pūṣṇo hastābhyām / ādade nāryasīdamahaṁrakṣasāṁ grīvā'apikṛntāmi / yavo'si yavayāsmaddveṣo yavayārarātī rdive tvā'natarikṣāya tvā pṛthivyai tvā śundhantām̐llokāḥ pitṛṣadanāḥ pitṛṣadanamasi //1 //*

५. सोमसविता रौ (Somasavitā Rau) - य. (Yv.)५.३९

देव सवितरेष ते सोमस्तंरक्षस्व मा त्वा दभन्। एतत्त्वं देव सोम देवो देवाँश्ऽउपागाऽइदमहं मनुष्यान्त्सह रायस्पोषेण स्वाहा निर्वरुणस्य पाशान्मुच्ये ॥३९॥
*deva savitareṣa te somastaṁrakṣasva mā tvā dabhan / etattvaṁ deva soma devo devām̐ś'upāgā'idamahaṁ manuṣyāntsaha rāyaspoṣeṇa svāhā nirvaruṇasya pāśānmuchye //39 //*

**७५. आंगिरसः - द्र.अंगिरसः (Āṁgirasaḥ - See Aṁgirasaḥ)**

**७६. आत्मा (Ātmā)**

१. अग्निर् आत्मा वा (Agnir Ātmā Vā) - ऋ. (Rv.) ३.२६.७

अग्निरस्मि जन्मना जातवेदा घृतं मे चक्षुरमृतं म आसन् ।
अर्कस्त्रिधातू रजसो विमानोऽजस्रो घर्मो हविरस्मि नाम ॥७॥
*agnirasmi janmanā jātavedā ghṛtaṁ me chakṣuramṛtaṁ ma āsan /*
*arkastridhātū rajaso vimāno'jasro gharmo havirasmi nāma //7 //*

२. अन्नम् (Annam) - सा. (Sv.) ५९४

अहमस्मि प्रथमजा ऋतस्य पूर्व देवेभ्यो अमृतस्य नाम ।
यो मा ददाति स स इदेवमावदहमन्नमन्नमदन्तमद्मि ॥४॥
*ahamasmi prathamajā ṛtasya pūrva devebhyo amṛtasya nāma /*
*yo mā dadāti sa sa idevamāvadahamannamannamadantamadmi //4 //*

७७. **आत्रेयः - द्र. अत्रिः (Ātreyaḥ - See Atriḥ)**

७८. **आत्रेयः (साग्री. सास्वा.); वामदेव (सार्षेदी.) (Ātreyaḥ [Ssb. Sas.]; Vāmadeva [Sad.])**

१. विश्वेदेवाः (Viśvedevāḥ) - सा. (Sv.) ४५५

ऊर्जा मित्रो वरुणः पिन्वतेडाः पीवरीमिषं कृणुही न इन्द्र ॥९॥

*ūrjā mitro varuṇaḥ pinvateḍāḥ pīvarīmiṣaṁ kṛṇuhī na indra ॥9॥*

७९. **आथर्वणः दध्यङ् (Ātharvaṇaḥ Dadhyaṅ)**

१. अग्निः (Agniḥ) - य. (Yv.)३६.१; ३७.१५

य. (Yv.)३६.१

ऋचं वाचं प्र पद्ये मनो यजुः प्र पद्ये साम प्राणं प्र पद्ये चक्षुः श्रोत्रं प्र पद्ये ।
वागोजः सहौजो मयि प्राणापानौ ॥१॥

*ṛchaṁ vāchaṁ pra padye mano yajuḥ pra padye sāma prāṇaṁ pra padye chakṣuḥ śrotraṁ pra padye ।*
*vāgojaḥ sahaujo mayi prāṇāpānau ॥1॥*

य. (Yv.)३७.१५

समग्निरग्निना गत सं दैवेन सवित्रा संसूर्ग्येणारोचिष्ट ।
स्वाहा समग्निस्तपसा गत सं दैव्येन सवित्रा संसूर्य्येणारूरुचत ॥१५॥

*samagniragninā gata saṁ daivena savitrā saṁsūrgyeṇārochiṣṭa ।*
*svāhā samagnistapasā gata saṁ daivyena savitrā saṁsūryyeṇārūruchata ॥15॥*

२. आपः (Āpaḥ) - य. (Yv.)३६.१२

शन्नो देवीरभिष्टयऽ आपो भवन्तु पीतये। शंयोरभि स्रवन्तु नः ॥१२॥

*śanno devīrabhiṣṭaya' āpo bhavantu pītaye । śaṁyorabhi sravantu naḥ ॥12॥*

३. इन्द्रः (Indraḥ) - य. (Yv.)३६.७-८

कया त्वं नऽऊत्याभि प्र मन्दसे वृषन्। क्या स्तोतृभ्यऽआ भर ॥७॥
इन्द्रो विश्वस्य राजति। शन्नोऽअस्तु द्विपदे शं चतुष्पदे ॥८॥

*kayā tvaṁ na'ūtyābhi pra mandase vṛṣan । kyā stotṛbhya'ā bhara ॥7॥*
*indro viśvasya rājati । śanno'astu dvipade śaṁ chatuṣpade ॥8॥*

४. ईश्वरः (Īśvaraḥ) - य. (Yv.)३६.१७-१९; २१; २२; ३७.१४; १६; १८

य. (Yv.)३६.१७-१९

द्यौः शान्तिरन्तरिक्षंशन्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः। वनस्पत्यः शान्तिर्विश्वे देवाः शान्तिर्ब्रह्म शान्ति सर्वंशान्तिः शन्तिरेव शान्तिः सा मा शान्तिरेधि ॥१७॥
दृते दृं ह मा मित्रस्य मा चक्षुषा सर्वाणि भूतानि समीक्षन्ताम्।मित्रस्याहं चक्षुषा सर्वाणि भूतानि समीक्षे। मित्रस्य चक्षुषा समीक्षामहे ॥१८॥
दृते दृं ह मा। ज्योक्ते संदृशि जीवयासं ज्योक्ते संदृशि जीव्यासम्॥१९॥

*dyauḥ śāntirantarikṣaṁśantiḥ pṛthivī śāntirāpaḥ śāntiroṣadhayaḥ śāntiḥ । vanaspatyaḥ śāntirviśve devāḥ śāntirbrahma śānti sarvaṁśāntiḥ śantireva śāntiḥ sā mā śāntiredhi ॥17॥*
*dṛte dṛṁ ha mā mitrasya mā chakṣuṣā sarvāṇi bhūtāni samīkṣantām ।mitrasyāhaṁ chakṣuṣā sarvāṇi bhūtāni samīkṣe । mitrasya chakṣuṣā samīkṣāmahe ॥18॥*
*dṛte dṛṁ ha mā । jyokte saṁdṛśi jīvayāsaṁ jyokte saṁdṛśi jīvyāsam ॥19॥*

य. (Yv.)३६.२१-२२

नमस्तेऽअस्तु विद्युते नमस्ते स्तनयित्नवे। नमस्ते भगवन्नस्तु यतः स्वः समीहसे ॥२१॥
यतो यतः समीहसे ततो नोऽअभयं कुरु। शं नः कुरु प्रजाभ्योऽभयं नः पशुभ्यः ॥२२॥

*namaste'astu vidyute namaste stanayitnave । namaste bhagavannastu yataḥ svaḥ samīhase ॥21॥*
*yato yataḥ samīhase tato no'abhayaṁ kuru । śaṁ naḥ kuru prajābhyo'bhayaṁ naḥ*

*paśubhyaḥ //22 //*

य. (Yv.)३७.१४

गर्भो देवानां पिता मतीनां पतिः प्रजानाम।
सं देवो देवेन सवित्रा गत संसूर्य्येण रोचते ॥१४॥

*garbho devānāṁ pitā matīnāṁ patiḥ prajānāma /*
*saṁ devo devena savitrā gata saṁsūryyeṇa rochate //14 //*

य. (Yv.)३७.१६

धर्त्ता दिवो वि भाति तपसस्पृथिव्यां धर्त्ता देवो देवानाम मर्त्यस्तपोजाः ।
वाचमस्मे नि यच्छ देवायुवम् ॥१६॥

*dharttā divo vi bhāti tapasasprthivyāṁ dharttā devo devānāma martyastapojāḥ /*
*vāchamasme ni yachchha devāyuvam //16 //*

य. (Yv.)३७.१८

विश्वासां भुवां पते विश्वम्य मनसस्पते विश्वस्य वचसम्पते सर्वस्य वचसस्पते ।
देवश्रुत्त्वं देव घर्म देवो देवान् पाह्यत्र प्रवीरनु वां देववीतये ।
मधु माध्वीभ्यां मधु माधूचीभ्याम् ॥१८॥

*viśvāsāṁ bhuvāṁ pate viśvamya manasaspate viśvasya vachasampate sarvasya vachasaspate /*
*devaśruttvaṁ deva gharma devo devān pāhyatra pravīranu vāṁ devavītaye /*
*madhu mādhvībhyāṁ madhu mādhūchībhyām //18 //*

५. द्यावापृथिवी (Dyāvāpṛthivī) - य. (Yv.)३७.३

देवी द्यावापृथिवी मखस्य वामद्य शिरो राध्यासं देवयजने पृथिव्याः।
मखाय त्वा मखस्य त्वा शीर्ष्णे ॥३॥

*devī dyāvāpṛthivī makhasya vāmadya śiro rādhyāsaṁ devayajane pṛthivyāḥ /*
*makhāya tvā makhasya tvā śīrṣṇe //3 //*

६. पृथिवी (Pṛthivī) - य. (Yv.)३७.१२

अनाधृष्टा पुरस्तादग्नेराधिपत्यऽआयुर्मे दाः। पुत्रवती दक्षिणतऽइन्द्रस्याधिपत्ये प्रजां मे दाः ।
सुषदा पश्चाद्देवस्य सवितुराधिपत्ये चक्षुर्मे दाः। आश्रुतिरुत्तरतो धातुराधिपत्ये रायस्पोषं मे दाः ।
विधृतिरुपारिष्टाद् बृहस्तेराधिपत्यऽओजो मे दाः। विश्वाभ्यो मा नाष्ट्राभ्यस्पाहि मनोरष्वासि ॥१२॥

*anādhṛṣṭā purastādagnerādhipatya'āyurme dāḥ / putravatī dakṣiṇata'indrasyādhipatye prajāṁ me dāḥ /*
*suṣadā paśchāddevasya saviturādhipatye chakṣurme dāḥ / āśrutiruttarato dhāturādhipatye rāyaspoṣaṁ me dāḥ / vidhṛtirupāriṣṭād bṛhasterādhipatya'Ojo me dāḥ / viśvābhyo mā nāṣṭrābhyaspāhi manoraṣvāsi //12 //*

७. बृहस्पतिः (Bṛhaspatiḥ) - य. (Yv.)३६.२

यन्मे छिद्रं चक्षुषो हृदयस्य मनसो वातितृणणां बृहस्पतिर्मे तद्दधातु।
शं नो भवतु भुवनस्य यस्पतिः ॥२॥

*yanme chhidraṁ chakṣuṣo hṛdayasya manaso vātitṛṇaṇāṁ bṛhaspatirme taddadhātu /*
*śaṁ no bhavatu bhuvanasya yaspatiḥ //2 //*

८. मित्रादयो लिंगोक्ताः (Mitrādayo Liṁgoktāḥ) - य. (Yv.)३६.९

शन्नो मित्रः शं वरुणाः शन्नो भवत्वर्य्यमा। शन्नऽइन्द्रो बृहस्पतिः शन्नो विष्णुरु रुक्रमः ॥९॥

*śanno mitraḥ śaṁ varuṇāḥ śanno bhavatvaryyamā / śanna'indro bṛhaspatiḥ śanno viṣṇuru rukramaḥ //9 //*

९. याः (Yāḥ) - य. (Yv.)३७.४-६; ८

य. (Yv.)३७.४-६

देव्यो वम्र्यो भूतस्य प्रथमजा मुखस्य वोऽद्य शिरो राध्यासं देवयजने पृथिव्या ।
मखाय त्वा मखस्य त्वा शीर्ष्णो ॥४॥
इयत्यग्रऽआसीन्मखस्य तेऽद्य शिरो राध्यासं देवयजने पृथिव्याः ।
मखाय त्वा मखस्य त्वा शीर्ष्णो ॥५॥
इन्द्रस्यौजः स्थ मखस्य वोऽद्य शिरो राध्यासं देवयजने पृथिव्याः ।
मखाय त्वा मखय त्वा शीष्णे ।
मखाय त्वा मखस्य त्वा शीर्ष्णे। मखाय त्वा मखस्य त्वा शीर्ष्णे॥६॥

*devyo vamryo bhūtasya prathamajā mukhasya vo'dya śiro rādhyāsaṁ devayajane pṛthivyā ।*
*makhāya tvā makhasya tvā śīrṣṇo ॥4॥*
*iyatyagra'āsīnmakhasya te'dya śiro rādhyāsaṁ devayajane pṛthivyāḥ ।*
*makhāya tvā makhasya tvā śīrṣṇo ॥5॥*
*indrasyaujaḥ stha makhasya vo'dya śiro rādhyāsaṁ devayajane pṛthivyāḥ ।*
*makhāya tvā makhaya tvā śīṣṇe ।*
*makhāya tvā makhasya tvā śīrṣṇe । makhāya tvā makhasya tvā śīrṣṇe ॥6॥*

य. (Yv.)३७.८

मखस्य शिरोऽसि मखाय त्वा मखस्य त्वा शीर्ष्णो मखस्य शिरोऽसि मखाय त्वा मखस्य त्वा शीर्ष्णे। मखस्य शिरोऽसि मखाय त्वा मखस्य त्वा शीर्ष्णे। मखाय त्वा मखस्य त्वा शीर्ष्णो। मखाय त्वा मखस्य त्वा शीष्णे। मखाय त्वा मखस्य त्वाा शीर्ष्णे ॥८॥

*makhasya śiro'si makhāya tvā makhasya tvā śīrṣṇo makhasya śiro'si makhāya tvā makhasya tvā śīrṣṇe । makhasya śiro'si makhāya tvā makhasya tvā śīrṣṇe । makhāya tvā makhasya tvā śīrṣṇo । makhāya tvā makhasya tvā śīṣṇe । makhāya tvā makhasya tvāā śīrṣṇe ॥8॥*

१०. लिंगोक्ताः (Liṁgoktāḥ) - य. (Yv.)३६.११

अहानि शं भवन्तु नः शंरात्रीः प्रति धीयताम्। शन्नऽइन्द्राग्नी भवतामवोभिः शन्नऽइन्द्रावरुणा रातहव्या। शन्नऽइन्द्रापूषणा वाजसातौ शमिन्द्रासोमा सुविताय शंयोः ॥११॥

*ahāni śaṁ bhavantu naḥ śaṁrātrīḥ prati dhīyatām । śanna'indrāgnī bhavatāmavobhiḥ śanna'indrāvaruṇā rātahavyā । śanna'indrāpūṣaṇā vājasātau śamindrāsomā suvitāya śaṁyoḥ ॥11॥*

११. वातादयः (Vātādayaḥ) - य. (Yv.)३६.१०

शन्नो वातः पवतांशन्नस्तपतु सूर्य्यः। शन्नः कनिक्रदद्देवः पर्जन्योऽअभि वर्षतु ॥१०॥

*śanno vātaḥ pavatāṁśannastapatu sūryyaḥ । śannaḥ kanikradaddevaḥ parjanyo'abhi varṣatu ॥10॥*

१२. विद्वान् (Vidvān) - य. (Yv.)३७.९; १३

य. (Yv.)३७.९

अश्वस्य त्वा वृष्णः शक्रा धूपयामि देवयजने पृथिव्याः। मखाय त्वा मखस्य त्वा शीर्ष्णे। अश्वम्य त्वा वृष्णाः शक्रा धूपयामि देवयजने पृथिव्याः। मखाय त्वा मखस्य त्वा शीर्ष्णे। अश्वस्य त्वा वृष्णः शक्रा धूपयामि देवयजने पृथिव्याः। मखाय त्वा मखस्य त्वा शीर्ष्णे। मखाय
त्वा मखस्य त्वा शीर्ष्णे। मखाय त्वा मखस्य त्वा शीर्ष्णे। मखाय त्वा मखस्य त्वा शीर्ष्णे ।९॥

*aśvasya tvā vṛṣṇaḥ śakrā dhūpayāmi devayajane pṛthivyāḥ । makhāya tvā makhasya tvā śīrṣṇe । aśvamya tvā vṛṣṇāḥ śakrā dhūpayāmi devayajane pṛthivyāḥ । makhāya tvā makhasya tvā śīrṣṇe । aśvasya tvā vṛṣṇaḥ śakrā dhūpayāmi devayajane pṛthivyāḥ । makhāya tvā makhasya tvā śīrṣṇe । makhāya*
*tvā makhasya tvā śīrṣṇe । makhāya tvā makhasya tvā śīrṣṇe । makhāya tvā makhasya*

*tvā śīrṣṇe /9 //*

य. (Yv.)३७.१३

स्वाहा मरुद्भिः परि श्रीयस्व दिवः संस्पृशस्पाहि। मधु मधु मधु ॥१३॥

*svāhā marudbhiḥ pari śrīyasva divaḥ saṁspṛśaspāhi / madhu madhu madhu //13 //*

१३. विद्वांसः (Vidvāṁsaḥ) - य. (Yv.)३७.१०

ऋजवे त्वा साधवे त्वा सुक्षित्यै त्वा। मखाय त्वा मखस्य त्वा शीर्ष्णे ।

मखाय त्वा मखस्य त्वा शीर्ष्णे। मखाय त्वा मखस्य त्वा शीर्ष्णे ॥१०॥

*ṛjave tvā sādhave tvā sukṣityai tvā / makhāya tvā makhasya tvā śīrṣṇe /*

*makhāya tvā makhasya tvā śīrṣṇe / makhāya tvā makhasya tvā śīrṣṇe //10 //*

१४. सविता (Savitā) - य. (Yv.)३७.११

यमाय त्वा मखाय त्वा सूर्य्यस्य त्वा तपसे ।

देवस्त्वा सविता मध्वानक्तु पृथिव्याः संस्पृशस्पाहि। अर्चिरसि शोचिरसि तपोऽसि ॥११॥

*yamāya tvā makhāya tvā sūryyamya tvā tapase /*

*devastvā savitā madhvānakru pṛthivyāḥ saṁspṛśampāhi / archirasi śochirasi tapo'si //11 //*

१५. सूर्यः (Sūryaḥ) - य. (Yv.)३६.२४

तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत्। पश्येम शरदः शतं जीवेम शरदः शतंशृणुयाम शरदः शतं प्र ब्रवाम शरदः शतमदीना स्याम शग्दः शतं भूयश्च शग्दः शतात् ॥२४॥

*tachchakṣurdevahitaṁ purastāchchhukramuchcharat / paśyema śaradaḥ śataṁ jīvema śaradaḥ śataṁśṛṇuyāma śaradaḥ śataṁ pra bravāma śaradaḥ śatamadīnā syāma śagdaḥ śataṁ bhūyaścha śagdaḥ śatāt //24 //*

१६. सोमः (Somaḥ) - य. (Yv.)३६.२३

सुमित्रिया नऽआपऽओषधयः सन्तु दुर्मित्रियास्तस्मै सन्तु । योऽस्मान् द्वेष्टि यं च वयं द्विष्मः ॥२३।

*sumitriyā na'āpa'Oṣadhayaḥ santu durmitriyāstasmai santu / yo'smān dveṣṭi yaṁ cha vayaṁ dviṣmaḥ //23 /*

## ८०. आदित्या देवाः (Ādityā devāḥ)

१. अग्निः (Agniḥ) - य. (Yv.)३५.१६

अग्नऽआयूं षि पवसऽआ सुवोर्जमिषं च नः। आरे बाधस्व दुच्छुनाम् ॥१६॥

*agna'āyūṁ ṣi pavasa'ā suvorjamiṣaṁ cha naḥ / āre bādhasva duchchhunām //16 //*

२. आपः (Āpaḥ) - य. (Yv.)३५.१२

सुमित्रिया नऽआपऽओषधयः सन्तु दुर्मित्रियास्तस्मै सन्तु योऽस्मान् द्वेष्टि यं च वयं द्विषमः ॥१२॥

*sumitriyā na'āpa'Oṣadhayaḥ santu durmitriyāstasmai santu yo'smān dveṣṭi yaṁ cha vayaṁ dviṣamaḥ //12 //*

३. कृषिबलाः (Kṛṣibalāḥ) - य. (Yv.)३५.१३

अनड्वाहमन्वारभमहे सौरभेयंस्वस्तये। स नऽ इन्द्रऽ इव देवेभ्यो वह्निः सन्तरणो भव ॥१३॥

*anaḍvāhamanvārabhamahe saurabheyaṁsvastaye / sa na' indra' iva devebhyo vahniḥ santaraṇo bhava //13 //*

४. जातवेदा (Jātavedā) - य. (Yv.)३५.२०

वह वपां जातवेदः पितृभ्यो यत्रैनान्वेत्थ निहितान् पराके ।

मेदसः कुल्याऽउप तान्त्स्रवन्तु सत्याऽ एषामाशिषः स नमन्तांस्वाहा ॥२०॥

*vaha vapāṁ jātavedaḥ pitṛbhyo yatrainānvettha nihitān parāke /*

*medasaḥ kulyā'upa tāntsravantu satyā' eṣāmāśiṣaḥ sa namantāṁsvāhā //20 //*

५. प्रजापतिः (Prajāpatiḥ) - य. (Yv.)३५.६

प्रजापतौ त्वा देवतायामुपोदके लोके निदधाम्यसौ। अप नः शोशुचदघम् ॥६॥

*prajāpatau tvā devatāyāmupodake loke nidadhāmyasau / apa naḥ śośuchadagham*

*//6 //*

६. विश्वेदेवाः (Viśvedevāḥ) - य. (Yv.)३५.९

कल्पन्तां ते दिशम्तुभ्यमापः शिवतमास्तुभ्यं भवन्तु सिन्धवः ।
अन्तरिक्षंशिवं तुभ्यं कल्पन्तां ते दिशः सर्वाः ॥९॥
*kalpantāṁ te diśamtubhyamāpaḥ śivatamāstubhyaṁ bhavantu sindhavaḥ /*
*antarikṣaṁśivaṁ tubhyaṁ kalpantāṁ te diśaḥ sarvāḥ //9 //*

७. सविता (Savitā) - य. (Yv.) ३५.२

सविता ते शरीरेभ्यः पृथिव्यां लोकमिच्छतु। तस्मै युजयन्तामुस्रियाः ॥२॥
*savitā te śarīrebhyaḥ pṛthivyāṁ lokamichchhatu / tasmai yujayantāmusriyāḥ //2 //*

८. सूर्यः (Sūryaḥ) - य. (Yv.) ३५.१४

उद्वयं तमसस्परि स्वृः पश्यन्तऽउत्तरम्। देवं देवत्रा सूर्य्यमगन्म ज्योतिरुत्तमम् ॥१४॥
*udvayaṁ tamasaspari svṝḥ paśyanta'uttaram / devaṁ devatrā sūryyamaganma jyotiruttamam //14 //*

## ८१. आदित्या देवा वा (Ādityā Devā Vā)

१. पितरः (Pitaraḥ) - य. (Yv.)३५.१

अपेतो यन्तु पणयोऽसुम्ना देवपीयवः। अस्यलोकः सुतावतः ।
द्युभिरहोभिरक्तुभिर्व्यक्तं यमो ददात्ववसानमस्मै ॥१॥
*apeto yantu paṇayo'sumnā devapīyavaḥ / asyalokaḥ sutāvataḥ /*
*dyubhirahobhiraktubhirvyaktaṁ yamo dadātvavasānamasmai //1 //*

श्. वायु सविता रौ (Vāyu Savitā Rau) - य. (Yv.)३५.५

सविता ते शरीराणि मातुरुरुपस्थऽआ वपतु। तस्मै पृथिवी शं भव ॥५॥
*savitā te śarīrāṇi mātururupastha'ā vapatu / tasmai pṛthivī śaṁ bhava //5 //*

३. विश्वेदेवाः (Viśvedevāḥ) - य. (Yv.)३५.८

शं वातः शंहि ते घृणिः शं ते भवन्त्विष्टकाः ।
शं ते भवन्त्वग्नयः पार्थिवासो मा त्वामि शूशुचन् ॥८॥
*śaṁ vātaḥ śaṁhi te ghṛṇiḥ śaṁ te bhavantviṣṭakāḥ /*
*śaṁ te bhavantvagnayaḥ pārthivāso mā tvāmi śūśuchan //8 //*

४. सविता (Savitā) - य. (Yv.)३५.३

वायुः पुनातु सविता पुनाव्वग्नर्भ्राजसा सूर्य्यस्य वर्चसा। वि मुच्यन्तामुस्रियाः ॥३॥
*vāyuḥ punātu savitā punāvvagnarbhrājasā sūryyasya varchasā / vi muchyantāmusriyāḥ //3 //*

## ८२. आप्त्यस्त्रितः अंगिरसः कुत्सो वा (Āptyastritaḥ Aṁgirasaḥ Kutso Vā)

१. विश्वेदेवाः (Viśvedevāḥ) - ऋ. (Rv.) १.१०५.१-१९

चन्द्रमा अप्स्व१न्तरा सुपर्णो धावते दिवि ।
न वो हिरण्यनेमयः पदं विन्दन्ति वित्तं मे अस्य रोदसी ॥१॥
अर्थमिद्वा उ अर्थिन आ जाया युवते पतिम् ।
तुंजाते वृष्ण्यं पयः परिदाय रसं दुहे वित्तं मे अस्य रोदसी ॥२॥
मो षु देवा अदः स्व१रव पादि दिवस्परि ।
मा सोम्यस्य शंभुवः शूने भूम कदा चन वित्तं मे अस्य रोदसी ॥३॥
यां पृच्छाम्यवमं स तद्दूतो वि वोचति ।
क्व ऋतं पूर्व्य गतं कस्तद्बिभर्ति नूतनो वित्तं मे अस्य रोदसी ॥४॥
अमी ये देवाः स्थन त्रिष्वा रोचने दिवः ।
कद्व ऋतं कदनृतं क्व प्रत्ना व आहुतिर्वित्तं मे अस्य रोदसी ॥५॥
कद्व ऋतस्य धर्णसि कद्वरुणस्य चक्षणम् ।

कदर्यम्णो महस्पथाति क्रामेम दूढ्यो वित्तं मे अस्य रोदसी ॥६॥
अहं सो अस्मिः पुरा सुते वदामि कानि चित् ।
तं मा व्यन्त्याध्यो३ वृको न तृष्णजं मृगं वित्तं मे अस्य रोदसी ॥७॥
सं मा तपन्त्यभितः सपत्नीरिव पर्शवः ।
मूषो न शिश्ना व्यदन्ति माध्यः स्तोतारं ते शतक्रतो वित्तं मे अस्य रोदसी ॥८॥
अमी ये सप्त रश्मयस्तत्रा मे नाभिराता ।
त्रितस्तद्वेदाप्त्यः स जामित्वाय रेभति वित्तं मे अस्य रोदसी ॥९॥
अमी ये पंचोक्षणो मध्ये तस्थुर्महो दिवः ।
देवत्रा नु प्रवाच्यं सध्रीचीना नि वावृतुर्वित्तं मे अस्य रोदसी ॥१०॥
सुपर्णा एत आसते मध्य आरोधने दिवः ।
ते सेधन्ति पथो वृकं तरन्तं यह्वतीरपो वित्तं मे अस्य रोदसी ॥११॥
नव्यं तदुक्थ्यं हितं देवासः सुप्रवाचनम् ।
ऋतमर्षन्ति सिन्धवः सत्यं ततान सूर्यो वित्तं मे अस्य रोदसी ॥१२॥
अग्ने तव त्यदुक्थ्यं देवेष्वस्त्याप्यम् ।
स नः सत्तो मनुष्वदा देवान्यक्षि विदुष्टरो वित्ते मे अस्य रोदसी ॥१३॥
सत्तो होता मनुष्वदा देवाँ अच्छा विदुष्टरः ।
अग्निर्हव्या सुषूदति देवो देवेषु मेधिरो वित्तं मे अस्य रोदसी ॥१४॥
ब्रह्मा कृणोति वरुणो गातुविदं तमीमहे ।
व्यूर्णोति हृदा मतिं नव्यो जायतामृतं वित्तं मे अस्य रोदसी ॥१५॥
असौ यः पन्था आदित्यो दिवि प्रवाच्यं कृतः ।
न स देवा अतिक्रमे तं मर्तासो न पश्यथ वित्तं मे अस्य रोदसी ॥१६॥
त्रितः कूपेऽवहितो देवान्हवत ऊतये ।
तच्छुश्राव बृहस्पतिः कृण्वन्नंहूरणादुरु वित्तं मे अस्य रोदसी ॥१७॥
अरुणो मा सकृद्वृकः पथा यन्तं ददर्श हि ।
उज्जिहीते निचाय्या तष्टेव पृष्ट्यामयी वित्तं मे अस्य रोदसी ॥१८॥
एनांगूषेण वयमिन्द्रवन्तोऽभि ष्याम वृजने सर्ववीराः ।
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥१९॥

*chandramā apsva1ntarā suparṇo dhāvate divi ।*
*na vo hiraṇyanemayaḥ padaṁ vindanti vittaṁ me asya rodasī ॥1॥*
*arthamidvā u arthina ā jāyā yuvate patim ।*
*tuṁjāte vṛṣṇyaṁ payaḥ paridāya rasaṁ duhe vittaṁ me asya rodasī ॥2॥*
*mo ṣu devā adaḥ sva1rava pādi divaspari ।*
*mā somyasya śaṁbhuvaḥ śūne bhūma kadā chana vittaṁ me asya rodasī ॥3॥*
*yāṁ pṛchchhāmyavamaṁ sa taddūto vi vochati ।*
*kva ṛtaṁ pūrvya gataṁ kastadbibharti nūtano vittaṁ me asya rodasī ॥4॥*
*amī ye devāḥ sthana triṣvā rochane divaḥ ।*
*kadva ṛtaṁ kadanṛtaṁ kva pratnā va āhutirvittaṁ me asya rodasī ॥5॥*
*kadva ṛtasya dharṇasi kadvaruṇasya chakṣaṇam ।*
*kadaryamṇo mahaspathāti krāmema dūḍhyo vittaṁ me asya rodasī ॥6॥*
*ahaṁ so asmiḥ purā sute vadāmi kāni chit ।*
*taṁ mā vyantyādhyo3 vṛko na tṛṣṇajaṁ mṛgaṁ vittaṁ me asya rodasī ॥7॥*
*saṁ mā tapantyabhitaḥ sapatnīriva parśavaḥ ।*
*mūṣo na śiśnā vyadanti mādhyaḥ stotāraṁ te śatakrato vittaṁ me asya rodasī ॥8॥*
*amī ye sapta raśmayastatrā me nābhirātatā ।*
*tritastadvedāptyaḥ sa jāmitvāya rebhati vittaṁ me asya rodasī ॥9॥*
*amī ye paṁchokṣaṇo madhye tasthurmaho divaḥ ।*
*devatrā nu pravāchyaṁ sadhrīchīnā ni vāvṛturvittaṁ me asya rodasī ॥10॥*
*suparṇā eta āsate madhya ārodhane divaḥ ।*

*te sedhanti patho vṛkaṁ tarantaṁ yahnatīrapo vittaṁ me asya rodasī //11 //*
*navyaṁ tadukthyaṁ hitaṁ devāsaḥ supravāchanam /*
*ṛtamarṣanti sindhavaḥ satyaṁ tatāna sūryo vittaṁ me asya rodasī //12 //*
*agne tava tyadukthyaṁ deveṣvastyāpyam /*
*sa naḥ satto manuṣvadā devānyakṣi viduṣṭaro vitte me asya rodasī //13 //*
*satto hotā manuṣvadā devāṁ achchhā viduṣṭaraḥ /*
*agnirhavyā suṣūdati devo deveṣu medhiro vittaṁ me asya rodasī //14 //*
*brahmā kṛṇoti varuṇo gātuvidaṁ tamīmahe /*
*vyūrṇoti hṛdā matiṁ navyo jāyatāmṛtaṁ vittaṁ me asya rodasī //15 //*
*asau yaḥ panthā ādityo divi pravāchyaṁ kṛtaḥ /*
*na sa devā atikrame taṁ martāso na paśyatha vittaṁ me asya rodasī //16 //*
*tritaḥ kūpe'vahito devānhavata ūtaye /*
*tachchhuśrāva bṛhaspatiḥ kṛṇvannaṁhūraṇāduru vittaṁ me asya rodasī //17 //*
*aruṇo mā sakṛdvṛkaḥ pathā yantaṁ dadarśa hi /*
*ujjihīte nichāyyā taṣṭeva pṛṣṭyāmayī vittaṁ me asya rodasī //18 //*
*enāṁgūṣeṇa vayamindravanto'bhi ṣyāma vṛjane sarvavīrāḥ /*
*tanno mitro varuṇo māmahantāmaditiḥ sindhuḥ pṛthivī uta dyauḥ //19 //*

## ८३. आभूतिः (Ābhūtiḥ)

### १. इन्द्रः (Indraḥ) - य. (Yv.)१९.६-७

कुविदंग यवमन्तो यवं चिद्यथा दान्त्यनुपूर्व वियुय। इहेहैषां कृणुहि भेजनानि ये बर्हिषो नामऽउक्रिं यजन्ति। उपयामगृहीतोऽस्यश्विभ्यां त्वा सरस्वत्यै त्वेन्द्राय त्वा सुत्राम्णाऽएष ते योनिस्तेजसे त्वा वीर्याय त्वा बलाय त्वा ॥६॥
नाना हि वां देवहितंसदस्कृतं मा संसृक्षाथां परमे व्योमन् ।
सुरा त्वमसि शुष्मिणी सोमऽएष मा मा हिं सीः स्वां योनिमाविशन्ती ॥७॥

*kuvidaṁga yavamanto yavaṁ chidyathā dāntyanupūrva viyuya / ihehaiṣāṁ kṛṇuhi bhejanāni ye barhiṣo nāma'ukriṁ yajanti / upayāmagṛhīto'syaśvibhyāṁ tvā sarasvatyai tvendrāya tvā sutrāmṇā'eṣa te yonistejase tvā vīryāya tvā balāya tvā //6 //*
*nānā hi vāṁ devahitaṁsadaskṛtaṁ mā saṁsṛkṣāthāṁ parame vyoman /*
*surā tvamasi śuṣmiṇī soma'eṣa mā mā hiṁ sīḥ svāṁ yonimāviśantī //7 //*

### २. सोमः (Somaḥ) - य. (Yv.)१९.४-५; ८-९

य. (Yv.)१९.४-५

पुनाति ते परिस्रुतंसोमंसूर्य्यस्य दुहिता। वारेण शश्वता तना॥४॥
ब्रह्म क्षत्रं पवते तेजऽइन्द्रियंसुरया सोमः सुतऽ आसुतो मदाय ।
शुक्रोण देव देवताः पिपृग्धि रसेनान्नं यजमानाय धेहि॥५॥

*punāti te parisrutaṁsomaṁsūryyasya duhitā / vāreṇa śaśvatā tanā //4 //*
*brahma kṣatraṁ pavate teja'indriyaṁsurayā somaḥ suta' āsuto madāya /*
*śukroṇa deva devatāḥ pipṛgdhi rasenānnaṁ yajamānāya dhehi //5 //*

य. (Yv.)१९.८-९

उपयामगृहीतोऽस्याश्विनं तेजः सारस्वतं वीर्यमैन्द्रं बलम् ।
एष ते योनिर्मोदाय त्वानन्दाय त्वा महसे त्वा ॥८॥
तेजोऽसि तेजो मयि धेहि वीर्यमसि वीयृ मयि धेहि बलमसि बलं मयि धेह्योजोऽस्योजो मयि धेहि मन्युरसि मन्युं मयि धेहि सहोऽसि सहो मयि धेहि ॥९॥

*upayāmagṛhīto'syāśvinaṁ tejaḥ sārasvataṁ vīryamaindraṁ balam /*
*eṣa te yonirmodāya tvānandāya tvā mahase tvā //8 //*
*tejo'si tejo mayi dhehi vīryamasi vīyṝ mayi dhehi balamasi balaṁ mayi dhehyojo'syojo mayi dhehi manyurasi manyuṁ mayi dhehi saho'si saho mayi dhehi //9 //*

## ८४. आयुः (Āyuḥ)

१. इन्द्रः (Indraḥ) -अ. (Av.) २०.११९.१

अस्तावि मन्म पूर्व्य ब्रह्मोन्द्राय वोचत। पूर्वीऋर्तस्य बृहतीरनूषत स्तोतुर्मेधा असृक्षत ॥१॥
*astāvi manma pūrvya brahmondrāya vochata / pūrvīṛrtasya bṛhatīranūṣata stoturmedhā asṛkṣata //1 //*

## ८५. आयुः काण्वः (वालखिल्यम) (Āyuḥ Kāṇvaḥ [Vālakhilyama]

१. इन्द्रः (Indraḥ) - सा. (Sv.) १६७७-१६७८

अस्तावि मन्म पूवर्य ब्रह्मेन्द्राय वोचत ।
पूर्वीऋर्तस्य बृहीतरनूषत स्तोतुर्मेधा असृक्षत ॥१॥
समिन्द्रो रायो बृहतीरधूनुत सं क्षोणी समु सूर्यम् ।
सं शुक्रासः शुचयः सं गवाशिरः सोमा इन्द्रममन्दिषुः ॥२॥
*astāvi manma pūvarya brahmendrāya vochata /*
*pūrvīṛrtasya bṛhītaranūṣata stoturmedhā asṛkṣata //1 //*
*samindro rāyo bṛhatīradhūnuta saṁ kṣoṇī samu sūryam /*
*saṁ śukrāsaḥ śuchayaḥ saṁ gavāśiraḥ somā indramamandiṣuḥ //2 //*

## ८६. आयुर्वर्चोबलकामः (Āyurvarchobalakāmaḥ)

१. निऋर्ति . अ.६.६३.१ (Niṛrti . Av.6.63.1)

यत् ते देवी निऋर्तिराबबन्ध दाम ग्रीवास्वविमोक्यं यत् ।
तत् ते वि ष्याम्यायुषे वर्चसे बलायादोमदमन्नमद्धि प्रसूतः ॥१॥
*yat te devī niṛrtirābabandha dāma grīvāsvavimokyaṁ yat /*
*tat te vi ṣyāmyāyuṣe varchase balāyādomadamannamaddhi prasūtaḥ //1 //*

२. मृत्युः (Mṛtyuḥ) - अ. (Av.) ६.६३.३

अयस्मये द्रुपदे बेधिष इहाभिहितो मृत्युभिर्ये सहस्रम् ।
यमेन त्वं पितृभिः संविदान उत्तमं नाकमधि रोहयेमम् ॥३॥
*ayasmaye drupade bedhiṣa ihābhihito mṛtyubhirye sahasram /*
*yamena tvaṁ pitṛbhiḥ saṁvidāna uttamaṁ nākamadhi rohayemam //3 //*

३. यमः (Yamaḥ) - ६.६३.२

नमोऽस्तु ते निऋर्ते तिग्मतेजोऽयस्यमान् वि चृता बन्धपाशान् ।
यमो मह्यं पुनरित् त्वां ददाति तस्मै यमाय नमो अस्तु मृत्यवे ॥२॥
*namo'stu te niṛrte tigmatejo'yasyamān vi chṛtā bandhapāśān /*
*yamo mahyaṁ punarit tvāṁ dadāti tasmai yamāya namo astu mṛtyave //2 //*

## ८७. आयुः काण्वः (Āyuḥ Kāṇvaḥ)

१. इन्द्रः (Indraḥ) - ऋ. (Rv.) ८.५२.१-१०

यथ मनौ विवस्वति सोमं शक्रापिबः सुतम् ।
यथा त्रिते छन्द इन्द्र जुजोषस्यायौ मादयसे सचा ॥१॥
पृषध्रे मेध्ये मातरिश्वनीन्द्र सुवाने अमन्दथाः ।
यथा सोमं दशशिप्रे दशोण्ये स्यूमरश्मावृजूनसि ॥२॥
य उक्था केवला दधे यः सोमं धृषितापिबत् ।
यस्मै विष्णुस्त्रीणि पदा विचक्रम उप मित्रस्य धर्मभिः ॥३॥
यस्य त्वमिन्द्र स्तोमेषु चाकनो वाजे वाजिंछतक्रतो ।
तं त्वा वयं सुदुघामिव गोदुहो जुहूमसि श्रवस्यवः ॥४॥
यो नो दाता स नः पिता महाँ उग्र ईशानकृत् ।
अयामन्नुग्रो मघवा पुरुवसुर्गोरश्वस्य प्र दातु नः ॥५॥
यस्मै त्वं वसो दानाय मंहसे स रायस्पोषमिन्वति ।

वसूयवो वसुपतिं शतक्रतुं स्तोमैरिन्द्रं हवामहे ॥६॥
कदा चन प्र युच्छस्युभे नि पासि जन्मनी ।
तुनीयादित्य हवनं त इन्द्रियमा तस्थावमृतं दिवि ॥७॥
यस्मै त्वं मघवन्निन्द्र गिर्वणः शिक्षो शिक्षसि दाशुषे ।
अस्माकं गिर उत सुष्टुतिं वसो कण्ववच्छृणुधी हवम् ॥८॥
अस्तावि मन्म पूर्व्यं ब्रह्मेन्द्राय वोचत ।
पूर्वीऋर्तस्य बृहतीरनूषत स्तोतुर्मेधा असृक्षत ॥९॥
समिन्द्रो रायो बृहतीरधूनुत सं क्षोणी समु सूर्यम् ।
सं शुक्रासः शुचयः सं गवाशिरः सोमा इन्द्रममन्दिशुः ॥१०॥
*yatha manau vivasvati somaṁ śakrāpibaḥ sutam* ।
*yathā trite chhanda indra jujoṣasyāyau mādayase sachā* ॥1॥
*pṛṣadhre medhye mātariśvanīndra suvāne amandathāḥ* ।
*yathā somaṁ daśaśipre daśoṇye syūmaraśmāvṛjūnasi* ॥2॥
*ya ukthā kevalā dadhe yaḥ somaṁ dhṛṣitāpibat* ।
*yasmai viṣṇustrīṇi padā vichakrama upa mitrasya dharmabhiḥ* ॥3॥
*yasya tvamindra stomeṣu chākano vāje vājiṁchhatakrato* ।
*taṁ tvā vayaṁ sudughāmiva goduho juhūmasi śravasyavaḥ* ॥4॥
*yo no dātā sa naḥ pitā mahām̐ ugra īśānakṛt* ।
*ayāmannugro maghavā puruvasurgoraśvasya pra dātu naḥ* ॥5॥
*yasmai tvaṁ vaso dānāya maṁhase sa rāyaspoṣaminvati* ।
*vasūyavo vasupatiṁ śatakratuṁ stomairindraṁ havāmahe* ॥6॥
*kadā chana pra yuchchhasyubhe ni pāsi janmanī* ।
*tunīyāditya havanaṁ ta indriyamā tasthāvamṛtaṁ divi* ॥7॥
*yasmai tvaṁ maghavannindra girvaṇaḥ śikṣo śikṣasi dāśuṣe* ।
*asmākaṁ gira uta suṣṭutiṁ vaso kaṇvavachchhṛṇudhī havam* ॥8॥
*astāvi manma pūrvya brahmendrāya vochata* ।
*pūrvīṛrtasya bṛhatīranūṣata stoturmedhā asṛkṣata* ॥9॥
*samindro rāyo bṛhatīradhūnuta saṁ kṣoṇī samu sūryam* ।
*saṁ śukrāsaḥ śuchayaḥ saṁ gavāśiraḥ somā indramamandiśuḥ* ॥10॥

## ८८. आसंगः प्लायोगिः (Āsaṁgaḥ Plāyogiḥ)

१. असंगस्य दानस्तुतिः (Asaṁgasya Dānastutiḥ )- ऋ. (Rv.) ८.१.३०-३३

स्तुहि स्तुहीदेते घा ते मंहिष्ठासो मघोनाम् ।
निन्दताश्वः प्रपथी परमज्या मघस्य मेध्यातिथे ॥३०॥
आ यदश्वान्वनन्वतः श्रद्धयाहं रथे रुहम् ।
उत वामस्य वसुनश्चिकेतति यो अस्ति याद्वः पशुः ॥३१॥
य ऋज्रा मह्यं मामहे सह त्वचा हिरण्यया ।
एष विश्वान्यभ्यस्तु सौभगासंगस्य स्वनद्रथः ॥३२॥
अध प्लायोगिरति दासदन्यानासंगो अग्ने दशभिः सहस्रैः ।
अधोक्षणो दश मह्यं रुशन्तो नळाइव सरसो निरतिष्ठन् ॥३३॥
*stuhi stuhīdete ghā te maṁhiṣṭhāso maghonām* ।
*nindatāśvaḥ prapathī paramajyā maghasya medhyātithe* ॥30॥
*ā yadaśvānvananvataḥ śraddhayāhaṁ rathe ruham* ।
*uta vāmasya vasunaśchiketati yo asti yādvaḥ paśuḥ* ॥31॥
*ya ṛjrā mahyaṁ māmahe saha tvachā hiraṇyayā* ।
*eṣa viśvānyabhyastu saubhagāsaṁgasya svanadrathaḥ* ॥32॥
*adha plāyogirati dāsadanyānāsaṁgo agne daśabhiḥ sahasraiḥ* ।
*adhokṣaṇo daśa mahyaṁ ruśanto naḻāīva saraso niratiṣṭhan* ॥33॥

## ८९. आसुरिः (Āsuriḥ)

१. अग्निः (Agniḥ) - य. (Yv.)३.३८-४०

आगन्म विश्ववेदसमस्मभ्यं वसुवित्तमम् ।
अग्ने सम्राडभि द्युम्नमभि सहऽआयच्छस्व ॥३८॥
अयमग्निर्गृहपतिर्गार्हपत्यः प्रजाया वसुवित्तमः ।
अग्ने गृहपतेऽभि द्युम्नमभि सहऽआयच्छस्व ॥३९॥
अयमग्निः पुरीष्यो रयिमान् पुष्टिवर्द्धनः ।
अग्ने पुरीष्याभि द्युम्नमभि सहऽआयच्छस्व ॥४०॥

*āganma viśvavedasamasmabhyaṁ vasuvittamam /*
*agne samrāḍabhi dyumnamabhi saha'āyachchhasva //38 //*
*ayamagnirgṛhapatirgārhapatyaḥ prajāyā vasuvittamaḥ /*
*agne gṛhapate'bhi dyumnamabhi saha'āyachchhasva //39 //*
*ayamagniḥ purīṣyo rayimān puṣṭivarddhanaḥ /*
*agne purīṣyābhi dyumnamabhi saha'āyachchhasva //40 //*

२. वास्तुरग्निः (Vāsturagniḥ) - य. (Yv.)३.४१

गृहा मा बिभीत मा वेपध्वमूर्ज्ज बिभ्रतऽ एमसि ।
ऊर्ज्ज बिभ्रद्व सुमनाः सुमेधा गुहानैमि मनसा मोदमानः ॥४१॥

*gṛhā mā bibhīta mā vepadhvamūrjja bibhrata' emasi /*
*ūrjja bibhradva sumanāḥ sumedhā guhānaimi manasā modamānaḥ //41 //*

## ९०. इटो भार्गवः (Iṭo Bhārgavaḥ)

१. इन्द्रः (Indraḥ) - ऋ. (Rv.) १०.१७१.१-४

त्वं त्यमिटतो रथमिन्द्र प्रावः सुतावतः। अशृणोः सोमिनो हवम् ॥१॥
त्वं मखस्य दोधतः शिरोऽव त्वचो भरः। अगच्छः सोमिनो गृहम् ॥२॥
त्वं त्यमिन्द्र मर्त्यमास्त्राबुध्नाय वेन्यम्। मुहुः श्रथ्ना मनस्यवे ॥३॥
त्वं तयमिन्द्र सूर्य पश्चा सन्तं पुरस्कृधि। देवानां चित्तिरो वशम् ॥४॥

*tvaṁ tyamiṭato rathamindra prāvaḥ sutāvataḥ / aśṛṇoḥ somino havam //1 //*
*tvaṁ makhasya dodhataḥ śiro'va tvacho bharaḥ / agachchhaḥ somino gṛham //2 //*
*tvaṁ tyamindra martyamāstrābudhnāya venyam / muhuḥ śrathnā manasyave //3 //*
*tvaṁ tayamindra sūrya paśchā santaṁ puraskṛdhi / devānāṁ chittiro vaśam //4 //*

## ९१. इध्मवाहो दार्ढच्युतः (Idhmavāho Dārḍhachyutaḥ)

१. पवमानः सोमः (Pavamānaḥ Somaḥ)- ऋ. (Rv.) ९.२६.१-६

तममृक्षन्त वाजिनमुपस्थे अदितेरधि। विप्रासो अण्व्या धिया ॥१॥
तं गावो अभ्यनूषत सहस्रधारमक्षितम्। इन्दुं धर्तारमा दिवः ॥२॥
तं वेधां मेधयाह्यन्पवमानमधि द्यवि। धर्णासिं भूरिधायसम् ॥३॥
तमह्यन्भुरिजोर्धिया संवसानं विवस्वतः। पतिं वाचो अदाभ्यम् ॥४॥
तं सानावधि जामयो हरिं हिन्वन्त्यद्रिभिः। हर्यतं भूरिचक्षसम् ।५॥
तं त्वा हिन्वन्ति वेधसः पवमान गिरावृधम्। इन्दविन्द्राय मत्सरम् ॥६॥

*tamamṛkṣanta vājinamupasthe aditeradhi / viprāso aṇvyā dhiyā //1 //*
*taṁ gāvo abhyanūṣata sahasradhāramakṣitam / induṁ dhartāramā divaḥ //2 //*
*taṁ vedhāṁ medhayāhyanpavamānamadhi dyavi / dharṇāsiṁ bhūridhāyasam //3 //*
*tamahyanbhurijordhiyā saṁvasānaṁ vivasvataḥ / patiṁ vācho adābhyam //4 //*
*taṁ sānāvadhi jāmayo hariṁ hinvantyādribhiḥ / haryataṁ bhūrichakṣasam /5 //*
*taṁ tvā hinvanti vedhasaḥ pavamāna girāvṛdham / indavindrāya matsaram //6 //*

## ९२. इन्द्रः (Indraḥ)

२. इन्द्रः (Indraḥ) - ऋ. (Rv.) ८.१००.४-५; य. (Yv.)१८.६८

ऋ. (Rv.) ८.१००.४-५

अयमस्मि जरितः पश्य मेह विश्वा जातान्यभ्यस्मि मह्ना ।
ऋतस्य मा प्रदिशो वर्धयन्त्यादर्दिरो भुवना दर्दरीमि ॥४॥
आ यन्मा वेना अरुहन्नृतस्यँ एकमासीनं हर्यतस्य पृष्ठे ।
मनश्चिन्मे हृद आ प्रत्यवोचदचिक्रदंिछशुमन्तः सखायः ॥५॥

*ayamasmi jaritaḥ paśya meha viśvā jātānyabhyasmi mahnā /*
*ṛtasya mā pradiśo vardhayantyādardiro bhuvanā dardarīmi //4 //*
*ā yanmā venā aruhannṛtasyam̐ ekamāsīnaṁ haryatasya pṛṣṭhe /*
*manaśchinme hṛda ā pratyavochadachikradiṁchhaśumantaḥ sakhāyaḥ //5 //*

य. (Yv.)१८.६८

वार्त्रहत्याय शवसे पृतनषाह्याय च। इन्द्र त्वावर्तयामसि ॥६८॥

*vārtrahatyāya śavase pṛtanaṣāhyāya cha / indra tvāvartayāmasi //68 //*

## ९३. इन्द्राणी (Indrāṇī)

१. उपनिषत् सपत्नीबाधनम् (Upaniṣat Sapatnībādhanam) - ऋ. (Rv.) १०.१४५.१-६

इमां खनाम्योषधिं वीरुधं बलवत्तमाम्। यया सपत्नीं बाधते यया सं विन्दते पतिम् ॥१॥
उत्तानपर्णे सुभगे देवजूते सहस्वति। सपत्नीं मे परा धम पतिं मे केवलं कुरु ॥२॥
उत्तराहमुत्तर उत्तरेदुत्तराभ्यः। अथा सपत्नी या ममाधरा साधराभ्यः ॥३॥
नह्यस्या नाम गृभ्णामि नो अस्मिन्नमते जने। परामेव परावतं सपत्नीं गमयामसि ॥४॥
अहमस्मि सहमानाथ त्वमसि सासहिः। उभे सहस्वती भूत्वी सपत्नीं मे सहावहै ॥५॥
उप तेऽधां सहमानामभि त्वाधां सहीयसा।
मामनु प्र ते मनो वत्सं गौरिव धावतु पथा वारिव धावतु॥६॥

*imāṁ khanāmyoṣadhiṁ vīrudhaṁ balavattamām / yayā sapatnīṁ bādhate yayā saṁ vindate patim //1 //*
*uttānaparṇe subhage devajūte sahasvati / sapatnīṁ me parā dhama patiṁ me kevalaṁ kuru //2 //*
*uttarāhamuttara uttareduttarābhyaḥ / athā sapatnī yā mamādharā sādharābhyaḥ //3 //*
*nahyasyā nāma gṛbhṇāmi no asminnamate jane / parāmeva parāvataṁ sapatnīṁ gamayāmasi //4 //*
*ahamasmi sahamānātha tvamasi sāsahiḥ / ubhe sahasvatī bhūtvī sapatnīṁ me sahāvahai //5 //*
*upa te'dhāṁ sahamānāmabhi tvādhāṁ sahīyasā /*
*māmanu pra te mano vatsaṁ gauriva dhāvatu pathā vāriva dhāvatu //6 //*

## ९४. इन्द्राग्नी (Indrāgnī)

१. अग्निः (Agniḥ) - य. (Yv.)१३.२२

यास्तेऽअग्ने सूर्य्ये रुचो दिवमातन्वन्ति रश्मिभिः ।
ताभिर्नोऽअद्य सर्वाभी रुचे जनाय नस्कृधि ॥२२॥

*yāste'agne sūryye rucho divamātanvanti raśimabhiḥ /*
*tābhirno'adya sarvābhī ruche janāya naskṛdhi //22 //*

२. ऋतवः (Ṛtavaḥ) - य. (Yv.)१३.२५

मधुश्च माध्वश्च वासन्तिकावृतूऽअग्नेरन्तःश्लेषोऽसि कल्पेतां द्यावापृथिवी कल्पन्तामापऽओषध्यः कल्पन्तामग्नयः पृथङ् मम ज्यैष्ठ्याय सव्रताः। येऽअग्नयः समनसोऽनतरा द्यावापृथिवीऽइमे
वासन्तिकावृतूऽअभिकल्पमानाऽइन्द्रमिव देवाऽअभिसंविशन्तु तया देवतयांगिरस्वद् ध्रुवे सीदतम्॥२५॥

*madhuścha mādhvaścha vāsantikāvṛtū'agnerantaḥśleṣo'si kalpetāṁ dyāvāpṛthivī kalpantāmāpa'Oṣadhyaḥ kalpantāmagnayaḥ pṛthaṅ mama jyaiṣṭhyāya savratāḥ /*

*ye'agnayaḥ samanaso'natarā dyāvāpṛthivī'ime*
*vāsantikāvṛtū'abhikalpamānā'indramiva devā'abhisaṁviśantu tayā devatayāṁgirasvad dhruve sīdatam ॥25 ॥*

३. प्रजापतिः (Prajāpatiḥ) - य. (Yv.)१३.२४

विराड् ज्योतिरधारयत् स्वराड् ज्योतिरधारयत्। प्रजापतिष्ट्वा सादयतु पृष्ठे पृथिव्या ज्योतिष्मतीम्। विश्वस्मै प्राणायापानाय व्यानाय विश्वं ज्योतिर्यच्छ।
अग्निष्टेऽधिपतिस्तया देवतयांगिरस्वद् ध्रुवा सीद ॥२४॥
*virāḍ jyotiradhārayat svarāḍ jyotiradhārayat । prajāpatiṣṭvā sādayatu pṛṣṭhe pṛthivyā jyotiṣmatīm । viśvasmai prāṇāyāpānāya vyānāya viśvaṁ jyotiryachchha ।*
*agniṣṭe'dhipatistayā devatayāṁgirasvad dhruvā sīda ॥24 ॥*

४. बृहस्पतिः (Bṛhaspatiḥ) - य. (Yv.)१३.२३

या वो देवाः सूर्य्ये रुचो गोष्वश्वेषु या रुचः। इन्द्राग्नी ताभिः सर्वाभि रुचं नो धत्त बृहस्पते ॥२३॥
*yā vo devāḥ sūryye rucho goṣvaśveṣu yā ruchaḥ । indrāgnī tābhiḥ sarvābhi ruchaṁ no dhatta bṛhaspate ॥23 ॥*

## ९५. इन्द्राबृहस्पती (indrābṛhaspatī)

१. सविता (Savitā) - य. (Yv.)९.१

देव सवितः प्रसुव यां प्रसुव यापतिं भगाय। दिव्यो गन्धर्वः केतपूः केतं नः पुनातु वाचस्पतिर्वाजं नः स्वदतु स्वाहा ॥१॥
*deva savitaḥ prasuva yāṁ prasuva yāpatiṁ bhagāya । divyo gandharvaḥ ketapūḥ ketaṁ naḥ punātu vāchaspatirvājaṁ naḥ svadatu svāhā ॥1 ॥*

## ९६. इन्द्र प्रमतिर् वासिष्ठः (Indra Pramatir Vāsiṣṭhaḥ)

१. पवमानः सोमः (Pavamānaḥ Somaḥ)- ऋ. (Rv.) ९.९७.४-६; सा. (Sv.) ५३५

ऋ. (Rv.) ९.९७.४-६

प्र गायताभ्यर्चाम देवान्त्सोमं हिनोत महते धनाय ।
स्वादुः पवाते अति वारमव्यमा सीदाति कलशं देवयुर्नः ॥४॥
इन्दुर्देवानामुप सख्यमायन्त्सहस्रधारः पवते मदाय ।
नृभिः स्तवानो अनु धाम पूर्वमगन्निन्द्रं महते सौभगाय ॥५॥
स्तोत्रे राये हरिरर्षा पुनान इन्द्रं मदो गच्छतु ते भराय ।
देवैर्याहि सरथं राधो अच्छा यूयं पात स्वस्तिभिः सदा नः ॥६॥
*pra gāyatābhyarchāma devāntsomaṁ hinota mahate dhanāya ।*
*svāduḥ pavāte ati vāramavyamā sīdāti kalaśaṁ devayurnaḥ ॥4 ॥*
*indurdevānāmupa sakhyamāyantsahasradhāraḥ pavate madāya ।*
*nṛbhiḥ stavāno anu dhāma pūrvamagannindraṁ mahate saubhagāya ॥5 ॥*
*stotre rāye harirarṣā punāna indraṁ mado gachchhatu te bharāya ।*
*devairyāhi sarathaṁ rādho achchhā yūyaṁ pāta svastibhiḥ sadā naḥ ॥6 ॥*

सा. (Sv.) ५३५

प्र गायताभ्यर्चाम देवान्त्सोमं हिनोत महते धनाय ।
स्वादुः पवतामति वारमव्यमा सीदतु कलशं देव इन्दुः ॥३॥
*pra gāyatābhyarchāma devāntsomaṁ hinota mahate dhanāya ।*
*svāduḥ pavatāmati vāramavyamā sīdatu kalaśaṁ deva induḥ ॥3 ॥*

## ९७. इन्द्र मातरो देवजामयः (Indra Mātaro Devajāmayaḥ)

१. इन्द्रः (Indraḥ) - ऋ. (Rv.) १०.१५३.१-५

ईंखयन्तीरपस्युव इन्द्रं जातमुपासते। भूजानासः सुवीर्यम् ॥१॥
तवमिन्द्र बलादधि सहसो जात ओजसः। त्वं वृषन्वृषेदसि ॥२॥
त्वमिन्द्रासि वृत्रहा व्य१न्तरिक्षमतिरः। उद् द्यामस्तभ्ना ओजसा ॥३॥

त्वमिन्द्र सजोषसमर्क विभर्षि बाह्वोः। वज्रं शिशान ओजसा ॥४॥
त्वमिन्द्राभिभूरसि विश्वा जातान्योजसा। स विश्वा भुव आभवः ॥५॥
*īṁkhayantīrapasyuva indraṁ jātamupāsate । bhūjānāsaḥ suvīryam ॥1॥*
*tavamindra balādadhi sahaso jāta Ojasaḥ । tvaṁ vṛṣanvṛṣedasi ॥2॥*
*tvamindrāsi vṛtrahā vya1ntarikṣamatiraḥ । ud dyāmastabhnā Ojasā ॥3॥*
*tvamindra sajoṣasamarka vibharṣi bāhnoḥ । vajraṁ śiśāna Ojasā ॥4॥*
*tvamindrābhibhūrasi viśvā jātānyojasā । sa viśvā bhuva ābhavaḥ ॥5॥*

## ९८. आश्वतराश्विः (Āśvatarāśviḥ)

१. अग्निः (Agniḥ) - य. (Yv.)२०.२४-२६

अभ्या दधामि समिधमग्ने व्रतपते त्वयि ।
व्रतं च श्रद्धां चोपैमीन्धे त्वा दीक्षितोऽअहम् ॥२४॥
यत्र ब्रह्म च क्षत्रं च सम्यंचौ चरतः सह ।
तं लोकं पुणयं प्रोषं यत्र देवाः सहाग्निना ॥२५॥
यत्रेन्द्रश्च वायुश्च सम्यंचौ चरतः सह ।
तं लोकं पुणयं प्रोषं यत्र सेदिर्न विद्यते ॥२६॥
*abhyā dadhāmi samidhamagne vratapate tvayi ।*
*vrataṁ cha śraddhāṁ chopaimīndhe tvā dīkṣito'aham ॥24॥*
*yatra brahma cha kṣatraṁ cha samyaṁchau charataḥ saha ।*
*taṁ lokaṁ puṇayaṁ proṣaṁ yatra devāḥ sahāgninā ॥25॥*
*yatrendraścha vāyuścha samyaṁchau charataḥ saha ।*
*taṁ lokaṁ puṇayaṁ proṣaṁ yatra sedirna vidyate ॥26॥*

## ९९. इन्द्रो मुष्कवान् (Indro Muṣkavān)

१. इन्द्रः (Indraḥ) - ऋ. (Rv.) १०.३८.१-५

अस्मिन्न इन्द्र पुत्सुतौ यशस्वति शिमीवति क्रन्दसि प्राव सातये ।
यत्र गोषाता धृषितेषु खदिषु विष्वक्पतन्ति दिद्यवो नृषाह्ये ॥१॥
स नः क्षुमन्तं सदने व्यूर्णुहि गार्सासं रयिमिन्द्र श्रवाय्यम् ।
स्याम ते जयतः शक्र मेदिनो यथा वयमुश्मसि तद्वसो कृधि ॥२॥
यो नो दास आर्यो वा पुरुष्टुतादेव इन्द्र युधये चिकेतति ।
अस्माभिष्टे सुषहाः सन्तु शत्रवस्त्वया वयं तान्वनुयाम संगमे ॥३॥
यो दभ्रेभिर्हव्यो यश्च भूरिभिर्यो अभीके वरिवोविन्नृषाह्ये ।
तं विखादे सस्निमद्य श्रुतं नरमर्वांचमिन्दमवसे करामहे ॥४॥
स्ववृजं हि त्वामहमिन्द्र शुश्रवानानुदं वृषभ रध्रचोदनम् ।
प्र मुंचस्व परि कुत्सादिहा गहि किमु त्वावान्मुष्कयोर्बद्ध आसते ॥५॥
*asminna indra putsutau yaśasvati śimīvati krandasi prāva sātaye ।*
*yatra goṣātā dhṛṣiteṣu khadiṣu viṣvakpatanti didyavo nṛṣāhye ॥1॥*
*sa naḥ kṣumantaṁ sadane vyūrṇuhi gārsāsaṁ rayimindra śravāyyam ।*
*syāma te jayataḥ śakra medino yathā vayamuśmasi tadvaso kṛdhi ॥2॥*
*yo no dāsa āryo vā puruṣṭutādeva indra yudhaye chiketati ।*
*asmābhiṣte suṣahāḥ santu śatravastvayā vayaṁ tānvanuyāma saṁgame ॥3॥*
*yo dabhrebhirhavyo yaścha bhūribhiryo abhīke varivovinnṛṣāhye ।*
*taṁ vikhāde sasnimadya śrutaṁ naramarvāṁchamindamavase karāmahe ॥4॥*
*svavṛjaṁ hi tvāmahamindra śuśravānānudaṁ vṛṣabha radhrachodanam ।*
*pra muṁchasva pari kutsādihā gahi kimu tvāvānmuṣkaryobaddha āsate ॥5॥*

## १००. इन्द्र वसुक्रयोः संवादः ऐन्द्रः (Indra Vasukrayoḥ Saṁvādaḥ Aindraḥ)

१. इन्द्रः (Indraḥ) - ऋ. (Rv.) १०.२८.१-१२

विश्वो ह्यऽन्यो अरिराजगाम ममेदह श्वशुरो न जगाम ।

जक्षीयाद्धाना उत सोमं पपीयात्स्वाशितः पुनरस्तं जगायात् ॥१॥
स रोरुवद्वृषभस्तिग्मश्रृंगो वर्ष्मन्तस्थौ वरिमन्ना पृथिव्याः ।
विश्वेष्वेनं वृजनेषु पामि यो मे कुक्षी सुतसोमः पृणाति ॥२॥
अद्रिणा ते मन्दिन इन्द्र तूयान्त्सुन्वन्ति सोमान्पिबसि त्वमेषाम् ।
पचन्ति ते वृषभाँ अत्सि तेर्षा पृक्षेण यन्मघवन्हूयमानः ॥३॥
इदं सु मे जरितरा चिकिद्धि प्रतीपं शापं नद्याो वहन्ति ।
लोपाशः सिंहं प्रत्यंचमत्साः क्रोष्टा वराहं निरतक्त कक्षात् ॥४॥
कथा त एतदहमा चिकेतं गृत्सस्य पाकस्तवसो मनीषम् ।
त्वं नो विद्वाँ ऋतुथ वि वोचो यमर्ध ते मघवन्क्षेम्या धूः ॥५॥
एवा हि मां तवसं वर्धयन्ति दिवश्चिन्मे बृहत उत्तरा धूः ।
पुरू सहस्रा नि शिशामि सकमशत्रुं हि मा जनिता जजान ॥६॥
एवा हि मां तवसं जुज्ञुरुग्रं कर्मन्कर्मन्वृषणामिन्द्रं देवाः ।
वधु वृत्रं वज्रेण मन्दसानोऽप व्रजं महिना दाशुषे वम् ॥७॥
देवास आयन्परशूँरबिभ्रन्वना वृश्चन्तो अभि विड्भिरायन् ।
नि सुद्रवं१ दधतो वक्षणासु यत्रा कृपीटमनु तद्दहन्ति ॥८॥
शशः क्षुरं प्रत्यंचं जगाराद्रिं लोगेन व्यभेदमारात् ।
बृहन्तं चिद्दहते रन्धयानि वयद्वत्सो वृषभं शूशुवानः ॥९॥
सुपर्ण इत्था नखमा सिषायावरुद्धः परिपदं न सिंहः ।
निरुद्धश्चिन्महिषस्तर्ष्यावान्गोधा तस्मा अयथं कर्षदेतत् ॥१०॥
तेभ्यो गोधा अयथं कर्षदेतद्ये ब्रह्मणं: प्रतिपीयन्त्यन्नैः ॥
सिम उक्ष्णोऽवसृष्टाँ अदन्ति स्वयं बलानि तन्वः श्रणानाः ॥११॥
एते शमीभीः सुशमी अभूवन्ये हिन्विरे तन्वः सोम उक्थैः ।
नृवद्वदन्नुप नो माहि वाजान्दिवि श्रवो दधिषे नाम वीरः ॥१२॥

*viśvo hya1nyo arirājagāma mamedaha śvaśuro na jagāma /*
*jakṣīyāddhānā uta somaṁ papīyātsvāśitaḥ punarastaṁ jagāyāt //1 //*
*sa roruvadvṛṣabhastigmaśṛṁgo varṣmantasthau varimannā pṛthivyāḥ /*
*viśveṣvenaṁ vṛjaneṣu pāmi yo me kukṣī sutasomaḥ pṛṇāti //2 //*
*adriṇā te mandina indra tūyāntsunvanti somānpibasi tvameṣām /*
*pachanti te vṛṣabhāṁ atsi terṣā pṛkṣeṇa yanmaghavanhūyamānaḥ //3 //*
*idaṁ su me jaritarā chikiddhi pratīpaṁ śāpaṁ nadyāo vahanti /*
*lopāśaḥ siṁhaṁ pratyaṁchamatsāḥ kroṣṭā varāhaṁ niratakta kakṣāt //4 //*
*kathā ta etadahamā chiketaṁ gṛtsasya pākastavaso manīṣam /*
*tvaṁ no vidvāṁ ṛtutha vi vocho yamardha te maghavankṣemyā dhūḥ //5 //*
*evā hi māṁ tavasaṁ vardhayanti divaśchinme bṛhata uttarā dhūḥ /*
*purū sahasrā ni śiśāmi sakamaśatruṁ hi mā janitā jajāna //6 //*
*evā hi māṁ tavasaṁ jajñurugraṁ karmankarmanvṛṣaṇāmindraṁ devāḥ /*
*vadhu vṛtraṁ vajreṇa mandasāno'pa vrajaṁ mahinā dāśuṣe vam //7 //*
*devāsa āyanparaśūṁrabibhranvanā vṛśchanto abhi viḍbhirāyan /*
*ni sudravaṁ1 dadhato vakṣaṇāsu yatrā kṛpīṭamanu taddahanti //8 //*
*śaśaḥ kṣuraṁ pratyaṁchaṁ jagārādriṁ logena vyabhedamārāt /*
*bṛhantaṁ chidṛhate randhayāni vayadvatso vṛṣabhaṁ śūśuvānaḥ //9 //*
*suparṇa itthā nakhamā siṣāyāvaruddhaḥ paripadaṁ na siṁhaḥ /*
*niruddhaśchinmahiṣastarṣyāvāngodhā tasmā ayathaṁ karṣadetat //10 //*
*tebhyo godhā ayathaṁ karṣadetadye brahmaṇaṁḥ pratipīyantyannaiḥ //*
*sima ukṣaṇo'vasṛṣṭāṁ adanti svayaṁ balāni tanva1ḥ śṛṇānāḥ //11 //*
*ete śamībhīḥ suśamī abhūvanye hinvire tanvaḥ soma ukthaiḥ /*
*nṛvadvadannupa no māhi vājāndivi śravo dadhiṣe nāma vīraḥ //12 //*

## १०१. इन्द्रविश्वामित्रा (Indraviśvāmitrā)

१. इन्द्रः (Indraḥ) - य. (Yv.)१८.६९

सहदानु पुरुहूत क्षियन्तमहस्तमिन्द्र सं पिणक् कुणारुम् ।
अभि वृत्रं वर्धमानं पियारुमपादमिन्द्र तवसा जघन्थ ॥६९॥
*sahadānu puruhūta kṣiyantamahastamindra saṁ piṇak kuṇārum* ।
*abhi vṛtraṁ vardhamānaṁ piyārumapādamindra tavasā jaghantha* ॥69॥

## १०२. इन्द्रो वैकुण्ठः (Indro Vaikuṇṭhaḥ)

१. इन्द्रो वैकुण्ठः (Indro Vaikuṇṭhaḥ) - ऋ. (Rv.) १०.४८.१-११; १०.४९.१-११; १०.५०.१-७

ऋ. (Rv.) १०.४८.१-११

अहं भुवं वसुनः पूर्व्यस्पतिरहं धनानि सं जयामि शश्वतः ।
मां हवन्ते पितरं न जन्तवोऽहं दाशुषे वि भजामि भोजनम् ॥१॥
अहमिन्द्रो रोधो वक्षो अथर्वणस्त्रिताय गा अजनयमहेरधि ।
अहं दस्युभ्यः परि नृम्णमा ददे गोत्रा शिक्षन् दधीचे मातरिश्वने ॥२॥
मह्यं त्वष्टा वज्रमतक्षदायसं मयि देवासोऽवृजन्नपि क्रतुम् ।
मामानीकं सूर्यस्येव दुष्टरं मामार्यन्ति कृतेन कर्त्वेन च ॥३॥
अहमेतं गव्ययमश्व्यं पशुं पुरीषिणं सायकेना हिरण्ययम् ।
पुरू सहस्रा नि शिशामि दाशुषे यन्मा सोमास उक्थिनो अमन्दिषुः ॥४॥
अहमिन्द्रो न परा जिग्य इद्धनं न मृतयवेऽव तस्थे कदा चन ।
सोममिन्मा सुन्वन्तो याचता वसु न मे पूरवः सख्ये रिषाथन ॥५॥
अहमेतांछाश्वसतो द्वाद्वेन्द्रं ये वज्रं युधयेऽकृण्वत ।
आह्वयमानाँ अव हन्मनाहनं दृळहा वदन्नमस्युर्नमस्विनः ॥६॥
अभी३ दमेकमेको अस्मि निष्षाळभी द्वा किमु त्रयः करन्ति ।
खले न पर्षान् प्रति हन्मि भूरि किं मा निन्दन्ति शत्रवोऽन्द्रिाः ॥।७॥
अहं गुंगुभ्यो अतिथिग्वमिष्करमिषं न वृत्रतुरं विक्षु धारयम् ।
यत्पर्णयघ्न उत वा करंजहे प्राहं महे वृत्रहत्ये अशुश्रवि ॥८॥
प्र मे नमी साप्य इषे भुजे भूद्गवामेषे सख्या कृणुत द्विता ।
दिद्युं यदस्य समिथेषु मंहयमादिदेनं शंस्यमुक्थ्यं करम् ॥९॥
प्र नेमस्मिन्दृशे सोमो अन्तर्गोपा नेममाविरस्था कृणोति ।
स तिग्मशृंगं वृषभं युयुत्सन् द्रुहस्तस्थौ बहुले बद्धो अन्तः ॥१०॥
आदित्यानां वसूनां रुद्रियाणां देवो देवानां न मिनामि धाम ।
ते मा भद्राय शवसे ततक्षुरपराजितमस्तृतमषाळहम्॥११॥
*ahaṁ bhuvaṁ vasunaḥ pūrvyaspatirahaṁ dhanāni saṁ jayāmi śaśvataḥ* ।
*māṁ havante pitaraṁ na jantavo'haṁ dāśuṣe vi bhajāmi bhojanam* ॥1॥
*ahamindro rodho vakṣo atharvaṇastritāya gā ajanayamaheradhi* ।
*ahaṁ dasyubhyaḥ pari nṛmṇamā dade gotrā śikṣan dadhīche mātariśvane* ॥2॥
*mahyaṁ tvaṣṭā vajramatakṣadāyasaṁ mayi devāso'vṛjannapi kratum* ।
*māmānīkaṁ sūryasyeva duṣṭaraṁ māmāryanti kṛtena kartvena cha* ॥3॥
*ahametaṁ gavyayamaśvyaṁ paśuṁ purīṣiṇaṁ sāyakenā hiraṇyayam* ।
*purū sahasrā ni śiśāmi dāśuṣe yanmā somāsa ukthino amandiṣuḥ* ॥4॥
*ahamindro na parā jigya iddhanaṁ na mṛtayave'va tasthe kadā chana* ।
*somaminmā sunvanto yāchatā vasu na me pūravaḥ sakhye riṣāthana* ॥5॥
*ahametāṁchhāśvasato dvādvendraṁ ye vajraṁ yudhaye'kṛṇvata* ।
*āhnayamānāṁ̐ ava hanmanāhanaṁ dṛḷahā vadannamasyurnamasvinaḥ* ॥6॥
*abhī3 damekameko asmi niṣṣāḷabhī dvā kimu trayaḥ karanti* ।
*khale na parṣān prati hanmi bhūri kiṁ mā nindanti śatravo'ndriāḥ* ॥।7॥
*ahaṁ guṁgubhyo atithigvamiṣkaramiṣaṁ na vṛtraturaṁ vikṣu dhārayam* ।

*yatparṇayaghna uta vā karaṁjahe prāhaṁ mahe vṛtrahatye aśuśravi* //8 //
*pra me namī sāpya iṣe bhuje bhūdgavāmeṣe sakhyā kṛṇuta dvitā* /
*didyuṁ yadasya samitheṣu maṁhayamādidenaṁ śaṁsyamukthyaṁ karam* //9 //
*pra nemasmindṛśe somo antargopā nemamāvirasthā kṛṇoti* /
*sa tigmaśṛṁgaṁ vṛṣabhaṁ yuyutsan druhastasthau bahule baddho antaḥ* //10 //
*ādityānāṁ vasūnāṁ rudriyāṇāṁ devo devānāṁ na mināmi dhāma* /
*te mā bhadrāya śavase tatakṣuraparājitamastṛtamaṣāḷaham* //11 //

ऋ. (Rv.) १०.४९.१-११

अहं दां गृणते पूर्व्यं वस्वहं ब्रह्म कृणवं मह्यं वर्धनम् ।
अहं भुवं चोदितायज्वनः साक्षि विश्वस्मिन्भरे ॥१॥
मां धुरिन्द्र नाम देवता दिवश्च ग्मश्चापां च जन्तवः ।
अहं हरी वृषणा विव्रता रघू अहं वज्रं शवसे धृष्ण्वा ददे ॥२॥
अहमत्कं कवये शिश्नथं हथैरहं कुत्समावमाभिरूतिभिः ।
अहं शुष्णस्य श्नथिता वर्ध्यमं न यो रर आर्य नाम दस्यवे ॥३॥
अहं पितेव वेतसूँरभिष्टये तुग्रं कुत्साय स्मदिभं च रन्धयम् ।
अहं भुवं यजमानस्य राजनि प्र यद्भरे तुजये न प्रियाधृषे ॥४॥
अहं रन्धयं मृगयं श्रुतर्वणे यन्माजिहीत वयुना चनानुषक् ।
अहं वेशं नम्रमायवेऽकरमहं सव्याय पड्गृभिमरन्धयम् ॥५॥
अहं स यो नववास्त्वं बृहद्रथं सं वृत्रेव दासं वृत्रहारुजम् ।
यद्वर्धयन्तं प्रथयन्तमानुषग्दूरे पारे रजसो रोचनाकरम् ॥६॥
अहं सूर्यस्य परि याम्याशुभिः प्रैतशेभिर्वहमान ओजसा ।
यन्मा सावो मनुष आह निर्णिज ऋधक्कृषे दासं कृत्व्यं हथैः ॥७॥
अहं सप्तहा नहुषो नहुष्टरः प्राश्रावयं शवसा तुर्वशं यदुम् ।
अहं न्य१न्यं सहसा सहस्करं नव व्राधतो नवतिं च वक्षयम् ॥८॥
अहं सप्त स्रवतो धारयं वृषा द्रवित्न्वः पृथिव्यां सीरा अधि ।
अहमर्णांसि वि तिरामि सुक्रतुर्युधा विदं मनवे गातुमिष्टये ॥९॥
अहं तदासु धारयं यदासु न देवश्चन त्वष्टाधारयद्रुशत् ।
स्पार्हं गवामूधः सु वक्षणास्वा मधोर्मधु श्वात्र्यं सोममाशिरम् ॥१०॥
एवा देवाँ इन्द्रो विव्ये नृनन् प्र च्यौत्नेन मघवा सत्यराधाः ।
विश्वेत्ता ते हरिवः शचीवोऽभि तुरासः स्वयशो गृणन्ति ॥११॥

*ahaṁ dāṁ gṛṇate pūrvya vasvahaṁ brahma kṛṇavaṁ mahyaṁ vardhanam* /
*ahaṁ bhuvaṁ choditāyajvanaḥ sākṣi viśvasminbhare* //1 //
*māṁ dhurindra nāma devatā divaścha gmaśchāpāṁ cha jantavaḥ* /
*ahaṁ harī vṛṣaṇā vivratā raghū ahaṁ vajraṁ śavase dhṛṣṇvā dade* //2 //
*ahamatkaṁ kavaye śiśnathaṁ hathairahaṁ kutsamāvamābhirarūtibhiḥ* /
*ahaṁ śuṣṇasya śnathitā vardhyamaṁ na yo rara ārya nāma dasyave* //3 //
*ahaṁ piteva vetasūm̐rabhiṣṭaye tugraṁ kutsāya smadibhaṁ cha randhayam* /
*ahaṁ bhuvaṁ yajamānasya rājani pra yadbhare tujaye na priyādhṛṣe* //4 //
*ahaṁ randhayaṁ mṛgayaṁ śrutarvaṇe yanmājihīta vayunā chanānuṣak* /
*ahaṁ veśaṁ namramāyave'karamahaṁ savyāya paḍgṛbhimarandhayam* //5 //
*ahaṁ sa yo navavāstvaṁ bṛhadrathaṁ saṁ vṛtreva dāsaṁ vṛtrahārujam* /
*yadvardhayantaṁ prathayantamānuṣagdūre pāre rajaso rochanākaram* //6 //
*ahaṁ sūryasya pari yāmyāśubhiḥ praitaśebhirvahamāna Ojasā* /
*yanmā sāvo manuṣa āha nirṇija ṛdhakkṛṣe dāsaṁ kṛtvyaṁ hathaiḥ* //7 //
*ahaṁ saptahā nahuṣo nahuṣṭaraḥ prāśrāvayaṁ śavasā turvaśaṁ yadum* /
*ahaṁ nya1nyaṁ sahasā sahaskaraṁ nava vrādhato navatiṁ cha vakṣayam* //8 //
*ahaṁ sapta sravato dhārayaṁ vṛṣā dravitnvaḥ pṛthivyāṁ sīrā adhi* /
*ahamarṇāsi vi tirāmi sukraturyudhā vidaṁ manave gātumiṣṭaye* //9 //

*ahaṁ tadāsu dhārayaṁ yadāsu na devaśchana tvaṣṭādhārayadruśat* /
*spārha gavāmūdhaḥ su vakṣaṇāsvā madhormadhu śvātrayaṁ somamāśiram* //10 //
*evā devām̐ indro vivye nṝnan pra chyautnena maghavā satyarādhāḥ* /
*viśvettā te harivaḥ śachīvo'bhi turāsaḥ svayaśo gṛṇanti* //11 //

ऋ. (Rv.) १०.५०.१-७

प्र वो महे मन्दमानायान्धसोऽर्चा विश्वानराय विश्वाभुवे ।
इन्द्रस्य यस्य सुमखं सहो महि श्रवो नृम्णं च रोदसी सपर्यतः ॥१॥
सो चिन्नु सख्या नर्य इनः स्तुतश्चर्कृत्य इन्द्रो मावते नरे ।
विश्वासु धूर्षु वाजकृत्येषु सत्पते वृत्रे वाप्स्व१भि शूर मन्दसे ॥२॥
के ते नर इन्द्र ये त इषे ये ते सुम्नं सधन्य१ मियक्षान् ।
के ते वाजायासुर्याय हिन्विरे के अप्सु स्वासूर्वरासु पौंस्ये ॥३॥
भुवस्त्वमिन्द्र ब्रह्मणा महान्भुवो विश्वेषु सवनेषु यियाः ।
भुवो नॄँच्यौतनो विश्वस्मिन्भरे ज्येष्ठश्च मन्त्रो विश्वचर्षणे ॥४॥
अवा नु कं ज्यायान् यावनसो महीं त ओमात्रां कृष्टयो विदुः ।
असो नु कमजरो वर्धाश्च विश्वेदेता सवना तूतुमा कृषे ॥५॥
एता विश्व सवना तूतुमा कृषे स्वयं सूनो सहसो यानि दधिषे ।
वराय ते पात्रं धर्मणे तना याो मन्त्रो ब्रह्मोद्यतं वचः ॥६॥
ये ते विप्र ब्रह्मकृतः सुते सचा वसूनां च वसुनश्च दावने ।
प्र ते सुम्नस्य मनसा पथा भुवन्मदे सुतस्य सोम्यस्यान्धसः ॥७॥

*pra vo mahe mandamānāyāndhaso'rchā viśvānarāya viśvābhuve* /
*indrasya yasya sumakhaṁ saho mahi śravo nṛmṇaṁ cha rodasī saparyataḥ* //1 //
*so chinnu sakhyā narya inaḥ stutaścharkṛtya indro māvate nare* /
*viśvāsu dhūrṣu vājakṛtyeṣu satpate vṛtre vāpsva1bhi śūra mandase* //2 //
*ke te nara indra ye ta iṣe ye te sumnaṁ sadhanya1 miyakṣān* /
*ke te vājāyāsuryāya hinvire ke apsu svāsūrvarāsu pauṁsye* //3 //
*bhuvastvamindra brahmaṇā mahānbhuvo viśveṣu savaneṣu yiāyaḥ* /
*bhuvo nṝm̐chyautano viśvasminbhare jyeṣṭhaścha mantro viśvacharṣaṇe* //4 //
*avā nu kaṁ jyāyān yāvanaso mahīṁ ta Omātrāṁ kṛṣṭayo viduḥ* /
*aso nu kamajaro vardhāścha viśvedetā savanā tūtumā kṛṣe* //5 //
*etā viśva savanā tūtumā kṛṣe svayaṁ sūno sahaso yāni dadhiṣe* /
*varāya te pātraṁ dharmaṇe tanā yāo mantro brahmodyataṁ vachaḥ* //6 //
*ye te vipra brahmakṛtaḥ sute sachā vasūnāṁ cha vasunaścha dāvane* /
*pra te sumnasya manasā pathā bhuvanmade sutasya somyasyāndhasaḥ* //7 //

## १०३. इरिम्बिठिः (Irimbiṭhiḥ)

१. इन्द्रः (Indraḥ) - अ. (Av.) २.३.१-३; २.४.१-३; २.५.१-७; २०.३८.१-३; २०.४४.१-३; २०.४६.१-३; २०.४७.७-९

अ. (Av.) २.३.१-३

अदो यदवधावत्यवत्कमधि पर्वतात्। तत्ते कृणोमि भेषजं सुभेषजं यथाससि ॥१॥
आदंगां कुविदंगा शतं या भेषजानि ते। तेषामसि त्वमुत्तममनास्रावमरोगणम् ॥२॥
नीचैः खन्त्यसुरा अरुः स्राणमिदं महत्। तदास्रावस्य भेषजं तदु रोगमनीनशत् ॥३॥

*ado yadavadhāvatyavatkamadhi parvatāt / tatte kṛṇomi bheṣajaṁ subheṣajaṁ yathāsasi* //1 //
*ādaṁgāṁ kuvidaṁgā śataṁ yā bheṣajāni te / teṣāmasi tvamuttamamanāsrāvamarogaṇam* //2 //
*nīchaiḥ khantyasurā aruḥ srāṇamidaṁ mahat / tadāsrāvasya bheṣajaṁ tadu rogamanīnaśat* //3 //

अ. (Av.) २.४.१-३

दीर्घायुत्वाय बृहते रणायारिष्यन्तो दक्षमाणाः सदैव ।
मणिं विष्कन्धदूषणं जंगिडो विभृमो वयम् ॥१॥
जंगिडो जम्भाद् विशराद् विष्कन्धादभिशोचनात् ।
मणिः सहस्रवीर्यः परि णः पातु विश्वतः ॥२॥
अयं विष्कन्धं सहते ऽयं बाधते अत्त्रिणः ।
अयं नो विश्वभेषजो जंगिडः पात्वंसहसः ॥३॥

*dīrghāyutvāya bṛhate raṇāyāriṣyanto dakṣamāṇāḥ sadaiva ।*
*maṇiṁ viṣkandhadūṣaṇaṁ jaṁgiḍo vibhṛmo vayam ॥1॥*
*jaṁgiḍo jambhād viśarād viṣkandhādabhiśochanāt ।*
*maṇiḥ sahasravīryaḥ pari ṇaḥ pātu viśvataḥ ॥2॥*
*ayaṁ viṣkandhaṁ sahate 'yaṁ bādhate attriṇaḥ ।*
*ayaṁ no viśvabheṣajo jaṁgiḍaḥ pātvaṁsahasaḥ ॥3॥*

अ. (Av.) २.५.१-७

इन्द्र जुषस्व प्र वहा याहि शूर हरिभ्याम् ।
पिबा सुतस्य मतेरिह मधोश्चकानश्चरुर्मदाय ॥१॥
इन्द्र जठरं नव्यो न पृणस्व मधोर्दिवो न ।
अस्य सुतस्य स्व१र्णोप त्वा मदाः सुवाचो अगुः ॥२॥
इन्द्रस्तुराषणिमत्रो वृत्रं यो जघान यतीर्न ।
बिभेद बलं भृगुर्न ससहे शत्रून् मदे सोमस्य ॥३॥
आ त्वा विशन्तुसुतास इन्द्र पृणस्व कुक्षी विड्ढि शक्र धियेह्या नः ।
श्रुधी हव गिरो मे जुषस्वेन्द्र स्वयुग्भिर्मत्स्वेह महे रणाय ॥४॥
इन्द्रस्य नु प्रा वोचं वीर्याणि यानि चकार प्रथमानि वज्री ।
अहन्नहिमन्वपस्ततर्द प्र वक्षणा अभिनत् पर्वतानाम् ॥५॥
अहन्नहिं पर्वते शिश्रियाणं त्वष्टास्मै वज्रं स्वर्यततक्ष ।
वाश्राइव धेनवः स्यन्दमाना अंजः समुद्रमव जग्मुरापः ॥६॥
वृषायमाणो अवृणीत सोमं त्रिकद्रुकेष्वपिबत् सुतस्य ।
आ सायकं मघवादत्त वज्रमहन्नेनं प्रथमजामहीनाम् ॥७॥

*indra juṣasva pra vahā yāhi śūra haribhyām ।*
*pibā sutasya materiha madhośchakānaścharurmadāya ॥1॥*
*indra jaṭharaṁ navyo na pṛṇasva madhordivo na ।*
*asya sutasya sva1rṇopa tvā madāḥ suvācho aguḥ ॥2॥*
*indrasturāṣaṇimatro vṛtraṁ yo jaghāna yatīrna ।*
*bibheda balaṁ bhṛgurna sasahe śatrūn made somasya ॥3॥*
*ā tvā viśantusutāsa indra pṛṇasva kukṣī viḍḍhi śakra dhiyehyā naḥ ।*
*śrudhī hava giro me juṣasvendra svayugbhirmatsveha mahe raṇāya ॥4॥*
*indrasya nu prā vochaṁ vīryāṇi yāni chakāra prathamāni vajrī ।*
*ahannahimanvapastatarda pra vakṣaṇā abhinat parvatānām ॥5॥*
*ahannahiṁ parvate śiśriyāṇaṁ tvaṣṭāsmai vajraṁ svaryatatakṣa ।*
*vāśrāiva dhenavaḥ syandamānā aṁjaḥ samudramava jagmurāpaḥ ॥6॥*
*vṛṣāyamāṇo avṛṇīta somaṁ trikadrukeṣvapibat sutasya ।*
*ā sāyakaṁ maghavādatta vajramahannenaṁ prathamajāmahīnām ॥7॥*

अ. (Av.) २०.३८.१-३

आ याहि सुषुमा हि त इन्द्र सोमं पिबा इमम्। एदं बर्हिः सदो मम ॥१॥
आ त्वा ब्रह्मयुजा हरी वहतामिन्द्र केशिना। उप ब्रह्माणि नः श्रृणु ॥२॥
ब्रह्माणस्त्वा वयं युजा सोमपामिन्द्र सोमिनः। सुतावन्तो हवामहे ॥३॥

*ā yāhi suṣumā hi ta indra somaṁ pibā imam । edaṁ barhiḥ sado mama ॥1॥*

*ā tvā brahmayujā harī vahatāmindra keśinā / upa brahmāṇi naḥ śṛṇu //2 //*
*brahmāṇastvā vayaṁ yujā somapāmindra sominaḥ / sutāvanto havāmahe //3 //*

अ. (Av.) २०.४४.१-३

प्र सम्राजं चर्षणीनामिन्द्रं स्तोता नव्यं गीर्भिः। नरं नृषाहं मंहिष्ठम् ॥१॥
यस्मिन्नुक्थानि रण्यन्ति विश्वानि च श्रवस्या। अपामवो न समुद्रे ॥२॥
तं सुष्टुत्या विवासे ज्येष्ठराजं भरे कृत्नुम्। महो वाजिनं सनिभ्यः ॥३॥

*pra samrājaṁ charṣaṇīnāmindraṁ stotā navyaṁ gīrbhiḥ / naraṁ nṛṣāhaṁ maṁhiṣṭham //1 //*
*yasminnukthāni raṇyanti viśvāni cha śravasyā / apāmavo na samudre //2 //*
*taṁ suṣṭutyā vivāse jyeṣṭharājaṁ bhare kṛtnum / maho vājinaṁ sanibhyaḥ //3 //*

अ. (Av.) २०.४६.१-३

प्रणेतारं वस्यो अच्छा कर्त्तारं ज्योतिः समत्सु। सासह्वांसं युधामित्रान् ॥१॥
स नः पप्रिः पारयाति स्वस्ति नावा पुरुहूतः। इन्द्रो विश्वा अति द्विषः ॥२॥
स त्वं न इन्द्र वाजेभिर्दशस्या च गातुया च। अच्छा च नः सुम्नं नेषि ॥३॥

*praṇetāraṁ vasyo achchhā karttāraṁ jyotiḥ samatsu / sāsahnāṁsaṁ yudhāmitrān //1 //*
*sa naḥ papriḥ pārayāti svasti nāvā puruhūtaḥ / indro viśvā ati dviṣaḥ //2 //*
*sa tvaṁ na indra vājebhirdaśasyā cha gātuyā cha / achchhā cha naḥ sumnaṁ neṣi //3 //*

अ. (Av.) २०.४७.७-९

आ याहि सुषुमा हि त इन्द्र सोमं पिबा इमम्। एदं बर्हिः सदो मम ॥७॥
आ त्वा ब्रह्मयुजा हरी वहतामिन्द्र केशिना। उप ब्रह्माणि नः श्रृणु ॥८॥
ब्रह्माणस्त्वा वयं युजा सोमपामिन्द्र सोमिनः। सुतावन्तो हवामहे ॥९॥

*ā yāhi suṣumā hi ta indra somaṁ pibā imam / edaṁ barhiḥ sado mama //7 //*
*ā tvā brahmayujā harī vahatāmindra keśinā / upa brahmāṇi naḥ śṛṇu //8 //*
*brahmāṇastvā vayaṁ yujā somapāmindra sominaḥ / sutāvanto havāmahe //9 //*

## १०४. इरिम्बिठिः काण्वः (Irimbiṭhiḥ Kāṇvaḥ)

१. अग्निसूर्यानिलाः (Agnisūryānilāḥ) - ऋ. (Rv.) ८.१८.९

शमग्निरग्निभिः करच्छं नस्तपतु सूर्यः। शं वातो वात्वरपा अप स्रिधः ॥९॥

*śamagniragnibhiḥ karachchhaṁ nastapatu sūryaḥ / śaṁ vāto vātvarapā apa sridhaḥ //9 //*

२. अश्विनौ (Aśvinau) - ऋ. (Rv.) ८.१८.८

उत त्या दैव्या भिषजा शं नः करतो अश्विना। युयुयातामितो रपो अप स्रिधः ॥८॥

*uta tyā daivyā bhiṣajā śaṁ naḥ karato aśvinā / yuyuyātāmito rapo apa sridhaḥ //8 //*

३. आदित्याः (Ādityāḥ) - ऋ. (Rv.) ८.१८.१-७; ८.१८.१०-२२ ; सा. (Sv.) ३९५ , ३९७

ऋ. (Rv.) ८.१८.१-७

इदं ह नूनमेषां सुम्नं भिक्षेत मर्त्यः। आदित्यानामपूर्व्यं सवीमनि ॥१॥
अन्वाणौ ह्येषां पन्था आदित्यानाम्। अदब्धाः सन्ति पायवः सुगेवृधः ॥२॥
तत्सु नः सविता भगो वरुणो मित्रो अर्यमा। शर्म यच्छन्तु सप्रथो यदीमहे ॥३॥
देवेभिर्देव्यदितेऽरिष्टभर्मन्ना गहि। स्मत्सूरिभिः पुरुप्रिये सुशर्मभिः ॥४॥
ते हि पुत्रासो अदितेर्विदुर्द्वेषांसि योतवे। अंहोश्चिदुरुचक्रयोऽनेहसः ॥५॥
अदितिर्नो दिवा पशुमदितिर्नक्तमद्वयाः। अदितिः पात्वंहसः सदावृधा ॥६॥
उत स्या नो दिवा मतिरदितिरूत्या गमत्। सा शंताति मयस्करदप स्रिधः ॥७॥

*idaṁ ha nūnameṣāṁ sumnaṁ bhikṣeta martyaḥ / ādityānāmapūrvya savīmani //1 //*
*anvāṇau hyeṣāṁ panthā ādityānām / adabdhāḥ santi pāyavaḥ sugevṛdhaḥ //2 //*
*tatsu naḥ savitā bhago varuṇo mitro aryamā / śarma yachchhantu saprātho yadīmahe //3 //*

*devebhirdevyadite'riṣṭabharmannā gahi । smatsūribhiḥ purupriye suśarmabhiḥ ॥4॥*
*te hi putrāso aditervidurdveṣaṁsi yotave । aṁhośchiduruchakrayo'nehasaḥ ॥5॥*
*aditirno divā paśumaditirnaktamadvayāḥ । aditiḥ pātvaṁhasaḥ sadāvṛdhā ॥6॥*
*uta syā no divā matiraditirūtyā gamat । sā śaṁtāti mayaskaradapa sridhaḥ ॥7॥*

ऋ. (Rv.) ८.१८.१०-२२

अपामीवामप स्रिधमप सेधत दुर्मतिम्। आदित्यासो युयोतना नो अंहसः ॥१०॥
युयोता शरुमस्मदाँ आदित्यास उतामतिम्। ऋधग द्वेषः कृणुत विश्ववेदसः ॥११॥
तत्सु नः शर्म यच्छतादित्या यन्मुमोचति। एनस्वन्तं चिदेनसः सुदानवः ॥१२॥
यो नः कश्चिद्रिरिक्षति रक्षस्त्वेन मर्त्यः। स्वैः ष एवै रिरिषीष्ट युर्जनः ॥१३॥
समित्तमघमश्नवद्दुः शंसं मर्त्य रिपुम्। यो अस्मत्रा दुर्हणावाँ उप द्वयुः ॥१४॥
पाकत्रा स्थन देवा हृत्सु जानीथ मर्त्यम्। उप द्वयुं चाद्वयुं च वसवः ॥१५॥
आ शर्म पर्वतानामोतापां वृणीमहे। द्यावाक्षामारे अस्मद्रपस्कृतम् ॥१६॥
ते नो भद्रेण शर्मणा युष्माकं नावा वसवः । अति विश्वानि दुरिता पिपर्तन ॥१७॥
तुचे तनाय तत्सु नो द्राघीय आयुर्जीवसे। आदित्यासः सुमहसः कृणोतन ॥१८॥
याो हीळो वो अन्तर आदित्या अस्ति मृळत। युष्मे इद्वो अपि ष्मसि सजात्ये ॥१९॥
बृहद्वरूथं मरुतां देवं त्रतारमश्विना। मित्रमीमहे वरुणं स्वस्तये ॥२०॥
अनेहो मित्रार्यमन्नृवद्वरुण शंस्यम्। त्रिवरूथं मरुतो यन्त नश्छद्रिः ॥२१॥
ये चिद्धि मृतयुबन्धव आदित्या मनवः स्मसि। प्र सून आयुर्जीव से तिरेतन॥२२॥

*apāmīvāmapa sridhamapa sedhata durmatim । ādityāso yuyotanā no aṁhasaḥ ॥10॥*
*yuyotā śarumasmadāṁ̐ ādityāsa utāmatim । ṛdhaga dveṣaḥ kṛṇuta viśvavedasaḥ ॥11॥*
*tatsu naḥ śarma yachchhatādityā yanmumochati । enasvantaṁ chidenasaḥ sudānavaḥ ॥12॥*
*yo naḥ kaśchidririkṣati rakṣastvena martyaḥ । svaiḥ ṣa evai ririṣīṣṭa yurjanaḥ ॥13॥*
*samittamaghamaśnavadduḥ śaṁsaṁ martya ripum । yeā asmatrā durhaṇāvāṁ̐ upa dvayuḥ ॥14॥*
*pākatrā sthana devā hṛtsu jānītha martyam । upa dvayuṁ chādvayuṁ cha vasavaḥ ॥15॥*
*ā śarma parvatānāmotāpāṁ vṛṇīmahe । dyāvākṣāmāre asmadrapaskṛtam ॥16॥*
*te no bhadreṇa śarmaṇā śurūmākaṁ nāvā vasavaḥ । ati viśvāni duritā pipartana ॥17॥*
*tuche tanāya tatsu no drāghīya āyurjīvase । ādityāsaḥ sumahasaḥ kṛṇotana ॥18॥*
*yāo hīḻo vo antara ādityā asti mṛḻata । yuṣme idvo api ṣmasi sajātye ॥19॥*
*bṛhadvarūthaṁ marutāṁ devaṁ tratāramaśvinā । mitramīmahe varuṇaṁ svastaye ॥20॥*
*aneho mitrāryamannṛvadvaruṇa śaṁsyam । trivarūthaṁ maruto yanta naśchhadriḥ ॥21॥*
*ye chiddhi mṛtayubandhava ādityā manavaḥ smasi । pra sūna āyurjīva se tiretana ॥22॥*

सा. (Sv.) ३९५

तुचे तुनाय तत्सु ना द्राघीय आयुर्जीवसे। आदित्यासः सुमहसः कृणोतन ॥५॥
*tuche tunāya tatsu nā drāghīya āyurjīvase । ādityāsaḥ sumahasaḥ kṛṇotana ॥5॥*

सा. (Sv.) ३९७

अपामीवामप स्रिधमप सेधत दुर्मतिम्। आदित्यासो युयोतना नो अं हसः ॥७॥
*apāmīvāmapa sridhamapa sedhata durmatim । ādityāso yuyotanā no aṁ hasaḥ ॥7॥*

४. इन्द्रः (Indraḥ) - ऋ. (Rv.) ८.१६.१-१२; ८.१७.१-१५; सा. (Sv.) ६६६-६६८; ७२५-७२७

ऋ. (Rv.) ८.१६.१-१२

प्र सम्राजं चर्षणीनामिन्द्रं स्तोता नव्यं गीर्भिः। नरं नृषाहं मंहिष्ठम् ॥१॥
यस्मिन्नुक्थानि रण्यन्ति विश्वनि च श्रवस्या। उपामवो न समुद्रे ॥२॥

तं सुष्टुत्या विवासे ज्येष्ठराजं भरे कृत्नुम्। महो वाजिनं सनिभ्यः ॥३॥
यस्यानूना गभीरा मदा उरवस्तरुत्राः। हर्षुमन्तः शूरसातौ ॥४॥
तमिद्धनेषु हितेष्वधिवाकाय हवन्ते। येषामिन्द्रस्ते जयन्ति ॥५॥
तमिच्च्यौत्नैरार्यन्ति तं कृतेभिश्चर्षणयः। एष इन्द्रो वरिवस्कृत् ॥६॥
इन्द्रो ब्रह्मेन्द्र ऋषिरिन्द्रः पुरू पुरुहूतः। महान्महीभिः शचीभिः ॥७॥
स स्तोम्यः स हव्यः सत्य सत्वा तुविकूर्मिः। एकश्चित्सन्नभिभूतिः ॥८॥
तमर्केभिस्तं सामभिस्तं गायत्रैश्चर्षणयः। इन्द्रं वर्धन्ति क्षितयः ॥९॥
प्रणेतारं वस्यो अच्छा कर्तारं ज्योतिः समत्सु। सासह्वांसं युधामित्रान् ॥१०॥
स नः पप्रिः पारयाति स्वस्ति नावा पुरुहूतः। इन्द्रो विश्वा अति द्विषः ॥११॥
स त्वं न इन्द्र वाजेभिर्दशस्या च गातुया च। अच्छा च नः सुम्नं नेषि ॥१२॥

*pra samrājaṁ charṣaṇīnāmindraṁ stotā navyaṁ gīrbhiḥ | naraṁ nṛṣāhaṁ maṁhiṣṭham ||1 ||*
*yasminnukthāni raṇyanti viśvani cha śravasyā | upāmavo na samudre ||2 ||*
*taṁ suṣṭutyā vivāse jyeṣṭharājaṁ bhare kṛtnum | maho vājinaṁ sanibhyaḥ ||3 ||*
*yasyānūnā gabhīrā madā uravastarutrāḥ | harṣumantaḥ śūrasātau ||4 ||*
*tamiddhaneṣu hiteṣvadhivākāya havante | yeṣāmindraste jayanti ||5 ||*
*tamichchyautnairāryanti taṁ kṛtebhiścharṣaṇayaḥ | eṣa indro varivaskṛt ||6 ||*
*indro brahmendra ṛṣirindraḥ purū puruhūtaḥ | mahānmahībhiḥ śachībhiḥ ||7 ||*
*sa stomyaḥ sa havyaḥ satya satvā tuvikūrmiḥ | ekaśchitsannabhibhūtiḥ ||8 ||*
*tamarkebhistaṁ sāmabhistaṁ gāyatraiścharṣaṇayaḥ | indraṁ vardhanti kṣitayaḥ ||9 ||*
*praṇetāraṁ vasyo achchhā kartāraṁ jyotiḥ samatsu | sāsahnāṁsaṁ yudhāmitrān ||10 ||*
*sa naḥ papriḥ pārayāti svasti nāvā puruhūtaḥ | indro viśvā ati dviṣaḥ ||11 ||*
*sa tvaṁ na indra vājebhirdaśasyā cha gātuyā cha | achchhā cha naḥ sumnaṁ neṣi ||12 ||*

ऋ. (Rv.) ८.१७.१-१५

आ याहि सुषुमा हि त इन्द्र सोमं पिबा इमम्। एदं बर्हिः सदो मम ॥१॥
आ त्वाब्रह्मयुजा हरी वहतामिन्द्र केशिना। उप ब्रह्माणि नः शृणु ॥२॥
ब्रह्माणस्त्वा वयं युजा सोमपामिन्द्र सोमिनः। सुतावन्तो हवामहे ॥३॥
आ नो याहि सुतावतोऽस्माकं सुष्टुतीरुप। पिबा सु शिप्रिन्नन्धसः ॥४॥
आ ते सिंचामि कुक्ष्योरनु गात्रा वि धावतु। गृभाय जिह्वया मधु ॥५॥
स्वादुष्टे अस्तु संसुदे मधुमान्तन्वे३तव। सोमः शमस्तु ते हृदे ॥६॥
अयमु त्वा विचर्षणे जनीरिवाभि संवृतः। प्र सोम इन्द्र सर्पतु ॥७॥
तविग्रीवो वपोदरः सुबाहुरन्धसो मदे। इन्द्रो वृत्राणि जिघ्नते ॥८॥
इन्द्र प्रेहि पुरस्त्वं विश्वस्येशान ओजसा। वृत्राणि वृत्रहंजहि ॥९॥
दीर्घस्ते अस्तवङ्कुशो येना वसु प्रयच्छसि। यजमानाय सुन्वते ॥१०॥
अयं त इन्द्र सोमो निपूतो अधि बर्हिषि। एहीमस्य द्रवा पिब ॥११॥
शाचिंगो शाचिंपूजनायं रणाय ते सुतः। आखण्डल प्र हूयसे ॥१२॥
यस्ते शृंगवृषो नपात् प्रणपात्कुण्डपाय्यः। न्यस्मिन्दध्र आ मनः ॥१३॥
वास्तोष्पते ध्रुवा स्थणांसत्रं सोम्यानाम्। द्रप्सो भेत्ता पुरां शश्वतीनामिन्द्रो मुनीनां सखा ॥१४॥
पृदाकुसानुर्यजतो गवेषण एकः सन्नभि भूयसः।
भूर्णिमश्वं नयत्तुजा पुरो गृभेन्द्रं सोमस्य पीतये ॥१५॥

*ā yāhi suṣumā hi ta indra somaṁ pibā imam | edaṁ barhiḥ sado mama ||1 ||*
*ā tvābrahmayujā harī vahatāmindra keśinā | upa brahmāṇi naḥ śṛṇu ||2 ||*
*brahmāṇastvā vayaṁ yujā somapāmindra sominaḥ | sutāvanto havāmahe ||3 ||*
*ā no yāhi sutāvato'smākaṁ suṣṭutīrupa | pibā su śiprinnandhasaḥ ||4 ||*
*ā te siṁchāmi kukṣayoranu gātrā vi dhāvatu | gṛbhāya jihnayā madhu ||5 ||*
*svāduṣṭe astu saṁsude madhumāntanve3tava | somaḥ śamastu te hṛde ||6 ||*

*ayamu tvā vicharṣaṇe janīrivābhi saṁvṛtaḥ | pra soma indra sarpatu ||7 ||*
*tavigrīvo vapodaraḥ subāhurandhaso made | indro vṛtrāṇi jighnate ||8 ||*
*indra prehi purastvaṁ viśvasyeśāna Ojasā | vṛtrāṇi vṛtrahaṁjahi ||9 ||*
*dīrghaste astavaṅkuśo yenā vasu prayachchhasi | yajamānāya sunvate ||10 ||*
*ayaṁ ta indra somo nipūto adhi barhiṣi | ehīmasya dravā piba ||11 ||*
*śāchiṁgo śāchiṁpūjanāyaṁ raṇāya te sutaḥ | ākhaṇḍala pra hūyase ||12 ||*
*yaste śṛṁgavṛṣo napāt praṇapātkuṇḍapāyyaḥ | nyasmindadhra ā manaḥ ||13 ||*
*vāstoṣpate dhruvā sthaṇāṁsatraṁ somyānām | drapso bhettā purāṁ śaśvatīnāmindro munīnāṁ sakhā ||14 ||*
*pṛdākusānuryajato gaveṣaṇa ekaḥ sannabhi bhūyasaḥ |*
*bhūrṇimaśvaṁ nayattujā puro gṛbhendraṁ somasya pītaye ||15 ||*

सा. (Sv.) ६६६-६६८

आ याहि सुषुमा हि त इन्द्र सोमं पिबा इमम्। इदं बर्हिः सदो मम ॥१॥
आ त्वाब्रह्मयुजा हरी वहतामिन्द्र केशिना। उप ब्रह्माणि नः श्रृणु ॥२॥
ब्रह्माणस्त्वा युजा वयं सोमपामिन्द्र सोमिनः। सुतावन्तो हवामहे॥३॥
*ā yāhi suṣumā hi ta indra somaṁ pibā imam | idaṁ barhiḥ sado mama ||1 ||*
*ā tvābrahmayujā harī vahatāmindra keśinā | upa brahmāṇi naḥ śṛṇu ||2 ||*
*brahmāṇastvā yujā vayaṁ somapāmindra sominaḥ | sutāvanto havāmahe ||3 ||*

सा. (Sv.) ७२५-७२७

अयं त इन्द्र सोमो निपूतो अधि बर्हिषि। एहीमस्य द्रवा पिब ॥१॥
शाचिगो शाचिपूजनायं रणाय ते सुतः। आखण्डल प्र हूयसे ॥२॥
यस्ते श्रृंगवृषो णापात् प्राणापात् कुण्डपाय्यः। नयस्मिन् दध्र आ मनः ॥३॥
*ayaṁ ta indra somo nipūto adhi barhiṣi | ehīmasya dravā piba ||1 ||*
*śāchigo śāchipūjanāyaṁ raṇāya te sutaḥ | ākhaṇḍala pra hūyase ||2 ||*
*yaste śṛṁgavṛṣo ṇāpāt prāṇāpāt kuṇḍapāyyaḥ | nayasmin dadhra ā manaḥ ||3 ||*

**१०५. इरिम्बिठिः काण्वः (साग्री. सास्वा. ऋसर्व. ८.१८.७); पुरुमीढ (सार्षेदी.) (Irimbiṭhiḥ Kāṇvaḥ [Ssb. Sas. Rss. 8.18.7]; Purumīḍha [Sad.])**

१. अदितिः (Aditiḥ) - सा. (Sv.) १०२

उत स्या नो दिवा मतिरदितिरूत्यागमत्। सा शन्ताति मयस्करदप स्रिधः ॥६॥
*uta syā no divā matiraditirūtyāgamat | sā śantāti mayaskaradapa sridhaḥ ||6 ||*

**१०६. इरिम्बिठिः काण्वः (साग्री. सास्वा. ऋसर्व. ८.१६.१; ८.१७.११; ८.१७.१); इरिमीढः (सार्षेदी.) (Irimbiṭhiḥ Kāṇvaḥ [Ssb. Sas. Rss. 8.16.1; 8.17.11; 8.17.1])**

१. इन्द्रः (INDRAḤ) - सा. (Sv.) १४४ , १५९ , १९१

सा. (Sv.) १४४

प्र संम्राजं चर्षणीनामिन्द्रं स्तोता नव्यं गीर्भिः। नरं नृषाहं मंहिष्ठम् ॥१०॥
*pra saṁmrājaṁ charṣaṇīnāmindraṁ stotā navyaṁ gīrbhiḥ | naraṁ nṛṣāhaṁ maṁhiṣṭham ||10 ||*

सा. (Sv.) १५९

अयं त इन्द्र सोमो निपूतो अधि बर्हिषि। एहीमस्य द्रवा पिब ॥५॥
*ayaṁ ta indra somo nipūto adhi barhiṣi | ehīmasya dravā piba ||5 ||*

सा. (Sv.) १९१

आ याहि सुषुमा हि त इन्द्र सोमं पिबा इमम्। एदं बर्हिः सदो मम ॥७॥
*ā yāhi suṣumā hi ta indra somaṁ pibā imam | edaṁ barhiḥ sado mama ||7 ||*

## १०७. इष आत्रेयः (Iṣa Ātreyaḥ)

१. अग्निः (Agniḥ) - ऋ. (Rv.) ५.७.१-१०; ५.८.१-७

ऋ. (Rv.) ५.७.१-१०

सखायः सं वः सम्यंचमिषं स्तोमं चाग्नये। वर्षिष्ठाय क्षितीनामूर्जो नप्त्रे सहस्वते ॥१॥
कुत्रा चिद्यस्य समृतौ रण्वा नरो नृषदने। अर्हन्तश्चिद्यमिन्धते संजनयन्ति जन्तवः ॥२॥
सं यदिषो वनामहे सं हव्या मानुषाणाम्। उत द्युम्नस्य शवस ऋतस्य रश्मिमा ददे ॥३॥
स स्मा कृणोति केतुमा नक्तं चिद्दूर आ सते। पावको यद्वनस्पतीन्प्र स्मा मिनात्यजरः ॥४॥
अव स्म यस्य वेषणे स्वेदं पथिषु जुह्वति। अभीमह स्वजेन्यं भूमा पृष्ठेव रुरुहुः ॥५॥
यं मर्त्यः पुरुस्पृहं विदद्विश्वस्य धायसे। प्र स्वादनं पितूनामस्ततातिं चिदायवे ॥६॥
स हि ष्मा धन्वाक्षितं दाता न दात्या पशुः। हिरिश्मश्रुः शुचिदन्नृभुरनिभृष्टतविषिः ॥७॥
शुचिः ष्म यस्मा अत्रिवत्प्र स्वधितीव रीयते। सुषूरसूत माता क्राणा यदानशे भगम् ॥८॥
आ यस्ते सर्पिरासुतेऽग्ने शमस्ति धायसे। ऐषु द्युम्नमुत श्रव आ चित्तं मर्त्येषु धाः ॥९॥
इति चिन्मन्युमध्रिजस्त्वादातमा पशुं ददे।
आदग्ने अपृणतोऽत्रिः सासह्याद्दस्यूनिषः सासह्यान्नॄन् ॥१०॥

*sakhāyaḥ saṁ vaḥ samyaṁchamiṣaṁ stomaṁ chāgnaye |*
*varṣiṣṭhāya kṣitīnāmūrjo naptre sahasvate ||1 ||*
*kutrā chidyasya samṛtau raṇvā naro nṛṣadane |*
*arhantaśchidyamindhate saṁjanayanti jantavaḥ ||2 ||*
*saṁ yadiṣo vanāmahe saṁ havyā mānuṣāṇām |*
*uta dyumnasya śavasa ṛtasya raśmimā dade ||3 ||*
*sa smā kṛṇoti ketumā naktaṁ chiddūra ā sate |*
*pāvako yadvanspatīnpra smā mināṭyajaraḥ ||4 ||*
*ava sma yasya veṣaṇe svedaṁ pathiṣu juhnati |*
*abhīmaha svajenyaṁ bhūmā pṛṣṭheva ruruhuḥ ||5 ||*
*yaṁ martyaḥ puruspṛhaṁ vidadviśvasya dhāyase |*
*pra svādanaṁ pitūnāmastatātiṁ chidāyave ||6 ||*
*sa hi ṣmā dhanvākṣitaṁ dātā na dātyā paśuḥ |*
*hiriśmaśruḥ śuchidannṛbhuranibhṛṣṭataviṣiḥ ||7 ||*
*śuchiḥ ṣma yasmā atrivatpra svadhitīva rīyate |*
*suṣūrasūta mātā krāṇā yadānaśe bhagam ||8 ||*
*ā yaste sarpirāsute'gne śamasti dhāyase |*
*aiṣu dyumnamuta śrava ā chittaṁ martyeṣu dhāḥ ||9 ||*
*iti chinmanyumadhrijastvādātamā paśuṁ dade |*
*ādagne apṛṇato'triḥ sāsahyāddasyūniṣaḥ sāsahyānnṝn ||10 ||*

ऋ. (Rv.) ५.८.१-७

त्वामग्न ऋतायवः समीधिरे प्रत्नं प्रत्नास ऊतये सहस्कृत ।
पुरुश्चन्द्र यजतं विश्वधायसं दमूनसं गृहपतिं वरेण्यम् ॥१॥
त्वामग्ने अतिथिं पूर्व्यं विशः शोचिष्केशं गृहपतिं नि षेदिरे ।
बृहत्केतुं पुरुरूपं धनस्पृतं सुशर्माणं स्ववसं जरद्विषम् ॥२॥
त्वामग्ने मानुषीरीळते विशो होत्राविदं विविचिं रत्नधातमम् ।
गुहा सन्तं सुभग विश्वदर्शतं तुविष्वणसं सुयजं घृतश्रियम् ॥३॥
त्वामग्ने धर्णसिं विश्वधा वयं गीर्भिर्गृणन्तो नमसोप सेदिम ।
स नो जुषस्व समिधानो अंगिरो देवो मर्तस्य यशसा सुदीतिभिः ॥४॥
त्वमग्ने पुरुरूपो विशेविशे व्यो दधासि प्रत्नथा पुरुष्टुत ।
पुरूण्यन्ना सहसा वि राजसि त्विषिः सा ते तित्विषाणस्य नाधृषे ॥५॥
त्वामग्ने समिधानं यविष्ठ्य देवा दूतं चक्रिरे हव्यवाहनम् ।
उरुज्रयसं घृतयोनिमाहुतं त्वेषं चक्षुर्दधिरे चोदयन्मति ॥६॥

त्वामग्ने प्रदिव आहुतं घृतैः सुम्नायवः सुषमिधा समीधिरे ।
स वावृधान ओषधीभिरुक्षितो३भि ज्रयांसि पार्थिवा वि तिष्ठसे ॥७ ॥
*tvāmagna ṛtāyavaḥ samīdhire pratnaṁ pratnāsa ūtaye sahaskṛta /*
*puruśchandra yajataṁ viśvadhāyasaṁ damūnasaṁ gṛhapatiṁ vareṇyam //1 //*
*tvāmagne atithiṁ pūrvya viśaḥ śochiṣkeśaṁ gṛhapatiṁ ni ṣedire /*
*bṛhatketuṁ pururūpaṁ dhanaspṛtaṁ suśarmāṇaṁ svavasaṁ jaradviṣam //2 //*
*tvāmagne mānuṣīrīḻate viśo hotrāvidaṁ vivichiṁ ratnadhātamam /*
*guhā santaṁ subhaga viśvadarśataṁ tuviṣvaṇasaṁ suyajaṁ ghṛtaśriyam //3 //*
*tvāmagne dharṇasiṁ viśvadhā vayaṁ gīrbhirgṛṇanto namasopa sedima /*
*sa no juṣasva samidhāno aṁgiro devo martasya yaśasā sudītibhiḥ //4 //*
*tvamagne pururūpo viśeviśe vyo dadhāsi pratnathā puruṣṭuta /*
*purūṇyannā sahasā vi rājasi tviṣiḥ sā te titviṣāṇasya nādhṛṣe //5 //*
*tvāmagne samidhānaṁ yaviṣṭhya devā dūtaṁ chakrire havyavāhanam /*
*urujrayasaṁ ghṛtayonimāhutaṁ tveṣaṁ chakṣurdadhire chodayanmati //6 //*
*tvāmagne pradiva āhutaṁ ghṛtaiḥ sumnāyavaḥ suṣamidhā samīdhire /*
*sa vāvṛdhāna Oṣadhībhirukṣito3bhi jrayāṁsi pārthivā vi tiṣṭhase //7 //*

## १०८. उचथ्यः (Uchathyaḥ)

१. पवमानः सोमः (Pavamānaḥ Somaḥ)- ऋ. (Rv.) ९.५०.१-५; ९.५१.१-५; ९.५२.१-५

ऋ. (Rv.) ९.५०.१-५

उत्ते शुष्मास ईरते सिन्धोरूर्मेरिव स्वनः । वाणस्य चोदया पविम् ॥१ ॥
प्रसवे त उदीरते तिस्रो वाचो मखस्युवः । यदव्य एषि सानवि ॥२ ॥
अव्यो वारे परि प्रियं हरि हिन्वन्त्यद्रिभिः । पवमानं मधुश्चुतम् ॥३ ॥
आ पवस्व मदिन्तम पवित्रं धारया कवे । अर्कस्य योनिमासदम् ॥४ ॥
स पवस्व मदिन्तम गोभिरंजानो अक्तुभिः । इन्दविन्द्राय पीतये ॥५ ॥
*utte śuṣmāsa īrate sindhorūrmeriva svanaḥ / vāṇasya chodayā pavim //1 //*
*prasave ta udīrate tisro vācho makhasyuvaḥ / yadavya eṣi sānavi //2 //*
*avyo vāre pari priyaṁ hari hinvantyadribhiḥ / pavamānaṁ madhuśchutam //3 //*
*ā pavasva madintama pavitraṁ dhārayā kave / arkasya yonimāsadam //4 //*
*sa pavasva madintama gobhiraṁjāno aktubhiḥ / indavindrāya pītaye //5 //*

ऋ. (Rv.) ९.५१.१-५

अध्वर्यो अद्रिभिः सुतं सोमं पवित्र आ सृज । पुनीहीन्द्राय पातवे ॥१ ॥
दिवः पीयूषमुत्तमं सोममिन्द्राय वज्रिणे । सुनोता मधुमत्तमम् ॥२ ॥
तव त्य इन्दो अन्धसो देवा मधेर्व्यश्नते । पवमानस्य मरुतः ॥३ ॥
त्वं हि सोम वर्धयन्त्सुतो मदाय भूर्णये । वृषन्त्स्तोतारमूतये ॥४ ॥
अभ्यर्ष विचक्षण पवित्रं धारया सुतः । अभि वाजमुत श्रवः ॥५ ॥
*adhvaryo adribhiḥ sutaṁ somaṁ pavitra ā sṛja / punīhīndrāya pātave //1 //*
*divaḥ pīyūṣamuttamaṁ somamindrāya vajriṇe / sunotā madhumattamam //2 //*
*tava tya indo andhaso devā madhervyaśnate / pavamānasya marutaḥ //3 //*
*tvaṁ hi soma vardhayantsuto madāya bhūrṇaye / vṛṣantstotāramūtaye //4 //*
*abhyarṣa vichakṣaṇa pavitraṁ dhārayā sutaḥ / abhi vājamuta śravaḥ //5 //*

ऋ. (Rv.) ९.५२.१-५

परि द्युक्षः सन्द्रयिर्भरद्वाजं नो अन्धसा । सुवानो अर्ष पवित्र आ ॥१ ॥
तव प्रत्नेभिरध्वभिरव्यो वारे परि प्रियः । सहस्रधारो यात्तना ॥२ ॥
चरुर्न यस्तमींखयेन्दो न दानमींखय । वधैर्वधस्नवींखय ॥३ ॥
नि शुष्ममिन्दवेषां पुरुहूत जनानाम् । यो अस्माँ आदिदेशति ॥४ ॥
शतं न इन्द ऊतिभिः सहस्रं वा शुचीनाम् । पवस्व मंहयद्रयिः ॥५ ॥
*pari dyukṣaḥ sandrayirbharadvājaṁ no andhasā / suvāno arṣa pavitra ā //1 //*

*tava pratnebhiradhvabhiravyo vāre pari priyaḥ | sahasradhāro yāttanā ||2 ||*
*charurna yastamīṁkhayendo na dānamīṁkhaya | vadhairvadhasnavīṁkhaya ||3 ||*
*ni śuṣmamindaveṣāṁ puruhūta janānām | yo asmām̐ ādideśati ||4 ||*
*śataṁ na inda ūtibhiḥ sahasraṁ vā śuchīnām | pavasva maṁhayadrayiḥ ||5 ||*

## १०९. उचथ्य आङ्गिरस (Uchathya Āṅgirasa)

१. पवमान सोमः (Pavamāna Somaḥ) - सा. (Sv.) ४९६; ४९९; १२०५-१२०९; १२२५-१२२७

सा. (Sv.) ४९६

परि द्युक्षं सनद्रयिं भरद्वाजं नो अन्धसा। स्वानो अर्ष पवित्र आ ॥१०॥

*pari dyukṣaṁ sanadrayiṁ bharadvājaṁ no andhasā | svāno arṣa pavitra ā ||10 ||*

सा. (Sv.) ४९९

अध्वर्यो अद्रिभिः सुतं सोमं पवित्र आ नय। पुनाहीन्द्राय पातवे ॥३॥

*adhvaryo adribhiḥ sutaṁ somaṁ pavitra ā naya | punāhīndrāya pātave ||3 ||*

सा. (Sv.) १२०५-१२०९

उत्ते शुष्मास ईरते सिन्धोरूर्मेरिव स्वनः। वाणस्य चोदया पविम् ॥१॥
प्रसवे त उदीरते तिस्रो वाचो मखस्युवः। यदव्य एषि सानवि ॥२॥
अव्या वारैः परिप्रियं हरिं हिन्वन्त्यद्रिभिः। पवमानं मधुश्चुतम् ॥३॥
आ पवस्व मदिन्तम पवित्रं धारया कवे। अर्कस्य योनिमासदम् ॥४॥
स पवस्व मदिन्तम गोभिरंजानो अक्तुभिः। एन्द्रस्य जठरं विश ॥५॥

*utte śuṣmāsa īrate sindhorūrmeriva svanaḥ | vāṇasya chodayā pavim ||1 ||*
*prasave ta udīrate tisro vācho makhasyuvaḥ | yadavya eṣi sānavi ||2 ||*
*avyā vāraiḥ paripriyaṁ hariṁ hinvantyadribhiḥ | pavamānaṁ madhuśchutam ||3 ||*
*ā pavasva madintama pavitraṁ dhārayā kave | arkasya yonimāsadam ||4 ||*
*sa pavasva madintama gobhiraṁjāno aktubhiḥ | endrasya jaṭharaṁ viśa ||5 ||*

सा. (Sv.) १२२५-१२२७

अध्वर्यो अद्रिभिः सुतं सोमं पवित्र आ नय। पुनाहीन्द्राय पातवे ॥१॥
तव त्यइन्दो अन्धसो देवा मधोर्व्याशत। पवमानस्य मरुतः ॥२॥
दिवः पीयूषमुत्तमं सोममिन्द्राय वज्रिणे। सुनोता मधुमत्तमम्॥३॥

*adhvaryo adribhiḥ sutaṁ somaṁ pavitra ā naya | punāhīndrāya pātave ||1 ||*
*tava tyaindo andhaso devā madhorvyāśata | pavamānasya marutaḥ ||2 ||*
*divaḥ pīyūṣamuttamaṁ somamindrāya vajriṇe | sunotā madhumattamam ||3 ||*

## ११०. उच्छोचनः (Uchchhochanaḥ)

१. बृहस्पत्यादयः (Bṛhaspatyādayaḥ) - अ. (Av.) ६.१०३.१-३

सादनं वो बृहस्पतिः संदानं सविता करत्। संदानं मित्रो अर्यमा संदानं भगो अश्विना ॥१॥
सं परमान्त्समवमानथो सं द्यामि मध्यमान्। इन्द्रस्तान् पर्यहार्दाम्ना तानग्ने सं द्या त्वम् ॥२॥
अमी ये युधमायन्ति केतून् कृत्वानीकशः। इन्द्रस्तान् पर्यहार्दाम्ना तानग्ने सं द्या तवम् ॥३॥

*sādanaṁ vo bṛhaspatiḥ saṁdānaṁ savitā karat |*
*saṁdānaṁ mitro aryamā saṁdānaṁ bhago aśvinā ||1 ||*
*saṁ paramāntsamavamānatho saṁ dyāmi madhyamān |*
*indrastān paryahārdāmnā tānagne saṁ dyāā tvam ||2 ||*
*amī ye yudhamāyanti ketūn kṛtvānīkaśaḥ |*
*indrastān paryahārdāmnā tānagne saṁ dyā tavam ||3 ||*

## १११. उत्कीलः (Utkīlaḥ)

१. अग्निः (Agniḥ) - य. (Yv.)११.४९; १८.७५

य. (Yv.)११.४९

वि पाजसा पृथुना शोशुचानो बाधस्व द्विषो रक्षसोऽअमीवाः ।

सुशर्मणो बृहतः शर्मणि स्यामग्नेरहंसुहवस्य प्रणीतौ ॥४९॥
*vi pājasā pṛthunā śośuchāno bādhasva dviṣo rakṣaso'amīvāḥ /*
*suśarmaṇo bṛhataḥ śarmaṇi syāmagnerahaṁsuhavasya praṇītau //49 //*

य. (Yv.)१८.७५

वयं ते ऽअद्य ररिमा हि काममुत्तानहस्ता नमसोपसद्य ।
यजिष्ठेन मनसा यक्षि देवानसेधता मन्मना विप्रोऽअग्ने ॥७५॥
*vayaṁ te 'adya rarimā hi kāmamuttānahastā namasopasadya /*
*yajiṣṭhena manasā yakṣi devānasedhatā manmanā vipro'agne //75 //*

२. विश्वेदेवाः (Viśvedevāḥ) - य. (Yv.)१८.७६

धामच्छदग्निरिन्द्रो ब्रह्मा देवो बृहस्पतिः। सचेतसो विश्वे देवा यां प्रावन्तु नः शुभे ॥७६॥
*dhāmachchhadagnirindro brahmā devo bṛhaspatiṁḥ / sachetaso viśve devā yāṁ prāvantu naḥ śubhe //76 //*

## ११२. उत्कीलः कात्यः (Utkīlaḥ Kātyaḥ)

१. अग्निः (Agniḥ) - ऋ. (Rv.) ३.१५.१-७; ३.१६.१-६; सा. (Sv.) ६०

ऋ. (Rv.) ३.१५.१-७

वि पाजसा पृथुना शोशुचानो बाधस्व द्विषो रक्षसो अमीवाः ।
सुशर्मणो बृहतः शर्मणि स्यामग्नेरहं सुहवस्य प्रणीतौ ॥१॥
त्वं नो अस्या उषसो व्युष्टौ त्वं सूर उदिते बोधि गोपाः ।
जन्मेव नित्यं तनयं जुषस्व स्तोमं मे अग्ने तन्वा सुजात ॥२॥
त्वं नृचक्षा वृषभानु पूर्वीः कृष्णास्वग्ने अरुषो वि भाहि ।
वसो नेषि च पर्षि चात्यंहः कृधी नो राय उशिजो यविष्ठ ॥३॥
उषाळहो अग्ने वृषभो दिदीहि पुरो विश्वाः सौभगा संजिगीवान् ।
यास्य नेता प्रथमस्य पायोर्जातवेदो बृहतः सुप्राणीते ॥४॥
अच्छिद्रा शर्म जरितः पुरूणि देवाँ अच्छा दीद्यानः सुमेधाः ।
रथो न सस्निरभि वक्षि वाजमग्ने त्वं रोदसी नः सुमेके ॥५॥
प्र पीपय वृषभ जिन्व वाजानग्ने त्वं रोदसी नः सुदोघे ।
देवेभिर्देव सुरुचा रुचानो मा नो मर्तस्य दुर्मतिः परि ष्ठात् ॥६॥
इळामग्ने पुरुदंसं सनि गोः शश्वत्तमं हवमानाय साघ ।
स्यान्नः सूनुस्तनयो विजावाग्ने सा ते सुमतिर्भूत्वस्मे ॥७॥
*vi pājasā pṛthunā śośuchāno bādhasva dviṣo rakṣaso amīvāḥ /*
*suśarmaṇo bṛhataḥ śarmaṇi syāmagnerahaṁ suhavasya praṇītau //1 //*
*tvaṁ no asyā uṣaso vyuṣṭau tvaṁ sūra udite bodhi gopāḥ /*
*janmeva nityaṁ tanayaṁ juṣasva stomaṁ me agne tanvā sujāta //2 //*
*tvaṁ nṛchakṣā vṛṣabhānu pūrvīḥ kṛṣṇāsvagne aruṣo vi bhāhi /*
*vaso neṣi cha parṣi chātyaṁhaḥ kṛdhī no rāya uśijo yaviṣṭha //3 //*
*uṣāḷaho agne vṛṣabho didīhi puro viśvāḥ saubhagā saṁjigīvān /*
*yāsya netā prathamasya pāyorjātavedo bṛhataḥ suprāṇīte //4 //*
*achchhidrā śarma jaritaḥ purūṇi devāṁ achchhā dīdyānaḥ sumedhāḥ /*
*ratho na sasnirabhi vakṣi vājamagne tvaṁ rodasī naḥ sumeke //5 //*
*pra pīpaya vṛṣabha jinva vājānagne tvaṁ rodasī naḥ sudoghe /*
*devebhirdeva suruchā ruchāno mā no martasya durmatiḥ pari ṣṭhāt //6 //*
*iḷāmagne purudaṁsaṁ sani goḥ śaśvattamaṁ havamānāya sāgha /*
*syānnaḥ sūnustanayo vijāvāgne sā te sumatirbhūtvasme //7 //*

ऋ. (Rv.) ३.१६.१-६

अयमग्नि सुवीर्यस्येषे महः सौभगस्य ।
राय ईशे स्वपत्यस्य गोमत् ईशे वृत्रहथानाम् ॥१॥

इमं नरो मरुतः सश्चता वृधं यस्मिन्नायः शेवृधासः ।
अभि ये सन्तिः पृतनासु दूढ्यो विश्वाहा शत्रुमादभुः ॥२॥
स त्वं नो रायः शिशीहि मीढ्वो अग्ने सुवीर्यस्य ।
तुविद्युम्न वर्षिष्ठस्य प्रजावतोऽनमीवस्य शुष्मिणः ॥३॥
चक्रिर्यो विश्वा भुवनाभि सासहिश्चक्रिर्देवेष्वा दुवः ।
आ देवेषु यतत आ सुवीर्य आ शंस उत नुणाम् ॥४॥
मा नो अग्नेऽमतये मावीरतायै रीरधः ।
मागोतायै सहसस्पुत्र मा निदेऽप द्वेषांस्या कृधि ॥५॥
शग्धि वाजस्य सुभग प्रजावतोऽग्ने बृहतो अध्वरे ।
सं राया भूयसा सृज मयोभुना तुविद्युम्न यशस्वता ॥६॥
*ayamagni suvīryasyeṣe mahaḥ saubhagasya ।*
*rāya īśe svapatyasya gomat īśe vṛtrahathānām ॥1॥*
*imaṁ naro marutaḥ saśchatā vṛdhaṁ yasminnāyaḥ śevṛdhāsaḥ ।*
*abhi ye santiḥ pṛtanāsu dūḍhyo viśvāhā śatrumādabhuḥ ॥2॥*
*sa tvaṁ no rāyaḥ śiśīhi mīḍhvo agne suvīryasya ।*
*tuvidyumna varṣiṣṭhasya prajāvato'namīvasya śuṣmiṇaḥ ॥3॥*
*chakriryo viśvā bhuvanābhi sāsahiśchakrirdeveṣvā duvaḥ ।*
*ā deveṣu yatata ā suvīrya ā śaṁsa uta nuṇām ॥4॥*
*mā no agne'mataye māvīratāyai rīradhaḥ ।*
*māgotāyai sahasasputra mā nide'pa dveṣāṁsyā kṛghi ॥5॥*
*śagdhi vājasya subhaga prajāvato'gne bṛhato adhvare ।*
*saṁ rāyā bhūyasā sṛja mayobhunā tuvidyumna yaśasvatā ॥6॥*

सा. (Sv.) ६०

अयमग्निः सुवीर्यस्येशे हि सौभगस्य। राय ईशे स्वपत्यस्य गोमत ईशे वृत्रहथानाम् ॥६०॥
*ayamagniḥ suvīryasyeśe hi saubhagasya । rāya īśe svapatyasya gomata īśe vṛtrahathānām ॥60॥*

## ११३. उत्तरनारायणः (Uttaranārāyaṇaḥ)

१. आदित्यः (Ādityaḥ) - य. (Yv.)३१.१७-१९; २२

य. (Yv.)३१.१७-१९

अदभ्यः सम्भृतः पृथिव्यै रसाच्च विश्वकर्मणः समवर्त्तताग्रे ।
तस्य त्वष्टा विदधद्रूपमेति तन्मर्त्यस्य देवत्वमाजानमग्रे ॥१७॥
वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसः परस्तात् ।
तमेव विदित्वाति मृत्युमेति नान्यः पन्था विद्यतेऽयनाय ॥१८॥
प्रजापतिश्चरति गर्भे ऽअन्तरजायमानो बहुधा वि जायते ।
तस्य योनिं परि पश्यन्ति धीरास्तस्मिन्ह तस्थुर्भुवनानि विश्वा ॥१९॥
*adabhyaḥ sambhṛtaḥ pṛthivyai rasāchcha viśvakarmaṇaḥ samavarttatāgre ।*
*tasya tvaṣṭā vidadhadrūpameti tanmartyasya devatvamājānamagre ॥17॥*
*vedāhametaṁ puruṣaṁ mahāntamādityavarṇa tamasaḥ parastāt ।*
*tameva viditvāti mṛtyumeti nānyaḥ panthā vidyate'yanāya ॥18॥*
*prajāpatiścharati garbhe 'antarajāyamāno bahudhā vi jāyate ।*
*tasya yoniṁ pari paśyanti dhīrāstasminha tasthurbhuvanāni viśvā ॥19॥*

य. (Yv.)३१.२२

श्रीश्च ते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम्।
इष्णान्निषणमु मऽइषाण सर्वलोकं मऽइषाण ॥२२॥
*śrīścha te lakṣamīścha patnyāvahorātre pārśve nakṣatrāṇi rūpamaśvinau vyāttam ।*
*iṣṇānniṣaṇamu ma'iṣāṇa sarvalokaṁ ma'iṣāṇa ॥22॥*

२.विश्वेदवाः (Viśvedavāḥ) - य. (Yv.)३१.२१

रुचं ब्राह्मं जनयन्तो देवाऽअग्रे तदब्रुवन्। यस्त्वैवं ब्राह्मणो विद्यात्तस्य देवाऽअसन्वशे ॥२१॥

*rucham brāhmam janayanto devā'agre tadabruvan । yastvaivam brāhmaṇo vidyāttasya devā'asanvaśe ॥21॥*

३.सूर्यः (Sūryaḥ) - य. (Yv.)३१.२०

यो देवेभ्यऽआतपति यो देवानां पुरोहितः। पूर्वो यो देवेभ्यो जातो नमो रुचाय ब्राह्मये ॥२०॥

*yo devebhya'ātapati yo devānām purohitaḥ । pūrvo yo devebhyo jāto namo ruchāya brāhmaye ॥20॥*

## ११४. उद्दालकः (Uddālakaḥ)

१. कामः (Kāmaḥ) - अ. (Av.) ३.२९.७

क इदं कस्मा अदात् कामः कामायादात्।
कामो दाता कामः प्रतिग्रहीता कामः समुद्रमा विवेश।
कामेन त्वा प्रति गृह्णामि कामैतत् ते ॥७॥

*ka idam kasmā adāt kāmaḥ kāmāyādāt ।*
*kāmo dātā kāmaḥ pratigrahītā kāmaḥ samudramā viveśa ।*
*kāmena tvā prati gṛhṇāmi kāmaitat te ॥7॥*

२. भूमिः (Bhūmiḥ) - अ. (Av.) ३.२९.८

भूमिष्ट्वा प्रति गृह्णात्वन्तरिक्षमिदं महत् ।
माहं प्राणेन मात्मना मा प्रजया प्रतिगृह्य वि राधिषि ॥८॥

*bhūmiṣṭvā prati gṛhṇātvantarikṣamidam mahat ।*
*māham prāṇena mātmanā mā prajayā pratigṛhya vi rādhiṣi ॥8॥*

३. वनस्पतिः (Vanaspatiḥ) - अ. (Av.) ६.१५.१-३

उत्तमो अस्योषधीनां तव वृक्षा उपस्तयः। उपस्तिरस्तु सोऽस्माकं यो अस्माँ अभिदासति ॥१॥
सबन्धुश्चासबन्धुश्च यो अस्माँ अभिदासति। तेषां सा वृक्षाणामिवाहं भूयासमुत्तमः ॥२॥
यथा सोम ओषधीनामुत्तमो हविषां कृतः। तलाशा वृक्षाणामिवाहं भूयासमुत्तमः ॥३॥

*uttamo asyoṣadhīnām tava vṛkṣā upastayaḥ । upastirastu so'smākam yo asmām̐ abhidāsati ॥1॥*
*sabandhuśchāsabandhuścha yo asmām̐ abhidāsati । teṣām sā vṛkṣāṇāmivāham bhūyāsamuttamaḥ ॥2॥*
*yathā soma Oṣadhīnāmuttamo haviṣām kṛtaḥ । talāśā vṛkṣāṇāmivāham bhūyāsamuttamaḥ ॥3॥*

४. शितिपाद् अविः (Śitipād Aviḥ) - अ. (Av.) ३.२९.१-६

यद् राजानो विभजन्त इष्टापूर्त्तस्य षोडशं यमस्यामी सभासदः ।
अविस्तस्मात् प्र मुंचति दत्तः शितिपात् स्वधा ॥१॥
सर्वान् कामान् पूरयत्याभवन् प्रभवन् भवन् । आकूतिप्रोऽविर्दत्तः शितिपान्नोप दस्यति ॥२॥
यो ददाति शितिपादमवि लोकेन संमितम् ।
स नाकमभ्यारोहति यत्र शुल्को न क्रियते अवलेन बलीयसे ॥३॥
पंचापूपं शितिपादमविं लोकेन संभितम् । प्रदातोप जीवति पितृणां लोकेऽक्षितम् ॥४॥
पंचापूपं शितिपादमविं लोकेन संमितम् । प्रदातोप जीवति सूर्यामासयोरक्षितम् ॥५॥
इरेव नोप दस्यति समुद्रइव पयो महत् । देवौ सवासिनाविव शतिपान्नोप दस्यति ॥६॥

*yad rājāno vibhajanta iṣṭāpūrttasya ṣoḍaśam yamasyāmī sabhāsadaḥ ।*
*avistasmāt pra mumchati dattaḥ śitipāt svadhā ॥1॥*
*sarvān kāmān pūrayatyābhavan prabhavan bhavan । ākūtipro'virdattaḥ śitipānnopa dasyati ॥2॥*
*yo dadāti śitipādamavi lokena sammitam ।*
*sa nākamabhyārohati yatra śulko na kriyate avalena balīyase ॥3॥*

*paṁchāpūpaṁ śitipādamaviṁ lokena saṁbhitam । pradātopa jīvati pitṝṇāṁ loke'kṣitam ॥4॥*
*paṁchāpūpaṁ śitipādamaviṁ lokena saṁmitam । pradātopa jīvati sūryāmāsayorakṣitam ॥5॥*
*ireva nopa dasyati samudraiva payo mahat । devau savāsināviva śatipānnopa dasyati ॥6॥*

## ११५. उन्मोचनः (Unmochanaḥ)

१. कासाः (Kāsāḥ) - अ. (Av.) ६.१०५.१-३

यथा मनो मनस्केतैः परापतत्याशुमत्। एवा त्वं कासे प्र पत मनसोऽनु प्रवाय्यम् ॥१॥
यथा बाणः सुसंशितः परापतत्याशुमत्। एवा त्वं कासे प्र पत पृथिव्या अनु संवतम् ॥२॥
यथा सूर्यस्य रश्मयः परापतन्त्याशुमत्। एवा त्वं कासे प्र पत समुद्रस्यानु विक्षरम् ॥३॥
*yathā mano manasketaiḥ parāpatatyāśumat । evā tvaṁ kāse pra pata manaso'nu pravāyyam ॥1॥*
*yathā bāṇaḥ susaṁśitaḥ parāpatatyāśumat । evā tvaṁ kāse pra pata pṛthivyā anu saṁvatam ॥2॥*
*yathā sūryasya raśmayaḥ parāpatantyāśumat । evā tvaṁ kāse pra pata samudrasyānu vikṣaram ॥3॥*

## ११६. उन्मोचनः (आयुष्कामः) (Unmochanaḥ [Āyuṣkāmaḥ])

१. आयुः (मन्त्रोक्ताः) (Āyuḥ [Mantroktāḥ]) - अ. (Av.) ५.३०.१-१७

आवतस्त आवतः पराबतस्त आवतः ।
इहैव भव मा नु गा मा पूर्वाननु गाः पितॄनसुं बध्नामि ते दृढम् ॥१॥
यत् त्वाभिचेरुः पुरुषः खो यदरणो जनः । उन्मोचनप्रमोचने उभे वाचा वदामि ते ॥२॥
यद् दुद्रोहिथ शेपिषे स्त्रियै पुंसे अचित्त्या । उन्मोचनप्रमोचने उभे वाच वदामि ते ॥३॥
यदेनसो मातृकृताच्छेषे पितृकृताच्च यत् । उन्मोचनप्रमोचने उभे वाचा वदामि ते ॥४॥
यत् ते माता यत् ते पिता जामिर्भ्राता च सर्जतः ।
प्रत्यक् सेवख भेषजं जरदष्टिं कृणोमि त्वा ॥५॥
इहैधि पुरुष सर्वेण मनसा सह । दूतौ यमस्य मानु गा अधि जीवपुरा इहि ॥६॥
अनुहूतः पनरेहि विद्वानुदयनं पथः । आरोहणमाक्रमणं जीवतोजीवतोऽयनम् ॥७॥
मा बिभेर्न मरिष्यसि जरदष्टिं कृणोमि त्वा। निरवोचमहं यक्ष्ममंगेभ्यो अंगज्वरं तव ॥८॥
अंगभेदो अंगज्वरो यश्च ते हृदयामयः । यक्ष्मः श्येनइव प्रापप्तद् वाचा साढः परस्तराम् ॥९॥
ऋषी बोधप्रतीबोधावस्वप्नो यश्च जागृविः ।
तौ ते प्राणस्य गोप्तारौ दिवा नक्त च जागृताम् ॥१०॥
अयमग्निरुपसद्य इह सूर्य उदेतु ते । उदेहि मृत्योर्गम्भीरात् कृष्णाच्चित् तमसस्परि ॥११॥
नमो यमाय नमो अस्तु मृत्यवे नमः पितृभ्य उत ये नयन्ति ।
उत्पारणस्य यो वेद तमग्निं पुरो दधेऽस्मा अरिष्टतातये ॥१२॥
ऐतु प्राण ऐतु मन ऐतु चक्षुरथो बलम् । शरीरमस्य सं विदां तत् पद्भ्यां प्रति तिष्ठतु ॥१३॥
प्राणेनाग्ने चक्षुषा सं सृजेमं समीरय तन्वा३ सं बलेन ।
वेत्थामृतस्य मा नु गान्मा नु भूमिगृहो भुवत् ॥१४॥
मा ते प्राण दसन्मो अपानोऽपि धायि ते । सूर्यस्त्वाधिपतिर्मृत्योरुदायच्छतु रश्मिभिः ॥१५॥
इयमन्तर्वदति जिह्वा बद्धा पनिष्पदा । त्वया यक्ष्मं निरवोचं शतं रोपीश्च तक्मनः ॥१६॥
अयं लोकः प्रियतमो देवानामपराजितः। यस्मै त्वमिह मृत्यवे दिष्टः पुरुष जनिष्ठो।
स च त्वानु ह्वयामसि मा पुरा जरसो मृथाः ॥१७॥
*āvatasta āvataḥ parābatasta āvataḥ ।*
*ihaiva bhava mā nu gā mā pūrvānanu gāḥ pitṝnasuṁ badhnāmi te dṛḍham ॥1॥*
*yat tvābhicheruḥ puruṣaḥ kho yadaraṇo janaḥ । unmochanapramochane ubhe vāchā vadāmi te ॥2॥*

*yad dudrohitha śepiṣe striyai puṁse achittyā । unmochanapramochane ubhe vācha vadāmi te ॥3 ॥*
*yadenaso mātṛkṛtāchchheṣe pitṛkṛtāchcha yat । unmochanapramochane ubhe vāchā vadāmi te ॥4 ॥*
*yat te mātā yat te pitā jāmirbhrātā cha sarjataḥ ।*
*pratyak sevakha bheṣajaṁ jaradaṣṭiṁ kṛṇomi tvā ॥5 ॥*
*ihaidhi puruṣa sarveṇa manasā saha । dūtau yamasya mānu gā adhi jīvapurā ihi ॥6 ॥*
*anuhūtaḥ panarehi vidvānudayanaṁ pathaḥ । ārohaṇamākramaṇaṁ jīvatojīvato'yanam ॥7 ॥*
*mā bibherna mariṣyasi jaradaṣṭiṁ kṛṇomi tvā । niravochamahaṁ yakṣamamaṁgebhyo aṁgajvaraṁ tava ॥8 ॥*
*aṁgabhedo aṁgajvaro yaścha te hṛdayāmayaḥ । yakṣamaḥ śyenaiva prāpaptad vāchā sāḍhaḥ parastarām ॥9 ॥*
*ṛṣī bodhapratībodhāvasvapno yaścha jāgṛviḥ ।*
*tau te prāṇasya goptārau divā nakta cha jāgṛtām ॥10 ॥*
*ayamagnirupasadya iha sūrya udetu te । udehi mṛtyorgambhīrāt kṛṣṇāchchit tamasaspari ॥11 ॥*
*namo yamāya namo astu mṛtyave namaḥ pitṛbhya uta ye nayanti ।*
*utpāraṇasya yo veda tamagiṁna puro dadhe'smā ariṣṭatātaye ॥12 ॥*
*aitu prāṇa aitu mana aitu chakṣuratho balam । śarīramasya saṁ vidāṁ tat padbhyāṁ prati tiṣṭhatu ॥13 ॥*
*prāṇenāgne chakṣuṣā saṁ sṛjemaṁ samīraya tanvā3 saṁ balena ।*
*vetthāmṛtasya mā nu gānmā nu bhūmigṛho bhuvat ॥14 ॥*
*mā te prāṇa dasanmo apāno'pi dhāyi te । sūryastvādhipatirmṛtyorudāyachchhatu raśmibhiḥ ॥15 ॥*
*iyamantarvadati jihnā baddhā panispadā । tvayā yakṣamaṁ niravochaṁ śataṁ ropīścha takmanaḥ ॥16 ॥*
*ayaṁ lokaḥ priyatamo devānāmaparājitaḥ । yasmai tvamiha mṛtyave diṣṭaḥ puruṣa janiṣṭho ।*
*sa cha tvānu hnayāmasi mā purā jaraso mṛthāḥ ॥17 ॥*

## ११७. उपमन्युः वासिष्ठः (Upamanyuḥ Vāsiṣṭhaḥ)

१. पवमानः सोमः (Pavamānaḥ Somaḥ)- सा. (Sv.) ८०६-८०८

वृषा शोणो अभिकनिक्रदद्गा नदयन्नेषि पृथिवीमुत द्याम् ।
इन्द्रस्येव वग्नुरा श्रृण्व आजौ प्रचोदयन्नर्षसि वाचमेमाम् ॥१॥
रसाय्यः पयसा पिन्वमान ईरयन्नेषि मधुमन्तमंशुम् ।
पवमान सन्तनिमेषि कृण्वन्निन्द्राय सोम परिषिच्यमानः ॥२॥
एवा पवस्व मदिरो मदायोदग्राभस्य नमयन्वधस्नुम् ।
परि वर्ण भरमाणो रुशन्तं गव्युर्नो अर्ष परि सोम सिक्तः ॥३॥

*vṛṣā śoṇo abhikanikradadgā nadayanneṣi pṛthivīmuta dyām ।*
*indrasyeva vagnurā śṛṇva ājau prachodayannarṣasi vāchamemām ॥1 ॥*
*rasāyyaḥ payasā pinvamāna īrayanneṣi madhumantamaṁśum ।*
*pavamāna santanimeṣi kṛṇvannindrāya soma pariṣichyamānaḥ ॥2 ॥*
*evā pavasva madiro madāyodagrābhasya namayanvadhasnum ।*
*pari varṇa bharamāṇo ruśantaṁ gavyurno arṣa pari soma siktaḥ ॥3 ॥*

## ११८. प्रमन्युर् वासिष्ठः (Pramanyur Vāsiṣṭhaḥ)

१. पवमानः सोमः (Pavamānaḥ Somaḥ)- ऋ. (Rv.) ९.९७.१३-१५

वृषा शोणो अभिकनिक्रदद्गा नदयन्नेति पृथिवीमुत द्याम् ।
इन्द्रस्येव वग्नुरा श्रृण्व आजौ प्रचेतयन्नर्षति वाचमेमाम् ॥१३॥

रसाय्यः पयसा पिन्वमान ईरयन्नेषि मधुमन्तमंशुम् ।
पवमानः संतनिमेषि कृण्वन्निन्द्राय सोम परिषिच्यमानः ॥१४॥
एवा पवस्व मदिरो मदायोदग्राभस्य नमयन्वधस्नैः ।
परि वर्ण भरमाणो रुशन्तं गव्युर्नो अर्ष परि सोम सिक्तः ॥१५॥
*vṛṣā śoṇo abhikanikradadrā nadayanneti pṛthivīmuta dyām /*
*indrasyeva vagnurā śṛṇva ājau prachetayannarṣati vāchamemām //13 //*
*rasāyyaḥ payasā pinvamāna īrayanneṣi madhumantamaṁśum /*
*pavamānaḥ saṁtanimeṣi kṛṇvannindrāya soma pariṣichyamānaḥ //14 //*
*evā pavasva madiro madāyodagrābhasya namayanvadhasnaiḥ /*
*pari varṇa bharamāṇo ruśantaṁ gavyurno arṣa pari soma siktaḥ //15 //*

## ११९. उपरिबभ्रवः (Uparibabhravaḥ)

१. अघ्न्या (Aghnyā) - अ. (Av.) ७.७५.१-२

प्रजावतीः सूयवसे रुशन्तीः शुद्धा अपः सुप्रपाणे पिबन्तीः ।
मा व स्तेन ईशत माघशंसः परि वो रुद्रस्य हेतिर्वृणक्तु ॥१॥
पदाा स्थ रमतयः संहिता विश्वनाम्नीः ।
उप मा देवीर्देवेभिरेत । इमं गोष्ठमिदं सदो घृतेनास्मान्त्समुक्षत ॥२॥
*prajāvatīḥ sūyavase ruśantīḥ śuddhā apaḥ suprapāṇe pibantīḥ /*
*mā va stena īśata māghaśaṁsaḥ pari vo rudrasya hetirvṛṇaktu //1 //*
*padāā stha ramatayaḥ saṁhitā viśvanāmnīḥ /*
*upa mā devīrdevebhireta / imaṁ goṣṭhamidaṁ sado ghṛtenāsmāntsamukṣata //2 //*

२. गौः (Gauḥ) - अ. (Av.) ६.३१.१-३

आयं गौः पृश्निरक्रमीदसदन्मातरं पुरः । पितरं च प्रयन्त्स्वः ॥१॥
अन्तश्चरति रोचना अस्य प्राणादपानतः । व्यख्यन्महिषः स्वः ॥२॥
त्रिंशद् धामा वि राजति वाक् पतंगो अशिश्रियत् । प्रति वस्तोरहर्द्युभिः ॥३॥
*āyaṁ gauḥ pṛśnirakramīdasadanmātaraṁ puraḥ / pitaraṁ cha prayantsvaḥ //1 //*
*antaścharati rochanā asya prāṇādapānataḥ / vyakhyanmahiṣaḥ svaḥ //2 //*
*triṁśad dhāmā vi rājati vāk pataṁgo aśiśriyat / prati vastorahardyubhiḥ //3 //*

३. पूषा (Pūṣā) - अ. (Av.) ७.९.१-४

प्रपथे पथामजनिष्ट पूषा प्रपथे दिवः प्रपथे पृथिव्याः ।
उभे अभिप्रियतमे सधस्थे आ च परा च चरति प्रजानन् ॥१॥
पूषेमा आशा अनु वेद सर्वाः सो अस्माँ अभयतमेन नेषत् ।
स्वस्तिदा आघृणिः सर्ववीरोऽप्रयुच्छन् पुर एतु प्रजानन् ॥२॥
पूषन् तव व्रते वयं न रिष्येम कदा चन । स्तोतारस्त इह स्मसि ॥३॥
परि पूषा परस्ताद्धस्तं दधातु दक्षिणम् । पुनर्नो नष्टमाजतु सं नष्टेन गमेमहि ॥४॥
*prapathe pathāmajaniṣṭa pūṣā prapathe divaḥ prapathe pṛthivyāḥ /*
*ubhe abhipriyatame sadhasthe ā cha parā cha charati prajānan //1 //*
*pūṣemā āśā anu veda sarvāḥ so asmām̐ abhayatamena neṣat /*
*svastidā āghṛṇiḥ sarvavīro'prayuchchhan pura etu prajānan //2 //*
*pūṣan tava vrate vayaṁ na riṣyema kadā chana / stotārasta iha smasi //3 //*
*pari pūṣā parastāddhastaṁ dadhātu dakṣiṇam / punarno naṣṭamājatu saṁ naṣṭena gamemahi //4 //*

४. बृहस्पतिः (Bṛhaspatiḥ) - अ. (Av.) ७.८.१

भद्रादधि श्रेयः प्रेहि बृहस्पतिः पुरएता ते अस्तु ।
अथेममस्या वर आ पृथिव्या आरेशत्रुं कृणुहि सर्ववीरम् ॥१॥
*bhadrādadhi śreyaḥ prehi bṛhaspatiḥ puraetā te astu /*
*athemamasyā vara ā pṛthivyā āreśatruṁ kṛṇuhi sarvavīram //1 //*

५. शमी (Śamī) - अ. (Av.) ६.३०.१-३

देवा इमं मधुना संयुतं यवं सरस्वत्यामधि मणावचर्कृषुः ।
इन्द्र आसीत् सीरपतिः शतक्रतुः कीनाशा आसन् मरुतः सुदानवः ॥१॥
यस्ते मदोऽवकेशो विकेशो येनाभिहस्यं पुरुषं कृणोषि ।
आरात् त्वदन्या वनानि वृक्षि त्वं शमि शतवल्शा वि रोह ॥२॥
बृहत् पलाशे सुभगे वर्षवृद्ध ऋतावरि मातेव पुत्रेभ्यो मृड केशेभ्यः शमि ॥३॥

*devā imaṁ madhunā saṁyutaṁ yavaṁ sarasvatyāmadhi maṇāvacharkṛṣuḥ /*
*indra āsīt sīrapatiḥ śatakratuḥ kīnāśā āsan marutaḥ sudānavaḥ //1 //*
*yaste mado'vakeśo vikeśo yenābhihasyaṁ puruṣaṁ kṛṇoṣi /*
*ārāt tvadanyā vanāni vṛkṣi tvaṁ śami śatavalśā vi roha //2 //*
*bṛhat palāśe subhage varṣavṛddha ṛtāvari māteva putrebhyo mṛḍa keśebhyaḥ śami //3 //*

**१२०. उपरिबभ्रवः सार्पराज्ञी वा (Uparibabhravaḥ Sārparājñī Vā)**

१. गौः (Gauḥ) - अ. (Av.) २०.४८.४-६

आयं गौः पृश्निरक्रमीदसदन्मातरं पुरः। पितरं च प्रयनतसव्ः ॥४॥
अन्तश्चरति रोचना अस्य प्राणादपानतः। व्यख्यन्महिषः स्वः ॥५॥
त्रिंशद्धामा वि राजति वाक्पतंगो अशिश्रियत्। प्रति वस्तोरहर्द्युभिः ॥६॥

*āyaṁ gauḥ pṛśnirakramīdasadanmātaraṁ puraḥ / pitaraṁ cha prayanatasavḥ //4 //*
*antaścharati rochanā asya prāṇādapānataḥ / vyakhyanmahiṣaḥ svaḥ //5 //*
*triṁśaddhāmā vi rājati vākpataṁgo aśiśriyat / prati vastorahardyubhiḥ //6 //*

**१२१. उपस्तुतो वार्हिषृव्यः (साग्री. सास्वा. ऋसर्व. १०.११५.१); त्वाष्ट्रीहव्यः (सार्षेदी.) (Upastuto Vārhiṣṛvyaḥ [Ssb. Sas. Rss. 10.115.1]; Tvāṣṭrīhavyaḥ [Sad.])**

१. अग्निः (Agniḥ) - सा. (Sv.) ६४

चित्र इच्छिशोस्तरुणस्य वक्षथो न यो मातरावन्वेति धातवे ।
अनूधा यदजीजनदधा चिदा ववक्षत्सद्यो महि दूत्यां३ चरन् ॥२॥

*chitra ichchhiśostaruṇasya vakṣatho na yo mātarāvanveti dhātave /*
*anūdhā yadajījanadadhā chidā vavakṣatsadyo mahi dūtyāṁ3 charan //2 //*

**१२२. उपस्तुतो वार्ष्टिहव्यः (upastuto vārṣṭihavyaḥ)**

१. अग्निः (Agniḥ) - ऋ. (Rv.) १०.११५.१-९

चित्र इच्छिशोस्तरुणस्य वक्षथो न यो मातरावप्येति धातवे ।
अनूधा यदि जीजनदधा च नु ववक्ष सद्यो महि दूत्यं१ चरन् ॥१॥
अग्निर्ह नाम धायि दन्नपस्तमः सं यो वना युवते भस्मना दता ।
अभिप्रमुरा जुह्वा स्वध्वर इनो न प्रोथमानो यवसे वृषा ॥२॥
तं वो विं न द्रुषदं देवमन्धस इन्दुं प्रोथन्तं प्रवपन्तमर्णवम् ।
आसा वह्निं न शोचिषा विरप्शिनं महिव्रतं न सरजन्तमध्वनः ॥३॥
वि यस्य ते ज्रयसानस्याजर धक्षोर्न वाताः परि सन्त्यच्युताः ।
आ रण्वासो युयुधयो न सत्वनं त्रितं नशन्त प्र शिषन्त इष्टये ॥४॥
स इदग्निः कणवतमः कण्वसखार्यः परस्यान्तरस्य तरुषः ।
अग्निः पातु गृणतो अग्निः सूरीनग्निर्ददातु तेषामवो नः ॥५॥
वाजिनत्माय सह्यसे सुपित्र्य तृषु च्यवानो अनु जातवेदसे ।
अनुद्रे चिद्यो धृषता वरं सते महिन्तमाय धन्वनेदविष्यते ॥६॥
एवाग्निर्मर्तैः सह सूरिभिर्वसुः ष्टवे सहसः सूनरो नृभिः ।
मित्रासो न ये सुधिता ऋतायवो द्यावो न द्युम्नैरभि सन्ति मानुषान् ॥७॥
ऊर्जो नपात्सहसावन्निति त्वोपस्तुतस्य वन्दते वृषा वाक् ।
त्वां स्तोषाम त्वया सुवीरा द्राघीय आयुः प्रतरं दधानाः ॥८॥

इति त्वाग्ने वृष्टिहव्यस्य पुत्रा उपस्तुतास ऋषयोऽवोचन् ।
ताँश्च पाहि गृणतश्च सूरीन्वषड्वषळित्यूर्ध्वासो अनक्षन्नमो नम इत्यूर्ध्वासो अनक्षन् ॥९॥
*chitra ichchhiśostaruṇasya vakṣatho na yo mātarāvapyeti dhātave ।*
*anūdhā yadi jījanadadhā cha nu vavakṣa sadyo mahi dūtyaṁ1 charan ॥1॥*
*agnirha nāma dhāyi dannpastamaḥ saṁ yo vanā yuvate bhasmanā datā ।*
*abhipramurā juhnā svadhvara ino na prothamāno yavase vṛṣā ॥2॥*
*taṁ vo viṁ na druṣadaṁ devamandhasa induṁ prothantaṁ pravapantamarṇavam ।*
*āsā vahniṁ na śochiṣā virapśinaṁ mahivrataṁ na sarajantamadhvanaḥ ॥3॥*
*vi yasya te jrayasānasyājara dhakṣorna vātāḥ pari santyachyutāḥ ।*
*ā raṇvāso yuyudhayo na satvanaṁ tritaṁ naśanta pra śiṣanta iṣṭaye ॥4॥*
*sa idagniḥ kaṇavatamaḥ kaṇvasakhāryaḥ parasyāntarasya taruṣaḥ ।*
*agniḥ pātu gṛṇato agniḥ sūrīnagnirdadātu teṣāmavo naḥ ॥5॥*
*vājinatmāya sahyase supitraya tṛṣu chyavāno anu jātavedase ।*
*anudre chidyo dhṛṣatā varaṁ sate mahintamāya dhanvanedaviṣyate ॥6॥*
*evāgnirmartaiḥ saha sūribhirvasuḥ ṣṭave sahasaḥ sūnaro nṛbhiḥ ।*
*mitrāso na ye sudhitā ṛtāyavo dyāvo na dyumnairabhi santi mānuṣān ॥7॥*
*ūrjo napātsahasāvanniti tvopastutasya vandate vṛṣā vāk ।*
*tvāṁ stoṣāma tvayā suvīrā drāghīya āyuḥ prataraṁ dadhānāḥ ॥8॥*
*iti tvāgne vṛṣṭihavyasya putrā upastutāsa ṛṣayo'vochan ।*
*tām̐ścha pāhi gṛṇataścha sūrīnvaṣaḍvaṣaḷityūrdhvāso anakṣannamo nama ityūrdhvāso anakṣan ॥9॥*

## १२३. उरु (Uru)

१. पवमानः सोमः (Pavamānaḥ Somaḥ)- ऋ. (Rv.) ९.१०८.४-५

येना नवग्वो दध्यङ्ङपोर्णुते येन विप्रास आपिरे ।
देवानां सम्ने अमृतस्य चारुणो येन श्रवांस्यानशुः ॥४॥
एष स्य धारया सुतोऽव्यो वारेभिः पवते मदिन्तमः। क्रीळन्नूर्मिरपामिव ॥५॥
*yenā navagvo dadhyaṅṅporṇute yena viprāsa āpire ।*
*devānāṁ samne amṛtasya chāruṇo yena śravāṁsyānaśuḥ ॥4॥*
*eṣa sya dhārayā suto'vyo vārebhiḥ pavate madintamaḥ । krīḷannūrmirapāmiva ॥5॥*

## १२४. उरुर् आंगिरसः (Urur Āṁgirasaḥ)

१. पवमानः सोमः (Pavamānaḥ Somaḥ)- सा. (Sv.) ५८४; ९३९

सा. (Sv.) ५८४

एष स्य धारया सुतोऽव्या वारेभिः पवते मदिन्तमः। क्रीळन्नूर्मिरपामिव ॥७॥
*eṣa sya dhārayā suto'vyā vārebhiḥ pavate madintamaḥ । krīḷannūrmirapāmiva ॥7॥*

सा. (Sv.) ९३९

येना नवग्वा दध्यङ्ङ्योर्णुते येन विप्रास आपिरे ।
देवानां सुम्ने अमृतस्य चारुणो येन श्रवांस्याशत ॥२॥
*yenā navagvā dadhyaṅṅyorṇute yena viprāsa āpire ।*
*devānāṁ sumne amṛtasya chāruṇo yena śravāṁsyāśata ॥2॥*

## १२५. उरुक्षय आमहीयवः (Urukṣaya Āmahīyavaḥ)

१. अग्नीरक्षोहा (Agnīrakṣohā) - ऋ. (Rv.) १०.११८.१-९

अग्ने हंसि न्यत्रिणं दीद्यन्मर्त्येष्वा। स्वे क्षये शुचिव्रत ॥१॥
उत्तिष्ठसि स्वाहुतो घृतानि प्रति मोदसे। यत्त्वा स्रुचः समस्थिरन् ॥२॥
स आहुतो वि रोचतेऽग्निरीळेन्यो गिरा। स्रुचा प्रतीकमज्यते ॥३॥
घृतेनाग्निः समज्यते मधुप्रतीक आहुतः। रोचमानो विभावसुः ॥४॥
जरमाणः समिध्यसे देवेभ्यो हव्यवाहन। तं त्वा हवन्त मर्त्याः ॥५॥

तं मर्ता अमर्त्यं घृतेनाग्निं सपर्यत। अदाभ्यं गृहपतिम् ॥६॥
अदाभ्येन शोचिषाने रक्षस्त्वं दह। गोपा ऋतस्य दीदिहि ॥७॥
स त्वमग्ने प्रतीकेन प्रत्योष यातुधान्यः। उरुक्षयेषु दीद्यत् ॥८॥
तं त्वा गीर्भिरुरुक्षया हव्यवाहं समीधिरे। यजिष्ठं मानुषे जने ॥९॥
*agne haṁsi nya1triṇaṁ dīdyanmartyeṣvā / sve kṣaye śuchivrata //1 //*
*uttiṣṭhasi svāhuto ghṛtāni prati modase / yattvā sruchaḥ samasthiran //2 //*
*sa āhuto vi rochate'gnirīḷenyo girā / sruchā pratīkamajyate //3 //*
*ghṛtenāgniḥ samajyate madhupratīka āhutaḥ / rochamāno vibhāvasuḥ //4 //*
*jaramāṇaḥ samidhyase devebhyo havyavāhana / taṁ tvā havanta martyāḥ //5 //*
*taṁ martā amartya ghṛtenāgiṁna saparyata / adābhyaṁ gṛhapatim //6 //*
*adābhyena śochiṣāne rakṣastvaṁ daha / gopā ṛtasya dīdihi //7 //*
*sa tvamagne pratīkena pratyoṣa yātudhānyaḥ / urukṣayeṣu dīdyat //8 //*
*taṁ tvā gīrbhirurukṣayā havyavāhaṁ samīdhire / yajiṣṭhaṁ mānuṣe jane //9 //*

## १२६. उरुचक्रिर् आत्रेयः (Uruchakrir Ātreyaḥ)

१. मित्रावरुणौ (Mitrāvaruṇau) - ऋ. (Rv.) ५.६९.१-४; ५.७०.१-४; सा. (Sv.) ९८५-८७

ऋ. (Rv.) ५.६९.१-४

त्री रोचना वरुण त्रीरुँत द्यूत्रीणि मित्र धारयथो रजांसि ।
वावृधानावमतिं क्षत्रियस्यानु व्रतं रक्षमाणावजुर्यम् ॥१॥
इरावतीर्वरुण धेनवो वां मधुमद्वां सिन्धवो मित्र दुह्रे ।
त्रयस्तस्थुर्वृषभासस्तिसृणां धिष्णानां रेतोधा वि द्युमन्तः ॥२॥
प्रातर्देवीमदितिं जोहवीमि मध्यन्दिन उदिता सूर्यस्य ।
राये मित्रावरुणा सर्वतातेळे तोकाय तनयाय शं योः ॥३॥
या धर्तारा रजसो रोचनस्योतादित्या दिव्या पार्थिवस्य ।
न वां देवा अमृता आ मिनन्ति व्रतानि मित्रावरुणा ध्रुवाणि ॥४॥
*trī rochanā varuṇa trīruṁta dyūntrīṇi mitra dhārayatho rajāṁsi /*
*vāvṛdhānāvamatiṁ kṣatriyasyānu vrataṁ rakṣamāṇāvajuryam //1 //*
*irāvatīrvaruṇa dhenavo vāṁ madhumadvāṁ sindhavo mitra duhre /*
*trayastasthurvṛṣabhāsastisṛṇāṁ dhiṣṇānāṁ retodhā vi dyumantaḥ //2 //*
*prātardevīmaditi johavīmi madhyandina uditā sūryasya /*
*rāye mitrāvaruṇā sarvatāteḷe tokāya tanayāya śaṁ yoḥ //3 //*
*yā dhartārā rajaso rochanasyotādityā divyā pārthivasya /*
*na vāṁ devā amṛtā ā minanti vratāni mitrāvaruṇā dhruvāṇi //4 //*

ऋ. (Rv.) ५.७०.१-४

पुरूरुणा चिद्ध्यस्त्यवो नूनं वां वरुण। मित्र वंसि वा सुमतिम्॥१॥
ता वां सम्यगद्रुह्वाणेषमश्याम् धायसे। वयं ते रुद्रा स्याम ॥२॥
पातं नो रुद्रा पायुभिरुत त्रायेथां सुत्रात्रा। तुर्याम दस्यून्तनूभिः ॥३॥
मा कस्याद्भुतक्रतू यक्षं भुजेमा तनूभिः। मा शेषसा मा तनसा॥४॥
*purūruṇā chiddhyastyavo nūnaṁ vāṁ varuṇa / mitra vaṁsi vā sumatim //1 //*
*tā vāṁ samyagadruhnāṇeṣamaśyām dhāyase / vayaṁ te rudrā syāma //2 //*
*pātaṁ no rudrā pāyubhiruta trāyethāṁ sutrātrā / turyāma dasyūntanūbhiḥ //3 //*
*mā kasyādbhutakratū yakṣaṁ bhujemā tanūbhiḥ / mā śeṣasā mā tanasā //4 //*

सा. (Sv.) ९८५-८७

पुरूरुणा चिद्ध्यस्त्यवो नूनं वां वरुण। मित्र वं सि वां सुमतिम् ॥१॥
ता वांसम्यगद्रुह्वाणेषमश्याम धाम च। वयं वां मित्रा स्याम ॥२॥
पातं नो मित्रा पायुभिरुत त्रायेथां सुत्रात्रा। साह्याम दस्यूं तनूभिः ॥३॥
*purūruṇā chiddhyastyavo nūnaṁ vāṁ varuṇa / mitra vaṁ si vāṁ sumatim //1 //*
*tā vāṁsamyagadruhnāṇeṣamaśyāma dhāma cha / vayaṁ vāṁ mitrā syāma //2 //*

*pātaṁ no mitrā pāyubhiruta trāyethāṁ sutrātrā | sāhyāma dasyūṁ tanūbhiḥ ||3 ||*

## १२७. उर्ध्व ग्रावार्बुदः (Urdhva Grāvārbudaḥ)

१. ग्रावाणः (Grāvāṇaḥ) - ऋ. (Rv.) १०.१७५.१-४

प्र वो ग्रावाणः सविता देवः सुवतु धर्मणा। धूर्षु युज्यध्वं सुनुत ॥१॥
ग्रावाणो अप दुच्छुनामप सेधत दुर्मतिम्। उस्राः कर्तन भेषजम् ॥२॥
ग्रावाण उपरेष्वा महीयन्ते सजोषसः। वृष्णे दधतो वृष्ण्यम् ॥३॥
ग्रावाणः सविता नु वो देवः सुवतु धर्मणा। यजमानाय सुन्वते ॥४॥

*pra vo grāvāṇaḥ savitā devaḥ suvatu dharmaṇā | dhūrṣu yujyadhvaṁ sunuta ||1 ||*
*grāvāṇo apa duchchhunāmapa sedhata durmatim | usrāḥ kartana bheṣajam ||2 ||*
*grāvāṇa upareṣvā mahīyante sajoṣasaḥ | vṛṣṇe dadhato vṛṣṇyam ||3 ||*
*grāvāṇaḥ savitā nu vo devaḥ suvatu dharmaṇā | yajamānāya sunvate ||4 ||*

## १२८. उर्ध्वसद्मा (Urdhvasadmā)

१. पवमानः सोमः (Pavamānaḥ Somaḥ)- ऋ. (Rv.) ९.१०८.८-९

सहस्रधारं वृषभं पयोवृधं प्रियं देवाय जन्मने।
ऋतेन य ऋतजातो विवावृधे राजा देव ऋतं बृहत् ॥८॥
अभि धुम्नं बृहद्यश इषस्पते दिदीहि देव देवयुः। वि कोशं मध्यमं युव ॥९॥

*sahasradhāraṁ vṛṣabhaṁ payovṛdhaṁ priyaṁ devāya janmane |*
*ṛtena ya ṛtajāto vivāvṛdhe rājā deva ṛtaṁ bṛhat ||8 ||*
*abhi dhumnaṁ bṛhadyaśa iṣaspate didīhi deva devayuḥ | vi kośaṁ madhyamaṁ yuva ||9 ||*

## १२९. उर्वशी (Urvaśī)

१. पुरुरवा ऐळः (Pururavā Ailaḥ) - ऋ. (Rv.) १०.९५.२; ४; ५; ७; ११; १३; १५; १६; १८

ऋ. (Rv.) १०.९५.२

किमेता वाचा कृणवा तवाहं प्राक्रमिषमुषसामग्रियेव ।
पुरूरवः पुनरस्तं परेहि दुरापना वात इवाहमस्मि ॥२॥

*kimetā vāchā kṛṇavā tavāhaṁ prākramiṣamuṣasāmagriyeva |*
*purūravaḥ punarastaṁ parehi durāpanā vāta ivāhamasmi ||2 ||*

ऋ. (Rv.) १०.९५.४-५

सा वसु दधती श्वशुराय वय उषो यदि वष्ट्यन्तिगृहात् ।
अस्तं ननक्षे यस्मिंचाकन्दिवा नक्तं श्नथिता वैतसेन ॥४॥
त्रि स्म माह्नः श्नथयो वैतसेनोत स्म मेऽव्यत्यै पृणासि ।
पुरूरवोऽनु ते केतमायं राजा मे वीर तन्व१स्तदासीः ॥५॥

*sā vasu dadhatī śvaśurāya vaya uṣo yadi vaṣṭyantigṛhāt |*
*astaṁ nanakṣe yasmiṁchākandivā naktaṁ śnathitā vaitasena ||4 ||*
*tri sma māhnaḥ śnathayo vaitasenota sma me'vyatyai pṛṇāsi |*
*purūravo'nu te ketamāyaṁ rājā me vīra tanva1stadāsīḥ ||5 ||*

ऋ. (Rv.) १०.९५.७

समस्मिज्जायमान आसत ग्ना उतेमवर्धन्नद्यः१ स्वगूताः ।
महे यत्त्वा पुरूरवो रणायावर्धयन्दस्युहत्याय देवाः ॥७॥

*samasmijjāyamāna āsata gnā utemavardhannadyaḥ1 svagūtāḥ |*
*mahe yattvā purūravo raṇāyāvardhayandasyuhatyāya devāḥ ||7 ||*

ऋ. (Rv.) १०.९५.११

जिाष इत्था गोपीथ्याय हि दधाथ तत्पुरूरवो म ओजः ।
अशासं त्वा विदुषी सहिसमन्नहन्न म आश्रृणोः किमभुग्वदासि ॥११॥

*jiāṣa itthā gopīthyāya hi dadhātha tatpurūravo ma Ojaḥ |*

*aśāsaṁ tvā viduṣī sahisamannahanna ma āśṛṇoḥ kimabhugvadāsi //11 //*

ऋ. (Rv.) १०.९५.१३

प्रति ब्रवाणि वर्तयते अश्रु चक्रन्न क्रन्ददाध्ये शिवायै ।
प्र तत्ते हिनवा यत्ते अस्मे परेह्यस्तं नहि मूर मापः ॥१३॥
*prati bravāṇi vartayate aśru chakranna krandadādhye śivāyai /*
*pra tatte hinavā yatte asme parehyastaṁ nahi mūra māpaḥ //13 //*

ऋ. (Rv.) १०.९५.१५-१६

पुरूरवो मा मृथा मा प्र पप्तो मा त्वा वृकासो अशिवास उ क्षन् ।
न वै स्त्रैणानि सख्यानि सन्ति सालावृकाणां हृदयान्येता ॥१५॥
यद्विरूपाचरं मर्त्येष्ववसं रात्रीः शरदश्चतस्रः ।
घृतस्य स्तोकं सकृदह्न आश्नां तादेवेदं तातृपाणा चरामि ॥१६॥
*purūravo mā mṛthā mā pra papto mā tvā vṛkāso aśivāsa u kṣan /*
*na vai straiṇāni sakhyāni santi sālāvṛkāṇāṁ hṛdayānyetā //15 //*
*yadvirūpācharaṁ martyeṣvavasaṁ rātrīḥ śaradaśchatasraḥ /*
*ghṛtasya stokaṁ sakṛdahna āśnāṁ tādevedaṁ tātṛpāṇā charāmi //16 //*

ऋ. (Rv.) १०.९५.१८

इति त्वा देवा इम आहुरैळ यथेमेतद्भवसि मृत्युबन्धुः ।
प्रजा ते देवान्हविषा यजाति स्वर्ग उ त्वमपि मादयासे ॥१८॥
*iti tvā devā ima āhuraiḷa yathemetadbhavasi mṛtyubandhuḥ /*
*prajā te devānhaviṣā yajāti svarga u tvamapi mādayāse //18 //*

## १३०. उलो वातायनः (Ulo Vātāyanaḥ)

१. इन्द्रः (साग्री. सास्वा. ऋसर्व.) वायुः (सार्षेदी.) (Indraḥ [Ssb. Sas. Rss.] Vāyuḥ [Sad.]- सा. (Sv.) १८४

वात आ वातु भेषजं शम्भु मयोभु नो हृदे। प्र न आयूंषि तारिषत् ॥१०॥
*vāta ā vātu bheṣajaṁ śambhu mayobhu no hṛde / pra na āyūṁṣi tāriṣat //10 //*

२. वायुः (Vāyuḥ) - ऋ. (Rv.) १०.१८६.१-३; सा. (Sv.) १८४०-४२

ऋ. (Rv.) १०.१८६.१-३

वात आ वातु भेषजं शम्भु मयोभु नो हृदे। प्र ण आयूँषि तारिषत् ॥१॥
उत वात पितासि न उत भ्रातोत नः सखा। स नो जीवातवे कृधि ॥२॥
यददो वात ते गृहे३ मृतस्य निधिर्हितः। ततो नो देहि जीवसे ॥३॥
*vāta ā vātu bheṣajaṁ śambhu mayobhu no hṛde / pra ṇa āyūṁṣi tāriṣat //1 //*
*uta vāta pitāsi na uta bhrātota naḥ sakhā / sa no jīvātave kṛdhi //2 //*
*yadado vāta te gṛhe3 mṛtasya nidhirhitaḥ / tato no dehi jīvase //3 //*

सा. (Sv.) १८४०-१८४२

वात आ वातु भेषजं शम्भु मयोभु नो हृदे। प्र न आयूंषि तरिषत् ॥१॥
उत वात पितासि न उत भ्रातोत नः सखा। स नो जीवातवे कृधि ॥२॥
यददो वात ते गृहे३ऽमृतं निहितं गुहा। तस्य नो धेहि जीवसे ॥३॥
*vāta ā vātu bheṣajaṁ śambhu mayobhu no hṛde / pra na āyūṁṣi tariṣat //1 //*
*uta vāta pitāsi na uta bhrātota naḥ sakhā / sa no jīvātave kṛdhi //2 //*
*yadado vāta te gṛhe3'mṛtaṁ nihitaṁ guhā / tasya no dhehi jīvase //3 //*

## १३१. उशना (Uśanā)

१. अग्निः (Agniḥ) - य. (Yv.)१३.५२

त्वं यविष्ठ दाशुषो नॄः पाहि श्रृणुधी गिरः। रक्षा तोकमतु त्मना ॥५२॥
*tvaṁ yaviṣṭha dāśuṣo nṝḥ pāhi śṛṇudhī giraḥ / rakṣā tokamatu tmanā //52 //*

२. अश्विनौ (Aśvinau) - य. (Yv.) १४.१-५

ध्रुवक्षितिर्ध्रुवयोनिर्ध्रुवासि ध्रुवं योनिमासीद साधुया ।
उख्यस्य केतुं प्रथमं जुषाणा अश्विनाध्वर्यू सादयतामिह त्वा ॥१॥
कुलायिनी घृतवती पुरन्धिः स्योने सीद सदने पृथिव्याः ।
अभि त्वा रुद्रा वसवो गृणान्त्विमा ब्रह्म पीपिहि सौभगायाश्विनाध्वर्यू सादयतामिह त्वा ॥२॥
स्वैर्दक्षैर्दक्षपितेह सीद देवानांसुम्ने बृहते रणाय ।
पितेवैधि सूनवऽआ सुशेवा स्वावेशा तन्वा संविशस्वाश्विनाध्वर्यू सादयतामिह त्वा ॥३॥
पृथिव्याः पुरीषमस्यप्सो नाम तां त्वा विश्वेऽअभिगृणन्तु देवाः। स्तोमपृष्ठा घृतवतीह सीद प्रजावदस्मे द्रविणा यजस्वा श्विनाध्वर्यू सादयतामिह त्वा ॥४॥
अदित्यास्त्वा पृष्ठे सादयाम्यन्तरिक्षस्य धर्त्री विष्टम्भनीं दिशामधिपत्नीं भुवनानाम् ।
ऊर्मिर्द्रप्सोऽअपामसि विश्वकर्मा तऽऋषिश्विनाध्वर्यू सादयतामिह त्वा ॥५॥

*dhruvakṣitirdhruvayonirdhruvāsi dhruvaṁ yonimāsīda sādhuyā ।*
*ukhyasya ketuṁ prathamaṁ juṣāṇā aśvinādhvaryū sādayatāmiha tvā ॥1॥*
*kulāyinī ghṛtavatī purandhiḥ syone sīda sadane pṛthivyāḥ ।*
*abhi tvā rudrā vasavo gṛṇāntvimā brahma pīpihi saubhagāyāśvinādhvaryū sādayatāmiha tvā ॥2॥*
*svairdakṣairdakṣapiteha sīda devānāṁsumne bṛhate raṇāya ।*
*pitevaidhi sūnava'ā suśevā svāveśā tanvā saṁviśasvāśvinādhvaryū sādayatāmiha tvā ॥3॥*
*pṛthivyāḥ purīṣamasyapso nāma tāṁ tvā viśve'abhigṛṇantu devāḥ । stomapṛṣṭhā ghṛtavatīha sīda prajāvadasme draviṇā yajasvā śvinādhvaryū sādayatāmiha tvā ॥4॥*
*adityāstvā pṛṣṭhe sādayāmyantarikṣasya dhartrī viṣṭambhanīṁ diśāmadhipatnīṁ bhuvanānām ।*
*ūrmirdrapso'apāmasi viśvakarmā ta'ṛṣiśvinādhvaryū sādayatāmiha tvā ॥5॥*

३. आपः (Āpaḥ) - य. (Yv.)१३.५३

अपां त्वेमन्त्सादयाम्यपा त्वोद्मन्त्सादयाम्यपां त्वा भस्मन्त्सादयाम्यपां त्वा ज्योतिषि सादयाम्यपां त्वायने सादयाम्यर्णवे त्वा सदने सादयामि समुद्रे त्वा सदने सादयामि। सरिरे त्वा सदने सादयाम्यपां त्वा क्षये सादयाम्यपां त्वा सधिषि सादयाम्यपां त्वा सदने सादयाम्यपां त्वा सधस्थे सादयाम्यपां त्वा योनौ सादयाम्यपां त्वा पुरीषे सादयाम्यपां त्वा पाथसि सादयामि गायत्रेण त्वा छन्दसा सादयामि त्रैष्टुभेन त्वा छन्दसा सादयामि जागतेन त्वा छन्दसा सादयाम्यानुष्टुभेन त्वा छन्दसा सादयामि पाङ्क्तेन त्वा छन्दसा सादयामि ॥५३॥

*apāṁ tvemantsādayāmyapā tvodmantsādayāmyapāṁ tvā bhasmantsādayāmyapāṁ tvā jyotiṣi sādayāmyapāṁ tvāyane sādayāmyarṇave tvā sadane sādayāmi samudre tvā sadane sādayāmi । sarire tvā sadane sādayāmyapāṁ tvā kṣaye sādayāmyapāṁ tvā sadhiṣi sādayāmyapāṁ tvā sadane sādayāmyapāṁ tvā sadhasthe sādayāmyapāṁ tvā yonau sādayāmyapāṁ tvā purīṣe sādayāmyapāṁ tvā pāthasi sādayāmi gāyatreṇa tvā chhandasā sādayāmi traiṣṭubhena tvā chhandasā sādayāmi jāgatena tvā chhandasā sādayāmyānuṣṭubhena tvā chhandasā sādayāmi pāṅktena tvā chhandasā sādayāmi ॥53॥*

४. ग्रीष्मर्तुः (Grīṣmartuḥ) - य. (Yv.)१४.६

शुक्रश्च शुचिश्च ग्रैष्मावृतू ऽअग्नेरन्तः-२लेषोऽसि कल्पेतां द्यावापृथिवी कल्पन्तामापऽओषधयः कल्पन्तामग्नयः पृथङ् मम ज्यैष्ठ्याय सव्रताः।
येऽअग्नयः समनसो ऽन्तरा द्यावापृथिवीऽइमे ग्रैष्मावृतूऽअभि कल्पमानाऽइन्द्रमिव देवाऽअभिसंविशन्तु तया देवतयांगिरस्वद् ध्रुवे सीदतम् ॥६॥

*śukraścha śuchiścha graiṣmāvṛtū 'agnerantaḥ-2leṣo'si kalpetāṁ dyāvāpṛthivī kalpantāmāpa'Oṣadhayaḥ kalpantāmagnayaḥ pṛthaṅ mama jyaiṣṭhyāya savratāḥ ।*
*ye'agnayaḥ samanaso 'ntarā dyāvāpṛthivī'ime graiṣmāvṛtū'abhi kalpamānā'indramiva devā'abhisaṁviśantu tayā devatayāṁgirasvad dhruve sīdatam ॥6॥*

५. पवमानः सोमः (Pavamānaḥ Somaḥ)- ऋ. (Rv.) ९.८७.१-९; ९.८८.१-८; ९.८९.१-७

ऋ. (Rv.) ९.८७.१-९

प्र तु द्रव परि कोशं नि षीद नृभिः पुनानो अभि वाजमर्ष ।
अश्वं न त्वा वाजिनं मर्जयन्तोऽच्छा बर्ही रशनाभिर्नयन्ति ॥१॥
स्वायुधः पवते देव इन्दुरशस्तिहा वृजनं रक्षमाणः ।
पिता देवानां जनिता सुदक्षो विष्टम्भो दिवो धरुणः पृथिव्याः ॥२॥
ऋषिर्विप्रः पुरएता जनानामृभुर्धीर उशना काव्येन ।
स चिद्विवेद निहितं यदासामपीच्यं१ गुह्यं नाम गोनाम् ॥३॥
एष स्य ते मधुमाँ इन्द्र सोमो वृषा वृष्णे परि पवित्रे अक्षाः ।
सहस्रसाः शतसा भूरिदावा शश्वत्तमं बर्हिरा वाज्यस्थात् ॥४॥
एते सोमा अभि गव्या सहस्रा महे वाजायामृताय श्रवांसि ।
पवित्रेभिः पवमाना असृग्रञ्छ्रवस्यवो न पृतनाजो अत्याः ॥५॥
परि हि ष्मा पुरुहूतो जनानां विश्वासरद्भोजना पूयमानः ।
अथा भर श्येनभृत प्रयांसि रयिं तुंजानो अभि वाजमर्ष ॥६॥
एष सुवानः परि सोमः पवित्रे सर्गो न सृष्टो अदधावदर्वा ।
तिग्मे शिशानो महिषो न शृंगे गा गव्यन्नभि शूरो न सत्वा ॥७॥
एषा ययौ परमादन्तरद्रेः कुचित्सतीरूर्वे गा विवेद ।
दिवो न विद्युत्स्तनयन्त्यभ्रैः सोमस्य ते पवत इन्द्र धारा ॥८॥
उत स्म राशिं परि यासि गोनामिन्द्रेण सोम सरथं पुनानः ।
पूर्वीरिषो बृहतीर्जीरदानो शिक्षा शचीवस्तव ता उपष्टुत् ॥९॥

*pra tu drava pari kośaṁ ni ṣīda nubhiḥ punāno abhi vājamarṣa /*
*aśvaṁ na tvā vājinaṁ marjayanto'chchhā barhī raśanābhirnayanti //1 //*
*svāyudhaḥ pavate deva induraśastihā vṛjanaṁ rakṣamāṇaḥ /*
*pitā devānāṁ janitā sudakṣo viṣṭambho divo dharuṇaḥ pṛthivyāḥ //2 //*
*ṛṣirvipraḥ puraetā janānāmṛbhiurdhīra uśanā kāvyena /*
*sa chidviveda nihitaṁ yadāsāmapīchyaṁ1 guhyaṁ nāma gonām //3 //*
*eṣa sya te madhumām̐ indra somo vṛṣā vṛṣṇe pari pavitre akṣāḥ /*
*sahasrasāḥ śatasā bhūridāvā śaśvattamaṁ barhirā vājyasthāt //4 //*
*ete somā abhi gavyā sahasrā mahe vājāyāmṛtāya śravāṁsi /*
*pavitrebhiḥ pavamānā asṛgraṁchhravasyavo na pṛtanājo atyāḥ //5 //*
*pari hi ṣmā puruhūto janānāṁ viśvāsaradbhojanā pūyamānaḥ /*
*athā bhara śyenabhṛta prayāṁsi rayiṁ tuṁjāno abhi vājamarṣa //6 //*
*eṣa suvānaḥ pari somaḥ pavitre sargo na sṛṣṭo adadhāvadarvā /*
*tigme śśiāno mahiṣo na śṛṅge gā gavyannabhi śūro na satvā //7 //*
*eṣā yayau paramādantaradreḥ kuchitsatīrūrve gā viveda /*
*divo na vidyutsatanayantyabhraiḥ somasya te pavata indra dhārā //8 //*
*uta sma rāśi pari yāsi gonāmindreṇa soma sarathaṁ punānaḥ /*
*pūrvīriṣo bṛhatīrjīradāno śikṣā śachīvastava tā upaṣṭut //9 //*

ऋ. (Rv.) ९.८८.१-८

अयं सोम इन्द्रं तुभ्यं सुन्वे तुभ्यं पवते त्वमस्य पाहि ।
त्वं ह यं चकृषे त्वं ववृष इन्दुं मदाय युज्याय सोमम् ॥१॥
स ई रथो न भुरिषळयोजि महः पुरूणि सातये वसूनि ।
आदीं विश्वा नहुष्याणि जाता स्वर्षाता वन ऊर्ध्वा नवन्त ॥२॥
वायुर्न यो नियुत्वाँ इष्टयामा नासत्येव हव आ शंभविष्ठः ।
विश्ववारो द्रविणोदा इव त्मन्पूषेव धीजवनोऽसि सोम ॥३॥
इन्द्रो न यो महा कर्माणि चक्रिर्हन्ता वृत्राणामसि सोम पूर्भित् ।
पैद्वो न हि त्वमहिनाम्नां हन्ता विश्वस्यासि सोम दस्योः ॥४॥

अग्निर्न यो वन आ सृज्यमानो वृथा पाजांसि कृणुते नदीषु ।
जनो न युध्वा महत उपब्दिरियर्ति सोमः पवमान ऊर्मिम् ॥५॥
एते सोमा अति वाराण्यव्या दिव्या न कोशासो अभ्रवर्षाः ।
वृथा समुद्रं सिन्धवो न नीचीः सुतासो अभि कलशाँ असृग्रन् ॥६॥
शुष्मी शर्धो न मारुतं पवस्वानभिशस्ता दिव्या यथा विट् ।
आपो न मक्षू सुमतिर्भवा नः सहस्राप्साः पृतनाषाण्न याः ॥७॥
रााो नु ते वरुणस्य व्रतानि बृहद्गभीरं तव सोम धाम ।
शुचिष्टवमसि प्रियो न मित्रो दक्षाय्यो अर्यमेवासि सोम ॥८॥

*ayaṁ soma indraṁ tubhyaṁ sunve tubhyaṁ pavate tvamasya pāhi /*
*tvaṁ ha yaṁ chakṛṣe tvaṁ vavṛṣa induṁ madāya yujyāya somam //1 //*
*sa ī ratho na bhuriṣaḻayoji mahaḥ purūṇi sātaye vasūni /*
*ādīṁ viśvā nahuṣyāṇi jātā svarṣātā vana ūrdhvā navanta //2 //*
*vāyurna yeā niyutvām̐ iṣṭayāmā nāsatyeva hava ā śaṁbhaviṣṭhaḥ /*
*viśvavāro draviṇodā iva tmanpūṣeva dhījavano'si soma //3 //*
*indro na yo mahā karmāṇi chakrirhantā vṛtrāṇāmasi soma pūrbhit /*
*paidvo na hi tvamahināmnā hantā viśvasyāsi soma dasyoḥ //4 //*
*agnirna yo vana ā sṛjyamāno vṛthā pājāṁsi kṛṇute nadīṣu /*
*jano na yudhvā mahata upabdiriyarti somaḥ pavamāna ūrmim //5 //*
*ete somā ati vārāṇyavyā divyā na kośāso abhravarṣāḥ /*
*vṛthā samudraṁ sindhavo na nīchīḥ sutāso abhi kalaśām̐ asṛgran //6 //*
*śuṣmī śardho na mārutaṁ pavasvānabhiśastā divyā yathā viṭ /*
*āpo na makṣū sumatirbhavā naḥ sahasrāpsāḥ pṛtanāṣāṇna yāḥ //7 //*
*rāāo nu te varuṇasya vratāni bṛhadgabhīraṁ tava soma dhāma /*
*śuchiṣṭavamasi priyo na mitro dakṣāyyo aryamevāsi soma //8 //*

ऋ. (Rv.) ९.८९.१-७

प्रो स्य वह्निः पथ्यभिरस्यान्दिवो न वृष्टिः पवमानो अक्षाः ।
सहस्रधारो असदन्न्य१स्मे मातुरुपस्थे वन आ च सोमः ॥१॥
राजा सिन्धूनामवसिष्ट वास ऋतस्य नावमारुहद्रजिष्ठाम् ।
अप्सु द्रप्सो वावृधे श्येनजूतो दुह ई पिता दुह ई पितुर्जाम् ॥२॥
सिंहं नसन्त मध्वो अयासं हरिमरुषं दिवो अस्य पतिम् ।
शूरो युत्सु प्रथमः पृच्छते गा अस्य चक्षसा परि पात्युक्षा ॥३॥
मधुपृष्ठं घोरमयासमश्वं रथे युञ्जन्त्युरुचक्र ऋष्वम् ।
स्वसार ई जामयो मर्जयन्ति सनाभयो वाजिनमूर्जयन्ति ॥४॥
चतस्र ई घृतदुहः सचन्ते समाने अन्तर्धरुणे निषत्ताः ।
ता ईमर्षन्ति नमसा पुनानास्ता ई विश्वतः पवरि षन्ति पूर्वीः ॥५॥
विष्टम्भे दिवो धरुणः पृथिव्या विश्वा उत क्षितयो हस्ते अस्य ।
असत्त उत्सो गृणते नियुत्वान्मध्वो अंशुः पवत इन्द्रियाय ॥६॥
वन्वन्नवातो अभि देववीतिमिन्द्राय सोम वृत्रहा पवस्व ।
शग्धि महः पुरुश्चन्द्रस्य रायः सुवीर्यस्य पतयः स्याम ॥७॥

*pro sya vahniḥ pathyabhirasyāndivo na vṛṣṭiḥ pavamāno akṣāḥ /*
*sahasradhāro asadannya1sme māturupasthe vana ā cha seāmaḥ //1 //*
*rājā sindhūnāmavasiṣṭa vāsa ṛtasya nāvamāruhadrajiṣṭhām /*
*apsu drapso vāvṛdhe śyenajūto duha ī pitā duha ī piturjām //2 //*
*siṁhaṁ nasanta madhvo ayāsaṁ harimaruṣaṁ divo asya patim /*
*śūro yutsu prathamaḥ pṛchchhate gā asya chakṣasā pari pātyukṣā //3 //*
*madhupṛṣṭhaṁ ghoramayāsamaśvaṁ rathe yujjantyuruchakra ṛṣvam /*
*svasāra ī jāmayo marjayanti sanābhayo vājinamūrjayanti //4 //*
*chatasra ī ghṛtaduhaḥ sachante samāne antardharuṇe niṣattāḥ /*

*tā īmarṣanti namasā punānāstā ī viśvataḥ pavari ṣanti pūrvīḥ ॥5 ॥*
*viṣṭambhe divo dharuṇaḥ pṛthivyā viśvā uta kṣitayo haste asya ।*
*asatta utso gṛṇate niyutvānmadhvo aṁśuḥ pavata indriyāya ॥6 ॥*
*vanvannavāto abhi devavītimindrāya soma vṛtrahā pavasva ।*
*śagdhi mahaḥ puruśchandrasya rāyaḥ suvīryasya patayaḥ syāma ॥7 ॥*

६. प्रजापतिः (Prajāpatiḥ) - य. (Yv.)१३.५५-५८

अयं दक्षिणा विश्वकर्मा तस्य मनो वैश्वकर्मणं ग्रीष्मो मानसस्त्रिष्टुब ग्रैष्मी त्रिष्टुभः स्वारम्। स्वारादन्तर्य्यामोऽन्तर्यामात्पंचदशः पंचदशाद् बृहद् भरद्वाजऽऋषिः प्रजापतिगृहीतया त्वया मनो गृह्णामि प्रजाभ्यः ॥५५॥

अयं पश्चाद् विश्वव्यचास्तस्य चक्षुर्वैश्वव्यचसं वर्षाश्चाक्षुष्यो जगती वार्षी जगत्याऽऋक्समम्। ऋक्समाच्छुक्रः शुक्रात्सप्तदशः सप्तदशाद्वैरूपं जमदग्नि ऋषिः प्रजापतिगृहीतया त्वया चक्षुर्गृह्णामि प्रजाभ्यः ॥५६॥

इदमुत्तरात् स्वस्तस्य श्रोत्रंसौवंशरच्छ्रौत्र्यनुष्टुप् शारद्यनुष्टुभऽऐडमैडान्मन्थी मन्थिनऽएकविं शऽएकविंशाद् वैराजं विश्वमित्रऽऋषिः प्रजापतिगृहीतया त्वया श्रोत्रं गृह्णामि प्रजाभ्यः ॥५७॥

इयमुपरि मतिस्तस्यै वाङ्मात्या हेमन्तो वाच्यः पङ्क्तिर्हैमन्ती पङ्क्त्यै निधनवन्निधनवतऽआग्रयणः। आग्रयणात् त्रिणवत्रयस्त्रिँशौ त्रिणवत्रयस्त्रिं शाभ्यांशाक्वररैवते विश्वकर्मऽऋषि प्रजापतिगृहीतया त्वया वाचं गृह्णामि प्रजाभ्यः ॥५८॥

*ayaṁ dakṣiṇā viśvakarmā tasya mano vaiśvakarmaṇaṁ grīṣmo mānasastriṣṭuba graiṣmī triṣṭubhaḥ svāram । svārādantaryyāmo'ntaryāmātpaṁchadaśaḥ paṁchadaśād bṛhad bharadvāja'ṛṣiḥ prajāpatigṛhītayā tvayā mano gṛhṇāmi prajābhyaḥ ॥55 ॥*
*ayaṁ paśchād viśvavyachāstasya chakṣurvaiśvavyachasaṁ varṣāśchākṣuṣyo jagatī vārṣī jagatyā'ṛksamam । ṛksamāchchhukraḥ śukrātsaptadaśaḥ saptadaśādvairūpaṁ jamadagni ṛṣiḥ prajāpatigṛhītayā tvayā chakṣurgṛhṇāmi prajābhyaḥ ॥56 ॥*
*idamuttarāt svastasya śrotraṁsauvaṁśarachchhrautrayanuṣṭup śāradyanuṣṭubha'aiḍamaiḍānmanthī manthina'ekaviṁ śa'ekaviṁśād vairājaṁ viśvamitra'ṛṣiḥ prajāpatigṛhītayā tvayā śrotraṁ gṛhṇāmi prajābhyaḥ ॥57 ॥*
*iyamupari matistasyai vāṅmātyā hemanto vāchyaḥ paṅktihaimantī paṅktyai nidhanavannidhanavata'āgrayaṇaḥ । āgrayaṇāt triṇavatrayastriṁśau triṇavatrayastriṁ śābhyāṁśākvararaivate viśvakarma'ṛṣi prajāpatigṛhītayā tvayā vāchaṁ gṛhṇāmi prajābhyaḥ ॥58 ॥*

७. प्राणः (Prāṇaḥ) - य. (Yv.)१३.५४

अयं पुरो भुवस्तस्य प्राणो भैवायनो वसन्तः प्राणायनो गायत्री वासन्ती गाय त्र्यै गायत्रं गायत्रादुपां शुरुपां शोस्त्रिवृत् त्रिवृतो रथन्तरं वसिष्ठऽऋषिः प्रजापतिगृहीतया त्वया प्राणं गृह्णामि प्रजाभ्यः ॥५४॥

ayaṁ puro bhuvastasya prāṇo bhaivāyano vasantaḥ prāṇāyano gāyatrī vāsantī gāya trayai gāyatraṁ gāyatrādupāṁ śurupāṁ śostrivṛt trivṛto rathantaraṁ vasiṣṭha'ṛṣiḥ prajāpatigṛhītayā tvayā prāṇaṁ gṛhṇāmi prajābhyaḥ ॥54 ॥

८. विश्वेदेवाः (Viśvedevāḥ) - य. (Yv.)१८.७७

त्वं यविष्ठ दाशुषो नॄः पाहि श्रृणुधी गिरः। रक्षा तोकमुत त्मना ॥७७॥
*tvaṁ yaviṣṭha dāśuṣo nṝḥ pāhi śrṛṇudhī giraḥ । rakṣā tokamuta tmanā ॥77 ॥*

## १३२. उशना काव्यः (Uśanā Kāvyaḥ)

१. अग्निः (Agniḥ) - ऋ. (Rv.) ८.८४.१-९; सा. (Sv.) ५; ३४; १२४४-१२४६; १५४९-१५५१

ऋ. (Rv.) ८.८४.१-९

प्रेष्ठं वो अतिथिं स्तुषे मित्रमिव प्रियम्। अग्निं रथं न वेद्यम् ॥१॥
कविमिव प्रचेतसं यं देवासो अध द्विता। नि मर्त्येष्वादयधुः ॥२॥
त्वं यविष्ठ दाशुषो नॄः पाहि श्रृणुधी गिरः। रक्षा तोकमुत त्मना ॥३॥
कया ते अग्ने अंगिर ऊर्जो नपादुपस्तुतिम्। वराय देव मन्यवे ॥४॥
दाशेम कस्य मनसा यास्य सहसो यहो। कदु वोच इदं नमः ॥५॥

अधा त्वं हि नस्करो विश्वा अस्मभ्यं सुक्षितीः। वाजद्रविणसो गिरः ॥६॥
कस्य नूनं परीणसो धियो जिन्वसि दंपते। गोषाता यस्य ते गिरः ॥७॥
तं मर्जयन्त सुक्रतुं पुरोयावानमाजिषु। स्वेषु क्षयेषु वाजिनम् ॥८॥
क्षेति क्षेमेभिः साधुभिर्नकिर्यं घ्नन्ति हन्ति यः। अग्ने सुवीर एधते ॥९॥
*preṣṭhaṁ vo atithi stuṣe mitramiva priyam | agniṁ rathaṁ na vedyam ||1||*
*kavimiva prachetasaṁ yaṁ devāso adha dvitā | ni martyeṣvādayadhuḥ ||2||*
*tvaṁ yaviṣṭha dāśuṣo nṝḥ pāhi śṛṇudhī giraḥ | rakṣā tokamuta tmanā ||3||*
*kayā te agne aṁgira ūrjo napādupastutim | varāya deva manyave ||4||*
*dāśema kasya manasā yāsya sahaso yaho | kadu vocha idaṁ namaḥ ||5||*
*adhā tvaṁ hi naskaro viśvā asmabhyaṁ sukṣitīḥ | vājadraviṇaso giraḥ ||6||*
*kasya nūnaṁ parīṇaso dhiyo jinvasi daṁpate | goṣātā yasya te giraḥ ||7||*
*taṁ marjayanta sukratuṁ puroyāvānamājiṣu | sveṣu kṣayeṣu vājinam ||8||*
*kṣeti kṣemebhiḥ sādhubhirnakirya ghnanti hanti yaḥ | agne suvīra edhate ||9||*

सा. (Sv.) ५

प्रेष्ठं वो अतिथिं स्तुषे मित्रमिव प्रियम्। अग्ने रथं न वेद्यम् ॥५॥
preṣṭhaṁ vo atithi stuṣe mitramiva priyam | agne rathaṁ na vedyam ||5||

सा. (Sv.) ३४

कस्य नूनं परीणसि धियो जिन्वसि सत्पते। गोषाता यस्य ते गिरः ॥१४॥
*kasya nūnaṁ parīṇasi dhiyo jinvasi satpate | goṣātā yasya te giraḥ ||14||*

सा. (Sv.) १२४४-१२४६

प्रेष्ठं वा अतिथिंस्तुषे मित्रमिव प्रियम्। अग्ने रथं न वेद्यम् ॥१॥
कविमिव प्रशं स्यं यं देवास इति द्विता। नि मर्त्येष्वादधुः ॥२॥
त्वं यविष्ठ दाशुषो नृः पाहि श्रृणुही गिरः। रक्षा तोकमुत त्मना ॥३॥
*preṣṭhaṁ vā atithiṁstuṣe mitramiva priyam | agne rathaṁ na vedyam ||1||*
*kavimiva praśaṁ syaṁ yaṁ devāsa iti dvitā | ni martyeṣvādadhuḥ ||2||*
*tvaṁ yaviṣṭha dāśuṣo nṝḥ pāhi śṛṇuhī giraḥ | rakṣā tokamuta tmanā ||3||*

सा. (Sv.) १५४९-१५५१

कया ते अग्ने अंगिर ऊर्जो नपादुपस्तुतिम्। वराय देव मन्यवे ॥१॥
दाशेम कस्य मनसा यास्य सहसो यहो। कदु वोच इदं नमः ॥२॥
अधात्वं हि नस्करो विश्वा अस्मभ्यं सुक्षितीः। वाजद्रविणसो गिरः ॥३॥
*kayā te agne aṁgira ūrjo napādupastutim | varāya deva manyave ||1||*
*dāśema kasya manasā yāsya sahaso yaho | kadu vocha idaṁ namaḥ ||2||*
*adhātvaṁ hi naskaro viśvā asmabhyaṁ sukṣitīḥ | vājadraviṇaso giraḥ ||3||*

२. पवमानः सोमः (Pavamānaḥ Somaḥ)- सा. (Sv.) ५२३; ५३१; ६७७-६७९; १४७१-१४७३

सा. (Sv.) ५२३

प्र तु द्रव परि कोशं नि षीद नृभिः पुनानो अभि वाजमर्ष।
अश्वं न त्वा वाजिनं मर्जयन्तोऽच्छा बर्ही रशनाभिर्नयन्ति ॥१॥
*pra tu drava pari kośaṁ ni ṣīda nṛbhiḥ punāno abhi vājamarṣa |*
*aśvaṁ na tvā vājinaṁ marjayanto'chchhā barhī raśanābhirnayanti ||1||*

सा. (Sv.) ५३१

एष स्य ते मधुमाँ इन्द्र सोमो वृषा वृष्णः परि पवित्रे अक्षाः।
सहस्रदाः शतदा भूरिदावा शश्वत्तमं बर्हिरा वाज्यस्थात् ॥९॥
*eṣa sya te madhumām̐ indra somo vṛṣā vṛṣṇaḥ pari pavitre akṣāḥ |*
*sahasradāḥ śatadā bhūridāvā śaśvattamaṁ barhirā vājyasthāt ||9||*

सा. (Sv.) ६७७-६७९

प्र तु द्रव परि कोशं नि षीद नृभिः पुनानो अभि वाजमर्ष।

अश्वं न त्वा वाजिनं मर्जयन्तोऽच्छा बर्ही रशनाभिर्नयन्ति ॥१॥
स्वायुधः पवते देव इन्दुशस्तिहा वृजना रक्षमाणः ।
पिता देवानां जनिता सुदक्षो विष्टम्भो दिवो धरुणः पृथिव्याः ॥२॥
ऋषिर्विप्रः पुर एता जनानामृभुर्धीर उशना काव्यने ।
न चिद्विवेद निहितं यदासापीच्यां३ गुह्यं नाम गोनाम् ॥३॥
*pra tu drava pari kośaṁ ni ṣīda nṛbhiḥ punāno abhi vājamarṣa* /
*aśvaṁ na tvā vājinaṁ marjayanto'chchhā barhī raśanābhirnayanti* //1 //
*svāyudhaḥ pavate deva induśastihā vṛjanā rakṣamāṇaḥ* /
*pitā devānāṁ janitā sudakṣo viṣṭambho divo dharuṇaḥ pṛthivyāḥ* //2 //
*ṛṣirvipraḥ pura etā janānāmṛbhurdhīra uśanā kāvyane* /
*na chidviveda nihitaṁ yadāsāpīchyāṁ3 guhyaṁ nāma gonām* //3 //

सा. (Sv.) १४७१-१४७३

अयं सोम इन्द्र तुभ्यं सुन्वे तुभ्यं पवते त्वमस्य पाहि ।
त्वं ह यं चकृषे त्वं ववृष इन्दुं मदाय युज्याय सोमम् ॥१॥
स ई रथो न भुरिषडयोजि महः पुरूणि सातये वसूनि ।
आदीं विश्वा नहुष्याणि जाता स्वर्षाता वन ऊर्ध्वा नवन्त ॥२॥
शुष्मी शर्धो न मारुतं पवस्वानभिशस्ता दिव्या यथा विट् ।
आपो न मक्षू सुमतिर्भवा नः सहस्राप्साः पृतनाषाणत याः ॥३॥
*ayaṁ soma indra tubhyaṁ sunve tubhyaṁ pavate tvamasya pāhi* /
*tvaṁ ha yaṁ chakṛṣe tvaṁ vavṛṣa induṁ madāya yujyāya somam* //1 //
*sa ī ratho na bhuriṣaḍayoji mahaḥ purūṇi sātaye vasūni* /
*ādīṁ viśvā nahuṣyāṇi jātā svarṣātā vana ūrdhvā navanta* //2 //
*śuṣmī śardho na mārutaṁ pavasvānabhiśastā divyā yathā viṭ* /
*āpo na makṣū sumatirbhavā naḥ sahasrāpsāḥ pṛtanāṣāṇata yāḥ* //3 //

## १३३. ऊर्ध्व सद्मा आंगिरसः (Ūrdhva Sadmā Āṁgirasaḥ)

१. पवमानः सोमः (Pavamānaḥ Somaḥ)- सा. (Sv.) ५७९; १०११; १३९५

सा. (Sv.) ५७९

अभि द्युम्नं बृहद्यश इषस्पते दिदीहि देव देव्युम्। वि कोशं मध्यमं युव ॥२॥
*abhi dyumnaṁ bṛhadyaśa iṣaspate didīhi deva devyum / vi kośaṁ madhyamaṁ yuva* //2 //

सा. (Sv.) १०११

अभि द्युम्नं बृहद्यश इषस्पते दिदीहि देव देवयुम्। वि कोशं मध्यमं युव ॥१॥
*abhi dyumnaṁ bṛhṛdyaśa iṣaspate didīhi deva devayum / vi kośaṁ madhyamaṁ yuva* //1 //

सा. (Sv.) १३९५

सहस्रधारं वृषभं पयोदुहं प्रियं देवाय जन्मने।
ऋतेन य ऋतजातो विवावृधे राजा देव ऋतं बृहत्॥२॥
*sahasradhāraṁ vṛṣabhaṁ payoduhaṁ priyaṁ devāya janmane* /
*ṛtena ya ṛtajāto vivāvṛdhe rājā deva ṛtaṁ bṛhat* //2 //

## १३४. ऋण त्रसदस्यू (Ṛṇa Trasadasyū)

१. वाजिनः (Vājinaḥ) - सा. (Sv.) ४३५

आविर्मर्या आ वाजं वाजिनो अग्मं देवस्य सवितुः सवम्। स्वर्गांअर्वन्तो जयत ॥९॥
*āvirmaryā ā vājaṁ vājino agmaṁ devasya savituḥ savam / svargāṁarvanto jayata* //9 //

**१३५. ऋणंचयः (Ṛṇaṁchayaḥ)**

१. पवमानः सोमः (Pavamānaḥ Somaḥ)- ऋ. (Rv.) ९.१०८.१२-१३

वृषा वि जो जनयन्नमर्त्यः प्रतपंज्योतिषा तमः। स सुष्टुतः कविभिर्निर्णिजं दधे त्रिधात्वस्य दंससा॥१२॥

स सुन्वे यो वसूना यो रायामानेता य इळनाम्। सोमो यः सुक्षितीनाम् ॥१३॥

*vṛṣā vi jo janayannamartyaḥ pratapaṁjyotiṣā tamaḥ । sa suṣṭutaḥ kavibhirnirṇijaṁ dadhe tridhātvasya daṁsasā ॥12॥*

*sa sunve yo vasūnā yo rāyāmānetā ya iḷanām । somo yaḥ sukṣitīnām ॥13॥*

**१३६. ऋणंचयो आंगिरसः (Ṛṇaṁchayo Āṁgirasaḥ)**

१. पवमानः सोमः (Pavamānaḥ Somaḥ)- सा. (Sv.) ५८२

स सुन्वे यो वसूनां यो रायामानेता य इडानाम्। सोमो यः सुक्षितीनाम् ॥५॥

*sa sunve yo vasūnāṁ yo rāyāmānetā ya iḍānām । somo yaḥ sukṣitīnām ॥5॥*

**१३७. ऋणंचयो राजर्षिः (Ṛṇaṁchayo Rājarṣiḥ)**

१. पवमानः सोमः (Pavamānaḥ Somaḥ)- सा. (Sv.) १०९६

स सुन्वे यो वसूनां यो रायामानेता य इडानाम्। सोमो यः सुक्षितीनाम् ॥१॥

*sa sunve yo vasūnāṁ yo rāyāmānetā ya iḍānām । somo yaḥ sukṣitīnām ॥1॥*

**१३८. ऋजिष्वा (Ṛjiṣvā)**

१. पवमानः सोमः (Pavamānaḥ Somaḥ)- ऋ. (Rv.) ९.१०८.६-७

य उस्रिया अप्या अन्तरश्मनो निर्गा अकृन्तदोजसा ।

अभि व्रजं तत्निषे गव्यमश्व्यं वर्मीव धृष्णवा रुज॥६॥

आ सोता परि षिंचताश्वं न स्तोममप्तुरं रजस्तुरम् । वनऋक्षमुदप्रुतम् ॥७॥

*ya usriyā apyā antaraśmano nirgā akṛntadojasā ।*

*abhi vrajaṁ tatniṣe gavyamaśvayaṁ varmīva dhṛṣṇavā ruja ॥6॥*

*ā sotā pari ṣiṁchatāśvaṁ na stomamapturaṁ rajasturam ।*

*vanaṛkṣumudaprutam ॥7॥*

२. पूषा (Pūṣā) - य. (Yv.)३४.४२

पथस्पथः परिपतिं वचस्या कामेन कृतोऽअभ्यानडर्कम् ।

सा नो रासच्छुरुधश्चन्द्राग्रा धियं धियं सीषधाति प्रपूषा ॥४२॥

*pathaspathaḥ paripatiṁ vachasyā kāmena kṛto'abhyānaḍarkam ।*

*sā no rāsachchhurudhaśchandrāgrā dhiyaṁ dhiyaṁ sīṣadhāti prapūṣā ॥42॥*

३. लिङेक्ताः (Liṅektāḥ) - य. (Yv.)३४.५३

उत नोऽहिर्बुध्न्यः शृणोत्वज ऽएकपात्पृथिवी समुद्रः ।

विश्वे देवाऽऋतावृधो हुवाना स्तुता मन्त्राः कविशस्ताऽअवन्तु ॥५३॥

*uta no'hirbudhnyaḥ śṛṇotvaja 'ekapātpṛthivī samudraḥ ।*

*viśve devā'ṛtāvṛdho huvānā stutā mantrāḥ kaviśastā'avantu ॥53॥*

४. वायुः (Vāyuḥ) - य. (Yv.)३३.५५

प्र वायुमच्छा बृहती मनीषा बृहद्रयिं विश्ववारंरथप्राम् ।

द्युतद्यामा नियुतः पत्यमानः कविः कविमियक्षसि प्रयज्यो॥५५॥

*pra vāyumachchhā bṛhatī manīṣā bṛhadrayiṁ viśvavāraṁrathaprām ।*

*dyutadyāmā niyutaḥ patyamānaḥ kaviḥ kavimiyakṣasi prayajyo ॥55॥*

५. विश्वेदेवा (Viśvedevā) - ऋ. (Rv.) ६.४९.१-१५; ६.५०.१-१५; ६.५१.१.-१६; ६.५२.१-१७

ऋ. (Rv.) ६.४९.१-१५

स्तुषे जनं सुव्रतं नव्यसमीभिर्गीर्भिर्मित्रावरुणा सुम्नयन्ता ।

त आ गमन्तु त इह श्रुवन्तु सक्षत्रासो वरुणो मित्रे अग्निः ॥१॥

विशैविश ईड्यमध्वरेष्वदृप्तक्रतुमरतिं युवत्योः ।

दिवः शिशुं सहसः सूनुमग्निं यास्य केतुमरुषं यजध्यै ॥२॥
अरुषस्य दुहितरा विरूपे स्तृभिरन्या पिपिशे सूरो अन्या ।
मिथस्तुरा विचरन्ती पावके मन्म श्रुतं नक्षत ऋच्यमाने ॥३॥
प्र वायुमच्छा बृहती मनीषा बृहद्रयिं विश्ववारं रथप्राम् ।
द्युतद्यामा नियुतः पत्यमानः कविः कविमियक्षसि प्रयजयो ॥४॥
स मे वपुश्छदयदश्विनोर्यो रथो विरुक्मान्मनसा युजानः ।
येन नरा नासत्येषयध्यै वार्तिर्याथस्तनयाय त्मने च ॥५॥
पर्जन्यवाता वृषभा पृथिव्याः पुरीषाणि जिन्वतमप्यानि ।
सत्यश्रुतः कवयो यस्य गीर्भिर्जगतः स्थतर्जगदा कृणुध्वम् ॥६॥
पावीरवी कन्या चित्रायुः सरस्वती वीरपत्नी धियं धात् ।
ग्नाभिरच्छिद्रं शरणं सजोषा दुराधर्ष गृणते शर्म यंसत् ॥७॥
पथस्पथः परिपतिं वचस्या कामेन कृतो अभ्यानळर्कम् ।
स नो रासच्छुरुधश्चन्द्राग्रा धियंधियं सीषधाति प्र पूषा ॥८॥
प्रथमभाजं यशसं वयोधां सुपाणिं देवं सुगभस्तिमृभ्वम् ।
होता यक्षद्यजतं पस्त्यानामग्निस्त्वष्टारं सुहवं विभावा ॥९॥
भुवनस्य पितरं गीर्भिराभी रुद्रं दिवा वर्धया रुद्रमक्तौ ।
बृहन्तमृष्वमजरं सुषुम्नमृधग्घुवेम कविनेषितासः ॥१०॥
आ युवानः कवयो यियासो मरुतो गन्त गृणतो वरस्याम् ।
अचित्रं चिद्धि जिन्वथा वृधन्त इत्था नक्षन्तो नरो अंगिरस्वत् ॥११॥
प्र वीराय प्र तवसे तुरायाजा यूथेव पशुरक्षिरस्तम् ।
स पिस्पृशति तन्वि श्रुतस्य स्तृभिर्न नाकं वचनस्य विपः ॥१२॥
यो रजांसि विममे पार्थिवानि त्रिश्चिद्विष्णुर्मनवे बाधिताय ।
तस्य ते शर्मन्नुपदद्यमाने राया मदेम तन्वा३ तना च ॥१३॥
तन्नोऽहिर्बुध्न्यो अद्भिरर्कैस्तत्पर्वतस्तत्सविता चनो धात् ।
तदोषधीभिरभि रातिषाचो भगः पुरन्धिर्जिन्वतु प्र राये ॥१४॥
नू नो रयिं रथ्यं चर्षणिप्रां पुरुवीरं मह ऋतस्य गोपाम् ।
क्षयं दाताजरं येन जनान्त्स्पृधो
अदेवीरभि च क्रमाम विश आदेवीरभ्य१ श्रवाम ॥१५॥

*stuṣe janaṁ suvrataṁ navyasamībhirgībhirmitrāvaruṇā sumnayantā /*
*ta ā gamantu ta iha śruvantu sakṣatrāso varuṇo mitre agniḥ //1 //*
*viśaiviśa īḍyamadhvareṣvadṛptakratumaratiṁ yuvatyoḥ /*
*divaḥ śiśuṁ sahasaḥ sūnumagiṁna yāsya ketumaruṣaṁ yajadhyai //2 //*
*aruṣasya duhitarā virūpe stṛbhiranyā pipiśe sūro anyā /*
*mithasturā vicharantī pāvake manma śrutaṁ nakṣata ṛchyamāne //3 //*
*pra vāyumachchhā bṛhatī manīṣā bṛhadrayiṁ viśvavāraṁ rathaprām /*
*dyutadyāmā niyutaḥ patyamānaḥ kaviḥ kavimiyakṣasi prayajayo //4 //*
*sa me vapuśchhadayadaśvinoryo ratho virukmānmanasā yujānaḥ /*
*yena narā nāsatyeṣayadhyai vārtiryāthastanayāya tmane cha //5 //*
*parjanyavātā vṛṣabhā pṛthivyāḥ purīṣāṇi jinvatamapyāni /*
*satyaśrutaḥ kavayo yasya gīrbhirjagataḥ sthatarjagadā kṛṇudhvam //6 //*
*pāvīravī kanyā chitrāyuḥ sarasvatī vīrapatnī dhiyaṁ dhāt /*
*gnābhirachchhidraṁ śaraṇaṁ sajoṣā durādharṣa gṛṇate śarma yaṁsat //7 //*
*pathaspathaḥ paripatiṁ vachasyā kāmena kṛto abhyānaḻarkam /*
*sa no rāsachchhurudhaśchandrāgrā dhiyaṁdhiyaṁ sīṣadhāti pra pūṣā //8 //*
*prathamabhājaṁ yaśasaṁ vayodhāṁ supāṇiṁ devaṁ sugabhastimṛbhavam /*
*hotā yakṣadyajataṁ pastyānāmagnistvaṣṭāraṁ sṛhavaṁ vibhāvā //9 //*
*bhuvanasya pitaraṁ gīrbhirābhī rudraṁ divā vardhayā rudramaktau /*
*bṛhantamṛpvamajaraṁ suṣumnamṛdhagghuvema kavineṣitāsaḥ //10 //*

*ā yuvānaḥ kavayo yiāyāso maruto ganta gṛṇato varasyām /*
*achitraṁ chiddhi jinvathā vṛdhanta itthā nakṣanto naro aṁgirasvat //11 //*
*pra vīrāya pra tavase turāyājā yūtheva paśurakṣirastam /*
*sa pispṛśati tanvi śrutasya stṛbhirna nākaṁ vachanasya vipaḥ //12 //*
*yo rajāṁsi vimame pārthivāni triśchidviṣṇurmanave bādhitāya /*
*tasya te śarmannupadadyamāne rāyā madema tanvā3 tanā cha //13 //*
*tanno'hirbudhnyo adbhirarkaistatparvatastatsavitā chano dhāt /*
*tadoṣadhībhirabhi rātiṣācho bhagaḥ purandhirjinvatu pra rāye //14 //*
*nū no rayiṁ rathyaṁ charṣaṇiprāṁ puruvīraṁ maha ṛtasya gopām /*
*kṣayaṁ dātājaraṁ yena janāntspṛdho*
*adevīrabhi cha kramāma viśa ādevīrabhya1 śnavāma //15 //*

ऋ. (Rv.) ६.५०.१-१५

हुवे वो देवीमदितिं नमोभिर्मृळीकाय वरुणं मित्रमग्निम् ।
अभिक्षदामर्यमणं सुशेवं त्रातॄन्देवान्त्सवितारं भगं च ॥१॥
सुजयोतिषः सूर्य दक्षपितॄननागास्त्वे सुमहो वीहि देवान् ।
द्विजन्मानो य ऋतसापः सत्याः स्वर्वन्तो यजता अग्निजिह्वाः ॥२॥
उत द्यावापृथिवी क्षत्रमुरु बृहद्रोदसी शरणं सुषुम्ने ।
महस्करथो वरिवो यथा नोऽस्मे क्षयाय धिषणे अनेहः ॥३॥
आ नो रुद्रस्य सूनवो नमन्तामद्या हूतासो वसवोऽधृष्टाः ।
यदीमर्भे महति वा हितासो बाधे मरुतो अह्वाम देवान् ॥४॥
मिम्यक्ष येषु रोदसी नु देवी सिषक्ति पूष अभर्धयज्वा ।
श्रुतवा हवं मरुतो यद्ध याथ भूमा रेजन्ते अध्वनि प्रविक्ते ॥५॥
अभि त्यं वीरं गिर्वणसमर्चेन्द्रं ब्रह्मणा जरितर्नवेन ।
श्रवदिद्धवमुप च स्तवानो रासद्वाजाँ उप महो गृणानः ॥६॥
ओमनमापो मानुषीरमृक्तं धात तोकाय तनयाय शं योः ।
यूयं हि ष्ठा भिषजो मातृतमा विश्वस्य स्थातुर्जगतो जनित्रीः ॥७॥
आ नो देवः सविता त्रायमाणो हिरण्यपाणिर्यजतो जगम्यात् ।
यो दत्रवाँ उषसो न प्रतीकं व्यूर्णुते दाशुषे वार्याणि ॥८॥
उत त्वं सूनो सहसो नो अद्या देवाँ अस्मिन्नध्वरे ववृत्याः ।
स्यामहं ते सदमिद्रातौ तव स्यामग्नेऽवसा सुवीरः ॥९॥
उत त्या से हवमा जग्म्यातं नासत्या धीभिर्युवमंग विप्रा ।
अत्रिं न महस्तमसोऽमुमुक्तं तूर्वतं नरा दुरितादभीके ॥१०॥
ते नो रायो द्युमतो वाजवतो दातारो भूत नृवतः पुरुक्षोः ।
दशस्यन्तो दिव्याः पार्थिवासो गोजाता अप्या मृळता च देवाः ॥११॥
ते नो रुद्रः सरस्वती सजोषा भीळहुष्मन्तो विष्णुर्मृळन्तु वायुः ।
ऋभुक्षा वाजो दैव्यो विधाता पर्जन्यावाता पिप्यतामिषं नः ॥१२॥
उत स्य देवः सविता भगो नोऽपां नपादवतु दानु पप्रिः ।
त्वष्टा देवेभिर्जनिभिः सजोषा द्यौर्देवेभिः पृथिवी समुद्रैः ॥१३॥
उत नोऽहिर्बुध्न्यः श्रृणोत्वज एकपात्पृथिवी समुद्रः ।
विश्वे देवा ऋतावृधो हुवानाः स्तुता मन्त्राः कविशस्ता अवन्तु ॥१४॥
एवा नपातो मम तस्य धीभिर्भरद्वाजा अभ्यर्चन्त्यर्कैः ।
ग्ना हुतासो वसवोऽधृष्टा विश्वे स्तुतासो भूता यजत्राः ॥१५॥

*huve vo devīmaditiṁ namobhirmṛḻīkāya varuṇaṁ mitramagnim /*
*abhikṣadāmaryamaṇaṁ suśevaṁ trātṝndevāntsavitāraṁ bhagaṁ cha //1 //*
*sujayotiṣaḥ sūrya dakṣapitṝnanāgāstve sumaho vīhi devān /*
*dvijanmāno ya ṛtasāpaḥ satyāḥ svarvanto yajatā agnijihnāḥ //2 //*
*uta dyāvāpṛthivī kṣatramuru bṛhadrodasī śaraṇaṁ suṣumne /*

*mahaskaratho varivo yathā no'sme kṣayāya dhiṣaṇe anehaḥ ॥3॥*
*ā no rudrasya sūnavo namantāmadyāā hūtāso vasavo'dhṛṣṭāḥ ।*
*yadīmarbhe mahati vā hitāso bādhe maruto ahnāma devān ॥4॥*
*mimyakṣa yeṣu rodasī nu devī siṣakti pūṣa abhardhayajvā ।*
*śrutavā havaṁ maruto yaddha yātha bhūmā rejante adhvani pravikte ॥5॥*
*abhi tyaṁ vīraṁ girvaṇasamarchendraṁ brahmaṇā jaritarnavena ।*
*śravadiddhavamupa cha stavāno rāsadvājām̐ upa maho gṛṇānaḥ ॥6॥*
*Omanamāpo mānuṣīramṛktaṁ dhāta tokāya tanayāya śaṁ yoḥ ।*
*yūyaṁ hi ṣṭhā bhiṣajo mātṛtamā viśvasya sthāturjagato janitrīḥ ॥7॥*
*ā no devaḥ savitā trāyamāṇo hiraṇyapāṇiryajato jagamyāt ।*
*yeā datravām̐ uṣaso na pratīkaṁ vyūrṇute dāśuṣe vāryāṇi ॥8॥*
*uta tvaṁ sūno sahaso no adyā devām̐ asminnadhvare vavṛtyāḥ ।*
*syāmahaṁ te sadamidrātau tava syāmagne'vasā suvīraḥ ॥9॥*
*uta tyā se havamā jagmyātaṁ nāsatyā dhībhiryuvamaṁga viprā ।*
*atriṁ na mahastamaso'mumuktaṁ tṛvrataṁ narā duritādabhīke ॥10॥*
*te no rāyo dyumato vājavato dātāro bhūta nṛvataḥ purukṣoḥ ।*
*daśasyanto divyāḥ pārthivāso gojātā apyā mṛḷatā cha devāḥ ॥11॥*
*te no rudraḥ sarasvatī sajoṣā bhīḷahuṣmanto viṣṇurmṛḷantu vāyuḥ ।*
*ṛbhukṣā vājo daivyo vidhātā parjanyāvātā pipyatāmiṣaṁ naḥ ॥12॥*
*uta sya devaḥ savitā bhago no'pāṁ napādavatu dānu papriḥ ।*
*tvaṣṭā devebhirjanibhiḥ sajoṣā dyaurdevebhiḥ pṛthivī samudraiḥ ॥13॥*
*uta no'hirbudhnyaḥ śṛṇotvaja ekapātpṛthivī samudraḥ ।*
*viśve devā ṛtāvṛdho huvānāḥ stutā mantrāḥ kaviśastā avantu ॥14॥*
*evā napāto mama tasya dhībhirbharadvājā abhyarchantyarkaiḥ ।*
*gnā hutāso vasavo'dhṛṣṭā viśve stutāso bhūtā yajatrāḥ ॥15॥*

ऋ. (Rv.) ६.५१.१.-१६

उदु त्यच्च्क्षुर्महि मित्रयोराँ एति प्रिय वरुणयोरदब्धम् ।
ऋतस्य शुचि दर्शतमनीकं रुक्मो न दिव उदिता व्यद्यौत् ॥१॥
वेद यस्त्रीणि विदथान्येषां देवानां जन्म सनुतरा च विप्रः ।
ऋजु मर्तेषु वृजिना च पश्यन्नभि चष्टे सूरो अर्य एवान् ॥२॥
स्तुष उ वो मह ऋतस्य गोपानदितिं मित्रं वरुणं सुजातान् ।
अर्यमणं भगमदब्धधीतीनच्छा वोचे सधन्यः पावकान् ॥३॥
रिशादसः सत्पतीरँदब्धान्महो राः सुवसनस्य दातॄन् ।
यूनः सुक्षत्रान्क्षयतो दिवो न्टृनादित्यान्याम्यदिति दुवोयु ॥४॥
द्यौ३ष्पितः पृथिवी मातरध्रुगग्ने भ्रातर्वसवो मृळता नः ।
विश्व आदित्या अदिते सजोषा अस्मभ्यं शर्म बहुलं वि यन्त ॥५॥
मा नो वृकाय वृक्ये समस्मा अघायते रीरधता यजत्राः ।
यूयं हि ष्ठा रथ्यो नस्तनूनां यूयं दक्षस्य वचसो बभूव ॥६॥
मा व एनो अन्यकृतं भुजेम मा तत्कर्म वसवो यच्चयध्वे ।
विश्वस्य हि क्षयथ विश्वदेवाः स्वयं रिपुस्तन्वं रिरिषीष्ट ॥७॥
नम इदुग्रं नम आ विवासे नमो दाधार पृथिवीमुत द्याम् ।
नमो देवेभ्यो नम ईश एषां कृतं चिदेनो नमसा विवासे ॥८॥
ऋतस्य वो रथ्यः पूतदक्षानृतस्य पस्त्यसदो अदब्धान् ।
ताँ आ नमोभिरुरुचक्षसो नृन्विश्वान्व आ नमे महो यजत्राः ॥९॥
ते हि श्रेष्ठवर्चसस्त उ नस्तिरो विश्वनि दुरिता नयन्ति ।
सुक्षत्रासो वरुणे मित्रो अग्नि ऋतधीतयो वक्मराजसत्याः ॥१०॥
ते न इन्द्रः पृथिवी क्षम वर्धन् पूषा भगो अदितिः पंच जनाः ।
सुशमा्रणः स्ववसः सुनीथा भवन्तु नः सुत्रात्रासः सुगोपाः ॥११॥

नू सद्मानं दिव्यं नंशि देवा भारद्वाजः सुमतिं याति होता ।
आसानेभिर्यजमानो मियेधैर्देवानां जन्म वसूयुर्ववन्द ॥१२॥
अप त्यं वृजिनं रिपुं स्तेनमग्ने दुराध्यम् । दविष्ठमस्य सत्पते कृधी सुगम् ॥१३॥
ग्रावाणः सोम नो हि कं सखित्वनाय वावशुः। जही न्य१ त्रिणं पणिं वृको हि षः ॥१४॥
यूयं हि ष्ठा सुदानव इन्द्रजयेष्ठा अभिद्यवः। कर्ता नो अध्वन्ना सुगं गोपा अमा ॥१५॥
अपि पन्थामगन्महि स्वस्तिगामनेहसम् । येन विश्वाः परि द्विषो वृणक्ति विन्दते वसु ॥१६॥
*udu tyachchkṣurmahi mitrayorām̐ eti priya varuṇayoradabdham /*
*ṛtasya śuchi darśatamanīkaṁ rukmo na diva uditā vyadyaut //1 //*
*veda yastrīṇi vidathānyeṣāṁ devānāṁ janma sanutarā cha vipraḥ /*
*ṛju marteṣu vṛjinā cha paśyannabhi chaṣṭe sūro arya evān //2 //*
*stuṣa u vo maha ṛtasya gopānaditiṁ mitraṁ varuṇaṁ sujātān /*
*aryamaṇaṁ bhagamadabdhadhītīnachchhā voche sadhanyaḥ pāvakān //3 //*
*riśādasaḥ satpatīram̐dabdhānmaho rāāḥ suvasanasya dātṝn /*
*yūnaḥ sukṣatrānkṣayato divo nṛṝnādityānyāmyaditi duvoyu //4 //*
*dyau3ṣpitaḥ pṛthivī mātaradhrugagne bhrātarvasavo mṛḷatā naḥ /*
*viśva ādityā adite sajoṣā asmabhyaṁ śarma bahulaṁ vi yanta //5 //*
*mā no vṛkāya vṛkye samasmā aghāyate rīradhatā yajatrāḥ /*
*yūyaṁ hi ṣṭhā rathyo nastanūnāṁ yūyaṁ dakṣasya vachaso babhūva //6 //*
*mā va eno anyakṛtaṁ bhujema mā tatkarma vasavo yachchayadhve /*
*viśvasya hi kṣayatha viśvadevāḥ svayaṁ ripustanvaṁ ririṣīṣṭa //7 //*
*nama idugraṁ nama ā vivāse namo dādhāra pṛthivīmuta dyām /*
*namo devebhyo nama īśa eṣāṁ kṛtaṁ chideno namasā vivāse //8 //*
*ṛtasya vo rathyaḥ pūtadakṣānṛtasya pastyasado adabdhān /*
*tām̐ ā namobhiruruchakṣaso nṛnviśvānva ā name maho yajatrāḥ //9 //*
*te hi śreṣṭhavarchasasta u nastiro viśvani duritā nayanti /*
*sukṣatrāso varuṇe mitro agni ṛtadhītayo vakmarājasatyāḥ //10 //*
*te na indraḥ pṛthivī kṣama vardhan pūṣā bhgo aditiḥ paṁcha janāḥ /*
*suśamāraṇaḥ svavasaḥ sunīthā bhavantu naḥ sutrātrāsaḥ sugopāḥ //11 //*
*nū sadmānaṁ divyaṁ naṁśi devā bhāradvājaḥ sumatiṁ yāti hotā /*
*āsānebhiryajamāno miyedhairdevānāṁ janma vasūyurvavanda //12 //*
*apa tyaṁ vṛjinaṁ ripuṁ stenamagne durādhyam / daviṣṭhamasya satpate kṛdhī sugam //13 //*
*grāvāṇaḥ soma no hi kaṁ sakhitvanāya vāvaśuḥ / jahī nya1 triṇaṁ paṇiṁ vṛko hi ṣaḥ //14 //*
*yūyaṁ hi ṣṭhā sudānava indrajayeṣṭhā abhidyavaḥ / kartā no adhvannā sugaṁ gopā amā //15 //*
*api panthāmaganmahi svastigāmanehasam / yena viśvāḥ pari dviṣo vṛṇakti vindate vasu //16 //*

ऋ. (Rv.) ६.५२.१-१७

नतद्दिवा न पृथिव्यानु मन्ये न योन नोत शमीभिराभिः ।
उब्जन्तु तं सुभवः१ पर्वतासो नि हीयतामतियाजस्य यष्टा ॥१॥
अति वा यो मरुतो मन्यते नो ब्रह्म वा यः क्रियमाणं निनित्सात् ।
तपूंषि तस्मै वृजिनानि सन्तु ब्रह्मद्विषमभि तं शोचतु द्यौः ॥२॥
किमंग त्वा ब्रह्मणः सोम गोपां किमंग त्वाहुरभिषस्तिपां नः ।
मिकंग नः पश्यसि निद्यमानान् ब्रह्मद्विषे तपुषिं हेतिमस्य ॥३॥
अवन्तु मामुषसो जायमाना अवन्तु मा सिन्धवः पिन्वमानाः ।
अवन्तु मा पर्वतासो ध्रुवासोऽवन्तु मा पितरो देवहूतौ ॥४॥
विश्वदानीं सुमनसः स्याम पश्येम नु सूर्यमुच्चरन्तम् ।

तथा करद्वसुपतिर्वसूनां देवाँ ओहानोऽवसागमिष्ठः ॥५॥
इन्द्रो नेदिष्ठमवसागमिष्ठः सरस्वती सिन्धुभिः पिन्वमाना ।
पर्जन्यो न ओषधीभिर्मयोभुरग्निः सुशंसः सुहवः पितेव ॥६॥
विश्वे देवास आ गत श्रृणुता म इमं हवम्। एदं बर्हिर्नि षीदत ॥७॥
यो वो देवा घृतस्नुना हव्येन प्रति भूषति। तं विश्व उप गच्छथ ॥८॥
उप नः सूनवो गिरः श्रृण्वन्त्वमृतस्य ये। सुमृळीका भवन्तु नः ॥९॥
विश्वे देवा ऋतावृध ऋतुभिर्हवनश्रुतः। जुषन्तां युज्यं पयः ॥१०॥
स्तोत्रमिन्द्रो मरुद्गणस्त्वष्टृमान् मित्रो अर्यमा। इमा हव्या जुषन्त नः ॥११॥
इमं नो अग्ने अध्वरं होतर्वयुनशो यज। चिकित्वान्दैव्यं जनम् ॥१२॥
विश्वे देवाः श्रृणुतेमं हवं मे ये अन्तरिक्षे य उप द्यवि ष्ठ ।
ये अग्निजिह्वा उत वा यजत्रा आसद्यास्मिन्बर्हिषि मादयध्वम् ॥१३॥
विश्वे देवा मम श्रृण्वन्तु यिाया उभे रोदसी अपां नपाच्च मन्म ।
मा वो वचांसि परिचक्ष्याणि वोचं सुम्नेष्विद्वो अन्तमा मदेम ॥१४॥
ये के च ज्मा महिनो अहिमाया दिवो जिारे अपां सधस्थे ।
ते अस्मभ्यमिषये विश्वमायुः क्षप उस्रा परिवस्यन्तु देवाः ॥१५॥
अग्नीपर्जन्याववतं धियं मेऽस्मिन्हवे सुहवा सुष्टुतिं नः ।
इळामन्यो जनयद् गर्भमन्यः प्रजावतीरिष आ धत्तमस्मे ॥१६॥
स्तीर्णे बर्हिषि समिधाने अग्नौ सूक्तेन महा नमसा विवासे ।
अस्मिन्नो अद्य विदथे यजत्रा विश्वे देवा हविषि मादयध्वम् ॥१७॥

*nataddivā na pṛthivyānu manye na yona nota śamībhirābhiḥ* ।
*ubjantu taṁ subhavaḥ1 parvatāso ni hīyatāmatiyājasya yaṣṭā* ॥1॥
*ati vā yo maruto manyate no brahma vā yaḥ kriyamāṇaṁ ninitsāt* ।
*tapūṁṣi tasmai vṛjināni santu brahmadviṣamabhi taṁ śochatu dyauḥ* ॥2॥
*kimaṁga tvā brahmaṇaḥ soma gopāṁ kimaṁga tvāhurabhiṣastipāṁ naḥ* ।
*mikaṁga naḥ paśyasi nidyamānān brahmadviṣe tapuṣiṁ hetimasya* ॥3॥
*avantu māmuṣaso jāyamānā avantu mā sindhavaḥ pinvamānāḥ* ।
*avantu mā parvatāso dhruvāso'vantu mā pitaro devahūtau* ॥4॥
*viśvadānīṁ sumanasaḥ syāma paśyema nu sūryamuchcharantam* ।
*tathā karadvasupatirvasūnāṁ devām̐ Ohāno'vasāgamiṣṭhaḥ* ॥5॥
*indro nediṣṭhamavasāgamiṣṭhaḥ sarasvatī sindhubhiḥ pinvamānā* ।
*parjanyo na Oṣadhībhirmayobhuragniḥ suśaṁsaḥ suhavaḥ piteva* ॥6॥
*viśve devāsa ā gata śṛṇutā ma imaṁ havam* । *edaṁ barhirni ṣīdata* ॥7॥
*yeā vo devā ghṛtasnunā havyena prati bhūṣati* । *taṁ viśva upa gachchhatha* ॥8॥
*upa naḥ sūnavo giraḥ śṛṇvantvamṛtasya ye* । *sumṛḷīkā bhavantu naḥ* ॥9॥
*viśve devā ṛtāvṛdha ṛtubhirhavanaśrutaḥ* । *juṣantāṁ yujyaṁ payaḥ* ॥10॥
*stotramindro marudgaṇastvaṣṭṛmān mitro aryamā* । *imā havyā juṣanta naḥ* ॥11॥
*imaṁ no agne adhvaraṁ hotarvayunaśo yaja* । *chikitvāndaivyaṁ janam* ॥12॥
*viśve devāḥ śṛṇutemaṁ havaṁ me ye antarikṣe ya upa dyavi ṣṭha* ।
*ye agnijihnā uta vā yajatrā āsadyāsminbarhiṣi mādayadhvam* ॥13॥
*viśve devā mama śṛṇvantu yiāyā ubhe rodasī apāṁ napāchcha manma* ।
*mā vo vachāṁsi parichakṣayāṇi vochaṁ sumneṣvidvo antamā madema* ॥14॥
*ye ke cha jmā mahino ahimāyā divo jiāre apāṁ sadhasthe* ।
*te asmabhyamiṣaye viśvamāyuḥ kṣapa usrā parivasyantu devāḥ* ॥15॥
*agnīparjanyāvavataṁ dhiyaṁ me'sminhave suhavā suṣṭutiṁ naḥ* ।
*iḷāmanyo janayad garbhamanyaḥ prajāvatīriṣa ā dhattamasme* ॥16॥
*stīrṇe barhiṣi samidhāne agnau sūktena mahā namasā vivāse* ।
*asminno adya vidathe yajatrā viśve devā haviṣi mādayadhvam* ॥17॥

## १३९. ऋजिश्वा भारद्वाजः (Ṛjiśvā Bhāradvājaḥ)

१. पवमानः सोमः (Pavamānaḥ Somaḥ)- सा. (Sv.) ५८०; ५८५; १३९४

सा. (Sv.) ५८०

आ सोता परि षिंचताश्वं न स्तोममप्तुरं रजस्तुरम्। वनप्रक्षमुदप्रुतम् ॥३ ॥

*ā sotā pari ṣiṁchatāśvaṁ na stomamapturaṁ rajasturam |*
*vanaprakṣamudaprutam ||3 ||*

सा. (Sv.) ५८५

य उस्रिया अपि या अन्तरश्मनि निर्गा अकृन्तदोजसा ।
अभि व्रजं तत्निषे गव्यमश्व्यं वर्मीव धृष्णवा रुज ॥८ ॥

*ya usriyā api yā antaraśmani nirgā akṛntadojasā |*
*abhi vrajaṁ tatniṣe gavyamaśvyaṁ varmīva dhṛṣṇavā ruja ||8 ||*

सा. (Sv.) १३९४

आ सोता परि षिंचताश्वं न स्तोममप्तुरं रजस्तुरम्। वनप्रक्षमुदप्रुतम् ॥१ ॥

*ā sotā pari ṣiṁchatāśvaṁ na stomamapturaṁ rajasturam |*
*vanaprakṣamudaprutam ||1 ||*

२. विश्वेदेवाः (Viśvedevāḥ) - सा. (Sv.) ६१०; १५९५

सा. (Sv.) ६१०

विश्वे देवा मम शृण्वन्तु यामुभे रोदसी अपां नपाच्च मन्म ।
मा वो वचांसि परिचक्ष्याणि वोचं सुम्नेष्विद्वो अन्तमा मदेम ॥९ ॥

*viśve devā mama śṛṇvantu yāmubhe rodasī apāṁ napāchcha manma |*
*mā vo vachāṁsi parichakṣayāṇi vochaṁ sumneṣvidvo antamā madema ||9 ||*

सा. (Sv.) १५९५

उप नः सूनवो गिरः शृण्वन्त्वमृतस्य ये। सुमृडीका भवन्तु नः ॥१ ॥

*upa naḥ sūnavo giraḥ śṛṇvantvamṛtasya ye | sumṛḍīkā bhavantu naḥ ||1 ||*

## १४०. ऋभुः (Ṛbhuḥ)

१. रोहिणी वनस्पतिः (Rohiṇī Vanaspatiḥ) - अ. (Av.) ४.१२.१-७

रोहण्यसि रोहण्यस्थ्नश्छिन्नस्य रोहणी। रोहयेदमरुन्धति ॥१ ॥
यत् ते रिष्टं यत् ते द्युत्तमस्ति पेष्ट्रं त आत्मनि।
धाता तद् भद्रया पुनः सं दधत् परुषा परुः ॥२ ॥
सं ते मज्जा मजा भवतु समु परुष परुः। सं ते मांसस्य विस्रस्तं समस्थ्यपि रोहतु ॥३ ॥
मज्जा मजा सं धीयतां चर्मणा चर्म रोहतु। असृक् ते अस्थि रोहतु मांसं मांसेन रोहतु ॥४ ॥
लोम लोम्ना सं कल्पया त्वचा सं कल्पया त्वचम्। असृक् ते अस्थि रोहतु च्छिन्नं सं धेह्योषधे ॥५ ॥
स उत् तिष्ठ प्रेहि प्र द्रव रथः सुचक्रः सुपविः सुनाभिः प्रति तिष्ठोर्ध्वः ॥६ ॥
यदि कर्त पतित्वा संशश्रे यदि वाश्मा प्रहृतो जघान।
ऋभू रथस्येवांगानि सं दधत् परुषा परुः ॥७ ॥

*rohaṇyasi rohaṇyasthnaśchhinnasya rohaṇī | rohayedamarundhati ||1 ||*
*yat te riṣṭaṁ yat te dyuttamasti peṣṭraṁ ta ātmani |*
*dhātā tad bhadrayā punaḥ saṁ dadhat paruṣā paruḥ ||2 ||*
*saṁ te majjā majā bhavatu samu paruṣa paruḥ | saṁ te māṁsasya visrastaṁ samasthyapi rohatu ||3 ||*
*majjā majā saṁ dhīyatāṁ charmaṇā charma rohatu | asṛk te asthi rohatu māṁsaṁ māṁsena rohatu ||4 ||*
*loma lomnā saṁ kalpayā tvachā saṁ kalpayā tvacham | asṛk te asthi rohatu chchhinnaṁ saṁ dhehyoṣadhe ||5 ||*
*sa ut tiṣṭha prehi pra drava rathaḥ suchakraḥ supaviḥ sunābhiḥ prati tiṣṭhordhvaḥ ||6 ||*

*yadi karta patitvā saṁśaśre yadi vāśmā prahṛto jaghāna ।*
*ṛbhū rathasyevāṁgāni saṁ dadhat paruṣā paruḥ ॥7॥*

## १४१. ऋषभो वैराजः शाक्वरो वा (Ṛṣabho Vairājaḥ Śākvaro Vā)

१. सपत्नघ्नम् (Sapatnaghnam) - ऋ. (Rv.) १०.१६६.१-५

ऋषभं मा समानानां सपत्नानां विषासहिम् । हन्तारं शत्रूणां कृधि विराजं गोपतिं गवाम् ॥१॥
अहमस्मि सपत्नहेन्द्र इवारिष्टो अक्षतः । अधः सपत्ना मे पदोरिमे सर्वे अभिष्ठिताः ॥२॥
अत्रैव वोऽपि नह्याम्युभे आर्त्नी इव ज्यया । वाचस्पते नि षेधेमान्यथ मदधरं वदान् ॥३॥
अभिभूरहमागमं विश्वकर्मेण धाम्ना । आ वश्चित्तमा वो व्रतमा वोऽहं समिति ददे ॥४॥
योगक्षेमं व आदायाहं भूयासमुत्तम आ वो मूर्धानमक्रमीम् ।
अधस्पदान्म उद्वदत मण्डूकाइवोदकान्मण्डूका उदकादिव ॥५॥

*ṛṣabhaṁ mā samānānāṁ sapatnānāṁ viṣāsahim । hantāraṁ śatrūṇāṁ kṛdhi virājaṁ gopatiṁ gavām ॥1॥*
*ahamasmi sapatnahendra ivāriṣṭo akṣataḥ । adhaḥ sapatnā me padorime sarve abhiṣṭhitāḥ ॥2॥*
*atraiva vo'pi nahyāmyubhe ārtnī iva jyayā । vāchaspate ni ṣedhemānyatha madadharaṁ vadān ॥3॥*
*abhibhūrahamāgamaṁ viśvakarmeṇa dhāmnā । ā vaśchittamā vo vratamā vo'haṁ samiti dade ॥4॥*
*yogakṣemaṁ va ādāyāhaṁ bhūyāsamuttama ā vo mūrdhānamakramīm ।*
*adhaspadānma udvadata maṇḍūkāivodakānmaṇḍūkā udakādiva ॥5॥*

## १४२. ऋषभो वैश्वामित्रः (Ṛṣabho Vaiśvāmitraḥ)

१. अग्निः (Agniḥ) - ऋ. (Rv.) ३.१३.१-७; ३.१४.१-७

ऋ. (Rv.) ३.१३.१-७

प्र वो देवायाग्नये बर्हिष्ठमर्चास्मै। गमद्देवेभिरा स नो यजिष्ठो बर्हिरा सदत् ॥१॥
ऋतावा यस्य रोदसी दक्षं सचन्त ऊतयः। हविष्मन्तस्तमीळते तं सनिष्यन्तोऽवसे ॥२॥
स यन्ता विप्र एषां स याानामथा हि षः। अगिंन तं वो दुवस्यत दाता यो वनिता मघम् ॥३॥
स नः शर्माणि वीतयेऽग्निर्यच्छतु शंतमा। यतो नः प्रुष्णवद्वसु दिवि क्षितिभ्यो अप्स्वा ॥४॥
दीदिवांसमपूर्व्य वस्वीभिरस्य धीतिभिः। ऋक्वाणो अग्निमिन्धते होतारं विश्पतिं विशाम् ॥५॥
उत नो ब्रह्मन्नविष उक्थेषु देवहूतमः। शं नः शोचा मरुद्धृधोऽग्ने सहस्रसातमः ॥६॥
नू नो रास्व सहस्रवत्तोकवत्पुष्टिमद्वसु। द्युमदग्ने सुवीर्य वर्षिष्ठमनुपक्षितम्॥७॥

*pra vo devāyāgnaye barhiṣṭhamarchāsmai । gamaddevebhirā sa no yajiṣṭho barhirā sadat ॥1॥*
*ṛtāvā yasya rodasī dakṣaṁ sachanta ūtayaḥ । haviṣmantastamīḷate taṁ saniṣyanto'vase ॥2॥*
*sa yantā vipra eṣāṁ sa yāānāmathā hi ṣaḥ । agiṁna taṁ vo duvasyata dātā yo vanitā magham ॥3॥*
*sa naḥ śarmāṇi vītaye'gniryachchhatu śaṁtamā । yato naḥ pruṣṇavadvasu divi kṣitibhyo apsvā ॥4॥*
*dīdivāṁsamapūrvya vasvībhirasya dhītibhiḥ । ṛkvāṇo agnimindhate hotāraṁ viśpatiṁ viśām ॥5॥*
*uta no brahmannaviṣa uktheṣu devahūtamaḥ । śaṁ naḥ śochā maruddhṛdho'gne sahasrasātamaḥ ॥6॥*
*nū no rāsva sahasravattokavatpuṣṭimadvasu । dyumadagne suvīrya varṣiṣṭhamanupakṣitam ॥7॥*

ऋ. (Rv.) ३.१४.१-७

आ होता मन्द्रो विदथान्यस्थात्सत्यो यज्वा कवितमः स वेधाः ।
विद्युद्रथः सहसस्पुत्रो अग्निः शेचिष्केशः पृथिव्यां पाजो अश्रेत् ॥१॥

अयामि ते नमउक्तिं जुषस्व ऋतावस्तुभ्यं चेतते सहस्वः ।
विद्वाँ आ वक्षि विदुषो नि षत्सि मध्ये आ बर्हिरूतये यजत्र ॥२॥
द्रवतां त उषसा वाजयन्ती अग्ने वातस्य पथ्याभिरच्छ ।
यत्सीमंजन्ति पूर्व्य हविर्भिरा बन्धुरेव तस्थतुर्दुरोणे ॥३॥
मित्रश्च तुभ्यं वरुणः सहस्वोऽग्ने विश्वे मरुतः सुम्नमर्चन् ।
यच्छोचिषा सहस्पुत्र तिष्ठा अभि क्षितीः प्रथयन्त्सूर्यो नृन् ॥४॥
वयं ते अद्य ररिमा हि काममुत्तानहस्ता नमसोपसद्य ।
यजिष्ठेन मनसा यक्षि देवानस्रेधता मन्मना विप्रो अग्ने ॥५॥
त्वद्धि पुत्र सहसो वि पूर्वीर्देवस्य यन्त्यूतयो वि वाजाः ।
त्वं देहि सहस्रिणं रयिं नोऽदोघेण वचसा सत्यमग्ने ॥६॥
तुभ्यं दक्ष कविक्रतो यानीमा देव मर्तासो अध्वरे अकर्म ।
त्वं विश्वस्य सुरथस्य चोधि सर्व तदग्ने अमृत स्वदेह ॥७॥

*ā hotā mandro vidathānyasthātsatyo yajvā kavitamaḥ sa vedhāḥ /*
*vidyudrathaḥ sahasasputro agniḥ śechiṣkeśaḥ pṛthivyāṁ pājo aśret //1 //*
*ayāmi te namauktiṁ juṣasva ṛtāvastubhyaṁ chetate sahasvaḥ /*
*vidvām̐ ā vakṣi viduṣo ni ṣatsi madhye ā barhirūtaye yajatra //2 //*
*dravatāṁ ta uṣasā vājayantī agne vātasya pathyābhirachchha /*
*yatsīmaṁjanti pūrvya havirbhirā bandhureva tasthaturduroṇe //3 //*
*mitraścha tubhyaṁ varuṇaḥ sahasvo'gne viśve marutaḥ sumnamarchan /*
*yachchhochiṣā sahasputra tiṣṭhā abhi kṣitīḥ prathayantsūryo nṝn //4 //*
*vayaṁ te adya rarimā hi kāmamuttānahastā namasopasadya /*
*yajiṣṭhena manasā yakṣi devānasredhatā manmanā vipro agne //5 //*
*tvaddhi putra sahaso vi pūrvīrdevasya yantyūtayo vi vājāḥ /*
*tvaṁ dehi sahasriṇaṁ rayiṁ no'dogheṇa vachasā satyamagne //6 //*
*tubhyaṁ dakṣa kavikrato yānīmā deva martāso adhvare akarma /*
*tvaṁ viśvasya sṛrathasya chodhi sarva tadagne amṛta svadeha //7 //*

२. पवमानः सोमः (Pavamānaḥ Somaḥ)- ऋ. (Rv.) ९.७१.१-९

आदक्षिणा सृज्यते शुष्म्या३ सदं वेति द्रुहो रक्षसः पाति जागृविः ।
हरिरोपशं कृणुते नभस्पय उपस्तिरे चम्वो३ र्ब्रह्म निर्णिजे ॥१॥
प्र कृष्टिहेव शूष एति रोरुवद सूर्य१ वर्ण नि रिणीते अस्य तम् ।
जहाति वव्रिं पितुरेतिं निष्कृतमुपप्रुतं कृणुते निर्णिजं तना ॥२॥
अद्रिभिः सुतः पवते गभस्त्योर्वृषायते नभसा वेपते मती ।
स मोदते नसते साधते गिरा नेनिक्ते अप्सु यजते परीमणि ॥३॥
परि द्युक्षं सहसः पर्वतावृधं मध्वः सिंचन्ति हर्म्यस्य सक्षणिम् ।
आ यस्मिन्गावः सुहुताद ऊधनि मूर्धंछ्रीणन्त्यग्रियं वरीमभिः ॥४॥
समी रथं न भुरिजोरहेषत दश स्वसारो अदितेरुपस्थ आ ।
जिगादुप ज्रयति गोरपीच्यं पदं यदस्य मतुथा अजीजनन् ॥५॥
श्येनो न योनिं सदनं धिया कृतं हिरण्ययमासदं देव एषति ।
ए रिणन्ति बर्हिषि प्रियं गिराश्वो न देवाँ अप्येति यियः ॥६॥
परा व्यक्तो अरुषो दिवः कविर्वृषा त्रिपृष्ठो अनविष्ट गा अभि ।
सहस्रणीतिर्यतिः परायती रेभो न पूर्वीरुषसो वि राजति ॥७॥
त्वेषं रूपं कृणुते वर्णो अस्य स यत्राशयत्समृता सेधति स्रिधः ।
अप्सा याति स्वधया दैव्यं जनं सं सुष्टुती नसते सं गोअग्रया ॥८॥
उक्षेव यूथा परियन्नरावीदधि त्विषीरधित सूर्यस्य ।
दिव्यः सुपर्णोऽव चक्षत क्षां सोमः परि क्रतुना पश्यते जाः ॥९॥

*ādakṣiṇā sṛjyate śuṣmyā3 sadaṁ veti druho rakṣasaḥ pāti jāgṛviḥ /*
*hariropaśaṁ kṛṇute nabhaspaya upastire chamvo3 rbrahma nirṇije //1 //*

*pra kṛṣṭiheva śūṣa eti roruvada sūrya1 varṇa ni riṇīte asya tam /*
*jahāti vavriṁ pituretiṁ niṣkṛtamupaprutaṁ kṛṇute nirṇijaṁ tanā //2 //*
*adribhiḥ sutaḥ pavate gabhastyorvṛṣāyate nabhasā vepate matī /*
*sa modate nasate sādhate girā nenikte apsu yajate parīmaṇi //3 //*
*pari dyukṣaṁ sahasaḥ parvatāvṛdhaṁ madhvaḥ siṁchanti harmyasya sakṣaṇim /*
*ā yasmingāvaḥ suhutāda ūdhani mūrdhaṁchhrīṇantyagriyaṁ varīmabhiḥ //4 //*
*samī rathaṁ na bhurijoraheṣata daśa svasāro aditerupastha ā /*
*jigādupa jrayati gorapīchyaṁ padaṁ yadasya matuthā ajījanan //5 //*
*śyeno na yoniṁ sadanaṁ dhiyā kṛtaṁ hiraṇyayamāsadaṁ deva eṣati /*
*e riṇanti barhiṣi priyaṁ girāśvo na devāṁ apyeti yiāyaḥ //6 //*
*parā vyakto aruṣo divaḥ kavirvṛṣā tripṛṣṭho anaviṣṭa gā abhi /*
*sahasraṇītiryatiḥ parāyatī rebho na pūrvīruṣaso vi rājati //7 //*
*tveṣaṁ rūpaṁ kṛṇute varṇo asya sa yatrāśayatsamṛtā sedhati sridhaḥ /*
*apsā yāti svadhayā daivyaṁ janaṁ saṁ suṣṭutī nasate saṁ goagrayā //8 //*
*ukṣeva yūthā pariyannarāvīdadhi tviṣīradhita sūryasya /*
*divyaḥ suparṇo'va chakṣata kṣāṁ somaḥ pari kratunā paśyate jāḥ //9 //*

## १४३. ऋष्यश्रंगः (Ṛṣyaśraṁgaḥ)

१. केशिनः (Keśinaḥ) - ऋ. (Rv.) १०.१३६.७

वायुरस्मा उपामन्थतिपनष्टि स्मा कुनन्नमा। केशी विषस्य पात्रेण यद्रुद्रेणपिबत्सह ॥७॥
*vāyurasmā upāmanthatipanaṣṭi smā kunannamā / keśī viṣasya pātreṇa yadrudreṇapibatsaha //7 //*

## १४४. एतशः (Etaśaḥ)

१. केशिनः (Keśinaḥ) - ऋ. (Rv.) १०.१३६.६

अप्सरसां गन्धर्वाणां मृगाणां चरणे चरन्। केशी केतस्य विद्वान्तसखा स्वादुर्मदिन्तमः ॥६॥
*apsarasāṁ gandharvāṇāṁ mṛgāṇāṁ charaṇe charan / keśī ketasya vidvāntasakhā svādurmadintamaḥ //6 //*

## १४५. एवद्यूर्नौधसः (Evadyūrnaudhasaḥ)

१. इन्द्रः (Indraḥ) - ऋ. (Rv.) ८.८०.१-९

नह्य१ न्यं बळाकरं मर्डितारं शतक्रतो। त्वं न इन्द्र मृळय ॥१॥
यो नः शश्वत्पुराविथामृधो वाजसातये। स त्वं न इन्द्र मृळय ॥२॥
किमंग रध्रचोदनः सुन्वानस्यावितेदसि। कुवित्स्विन्द्र णः शकः ॥३॥
इन्द्र प्र णो रथमव पश्चाच्चित्सन्तमद्रिवः। पुरस्तादेनं मे कृधि ॥४॥
हन्तो नु किमास्से प्रथम नो रथं कृधि। उपमं वाजयु श्रवः ॥५॥
अवा नो वाजयुं रथं सुकरं ते किमित्परि। अस्मान्त्सु जिग्युषस्कृधि ॥६॥
इन्द्र दृह्यस्व पूरसि भद्रा त एति निष्कृतम्। इयं धीऋर्त्वियावती ॥७॥
मा सीमवद्य आ भागुर्वी काष्ठा हितं धनम्। अपावृक्ता अरत्नयः ॥८॥
तुरीयं नाम यियं यदा करस्तदुश्मसि। आदित्पतिर्न ओहसे ॥९॥
*nahya1 nyaṁ baḷākaraṁ marḍitāraṁ śatakrato / tvaṁ na indra mṛḷaya //1 //*
*yo naḥ śaśvatpurāvithāmṛdho vājasātaye / sa tvaṁ na indra mṛḷaya //2 //*
*kimaṁga radhrachodanaḥ sunvānasyāvitedasi / kuvitsvindra ṇaḥ śakaḥ //3 //*
*indra pra ṇo rathamava paśchāchchitsantamadrivaḥ / purastādenaṁ me kṛdhi //4 //*
*hanto nu kimāsse prathama no rathaṁ kṛdhi / upamaṁ vājayu śravaḥ //5 //*
*avā no vājayuṁ rathaṁ sukaraṁ te kimitpari / asmāntsu jigyuṣaskṛdhi //6 //*
*indra dṛhyasva pūrasi bhadrā ta eti niṣkṛtam / iyaṁ dhīṛrtviyāvatī //7 //*
*mā sīmavadya ā bhāgurvī kāṣṭhā hitaṁ dhanam / apāvṛktā aratnayaḥ //8 //*
*turīyaṁ nāma yiāyaṁ yadā karastaduśmasi / āditpatirna Ohase //9 //*

२. देवाः (Devāḥ) - ऋ. (Rv.) ८.८०.१०

अवीवृधद्वो अमृता अमन्दीदेकद्यूर्देवा उत याश्च देवीः ।
तस्मा उ राधः कृणुत प्रशस्तं प्रातर्मक्षू धियावसुर्जगम्यात् ॥१० ॥
*avīvṛdhadvo amṛtā amandīdekadyūrdevā uta yāścha devīḥ /*
*tasmā u rādhaḥ kuṇuta praśastaṁ prātarmakṣū dhiyāvasurjagamyāt //10 //*

## १४६. एवयामरुद् आत्रेयः (Evayāmarud Ātreyaḥ)

१. मरुतः (Marutaḥ) - ऋ. (Rv.) ५.८७.१-९

प्र वो महे मतयो यन्तु विष्णवे मरुत्वते गिरिजा एवयामरुत् ।
प्र शर्धाय प्रयज्यवे सुखादये तवसे भन्ददिष्टये धुनिव्रताय शवसे ॥१ ॥
प्र ये जाता महिना ये च नु स्वयं प्र विद्मना ब्रुवत एवयामरुत् ।
क्रत्वा तद्वो मरुतो नाधृषे शवो दाना मह्ना तदेषामधृष्टासो नाद्रयः ॥२ ॥
प्र ये दिवो बृहतः शृण्विरे गिरा सुशुक्वानः सुभ्व एवयामरुत् ।
न येषामिरी सधस्थ ईष्ट आँ अग्नयो न स्वविद्युतः प्र स्यन्द्रासो धुनीनाम् ॥३ ॥
स चक्रमे महतो निरुरुक्रमः समानस्मात्सदस एवयामरुत् ।
यदायुक्त त्मना स्वादधि ष्णुभिर्विष्पर्धसो विमहसो जिगाति शेवृधो नृभिः ॥४ ॥
स्वनो न वोऽमवान्रेजयद्वृषा त्वेषो ययिस्तविष एवयामरुत् ।
येना सहन्त ऋंजत स्वरोचिषः स्थारश्मानो हिरण्ययाः स्वायुधास इष्मिणः ॥५ ॥
अपारो वो महिमा वृद्धशवसस्त्वेषं शवोऽवत्वेवयामरुत् ।
स्थातारो हि प्रसितौ संदृशि स्थन ते न उरुष्यता निदः शुशुक्वांसो नाग्नयः ॥६ ॥
ते रुद्रासः सुमखा अग्नयो यथा तुविद्युम्ना अवन्त्वेवयामरुत् ।
दीर्घं पृथु पप्रथे सद्म पार्थिवं येषामज्मेष्वा महः शर्धास्यद्भुतैनसाम् ॥७ ॥
अद्वेषो नो मरुतो गातुमेतन श्रोता हवं जरितुरेवयामरुत् ।
विष्णोर्महः समन्यवो युयोतन स्मद्रथ्यो३ न दंसनाप द्वेषांसि सनुतः ॥८ ॥
गन्ता नो यां यियाः सुशमि श्रोता हवमरक्ष एवयामरुत् ।
ज्येष्ठासो न पर्वतासो व्योमनि यूयं तस्य प्रचेतसः स्यात दुर्धर्तवो निदः ॥९ ॥
*pra vo mahe matayo yantu viṣṇave marutvate girijā evayāmarut /*
*pra śardhāya prayajyave sukhādaye tavase bhandadiṣṭaye dhunivratāya śavase //1 //*
*pra ye jātā mahinā ye cha nu svayaṁ pra vidmanā bruvata evayāmarut /*
*kratvā tadvo maruto nādhṛṣe śavo dānā mahnā tadeṣāmadhṛṣṭāso nādrayaḥ //2 //*
*pra ye divo bṛhataḥ śṛṇvire girā suṣukvānaḥ subhva evayāmarut /*
*na yeṣāmirī sadhastha īṣṭa āṁ̐ agnayo na svavidyutaḥ pra syandrāso dhunīnām //3 //*
*sa chakrame mahato nirurukramaḥ samānasmātsadasa evayāmarut /*
*yadāyukta tmanā svādadhi ṣṇubhirviṣpardhaso vimahaso jigāti śevṛdho nṛbhiḥ //4 //*
*svano na vo'mavānnejayadvṛṣā tveṣo yayistaviṣa evayāmarut /*
*yenā sahanta ṛṁjata svarochiṣaḥ sthāraśmāno hiraṇyayāḥ svāyudhāsa iṣmiṇaḥ //5 //*
*apāro vo mahimā vṛddhaśavasastveṣaṁ śavo'vatvevayāmarut /*
*sthātāro hi prasitau saṁdṛśi sthana te na uruṣyatā nidaḥ śuśukvāṁso nāgnayaḥ //6 //*
*te rudrāsaḥ sumakhā agnayo yathā tuvidyumnā avantvevayāmarut /*
*dīrgha pṛthu paprathe sadma pārthivaṁ yeṣāmajmeṣvā mahaḥ*
*śardhāsyadbhutainasām //7 //*
*adveṣo no maruto gātumetana śrotā havaṁ jariturevayāmarut /*
*viṣṇormahaḥ samanyavo yuyotana smadrathyo3 na daṁsanāpa dveṣāṁsi*
*sanutaḥ //8 //*
*gantā no yāṁ yiāyāḥ suśami śrotā havamarakṣa evayāmarut /*
*jyeṣṭhāso na parvatāso vyomani yūyaṁ tasya prachetasaḥ syāta durdhartavo*
*nidaḥ //9 //*

२. मरुतः (साग्री. सास्वा. ऋसर्व.); रुद्रः (सार्षेदी.) (Marutaḥ [Ssb. Sas. Rss.]; Rudraḥ

[Sad.]- सा. (Sv.) ४६२

प्र वो माहे मतयो यन्तु विष्णवे मरुत्वते गिरिजा एवयामरुत् ।
प्र शर्धाय प्र यज्यवे सुखादये तवसे भन्ददिष्टये धुनिव्रताय शवसे ॥६॥
*pra vo māhe matayo yantu viṣṇave marutvate girijā evayāmarut /*
*pra śardhāya pra yajyave sukhādaye tavase bhandadiṣṭaye dhunivratāya śavase //6 //*

## १४७. और्णवाभः (Aurṇavābhaḥ)

१. इन्द्रः (Indraḥ) - य. (Yv.)३.५०

देहि मे ददामि ते नि मे धेहि नि ते दधे।
निहारं च हरासि मे निहारं निहराणि ते स्वाहा ॥५०॥
*dehi me dadāmi te ni me dhehi ni te dadhe /*
*nihāraṁ cha harāsi me nihāraṁ niharāṇi te svāhā //50 //*

२. याः (Yāḥ) - य. (Yv.)३.४८-४९

अवभृथ निचुम्पुण निचेरुरसि निचुम्पुणः।
अव देवैर्देवकृतमेनोऽ यासिषमव मर्त्यैर्मर्त्यकृतं पुरुराव्णो देव रिषस्पाहि ॥४८॥
पूर्णा दर्वि परा पत सुपूर्णा पुनरापत ।
वस्नेव विक्रीणावहाऽइषमूर्जंशतक्रतो ॥४९॥
*avabhṛtha nichumpuṇa nicherurasi nichumpuṇaḥ /*
*ava devairdevakṛtameno' yāsiṣamava martyairmartyakṛtaṁ pururāvṇo deva riṣaspāhi //48 //*
*pūrṇā darvi parā pata supūrṇā punarāpata /*
*vasneva vikrīṇāvahā'iṣamūrjaṁśatakrato //49 //*

## १४८. औतथ्यः दीर्घतमा - द्र. दीर्घतमा औतथ्य (Autathyaḥ Dīrghatamā - See Dīrghatamā Autathya)

## १४९. कक्षीवान (दैर्धतमसः औशिजः) (Kakṣīvāna (Dairdhatamasaḥ Auśijaḥ)

१. अश्विनौ (Aśvinau) - ऋ. (Rv.) १.११६.१-२५; १.११७.१-२५; १.११८.१-११

ऋ. (Rv.) १.११६.१-२५

नासत्याभ्यां बर्हिरिव प्र वृंजे स्तोमाँ इयर्म्यभ्रियेव वातः ।
यावर्भगाय विमदाय जायां सेनाजुवा न्यूहतू रथेन ॥१॥
वीळु१पत्मभिराशुहेमभिर्वा देवानां वा जुतिभिः शाशदाना ।
तद्रासभो नासत्या सहस्रमाजा यमस्य प्रधने जिगाय ॥२॥
तुग्रो ह भुज्युमश्विनोदमेघे रयिं न कश्चिन्ममृवाँ अवाहाः ।
तमूहथुर्नौभिरात्मन्वतीभिरन्तरिक्षप्रुदिभरपोदकाभिः ॥३॥
तिस्रः क्षपस्त्रिरहातिव्रजद्भिर्नासत्या भुजयुमूहथुः पतंगैः ।
समुद्रस्य धन्वन्नार्द्रस्य पारे त्रिभी रथैः शतपद्भिः पळश्वैः ॥४॥
अनारम्भणे तदवीरयेथामनास्थाने अग्रभणे समुद्रे ।
यदश्विना ऊहथुर्भुज्युमस्तँ शतारित्रां नावमातस्थिवांसम् ॥५॥
यमश्विना ददथुः श्वेतमश्वमघाश्वय शश्वदित्स्वस्ति ।
तद्वां दात्रं महि कीर्तेन्यं भूत्पैद्वो वाजी सदमिद्धव्यो अर्यः ॥६॥
युवं नरा स्तुवते पज्रियाय कक्षीवते अरदतं पुरंधिम् ।
कारोताच्छफादश्वस्य वृष्णः शतं कुम्भाँ असिंचतं सुरायाः ॥७॥
हिमेनाग्निं घ्रसमवारयेथां पितुमतीमूर्जमस्मा अधत्त्म् ।
ऋबीसे अत्रिमश्विनावनीतमुन्निन्यथुः सर्वगणं स्वस्ति ॥८॥
परावतं नासत्यानुदेथामुच्चाबुध्नं चक्रथुर्जिह्मबारम् ।
क्षरन्नापो न पायनाय राये सहस्राय तृष्यते गोतमस्य ॥९॥
जुजुरुषो नासत्योत वव्रिं प्रामुंचतं द्रापिमिव च्यवानात् ।

प्रातिरतं जहितस्यायुर्दस्रादित्पतिमकृणुतं कनीनाम् ॥१०॥
तद्वां नरा शंस्यं राध्यं चाभिष्टिमन्नासत्या वरूथम् ।
यद्विद्वांसा निधिमिवापगूळहमुद्दर्शतादूपथुर्वन्दनाय ॥११॥
तद्वां नरा सनये दंस उग्रमाविष्कृणोमि तायतुर्न वृष्टिम् ।
दध्यङ् ह यन्मध्वाथर्वणो वामश्वस्य शीर्ष्णा प्र यदीमुवाच ॥१२॥
अजोहवीन्नासत्या करा वां महे यामन्पुरुभुजा पुरंधिः ।
श्रुतं तच्छासुरिव वध्रिमत्या हिरण्यहस्तमश्विनावदत्तम् ॥१३॥
आस्नो वृकस्य वर्तिकामभीके युवं नरा नासत्यामुमुक्तम् ।
उतो कविं पुरुभुजा युवं ह कृपमाणमकृणुतं विचक्षे ॥१४॥
चरित्रं हि वेरिवाच्छेदि पर्णमाजा खेलस्य परितक्म्यायाम् ।
सद्यो जङ्घामायसीं विश्पलायै धने हिते सर्तवे प्रत्यधत्तम्॥ १५॥
शतं मेषान्वृक्ये चक्षदानमृज्राश्वं तं पितान्धं चकार ।
तस्मा अक्षी नासत्या विचक्ष आधत्तं दस्रा भिषजावनर्वन् ॥१६॥
आ वां रथं दुहिता सूर्यस्य कार्ष्मेवातिष्ठदर्वता जयन्ती ।
विश्वे देवा अन्वमन्यन्त हृद्भिः समु श्रिया नासत्या सचेथे ॥१७॥
यदयातं दिवोदासाय वर्तिर्भरद्वाजायाश्विना हयन्ता ।
रेवदुवाह सचनो रथो वां वृषभश्च शिंशुमारश्च युक्ता ॥१८॥
रयिं सुक्षत्रं स्वपत्यमायुः सुवीर्यं नासत्या वहन्ता ।
आ जह्नावीं समनसोप वाजैस्त्रिरह्नो भागं दधतीमयातम् ॥१९॥
परिविष्टं जाहुषं विश्वतः सीं सुगेभिर्नक्तमूहथू रजोभिः ।
विभिन्दुना नासत्या रथेन वि पर्वताँ अजरयू अयातम् ॥२०॥
एकस्या वस्तोरावतं रणाय वशमश्विना सनये सहस्रा ।
निरहतं दुच्छुना इन्द्रवन्ता पृथुश्रवसो वृषणावरातीः ॥२१॥
शरस्य चिदार्चत्कस्यावतादा नीचादुच्चा चक्रथुः पातवे वाः ।
शयवे चिन्नासत्या शचीभिर्जसुरये स्तर्यं पिप्यथुर्गाम् ॥२२॥
अवस्यते स्तुवते कृष्णियाय ऋजूयते नासत्या शचीभिः ।
पशुं न नष्टमिव दर्शनाय विष्णाप्वं ददथुर्विश्वकाय ॥२३॥
दश रात्रीरशिवेना नव द्यूनवनद्धं श्नथितमप्स्वन्तः ।
विप्रुतं रेभमुदनि प्रवृक्तमुन्निन्यथुः सोममिव स्रुवेण ॥२४॥
प्र वां दंसास्यश्विनाववोचमस्य पतिः स्यां सुगवः सुवीरः ।
उत पश्यन्नश्नुवन्दीर्घमायुरस्तमिवेज्जरिमाणं जगम्याम् ॥२५॥

*nāsatyābhyāṁ barhiriva pra vṛñje stomām̐ iyarmyābhriyeva vātaḥ* ।
*yāvarbhagāya vimadāya jāyāṁ senājuvā nyūhatū rathena* ॥1॥
*vīḷu1patmabhirāśuhemabhirvā devānāṁ vā jutibhiḥ śāśadānā* ।
*tadrāsabho nāsatyā sahasramājā yamasya pradhane jigāya* ॥2॥
*tugro ha bhujyumaśvinodameghe rayiṁ na kaśchinmamṛvām̐ avāhāḥ* ।
*tamūhathurnaubhirātmanvatībhirantarikṣaprudibharapodakābhiḥ* ॥3॥
*tisraḥ kṣapastrirahātivrajadbhirnāsatyā bhujayumūhathuḥ pataṁgaiḥ* ।
*samudrasya dhanvannārdrasya pāre tribhī rathaiḥ śatapadbhiḥ paḷaśvaiḥ* ॥4॥
*anārambhaṇe tadavīrayethāmanāsthāne agrabhaṇe samudre* ।
*yadaśvinā ūhathurbhujyumastam̐ śatāritrāṁ nāvamātasthivāṁsam* ॥5॥
*yamaśvinā dadathuḥ śvetamaśvamaghāśvaya śaśvaditsvasti* ।
*tadvāṁ dātraṁ mahi kīrtenyaṁ bhūtpaidvo vājī sadamiddhavyo aryaḥ* ॥6॥
*yuvaṁ narā stuvate pajriyāya kakṣīvate aradataṁ puraṁdhim* ।
*kārotāchchhaphādaśvasya vṛṣṇaḥ śataṁ kumbhām̐ asiṁchataṁ surāyāḥ* ॥7॥
*himenāgniṁ ghrasamavārayethāṁ pitumatīmūrjamasmā adhattm* ।
*ṛbīse atrimaśvināvanītamunninyathuḥ sarvagaṇaṁ svasti* ॥8॥

*parāvataṁ nāsatyānudethāmuchchābudhnaṁ chakrathurjihmabāram* ।
*kṣarannāpo na pāyanāya rāye sahasrāya tṛṣyate gotamasya* ॥9 ॥
*jujuruṣo nāsatyota vavriṁ prāmuṁchataṁ drāpimiva chyavānāt* ।
*prātiratam jahitasyāyurdasrāditpatimakṛṇutaṁ kanīnām* ॥10 ॥
*tadvāṁ narā śaṁsyaṁ rādhyaṁ chābhiṣṭimannāsatyā varūtham* ।
*yadvidvāṁsā nidhibhivāpagūḷahamuddarśatādūpathurvandanāya* ॥11 ॥
*tadvāṁ narā sanaye daṁsa ugramāviṣkṛṇomi tāyaturna vṛṣṭim* ।
*dadhyaṅ ha yanmadhvātharvaṇo vāmaśvasya śīrṣṇā pra yadībhuvācha* ॥12 ॥
*ajohavīnnāsatyā karā vāṁ mahe yāmanpurubhujā puraṁdhiḥ* ।
*śrutaṁ tachchhāsuriva vadhrimatyā hiraṇyahastamaśvināvadattam* ॥13 ॥
*āsno vṛkasya vārtikāmabhīke yuvaṁ narā nāsatyāmumuktam* ।
*uto kaviṁ purubhujā yuvaṁ ha kṛpamāṇamakṛṇutaṁ vichakṣe* ॥14 ॥
*charitraṁ hi verivāchchhedi parṇamājā khelasya paritakmyāyām* ।
*sadyo jaṅghāmāyasīṁ viśpalāyai dhane hite sartave pratyadhattam* ॥ 15 ॥
*śataṁ meṣānvṛkye chakṣadānamṛjrāśvaṁ taṁ pitāndhaṁ chakāra* ।
*tasmā akṣī nāsatyā vichakṣa ādhattaṁ dasrā bhiṣajāvanarvan* ॥16 ॥
*ā vāṁ rathaṁ duhitā sūryasya kārṣmevātiṣṭhadarvatā jayantī* ।
*viśve devā anvamanyanta hṛdbhiḥ samu śriyā nāsatyā sachethe* ॥17 ॥
*yadayātaṁ divodāsāya vartirbharadvājāyāśvinā hayantā* ।
*revaduvāha sachano ratho vāṁ vṛṣabhaścha śiṁśumāraścha yuktā* ॥18 ॥
*rayiṁ sukṣatraṁ svapatyamāyuḥ suśvīrya nāsatyā vahantā* ।
*ā jahnāvīṁ samanasopa vājaistrirahno bhāgaṁ dadhatīmayātam* ॥19 ॥
*pariviṣṭaṁ jāhuṣaṁ viśvataḥ sīṁ sugebhirnaktamūhathū rajobhiḥ* ।
*vibhindunā nāsatyā rathena vi parvatāṁ̐ ajarayū ayātam* ॥20 ॥
*ekasyā vastorāvataṁ raṇāya vaśamaśvinā sanaye sahasrā* ।
*nirahataṁ duchchhunā indravantā pṛthuśravaso vṛṣaṇāvarātī* ॥21 ॥
*śarasya chidārchatkasyāvatādā nīchāduchchā chakrathuḥ pātave vāḥ* ।
*śayave chinnāsatyā śachībhirjasuraye starya pipyathurgām* ॥22 ॥
*avasyate stuvate kṛṣṇiyāya ṛjūyate nāsatyā śachībhiḥ* ।
*paśuṁ na naṣṭamiva darśanāya viṣṇāpvaṁ dadathurviśvakāya* ॥23 ॥
*daśa rātrīraśivenā nava dyūnavanaddhaṁ śnathitamapsva1ntaḥ* ।
*viprutaṁ rebhamudani pravṛktamunninyathuḥ somamiva sruveṇa* ॥24 ॥
*pra vāṁ daṁsāsyaśvināvavochamasya pātiḥ syāṁ sugavaḥ suvīraḥ* ।
*uta paśyannaśnuvandīrghamāyurastamivejjarimāṇaṁ jagamyām* ॥25 ॥

ऋ. (Rv.) १.११७.१-२५

मध्वः सोमस्याश्विना मदाय प्रत्नो होता विवासते वाम् ।
बर्हिष्मती रातिर्विश्रिता गीरिषा यातं नासत्योप वाजैः ॥१॥
यो वामश्विना मनसो जवीयान्रथः स्वश्वो विश आजिगति ।
येन गच्छथः सुकृतो दुरोणं तेन नरा वर्तिरस्मभ्यं यातम् ॥२॥
ऋषिं नरावंहसः पांचजन्यमृबीसादत्रिं मुंचथो गणेन ।
मिनन्ता दस्योरशिवस्य माया अनुपूर्व वृषणा चोदयन्ता ॥३॥
अश्वं न गूळहमश्विना दुरेवैऋर्षिं नरा वृषणा रेभमप्सु ।
सं तं रणीथो विप्रुतं दसोभिर्न वां जूर्यन्ति पूर्व्या कृतानि ॥४॥
सुषुप्वांसं न निऋर्तेरुपस्थे सूर्यं न दस्रा तमसि क्षियन्तम् ।
शुभे रुक्मं न दर्शतं निखातमुदूपथुरश्विना वन्दनाय ॥५॥
तद्वां नरा शंस्यं पज्रियेण कक्षीवता नासत्या परिज्मन् ।
शफादश्वस्य वाजिनो जनाय शतं कुम्भाँ असिंचतं मधूनाम् ॥६॥
युवं नरा स्तुवते कृष्णियाय विष्णाप्वं ददथुर्विश्वकाय ।

घोषायै चितिपतृषदे दुरोणे पतिं जूर्यन्त्या अश्विनावदत्तम् ॥७॥
युवं श्यावाय रुशतीमदत्त महः क्षेणस्याश्विना कण्वाय ।
प्रवाच्यं तद्वृषणा कृतं वां यन्नार्षदाय श्रवो अध्यधत्तम् ॥८॥
पुरू वर्पास्यश्विना दधाना नि पेदव ऊहथुराशुमश्वम् ।
सहस्रसां वाजिनमप्रतीतमहिहनं श्रवस्यं१ तरुत्रम् ॥९॥
एतानि वा श्रवस्या सुदानू ब्रह्माङ्गूषं सदनं रोदस्योः ।
यद्वां पज्रासो अश्विना हवन्ते यातमिषा च विदुषे च वाजम् ॥१०॥
सूनोर्मानेनाश्विना गृणाना वाज विप्राय भुरणा रदन्ता ।
अगस्त्ये ब्रह्मणा वावृधाना सं विपूपलां नासत्यारिणीतम् ॥११॥
कुह यान्ता सुष्टुतिं काव्यस्य दिवो नपाता वृषण शयुत्रा ।
हिरण्यस्येव कलशं निखातमुदूपथुर्दशमे अश्विनाहन् ॥१२॥
युवं च्यवानमश्विना जरन्तं पुनर्युवानं चक्रथुः शचीभिः ।
युवो रथं दुहिता सूर्यस्य सह श्रिया नासत्यावृणीत ॥१३॥
युवं तुग्राय पूर्व्येभिरेवैः पुनर्मन्यावभवतं युवाना ।
युवं भुजयुमर्णसो निः समुद्राद्विभिरूहथुरृज्रेभिरश्वैः ॥१४॥
अजोहवीदश्विना तौग्र्यो वां प्रोळ्हः समुद्रमव्यथिर्जगन्वान् ।
निष्टमूहथुः सुयुजा रथेन मनोजवसा वृषणा स्वस्ति ॥१५॥
अजोहवीदश्विना वर्तिका वमास्नो यत्सीममुंचतं वृकस्य ।
वि जयुषा ययथुः सान्वद्रेर्जातं विष्वाचो अहतं विषेण ॥१६॥
शतं मेषान्वृक्ये मामहानं तमः प्रणीतमशिवेन पित्रा ।
आक्षी ऋज्राश्वे अश्विनावधत्तं ज्योतिरन्धाय चक्रथुर्विचक्षे ॥१७॥
शुनमन्धाय भरमह्वयत्सा वृकीरश्विना वृषणा नरेति ।
जारः कनीन इव चक्षदान ऋज्राश्वः शतमेकं च मेषान् ॥१८॥
मही वामूतिरश्विना मयोभूरुत स्रामं धिष्ण्या सं रिणीथः ।
अथा युवामिदह्वयत्पुरंधिरागच्छतं सीं वृषणाववोभिः ॥१९॥
अधेनुं दस्रा स्तर्य१ विषक्तामपिन्वतं शयवे अश्विना गाम् ।
युवं शचीभिर्विमदाय जायां न्यूहथुः पुरुमित्रस्य योषाम् ॥२०॥
यवं वृकेणाश्विना वपन्तेषं दुहन्ता मनुषाय दस्रा ।
अभि दस्युं बकुरेणा धमन्तोरु ज्योतिश्चक्रथुरार्याय ॥२१॥
आथर्वणायाश्विना दधीचेऽश्व्यं शिरः प्रत्यैरयतम् ।
स वां मधु प्र वोचदृतायन्त्वाष्ट्रं यद्दस्रावपिकक्ष्यं वाम् ॥२२॥
सदा कवी सुमतिमा चके वां विश्वा धियो अश्विना प्रावतं मे ।
अस्मे रयिं नासत्या बृहन्तमपत्यसाचं श्रुत्यं रराथाम् ॥२३॥
हिरण्यहस्तमश्विना रराणा पुत्रं नरा वध्रिमत्या अदत्तम् ।
त्रिधा ह श्यावमश्विना विकस्तमुज्जीवस ऐरयतं सुदानू ॥२४॥
एतानि वामश्विना वीर्याणि प्र पूर्व्याण्यायवोऽवोचन् ।
ब्रह्म कृण्वन्तो वृषणा युवभ्यां सुवीरासो विदथमा वदेम ॥२५॥

*madhvaḥ somasyāśvinā madāya pratno hotā vivāsate vām /*
*barhiṣmatī rātirviśritā gīriṣā yātaṁ nāsatyopa vājaiḥ //1 //*
*yo vāmaśvinā manaso javīyānnathaḥ svaśvo viśa ājigati /*
*yena gachchhathaḥ sṛkṛto duroṇaṁ tena narā vartirasmabhyaṁ yātam //2 //*
*ṛṣiṁ narāvaṁhasaḥ pāṁchajanyamṛbīsādatriṁ muṁchatho gaṇena /*
*minantā dasyoraśivasya māyā anupūrva vṛṣaṇā chodayantā //3 //*
*aśvaṁ na gūḷahamaśvinā durevairṛṣiṁ narā vṛṣaṇā rebhamapsu /*
*saṁ taṁ raṇītho viprutaṁ dasobhirna vāṁ jūryanti pūrvyā kṛtāni //4 //*
*suṣupvāṁsaṁ na nirṛterupasthe sūrya na dasrā tamasi kṣiyantam /*
*śubhe rukmaṁ na darśataṁ nikhātamudūpathuraśvinā vandanāya //5 //*

*tadvāṁ narā śaṁsyaṁ pajriyeṇa kakṣīvatā nāsatyā parijman /*
*śaphādaśvasya vājino janāya śataṁ kumbhāṁ asiṁchataṁ madhūnām //6 //*
*yuvaṁ narā stuvate kṛṣṇiyāya viṣṇapvaṁ dadathurviśvakāya /*
*ghoṣāyai chitipatṛṣade duroṇe patiṁ jūryantyā aśvināvadattam //7 //*
*yuvaṁ śyāvāya ruśatīmadatta mahaḥ kṣeṇasyāśvinā kaṇvāya /*
*pravāchyaṁ tadvṛṣaṇā kṛtaṁ vāṁ yannārṣadāya śravo adhyadhattam //8 //*
*purū varpāsyaśvinā dadhānā ni pedava ūhathurāśumaśvam /*
*sahasrasāṁ vājinamapratītamahihanaṁ śravasyaṁ1 tarutram //9 //*
*etāni vā śravasyā sudānū brahmāṅ gūṣaṁ sadanaṁ rodasyoḥ /*
*yadvāṁ pajrāso aśvinā havante yātamiṣā cha viduṣe cha vājam //10 //*
*sūnormānenāśvinā gṛṇānā vāja viprāya bhuraṇā radantā /*
*agastye brahmaṇā vāvṛdhānā saṁ vipūpalāṁ nāsatyāriṇītam //11 //*
*kuha yāntā suṣṭutiṁ kāvyasya divo napātā vṛṣaṇa śayutrā /*
*hiraṇyasyeva kalaśaṁ nikhātamudūpathurdaśame aśvināhan //12 //*
*yuvaṁ chyavānamaśvinā jarantaṁ punaryuvānaṁ chakrathuḥ śachībhiḥ /*
*yuvo rathaṁ duhitā sūryasya saha śriyā nāsatyāvṛṇīta //13 //*
*yuvaṁ tugrāya pūrvyebhirevaiḥ punarmanyāvabhavataṁ yuvānā /*
*yuvaṁ bhujayumarṇaso niḥ samudrādvibhirūhathurṛjrebhiraśvaiḥ //14 //*
*ajohavīdaśvinā taugryo vāṁ proḷahaḥ samudramavyathirjaganvān /*
*niṣṭamūhathuḥ suyujā rathena manojavasā vṛṣaṇā svasti //15 //*
*ajohavīdaśvinā vartikā vamāsno yatsīmamuṁchataṁ vṛkasya /*
*vi jayuṣā yayathuḥ sānvadrerjātaṁ viṣvācho ahataṁ viṣeṇa //16 //*
*śataṁ meṣānvṛkye māmahānaṁ tamaḥ praṇītamaśivena pitrā /*
*ākṣī ṛjrāśve aśvināvadhattaṁ jyotirandhāya chakrathurvichakṣe //17 //*
*śunamandhāya bharamahnayatsā vṛkīraśvinā vṛṣaṇā nareti /*
*jāraḥ kanīna iva chakṣadāna ṛjrāśvaḥ śatamekaṁ cha meṣān //18 //*
*mahī vāmūtiraśvinā mayobhūruta srāmaṁ dhiṣṇyā saṁ riṇīthaḥ /*
*athā yuvāmidahnayatpuraṁdhirāgachchhataṁ sīṁ vṛṣaṇāvavobhiḥ //19 //*
*adhenuṁ dasrā starya1 viṣaktāmapinvataṁ śayave aśvinā gām /*
*yuvaṁ śachībhirvimadāya jāyāṁ nyūhathuḥ purumitrasya yoṣām //20 //*
*yavaṁ vṛkeṇāśvinā vapanteṣaṁ duhantā manuṣāya dasrā /*
*abhi dasyuṁ bakureṇā dhamantoru jyotiśchakrathurāryāya //21 //*
*ātharvaṇāyāśvinā dadhīche'śvyaṁ śiraḥ pratayairayatam /*
*sa vāṁ madhu pra vochadṛtāyantvāṣṭraṁ yaddasrāvapikakṣayaṁ vām //22 //*
*sadā kavī sumatimā chake vāṁ viśvā dhiyo aśvinā prāvataṁ me /*
*asme rayiṁ nāsatyā bṛhantamapatyasāchaṁ śrutyaṁ rarāthām //23 //*
*hiraṇyahastamaśvinā rarāṇā putraṁ narā vadhrimatyā adattam /*
*tridhā ha śyāvamaśvinā vikastamujjīvasa airayataṁ sudānū //24 //*
*etāni vāmaśvinā vīryāṇi pra pūrvyāṇyāyavo'vochan /*
*brahma kṛṇvanto vṛṣaṇā yuvabhyāṁ suvīrāso vidathamā vadema //25 //*

ऋ. (Rv.) १.११८.१-११

आ वां रथो अश्विना श्येनपत्वा सुमृळीकः स्ववाँ यात्वर्वाङ् ।
यो मर्त्यस्य मनसो जीवयान्त्रिवन्धुरो वृषणा वातरंहाः ॥१॥
त्रिवन्धुरेण त्रिवृता रथेन त्रिचक्रेण सुवृता यातमर्वाक् ।
पिन्वतं गा जिन्वतमर्वतो नो वर्धयतमश्विना वीरमस्मे ॥२॥
प्रवद्यामना सुवृता रथेन दस्राविमं शृणुतं श्लोकमद्रेः ।
किमंग वा प्रत्यवर्ति गमिष्ठाहुर्विप्रासो अश्विना पुराजाः ॥३॥
आ वां श्येनासो अश्विना वहन्तु रथे युक्तास आशवः पतंगाः ।
ये अप्तुरो दिव्यासो न गृध्रा अभि प्रयो नासत्या वहन्ति ॥४॥

आ वां रथं युवतिस्तिष्ठदत्र जुष्ट्वी नरा दुहिता सूर्यस्य ।
परि वामश्वा वपुषः पतंगा वयो वहन्त्वरुषा अभीके ॥५॥
उद्वन्दनमैरतं दंसनाभिरुद्रेभं दस्रा वृषणा शचीभिः ।
निष्टौग्र्यं पारयथः समुद्रात्पुनश्च्यवानं चक्रथुर्युवानम् ॥६॥
युवमत्रयेऽवनीताय तप्तमूर्जमोमानमश्विनावधत्तम् ।
युवं कण्वायापिरिप्ताय चक्षुः प्रत्यधत्तं सुष्टुतिं जुजुषाणा ॥७॥
युवं धेनुं शयवे नाधितायापिन्वतमश्विना पूर्व्याय ।
अमुंचतं वर्तिकामंहसो निः प्रति जङ्घाँ विश्पलाया अधत्तम् ॥८॥
युवं श्वेतं पेदव इन्द्रजूतमहिहनमश्विनादत्तमश्वम् ।
जोहूत्रमर्यो अभिभूतिमुग्रं सहस्रसां वृषणं वीड्वंगम् ॥९॥
ता वां नरा स्ववसे सुजाता हवामहे अश्विना नाधमानाः ।
आ न उप वसुमता रथेन गिरो जुषाणा सुविताय यातम् ॥१०॥
आ श्येनस्य जवसा नूतनेनास्मे यातं नासत्या सजोषाः ।
हवे हि वामश्विना रातहव्यः शश्वत्तमाया उषसो व्युष्टौ ॥११॥

*ā vāṁ ratho aśvinā śyenapatvā sumṛḻīkaḥ svavām̐ yātvarvāṅ ।*
*yo martyasya manaseā jīvayāntrivandhuro vṛṣaṇā vātaraṁhāḥ ॥1॥*
*trivandhureṇa trivṛtā rathena trichakreṇa suvṛtā yātamarvāk ।*
*pinvataṁ gā jinvatamarvato no vardhayatamaśvinā vīramasme ॥2॥*
*pravadyāmanā suvṛtā rathena dasrāvimaṁ śṛṇutaṁ ślokamadreḥ ।*
*kimaṁga vā pratyavarti gamiṣṭhāhurviprāso aśvinā purājāḥ ॥3॥*
*ā vāṁ śyenāso aśvinā vahantu rathe yuktāsa āśavaḥ pataṁgāḥ ।*
*ye apturo divyāso na gṛdhrā abhi prayo nāsatyā vahanti ॥4॥*
*ā vāṁ rathaṁ yuvatistiṣṭhadatra juṣṭvī narā duhitā sūryasya ।*
*pari vāmaśvā vapuṣaḥ pataṁgā vayo vahantvaruṣā abhīke ॥5॥*
*udvandanamairataṁ daṁsanābhirudrebhaṁ dasrā vṛṣaṇā śachībhiḥ ।*
*niṣṭaugryaṁ pārayathaḥ samudrātpunaśchyavānaṁ chakrathuryuvānam ॥6॥*
*yuvamatraye'vanītāya taptamūrjamomānamaśvināvadhattam ।*
*yuvaṁ kaṇvāyāpiriptāya chakṣuḥ pratyadhattaṁ suṣṭutiṁ jujuṣāṇā ॥7॥*
*yuvaṁ dhenuṁ śayave nādhitāyāpinvatamaśvinā pūrvyāya ।*
*amuṁchataṁ vartikāmaṁhaso niḥ prati jaṅghām̐ viśpalāyā adhattam ॥8॥*
*yuvaṁ śvetaṁ pedava indrajūtamahihanamaśvinādattamaśvam ।*
*johūtramaryo abhibhūtimugraṁ sahasrasāṁ vṛṣaṇaṁ vīḍvaṁgam ॥9॥*
*tā vāṁ narā svavase sujātā havāmahe aśvinā nādhamānāḥ ।*
*ā na upa vasumatā rathena giro juṣāṇā suvitāya yātam ॥10॥*
*ā śyenasya javasā nūtanenāsme yātaṁ nāsatyā sajoṣāḥ ।*
*have hi vāmaśvinā rātahavyaḥ śaśvattamāyā uṣaso vyuṣṭau ॥11॥*

२. पवमानः सोमः (Pavamānaḥ Somaḥ)- ऋ. (Rv.) ९.७४.१-९

शिशुर्न जातोऽव चक्रदद्वने स्व१र्यद्वाज्यरुषः सिषासति ।
दिवो रेतसा सचते पयोवृधा तमीमहे सुमती शर्म सप्रथः ॥१॥
दिवो यः स्कम्भो धरुणः स्वातत आपूर्णो अंशुः पर्येति विश्वतः ।
सेमे मही रोदसी यक्षदावृता समीची ने दाधार समिषः कविः ॥२॥
महि प्सरः सुकृतं सोम्यं मधूर्वी गव्यूतिरदितेर्ऋतं यते ।
ईशे यो वृष्टेरित उस्रियो वृषापां नेता य इतऊतिर्ऋग्मियः ॥३॥
आत्मन्वन्नभो दुह्यते घृतं पय ऋतस्य नाभिरमृतं वि जायते ।
समीचीनाः सुदानवः प्रीणन्ति तं नरो हितमव मेहन्ति पेरवः ॥४॥
अरावीदंशुः सचमान ऊर्मिणा देवाव्यं१ मनुषे पिन्वति त्वचम् ।
दधाति गर्भमदितेरुपस्थ आ येन तोकं च तनयं च धामहे ॥५॥

सहस्रधारेऽव ता असश्चतस्तृतीये सन्तु रजसि प्रजावतीः ।
चतस्रो नाभो निहिता अबो दिवो हविर्भरन्त्यमृतं घृतश्चुतः ॥६॥
श्वेतं रूपं कृणुते यत्सिषासति सोमो मीढ्वाँ असुरो वेद भूमनः ।
धिया शमी सचते सोमभि प्रवद्दिवस्कबन्धमव दर्षदुद्रिणम् ॥७॥
अध श्वेतं कलशं गोभिरक्तं कार्ष्मन्ना वाज्यक्रमीत्ससवान् ।
आ हिन्विरे मनसा देवयन्तः कक्षीवते शतहिमाय गोनाम् ॥८॥
अद्भिः सोम पपृचानस्य ते रसोऽव्यो वारं वि पवमान धावति ।
स मृज्यमानः कविभिर्मदिन्तम स्वदस्वेन्द्राय पवमान पीतये ॥९॥

*śiśurna jāto'va chakradadvane sva1ryadvājyaruṣaḥ siṣāsati /*
*divo retasā sachate payovṛdhā tamīmahe sumatī śarma saprathaḥ //1 //*
*divo yaḥ skambho dharuṇaḥ svātata āpūrṇo aṁśuḥ paryeti viśvataḥ /*
*seme mahī rodasī yakṣadāvṛtā samīchī ne dādhāra samiṣaḥ kaviḥ //2 //*
*mahi psaraḥ sukṛtaṁ somyaṁ madhūrvī gavyūtiraditeṛrtaṁ yate /*
*īśe yo vṛṣṭerita usriyo vṛṣāpāṁ netā ya itaūtiṛrgmiyaḥ //3 //*
*ātmanvannabho duhyate ghṛtaṁ paya ṛtasya nābhiramṛtaṁ vi jāyate /*
*samīchīnāḥ sudānavaḥ prīṇanti taṁ naro hitamava mahanti peravaḥ //4 //*
*arāvīdaṁśuḥ sachamāna ūrmiṇā devāvyaṁ1 manuṣe pinvati tvacham /*
*dadhāti garbhamaditerupastha ā yena tokaṁ cha tanayaṁ cha dhāmahe //5 //*
*sahasradhāre'va tā asaśchatastṛtīye santu rajasi prajāvatīḥ /*
*chatasro nābho nihitā abo divo havirbharantyamṛtaṁ ghṛtaśchutaḥ //6 //*
*śvetaṁ rūpaṁ kṛṇute yatsiṣāsati somo mīḍhvām̐ asuro veda bhūmanaḥ /*
*dhiyā śamī sachate somabhi pravaddivaskabandhamava darṣadudriṇam //7 //*
*adha śvetaṁ kalaśaṁ gobhiraktaṁ kārṣmannā vājyakramītsasavān /*
*ā hinvire manasā devayantaḥ kakṣīvate śatahimāya gonām //8 //*
*adbhiḥ soma papṛchānasya te raso'vyo vāraṁ vi pavamāna dhāvati /*
*sa mṛjyamānaḥ kavibhirmadintama svadasvendrāya pavamāna pītaye //9 //*

३. विद्वांसः (Vidvāṁsaḥ) - ऋ. (Rv.) १.१२६.१-७

अमन्दान्त्सतोमान्प्र भरे मनीषा सिन्धावधि क्षियतो भावयस्य ।
यो मे सहस्रममिमीत सवानतूर्तो राजा श्रव इच्छमानः ॥१॥
शतं राो राधमानस्य निष्कांछतमश्वान्प्रयतान्त्सद्य आदम् ।
शतं कक्षीवाँ असुरस्य गोनां दिवि श्रवोऽजरमा ततान ॥२॥
उप मा श्यावाः स्वनयेन दत्ता बधूमन्तो दश रथासो अस्थुः ।
षष्टिः सहस्रमनु गव्यमागात्सनत्कक्षीवाँ अभिपित्वे अह्नाम् ॥३॥
चत्वारिंशद्दशरथस्य शोणाः सहस्रस्याग्रे श्रेणिं नयन्ति ।
मदच्युतः कृशनावतो अत्यान्कक्षीवन्त उदमृक्षन्त पज्राः ॥४॥
पूर्वामनु प्रयतिमाददे वस्त्रीन्युक्ताँ अष्टावरिधायसो गाः ।
सुबन्धवो ये विश्या इव व्रा अनस्वन्तः श्रव ऐषन्त पज्राः ॥५॥
आगधिता परिगधिता या कशीकेव जंगहे । ददाति मह्यं यादुरी याशूनां भोज्या शता ॥६॥
उपोप मे परा मृश मा मे दभ्राणि मन्यथाः । सर्वाहमस्मि रोमशा गन्धारीणामिवाविका ॥७॥

*amandāntsatomānpra bhare manīṣā sindhāvadhi kṣiyato bhāvayasya /*
*yo me sahasramamimīta savānatūrto rājā śrava ichchhamānaḥ //1 //*
*śataṁ rāāo rādhamānasya niṣkāṁchhatamaśvānprayatānsadya ādam /*
*śataṁ kakṣīvām̐ asurasya gonāṁ divi śravo'jaramā tatāna //2 //*
*upa mā śyāvāḥ svanayena dattā badhūmanto daśa rathāso asthuḥ /*
*ṣaṣṭiḥ sahasramanu gavyamāgātsanatkakṣīvām̐ abhipitve ahnām //3 //*
*chatvāriṁśaddaśarathasya śoṇāḥ sahasrasyāgre śreṇiṁ nayanti /*
*madachyutaḥ kṛśanāvato atyānkakṣīvanta udamṛkṣanta pajrāḥ //4 //*
*pūrvāmanu prayatimādade vastrīnyuktām̐ aṣṭāvaridhāyaso gāḥ /*

*subandhavo ye viśyā iva vrā anasvantaḥ śrava aiṣanta pajrāḥ* ॥5॥
*āgadhitā parigadhitā yā kaśīkeva jaṁgahe* । *dadāti mahyaṁ yādurī yāśūnāṁ bhojyā śatā* ॥6॥
*upopa me parā mṛśa mā me dabhrāṇi manyathāḥ* । *sarvāhamasmi romaśā gandhārīṇāmivāvikā* ॥7॥

४. विश्वेदेवाः (Viśvedevāḥ) - ऋ. (Rv.) १.१२२.१-१५

प्र वः पान्तं रघुमन्यवोऽन्धो यां रुद्राय मीळहुषे भरध्वम् ।
दिवो अस्तोष्यसुरस्य वीरैरिषुध्येव मरुतो रोदस्योः ॥१॥
पत्नीव पूर्वहूतिं वावृधध्या उषासानक्ता पुरुधा विदाने ।
स्तरीर्नात्कं व्युतं वसाना सूर्यस्य श्रिया सुदृशी हिरण्यैः ॥२॥
ममत्तु नः परिज्मा वसर्हा ममत्तु वातो अपां वृषण्वान् ।
शिशीतमिन्द्रापर्वता युवं नस्तन्नो विश्वे वरिवस्यन्तु देवाः ॥३॥
उत त्या मे यशसा श्वेतनायै व्यन्ता पान्तौशिजो हुवध्यै ।
प्र वो नपातमपां कृणुध्वं प्र मातरा रास्पिनस्यायोः ॥४॥
आ वो रुवण्युमौशिजो हुवध्यै घोषेव शंसमर्जुनस्य नशे ।
प्र वः पूष्णे दावन आँ अच्छा वोचेय वसुतातिमग्नेः ॥५॥
श्रुतं मे मित्रावरुणा हवेमोत श्रुतं सदने विश्वतः सीम् ।
श्रोतु नः श्रोतुरातिः सुश्रोतुः सुक्षेत्रा सिन्धुरद्भिः ॥६॥
स्तुषे सा वां वरुण मित्र रातिर्गवां शता पृक्षयामेषु पज्रे ।
श्रुतरथे प्रियरथे दधानाः सद्यः पुष्टिं निरुन्धानासो अग्मन्॥७॥
अस्य स्तुषे महिमघस्य राधः सचा सनेम नहुषः सुवीराः ।
जनोयः पज्रेभ्यो वाजिनीवानश्वावतो रथिना मह्यं सूरिः ॥८॥
जनो यो मित्रावरुणावभिध्रुगपो न वां सुनोत्यक्ष्णयाध्रुक् ।
स्वयं स यक्ष्मं हृदये नि धत् आप यदीं होत्राभिर्ऋतावा ॥९॥
स व्राधतो नहुषो दंसुजूतः शर्धस्तरो नरां गूर्तश्रवाः ।
विसृष्टरातिर्याति बाळहसृत्वा विश्वासु पृतसु सदमिच्छूरः ॥१०॥
अध ग्मन्ता नहुषो हवं सूरेः श्रोता राजानो अमृतस्य मन्द्राः ।
नभोजुवो यन्निरवस्य राधः प्रशस्तये महिना रथवते ॥११॥
एतं शर्धं धाम यस्य सूरेरित्यवोचन्दशतयस्य नंशे ।
द्युम्नानि येषु वसुताती रारन्विश्वे सन्वन्तु प्रभृथेषु वाजम् ॥१२॥
मन्दामहे दशतयस्य धासेर्द्विर्यत्पंच बिभ्रतो यन्त्यन्ना ।
किमिष्टाश्व इष्टरश्मिरेत ईशानासस्तरुष ऋंजते नृन् ॥१३॥
हिरण्यकर्णं मणिग्रीवमर्णस्तन्नो विश्वे वरिवस्यन्तु देवाः ।
अर्यो गिरः सद्य आ जग्मुषीरोस्राश्चाकन्तूभयेष्वस्मे ॥१४॥
चत्वारो मा मशर्शारस्य शिश्वस्त्रयो रा॒ आयवसस्य जिष्णोः ।
रथो वां मित्रावरुणा दीर्घप्साः स्यूमगभस्तिः सूरो नाद्यौत् ॥१५॥

*pra vaḥ pāntaṁ raghumanyavo'ndho yāṁ rudrāya mīḻahuṣe bharadhvam* ।
*divo astoṣyasurasya vīrairiṣudhyeva maruto rodasyoḥ* ॥1॥
*patnīva pūrvahūtiṁ vāvṛdhadhyā uṣāsānaktā purudhā vidāne* ।
*starīrnātkaṁ vyutaṁ vasānā sūryasya śriyā sudṛśī hiraṇyaiḥ* ॥2॥
*mamattu naḥ parijmā vasarhā mamattu vāto apāṁ vṛṣaṇvān* ।
*śiśītamindrāparvatā yuvaṁ nastanno viśve varivasyantu devāḥ* ॥3॥
*uta tyā me yaśasā śvetanāyai vyantā pāntauśijo huvadhyai* ।
*pra vo napātamapāṁ kṛṇudhvaṁ pra mātarā rāspinasyāyoḥ* ॥4॥
*ā vo ruvaṇyumauśijo huvadhyai ghoṣeva śaṁsamarjunasya naśe* ।
*pra vaḥ pūṣṇe dāvana āṁ̐ achchhā vocheya vasutātimagneḥ* ॥5॥
*śrutaṁ me mitrāvaruṇā havemota śrutaṁ sadane viśvataḥ sīm* ।

*śrotu naḥ śroturātiḥ suśrotuḥ sukṣetrā sindhuradbhiḥ ॥6॥*
*stuṣe sā vāṁ varuṇa mitra rātirgavāṁ śatā pṛkṣayāmeṣu pajre ।*
*śrutarathe priyarathe dadhānāḥ sadyaḥ puṣṭiṁ nirundhānāso agman ॥7॥*
*asya stuṣe mahimaghasya rādhaḥ sachā sanema nahuṣaḥ suvīrāḥ ।*
*janoyaḥ pajrebhyo vājinīvānaśvāvato rathinā mahyaṁ sūriḥ ॥8॥*
*jano yo mitrāvaruṇāvabhidhrugapo na vāṁ sunotyakṣaṇayādhruk ।*
*svayaṁ sa yakṣamaṁ hṛdaye ni dhatt āpa yadīṁ hotrābhirṛtāvā ॥9॥*
*sa vrādhato nahuṣo daṁsujūtaḥ śardhastaro narāṁ gūrtaśravāḥ ।*
*visṛṣṭarātiryāti bāḻahasṛttvā viśvāsu pṛtasu sadamichchhūraḥ ॥10॥*
*adha gmantā nahuṣo havaṁ sūreḥ śrotā rājāno amṛtasya mandrāḥ ।*
*nabhojuvo yanniravasya rādhaḥ praśastaye mahinā rathavate ॥11॥*
*etaṁ śardha dhāma yasya sūrerityavochandaśatayasya naṁśe ।*
*dyumnāni yeṣu vasutātī rāranviśve sanvantu prabhṛtheṣu vājam ॥12॥*
*mandāmahe daśatayasya dhāserdviryatpaṁcha bibhrato yantyannā ।*
*kimiṣṭāśva iṣṭaraśmireta īśānāsastaruṣa ṛṁjate nṛn ॥13॥*
*hiraṇyakarṇa maṇigrīvamarṇastanno viśve varivasyantu devāḥ ।*
*aryo giraḥ sadya ā jagmuṣīrosrāśchākantūbhayeṣvasme ॥14॥*
*chatvāro mā maśarśārasya śiśvastrayo rāā āyavasasya jiṣṇoḥ ।*
*ratho vāṁ mitrāvaruṇā dīrghapsāḥ syūmagabhastiḥ sūro nādyaut ॥15॥*

## १५०. कक्षीवान् दैर्घतमसः औशिजः (Kakṣīvān Dairghatamasaḥ Auśijaḥ)

१. अश्विनौ (Aśvinau) - ऋ. (Rv.) १.११९.१-१०; १.१२०.१-१२

ऋ. (Rv.) १.११९.१-१०

आ वा रथं पुरुमायं मनोजुवं जीराश्वं यियं जीवसे हुवे ।
सहस्रकेतुं वनिनं शतद्वसुं श्रुष्टीवानं वरिवोधामभि प्रयः ॥१॥
ऊर्ध्वा धीतिः प्रत्यस्य प्रयामन्यधायि शस्मन्त्समयनत आ दिशः ।
स्वदामि घर्मं प्रति यन्त्यूतय आ वामूर्जानी रथमश्विनारुहत् ॥२॥
सं यन्मिथः पस्पृधनासो अग्मत शुभे मखा अमिता जायवो रणे ।
युवोरह प्रवणे चेकिते रथो यदश्विना वहथः सूरिमा वरम् ॥३॥
युवं भुजयु भुरमाणं विभिर्गतं स्वयुक्तिभिर्निवहन्ता पितृभ्य आ ।
यासिष्टं वर्तिर्वृषणा विजेन्यं१ दिवोदासाय महि चेति वामवः ॥४॥
युवोरश्विना वपुषे युवायुजं रथं वाणी येमतुरस्य शर्ध्यम् ।
आ वां पतित्वं सख्याय जग्मुषी योषावृणीत जेन्या युवां पती ॥५॥
युवं रेभं परिषूतेरुरुष्यथो हिमेन घर्मं परितप्तमत्रये ।
युवं शयोरवसं पिप्यथुर्गवि प्र दीर्घेण वन्दनस्तार्यायुषा ॥६॥
युवं वन्दनं निऋतं जरण्यया रथं न दस्रा करणा समिन्वथः ।
क्षेत्रादा विप्रं जनथो विपन्यया प्र वामत्र विधते दंसना भुवत् ॥७॥
अगच्छतं कृपमाणं परावति पितुः स्वस्य त्यजसा निबाधितम् ।
स्वर्वतीरित ऊतीर्युवोरह चित्रा अभीके अभवन्नभिष्टयः ॥८॥
उत स्या वां मधुमन्मक्षिकारपन्मदे सोमस्यौशिजो हुवन्यति ।
युवं दधीचो मन आ विवासथोऽथा शिरः प्रति वामश्व्यं वदत् ॥९॥
युवं पेदवे पुरुवारमश्विना स्पृधां श्वेतं तरुतारं दुवस्यथः ।
शर्यैरभिद्युं पृतनासु दुष्टरं चर्कृत्यमिन्द्रमिव चर्षणीसहम् ॥१०॥

*ā vā rathaṁ purumāyaṁ manojuvaṁ jīrāśvaṁ yiāyaṁ jīvase huve ।*
*sahasraketuṁ vaninaṁ śatadvasuṁ śruṣṭīvānaṁ varivodhāmabhi prayaḥ ॥1॥*
*ūrdhvā dhītiḥ pratyasya prayāmanyadhāyi śasmantsamayanata ā diśaḥ ।*
*svadāmi gharma prati yantyūtaya ā vāmūrjānī rathamaśvināruhat ॥2॥*
*saṁ yanmithaḥ paspṛdhanāso agmata śubhe makhā amitā jāyavo raṇe ।*

*yuvoraha pravaṇe chekite ratho yadaśvinā vahathaḥ sūrimā varam //3 //*
*yuvaṁ bhujayu bhuramāṇaṁ vibhirgataṁ svayuktibhirnivahantā pitṛbhya ā /*
*yāsiṣṭaṁ vartirvṛṣaṇā vijenyaṁ1 divodāsāya mahi cheti vāmavaḥ //4 //*
*yuvoraśvinā vapuṣe yuvāyujaṁ rathaṁ vāṇī yematurasya śardhyam /*
*ā vāṁ patitvaṁ sakhyāya jagmuṣī yoṣāvṛṇīta jenyā yuvāṁ patī //5 //*
*yuvaṁ rebhaṁ pariṣūteruruṣyatho himena gharma paritaptamatraye /*
*yuvaṁ śayoravasaṁ pipyathurgavi pra dīrgheṇa vandanastāryāyuṣā //6 //*
*yuvaṁ vandanaṁ nirṛtaṁ jaraṇyayā rathaṁ na dasrā karaṇā saminvathaḥ /*
*kṣetrādā vipraṁ janatho vipanyayā pra vāmatra vidhate daṁsanā bhuvat //7 //*
*agachchhataṁ kṛpamāṇaṁ parāvati pituḥ svasya tyajasā nibādhitam /*
*svarvatīrita ūtīryuvoraha chitrā abhīke abhavannabhiṣṭayaḥ //8 //*
*uta syā vāṁ madhumanmakṣikārapanmade somasyauśijo huvanyati /*
*yuvaṁ dadhīcho mana ā vivāsatho'thā śiraḥ prati vāmaśvayaṁ vadat //9 //*
*yuvaṁ pedave puruvāramaśvinā spṛdhāṁ śvetaṁ tarutāraṁ duvasyathaḥ /*
*śaryairabhidyuṁ pṛtanāsu duṣṭaraṁ charkṛtyamindramiva charṣaṇīsaham //10 //*

ऋ. (Rv.) १.१२०.१-१२

का राधद्धोत्राश्विना वा को वां जोष उभयोः। कथा विधात्यप्रचेताः ॥१॥
विद्वांसाविदुरः पृच्छेदविद्वानित्थापरो अचेताः। नू चिन्नु मर्ते अक्रौ ॥२॥
ता विद्वांसा हवामहे वां ता नो विद्वांसा मन्म वोचेतमद्य। प्रार्चद्दयमानो युवाकुः ॥३॥
विपृच्छामि पाक्या३ न देवान्वषट्कृतस्याद्भुतस्य दस्रा। पातं च सह्यसो युवं च रभ्यसो नः ।४
प्र या घोषे भृगवाणे न शोभे यया वाचा यजति पज्रियो वाम्। प्रैषयुर्न विद्वान् ॥५॥
श्रुतं गायत्रं तकवानस्याहं चिद्धि रिरेभाश्विना वाम्। आक्षी शुभस्पती दन् ॥६॥
युवं ह्यास्तं महो रन्युवं वा यन्निरततंसतम्। ता नो वसू सुगोपा स्यातं नो वृकादघायोः ॥७॥
मा कस्मै धातमभ्यमित्रिणे नो माकुत्रा नो गृहेभ्यो धेनवो गुः। स्तनाभुजो अशिश्वीः ॥८॥
दुहीयन्मित्रधितये युवाकु राये च नो मिमीतं वाजवत्यै। इषे च नो मिमीतं धेनुमत्यै ॥९॥
अश्विनोरसनं रथमनश्वं वाजिनीवतोः। तेनाहं भूरि चाकन ॥१०॥
अयं समह मा तनूह्याते जनां अनु। सोमपेयं सुखो रथः ॥११॥
अध स्वप्नस्य निर्विदेऽभुंजतश्च रेवतः। उभा ता बस्रि नश्यतः ॥१२॥

*kā rādhaddhotrāśvinā vā ko vāṁ joṣa ubhayoḥ / kathā vidhātyaprachetāḥ //1 //*
*vidvāṁsāvidduraḥ pṛchchhedavidvānitthāparo achetāḥ / nū chinnu marte akrau //2 //*
*tā vidvāṁsā havāmahe vāṁ tā no vidvāṁsā manma vochetamadya / prārchaddayamāno yuvākuḥ //3 //*
*vipṛchchhāmi pākyā3 na devānvaṣaṭkṛtasyādbhutasya dasrā / pātaṁ cha sahyaso yuvaṁ cha rabhyaso naḥ /4*
*pra yā ghoṣe bhṛgavāṇe na śobhe yayā vāchā yajati pajriyo vām / praiṣayurna vidvān //5 //*
*śrutaṁ gāyatraṁ takavānasyāhaṁ chiddhi rirebhāśvinā vām / ākṣī śubhaspatī dan //6 //*
*yuvaṁ hyāstaṁ maho ranyuvaṁ vā yanniratataṁsatam / tā no vasū sugopā syātaṁ no vṛkādaghāyoḥ //7 //*
*mā kasmai dhātamabhyamitriṇe no mākunnā no gṛhebhyo dhenavo guḥ / stanābhujo aśiśvīḥ //8 //*
*duhīyanmitradhitaye yuvāku rāye cha no mimītaṁ vājavatyai / iṣe cha no mimītaṁ dhenumatyai //9 //*
*aśvinorasanaṁ rathamanaśvaṁ vājinīvatoḥ / tenāhaṁ bhūri chākana //10 //*
*ayaṁ samaha mā tanūhyāte janāṁ anu / somapeyaṁ sukho rathaḥ //11 //*
*adha svapnasya nirvide'bhuṁjataścha revataḥ / ubhā tā basri naśyataḥ //12 //*

२. इन्द्रः विश्वेदेवा च (Indraḥ Viśvedevā Cha) - ऋ. (Rv.) १.१२१.१-१५

कदित्था नॄन् पात्रं देवयतां श्रवदगिरो अंगिरसां तुरण्यन् ।
प्र यदानड्विश आ हर्म्यस्योरु क्रंसते अध्वरे यजत्रः ॥१॥
स्तम्भीद्ध द्यां स धरुणं प्रुषायदृभुर्वाजाय द्रविणं नरो गोः ।
अनु स्वजां महिषश्चक्षत व्रां मेनामश्वस्य परि मातरं गोः ॥२॥
नक्षद्धवमरुणीः पूर्व्यं राट् तुरो विशामंगिरसामनु द्यून् ।
तक्षद्वज्रं नियुतं तस्तम्भद् द्याां चतुष्पदे नर्याय द्विपादे ॥३॥
अस्य मदे स्वर्य दा ऋतायापीवृतमुस्रियाणामनीकम् ।
यद्ध प्रसर्गे त्रिककुम्निवर्तदप द्रुहो मानुषस्य दुरो वः ॥४॥
तुभ्यं पयो यत्पितरावनीतां राधः सुरेतस्तुरणे भुरण्यू ।
शुचि यत्ते रेक्ण आयजन्त सबर्दुघायाः पय उस्रियायाः ॥५॥
अध प्र जो तरणिर्ममत्तु प्र रोच्यस्य उषसो न सूरः ।
इन्दुर्येभिराष्ट स्वेदुहव्यैः स्रुवेण सिंचंजरणाभि धाम ॥६॥
स्ध्मिा यद्वनधितिरपस्यात्सूरो अध्वरे परि रोधना गोः ।
यद्ध प्रभासि कृत्व्याँ अनु द्यूननर्विशे पश्विषे तुराय ॥७॥
अष्टा महो दिव आदो हरी इह द्युम्नासाहमभि योधान उत्सम् ।
हरिं यत्ते मन्दिनं दुक्षन्वृधे गोरभसमद्रिभिर्वाताप्यम् ॥८॥
त्वमायसं प्रति वर्तयो गोर्दिवो अश्मानमुपनीतमृभ्वा ।
कुत्साय यत्र पुरुहूत वन्वंछुष्णमनन्तैः परियासि वधैः ॥९॥
पुरा यत्सूरस्तमसो अपीतेस्तमद्रिवः फलिगं हेतिमस्य ।
शुष्णस्य चित्परिहितं यदोजो दिवस्परि सुग्रथितं तदादः ॥१०॥
अनु त्वामही पाजसी अचक्रे द्यावाक्षामा मदतामिन्द्र कर्मन् ।
त्वं वृत्रमाशयानं सिरासु महो वज्रेण सिष्वपो वराहुम् ॥११॥
त्वमिन्द्र नर्यो याँ अवो नॄन्तिष्ठा वातस्य सुयुजो वहिष्ठान् ।
यं ते काव्य उशना मन्दिनं दाद्वृत्रहणं पार्यां ततक्ष वज्रम् ॥१२॥
त्वं सूरो हरितो रामयो नॄभ्भरच्चक्रमेतशो नायमिन्द्र ।
प्रास्य पारं नवतिं नाव्यानामपि कर्तमवर्तयोऽयज्यून् ॥१३॥
त्वं नो अस्या इन्द्र दुर्हणायाः पाहि वज्रिवो दुरितादभीके ।
प्र नो वाजात्रथ्यो३ अश्वबुध्यानिषे यन्धि श्रवसे सूनृतायै ॥१४॥
मा सा ते अस्मत्सुमतिर्वि दसद्वाजप्रमहः समिषो वरन्त ।
आ नो भज मघवन्गोष्वर्यो महिष्ठास्ते सधमादः स्याम ॥१५॥

*kaditthā nṝn pātraṁ devayatāṁ śravadagiro aṁgirasāṁ turaṇyan* ।
*pra yadānaḍviśa ā harmyasyoru kraṁsate adhvare yajatraḥ* ॥1॥
*stambhīddha dyāṁ sa dharuṇaṁ pruṣāyadṛbhurvājāya draviṇaṁ naro goḥ* ।
*anu svajāṁ mahiṣaśchakṣata vrāṁ menāmaśvasya pari mātaraṁ goḥ* ॥2॥
*nakṣaddhavamaruṇīḥ pūrvya rāṭ turo viśāmaṁgirasāmanu dyūn* ।
*takṣadvajraṁ niyutaṁ tastambhad dyāāṁ chatuṣpade naryāya dvipāde* ॥3॥
*asya made svarya dā ṛtāyāpīvṛtamusriyāṇāmanīkam* ।
*yaddha prasarge trikakumnivartadapa druho mānuṣasya duro vaḥ* ॥4॥
*tubhyaṁ payo yatpitarāvanītāṁ rādhaḥ suretasturaṇe bhuraṇyū* ।
*śuchi yatte rekṇa āyajanta sabardughāyāḥ paya usriyāyāḥ* ॥5॥
*adha pra jo taraṇirmamattu pra rochyasya uṣaso na sūraḥ* ।
*induryebhirāṣṭa sveduhavyaiḥ sruveṇa siṁchaṁjaraṇābhi dhāma* ॥6॥
*sdhmiā yadvanadhitirapasyātsūro adhvare pari rodhanā goḥ* ।
*yaddha prabhāsi kṛtvyāṁ anu dyūnanarviśe paśviṣe turāya* ॥7॥
*aṣṭā maho diva ādo harī iha dyumnāsāhamabhi yodhāna utsam* ।
*hariṁ yatte mandinaṁ dukṣanvṛdhe gorabhasamadribhirvātāpyam* ॥8॥

*tvamāyasaṁ prati vartayo gordivo aśmānamupanītamṛbhvā /*
*kutsāya yatra puruhūta vanvaṁchhuṣṇamanantaiḥ pariyāsi vadhaiḥ //9 //*
*purā yatsūrastamaso apītestamadrivaḥ phaligaṁ hetimasya /*
*śuṣṇasya chitparihitaṁ yadojo divaspari sugrathitaṁ tadādaḥ //10 //*
*anu tvāmahī pājasī achakre dyāvākṣāmā madatāmindra karman /*
*tvaṁ vṛtramāśayānaṁ sirāsu maho vajreṇa siṣvapo varāhum //11 //*
*tvamindra naryo yāṁ̐ avo nṝntiṣṭā vātasya suyujo vahiṣṭhān /*
*yaṁ te kāvya uśanā mandinaṁ dādvṛtrahaṇaṁ pāryā tatakṣa vajram //12 //*
*tvaṁ sūro harito rāmayo nṝnbharachchakrametaśo nāyamindra /*
*prāsya pāraṁ navatiṁ nāvyānāmapi kartamavartayo'yajyūn //13 //*
*tvaṁ no asyā indra durhaṇāyāḥ pāhi vajrivo duritādabhīke /*
*pra no vājānrathyo3 aśvabudhyāniṣe yandhi śravase sūnṛtāyai //14 //*
*mā sā te asmatsumatirvi dasadvājapramahaḥ samiṣo varanta /*
*ā no bhaja maghavangoṣvaryo mahiṣṭhāste sadhamādaḥ syāma //15 //*

३. उषा (Uṣā) - ऋ. (Rv.)१.१२३.१-१३; १.१२४.१-१३

ऋ. (Rv.) १.१२३.१-१३

पृथू रथो दक्षिणाया अयोज्यैनं देवासो अमृतासो अस्थुः ।
कृष्णादुदस्थादर्या३ विहायाश्चिकित्सन्ती मानुषाय क्षयाय ॥१॥
पूर्वा विश्वस्माद्भुवनादबोधि जयन्ती वाजं बृहती सनुत्री ।
उच्चा व्यख्यद्युवतिः पुनर्भूरोषा अगन्प्रथमा पूर्वहूतौ ॥२॥
यदद्य भागं विभजासि नृभ्य उषो देवि मर्त्यत्रा सुजाते ।
देवो नो अत्र सविता दमूना अनागसो वोचति सूर्याय ॥३॥
गृहंगृहमहना यात्यच्छा दिवेदिवे अधि नामा दधाना ।
सिषासन्ती द्योतना शश्वदागादग्रमग्रमिद्भजते वसूनाम् ॥४॥
भगस्य स्वसा वरुणस्य जामिरुषः सूनृते प्रथमा जरस्व ।
पश्चा स दध्या यो अघस्य धाता जयेम तं दक्षिणया रथेन ॥५॥
उदीरतां सूनृता उत्पुरन्धीरुदग्नयः शुशुचानासो अस्थुः ।
स्पार्हा वसूनि तमसापगूळ्हाविष्कृण्वन्त्युषसो विभातीः ॥६॥
अपान्येदेत्यभ्य१न्यदेति विषुरूपे अहनी सं चरेते ।
परिक्षितोस्तमो अन्या गुहाकरद्यौदुषाः शोशुचता रथेन ॥७॥
सदृशीरद्य सदृशीरिदु श्वो दीर्घं सचन्ते वरुणस्य धाम ।
अनवद्यास्त्रिंशतं योजनान्येकैका क्रतुं परि यन्ति सद्यः ॥८॥
जानत्यह्नः प्रथमस्य नाम शुक्रा कृष्णादजनिष्ट श्वितीची ।
ऋतस्य योषा न मिनाति धामाहरहर्निष्कृतमाचरन्ती ॥९॥
कन्येव तन्वा३ शाशदानाँ एषि देवि देवमियक्षमाणम् ।
संस्मयमाना युवतिः पुरस्तादाविर्वक्षांसि कृणुषे विभाती ॥१०॥
सुसंकाशा मातृमृष्टेव योषाविस्तन्वं कृणुषे दृशे कम् ।
भद्रा त्वमुषो वितरं व्युच्छ न तत्ते अन्या उषसो नशन्त ॥११॥
अश्ववतीर्गोमतीर्विश्ववारा यतमाना रश्मिभिः सूर्यस्य ।
परा च यन्ति पुनरा च यन्ति भद्रा नाम वहमाना उषासः ॥१२॥
ऋतस्य रश्मिमनुयच्छमाना भद्रंभद्रं क्रतुमस्मासु धेहि ।
उषो नो अद्य सुहवा व्युच्छास्मासु रायो मघवत्सु च स्युः ॥१३॥

*puthū ratho dakṣiṇāyā ayojyainaṁ devāso amṛtāseā asthuḥ /*
*kṛṣṇādudasthādaryā3 vihāyāśchikitsantī mānuṣāya kṣayāya //1 //*
*pūrvā viśvasmādbhruvanādabodhi jayantī vājaṁ bṛhatī sanutrī /*
*uchchā vyakhyadyuvatiḥ punarbhūroṣā aganprathamā pūrvahūtau //2 //*
*yadadya bhāgaṁ vibhajāsi nṛbhya uṣo devi martyatrā sujāte /*

*devo no atra savitā damūnā anāgaso vochati sūryāya ॥3॥*
*gṛhaṁgṛhamahanā yātyachchhā divedive adhi nāmā dadhānā ।*
*siṣāsantī dyotanā śaśvadāgādagramagramidbhajate vasūnām ॥4॥*
*bhagasya svasā varuṇasya jāmiruṣaḥ sūnṛte prathamā jarasva ।*
*paśchā sa dadhyā yo aghasya dhātā jayema taṁ dakṣiṇayā rathena ॥5॥*
*udīratāṁ sūnṛtā utpurandhīrudagnayaḥ śuśuchānāso asthuḥ ।*
*spārhā vasūni tamasāpagūḷhaviṣkṛṇvantyuṣaso vibhatīḥ ॥6॥*
*apānyedatyabhya1nyadeti viṣurūpe ahanī saṁ charete ।*
*parikṣitostamo anyā guhākaradyauduṣāḥ śośuchatā rathena ॥7॥*
*sadṛśīradya sadṛśīridu śvo dīrgha sachante varuṇasya dhāma ।*
*anavadyāsiṁtraśataṁ yojanānyekaikā kratuṁ pari yanti sadyaḥ ॥8॥*
*jānatyahnaḥ prathamasya nāma śukrā kṛṣṇādajaniṣṭa śvitīchī ।*
*ṛtasya yoṣā na mināti dhāmāharaharniṣkṛtamācharantī ॥9॥*
*kanyeva tanvā3 śāśadānām̐ eṣi devi devamiyakṣamāṇam ।*
*saṁsmayamānā yuvatiḥ purastādāvirvakṣāṁsi kṛṇuṣe vibhātī ॥10॥*
*susaṁkāśā mātṛmṛṣṭeva yoṣāvistanvaṁ kṛṇuṣe dṛśe kam ।*
*bhadrā tvamuṣo vitaraṁ vyuchchha na tatte anyā uṣaso naśanta ॥11॥*
*aśvavatīrgomatīrviśvavārā yatamānā raśmibhiḥ sūryasya ।*
*parā cha yanti punarā cha yanti bhadrā nāma vahamānā uṣāsaḥ ॥12॥*
*ṛtasya raśmimanuyachchhamānā bhadraṁbhadraṁ kratumasamāsu dhehi ।*
*uṣo no adya suhavā vyuchchhāsmāsu rāyo maghavatsu cha syuḥ ॥13॥*

ऋ. (Rv.) १.१२४.१-१३

उष उच्छन्ती समिधाने अग्ना उद्यन्त्सूर्य उर्विया ज्योतिरश्रेत् ।
देवो नो अत्र सविता न्वर्थं प्रासावीद् द्विपत्प्र चतुष्पदित्यै ॥१॥
अमिनती दैव्यानि व्रतानि प्रमिनती मनुष्या युगानि ।
ईयुषीणामुपमा शश्वतीनामायतीनां प्रथमोषा व्यद्यौत् ॥२॥
एषा दिवो दुहिता प्रत्यदर्शि ज्योतिर्वसाना समना पुरस्तात् ।
ऋतस्य पन्थामन्वेति साधु प्रजानतीव न दिशो मिनाति ॥३॥
उपो अदर्शि शुन्ध्युवो न वक्षो नोधा इवाविरकृत प्रियाणि ।
अद्मसन्न ससतो बोधयन्ती शश्वत्तमागात्पुनरेयुषीणाम् ॥४॥
पूर्वे अर्धे रजसो अप्त्यस्य गवां जनित्र्यकृत प्र केतुम् ।
व्यु प्रथते वितरं वरीय ओभा पृणन्ती पित्रोरुपस्था ॥५॥
एवेदेषा पुरुतमा दृशे कं नाजामिं न परि वृणक्ति जामिम् ।
अरेपसा तन्वा३ शाशदाना नार्भादीषते न महो विभाती ॥६॥
अभ्रातेव पुंस एति प्रतीची गर्तारुगिव सनये धनानाम् ।
जायेव पत्य उशती सुवासा उषा हस्रेव नि रिणीते अप्सः ॥७॥
स्वसा स्वस्रे ज्यायस्यै योनिमारैगपैत्यस्याः प्रतिचक्ष्येव ।
व्युच्छन्ती रश्मिभिः सूर्यस्यांज्यङ्क्ते समनगा इव व्राः ॥८॥
आसां पूर्वासामहसु स्वसॄणामपरा पूर्वामभ्येति पश्चात् ।
ताः प्रत्नवन्नव्यसीर्नूनमस्मे रेवदुच्छन्तु सुदिना उषासः ॥९॥
प्र बोधयोषः पृणतो मघोन्यबुध्यमनानाः पणयः ससन्तु ।
रेवदुच्छ मघवद्भ्यो मघोनि रेवत्स्तोत्रे सूनृते जारयन्ती ॥१०॥
अवेयमश्वैद्युवतिः पुरस्ताद्युङ्क्ते गवामरुणानामनीकम् ।
वि नूनमुच्छादसति प्र केतुर्गृहंगृहमुप तिष्ठाते अग्निः ॥११॥
उत्ते व्यश्चिद्वसतेरपप्तन्नरश्च ये पितुभाजो व्युष्टौ ।
अमा सते वहसि भूरि वाममुषो देवि दाशुषे मर्त्याय ॥१२॥
अस्तोढ्वं स्तोम्या ब्रह्मणा मेऽवीवृधध्वमुशतीरुषासः ।

युष्माकं देवीरवसा सनेम सहस्रिणं च शतिनं च वाजम ॥१३॥

*uṣa uchchhantī samidhāne agnā udyantsūrya urviyā jyotiraśret |*
*devo no atra savitā nvartha prāsāvīd dvipatpra chatuṣpadityai ||1||*
*aminatī daivyāni vratāni praminatī manuṣyā yugāni |*
*īyuṣīṇāmupamā śaśvatīnāmāyatīnāṁ prathamoṣā vyadyaut ||2||*
*eṣā divo duhitā pratyadarśi jyotirvasānā samanā purastāt |*
*ṛtasya panthāmanveti sādhu prajānatīva na diśo mināti ||3||*
*upo adarśi śundhyuvo na vakṣo nodhā ivāvirakṛta priyāṇi |*
*admasanna sasato bodhayantī śaśvattamāgātpunareyuṣīṇām ||4||*
*pūrve ardhe rajaso aptyasya gavāṁ janitrayakṛta pra ketum |*
*vyu prathate vitaraṁ varīya Obhā pṛṇantī pitrorupasthā ||5||*
*evedeṣā purutamā dṛśe kaṁ nājāmiṁ na pari vṛṇakti jāmim |*
*arepasā tanvā3 śāśadānā nārbhādīṣate na maho vibhātī ||6||*
*abhrāteva puṁsa eti pratīchī gartārugiva sanaye dhanānām |*
*jāyeva patya uśatī suvāsā uṣā hasreva ni riṇīte apsaḥ ||7||*
*svasā svasre jyāyasyai yonimāraigapaityasyāḥ pratichakṣayeva |*
*vyuchchhantī raśmibhiḥ sūryasyāṁjyaṅkte samanagā iva vrāḥ ||8||*
*āsāṁ pūrvāsāmahasu svasṝṇāmaparā pūrvāmabhyeti paśchāt |*
*tāḥ pratnavannavyasīrnūnamasme revaduchchhantu sudinā uṣāsaḥ ||9||*
*pra bodhayoṣaḥ pṛṇato maghonyabudhyamanānāḥ paṇayaḥ sasantu |*
*revaduchchha maghavadbhyo maghoni revatstotre sūnṛte jārayantī ||10||*
*aveyamaśvaidyuvatiḥ purastādyuṅkte gavāmaruṇānāmanīkam |*
*vi nūnamuchchhādasati pra keturgṛhaṁgṛhamupa tiṣṭhāte agniḥ ||11||*
*utte vyaśchidvasaterapaptannaraścha ye pitubhājo vyuṣṭau |*
*amā sate vahasi bhūri vāmamuṣo devi dāśuṣe martyāya ||12||*
*astoḍhvaṁ stomyā brahmaṇā me'vīvṛdhadhvamuśatīruṣāsaḥ |*
*yuṣmākaṁ devīravasā sanema sahasriṇaṁ cha śatinaṁ cha vājama ||13||*

४. दम्पती (Dampatī) - ऋ. (Rv.) १.१२५.१-७

प्राता रत्नं प्रातरित्वा दधाति तं चिकित्वान्प्रतिगृह्या नि धत्ते ।
ते प्रजां वर्धयमान आयू रायस्पोषेण सचते सुवीरः ॥१॥
सुगुरसत्सुहिरण्यः स्वश्वो बृहदस्मै वय इन्द्रो दधाति ।
यस्त्ववायन्तं वसुना प्रातरित्वो मुक्षीजयेव पदिमुत्सिनाति ॥२॥
आयमद्य सुकृतं प्रातरिच्छन्निष्टेः पुत्रं वसुमता रथेन ।
अंशोः सुतं पायय मत्सरस्य क्षयद्वीरं वर्धय सूनृताभिः ॥३॥
उप क्षरन्ति सिन्धवो मयोभुव ईजानं च यक्ष्यमाणं च धेनवः ।
पृणान्तं च पपुरिं च श्रवस्यवो घृतस्य धारा उप यन्ति विश्वतः ॥४॥
नाकस्य पृष्ठे अधि तिष्ठति श्रितो यः पृणाति स ह देवेषु गच्छति ।
तस्मा आपो घृतमर्षन्ति सिन्धवस्तस्मा इयं दक्षिणा पिन्वते सदा ॥५॥
दक्षिणावतामिदिमानि चित्रा दक्षिणावतां दिवि सूर्यासः ।
दक्षिणावन्तो अमृतं भजन्ते दक्षिणावन्तः प्र तिरन्त आयुः ॥६॥
मा पृणन्तो दुरितमेन आरन्मा जारिषुः सूरयः सुव्रातसः ।
अन्यस्तेषां परिधिरस्तु कश्चिदपृणन्तमभि सं यन्तु शोकाः ॥७॥

*prātā ratnaṁ prātaritvā dadhāti taṁ chikitvānpratigṛhyā ni dhatte |*
*te prajāṁ vardhayamāna āyū rāyaspoṣeṇa sachate suvīraḥ ||1||*
*sugurasatsuhiraṇyaḥ svaśvo bṛhadasmai vaya indro dadhāti |*
*yastvavāyantaṁ vasunā prātaritvo mukṣījayeva padimutsināti ||2||*
*āyamadya sukṛtaṁ prātarichchhanniṣṭeḥ putraṁ vasumatā rathena |*
*aṁśoḥ sutaṁ pāyaya matsarasya kṣayadvīraṁ vardhaya sūnṛtābhiḥ ||3||*

*upa kṣaranti sindhavo mayobhuva ījānaṁ cha yakṣayamāṇaṁ cha dhenavaḥ* ।
*pṛṇāntaṁ cha papuriṁ cha śravasyaveā ghṛtasya dhārā upa yanti viśvataḥ* ॥4॥
*nākasya pṛṣṭhe adhi tiṣṭhati śrito yaḥ pṛṇāti sa ha deveṣu gachchhati* ।
*tasmā āpo ghṛtamarṣanti sindhavastasmā iyaṁ dakṣiṇā pinvate sadā* ॥5॥
*dakṣiṇāvatāmidimāni chitrā dakṣiṇāvatāṁ divi sūryāsaḥ* ।
*dakṣiṇāvanto amṛtaṁ bhajante dakṣiṇāvantaḥ pra tiranta āyuḥ* ॥6॥
*mā pṛṇanto duritamena āranmā jāriṣuḥ sūrayaḥ suvrātasaḥ* ।
*anyasteṣāṁ paridhirastu kaśchidapṛṇantamabhi saṁ yantu śokāḥ* ॥7॥

## १५१. कण्वः (Kaṇvaḥ)

१. अग्निः (Agniḥ) - य. (Yv.)११.४२

ऊर्ध्वऽऊ षु णऽऊतये तिष्ठा देवो न सविता ।
ऊध्वो वाजस्य सनिता यदिंजभिर्वाघद्भिर्विह्वयामहे ॥४२॥
*ūrdhva'ū ṣu ṇa'ūtaye tiṣṭhā devo na savitā* ।
*ūdhvo vājasya sanitā yadiṁjabhirvāghadbhirvihnayāmahe* ॥42॥

२. ईश्वरः (Īśvaraḥ) - य. (Yv.)३७.७

प्रैतु ब्रह्मणस्पतिः प्र देवयेतु सूनृता। अच्छा वीरं नयंर् पङ्क्तिराधसं देवा यां नयन्तु नः। मखायत्वा मखस्य त्वा शीर्ष्णे। मखाय त्वा मखस्य त्वा शीर्ष्णे। मखाय तवा मखस्य त्वा शीर्ष्णो।७।
*praitu brahmaṇaspatiḥ pra devayetu sūnṛtā । achchhā vīraṁ nayaṁr paṅktirādhasaṁ devā yāṁ nayantu naḥ । makhāyatvā makhasya tvā śīrṣṇe । makhāya tvā makhasya tvā śīrṣṇe । makhāya tavā makhasya tvā śīrṣṇo ।7।*

३. पवमानः सोमः (Pavamānaḥ Somaḥ)- ऋ. (Rv.) ९.९४.१-४

अधि यदस्मिन्वाजिनीव शुभः स्पर्धन्ते धियः सूर्ये न विशः ।
अपो वृणानः पवते कवीयन्व्रजं न पशुवर्धनाय मन्म ॥१॥
द्विता व्यूर्ण्वन्नमृतस्य धाम स्वर्विदे भुवनानि प्रथन्त ।
धियः पिन्वानाः स्वसरे न गाव ऋतायन्तीरभि वावश्र इन्दुम् ॥२॥
परि यत्कविः काव्या भरते शूरो न रथो भुवनानि विश्वा ।
देवेषु यशो मर्ताय भूषन्दक्षाय रायः पुरुभूषु नव्यः ॥३॥
श्रिये जातः श्रिय आ निरियाय श्रियं वयो जरितृभ्यो दधाति ।
श्रियं वसाना अमृतत्वमायन्भवन्ति सत्या समिथा मितद्रौ ॥४॥
*adhi yadasminvājinīva śubhaḥ spardhante dhiyaḥ sūrye na viśaḥ* ।
*apo vṛṇānaḥ pavate kavīyanvrajaṁ na paśuvardhanāya manma* ॥1॥
*dvitā vyūrṇvannamṛtasya dhāma svarvide bhuvanāni prathanta* ।
*dhiyaḥ pinvānāḥ svasare na gāva ṛtāyantīrabhi vāvaśra indum* ॥2॥
*pari yatkaviḥ kāvyā bharate śūro na ratho bhuvanāni viśvā* ।
*deveṣu yaśo martāya bhūṣandakṣāya rāyaḥ purubhūṣu navyaḥ* ॥3॥
*śriye jātaḥ śriya ā niriyāya śriyaṁ vayo jaritṛbhyo dadhāti* ।
*śriyaṁ vasānā amṛtatvamāyanbhavanti satyā samithā mitadrau* ॥4॥

४. प्राणाः (Prāṇāḥ) - य. (Yv.)३४.५५

सप्तऽऋषयः प्रतिहिताः शरीरे सप्त रक्षन्ति मदमप्रमादम् ।
सप्तापः स्वपतो लोकमीयुस्तत्र जागृतोऽअस्वप्न जौ सत्रसदौ च देवौ ॥५५॥
*sapta'ṛṣayaḥ pratihitāḥ śarīre sapta rakṣanti madamapramādam* ।
*saptāpaḥ svapato lokamīyustatra jāgṛto'asvapna jau satrasadau cha devau* ॥55॥

५. ब्रह्मणस्पतिः (Brahmaṇaspatiḥ) - य. (Yv.)३४.५६-५७

उत्तिष्ठ ब्रह्मणस्पते देवयन्तस्त्वेमहे।
उप प्र यन्तु मरुतः सुदानवऽ इन्द्र प्राशूर्भवा सचा॥५६॥
प्र नूनं ब्रह्मणस्पतिर्मन्त्रं वदत्युक्थ्यम्।

याम्मन्निन्द्रो वरुणो मित्रोऽअर्य्यमा देवाऽ ओकां सि चक्रिरे ॥५७ ॥
*uttiṣṭha brahmaṇaspate devayantastvemahe ।*
*upa pra yantu marutaḥ sudānava' indra prāśūrbhavā sachā ॥56 ॥*
*pra nūnaṁ brahmaṇaspatirmantraṁ vadatyukthyam ।*
*yāmmannindro varuṇo mitro'aryyamā devā' Okāṁ si chakrire ॥57 ॥*

६. विश्वेदेवाः (Viśvedevāḥ) - य. (Yv.)३३.८९
प्रैतु बृह्मणस्पतिः प्र देव्येतु सूनृता। अच्छा वीरं नर्य पङ्क्तिराधसं देवा यां नयन्तु न ॥८९॥
*praitu bṛhmaṇaspatiḥ pra devyetu sūnṛtā । achchhā vīraṁ narya paṅktirādhasaṁ devā yāṁ nayantu na ॥89 ॥*

७. सविता (Savitā) - य. (Yv.)१७.७४
तांसवितुर्वरेणयस्य चित्रामाहं वृणे सुमतिं विश्वजन्याम् ।
यामस्य कणवो अदुहत्प्रपीनांसहस्रधारां पयसा महीं गाम् ॥७४॥
*tāṁsaviturvareṇayasya chitrāmāhaṁ vṛṇe sumatiṁ viśvajanyām ।*
*yāmasya kaṇavo aduhatprapīnāṁsahasradhārāṁ payasā mahīṁ gām ॥74 ॥*

## १५२. कण्वो घौरः (Kaṇvo Ghauraḥ)

१. अग्निः (Agniḥ) - ऋ. (Rv.) १.३६.१-२०; सा. (Sv.) ५४; ५६; ५७; ५९

ऋ. (Rv.) १.३६.१-२०

प्र वो यह्वं पुरूणां विशां देवयतीनाम् ।
अग्निं सूक्तेभिर्वचोभिरीमहे यं सीमिदन्यं ईळते ॥१॥
जनासो अग्निं दधिरे सहोवृधं हविष्मन्तो विधेम ते ।
स त्वं नो अद्य सुमना इहाविता भवा वाजेषु सन्त्य ॥२॥
प्र त्वा दूतं वृणीमहे होतारं विश्ववेदसम् ।
महस्ते सतो वि चरन्त्यर्चयो दिवि स्पृशन्ति भानवः ॥३॥
देवासस्त्वा वरुणो मित्रो अर्यमा सं दूतं प्रत्नमिन्धते ।
विश्वं सो अग्ने जयति त्वया धनं यस्ते ददाश मर्त्यः ॥४॥
मन्द्रो होता गृहपतिरग्ने दूतो विशामसि ।
त्वे विश्वा संगतानि व्रता ध्रुवा यानि देवा अकृण्वत् ॥५॥
त्वे इदग्ने सुभगे यविष्ठ्य विश्वमा हूयते हविः ।
स त्वं नो अद्य सुमना उतापरं यक्षि देवान्त्सुवीर्या ॥६॥
तं घेमित्था नमस्विन उप स्वराजमासते ।
होत्राभिरग्निं मनुषः समिधते तितिर्वांसो अति स्रिधः ॥७॥
घ्नन्तो वृत्रमतरन्रोदसी अप उरु क्षयाय चक्रिरे ।
भुवत्कण्वे वृषा द्युम्न्याहुतः क्रन्ददश्वो गविष्टिषु ॥८॥
सं सीदस्व महाँ असि शोचस्व देववीतमः ।
वि धूममग्ने अरुषं मियेध्य सृज प्रशस्त दर्शतम् ॥९॥
यं त्वा देवासो मनवे दधुरिह यजिष्ठं हव्यवाहन ।
यं कण्वो मेध्यातिथिर्धनस्पृतं यं वृषा यमुपस्तुतः ॥१०। ।
यमग्निं मेध्यातिथिः कण्व ईध ऋतादधि ।
तस्य प्रेषो दीदियुस्तमिमा ऋचस्तमग्निं वर्धयामसि ॥११॥
रायस्पूर्धि स्वधावोऽस्ति हि तेऽग्ने देवेष्वाप्यम् ।
त्वं वाजस्य श्रुत्यस्य राजसि स नो मृळ महाँ असि ॥१२॥
ऊर्ध्व ऊ षु ण ऊतये तिष्ठा देवो न सविता ।
ऊर्ध्वो वाजस्य समिता यदञ्जिभिर्वाघद्भिर्विह्वयामहे ॥१३॥
ऊर्ध्वो नः पाह्यंहसो नि केतुना विश्वं समत्रिणं दह ।
कृधी न ऊर्ध्वांचरथय जीवसे विदा देवेषु नो दुवः ॥१४॥
पाहि नो अग्ने रक्षसः पाहि धूर्तेरराव्णः ।

पाहि रीषत उत वा जिघांसतो बृहद्भानो यविष्ठ्य ॥१५॥
घनेव विष्वग्वि जह्यराव्णस्तपुर्जम्भ यो अस्मध्रुक् ।
ये मर्त्यः शिशीते अत्यक्तुभिर्मा नः स रिपुरीशत ॥१६॥
अग्निर्वव्ने सुवीर्यमग्निः कण्वाय सौभगम् ।
अग्निः प्रावन्मित्रोत मेध्यातिथिमग्निः साता उपस्तुतम् ॥१७॥
अग्निना तुर्वशं यदुं परावत उग्रादेवं हवामहे ।
अग्निर्नयन्नववास्त्वं बृहद्रथं तुर्वीतिं दस्यवे सहः ॥१८॥
नि त्वामग्ने मनुर्दधे ज्योतिर्जनाय शश्वते ।
दीदेथ कण्व ऋतजात उक्षितो यं नमस्यान्ति कृष्टयः ॥१९॥
त्वेषासो अग्नेरमवन्तो अर्चयो भीमासो न प्रतीतये ।
रक्षस्विनः सदमिद्यातुमावतो विश्वं समत्रिणं दह ॥२०॥

*pra vo yahnaṁ purūṇāṁ viśāṁ devayatīnām /*
*agniṁ sūktebhirvachobhirīmahe yaṁ sīmidanyaṁ īḻate //1 //*
*janāso agniṁ dadhire sahovṛdhaṁ haviṣmanto vidhema te /*
*sa tvaṁ no adya sumanā ihāvitā bhavā vājeṣu santya //2 //*
*pra tvā dūtaṁ vṛṇīmahe hotāraṁ viśvavedasam /*
*mahaste sato vi charantyarchayo divi spṛśanti bhānavaḥ //3 //*
*devāsastvā varuṇo mitro aryamā saṁ dūtaṁ pratnamindhate /*
*viśvaṁ so agne jayati tvayā dhanaṁ yaste dadāśa martyaḥ //4 //*
*mandro hotā gṛhapatiragne dūto viśāmasi /*
*tve viśvā saṁgatāni vratā dhruvā yāni devā akṛṇvat //5 //*
*tve idagne subhage yaviṣṭhya viśvamā hūyate haviḥ /*
*sa tvaṁ no adya sumanā utāparaṁ yakṣi devāntsuvīryā //6 //*
*taṁ ghemitthā namasvina upa svarājamāsate /*
*hotrābhiragniṁ manuṣaḥ samidhate titirvāso ati sridhaḥ //7 //*
*ghnanto vṛtramatarannodasī apa uru kṣayāya chakrire /*
*bhuvatkaṇve vṛṣā dyumnyāhutaḥ krandadaśvo gaviṣṭiṣu //8 //*
*saṁ sīdasva mahāṁ̐ asi śochasva devavītamaḥ /*
*vi dhūmamagne aruṣaṁ miyedhya sṛja praśasta darśatam //9 //*
*yaṁ tvā devāso manave dadhuriha yajiṣṭhaṁ havyavāhana /*
*yaṁ kaṇvo medhyātithirdhanaspṛtaṁ yaṁ vṛṣā yamupastutaḥ //10 / /*
*yamagniṁ medhyātithiḥ kaṇva īdha ṛtādadhi /*
*tasya preṣo dīdiyustamimā ṛchastamagniṁ vardhayāmasi //11 //*
*rāyaspūrdhi svadhāvo'sti hi te'gne deveṣvāpyam /*
*tvaṁ vājasya śrutyasya rājasi sa no mṛḻa mahāṁ̐ asi //12 //*
*ūrdhva ū ṣu ṇa ūtaye tiṣṭhā devo na savitā /*
*ūrdhvo vājasya samitā yadatrajibhivadhidbhirvihnayāmahe //13 //*
*ūrdhvo naḥ pāhyaṁhaso ni ketunā viśvaṁ samatriṇaṁ daha /*
*kṛdhī na ūrdhvāṁcharathaya jīvase vidā deveṣu no duvaḥ //14 //*
*pāhi no agne rakṣasaḥ pāhi dhūrterarāvṇaḥ /*
*pāhi rīṣata uta vā jighāṁsato bṛhadbhāno yaviṣṭhya //15 //*
*ghaneva viṣvagvi jahyarāvṇastapurjambha yo asmadhruk /*
*ye martyaḥ śiśīte atyaktubhirmā naḥ sa ripurīśata //16 //*
*agnirvavne suvīryamagniḥ kaṇvāya saubhagam /*
*agniḥ prāvanmitrota medhyātithimagniḥ sātā upastutam //17 //*
*agninā turvaśaṁ yaduṁ parāvata ugrādevaṁ havāmahe /*
*agnirnayannavavāstvaṁ bṛhadrathaṁ turvītiṁ dasyave sahaḥ //18 //*
*ni tvāmagne manurdadhe jyotirjanāya śaśvate /*
*dīdetha kaṇva ṛtajāta ukṣito yaṁ namasyānti kṛṣṭayaḥ //19 //*

*tveṣāso agneramavanto archayo bhīmāso na pratītaye* ।
*rakṣasvinaḥ sadamidyāātumāvato viśvaṁ samatriṇaṁ daha* ॥20॥

सा. (Sv.) ५४

नित्वामग्ने मनुर्दधे ज्योतिर्जनाय शश्वते ।
दीदेथ कण्व ऋतजात उक्षितो यं नमस्यन्ति कृष्टयः ॥१०॥
*nitvāmagne manurdadhe jyotirjanāya śaśvate* ।
*dīdetha kaṇva ṛtajāta ukṣito yaṁ namasyanti kṛṣṭayaḥ* ॥10॥

सा. (Sv.) ५६-५७

प्रैतु ब्रह्मणस्पतिः प्र देव्येतु सूनृता ।
अच्छा वीरं नर्यं पङ्क्तिराधसं देवा यां नयन्तु नः ॥२॥
ऊर्ध्व ऊ षु ण ऊतये तिष्ठा देवो न सविता ।
ऊर्ध्वो वाजस्य सनिता यदिंजभिर्वाघद्भिर्विह्वयामहे ॥३॥
*praitu brahmaṇaspatiḥ pra devyetu sūnṛtā* ।
*achchhā vīraṁ narya paṅktirādhasaṁ devā yāṁ nayantu naḥ* ॥2॥
*ūrdhva ū ṣu ṇa ūtaye tiṣṭhā devo na savitā* ।
*ūrdhvo vājasya sanitā yadiṁjabhirvāghadbhirvihnayāmahe* ॥3॥

सा. (Sv.) ५९

प्र वो यह्व पुरूणां विशां देवयतीनाम्। अग्निं सूक्तेभिर्वचोभिर्वृणीमहे यं समिदन्य इन्धते ॥५॥
*pra vo yahna purūṇāṁ viśāṁ devayatīnām । agni sūktebhirvachobhirvṛṇīmahe yaṁ samidanya indhate* ॥5॥

२. आदित्याः (Ādityāḥ) - ऋ. (Rv.) १.४१.४-६

सुगः पन्था अनृक्षर आदित्यास ऋतं यते। नात्रावखादो अस्ति वः ॥४॥
यं यां नयथा नर आदित्या ऋजुना पथा। प्र वः स धीतये नशत् ॥५॥
स रत्नं मर्त्यो वसु विश्वं तोकमुत त्मना। अच्छा गच्छत्यस्तृतः ॥६॥
*sugaḥ panthā anṛkṣara ādityāsa ṛtaṁ yate । nātrāvakhādo asti vaḥ* ॥4॥
*yaṁ yāṁ nayathā nara ādityā ṛjunā pathā । pra vaḥ sa dhītaye naśat* ॥5॥
*sa ratnaṁ martyo vasu viśvaṁ tokamuta tmanā । achchhā gachchhatyastṛtaḥ* ॥6॥

३. इन्द्रः (साग्री. सास्वा.) वरुणमित्रार्यमणः (ऋसर्व.) मित्रावरुणां मुख्या आदित्या देवताः (सार्षेदी.) (Indraḥ [Ssb. Sas.] Varuṇamitrāryamaṇaḥ [Rss.] Mitrāvaruṇāṁ Mukhyā Ādityā Devatāḥ [Sad.]- सा. (Sv.) १८५

यं रक्षन्ति प्रचेतसो वरुणो मित्रो अर्यमा। न किः स दभ्यते जनः ॥१॥
*yaṁ rakṣanti prachetaso varuṇo mitro aryamā । na kiḥ sa dabhyate janaḥ* ॥1॥

४. पवमानः सोमः (Pavamānaḥ Somaḥ)- सा. (Sv.) ५३९

अधि यदस्मिन्वाजिनीव शुभः स्पर्धन्ते धियः सूरे न विशः ।
अपो वृणानः पवते कवीयान्व्रजं न पशुवर्धनाय मन्म ॥७॥
*adhi yadasminvājinīva śubhaḥ spardhante dhiyaḥ sūre na viśaḥ* ।
*apo vṛṇānaḥ pavate kavīyānvrajaṁ na paśuvardhanāya manma* ॥7॥

५. पूषा (Pūṣā) - ऋ. (Rv.) १.४२.१-१०

सं पूषन्नध्वनस्तिर व्यंहो विमुचो नपात्। सक्ष्वा देव प्र णस्पुरः ॥१॥
यो नः पूषन्नघो वृको दुःशेव आदिदेशति। अप स्म तं पथो जहि ।२॥
अप त्यं परिपन्थिनं मुषीवाणं हुरश्चितम्। दूरमधि स्रुतेरज ॥३॥
त्वं तस्य द्वयाविनोऽघशंसस्य कस्य चित्। पदाभि तिष्ठ तपुषिम्॥४॥
आ तत्ते दस्र मन्तुमः पूषन्नवो वृणीमहे। येन पितॄनचोदयः ॥५॥
अधा नो विश्वसौभग हिरण्यवाशीमत्तम। धनानि सुषणा कृधि ॥६॥
अति नः सश्चतो नय सुगा नः सुपथा कृणु। पूषन्निह ऋतुं विदः ॥७॥
अभि सूयवसं नय न नवज्वारो अध्वने। पूषन्निह क्रतुं विदः ॥८॥

शग्धि पूर्धि प्र यंसि च शिशीहि प्रास्युदरम्। पूषन्निह क्रतुं विदः ॥९॥
न पूषणं मेथामसि सूक्तैरभि गृणीमसि। वसूनि दस्ममीमहे ॥१०॥

*saṁ pūṣannadhvanastira vyaṁho vimucho napāt | sakṣavā deva pra ṇaspuraḥ ||1 ||*
*yo naḥ pūṣannagho vṛko duḥśeva ādideśati | apa sma taṁ patho jahi |2 ||*
*apa tyaṁ paripanthinaṁ muṣīvāṇaṁ huraśchitam | dūramadhi sruteraja ||3 ||*
*tvaṁ tasya dvayāvino'ghaśaṁsasya kasya chit | padābhi tiṣṭha tapuṣim ||4 ||*
*ā tatte dasra mantumaḥ pūṣannavo vṛṇīmahe | yena pitṝnachodayaḥ ||5 ||*
*adhā no viśvasaubhaga hiraṇyavāśīmattama | dhanāni suṣaṇā kṛdhi ||6 ||*
*ati naḥ saśchato naya sugā naḥ supathā kṛṇu | pūṣanniha ṛtuṁ vidaḥ ||7 ||*
*abhi sūyavasaṁ naya na navajvāro adhvane | pūṣanniha kratuṁ vidaḥ ||8 ||*
*śagdhi pūrdhi pra yaṁsi cha śiśīhi prāsyudaram | pūṣanniha kratuṁ vidaḥ ||9 ||*
*na pūṣaṇaṁ methāmasi sūktairabhi gṛṇīmasi | vasūni dasmamīmahe ||10 ||*

६. बृहस्पतिः (Bṛhaspatiḥ) - ऋ. (Rv.) १.४०.१-८

उत्तिष्ठ ब्रह्मणस्पते देवयन्तस्त्वेमहे ।
उप प्र यन्तु मरुतः सुदानव इन्द्र प्राशूर्भवा सचा ॥१॥
त्वामिद्धि सहसस्पुत्र मर्त्य उपब्रूते धने हिते ।
सुवीर्यं मरुत आ स्वश्व्यं दधीत यो व आचके ॥२॥
प्रैतु ब्रह्मणस्पतिः प्र देव्येतु सूनृता ।
अच्छा वीरं नर्यं पङ्क्तिराधसं देवा यज्ञं नयन्तु नः ॥३॥
यो वाघते ददाति सूनरं वसु स धत्ते अक्षिति श्रवः ।
तस्मा इळां सुवीरामा यजामहे सुप्रतूर्तिमनेहसम् ॥४॥
प्र नूनं ब्रह्मणस्पतिर्मन्त्रं वदत्युक्थ्यम् ।
यस्मिन्निन्द्रो वरुणो मित्रो अर्यमा देवा ओकांसि चक्रिरे ॥५॥
तमिद्वोचेमा विदथेषु शंभुवं मन्त्रं देवा अनेहसम् ।
इमां च वाचं प्रतिहर्यथा नरो विश्वेद्वामा वो अश्नवत् ॥६॥
को देवयन्तमश्नवज्जनं को वृक्तबर्हिषम् ।
प्रप्र दाश्वान्पस्त्याभिरस्थितान्तर्वावत्क्षयं दधे ॥७॥
उप क्षत्रं पृंचीत हन्ति राजभिर्भये चित्सुक्षितिं दधे ।
नास्य वर्ता न तरुता महाधने नार्भे अस्ति वज्रिणः ॥८॥

*uttiṣṭha brahmaṇaspate devayantastvemahe |*
*upa pra yantu marutaḥ sudānava indra prāśūrbhavā sachā ||1 ||*
*tvāmiddhi sahasasputra martya upabrūte dhane hite |*
*suvīrya maruta ā svaśvyaṁ dadhīta yo va āchake ||2 ||*
*praitu brahmaṇaspatiḥ pra devyetu sūnṛtā |*
*achchhā vīraṁ narya paṅktirādhasaṁ devā yāṁ nayantu naḥ ||3 ||*
*yo vāghate dadāti sūnaraṁ vasu sa dhatte akṣiti śravaḥ |*
*tasmā iḷāṁ suvīrāmā yajāmahe supratūrtimanehasam ||4 ||*
*pra nūnaṁ brahmaṇaspatirmantraṁ vadatyukthyam |*
*yasminnindro varuṇe mitro aryamā devā Okāṁsi chakrire ||5 ||*
*tamidvochemā vidatheṣu śaṁbhuvaṁ mantraṁ devā anehasam |*
*imāṁ cha vāchaṁ pratiharyathā naro viśvedvāmā vo aśnavat ||6 ||*
*ko devayantamaśnavajjanaṁ ko vṛkta barhiṣam |*
*prapra dāśvānpastyābhirasthitāntarvāvatkṣayaṁ dadhe ||7 ||*
*upa kṣatraṁ pṛṁchīta hanti rājabhirbhaye chitsukṣitiṁ dadhe |*
*nāsya vartā na tarutā mahādhane nārbhe asti vajriṇaḥ ||8 ||*

७. मरुतः (Marutaḥ) - ऋ. (Rv.) १.३७.१-१५; १.३८.१-१५; १.३९.१-१०

ऋ. (Rv.) १.३७.१-१५

क्रीळं वः शर्धो मारुतमनर्वाणं रथेशुभम्। कण्वा अभि प्रगायत ॥१॥
य पृषतीभिऋर्ष्टिभिः साकं वाशीभिरिंजभिः अजायन्त स्वर्भानवः ॥२॥
इहेव शृण्व एषां कशा हस्तेषु यद्वदान्। नि यामिंचत्रमृंजते ॥३॥
प्र वः शर्धाय घृष्वये त्वेषद्युम्नाय शुष्मिणे। देवत्तं ब्रह्म गायत ॥४॥
प्र शंसा गोष्वध्न्यं क्रीळं यच्छर्धो मारुतम्। जम्भे रसस्य वावृधे ॥५॥
को वो वर्षिष्ठ आ नरो दिवश्च ग्मश्च धूतयः। यत्सीमन्तं न धूनुथ ॥६॥
नि वो यामाय मानुषो दध्र उग्राय मन्यवे। जिहीत पर्वतो गिरिः ॥७॥
येषमज्मेषु पृथिवी जुजुर्वाँ इव विश्पतिः। भिया यामेषु रेजते ॥८॥
स्थिरं हि जानमेषां वयो मातुर्निरेतवे। यत्सीमनु द्विता शवः ॥९॥
उदु त्ये सूनवो गिरः काष्ठा अज्मेष्वत्नत। वाश्रा अभिज्ञु यातवे ॥१०॥
त्यं चिद्घा दीर्घं पृथुं मिहो नपातममृध्रम्। प्र च्यावयन्ति यामभिः ॥११॥
मरुतो यद्ध वो बलं जनाँ अचुच्यवीतन। गिरींरचुच्यवीतन ॥१२॥
यद्ध यान्ति मरुतः सं ह ब्रुवतेऽध्वन्ना। शुणोति कश्चिदेषाम् ॥१३॥
प्र यात् शीभमाशुभिः सन्ति कण्वेषु वो दुवः। तत्रो षु मादयाध्वै ॥१४॥
अस्ति हि ष्मा मदाय वः स्मसि ष्मा वयमेषाम्। विश्वं चिदायुर्जीवसे ॥१५॥

*krīṁḷa vaḥ śardho mārutamanarvāṇaṁ ratheśubham । kaṇvā abhi pragāyata ॥1॥*
*ya pṛṣatībhirṛṣṭibhiḥ sākaṁ vāśībhiriṁjabhiḥ ajāyanta svarbhānavaḥ ॥2॥*
*iheva śṛṇva eṣāṁ kaśā hasteṣu yadvadān । ni yāmiṁchatramṛṁjate ॥3॥*
*pra vaḥ śardhāya ghṛṣvaye tveṣadyumnāya śuṣmiṇe । devattaṁ brahma gāyata ॥4॥*
*pra śaṁsā goṣvadhnyaṁ krīḷaṁ yachchhardho mārutam । jambhe rasasya vāvṛdhe ॥5॥*
*ko vo varṣiṣṭha ā naro divaścha gmaścha dhūtayaḥ । yatsīmantaṁ na dhṛnutha ॥6॥*
*ni vo yāmāya mānuṣo dadhra ugrāya manyave । jihīta parvato giriḥ ॥7॥*
*yeṣamajmeṣu pṛthivī jujurtvām̐ iva viśpatiḥ । bhiyā yāmeṣu rejate ॥8॥*
*sthiraṁ hi jānameṣāṁ vayo māturniretave । yatsīmanu dvitā śavaḥ ॥9॥*
*udu tye sūnavo giraḥ kāṣṭhā ajmeṣvatnata । vāśrā abhiāu yātave ॥10॥*
*tyaṁ chidghā dīrgha pṛthuṁ miho napātamamṛdhram । pra chyāvayanti yāmabhiḥ ॥11॥*
*maruto yaddha vo balaṁ janām̐ achuchyavītana । girīṁrachuchyavītana ॥12॥*
*yaddha yānti marutaḥ saṁ ha bruvate'dhvannā । śuṇoti kaśchideṣām ॥13॥*
*pra yāt śībhamāśubhiḥ santi kaṇveṣu vo duvaḥ । tatro ṣu mādayādhvai ॥14॥*
*asti hi ṣmā madāya vaḥ smasi ṣmā vayameṣām । viśvaṁ chidāyurjīvase ॥15॥*

ऋ. (Rv.) १.३८.१-१५

कद्ध नूनं कधप्रियः पिता पुत्रं न हस्तयोः। दधिध्वे वृक्त बर्हिषः ॥१॥
क्व नूनं कद्वो अर्थ गन्ता दिवो न पृथिव्याः। क्व वो गावो न रण्यन्ति ॥२॥
क्व वः सुम्ना नव्यांसि मरुतः क्व सुविता। क्वो३ विश्वानि सौभगा ॥३॥
यद्यूयं पृश्निमातरो मर्तासः स्यातन। स्तोता वो अमृतः स्यात् ॥४॥
मा वो मृगो न यवसे जरिता भूदजोष्यः। पथा यमस्य गादुप ॥५॥
मो षुणः परापरा निर्ऋतिर्दुर्हणा वधीत्। पदीष्ट तृष्णया सह ॥६॥
सत्यं त्वेषा अमवन्तो धन्विंचदा रुद्रियासः। मिहं कृण्वन्त्यवाताम् ॥७॥
वाश्रेव विद्युन्मिमाति वत्सं न माता सिषक्ति। यदेषां वृष्टिरसर्जि ॥८॥
दिवा चित्तमः कृण्वन्ति पर्जन्येनोदवाहेन। यत्पृथिवीं व्युन्दन्ति ॥९॥
अध स्वनान्मरुतां विश्वमा सद्म पार्थिवम्। अरेजन्त प्र मानुषाः ॥१०॥
मरुतो वीळुपाणिभिश्चित्रा रोधस्वतीरनु। यातेमखिद्रयामभिः ॥११॥
स्थिरा वः सन्तु नेमयो रथा अश्वास एषाम्। सुसंस्कृता अभीशवः ॥१२॥

अच्छा वदा तना गिरा जरायै ब्रह्मणस्पतिम्। अग्निं मित्रं न दर्शतम् ॥१३॥
मिमीहि श्लोकमास्ये पर्जन्य इव ततनः। गाय गायत्रमुक्थ्यम् ।१४॥
वन्दस्व मारुतं गणं त्वेषं पनस्युमर्किणम्। अस्मे वृद्धा असन्निह ॥१५॥
*kaddha nūnaṁ kadhapriyaḥ pitā putraṁ na hastayoḥ | dadhidhve vṛkta barhiṣaḥ ||1||*
*kva nūnaṁ kadvo artha gantā divo na pṛthivyāḥ | kva vo gāvo na raṇyanti ||2||*
*kva vaḥ sumnā navyāṁsi marutaḥ kva suvitā | kvo3 viśvāni saubhagā ||3||*
*yadyūyaṁ pṛśnimātaro martāsaḥ syātana | stotā vo amṛtaḥ syāt ||4||*
*mā vo mṛgo na yavase jaritā bhūdajoṣyaḥ | pathā yamasya gādupa ||5||*
*mo ṣuṇaḥ parāparā nirṛtirdurhaṇā vadhīt | padīṣṭa tṛṣṇayā saha ||6||*
*satyaṁ tveṣā amavanto dhanviṁchadā rudriyāsaḥ | mihaṁ kṛṇvantyavātām ||7||*
*vāśreva vidyunmimāti vatsaṁ na mātā siṣakti | yadeṣāṁ vṛṣṭirasarji ||8||*
*divā chittamaḥ kṛṇvanti parjanyenodavāhena | yatpṛthivīṁ vyundanti ||9||*
*adha svanānmarutāṁ viśvamā sadma pārthivam | arejanta pra mānuṣāḥ ||10||*
*maruto vīḷupāṇibhiśchitrā rodhasvatīranu | yātemakhidrayāmabhiḥ ||11||*
*sthirā vaḥ santu nemayo rathā aśvāsa eṣām | susaṁskṛtā abhīśavaḥ ||12||*
*achchhā vadā tanā girā jarāyai brahmaṇaspatim | agniṁ mitraṁ na darśatam ||13||*
*mimīhi ślokamāsye parjanya iva tatanaḥ | gāya gāyatramukthyam |14||*
*vandasva mārutaṁ gaṇaṁ tveṣaṁ panasyumarkiṇam | asme vṛddhā asanniha ||15||*

ऋ. (Rv.) १.३९.१-१०

प्र यदित्था परावतः शेचिर्न मानमस्यथ ।
कस्य क्रत्वा मरुतः कस्य वर्पसा कं याथ कं ह धूतयः ॥१॥
स्थिरा वः सन्त्वायुधा पराणुदे वीळू उत प्रतिष्कभे ।
युष्माकमस्तु तविषी पनीयसी मा मर्त्यस्य मायिनः ॥२॥
परा ह यत्स्थिरं हथ नरो वर्तयथा गुरु ।
वि याथन वनिनः पृथिव्या व्याशाः पर्वतानाम् ॥३॥
नहि वः शत्रुर्विविदे अधि द्यवि न भूम्यां रिशादसः ।
युष्माकमस्तु तविषी तना युजा रुद्रासो नू चिदाधृषे ॥४॥
प्र वेपयन्ति पर्वतान् वि विंचन्ति वनस्पतीन् ।
प्रो आरत मरुतो दुर्मदा इव देवासः सर्वया विशा ॥५॥
उपो रथेषु पृषतीरयुग्ध्वं प्रष्टिर्वहति रोहितः ।
आ वो यामाय पृथिवी चिदश्रोदबीभयन्त मानुषाः ॥६॥
आ वो मक्षू तनाय कं रुद्रा अवो वृणीमहे ।
गन्ता नूनं नोऽवसा यथा पुरेत्था कण्वाय बिभ्युषे ॥७॥
युष्मेषितो मरुतो मर्त्येषित आ यो नो अभ्व ईषते ।
वि तं युयोत शवसा व्योजसा वि युष्माकाभिरूतिभिः ॥८॥
असामि हि प्रयज्यवः कण्वं दद प्रचेतसः ।
असामिभिर्मरुत आ न ऊतिभिर्गन्ता वृष्टिं न विद्युतः ॥९॥
असाम्योजो बिभृथा सुदानवोऽसामि धूतयः शवः ।
ऋषिद्विषे मरुतः परिमन्यव इषुं न सृजत द्विष्म ॥१०॥
*pra yaditthā parāvataḥ śechirna mānamasyatha |*
*kasya kratvā marutaḥ kasya varpasā kaṁ yātha kaṁ ha dhūtayaḥ ||1||*
*sthirā vaḥ santvāyudhā parāṇude vīḷū uta pratiṣkabhe |*
*yuṣmākamastu taviṣī panīyasī mā martyasya māyinaḥ ||2||*
*parā ha yatsthiraṁ hatha naro vartayathā guru |*
*vi yāthana vaninaḥ pṛthivyā vyāśāḥ parvatānām ||3||*
*nahi vaḥ śatrurvivide adhi dyavi na bhūmyāṁ riśādasaḥ |*
*yuṣmākamastu taviṣī tanā yujā rudrāso nū chidādhṛṣe ||4||*
*pra vepayanti parvatān vi viṁchanti vanaspatīn |*

*pro ārata maruto durmadā iva devāsaḥ sarvayā viśā //5 //*
*upo ratheṣu pṛṣatīrayugdhvaṁ praṣṭirvahati rohitaḥ /*
*ā vo yāmāya pṛthivī chidaśrodabībhayanta mānuṣāḥ //6 //*
*ā vo makṣū tanāya kaṁ rudrā avo vṛṇīmahe /*
*gantā nūnaṁ no'vasā yathā puretthā kaṇvāya bibhyuṣe //7 //*
*yuṣmeṣito maruto martyeṣita ā yo no abhva īṣate /*
*vi taṁ yuyota śavasā vyojasā vi yuṣmākābhirūtibhiḥ //8 //*
*asāmi hi prayajyavaḥ kaṇvaṁ dada prachetasaḥ /*
*asāmibhirmaruta ā na ūtibhirgantā vṛṣṭiṁ na vidyutaḥ //9 //*
*asāmyojo bibhṛthā sudānavo'sāmi dhūtayaḥ śavaḥ /*
*ṛṣidviṣe marutaḥ parimanyava iṣuṁ na sṛjata dviṣma //10 //*

८. मित्रावरुणौ (Mitrāvaruṇau) - ऋ. (Rv.) १.४३.३

यथा नो मित्रो वरुणो यथा रुद्रश्चिकेतति। यथा विश्वे सजोषसः ॥३॥
*yathā no mitro varuṇo yathā rudraśchiketati / yathā viśve sajoṣasaḥ //3 //*

९. रुद्रः (Rudraḥ) - ऋ. (Rv.) १.४३.१-२; १.४३.४-६

ऋ. (Rv.) १.४३.१-२

मद्रुद्राय प्रचेतसे मीळ्हुष्टमाय त्व्यसे। वोचेम शन्तमं हृदे ॥१॥
यथा नो अदितिः करत्पश्वे नृभ्यो यथा गवे। यथा तोकाय रुद्रियम् ॥२॥
*madrudrāya prachetase mīḻahuṣṭamāya tvyase / vochema śantamaṁ hṛde //1 //*
*yathā no aditiḥ karatpaśve nṛbhyo yathā gave / yathā tokāya rudriyam //2 //*

ऋ. (Rv.) १.४३.४-६

गाथपतिं भेधपतिं रुद्रं जलाषभेषजम्। तच्छंयोः सुम्नमीमहे ॥४॥
यः शुक्र इव सूर्यो हिरण्यमिव रोचते। श्रेष्ठो देवानां वसुः ॥५॥
शं नः करत्यर्वते सुगं मेषाय मेष्ये। नृभ्यो नारिभ्यो गवे ॥६॥
*gāthapatiṁ bhedhapatiṁ rudraṁ jalāṣabheṣajam / tachchhaṁyoḥ sumnamīmahe //4 //*
*yaḥ śukra iva sūryo hiraṇyamiva rochate / śreṣṭho devānāṁ vasuḥ //5 //*
*śaṁ naḥ karartyavate sugaṁ meṣāya meṣye / nṛbhyo nāribhyo gave //6 //*

१०. मित्रवरुण-अर्यमणः (Mitravaruṇa-Aryamaṇaḥ) - ऋ. (Rv.) १.४१.१-३; १.४१.७-९

ऋ. (Rv.) १.४१.१-३

यं रक्षन्ति प्रचेतसो वरुणो मित्रो अर्यमा। नू चित्स दभ्यते जनः ॥१॥
यं बाहुतेव पिप्रति पान्ति मर्त्य रिषः। अरिष्टः सर्व एधते ॥२॥
वि दुर्गा विद्विषः पुरो घ्नन्ति राजान एषाम्। नयन्ति दुरिता तिरः ॥३॥
*yaṁ rakṣanti prachetaso varuṇo mitro aryamā / nū chitsa dabhyate janaḥ //1 //*
*yaṁ bāhuteva piprati pānti martya riṣaḥ / ariṣṭaḥ sarva edhate //2 //*
*vi durgā vidviṣaḥ puro ghnanti rājāna eṣām / nayanti duritā tiraḥ //3 //*

ऋ. (Rv.) १.४१.७-९

कथा राधाम सखायः स्तोमं मित्रस्यार्यम्णः। महि प्सरो वरुणस्य ॥७॥
मा वो घ्नन्त मा शपन्तं प्रति वोचेदेवयन्तम्। सुम्नैरिद्व आ विवासे ॥८॥
चतुरश्चिद्ददमानाद्बिभीयादा निधातोः। न दुरुक्ताय स्पृहयेत् ॥९॥
*kathā rādhāma sakhāyaḥ stomaṁ mitrasyāryamṇaḥ / mahi psaro varuṇasya //7 //*
*mā vo ghnanta mā śapantaṁ prati vochedevayantam / sumnairidva ā vivāse //8 //*
*chaturaśchiddadamānādbibhīyādā nidhātoḥ / na duruktāya spṛhayet //9 //*

११. सोमः (Somaḥ) - ऋ. (Rv.) १.४३.७-९

अस्मे सोम श्रियमधि नि धेहि शतस्य नृणाम्। महि श्रवस्तुविनृम्णम् ॥७॥
मा नः सोमपरिबाधो मारातयो जुहुरन्त। आ न इन्दो वाजे भज ॥८॥

यास्ते प्रजा अमृतस्य परस्मिन्धामन्नृतस्य। मूर्धा नाभा सोम वेन आभूषन्तीः सोम वेदः ॥९॥
*asme soma śriyamadhi ni dhehi śatasya nṛṇām । mahi śravastuvinṛmṇam ॥7॥*
*mā naḥ somaparibādho mārātayo juhuranta । ā na indo vāje bhaja ॥8॥*
*yāste prajā amṛtasya parasmindhāmannṛtasya । mūrdhā nābhā soma vena ābhūṣantīḥ soma vedaḥ ॥9॥*

**१५३. कण्वो घौरः (साग्री. सास्वा. ऋसर्व.); त्रिशोकः काण्वः (सार्षेदी.) (Kaṇvo Ghauraḥ [Ssb. Sas. Rss.]; Triśokaḥ Kāṇvaḥ [Sad.])**

१. इन्द्रः (साग्री. सास्वा.); मरुतः (ऋसर्व. १.३.७.३) (Indraḥ [Ssb. Sas.]; Marutaḥ [Rss. 1.3.7.3]) - सा. (Sv.) १३५

इहेव श्रृणव एषां कशा हस्तेषु यद्वदान्। नि यामं चित्रमृंजते ॥१॥
*iheva śṛṇava eṣāṁ kaśā hasteṣu yadvadān । ni yāmaṁ chitramṛñjate ॥1॥*

**१५४. कण्वो घौरः (सार्षेदी. ऋसर्व. १.३७.१०); प्रस्कण्वः काण्वः (साग्री. सास्वा.) (Kaṇvo Ghauraḥ [SAD. RSS. 1.37.10]; Praskaṇvaḥ Kāṇvaḥ [Ssb. Sas.])**

१. मरुतः (Marutaḥ) - सा. (Sv.) २२१

उदु त्ये सूनवो गिरः काष्ठा योष्वत्नत। वाश्रा अभि यातवे॥८॥
*udu tye sūnavo giraḥ kāṣṭhā yoṣvatnata । vāśrā abhi yātave ॥8॥*

**१५५. कतो वैश्वामित्रः (Kato Vaiśvāmitraḥ)**

१. अग्निः (Agniḥ) - ऋ. (Rv.) ३.१७.१-५; ३.१८.१-५

ऋ. (Rv.) ३.१७.१-५

समिध्यमानः प्रथमानु धर्मा समक्तुभिरज्यते विश्ववारः ।
शोचिष्केशो घृतनिर्णिक्पावकः सुयाो अग्निर्यजथाय देवान् ॥१॥
यथायजो होत्रमग्ने पृथिव्या यथा दिवो जातवेदश्चिकित्वान् ।
एवानेन हविषा यक्षि देवान्मनुष्वद्यां प्र तिरेममद्य ॥२॥
त्रीण्यायूंषि तव जातवेदस्तिस्र आजानीरुषसस्ते अग्ने ।
ताभिर्देवानामवो यक्षि विद्वानथा भव यजमानाय शं योः ॥३॥
अग्निं सुदीतिं सुदृशं गृणन्तो नमस्यामस्त्वेड्यं जातवेदः ।
त्वा दूतमरतिं हव्यवाहं देवा अकृण्वन्नमृतस्य नाभिम् ॥४॥
यस्त्वद्धोता पूर्वो अग्ने यजीयान्द्विता च सत्ता स्वधया च शंभुः ।
तस्यान् धर्म प्र यजा चिकित्वोऽथा नो धा अध्वरं देववीतौ ॥५॥
*samidhyamānaḥ prathamānu dharmā samaktubhirajyate viśvavāraḥ ।*
*śochiṣkeśo ghṛtanirṇikpāvakaḥ suyāo agniryajathāya devān ॥1॥*
*yathāyajo hotramagne pṛthivyā yathā divo jātavedaśchikitvān ।*
*evānena haviṣā yakṣi devānmanuṣvadyāṁ pra tiremamadya ॥2॥*
*trīṇyāyūāṁṣi tava jātavedastisra ājānīruṣasaste agne ।*
*tābhirdevānāmavo yakṣi vidvānathā bhava yajamānāya śaṁ yoḥ ॥3॥*
*agniṁ sudītiṁ sudṛśaṁ gṛṇanto namasyāmastveḍyaṁ jātavedaḥ ।*
*tvā dūtamaratiṁ havyavāhaṁ devā akṛṇvannamṛtasya nābhim ॥4॥*
*yastvaddhotā pūrvo agne yajīyāndvitā cha sattā svadhayā cha śaṁbhuḥ ।*
*tasyān dharma pra yajā chikitvo'thā no dhā adhvaraṁ devavītau ॥5॥*

ऋ. (Rv.) ३.१८.१-५

भवा नो अग्ने सुमना उपतौ सखेव सख्ये पितरेव साधुः ।
पुरुद्रुहो हि क्षितयो जनानां प्रति प्रतीचीर्दहतादरातीः ॥१॥
तपो ष्वग्ने अन्तराँ अमित्रान् तपा शंसमररुषः परस्य ।
तपो वसो चिकितानो अचित्तान्वि ते तिष्ठन्तामजरा अयासः ॥२॥
इध्मेनाग्न इच्छमानो घृतेन जुहोमि हव्यं तरसे बलाय ।

यावदीशे ब्रह्मणा वन्दमान इमां धियं शतसेयाय देवीम् ॥३॥
उच्छोचिषा सहसस्पुत्र स्तुतो बृहद्वयः शशमानेषु धेहि ।
रेवदग्ने विश्वामित्रेषु शं योर्मर्मृज्मा ते तन्वं१ भूरि कृत्वः ॥४॥
कृधि रत्नं सुसनितर्धनानां स घेदग्ने भवसि यत्समिद्धः ।
स्तोतुर्दुरोणे सुभगस्य रेवत्सृप्रा करस्ना दधिषे वपूंषि ॥५॥

*bhavā no agne sumanā upatau sakheva sakhye pitareva sādhuḥ /*
*purudruho hi kṣitayo janānāṁ prati pratīchīrdahatādarātīḥ //1 //*
*tapo ṣvagne antarām̐ amitrān tapā śaṁsamararuṣaḥ parasya /*
*tapo vaso chikitāno achittānvi te tiṣṭhantāmajarā ayāsaḥ //2 //*
*idhmenāgna ichchhamāno ghṛtena juhomi havyaṁ tarase balāya /*
*yāvadīśe brahmaṇā vandamāna imāṁ dhiyaṁ śataseyāya devīm //3 //*
*uchchhochiṣā sahasasputra stuto bṛhadvayaḥ śaśamāneṣu dhehi /*
*revadagne viśvāmitreṣu śaṁ yormarmṛjmā te tanvaṁ1 bhūri kṛtvaḥ //4 //*
*kṛdhi ratnaṁ susanitardhanānāṁ sa ghedagne bhavasi yatsamiddhaḥ /*
*stoturduroṇe subhagasya revatsṛprā karasnā dadhiṣe vapūṁṣi //5 //*

**१५६. कद्रुः सर्पराज्ञी - द्र. सर्पराज्ञी (Kadruḥ Sarparājñī - See Sarparājñī)**

**१५७. कपिंजलः (Kapiṁjalaḥ)**

१. ओषधिः (Oṣadhiḥ) - अ. (Av.) २.२७.१-५

नेच्छत्रुः प्राशं जयाति सहमानाभिभूरसि। प्राशं प्रतिप्राशो जह्यरसान् कृण्वोषधे ॥१॥
सुपर्णस्त्वान्वविन्दत् सूकरस्त्वाखनन्नसा। प्राशं प्रतिप्राशो जह्यरसान् कृण्वोषधे ॥२॥
इन्द्रो ह चक्रे त्वा बाहावसुरेभ्य स्तरीतवे। प्राशं प्रतिप्राशो जह्यरसान् कृण्वोषधे ॥३॥
पाटामिन्द्रो व्याश्नादसुरेभ्य स्तरीतवे। प्राशं प्रतिप्राशो जह्यरसान् कृण्वोषधे ॥४॥
तयाहं शत्रून्त्साक्ष इन्द्रः सालावृकाँइव। प्राशं प्रतिप्राशो जह्यरसान् कृण्वोषधे ॥५॥

*nechchhatruḥ prāśaṁ jayāti sahamānābhibhūrasi /*
*prāśaṁ pratiprāśo jahyarasān kṛṇvoṣadhe //1 //*
*suparṇastavānvavindat sūkarastvākhanannasā /*
*prāśaṁ pratiprāśo jahyarasān kṛṇvoṣadhe //2 //*
*indro ha chakre tvā bāhāvasurebhya starītave /*
*prāśaṁ pratiprāśo jahyarasān kṛṇvoṣadhe //3 //*
*pāṭāmindro vyāśnādasurebhya starītave /*
*prāśaṁ pratiprāśo jahyarasān kṛṇvoṣadhe //4 //*
*tayāhaṁ śatrūntsākṣa indraḥ sālāvṛkām̐iva /*
*prāśaṁ pratiprāśo jahyarasān kṛṇvoṣadhe //5 //*

२. इन्द्रः (Indraḥ) - अ. (Av.) २.२७.७

तस्य प्राशं त्वं जहि यो न इन्द्राभिदासति। अधि नो ब्रूहि शक्तिभिः प्राशि मामुत्तरं कृधि ॥७॥

*tasya prāśaṁ tvaṁ jahi yo na indrābhidāsati / adhi no brūhi śaktibhiḥ prāśi māmuttaraṁ kṛdhi //7 //*

३. गृध्रौ (Gṛdhrau) - अ. (Av.) ७.९५.१-३

उदस्य श्यावौ विथुरौ गृध्रौ द्यामिव पेततुः। उच्छोचनप्रशेचनावस्योच्छोचनौ हृदः ॥१॥
अहमेनावुदतिष्ठिपं गावौ श्रान्तसदाविव। कुर्कुराविव कुजन्तावुदवन्तौ वृकाविव ॥२॥
आतोदिनौ नितोदिनावथो संतोदिनावुत। अपि नह्याम्यस्य मेढ्रं य इतः स्त्री पुमांजभार ॥३॥

*udasya śyāvau vithurau gṛdhrau dyāmiva petatuḥ /*
*uchchhochanapraśechanāvasyochchhochanau hṛdaḥ //1 //*
*ahamenāvudatiṣṭhipaṁ gāvau śrāntasadāviva /*
*kurkurāviva kujantāvudavantau vṛkāviva //2 //*
*ātodinau nitodināvatho saṁtodināvuta /*
*api nahyāmyasya meḍhraṁ ya itaḥ strī pumāṁjabhāra //3 //*

४. रुद्रः (Rudraḥ) - अ. (Av.) २.२७.६

रुद्र जलाषभेषज नीलशिखण्ड कर्मकृत्। प्राशं प्रतिप्राशो जह्यरसान् कृण्वोषधे ॥६॥

*rudra jalāṣabheṣaja nīlaśikhaṇḍa karmakṛt / prāśaṁ pratiprāśo jahyarasān kṛṇvoṣadhe //6 //*

५. वयः (Vayaḥ) - अ. (Av.) ७.९६.१

असदन् गावः सदनेऽपप्तद् वसतिं वयः। आस्थाने पर्वता अस्थुः स्थाम्नि वृक्कावतिष्ठिपम्॥१।

*asadan gāvaḥ sadane'paptad vasatiṁ vayaḥ /*
*āsthāne parvatā asthuḥ sthāmni vṛkkāvatiṣṭhipam //1 /*

## १५८. कपोतो नैऋर्तः (Kapoto Naiṛrtaḥ)

१. कपोतापहतौ प्रायश्चित् वैश्वदेवम् (Kapotāpahatau Prrāyaśchit Vaiśvadevam) - ऋ. (Rv.) १०.१६५.१-५

देवाः कपोत इषितो यदिच्छन्दूतो निऋर्त्या इदमाजगाम् ।
तस्मा अर्चाम् कृणवाम् निष्कृतिं शं नो अस्तु द्विपदे शं चतुष्पदे ॥१॥
शिवः कपोत इषितो नो अस्त्वनागा देवाः शकुनो गृहेषु ।
अग्निर्हि विप्रो जुषतां हविर्नः परि हेतिः पक्षिणी नो वृणक्तु ॥२॥
हेतिः पक्षिणी न दभात्यस्मानाष्ट्र्यां पदं कृणुते अग्निधाने ।
शं नो गोभ्यश्च पुरुषेभ्यश्चास्तु मा नो हिंसीदिह देवाः कपोतः ॥३॥
यदुलूको वदति मोघमेतद्यत्कपोतः पदमग्नौ कृणोति ।
यस्य दूतः प्रहित एष एतत्तस्मै यमाय नमो अस्तु मृत्यवे ॥४॥
ऋचा कपोतं नुदत प्राणेदमिषं मदन्तः परि गां नयध्वम् ।
संयोपयन्तो दुरितानि विश्वा हित्वा न ऊर्ज प्र प्रतात्पतिष्ठः ॥५॥

*devāḥ kapota iṣito yadichchhandūto niṛrtyā idamājagām /*
*tasmā archām kṛṇavām niṣkṛtiṁ śaṁ no astu dvipade śaṁ chatuṣpade //1 //*
*śivaḥ kapota iṣito no astvanāgā devāḥ śakuno gṛheṣu /*
*agnirhi vipro juṣatāṁ havirnaḥ pari hetiḥ pakṣiṇī no vṛṇaktu //2 //*
*hetiḥ pakṣiṇī na dabhātyasmānāṣṭryāṁ padaṁ kṛṇute agnidhāne /*
*śaṁ no gobhyaścha puruṣebhyaśchāstu mā no hiṁsīdiha devāḥ kapotaḥ //3 //*
*yadulūko vadati moghametadyatkapotaḥ padamagnau kṛṇoti /*
*yasya dūtaḥ prahita eṣa etattasmai yamāya namo astu mṛtyave //4 //*
*ṛchā kapotaṁ nudata prāṇedamiṣaṁ madantaḥ pari gāṁ nayadhvam /*
*saṁyopayanto duritāni viśvā hitvā na ūrja pra pratātpatiṣṭhaḥ //5 //*

## १५९. कबन्धः (Kabandhaḥ)

१. इन्द्रः (Indraḥ) - अ. (Av.) ६.७५.१-३

निरमुं नुद ओकसः सपपत्नो यः पृतन्यति। नैर्बाध्येन हविषेन्द्र एनं पराशरीत् ॥१॥
परमां तं परावतमिन्द्रो नुदतु वृत्रहा। यतो न पुनरायति शश्वतीभ्यः समाभ्यः ॥२॥
एतु तिस्रः परावत एतु पंच जनाँ अति। एतु तिस्रोति रोचना यतो न पुनरायति ।
शश्वतीभ्यः समाभ्यो यावत् सूर्यो असद् दिवि ॥३॥

*niramuṁ nuda Okasaḥ sapapatno yaḥ pṛtanyati /*
*nairbādhyena haviṣendra enaṁ parāśarīt //1 //*
*paramāṁ taṁ parāvatamindro nudatu vṛtrahā /*
*yato na punarāyati śaśvatībhyaḥ samābhyaḥ //2 //*
*etu tisraḥ parāvata etu paṁcha janām̐ ati /*
*etu tisroti rochanā yato na punarāyati /*
*śaśvatībhyaḥ samābhyo yāvat sūryo asad divi //3 //*

२. जातवेदा (Jātavedā) - अ. (Av.) ६.७७.१-३

अस्थाद् द्यौरस्थात् पृथिव्यस्थाद् विश्वमिदं जगत् ।

अस्थाने पर्वता अस्थुः स्थाम्न्यश्वाँ अतिष्ठिपम् ॥१॥
य उदानट् परायणं य उदानण्न्यायनम् । आवर्तनं नवर्तनं यो गोपा अपि तं हुवे ॥२॥
जातवेदो नि वर्तय शतं ते सन्त्वावृतः । सहस्रं त उपावृतस्ताभिर्नः पुनरा कृधि ॥३॥
*asthād dyaurasthāt pṛthivyasthād viśvamidaṁ jagat /*
*asthāne parvatā asthuḥ sthāmnyaśvām̐ atiṣṭhipam //1 //*
*ya udānaṭ parāyaṇaṁ ya udānaṇnyāyanam /*
*āvartanaṁ navartanaṁ yo gopā api taṁ huve //2 //*
*jātavedo ni vartaya śataṁ te santvāvṛtaḥ /*
*sahasraṁ ta upāvṛtastābhirnaḥ punarā kṛdhi //3 //*

३. सान्तपनाग्निः (Sāntapanāgniḥ) - अ. (Av.) ६.७६.१-४

य एनं परिषीदन्ति समादधति चक्षसे। स्रप्रेद्धो अग्निर्जिह्वाभिरुदेतु हृदयादधि ॥१॥
अग्नेः सांतपनस्याहमायुषे पदमा रभे। अद्धातिर्यस्य पश्यति धूममुद्यन्तमास्यतः ॥२॥
यो अस्य समिधं वेद क्षत्रियेण समाहिताम्। नाभिह्वारे पदं नि दधाति स मृत्यवे ॥३॥
नैनं घ्नन्ति पर्यायिणो न सन्नाँ अव गच्छति। अग्नेर्य क्षत्रियो विद्वान्नाम गृह्णात्यायुषे ॥४॥
*ya enaṁ pariṣīdanti samādadhati chakṣase /*
*srapreddho agnirjihnābhirudetu hṛdayādadhi //1 //*
*agneḥ sāṁtapanasyāhamāyuṣe padamā rabhe /*
*addhātiryasya paśyati dhūmamudyantamāsyataḥ //2 //*
*yo asya samidhaṁ veda kṣatriyeṇa samāhitām /*
*nābhihnāre padaṁ ni dadhāti sa mṛtyave //3 //*
*nainaṁ ghnanti paryāyiṇo na sannām̐ ava gachchhati /*
*agnerya kṣatriyo vidvānnāma gṛhṇātyāyuṣe //4 //*

## १६०. कर्णश्रुत् वासिष्ठः (Karṇaśrut Vāsiṣṭhaḥ)

१. पवमानः सोमः (Pavamānaḥ Somaḥ) - ऋ. (Rv.) ९.९७.२२-२४

तक्षद्यदी मनसो वेनतो वाग्ज्येष्ठस्य वा धर्मणि क्षेरनीके ।
आदीमायन्वरमा वावशाना जुष्टं पति कलशे गाव इन्दुम् ॥२२॥
प्र दानुदो दिव्यो दानुपिन्व ऋतमृताय पवते सुमेधाः ।
धर्मा भुवद्वृजन्यस्य राजा प्र रश्मिभिर्दशभिर्भारि भूम ॥२३॥
पवित्रेभिः पवमानो नृचक्षा राजा देवानामुत मर्त्यानाम् ।
द्विता भुवद्रयिपती रयीणामृतं भरत्सुभृतं चार्विन्दुः ॥२४॥
*takṣadyadī manaso venato vāgjyeṣṭhasya vā dharmaṇi kṣeranīke /*
*ādīmāyanvaramā vāvaśānā juṣṭaṁ pati kalaśe gāva indum //22 //*
*pra dānudo divyo dānupinva ṛtamṛtāya pavate sumedhāḥ /*
*dharmā bhuvadvṛjanyasya rājā pra raśmibhirdaśabhirbhāri bhūma //23 //*
*pavitrebhiḥ pavamāno nṛchakṣā rājā devānāmuta martyānām /*
*dvitā bhuvadrayipatī rayīṇāmṛtaṁ bharatsubhṛtaṁ chārvinduḥ //24 //*

## १६१. कर्णश्रुद् वासिष्ठः (साग्री. सास्वा. ऋसर्व.); दृढीको वासिष्ठः (सार्षेदी.) (Karṇaśrud Vāsiṣṭhaḥ [Ssb. Sas. Rss.]; Dṛḍhīko Vāsiṣṭhaḥ [Sad.]

१. पवमानः सोमः (Pavamānaḥ Somaḥ) - सा. (Sv.) ५३७

तक्षद्यदी मनसो वेनतो वाग् जयेष्ठस्य धर्म द्युक्षोरनीके ।
आदीमायन्वरमा वावशाना जुष्टं पतिं कलशे गाव इन्दुम् ॥५॥
*takṣadyadī manaso venato vāg jayeṣṭhasya dharma dyukṣoranīke /*
*ādīmāyanvaramā vāvaśānā juṣṭaṁ patiṁ kalaśe gāva indum //5 //*

## १६२. करिक्रतः (Karikrataḥ)

१. केशिनः (Keśinaḥ) - ऋ. (Rv.) १०.१३६.५

वातस्याश्वो वायोः सखाथो देवेषितो मुनिः। उभौ समुद्रावा क्षेति यश्च पूर्व उतापरः ॥५॥

*vātasyāśvo vāyoḥ sakhātho deveṣito muniḥ । ubhau samudrāvā kṣeti yaścha pūrva utāparaḥ ॥5॥*

## १६३. कलिः (Kaliḥ)

१. इन्द्रः (Indraḥ) - अ. (Av.) २०.९७.१-३

वयमेनमिदा ह्योऽपीपेमेह वज्रिणम् । तस्मा उ अद्य समना सुतं भरा नूनं भूषत श्रुते ॥१॥
वृकश्चिदस्य वारण उरामथिरा वयुनेषु भूषति ।
सेमं न स्तोमं जुजुषाण आ गहीन्द्र प्र चित्रया धिया ॥२॥
कदू न्व१स्याकृतमिन्द्रस्यास्ति पौंस्यम्।
केनो नु कं श्रोमतेन न शुश्रुवे जनुषः परि वृत्रहा ॥३॥
*vayamenamidā hyo'pīpemeha vajriṇam । tasmā u adya samanā sutaṁ bharā nūnaṁ bhūṣata śrute ॥1॥*
*vṛkaśchidasya vāraṇa urāmathirā vayuneṣu bhūṣati ।*
*semaṁ na stomaṁ jujuṣāṇa ā gahīndra pra chitrayā dhiyā ॥2॥*
*kadū nva1syākṛtamindrasyāsti pauṁsyam ।*
*keno nu kaṁ śromatena na śuśruve januṣaḥ pari vṛtrahā ॥3॥*

## १६४. कलिः प्रागाथः (Kaliḥ Prāgāthaḥ)

१. इन्द्रः (Indraḥ) - ऋ. (Rv.) ८.६६.१-१५; सा. (Sv.) २३७; २७२; ६८७-६८८; १६९१-१६९२

ऋ. (Rv.) ८.६६.१-१५

तरोभिर्वो विदद्वसुमिन्द्र सबाध ऊतये। बृहद् गायन्तः सुतसोमे अध्वरे हुवे भरं न कारिणम् ॥१॥
न यं दुध्रा वरन्ते न स्थिरा मुरो मदे सुशिप्रमन्धसः।
य आदृत्या शशमानाय सुन्वते दाता जरित्र उक्थ्यम् ॥२॥
यः शक्रो मृक्षो अश्व्यो यो वा कीजो हिरण्ययः।
स ऊर्वस्य रेजयत्यपावृतिमिन्द्रो गव्यस्य वृत्रहा ॥३॥
निखातं चिद्यः पुरुसंभृतं वसूदिद्वपति दाशुषे ।
वज्री सुशिप्रो हर्यश्व इत् करदिन्द्रः क्रत्वा यथा वशत् ॥४॥
यद्वावन्थ पुरुष्टुत पुरा चिच्छूर नृणाम् ।
वयं तत्त इन्द्र सं भरामसि यामुक्थं तुरं वचः ॥५॥
सचा सोमेषु पुरुहूत वज्रिवो मदाय द्युक्ष सोमपाः ।
त्वमिद्धि ब्रह्मकृते काम्यं वसु देष्ठः सुन्वते भुवः ॥६॥
वयमेनमिदा ह्योऽपीपेमेह वज्रिणम् । तस्मा उ अद्य समना सुतं भरा नूनं भूषत श्रुते ॥७॥
वृकश्चिदस्य वारण उरामथिरा वयुनेषु भूषति ।
सेमं नः स्तोमं जुजुषाण आ गहोन्द्र प्र चित्रया धिया ॥८॥
कदू न्व१स्याकृतमिन्द्रस्यास्ति पौंस्यम् । केनो नु कं श्रोमतेन न शुश्रुवे जनुषः परि वृत्रहा ॥९॥
कदू महीरधृष्टा अस्य तविषीः कदु वृत्रघ्नो अस्तृतम् ।
इन्द्रो विश्वान् वेकनाटाँ अहर्दृश उत क्रत्वा पर्णीँरभि ॥१०॥
वयं घा ते अपूर्व्येन्द्र ब्रह्माणि वृत्रहन् । पुरूतमासः पुरुहूत वज्रिवो भृतिं न प्र भरामसि ॥११॥
पूर्वीश्चिद्धि त्वे तुविकूर्मिन्नाशसो हवन्त इन्द्रोतयः ।
तिरश्चिदर्यः सवना वसो गहि शविष्ठ श्रुधि मे हवम् ॥१२॥
वयं घा ते त्वे इद्विन्द्र विप्रा अपि ष्मसि ।
नहि त्वदन्यः पुरुहूत कश्चन मघवन्नस्ति मर्डिता ॥१३॥
त्वं नो अस्या अमतेरुत क्षुधो३ भिशस्तेरव स्पृधि ।
त्वं न ऊती तव चित्रया धिया शिक्षा शचिष्ठ गातुवित् ॥१४॥
सोम इद्वः सुतो अस्तु कलयो मा बिभीतन। अपेदेष ध्वस्मायति स्वयं धैषो अपायति ॥१५॥
*tarobhirvo vidadvasumindra sabādha ūtaye । bṛhad gāyantaḥ sutasome adhvare huve bharaṁ na kāriṇam ॥1॥*

*na yaṁ dughrā varante na sthirā muro made suśipramandhasaḥ* ।
*ya ādṛtyā śaśamānāya sunvate dātā jaritra ukthyam* ॥2 ॥
*yaḥ śakro mṛkṣo aśvyo yo vā kījo hiraṇyayaḥ* ।
*sa ūrvasya rejayatyapāvṛtimindro gavyasya vṛtrahā* ॥3 ॥
*nikhātaṁ chidyaḥ purusaṁbhṛtaṁ vasūdidvapati dāśuṣe* ।
*vajrī suśipro haryaśva it karadindraḥ kratvā yathā vaśat* ॥4 ॥
*yadvāvantha puruṣṭuta purā chichchhūra nṛṇām* ।
*vayaṁ tatta indra saṁ bharāmasi yāmukthaṁ turaṁ vachaḥ* ॥5 ॥
*sachā someṣu puruhūta vajrivo madāya dyukṣa somapāḥ* ।
*tvamiddhi brahmakṛte kāmyaṁ vasu deṣṭhaḥ sunvate bhuvaḥ* ॥6 ॥
*vayamenamidā hyo'pīpemeha vajriṇam* ।
*tasmā u adya samanā sutaṁ bharā nūnaṁ bhūṣata śrute* ॥7 ॥
*vṛkaśchidasya vāraṇa urāmathirā vayuneṣu bhūṣati* ।
*semaṁ naḥ stomaṁ jujuṣāṇa ā gahondra pra chitrayā dhiyā* ॥8 ॥
*kadū nva1syākṛtamindrasyāsti pauṁsyam* ।
*keno nu kaṁ śromatena na śuśruve januṣaḥ pari vṛtrahā* ॥9 ॥
*kadū mahīradhṛṣṭā asya taviṣīḥ kadu vṛtraghno astṛtam* ।
*indro viśvān vekanāṭām̐ ahardṛśa uta kratvā paṇīm̐rabhi* ॥10 ॥
*vayaṁ ghā te apūrvyendra brahmāṇi vṛtrahan* ।
*pṛrūtamāsaḥ puruhūta vajrivo bhṛtiṁ na pra bharāmasi* ॥11 ॥
*pūrvīśchiddhi tve tuvikūrminnāśaso havanta indrotayaḥ* ।
*tiraśchidaryaḥ savanā vaso gahi śaviṣṭha śrudhi me havam* ॥12 ॥
*vayaṁ ghā te tve idvindra viprā api ṣmasi* ।
*nahi tvadanyaḥ puruhūta kaśchana maghavannasti marḍitā* ॥13 ॥
*tvaṁ no asyā amateruta kṣudho3 bhiśasterava spṛdhi* ।
*tvaṁ na ūtī tava chitrayā dhiyā śikṣā śachiṣṭha gātuvit* ॥14 ॥
*soma idvaḥ suto astu kalayo mā bibhītana* ।
*apedeṣa dhvasmāyati svayaṁ dhaiṣo apāyati* ॥15 ॥

सा. (Sv.) २३७

तरोभिर्वो विदद्वसुमिन्द्रं सबाध ऊतये। बृहद्गायन्तः सुतसोमे अध्वरे हुवे भरं न कारिणम्॥५॥
*tarobhirvo vidadvasumindraṁ sabādha ūtaye* ।
*bṛhadgāyantaḥ sutasome adhvare huve bharaṁ na kāriṇam* ॥5 ॥

सा. (Sv.) २७२

वयमेनमिदा ह्योपीपेमेह वज्रिणम्। तस्मा उ अद्य सवने सुतं भरा नूनं भूषत श्रुते ॥१०॥
*vayamenamidā hyopīpemeha vajriṇam* । *tasmā u adya savane sutaṁ bharā nūnaṁ bhūṣata śrute* ॥10 ॥

सा. (Sv.) ६८७-८८

तरोभिर्वो विदद्वसुमिन्द्रं सबाध ऊतये। बृहद्गायन्तः सुतसोमे अध्वरे हुवे भरं न कारिणम् ॥१॥
न यं दुध्रा वरन्ते न स्थिरा मुरो मदेषु शिप्रमन्धसः ।
आदृत्या शशमानाय सुन्वते दाता जरित्र उक्थ्यम् ॥२॥
*tarobhirvo vidadvasumindraṁ sabādha ūtaye* ।
*bṛhadgāyantaḥ sutasome adhvare huve bharaṁ na kāriṇam* ॥1 ॥
*na yaṁ dudhrā varante na sthirā muro madeṣu śipramandhasaḥ* ।
*ādṛtyā śaśamānāya sunvate dātā jaritra ukthyam* ॥2 ॥

सा. (Sv.) १६९१-१६९२

वयमेनमिदा ह्योऽपीपेमेह वज्रिणम्। तस्मा उ अद्य सवने सुतं भरा नूनं भूषत श्रुते ॥१॥
वृकश्चिदस्य वारण उरामथिरा वयुनेषु भूषति।
सेमं न स्तोमं जुजुषाण आ गहीन्द्र प्र चित्रया धिया॥२॥

*vayamenamidā hyo'pīpemeha vajriṇam ।*
*tasmā u adya savane sutaṁ bharā nūnaṁ bhūṣata śrute ॥1॥*
*vṛkaśchidasya vāraṇa urāmathirā vayuneṣu bhūṣati ।*
*semaṁ na stomaṁ jujuṣāṇa ā gahīndra pra chitrayā dhiyā ॥2॥*

## १६५. कवष ऐलूषः (Kavaṣa Ailūṣaḥ)

१. आप अपान्नपाद् वा (Āpa Apānnapād Vā) - ऋ. (Rv.) १०.३०.१-१५

प्र देवत्रा ब्रह्मणे गातुरेत्वपो अच्छा मनसो न प्रयुक्ति ।
महीं मित्रस्य वरुणस्य धासिं पृथुज्रयसे रीरधा सुवृक्तिम् ॥१॥
अध्वर्यवो हविष्मन्तो हि भूताच्छाप इतोशतीरुशन्तः ।
अव याश्चष्टे अरुणः सुपर्णस्तमास्य ध्वमूर्मिमद्या सुहस्ताः ॥२॥
अध्वर्यवोऽप इता समुद्रमपां नपातं हविषा यजध्वम् ।
स वो ददमूर्मिमद्या सुपूतं तस्मै सोमं मधुमन्तं सुनोत ॥३॥
यो अनिध्मो दीदयदप्ख१ न्तर्य विप्रास ईळते अध्वरेषु ।
अपां नपान्मधुमतीरपो दा याभिरिन्द्रो वावृधे वीर्याय ॥४॥
याभिः सोमो मोदते हर्षते च कल्याणीभियुवतिभिर्न मर्यः ।
ता अध्वर्यो अपो अच्छा परेहि यदासिंचा ओषधीभिः पुनीतात् ॥५॥
एवेद्यूने युवतयो नमन्त यदीमुशन्नुशतीरेत्यच्छ ।
सं जानते मनसा सं चिकित्रेऽध्वर्यवो धिष्णापश्च देवीः ॥६॥
यो वो वृताभ्यो अकृणोदु लोकं यो वो मह्या अभिशस्तेरमुंचत् ।
तस्मा इन्द्राय मधुमन्तमूर्मिं देवमादनं प्र हिणोतनापः ॥७॥
प्रास्मै हिनोत मधुमन्तमूर्मिं गर्भो यो वः सिन्धवो मध्व उत्सः ।
घृतपृष्ठमीड्यमध्वरेष्वापो रेवतीः श्रृणुता हवं मे ॥८॥
तं सिन्धवो मत्सरमिन्द्रपानमूर्मिं प्र हेत य उभे इयर्ति ।
मदच्युतमौशानं नभोजां परि त्रितन्तुं विचरन्तमुत्सम् ॥९॥
आवर्वृततीरध नु द्विधारा गोषुयुधो न नियवं चरन्तीः ।
ऋषे जनित्रीर्भुवनस्य पत्नीरपो वन्दस्व सवृधः सयोनीः ॥१०॥
हिनोता नो अध्वरं देवयज्या हिनोत ब्रह्म सनये धनानाम् ।
ऋतस्य योगे वि ष्यध्वमूधः श्रुष्टीवरीर्भूतनास्मभ्यमापः ॥११॥
आपो रेवतीः क्षयथा हि वस्वः क्रतुं च भद्रं विभृथामृतं च ।
रायश्च स्थ स्वपत्यस्य पत्नीः सरस्वती तद्गृणते वयो धात् ॥१२॥
प्रति यदापो अदृश्रमायतीर्घृतं पयांसि बिभ्रतीर्मधूनि ।
अध्वर्युभिर्मनसा संविदाना इन्द्राय सोमं सुषुतं भरन्तीः ॥१३॥
एमा अग्मन् रेवतीर्जीवधन्या अध्वर्यवः सादयता सखायः ।
नि बर्हिषि धत्तन सोम्यासोऽपां नप्त्रा संविदानास एनाः ॥१४॥
आग्मन्नाप उशतीर्बर्हिरेदं न्यध्वरे असदन्देवयन्तीः ।
अध्वयर्वः सुनुतेन्द्राय सोममभूदु वः सुशका देवयजया ॥१५॥

*pra devatrā brahmaṇe gāturetvapo achchhā manaso na prayukti ।*
*mahīṁ mitrasya varuṇasya dhāsiṁ pṛthujrayase rīradhā suvṛktim ॥1॥*
*adhvaryavo haviṣmanto hi bhūtāchchhāpa itośatīruśantaḥ ।*
*ava yāśchaṣṭe aruṇaḥ suparṇastamāsya dhvamūrmimadyā suhastāḥ ॥2॥*
*adhvaryavo'pa itā samudramapāṁ napātaṁ haviṣā yajadhvam ।*
*sa vo dadadūrmimadyā supūtaṁ tasmai somaṁ madhumantaṁ sunota ॥3॥*
*yo anidhmo dīdayadapkha1 ntarya viprāsa īḷate adhvareṣu ।*
*apāṁ napānmadhumatīrapo dā yābhirindro vāvṛdhe vīryāya ॥4॥*
*yābhiḥ somo modate rhaṣate cha kalyāṇībhiyuvatibhirna maryaḥ ।*
*tā adhvaryo apo achchhā parehi yadāsiṁchā Oṣadhībhiḥ punītāt ॥5॥*
*evedyūne yuvatayo namanta yadīmuśannuśatīretyachchha ।*

*saṁ jānate manasā saṁ chikitre'dhvaryavo dhiṣṇāpaścha devīḥ //6 //*
*yo vo vṛtābhyo akṛṇodu lokaṁ yo vo mahyā abhiśasteramuṁchat /*
*tasmā indrāya madhumantamūrmi devamādanaṁ pra hiṇotanāpaḥ //7 //*
*prāsmai hinota madhumantamūrmi garbho yo vaḥ sindhavo madhva utsaḥ /*
*ghṛtapṛṣṭhamīḍyamadhvareṣvāpo revatīḥ śṛṇutā havaṁ me //8 //*
*taṁ sindhavo matsaramindrapānamūrmi pra heta ya ubhe iyārti /*
*madachyutamauśānaṁ nabhojāṁ pari tritantuṁ vicharantamutsam //9 //*
*āvarvṛtatīradha nu dvidhārā goṣuyudho na niyavaṁ charantīḥ /*
*ṛṣe janitrīrbhuvanasya patnīrapo vandasva savṛdhaḥ sayonīḥ //10 //*
*hinotā no adhvaraṁ devayajyā hinota brahma sanaye dhanānām /*
*ṛtasya yoge vi trayadhvamūdhaḥ śruṣṭīvarīrbhūtanāsmabhyamāpaḥ //11 //*
*āpo revatīḥ kṣayathā hi vasvaḥ kratuṁ cha bhadraṁ vibhṛthāmṛtaṁ cha /*
*rāyaścha stha svapatyasya patnīḥ sarasvatī tadgṛṇate vayo dhāt //12 //*
*prati yadāpo adṛśramāyatīrghṛtaṁ payāṁsi bibhratīrmadhūni /*
*adhvaryubhirmanasā saṁvidānā indrāya somaṁ suṣutaṁ bharantīḥ //13 //*
*emā agman revatīrjīvadhanyā adhvaryavaḥ sādayatā sakhāyaḥ /*
*ni barhiṣi dhattana somyāso'pāṁ naptrā saṁvidānāsa enāḥ //14 //*
*āgmannāpa uśatīrbarhiredaṁ nyadhvare asadandevayantīḥ /*
*adhvayarvaḥ sunutendrāya somamabhūdu vaḥ suśakā devayajayā //15 //*

२. इन्द्रः (Indraḥ) - ऋ. (Rv.) १०.३३.२-३

सं मा तपन्त्यभितः सपत्नीरिव पर्शवः ।
नि बाधते अमतिर्नग्नता जसुर्वेर्न वेवीयते मतिः ॥२॥
मूषो न शिश्ना व्यदन्ति माध्यः स्तोतारं ते शतक्रतो ।
सकृत्सु नो मघवन्निन्द्र मृळयाधा पितेव नो भव ॥३॥
*saṁ mā tapantyabhitaḥ sapatnīriva parśavaḥ /*
*ni bādhate amatirnagnatā jasurverna vevīyate matiḥ //2 //*
*mūṣo na śiśnā vyadanti mādhyaḥ stotāraṁ te śatakrato /*
*sakṛtsu no maghavannindra mṛḷayādhā piteva no bhava //3 //*

३. उपमश्रवामित्र-अतिथिपुत्राः (Upamaśravāmitra-Atithiputrāḥ) - ऋ. (Rv.) १०.३०.६-९

एवेद्यूने युवतयो नमन्त यदीमुशन्नुशतीरेत्यच्छ ।
सं जानते मनसा सं चिकित्रेऽध्वर्यवो धिष्णापश्च देवीः ॥६॥
यो वो वृताभ्यो अकृणोदु लोकं यो वो मह्या अभिशस्तेरमुंचत् ।
तस्मा इन्द्राय मधुमन्तमूर्मिं देवमादनं प्र हिणोतनापः ॥७॥
प्रास्मै हिनोत मधुमन्तमूर्मिं गर्भो यो वः सिन्धवो मध्व उत्सः ।
घृतपृष्ठमीड्यमध्वरेष्वापो रेवतीः शृणुता हवं मे ॥८॥
तं सिन्धवो मत्सरमिन्द्रपानमूर्मिं प्र हेत य उभे इयर्ति ।
मदच्युतमौशानं नभोजां परि त्रितन्तुं विचरन्तमुत्सम् ॥९॥
*evedyūne yuvatayo namanta yadīmuśannuśatīretyachchha /*
*saṁ jānate manasā saṁ chikitre'dhvaryavo dhiṣṇāpaścha devīḥ //6 //*
*yo vo vṛtābhyo akṛṇodu lokaṁ yo vo mahyā abhiśasteramuṁchat /*
*tasmā indrāya madhumantamūrmi devamādanaṁ pra hiṇotanāpaḥ //7 //*
*prāsmai hinota madhumantamūrmi garbho yo vaḥ sindhavo madhva utsaḥ /*
*ghṛtapṛṣṭhamīḍyamadhvareṣvāpo revatīḥ śṛṇutā havaṁ me //8 //*
*taṁ sindhavo matsaramindrapānamūrmi pra heta ya ubhe iyārti /*
*madachyutamauśānaṁ nabhojāṁ pari tritantuṁ vicharantamutsam //9 //*

४. कुरुश्रवणस्य त्रासदस्यवस्य दानस्तुतिः (Kuruśravaṇasya Trāsadasyavasya Dānastutiḥ) - ऋ. (Rv.) १०.३३.४-५

कुरुश्रवणमावृणि राजानं त्रासदस्यवम् । मंहिष्ठं वाघतामृषिः ॥४॥

यस्य मा हरितो रथे तिस्रो वहन्ति साधुया। स्तवै सहस्रदक्षिणे ॥५॥

*kuruśravaṇamāvṛṇi rājānaṁ trāsadasyavam | maṁhiṣṭhaṁ vāghatāmṛṣiḥ ||4 ||*
*yasya mā harito rathe tisro vahanti sādhuyā | stavai sahasradakṣiṇe ||5 ||*

५. विश्वेदेवाः (Viśvedevāḥ) - ऋ. (Rv.)१०.३१.१-११; १०.३३.१

ऋ. (Rv.) १०.३१.१-११

आ नो देवानामुप वेतु शंसो विश्वेभिस्तुरैरवसे यजत्रः ।
तेभिर्वयं सुषखयो भवेम तरन्तो विश्वा दुरिता स्याम ॥१॥
परि चिन्मर्तो द्रविणं ममन्यादृतस्य पथा नमसा विवासेत ।
उत स्वेन क्रतुना सं वदेत श्रेयांसं दक्षं मनसा जगृभ्यात् ॥२॥
अधायि धीतिरससृग्रमंशास्तीर्थे न दस्ममुप यन्त्यूमाः ।
अभ्यानश्म सुवितस्य शूषं नवेदसो अमृतानामभूम ॥३॥
नित्यश्चाकन्यात्स्वपतिर्दमूना यस्मा उ देवः सावती जजान ।
भगो वा गोभिरर्यमेमनज्यात्सो अस्मै चारुश्छदयदुत स्यात् ॥४॥
इयं सा भूया उषसामिव क्षा यद्ध क्षुमन्तः शवसा समायन् ।
अस्य स्तुतिं जरितुर्भिक्षमाणा आ नः शग्मास उप यन्तु वाजाः ॥५॥
अस्येदेषा सुमतिः पप्रथानाभवत्पूर्व्या भूमना गौः ।
अस्य सनीळा असुरस्य योनौ समान आ भरणे बिभ्रमाणाः ॥६॥
किं स्विद्वनं क उ स वृक्ष आस यतो द्यावापृथिवी निष्टतक्षुः ।
संतस्थाने अजरे इतऊती अहानि पूर्वीरुषसो जरन्त ॥७॥
नैतावदेना परो अन्यदस्त्युक्षा स द्यावापृथिवी बिभर्ति ।
त्वचं पवित्रं कृणुत स्वधावान्यदीं सूर्यं न हरितो वहन्ति ॥८॥
स्तेगो न क्षामत्येति पृथ्वीं मिहं न वातो वि ह वाति भूम ।
मित्रो यत्र वरुणो अज्यमानोऽग्निर्वने न व्यसृष्ट शोकम् ॥९॥
स्तरीर्यत्सूत सद्यो अज्यमाना व्यथिरव्यथीः कृणुत स्वगोपा ।
पुत्रो यत्पूर्वः पित्रोर्जनिष्ट शमयां गौर्जगार यद्ध पृच्छान् ॥१०॥
उत कण्वं नृषदः पुत्रमाहुरुत श्यावो धनमादत्त वाजी ।
प्र कृष्णाय रुषदपिन्वतोधऋर्तमत्र नकिरस्मा अपीपेत् ॥११॥

*ā no devānāmupa vetu śaṁso viśvebhisturairavase yajatraḥ |*
*tebhirvayaṁ suṣakhayo bhavema taranto viśvā duritā syāma ||1 ||*
*pari chinmarto draviṇaṁ mamanyādṛtasya pathā namasā vivāseta |*
*uta svena kratunā saṁ vadeta śreyāṁsaṁ dakṣaṁ manasā jagṛbhyāt ||2 ||*
*adhāyi dhītirasasṛgramaṁśāstīrthe na dasmamupa yantyūmāḥ |*
*abhyānaśma suvitasya śūṣaṁ navedaso amṛtānāmabhūma ||3 ||*
*nityaśchākanyātsvapatirdamūnā yasmā u devaḥ sāvatī jajāna |*
*bhago vā gobhiraryamemanajyātso asmai chāruśchhadayaduta syāt ||4 ||*
*iyaṁ sā bhūyā uṣasāmiva kṣā yaddha kṣumantaḥ śavasā samāyan |*
*asya stutiṁ jariturbhikṣamāṇā ā naḥ śagmāsa upa yantu vājāḥ ||5 ||*
*asyedeṣā sumatiḥ paprathānābhavatpūrvyā bhūmanā gauḥ |*
*asya sanīḻā asurasya yonau samāna ā bharaṇe bibhramāṇāḥ ||6 ||*
*kiṁ svidvanaṁ ka u sa vṛkṣa āsa yato dyāvāpṛthivī niṣṭatakṣuḥ |*
*saṁtasthāne ajare itaūtī ahāni pūrvīruṣaso jaranta ||7 ||*
*naitāvadenā paro anyadastyukṣā sa dyāvāpṛthivī bibharti |*
*tvachaṁ pavitraṁ kṛṇuta svadhāvānyadīṁ sūrya na harito vahanti ||8 ||*
*stego na kṣāmatyeti pṛthvīṁ mihaṁ na vāto vi ha vāti bhūma |*
*mitro yatra varuṇo ajyamāno'gnirvane na vyasṛṣṭa śokam ||9 ||*
*starīryatsūta sadyāo ajyamānā vyathiravyathīḥ kṛṇuta svagopā |*
*putro yatpūrvaḥ pitrorjaniṣṭa śamayāṁ gaurjagāra yaddha pṛchchhān ||10 ||*

*uta kaṇvaṁ nṛṣadaḥ putramāhuruta śyāvo dhanamādatta vājī /*
*pra kṛṣṇāya ruṣadapinvatogharṛtamatra nakirasmā apīpet //11 //*

ऋ. (Rv.) १०.३३.१

प्र मा ययुज्रे प्रयुजो जनानां वहामि स्म पूषणमन्तरेण ।
विश्वे देवासो अध मामरक्षन्दुः शासुरागादिति घोष आसीत् ॥१॥
*pra mā yayujre prayujo janānāṁ vahāmi sma pūṣaṇamantareṇa /*
*viśve devāso adha māmarakṣanduḥ śāsurāgāditi ghoṣa āsīt //1 //*

## १६६. कवष ऐलूषः (साग्री. सास्वा.); वामदेवः (सार्षेदी.) (Kavaṣa Ailūṣaḥ [Ssb. Sas.]; Vāmadevaḥ [Sad.])

१. विश्वेदेवाः (साग्री. सास्वा.); इन्द्रः (सार्षेदी.) (Viśvedevāḥ [Ssb. Sas.]; Indraḥ [Sad.])- सा. (Sv.) ४५३

वि स्रुतयो यथा पथा इन्द्र त्वद्यन्तु रातयः ॥७॥
*vi srutayo yathā pathā indra tvadyantu rātayaḥ //7 //*

## १६७. कवष ऐलूषः अक्षो वा मौजवान् (Kavaṣa Ailūṣaḥ Akṣo Vā Maujavān)

१. अक्ष कितवनिन्दा (Akṣa Kitavanindā) - ऋ. (Rv.) १०.३४.२-६; ८; १०; १४

ऋ. (Rv.) १०.३४.२-६

न मा मिमेथ न जिहीळ एषा शिवा सखिभ्य उत मह्यमासीत् ।
अक्षस्याहमेकपरस्य हेतोरनुव्रतामप जायामरोधम् ॥२॥
द्वेष्टि श्वश्रूरप जाया रुणद्धि न नाथितो विन्दते मर्डितारम् ।
अश्वस्येव जरतो वस्न्यस्य नाहं विन्दामि कितवस्य भोगम् ॥३॥
अन्ये जायां परि मृशन्त्यस्य यस्यागृधद्वेदने वाज्य१क्षः ।
पिता माता भ्रातर एनमाहुर्न जानीमो नयता बद्धमेतम् ॥४॥
यदादीध्ये न दविषाण्येभिः परायद्भ्योऽव हीये सखिभ्यः ।
न्युप्ताश्च बभ्रवो वाचमक्रतँ एमीदेषां निष्कृतं जारिणीव ॥५॥
सभामेति कितवः पृच्छमानो चेष्यामीति तन्वा३ शूशुजानः ।
अक्षासो अस्य वि तिरन्ति कामं प्रतिदीव्ने दधत आ कृतानि ॥६॥
*na mā mimetha na jihīḷa eṣā śivā sakhibhya uta mahyamāsīt /*
*akṣasyāhamekaparasya hetoranuvratāmapa jāyāmarodham //2 //*
*dveṣṭi śvaśrūrapa jāyā ruṇaddhi na nāthito vindate marḍitāram /*
*aśvasyeva jarato vasnyasya nāhaṁ vindāmi kitavasya bhogam //3 //*
*anye jāyāṁ pari mṛśantyasya yasyāgṛdhadvedane vājya1kṣaḥ /*
*pitā mātā bhrātara enamāhurna jānīmo nayatā baddhametam //4 //*
*yadādīdhye na daviṣāṇyebhiḥ parāyadbhyo'va hīye sakhibhyaḥ /*
*nyuptāścha babhravo vāchamakrataṁ emīdeṣāṁ niṣkṛtaṁ jāriṇīva //5 //*
*sabhāmeti kitavaḥ pṛchchhamāno cheṣyāmīti tanvā3 śūśujānaḥ /*
*akṣāso asya vi tiranti kāmaṁ pratidīvne dadhata ā kṛtāni //6 //*

ऋ. (Rv.) १०.३४.८

त्रिपंचाशः क्रीळति व्रात एषां देव इव सविता सत्यधर्मा ।
उग्रस्य चिन्मन्यवे ना नमन्ते राजा चिदेभ्यो नम इतकृणोति ॥८॥
*tripaṁchāśaḥ krīḷati vrāta eṣāṁ deva iva savitā satyadharmā /*
*ugrasya chinmanyave nā namante rājā chidebhyeā nama itakṛṇoti //8 //*

ऋ. (Rv.) १०.३४.१०

जाया तप्यते कितवस्य हीना माता पुत्रस्य चरतः क्व स्वित् ।
ऋणावा बिभ्यद्धनमिच्छमानोऽन्येषामस्तमुप नक्तमेति ॥१०॥
*jāyā tapyate kitavasya hīnā mātā putrasya charataḥ kva svit /*
*ṛṇāvā bibhyaddhanamichchhamāno'nyeṣāmastamupa naktameti //10 //*

ऋ. (Rv.) १०.३४.१४

मित्रं कृणुध्वं खलु मृळता नो मा नो घोरेण चरताभि धृष्णु ।
नि वो नु मन्युर्विशतामरातिरन्यो बभ्रूणां प्रसितौ न्वस्तु ॥१४॥
*mitraṁ kṛṇudhvaṁ khalu mṛḷatā no mā no ghoreṇa charatābhi dhṛṣṇu /*
*ni vo nu manyurviśatāmarātiranyo babhrūṇāṁ prasitau nvastu //14 //*

२. अक्ष कृषिप्रशंसा (Akṣa Kṛṣipraśaṁsā) - ऋ. (Rv.) १०.३४.१; ७; ९; १२; १३

ऋ. (Rv.) १०.३४.१

प्रावेपा मा बृहतो मादयन्ति प्रवातेजा इरिणे वर्वृतानाः ।
सामेस्येव मौजवतस्य भक्षो विभीदको जागृविर्मह्यमच्छान् ॥१॥
*prāvepā mā bṛhato mādayanti pravātejā iriṇe varvṛtānāḥ /*
*sāmesyeva maujavatasya bhakṣo vibhīdako jāgṛvirmahyamachchhān //1 //*

ऋ. (Rv.) १०.३४.७

अक्षास इदङ्कुशिनो नितो दिनो निकृत्वानस्तपनास्तापयिष्णवः ।
कुमारदेष्णा जयतः पुनर्हणो मध्वा सम्पृक्ताः कितवस्य बर्हणा ॥७॥
*akṣāsa idaṅkuśino nito dino nikṛtvānastapanāstāpayiṣṇavaḥ /*
*kumāradeṣṇā jayataḥ punarhaṇo madhvā sampṛktāḥ kitavasya barhaṇā //7 //*

ऋ. (Rv.) १०.३४.९

नीचा वर्तन्त उपरि स्फुरन्त्यहस्तासो हस्तवन्तं सहन्ते ।
दिव्या अंगारा इरिणे न्युप्ताः शीताः सन्तो हृदयें निर्दहन्ति ॥९॥
*nīchā vartanta upari sphurantyahastāso hastavantaṁ sahante /*
*divyā aṁgārā iriṇe nyuptāḥ śītāḥ santo hṛdayeṁ nirdahanti //9 //*

ऋ. (Rv.) १०.३४.१२-१३

यो वः सेनानीर्महतो गणस्य राजा व्रातस्य प्रथमो बभूव ।
तस्मै कृणोमि न धना रुणध्मि दशाहं प्राचीस्तदृतं वदामि ॥१२॥
अक्षैर्मा दीव्यः कृषिमित्कृषस्व वित्ते रमस्व बहु मन्यमानः ।
तत्र गावः कितव तत्र जाया तन्मे वि चष्टे सवितायमर्यः ॥१३॥
*yo vaḥ senānīrmahato gaṇasya rājā vrātasya prathamo babhūva /*
*tasmai kṛṇomi na dhanā ruṇadhmi daśāhaṁ prāchīstadṛtaṁ vadāmi //12 //*
*akṣairmā dīvyaḥ kṛṣimitkṛṣasva vitte ramasva bahu manyamānaḥ /*
*tatra gāvaḥ kitava tatra jāyā tanme vi chaṣṭe savitāyamaryaḥ //13 //*

## १६८. कविः (Kaviḥ)

१. पवमानः सोमः (Pavamānaḥ Somaḥ) - ऋ. (Rv.) ९.७५.१-५; ९.७६.१-५; ९.७७.-५; ९.७८.१-५; ९.७९.१-५

ऋ. (Rv.) ९.७५.१-५

अभि प्रियाणि पवते चनोहितो नामानि यह्वो अधि येषु वर्धते ।
आ सूर्यस्य बृहतो बृहन्नधि रथं विष्वंचमरुहद्विचक्षणः ॥१॥
ऋतस्य जिह्वा पवते मधु प्रियं वक्ता पतिर्धियो अस्या अदाभ्यः ।
दधति पुत्रः पित्रोरपीच्यं१ नाम तृतीयमधि रोचने दिवः ॥२॥
अव द्युतानः कलशाँ अचिक्रदन्नृभिर्येमानः कोश आ हिरण्यये ।
अभीमृतस्य दोहना अनूषताधि त्रिपृष्ठ उषसो वि राजति ॥३॥
अद्रिभिः सुतो मातिभिश्चनोहितः प्ररोचयन्रोदसी मातरा शुचिः ।
रोमाण्यव्या समया वि धावति मधोर्धारा पिन्वमाना दिदिवे ॥४॥
परि सोम प्र धन्वा स्वस्तये नृभिः पुनानो अभि वासयाशिरम् ।
ये ते मदा आहनसो विहायस्तेभिरिन्द्रं चोदय दातवे मघम् ॥५॥
*abhi priyāṇi pavate chanohito nāmāni yahno adhi yeṣu vardhate /*
*ā sūryasya bṛhato bṛhannadhi rathaṁ viṣvaṁchamaruhadvichakṣaṇaḥ //1 //*

*ṛtasya jihnā pavate madhu priyaṁ vaktā patirdhiyo asyā adābhyaḥ* ।
*dadhati putraḥ pitrorapīchyaṁ1 nāma tṛtīyamadhi rochane divaḥ* ॥2॥
*ava dyutānaḥ kalaśām̐ achikradannṛbhiryemānaḥ kośa ā hiraṇyaye* ।
*abhīmṛtasya dohanā anūṣatādhi tripṛṣṭha uṣaso vi rājati* ॥3॥
*adribhiḥ suto mātibhiśchanohitaḥ prarochayannodasī mātarā śuchiḥ* ।
*romāṇyavyā samayā vi dhāvati madhordhārā pinvamānā didive* ॥4॥
*pari soma pra dhanvā svastaye nṛbhiḥ punāno abhi vāsayāśiram* ।
*ye te madā āhanaso vihāyastebhirindraṁ chodaya dātave magham* ॥5॥

ऋ. (Rv.) ९.७६.१-५

धर्ता दिवः पवते कृत्व्यो रसो दक्षो देवानामनुमाद्यो नृभिः ।
हरिः सृजानो अत्यो न सत्वभिर्वृथा पाजांसि कृणुते नदीष्वा ॥१॥
शूरो न धत्त आयुधा गभस्त्योः स्वः सिषासन्नथिरो गविष्टिषु ।
इन्द्रस्य शुष्ममीरयन्नपस्युभिरिन्दुर्हिन्वानो अज्यते मनीषिभिः ॥२॥
इन्द्रस्य सोम पवमान ऊर्मिणा तविष्यमाणो जठरेष्वा विश ।
प्रणः पिन्व विद्युदभ्रेव रोदसी धिया न वाजाँ उप मासि शश्वतः ॥३॥
विश्वस्य राजा पवते स्वर्दृशं ऋतस्य धीतिमृषिषाळवीवशत् ।
यः सूर्यस्यासिरेण मृज्यते पिता मतीनामसमष्टकाव्यः ॥४॥
वृषेव यूथा परि कोशमर्षस्यपामुपस्थे वृषभः कनिक्रदत् ।
स इन्द्राय पवसे मत्सरिन्तमो यथा जेषाम समिथे त्वोतयः ॥५॥

*dhartā divaḥ pavate kṛtvyo raso dakṣo devānāmanumādyo nṛbhiḥ* ।
*hariḥ sṛjāno atyo na satvabhirvṛthā pājāṁsi kṛṇute nadīṣvā* ॥1॥
*śūro na dhatta āyudhā gabhastyoḥ svaḥ siṣāsannathiro gaviṣṭiṣu* ।
*indrasya śuṣmamīrayannapasyubhirindurhinvāno ajyate manīṣibhiḥ* ॥2॥
*indrasya soma pavamāna ūrmiṇā taviṣyamāṇo jaṭhareṣvā viśa* ।
*praṇaḥ pinva vidyudabhreva rodasī dhiyā na vājām̐ upa māsi śaśchataḥ* ॥3॥
*viśvasya rājā pavate svardṛśaṁ ṛtasya dhītimṛṣiṣāḷavīvaśat* ।
*yaḥ sūryasyāsireṇa mṛjyate pitā matīnāmasamaṣṭakāvyaḥ* ॥4॥
*vṛṣeva yūthā pari kośamarṣasyapāmupasthe vṛṣabhaḥ kanikradat* ।
*sa indrāya pavase matsarintamo yathā jeṣāma samithe tvotayaḥ* ॥5॥

ऋ. (Rv.) ९.७७.-५

एष प्र कोशे मधुमाँ अचिक्रददिन्द्रस्य वज्रो वपुषो वपुष्टरः ।
अभीमृतस्य सुदुघा घृतश्चुतो वाश्रा अर्षन्ति पयसेव धेनवः ॥१॥
स पूर्व्यः पवते यं दिवस्परि श्येनो मथायदिषितस्तिरो रजः ।
स मध्व आ युवते वेविजान इत्कृशानोरस्तुर्मनसाह बिभ्युषा ॥२॥
ते नः पूर्वास उपरास इन्दवो महे वाजाय धन्वन्तु गोमते ।
ईक्षेण्यासो अह्यो३न चारवो ब्रह्मब्रह्म ये जुजुषुर्हविर्हविः ॥३॥
अयं नो विद्वान्वनवद्वनुष्यत इन्दुः सत्राचा मनसा पुरुष्टुतः ।
इनस्य यः सदने गर्भमादधे गवामुरुब्जमभ्यर्षति व्रजम् ॥४॥
चाक्रिर्दिवः पवते कृत्व्यो रसो महाँ अदब्धो वरुणो हुरुग्यते ।
असावि मित्रो वृजनेषु यियोऽत्यो न यूथे वृषयुः कनिक्रदत् ॥५॥

*eṣa pra kośe madhumām̐ achikradadindrasya vajro vapuṣo vapuṣṭaraḥ* ।
*abhīmṛtasya sudughā ghṛtaśchuto vāśrā arṣanti payaseva dhenavaḥ* ॥1॥
*sa pūrvyaḥ pavate yaṁ divaspari śyeno mathāyadiṣitastiro rajaḥ* ।
*sa madhva ā yuvate vevijāna itkṛśānorasturmanasāha bibhyuṣā* ॥2॥
*te naḥ pūrvāsa uparāsa indavo mahe vājāya dhanvantu gomate* ।
*īkṣeṇyāso ahyo3na chāravo brahmabrahma ye jujuṣurhavirhaviḥ* ॥3॥
*ayaṁ no vidvānvanavadvanuṣyata induḥ satrāchā manasā puruṣṭutaḥ* ।
*inasya yaḥ sadane garbhamādadhe gavāmurubjamabhyarṣati vrajam* ॥4॥

*chākrirdivaḥ pavate kṛtvyo raso mahām̐ adabdho varuṇo hurugyate* ।
*asāvi mitro vṛjaneṣu yiāyo'tyo na yūthe vṛṣayuḥ kanikradat* ॥5॥

ऋ. (Rv.) ९.७८.१-५

प्र राजा वाचं जनयन्नसिष्यददपो वसानो अभि गा इयक्षति ।
गृभ्णाति रिप्रमविरस्य तान्वा शुद्धो देवानामुप याति निष्कृतभ् ॥१॥
इन्द्राय सोम परि षिच्यसे नृभिर्नृचक्षा ऊर्मिः कविरज्यसे वने ।
पूर्वीहि ते स्रुतयः सन्ति यातवे सहस्रमश्वा हरयश्चमूषदः ॥२॥
समुद्रिया अप्सरसो मनीषिणमासीना अन्तरभि सोमक्षरन् ।
ता ई हिन्वन्ति हर्म्यस्य सक्षणिं याचन्ते सुम्नं पवमानमक्षितम् ॥३॥
गोजिन्नःसोमो रथजिद्धिरण्यजित्स्वर्जिदब्जित्पवते सहस्रजित् ।
यं देवसश्चक्रिरे पीतये मदं स्वादिष्ठं द्रप्समरुणं मयोभुवम् ॥४॥
एतानि सोम पवमानो अस्मयुः सत्यानि कृण्वन्द्रविणान्यर्षसि ।
जहि शुत्रुमन्तिके दूरके च य उर्वी गव्यूतिमभयं च नस्कृधि ॥५॥

*pra rājā vācham̐ janayannasiṣyadadapo vasāno abhi gā iyakṣati* ।
*gṛbhṇāti ripramavirasya tānvā śuddho devānāmupa yāti niṣkṛtabh* ॥1॥
*indrāya soma pari ṣichyase nṛbhirnṛchakṣā ūrmiḥ kavirajyase vane* ।
*pūrvīhi te srutayaḥ santi yātave sahasramaśvā harayaśchamūṣadaḥ* ॥2॥
*samudriyā apsaraso manīṣiṇamāsīnā antarabhi somakṣaran* ।
*tā ī hinvanti harmyasya sakṣaṇim̐ yāchante sumnam̐ pavamānamakṣitam* ॥3॥
*gojinnaḥsomo rathajiddhiraṇyajitsvarjidabjitpavate sahasrajit* ।
*yam̐ devasaśchakrire pītaye madam̐ svādiṣṭham̐ drapsamaruṇam̐ mayobhuvam* ॥4॥
*etāni soma pavamāno asmayuḥ satyāni kṛṇvandraviṇānyarṣasi* ।
*jahi śutrumantike dūrake cha ya urvī gavyūtimabhayam̐ cha naskṛdhi* ॥5॥

ऋ. (Rv.) ९.७९.१-५

अचोदसो नो धन्वन्त्विन्दवः प्र सुवानासो बृहद्दिवेषु हरयः ।
वि च नशन्न इषो अरातयोऽर्यो नशन्त सनिषन्त नो धियः ॥१॥
प्र णो धन्वन्त्विन्दवो मदच्युतो धना वा येभिरर्वतो जुनीमसि ।
तिरो मर्तस्य कस्य चित्परिह्वृतिं वयं धनानि विश्वधा भरेमहि ॥२॥
उत स्वस्या अरात्या अरिर्हि ष उतान्यस्या अरात्या वृको हि षः ।
धन्वन्न तृष्णा समरीत ताँ अभि सोम जहि पवमान दुराध्यः ॥३॥
दिवि ते नाभा परमो य आददे पृथिव्यास्ते रुरुहुः सानवि क्षिपः ।
अद्रयस्त्वा बप्सति गोरधि त्वच्य१प्सु त्वा हस्तैर्दुदुहुर्मनीषिणः ॥४॥
एवा त इन्दो सुभ्वं सुपेशसं रसं तुंजन्ति प्रथमा अभिश्रियः ।
निदनिदं पवमान नि तारिष आविस्ते शुष्मो भवतु प्रियो मदः ॥५॥

*achodaso no dhanvantvindavaḥ pra suvānāso bṛhaddiveṣu harayaḥ* ।
*vi cha naśanna iṣo arātayo'ryo naśanta saniṣanta no dhiyaḥ* ॥1॥
*pra ṇo dhanvantvindavo madachyuto dhanā vā yebhirarvato junīmasi* ।
*tiro martasya kasya chitparihnṛtim̐ vayam̐ dhanāni viśvadhā bharemahi* ॥2॥
*uta svasyā arātyā arirhi ṣa utānyasyā arātyā vṛko hi ṣaḥ* ।
*dhanvanna tṛṣṇā samarīta tām̐ abhi soma jahi pavamāna durādhyaḥ* ॥3॥
*divi te nābhā paramo ya ādade pṛthivyāste ruruhuḥ sānavi kṣipaḥ* ।
*adrayastvā bapsati goradhi tvachya1psu tvā hastairduduhurmanīṣiṇaḥ* ॥4॥
*evā ta indo subhvam̐ supeśasam̐ rasam̐ tum̐janti prathamā abhiśriyaḥ* ।
*nidanidam̐ pavamāna ni tāriṣa āviste śuṣmo bhavatu priyo madaḥ* ॥5॥

## १६९. कविर् भार्गवः (Kavir Bhārgavaḥ)

१. पवमानः सोमः (Pavamānaḥ Somaḥ) - ऋ. (Rv.) ९.४७.१-५; ९.४८.१-५; ९.४९.१-५; सा. (Sv.) ५०७; ५५४-५५६; ५५८; ७००-७०२ ; ८३६-८४०; १२२८-१२३०; १४३५-१४३९

ऋ. (Rv.) ९.४७.१-५

अया सोमः सुकृत्यया महश्चिदभ्यवर्धत। मन्दान उद्वृषायते ॥१॥
कृतानीदस्य कर्त्वा चेतन्ते दस्युतर्हणा। ऋणा च धृष्णुश्चयते ॥२॥
आत्सोम इन्द्रियो रसो वज्रः सहस्रसा भुवत्। उक्थं यदस्य जायते ॥३॥
स्वयं कविर्विधर्तरि विप्राय रत्नमिच्छति। यदी मर्मृज्यते धियः ॥४॥
सिषासतू रयीणां वाजेष्वर्वतामिव। भरेषु जिग्युषामसि ॥५॥

*ayā somaḥ sukṛtyayā mahaśchidabhyavardhata | mandāna udvṛṣāyate ||1 ||*
*kṛtānīdasya kartvā chetante dasyutarhaṇā | ṛṇā cha dhṛṣṇuśchayate ||2 ||*
*ātsoma indriyo raso vajraḥ sahasrasā bhuvat | uktham̐ yadasya jāyate ||3 ||*
*svayam̐ kavirvidhartari viprāya ratnamichchhati | yadī marmṛjyate dhiyaḥ ||4 ||*
*siṣāsatū rayīṇām̐ vājeṣvarvatāmiva | bhareṣu jigyuṣāmasi ||5 ||*

ऋ. (Rv.) ९.४८.१-५

तं त्वा नृम्णनि बिभ्रतं सधस्थेषु महो दिवः। चारुं सुकृत्ययेमहे ॥१॥
संवृक्तधृष्णुमृक्थ्यं महामहिव्रतं मदम्। शतं पुरो रुरुक्षणिम् ॥२॥
अतस्त्वा रयिमभि राजानं सुक्रतो दिवः। सुपर्णो अव्यथिर्भरत् ॥३॥
विश्वस्मा इत्स्वर्दृशे साधरणं रजस्तुरम्। गोपामृतस्य विर्भरत् ॥४॥
अधा हिन्वान् इन्द्रियं ज्यायो महित्वमानशे। अभिष्टिकृद्विचर्षणि ॥५॥

*tam̐ tvā nṛmṇani bibhratam̐ sadhastheṣu maho divaḥ | chārum̐ sukṛtyayemahe ||1 ||*
*sam̐vṛktadhṛṣṇumṛkthyam̐ mahāmahivratam̐ madam | śatam̐ puro rurukṣaṇim ||2 ||*
*atastvā rayimabhi rājānam̐ sukrato divaḥ | suparṇo avyathirbharat ||3 ||*
*viśvasmā itsvardṛśe sādharaṇam̐ rajasturam | gopāmṛtasya virbharat ||4 ||*
*adhā hinvān indriyam̐ jyāyo mahitvamānaśe | abhiṣṭikṛdvicharṣaṇi ||5 ||*

ऋ. (Rv.) ९.४९.१-५

पवस्व वृष्टिमा सु नोऽपामूर्मिं दिवस्परि। अयक्ष्मा बृहतीरिषः ॥१॥
तया पवस्व धारया यया गाव इहागमन्। जन्यास उप नो गृहम् ॥२॥
घृतं पवस्व धारया योषु देववीतमः। अस्मभ्यं वृष्टिमा पव ॥३॥
स न ऊर्जे व्य१ व्ययं पवित्रं धाव धारया। देवासः श्रृणवन्हि कम् ॥४॥
पवमानो असिष्यदद्रक्षांस्यजपङ्घनत्। प्रत्नवद्रोचयन् रुचः ॥५॥

*pavasva vṛṣṭimā su no'pāmūrmi divaspari | ayakṣamā bṛhatīriṣaḥ ||1 ||*
*tayā pavasva dhārayā yayā gāva ihāgaman | janyāsa upa no gṛham ||2 ||*
*ghṛtam̐ pavasva dhārayā yoṣu devavītamaḥ | asmabhyam̐ vṛṣṭimā pava ||3 ||*
*sa na ūrje vya1 vyayam̐ pavitram̐ dhāva dhārayā | devāsaḥ śṛṇavanhi kam ||4 ||*
*pavamāno asiṣyadadrakṣām̐syajapaṅghanat | pratnavadvochayan ruchaḥ ||5 ||*

सा. (Sv.) ५०७

अया सोम सुकृत्यया महान्त्सन्न भ्यवर्धथाः। मन्दान इद् वृषायसे ॥११॥

*ayā soma sukṛtyayā mahāntsanna bhyavardhathāḥ | mandāna id vṛṣāyase ||11 ||*

सा. (Sv.) ५५४-५५६

अभि प्रियाणि पवते चनोहितो नामानि यह्वो अधि येषु वर्धते ।
आ सूर्यस्य बृहतो बृहन्नधि रथं विष्वञ्चमरुहद्विचक्षणः ॥१॥
अचोदसो नो धन्वन्त्विन्दवः प्र स्वानासो बृहद्देवेषु हरयः ।
वि चिदश्नाना इषयो अरातयोऽर्यो नः सन्तु सनिषन्तु नो धियः ॥२॥
एष प्र कोशे मधुमाँ अचिक्रददिन्द्रस्य वज्रो वपुषो वपुष्टमः ।
अभ्यृ३तस्य सुदुघा घृतश्चुतो वाश्रा अर्षन्ति पयसा च धेनवः ॥३॥

*abhi priyāṇi pavate chanohito nāmāni yahno adhi yeṣu vardhate ।*
*ā sūryasya bṛhato bṛhannadhi rathaṁ viṣvaśchamaruhadvichakṣaṇaḥ ॥1॥*
*achodaso no dhanvantvindavaḥ pra svānāso bṛhaddeveṣu harayaḥ ।*
*vi chidaśnānā iṣayo arātayo'ryo naḥ santu saniṣantu no dhiyaḥ ॥2॥*
*eṣa pra kośe madhumām̐ achikradadindrasya vajro vapuṣo vapuṣṭamaḥ ।*
*abhyṛ3tasya sudughā ghṛtaśchuto vāśrā arṣanti payasā cha dhenavaḥ ॥3॥*

सा. (Sv.) ५५८

धर्ता दिवः पवते कृत्व्यो रसो दक्षो देवानामनुमाद्यो नृभिः ।
हरिः सृजानो अत्यो न सत्वभिर्वृथा पाजांसि कृणुषे नदीष्वा ॥५॥
*dhartā divaḥ pavate kṛtvyo raso dakṣo devānāmanumādyo nṛbhiḥ ।*
*hariḥ sṛjāno atyo na satvabhirvṛthā pājāṁsi kṛṇuṣe nadīṣvā ॥5॥*

सा. (Sv.) ७००-७०२

अभि प्रियाणि पवते चनोहितो नामानि यह्वो अधि येषु वर्धते ।
आ सूर्यस्य बृहतो बृहन्नधि रथं विष्वंचमरुहद्विचक्षणः ॥१॥
ऋतस्य जिह्वा पवते मधु प्रियं वक्ता पतिर्धियो अस्या अदाभ्यः ।
दधाति पुत्रः पित्रोरपीच्यां३नाम तृतीयमधि रोचनं दिवः ॥२॥
अव द्युतानः कलशाँ अचिक्रदन्नृभिर्येमाणः कोश आ हिरण्यये ।
अभी ऋतस्य दोहना अनूषताधि त्रिपृष्ठ उषसो वि राजसि ॥३॥
*abhi priyāṇi pavate chanohito nāmāni yahno adhi yeṣu vardhate ।*
*ā sūryasya bṛhato bṛhannadhi rathaṁ viṣvaṁchamaruhadvichakṣaṇaḥ ॥1॥*
*ṛtasya jihnā pavate madhu priyaṁ vaktā patirdhiyo asyā adābhyaḥ ।*
*dadhāti putraḥ pitrorapīchyām̐3nāma tṛtīyamadhi rochanaṁ divaḥ ॥2॥*
*ava dyutānaḥ kalaśām̐ achikradannṛbhiryemāṇaḥ kośa ā hiraṇyaye ।*
*abhī ṛtasya dohanā anūṣatādhi tripṛṣṭha uṣaso vi rājasi ॥3॥*

सा. (Sv.) ८३६-८४०

तं त्वा नृम्णानि बिभ्रतं सधस्थेषु महो दिवः चारुं सुकृत्ययेमहे ॥१॥
संवृक्तधृष्णुमुक्थ्यं महामहिव्रतं मदम्। शतं पुरो रुरुक्षणिम् ॥२॥
अतस्त्वा रयिरभ्ययद्राजानं सृक्रतो दिवः सुपर्णो अव्यथी भरत् ॥३॥
अध हिन्वान इन्द्रियं ज्यायो महित्वमानशे। अभिष्टिकृद्विचर्षणिः ॥४॥
विश्वस्मा इत् स्वर्दृशे साधारणं रजस्तुरम्। गोपामृतस्य विर्भरत् ॥५॥
*taṁ tvā nṛmṇāni bibhrataṁ sadhastheṣu maho divaḥ chāruṁ sukṛtyayemahe ॥1॥*
*saṁvṛktadhṛṣṇumukthyaṁ mahāmahivrataṁ madam । śataṁ puro rurukṣaṇim ॥2॥*
*atastvā rayirabhyayadrājānaṁ sṛkrato divaḥ suparṇo avyathī bharat ॥3॥*
*adha hinvāna indriyaṁ jyāyo mahitvamānaśe । abhiṣṭikṛdvicharṣaṇiḥ ॥4॥*
*viśvasmā it svardṛśe sādhāraṇaṁ rajasturam । gopāmṛtasya virbharat ॥5॥*

सा. (Sv.) १२२८-१२३०

धर्ता दिवः पवते कृत्व्यो रसो दक्षो देवानामनुमाद्यो नृभिः ।
हरिः सृजानो अत्यो न सत्वभिर्वृथा पाजांसि कृणुषे नदीष्वा ॥१॥
शूरो न धत्त आयुधा गभस्त्योः स्वाः३ सिषासन्रथिरो गविष्टिषु ।
इन्द्रस्य शुष्ममीरयन्नपस्युभिरिन्दुर्हिन्वानो अजयते मनीषिभिः ॥२॥
इन्द्रस्य सोम पवमान ऊर्मिणा तविष्यमाणो जठरेष्वा विश ।
प्र नः पिन्व विद्युदभ्रेव रोदसी धिया नो वाजाँ उप माहि शश्वतः ॥३॥
*dhartā divaḥ pavate kṛtvyo raso dakṣo devānāmanumādyo nṛbhiḥ ।*
*hariḥ sṛjāno atyo na satvabhirvṛthā pājāṁsi kṛṇuṣe nadīṣvā ॥1॥*
*śūro na dhatta āyudhā gabhastyoḥ svāḥ3 siṣāsanrathiro gaviṣṭiṣu ।*
*indrasya śuṣmamīrayannapasyubhirindurhinvāno ajayate manīṣibhiḥ ॥2॥*
*indrasya soma pavamāna ūrmiṇā taviṣyamāṇo jaṭhareṣvā viśa ।*

*pra naḥ pinva vidyudabhreva rodasī dhiyā no vājām̐ upa māhi śaśvataḥ ॥3 ॥*

सा. (Sv.) १४३५-१४३९

पवस्व वृष्टिमा सुनोऽपामूर्मिं दिवस्परि। अयक्ष्मा बृहतीरिषः ॥१॥
तया पवस्व धारया यया गाव इहागमन्। जन्यास उप नो गृहम् ॥२॥
घृतं पवस्व धारया योषु देववीतमः। अस्मभ्यं वृष्टिमा पव ॥३॥
स न ऊर्जे व्य३व्ययं पवित्रं धाव धारया। देवासः शृणवन् हि कम्॥४॥
पवमानो असिष्यदद्रक्षांस्यपजङ्घनत्। प्रत्नवद्रोचयन्रुचः॥५॥

*pavasva vṛṣṭimā suno'pāmūrmi divaspari । ayakṣamā bṛhatīriṣaḥ ॥1 ॥*
*tayā pavasva dhārayā yayā gāva ihāgaman । janyāsa upa no gṛham ॥2 ॥*
*ghṛtaṁ pavasva dhārayā yoṣu devavītamaḥ । asmabhyaṁ vṛṣṭimā pava ॥3 ॥*
*sa na ūrje vya3vyayaṁ pavitraṁ dhāva dhārayā । devāsaḥ śṛṇavan hi kam ॥4 ॥*
*pavamāno asiṣyadadrakṣāṁsyapajaṅghanat । pratnavadrochayanruchaḥ ॥5 ॥*

## १७०. कश्यपः (Kaśyapaḥ)

१. पवमानः सोमः (Pavamānaḥ Somaḥ) - ऋ. (Rv.) ९.६४.१-३०; ९.६७.४-६; ९.९१.१-६; ९.११३.१-११; ९.११४.१-४; सा. (Sv.) ९५६

ऋ. (Rv.) ९.६४.१-३०

वृषा सोम द्युमाँ असि वृषा देव वृषव्रतः। वृषा धर्माणि दधिषे ॥१॥
वृष्णस्ते वृष्ण्यं शवो वृषा वनं वृषा मदः। सत्यं वृषन् वृषेदसि ॥२॥
अश्वो न चक्रदो वृषा सं गा इन्दो समर्वतः। वि नो राये दुरो वृधि॥३॥
असृक्षत प्र वाजिनो गव्या सोमासो अश्वया। शुक्रासो वीरयाशवः ॥४॥
शुम्भमाना ऋतायुभिर्मृज्यमाना गभस्त्योः। पवन्ते वारे अव्यये ॥५॥
ते विश्वा दाशुषे वसु सोमा दिव्यानि पार्थिवा। पवन्तामान्तरिक्ष्या ॥६॥
पवमानस्य विश्ववित्प्र ते सर्गा असृक्षत। सूर्यस्येव न रश्मयः ॥७॥
केतुं कृण्वन्दिवस्परि विश्वा रूपाभ्यर्षसि। समुद्रः सोम पिन्वसे ॥८॥
हिन्वानो वाचमिष्यसि पवमान विधर्मणि। अक्रान्देवो न सूर्यः ॥९॥
इन्दुः पविष्ट चेतनः प्रियः कवीनां मती। सृजदश्वं रथीरिव ॥१०॥
ऊर्मिर्यस्ते पवित्र आ देवावीः पर्यक्षरत्। सीदन्नृतस्य योनिमा ॥११॥
स नो अर्ष पवित्र आ मदो यो देववीतमः। इन्दविन्द्राय पीतये ॥१२॥
इषे पवस्व धारया मृज्यमानो मनीषिभिः। इन्द्रो रुचाभि गा इहि ॥१३॥
पुनानो वरिवस्कृध्यूर्ज जनाय गिर्वणः। हरे सृजान आशिरम् ॥१४॥
पुनानो देववीतय इन्द्रस्य याहि निष्कृतम्। द्युतानो वाजिभिर्यतः ॥१५॥
प्र हिन्वानास इन्दवोऽच्छा समुद्रमाशवः। धिया जूता असृक्षत ॥१६॥
मर्मृजानास आयवो वृथा समुद्रमिन्दवः। अग्मन्नृतस्य योनिमा ॥१७॥
परि णो याह्यसमयुर्विश्वा वसून्योजसा। पाहि नः शर्म वीरवत् ॥१८॥
मिमाति वह्निरेतशः पदं युजान ऋक्वभिः। प्र यत्समुद्र आहितः ॥१९॥
आ यद्योनिं हिरण्यमाशुऋर्तस्य सीदति। जहात्यप्रचेतसः ॥२०॥
अभि वेना अनूषतेयक्षन्ति प्रचेतसः मज्जन्त्यविचेतसः ॥२१॥
इन्द्रायेन्दो मरुत्वते पवस्व मधुमत्तमः। ऋतस्य योनिमासदम् ॥२२॥
तं त्वा विप्रा वचोविदः परिष्कृण्वन्ति वेधसः। सं त्वा मृजन्त्यायवः ॥२३॥
रसं ते मित्रो अर्यमा पिबन्ति वरुणः कवे। पवमानस्य मरुतः ॥२४॥
त्वं सोम विपश्चितं पुनानो वाचमिष्यसि। इन्दो सहस्रभर्णसम् ॥२५॥
उतो सहस्रभर्णसं वाचं सोम मखस्युवम्। पुनान इन्दवा भर ॥२६॥
पुनान इन्दवेषां पुरुहूत जनानाम्। प्रियः समुद्रमा विश ॥२७॥
दविद्युतत्या रुचा परिष्टोभन्त्या कृपा। सोमाः शुक्रा गवाशिरः ॥२८॥
हिन्वानो हेतृभिर्यत आ वाजं वाज्यक्रमीत्। सीदन्तो वनुषो यथा ॥२९॥
ऋधक्सोम स्वस्तये संजग्मानो दिवः कविः। पवस्व सूर्यो दृशे ॥३०॥

*vṛṣā soma dyumām̐ asi vṛṣā deva vṛṣavrataḥ । vṛṣā dharmāṇi dadhiṣe ॥1॥*
*vṛṣṇaste vṛṣṇyaṁ śavo vṛṣā vanaṁ vṛṣā madaḥ । satyaṁ vṛṣan vṛṣedasi ॥2॥*
*aśvo na chakrado vṛṣā saṁ gā indo samarvataḥ । vi no rāye duro vṛdhi ॥3॥*
*asṛkṣata pra vājino gavyā somāso aśvayā । śukrāso vīrayāśavaḥ ॥4॥*
*śumbhamānā ṛtāyubhirmṛjyamānā gabhastyoḥ । pavante vāre avyaye ॥5॥*
*te viśvā dāśuṣe vasu somā divyāni pārthivā । pavantāmāntarikṣayā ॥6॥*
*pavamānasya viśvavitpra te sargā asṛkṣata । sūryasyeva na raśmayaḥ ॥7॥*
*ketuṁ kṛṇvandisvapari viśvā rūpābhyarṣasi । samudraḥ soma pinvase ॥8॥*
*hinvāno vāchamiṣyasi pavamāna vidharmaṇi । akrāndevo na sūryaḥ ॥9॥*
*induḥ paviṣṭa chetanaḥ priyaḥ kavīnāṁ matī । sṛjadaśvaṁ rathīriva ॥10॥*
*ūrmiryaste pavitra ā devāvīḥ paryakṣarat । sīdannṛtasya yonimā ॥11॥*
*sa no arṣa pavitra ā mado yo devavītamaḥ । indravindrāya pītaye ॥12॥*
*iṣe pavasva dhārayā mṛjyamāno manīṣibhiḥ । indro ruchābhi gā ihi ॥13॥*
*punāno varivaskṛdhyūrja janāya girvaṇaḥ । hare sṛjāna āśiram ॥14॥*
*punāno devavītaya indrasya yāhi niṣkṛtam । dyutāno vājibhiryataḥ ॥15॥*
*pra hinvānāsa indavo'chchhā samudramāśavaḥ । dhiyā jūtā asṛkṣata ॥16॥*
*marmṛjānāsa āyavo vṛthā samudramindavaḥ । agmannṛtasya yonimā ॥17॥*
*pari ṇo yāhyasamayurviśvā vasūnyojasā । pāhi naḥ śarma vīravat ॥18॥*
*mimāti vahniretaśaḥ padaṁ yujāna ṛkvabhiḥ । pra yatsamudra āhitaḥ ॥19॥*
*ā yadyoniṁ hiraṇyamāśurṛtasya sīdati । jahātyaprachetasaḥ ॥20॥*
*abhi venā anūṣateyakṣanti prachetasaḥ majjantyavichetasaḥ ॥21॥*
*indrāyendo marutvate pavasva madhumattamaḥ । ṛtasya yonimāsadam ॥22॥*
*taṁ tvā viprā vachovidaḥ pariṣkṛṇvanti vedhasaḥ । saṁ tvā mṛjantyāyavaḥ ॥23॥*
*rasaṁ te mitro aryamā pibanti varuṇaḥ kave । pavamānasya marutaḥ ॥24॥*
*tvaṁ soma vipaśchitaṁ punāno vāchamiṣyasi । indo sahasrabharṇasam ॥25॥*
*uto sahasrabharṇasaṁ vāchaṁ soma makhasyuvam । punāna indavā bhara ॥26॥*
*punāna indaveṣāṁ puruhūta janānām । priyaḥ samudramā viśa ॥27॥*
*davidyutatyā ruchā pariṣṭobhantyā kṛpā । somāḥ śukrā gavāśiraḥ ॥28॥*
*hinvāno hetṛbhiryata ā vājaṁ vājyakramīt । sīdanto vanuṣo yathā ॥29॥*
*ṛdhaksoma svastaye saṁjagmāno divaḥ kaviḥ । pavasva sūryo dṛśe ॥30॥*

ऋ. (Rv.) ९.६७.४-६

इन्दुर्हिन्वानो अर्षति तिरो वाराण्यव्यया। हरिर्वाजमचिक्रदत् ॥४॥
इन्दो व्यव्यमर्षसि वि श्रवांसि वि सौभगा। वि वाजान्त्सोम गोमतः ॥५॥
आ न इन्दो शतग्विनं रयिं गोमन्तमश्विनम्। भरा सोम सहस्रिणम् ॥६॥

*indurhinvāno arṣati tiro vārāṇyavyayā । harirvājamachiknadat ॥4॥*
*indo vyavyamarṣasi vi śravāṁsi vi saubhagā । vi vājāntsoma gomataḥ ॥5॥*
*ā na indo śatagvinaṁ rayiṁ gomantamaśvinam । bharā soma sahasriṇam ॥6॥*

ऋ. (Rv.) ९.९१.१-६

असर्जि वक्वा रथ्ये यथाजौ धिया मनोता प्रथमो मनीषी ।
दश स्वसारो अधि सानो अव्येऽजन्ति वह्निं सदनान्यच्छ ॥१॥
वीती जनस्य दिव्यस्य कव्यैरधि सुवानो नहुष्येभिरिन्दुः ।
प्र यो नृभिरमृतो मर्त्येभिर्मर्मृजानोऽविभिर्गोभिरद्भिः ॥२॥
वृषा वृष्णे रोरुवदंशुरस्मै पवमानो रुशदीर्ते पयो गोः ।
सहस्रमृक्वा पथिभिर्वचोविदध्वस्मभिः सूरो अण्वं वि याति ॥३॥
रुजा दृळहा चिद्रक्षसः सदांसि पुनान इन्द ऊर्णुहि वि वाजान् ।
वृश्चोपरिष्टात्तुजता वधेन ये अन्ति दूरादुपनायमेषाम् ॥४॥
स प्रत्नवन्नव्यसे विश्ववार सूक्ताय पथः कृणुहि प्राचः ।
ये दुष्षहासो वनुषा बृहन्तस्ताँस्ते अश्याम पुरुकृत्पुरुक्षो ॥५॥

एवा पुनानो अपः स्व१र्गा अस्मभ्यं तोका तनयानि भूरि ।
शं नः क्षेत्रमुरु ज्योतींषि सोम ज्योङ्नः सूर्यं दृशये रिरीहि ॥६॥
*asarji vakvā rathye yathājau dhiyā manotā prathamo manīṣī /*
*daśa svasāro adhi sāno avye'janti vahniṁ sadanānyachchha //1 //*
*vītī janasya divyasya kavyairadhi suvāno nahuṣyebhirinduḥ /*
*pra yo nṛbhiramṛto martyebhirmarmṛjāno'vibhirgobhiradbhiḥ //2 //*
*vṛṣā vṛṣṇe roruvadaṁśurasmai pavamāno ruśadīrte payo goḥ /*
*sahasramṛkvā pathimirvachovidadhvasmabhiḥ sūro aṇvaṁ vi yāti //3 //*
*rujā dṛḷahā chidrakṣasaḥ sadāṁsi punāna inda ūrṇuhi vi vājān /*
*vṛśchopariṣṭāttujatā vadhena ye anti dūrādupanāyameṣām //4 //*
*sa pratnavannavyase viśvavāra sūktāya pathaḥ kṛṇuhi prāchaḥ /*
*ye duṣṣahāso vanuṣā bṛhantastāṁste aśyāma purukṛtpurukṣo //5 //*
*evā punāno apaḥ sva1rgā asmabhyaṁ tokā tanayāni bhūri /*
*śaṁ naḥ kṣetramuru jyotīṁṣi soma jyoṅnaḥ sūrya dṛśaye ririhi //6 //*

ऋ. (Rv.) ९.११३.१-११

शर्यणावति सोममिन्द्रः पिबतु वृत्रहा ।
बलं दधान आत्मनि करिष्यन्वीर्यं महदिन्द्रायेन्दो परि स्रव ॥१॥
आ पवस्व दिशां पत आर्जीकात्सोम मीढ्वः ।
ऋतवाकेन सत्येन श्रद्धया तपसा सुत इन्द्रायेन्दो परि स्रव ॥२॥
पर्जन्यवृद्धं महिषं तं सूर्यस्य दुहिताभरत् ।
तं गन्धर्वाः प्रत्यगृभ्णन्तं सोमे रसमादधुरिन्द्रायेन्दो परि स्रव ॥३॥
ऋतं वदन्नृतद्युम्न सत्यं वदन्त्सत्यकर्मन् ।
श्रद्धां वदन्त्सोम राजन्धात्रा सोम परिष्कृत इन्द्रायेन्दो परि स्रव ॥४॥
सत्यमुग्रस्य बृहतः सं स्रवन्ति संस्रावाः ।
सं यन्ति रसिनो रसाः पुनानो ब्रह्मणा हर इन्द्रायेन्दो परि स्रव ॥५॥
यत्र ब्रह्मा पवमान छन्दस्यां३ वाचं वदन् ।
ग्राव्णा सोमे महीयते सोमेनानन्दं जनयन्निन्द्रायेन्दो परि स्रव ॥६॥
यत्र ज्योतिरजस्रं यस्मिँल्लोके स्वर्हितम् ।
तस्मिन्मां धेहि पवमानामृते लोके अक्षित इन्द्रायेन्दो परि स्रव ॥७॥
यत्र राजा वैवस्वतो यत्रावरोधनं दिवः ।
यत्रामूर्यह्वतीरापस्तत्र माममृतं कृधीन्द्रायेन्दो परि स्रव ॥८॥
यत्रानुकामं चरणं त्रिनाके त्रिदिवे दिवः ।
लोका यत्र ज्योतिष्मन्तस्तत्र माममृतं कृधीन्द्रायेन्दो परि स्रव ॥९॥
यत्र कामा निकामाश्च यत्र ब्रध्नस्य विष्टपम् ।
स्वधा च यत्र तृप्तिश्च तत्र माममृतं कृधीन्द्रायेन्दो परि स्रव ॥१०॥
यत्रानदाश्च मोदाश्च मुदः प्रमुद आसते ।
कामस्य यत्राप्ताः कामास्तत्र माममृतं कृधीन्द्रायेन्दो परि स्रव ॥११॥
*śaryaṇāvati somamindraḥ pibatu vṛtrahā /*
*balaṁ dadhāna ātmani kariṣyanvīrya mahadindrāyendo pari srava //1 //*
*ā pavasva diśāṁ pata ārjīkātsoma mīḍhvaḥ /*
*ṛtavākena satyena śraddhayā tapasā suta indrāyendo pari srava //2 //*
*parjanyavṛddhaṁ mahiṣaṁ taṁ sūryasya duhitābharat /*
*taṁ gandhavāḥ pratyagṛbhṇantaṁ some rasamādadhurindrāyendo pari srava //3 //*
*ṛtaṁ vadannṛtadyumna satyaṁ vadantsatyakarman /*
*śraddhāṁ vadantsoma rājandhātrā soma pariṣkṛta indrāyendo pari srava //4 //*
*satyamugrasya bṛhataḥ saṁ sravanti saṁsrāvāḥ /*
*saṁ yanti rasino rasāḥ punāno brāhmaṇā hara indrāyendo pari srava //5 //*
*yatra brahmā pavamāna chhandasyāṁ3 vāchaṁ vadan /*

*grāvṇā some mahīyate somenānandaṁ janayannindrāyendo pari srava* //6 //
*yatra jyotirajasraṁ yasmiṁlloke svarhitam* /
*tasminmāṁ dhehi pavamānāmṛte loke akṣita indrāyendo pari srava* //7 //
*yatra rājā vaivasvato yatrāvarodhanaṁ divaḥ* /
*yatrāmūryahnatīrāpastatra māmamṛtaṁ kṛdhīndrāyendo pari srava* //8 //
*yatrānukāmaṁ charaṇaṁ trināke tridive divaḥ* /
*lokā yatra jyotiṣmantastatra māmamṛtaṁ kṛdhīndrāyendo pari srava* //9 //
*yatra kāmā nikāmāścha yatra bradhnasya viṣṭapam* /
*svadhā cha yatra tṛpśchi tatra māmamṛtaṁ kṛdhīndrāyendo pari srava* //10 //
*yatrānadāścha modāścha mudaḥ pramuda āsate* /
*kāmasya yatrāptāḥ kāmāstatra māmamṛtaṁ kudhīndrāyendo pari srava* //11 //

ऋ. (Rv.) ९.११४.१-४

य इन्दोः पवमानस्यानु धामान्यक्रमीत् ।
तमाहुः सुप्रजा इति यस्ते सोमाविधन्मन इन्द्रायेन्दो परि स्रव ॥१॥
ऋषे मन्त्रकृतां स्तोमैः कश्यपोद्वर्धयन्गिरः ।
सोमं नमस्य राजानं यो जाो वीरुधां परिरिन्द्रायेन्दो परि स्रव ॥२॥
सप्त दिशो नानासूर्याः सप्त होतार ऋत्विजः ।
देवा आदित्या ये सप्त तेभिः सोमाभि रक्ष न इन्द्रायेन्दो परि स्रव ॥३॥
यत्ते राजंछृतं हविस्तेन सोमाभि रक्ष नः ।
अरातीवा मा नस्तारीन्मो च नः चनाममदिन्द्रायेन्दो परि स्रव ॥४॥

*ya indoḥ pavamānasyānu dhāmānyakramīt* /
*tamāhuḥ suprajā iti yaste somāvidhanmana indrāyendo pari srava* //1 //
*ṛṣe mantrakṛtāṁ stomaiḥ kaśyapodvardhayangiraḥ* /
*somaṁ namasya rājānaṁ yo jāo vīrudhāṁ paririndrāyendo pari srava* //2 //
*sapta diśo nānāsūryāḥ sapta hotāra ṛtvijaḥ* /
*devā ādityā ye sapta tebhiḥ somābhi rakṣa na indrāyendo pari srava* //3 //
*yatte rājaṁchhṛtaṁ havistena somābhi rakṣa naḥ* /
*arātīvā mā nastārīnmo cha naḥ chanāmamadindrāyendo pari srava* //4 //

सा. (Sv.) ९५६

त्वं नृचक्षा असि सोम विश्वतः पवमान वृषभ ता वि धावसि ।
स नः पवस्व वसुमद्धिरण्यवद्धयंस्याम भुवनेषु जीवसे ॥२॥

*tvaṁ nṛchakṣā asi soma viśvataḥ pavamāna vṛṣabha tā vi dhāvasi* /
*sa naḥ pavasva vasumaddhiraṇyavaddhayaṁsyāma bhuvaneṣu jīvase* //2 //

२. ब्रह्मगवी (Brahmagavī) - अ. (Av.) १२.५(१).१-६; १२.५(२).७-११; १२.५(३).१२-२७; १२.५(४).२८-३८; १२.५(५).३४-४६; १२.५(६).४७-६१; १२.५(७).६२-७३

अ. (Av.) १२.५(१).१-६

श्रमेण तपसा सृष्टा ब्रह्मणा वित्तऋते श्रिता ॥१॥
सत्येनावृता श्रिया प्रावृता यशसा परीवृता ॥२॥
स्वधया परिहिता श्रद्धया पर्यूढा दीक्षया गुप्ता यो प्रतिष्ठिता लोको निधनम् ॥३॥
ब्रह्म पदवायं ब्रह्मणोऽधिपतिः ॥४॥
तामाददानस्य ब्रह्मगवीं जिनतो ब्राह्मणं क्षत्रियस्य ॥५॥
अप क्रामति सूनृता वीर्य१ पुण्या लक्ष्मीः ॥६॥

*śrameṇa tapasā sṛṣṭā brahmaṇā vittaṛte śritā* //1 //
*satyenāvṛtā śriyā prāvṛtā yaśasā parīvṛtā* //2 //
*svadhayā parihitā śraddhayā paryūḍhā dīkṣayā guptā yo pratiṣṭhitā loko nidhanam* //3 //
*brahma padavāyaṁ brahmaṇo'dhipatiḥ* //4 //

*tāmādadānasya brahmagavīṁ jinato brāhmaṇaṁ kṣatriyasya //5 //*
*apa krāmati sūnṛtā vīrya1 puṇyā lakṣamīḥ //6 //*

अ. (Av.) १२.५(२).७-११

ओजश्च तेजश्च सहश्च बलं च वाक् चेन्द्रियं च श्रीश्च धर्मश्च ॥७॥
ब्रह्म च क्षत्रं च राष्ट्रं च विशश्च त्विषिश्च यशश्च वर्चश्च द्रविणं च ॥८॥
आयुश्च रूपं च नाम च कीर्तिश्च प्राणश्चापानश्च चक्षुश्च श्रोत्रं च ॥९॥
पयश्च रसश्चान्नं चान्नाद्यं च ऋतं च सत्यं चेष्टं च पूर्तं च प्रजा च पशवश्च ॥१०॥
तानि सर्वाण्यप क्रामन्ति ब्रह्मगवीमाददानस्य जिनतो ब्राह्मणं क्षत्रियस्य ॥११॥

*Ojaścha tejaścha sahaścha balaṁ cha vāk chendriyaṁ cha śrīścha dharmaścha //7 //*
*brahma cha kṣatraṁ cha rāṣṭraṁ cha viśaścha tviṣiścha yaśaścha varchaścha draviṇaṁ cha //8 //*
*āyuścha rūpaṁ cha nāma cha kīrtiścha prāṇaśchāpānaścha chakṣuścha śrotraṁ cha //9 //*
*payaścha rasaśchānnaṁ chānnādyaṁ cha ṛtaṁ cha satyaṁ cheṣṭaṁ cha pūrta cha prajā cha paśavaścha //10 //*
*tāni sarvāṇyapa krāmanti brahmagavīmādadānasya jinato brāhmaṇaṁ kṣatriyasya //11 //*

अ. (Av.) १२.५(३).१२-२७

सैषा भीमा ब्रह्मगव्य१घविष साखात् कृत्या कूल्बजमावृता ॥१२॥
सर्वाण्यस्या घोराणि सर्वे च मृत्यवः ॥१३॥
सर्वाणस्यां क्रूराणि सर्वे पुरुषवधाः ॥१४॥
सा ब्रह्मज्यं देवपीयुं ब्रह्मगव्यादीयमाना मृत्योः पड्बीश आ द्यति ॥१५॥
मेनिः शतवधा हि सा ब्रह्मज्यस्य क्षितिर्हि सा ॥१६॥
तस्माद् वै ब्राह्मणानां गौर्दुराधर्षा विजानता ॥१७॥
वज्रो धावन्ती वैश्वानर उद्वीता ॥१८॥
हेतिः शफानुत्खिदन्ती महादेवो३पेक्षमाणा ॥१९॥
क्षुरपविरीक्षमाणा वाश्यमानाभि स्फूर्जति ॥२०॥
मृत्युर्हिङ्कृण्वत्यु१ग्रो देवः पुच्छं पर्यस्यन्ती ॥२१॥
सर्वज्यानिः कर्णौ वरीवर्जयन्ती राजयक्ष्मो मेहन्ती ॥२२॥
मेनिर्दुह्यमाना शीर्षक्तिर्दुग्धा ॥२३॥
सेदिरुपतिष्ठन्ती मिथोयोधः परामृष्टा ॥२४॥
शरव्या३ मुखेऽपिनह्यमान ऋतिर्हन्यमाना ॥२५॥
अघविषा निपतन्ती तमो निपतिता ॥२६॥
अनुगच्छन्ती प्राणानुप दासयति ब्रह्मगवी ब्रह्मज्यस्य ॥२७॥

*saiṣā bhīmā brahmagavya1ghaviṣa sākhāt kṛtyā kūlbajamāvṛtā //12 //*
*sarvāṇyasyā ghorāṇi sarve cha mṛtyavaḥ //13 //*
*sarvāṇasyāṁ krūrāṇi sarve puruṣavadhāḥ //14 //*
*sā brahmajyaṁ devapīyuṁ brahmagavyādīyamānā mṛtyoḥ paḍbīśa ā dyati //15 //*
*meniḥ śatavadhā hi sā brahmajyasya kṣitirhi sā //16 //*
*tasmād vai brāhmaṇānāṁ gaurdurādharṣā vijānatā //17 //*
*vajro dhāvantī vaiśvānara udvītā //18 //*
*hetiḥ śaphānutkhidantī mahādevo3pekṣamāṇā //19 //*
*kṣurapavirīkṣamāṇā vāśyamānābhi sphūrjati //20 //*
*mṛtyurhiṅkṛṇvatyu1gro devaḥ puchchhaṁ paryasyantī //21 //*
*sarvajyāniḥ karṇau varīvarjayantī rājayakṣamo mehantī //22 //*
*menirduhyamānā śīrṣaktirdugdhā //23 //*
*sedirupatiṣṭhantī mithoyodhaḥ parāmṛṣṭā //24 //*
*śaravyā3 mukhe'pinahyamāna ṛtirhanyamānā //25 //*

*aghaviṣā nipatantī tamo nipatitā //26 //*
*anugachchhantī prāṇānupa dāsayati brahmagavī brahmajyasya //27 //*

अ. (Av.) १२.५(४).२८-३८

वैरं विकृत्यमाना पौत्राद्यं विभाज्यमाना ॥२८॥
देवहेतिर्ह्रियमाणा व्यृद्धिर्हृता ॥२९॥
पाप्माधिधीयमाना पारुष्यमवधीयमाना ॥३०॥
विषं प्रयस्यन्ती तक्मा प्रयस्ता ॥३१॥
अघं पच्यमाना दुःष्वप्न्यं पक्वा ॥३२॥
मूलबर्हणी पर्याक्रियमाणा क्षितिः पर्याकृता ॥३३॥
असां गन्धेन शुगुद्ध्रियमाणाशीविष उद्धृता ॥३४॥
अभूतिरुपह्रियमाणा पराभूतिरुपहृता ॥३५॥
शर्वः क्रुद्धः पिश्यमाना शिमिदा पिशिता ॥३६॥
अवर्तिरश्यमाना निरृतिरशिता ॥३७॥
अशिता लोकाच्छिनत्ति ब्रह्मगवी ब्रह्मज्यमस्माच्चामुष्माच्च ॥३८॥

*vairaṁ vikṛtyamānā pautrādyaṁ vibhājyamānā //28 //*
*devahetirhirayamāṇā vyṛddhirhṛtā //29 //*
*pāpmādhidhīyamānā pāruṣyamavadhīyamānā //30 //*
*viṣaṁ prayasyantī takmā prayastā //31 //*
*aghaṁ pachyamānā duḥṣvapnyaṁ pakvā //32 //*
*mūlabarhaṇī paryākriyamāṇā kṣitiḥ paryākṛtā //33 //*
*asāāṁ gandhena śuguddhriyamāṇāśīviṣa uddhṛtā //34 //*
*abhūtirupahriyamāṇā parābhūtirupahṛtā //35 //*
*śarvaḥ kruddhaḥ piśyamānā śimidā piśitā //36 //*
*avartiraśyamānā nirṛtiraśitā //37 //*
*aśitā lokāchchhinatti brahmagavī brahmajyamasmāchchāmuṣmāchcha //38 //*

अ. (Av.) १२.५(५).३४-४६

तस्या आहननं कृत्या मेनिराशसनं वलग ऊबध्यम् ॥३९॥
अस्वगता परिह्णुता ॥४०॥
अग्निः क्रव्याद् भूत्वा ब्रह्मगवी ब्रह्मज्यं प्रविश्यात्ति ॥४१॥
सर्वास्यांगा पर्वा मूलानि वृश्चति ॥४२॥
छिनत्त्यस्य पितृबन्धु परा भावयति मातृबन्धु ॥४३॥
विवाहां ज्ञातीन्त्सर्वानपि क्षापयति ब्रह्मगवी
ब्रह्मज्यस्य क्षत्रियेणपुनर्दीयमाना ॥४४॥
अवास्तुमेनमस्वगमप्रजसं करोत्यपरापरणो भवति क्षीयते ॥४५॥
य एवं विदुषो ब्राह्मणस्य क्षत्रियो गामादत्ते ॥४६॥

*tasyā āhananaṁ kṛtyā menirāśasanaṁ valaga ūbadhyam //39 //*
*asvagatā parihṇutā //40 //*
*agniḥ kravyād bhūtvā brahmagavī brahmajyaṁ praviśyātti //41 //*
*sarvāsyāṁgā parvā mūlāni vṛśchati //42 //*
*chhinattyasya pitṛbandhu parā bhāvayati mātṛbandhu //43 //*
*vivāhāṁ jñātīntsarvānapi kṣāpayati brahmagavī*
*brahmajyasya kṣatriyeṇapunardīyamānā //44 //*
*avāstumenamasvagamaprajasaṁ karotyaparāparaṇo bhavati kṣīyate //45 //*
*ya evaṁ viduṣo brāhmaṇasya kṣatriyo gāmādatte //46 //*

अ. (Av.) १२.५(६).४७-६१

क्षिप्रं वै तस्याहनने गृध्राः कुर्वत ऐलबम् ॥४७॥
क्षिप्रं वै तस्यादहनं परि नृत्यन्ति केशिनीराघ्नानाः

पाणिनोरसि कुर्वाणाः पापमैलबम् ॥४८॥
क्षिप्रं वै तस्य वास्तुषु वृकाः कुर्वत ऐलबम् ॥४९॥
क्षिप्रं वै तस्य पृच्छन्ति यत् तदासी३दिदं नु ता३दिति ॥५०॥
छिन्ध्या च्छिन्धि प्र च्छिन्ध्यपि क्षापय क्षापय ॥५१॥
आददानमांगिरसि ब्रह्मज्यमुप दासय ॥५२॥
वैश्वदेवी ह्यु१च्यसे कृत्वा कूल्बजमावृता ॥५३॥
ओषन्ती समोषन्ती ब्रह्मणो वज्रः ॥५८॥
क्षुरपर्विर्मृत्युर्भूत्वा वि धाव त्वम् ॥५५॥
आ दत्से जिनतां वर्च इष्टं पूर्तं चाशिषः ५६॥
आदाय जीतं जीताय लोके३ऽमुष्मिन् प्र यच्छसि ॥५७॥
अघ्न्ये पदवीर्भव ब्राह्मणस्याभिशस्त्या ॥५८॥
मेनिः शरव्याभवाघादघविषा भव ॥५९॥
अहन्ये प्र शिरो जहि ब्रह्मज्यस्य कृतागसो देवपीयोरराधसः ॥६०॥
त्वया प्रमुर्णं मृदितमग्निर्दहतु दुश्चितम्॥६१॥
*kṣipraṁ vai tasyāhanane gṛdhrāḥ kurvata ailabam ॥47॥*
*kṣipraṁ vai tasyādahanaṁ pari nṛtyanti keśinīrāghnānāḥ*
*pāṇinorasi kurvāṇāḥ pāpamailabam ॥48॥*
*kṣipraṁ vai tasya vāstuṣu vṛkāḥ kurvata ailabam ॥49॥*
*kṣipraṁ vai tasya pṛchchhanti yat tadāsī3didaṁ nu tā3diti ॥50॥*
*chhindhyā chchhindhi pra chchhindhyapi kṣāpaya kṣāpaya ॥51॥*
*ādadānamāṁgirasi brahmajyamupa dāsaya ॥52॥*
*vaiśvadevī hyu1chyase kṛtvā kūlbajamāvṛtā ॥53॥*
*Oṣantī samoṣantī brahmaṇo vajraḥ ॥58॥*
*kṣuraparvirmṛtyurbhūtvā vi dhāva tvam ॥55॥*
*ā datse jinatāṁ varcha iṣṭaṁ pūrta chāśiṣaḥ 56॥*
*ādāya jītaṁ jītāya loke3'muṣmin pra yachchhasi ॥57॥*
*aghnye padavīrbhava brāhmaṇasyābhiśastyā ॥58॥*
*meniḥ śaravyābhavāghādaghaviṣā bhava ॥59॥*
*ahanye pra śiro jahi brahmajyasya kṛtāgaso devapīyorarādhasaḥ ॥60॥*
*tvayā pramurṇa mṛditamagnirdahatu duśchitam ॥61॥*

अ. (Av.) १२.५ (७).६२-७३
वृश्च प्र वृश्च सं वृश्च दह प्र दह सं दह ॥६२॥
ब्रह्मज्यं देव्यघ्न्य आ मूलादनुसंदह ॥६३॥
यथायाद् यमसादनात् पापलोकान् परावतः ॥६४॥
एवा त्वं देव्यघ्न्ये ब्रह्मज्यस्य कृतागसो देवपीयोरराधसः ॥६५॥
वज्रेण शतपर्वणा तीक्षणेन क्षुरभृष्टिना ॥६६॥
प्र स्कन्धान् प्र शिरो जहि ॥६७॥
लोमान्यस्य सं छिन्धि त्वचमस्य वि वेष्टय ॥६८॥
मासांन्यस्य शातय स्नावान्यस्य सं वृह ॥६९॥
अस्थीन्यस्य पीडय मज्जानमस्य निर्जहि ॥७०॥
सर्वास्यांगा पर्वाणि वि श्रथय ॥७१॥
अग्निरेनं क्रव्यात् पृथिव्या नुदतामुदोषतु
वायुरन्तरिक्षान्महतो वरिम्णः ॥७२॥
सूर्य एनं दिवः प्र णुदतां न्योषतु॥७३॥
*vṛścha pra vṛścha saṁ vṛścha daha pra daha saṁ daha ॥62॥*
*brahmajyaṁ devyaghnya ā mūlādanusaṁdaha ॥63॥*
*yathāyād yamasādanāt pāpalokān parāvataḥ ॥64॥*

*evā tvaṁ devyaghnye brahmajyasya kṛtāgaso devapīyorarādhasaḥ //65 //*
*vajreṇa śataparvaṇā tīkṣaṇena kṣurabhṛṣṭinā //66 //*
*pra skandhān pra śiro jahi //67 //*
*lomānyasya saṁ chhindhi tvachamasya vi veṣṭaya //68 //*
*māsāṁnyasya śātaya snāvānyasya saṁ vṛha //69 //*
*asthīnyasya pīḍaya majjānamasya nirjahi //70 //*
*sarvāsyāṁgā parvāṇi vi śrathaya //71 //*
*agnirenaṁ kravyāt pṛthivyā nudatāmudoṣatu*
*vāyurantarikṣānmahato varimṇaḥ //72 //*
*sūrya enaṁ divaḥ pra ṇudatāṁ nyoṣatu //73 //*

३. याः (Yāḥ) - य. (Yv.)८.६३

आपवस्व हिरण्यवदश्ववत्सोम वीरवत्। वाजं गामन्तमाभर स्वाहा ॥६३॥
*āpavasva hiraṇyavadaśvavattsoma vīravat / vājaṁ gāmantamābhara svāhā //63 //*

४. वशा (Vaśā) - अ. (Av.) १०.१०.१-३४; १२.४.१-५३

अ. (Av.) १०.१०.१-३४

नमस्ते जायमानायै जाताय उत ते नमः । बालेभ्यः शफेभ्यो रूपायाघ्न्ये ते नमः ॥१॥
यो विद्यात् सप्त प्रवतः सप्त विद्यात् परावतः ।
शिरो यास्य यो विद्यात् स वशां ग्रति गृह्णीयात् ॥२॥
वेदाहं सप्त प्रवतः सप्त वेद परावतः । शिरो यास्याहं वेद सोमं चास्यां विचक्षणम् ॥३॥
यया द्यौर्यया पृथिवी ययापो गुपिता इमाः ।
वशां सहस्रधारां ब्रह्मणाच्छावदामसि ॥४॥
शतं कंसाः शतं दोग्धारः शतं गोप्तारो अधि पृष्ठे अस्याः ।
ये देवास्तस्यां प्राणन्ति ते वशां विदुरेकधा ॥५॥
यापदीराक्षीरा स्वधाप्राणा महीलुका । वशा पर्जन्यपत्नी देवाँ अप्येति ब्रह्मणा ॥६॥
अनु त्वाग्निः प्राविशदनु सोमो वशे त्वा । ऊधस्ते भद्रे पर्जन्यो विद्युतस्ते स्तना वशे ॥७॥
अपस्त्वं धुक्षे प्रथमा उर्वरा अपरा वशे । तृतीयं राष्ट्रं धुक्षेऽन्नं क्षीरं वशे त्वम् ॥८॥
यदादित्यैर्हूयमानोपातिष्ठ ऋतावरि । इन्द्रः सहस्रपात्रन्त्सोमं त्वापाययद् वशे ॥९॥
यदनूचीन्द्रमैरात् त्व ऋषभोऽह्वयत् । तस्मात् ते वृत्रहा पयः क्षीरं क्रुद्धोऽहरद् वशे ॥१०॥
यत् ते क्रुद्धो धनपतिरा क्षीरमहरद् वशे । इदं तदद्य नाकस्त्रिषु पात्रेषु रक्षति ॥११॥
त्रिषु पात्रेषु तं सोममा देव्यहरद् वशा । अथर्वा यत्र दीक्षितो बर्हिष्यास्त हिरण्यये ॥१२॥
सं हि सोमेनागत समु सर्वेण पद्वता । वशा समुद्रमध्यष्ठाद् गन्धर्वैः कलिभिः सह ॥१३॥
सं हि वातेनागत समु सर्वैः पतत्रिभिः । वशा समुद्रे प्रानृत्यदृचः सामानि बिभ्रती ॥१४॥
सं हि सूर्येणागत समु सर्वेण चक्षुषा । वशा समुद्रमत्यख्यद् भद्रा ज्योतींषि बिभ्रती ॥१५॥
अभीवृता हिरण्येन यदतिष्ठ ऋतावरि । अश्वः समुद्रो भूत्वाध्यस्कन्दद् वशे त्वा ॥१६॥
तद् भद्राः समगच्छन्त वशा देष्ट्र्यथो स्वधा। अथर्वा यत्र दीक्षितो बर्हिष्यास्त हिरण्यये ॥१७॥
वशा माता राजन्यस्य वशा माता स्वधे तव। वशाया या आयुधं ततश्चित्तमजायत ॥१८॥
ऊर्ध्वो बिन्दुरुदचरद् ब्रह्मणः ककुदादधि । ततस्त्वं जिषे वशे ततो होताजायत ॥१९॥
आस्नस्ते गाथा अभवन्नुष्णिहाभ्यो बलं वशे। पाजस्याज्जो या स्तनेभ्यो रश्मयस्त्व ॥२०॥
ईर्माभ्यामयनं जातं सक्थिभ्यां च वशे तव । आन्त्रेभ्यो जिरे अत्रा उदरादधि वीरुधः ॥२१॥
यदुदरं वरुणस्यानुप्राविशथा वशे । ततस्त्वा ब्रह्मोदह्वयत् स हि नेत्रमवेत् तव ॥२२॥
सर्वे गर्भादवेपन्त जायमानादसूस्वः।
ससूव हि तामाहुर्वशेति ब्रह्मभिः क्लृप्तः स ह्यस्या बन्धुः ॥२३॥
युध एकः सं सृजति यो अस्या एक इद् वशी।
तरांसि याा अभवन् तरसां चक्षुरभवद् वशा ॥२४॥
वशा यां प्रत्यगृह्णाद् वशा सूर्यमधारयत् ।
वशायामन्तरविशदोदनो ब्रह्मणा सह ॥२५॥

वशामेवामृतमाहुर्वशां मृतयुमुपासते।
वशेदं सर्वमभवद् देवा मनुष्या३ असुराः पितर ऋषयः ॥२६॥
य एवं विद्यात् स वशां प्रति गृह्णीयात् ।
तथा हि याः सर्वपाद् दुहे दात्रेऽनपस्फुरन् ॥२७॥
तिस्रो जिह्वा वरुणस्यान्तर्दीद्यत्यासनि । तासां या मध्ये राजति सा वशा दुष्प्रतिग्रहा ॥२८॥
चतुर्धा रेतो अभवद् वशायाः । अपस्तुरीयममृतं तुरीयं यास्तुरीयं पशवस्तुरीयम् ॥२९॥
वशा द्यौर्वशा पृथिवी वशा विष्णुः प्रजापतिः। वशाया दुग्धमपिबन्त्साध्या वसवश्च ये ॥३०॥
वशाया दुग्धं पीत्वा साध्या वसवश्च ये । ते वै ब्रध्नस्य विष्टपि पयो अस्या उपासते ॥३१॥
सोममेनामेके दुह्रे घृतमेक उपासते । य एवं विदुषे वशां ददुस्ते गतास्त्रिदिवं दिवः ॥३२॥
ब्राह्मणेभ्यो वशा दत्त्वा सर्वांल्लोकान्त्समश्नुते। ऋतंह्यस्यामार्पितमपि ब्रह्माथो तपः ॥३३॥
वशां देवा उप जीवन्ति वशां मनुष्याउत । वशेदं सर्वमभवद् यावत् सूर्यो विपश्यति॥३४॥

*namaste jāyamānāyai jātāya uta te namaḥ /*
*bālebhyaḥ śaphebhyo rūpāyāghnye te namaḥ //1 //*
*yo vidyāt sapta pravataḥ sapta vidyāt parāvataḥ /*
*śiro yāsya yo vidyāt sa vaśāṁ grati gṛhṇīyāt //2 //*
*vedāhaṁ sapta pravataḥ sapta veda parāvataḥ /*
*śiro yāsyāhaṁ veda somaṁ chāsyāṁ vichakṣaṇam //3 //*
*yayā dyauryayā pṛthivī yayāpo gupitā imāḥ /*
*vaśāṁ sahasradhārāṁ brahmaṇāchchhāvadāmasi //4 //*
*śataṁ kaṁsāḥ śataṁ dogdhāraḥ śataṁ goptāro adhi pṛṣṭhe asyāḥ /*
*ye devāstasyāṁ prāṇanti te vaśāṁ vidurekadhā //5 //*
*yāpadīrākṣīrā svadhāprāṇā mahīlukā /*
*vaśā parjanyapatnī devām̐ apyeti brahmaṇā //6 //*
*anu tvāgniḥ prāviśadanu somo vaśe tvā /*
*ūdhaste bhadre parjanyo vidyutaste stanā vaśe //7 //*
*apastvaṁ dhukṣe prathamā urvarā aparā vaśe /*
*tṛtīyaṁ rāṣṭraṁ dhukṣe'nnaṁ kṣīraṁ vaśe tvam //8 //*
*yadādityairhūyamānopātiṣṭha ṛtāvari /*
*indraḥ sahasrapātrantsomaṁ tvāpāyayad vaśe //9 //*
*yadanūchīndramairāt tva ṛṣabho'hnayat /*
*tasmāt te vṛtrahā payaḥ kṣīraṁ kruddho'harad vaśe //10 //*
*yat te kruddho dhanapatirā kṣīramaharad vaśe /*
*idaṁ tadadya nākastriṣu pātreṣu rakṣati //11 //*
*triṣu pātreṣu taṁ somamā devyaharad vaśā /*
*atharvā yatra dīkṣito barhiṣyāsta hiraṇyaye //12 //*
*saṁ hi somenāgata samu sarveṇa padvatā /*
*vaśā samudramadhyaṣṭhād gandharvaiḥ kalibhiḥ saha //13 //*
*saṁ hi vātenāgata samu sarvaiḥ patatribhiḥ /*
*vaśā samudre prānṛtyadṛchaḥ sāmāni bibhratī //14 //*
*saṁ hi sūryeṇāgata samu sarveṇa chakṣuṣā /*
*vaśā samudramatyakhyad bhadrā jyotīṁṣi bibhratī //15 //*
*abhīvṛtā hiraṇyena yadatiṣṭha ṛtāvari /*
*aśvaḥ samudro bhūtvādhyaskandad vaśe tvā //16 //*
*tad bhadrāḥ samagachchhanta vaśā deṣṭryatho svadhā /*
*atharvā yatra dīkṣito barhiṣyāsta hiraṇyaye //17 //*
*vaśā mātā rājanyasya vaśā mātā svadhe tava /*
*vaśāyā yā āyudhaṁ tataśchittamajāyata //18 //*
*ūrdhvo bindurudacharad brahmaṇaḥ kakudādadhi /*
*tatastvaṁ jiāṣe vaśe tato hotājāyata //19 //*

*āsnaste gāthā abhavannuṣṇihābhyo balaṁ vaśe |*
*pājasyājjo yā stanebhyo raśmayastva ||20 ||*
*īrmābhyāmayanaṁ jātaṁ sakthibhyāṁ cha vaśe tava |*
*āntrebhyo jiāre atrā udarādadhi vīrudhaḥ ||21 ||*
*yadudaraṁ varuṇasyānuprāviśathā vaśe |*
*tatastvā brahmodahnayat sa hi netramavet tava ||22 ||*
*sarve garbhādavepanta jāyamānādasūsvaḥ |*
*sasūva hi tāmāhurvaśeti brahmabhiḥ klṛptaḥ sa hyasyā bandhuḥ ||23 ||*
*yudha ekaḥ saṁ sṛjati yo asyā eka id vaśī |*
*tarāṁsi yāā abhavan tarasāṁ chakṣurabhavad vaśā ||24 ||*
*vaśā yāṁ pratyagṛhṇād vaśā sūryamadhārayat |*
*vaśāyāmantaraviśadodano brahmaṇā saha ||25 ||*
*vaśāmevāmṛtamāhurvaśāṁ mṛtayumupāsate |*
*vaśedaṁ sarvamabhavad devā manuṣyā3 asurāḥ pitara ṛṣayaḥ ||26 ||*
*ya evaṁ vidyāt sa vaśāṁ prati gṛhṇīyāt |*
*tathā hi yāḥ sarvapād duhe dātre'napasphuran ||27 ||*
*tisro jihnā varuṇasyāntardīdyatyāsani |*
*tāsāṁ yā madhye rājati sā vaśā duṣpratigrahā ||28 ||*
*chaturdhā reto abhavad vaśāyāḥ |*
*apasturīyamamṛtaṁ turīyaṁ yāsturīyaṁ paśavasturīyam ||29 ||*
*vaśā dyaurvaśā pṛthivī vaśā viṣṇuḥ prajāpatiḥ |*
*vaśāyā dugdhamapibantsādhyā vasavaścha ye ||30 ||*
*vaśāyā dugdhaṁ pītvā sādhyā vasavaścha ye |*
*te vai bradhnasya viṣṭapi payo asyā upāsate ||31 ||*
*somamenāmeke duhre ghṛtameka upāsate |*
*ya evaṁ viduṣe vaśāṁ daduste gatāstridivaṁ divaḥ ||32 ||*
*brāhmaṇebhyo vaśā dattvā sarvāṁllokāntsamaśnute |*
*ṛtaṁhyasyāmārpitamapi brahmātho tapaḥ ||33 ||*
*vaśāṁ devā upa jīvanti vaśāṁ manuṣyāuta |*
*vaśedaṁ sarvamabhavad yāvat sūryo vipaśyati ||34 ||*

अ. (Av.) १२.४.१-५३

ददामीत्येव ब्रूयादनु चैनामभुत्सत । वशां ब्रह्मभ्यो याचद्भ्यस्तत् प्रजावदपत्यवत् ॥१॥
प्रजया स वि क्रीणीते पशुभिश्चोप दस्यति। य आर्षेभ्यो याचद्भ्यो देवानां गां न दित्सति ॥२॥
कूटयास्य सं शीर्यन्ते श्लोणया काटमर्दति। बण्डया दह्यन्ते गृहाः काणया दीयते स्वम् ॥३॥
विलोहितो अधिष्ठानाच्छक्नो विन्दति गोपतिम्। तथा वशायाः संविद्यं दुरदभ्ना ह्यु१च्यसे ॥४॥
पदोरस्या अधिष्ठानाद् विक्लिन्दुर्नाम विन्दति। अनामनात् सं शीर्यन्ते या मुखेनोपजिघ्रति ॥५॥
यो अस्याः कर्णवास्कुनोत्या स देवेषु वृश्चते। लक्ष्म कुर्व इति मन्यते कनीयः कृणुते स्वम् ॥६॥
यदस्याः कस्मै चिद् भोगाय बालान् कश्चित् प्रकृन्तति ।
ततः किशोरा म्रियन्ते वत्सांश्च घातुको वृकः ॥७॥
यदस्या गोपतौ सत्या लोम ध्वाङ्क्षो अजीहिडत्।
ततः कुमारा म्रियन्ते यक्ष्मो विन्दत्यनामनात् ॥८॥
यदस्याः पल्पूलनं शकृद दासी समस्यति ।
ततोऽपरूपं जायते तस्मादव्येष्यदेनसः ॥९॥
जायमानाभि जायते देवान्तसब्राह्मणान् वशा।
तस्माद् ब्रह्मभ्यो देयैषा तदाहुः स्वस्य गोपनम् ॥१०॥
य एनां वनिमायन्ति तेषां देवकृता वशा । ब्रह्मज्येयं तदब्रुवन् य एनां निप्रियायते ॥११॥
य आर्षेयेभ्यो याचद्भ्यो देवानां गां न दित्सति ।
आ स देवेषु वृश्चते ब्राह्मणानां च मन्यवे ॥१२॥

यो अस्य स्याद् वशाभोगो अन्यामिच्छेत तर्हि सः ।
हिंस्ते अदत्ता पुरुषं याचितां च न दित्सति ॥१३॥
यथा शेवधिर्निहितो ब्राह्मणानां तथा वशा। तमेतदच्छायन्ति यस्मिन् कस्मिंश्च जायते ॥१४॥
स्वमेतदच्छायन्ति यद् वशां ब्राह्मणा अभि । यथैनानन्यस्मिन् जिनीयादेवास्या निरोधनम् ॥१५॥
चरेदेवा त्रैहायणादविाातगदा सती। वशां च विद्यान्नारद ब्राह्मणास्तर्ह्येष्याः ॥१६॥
य एनामवशामाह देवानां निहितं निधिम्। उभौ तस्मै भवाशर्वौ परिक्रम्येषुमस्यतः ॥१७॥
यो अस्या ऊधो न वेदाथो अस्या स्तनानुत। उभयेनैवास्मै दुहे दातुं चेदशकद् वशाम् ॥१८॥
दुरदभ्नैनमा शये याचितां च न दित्सति। नास्मै कामाः समृध्यन्ते यामदत्वा चिकीर्षति ॥१९॥
देवावशामयाचन् मुखं कृत्वा ब्राह्मणम्। तेषां सर्वेषामददद्धेडं न्येति मानुषः ॥२०॥
हेडं पशूनां न्येति ब्राह्मणेभ्योऽददद् वशाम्। देवानां निहितं भागं मर्त्यश्चेन्निप्रियायते ॥२१॥
यदन्ये शतं याचेयुर्ब्राह्मणा गोपतिं वशाम्। अथैनां देवा अब्रुवन्नेवं ह विदुषो वशा ॥२२॥
य एवं विदुषेऽदत्त्वाथान्येभ्यो ददद् वशाम्। दुर्गा तस्मा अधिष्ठाने पृथिवी सहदेवता ॥२३॥
देवा वशमयाचन् यस्मिन्नग्रे अजायत। तामेतां विद्यान्नारदः सह दैवैरुदाजत ॥२४॥
अनपत्यमल्पपशुं वशा कृणोति पूरुषम्। ब्राह्मणैश्च याचितामथैनां निप्रियायते ॥२५॥
अग्नीषोमाभ्यां कामाय मित्राय वरुणाय च। तेभ्यो याचन्ति ब्राह्मणास्तेष्वा वृश्चतेऽददत् ॥२६॥
यावदस्या गोपतिर्नोपशृणुयादृचः स्वयम् । चरेदस्य तावद् गोषु नास्य श्रुत्वा गृहे वसेत् ॥२७॥
यो अस्या ऋच उपश्रुत्याथ गोष्वचीचरत् । आयुश्च तस्य भूतिं च देवा वृश्चन्ति हीडिताः ॥२८॥
वशा चरन्ती बहुधा देवानां निहितो निधिः। आविष्कृणुष्व रूपाणि यदा स्थाम जिघांसति ॥२९॥
आविरात्मानं कृणुते यदा स्थाम जिघांसति। अथो ह ब्रह्मभ्यो वशा याच्याय कृणुते मनः ॥३०॥
मनसा सं कल्पयति तद् देवाँ अपि गच्छति । ततो ह ब्रह्माणो वशामुपप्रयन्ति याचितुम् ॥३१॥
स्वधाकारेण पितृभ्यो योन देवताभ्यः। दानेन राजन्योवशाया मातुर्हेडं न गच्छति ॥३२॥
वशा माता राजन्यस्य तथा संभूतमग्रशः। तस्या आहुरनर्पणं यद् ब्रह्मभ्यः प्रदीयते ॥३३॥
यथाज्यं प्रगृहीतमालुम्पेत् स्रुचो अग्नये। एवा ह ब्रह्मभ्यो वशामग्नय आ वृश्चतेऽददत् ॥३४॥
पुरोडाशवत्सा सुदुघा लोकेऽसमा उप तिष्ठति। सास्मै सर्वान् कामान् वशा प्रददुषे दुहे ॥३५॥
सर्वान् कामान् यमराज्ये वशा प्रददुषे दुहे। अथहुर्नारकं लोकं निरुन्धानस्य याचिताम् ॥३६॥
प्रवीयमाना चरति क्रुद्धा गोपतये वशा। वेहतं मा मन्यमानो मृत्योः पाशेषु बध्यताम् ॥३७॥
यो वेहतं मन्यमानोऽमा च पचते वशाम्। अप्यस्य पुत्रान् पोत्रांश्च याचयते बृहस्पतिः ॥३८॥
महदेषाव तपति चरन्ती गोषु गौरपि। अथो ह गोपतये वशाद दुषे विषं दुहे ॥३९॥
प्रियं पशूनां भवति यद् ब्रह्मभ्यः प्रदीयते। अथो वशायास्तत् प्रियं यद् देवत्रा हविः स्यात् ॥४०॥
या वशा उदकल्पयन् देवा याादुदेत्य। तासां विलिप्त्यं भीमामुदाकुरुत नारदः ॥४१॥
तो देवा अमीमांसन्त वशेयाउमवशेति। तामब्रवीन्नारद एषा वशानां वशतमेति ॥४२॥
कति नु वशा नारद यास्त्वं वेत्थ मनुष्यजाः।
तास्त्वा पृच्छामि विद्वांसं कस्या नाश्नीयादब्राह्मणः ॥४३॥
विलिप्त्या बृहस्पते या च सूतवशा वशा । तस्या नाश्नीयादब्राह्मणो य आशंसेत् भूत्याम् ॥४४॥
नमस्ते अस्तु नारदानुष्ठु विदुषे वशा। कतमासां भीमतमा यामदत्त्वा पराभवेत् ॥४५॥
विलिप्ती या बृहस्पतेऽथो सूतवशा वशा। तस्या नाश्नीयादब्राह्मणो य आशंसेत भूत्याम् ॥४६॥
त्रीणि वै वशाजातानि विलिप्ती सूतवशा वशा। ताः प्र यच्छेद् ब्रह्मभ्यः सोऽनाव्रस्कः प्रजापतौ ।
एतद् वो ब्राह्मणा हविरिति मन्वीत याचितः। वशां चेदेनं याचेयुर्या भीमाददुषो गृहे ।
देवा वशां पर्यवदन् न नोऽदादिति हीडिताः। एताभिऋग्भिर्भेदं तस्माद् वै स पराभवत् ॥४९॥
उतैनां भेदो नाददाद् वशामिन्द्रेण याचितः। तस्मात् तं देवा आगसोऽपवृश्चन्नहमुत्तरे ॥५०॥
ये वशाया अदानाय वदन्ति परिरापिणः। इन्द्रस्य मन्यवे जाल्मा आ वृश्चन्ते अचित्त्या ॥५१॥
ये गापतिं पराणीयाथाहुर्मा ददा इति। रुद्रस्यास्तां ते हेतिं परि यन्त्यचित्तया ॥५२॥
यदि हुतां यद्यहुताममा च पचते वशाम्।
देवान्त्सब्राह्मणानृत्वा जिह्मो लोकान्निरृच्छति ॥५३॥

*dadāmītyeva brūyādanu chaināmabhutsata ।*
*vaśāṁ brahmabhyo yāchadbhyastat prajāvadapatyavat ॥1॥*

*prajayā sa vi krīṇīte paśubhiśchopa dasyati |*
*ya ārṣebhyo yāchadbhyo devānāṁ gāṁ na ditsati ||2 ||*
*kūṭayāsya saṁ śīryante śloṇayā kāṭamardati |*
*baṇḍayā dahyante gṛhāḥ kāṇayā dīyate svam ||3 ||*
*vilohito adhiṣṭhānāchchhakno vindati gopatim |*
*tathā vaśāyāḥ saṁvidyaṁ duradabhnā hyu1chyase ||4 ||*
*padorasyā adhiṣṭhānād viklindurnāma vindati |*
*anāmanāt saṁ śīryante yā mukhenopajighrati ||5 ||*
*yo asyāḥ karṇavāskunotyā sa deveṣu vṛśchate |*
*lakṣama kurva iti manyate kanīyaḥ kṛṇute svam ||6 ||*
*yadasyāḥ kasmai chid bhogāya bālān kaśchit prakṛntati |*
*tataḥ kiśorā mriyante vatsāṁścha ghātuko vṛkaḥ ||7 ||*
*yadasyā gopatau satyā loma dhvāṅkṣo ajīhiḍat |*
*tataḥ kumārā mriyante yakṣamo vindatyanāmanāt ||8 ||*
*yadasyāḥ palpūlanaṁ śakṛda dāsī samasyati |*
*tato'parūpaṁ jāyate tasmādavyeṣyadenasaḥ ||9 ||*
*jāyamānābhi jāyate devāntasabrāhmaṇān vaśā |*
*tasmād brahmabhyo deyaiṣā tadāhuḥ svasya gopanam ||10 ||*
*ya enāṁ vanimāyanti teṣāṁ devakṛtā vaśā |*
*brahmajyeyaṁ tadabruvan ya enāṁ nipriyāyate ||11 ||*
*ya ārṣeyebhyo yāchadbhyo devānāṁ gāṁ na ditsati |*
*ā sa deveṣu vṛśchate brāhmaṇānāṁ cha manyave ||12 ||*
*yo asya syād vaśābhogo anyāmichchheta tarhi saḥ |*
*hiṁste adattā puruṣaṁ yāchitāṁ cha na ditsati ||13 ||*
*yathā śevadhirnihito brāhmaṇānāṁ tathā vaśā |*
*tametadachchhāyanti yasmin kasmiścha jāyate ||14 ||*
*svametadachchhāyanti yad vaśāṁ brāhmaṇā abhi |*
*yathainānanyasmin jinīyādevāsyā nirodhanam ||15 ||*
*charedevā traihāyaṇādaviāātagadā satī |*
*vaśāṁ cha vidyānnārada brāhmaṇāstarhyeṣyāḥ ||16 ||*
*ya enāmavaśāmāha devānāṁ nihitaṁ nidhim |*
*ubhau tasmai bhavāśarvau parikramyeṣumasyataḥ ||17 ||*
*yo asyā ūdho na vedātho asyā stanānuta |*
*ubhayenaivāsmai duhe dātuṁ chedaśakad vaśām ||18 ||*
*duradabhnainamā śaye yāchitāṁ cha na ditsati |*
*nāsmai kāmāḥ samṛdhyante yāmadatvā chikīrṣati ||19 ||*
*devāvaśāmayāchan mukhaṁ kṛtvā brāhmaṇam |*
*teṣāṁ sarveṣāmadadaddheḍaṁ nyeti mānuṣaḥ ||20 ||*
*heḍaṁ paśūnāṁ nyeti brāhmaṇebhyo'dadad vaśām |*
*devānāṁ nihitaṁ bhāgaṁ martyaśchennipriyāyate ||21 ||*
*yadanye śataṁ yācheyurbrāhyaṇā gopatiṁ vaśām |*
*athaināṁ devā abruvannevaṁ ha viduṣo vaśā ||22 ||*
*ya evaṁ viduṣe'dattvāthānyebhyo dadad vaśām |*
*durgā tasmā adhiṣṭhāne pṛthivī sahadevatā ||23 ||*
*devā vaśamayāchan yasminnagre ajāyata |*
*tāmetāṁ vidyānnāradaḥ saha daivairudājata ||24 ||*
*anapatyamalpapaśuṁ vaśā kṛṇoti pūruṣam |*
*brāhmaṇaiścha yāchitāmathaināṁ nipriyāyate ||25 ||*
*agnīṣomābhyāṁ kāmāya mitrāya varuṇāya cha |*
*tebhyo yāchanti brāhmaṇāsteṣvā vṛśchate'dadat ||26 ||*

*yāvadasyā gopatirnopaśṛṇuyādṛchaḥ svayam ।*
*charedasya tāvad goṣu nāsya śrutvā gṛhe vaset ॥27 ॥*
*yo asyā ṛcha upaśrutyātha goṣvachīcharat ।*
*āyuścha tasya bhūtiṁ cha devā vṛśchanti hīḍitāḥ ॥28 ॥*
*vaśā charantī bahudhā devānāṁ nihito nidhiḥ ।*
*āviṣkṛṇuṣva rūpāṇi yadā sthāma jighāṁsati ॥29 ॥*
*āvirātmānaṁ kṛṇute yadā sthāma jighāṁsati ।*
*atho ha brahmabhyo vaśā yāchṁyāya kṛṇute manaḥ ॥30 ॥*
*manasā saṁ kalpayati tad devāṁ̐ api gachchhati ।*
*tato ha brahmāṇo vaśāmupaprayanti yāchitum ॥31 ॥*
*svadhākāreṇa pitṛbhyo yona devatābhyaḥ ।*
*dānena rājanyovaśāyā māturheḍaṁ na gachchhati ॥32 ॥*
*vaśā mātā rājanyasya tathā saṁbhūtamagraśaḥ ।*
*tasyā āhuranarpaṇaṁ yad brahmabhyaḥ pradīyate ॥33 ॥*
*yathājyaṁ pragṛhītamālumpet srucho agnaye ।*
*evā ha brahmabhyo vaśāmagnaya ā vṛśchate'dadat ॥34 ॥*
*puroḍāśavatsā sudughā loke'samā upa tiṣṭhati ।*
*sāsmai sarvān kāmān vaśā pradaduṣe duhe ॥35 ॥*
*sarvān kāmān yamarājye vaśā pradaduṣe duhe ।*
*athahurnārakaṁ lokaṁ nirundhānasya yāchitām ॥36 ॥*
*pravīyamānā charati kruddhā gopataye vaśā ।*
*vehataṁ mā manyamāno mṛtyoḥ pāśeṣu badhyatām ॥37 ॥*
*yo vehataṁ manyamāno'mā cha pachate vaśām ।*
*apyasya putrān potrāṁścha yāchayate bṛhaspatiḥ ॥38 ॥*
*mahadeṣāva tapati charantī goṣu gaurapi ।*
*atho ha gopataye vaśāda duṣe viṣaṁ duhe ॥39 ॥*
*priyaṁ paśūnāṁ bhavati yad brahmabhyaḥ pradīyate ।*
*atho vaśāyāstat priyaṁ yad devatrā haviḥ syāt ॥40 ॥*
*yā vaśā udakalpayan devā yāādudetya ।*
*tāsāṁ viliptyaṁ bhīmāmudākuruta nāradaḥ ॥41 ॥*
*to devā amīmāṁsanta vaśeyā3mavaśeti ।*
*tāmabravīnnārada eṣā vaśānāṁ vaśatameti ॥42 ॥*
*kati nu vaśā nārada yāstvaṁ vettha manuṣyajāḥ ।*
*tāstvā pṛchchhāmi vidvāṁsaṁ kasyā nāśnīyādabrāhmaṇaḥ ॥43 ॥*
*viliptyā bṛhaspate yā cha sūtavaśā vaśā ।*
*tasyā nāśnīyādabrāhmaṇo ya āśaṁset bhūtyām ॥44 ॥*
*namaste astu nāradānuṣṭhu viduṣe vaśā ।*
*katamāsāṁ bhīmatamā yāmadattvā parābhavet ॥45 ॥*
*viliptī yā bṛhaspate'tho sūtavaśā vaśā ।*
*tasyā nāśnīyādabrāhmaṇo ya āśaṁseta bhūtyām ॥46 ॥*
*trīṇi vai vaśājātāni viliptī sūtavaśā vaśā ।*
*tāḥ pra yachchhed brahmabhyaḥ so'nāvraskaḥ prajāpatau ।*
*etad vo brāhmaṇā haviriti manvīta yāchitaḥ ।*
*vaśāṁ chedenaṁ yācheyuryā bhīmādaduṣo gṛhe ।*
*devā vaśāṁ paryavadan na no'dāditi hīḍitāḥ ।*
*etābhirṛgbhirbhedaṁ tasmād vai sa parābhavat ॥49 ॥*
*utaināṁ bhedo nādadād vaśāmindreṇa yāchitaḥ ।*
*tasmāt taṁ devā āgaso'pavṛśchannahamuttare ॥50 ॥*
*ye vaśāyā adānāya vadanti parirāpiṇaḥ ।*
*indrasya manyave jālmā ā vṛśchante achittyā ॥51 ॥*

*ye gāpatiṁ parāṇīyāthāhurmā dadā iti |*
*rudrasyāstāṁ te hetiṁ pari yantyachittayā ||52 ||*
*yadi hutāṁ yadyahutāmamā cha pachate vaśām |*
*devāntsabrāhmaṇānṛtvā jihmo lokānnirṛchchhati ||53 ||*

**१७१. कश्यपः वत्सारः - द्र. वत्सारः काश्यपः (Kaśyapaḥ Vatsāraḥ - Dṛ. Vatsāraḥ Kāśyapaḥ)**

**१७२. काक्षीवत् सुकीर्ति (Kākṣīvat Sukīrti)**

१. सोमः (Somaḥ) - य. (Yv.)२०.३३

उपयामगृहीतोऽस्यश्विभ्यां त्वा सरस्वत्यै त्वेन्द्राय त्वा सुत्राम्णऽएष ते येनिरश्विभ्यां त्वा सरस्वत्यै त्वेन्द्राय त्वा सुत्राम्णे ॥३३ ॥

*upayāmagṛhīto'syaśvibhyāṁ tvā sarasvatyai tvendrāya tvā sutrāmṇa'eṣa te yeniraśvibhyāṁ tvā sarasvatyai tvendrāya tvā sutrāmṇe ||33 ||*

**१७३. कश्यपो मारीचः (Kaśyapo Mārīchaḥ)**

१. अग्निर्जातवेदाः (Agnirjātavedāḥ) - ऋ. (Rv.) १.९९.१

जातवेदसे सुनवाम् सोममरातीयतो नि दहाति वेदः ।
स नः पर्षदति दुर्गाणि विश्वा नावेव सिन्धु दुरितात्यग्निः ॥१ ॥
*jātavedase sunavām somamarātīyato ni dahāti vedaḥ |*
*sa naḥ parṣadati durgāṇi viśvā nāveva sindhu duritātyagniḥ ||1 ||*

२. पवमानः सोमः (Pavamānaḥ Somaḥ) - सा. (Sv.) ४७२; ४८१; ४८२ ; ५०४; ५०५; ५४३; ६५४-६५६; ७८१-७८३; ८४१-८४३; ९५८-९६०; १०३४-१०३६; १०७६-१०७८

सा. (Sv.) ४७२

इन्द्रायेन्दो मरुत्वते पवस्व मधुमत्तमः । अर्कस्य योनिमासदम् ॥६ ॥
*indrāyendo marutvate pavasva madhumattamaḥ | arkasya yonimāsadam ||6 ||*

सा. (Sv.) ४८१-४८२

इन्दुः पविष्ट चेतनः प्रियः कवीनां मतिः । सृजदश्वं रथीरिव ॥५ ॥
असृक्षत प्र वाजिनो गव्या सोमासो अश्वया । शुक्रासोा वीरयाशवः ॥६ ॥
*induḥ paviṣṭa chetanaḥ priyaḥ kavīnāṁ matiḥ | sṛjadaśvaṁ rathīriva ||5 ||*
*asṛkṣata pra vājino gavyā somāso aśvayā | śukrāsoā vīrayāśavaḥ ||6 ||*

सा. (Sv.) ५०४-५०५

वृषा सोम द्युमाँ असि वृषा देव वृषव्रतः । वृषा धर्माणि दध्रिषे ॥८ ॥
इषे पवस्व धारया मृज्यमानो मनीषिभिः । इन्दो रुचाभि गा इहि ॥९ ॥
*vṛṣā soma dyumām̐ asi vṛṣā deva vṛṣavrataḥ | vṛṣā dharmāṇi dadhriṣe ||8 ||*
*iṣe pavasva dhārayā mṛjyamāno manīṣibhiḥ | indo ruchābhi gā ihi ||9 ||*

सा. (Sv.) ५४३

असर्जि वक्वा रथ्ये यथाजौ धिया मनोता प्रथमा मनीषा ।
दश स्वसारो अधि सानो अव्ये मृजन्ति वह्निं सदनेष्वच्छ ॥११ ॥
*asarji vakvā rathye yathājau dhiyā manotā prathamā manīṣā |*
*daśa svasāro adhi sāno avye mṛjanti vahniṁ sadaneṣvachchha ||11 ||*

सा. (Sv.) ६५४-६५६

दविद्युतत्या रुचा परिष्टोभन्त्या कृपा । सोमाः शुक्रा गवाशिरः ॥१ ॥
हिन्वानो हेतृभिर्हित आ वाजं वाज्यक्रमीत् । सीदन्तो वनुषो यथा ॥२ ॥
ऋधक्सोम स्वस्तये संजग्मानो दिवा कवे । पवस्व सूर्यो दृशे ॥३ ॥
*davidyutatyā ruchā pariṣṭobhantyā kṛpā | somāḥ śukrā gavāśiraḥ ||1 ||*
*hinvāno hetṛbhirhita ā vājaṁ vājyakramīt | sīdanto vanuṣo yathā ||2 ||*
*ṛdhaksoma svastaye saṁjagmāno divā kave | pavasva sūryo dṛśe ||3 ||*

सा. (Sv.) ७८१-७८३

वृषा सोम द्युमां असि वृषा देव वृषव्रतः। वृषा धर्माणि दध्रिषे ॥१॥
वृष्णस्ते वृष्ण्यं शवो वृषा वनं वृषा सुतः। स त्वं वृषन्वृषेदसि ॥२॥
अश्वो न चक्रदो वृषा सं गा इन्दो समर्वतः।वि नो राये दुरो वृधि ॥३॥

*vṛṣā soma dyumāṁ asi vṛṣā deva vṛṣavrataḥ / vṛṣā dharmāṇi dadhriṣe //1 //*
*vṛṣṇaste vṛṣṇyaṁ śavo vṛṣā vanaṁ vṛṣā sutaḥ / sa tvaṁ vṛṣanvṛṣedasi //2 //*
*aśvo na chakrado vṛṣā saṁ gā indo samarvataḥ /vi no rāye duro vṛdhi //3 //*

सा. (Sv.) ८४१-८४३

इषे पवस्व धारया मृज्यमानो मनीषिभिः। इन्दो रुचाभि गा इहि ॥१॥
पुनानो परिवस्कृध्यूर्ज जनाय गिर्वणः। हरे सृजान आशिरम् ॥२॥
पुनानो देववीतय इन्द्रस्य याहि निष्कृतम्। द्युतानो वाजिभिर्हितः ॥३॥

*iṣe pavasva dhārayā mṛjyamāno manīṣibhiḥ / indo ruchābhi gā ihi //1 //*
*punāno parivaskṛdhyūrja janāya girvaṇaḥ / hare sṛjāna āśiram //2 //*
*punāno devavītaya indrasya yāhi niṣkṛtam / dyutāno vājibhirhitaḥ //3 //*

सा. (Sv.) ९५८-९६०

पवमानस्य विश्विविठा ते सर्गा असृक्षत। सूर्यस्येव न रश्मयः ॥१॥
केतुं कृण्वन्दिवस्परि विश्वा रूपाभ्यर्षसि। समुद्रः सोम पिन्वसे ॥२॥
जाानो वाचमिष्यसि पवमान विधर्मणि। क्रन्दन्देवो न सूर्यः ॥३॥

*pavamānasya viśviviṭhā te sargā asṛkṣata / sūryasyeva na raśmayaḥ //1 //*
*ketuṁ kṛṇvandivaspari viśvā rūpābhyarṣasi / samudraḥ soma pinvase //2 //*
*jāāno vāchamiṣyasi pavamāna vidharmaṇi / krandandevo na sūryaḥ //3 //*

सा. (Sv.) १०३४-१०३६

असृक्षत प्र वाजिनो गव्या सोमासो अश्वया। शुक्रासो वीरयाशवः ॥१॥
शुम्भमाना ऋतायुभिर्मृज्यमाना गभस्त्योः। पवन्ते वारे अव्यये ॥२॥
ते विश्वा दाशुषे वसु सोमा दिव्यानि पार्थिवा। पवन्तामान्तरिक्ष्या ॥३॥

*asṛkṣata pra vājino gavyā somāso aśvayā / śukrāso vīrayāśavaḥ //1 //*
*śumbhamānā ṛtāyubhirmṛjyamānā gabhastyoḥ / pavante vāre avyaye //2 //*
*te viśvā dāśuṣe vasu somā divyāni pārthivā / pavantāmāntarikṣayā //3 //*

सा. (Sv.) १०७६-१०७८

इन्द्रायेन्दो मरुत्वते पवस्व मधुमत्तमः। अर्कस्य योनिमासदम् ॥१॥
तं त्वा विप्रा वचोविदः परिष्कृण्वन्ति धर्णसिम्। सं त्वा मृजन्त्यायवः ॥२॥
रसं ते मित्रो अर्यमा पिबन्तु वरुणः कवे। पवमानस्य मरुतः॥३॥

*indrāyendo marutvate pavasva madhumattamaḥ / arkasya yonimāsadam //1 //*
*taṁ tvā viprā vachovidaḥ pariṣkṛṇvanti dharṇasim / saṁ tvā mṛjantyāyavaḥ //2 //*
*rasaṁ te mitro aryamā pibantu varuṇaḥ kave / pavamānasya marutaḥ //3 //*

## १७४. काङ्कायनः (Kāṅkāyanaḥ)

१. अघ्न्याः (Aghnyāḥ) - अ. (Av.) ६.७०.१-३

यथा मांसं यथा सुरा यथाक्षा अधिदेवने। यथा पुंसो वृषण्यत स्त्रियां निहन्यते मनः ।
एवाते अघ्न्ये मनोऽधि वत्से नि हन्यताम् ॥१॥
यथा हस्ती हस्तिन्याः पदेन पदमुद्युजे । यथा पुंसो वृषण्यत् स्त्रिया निहन्यते मनः ।
एवा ते अघ्न्ये मनोऽधि वत्से नि हन्यताम् ॥२॥
यथा प्रधिर्यथोपधिर्यथा नभ्यं प्रधवधि । यथा पुंसो वृषण्यत स्त्रियां निहन्यते मनः ।
एवा ते अघ्न्ये मनोऽधि वत्से नि हन्यताम् ॥३॥

*yathā māṁsaṁ yathā surā yathākṣā adhidevane /*
*yathā puṁso vṛṣaṇyata striyāṁ nihanyate manaḥ /*
*evāte aghnye mano'dhi vatse ni hanyatām //1 //*

*yathā hastī hastinyāḥ padena padamudyuje ।*
*yathā puṁso vṛṣaṇyat strayiā nihanyate manaḥ ।*
*evā te aghnye mano'dhi vatse ni hanyatām ॥2॥*
*yathā pradhiryathopadhiryathā nabhyaṁ pradhavadhi ।*
*yathā puṁso vṛṣaṇyata striyāṁ nihanyate manaḥ ।*
*evā te aghnye mano'dhi vatse ni hanyatām ॥3॥*

२. अर्बुदिः (Arbudiḥ) - अ. (Av.) ११.९.१-२६

ये बाहवो या इषवो धन्वनां वीर्याणि च । असीन् परशूनायुधं चित्ताकूतं च यद्धृदि ।
सर्व तदर्बुदे त्वममित्रेभ्यो दृशे कुरूदारांश्च प्र दर्शय ॥१॥
उत्तिष्ठत सं नह्यध्वं मित्रा देवजना यूयम् । संदृष्टा गुप्ता वः सन्तु या नो मित्राण्यर्बुदे ॥२॥
उत्तिष्ठतमा रभेथामादानसंदानाभ्याम् । अमित्राणां सेना अभि धत्तमर्बुदे ॥३॥
अबुदिर्नाम यो देव ईशानश्च न्यर्बुदिः । याभ्यामन्तरिक्षमावृतमियं च पृथिवी मही ।
ताभ्यामिन्द्रमेदिभ्यामहं जितमन्वेमि सेनया ॥४॥
उत्तिष्ठ त्वं देवजनार्बुदे सेनया सह । भंजन्नमित्राणां सेनां भोगेभिः परि वारय ॥५॥
सप्त जातान् न्यर्बुद उदाराणां समीक्षयन् । तेभिष्टवमाज्ये हुते सर्वैरुत्तिष्ठ सेनया ॥६॥
प्रतिघ्नानाश्रुमुखी कृधुकर्णी च क्रोशतु । विकेशी पुरुषे हते रदिते अर्बुदे तव ॥७॥
संकर्षन्ती करूकरं मनसा पुत्रमिच्छन्ती । पति भ्रातरमात् स्वान् रदिते अर्बुदे तव ॥८॥
अलिक्लवा जाष्कमदा गृध्राः श्येनाः पतत्रिणः ।
ध्वाङ्क्षा शकुनयस्तृप्यन्त्वमित्रेषु समीक्षयन् रदिते अर्बुदे तव ॥९॥
अथो सर्व श्वापदं मक्षिका तृप्यतु क्रिमिः । पौरुषेयेऽधि कुणपे रदिते अर्बुदे तव ॥१०॥
आ गृह्णीतं सं बृहतं प्राणापानान् न्यर्बुदे।
निवाशा घोषाः सं यन्त्वमित्रेषु समीक्षयन् रदिते अर्बुदे तव ॥११॥
उद् वेपय सं विजन्तां भियामित्रान्त्सं सृज। उरुग्राहैर्बाह्वंकैर्विध्यामित्रान् न्यर्बुदे ॥१२॥
मुह्यन्त्वेषां बाहवश्चित्ताकूतं च यद्धृदि । मैषामुच्छेषि किं चन रदिते अर्बुदे तव ॥१३॥
प्रतिघ्नानाः सं धावन्तूरः पटूरावाघ्नानाः ।
अघरिणीर्विकेश्योरुदत्यः१ पुरुषे हते रदिते अर्बुदे तव ॥१४॥
श्वन्वतीरप्सरसो रूपका उतार्बुदे । अन्तः पात्रे रेरिहतीं रिशां दुर्णिहितैषिणीम् ।
सर्वास्ता अर्बुदे त्वममित्रेभ्यो दृशे कुरूदारांश्च प्र दर्शय ॥१५॥
खडूरेऽधिचङ्क्रमां खर्विकां खर्ववासिनीम् । य उदारा अन्तर्हिता गन्धर्वाप्सरसश्च ये ।
सर्पा इतरजना रक्षांसि ॥१६॥
चतुर्दष्ट्रांछ्यावदतः कुम्भमुष्काँ असृङ्मुखान् । स्वभ्यसा ये चोद्भ्यसाः ॥१७॥
उद् वेपय त्वमर्बुदेऽमित्राणाममूः सिचः । ज्यांश्च जिष्णुश्चामित्रांजयतामिन्द्रमेदिनौ ॥१८॥
प्रब्लीनो मृदितः शयां हतो३मित्रो न्यर्बुदे। अग्निजिह्वा धूमशिख जयन्तीर्यन्तु सेनया ॥१९॥
तयार्बुदे प्रणुत्तानामिन्द्रो हन्तु वरंवरम् । अमित्राणां शचीपतिर्मामीषां मोचि कश्चन ॥२०॥
उत्कसन्तु हृदयान्यूर्ध्वः प्राण उदीषतु । शौष्कास्यमनु वर्ततामामित्रान् मोत मित्रिणः ॥२१॥
ये च धीरा ये चाधीराः परांचो बधिराश्च ये। तमसा ये च तूपरा अथो बस्ताभिवासिनः ।
सर्वास्ताँ अर्बुदे त्वममित्रेभ्यो दृशे कुरूदारांश्च प्र दर्शय ॥२२॥
अर्बुदिश्च त्रिषन्धिश्चामित्रान् नो वि विध्यताम् ।
यथैषामिन्द्र वृत्रहन् हनाम शचीपतेऽमित्राणां सहस्रशः ॥२३॥
वनस्पतीन् वानस्पत्यानोषधीरुत वीरुधः । गन्धर्वाप्सरसः सर्पान् देवान् पुण्यजनान् पितृन् ।
सर्वास्ताँ अर्बुदे त्वममित्रेभ्यो दृशे कुरूदारांश्च प्र दर्शय ॥२४॥
ईशां वो मरुतो देव आदित्यो ब्रह्मणस्पतिः । ईशां व इन्द्रश्चाग्निश्च धाता मित्रः प्रजापतिः ।
ईशां व ऋषयश्चक्रुरमित्रेषु समीक्षयन् रदिते अर्बुदे तव ॥२५॥
तेषां सर्वेषामीशाना उत्तिष्ठत सं नह्यध्वं मित्रा देवजना यूयम् ।
इमं संग्रामं संजित्य यथालोकं वि तिष्ठध्वम् ॥२६॥

*ye bāhavo yā iṣavo dhanvanāṁ vīryāṇi cha ।*

*asīn paraśūnāyudhaṁ chittākūtaṁ cha yaddhṛdi ।*
*sarva tadarbude tvamamitrebhyo dṛśe kurūdārāṁścha pra darśaya ॥1 ॥*
*uttiṣṭhata saṁ nahyadhvaṁ mitrā devajanā yūyam ।*
*saṁdṛṣṭā guptā vaḥ santu yā no mitrāṇyarbude ॥2 ॥*
*uttiṣṭhatamā rabhethāmādānasaṁdānābhyām ।*
*amitrāṇāṁ senā abhi dhattamarbude ॥3 ॥*
*abudirnāma yo deva īśānaścha nyarbudiḥ ।*
*yābhyāmantarikṣamāvṛtamiyaṁ cha pṛthivī mahī ।*
*tābhyāmindramedibhyāmahaṁ jitamanvemi senayā ॥4 ॥*
*uttiṣṭha tvaṁ devajanārbude senayā saha ।*
*bhaṁjannamitrāṇāṁ senāṁ bhogebhiḥ pari vāraya ॥5 ॥*
*sapta jātān nyarbuda udārāṇāṁ samīkṣayan ।*
*tebhiṣṭavamājye hute sarvairuttiṣṭha senayā ॥6 ॥*
*pratighnānāśrumukhī kṛdhukarṇī cha krośatu ।*
*vikeśī puruṣe hate radite arbude tava ॥7 ॥*
*saṁkarṣantī karūkaraṁ manasā putramichchhantī ।*
*pati bhrātaramāt svān radite arbude tava ॥8 ॥*
*aliklavā jāṣkamadā gṛdhrāḥ śyenāḥ patatriṇaḥ ।*
*dhvāṅkṣā śakunayastṛpyantvamitreṣu samīkṣayan radite arbude tava ॥9 ॥*
*atho sarva śvāpadaṁ makṣikā tṛpyatu krimiḥ ।*
*pauruṣeye'dhi kuṇape radite arbude tava ॥10 ॥*
*ā gṛhṇītaṁ saṁ bṛhataṁ prāṇāpānān nyarbude ।*
*nivāśā ghoṣāḥ saṁ yantvamitreṣu samīkṣayan radite arbude tava ॥11 ॥*
*ud vepaya saṁ vijantāṁ bhiyāmitrāntsaṁ sṛja ।*
*urugrāhairbāhnaṅkairvidhyāmitrān nyarbude ॥12 ॥*
*muhyantveṣāṁ bāhavaśchittākūtaṁ cha yaddhṛdi ।*
*maiṣāmuchchheṣi kiṁ chana radite arbude tava ॥13 ॥*
*pratighnānāḥ saṁ dhāvantūraḥ paṭūrāvāghnānāḥ ।*
*aghariṇīrvikeśyorudatyaḥ? puruṣe hate radite arbude tava ॥14 ॥*
*śvanvatīrapsaraso rūpakā utārbude । antaḥ pātre rerihatīṁ riśāṁ durṇihitaiṣiṇīm ।*
*sarvāstā arbude tvamamitrebhyo dṛśe kurūdārāṁścha pra darśaya ॥15 ॥*
*khaḍūre'dhichaṅkramāṁ kharvikāṁ kharvavāsinīm ।*
*ya udārā antarhitā gandharvāpsarasaścha ye ।*
*sarpā itarajanā rakṣāṁsi ॥16 ॥*
*chaturdaṣṭrāṁchhyāvadataḥ kumbhamuṣkāṁ̐ asṛṅmukhān ।*
*svabhyasā ye chodbhyasāḥ ॥17 ॥*
*ud vepaya tvamarbude'mitrāṇāmamūḥ sichaḥ ।*
*jyāṁścha jiṣṇuśchāmitrāṁjayatāmindramedinau ॥18 ॥*
*prablīno mṛditaḥ śayāṁ hato3mitro nyarbude ।*
*agnijihnā dhūmaśikha jayantīryantu senayā ॥19 ॥*
*tayārbude praṇuttānāmindro hantu varaṁvaram ।*
*amitrāṇāṁ śachīpatirmāmīṣāṁ mochi kaśchana ॥20 ॥*
*utkasantu hṛdayānyūrdhvaḥ prāṇa udīṣatu ।*
*śauṣkāsyamanu vartatāmamitrān mota mitriṇaḥ ॥21 ॥*
*ye cha dhīrā ye chādhīrāḥ parāṁcho badhirāścha ye ।*
*tamasā ye cha tūparā atho bastābhivāsinaḥ ।*
*sarvāstāṁ̐ arbude tvamamitrebhyo dṛśe kurūdārāṁścha pra darśaya ॥22 ॥*
*arbudiścha triṣandhiśchāmitrān no vi vidhyatām ।*
*yathaiṣāmindra vṛtrahan hanāma śachīpate'mitrāṇāṁ sahasraśaḥ ॥23 ॥*
*vanaspatīn vānaspatyānoṣadhīruta vīrudhaḥ ।*

*gandharvāpsarasaḥ sarpān devān puṇyajanān pitṝn* ।
*sarvāstāṁ arbude tvamamitrebhyo dṛśe kurūdārāṁścha pra darśaya* ॥24॥
*īśāṁ vo maruto deva ādityo brahmaṇaspatiḥ* ।
*īśāṁ va indraśchāgniścha dhātā mitraḥ prajāpatiḥ* ।
*īśāṁ va ṛṣayaśchakruramitreṣu samīkṣayan radite arbude tava* ॥25॥
*teṣāṁ sarveṣāmīśānā uttiṣṭhata saṁ nahyadhvaṁ mitrā devajanā yūyam* ।
*imaṁ saṁgrāmaṁ saṁjitya yathālokaṁ vi tiṣṭhadhvam* ॥26॥

## १७५. काण्वः (Kāṇvaḥ)

१. आदित्यः (Ādityaḥ) - अ. (Av.) २.३२.१-६

उद्यन्नादित्यः क्रिमीन् हन्तु निम्रोचन् हन्तु रश्मिभिः। ये अन्तः क्रिमयो गवि ॥१॥
विश्वरूपं चतुरक्षं क्रिमिं सारंगमर्जुनम्। शृणाम्यस्य पृष्टीरपि वृश्चामि यच्छिरः ॥२॥
अत्रिवद् वः क्रिमयो हन्मि कण्ववज्जमदग्निवत्। अगस्त्यस्य ब्रह्मणा सं पिनष्म्यहं क्रिमीन्।३।
हतो राजा क्रिमीणामुतैषां स्थपतिर्हतः। हतो हतमाता क्रिमिर्हतभ्राता हतस्वसा ॥४॥
हतासो अस्य वेशसो हतासः परिवेशसः। अथो ये क्षुल्लकाइव सर्वे ते क्रिमयो हताः ॥५॥
प्र ते शृणामि शृंगे याभ्यां वितुदायसि। भिनद्मि ते कुषुम्भं यस्ते विषधानः ॥६॥
*udyannādityaḥ krimīn hantu nimrochan hantu raśmibhiḥ* ।
*ye antaḥ krimayo gavi* ॥1॥
*viśvarūpaṁ chaturakṣaṁ krimiṁ sāraṁgamarjunam* ।
*śṛṇāmyasya pṛṣṭīrapi vṛśchāmi yachchhiraḥ* ॥2॥
*attrivad vaḥ krimayo hanmi kaṇvavajjamadagnivat* ।
*agastyasya brahmaṇā saṁ pinaṣmyahaṁ krimīn* ।3।
*hato rājā krimīṇāmutaiṣāṁ sthapatirhataḥ* ।
*hato hatamātā krimirhatabhrātā hatasvasā* ॥4॥
*hatāso asya veśaso hatāsaḥ pariveśasaḥ* ।
*atho ye kṣullakāiva sarve te krimayo hatāḥ* ॥5॥
*pra te śṛṇāmi śṛṁge yābhyāṁ vitudāyasi* ।
*bhinadmi te kuṣumbhaṁ yaste viṣadhānaḥ* ॥6॥

श्. इन्द्रादयः (Indrādayaḥ) - अ. (Av.) ५.२३.१-१३

ओते मे द्यावापृथिवी ओता देवी सरस्वती। ओतौ म इन्द्रश्चग्निश्च क्रिमी जम्भयतामिति ।१।
अस्येन्द्र कुमारस्य क्रिमीन् धनपते जहि। हता विश्व अरातय उग्रेण वचसा मम ॥२॥
यो अक्ष्यौपरिसर्पति यो नासे परिसर्पति। दतां यो मध्यं गच्छति तं क्रिमिं जम्भयामसि ॥३॥
सरूपौ द्वौ विरूपौ द्वौ कृष्णौ द्वौ रोहितौ द्वौ। बभ्रुश्च बभ्रुकर्णश्च गृध्रः कोकश्च ते हताः ॥४॥
ये क्रिमयः शितिकक्षा ये कृष्णाः शितिबाहवः। ये के च विश्वरूपास्तान् क्रिमीन् जम्भयामसि ॥५॥
उत् पुरस्तात् सूर्य एति विश्वदृष्टो अदृष्टहां।
दृष्टांश्च घ्नन्नदृष्टांश्च सर्वाश्च प्रमृणन् क्रिमीन्।६।
येवाषासः कष्कषास एजत्काः शिपविलुकाः। दृष्टश्च हन्यतां क्रिमिरुतादृष्टश्च हन्यताम् ।७॥
हतो येवाषः क्रिमीणा हतो नदनिमोत। सर्वान नि मष्मषाकरं दृषदा खल्वाँइव ॥८॥
त्रिशीर्षाणं त्रिककुदं क्रिमिं सारंगमर्जुनम्। शृणम्यस्य पृष्टीरपि वृश्चमि यच्छिरः ॥९॥
अत्रिवद् वः क्रिमयो हन्मि कण्वज्जमदग्निवत्। अगस्त्यस्य ब्रह्मणा सं पिनष्म्यहं क्रिमीन्।१०।
हतो राजा क्रिमीणामुतैषां स्थपतिर्हतः। हतो हतमाता क्रिमिर्हतभ्राता हतस्वसा ॥११॥
हतासो अस्य वेशसो हतासः परिवेशसः। अथो ये क्षुल्लकाइव सर्वे ते क्रिमयो हताः ॥१२॥
सर्वेषां च क्रिमीणां सर्वासां च क्रिमीणाम्। भिनद्म्यश्मना शिरो दहाम्यग्निना मुखम् ॥१३॥
*Ote me dyāvāpṛthivī Otā devī sarasvatī* ।
*Otau ma indraśchagniścha krimī jambhayatāmiti* ।1।
*asyendra kumārasya krimīn dhanapate jahi* ।
*hatā viśva arātaya ugreṇa vachasā mama* ॥2॥
*yo akṣayauparisarpati yeā nāse parisarpati* ।

*datāṁ yo madhyaṁ gachchhati taṁ krimiṁ jambhayāmasi ॥3 ॥*
*sarūpau dvau virūpau dvau kṛṣṇau dvau rohitau dvau ।*
*babhruścha babhrukarṇaścha gṛdhraḥ kokaścha te hatāḥ ॥4 ॥*
*ye krimayaḥ śitikakṣā ye kṛṣṇāḥ śitibāhavaḥ ।*
*ye ke cha viśvarūpāstān krimīn jambhayāmasi ॥5 ॥*
*ut purastāt sūrya eti viśvadṛṣṭo adṛṣṭahāṁ ।*
*dṛṣṭāṁścha ghrannadṛṣṭāṁścha sarvāścha pramṛṇan krimīn ।6 ।*
*yevāṣāsaḥ kaṣkaṣāsa ejatkāḥ śipavitnukāḥ ।*
*dṛṣṭaścha hanyatāṁ krimirutādṛṣṭaścha hanyatām ।7 ॥*
*hato yevāṣaḥ krimīṇā hato nadanimota ।*
*sarvāna ni maṣmaṣākaraṁ dṛṣadā khalvāṁiva ॥8 ॥*
*triśīrṣāṇaṁ trikakudaṁ krimiṁ sāraṁgamarjunam ।*
*śṛṇamyasya pṛṣṭīrapi vṛśchami yachchhiraḥ ॥9 ॥*
*attrivad vaḥ krimayo hanmi kaṇvajjamadagnivat ।*
*agastyasya brahmaṇā saṁ pinaṣmyahaṁ krimīn ।10 ।*
*hato rājā krimīṇāmutaiṣāṁ sthapatirhataḥ ।*
*hateā hatamātā krimirhatabhrātā hatasvasā ॥11 ॥*
*hatāso asya veśaso hatāsaḥ pariveśasaḥ ।*
*atho ye kṣullakāiva sarve te krimayo hatāḥ ॥12 ॥*
*sarveṣāṁ cha krimīṇāṁ sarvāsāṁ cha krimīṇām । bhinadmyaśmanā śiro dahāmyagninā mukham ॥13 ॥*

३. क्रिमिजम्भनम् (Krimijambhanam) - अ. (Av.) २.३१.२-५

दृष्टमदृष्टमतृहमथो कुरूरुमतृहम् ।
अलगण्डून्त्सर्वांछलुनान् क्रिमीन् वचसा जम्भयामसि ॥२ ॥
अल्गण्डून् हन्मि महता वधेन दूना अदूना अरसा अभूवन् ।
शिष्टानशिष्टान् नि तिरामि वाचा यथा क्रिमीणां नकिरुच्छिषातै ॥३ ॥
अन्वान्त्र्यं शीर्षण्य१मथो पार्ष्टेयं क्रिमीन् ।
अवस्कवं व्यध्वरं क्रिमीन् वचसा जम्भयामसि ॥४ ॥
ये क्रिमयः पर्वतेषु वनेष्वोषधीषु पशुष्वप्स्व१न्तः ।
ये अस्माकं तन्वमाविविशुः सर्वं तद्धन्मि जनिम क्रिमीणाम् ॥५ ॥

*dṛṣṭamadṛṣṭamatṛhamatho kurūrumatṛham ।*
*alagaṇḍūntsarvāṁchhalunān krimīn vachasā jambhayāmasi ॥2 ॥*
*algaṇḍūn hanmi mahatā vadhena dūnā adūnā arasā abhūvan ।*
*śiṣṭānaśiṣṭān ni tirāmi vāchā yathā krimīṇāṁ nakiruchchhiṣātai ॥3 ॥*
*anvāntrayaṁ śīrṣaṇya1matho pārṣṭeyaṁ krimīn ।*
*avaskavaṁ vyadhvaraṁ krimīn vachasā jambhayāmasi ॥4 ॥*
*ye krimayaḥ parvateṣu vaneṣvoṣadhīṣu paśuṣvapsva1ntaḥ ।*
*ye asmākaṁ tanvamāviviśuḥ sarva taddhanmi janima krimīṇām ॥5 ॥*

४. मही (Mahī) - अ. (Av.) २.३१.१

इन्द्रस्य या मही दृषत् क्तिमेर्विश्वस्य तर्हणी। तया पिनष्मि सं क्रिमीन् दृषदा खल्वाँइव॥१ ॥
*indrasya yā mahī dṛṣat ktimerviśvasya tarhaṇī । tayā pinaṣmi saṁ krimīn dṛṣadā khalvāṁiva ॥1 ॥*

## १७६. कुत्सः (Kutsaḥ)

१. अग्निः (Agniḥ) - अ. (Av.) २०.१३.३; य. (Yv.)१२.२; १७.७०-७३; १८.७३; ३३.५ , ६

अ. (Av.) २०.१३.३

इमं स्तोमर्महते जातवेदसे रथमिव सं महेमा मनीषया ।
भद्रा हि नः प्रमतिरस्य संसद्यग्ने सख्ये मा रिषामा वयं तव ॥३ ॥

*imaṁ stomarmahate jātavedase rathamiva saṁ mahemā manīṣayā ।*
*bhadrā hi naḥ pramatirasya saṁsadyagne sakhye mā riṣāmā vayaṁ tava ॥3॥*

य. (Yv.)१२.२

नक्तोषासा समनसा विरूपे धापयेते शिशुमेकं समीची।
द्यावाक्षामा रुक्मोऽअन्तर्विभाति देवाऽअग्निं धारयन् द्रविणोदाः ॥२॥
*naktoṣāsā samanasā virūpe dhāpayete śiśumekaṁ samīchī ।*
*dyāvākṣāmā rukmo'antarvibhāti devā'agniṁ dhārayan draviṇodāḥ ॥2॥*

य. (Yv.)१७.७०-७३

नक्तोषासा समनसा विरूपे धापयेते शिशुमेकं समीची। द्यावाक्षामा रुक्मोऽअन्तर्विभाति देवाऽअग्निं धारयन् द्रविणोदाः ॥७०॥
अग्ने सहस्राक्ष शतमूर्द्धंछतं ते प्राणाः सहस्रं व्यानाः।
त्वं साहस्रस्य रायऽईशिषे तस्मै ते विधेम वाजाय स्वाहा ॥७१॥
सुपर्णोऽसि गरुत्मान् पृष्ठे पृथिव्याः सीद।
भासान्तरिक्षमापृण ज्योतिषा दिवमुत्तभान तेजसा दिशऽउद्दृं ह ॥७२॥
आजुह्वानः सुप्रतीकः पुरस्तादग्ने स्वं योनिमासीद् साधुया ।
अस्मिन्तस्धस्थे ऽअध्युत्तरस्मिन् विश्वे देवा यजमानश्च सीदत॥७३॥
*naktoṣāsā samanasā virūpe dhāpayete śiśumekaṁ samīchī । dyāvākṣāmā rukmo'antarvibhāti devā'agniṁ dhārayan draviṇodāḥ ॥70॥*
*agne sahasrākṣa śatamūrddhaṁchhataṁ te prāṇāḥ sahasraṁ vyānāḥ ।*
*tvaṁ sāhasrasya rāya'īśiṣe tasmai te vidhema vājāya svāhā ॥71॥*
*suparṇo'si garutmān pṛṣṭhe pṛthivyāḥ sīda ।*
*bhāsāntarikṣamāpṛṇa jyotiṣā divamuttabhāna tejasā diśa'uddṛṁ ha ॥72॥*
*ājuhnānaḥ supratīkaḥ purastādagne svaṁ yonimāsīd sādhuyā ।*
*asmintasdhasthe 'adhyuttarasmin viśve devā yajamānaścha sīdata ॥73॥*

य. (Yv.)१८.७३

पृष्टो दिवि पृष्टोऽअग्निः पृथिव्यां पृष्टो विश्वाऽओषधीरा विवेश ।
वैश्वानरः सहसा पृष्टोऽअग्निः स नो दिवा स रिषस्पातु नक्तम् ॥७३॥
*pṛṣṭo divi pṛṣṭo'agniḥ pṛthivyāṁ pṛṣṭo viśvā'Oṣadhīrā viveśa ।*
*vaiśvānaraḥ sahasā pṛṣṭo'agniḥ sa no divā sa riṣaspātu naktam ॥73॥*

य. (Yv.)३३.५-६

द्वे विरूपे चरतः स्वर्थेऽअन्यान्या वत्समुप धापयेते।
हरिरन्यस्या भवति स्वधावांछुक्रोऽअन्यस्यां ददृशे सुवर्चाः ॥५॥
अयमिह प्रथमो धायि धातृभिर्होता यजिष्ठोऽअध्वरेष्वीड्यः ।
यमपवानो भृगवो वि रुरुचुर्वनेषु चित्रं विभवं विशेविशे ॥६॥
*dve virūpe charataḥ svarthe'anyānyā vatsamupa dhāpayete ।*
*hariranyasyā bhavati svadhāvāṁchhukro'anyasyāṁ dadṛśe suvarchāḥ ॥5॥*
*ayamiha prathamo dhāyi dhātṛbhirhotā yajiṣṭho'adhvareṣvīḍyaḥ ।*
*yamapavāno bhṛgavo vi ruruchurvaneṣu chitraṁ vibhavaṁ viśeviśe ॥6॥*

२. अध्यात्मम् (Adhyātmam) - अ. (Av.) १०.८.१-४४

यो भूतं च भव्यं च सर्व यश्चाधितिष्ठति ।
स्वर्१र्यस्य च केवलं तस्मै ज्येष्ठाय ब्रह्मणे नमः ॥१॥
स्कम्भेनेमे विष्टभिते द्यौश्च भूमिश्च तिष्ठतः ।
स्कम्भ इदं सर्वमात्मन्वद् यत् प्राणन्निमिषच्च यत् ॥२॥
तिस्रो ह प्रजा अत्यायमायन् न्य१न्या अर्कमभितोऽविशन्त ।
बृहन् ह तस्थौ रजसो विमानो हरितो हरिणीरा विवेश ॥३॥
द्वादश प्रधयश्चक्रमेकं त्रीणि नभ्यानि क उ तच्चिकेत ।
तत्राहतास्त्रीणि शतानि शंकवः षष्टिश्च खीला अविचाचला ये ॥४॥

इदं सवितर्वि जानीहि षड् यमा एक एकजः ।
तस्मिन् हापित्वमिच्छन्ते य एषामेक एकजः ॥५॥
आविः सन्निहितं गुहा जरन्नाम महत् पदम् ।
तत्रेदं सर्वमार्पितमेजत् प्राणत् प्रतिष्ठितम् ॥६॥
एकचक्रं वर्तत एकनेमि सहस्राक्षरं प्र पुरो नि पश्चा ।
अर्धेन विश्वं भुवनं जजान यदस्यार्धं क्व३ तद् बभूव ॥७॥
पंचवाही वहत्यग्रमेषां प्रष्टयो युक्ता अनुसंवहन्ति ।
अयातमस्य ददृशे न यातं परं नेदीयोऽवरं दवीयः ॥८॥
तिर्यग्बिलश्चसमस ऊर्ध्वबुध्नस्तस्मिन् यशो निहितं विश्वरूपम् ।
तदासत ऋषयः सप्त साकं ये अस्य गोपा महतो बभूवुः ॥९॥
या पुरस्ताद् युज्यते या च पश्चाद् या विश्वतो युज्यते या च सर्वतः ।
यया याः प्राङ् तायते तां त्वा पृच्छामि कतमा स ऋचाम् ॥१०॥
यदेजति पतति यच्च तिष्ठति प्राणदप्राणन्निमिषच्च यद् भुवत् ।
तद् दाधार पृथिवीं विश्वरूपं तत् संभूय भवत्येकमेव ॥११॥
अनन्तं विततं पुरुत्रानन्तमन्तवच्चा समन्ते ।
ते नाकपालश्चरति विचिन्वन् विद्वान् भूतमुत भव्यमस्य ॥१२॥
प्रजापतिश्चरति गर्भे अन्तरदृश्यमानो बहुधा वि जायते ।
अर्धेन विश्वं भुवनं जजान यदस्यार्धं कतमः स केतुः ॥१३॥
ऊर्ध्वं भरन्तमुदकं कुम्भेनेवोदहार्यम् ।
पश्यन्ति सर्वे चक्षुषा न सर्वे मनसा विदुः ॥१४॥
दूरे पूर्णेन वसति दूर ऊनेन हीयते ।
महद् यक्षं भुवनस्य मध्ये तस्मै बलिं राष्ट्रभृतो भरन्ति ॥१५॥
यतः सूर्य उदेत्यस्तं यत्र च गच्छति । तदेव मन्येऽहं ज्येष्ठं तदु नात्येति किं चन ॥१६॥
ये अर्वाङ् मध्य उत वा पुराणं वेदं विद्वांसमभितो वदन्ति ।
आदित्यमेव ते परि वदन्ति सर्वे अग्निं द्वितीयं त्रिवृतं च हंसम् ॥१७॥
सहस्राह्ण्यं वियतावस्य पक्षौ हरेर्हंसस्य पततः स्वर्गम् ।
स देवान्त्सर्वानुरस्युपदद्य संपश्यन् याति भुवनानि विश्वा ॥१८॥
सत्येनोर्ध्वस्तपति ब्रह्मणार्वाङ् वि पश्यति । प्राणेन तिर्यङ् प्राणति यस्मिंज्येष्ठमधि श्रितम् ॥१९॥
यो वै ते विद्यादरणी याभ्यां निर्मथ्यते वसु ।
स विद्वांज्येष्ठं मन्येत स विद्याद् ब्राह्मणं महत् ॥२०॥
अपादग्रे समभवत् सो अग्रे स्व१राभरत् । चतुष्पाद् भूत्वा भोग्यः सर्वमादत्त भोजनम् ॥२१॥
भोग्यो भवदथो अन्नमदद् बहु । यो देवमुत्तरावन्तमुपासातै सनातनम् ॥२२॥
सनातनमेनमाहुरुताद्य स्यात् पुनर्णवः । अहोरात्रे प्र जायेते अन्यो अन्यस्य रूपयोः ॥२३॥
शतं सहस्रमयुतं नयर्बुदमसंख्येयं स्वमस्मिन् निविष्टम् ।
तदस्य घ्नत्यभिपश्यत एव तस्माद् देवो रोचत एष एतत् ॥२४॥
बालादेकमाणीयस्कमुतैकं नेव दृश्यते। ततः परिष्वजीयसी देवता सा मम प्रिया ॥२५॥
इयं कल्याण्य१जरा मर्त्यस्यामृता गृहे। यस्मै कृता शये स यश्चकार जजार सः ॥२६॥
त्वं स्त्री त्वं पुमानसि त्वं कुमार उत वा कुमारी ।
त्वं जीर्णो दण्डेन वंचसि त्वं जातो भवसि विश्वतोमुखः ॥२७॥
उतैषां पितोत वा पुत्र एषामुतैषां ज्येष्ठ उत वा कनिष्ठः ।
एको ह देवो मनसि प्रविष्टः प्रथमो जातः स उ गर्भे अनतः ॥२८॥
पूर्णात् पूर्णमूदचति पूर्णं पूर्णेन सिच्यते ।
उतो तदद्य विद्याम यतस्तत् परिषिच्यते ॥२९॥
एषा सनत्नी सनमेव जातैषा पुराणी परि सर्वं बभूव ।
मही देव्यु१षसो विभाती सैकेनैकेन मिषता वि चष्टे ॥३०॥
अविर्वै नाम देवत ऋतेनास्ते परीवृता । तस्या रूपेणेमे वृक्षा हरिता हरितस्रजः ॥३१॥

अन्ति सन्तं न जहात्यन्ति सन्त न पश्यति ।
देवस्य पश्य काव्यं न ममार न जीर्यति ॥३२॥
अपूर्वेणेषिता वाचस्ता वदन्ति यथायथम् । वदन्तीर्यत्र गच्छन्ति तदाहुर्ब्राह्मणं महत् ॥३३॥
यत्र देवाश्च मनुष्याश्चारा नाभाविव श्रिताः ।
अपां त्वा पुष्पं पृच्छामि यत्र तन्मायया हितम् ॥३४॥
येभिर्वात इषितः प्रवाति ये ददन्ते पंच दिशः सध्रीचीः ।
य आहुतिमत्यमन्यन्त देवा अपां नेतारः कतमे त आसन् ॥३५॥
इमामेषां पृथिवीं वस्त एकोऽनतरक्षिं पर्येको बभूव ।
दिवमेषां ददते यो विधर्ता विश्वा आशाः प्रति रक्षन्त्येके ॥३६॥
यो विद्यात् सूत्रं विततं यस्मिन्नोताः प्रजा इमाः ।
सूत्रं सूत्रस्य यो विद्यात् स विद्याद् ब्राह्मणं महत् ॥३७॥
वेदाहं सूत्रं विततं यस्मिन्नोताः प्रजा इमाः ।
सूत्रं सूत्रस्याहं वेदाथो यद् ब्राह्मणं महत् ॥३८॥
यदन्तरा द्यावापृथिवी अग्निरैत् प्रदहन् विश्वदाव्यः ।
यत्रातिष्ठन्नेकपत्नीः परस्तात् क्वेवासीन्मातरिश्वा तदानीम् ॥३९॥
अप्स्वासीन्मातरिश्वा प्रविष्टः प्रविष्टा देवाः सलिलान्यासन् ।
बृहन् ह तस्थौ रजसो विमानः पवमानो हरित आ विवेश ॥४०॥
उत्तरेणेव गायत्रीममृतेऽधि वि चक्रमे । साम्ना ये साम संविदुरजस्तद् ददृशे क्व ॥४१॥
निवेशनः संगमनो वसूनां देवइव सविता सत्यधर्मा ।
इन्द्रो न तस्थौ समरे धनानाम् ॥४२॥
पुण्डरीकं नवद्वारं त्रिभिर्गुणेभिरावृतम् । तस्मिन् यद् यक्षमात्मन्वत् तद् वै ब्रह्मविदो विदुः ॥४३॥
अकामो धीरो अमृतः स्वयंभू रसेन तृप्तो न कुतश्चनोनः ।
तमेव विद्वान् न बिभाय मृत्योरात्मानं धीरमजरं युवानम् ॥४४॥

*yo bhūtaṁ cha bhavyaṁ cha sarva yaśchādhitiṣṭhati /*
*sva1ryasya cha kevalaṁ tasmai jyeṣṭhāya brahmaṇe namaḥ //1 //*
*skambheneme viṣṭabhite dyauścha bhūmiścha tiṣṭhataḥ /*
*skambha idaṁ sarvamātmanvad yat prāṇannimiṣachcha yat //2 //*
*tisro ha prajā atyāyamāyan nya1nyā arkamabhito'viśanta /*
*bṛhan ha tasthau rajaso vimāno harito hariṇīrā viveśa //3 //*
*dvādaśa pradhayaśchakramekaṁ trīṇi nabhyāni ka u tachiketa /*
*tatrāhatāstrīṇi śatāni śaṁkavaḥ ṣaṣṭiścha khīlā avichāchalā ye //4 //*
*idaṁ savitarvi jānīhi ṣau yamā eka ekajaḥ /*
*tasmin hāpitvamichchhante ya eṣāmeka ekajaḥ //5 //*
*āviḥ sannihitaṁ guhā jarannāma mahat padam /*
*tatredaṁ sarvamārpitamejat prāṇat pratiṣṭhitam //6 //*
*ekachakraṁ vartata ekanemi sahasrākṣaraṁ pra puro ni paśchā /*
*ardhena viśvaṁ bhuvanaṁ jajāna yadasyārdha kva3 tad babhūva //7 //*
*paṁchavāhī vahatyagrameṣāṁ praṣṭayo yuktā anusaṁvahanti /*
*ayātamasya dadṛśe na yātaṁ paraṁ nedīyo'varaṁ davīyaḥ //8 //*
*tiryagbilaśchasamasa ūrdhvabudhnastasmin yaśo nihitaṁ viśvarūpam /*
*tadāsata ṛṣayaḥ sapta sākaṁ ye asya gopā mahato babhūvuḥ //9 //*
*yā purastād yujyate yā cha paśchād yā viśvato yujyate yā cha sarvataḥ /*
*yayā yāḥ prāṅ tāyate tāṁ tvā pṛchchhāmi katamā sa ṛchām //10 //*
*yadejati patati yachcha tiṣṭhati prāṇadaprāṇannimiṣachcha yad bhuvat /*
*tad dādhāra pṛthivīṁ viśvarūpaṁ tat saṁbhūya bhavatyekameva //11 //*
*anantaṁ vitataṁ purutrānantamantavachchā samante /*
*te nākapālaścharati vichinvan vidvān bhūtamuta bhavyamasya //12 //*
*prajāpatiścharati garbhe antaradṛśyamāno bahudhā vi jāyate /*

*ardhena viśvaṁ bhuvanaṁ jajāna yadasyārdha katamaḥ sa ketuḥ //13 //*
*ūrdhva bharantamudakaṁ kumbhenevodahāryam /*
*paśyanti sarve chakṣuṣā na sarve manasā viduḥ //14 //*
*dūre pūrṇena vasati dūra ūnena hīyate /*
*mahad yakṣaṁ bhuvanasya madhye tasmai baliṁ rāṣṭrabhṛto bharanti //15 //*
*yataḥ sūrya udetyastaṁ yatra cha gachchhati / tadeva manye'haṁ jyeṣṭhaṁ tadu nātyeti kiṁ chana //16 //*
*ye arvāṅ madhya uta vā purāṇaṁ vedaṁ vidvāṁsamabhito vadanti /*
*ādityameva te pari vadanti sarve agniṁ dvitīyaṁ trivṛtaṁ cha haṁsam //17 //*
*sahasrāhṇyaṁ viyatāvasya pakṣau harerhasasya patataḥ svargam /*
*sa devāntsarvānurasyupadadya saṁpaśyan yāti bhuvanāni viśvā //18 //*
*satyenordhvastapati brahmaṇārvāṅ vi paśyati / prāṇena tiryaṅ prāṇati yasmiṁjyeṣṭhamadhi śritam //19 //*
*yo vai te vidyādaraṇī yābhyāṁ nirmathyate vasu /*
*sa vidvāṁjyeṣṭhaṁ manyeta sa vidyād brāhmaṇaṁ mahat //20 //*
*apādagre samabhavat so agre sva1rābharat /*
*chatuṣpād bhūtvā bhogyaḥ sarvamādatta bhojanam //21 //*
*bhogyo bhavadatho annamadad bahu /*
*yo devamuttarāvantamupāsātai sanātanam //22 //*
*sanātanamenamāhurutādya syāt punarṇavaḥ /*
*ahorātre pra jāyete anyo anyasya rūpayoḥ //23 //*
*śataṁ sahasramayutaṁ nayarbudamasaṁkhyeyaṁ svamasmin niviṣṭam /*
*tadasya ghnatyabhipaśyata eva tasmād devo rochata eṣa etat //24 //*
*bālādekamāṇīyaskamutaikaṁ neva dṛśyate /*
*tataḥ pariṣvajīyasī devatā sā mama priyā //25 //*
*iyaṁ kalyāṇya1jarā martyasyāmṛtā gṛhe /*
*yasmai kṛtā śaye sa yaśchakāra jajāra saḥ //26 //*
*tvaṁ strī tvaṁ pumānasi tvaṁ kumāra uta vā kumārī /*
*tvaṁ jīrṇo daṇḍena vaṁchasi tvaṁ jāto bhavasi viśvatomukhaḥ //27 //*
*utaiṣāṁ pitota vā putra eṣāmutaiṣāṁ jyeṣṭha uta vā kaniṣṭhaḥ /*
*eko ha devo manasi praviṣṭaḥ prathamo jātaḥ sa u garbhe anataḥ //28 //*
*pūrṇāt pūrṇamūdachati pūrṇa pūrṇena sichyate /*
*uto tadadya vidyāma yatastat pariṣichyate //29 //*
*eṣā sanatnī sanameva jātaiṣā purāṇī pari sarva babhūva /*
*mahī devyu1ṣaso vibhātī saikenaikena miṣatā vi chaṣṭe //30 //*
*avirvai nāma devata ṛtenāste parīvṛtā / tasyā rūpeṇeme vṛkṣā haritā haritasrajaḥ //31 //*
*anti santaṁ na jahātyanti santa na paśyati /*
*devasya paśya kāvyaṁ na mamāra na jīryati //32 //*
*apūrveṇeṣitā vāchastā vadanti yathāyatham /*
*vadantīryatra gachchhanti tadāhurbrāhmaṇaṁ mahat //33 //*
*yatra devāścha manuṣyāśchārā nābhāviva śritāḥ /*
*apāṁ tvā puṣpaṁ pṛchchhāmi yatra tanmāyayā hitam //34 //*
*yebhirvāta iṣitaḥ pravāti ye dadante paṁcha diśaḥ sadhrāīchīḥ /*
*ya āhutimatyamanyanta devā apāṁ netāraḥ katame ta āsan //35 //*
*imāmeṣāṁ pṛthivīṁ vasta eko'natarakṣiṁ paryeko babhūva /*
*divameṣāṁ dadate yeā vidhartā viśvā āśāḥ prati rakṣantyeke //36 //*
*yo vidyāt sūtraṁ vitataṁ yasminnotāḥ prajā imāḥ /*
*sūtraṁ sūtrasya yo vidyāt sa vidyād brāhmaṇaṁ mahat //37 //*
*vedāhaṁ sūtraṁ vitataṁ yasminnotāḥ prajā imāḥ /*
*sūtraṁ sūtrasyāhaṁ vedātho yad brāhmaṇaṁ mahat //38 //*

*yadantarā dyāvāpṛthivī agnirait pradahan viśvadāvyaḥ ।*
*yatrātiṣṭhannekapatnīḥ parastāt kvevāsīnmātariśvā tadānīm ॥39 ॥*
*apsvāsīnmātariśvā praviṣṭaḥ praviṣṭā devāḥ salilānyāsan ।*
*bṛhan ha tasthau rajaso vimānaḥ pavamāno harita ā viveśa ॥40 ॥*
*uttareṇeva gāyatrīmamṛte'dhi vi chakrame ।*
*sāmnā ye sāma saṁvidurajastad dadṛśe kva ॥41 ॥*
*niveśanaḥ saṁgamano vasūnāṁ devaiva savitā satyadharmā ।*
*indro na tasthau samare dhanānām ॥42 ॥*
*puṇḍarīkaṁ navadvāraṁ tribhirguṇebhirāvṛtam ।*
*tasmin yad yakṣamātmanvat tad vai brahmavido viduḥ ॥43 ॥*
*akāmo dhīro amṛtaḥ svayaṁbhū rasena tṛpto na kutaśchanonaḥ ।*
*tameva vidvān na bibhāya mṛtyorātmānaṁ dhīramajaraṁ yuvānam ॥44 ॥*

३. अश्विनौ (Aśvinau) - य. (Yv.)३४.२९-३०

अप्नस्वतीमश्विना वाचमस्मे कृतं नो दस्रा वृषणा मनीषाम् ।
अद्यूत्येऽवसे निह्वये वां वृधे च नो भवतं वाजसातौ ॥२९॥
द्युभिरक्तुभिः परिपातमस्मानरिष्टेभिरश्विना सौभगेभिः ।
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवीऽउत द्यौः ॥३०॥
*apnasvatīmaśvinā vāchamasme kṛtaṁ no dasrā vṛṣaṇā manīṣām ।*
*adyūtye'vase nihnaye vāṁ vṛdhe cha no bhavataṁ vājasātau ॥29 ॥*
*dyubhiraktubhiḥ paripātamasmānariṣṭobhiraśvinā saubhagobhiḥ ।*
*tanno mitro varuṇo māmahantāmaditiḥ sindhuḥ pṛthivī'uta dyauḥ ॥30 ॥*

४. आदित्यो गृहपतिः (Āditya Gṛhapatiḥ) - य. (Yv.)८.४

याो देवानां प्रत्येतिं सुम्नमादित्यासो भवता मृडयन्तः। आ वोऽ र्वाची सुमतिर्ववृत्यादं होश्चिद्या वरिवोवित्तरासदादित्येभयस्त्वा ॥४॥
*yāo devānāṁ pratyetiṁ sumnamādityāso bhavatā mṛḍayantaḥ । ā vo' rvāchī sumatirvavṛtyādaṁ hośchidyā varivovittarāsadādityebhayastvā ॥4 ॥*

५. आदित्याः (Ādityāḥ) - य. (Yv.)३३.६८

याो देवानां प्रत्येतिं सुम्नमादित्यासो भवता मृडयन्तः ।
आ वोऽ र्वाची सुमतिर्ववृत्यादं होश्चिद्या वरिवोवित्तरासत ॥६८॥
*yāo devānāṁ pratyetiṁ sumnamādityāso bhavatā mṛḍayantaḥ ।*
*ā vo' rvāchī sumatirvavṛtyādaṁ hośchidyā varivovittarāsata ॥68 ॥*

६. इन्द्रः (Indraḥ) - अ. (Av.) २०.८.२; य. (Yv.)३३.२९

अ. (Av.) २०.८.२

अर्वाङ् एहि सोमकामं त्वाहुरयं सुतस्तस्य पिबा मदाय ।
उरुव्यचा जठर आ वृषस्व पितेव नः श्रृणुहि हूयमानः ॥२॥
*arvāṅ ehi somakāmaṁ tvāhurayaṁ sutastasya pibā madāya ।*
*uruvyachā jaṭhara ā vṛṣasva piteva naḥ śṛṇuhi hūyamānaḥ ॥2 ॥*

य. (Yv.)३३.२९

इमां ते धियं प्र भरे महो महीमस्य स्तोत्रे धिष्णा यत्तऽआनजे ।
तमुत्सवे च प्रसवे च सासहिमिन्द्रं देवासः शवसामदन्ननु ॥२९॥
*imāṁ te dhiyaṁ pra bhare maho mahīmasya stotre dhiṣṇā yatta'ānaje ।*
*tamutsave cha prasave cha sāsahimindraṁ devāsaḥ śavasāmadannanu ॥29 ॥*

७. गृहपतयः (Gṛhapatayaḥ) - य. (Yv.)८.५

विवस्वन्नादित्यैष ते सोमपीथस्तस्मिन् मत्स्व। श्रदस्मै नरो वचसे दधातन यदाशीर्दा दम्पती वाममश्नुतः। पुमान् पुत्रो जायते विन्दते वस्वधा विश्वाहारपऽएधते गृहे ॥५॥
*vivasvannādityaiṣa te somapīthastasmin matsva । śradasmai nareā vachase dadhātana*

*yadāśīrdā*
*dampatī vāmamaśnutaḥ / pumān putro jāyate vindate vasvadhā viśvāhārapa'edhate gṛhe //5 //*

८. रात्रिः (Rātriḥ) - य. (Yv.) ३४.३२

आ रात्रि पार्थिवंरजः पितुरप्रायि धामभिः ।
दिवः सदां सि बृहती वि तिष्ठसऽआ त्वेषं वर्त्तते तमः ॥३२॥
*ā rātri pārthivaṁrajaḥ pituraprāyi dhāmabhiḥ /*
*divaḥ sadāṁ si bṛhatī vi tiṣṭhasa'ā tveṣaṁ varttate tamaḥ //32 //*

९. रुद्राः (Rudrāḥ) - य. (Yv.)१६.१५-१७; १९; २९; १६.१८; २०-२८; ३०-३३; ३५-३९

य. (Yv.)१६.१५-१७

मा नो महान्तमुत मा नोऽअर्भकं मा नऽउक्षन्तमुत मा नऽउक्षितम् ।
मा नो वधीः पितरं मोत मातरं मा नः प्रियास्तन्वो रुद्र रीरिषः ॥१५॥
मा नस्तोके तनये मा नऽआयुषि मा नो गोषु मा नोऽअश्वेषु रीरिषः ।
मा नो वीरान् रुद्र भामिनो वर्धीर्हविष्मन्तः सदमित त्वा हवामहे ॥१६॥
नमो हिरण्यबाहवे सेनान्ये दिशां च पत्तये नमो नमो वृक्षेभ्यो हरिकेशेभ्यः पशूनां पतये नमो नमः शष्पिंजराय त्विषीमते पथीनां पतये नमो नमो हरिकेशायोपवीतिने पुष्टानां पतये नमः ।१७
*mā no mahāntamuta mā no'arbhakaṁ mā na'ukṣantamuta mā na'ukṣitam /*
*mā no vadhīḥ pitaraṁ mota mātaraṁ mā naḥ priyāstanvo rudra rīriṣaḥ //15 //*
*mā nastoke tanaye mā na'āyuṣi mā no goṣu mā no'aśveṣu rīriṣaḥ /*
*mā no vīrān rudra bhāmino vardhīrhaviṣmantaḥ sadamita tvā havāmahe //16 //*
*namo hiraṇyabāhave senānye diśāṁ cha pattaye namo namo vṛkṣebhyo harikeśebhyaḥ paśūnāṁ pataye namo namaḥ śaṣpiṁjarāya tviṣīmate pathīnāṁ pataye namo namo harikeśāyopavītine puṣṭānāṁ pataye namaḥ /17*

य. (Yv.)१६.१९

नमो रोहिताय स्थपतये वृक्षाणां पतये नमो नमो भुवन्तये वारिवस्कृतायौषधीनां पतये नमोनमो मन्त्रिणे वाणि जाय कक्षाणां पतये नमो नमऽउच्चैर्घोषायाक्रन्दयते पत्तीनां पतये नमः ॥१९॥
*namo rohitāya sthapataye vṛkṣāṇāṁ pataye namo namo bhuvantaye vārivaskṛtāyauṣadhīnāṁ pataye namonamo mantriṇe vāṇi jāya kakṣāṇāṁ pataye namo nama'uchchairgheāṣāyākrandayate pattīnāṁ pataye namaḥ //19 //*

य. (Yv.)१६.२९

नमः कपर्दिने च व्युप्तकेशाय च नमः सहस्राक्षाय च शतधन्वने च नमो गिरिशयाय च शिपिविष्टाय च नमो मीढुष्टमाय चेषुमते च ॥२९॥
*namaḥ kapardine cha vyuptakeśāya cha namaḥ sahasrākṣāya cha śatadhanvane cha namo giriśayāya cha śipiviṣṭāya cha namo mīḍhuṣṭamāya cheṣumate cha //29 //*

य. (Yv.)१६.१८

नमो बभ्लुशाय व्याधिनेऽन्नानां पतये नमो नमो भवस्य हेत्यै जगतां पतये नमो नमो रुद्रायाततायिने क्षेत्राणां पतयो नमो नमः सूतायाहन्त्यै वनानां पतये नमः ॥१८॥
*namo babhluśāya vyādhine'nnānāṁ pataye namo namo bhavasya hetyai jagatāṁ pataye namo namo rudrāyātatāyine kṣetrāṇāṁ patayo namo namaḥ sūtāyāhantyai vanānāṁ pataye namaḥ //18 //*

य. (Yv.)१६.२०-२८

नमः कृत्स्नायतया धावते सत्वनां पतये नमो नमः सहमानाय निव्याधिनऽआव्याधिनीनां पतये नमो नमो निषंगिणे ककुभाय स्तेनानां पतये नमो नमो निचेरवे परिचरायारणयानां पतये नमः ।२०।
नमो वंचते परिवंचते स्तायूनां पतये नमो नमो निषंगिणऽइषुधिमते तस्कराणां पतये नमो नमः सृकायिभ्यो जिघां सद्भ्यो मुष्णतां पतये नमो नमोऽसिमद्भ्यो नक्तं चरद्भ्यो विकृन्तानां पतये नमः ॥२१॥
नमऽउष्णीषिणे गिरिचराय कुलुंचानां पतये नमो रमऽषुमद्भ्यो धन्वायिभ्यश्च वो नमो नमऽआतन्वानेभ्यः

प्रतिदधानेभ्यश्च वो नमो नमऽ आयच्छद्भ्यो स्यद्भ्यश्च वो नमः ॥२२॥
नमो विसृजद्भ्ये विद्ध्यद्भ्यश्च वो नमो नमः स्वपद्भ्यो जाग्रद्भ्यश्च वो नमो नमः शयानेभ्यऽअसीनेभ्यश्च वो नमो नमस्तिष्ठद्भ्यो धावद्भ्यश्च वो नमः ॥२३॥
नमः सभाभ्यः समापतिभ्यश्च वो नमो नमोऽश्वेभ्योऽश्वपतिभ्यश्च वो नमो नम ऽआव्याधिनीभ्यो विविध्यन्तीभ्यश्च वो नमो नम ऽउगणाभ्यस्तृं हतीभ्यश्च वो नमः ॥२४॥
नमो गणेभ्यो गणपतिभ्यश्च वो नमो नमो व्रातेभ्यो व्रातपतिभ्यश्च वो नमो नमो गृत्सेभ्यो गृत्सपतिभ्यश्च वो नमो नमो विरूपेभ्यो विश्वरूपेभ्यश्च वो नमः ॥२५॥
नमः सेनाभ्यः सेनानिभ्यश्च वो नमो नमो रथिभ्यांऽअरथेभ्यश्च वो नमो नमः क्षत्तृभ्यः संग्रहीतृभ्यश्च वो नमो नमो महद्भ्योऽअर्भकेभ्यश्च वो नमः ॥२६॥
नमस्तक्षभ्यो रथकारेभ्यश्च वो नमो नमः कुलालेभ्यः कम्मरिभ्यश्च वो नमो नमो निषादेभ्यः पुञ्जिष्टेभ्यश्च वो नमो नमः शवनिभ्यो मृगयुभ्यश्च वो नमः ॥२७॥
नमः श्वभ्यः श्वपतिभ्यश्च वो नमो नमो भवाय च रुद्राय च नमः शर्वाय च पशुपतये च नमो नीलग्रीवाय च शितिकणठाय च ॥२८॥

*namaḥ kṛtsnāyatayā dhāvate satvanāṁ pataye namo namaḥ sahamānāya nivyādhina'āvyādhinīnāṁ pataye namo namo niṣaṁgiṇe kakubhāya stenānāṁ pataye namo namo nicherave paricharāyāraṇayānāṁ pataye namaḥ I20 I*
*namo vaṁchate parivaṁchate stāyūnāṁ pataye namo namo niṣaṁgiṇa'iṣudhimate taskarāṇāṁ pataye namo namaḥ sṛkāyibhyo jighāṁ sadbhyo muṣṇatāṁ pataye namo namo'simadbhyo naktaṁ charadbhyo vikṛntānāṁ pataye namaḥ II21 II*
*nama'uṣṇīṣiṇe giricharāya kuluṁchānāṁ pataye namo rama'ṣumadbhyo dhanvāyibhyaścha vo namo nama'ātanvānebhyaḥ pratidadhānebhyaścha vo namo nama' āyachchhadbhyo syadbhyaścha vo namaḥ II22 II*
*namo visṛjadbhye viddhyadbhyaścha vo namo namaḥ svapadbhyo jāgradbhyaścha vo namo namaḥ śayānebhya'asīnebhyaścha vo namo namastiṣṭhadbhyo dhāvadbhayaścha vo namaḥ II23 II*
*namaḥ sabhābhyaḥ samāpatibhyaścha vo namo namo'śvebhyo'śvapatibhyaścha vo namo nama 'āvyādhinībhyo vividhyantībhyaścha vo namo nama 'ugaṇābhyastṛṁ hatībhyaścha vo namaḥ II24 II*
*namo gaṇebhyo gaṇapatibhyaścha vo namo namo vrātebhyo vrātapatibhyaścha vo namo namo gṛtsebhyo gṛtsapatibhyaścha vo namo namo virūpebhyo viśvarūpebhyaścha vo namaḥ II25 II*
*namaḥ senābhyaḥ senānibhyaścha vo namo namo rathibhyāṁ'arathebhyaścha vo namo namaḥ kṣattṛbhyaḥ saṁgrahītṛbhyaścha vo namo namo mahadbhyo'arbhakebhyaścha vo namaḥ II26 II*
*namastakṣabhyo rathakārebhyaścha vo namo namaḥ kulālebhyaḥ karmmārebhyaścha vo namo namo niṣādebhyaḥ puñjiṣṭhebhyaścha vo namo namaḥ śavanibhyo mṛgayubhyaścha vo namaḥ II27 II*
*namaḥ śvabhyaḥ śvapatibhyaścha vo namo namo bhavāya cha rudrāya cha namaḥ śarvāya cha paśupataye cha namo nīlagrīvāya cha śitikaṇaṭhāya cha II28 II*

य. (Yv.) ३०-३३

नमो ह्रस्वाय च वामनाय च नमो बृहते च वर्षीयसे च नमो वृद्धाय च सवृधे च नमोऽग्र्याय च प्रथमाय च ॥३०॥
नमऽआशवे चाजिराय च नमः शीघ्याय च शीभ्याय च नमऽऊर्म्याय चावस्वन्याय च नमो नादेयाय च द्वीप्याय च ॥३१॥
नमो ज्येष्ठाय च कनिष्ठाय च नमः पूर्वजाय चापरजाय च नमो मध्यमाय चापगल्भाय च नमो जघन्याय च बुध्न्याय च ॥३२॥
नमः सोभ्याय च प्रतिसर्य्याय च नमो याम्याय च क्षेम्याय च नमः श्लोक्याय चावसान्याय च नमऽउर्वर्याय च खल्याय च ॥३३॥

*namo hrasvāya cha vāmanāya cha namo bṛhate cha vaṣīryase cha namo vṛddhāya cha savṛdhe cha namo'gryāya cha prathamāya cha //30 //*
*nama'āśave chājirāya cha namaḥ śīghyrāya cha śībhyāya cha nama'ūrmyāya chāvasvanyāya cha namo nādeyāya cha dvīpyāya cha //31 //*
*namo jyeṣiāya cha kaniṣṭhāya cha namaḥ pūrvajāya chāparajāya cha namo madhyamāya chāpagalbhāya cha namo jaghanyāya cha budhnyāya cha //32 //*
*namaḥ sobhyāya cha pratisaryyāya cha namo yābhyāya cha kṣemyāya cha namaḥ ślokyāya chāvasānyāya cha nama'urvaryāya cha khalyāya cha //33 //*

य. (Yv.)३५-३९

नमो बिल्मिने च कवचिने च नमो विर्मिणे च वरूथिने च नमः श्रुताय च श्रुसेनाय च नमो दुन्दुभ्याय चाहनन्याय च ॥३५॥
नमो धृष्णवे च प्रमृशाय च नमो निषंगिणे चेषुधिमते च नमस्तीक्षणेषवे चायुधिने च नमः स्वायुधाय च सुधन्वने च ॥३६॥
नमः सुत्याय च पथ्याय च नमः काठ्याय च नीप्याय च नमः कुल्याय च सरस्याय च नमो नादेयाय च वैशन्ताय च ॥३७॥
नमः कूप्याय चावट्याय च नमो वीध्र्याय चातप्याय च नमो मेध्याय च विद्युत्याय च नमो वर्ष्याय चावर्ष्याय च ॥३८॥
नमो वात्याय च रेष्म्याय च नमो वास्तव्याय च वास्तुपाय च नमः सोमाय च रुद्राय च नमस्ताम्राय चारुणाय च ॥३९॥

*namo bilmine cha kavachine cha namo virmiṇe cha varūthine cha namaḥ śrutāya cha śrusenāya cha namo dundubhyāya chāhananyāya cha //35 //*
*namo dhṛṣṇave cha pramṛśāya cha namo niṣaṁgiṇe cheṣudhimate cha namastīkṣaṇeṣave chāyudhine cha namaḥ svāyudhāya cha sudhanvane cha //36 //*
*namaḥ sutyāya cha pathyāya cha namaḥ kāṭhyāya cha nīpyāya cha namaḥ kulyāya cha sarasyāya cha namo nādeyāya cha vaiśantāya cha //37 //*
*namaḥ kūpyāya chāvaṭyāya cha namo vīdhyrāya chātapyāya cha namo medhyāya cha vidyutyāya cha namo varṣyāya chāvarṣyāya cha //38 //*
*namo vātyāya cha reṣmyāya cha namo vāstavyāya cha vāstupāya cha namaḥ somāya cha rudrāya cha namastāmrāya chāruṇāya cha //39 //*

१०. वैश्वानरः (Vaiśvānaraḥ) - य. (Yv.)२६.८-९

वैश्वानरो नऽऊतयऽआ प्र यातु परावतः। अग्निरुक्थेन वाहसा। उपयाम गृहीतोऽसि वैश्वानराय त्वैष ते योनिर्वैश्वानराय त्वा ॥८॥
अगिनऋर्षिः पवमानः पंचजन्यः पुरोहितः। तमीमहे महागयम् । उपयामगृहीतोऽस्यग्नये त्वा वर्चसऽएष ते योनिरग्नये त्वा वर्चसे ॥९॥
*vaiśvānaro na'ūtaya'ā pra yātu parāvataḥ / agnirukthena vāhasā /*
*upayāma gṛhīto'si vaiśvānarāya tvaiṣa te yonirvaiśvānarāya tvā //8 //*
*aginarṛṣiḥ pavamānaḥ paṁchajanyaḥ purohitaḥ / tamīmahe mahāgayam /*
*upayāmagṛhīto'syagnaye tvā varchasa'eṣa te yoniragnaye tvā varchase //9 //*

११. वैश्वानरोऽग्निः (Vaiśvānaro'gniḥ) - य. (Yv.)२६.७

वैश्वानरस्य सुमतौ स्याम राजा हि कं भुवनानमभि श्रीः। इतो जातो विश्वमिदं वि चष्टे वैश्वानरो यतते सूर्येण। उपयामगृहीतोऽसि वैश्वानराय त्वैष ते योनिर्वैश्वानराय तवा ॥७॥
*vaiśvānarasya sumatau syāma rājā hi kaṁ bhuvanānamabhi śrīḥ / ito jāto viśvamidaṁ vi chaṣṭe vaiśvānaro yatate sūryeṇa / upayāmagṛhīto'si vaiśvānarāya tvaiṣa te yonirvaiśvānarāya tavā //7 //*

१२. सूर्यः (Sūryaḥ) - **अ.** (Av.) २०.१०७.१५; २०.१२३.१-२; **य.** (Yv.)७.४२; ३३.३७; ३८; ४२

अ. (Av.) २०.१०७.१५

सूर्यो देवीमुषसं रोचमानां मर्यो न येषामभ्यतेति पश्चात् ।

यत्रा नरोदेवयन्तो युगानि वितन्वते प्रति भद्राय भद्रम् ॥१५॥
*sūryo devīmuṣasaṁ rochamānāṁ maryo na yeṣāmabhyateti paśchāt /*
*yatrā narodevayanto yugāni vitanvate prati bhadrāya bhadram //15 //*

अ. (Av.) २०.१२३.१-२

तत् सूर्यस्य देवत्वं तन्महित्वं मध्या कर्तोर्विततं सं जभार ।
यदेदयुक्त हरितः सधस्थादाद्रात्री वासस्तनुते सिमस्मै ॥१॥
तन्मित्रस्य वरुणयाभिचक्षे सूर्यो रूपं कृणुते द्योरुपस्थे ।
अनन्तमन्यद् रुशदस्य पाजः कृष्णमन्यदधरितः सं भरन्ति ॥२॥
*tat sūryasya devatvaṁ tanmahitvaṁ madhyā kartorvitataṁ saṁ jabhāra /*
*yadedayukta haritaḥ sadhasthādādrātrī vāsastanute simasmai //1 //*
*tanmitrasya varuṇayābhichakṣe sūryo rūpaṁ kṛṇute dyorupasthe /*
*anantamanyad ruśadasya pājaḥ kṛṣṇamanyadadharitaḥ saṁ bharanti //2 //*

य. (Yv.)७.४२

चित्रं देवनामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः ।
आप्रा द्यावापृथिवीऽअन्तरिक्षंसूर्य्यऽआत्मा जगतस्तस्थुषश्च स्वाहा ॥४२॥
*chitraṁ devanāmudagādanīkaṁ chakṣurmitrasya varuṇasyāgneḥ /*
*āprā dyāvāpṛthivī'antarikṣaṁsūryya'ātmā jagatastasthuṣaścha svāhā //42 //*

य. (Yv.)३३.३७-३८

तत्सूर्य्यस्य देवत्वं तन्महित्वं मध्या कर्त्तोर्विततंसं जभार ।
यदेदयुक्त हरितः सधस्थदाद्रात्री वासस्तनुते सिमस्मै ॥३७॥
तन्मित्रस्य वरुणस्याभिचक्षे सूर्य्यो रूपं कृणुते द्योरुपस्थे ।
अनन्तमन्यद्रुशदस्य पाजः कृष्णमन्यद्धरितः सं भरन्ति ॥३८॥
*tatsūryyasya devatvaṁ tanmahitvaṁ madhyā karttorvitataṁsaṁ jabhāra /*
*yadedayukta haritaḥ sadhasthadādrātrī vāsastanute simasmai //37 //*
*tanmitrasya varuṇasyābhichakṣe sūryyo rūpaṁ kṛṇute dyorupasthe /*
*anantamanyadruśadasya pājaḥ kṛṣṇamanyaddharitaḥ saṁ bharanti //38 //*

य. (Yv.)३३.४२

अद्या देवाऽउदिता सूर्य्यस्य निरं हसः पिपृता निरवद्यात् ।
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवीऽउत द्यौः ॥४२॥
*adyā devā'uditā sūryyasya niraṁ hasaḥ pipṛtā niravadyāt /*
*tanno mitro varuṇo māmahantāmaditiḥ sindhuḥ pṛthivī'uta dyauḥ //42 //*

## १७७. कुत्स आंगिरसः (Kutsa Āṁgirasaḥ)

१. अग्निः (Agniḥ) - ऋ. (Rv.) १.९४.१-१६; १.९७.१-८; सा. (Sv.) ६६; १०६४-१०६६

ऋ. (Rv.) १.९४.१-१६

इमं स्तोमर्महते जातवेदसे रथमिव सं महेमा मनीषया ।
भद्रा हि नः प्रमतिरस्य संसद्यग्ने सख्ये मा रिषामा वयं तव ॥१॥
यस्मै त्वमायजसे स साधत्यनर्वा क्षेति दधते सुवीर्यम् ।
स तृताव नैनमश्नोत्यंहतिरग्ने सख्ये मा रिशामा वयं तव ॥२॥
शकेम त्वा समिधं साधया धियस्त्वे देवा हविरदन्त्याहुतम् ।
त्वमादित्याँ आ वह तान्ह्यु१श्मस्यग्ने सख्ये मा रिषामा वयं तव ॥३॥
भरामेध्मं कृणवामा हवींषि ते चितयन्तः पर्वणापर्वणा वयम् ।
जीवातवे प्रतरं साधया धियोऽग्ने सख्ये मा रिषामा वयं तव ॥४॥
विशां गोपा अस्य चरन्ति जन्तवो द्विपच्च यदुत चतुष्पदक्तुभिः ।
चित्रः प्रकेत उषसो महाँ अस्यग्ने सख्ये मा रिषामा वयं तव ॥५॥
त्वमध्वर्युरुत होतासि पूर्व्यः प्रशास्ता पोता जनुषा पुरोहितः ।
विश्वा विद्वाँ आर्त्विज्या धीर पुष्यस्यग्ने सख्ये मा रिषामा वयं तव ॥६॥

यो विश्वतः सुप्रतीकः सदृङ्ङसि दूरे चित्सन्तळिदिवाति रोचसे ।
रात्र्याश्चिदन्धे अति देव पश्यस्यग्ने सख्ये मा रिषामा वयं तव ॥७॥
पूर्वो देवा भवतु सुन्वतो रथेऽस्माकं शंसो अभ्यस्तु दूढ्यः ।
तदा जानीतोत पुष्यता वचोऽग्ने सख्ये मा रिषामा वयं तव ॥८॥
वधैर्दुःशंसाँ अप दूढ्यो जहि दूरे वा ये अन्ति वा के चिदत्रिणः ।
अथा याय गृणते सुगं कृध्यग्ने सख्ये मा रिषामा वयं तव ॥९॥
यदयुक्था अरुषा रोहिता रथे वातजूता वृषभस्येव ते रवः ।
अदिन्वसि वनिनो धूमकेतुनाग्ने सख्ये मा रिषामा वयं तव ॥१०॥
अध स्वनादुत बिभ्युः पतत्रिणो द्रप्सा यत्ते यवसादो व्यस्थिरन् ।
सुगं तत्ते तावकेभ्यां रथेभ्योऽग्ने सख्ये मा रिषामा वयं तव ॥११॥
अयं मित्रस्य वरुणस्य धायसेऽवयातां मरुतां हेळो अद्भुतः ।
मृळा सु नो भूत्वेषां मनः पुनरग्ने सख्ये मा रिषामा वयं तव ॥१२॥
देवो देवनामसि मित्रो अद्भुतो वसुर्वसूनामसि चारुरध्वरे ।
शर्मन्त्स्याम् तव सप्रथस्तमेऽग्ने सख्ये मा रिषामा वयं तव ॥१३॥
तत्ते भद्रं यत्समिद्धः स्वे दमे सोमाहुतो जरसे मृळयत्तमः ।
दधासि रत्नं द्रविणं च दाशुषेऽग्ने सख्ये मा रिषामा वयं तव ॥१४॥
यस्मै त्वं सुद्रविणो ददाशोऽनागास्त्वमदिते सर्वताता ।
यं भद्रेण शवसा चोदयासि प्रजावता राधसा ते स्याम ॥१५॥
स त्वमग्ने सौभगत्वस्य विद्वानस्माकमायुः प्र तिरेह देव ।
तिन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥१६॥

*imaṁ stomarmahate jātavedase rathamiva saṁ mahemā manīṣayā /*
*bhadrā hi naḥ pramatirasya saṁsadyagne sakhye mā riṣāmā vayaṁ tava //1 //*
*yasmai tvamāyajase sa sādhatyanarvā kṣeti dadhate suvīryam /*
*sa tṛtāva nainamaśnotyaṁhatiragne sakhye mā riśāmā vayaṁ tava //2 //*
*śakema tvā samidhaṁ sādhayā dhiyastve devā haviradantyāhutam /*
*tvamādityām̐ ā vaha tānhyu12āmasyagne sakhye mā riṣāmā vayaṁ tava //3 //*
*bharāmedhmaṁ kṛṇavāmā havīṁṣi te chitayantaḥ parvaṇāparvaṇā vayam /*
*jīvātave prataraṁ sādhayā dhiyo'gne sakhye mā riṣāmā vayaṁ tava //4 //*
*viśāṁ gopā asya charanti jantavo dvipachcha yaduta chatuṣpadaktubhiḥ /*
*chitraḥ praketa uṣaso mahām̐ asyagne sakhye mā riṣāmā vayaṁ tava //5 //*
*tvamadhvaryuruta hotāsi pūrvyaḥ praśāstā potā januṣā purohitaḥ /*
*viśvā vidvām̐ ātirvajyā dhīra puṣyasyagne sakhye mā riṣāmā vayaṁ tava //6 //*
*yo viśvataḥ supratīkaḥ sadṛṅṅsi dūre chitsantaḷidivāti rochase /*
*rātrayāśchidandhe ati deva paśyasyagne sakhye mā riṣāmā vayaṁ tava //7 //*
*pūrvo devā bhavatu sunvato rathe'smākaṁ śeso abhyastu dūḍhyaḥ /*
*tadā jānītota puṣyatā vacho'gne sakhye mā riṣāmā vayaṁ tava //8 //*
*vadhairduḥśaṁsām̐ apa dūḍhyo jahi dūre vā ye anti vā ke chidatriṇaḥ /*
*athā yāāya gṛṇate sugaṁ kṛdhyagne sakhye mā riṣāmā vayaṁ tava //9 //*
*yadayukthā aruṣā rohitā rathe vātajūtā vṛṣabhasyeva te ravaḥ /*
*adinvasi vanino dhūmaketunāgne sakhye mā riṣāmā vayaṁ tava //10 //*
*adha svanāduta bibhyuḥ patatriṇo drapsā yatte yavasādo vyasthiran /*
*sugaṁ tatte tāvakebhyāṁ rathebhyo'gne sakhye mā riṣāmā vayaṁ tava //11 //*
*ayaṁ mitrasya varuṇasya dhāyase'vayātāṁ marutāṁ heḷo adbhutaḥ /*
*mṛḷā su no bhūtveṣāṁ manaḥ punaragne sakhye mā riṣāmā vayaṁ tava //12 //*
*devo devanāmasi mitro adbhuto vasurvasūnāmasi chāruradhvare /*
*śarmantsyām tava saprathastame'gne sakhye mā riṣāmā vayaṁ tava //13 //*
*tatte bhadraṁ yatsamiddhaḥ sve dame somāhuto jarase mṛḷayattamaḥ /*
*dadhāsi ratnaṁ draviṇaṁ cha dāśuṣe'gne sakhye mā riṣāmā vayaṁ tava //14 //*

*yasmai tvaṁ sudraviṇo dadāśo'nāgāstvamadite sarvatātā* ।
*yaṁ bhadreṇa śavasā chodayāsi prajāvatā rādhasā te syāma* ॥15॥
*sa tvamagne saubhagatvasya vidvānasmākamāyuḥ pra tireha deva* ।
*tinno mitro varuṇo māmahantāmaditiḥ sindhuḥ pṛthivī uta dyauḥ* ॥16॥

ऋ. (Rv.) १.९७.१-८

अप नः शोशुचदघमग्ने शुशुग्ध्या रयिम्। अप नः शोशुचदघम् ॥१॥
सुक्षेत्रिया सुगातुया वसूया च यजामहे। अप नः शेशुचदघम् ॥२॥
प्र यद्भन्दिष्ठ एषां प्रास्माकासश्च सूरयः। अप नः शेशुचदघम् ॥३॥
प्र यत्ते अग्ने सूरयो जायेमहि प्र ते वयम्। अपः न शेशुचदघम् ॥४॥
प्र यदग्नेः सहस्वतो विश्वतो यन्ति भानवः। अपः न शोशुचदघम् ॥५॥
त्वं हि विश्वतोमुख विश्वतः परिभूरसि। अपः न शेशुचदघम् ॥६॥
द्विषो नो विश्वतोमुखाति नावेव पारय। अप नः शंशुचदघम् ॥७॥
स नः सिन्धुमिव नावयाति पर्षा स्वस्तये। अप नः शेशुचदघम् ॥८॥
*apa naḥ śośuchadaghamagne śuśugdhyā rayim* । *apa naḥ śośuchadagham* ॥1॥
*sukṣetriyā sugātuyā vasūyā cha yajāmahe* । *apa naḥ śeśuchadagham* ॥2॥
*pra yadbhandiṣṭha eṣāṁ prāsmākāsaścha sūrayaḥ* । *apa naḥ śeśuchadagham* ॥3॥
*pra yatte agne sūrayo jāyemahi pra te vayam* । *apaḥ na śeśuchadagham* ॥4॥
*pra yadagneḥ sahasvato viśvato yanti bhānavaḥ* । *apaḥ na śośuchadagham* ॥5॥
*tvaṁ hi viśvatomukha viśvataḥ paribhūrasi* । *apaḥ na śeśuchadagham* ॥6॥
*dviṣo no viśvatomukhāti nāveva pāraya* । *apa naḥ śaṁśuchadagham* ॥7॥
*sa naḥ sindhumiva nāvayāti parṣā svastaye* । *apa naḥ śeśuchadagham* ॥8॥

सा. (Sv.) ६६

इमं स्तोममर्हते जातवेदसे रथमिव सं महेमा मनीषया ।
भद्रा हि नः प्रमतिरस्य संसद्यग्ने सख्ये मा रिषामा वयं तव ॥४॥
*imaṁ stomamarhate jātavedase rathamiva saṁ mahemā manīṣayā* ।
*bhadrā hi naḥ pramatirasya saṁsadyagne sakhye mā riṣāmā vayaṁ tava* ॥4॥

सा. (Sv.) १०६४-१०६६

इमं स्तोममर्हते जातवेदसे रथमिव सं महेमा मनीषया ।
भद्रा हि नः प्रमतिरस्य संसद्यग्ने सख्ये मा रिषामा वयं तव ॥१॥
भरामेध्मं कृणवामा हवींषि ते चितयन्तः पर्वणापर्वणा वयम् ।
जीवातवे प्रतरां साधया धियोऽग्ने सख्ये मा रिषामा वयं तव ॥२॥
शकेम त्वा समिधं साधया धियस्त्वे देवा हविरदन्त्याहुतम् ।
त्वमिदित्याँ आ वह तानह्यू३श्मस्यग्ने सख्ये मा रिषामा वयं तव ॥३॥
*imaṁ stomamarhate jātavedase rathamiva saṁ mahemā manīṣayā* ।
*bhadrā hi naḥ pramatirasya saṁsadyagne sakhye mā riṣāmā vayaṁ tava* ॥1॥
*bharāmedhmaṁ kṛṇavāmā havīṁṣi te chitayantaḥ parvaṇāparvaṇā vayam* ।
*jīvātave pratarāṁ sādhayā dhiyo'gne sakhye mā riṣāmā vayaṁ tava* ॥2॥
*śakema tvā samidhaṁ sādhayā dhiyastve devā haviradantyāhutam* ।
*tvamidityām̐ ā vaha tānahyū3śmasyagne sakhye mā riṣāmā vayaṁ tava* ॥3॥

२. अग्निर् वैश्वानरः (Agnir Vaiśvānaraḥ) - ऋ. (Rv.) १.९८.१-३

वैश्वानरस्य सुमतौ स्याम राजा हि कं भुवनानामभिश्रीः ।
इतो जातो विश्वमिदं वि चष्टे वैश्वानरो यतते सूर्येण ॥१॥
पृष्टो दि वि पृष्टो अग्निः पृथिव्यां पृष्टो विश्वा ओषधीरा विवेश ।
वैश्वानरः सहसा पृष्टो अग्निः स नो दिवा स रिषः पातु नक्तम् ॥२॥
वैश्वानर तव तत्सत्यमस्त्वस्मान्रायो मघवानः सचन्ताम् ।
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥३॥
*vaiśvānarasya sumatau syāma rājā hi kaṁ bhuvanānāmabhiśrīḥ* ।

*ito jāto viśvamidaṁ vi chaṣṭe vaiśvānaro yatate sūryeṇa //1 //*
*pṛṣṭo di vi pṛṣṭo agniḥ pṛthivyāṁ pṛṣṭo viśvā Oṣadhīrā viveśa /*
*vaiśvānaraḥ sahasā pṛṣṭo agniḥ sa no divā sa riṣaḥ pātu naktam //2 //*
*vaiśvānara tava tatsatyamastvasmānnāyo maghavānaḥ sachantām /*
*tanno mitro varuṇo māmahantāmaditiḥ sindhuḥ pṛthivī uta dyauḥ //3 //*

३. अश्विनौ (Aśvinau) - ऋ. (Rv.) १.११२.२-२५

युवोर्दानाय सुभरा असश्चतो रथमा तस्थुर्वचसं न मन्तवे ।
याभिर्धियोऽवथः कर्मन्निष्टये ताभिरू षु ऊतिभिश्विना गतम् ॥२॥
युवं तासां दिव्यस्य प्रशासने विशां क्षयथो अमृतस्य मज्मना ।
याभिर्धेनुमस्वं१ पिन्वथो नरा ताभिरू षु ऊतिभिरश्विना गतम् ॥३॥
याभिः परिज्मा तनयस्य मज्मना द्विमाता तूर्षु तरणिर्विभूषति ।
याभिस्त्रिमन्तुरभवद्विचक्षणस्ताभिरू षु ऊतिभिरश्विना गतम् ॥४॥
याभी रेभं निवृतं सितमद्भ्य उद्वन्दन्मैरयतं स्वर्दृशे ।
याभिः कण्वं प्र सिषसन्तमावतं ताभिरू षु ऊतिभिरश्विना गतम् ॥५॥
याभिरन्तकं जस्मानमारणे भुजयु याभिरव्यथिभिर्जिजिन्वथुः ।
याभिः कर्कन्धुं वय्यं च जिन्वथस्ताभिरू षु ऊतिभिरश्विना गतम् ॥६॥
याभिः शुचन्ति धनसां सुषंसदं तप्तं घर्ममोम्यावन्तमत्रये ।
याभिः पृश्निगुं पुरुकुत्समावतं ताभिरू षु ऊतिभिरश्विना गतम् ॥७॥
याभिः शचीभिर्वृषणा परावृजं प्रान्धं श्रोणं चक्षस एतवे कृथः ।
याभिर्वर्तिकां ग्रसितामुमुंचतं ताभिरू षु ऊतिभिरश्विना गतम् ॥८॥
याभिः सिन्धु मधुमन्तमसश्चतं वसिष्ठं याभिरजरावजिन्वतम् ।
याभिः कुत्सं श्रुतर्य नर्यमावतं ताभिरू षु ऊतिभिरश्विना गतम् ॥९॥
याभिर्विश्पलां धनसामथर्व्य सहस्रमील्ह आजावजिन्वतम् ।
याभिर्विशमश्व्यं प्रेणिमावतं ताभिरू षु ऊतिभिरश्विना गतम् ॥१०॥
याभिः सुदानू औशिजाय वणिजे दीघश्रवसे मधु कोशो अक्षरत् ।
कक्षीवन्तं स्तोतारं याभिरावतं ताभिरू षु ऊतिभिरश्विना गतम् ॥११॥
याभी रसां क्षोदसोद्नः पिपिन्वथुरनश्वं याभी रथमावतं जिषे ।
याभिस्त्रिशोक उस्रिया उदाजत ताभिरू षु ऊतिभिरश्विना गतम् ॥१२॥
याभिः सूर्य परियाथः परावति मन्धातारं क्षैत्रपत्येष्वावतम् ।
याभिर्विप्रं प्र भरद्वाजमावतं ताभिरू षु ऊतिभिश्विना गतम् ॥१३॥
याभिर्महामतिथिग्वं कशोजुवं दिवोदासं शम्बरहत्य आवतम् ।
याभिः पूर्भिद्ये त्रसदस्युमावतं ताभिरू षु ऊतिभिरश्विना गतम् ॥१४॥
याभिर्वभ्रं विपिपानमुपस्तुतं कलिं याभिर्वित्तजानि दुवस्यथः ।
याभिर्व्यश्वमुत पृथिमावतं ताभिरू षु ऊतिभिरश्विना गतम् ॥१५॥
याभिर्नरा शयवे याभिरत्रये याभिः पुरा मनवे गातुमीषथुः ।
याभिः शरीराजतं स्यूमरश्मये ताभिरू षु ऊतिभिरश्विना गतम् ॥१६॥
याभिः पठर्वा जठरस्य मज्मनाग्निर्नादीदेच्चित इद्धो अज्मन्ना ।
याभिः शर्यातमवथो महाधने ताभिरू षु ऊतिभिरश्विना गतम् ॥१७॥
याभिरंगिरो मनसा नरण्यथोऽग्रं गच्छथो विवरे गार्सासः ।
याभिर्मनु शूरमिषा समावतं ताभिरू षु ऊतिभिरश्विना गतम् ॥१८॥
याभिः पत्नीर्विमदाय न्यूहथुरा घ वा याभिररुणीरशिक्षतम् ।
याभिः सुदास ऊहथुः सदेव्यं१ ताभिरू षु ऊतिभिरश्विना गतम् ॥१९॥
याभिः शताती भवथो ददाशुषे भुज्युं याभिरवथो याभिरध्रिगुम् ।
ओम्यावतीं सुभरामृतस्तुभं ताभिरू षु ऊतिभिरश्विना गतम् ॥२०॥
याभिः कृशनुमसने दुवस्यथो जवे याभिर्यूनो अर्वन्तमावतम् ।
मधु पियं भरथो यत्सरड्भ्यस्ताभिरू षु ऊतिभिरश्विना गतम् ॥२१॥

याभिर्नरं गोषुयुधं नृषाह्ये क्षेत्रस्य साता तनयस्य जिन्वथः ।
याभी रथाँ अवथो याभिरर्वतस्ताभिरू षु ऊतिभिरश्विना गतम् ॥२२॥
याभिः कुत्समार्जुनेयं शतक्रतू प्र तुर्वीतिं प्र च दभीतिमावतम् ।
याभिर्ध्वसन्तिं पुरुषन्तिमावतं ताभिरू षु ऊतिभिरश्विना गतम् ॥२३॥
अप्नस्वतीमश्विना वाचमस्मे कृतं नो दस्रा वृषणा मनीषाम् ।
अद्यूत्येऽवसे नि ह्वये वां वृधे च नो भवतं वाजसातौ ॥२४॥
द्युभिरक्तुभिः परि पातमस्मानरिष्टेभिरश्विना सौभगेभिः ।
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥२५॥

*yuvordānāya subharā asaśchato rathamā tasthurvachasaṁ na mantave* ।
*yābhirdhiyo'vathaḥ karmanniṣṭaye tābhirū ṣu ūtibhiśvinā gatam* ॥2॥
*yuvaṁ tāsāṁ divyasya praśāsane viśāṁ kṣayatho amṛtasya majmanā* ।
*yābhirdhenumasvaṁ1 pinvatho narā tābhirū ṣu ūtibhiraśvinā gatam* ॥3॥
*yābhiḥ parijmā tanayasya majmanā dvimātā tūrṣu taraṇirvibhūṣati* ।
*yābhistrimanturabhavadvichakṣaṇastābhirū ṣu ūtibhiraśvinā gatam* ॥4॥
*yābhī rebhaṁ nivṛtaṁ sitamadbhya udvandanmairayataṁ svardṛśe* ।
*yābhiḥ kaṇvaṁ pra siṣasantamāvataṁ tābhirū ṣu ūtibhiraśvinā gatam* ॥5॥
*yābhirantakaṁ jasmānamāraṇe bhujayu yābhiravyathibhirjijinvathuḥ* ।
*yābhiḥ karkandhuṁ vayyaṁ cha jinvathastābhirū ṣu ūtibhiraśvinā gatam* ॥6॥
*yābhiḥ śuchanti dhanasāṁ suṣaṁsadaṁ taptaṁ gharmamomyāvantamatraye* ।
*yābhiḥ pṛśniguṁ purukutsamāvataṁ tābhirū ṣu ūtibhiraśvinā gatam* ॥7॥
*yābhiḥ śachībhirvṛṣaṇā parāvṛjaṁ prāndhaṁ śroṇaṁ chakṣasa etave kṛthaḥ* ।
*yābhirvartikāṁ grasitāmamuṁchataṁ tābhirū ṣu ūtibhiraśvinā gatam* ॥8॥
*yābhiḥ sindhu madhumantamasaśchataṁ vasiṣṭhaṁ yābhirajarāvajinvatam* ।
*yābhiḥ kutsaṁ śrutarya naryamāvataṁ tābhirū ṣu ūtibhiraśvinā gatam* ॥9॥
*yābhirviśpalāṁ dhanasāmatharvya sahasramīḷha ājāvajinvatam* ।
*yābhirviśamaśvyaṁ preṇimāvataṁ tābhirū ṣu ūtibhiraśvinā gatam* ॥10॥
*yābhiḥ sudānū auśijāya vaṇije dīghaśravase madhu kośo akṣarat* ।
*kakṣīvantaṁ stotāraṁ yābhirāvataṁ tābhirū ṣu ūtibhiraśvinā gatam* ॥11॥
*yābhī rasāṁ kṣodasodgaḥ pipinvathuranaśvaṁ yābhī rathamāvataṁ jiṣe* ।
*yābhistriśoka usriyā udājata tābhirū ṣu ūtibhiraśvinā gatam* ॥12॥
*yābhiḥ sūrya pariyāthaḥ parāvati mandhātāraṁ kṣaitrapatyeṣvāvatam* ।
*yābhirvipraṁ pra bharadvājamāvataṁ tābhirū ṣu ūtibhiśvinā gatam* ॥13॥
*yābhirmahāmatithigvaṁ kaśojuvaṁ divodāsaṁ śambarahatya āvatam* ।
*yābhiḥ pūrbhidye trasadasyumāvataṁ tābhirū ṣu ūtibhiraśvinā gatam* ॥14॥
*yābhirvabhraṁ vipipānamupastutaṁ kaliṁ yābhirvittajāni duvasyathaḥ* ।
*yābhirvyaśvamuta pṛthimāvataṁ tābhirū ṣu ūtibhiraśvinā gatam* ॥15॥
*yābhirnarā śayave yābhiratraye yābhiḥ purā manave gātumīṣathuḥ* ।
*yābhiḥ śarīrājataṁ syūmaraśmaye tābhirū ṣu ūtibhiraśvinā gatam* ॥16॥
*yābhiḥ paṭharvā jaṭharasya majmanāgnirnādīdechchita iddho ajmannā* ।
*yābhiḥ śaryātamavatho mahādhane tābhirū ṣu ūtibhiraśvinā gatam* ॥17॥
*yābhiraṁgiro manasā naraṇyatho'graṁ gachchhatho vivare gārsāsaḥ* ।
*yābhirmanu śūramiṣā samāvataṁ tābhirū ṣu ūtibhiraśvinā gatam* ॥18॥
*yābhiḥ patnīrvimadāya nyūhathurā gha vā yābhiraruṇīraśikṣatam* ।
*yābhiḥ sudāsa ūhathuḥ sadevyaṁ1 tābhirū ṣu ūtibhiraśvinā gatam* ॥19॥
*yābhiḥ śatātī bhavatho dadāśuṣe bhujyuṁ yābhiravatho yābhiradhrigum* ।
*Omyāvatīṁ subharāmṛtastubhaṁ tābhirū ṣu ūtibhiraśvinā gatam* ॥20॥
*yābhiḥ kṛśanumasane duvasyatho jave yābhiryūno arvantamāvatam* ।
*madhu piyaṁ bharatho yatsaraḍbhyastābhirū ṣu ūtibhiraśvinā gatam* ॥21॥
*yābhirnaraṁ goṣuyudhaṁ nṛṣāhye kṣetrasya sātā tanayasya jinvathaḥ* ।

*yābhī rathām̐ avatho yābhirarvatastābhirū ṣu ūtibhiraśvinā gatam* ॥22॥
*yābhiḥ kuttsamārjuneyaṁ śatakratū pra turvītiṁ pra cha dabhītimāvatam* ।
*yābhirdhvasanti puruṣantimāvataṁ tābhirū ṣu ūtibhiraśvinā gatam* ॥23॥
*apnasvatīmaśvinā vāchamasme kṛtaṁ no dasrā vṛṣaṇā manīṣām* ।
*adyūtye'vase ni hnaye vāṁ vṛdhe cha no bhavataṁ vājasātau* ॥24॥
*dyubhiraktubhiḥ pari pātamasmānariṣṭebhiraśvinā saubhagebhiḥ* ।
*tanno mitro varuṇo māmahantāmaditiḥ sindhuḥ pṛthivī uta dyauḥ* ॥25॥

४. इन्द्रः (Indraḥ) - ऋ. (Rv.) १.१०१.१-११; १.१०२.१-११; १.१०३.१-८; १.१०४.१-९; सा. (Sv.) ३८०

ऋ. (Rv.) १.१०१.१-११

प्र मन्दिने पितुमदर्चता वचो यः कृष्णगर्भा निरहन्नृजिश्वना ।
अवस्यवो वृषणं वज्रदक्षिणं मरुत्वन्तं सख्याय हवामहे ॥१॥
यो व्यंसं जाहृषाणेन मन्युना यः शम्बरं यो अहन्पिप्रुमव्रतम् ।
इन्द्रो यः शुष्णमशुषं न्यावृणङ्मरुत्वन्तं सख्याय हवामहे ॥२॥
यस्य द्यावपृथिवी पौंस्यं महद्यस्य व्रते वरुणो यस्य सूर्यः ।
यस्येन्द्रस्य सिन्धवः सश्चति व्रतं मरुत्वन्तं सख्याय हवामहे ॥३॥
यो अश्वानां यो गवां गोपतिर्वशी य आरितः कर्मणिकर्मणि स्थिरः ।
वीळोश्चिदिन्द्रो यो असुन्वतो वधो मरुत्वन्तं सख्याय हवामहे ॥४॥
यो विश्वस्य जगतः प्राणतस्पतिर्यो ब्रह्मणे प्रथमो गा अविन्दत् ।
इन्द्रो यो दस्यूँरधराँ अवातिरन्मरुत्वन्तं सख्याय हवामहे ॥५॥
यः शूरेभिर्हव्यो यश्च भीरुभिर्यो धावद्भिर्हूयते यश्च जिग्युभिः ।
इन्द्रं यं विश्वा भुवनाभि संदधुर्मरुत्वन्तं सख्याय हवामहे ॥६॥
रुद्राणामेति प्रदिशा विचक्षणो रुद्रेभिर्योषा तनुते पृथु ज्रयः ।
इन्द्रं मनीषा अभ्यर्चति श्रुतं मरुत्वन्तं सख्याय हवामहे ॥७॥
यद्वा मरुत्वः परमे सधस्थे यद्वावमे वृजने मादयासे ।
अत आ याह्यध्वरं नो अच्छा त्वाया हविश्चकृमा सत्यराधः ॥८॥
त्वायेन्द्र सोमं सुषुमा सुदक्ष त्वाया हविश्चकृमा ब्रह्मवाहः ।
अधा नियुत्वः सगणो मरुद्भिरस्मिन्यो बर्हिषि मादयस्व ॥९॥
मादयस्व हरिभिर्ये त इन्द्र वि ष्यस्व शिप्रे वि सृजस्व धेने ।
आ त्वा सुशिप्र हरयो वहन्तूशन्हव्यानि प्रति नो जुषस्व ॥१०॥
मरुत्स्तोत्रस्य वृजनस्य गोपा वयमिन्द्रेण सनुयाम वाजम् ।
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥११॥

*pra mandine pitumadarchatā vacho yaḥ kṛṣṇagarbhā nirahannṛjiśvanā* ।
*avasyavo vṛṣaṇaṁ vajradakṣiṇaṁ marutvantaṁ sakhyāya havāmahe* ॥1॥
*yo vyaṁsaṁ jāhṛṣāṇena manyunā yaḥ śambaraṁ yo ahanpiprumavratam* ।
*indro yaḥ śuṣṇamaśuṣaṁ nyāvṛṇaṅmarutvantaṁ sakhyāya havāmahe* ॥2॥
*yasya dyāvapṛthivī pauṁsyaṁ mahadyasya vrate varuṇo yasya sūryaḥ* ।
*yasyendrasya sindhavaḥ saśchati vrataṁ marutvantaṁ sakhyāya havāmahe* ॥3॥
*yo aśvānāṁ yo gavāṁ gopatirvaśī ya āritaḥ karmaṇikarmaṇi sthiraḥ* ।
*vīḷāośchidindro yo asunvato vadho marutvantaṁ sakhyāya havāmahe* ॥4॥
*yo viśvasya jagataḥ prāṇataspatiryo brahmaṇe prathamo gā avindat* ।
*indro yo dasyūm̐radharām̐ avātiranmarutvantaṁ sakhyāya havāmahe* ॥5॥
*yaḥ śūrebhirhavyo yaścha bhīrubhiryo dhāvadbhirhūyate yaścha jigyubhiḥ* ।
*indraṁ yaṁ viśvā bhuvanābhi saṁdadhurmarutvantaṁ sakhyāya havāmahe* ॥6॥
*rudrāṇāmeti pradiśā vichakṣaṇo rudrebhiryoṣā tanute pṛthu jrayaḥ* ।
*indraṁ manīṣā abhyarchati śrutaṁ marutvantaṁ sakhyāya havāmahe* ॥7॥
*yadvā marutvaḥ parame sadhasthe yadvāvame vṛjane mādayāse* ।

*ata ā yāhyadhvaraṁ no achchhā tvāyā haviśchakṛmā satyarādhaḥ //8 //*
*tvāyendra somaṁ suṣumā sudakṣa tvāyā haviśchakṛmā brahmavāhaḥ /*
*adhā niyutvaḥ sagaṇo marudbhirasminyo barhiṣi mādayasva //9 //*
*mādayasva haribhirye ta indra vi ṣyasva śipre vi sṛjasva dhene /*
*ā tvā suśipra harayo vahantūśanhavyāni prati no juṣasva //10 //*
*marutstotrasya vṛjanasya gopā vayamindreṇa sanuyāma vājam /*
*tanno mitro varuṇo māmahantāmaditiḥ sindhuḥ pṛthivī uta dyauḥ //11 //*

ऋ. (Rv.) १.१०२.१-११

इमां ते धियं प्र भरे महो महीमस्य स्तोत्रे धिष्णा यत्त आनजे ।
तमुत्सवे च प्रसवे च सासहिमिन्द्रं देवासः शवसामदन्ननु ॥१॥
अस्य श्रवो नद्यः सप्त बिभ्रति द्यावाक्षामा पृथिवी दर्शतं वपुः ।
अस्मै सूर्याचन्द्रमसाभिचक्षे श्रद्धे कमिन्द्र चरतो वितर्तुरम् ॥२॥
तं स्मा रथं मघवन्प्राव सातये जैत्रं यं ते अनुमदाम संगमे ।
आजा न इन्द्र मनसा पुरुष्टुत त्वायद्भ्यो मघवंछर्म यच्छ नः ॥३॥
वयं जयेम त्वया युजा वृतमस्माकमंशमुदवा भरेभरे ।
अस्मभ्यमिन्द्र वरिवः सुगं कृधि प्र शत्रूणां मघवन्वृष्ण्या रुज ॥४॥
नाना हि त्वा हवमाना जना इमे धनानां धर्तरवसा विपन्यवः ।
अस्माकं स्मा रथमा तिष्ठ सातये जैत्रं हीन्द्र निभृतं मनस्तव ॥५॥
गोजिता बाहू अमितक्रतुः सिमः कर्मन्कर्मंछतमूतिः खजङ्करः ।
अकल्प इन्द्रः प्रतिमानमोजसाथा जना वि ह्वयन्ते सिषासवः ॥६॥
उत्ते शतान्मघवन्नुच्च भूयस उत्सहस्राद्रिरिचे कृष्टिषु श्रवः ।
अमात्रं त्वा धिषणा तित्विषे मह्यधा वृत्राणि जिघ्नसे पुरन्दर ॥७॥
त्रिविष्टधातु प्रतिमानमोजसस्तिस्रो भूमीर्नृपते त्रीणि रोचना ।
अतीदं विश्वं भुवनं ववक्षिथशत्रुरिन्द्र जनुषा सनादसि ॥८॥
त्वां देवेषु प्रथमं हवामहे त्वं बभूथ पृतनासु सासहिः ।
सेमं नः कारुमुपमन्युमुद्भिदमिन्द्रः कृणोतु प्रसवे रथं पुरः ॥९॥
त्वं जिगेथ न धना रुरोधिथार्भेष्वाजा मघवन्महत्सु च ।
त्वामुग्रमवसे सं शिशीमस्यथा न इन्द्र हवनेषु चोदय ॥१०॥
विश्वाहेन्द्रो अधिवक्ता नो अस्तवपरिह्वृताः सनुयाम वाजम् ।
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥११॥

*imāṁ te dhiyaṁ pra bhare maho mahīmasya stotre dhiṣṇā yatta ānaje /*
*tamutsave cha prasave cha sāsahimindraṁ devāsaḥ śavasāmadannanu //1 //*
*asya śravo nadyaḥ sapta bibhrati dyāvākṣāmā pṛthivī darśataṁ vapuḥ /*
*asmai sūryāchandramasābhichakṣe śraddhe kamindra charato vitarturam //2 //*
*taṁ smā rathaṁ maghavanprāva sātaye jaitraṁ yaṁ te anumadāma saṁgame /*
*ājā na indra manasā puruṣṭuta tvāyadbhyo maghavaṁchharma yachchha naḥ //3 //*
*vayaṁ jayema tvayā yujā vṛtamasmākamaṁśamudavā bharebhare /*
*asmabhyamindra varivaḥ sugaṁ kṛdhi pra śatrūṇāṁ maghavanvṛṣṇyā ruja //4 //*
*nānā hi tvā havamānā janā ime dhanānāṁ dhartaravasā vipanyavaḥ /*
*asmākaṁ smā rathamā tiṣṭha sātaye jaitraṁ hīndra nibhṛtaṁ manastava //5 //*
*gojitā bāhū amitakratuḥ simaḥ karmankarmaṁchhatamūtiḥ khajaṅkaraḥ /*
*akalpa indraḥ pratimānamojasāthā janā vi hnayante siṣāsavaḥ //6 //*
*utte śatānmaghavannnuchcha bhūyasa utsahasrādririche kṛṣṭiṣu śravaḥ /*
*amātraṁ tvā dhiṣaṇā titviṣe mahyadhā vṛtrāṇi jighnase purandara //7 //*
*triviṣṭadhātu pratimānamojasastisro bhūmīrnṛpate trīṇi rochanā /*
*atīdaṁ viśvaṁ bhuvanaṁ vavakṣithaśatrurindra januṣā sanādasi //8 //*
*tvāṁ deveṣu prathamaṁ havāmahe tvaṁ babhūtha pṛtanāsu sāsahiḥ /*
*semaṁ naḥ kārumupamanyumudbhidamindraḥ kṛṇotu prasave rathaṁ puraḥ //9 //*

*tvaṁ jigetha na dhanā rurodhithārbheṣvājā maghavanmahatsu cha* ।
*tvāmugramavase saṁ śiśīmasyathā na indra havaneṣu chodaya* ॥10॥
*viśvāhendro adhivaktā no astavaparihnṛtāḥ sanuyāma vājam* ।
*tanno mitro varuṇo māmahantāmaditiḥ sindhuḥ pṛthivī uta dyauḥ* ॥11॥

ऋ. (Rv.) १.१०३.१-८

तत्त इन्दियं परमं पराचैरधारयन्त कवयः पुरेदम् ।
क्षमेदमन्यद्दिव्य१न्यदस्य समी पृच्यते समनेव केतुः ॥१॥
स धारयत्पृथिवीं पप्रथच्च वज्रेण हत्वा निरपः ससर्ज ।
अहन्नहिमभिनद्रौहिणं व्यहन्व्यंसं मघवा शचीभिः ॥२॥
स जातूभर्मा श्रद्दधान ओजः पुरो विभिन्दन्नचरद्वि दासीः ।
विद्वान्वज्रिन्दस्यवे हेतिमस्यार्य सहो वर्धया द्युम्नमिन्द्र ॥३॥
तदूचुषे मानुषेमा युगानि कीर्तेन्यं मघवा नाम विभ्रत् ।
उपप्रयन्दस्युहत्याय वज्री यद्ध सूनुः श्रवसे नाम दधे ॥४॥
तदस्येदं पश्यता भूरि पुष्टं श्रदिन्द्रस्य धत्तन वीर्याय ।
स गा अविन्दत्सो अविन्ददश्वान्त्स ओषधीः सो अपः स वनानि ॥५॥
भूरिर्कमणे वृषभाय वृष्णे सत्यशुष्माय सुनवाम सोमम् ।
य आदृत्या परिपन्थीव शूरोऽयज्वनो विभजन्नेति वेदः ॥६॥
तदिन्द्र प्रेव वीर्य चकर्थ यत्ससन्तं वज्रेणाबोधयोऽहिम् ।
अनु त्वा पत्नीर्हृषितं वयश्च विश्वे देवासो अमदन्ननु त्वा ॥७॥
शुष्णं पिप्रुं कुयवं वृत्रमिन्द्र यदावधीर्वि पुरः शम्बरस्य ।
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धु पृथिवी उत द्यौः ॥८॥

*tatta indiyaṁ paramaṁ parāchairadhārayanta kavayaḥ puredam* ।
*kṣamedamanyaddivya1nyadasya samī pṛchyate samaneva ketuḥ* ॥1॥
*sa dhārayatpṛthivīṁ paprathachcha vajreṇa hatvā nirapaḥ sasarja* ।
*ahannahimabhinadrauhiṇaṁ vyahanvyaṁsaṁ maghavā śachībhiḥ* ॥2॥
*sa jātūbharmā śraddadhāna Ojaḥ puro vibhindannacharadbi dāsīḥ* ।
*vidvānvajrindasyave hetimasyārya saho vardhayā dyumnamindra* ॥3॥
*tadūchuṣe mānuṣemā yugāni kīrtenyaṁ maghavā nāma vibhrat* ।
*upaprayandasyuhatyāya vajrī yaddha sūnuḥ śravase nāma dadhe* ॥4॥
*tadasyedaṁ paśyatā bhūri puṣṭaṁ śradindrasya dhattana vīryāya* ।
*sa gā avindatso avindadaśvāntsa Oṣadhīḥ so apaḥ sa vanāni* ॥5॥
*bhūrirkamaṇe vṛṣabhāya vṛṣṇe satyaśuṣmāya sunavāma somam* ।
*ya ādṛtyā paripanthīva śūro'yajvano vibhajanneti vedaḥ* ॥6॥
*tadindra preva vīrya chakartha yatsasantaṁ vajreṇābodhayo'him* ।
*anu tvā patnīrhṛṣitaṁ vayaścha viśve devāso amadannanu tvā* ॥7॥
*śuṣṇaṁ pipruṁ kuyavaṁ vṛtramindra yadāvadhīrvi puraḥ śambarasya* ।
*tanno mitro varuṇo māmahantāmaditiḥ sindhu pṛthivī uta dyauḥ* ॥8॥

ऋ. (Rv.) १.१०४.१-९

योनिष्ट इन्द्र निषदे अकारि तमा नि षीद स्वानो नार्वा ।
विमुच्या वयोऽवसायाश्वन्दोषा वस्तोर्वहीयसः प्रपित्वे ॥१॥
ओ त्ये नर इन्द्रमूतये गुर्नू चित्तान्त्सद्यो अध्वनो जगम्यात् ।
देवासो मन्युं दासस्य श्चम्नन्ते न आ वक्षन्त्सुविताय वर्णम् ॥२॥
अव त्मना भरते केतवेदा अव त्मना भरते फेनमुदन् ।
क्षीरेण स्नातः कुयवस्य योषे हते ते स्यातां प्रवणे शिफायाः ॥३॥
युयोप नाभिरुपरस्यायोः प्र पूर्वाभिस्तिरते राष्टि शूरः ।
अंजसी कुलिशी वीरपत्नी पयो हिन्वाना उदभिर्भरन्ते ॥४॥
प्रति यत्स्या नीथादर्शि दस्योरोको नाच्छा सदनं जानती गात् ।

अध स्मा नो मघवंचर्कृतादिन्मा नो मघेव निष्षपी परा दाः ॥५॥
स त्वं न इन्द्र सूर्ये सो अप्स्वनागास्त्व आ भज जीवशंसे ।
मान्तरां भुजमा रीरिषो नः श्रद्धितं ते महत इन्द्रियाय ॥६॥
अधा मन्ये श्रत्ते अस्मा अधायि वृषा चोदस्व महते धनाय ।
मा नो अकृते पुरुहूत योनाविन्द्र क्षुध्यद्भ्यो वय आसुतिं दाः ॥७॥
मा नो वधीरिन्द्र मा परा दा मा नः प्रिया भेजनानि प्र मोषीः ।
आण्डा मा नो मघवंछक्र निर्भेन्मा नः पात्रा भेत्सहजानुषाणि ॥८॥
अर्वाङेहि सोमकामं त्वाहुरयं सुतस्तस्य पिबा मदाय ।
उरुव्यचा जठर आ वृषस्व पितेव नः श्रृणुहि हूयमानः ॥९॥
*yoniṣṭa indra niṣade akāri tamā ni ṣīda svāno nārvā /*
*vimuchyā vayo'vasāyāśvandoṣā vastorvahīyasaḥ prapitve //1 //*
*O tye nara indramūtaye gurnū chittāntsadyo adhvano jagamyāt /*
*devāso manyuṁ dāsasya śchamnante na ā vakṣantsuvitāya varṇam //2 //*
*ava tmanā bharate ketavedā ava tmanā bharate phenamudan /*
*kṣīreṇa snātaḥ kuyavasya yoṣe hate te syātāṁ pravaṇe śiphāyāḥ //3 //*
*yuyopa nābhiruparasyāyoḥ pra pūrvābhistirate rāṣṭi śūraḥ /*
*aṁjasī kuliśī vīrapatnī payo hinvānā udabhirbharante //4 //*
*prati yatsyā nīthādarśi dasyoroko nāchchhā sadanaṁ jānatī gāt /*
*adha smā no maghavaṁcharkṛtādinmā no magheva niṣṣapī parā dāḥ //5 //*
*sa tvaṁ na indra sūrye so apsvanāgāstva ā bhaja jīvaśaṁse /*
*māntarāṁ bhujamā rīriṣo naḥ śraddhitaṁ te mahata indriyāya //6 //*
*adhā manye śratte asmā adhāyi vṛṣā chodasva mahate dhanāya /*
*mā no akṛte puruhūta yonāvindra kṣudhyadbhyo vaya āsutiṁ dāḥ //7 //*
*mā no vadhīrindra mā parā dā mā naḥ priyā bhejanāni pra moṣīḥ /*
*āṇḍā mā no maghavaṁchhakra nirbhenmā naḥ pātrā bhetsahajānuṣāṇi //8 //*
*arvāṅehi somakāmaṁ tvāhurayaṁ sutastasya pibā madāya /*
*uruvyachā jaṭhara ā vṛṣasva piteva naḥ śṛṇuhi hūyamānaḥ //9 //*

सा. (Sv.) ३८०

प्र मन्दिने पितुपदर्चता वचो यः कृष्णगर्भा निरहन्नृजिश्वना ।
अवस्यवो वृषणं वज्रदक्षिणं मरुत्वन्तं सख्याय हुवेमहि ॥११॥
*pra mandine pitupadarchatā vacho yaḥ kṛṣṇagarbhā nirahannṛjiśvanā /*
*avasyavo vṛṣaṇaṁ vajradakṣiṇaṁ marutvantaṁ sakhyāya huvemahi //11 //*

५. इन्द्राग्नी (Indrāgnī) - ऋ. (Rv.) १.१०८.१-१३; १.१०९.१-८

ऋ. (Rv.) १.१०८.१-१३

यइन्द्राग्नी चित्रतमो रथो वामभि विश्वानि भुवनानि चष्टे ।
तेना यातं सरथं तस्थिवांसाथा सोमस्य पिबतं सुतस्य ॥१॥
यावदिदं भुवनं विश्वमस्त्युरुव्यचा वरिमता गभीरम् ।
तावाँ अयं पातवे सोमो अस्तवरमिन्द्राग्नी मनसे युवभ्याम् ॥२॥
चक्राथे हि सध्य१ङ्नाम भद्रं सध्रीचीना वृत्रहणा उत स्थः ।
ताविन्द्राग्नी सध्र्यंचा निषद्या वृष्णः सोमस्य वृषणा वृषेथाम् ॥३॥
समिद्धेष्वग्निष्वानजाना यतस्रुचा बर्हिरु तिस्तिराणा ।
तीव्रैः सोमैः परिषिक्तेभिरर्वागेन्द्राग्नी सौमनसाय यातम् ॥४॥
यानीन्द्राग्नी चक्रथुर्वीर्याणि यानि रूपाण्युत वृष्ण्यानि ।
या वां प्रत्नानि सख्या शिवानि तेभिः सोमस्य पिबतं सुतस्य ॥५॥
यदब्रवं प्रथमं वां वृणानो३यं सोमो असुरैर्नो विहव्यः ।
तां सत्यां श्रद्धामभ्या हि यातमथा सोमस्य पिबतं सुतस्य ॥६॥
यदिन्द्राग्नी मदथः स्वे दुरोणे यद्ब्राह्मणि राजनि वा यजत्रा ।

अतः परि वृषणावा हि यातमथा सोमस्य पिबतं सुतस्य ॥७॥
यदिन्द्राग्नी यदुषु तुर्वशेषु यद्द्रुह्युष्वनुषु पूरुषु स्थः ।
अतः परि वृषणावा हि यातमथा सोमस्य पिबतं सुतस्य ॥८॥
यदिन्द्राग्नी अवमस्यां पृथिव्यां मध्यमस्यां परमस्यामुत स्थः ।
अतः परि वृषणावा हि यातमथा सोमस्य पिबतं सुतस्य ॥९॥
यदिन्द्राग्नी परमस्यां पृथिव्यां मध्यमस्यामवमस्यामुत स्थः ।
अतः परि वृषणावा हि यातमथा सोमस्य पिबतं सुतस्य ॥१०॥
यदिन्द्राग्नी दिवि ष्टो यत्पृथिव्यां यत्पर्वतेष्वोषधीष्वप्सु ।
अतः परि वृषणावा हि यातमथा सोमस्य पिबतं सुतस्य ॥११॥
यदिन्द्राग्नी उदिता सूर्यस्य मध्ये दिवः स्वध्या मादयेथे ।
अतः परि वृषणावा हि यातमथा सोमस्य पिबतं सुतस्य ॥१२॥
एवेन्द्राग्नी पपिवांसा सुतस्य विश्वास्मभ्यं सं जयतं धनानि ।
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥१३॥

*yaindrāgnī chitratamo ratho vāmabhi viśvāni bhuvanāni chaṣṭe /*
*tenā yātaṁ sarathaṁ tasthivāṁsāthā somasya pibataṁ sutasya //1 //*
*yāvadidaṁ bhuvanaṁ viśvamastyuruvyachā varimatā gabhīram /*
*tāvām̐ ayaṁ pātave somo astavaramindrāgnī manase yuvabhyām //2 //*
*chakrāthe hi sadhrya1ṅnāma bhadraṁ sadhrīchīnā vṛtrahaṇā uta sthaḥ /*
*tāvindrāgnī sadhryaṁchā niṣadyā vṛṣṇaḥ somasya vṛṣaṇā vṛṣethām //3 //*
*samiddheṣvagniṣvānajānā yatasruchā barhiru tistirāṇā /*
*tīvraiḥ somaiḥ pariṣiktebhirarvāgendrāgnī saumanasāya yātam //4 //*
*yānīndrāgnī chakrathurvīryāṇi yāni rūpāṇyuta vṛṣṇyāni /*
*yā vāṁ pratnāni sakhyā śivāni tebhiḥ somasya pibataṁ sutasya //5 //*
*yadabravaṁ prathamaṁ vāṁ vṛṇāno3yaṁ somo asurairno vihavyaḥ /*
*tāṁ satyāṁ śraddhāmabhyā hi yātamathā somasya pibataṁ sutasya //6 //*
*yadindrāgnī madathaḥ sve duroṇe yadbrāhmaṇi rājani vā yajatrā /*
*ataḥ pari vṛṣaṇāvā hi yātamathā somasya pibataṁ sutasya //7 //*
*yadindrāgnī yaduṣu turvaśeṣu yaddruhyuṣvanuṣu pūruṣu sthaḥ /*
*ataḥ pari vṛṣaṇāvā hi yātamathā somasya pibataṁ sutasya //8 //*
*yadindrāgnī avamasyāṁ pṛthivyāṁ madhyamasyāṁ paramasyāmuta sthaḥ /*
*ataḥ pari vṛṣaṇāvā hi yātamathā somasya pibataṁ sutasya //9 //*
*yadindrāgnī paramasyāṁ pṛthivyāṁ madhyamasyāmavamasyāmuta sthaḥ /*
*ataḥ pari vṛṣaṇāvā hi yātamathā somasya pibataṁ sutasya //10 //*
*yadindrāgnī divi ṣto yatpṛthivyāṁ yatparvateṣvoṣadhīṣvapsu /*
*ataḥ pari vṛṣaṇāvā hi yātamathā somasya pibataṁ sutasya //11 //*
*yadindrāgnī uditā sūryasya madhye divaḥ svadhyā mādayethe /*
*ataḥ pari vṛṣaṇāvā hi yātamathā somasya pibataṁ sutasya //12 //*
*evendrāgnī papivāṁsā sutasya viśvāsamabhyaṁ saṁ jayataṁ dhanāni /*
*tanno mitro varuṇo māmahantāmaditiḥ sindhuḥ pṛthivī uta dyauḥ //13 //*

ऋ. (Rv.) १.१०९.१-८

हि ह्यख्यं मनसा वस्य इच्छन्निन्द्राग्नीास उत वा सजातान् ।
नान्या युवत्प्रमतिरस्ति मह्यं स वां धियं वाजयन्तीमतक्षम् ॥१॥
अश्रवं हि भूरिदावत्तरा वां विजामातुरुत वा घा स्यालात् ।
अथा सोमस्य प्रयती युवभ्यामिन्द्राग्नी स्तोमं जनयामि नव्यम् ॥२॥
मा च्छेद्म रश्मीं रिति नाधमानाः पितॄणां शक्तीरनुयच्छमानाः ।
इन्द्राग्निभ्यां कं वृषणो मदन्ति ता ह्यद्री धिष्णाया उपस्थे ॥३॥
युवाभ्यां देवी धिषणां मदायेन्द्राग्नी सोममुशती सुनोति ।
तावश्विना भद्रहस्ता सुपाणी आ धावतं मधुना पृङ्क्तमप्सु ॥४॥

युवामिन्द्राग्नी वसुनो विभागे तवस्तमा शुश्रव वृत्रहत्ये ।
तावासद्या बर्हिषि यो अस्मिन्प्र चर्षणी मादयेथां सुतस्य ॥५॥
प्र चर्षणिभ्यः पृतनाहवेषु प्र पृथिव्या निरिचाथे दिवश्च ।
प्र सिन्धुभ्यः प्र गिरिभ्यो महित्वा प्रेन्द्राग्नी विश्वा भुनात्यन्या ॥६॥
आ भरतं शिक्षतं वज्रबाहू अस्माँ इन्द्राग्नी अवतं शचीभिः ।
इमे नु ते रश्मयः सूर्यस्य येभिः सपित्वं पितरो न आसन् ॥७॥
पुरंदरा शिक्षतं वज्रहस्तास्माँ इन्द्राग्नी अवतं भरेषु ।
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥८॥

*hi hyakhyaṁ manasā vasya ichchhannindrāgnīāāsa uta vā sajātān /*
*nānyā yuvatpramatirasti mahyaṁ sa vāṁ dhiyaṁ vājayantīmatakṣam //1 //*
*aśravaṁ hi bhūridāvattarā vāṁ vijāmāturuta vā ghā syālāt /*
*athā somasya prayatī yuvabhyāmindrāgnī stomaṁ janayāmi navyam //2 //*
*mā chchhedma raśmīṁ riti nādhamānāḥ pitṝṇāṁ śaktīranuyachchhamānāḥ /*
*indrāgnibhyāṁ kaṁ vṛṣaṇo madanti tā hyadrī dhiṣṇāyā upasthe //3 //*
*yuvābhyāṁ devī dhiṣṇāṁ madāyendrāgnī somamuśatī sunoti /*
*tāvaśvinā bhadrahastā supāṇī ā dhāvataṁ madhunā pṛṅktamapsu //4 //*
*yuvāmindrāgnī vasuno vibhāge tavastamā śuśrava vṛtrahatye /*
*tāvāsadyā barhiṣi yo asminpra charṣaṇī mādayethāṁ sutasya //5 //*
*pra charṣaṇibhyaḥ pṛtanāhaveṣu pra pṛthivyā nirichāthe divaścha /*
*pra sindhubhyaḥ pra giribhyeā mahitvā prendrāgnī viśvā bhunātyanyā //6 //*
*ā bharataṁ śikṣataṁ vajrabāhū asmām̐ indrāgnī avataṁ śachībhiḥ /*
*ime nu te raśmayaḥ sūryasya yebhiḥ sapitvaṁ pitaro na āsan //7 //*
*puraṁdarā śikṣataṁ vajrahastāsmām̐ indrāgnī avataṁ bhareṣu /*
*tanno mitro varuṇo māmahantāmaditiḥ sindhuḥ pṛthivī uta dyauḥ //8 //*

६. उषा द्वितीयस्यार्द्धर्चस्य रात्रिरपि (Uṣā Dvitīyasyārddharchasya Rātrirapi) - ऋ. (Rv.) १.११३.१-२०; सा. (Sv.) १७४९-१७५१

ऋ. (Rv.) १.११३.१-२०

इदं श्रेष्ठं ज्योतिषां ज्योतिरागाच्चित्रः प्रकेतो अजनिष्ट विभ्वा ।
यथा प्रसूता सवितुः सवायँ एवा रात्र्युषसे योनिमारैक् ॥१॥
रुशद्वत्सा रुशती श्वेत्यागादारैगु कृष्णा सदनान्यस्याः ।
समानबन्धू अमृते अनूची द्यावा वर्ण चरत आमिनाने ॥२॥
समानो अध्वा स्वस्रोरनन्तस्तमन्यान्या चरतो देवशिष्टे ।
न मेथेते न तस्थतुः सुमेके नक्तोषासा समनसा विरूपे ॥३॥
भास्वती नेत्री सूनृतानामचेति चित्रा वि दुरो न आवः ।
प्रार्प्या जगद्व्यु नो रायो अख्यदुषा अजीगर्भुवनानि विश्वा ॥४॥
जिह्मश्ये३ चरितवे मघोनयाभोगय इष्टये राय उ त्वम् ।
दभ्रं पश्यद्भ्य उर्विया विचक्ष उषा अजीगर्भुवनानि विश्वा ॥५॥
क्षत्राय त्वं श्रवसे त्वं महीया इष्टये त्वमर्थमिव त्वमित्यै ।
विसदृशा जीविताभिप्रचक्ष उषा अजीगर्भुवनानि विश्वा ॥६॥
एषा दिवो दुहिता प्रत्यदर्शि व्युच्छन्ती युवतिः शुक्रवासाः ।
विश्वस्येशाना पार्थिवस्य वस्व उषो अद्येह सुभगे व्युच्छ ॥७॥
परायतीनामन्वेति पाथ आयतीनां प्रथमा शश्वतीनाम् ।
व्युच्छन्ती जीवमुदीरयन्त्युषा मृतं कं चन बोधयन्ती ॥८॥
उषो यदग्निं समिधे चकर्थ वि यदावश्चक्षसा सूर्यस्य ।
यन्मानुषान्यक्ष्यमाणाँ अजीगस्तद्देवेषु चकृषे भद्रमप्नः ॥९॥
कियात्या यत्समया भवाति या व्यूषुर्याश्च नूनं व्युच्छान् ।
अनु पूर्वाः कृपते वावशाना प्रदीध्याना जोषमन्याभिरेति ॥१०॥

ईयुष्टे ये पूर्वतरामपश्यन्व्युच्छन्तीमुषसं मर्त्यासः ।
अस्माभिरू नु प्रतिचक्ष्याभूदो ते यन्ति ये अपरीषु पश्यान् ॥११॥
यावयद्द्वेषा ऋतपा ऋतेजाः सुम्नावरी सूनृता ईरयन्ती ।
सुमंगलीर्बिभ्रती देववीतिमिहाद्योषः श्रेष्ठतमा व्युच्छ ॥१२॥
शश्वत्पुरोषा व्युवास देव्यथो अद्येदं व्यावो मघोनी ।
अथो व्युच्छादुत्तराँ अनु द्यूनजरामृता चरति स्वधभिः ॥१३॥
व्य१ञ्जिभिर्दिव आतास्वद्यौदप कृष्णां निर्णिजं देवयावः ।
प्रबोधयन्त्यरुणेभिरश्वैरोषा याति सुयुजा रथेन ॥१४॥
आवहन्ती पोष्या वार्याणि चित्रं केतुं कृणुते चकिताना ।
ईयुषीणामुपमा शश्वतीनां विभातीनां प्रथमोषा व्यश्वैत् ॥१५॥
उदीर्ध्व जीवो असुर्न आगादप प्रागात्तम आ ज्योतिरेति ।
आरैक्पन्थां यातवे सूर्यायागन्म यत्र प्रतिरन्त आयुः ॥१६॥
स्यूमना वाच उदियर्ति वह्निः स्तवानो रेभ उषसो विभातीः ।
अद्या तदुच्छ गृणते मघोन्यस्मे आयुर्नि दिदीहि प्रजावत् ॥१७॥
या गोमतीरुषसः सर्ववीरा व्युच्छन्ति दाशुषे मर्त्याय ।
वायोरिव सूनृतानामुदर्के ता अश्वदा अश्नवत्सोमसुत्वा ॥१८॥
माता देवानामदितेरनीकं यास्य केतुर्बृहती वि भाहि ।
प्रशस्तिकृद्ब्रह्मणे नो व्यु१च्छा नो जने जनय विश्ववारे ॥१९॥
यच्चित्रमप्न उषसो वहन्तीजानाय शश्मानाय भद्रम् ।
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥२०॥

*idaṁ śreṣṭhaṁ jyotiṣāṁ jyotirāgāchchitraḥ praketo ajaniṣṭa vibhvā /*
*yathā prasūtā savituḥ savāyam̐ evā rātrayuṣase yonimāraik //1 //*
*ruśadvatsā ruśatī śvetyāgādāraigu kṛṣṇā sadanānyasyāḥ /*
*samānabandhū amṛte anūchī dyāvā varṇa charata āmināne //2 //*
*samāno adhvā svasroranantastamanyānyā charato devaśiṣṭe /*
*na methete na tasthatuḥ sumeke naktoṣāsā samanasā virūpe //3 //*
*bhāsvatī netrī sūnṛtānāmacheti chitrā vi duro na āvaḥ /*
*prārpyā jagadvyu no rāyo akhyaduṣā ajīgarbhruvanāni viśvā //4 //*
*jihmaśye3 charitave maghonayābhogaya iṣṭaye rāya u tvam /*
*dabhraṁ paśyadbhya urviyā vichakṣa uṣā ajīgarbhuvanāni viśvā //5 //*
*kṣatrāya tvaṁ śravase tvaṁ mahīyā iṣṭaye tvamarthamiva tvamityai /*
*visadṛśā jīvitābhiprachakṣa uṣā ajīgarbhuvanāni viśvā //6 //*
*eṣā divo duhitā pratyadarśi vyuchchhantī yuvatiḥ śukravāsāḥ /*
*viśvasyeśānā pārthivasya vasva uṣo adyeha subhage vyuchchha //7 //*
*parāyatīnāmanveti pātha āyatīnāṁ prathamā śaśvatīnām /*
*vyuchchhantī jīvamudīrayantyuṣā mṛtaṁ kaṁ chana bodhayantī //8 //*
*uṣo yadagniṁ samidhe chakartha vi yadāvaśchakṣasā sūryasya /*
*yanmānuṣānyakṣayamāṇām̐ ajīgastaddeveṣu chakṛṣe bhadramapnaḥ //9 //*
*kiyātyā yatsamayā bhavāti yā vyūṣuryāścha nūnaṁ vyuchchhān /*
*anu pūrvāḥ kṛpate vāvaśānā pradīdhyānā joṣamanyābhireti //10 //*
*īyuṣṭe ye pūrvatarāmapaśyanvyuchchhantīmuṣasaṁ martyāsaḥ /*
*asmābhirū nu pratichakṣayābhūdo te yanti ye aparīṣu paśyān //11 //*
*yāvayaddveṣā ṛtapā ṛtejāḥ sumnāvarī sūnṛtā īrayantī /*
*sumaṁgalīrbibhratī devavītimihādyoṣaḥ śreṣṭhatamā vyuchchha //12 //*
*śaśvatpuroṣā vyuvāsa devyatho adyedaṁ vyāvo maghonī /*
*atho vyuchchhāduttarām̐ anu dyūnajarāmṛtā charati svadhabhiḥ //13 //*
*vya1ñjibhirdiva ātāsvadyaudapa kṛṣṇāṁ nirṇijaṁ devayāvaḥ /*
*prabodhayantyaruṇebhiraśvairoṣā yāti suyujā rathena //14 //*

*āvahantī poṣyā vāryāṇi chitraṁ ketuṁ kṛṇute chakitānā* ।
*īyuṣīṇāmupamā śaśvatīnāṁ vibhātīnāṁ prathamoṣā vyaśvait* ॥15॥
*udīrdhva jīvo asurna āgādapa prāgāttama ā jyotiroti* ।
*āraikpanthāṁ yātave sūryāyāganma yatra pratiranta āyuḥ* ॥16॥
*syūmanā vācha udiyarti vahniḥ stavāno rebha uṣaso vibhātīḥ* ।
*adyā taduchchha gṛṇate maghonyasme āyurni didīhi prajāvat* ॥17॥
*yā gomatīruṣasaḥ sarvavīrā vyuchchhanti dāśuṣe martyāya* ।
*vāyoriva sūnṛtānāmudarke tā aśvadā aśnavatsomasutvā* ॥18॥
*mātā devānāmaditeranīkaṁ yāsya keturbṛhatī vi bhāhi* ।
*praśastikṛdbrahmaṇe no vyu1chchhā no jane janaya viśvavāre* ॥19॥
*yachchitramapna uṣaso vahantījānāya śaśmānāya bhadram* ।
*tanno mitro varuṇo māmahantāmaditiḥ sindhuḥ pṛthivī uta dyauḥ* ॥20॥

सा. (Sv.) १७४९-१७५१

इदं श्रेष्ठं ज्योतिषां ज्योतिरागाच्चित्रः प्रकेतो अजनिष्ट विभ्वा ।
यथा प्रसूता सवितुः सवायैवा रात्र्युषसे योनिमारैक् ॥१॥
रुशद्वत्सा रुशती श्वेत्यागादारैगु कृष्णा सदनान्यस्याः ।
समानबन्धू अमृते अनूची द्यावा वर्ण चरत आमिनाने ॥२॥
समानो अध्वा स्वस्रोरनन्तस्तमन्यान्या चरतो देवशिष्टे ।
न मेथते न तस्थतुः सुमेके नक्तोषासा समनसा विरूपे ॥३॥
*idaṁ śreṣṭhaṁ jyotiṣāṁ jyotirāgāchchitraḥ praketo ajaniṣṭa vibhvā* ।
*yathā prasūtā savituḥ savāyaivā rātrayuṣase yonimāraik* ॥1॥
*ruśadvatsā ruśatī śvetyāgādāraigu kṛṣṇā sadanānyasyāḥ* ।
*samānabandhū amṛte anūchī dyāvā varṇa charata āmināne* ॥2॥
*samāno adhvā svasroranantastamanyānyā charato devaśiṣṭe* ।
*na methate na tasthatuḥ sumeke naktoṣāsā samanasā virūpe* ॥3॥

७. ऋभवः (Ṛbhavaḥ) - ऋ. (Rv.) १.११०.१-९; १.१११.१-५

ऋ. (Rv.) १.११०.१-९

ततं मे अपस्तदु तायते पुनः स्वादिष्ठा धीतिरुचथाय शस्यते ।
अयं समुद्र इह विश्वदेव्यः स्वाहाकृतस्य समु तृप्णुत ऋभवः ॥१॥
आभोगयं प्र यदिच्छन्त ऐतनापाकाः प्रांचो मम के चिदापयः ।
सौधन्वनासश्चरितस्य भूमनागच्छत सवितुर्दाशुषो गृहम् ॥२॥
तत्सविता वोऽमृतत्वमासुवदगोह्यं यच्छ्रवयन्त ऐतन ।
त्यं चिच्चमसमसुरस्य भक्षणमेकं सन्तमकृणुता चतुर्वयम् ॥३॥
विष्ट्वी शमी तरणित्वेन वाघतो मर्तासः सन्तो अमृतत्वमानशुः ।
सौधन्वना ऋभवः सूरचक्षसः संवत्सरे समपृच्यन्त धीतिभिः ॥४॥
क्षेत्रमिव वि ममुस्तेजनेनँ एकं पात्रमृभवो जेहमानम् ।
उपस्तुता उपमं नाधमाना अमर्त्येषु श्रव इच्छमानाः ॥५॥
आ मनीषामन्तरिक्षस्य नृभ्यः स्रुचेव घृतं जुहवाम विद्मना ।
तरणित्वा ये पितुरस्य सश्चिर ऋभवो वाजमरुहन्दिवो रजः ॥६॥
ऋभुर्न इन्द्रः शवसा नवीयानृभुर्वाजोभिर्वसुभिर्वसुर्ददिः ।
युष्माकं देवा अवसाहनि प्रियेऽभि तिष्ठेम मृतसुतीरसुन्वताम् ॥७॥
निश्चर्मण ऋभवो गामपिंशत सं वत्सेनासृजता मातरं पुनः ।
सौधन्वनासः स्वपस्यया नरो जिव्री युवाना पितराकृणोतन ॥८॥
वाजेभिर्नो वाजसातावविड्ढ्यृमुमाँ इन्द्र चित्रमा दर्षि राधः ।
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥९॥
*tataṁ me apastadu tāyate punaḥ svādiṣṭhā dhītiruchathāya śasyate* ।
*ayaṁ samudra iha viśvadevyaḥ svāhākṛtasya samu tṛpṇuta ṛbhavaḥ* ॥1॥

*ābhogayaṁ pra yadichchhanta aitanāpākāḥ prāṁcho mama ke chidāpayaḥ* ।
*saudhanvanāsaścharitasya bhūmanāgachchhata saviturdāśuṣo gṛham* ॥2॥
*tatsavitā vo'mṛtatvamāsuvadagohyaṁ yachchhravayanta aitana* ।
*tyaṁ chichchamasamasurasya bhakṣaṇamekaṁ santamakṛṇutā chaturvayam* ॥3॥
*viṣṭvī śamī taraṇitvena vāghato martāsaḥ santo amṛtatvamānaśuḥ* ।
*saughanvanā ṛbhavaḥ sūrachakṣasaḥ saṁvatsare samapṛchyanta dhītibhiḥ* ॥4॥
*kṣetramiva vi mamustejanenaṁ̐ ekaṁ pātramṛbhavo jehamānam* ।
*upastutā upamaṁ nādhamānā amartyeṣu śrava ichchhamānāḥ* ॥5॥
*ā manīṣāmantarikṣasya nṛbhyaḥ srucheva ghṛtaṁ juhavāma vidmanā* ।
*taraṇitvā ye piturasya saśchira ṛbhavo vājamaruhandivo rajaḥ* ॥6॥
*ṛbhurna indraḥ śavasā navīyānṛbhurvājobhirvasubhirvasurdadiḥ* ।
*yuṣmākaṁ devā avasāhani priye3bhi tiṣṭhema mṛtasutīrasunvatām* ॥7॥
*niścharmaṇa ṛbhavo gāmapiṁśata saṁ vatsenāsṛjatā mātaraṁ punaḥ* ।
*saudhanvanāsaḥ svapasyayā naro jivrī yuvānā pitarākṛṇotana* ॥8॥
*vājebhirno vājasātāvaviḍḍhyṛmumāṁ̐ indra chitramā darṣi rādhaḥ* ।
*tanno mitro varuṇo māmahantāmaditiḥ sindhuḥ pṛthivī uta dyauḥ* ॥9॥

ऋ. (Rv.) १.१११.१-५

तक्षन्नथं सुवृतं विद्मनाासस्तक्षन्हरी इन्द्रवाहा वृषण्वसू ।
तक्षिन्पितृभ्यामृभवो युवद्वयस्तक्षन्वत्साय मातरं सचाभुवम् ॥१॥
आ नो यााय तक्षत ऋभुमद्वयः क्रत्वे दक्षाय सुप्रजावतीमिषम् ।
यथा क्षयाम सर्ववीरया विशा तन्नः शर्धाय धासथा स्विन्द्रियम् ॥२॥
आ तक्षत सातिमस्मभ्यमृभवः साति रथाय सातिमर्वते नरः ।
सातिं नो जैत्रीं सं महेत विश्वहा जामिमजामिं पृतनासु सक्षणिम् ॥३॥
ऋभुक्षणमिन्द्रमा हुव ऊतय ऋभून्वाजान्मरुतः सोमपीतये ।
उभा मित्रावरुणा नूनमश्विना ते नो हिन्वन्तु सातये धिये जिषे ॥४॥
ऋभुर्भराय सं शिशातु सातिं समर्यजिद्वाजो अस्माँ अविष्टु ।
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥५॥

*takṣannathaṁ suvṛtaṁ vidmanāāsastakṣanharī indravāhā vṛṣaṇvasū* ।
*takṣinpitṛbhyāmṛbhavo yuvadvayastakṣanvatsāya mātaraṁ sachābhuvam* ॥1॥
*ā no yāāya takṣata ṛbhumadvayaḥ kratve dakṣāya suprajāvatīmiṣam* ।
*yathā kṣayāma sarvavīrayā viśā tannaḥ śardhāya dhāsathā svindriyam* ॥2॥
*ā takṣata sātimasmabhyamṛbhavaḥ sāti rathāya sātimarvate naraḥ* ।
*sātiṁ no jaitrīṁ saṁ maheta viśvahā jāmimajāmiṁ pṛtanāsu sakṣaṇim* ॥3॥
*ṛbhukṣaṇamindramā huva ūtaya ṛbhūnvājānmarutaḥ somapītaye* ।
*ubhā mitrāvaruṇā nūnamaśvinā te no hinvantu sātaye dhiye jiṣe* ॥4॥
*ṛbhurbharāya saṁ śiśātu sātiṁ samaryajidvājo asmāṁ̐ aviṣṭu* ।
*tanno mitro varuṇo māmahantāmaditiḥ sindhuḥ pṛthivī uta dyauḥ* ॥5॥

८. द्रविणोदा अग्निः शुद्धोग्निर् वा (Draviṇodā Agniḥ Śuddhognir Vā) - ऋ. (Rv.) १.९६.१-९

स प्रत्नथा सहसा जायमानः सद्यः काव्यानि बळधत्त विश्वा ।
आपश्च मित्रं धिषणा च साधन्देवा अग्निं धारयन्द्रविणोदाम् ॥१॥
स पूर्वया निविदा कव्यतायोरिमाः प्रजा अजनयन्मनूनाम् ।
विवस्वता चक्षसा द्यामपश्च देवा अग्निं धारयन्द्रविणोदाम् ॥२॥
तमीळत प्रथमं यासाधं विश आरीराहुतमृंजसानम् ।
ऊर्जः पुत्रं भरतं सृप्रदानुं देवा अग्निं धारयन्द्रविणोदाम् ॥३॥
स मातरिश्वा पुरुवारपुष्टिर्विदद्गातुं तनयाय स्वर्वित् ।
विशां गोपा जनिता रोदस्योर्देवा अग्निं धारयन्द्रविणोदाम् ॥४॥
नक्तोषासा वर्णमामेम्याने धापयेते शिशुमेकं समीची ।

द्यावाक्षामा रुक्मो अन्तर्वि भाति देवा अग्निं धारयन्द्रविणोदाम् ॥५॥
रायो बुध्नः संगमनो वसूनां यास्यकेतुर्मन्मसाधनो वेः ।
अमृतत्वं रक्षमाणास एनं देवा अग्निं धारयन्द्रविणोदाम् ॥६॥
नू च पुरा च सदनं रयीणां जातस्य च जायमानस्य च क्षाम् ।
सतश्च गोपां भवतश्च भूरेर्देवा अग्निं धारयन्द्रविणेदाम् ॥७॥
द्रविणोदा द्रविणसस्तुरस्य द्रविणोदाः सनरस्य प्र यंसत् ।
द्रविणोदा वीवतीमिषं नो द्रविणोदा रासते दीर्घमायुः ॥८॥
एवा नो अग्ने समिधा वृधानो रेवत्पावक श्रवसे वि भाहि ।
तन्नो मित्रे वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥९॥
*sa pratnathā sahasā jāyamānaḥ sadyaḥ kāvyāni baḷadhatta viśvā ।*
*āpaścha mitraṁ dhiṣaṇā cha sādhandevā agniṁ dhārayandraviṇodām ॥1॥*
*sa pūrvayā nividā kavyatāyorimāḥ prajā ajanayanmanūnām ।*
*vivasvatā chakṣasā dyāmapaścha devā agniṁ dhārayandraviṇodām ॥2॥*
*tamīḷata prathamaṁ yāsādhaṁ viśa ārīrāhutamṛñjasānam ।*
*ūrjaḥ putraṁ bharataṁ sṛpradānuṁ devā agniṁ dhārayandraviṇodām ॥3॥*
*sa mātariśvā puruvārapuṣṭirvidadgātuṁ tanayāya svarvit ।*
*viśāṁ gopā janitā rodasyordevā agniṁ dhārayandraviṇodām ॥4॥*
*naktoṣāsā varṇamāmemyāne dhāpayete śiśumekaṁ samīchī ।*
*dyāvākṣāmā rukmo antarvi bhāti devā agniṁ dhārayandraviṇodām ॥5॥*
*rāyo budhnaḥ saṁgamano vasūnāṁ yāsyaketurmanmasādhano veḥ ।*
*amṛtatvaṁ rakṣamāṇāsa enaṁ devā agniṁ dhārayandraviṇodām ॥6॥*
*nū cha purā cha sadanaṁ rayīṇāṁ jātasya cha jāyamānasya cha kṣām ।*
*sataścha gopāṁ bhavataścha bhūrerdevā agniṁ dhārayandraviṇedām ॥7॥*
*draviṇodā draviṇasasturasya draviṇodāḥ sanarasya pra yaṁsat ।*
*draviṇodā vīvatīmiṣaṁ no draviṇodā rāsate dīrghamāyuḥ ॥8॥*
*evā no agne samidhā vṛdhāno revatpāvaka śravase vi bhāhi ।*
*tanno mitre varuṇo māmahantāmaditiḥ sindhuḥ pṛthivī uta dyauḥ ॥9॥*

९. द्यावापृथिव्यौ (प्रथमपादस्य) अग्निः (द्वितीयस्य) (Dyāvāpṛthivyau (Prrathama Pādasya) Agniḥ (Dvitīyasya) - ऋ. (Rv.) १.११२.१

ईळे द्यावापृथिवी पूर्वचित्तयेऽग्निं धर्म सुरुचं यामन्निष्टये ।
याभिर्भरे कारमंशाय जिन्वथस्ताभिरू षु ऊतिभिराश्विना गतम् ॥१॥
*īḷe dyāvāpṛthivī pūrvachitteye'gniṁ dharma suruchaṁ yāmanniṣṭaye ।*
*yābhirbhare kāramaṁśāya jinvathastābhirū ṣu ūtibhirāśvinā gatam ॥1॥*

१०. पवमानः सोमः (Pavamānaḥ Somaḥ) - सा. (Sv.) ५४१; ११०४-११०६; १४२६-१४२८

सा. (Sv.) ५४१

अया पवा पवस्वैना वसूनि माँ श्चतव इन्दो सरसि प्र धन्व ।
ब्रध्नश्चिद्यस्य वातो न जूतिं पुरुमेधाश्चित्तकवे नरं धात् ॥९॥
*ayā pavā pavasvainā vasūni māṁ̐ śchatava indo sarasi pra dhanva ।*
*bradhnaśchidyasya vāto na jūtiṁ purumedhāśchittakave naraṁ dhāt ॥9॥*

सा. (Sv.) ११०४-११०६

अया पवा पवस्वैना वसूनि मांश्चत्व इन्दो सरसि प्र धन्व ।
ब्रध्नश्चिद्यस्य वातो न जूतिं पुरुमेधाश्चित्तकवे नरं धात् ॥१॥
उत न एना पवया पवस्वाधि श्रुते श्रवाय्यस्य तीर्थे ।
षष्टिं सहस्रा नैगुतो वसूनि वृक्षं न पक्वं धूनद्रणाय ॥२॥
महीमे अस्य वृष नाम शूषे मांश्चत्वे वा पृशने वा वधत्रे ।
अस्वापयन्निगुतः स्नेहयच्चापामित्राँ अपाचितो अचेतः ॥३॥
*ayā pavā pavasvainā vasūni māṁśchatva indo sarasi pra dhanva ।*

*bradhnaśchidyasya vāto na jūtiṁ purumedhāśchittakave naraṁ dhāt ॥1॥*
*uta na enā pavayā pavasvādhi śrute śravāyyasya tīrthe ।*
*ṣaṣṭiṁ sahasrā naiguto vasūni vṛkṣaṁ na pakvaṁ dhūnadraṇāya ॥2॥*
*mahīme asya vṛṣa nāma śūṣe māṁśchatve vā pṛśane vā vadhatre ।*
*asvāpayannigutaḥ srehayachchāpāmitrāṁ apāchito achetaḥ ॥3॥*

सा. (Sv.) १४२६-१४२८

अभि वायुं वीत्यर्षा गृणानो३ऽभि मित्रावरुणा पूयमानः ।
अभी नरं धीजवनं रथेष्ठामभीन्द्रं वृषणं वज्रबाहुम ॥१॥
अभि वस्त्रा सुवसनान्यर्षाभि धेनूः सुदुघाः पूयमानः ।
अभिचन्द्रा भर्तवे नो हिरण्याभ्यश्वानरथिनो देव सोम ॥२॥
*abhi vāyuṁ vītyarṣā gṛṇāno3'bhi mitrāvaruṇā pūyamānaḥ ।*
*abhī naraṁ dhījavanaṁ ratheṣṭhāmabhīndraṁ vṛṣaṇaṁ vajrabāhuma ॥1॥*
*abhi vastrā suvasanānyarṣābhi dhenūḥ sudughāḥ pūyamānaḥ ।*
*abhichandrā bhartave no hiraṇyābhyaśvānarathino deva soma ॥2॥*

११. रुद्रः (Rudraḥ) - ऋ. (Rv.) १.११४.१-११

इमा रुद्राय तवसे कपर्दिने क्षयद्वीराय प्र भरामहे मतीः ।
यथा शमसदद्विपदेचतुष्पदे विश्वं पुष्टं ग्रामे अस्मिन्ननातुरम् ॥१॥
मृळा नो रुद्रोत नो मयस्कृधि क्षयद्वीराय नमसा विधेम ते ।
यच्छं च योश्च मनुरायेजे पिता तदश्याम तव रुद्र प्रणीतिषु ॥२॥
अश्याम ते सुमतिं देवयज्यया क्षयद्वीरस्य तव रुद्र मीढ्वः ।
सुम्नायन्निद्विशो अस्माकमा चरारिष्टवीरा जुहवाम ते हविः ॥३॥
त्वेषं वयं रुद्रं यासाधं वङ्कुं कविमवसे नि ह्वयामहे ।
आरे अस्मद्दैव्यं हेळो अस्यतु सुमतिमिद्वयमस्या वृणीमहे ॥४॥
दिवो वराहमरुषं कपर्दिनं त्वेषं रूपं नमसा नि ह्वयामहे ।
हस्ते बिभ्रद्भेषजा वार्याणि शर्म वर्म छर्दिरस्मभ्यं यंसत् ॥५॥
इदं पित्रे मरुतामुच्यते वचः स्वादोः स्वादीयो रुद्राय वर्धनम् ।
रास्वा च नो अमृत मर्तभोजनं त्मने तोकाय तनयाय मृळ ॥६॥
मा नो महान्तमुत मा नो अर्भकं मा न उक्षन्तमुत मा न उक्षितम् ।
मा नो वधीः पितरं मोत मातरं मा नः प्रियास्तन्वो रुद्र रीरिषः ॥७॥
मा नस्तोके तनये मा न आयौ मा नो गोषु मा नो अश्वेषु रीरिषः ।
वीरान्मा नो रुद्र भामितो वधीर्हविष्मन्तः सदमित्त्वा हवामहे ॥८॥
उप ते स्तोमान्पशुपा इवाकरं रास्वा पितर्मरुतां सुम्नमस्मे ।
भद्रा हि ते सुमति मृळयत्तमाथा वयमव इत्ते वृणीमहे ॥९॥
आरे ते गोघ्नमुत पूरुषघ्नं क्षयद्वीर सुम्नमस्मे ते अस्तु ।
मृळा च नो अधि च ब्रूहि देवाधा च नः शर्म यच्छ द्विबर्हाः ॥१०॥
अवोचाम नमो अस्मा अवस्यवः शृणोतु नो हवं रुद्रो मरुत्वान् ।
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥११॥
*imā rudrāya tavase kapardine kṣayadvīrāya pra bharāmahe matīḥ ।*
*yathā śamasadadvipadechatuṣpade viśvaṁ puṣṭaṁ grāme asminnanāturam ॥1॥*
*mṛḷā no rudrota no mayaskṛdhi kṣayadvīrāya namasā vidhema te ।*
*yachchhaṁ cha yoścha manurāyeje pitā tadaśyāma tava rudra praṇītiṣu ॥2॥*
*aśyāma te sumatiṁ devayajyayā kṣayadvīrasya tava rudra mīḍhvaḥ ।*
*sumnāyannidviśo asmākamā charāriṣṭavīrā juhavāma te haviḥ ॥3॥*
*tveṣaṁ vayaṁ rudraṁ yāsādhaṁ vaṅkuṁ kavimavase ni hnayāmahe ।*
*āre asmaddaivyaṁ heḷo asyatu sumatimidvayamasyā vṛṇīmahe ॥4॥*
*divo varāhamaruṣaṁ kapardinaṁ tveṣaṁ rūpaṁ namasā ni hnayāmahe ।*
*haste bibhradbheṣajā vāryāṇi śarma varma chhardirasmabhyaṁ yaṁsat ॥5॥*

*idaṁ pitre marutāmuchyate vachaḥ svādoḥ svādīyo rudrāya vardhanam* ।
*rāsvā cha no amṛta martabhojanaṁ tmane tokāya tanayāya mṛḷa* ॥6॥
*mā no mahāntamuta mā no arbhakaṁ mā na ukṣantamuta mā na ukṣitam* ।
*mā no vadhīḥ pitaraṁ mota mātaraṁ mā naḥ priyāstanvo rudra rīriṣaḥ* ॥7॥
*mā nastoke tanaye mā na āyau mā no goṣu mā no aśveṣu rīriṣaḥ* ।
*vīrānmā no rudra bhāmito vadhīrhaviṣmantaḥ sadamittvā havāmahe* ॥8॥
*upa te stomānpaśupā ivākaraṁ rāsvā pitarmarutāṁ sumnamasme* ।
*bhadrā hi te sumati mṛḷayattamāthā vayamava itte vṛṇīmahe* ॥9॥
*āre te godhnamuta pūruṣaghnaṁ kṣayadvīra sumnamasme te astu* ।
*mṛḷā cha no adhi cha brūhi devādhā cha naḥ śarma yachchha dvibarhāḥ* ॥10॥
*avochāma namo asmā avasyavaḥ śṛṇotu no havaṁ rudro marutvān* ।
*tanno mitro varuṇo māmahantāmaditiḥ sindhuḥ pṛthivī uta dyauḥ* ॥11॥

१२. विश्वेदेवाः (Viśvedevāḥ) - ऋ. (Rv.) १.१०६.१-७; १.१०७.१-३

ऋ. (Rv.) १.१०६.१-७

इन्द्रं मित्रं वरुणमग्निमूतये मारुतं शर्धो अदितिं हवामहे ।
रथं न दुर्गाद्वसवः सुदानवो विश्वस्मान्नो अंहसो निष्पिपर्तन ॥१॥
त आदित्या आ गता सर्वतातये भूत देवा वृत्रतूर्येषु शंभुवः ।
रथं न दुर्गाद्वसवः सुदानवो विश्वस्मान्नो अंहसो निष्पिपर्तन ॥२॥
अवन्तु नः पितरः सुप्रवाचना उत देवी देवपुत्रे ऋतावृधा ।
रथं न दुर्गाद्वसवः सुदानवो विश्वस्मान्नो अंहसो निष्पिपर्तन ॥३॥
नराशंसं वाजिनं वाजयन्निह क्षयद्वीरं पूषणं सुम्नैरीमहे ।
रथं न दुर्गाद्वसवः सुदानवो विश्वस्मान्नो अंहसो निष्पिपर्तन ॥४॥
बृहस्पते सदमिन्नः सुगं कृधि शं योर्यत्ते मनुर्हितं तदीमहे ।
रथं न दुर्गाद्वसवः सुदानवो विश्वस्मान्नो अंहसो निष्पिपर्तन ॥५॥
इन्द्रं कुत्सो वृत्रहणं शचीपतिं काटे निबाळ्ह ऋषिरह्नदूतये ।
रथं न दुर्गाद्वसवः सुदानवो विश्वस्मान्नो अंहसो निष्पिपर्तन ॥६॥
देवैर्नो देव्यदितिर्नि पातु देवस्त्राता त्रायतामप्रयुच्छन् ।
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥७॥

*indraṁ mitraṁ varuṇamagnimūtaye mārutaṁ śardho aditiṁ havāmahe* ।
*rathaṁ na durgādvasavaḥ sudānavo viśvasmānno aṁhaso niṣpipartana* ॥1॥
*ta ādityā ā gatā sarvatātaye bhūta devā vṛtratūryeṣu śaṁbhuvaḥ* ।
*rathaṁ na durgādvasavaḥ sudānavo viśvasmānno aṁhaso niṣpipartana* ॥2॥
*avantu naḥ pitaraḥ supravāchanā uta devī devaputre ṛtāvṛdhā* ।
*rathaṁ na durgādvasavaḥ sudānavo viśvasmānno aṁhaso niṣpipartana* ॥3॥
*narāśaṁsaṁ vājinaṁ vājayanniha kṣayadvīraṁ pūṣaṇaṁ sumnairīmahe* ।
*rathaṁ na durgādvasavaḥ sudānavo viśvasmānno aṁhaso niṣpipartana* ॥4॥
*bṛhaspate sadaminnaḥ sugaṁ kṛdhi śaṁ yoryatte manurhitaṁ tadīmahe* ।
*rathaṁ na durgādvasavaḥ sudānavo viśvasmānno aṁhaso niṣpipartana* ॥5॥
*indraṁ kutso vṛtrahaṇaṁ śachīpatiṁ kāṭe nibāḷha ṛṣirahnadūtaye* ।
*rathaṁ na durgādvasavaḥ sudānavo viśvasmānno aṁhaso niṣpipartana* ॥6॥
*devairno devyaditirni pātu devastrātā trāyatāmaprayuchchhan* ।
*tanno mitro varuṇo māmahantāmaditiḥ sindhuḥ pṛthivī uta dyauḥ* ॥7॥

ऋ. (Rv.) १.१०७.१-३

याो देवानां प्रत्येति सुम्नमादित्यासो भवता मृळयन्तः ।
आ वोऽर्वाची सुमतिर्ववृत्यादंहोश्चिद्या वरिवोवित्तरासत् ॥१॥
उप नो देवा अवसा गमन्त्वंगिरसां सामभिः स्तूयमानाः ।
इन्द्र इन्द्रियैर्मरुतो मरुद्भिरादित्यैर्नो अदितिः शर्म यंसत् ॥२॥

तन्न इन्द्रस्तद्वरुणस्तदग्निस्तदर्यमा तत्सविता चनो धात् ।
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥३॥
*yāo devānāṁ pratyeti sumnamādityāso bhavatā mṛḷayantaḥ* ।
*ā vo'rvāchī sumatirvavṛtyādaṁhośchidyā varivovittarāsat* ॥1॥
*upa no devā avasā gamantvaṁgirasāṁ sāmabhiḥ stūyamānāḥ* ।
*indra indriyairmaruto marudbhirādityairno aditiḥ śarma yaṁsat* ॥2॥
*tanna indrastadvaruṇastadagnistadaryamā tatsavitā chano dhāt* ।
*tanno mitro varuṇo māmahantāmaditiḥ sindhuḥ pṛthivī uta dyauḥ* ॥3॥

१३. सत्यगुणविशिष्टोऽग्निः शुद्धोऽग्निर् वा (Satyaguṇaviśiṣṭo'gniḥ Śuddho'gnir Vā) - ऋ. (Rv.) १.९५.१-११

द्वे विरूपे चरतः स्वर्थे अन्यान्या वत्समुप धापयेते ।
हरिरन्यस्यां भवति स्वधावांछुक्रो अन्यस्यां ददृशे सुवर्चाः ॥१॥
दशेमं त्वष्टुर्जनयन्त गर्भमतन्द्रासो युवतयो विभृत्रम् ।
तिग्मानीकं स्वयशसं जनेषु विरोचमानं परि षीं नयन्ति ॥२॥
त्रीणि जाना परि भूषन्त्यस्य समुद्र एकं दिव्येकमप्सु ।
पूर्वामनु प्र दिशं पार्थिवानामृतून्प्रशासद्धि दधावनुष्ठु ॥३॥
क इमं वो निण्यमा चिकेत वत्सो मातृर्जनयत स्वाधभिः ।
बह्वीनां गर्भो अपसामुपस्थान्महान्कविर्निश्चरति स्वधावान् ॥४॥
आविष्ट्यो वर्धते चारुरासु जिह्मानामूर्ध्वः स्वयशा उपस्थे ।
उभे त्वष्टुर्बिभ्यतुर्जायमानात्प्रतीची सिंहं प्रति जोषयेते ॥५॥
उभे भद्रे जोषयेत ने मेने गाधो न वाश्रा उप तस्थुरेवैः ।
स दक्षाणां दक्षपतिर्बभूवांजन्ति यं दक्षिणतो हविर्भिः ॥६॥
उद्ययमीति सवितेव बाहू उभे सिचौ यतते भीम ऋंजन् ।
उच्छुक्रमत्कमजते सिमस्मान्नवा मातृभ्यो वसना जहाति ॥७॥
त्वेषं रूपं कृणुत उत्तरं यत्संपृंचानः सदने गोभिरद्भिः ।
कविर्बुध्नं परि ममृज्यते धीः सा देवताता समितिर्बभूव ॥८॥
उरु ते ज्रयः पर्येति बुध्नं विरोचमानं महिषस्य धाम ।
विश्वेभिरग्ने स्वयशोभिरिद्धोऽदब्धेभिः पायुभिः पाह्यस्मान् ॥९॥
धन्वन्त्स्रोतः कृणुते गातुमूर्मि शुक्रैरुर्मिभिरभि नक्षति क्षाम् ।
विश्वा सनानि जठरेषु धत्तेऽन्तर्नवासु चरति प्रसूषु ॥१०॥
एवा नो अग्ने समिधा वृधानो रेवत्पावक श्रवसे वि भाहि ।
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥११॥
*dve virūpe charataḥ svarthe anyānyā vatsamupa dhāpayete* ।
*hariranyasyāṁ bhavati svadhāvāṁchhukro anyasyāṁ dadṛśe suvarchāḥ* ॥1॥
*daśemaṁ tvaṣṭurjanayanta garbhamatandrāso yuvatayo vibhṛtram* ।
*tigmānīkaṁ svayaśasaṁ janeṣu virochamānaṁ pari ṣīṁ nayanti* ॥2॥
*trīṇi jānā pari bhūṣantyasya samudra ekaṁ divyekamapsu* ।
*pūrvāmanu pra diśaṁ pārthivānāmṛtūnpraśāsaddhi dadhāvanuṣṭhu* ॥3॥
*ka imaṁ vo niṇyamā chiketa vatso mātṛrjanayata svādhabhiḥ* ।
*bahnīnāṁ garbho apasāmupasthānmahānkavirniścharati svadhāvān* ॥4॥
*āviṣṭyo vardhate chārurāsu jihmānāmūrdhvaḥ svayaśā upasthe* ।
*ubhe tvaṣṭurbibhyaturjāyamānātpratīchī siṁhaṁ prati joṣayete* ॥5॥
*ubhe bhadre joṣayeta ne mene gādho na vāśrā upa tasthurevaiḥ* ।
*sa dakṣāṇāṁ dakṣapatirbabhūvāṁjanti yaṁ dakṣiṇato havirbhiḥ* ॥6॥
*udyayamīti saviteva bāhū ubhe sichau yatate bhīma ṛṁjan* ।
*uchchhukramatkamajate simasmānnavā mātṛbhyeā vasanā jahāti* ॥7॥
*tveṣaṁ rūpaṁ kṛṇuta uttaraṁ yatsaṁpṛṁchānaḥ sadane gobhiradbhiḥ* ।

*kavirbudhnaṁ pari mamṛjyate dhīḥ sā devatātā samitirbabhūva* //8 //
*uru te jrayaḥ paryeti budhnaṁ virochamānaṁ mahiṣasya dhāma* /
*viśvebhiragne svayaśobhiriddho'dabdhebhiḥ pāyubhiḥ pāhyasmān* //9 //
*dhanvantsāretaḥ kṛṇute gātumūrmi śukrairurmibhirabhi nakṣati kṣām* /
*viśvā sanāni jaṭhareṣu dhatte'ntarnavāsu charati prasūṣu* //10 //
*evā no agne samidhā vṛdhāno revatpāvaka śravase vi bhāhi* /
*tanno mitro varuṇo māmahantāmaditiḥ sindhuḥ pṛthivī uta dyauḥ* //11 //

१४. सूर्यः (Sūryaḥ) - ऋ. (Rv.) १.११५.१-६; सा. (Sv.) ६२९

ऋ. (Rv.) १.११५.१-६

चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः ।
आप्रा द्यावापृथिवी अन्तरिक्षं सूर्य आत्मा जगतस्तस्थुषश्च ॥१॥
सूर्यो देवीमुषसं रोचमानां मर्यो न योषामभ्येति पश्चात् ।
यत्रा नरो देवयन्तो युगानि वितन्वते प्रति भद्राय भद्रम् ॥२॥
भद्रा अश्वा हरितः सूर्यस्य चित्रा एतग्वा अनुमाद्यासः ।
नमस्यन्तो दिव आ पृष्ठमस्थुः परि द्यावापृथिवी यन्ति सद्यः ॥३॥
तत्सूर्यस्य देवत्वं तन्महित्वं मध्या कर्तोर्विततं सं जभार ।
यदेदयुक्त हरितः सधस्थादाद्रात्री वासस्तनुते सिमस्मै ॥४॥
तन्मित्रस्य वरुणस्याभिचक्षे सूर्यो रूपं कृणुते द्यौरुपस्थे ।
अनन्तमन्यद्रुशदस्य पाजः कृष्णमन्यद्धरितः सं भरन्ति ॥५॥
अद्या देवा उदिता सूर्यस्य निरंहसः पिपृता निरवद्यात् ।
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥६॥

*chitraṁ devānāmudagādanīkaṁ chakṣurmitrasya varuṇasyāgneḥ* /
*āprā dyāvāpṛthivī antarikṣaṁ sūrya ātmā jagatastasthuṣaścha* //1 //
*sūryo devīmuṣasaṁ rochamānāṁ maryo na yoṣāmabhyeti paśchāt* /
*yatrā naro devayanto yugāni vitanvate prati bhadrāya bhadram* //2 //
*bhadrā aśvā haratiḥ sūryasya chitrā etagvā anumādyāsaḥ* /
*namasyanto diva ā pṛṣṭhamasthuḥ pari dyāvāpṛthivī yanti sadyaḥ* //3 //
*tatsūryasya devatvaṁ tanmahitvaṁ madhyā kartorvitataṁ saṁ jabhāra* /
*yadedayukta haritaḥ sadhasthādādrātrī vāsastanute simasmai* //4 //
*tanmitrasya varuṇasyābhichakṣe sūryo rūpaṁ kṛṇute dyaurupasthe* /
*anantamanyadruśadasya pājaḥ kṛṣṇamanyaddharitaḥ saṁ bharanti* //5 //
*adyā devā uditā sūryasya niraṁhasaḥ pipṛtā niravadyāt* /
*tanno mitreā varuṇo māmahantāmaditiḥ sindhuḥ pṛthivī uta dyauḥ* //6 //

सा. (Sv.) ६२९

चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः ।
आप्रा द्यावापृथिवी अन्तरिक्षं सूर्य आत्मा जगतस्तस्थुषश्च ॥३॥

*chitraṁ devānāmudagādanīkaṁ chakṣurmitrasya varuṇasyāgneḥ* /
*āprā dyāvāpṛthivī antarikṣaṁ sūrya ātmā jagatastasthuṣaścha* //3 //

## १७८. कुत्सीदिः (Kutsīdiḥ)

१. विश्वेदेवाः (Viśvedevāḥ) - य. (Yv.)३३.४७

अधि न इन्द्रैषां विष्णो सजात्यानाम्। इता मरुतो ऽअश्विना। तं प्रत्नथा। अयं वेनः ।
ये देवासः। आ नऽइडाभिः। विश्वेभिः सोम्यं मधु। ओमासश्चर्षणीधृतः ॥४७॥

*adhi na indraiṣāṁ viṣṇe sajātyānām / itā maruto 'aśvinā / taṁ pratnathā / ayaṁ venaḥ* /
*ye devāsaḥ / ā na'iḍābhiḥ / viśvebhiḥ somyaṁ madhu / Omāsaścharṣaṇīdhṛtaḥ* //47 //

१७९. कुमार आत्रेयो वृशो वा जान उभौ वा (Kumāra Ātreyo Vṛśo Vā Jāna Ubhau Vā)

१. अग्निः (AGNIḤ) - ऋ. (Rv.) ५.२.१; ३-८; १०-१२

ऋ. (Rv.) ५.२.१

कुमारं माता युवतिः समुब्धं गुहा बिभर्ति न ददाति पित्रे ।
अनीकमस्य न मिनज्जनासः पुरः पश्यन्ति निहितमरतौ ॥१॥
*kumāraṁ mātā yuvatiḥ samubdhaṁ guhā bibharti na dadāti pitre ।*
*anīkamasya na minajjanāsaḥ puraḥ paśyanti nihitamaratau ॥1॥*

ऋ. (Rv.) ५.२.३-८

हिरण्यदन्तं शुचिवर्णमारात्क्षेत्रादपश्यमायुधा मिमानम् ।
ददानो अस्मा अमृतं विपृक्वतिकं मामनिन्द्राः कृणवन्ननुक्थाः ॥३॥
क्षेत्रादपश्यं सनुतश्चरन्तं सुमद्यूथ न पुरु शोभमानम् ।
न ता अगृभ्रन्नजनिष्ट हिषः पलिक्नीरिद्युवतये भवन्ति ॥४॥
के मे मर्यकं वि यवन्त गोभिर्न येषां गोपा अरणश्चिदास ।
य ई जगृभुरव ते सृजन्त्वाजाति पश्व उप नश्चिकित्वान् ॥५॥
वसां राजानं वसतिं जानामरातये नि दधुर्मर्त्येषु ।
ब्रह्मायत्रेरव तं सृजन्तु निन्दितारो निन्द्यासो भवन्तु ॥६॥
शुनश्चिच्छेपं निदितं सहस्राद्यूपादमुञ्चो अशमिष्ट हि षः ।
एवास्मदग्ने वि मुमुग्धि पाशान्होतश्चिकित्व इह तू निषद्य ॥७॥
हृणीयमानो अप हि मदैयेः प्र मे देवानां व्रतपा उवाच ।
इन्द्रो विद्वाँ अनु हि त्वा चचक्ष तेनाहमग्ने अनुशिष्ट आगाम् ॥८॥
*hiraṇyadantaṁ śuchivarṇamārātkṣetrādapaśyamāyudhā mimānam ।*
*dadāno asmā amṛtaṁ vipṛkvatikaṁ māmanindrāḥ kṛṇavannanukthāḥ ॥3॥*
*kṣetrādapaśyaṁ sanutaścharantaṁ sumadyūtha na puru śobhamānam ।*
*na tā agṛbhrannajaniṣṭa hiṣaḥ paliknīridyuvatayeā bhavanti ॥4॥*
*ke me maryakaṁ vi yavanta gobhirna yeṣāṁ gopā araṇaśchidāsa ।*
*ya ī jagṛbhurava te sṛjantvājāti paśva upa naśchikitvān ॥5॥*
*vasāṁ rājānaṁ vasatiṁ jānāmarātayeā ni dadhurmartyeṣu ।*
*brahmāyatrerava taṁ sṛjantu ninditāro nindyāso bhavantu ॥6॥*
*śunaśchichchhepaṁ niditaṁ sahasrādyūpādamuṛcho aśamiṣṭa hi ṣaḥ ।*
*evāsmadagne vi mumugdhi pāśānhotaśchikitva iha tū niṣadya ॥7॥*
*hṛṇīyamāno apa hi madaiyeḥ pra me devānāṁ vratapā uvācha ।*
*indro vidvām̐ anu hi tvā chachakṣa tenāhamagne anuśiṣṭa āgām ॥8॥*

ऋ. (Rv.) ५.२.१०-१२

उत स्वानासो दिवि षन्त्वग्नेस्तिग्मायुधा रक्षसे हन्तवा उ ।
मदे चिदस्य प्र रुजन्ति भामा न वरन्ते परिबाधो अदेवी ॥१०॥
एतं ते स्तोमं तुविजात विप्रो रथं न धीरः स्वपा अतक्षम् ।
यदीदग्ने प्रति त्वं देव हर्याः स्वर्वतीरप एना जयेम ॥११॥
तुविग्रीवो वृषभो वावृधानोऽशत्र्वर्यः समजाति वेदः ।
इतीममग्निममृता अवोचन्बर्हिष्मते मनवे शर्म यंसद्धविष्मते मनवे शर्म यंसत्॥१२॥
*uta svānāso divi ṣantvagnestigmāyudhā rakṣase hantavā u ।*
*made chidasya pra rujanti bhāmā na varante paribādho adevī ॥10॥*
*etaṁ te stomaṁ tuvijāta vipro rathaṁ na dhīraḥ svapā atakṣam ।*
*yadīdagne prati tvaṁ deva haryāḥ svarvatīrapa enā jayema ॥11॥*
*tuvigrīvo vṛṣabho vāvṛdhāno'śatrava1ryaḥ samajāti vedaḥ ।*
*itīmamagnimamṛtā avochanbarhiṣmate manave śarma yaṁsaddhaviṣmate manave śarma yaṁsat ॥12॥*

## १८०. कुमारो यामायनः (Kumāro Yāmāyanaḥ)

१. यमः (Yamaḥ) - ऋ. (Rv.) १०.१३५.१-७

यस्मिन्वृक्षे सुपलाशे देवैः सम्पिबते यमः। अत्रा नो विश्पतिः पिता पुराणाँ अनु वेनति ॥१॥
पुराणाँ अनुवेनन्तं चरन्तं पापयामुया। असूयन्नभ्यचाकशं तस्मा अस्पृहयं पुनः ॥२॥
यं कुमार नवं रथमचक्रं मनसाकृणो। एकेषं विश्वतः प्रांचमपश्यन्नधि तिष्ठसि ॥३॥
यं कुमार प्रावर्तयो रथं विप्रेभ्यस्परि। तं सामानु प्रावर्तत समितो नाव्याहितम् ॥४॥
कः कुमारमजनयद्रथं को निरवर्तयत्। कः स्वित्तदद्य नो ब्रूयादनुदेयी यथाभवत् ॥५॥
यथाभवदनुदेयी ततो अग्रमजायत। पुरस्ताद् बुध्न आततः पश्चनिरयणं कृतम् ॥६॥
इदं यमस्य सादनं देवमानं यदुच्यते। इयमस्य धम्यते नाळीरयं गीर्भिः परिष्कृतः ॥७॥

*yasminvṛkṣe supalāśe devaiḥ sampibate yamaḥ / atrā no viśpatiḥ pitā purāṇām̐ anu venati //1 //*
*purāṇām̐ anuvenantaṁ charantaṁ pāpayāmuyā / asūyannabhyachākaśaṁ tasmā aspṛhayaṁ punaḥ //2 //*
*yaṁ kumāra navaṁ rathamachakraṁ manasākṛṇo / ekeṣaṁ viśvataḥ prāṁchamapaśyannadhi tiṣṭhasi //3 //*
*yaṁ kumāra prāvartayo rathaṁ viprebhyaspari / taṁ sāmānu prāvartata samito nāvyāhitam //4 //*
*kaḥ kumāramajanayadrathaṁ ko niravartayat / kaḥ svittadadya no brūyādanudeyī yathābhavat //5 //*
*yathābhavadanudeyī tato agramajāyata / purastād budhna ātataḥ paśchanirayaṇaṁ kṛtam //6 //*
*idaṁ yamasya sādanaṁ devamānaṁ yaduchyate / iyamasya dhamyate nāḷīrayaṁ gīrbhiḥ pariṣkṛtaḥ //7 //*

## १८१. कुमारहारितः (Kumārahāritaḥ)

१. अघन्या (Aghanyā) - य. (Yv.)१२.७३

वि मुच्यध्वमघ्न्या देवयानाऽअगन्म तमसस्पारमस्य। ज्योतिरापाम ॥७३॥

*vi muchyadhvamadhnyā devayānā'aganma tamasaspāramasya / jyotirāpāma //73 //*

२. अश्विनौ (Aśvinau) - य. (Yv.)१२.७४

सजूरब्दोऽअयवोभिः सजूरुषाऽअरुणीभिः सजोषसावश्विना दं सोभिः सजूः सूरऽएतशेन सजूर्वैश्वानरऽइडया घृतेन स्वाहा ॥७४॥

*sajūrabdo'ayavobhiḥ sajūruṣā'aruṇībhiḥ sajoṣasāvaśvinā daṁ sobhiḥ sajūḥ sūra'etaśena sajūrvaiśvānara'iḍayā ghṛtena svāhā //74 //*

३. कृषीवलाः (Kṛṣīvalāḥ) - य. (Yv.)१२.६९-७१

शुनंसु फाला वि कृषन्तु भूमिंशुनं कीनाशाऽअभि यन्तु वाहैः ।
शुनासीरा हविषा तोशमाना सुपिप्पलाऽओषधीः कर्त्तनास्मे ॥६९॥
घृतेन सीता मधुना समज्यता विश्वेर्देवैरनुमता मरुद्भिः ।
ऊर्जस्वती पयसा पिन्वमानास्मान्त्सीते पयसाभ्या ववृत्स्व ॥७०॥
लांगलं पवीरवत्सुशेवंसोमपित्सरु । तदद्वपति गामविं प्रफर्व्यं च पीवरीं प्रस्थावद्रथवाहनम् ॥७१॥

*śunaṁsu phālā vi kṛṣantu bhūmiṁśunaṁ kīnāśā'abhi yantu vāhaiḥ /*
*śunāsīrā haviṣā tośamānā supippalā'Oṣadhāīḥ karttanāsme //69 //*
*ghṛtena sītā madhunā samajyatā viśverdevairanumatā marudbhiḥ /*
*ūrjasvatī payasā pinvamānāsmāntsīte payasābhyā vavṛtsva //70 //*
*lāṁgalaṁ pavīravatsuśevaṁsomapitsaru / tadadvapati gāmaviṁ prapharvya cha pīvarīṁ prasthāvadrathavāhanam //71 //*

४. मित्रादयो लिङ्क्ताः (Mitrādayo Liṅektāḥ) - य. (Yv.)१२.७२

कामं कामदुघे धृक्ष्व मित्राय वरुणाय च। इन्द्रायाश्विभ्यां पूष्णे प्रजाभ्यऽओषधीभ्यः ॥७२॥

*kāmaṁ kāmadughe dhṛkṣava mitrāya varuṇāya cha | indrāyāśvibhyāṁ pūṣṇe prajābhya'Oṣadhībhyaḥ ||72 ||*

## १८२. कुरुस्तुतिः कुरुसुतिर्वा (Kurustutiḥ Kurusutirvā)

१. इन्द्रः (Indraḥ) - अ. (Av.) २०.४२.१-३

वाचमष्टापदीमहं नवस्रक्तिमृत्सपृशम्। इन्द्रात् परि तन्वंममे ॥१॥
अनु त्वा रोदसी उभे क्रक्षमाणमकृपेताम्। इन्द्र यद् दस्युहाभवः ॥२॥
उत्तिष्ठन्नोजसा सह पीत्वी शिप्रे अवेपयः सोममिन्द्र चमू सुतम् ॥३॥
*vāchamaṣṭāpadīmahaṁ navasraktimṛtsapṛśam | indrāt pari tanvaṁmame ||1 ||*
*anu tvā rodasī ubhe krakṣamāṇamakṛpetām | indra yad dasyuhābhavaḥ ||2 ||*
*uttiṣṭhannojasā saha pītvī śipre avepayaḥ somamindra chamū sutam ||3 ||*

## १८३. कुरुसुतिः काण्वः (Kurusutiḥ Kāṇvaḥ)

१. इन्द्रः (Indraḥ) - ऋ. (Rv.) ८.७६.१-१२; ८.७७.१-११; ८.७८.१-१०; सा. (Sv.) ९८८-९९०

ऋ. (Rv.) ८.७६.१-१२

इमं नु मायिनं हुव इन्द्रमीशानमोजसा। मरुत्वन्तं न वृंजसे ॥१॥
अयमिन्द्रो मरुत्सखा वि वृत्रस्याभिनच्छिरः। वज्रेण शतपर्वणा ॥२॥
वावृधानो मरुत्सखेन्द्रो वि वृत्रमैरयत्। सृजन्त्समुद्रिया अपः ॥३॥
अयं ह येन वा इदं स्वर्मरुत्वता जितम्। इन्द्रेण सोमपीतये ॥४॥
मरुत्वन्तमृजीषिणमोजस्वन्तं विरप्शिनम्। इन्द्रं गीर्भिर्हवामहे ॥५॥
इन्द्रं प्रत्नने मन्मना मरुत्वन्तं हवामहे। अस्य सोमस्य पीतये ॥६॥
मरुत्वाँ इन्द्र मीढ्वः पिबा सोमं शतक्रतो। अस्मिन्यो पुरुषटुत ॥७॥
तुभ्येदिन्द्र मरुत्वते सुताः सोमासो अद्रिवः। हृदा हूयन्त उक्थिनः ॥८॥
पिबेदिन्द्र मरुत्वते सुताः सोमासो अद्रिवः। हृदा हूयन्त उक्थिनः ॥८॥
पिबेदिन्द्र मरुत्सखा सुतं सोमं दिविष्टषु। वज्रं शिशान ओजसा ॥९॥
उत्तिष्ठन्नोजसा सह पीत्वी शिप्रे अवेपयः। सोममिन्द्रचमू सुतम् ॥१०॥
अनु त्वा रोदसी उभे ऋक्षमाणमकृपेताम्। इन्द्र यद्दस्युहाभवः ॥११॥
वाचमष्टापदीमहं नवस्रक्तिमृतस्पृशम्। इन्द्रात् परि तन्वं ममे ॥१२॥
*imaṁ nu māyinaṁ huva indramīśānamojasā | marutvantaṁ na vṛṁjase ||1 ||*
*ayamindro marutsakhā vi vṛtrasyābhinachchhiraḥ | vajreṇa śataparvaṇā ||2 ||*
*vāvṛdhāno marutsakhendro vi vṛtramairayat | sṛjantsamudriyā apaḥ ||3 ||*
*ayaṁ ha yena vā idaṁ svarmarutvatā jitam | indreṇa somapītaye ||4 ||*
*marutvantamṛjīṣiṇamojasvantaṁ virapśinam | indraṁ gībhirhavāmahe ||5 ||*
*indraṁ pratnane manmanā marutvantaṁ havāmahe | asya somasya pītaye ||6 ||*
*marutvāṁ̐ indra mīḍhvaḥ pibā somaṁ śatakrato | asminyo puruṣaṭuta ||7 ||*
*tubhyedindra marutvate sutāḥ somāso adrivaḥ | hṛdā hūyanta ukthinaḥ ||8 ||*
*pibedindra marutvate sutāḥ somāso adrivaḥ | hṛdā hūyanta ukthinaḥ ||8 ||*
*pibedindra marutsakhā sutaṁ somaṁ diviṣṭaṣu | vajraṁ śiśāna Ojasā ||9 ||*
*uttiṣṭhannojasā saha pītvī śipre avepayaḥ | somamindrachamū sutam ||10 ||*
*anu tvā rodasī ubhe ṛkṣamāṇamakṛpetām | indra yaddasyuhābhavaḥ ||11 ||*
*vāchamaṣṭāpadīmahaṁ navasraktimṛtaspṛśam | indrāt pari tanvaṁ mame ||12 ||*

ऋ. (Rv.) ८.७७.१-११

जाानो नु शतक्रतुर्वि पृच्छदिति मातरम्। क उग्राः के ह श्रृण्विरे ॥१॥
आदीं शवस्यब्रवीदौर्णवाभमहीशुवम्। ते पुत्र सन्तु निष्टुरः ॥२॥
समित्तान्वृत्रहाखिदत्खे अराँ इव खेदया। प्रवृद्धो दस्युहाभवत् ॥३॥
एकया प्रतिधापिबत्साकं सरांसि त्रिंशतम्। इन्द्रः सोमस्य काणुका ॥४॥
अभि गन्धर्वमतृणदबुध्नेषु रजः खा। इन्द्रो बृह्मभ्य इदवृधे ॥५॥
निराबिध्यद् गिरिभ्य आ धारयत्पक्वमोदनम्। इन्द्रो बुदं स्वाततम् ॥६॥

शतब्रध्न इषुस्तव सहस्रपर्ण एक इत्। यमिन्द्र चकृषे युजम् ॥७॥
तेन स्तोतृभ्य आ भर नृभ्यो नारिभ्यो अत्तवे। सद्यो जात ऋभुष्ठिर ॥८॥
एता च्यौत्नानि ते कृता वर्षिष्ठानि परिणसा। हृदा वीड्वधारयः ॥९॥
विश्वेत्ता विष्णुराभरदुरुक्रमस्त्वेषितः । शतं महिषान्क्षीरपाकमोदनं वराहमिन्द्र एमुषम् ॥१०॥
तुविक्षं ते सुकृतं सूमयं धनुः साधुर्बुन्दो हिरण्ययः।
उभा ते बाहू रण्या सुसंस्कृत ऋदूपे चिदृदूवृधा ॥११॥

*jāāno nu śatakraturvi pṛchchhaditi mātaram | ka ugrāḥ ke ha śṛṇvire ||1||*
*ādīṁ śavasyabravīdaurṇavābhamahīśuvam | te putra santu niṣṭurāḥ ||2||*
*samittānvṛtrahākhidatkhe arām̐ iva khedayā | pravṛddho dasyuhābhavat ||3||*
*ekayā pratidhāpibatsākaṁ sarāṁsi triṁśatam | indraḥ somasya kāṇukā ||4||*
*abhi gandharvamatṛṇadabudhneṣu rajaḥ khā | indro bṛhmabhya idavṛdhe ||5||*
*nirābidhyad giribhya ā dhārayatpakvamodanam | indro budaṁ svātatam ||6||*
*śatabradhna iṣustava sahasraparṇa eka it | yamindra chakṛṣe yujam ||7||*
*tena stotṛbhya ā bhara nṛbhyo nāribhyo attave | sadyo jāta ṛbhuṣṭhira ||8||*
*etā chyautnāni te kṛtā varṣiṣṭhāni pariṇasā | hṛdā vīḍvadhārayaḥ ||9||*
*viśvettā viṣṇurābharadurukramastveṣitaḥ | śataṁ mahiṣānkhīrapākamodanaṁ varāhamindra emuṣam ||10||*
*tuvikṣaṁ te sukṛtaṁ sūmayaṁ dhanuḥ sādhurbundo hiraṇyayaḥ |*
*ubhā te bāhū raṇyā susaṁskṛta ṛdūpe chidṛdūvṛdhā ||11||*

ऋ. (Rv.) ८.७८.१-१०

पुरोळाशं नो अन्धस इन्द्र सहस्रमा भर। शता च शुर गोनाम् ॥१॥
आ नो भर व्यंजनं गामश्वमभ्यंजनम्। सचा मना हिरण्यया ॥२॥
उत नः कर्णशोभना पुरूणि धृष्णवा भर। त्वं हि शृण्विषे वसो ॥३॥
नकीं वृधीक इन्द्र ते न सुषा न सुदा उत। नान्यस्त्वच्छूर वाघतः ॥४॥
नकीमिन्द्रो निकर्तवे न शक्रः परिशक्तवे। विश्वं शृणोति पश्यति ॥५॥
स मन्युं मतर्यानामदब्धो नि चिकीषते। पुरा निदश्चिकीषते ॥६॥
क्रत्व इत्पूर्णमुदरं तुरस्यास्ति विधतः। वृत्रघ्नः सोमापाव्नः ॥७॥
त्वे वसूनि संगता विश्व च सोम सौभगा। सुदात्वपरिह्वृता ॥८॥
त्वामिद्यवयुर्मम कामो गव्युर्हिरण्ययुः। त्वामश्वयुरेषते ॥९॥
तवेद्रिन्दांहमाशसा हस्ते दात्रं चना ददे ।
दिनस्य वा मघवन्त्संभृतस्य वा पूर्धि यवस्य काशिना ॥१०॥

*puroḷāśaṁ no andhasa indra sahasramā bhara | śatā cha śura gonām ||1||*
*ā no bhara vyaṁjanaṁ gāmaśvamabhyaṁjanam | sachā manā hiraṇyayā ||2||*
*uta naḥ karṇaśobhanā purūṇi dhṛṣṇavā bhara | tvaṁ hi śṛṇviṣe vaso ||3||*
*nakīṁ vṛdhīka indra te na suṣā na sudā uta | nānyastvachchhūra vāghataḥ ||4||*
*nakīmindro nikartave na śakraḥ pariśaktave | viśvaṁ śṛṇoti paśyati ||5||*
*sa manyuṁ mataryānāmadabdho ni chikīṣate | purā nidaśchikīṣate ||6||*
*kratva itpūrṇamudaraṁ turasyāsti vidhataḥ | vṛtraghnaḥ somāpāvnaḥ ||7||*
*tve vasūni saṁgatā viśva cha soma saubhagā | sudātvaparihnṛtā ||8||*
*tvāmidyavayurmama kāmo gavyurhiraṇyayuḥ | tvāmaśvayureṣate ||9||*
*tavedrindāṁhamāśasā haste dātraṁ chanā dade |*
*dinasya vā maghavantsaṁbhṛtasya vā pūrdhi yavasya kāśinā ||10||*

सा. (Sv.) ९८८-९९०

उत्तिष्ठन्नोजसा सह पीत्वा शिप्रे अवेपयः। सोममिन्द्र चमू सुतम् ॥१॥
अनु त्वा रोदसी उभे स्पर्धमान् मददेताम्। इन्द्र यद्दस्युहाभवः ॥२॥
वाचमष्टापदीमहं नवस्रक्तिमृतावृधम्। इन्द्रात्परितन्वं ममे ॥३॥

*uttiṣṭhannojasā saha pītvā śipre avepayaḥ | somamindra chamū sutam ||1||*
*anu tvā rodasī ubhe spardhamān madadetām | indra yaddasyuhābhavaḥ ||2||*

*vāchamaṣṭāpadīmahaṁ navasraktimṛtāvṛdham । indrātparitanvaṁ mame ॥3 ॥*

### १८४. कुशिकः (Kuśikaḥ)

१. इन्द्रः (Indraḥ) - य. (Yv.)३३.५९

विदद्यदी सरमा रुग्णमद्रेर्महि पाथः पूर्व्यंसध्यक्कः ।
अग्रं नयत्सुपद्यक्षराणामच्छा रवं प्रथमा जानती गात् ॥५९॥
*vidadyadī saramā rugṇamadrermahi pāthaḥ pūrvyaṁsadhyakkaḥ ।*
*agraṁ nayatsupadyakṣarāṇāmachchhā ravaṁ prathamā jānatī gāt ॥59 ॥*

### १८५. कुशिकः सौभरो , रात्रिर्वा भारद्वाजी (Kuśikaḥ Saubharo, Rātrirvā Bhāradvājī)

१. रात्रस्तवः (Rātrastavaḥ) - ऋ. (Rv.) १०.१२७.१-८

रात्री व्यख्यदायती पुरुत्रा देव्य१ क्षभिः । विश्वा अधि श्रियोऽधित ॥१॥
ओर्वप्रा अमर्त्या निवतो देव्यु१ द्वतः । ज्योतिषा बाधते तमः ॥२॥
निरु स्वसारमस्कृतोषसं देव्यायती । अपेदु हासते तमः ॥३॥
सा नो अद्य यस्या वयं नि ते यामन्नविक्ष्महि । वृक्षे न वसतिं वयः ॥४॥
नि ग्रामासो अविक्षत नि पद्वन्तो नि पक्षिणः । नि श्येनासश्चिदर्थिनः ॥५॥
यावया वृक्यं१वृकं यवय स्तेनमूर्म्ये । अथा नाः सुतरा भव ॥६॥
उप मा पेपिशत्तमः कृष्णं व्यक्तमस्थित । उष ऋणेव यातय ॥७॥
उप ते गाइवाकरं वृणीष्व दुहितर्दिवः । रात्रि स्तोमं न जिग्युषे ॥८॥
*rātrī vyakhyadāyatī purutrā devya1 kṣabhiḥ । viśvā adhi śriyo'dhita ॥1 ॥*
*Orvaprā amartyā nivato devyu1 dvataḥ । jyotiṣā bādhate tamaḥ ॥2 ॥*
*niru svasāramaskṛtoṣasaṁ devyāyatī । apedu hāsate tamaḥ ॥3 ॥*
*sā no adya yasyā vayaṁ ni te yāmannavikṣamahi । vṛkṣe na vasatiṁ vayaḥ ॥4 ॥*
*ni grāmāso avikṣata ni padvanto ni pakṣiṇaḥ । ni śyenāsaśchidarthinaḥ ॥5 ॥*
*yāvayā vṛkyaṁ1vṛkaṁ yavaya stenamūrmye । athā nāḥ sutarā bhava ॥6 ॥*
*upa mā pepiśattamaḥ kṛṣṇaṁ vyaktamasthita । uṣa ṛṇeva yātaya ॥7 ॥*
*upa te gāivākaraṁ vṛṇīṣva duhitardivaḥ । rātri stomaṁ na jigyuṣe ॥8 ॥*

### १८६. कुश्रिः (Kuśriḥ)

१. वाजीः (Vājīḥ) - य. (Yv.)११.१३

युंजाथांरासभं युवमस्मिन् यामे वृषएवसू । अग्निं भरन्तमस्मयुम् ॥१३॥
*yuṁjāthāṁrāsabhaṁ yuvamasmin yāme vṛṣaevasū । agniṁ bharantamasmayum ॥13 ॥*

### १८७. कसीदी काण्वः (Kasīdī Kāṇvaḥ)

१. इन्द्रः (Indraḥ) - ऋ. (Rv.)८.८१.१-९; ८.८२.१-९; सा. (Sv.) १६२; १६७; ७२८-७३०

ऋ. (Rv.) ८.८१.१-९

आ तु न इन्द्र क्षुमन्तं चित्रं ग्राभं सं गृभाय । महाहस्ती दक्षिणेन ॥१॥
विद्मा हि त्वा तुविकूर्मि तुविदेष्णं तुवीमघम् । तुवीमात्रमवोभिः ॥२॥
नहि त्वा शूर देवा न मर्तासो दित्सन्तम् । भीमं न गां वारयन्ते ॥३॥
एतो न्विन्द्रं स्तवामेशानं वस्वः स्वराजम् । न राधसा मर्धिषन्नः ॥४॥
प्र स्तोषदुप गासिषच्छ्रवत्साम गीयमानम् । अभि राधसा जुगुरत् ॥५॥
आ नो भर दक्षिणेनाभि सव्येन प्र मृश । इन्द्र मा नो वसोर्निर्भाक् ॥६॥
उप क्रमस्वा भर धृषता धृष्णो जनानाम् । उदाशूष्टरस्य वेदः ॥७॥
इन्द्र य उ नु ते अस्ति वाजो विप्रेभिः सनित्वः । अस्माभिः सु तं सनुहि ॥८॥
सद्योजुवस्ते वाजा अस्मभ्यं विश्वश्चन्द्राः । वशैश्च मक्षू जरन्ते ॥९॥
*ā tu na indra kṣumantaṁ chitraṁ grābhaṁ saṁ gṛbhāya । mahāhastī dakṣiṇena ॥1 ॥*
*vidmā hi tvā tuvikūrmi tuvideṣṇaṁ tuvīmagham । tuvīmātramavobhiḥ ॥2 ॥*
*nahi tvā śūra devā na martāso ditsantam । bhīmaṁ na gāṁ vārayante ॥3 ॥*
*eto nvindraṁ stavāmeśānaṁ vasvaḥ svarājam । na rādhasā mardhiṣannaḥ ॥4 ॥*

*pra stoṣadupa gāsiṣachchhravatsāma gīyamānam | abhi rādhasā jugurat ||5 ||*
*ā no bhara dakṣiṇenābhi savyena pra mṛśa | indra mā no vasornirbhāk ||6 ||*
*upa kramasvā bhara dhṛṣatā dhṛṣṇo janānām | udāśūṣṭarasya vedaḥ ||7 ||*
*indra ya u nu te asti vājo viprebhiḥ sanitvaḥ | asmābhiḥ su taṁ sanuhi ||8 ||*
*sadyojuvaste vājā asmabhyaṁ viśvaśchandrāḥ | vaśaiścha makṣū jarante ||9 ||*

ऋ. (Rv.) ८.८२.१-९

आ प्र द्रव परावतोऽर्वावतश्च बृत्रहन्। मध्वः प्रति प्रभर्मणि ॥१॥
तीव्राः सोमास आ गहि सुतासो मादयिष्णवः। पिबा दधृग्यथोचिषे ॥२॥
इषा मन्दस्वादु तेऽरं वराय मन्यवे। भुवत्त इन्द्र शं हृदे ॥३॥
आ त्वशत्रवा गहि न्युक्थानि च हूयसे। उपमे रोचने दिवः ॥४॥
तुभ्यायमद्रिभिः सुतो गोभिः श्रीतो मदाय कम्। प्र सोम इन्द्र हूयते ॥५॥
इन्द्र श्रुधि सु मे हवमस्मे सुतस्य गोमतः। वि पीतिं तृप्तिमश्नुहि ॥६॥
य इन्द्र चमसेष्वा सोमश्चमूषु ते सुतः। पिबेदस्य त्वमीशिषे ॥७॥
यो अप्सु चन्द्रमा इव सोमश्चमूषु ददृशे। पिबेदस्य त्वमीशिषे ॥८॥
यं ते श्येनः पदाभरत्तिरो रजांस्वस्पृतम्। पिबेदस्य त्वमीशिषे ॥९॥

*ā pra drava parāvato'rvāvataścha bṛtrahan | madhvaḥ prati prabharmaṇi ||1 ||*
*tīvrāḥ somāsa ā gahi sutāso mādayiṣṇavaḥ | pibā dadhṛgyathochiṣe ||2 ||*
*iṣā mandasvādu te'raṁ varāya manyave | bhuvatta indra śaṁ hṛde ||3 ||*
*ā tvaśatravā gahi nyukthāni cha hūyase | upame rochane divaḥ ||4 ||*
*tubhyāyamadribhiḥ suto gobhiḥ śrīto madāya kam | pra soma indra hūyate ||5 ||*
*indra śrudhi su me havamasme sutasya gomataḥ | vi pītiṁ tṛptimaśnuhi ||6 ||*
*ya indra chamaseṣvā somaśchamūṣu te sutaḥ | pibedasya tvamīśiṣe ||7 ||*
*yo apsu chandramā iva somaśchamūṣu dadṛśe | pibedasya tvamīśiṣe ||8 ||*
*yaṁ te śyenaḥ padābharattiro rajāṁsvaspṛtam | pibedasya tvamīśiṣe ||9 ||*

सा. (Sv.) १६२

य इन्द्र चमसेष्वा सोमश्चमूषु ते सुतः। पिबेदस्य त्वमीशिषे ॥८॥

*ya indra chamaseṣvā somaśchamūṣu te sutaḥ | pibedasya tvamīśiṣe ||8 ||*

सा. (Sv.) १६७

आ तू न इन्द्र क्षुमन्तं चित्रं ग्राभं सं गृभाय। महाहस्ती दक्षिणेन ॥३॥

*ā tū na indra kṣumantaṁ chitraṁ grābhaṁ saṁ gṛbhāya | mahāhastī dakṣiṇena ||3 ||*

सा. (Sv.) ७२८-७३०

आ तू न इन्द्र क्षमन्तं चित्रं ग्राभं सं भृभाय । महाहस्ती दक्षिणेन ॥१॥
विद्मा हि त्वा तुविकूर्मिं तुविदेष्णं तुवीमघम्। तुविमात्रमवोभिः ॥२॥
न हि त्वा शूर देवा न मर्तासो दित्सन्तम्। भीमं न गां वारयन्ते ॥३॥

*ā tū na indra kṣamantaṁ chitraṁ grābhaṁ saṁ bhṛbhāya | mahāhastī dakṣiṇena ||1 ||*
*vidmā hi tvā tuvikūrmi tuvideṣṇaṁ tuvīmagham | tuvimātramavobhiḥ ||2 ||*
*na hi tvā śūra devā na martāso ditsantam | bhīmaṁ na gāṁ vārayante ||3 ||*

२. इन्द्रः (साग्री.सास्वा. सार्षेदी.) विश्वेदेवाः (ऋसर्व.८.८३.१) (Indraḥ [Ssb.Sas. Sad.] Viśvedevāḥ [Rss.8.83.1) - सा. (Sv.) १३८

देवानामिदवो महत्तदा वृणीमहे वयम्। वृष्णामस्मभ्यमूतये ॥४॥

*devānāmidavo mahattadā vṛṇīmahe vayam | vṛṣṇāmasmabhyamūtaye ||4 ||*

३. विश्वेदेवाः (Viśvedevāḥ) - ऋ. (Rv.) ८.८३.१-९

देवानामिदवो महत्तदा वृणीमहे वयम्। वृष्णामस्मभ्यमूतये ॥१॥
ते नः सन्तु युजः सदा वरुणो मित्रो अर्यमा। वृधासश्च प्रचेतसः ॥२॥
अति नो विष्पिता पुरु नौभिरपो न पर्षथ। यूयमृतस्य रथ्यः ॥३॥
वामं नो अस्त्वर्यमन्वामं वरुण शंस्यम्। वामं ह्यावृणीमहे ॥४॥

वामस्य हि प्रचेतस ईशानासो रिशादसः। नेमादित्या अघस्य यत् ॥५॥
वयमिद्वः सुदानवः क्षियन्तो यान्तो अध्वन्ना। देवा वृधाय हूमहे ॥६॥
अधि न इन्द्रैषां विश्णो सजात्यानाम्। इता मरुतो अश्विना ॥७॥
प्र भ्रातृत्वं सुदानवोऽध द्विता समान्या। मातुर्गर्भे भरामहे ॥८॥
यूयं हि ष्ठा सुदानव इन्द्रज्येष्ठा अभिद्यवः। अधा चिद्व उत ब्रुवे ॥९॥
*devānāmidavo mahattadā vr̥ṇīmahe vayam / vr̥ṣṇāmasmabhyamūtaye //1 //*
*te naḥ santu yujaḥ sadā varuṇo mitro aryamā / vr̥dhāsaścha prachetasaḥ //2 //*
*ati no viṣpitā puru naubhirapo na parṣatha / yūyamr̥tasya rathyaḥ //3 //*
*vāmaṁ no astvaryamanvāmaṁ varuṇa śaṁsyam / vāmaṁ hyāvr̥ṇīmahe //4 //*
*vāmasya hi prachetasa īśānāso riśādasaḥ / nemādityā aghasya yat //5 //*
*vayamidvaḥ sudānavaḥ kṣiyanto yānto adhvannā / devā vr̥dhāya hūmahe //6 //*
*adhi na indraiṣāṁ viśṇo sajātyānām / itā maruto aśvinā //7 //*
*pra bhrātr̥tvaṁ sudānavo'dha dvitā samānyā / māturgarbhe bharāmahe //8 //*
*yūyaṁ hi ṣṭhā sudānava indrajyeṣṭhā abhidyavaḥ / adhā chidva uta bruve //9 //*

## १८८. कुसुरुबिन्दुः (Kusurubinduḥ)

१. पत्नी (Patnī) - य. (Yv.)८.४२-४३

आजिघ्र कलशं मह्या त्वा विशन्त्विन्दवः।
पुनरूर्जा निवर्त्तस्व सा नः सहस्रं धुक्ष्वोरुधारा पयस्वती पुनर्माविशताद्रयिः ॥४२॥
इडे रन्ते हव्ये काम्ये चन्द्रे ज्योतेऽदिते सरस्वति महि विश्रुति ।
एता तेऽअघ्न्ये नामानि देवेभ्योमा सुकृतं ब्रूतात् ॥४३॥
*ājighra kalaśaṁ mahyā tvā viśantvindavaḥ /*
*punarūrjā nivarttasva sā naḥ sahasraṁ dhukṣavorudhārā payasvatī punarmāviśatādrayiḥ //42 //*
*iḍe rante havye kāmye chandre jyote'dite sarasvati mahi viśruti /*
*etā te'aghnye nāmāni devebhyomā sukr̥taṁ brūtāt //43 //*

## १८९. कूर्मः (Kūrmaḥ)

१. विश्वेदेवाः (Viśvedevāḥ) - य. (Yv.)३३.५१

अर्वांचोऽअद्या भवता यजत्राऽआ वो हार्दि भयमानो व्ययेयम् ।
त्राध्वं नो देवा निजुरो वृकस्य त्राध्वं कर्त्तादवपदो यजत्राः ॥५१॥
*arvāṁcho'adyā bhavatā yajatrā'ā vo hārdi bhayamāno vyayeyam /*
*trādhvaṁ no devā nijuro vr̥kasya trādhvaṁ karttādavapado yajatrāḥ //51 //*

## १९०. कूर्मः गार्त्समदः (Kūrmaḥ Gārtsamadaḥ)

१. आदित्याः (Ādityāḥ) - य. (Yv.)३३.५४

देवेभ्यो हि प्रथमं यायिभ्योऽमृतत्वं सुवसि सभगमुत्तमम् ।
आदिद्दामानंसवितर्व्यूर्णुषेऽनूचीना जीविता मानुषेभ्यः ॥५४॥
*devebhyo hi prathamaṁ yāyibhyo'mr̥tatvaṁ suvasi sabhagamuttamam /*
*ādiddāmānaṁsavitarvyūrṇuṣe'nūchīnā jīvitā mānuṣebhyaḥ //54 //*

## १९१. कूर्मः गार्त्समदः गृत्समदो वा (Kūrmaḥ Gārtsamadaḥ Gr̥tsamado Vā)

१. आदित्याः (Ādityāḥ) - ऋ. (Rv.) २.२७.१-१७

इमा गिर आदित्येभ्यो घृतस्नूः सनाद्राजभ्यो जुह्वा जहोमि ।
शृणोतु मित्रो अर्यमा भगो नस्तुविजातो वरुणो दक्षो अंशः ॥१॥
इमं स्तोमं सक्रतवो मे अद्य मित्रो अर्यमा वरुणे जुषन्त ।
आदित्यासः शुचयो ध्यारपूता अवृजिना अनवद्या अरिष्टाः ॥२॥
त आदित्यास उरवो गभीरा अदब्धासो दिप्सन्तो भूर्यक्षाः ।
अन्तः पश्यन्ति वृजिनोत साधु सर्वं राजभ्यः परमा चिदन्ति ॥३॥

धारयन्त आदित्यासो जगत्स्था देवा विश्वस्य भुवनस्य गोपाः ।
दीर्घाधियो रक्षमाणा असुर्यमृतावानश्चयमाना ऋणानि ॥४॥
विद्यमादित्या अवसो वो अस्य यदर्यन्मभय आ चिन्मयोभु ।
युष्माकं मित्रावरुणा प्रणीतौ परि श्वभ्रेव दुरितानि वृज्याम् ॥५॥
सुगो हि वो अर्यमन्मित्र पन्था अनृक्षरो वरुण साधुरस्ति ।
तेनादित्या अधिवोचता नो यच्छता नो दुष्परिहन्तु शर्म ॥६॥
पिपर्तु नो अदिति राजपुत्राति द्वेषांस्यर्यमा सुगेभिः ।
बृहन्मित्रस्य वरुणस्य शर्मोप स्याम पुरुवीरा अरिष्टाः ॥७॥
तिस्रो भूमीर्धारयन् त्रीरुँत द्यून्त्रीणि व्रता विदथे अन्तरेषाम् ।
ऋतेनादित्या महि वो महित्वं तदर्यमन्वरुण मित्र चारु ॥८॥
त्री रोचना दिव्या धारयन्त हिरण्ययाः शुचयो धारपूताः ।
अस्वप्नजो अनिमिषा अदब्धा उरुशंसा ऋजवे मर्त्याय ॥९॥
त्वं विश्वेषां वरुणासि राजा ये च देवा असुर ये च मर्ताः ।
शतं नो रास्व शरदो विचक्षेऽश्यामायूंषि सुधितानि पूर्वा ॥१०॥
न दक्षिणा वि चिकिते न सव्या न प्राचीनमादित्या नोत पश्चा ।
पाक्या चिद्वसवो धीर्या चिद्युष्मानीतो अभयं ज्योतिरश्याम् ॥११॥
यो राजभ्य ऋतनिभ्यो ददाश यं वर्धयन्ति पुष्टयश्च नित्याः ।
स रेवान्याति प्रथमो रथेन वसुदावा विदथेषु प्रशस्तः ॥१२॥
शुचिरपः सूयवसा अदब्ध उप क्षेति वृद्धवयाः सुवीरः ।
नकिष्टं घ्नन्त्यन्तितो न दूराद्य आदित्यानां भवति प्राणीतौ ॥१३॥
अदिते मित्र वरुणोत मृळ यद्वो वयं चकृमा कच्चिदागः ।
उर्वश्यामभयं ज्योतिरिन्द्र मा नो दीर्घा अभि नशन्तमिस्राः ॥१४॥
उभे अस्मै पीपयतः समीची दिवो वृष्टिं सुभगो नाम पुष्यन् ।
उभा क्षयावाजयन्याति पृत्सूभावर्धौ भवतः साधू अस्मै ॥१५॥
या वो माया अभिद्रुहे यजत्राः पाशा आदित्या रिपवे विचृताः ।
अश्वीव ताँ अति येषं रथेनारिष्टा उरावा शर्मन्त्सयाम ॥१६॥
माहं मघोनो वरुण प्रियस्य भूरिदाव्न आ विदं शूनमापेः ।
मा रायो राजन्त्सुयमादव स्थां बृहद्वदेम विदथे सुवीराः ॥१७॥

*imā gira ādityebhyo ghṛtasnūḥ sanādrājabhyo juhnā jahomi* ।
*śṛṇotu mitro aryamā bhago nastuvijāto varuṇo dakṣo aṁśaḥ* ॥1॥
*imaṁ stomaṁ sakratavo me adya mitro aryamā varuṇe juṣanta* ।
*ādityāsaḥ śuchayo dhyāārapūtā avṛjinā anavadyā ariṣṭāḥ* ॥2॥
*ta ādityāsa uravo gabhīrā adabdhāso dipsanto bhūryakṣāḥ* ।
*antaḥ paśyanti vṛjinota sādhu sarva rājabhyaḥ paramā chidanti* ॥3॥
*dhārayanta ādityāso jagatsthā devā viśvasya bhuvanasya gopāḥ* ।
*dīrghādhiyo rakṣamāṇā asuryamṛtāvānaśchayamānā ṛṇāni* ॥4॥
*vidyamādityā avaso vo asya yadaryanmabhaya ā chinmayobhu* ।
*yuṣmākaṁ mitrāvaruṇā praṇītau pari śvabhreva duritāni vṛjyām* ॥5॥
*sugo hi vo aryamanmitra panthā anṛkṣaro varuṇa sādhurasti* ।
*tenādityā adhivochatā no yachchhatā no duṣparihantu śarma* ॥6॥
*pipartu no aditi rājaputrāti dveṣāṁsyaryamā sugebhiḥ* ।
*bṛhanmitrasya varuṇasya śarmopa syāma puruvīrā ariṣṭāḥ* ॥7॥
*tisro bhūmīrdhārayan trīruṁ̐ta dyūntrīṇi vratā vidathe antareṣām* ।
*ṛtenādityā mahi vo mahitvaṁ tadaryamanvaruṇa mitra chāru* ॥8॥
*trī rochanā divyā dhārayanta hiraṇyayāḥ śuchayo dhārapūtāḥ* ।
*asvapnajo animiṣā adabdhā uruṣaṁsā ṛjave martyāya* ॥9॥
*tvaṁ viśveṣāṁ varuṇāsi rājā ye cha devā asura ye cha martāḥ* ।
*śataṁ no rāsva śarado vichakṣe'śyāmāyūṁṣi sudhitāni pūrvā* ॥10॥

*na dakṣiṇā vi chikite na savyā na prāchīnamādityā nota paśchā* /
*pākyā chidvasavo dhīryā chidyuṣmānīto abhayaṁ jyotiraśyām* //11 //
*yo rājabhya ṛtanibhyo dadāśa yaṁ vardhayanti puṣṭayaścha nityāḥ* /
*sa revānyāti prathamo rathena vasudāvā vidatheṣu praśastaḥ* //12 //
*śuchirapaḥ sūyavasā adabdha upa kṣeti vṛddhavayāḥ suvīraḥ* /
*nakiṣṭaṁ dhnantyantito na dūrādya ādityānāṁ bhavati prāṇītau* //13 //
*adite mitra varuṇota mṛḷa yadvo vayaṁ chakṛmā kachchidāgaḥ* /
*urvaśyāmabhayaṁ jyotirindra mā no dīrghā abhi naśantamisrāḥ* //14 //
*ubhe asmai pīpayataḥ samīchī divo vṛṣṭiṁ subhago nāma puśyan* /
*ubhā kṣayāvājayanyāti pṛtsūbhāvardhau bhavataḥ sādhū asmai* //15 //
*yā vo māyā abhidruhe yajatrāḥ pāśā ādityā ripave vichṛtāḥ* /
*aśvīva tāṁ ati yeṣaṁ rathenāriṣṭā urāvā śarmantsayāma* //16 //
*māhaṁ maghono varuṇa priyasya bhūridāvna ā vidaṁ śūnamāpeḥ* /
*mā rāyo rājantsuyamādava sthāṁ bṛhadvadema vidathe suvīrāḥ* //17 //

२. वरुणः (Varuṇaḥ) - ऋ. (Rv.) २.२८.१-११

इदं कवेरादित्यस्य स्वराजो विश्वानि सान्त्यभ्यस्तु मह्ना ।
अति यो मन्द्रो यजथाय देवः सुकीर्तिं भिक्षे वरुणस्य भूरेः ॥१॥
तब व्रते सुभगासः स्याम स्वाध्यो वरुण तुष्टुवांसः ।
उपायन उषसां गोमतीनामग्नयो न जरमाणा अनु द्यून् ॥२॥
तव स्याम पुरुवीरस्य शर्मन्नुरुशंसस्य वरुण प्रणेतः ।
यूयं नः पुत्रा अदितेरदब्धा अभि क्षमध्वं युज्याय देवाः ॥३॥
प्र सीमादित्यो असृजद्विधर्तॉं ऋतं सिन्धवो वरुणस्य यन्ति।
न श्राम्यन्ति न वि मुचन्त्येते वयो न पप्तू रघुया परिज्मन् ॥४॥
वि मच्छ्रथाय रशनामिवाग ऋध्याम ते वरुण खामृतस्य ।
मा तन्तुश्छेदि वयतो धियं मे मा मात्रा शार्यपसः पुर ऋतोः ॥५॥
अपो सु म्यक्ष वरुण भियसं मत्सम्राळृतावोऽनु मा गृभाय ।
दामेव वत्साद्वि मुमुग्ध्यंहो नहि त्वदारे निमिषश्चनेशे ॥६॥
मा नो वधैर्वरुण ये त इष्टावेनः कृण्वन्तमसुर भ्रीणन्ति ।
मा ज्योतिषः प्रवसथानि गन्म वि षू मृधः शिश्रथो जीवसे नः ॥७॥
नमः पुरा ते वरुणोत नूनमुतापरं तुविजात ब्रवाम ।
त्वे हि कं पर्वते न श्रितान्यप्रच्युतानि दूळभ व्रतानि ॥८॥
पर ऋणा सावीरध मत्कृतानि आ नो जीवान्वरुण तासु शाधि ॥९॥
यो मे राजन्युज्यो वा सखा वा स्वप्ने भयं भीरवे मह्यमाह ।
स्तेनो वा यो दिप्सति नो वृको वा त्वं तस्माद्वरुण पाह्यस्मान् ॥१०॥
माहं मघोनो वरुण प्रियस्य भूरिदाव्न आ विदं शूनमापेः ।
मा रायो राजन्त्सुयामदव स्थां बृहद्वदेम विदथे सुवीराः ॥११॥

*idaṁ kaverādityasya svarājo viśvāni sāntyabhyastu mahnā* /
*ati yo mandro yajathāya devaḥ sukīrti bhikṣe varuṇasya bhūreḥ* //1 //
*taba vrate subhagāsaḥ syāma svādhyo varuṇa tuṣṭuvāṁsaḥ* /
*upāyana uṣasāṁ gomatīnāmagnayo na jaramāṇā anu dyūn* //2 //
*tava syāma puruvīrasya śarmannuruśaṁsasya varuṇa praṇetaḥ* /
*yūyaṁ naḥ putrā aditeradabdhā abhi kṣamadhvaṁ yujyāya devāḥ* //3 //
*pra sīmādityo asṛjadvidhatam̐ār ṛtaṁ sindhavo varuṇasya yanti* /
*na śrāmyanti na vi muchantyete vayo na paptū raghuyā parijman* //4 //
*vi machchhrathāya raśanāmivāga ṛdhyāma te varuṇa khāmṛtasya* /
*mā tantuśchhedi vayato dhiyaṁ me mā mātrā śāryapasaḥ pura ṛtoḥ* //5 //
*apo su myakṣa varuṇa bhiyasaṁ matsamrāḷṛtāvo'nu mā gṛbhāya* /
*dāmeva vatsādvi mumugdhyaṁho nahi tvadāre nimiṣaśchaneśe* //6 //

*mā no vadhairvaruṇa ye ta iṣṭāvenaḥ kṛṇvantamasura bhrīṇanti* /
*mā jyotiṣaḥ pravasathāni ganma vi ṣū mṛdhaḥ śiśratho jīvase naḥ* //7 //
*namaḥ purā te varuṇota nūnamutāparaṁ tuvijāta bravāma* /
*tve hi kaṁ parvate na śritānyaprachyutāni dūḷabha vratāni* //8 //
*para ṛṇā sāvīradha matkṛtāni ā no jīvānvaruṇa tāsu śādhi* //9 //
*yo me rājanyujyo vā sakhā vā svapne bhayaṁ bhīrave mahyamāha* /
*steno vā yo dipsati no vṛko vā tvaṁ tasmādvaruṇa pāhyasmān* //10 //
*māhaṁ maghono varuṇa priyasya bhūridāvna ā vidaṁ śūnamāpeḥ* /
*mā rāyo rājantsuyāmadava sthāṁ bṛhadvadema vidathe suvīrāḥ* //11 //

३. विश्वेदेवाः (Viśvedevāḥ) - ऋ. (Rv.) २.२९.१-७

धृतव्रता आदित्या इषिरा आरे मत्कर्त रहसूरिवागः ।
श्रृण्वतो वो वरुण मित्र देवा भद्रस्य विद्वाँ अवसे हुवे वः ॥१॥
यूयं देवाः प्रमतिर्यूयमोजो यूयं द्वेषांसि सनुतर्युयोत ।
अभिक्षत्तारो अभि च क्षमध्वमद्या च नो मृळयतापरं च ॥२॥
किमू नु वः कृणवामापरेण किं सनेन वसव आप्येन ।
यूयं नो मित्रावरुणादिते च स्वस्तिमिन्द्रामरुतो दधात ॥३॥
हये देवा यूयमिदापयः स्थ ते मृळत नाधमानाय मह्यम् ।
मा वो रथे मध्यमवाळृते भून्मा युष्मावत्स्वापिषु श्रमिष्म ॥४॥
प्र व एको मिमय भूर्यागो यन्मा पितेव कितवं शशस ।
आरे पाशा आरे अघानि देवा मा माधि पुत्रे विमिव ग्रभीष्ट ॥५॥
अर्वांचो अद्या भवता यजत्रा आ वो हार्दि भयमानो व्ययेयम् ।
त्राध्वं नो देवा निजुरो वृकस्य त्राध्वं कर्तादवपदो यजत्राः ॥६॥
माहं मघोनो बरुण प्रियस्य भूरिदाव्न आ विदं शूनमापेः ।
मा रायो राजन्त्सुयमादव स्थां बृहद्वदेम विदथे सुवीराः ॥७॥
*dhṛtavratā ādityā iṣirā āre matkarta rahasūrivāgaḥ* /
*śṛṇvato vo varuṇa mitra devā bhadrasya vidvām̐ avase huve vaḥ* //1 //
*yūyaṁ devāḥ pramatiryūyamojo yūyaṁ dveṣāṁsi sanutaryuyota* /
*abhikṣattāro abhi cha kṣamadhvamadyā cha no mṛḷayatāparaṁ cha* //2 //
*kimū nu vaḥ kṛṇavāmāpareṇa kiṁ sanena vasava āpyena* /
*yūyaṁ no mitrāvaruṇādite cha svastimindrāmaruto dadhāta* //3 //
*haye devā yūyamidāpayaḥ stha te mṛḷata nādhamānāya mahyam* /
*mā vo rathe madhyamavāḷṛte bhūnmā yuṣmāvatsvāpiṣu śramiṣma* //4 //
*pra va eko mimaya bhūryāgo yanmā piteva kitavaṁ śaśasa* /
*āre pāśā āre aghāni devā mā mādhi putre vimiva grabhīṣṭa* //5 //
*arvāṁcho adyā bhavatā yajatrā ā vo hārdi bhayamāno vyayeyam* /
*trādhvaṁ no devā nijuro vṛkasya trādhvaṁ kartādavapado yajatrāḥ* //6 //
*māhaṁ maghono baruṇa priyasya bhūridāvna ā vidaṁ śūnamāpeḥ* /
*mā rāyo rājantsuyamādava sthāṁ bṛhadvadema vidathe suvīrāḥ* //7 //

## १९२. कृतयशा आंगिरसः (Kṛtayaśā Āṁgirasaḥ)

१. पवमानः सोमः (Pavamānaḥ Somaḥ) - ऋ. (Rv.) ९.१०८.१०; सा. (Sv.) ५८१; १०१२

ऋ. (Rv.) ९.१०८.१०

आ वच्यस्व सुदक्ष चम्वोः सुतो विशां वह्निर्न विश्पतिः ।
वृष्टिं दिवः पवस्व रीतिमपां जिन्वा गविष्टये धियः ॥१०॥
*ā vachyasva sudakṣa chamvoḥ suto viśāṁ vahnirna viśpatiḥ* /
*vṛṣṭi divaḥ pavasva rītimapāṁ jinvā gaviṣṭaye dhiyaḥ* //10 //

सा. (Sv.) ५८१

एतमु त्यं मदच्युतं सहस्राधारं वृषभं दिवोदुहम्। विश्वा वसूनि बिभ्रतम् ॥४॥

*etamu tyaṁ madachyutaṁ sahasrādhāraṁ vr̥ṣabhaṁ divoduham । viśvā vasūni bibhratam ॥4॥*

सा. (Sv.) १०१२

आ वच्यस्व सुदक्ष चम्वोः सुतो विशां बह्निर्न विश्पतिः ।
वृष्टिं दिवः पवस्व रीतिमपो जिन्वन् गविष्टये धियः ॥२॥

*ā vachyasva sudakṣa chamvoḥ suto viśāṁ bahnirna viśpatiḥ ।*
*vr̥ṣṭi divaḥ pavasva rītimapo jinvan gaviṣṭaye dhiyaḥ ॥2॥*

## १९३. कृत्नुर् भार्गवः (Kr̥tnur Bhārgavaḥ)

१. सोमः (Somaḥ) - ऋ. (Rv.) ८.७९.१-९

अयं कृत्नुरगृभीतो विश्वजिदुद्भिदित्सोमः । ऋषिर्विप्रः काव्येन ॥१॥
अभ्यूर्णोति यन्नग्नं भिषक्ति विश्वं यत्तुरम् । प्रेमन्धः ख्यन्निः श्रोणो भूत् ॥२॥
त्वं सोम तनूकृद्भ्यो द्वेषोभ्योऽन्यकृतेभ्यः । उरु यन्तासि वरूथम् ॥३॥
त्वं चित्ती तव दक्षैर्दिव आ पृथिव्या ऋजीषिन् । यावीरघस्य चिद् द्वेषः ॥४॥
अर्थिनो यन्ति चेदर्थं गच्छानिद्ददुषो रातिम् । ववृज्युस्तृष्यतः कामम् ॥५॥
विदद्यत्पूर्व्यं नष्टमुदीमृतायुमीरयत् । प्रेमायुस्तारीदतीर्णम् ॥६॥
सुशेवो नो मृळयाकुरदृप्तक्रतुरवातः । भवा नः सोम शं हृदे ॥७॥
मा नः सोम सं वीविजो मा वि बीभिषथा राजन् । मा नो हार्दि त्विषा वधीः ॥८॥
अव यत्स्वे सधस्थे देवानां दुर्मतीरीक्षे । राजन्नप द्विषः सेध मीढ्वो अप स्रिधः सेध ॥९॥

*ayaṁ kr̥tnuragr̥bhīto viśvajidudbhiditsomaḥ । r̥ṣirvipraḥ kāvyena ॥1॥*
*abhyūrṇoti yannagnaṁ bhiṣakti viśvaṁ yatturam । premandhaḥ khyanniḥ śroṇo bhr̥t ॥2॥*
*tvaṁ soma tanūkr̥dbhyo dveṣobhyo'nyakr̥tebhyaḥ । uru yantāsi varūtham ॥3॥*
*tvaṁ chittī tava dakṣairdiva ā pr̥thivyā r̥jīṣin । yāvīraghasya chid dveṣaḥ ॥4॥*
*arthino yanti chedartha gachchhāniddaduṣo rātim । vavr̥jyustr̥ṣyataḥ kāmam ॥5॥*
*vidadyatpūrvya naṣṭamudīmr̥tāyumīrayat । premāyustārīdatīrṇam ॥6॥*
*suśevo no mr̥ḷayākuradr̥ptakraturavātaḥ । bhavā naḥ soma śaṁ hr̥de ॥7॥*
*mā naḥ soma saṁ vīvijo mā vi bībhiṣathā rājan । mā no hārdi tviṣā vadhīḥ ॥8॥*
*ava yatsve sadhasthe devānāṁ durmatīrīkṣe । rājannapa dviṣaḥ sedha mīḍhvo apa sridhaḥ sedha ॥9॥*

## १९४. कृशः काण्वः (Kr̥śaḥ Kāṇvaḥ)

१. प्रस्कण्वस्य दानस्तुतिः (Prraskaṇvasya Dānastutiḥ) - ऋ. (Rv.) ८.५५.१-५

भूरीदिन्द्रस्य वीर्य१ व्यख्यमभ्यायति । राधस्ते दस्यवे वृक ॥१॥
शतं श्वेतास उक्षणो दिवि तारो न रोचन्ते । मह्ना दिवं न तस्तभुः ॥२॥
शतं वेणूञ्छतं शुनः शतं चर्माणि म्लातानि । शतं मे बल्वजस्तुका अरुषीणां चतुःशतम् ॥३॥
सुदेवाः स्थ काण्वायना वयोवयो विचरन्तः । अश्वासो न चङ्क्रमत ॥४॥
आदित्साप्तस्य चर्किरन्नानूनस्य महि श्रवः । श्यावीरतिध्वसन्पथश्चक्षुषा चन संनशे ॥५॥

*bhūrīdindrasya vīrya1 vyakhyamabhyāyati । rādhaste dasyave vr̥ka ॥1॥*
*śataṁ śvetāsa ukṣaṇo divi tāro na rochante । mahnā divaṁ na tastabhuḥ ॥2॥*
*śataṁ veṇūṁchhataṁ śunaḥ śataṁ charmāṇi mlātāni ।*
*śataṁ me balvajastukā aruṣīṇāṁ chatuḥśatam ॥3॥*
*sudevāḥ stha kāṇvāyanā vayovayo vicharantaḥ । aśvāso na chaṅkramata ॥4॥*
*āditsāptasya chārkirannānūnasya mahi śravaḥ ।*
*śyāvīratidhvasanpathaśchakṣuṣā chana saṁnaśe ॥5॥*

१९५. **कृष्णः (ऋसर्व. अ.); कृष्ण आंगिरसः (साग्री.) (Kṛṣṇaḥ [Rss. Av.), Kṛṣṇa Āṁgirasaḥ [Ssb.])**

१. अश्विनौ (Aśvinau) - ऋ. (Rv.) ८.८५.१-९

आ मे हवं नासत्याश्विना गच्छतं युवम्। मध्वः सोमस्य पीतये ॥१॥
इमं मे स्तोममश्विनेमं मे श्रृणुतं हवम्। मध्वः सोमस्य पीतये ॥२॥
अयं वां कृष्णो अश्विना हवते वाजिनीवसू। मध्वः सोमस्य पीतये ॥३॥
शृणुतं जरितुर्हवं कृष्णस्य स्तुवतो नरा। मध्वः सोमस्य पीतये ॥४॥
छर्दिर्यन्तमदाभ्यं विप्राय स्तुवते नरा। मध्वः सोमस्य पीतये ॥५॥
गच्छतं दाशुषो गृहमित्था स्तुवतो अश्विना। मध्वः सोमस्य पीतये ॥६॥
युंजाथां रासभं रथे वीड्वंगे वृषण्वसू। मध्वः सोमस्य पीतये ॥७॥
त्रिबन्धुरेण त्रिवृता रथेना यातमश्विना। मध्वः सोमस्य पीतये ॥८॥
नू मे गिरो नासत्याश्विना प्रावतं युवम्। मध्वः सोमस्य पीतये ॥९॥

*ā me havaṁ nāsatyāśvinā gachchhataṁ yuvam | madhvaḥ somasya pītaye ||1||*
*imaṁ me stomamaśvinemaṁ me śṛṇutaṁ havam | madhvaḥ somasya pītaye ||2||*
*ayaṁ vāṁ kṛṣṇo aśvinā havate vājinīvasū | madhvaḥ somasya pītaye ||3||*
*śuṇutaṁ jariturhavaṁ kṛṣṇasya stuvato narā | madhvaḥ somasya pītaye ||4||*
*chhardiryantamadābhyaṁ viprāya stuvate narā | madhvaḥ somasya pītaye ||5||*
*gachchhataṁ dāśuṣo gṛhamitthā stuvato aśvinā | madhvaḥ somasya pītaye ||6||*
*yuṁjāthāṁ rāsabhaṁ rathe vīḍvaṁge vṛṣaṇvasū | madhvaḥ somasya pītaye ||7||*
*tribandhureṇa trivṛtā rathenā yātamaśvinā | madhvaḥ somasya pītaye ||8||*
*nū me giro nāsatyāśvinā prāvataṁ yuvam | madhvaḥ somasya pītaye ||9||*

२. इन्द्रः (Indraḥ) - ऋ. (Rv.) १०.४२.१-११; १०.४३.१-११; १०.४४.१-११; सा. (Sv.) ३७५; अ. (Av.) २०.१७.१-१२; २०.८९.१-११; २०.९४.१-११

ऋ. (Rv.) १०.४२.१-११

अस्तेव सु प्रतरं लायमस्यन्भूषन्निव प्र भरा स्तोममस्मै ।
वाचा विप्रास्तरत वाचमर्यो नि रामय जरितः सोम इन्द्रम् ॥१॥
दोहेन गामुप शिक्षा सखायं प्र बोधय जरितर्जारमिन्द्रम् ।
कोशं न पूर्णं वसुना न्यृष्टमा च्यावय मघदेयाय शूरम् ॥२॥
किमंग त्वा मघवन्भोजमाहुः शिशीहि मा शिशयं त्वा श्रृणोमि ।
अप्नस्वती मम धीरस्तु शक्र वसुविदं भगमिन्द्रा भरा नः ॥३॥
त्वां जना ममसत्येष्विन्द्र सन्तस्थाना वि ह्वयन्ते समीके ।
अत्रा युजं कृणुते यो हविष्मान्नासुन्वता सख्यं वष्टि शूरः ॥४॥
धनं न स्पन्द्रं बहुलं यो अस्मै तीव्रान्त्सोमाँ आसुनोति प्रयस्वान् ।
तस्मै शत्रून्त्सुतुकान्प्रातरह्नो नि स्वष्ट्रान्युवति हन्ति वृत्रम् ॥५॥
यस्मिन्वयं दधिमा शंसमिन्द्रं यः शिश्राय मघवा काममस्मे ।
आराच्चित्सन्भयतामस्य शत्रुर्न्यस्मै द्युम्ना जन्या नमन्ताम् ॥६॥
आराच्छत्रुमप बाधस्व दूरमुग्रो यः शम्बः पुरुहूत तेन ।
अस्मे धेहि यवमद्गोमदिन्द्र कृधी धियं जरित्रे वाजरत्नाम् ॥७॥
प्र यमन्तर्वृषसवासो अग्मन्तीव्राः सोमा बहुलान्तास इन्द्रम् ।
नाह दामानं मघवा नि यंसन्नि सुन्वते वहति भूरि वामम् ॥८॥
उत प्रहामतिदीव्या जयाति कृतं यच्छ्वघ्नी विचिनोति काले ।
यो देवकामो न धना रुणद्धि समित्तं राया सृजति स्वधावान् ॥९॥
गोभिष्टरेमामतिं दुरेवां यवेन क्षुधं पुरुहूत विश्वाम् ।
वयं राजभिः प्रथमा धनान्यस्माकेन वृजनेना जयेम ॥१०॥
बृहस्पतिर्नः परि पातु पश्चादुतोत्तरस्मादधरादघायोः ।
इन्द्रः पुरस्तादुत मध्यतो नः सखा सखिभ्यो वरिवः कृणोतु ॥११॥

*asteva su prataraṁ lāyamasyanbhūṣanniva pra bharā stomamasmai* ।
*vāchā viprāstarata vāchamaryo ni rāmaya jaritaḥ soma indram* ॥1॥
*dohena gāmupa śikṣā sakhāyaṁ pra bodhaya jaritarjāramindram* ।
*kośaṁ na pūrṇa vasunā nyṛṣṭamā chyāvaya maghadeyāya śūram* ॥2॥
*kimaṁga tvā maghavanbhojamāhuḥ śiśīhi mā śiśayaṁ tvā śṛṇomi* ।
*apnasvatī mama dhīrastu śakra vasuvidaṁ bhagamindrā bharā naḥ* ॥3॥
*tvāṁ janā mamamasatyeṣvindra santasthānā vi hnayante samīke* ।
*atrā yujaṁ kṛṇute yo haviṣmānnāsunvatā sakhyaṁ vaṣṭi śūraḥ* ॥4॥
*dhanaṁ na spandraṁ bahulaṁ yo asmai tīvrāntsomām̐ āsunoti prayasvān* ।
*tasmai śatrūntsutukānprātarahno ni svaṣṭrānyuvati hanti vṛtram* ॥5॥
*yasminvayaṁ dadhimā śaṁsamindraṁ yaḥ śiśrāya maghavā kāmamasme* ।
*ārāchchitsanbhayatāmasya śatrurnyasmai dyumnā janyā namantām* ॥6॥
*ārāchchhatrumapa bādhasva dūramugro yaḥ śambaḥ puruhūta tena* ।
*asme dhehi yavamadgomadindra kṛdhī dhiyaṁ jaritre vājaratnām* ॥7॥
*pra yamantarvṛṣasavāso agmantīvrāḥ somā bahulāntāsa indram* ।
*nāha dāmānaṁ maghavā ni yaṁsanni sunvate vahati bhūri vāmam* ॥8॥
*uta prahāmatidīvyā jayāti kṛtaṁ yachchhvaghnī vichinoti kāle* ।
*yo devakāmo na dhanā ruṇaddhi samittaṁ rāyā sṛjati svadhāvān* ॥9॥
*gobhiṣṭaremāmatiṁ durevāṁ yavena kṣudhaṁ puruhūta viśvām* ।
*vayaṁ rājabhiḥ prathamā dhanānyasmākena vṛjanenā jayema* ॥10॥
*bṛhaspatirnaḥ pari pātu paśchādutottarasmādadharādaghāyoḥ* ।
*indraḥ purastāduta madhyato naḥ sakhā sakhibhyo varivaḥ kṛṇotu* ॥11॥

ऋ. (Rv.) १०.४३.१-११

अच्छा म इन्द्रं मत्यः स्वर्विदः सध्रीचीर्विश्वा उशतीनरनूषत ।
परि ष्वजन्ते जनयो यथा पतिं मर्य न शुन्ध्युं मघवानमूतये ॥१॥
न घा त्वद्रिगप वेति मे मनस्त्वे इत्कामं पुरुहूत शिश्रय ।
राजेव दस्म नि षदोऽधि बर्हिष्यस्मिन्त्सु सोमेऽवपानमस्तु ते ॥२॥
विषूवृदिन्द्रो अमतेरुत क्षुधः स इद्रायो मघवा वस्व ईशते ।
तस्येदिमे प्रवणे सप्त सिन्धवो वयो वर्धन्ति वृषभस्य शुष्मिणः ॥३॥
वयो न वृक्षं सुपलाशमासदन्त्सोमास इन्द्रं मन्दिनश्चमूषदः ।
प्रैषामनीकं शवसा दविद्युतद्विदत्स्व१र्मनवे ज्योतिरार्यम् ॥४॥
कृतं न श्वघ्नी वि चिनोति देवने संवर्ग यन्मघवा सूर्य जयत् ।
न तत्ते अन्यो अनु वीर्य शकन्न पुराणो मघवन्नोत नूतनः ॥५॥
विशंविशं मघवा पर्यशायत जनानां धेना अवचाकशद्वृषा ।
यस्याह शक्रः सवनेषु रण्यति स तीव्रैः सौमैः सहते पृतन्यतः ॥६॥
आपो न सिन्धुमभि यत्समक्षरन्त्सोमास इन्द्रं कुल्याइव ह्रदम् ।
वर्धन्ति विप्रा महो अस्य सादने यवं न वृष्टिर्दिव्येन दानुना ॥७॥
वृषा न क्रुद्धः पतयद्रजः स्वा यो अर्यपत्नीरकृणोदिमा अपः ।
स सुन्वते मघवा जीरदानवेऽविन्दज्ज्योतिर्मनवे हविष्मते ॥८॥
उज्जायतां परशुर्ज्योतिषा सह भूया ऋतस्य सुदुघा पुराणवत् ।
वि रोजतामरुषो भानुना शुचिः स्व१र्ण शुक्रं शुशुचीत सत्पतिः ॥९॥
गोभिष्टरेमामतिं दुरेवां यवेन क्षुधं पुरुहूत विश्वाम् ।
वयं राजभिः प्रथमा धनान्यस्माकेन वृजनेना जयेम ॥१०॥
बृहस्पतिर्नः परि पातु पश्चादुतोत्तरस्मादधरादघायोः ।
इन्द्रः पुरस्तादुत मध्यतो नः सखा सखिभ्यो वरिवः कृणोतु ॥११॥

*achchhā ma indraṁ matyaḥ svarvidaḥ sadhrīchīrviśvā uśatīnaranūṣata* ।
*pari ṣvajante janayo yathā patiṁ marya na śundhyuṁ maghavānamūtaye* ॥1॥
*na ghā tvadrigapa veti me manastve itkāmaṁ puruhūta śiśraya* ।

*rājeva dasma ni ṣado'dhi barhiṣyasmintsu some'vapānamastu te //2 //*
*viṣūvṛdindro amateruta kṣudhaḥ sa idrāyo maghavā vasva īśate /*
*tasyedime pravaṇe sapta sindhavo vayo vardhanti vṛṣabhasya śuṣmiṇaḥ //3 //*
*vayo na vṛkṣaṁ supalāśamāsadantsomāsa indraṁ mandinaśchamūṣadaḥ /*
*praiṣāmanīkaṁ śavasā davidyutadvidatsva1rmanave jyotirāryam //4 //*
*kṛtaṁ na śvaghnī vi chinoti devane saṁvarga yanmaghavā sūrya jayat /*
*na tatte anyo anu vīrya śakanna purāṇo maghavannota nūtanaḥ //5 //*
*viśaṁviśaṁ maghavā paryaśāyata janānāṁ dhenā avachākaśadvṛṣā /*
*yasyāha śakraḥ savaneṣu raṇyati sa tīvraiḥ saumaiḥ sahate pṛtanyataḥ //6 //*
*āpo na sindhumabhi yatsamakṣarantsomāsa indraṁ kulyāiva hradam /*
*vardhanti viprā maho asya sādane yavaṁ na vṛṣṭirdivyena dānunā //7 //*
*vṛṣā na kruddhaḥ patayadrajaḥ svā yo aryapatnīrakṛṇodimā apaḥ /*
*sa sunvate maghavā jīradānave'vindajjyotirmanave haviṣmate //8 //*
*ujjāyatāṁ paraśurjyotiṣā saha bhūyā ṛtasya sudughā purāṇavat /*
*vi rojatāmaruṣo bhānunā śuchiḥ sva1rṇa śukraṁ śuśuchīta satpatiḥ //9 //*
*gobhiṣṭaremāmatiṁ durevāṁ yavena kṣudhaṁ puruhūta viśvām /*
*vayaṁ rājabhiḥ prathamā dhanānyasmākena vṛjanenā jayema //10 //*
*bṛhaspatirnaḥ pari pātu paśchādutottarasmādadharādaghāyoḥ /*
*indraḥ purastāduta madhyato naḥ sakhā sakhibhyo varivaḥ kṛṇotu //11 //*

ऋ. (Rv.) १०.४४.१-११

आ यात्विन्द्रः स्वपतिर्मदाय यो धर्मणा तूतुजानस्तुविष्मान् ।
प्रत्वक्षाणो अति विश्वा सहांस्यपारेण महता वृष्ण्येन ॥१॥
सुष्ठामा रथः सुयमा हरी ते मिम्यक्ष वज्रो नृपते गभस्तौ ।
शीभं राजन्त्सुपथा याह्यर्वाङ् वर्धाम ते पपुषो वृष्ण्यानि ॥२॥
एन्द्रवाहो नृपतिं वज्रबाहुमुग्रमुग्रासस्तविषास एनम् ।
प्रत्वक्षसं वृषभं सत्यशुष्ममेमस्मत्रा सधमादो वहन्तु ॥३॥
एवा पतिं द्रोणसाचं सचेतसमूर्जः स्कम्भं धरुण आ वृषायसे ।
ओजः कृष्व सं गृभाय त्वे अप्यसो यथा कोनिपानामिनो वृधे ॥४॥
गमन्नस्मे वसून्या हि शंसिषं स्वाशिषं भरमा याहि सोमिनः ।
त्वमीशिषे सास्मिन्ना सत्सि बर्हिष्यनाधृष्या तव पात्राणि धर्मणा ॥५॥
पृथक् प्रायन्प्रथमा देवहूतयोऽकृण्वत श्रवस्यानि दुष्टरा ।
न ये शेकुर्यियां नावमारुहमीर्मैव ते न्यविशन्त केपयः ॥६॥
एवैवापागपरे सन्तु दूढ्योऽश्वा येषां दुर्युज आयुयुज्रे ।
इत्था ये प्रागुपरे सन्ति दावने पुरूणि यत्र वयुनानि भोजना ॥७॥
गिरीँरज्रानेजमानाँ अधारयद् द्यौः क्रन्ददन्तरिक्षाणि कोपयत् ।
समीचीने धिषणे वि ष्कभायति वृष्णः पीत्वा मद उक्थानि शंसति ॥८॥
इमं बिभर्मि सुकृतं ते अङ्कुशं येनारुजासि मघवंछफारुजः ।
अस्मिन्त्सु ते सवने अस्त्वोक्यं सुत इष्टौ मघवन्बोध्याभगः ॥९॥
गोभिष्टरेमामतिं दुरेवां यवेन क्षुधं पुरुहूत विश्वाम् ।
वयं राजभिः प्रथमा धनान्यस्माकेन वृजनेना जयेम ॥१०॥
बृहस्पतिर्नः परि पातु पश्चादुतोत्तरस्मादधरादघायोः ।
इन्द्रः पुरस्तादुत मध्यतो नः सखा सखिभ्यो वरिवः कृणोतु ॥११॥

*ā yātvindraḥ svapatirmadāya yo dharmaṇā tūtujānastuviṣmān /*
*pratvakṣāṇo ati viśvā sahāṁsyapāreṇa mahatā vṛṣṇyena //1 //*
*suṣṭhāmā rathaḥ suyamā harī te mimyakṣa vajro nṛpate gabhastau /*
*śībhaṁ rājantsupathā yāhyarvāṅ vardhāma te papuṣo vṛṣṇyāni //2 //*
*endravāho nṛpatiṁ vajrabāhumugramugrāsastaviṣāsa enam /*
*pratvakṣasaṁ vṛṣabhaṁ satyaśuṣmamemasmatrā sadhamādo vahantu //3 //*

*evā patiṁ droṇasāchaṁ sachetasamūrjaḥ skambhaṁ dharuṇa ā vṛṣāyase* ।
*Ojaḥ kṛṣva saṁ gṛbhāya tve apyaso yathā konipānāmino vṛdhe* ॥4॥
*gamannasme vasūnyā hi śaṁsiṣaṁ svāśiṣaṁ bharamā yāhi sominaḥ* ।
*tvamīśiṣe sāsminnā satsi barhiṣyanādhṛṣyā tava pātrāṇi dharmaṇā* ॥5॥
*pṛthak prāyanprathamā devahūtayo'kṛṇvata śravasyāni duṣṭarā* ।
*na ye śekuryiāyāṁ nāvamāruhamīrmaiva te nyaviśanta kepayaḥ* ॥6॥
*evaivāpāgapare santu dūḍhyo'śvā yeṣāṁ duryuja āyuyujre* ।
*itthā ye prāgupare santi dāvane purūṇi yatra vayunāni bhojanā* ॥7॥
*girīm̐rajrānejamānām̐ adhārayad dyauḥ krandadantarikṣāṇi kopayat* ।
*samīchīne dhiṣaṇe vi ṣkabhāyati vṛṣṇaḥ pītvā mada ukthāni śaṁsati* ॥8॥
*imaṁ bibharmi sukṛtaṁ te aṅkuśaṁ yenārujāsi maghavaṁchhaphārujaḥ* ।
*asmintsu te savane astvokyaṁ suta iṣṭau maghavanbodhyābhagaḥ* ॥9॥
*gobhiṣṭaremāmatiṁ durevāṁ yavena kṣudhaṁ puruhūta viśvām* ।
*vayaṁ rājabhiḥ prathamā dhanānyasmākena vṛjanenā jayema* ॥10॥
*bṛhaspatirnaḥ pari pātu paśchādutottarasmādadharādaghāyoḥ* ।
*indraḥ purastāduta madhyato naḥ sakhā sakhibhyo varivaḥ kṛṇotu* ॥11॥

सा. (Sv.) ३७५

अच्छा व इन्द्रं मतयः स्वर्युवः सध्रीचीर्विश्वा उशतीरनूषत ।
परिष्वजन्त जनयो यथा पति मर्य न शुन्ध्युं मघवानमूतये ॥६॥
*achchhā va indraṁ matayaḥ svaryuvaḥ sadhrīchīrviśvā uśatīranūṣata* ।
*pariṣvajanta janayo yathā pati marya na śundhyuṁ maghavānamūtaye* ॥6॥

अ. (Av.) २०.१७.१-१२

अच्छा म इन्द्रं मतयः स्वर्विदः सध्रीचीर्विश्वा उशतीरनूषत ।
परि ष्वजन्ते जनयो यथा पतिं मर्य न शुन्ध्युं मघवानमूतये ॥१॥
न घा त्वद्रिगप वेति मे मनस्त्वे इत् कामं पुरुहूत शिश्रय ।
राजेव दस्म नि षदोऽधि बर्हिष्यस्मिन्त्सु सोमेऽवपानमस्तु ते ॥२॥
विषूवृदिन्द्रो अमतेरुत क्षुधः स इद्रायो मघवा वस्व ईशते ।
तस्येदिमे प्रवणे सप्त सिन्धवो वयो वर्धन्ति वृषभस्य शुष्मिणः ॥३॥
वयो न वृक्षं सुपलाशमासदन्त्सोमास इन्द्र मन्दिनश्चमूषदः ।
प्रेषामनीकं शवसा दविद्युतद् विदत् स्व१ र्मनवे ज्योतिरार्यम् ॥४॥
कृतं न श्वघ्नी वि चिनोति देवने संवर्ग यन्मघवा सूर्य जयत् ।
न तत् ते अन्यो अनु वीर्यशकन्न पुराणो मघवन् नोत नूतनः ॥५॥
विशंविशं मघवा पर्यशायत जनानां धेना अवचाकशद् वृषा ।
यस्याह शक्रः सवनेषु रण्यति स तीव्रैः सोमैः सहते पृतन्यतः ॥६॥
आपो न सिन्धुमभि यत् समक्षरन्त्सोमास इन्द्रं कुल्याइव ह्रदम् ।
वर्धन्ति विप्रा महो अस्य सादने यवं न वृष्टिर्दिव्येन दानुना ॥७॥
वृषा न क्रुद्धः पतयद् रजःस्वा यो अर्यपत्नीरकृणोदिमा अपः ।
स सुन्वते मघवा जीरदानवेऽविन्दज्ज्योतिर्मनवे हविष्मते ॥८॥
उज्जायतां परशुर्ज्योतिषा सह भूया ऋतस्य सुदुघा पुराणवत् ।
वि रोचतामरुषो भानुना शुचिः स्व१र्ण शुक्रं शुशुचीत सत्पतिः ॥९॥
गोभिष्टरेमामतिं दुरेवां यवेन क्षुधं पुरुहूत विश्वाम् ।
वयं राजभिः प्रथमा धनान्यस्माकेन वृजनेना जयेम ॥१०॥
बृहस्पतिर्नः परि पातु पश्चादुतोत्तरस्माद धरादघायोः ।
इन्द्रः पुरस्तादुत मध्यतो नः सखा सखिभ्यो वरिवः कृणोतु ॥११॥
बृहस्पते युवमिन्द्रश्च वस्वो दिव्यस्येशाथे उत पार्थिवस्य ।
धत्तं रयिं स्तुवते कीरये चिद्यूयं पात स्वस्तिभिः सदा नः ॥१२॥
*achchhā ma indraṁ matayaḥ svarvidaḥ sadhrīchīrviśvā uśatīranūṣata* ।

*pari ṣvajante janayo yathā patiṁ marya na śundhyuṁ maghavānamūtaye //1 //*
*na ghā tvadrigapa veti me manastve it kāmaṁ puruhūta śiśraya /*
*rājeva dasma ni ṣado'dhi barhiṣyasmintsu some'vapānamastu te //2 //*
*viṣūvṛdindro amateruta kṣudhaḥ sa idrāyo maghavā vasva īśate /*
*tasyedime pravaṇe sapta sindhavo vayo vardhanti vṛṣabhasya śuṣmiṇaḥ //3 //*
*vayo na vṛkṣaṁ supalāśamāsadantsomāsa indra mandinaśchamūṣadaḥ /*
*preṣāmanīkaṁ śavasā davidyutad vidat sva1 rmanave jyotirāryam //4 //*
*kṛtaṁ na śvaghnī vi chinoti devane saṁvarga yanmaghavā sūrya jayat /*
*na tat te anyo anu vīryaśakanna purāṇo maghavan nota nūtanaḥ //5 //*
*viśaṁviśaṁ maghavā paryaśāyata janānāṁ dhenā avachākaśad vṛṣā /*
*yasyāha śakraḥ savaneṣu raṇyati sa tīvraiḥ somaiḥ sahate pṛtanyataḥ //6 //*
*āpo na sindhumabhi yat samakṣarantsomāsa indraṁ kulyāiva hradam /*
*vardhanti viprā maho asya sādane yavaṁ na vṛṣṭirdivyena dānunā //7 //*
*vṛṣā na kruddhaḥ patayad rajaḥsvā yo aryapatnīrakṛṇodimā apaḥ /*
*sa sunvate maghavā jīradānave'vindajjotirmanave haviṣmate //8 //*
*ujjāyatāṁ paraśurjyotiṣā saha bhūyā ṛtasya sudughā purāṇavat /*
*vi rochatāmaruṣo bhānunā śuchiḥ sva1rṇa śukraṁ śuśuchīta satpatiḥ //9 //*
*gobhiṣṭaremāmatiṁ durevāṁ yavena kṣudhaṁ puruhūta viśvām /*
*vayaṁ rājabhiḥ prathamā dhanānyasmākena vṛjanenā jayema //10 //*
*bṛhaspatirnaḥ pari pātu paśvādutottarasmāda dharādaghāyoḥ /*
*indraḥ purastāduta madhyato naḥ sakhā sakhibhyo varivaḥ kṛṇotu //11 //*
*bṛhaspate yuvamindraścha vasvo divyasyeśāthe uta pārthivasya /*
*dhattaṁ rayiṁ stuvate kīraye chidyūyaṁ pāta svastibhiḥ sadā naḥ //12 //*

अ. (Av.) २०.८९.१-११

अस्तेव सु प्रतरं लायमस्यन् भूषन्निव प्र भरा स्तोममस्मै ।
वाचा विप्रास्तरत वाचमर्यो नि रामय जरितः सोम इन्द्रय ॥१॥
दोहेन गामुप शिक्षा सखायं प्र बोधय जरितर्जारमिन्द्रम् ।
कोशं न पूर्ण वसुना न्यृष्टमा च्यावय मघदेयाय शूरम् ॥२॥
किमंग त्वा मघवन् भोजमाहुः शिशीहि मा शिशयं त्वा श्रृणोमि ।
अप्नस्वती मम धीरस्तु शक्र वसुविदं भगमिन्द्रा भरा नः ॥३॥
त्वां जना ममसत्येष्विन्द्रं संतस्थाना वि ह्वयन्ते समीके ।
अत्रा युजं कृणुते यो हविष्मान्नासुन्वता सख्यं वष्टि शूरः ॥४॥
धनं न स्पन्द्रं बहुलं यो अस्मै तीव्रान्त्सोमाँ आसुनोति प्रयस्वान् ।
तस्मै शत्रून्त्सुतुकान् प्रातरह्नो नि स्वष्ट्रान् युवति हन्ति वृत्रम् ॥५॥
यस्मिन् वयं दधिमा शंसमिन्द्रे यः शिश्राय मघवा काममस्मे ।
आराच्चित् सन् भयतामस्य शत्रुर्न्यस्मै द्युम्ना जन्या नमन्ताम् ॥६॥
आराच्छत्रुमप बाधस्व दुरमुग्रो यः शम्बः पुरुहूत् तेन ।
अस्मे धेहि यवमद् गोमदिन्द्र कृधी धियं जरित्रे वाजरत्नाम् ॥७॥
प्र यमन्तर्वृषसवासो अग्मन् तीव्राः सोमा बहुलान्तास इन्द्रम् ।
नाह दामानं मघवा नि यंसन् नि सुन्वते वहति भूरि वामम् ॥८॥
उत प्रहामतिदीवा जयति कृतमिव श्वघ्नी वि चिनोति काले ।
यो देवकामो न धनं रुणदधि समित् तं रायः सृजति स्वधाभिः ॥९॥
वयं राजसु प्रथमा धनान्यरिष्टासो वृजनीभिर्जयेम ॥१०॥
बृहस्पतिर्नः परि पातु पश्चादुतोत्तरस्मादधरादघायोः ।
इन्द्रः पुरस्तादुत मध्यतो नः सखा सखिभ्यो वरिवः कृणोतु ॥११॥

*asteva su prataraṁ lāyamasyan bhūṣanniva pra bharā stomamasmai /*
*vāchā viprāstarata vāchamaryo ni rāmaya jaritaḥ soma indraya //1 //*
*dohena gāmupa śikṣā sakhāyaṁ pra bodhaya jaritarjāramindram /*

*kośaṁ na pūrṇa vasunā nyṛṣṭamā chyāvaya maghadeyāya śūram //2 //*
*kimaṁga tvā maghavan bhojamāhuḥ śiśīhi mā śiśayaṁ tvā śṛṇomi /*
*apnasvatī mama dhīrastu śakra vasuvidaṁ bhagamindrā bharā naḥ //3 //*
*tvāṁ janā mamasatyeṣvindraṁ saṁtasthānā vi hnayante samīke /*
*atrā yujaṁ kṛṇute yo haviṣmānnāsunvatā sakhyaṁ vaṣṭi śūraḥ //4 //*
*dhanaṁ na spandraṁ bahulaṁ yo asmai tīvrāntsomām̐ āsunoti prayasvān /*
*tasmai śatrūntsutukān prātarahūno ni svaṣṭrān yuvati hanti vṛtram //5 //*
*yasmin vayaṁ dadhimā śaṁsamindre yaḥ śiśrāya maghavā kāmamasme /*
*ārāchchit san bhayatāmasya śatrurnyasmai dyumnā janyā namantām //6 //*
*ārāchchhatrumapa bādhasva duramugro yaḥ śambaḥ puruhūt tena /*
*asme dhehi yavamad gomadindra kṛdhī dhiyaṁ jaritre vājaratnām //7 //*
*pra yamantarvṛṣasavāso agman tīvrāḥ somā bahulāntāsa indram /*
*nāha dāmānaṁ maghavā ni yaṁsan ni sunvate vahati bhūri vāmam //8 //*
*uta prahāmatidīvā jayati kṛtamiva śvaghnī vi chinoti kāle /*
*yo devakāmo na dhanaṁ ruṇadadhi samit taṁ rāyaḥ sṛjati svadhābhiḥ //9 //*
*vayaṁ rājasu prathamā dhanānyariṣṭāso vṛjanībhirjayema //10 //*
*bṛhaspatirnaḥ pari pātu paśvādutottarasmādadharādaghāyoḥ /*
*indraḥ purastāduta madhyato naḥ sakhā sakhibhyo varivaḥ kṛṇotu //11 //*

अ. (Av.) २०.९४.१-११

आ यात्विन्द्रः स्वपतिर्मदाय यो धर्मणा तूतुजानस्तुविष्मान् ।
प्रत्वक्षाणो अति विश्वा सहांस्यपारेण महता वृष्ण्येन ॥१॥
सुष्ठामा रथः सुयमा हरी ते मिम्यक्ष वज्रो नृपते गभस्तौ ।
शीभं राजन्त्सुपथा याह्यर्वाङ् वर्धाम् ते पपुषो वृष्ण्यानि ॥२॥
एन्द्रवाहो नृपतिं वज्रबाहुमुग्रमुग्रासस्तविषास एनम् ।
प्रत्वक्षसं वृषभं सत्यशुष्ममेमस्मत्रा सधमादो वहन्तु ॥३॥
एवा पतिं दोणसाचंसचेतसमूर्ज स्कम्भं धरुण आ वृषायसे ।
ओजः कृष्व सं गृभाय त्वे अप्यसो यथा केनिपानामिनो वृधे ॥४॥
गमन्नस्मे वसून्या हि शंसिषं स्वाशिषं भरमा याहि सोमिनः ।
त्वमीशिषे सास्मिन्ना सत्सि बर्हिष्यनाधृष्या तव पात्राणि धर्मणा ॥५॥
पृथक् प्रायन् प्रथमा देवहूतयोऽकृण्वत् श्रवस्यानि दुष्टरा ।
न ये शेकुर्यियां नावमारुहमीर्मैव ते न्यविशन्त केपयः ॥६॥
एवैवापागपरे सन्तु दूढ्योश्वा येषां दुर्युज आयुयुज्रे ।
इत्था ये प्रागुपरे सन्ति दावने पुरुणि यत्र वयुनानि भोजना ॥७॥
गिरीँरज्रान् रेजमानाँ अधारयद् द्यौः क्रन्ददन्तरिक्षाणि कोपयत् ।
समीचीने धिषणे वि ष्कभायति वृष्णः पीत्वामद उक्थानि शंसति ॥८॥
इमं बिभर्मि सुकृतं ते अङ्कुशं येनारुजासि मघवंछफारुजः ।
अस्मिन्त्सु ते सवने अस्त्वोक्यंसुत इष्टौ मघवन् बोध्याभगः ॥९॥
गोभिष्टरेमामतिं दुरेवां यवेन क्षुधं पुरुहूत विश्वाम् ।
वयं राजभिः प्रथमा धनान्यस्माकेन वृजनेना जयेम ॥१०॥
बृहस्पतिर्नः परि पातु पश्चादुतोत्तरस्मादधरादघायोः ।
इन्द्रः पुरस्तादुत मध्यतो नः सखा सखिभ्यो वरिवः कृणोतु ॥११॥

*ā yātvindraḥ svapatirmadāya yo dharmaṇā tūtujānastuviṣmān /*
*pratvakṣāṇo ati viśvā sahāṁsyapāreṇa mahatā vṛṣṇyena //1 //*
*suṣṭhāmā rathaḥ suyamā harī te mimyakṣa vajro nṛpate gabhastau /*
*śībhaṁ rājantsupathā yāhyarvāṅ vardhām te papuṣo vṛṣṇyāni //2 //*
*endravāho nṛpatiṁ vajrabāhumugramugrāsastaviṣāsa enam /*
*pratvakṣasaṁ vṛṣabhaṁ satyaśuṣmamemasmatrā sadhamādo vahantu //3 //*
*evā patiṁ deāṇasāchaṁsachetasamūrja skambhaṁ dharuṇa ā vṛṣāyase /*

*Ojaḥ kṛṣva saṁ gṛbhāya tve apyaso yathā kenipānāmino vṛdhe //4 //*
*gamannasme vasūnyā hi śaṁsiṣaṁ svāśiṣaṁ bharamā yāhi sominaḥ /*
*tvamīśiṣe sāsminnā satsi barhiṣyanādhṛṣyā tava pātrāṇi dharmaṇā //5 //*
*pṛthak prāyan prathamā devahūtayo'kṛṇvat śravasyāni duṣṭarā /*
*na ye śekuryiāyāṁ nāvamāruhamīrmaiva te nyaviśanta kepayaḥ //6 //*
*evaivāpāgapare santu ḍhūḍyośvā yeṣāṁ duryuja āyuyujre /*
*itthā ye prāgupare santi dāvane puruṇi yatra vayunāni bhojanā //7 //*
*girīṁrajrān rejamānāṁ adhārayad dyauḥ krandadantarikṣāṇi kopayat /*
*samīchīne dhiṣaṇe vi ṣkabhāyati vṛṣṇaḥ pītvāmada ukthāni śaṁsati //8 //*
*imaṁ bibharmi sṛkṛtaṁ te aṅkuśaṁ yenārujāsi maghavaṁchhaphārujaḥ /*
*asmintsu te savane astvokyaṁsuta iṣṭau maghavan bodhyābhagaḥ //9 //*
*gobhiṣṭaremāmatiṁ durevāṁ yavena kṣudhaṁ puruhūta viśvām /*
*vayaṁ rājabhiḥ prathamā dhanānyasmākena vṛjanenā jayema //10 //*
*bṛhaspatirnaḥ pari pātu paśchādutottarasmādadharādaghāyoḥ /*
*indraḥ purastāduta madhyato naḥ sakhā sakhibhyo varivaḥ kṛṇotu //11 //*

## १९६. कृष्णो द्युम्नीको वा प्रियमेधो वा वासिष्ठः (Kṛṣṇo Dyumnīko Vā Priyamedho Vā Vāsiṣṭhaḥ)

१. अश्विनौ (Aśvinau) - ऋ. (Rv.) ८.८७.१-६

द्युम्नी वां स्तोमो अश्विना क्रिविर्न सेक आ गतम् ।
मध्वः सुतस्य स दिवि प्रियो नरा पातं गौराविवेरिणे ॥१॥
पिबतं घर्मं मधुमन्तमश्विना बर्हिः सीदतं नरा ।
ता मन्दसाना मनुषो दुरोण आ नि पातं वेदसा वयः ॥२॥
आ वां विश्वाभिरूतिभिः प्रियमेधा अहूषत ।
ता वर्तिर्यातमुप वृक्तबर्हिषो जुष्टं यां दिविष्टिषु ॥३॥
पिबतं सोमं मधुमन्तमश्विना बर्हिः सीदतं सुमत् ।
ता वावृधाना उप सुष्टुतिं दिवो गन्तं गौराविवेरिणम् ॥४॥
आ नूनं यातमश्विनाश्वेभिः प्रुषितप्सुभिः ।
दस्रा हिरण्यवर्तनी शुभस्पती पातं सोममृतावृधा ॥५॥
वयं हि वां हवामहे विपन्यवो विप्रासो वाजसातये ।
ता वल्गू दस्रा पुरुदंससा धियाश्विना श्रुष्ट्या गतम् ॥६॥

*dyumnī vāṁ stomo aśvinā krivirna seka ā gatam /*
*madhvaḥ sutasya sa divi priyo narā pātaṁ gaurāviveriṇe //1 //*
*pibataṁ gharma madhumantamaśvinā barhiḥ sīdataṁ narā /*
*tā mandasānā manuṣo duroṇa ā ni pātaṁ vedasā vayaḥ //2 //*
*ā vāṁ viśvābhirūtibhiḥ priyamedhā ahūṣata /*
*tā vartiryātamupa vṛktabarhiṣo juṣṭaṁ yāṁ diviṣṭiṣu //3 //*
*pibataṁ somaṁ madhumantamaśvinā barhiḥ sīdataṁ sumat /*
*tā vāvṛdhānā upa suṣṭutiṁ divo gantaṁ gaurāviveriṇam //4 //*
*ā nūnaṁ yātamaśvināśvebhiḥ pruṣitapsubhiḥ /*
*dasrā hiraṇyavartanī śubhaspatī pātaṁ somamṛtāvṛdhā //5 //*
*vayaṁ hi vāṁ havāmahe vipanyavo viprāso vājasātaye /*
*tā valgū dasrā purudaṁsasā dhiyāśvinā śruṣṭyā gatam //6 //*

## १९७. कृष्णो विश्वको वा कार्ष्णिः (Kṛṣṇo Viśvako Vā Kārṣṇiḥ)

१. अश्विनौ (Aśvinau) - ऋ. (Rv.) ८.८६.१-५

उभा हि दस्रा भिषजा मयोभुवोभा दक्षस्य वचसो बभूवथुः ।
ता वां विश्वको हवते तनूकृथे मा नो वि यौष्टं सख्या मुमोचतम् ॥१॥
कथा नूनं वा विमना उप स्तवद्युवं धियं ददथुर्वस्य इष्टये ।
ता वां विश्वको हवते तनूकृथे मा नो वि यौष्टं सख्या मुमोचतम् ॥२॥

युवं हि ष्मा पुरुभुजेममेधतुं विष्णाप्वे ददथुर्वस्य इष्टये ।
ता वां विश्वको हवते तनूकृथे मा नो वि यौष्टं सख्या मुमोचतम् ॥३॥
उत त्यं वीरं धनसामृजीषिणं दूरे चित्सन्तमवसे हवामहे ।
यस्य स्वादिष्ठा सुमतिः पितुर्यथा मा नो वि यौष्टं सख्या मुमोचतम् ॥४॥
ऋतेन देवः सविता शमायत ऋतस्य शृंगमुर्विया वि पप्रथे ।
ऋतं सासाह महि चित्पृतन्यतो मा नो वि यौष्टं सख्या मुमोचतम् ॥५॥

*ubhā hi dasrā bhiṣajā mayobhuvobhā dakṣasya vachaso babhūvathuḥ /*
*tā vāṁ viśvako havate tanūkṛthe mā no vi yauṣṭaṁ sakhyā mumochatam //1 //*
*kathā nūnaṁ vā vimanā upa stavadyuvaṁ dhiyaṁ dadathurvasya iṣṭaye /*
*tā vāṁ viśvako havate tanūkṛthe mā no vi yauṣṭaṁ sakhyā mumochatam //2 //*
*yuvaṁ hi ṣmā purubhujemamedhatuṁ viṣṇāpve dadathurvasya iṣṭaye /*
*tā vāṁ viśvako havate tanūkṛthe mā no vi yauṣṭaṁ sakhyā mumochatam //3 //*
*uta tyaṁ vīraṁ dhanasāmṛjīṣiṇaṁ dūre chitsantamavase havāmahe /*
*yasya svādiṣṭhā sumatiḥ pituryathā mā no vi yauṣṭaṁ sakhyā mumochatam //4 //*
*ṛtena devaḥ savitā śamāyata ṛtasya śṛṁgamurviyā vi paprathe /*
*ṛtaṁ sāsāha mahi chitpṛtanyato mā no vi yauṣṭaṁ sakhyā mumochatam //5 //*

## १९८. केतुर् आग्नेयः (Ketur Āgneyaḥ)

१. अग्निः (Agniḥ) - ऋ. (Rv.) १०.१५६.१-५; सा. (Sv.) १५२७-१५३१

ऋ. (Rv.) १०.१५६.१-५

अग्निं हिन्वन्तु नो धियः सप्तिमाशुमिवाजिषु। तेन जेष्म धनन्धनम् ॥१॥
यया गा आकरामहे सेनयाग्ने त्वोत्या। तां नो हिन्व मघत्तये ॥२॥
आग्ने स्थूरं रयिं भर पृथुं गोमन्तमश्विनम्। अङ्धि खं वर्तया पणिम् ॥३॥
अग्ने नक्षत्रमजरमा सूर्य रोहयो दिवि। दधज्ज्योतिर्जनेभ्यः ॥४॥
अग्ने केतुर्विशामसि प्रेष्ठः श्रेष्ठ उपस्थसत्। बोधा स्तोत्रे वयो दधत् ॥५॥

*agiṁna hinvantu no dhiyaḥ saptimāśumivājiṣu / tena jeṣma dhanandhanam //1 //*
*yayā gā ākarāmahe senayāgne tvotyā / tāṁ no hinva maghattaye //2 //*
*āgne sthūraṁ rayiṁ bhara pṛthuṁ gomantamaśvinam / aṅdhi khaṁ vartayā paṇim //3 //*
*agne nakṣatramajaramā sūrya rohayo divi / dadhajjyotirjanebhyaḥ //4 //*
*agne keturviśāmasi preṣṭhaḥ śreṣṭha upasthasat / bodhā stotre vayo dadhat //5 //*

सा. (Sv.) १५२७-१५३१

अग्निं हिन्वन्तु नो धियः सप्तिमाशुमिवाजिषु। तेन जेष्म धनंधनम् ॥१॥
यया गा आकारामहे सेनयाग्ने तवोत्या। तां नो हिन्व मघत्तये ॥२॥
आग्ने स्थुरंरयिं भर पृथुं गोमन्तमश्विनम्। अङ्धि खं वर्तया पविम् ॥३॥
अग्ने नक्षत्रमजरमा सूर्य रोहयो दिवि। दधज्जयोतिर्जनेभ्यः ॥४॥
अग्ने केतुर्विशामसि प्रेष्ठ श्रेष्ठ उपस्थसत्। बोधा स्तोत्रे वयो दधत्॥५॥

*agniṁ hinvantu no dhiyaḥ saptimāśumivājiṣu / tena jeṣma dhanaṁdhanam //1 //*
*yayā gā ākārāmahe senayāgne tavotyā / tāṁ no hinva maghattaye //2 //*
*āgne sthuraṁrayiṁ bhara pṛthuṁ gomantamaśvinam /*
*aṅdhi khaṁ vartayā pavim //3 //*
*agne nakṣatramajaramā sūrya rohayo divi / dadhajjayotirjanebhyaḥ //4 //*
*agne keturviśāmasi preṣṭha śreṣṭha upasthasat / bodhā stotre vayo dadhat //5 //*

## १९९. कौण्डिन्यः (Kauṇḍinyaḥ)

१. परमात्मा (Paramātmā) - य. (Yv.)२०.३२

यो भूतानामधिपतिर्यस्मिँल्लोकाऽअधि श्रिताः ।
यऽईशे महतो महाँस्तेन गृह्णामि त्वामहं मयि गृह्णामि त्वामहम्॥३२॥

*yo bhūtānāmadhipatiryasmim̐llokā'adhi śritāḥ /*
*ya'īśe mahato mahām̐stena gṛhṇāmi tvāmahaṁ mayi gṛhṇāmi tvāmaham //32 //*

## २००. कौरुपथिः (Kaurupathiḥ)

१. इन्द्रावरुणौ (Indrāvaruṇau) - अ. (Av.) ७.५८.१-२

इन्द्रावरुणा सुतपाविमं सुतं सोमं पिबतं मद्यं धृतव्रतौ ।
युवो रथो अध्वरो देववीतये प्रति स्वसरमुप यातु पीतये ॥१॥
इन्द्रावरुणा अधुमत्तमस्य वृष्णः सोमस्य वृषणा वृषेथाम् ।
इदं वामन्धः परिषिक्तमासद्यास्मिन् बर्हिर्षि मादयेथाम् ॥२॥
*indrāvaruṇā sutapāvimaṁ sutaṁ somaṁ pibataṁ madyaṁ dhṛtavratau /*
*yuvo ratho adhvaro devavītaye prati svasaramupa yātu pītaye //1 //*
*indrāvaruṇā adhumattamasya vṛṣṇaḥ somasya vṛṣaṇā vṛṣethām /*
*idaṁ vāmandhaḥ pariṣiktamāsadyāsmin bahirṣi mādayethām //2 //*

२. मन्युः अध्यातमम् (Manyuḥ Adhyātamam) - अ. (Av.) ११.८.१-३४

यन्मन्युर्जायामावहत् संकल्पस्य गृहादधि। क आसं जन्या के वराः क उ ज्येष्ठवरोऽभवत्॥१।
तपश्चैवास्तां कर्म चान्तर्महत्यर्णवे। त आसं जन्यास्ते वरा ब्रह्म ज्येष्ठवरोऽभवत् ॥२॥
दश साकमजायन्त देवा देवेभ्यः पुरा। यो वै तान् विद्याात् प्रत्यक्षं स वा अद्य महद् वदेत्॥३।
प्राणापानौ चक्षुः श्रोत्रमक्षितिश्च क्षितिश्च या। व्यानोदानौ वाङ् मनस्ते वा आकूतिमावहन्॥४॥
अजाता आसन्नृतवोऽथो धाता बृहस्पतिः। इन्द्राग्नी अश्विना तर्हि कं ते ज्येष्ठमुपासत ॥५॥
तपश्चैवास्तां कर्म चान्तर्महत्यर्णवे। तपो ह जाो कम्रणस्तत् ते ज्येष्ठमुपासत ॥६॥
येत आसीद् भूमिः पूर्वा यामदधातय इद् विदुः। यो वै ता विद्यान्नामथा न स मन्येत पुराणवित्।७।
कुत इन्द्रः कुतः सोमः कुतो अग्निरजायत। कुतस्त्वष्टा समभवत् कुतो धाताजायत ॥८॥
इन्द्रादिन्द्रः सोमात् सोमो अग्नेरग्निरजायत। त्वष्टा ह जो त्वष्टुर्धातुर्धाताजायत ॥९॥
ये त आसन् दश जाता देवा देवेभ्यः पुरा। पुत्रेभ्यो लोकं दत्त्वा कस्मिंमस्ते लोक आसते॥१०॥
यदा केशानस्थि स्नाव मांसं मज्जानमाभरत्। शरीरं कृत्वा पादवत् कं लोकमनु प्राविशत् ।११।
कुतः केशान् कुतः स्नाव कुतो अस्थीन्याभरत्। अङ्गा पर्वाणि मज्जानं को मासं कुत आभरत्।१२।
संसिचो नाम ते देवा ये संभारान्त्समभरन्। सर्व संसिच्य मर्त्य देवाः पुरुषमाविशन् ॥१३॥
ऊरू पादावष्ठीवन्तौ शिरो हस्तावथो मुखम्। पृष्टीर्बर्जह्येपार्श्वे कस्तत् समदधादृषिः ॥१४॥
शिरो हस्तावथो मुखं जिह्वां ग्रीवाश्च कीकसाः। त्वचा प्रावृत्य सर्व तत् संधा समदधान्मही।१५।
यत्तच्छरीरमशयत् संधया संहितं महत्। येनेदमद्य रोचते को अस्मिन् वर्णमाभरत् ॥१६॥
सर्वे देवा उपाशिक्षन् तदजानाद् वधूः सती। ईशा वशस्य या जाया सास्मिन् वर्णमाभरत् ।१७।
यदा त्वष्टा व्यतृणत् पिता त्वष्टुर्य उत्तरः। गृहं कृतवाा मर्त्य देवाः पुरुषमाविशन् ॥१८॥
स्वप्नो वै तन्द्रीर्निर्ऋतिः पाप्मानो नाम देवताः। जरा खालत्यं पालित्यं शरीरमनु प्राविशन् ।१९।
स्तेयं दुष्कृतं वृजिनं सत्यं याो यशो बृहत्। बलं च क्षत्रमोजश्च शरीरमनु प्राविशन् ॥२०॥
भूतिश्च वा अभूतिश्च रातयोऽरातयश्च याः। क्षुधश्च सर्वास्तृष्णाश्च शरीरमनु प्राविशन् ॥२१॥
निन्दाश्च वा अनिन्दाश्च यच्च हन्तेति नेति च। शरीरं श्रद्धा दक्षिणाश्रद्धा चानु प्राविशन्।२२।
विद्याश्च वा अविद्याश्च यच्चान्यदुपदेश्यम्। शरीरं ब्रह्म प्राविशदृचः सामाथो यजुः ॥२३॥
आनन्दा मोदाः प्रमुदोऽभीमोदमुदश्च ये। हसो नरिष्टा नृत्तानि शरीरमनु प्राविशन् ॥२४॥
आलापाश्च प्रलापाश्चाभीलापलपश्च ये। शरीरं सर्वे प्राविशन्नायुजः प्रयुजो युजः ॥२५॥
प्राणपानौ चक्षुः श्रोत्रमक्षितिश्च क्षितिश्च या। व्यानोदानौ वाङ्मनः शरीरेण त ईयन्ते ॥२६॥
आशिषश्च प्रशिषश्च संशिषो विशिषश्च याः। चित्तानि सर्वे संकल्पाः शरीरमनु प्राविशन् ।२७।
आस्नेयीश्च वास्तेयीश्च त्वरणाः कृपणाश्च याः। गुह्याः शुक्रा स्थूला अपस्ता बीभत्सावसादयन्॥२८॥
अस्थि कृत्वा समिधं तदष्टापो असादयन्। रेतः वृत्वाज्यं देवाः पुरुषमाविशन् ॥२९॥
या आपो याश्च देवता या विराड् ब्रह्मणा सह। शरीरं ब्रह्म प्राविशच्छरीरेऽधि प्रजापतिः॥३०॥
सूर्यश्चक्षुर्वातः प्राणं पुरुषस्य वि भेजिरे। अथास्येतरमात्मानं देवः प्रायच्छन्नग्नये ॥३१॥
तस्माद् वै विद्वान् पुरुषमिदं ब्रह्मेति मन्यते। सर्वा ह्यस्मिन् देवता गावो गोष्ठइवासते ॥३२॥
प्रथमेन प्रामारेण त्रेधा विष्वङ् वि गच्छति। अद एकेन गच्छत्यद एकेन गच्छतीहैकेन नि षेवते॥३३॥

अप्सु स्तीमासु वृद्धासु शरीरमन्तरा हितम्। तस्मिंछवोऽध्यन्तरा तस्माच्छवोऽध्युच्यते ॥३४॥
*yanmanyurjāyāmāvahat saṁkalpasya gṛhādadhi |*
*ka āsaṁ janyā ke varāḥ ka u jyeṣṭhavaro'bhavat ||1 |*
*tapaśchaivāstāṁ karma chāntarmahatyarṇave |*
*ta āsaṁ janyāste varā brahma jyeṣṭhavaro'bhavat ||2 ||*
*daśa sākamajāyanta devā devebhyaḥ purā |*
*yo vai tān vidyāāt pratyakṣaṁ sa vā adya mahad vadet ||3 |*
*prāṇāpānau chakṣuḥ śrotramakṣitiścha kṣitiścha yā |*
*vyānodānau vāṅ manaste vā ākūtimāvahan ||4 ||*
*ajātā āsannṛtavo'tho dhātā bṛhaspatiḥ |*
*indrāgnī aśvinā tarhi kaṁ te jyeṣṭhamupāsata ||5 ||*
*tapaśchaivāstāṁ karma chāntarmahatyarṇave |*
*tapo ha jāo kamraṇastat te jyeṣṭhamupāsata ||6 ||*
*yeta āsīd bhūmiḥ pūrvā yāmadadhātaya id viduḥ |*
*yo vai tā vidyānnāmathā na sa manyeta purāṇavit |7 |*
*kuta indraḥ kutaḥ somaḥ kuto agnirajāyata |*
*kutastvaṣṭā samabhavat kuto dhātājāyata ||8 ||*
*indrādindraḥ somāt somo agneragnirajāyata |*
*tvaṣṭā ha jo tvaṣṭurdhāturdhātājāyata ||9 ||*
*ye ta āsan daśa jātā devā devebhyaḥ purā |*
*putrebhyo lokaṁ dattvā kasiṁmaste loka āsate ||10 ||*
*yadā keśānasthi snāva māṁsaṁ majjānamābharat |*
*śarīraṁ kṛtvā pādavat kaṁ lokamanu prāviśat |11 |*
*kutaḥ keśān kutaḥ snāva kuto asthīnyābharat |*
*aṅgā parvāṇi majjānaṁ ko māsaṁ kuta ābharat |12 |*
*saṁsicho nāma te devā ye saṁbhārāntsamabharan |*
*sarva saṁsichya martya devāḥ puruṣamāviśan ||13 ||*
*ūrū pādāvaṣṭhīvantau śiro hastāvatho mukham |*
*pṛṣṭīrbarjahyepārśve kastat samadadhādṛṣiḥ ||14 ||*
*śiro hastāvatho mukhaṁ jihnāṁ grīvāścha kīkasāḥ |*
*tvachā prāvṛtya sarva tat saṁdhā samadadhānmahī |15 |*
*yattachchharīramaśayat saṁdhayā saṁhitaṁ mahat |*
*yenedamadya rochate ko asmin varṇamābharat ||16 ||*
*sarve devā upāśikṣan tadajānād vadhūḥ satī |*
*īśā vaśasya yā jāyā sāsmin varṇamābharat |17 |*
*yadā tvaṣṭā vyatṛṇat pitā tvaṣṭurya uttaraḥ |*
*gṛhaṁ kṛtavāā martya devāḥ puruṣamāviśan ||18 ||*
*svapno vai tandrīrniṛrtiḥ pāpmāno nāma devatāḥ |*
*jarā khālatyaṁ pālityaṁ śarīramanu prāviśan |19 |*
*steyaṁ duṣkṛtaṁ vṛjinaṁ satyaṁ yāo yaśo bṛhat |*
*balaṁ cha kṣatramojaścha śarīramanu prāviśan ||20 ||*
*bhūtiścha vā abhūtiścha rātayo'rātayaścha yāḥ |*
*kṣudhaścha sarvāstṛṣṇāścha śarīramanu prāviśan ||21 ||*
*nindāścha vā anindāścha yachcha hanteti neti cha |*
*śarīraṁ śraddhā dakṣiṇāśraddhā chānu prāviśan |22 |*
*vidyāścha vā avidyāścha yachchānyadupadeśyam |*
*śarīraṁ brahma prāviśadṛchaḥ sāmātho yajuḥ ||23 ||*
*ānandā modāḥ pramudo'bhīmodamudaścha ye |*
*haso nariṣṭā nṛttāni śarīramanu prāviśan ||24 ||*
*ālāpāścha pralāpāśchābhīlāpalapaścha ye |*

*śarīraṁ sarve prāviśannāyujaḥ prayujo yujaḥ ॥25॥*
*prāṇapānau chakṣuḥ śrotramakṣitiścha kṣitiścha yā ।*
*vyānodānau vāṅmanaḥ śarīreṇa ta īyante ॥26॥*
*āśiṣaścha praśiṣaścha saṁśiṣo viśiṣaścha yāḥ ।*
*chittāni sarve saṁkalpāḥ śarīramanu prāviśan ।27।*
*āsneyīścha vāsteyīścha tvaraṇāḥ kṛpaṇāścha yāḥ ।*
*guhyāḥ śukrā sthūlā apastā bībhatsāvasādayan ॥28॥*
*asthi kṛtvā samidhaṁ tadaṣṭāpo asādayan ।*
*retaḥ vṛtvājyaṁ devāḥ puruṣamāviśan ॥29॥*
*yā āpo yāścha devatā yā virāḍ brahmaṇā saha ।*
*śarīraṁ brahma prāviśachchharīre'dhi prajāpatiḥ ॥30॥*
*sūryaśchakṣurvātaḥ prāṇaṁ puruṣasya vi bhejire ।*
*athāsyetaramātmānaṁ devaḥ prāyachchhannagnaye ॥31॥*
*tasmād vai vidvān puruṣamidaṁ brahmeti manyate ।*
*sarvā hyasmin devatā gāvo goṣṭhaivāsate ॥32॥*
*prathamena prāmāreṇa tredhā viṣvaṅ vi gachchhati ।*
*ada ekena gachchhatyada ekena gachchhatīhaikena ni ṣevate ॥33॥*
*apsu stīmāsu vṛddhāsu śarīramantarā hitam ।*
*tasminṁchhavo'dhyantarā tasmāchchhavo'dhyuchyate ॥34॥*

## २०१. कौशिकः (Kauśikaḥ)

१. मन्त्रोक्ता (Mantroktā) - अ. (Av.) १०.५.२५-३६

पृथिवीमनु वि क्रमेऽहं पृथिव्यास्तं निर्भजामो यो३स्मान् द्वेष्टि यं वयं द्विष्मः ।
स मा जीवीत् तं प्राणो जहातु ॥२५॥
विष्णोः क्रमोऽसि सपत्नहान्तरिक्षसंशितो वायुतेजाः ।
अन्तरिक्षमनु वि क्रमेऽहमन्तरिक्षात् तं निर्भजामो यो३स्मान् द्वेष्टि यं वयं द्विष्मः ।
स मा जीवीत् तं प्राणो जहातु ॥२६॥
विष्णोः क्रमोऽसि सपत्नहा द्यौसंशितः सूर्यतेजाः ।
दिवमनु वि क्रमेऽहं दिवस्तं निर्भजामो यो३स्मान् द्वेष्टि यं वयं द्विष्मः ।
स मा जीवीत् तं प्राणो जहातु ॥२७॥
विष्णोः क्रमोऽसि सपत्नहा दिक्संशितो मनस्तेजाः ।
दिशोऽनु वि क्रमेऽहं दिग्भ्यस्तं निर्भजामो यो३स्मान् द्वेष्टि यं वयं द्विष्मः ।
स मा जीवीत् तं प्राणो जहातु ॥२८॥
विष्णोः क्रमोऽसि सपत्नहाशासंशितो वाततेजाः ।
आशा अनु वि क्रमेऽहमाशाभ्यस्तं निर्भजामो यो३स्मान् द्वेष्टि यं वयं द्विष्मः ।
स मा जीवीत् तं प्राणो जहातु ॥२९॥
विष्णोः क्रमोऽसि सपत्नह ऋक्संशितः सामतेजाः ।
ऋचोऽनु वि क्रमेऽहमृग्भ्यस्तं निर्भजामो यो३स्मान् द्वेष्टि यं वयं द्विष्मः ।
सा मा जीवीत् तं प्राणो जहातु ॥३०॥
विष्णोः क्रमोऽसि सपत्नहा यासंशितो ब्रह्मतेजाः ।
यामनु वि क्रमेऽहं यातं निर्भजामो यो३स्मान् द्वेष्टि यं वयं द्विष्मः ।
स मा जीवीत् तं प्राणो जहातु ॥३१॥
विष्णोः क्रमोऽसि सपत्नहौषधीसंशितः सोमतेजाः ।
ओषधीरन् वि क्रमेऽहमोषधीभ्यस्तं निर्भजामो यो३स्मान् द्वेष्टि यं वयं द्विष्मः ।
स मा जीवीत् तं प्राणो जहातु ॥३२॥
विष्णोः क्रमोऽसि सपत्नहाप्सुसंशितो वरुणतेजाः ।
आपोऽनु वि क्रमेऽहमद्भ्यस्तं निर्भजामो यो३स्मान् द्वेष्टि यं वयं द्विष्मः ।
स मा जीवीत् तं प्राणे जहातु ॥३३॥

विष्णोः क्रमोऽसि सपत्नहा कृषिसंशितोऽन्नतेजाः ।
कृषिमनु वि क्रमेऽहं कृष्यास्तं निर्भजामो यो३स्मान् द्वेष्टि यं वयं द्विष्मः ।
स मा जीवीत् तं प्राणो जहातु ॥३४॥
विष्णोः क्रमोऽसि सपत्नहा प्राणसंशितः पुरुषतेजाः ।
प्राणमनु वि क्रमेऽहं प्राणात् तं निर्भजामो यो३स्मान् द्वेष्टि यं वयं द्विष्मः ।
स मा जीवीत् तं प्राणो जहातु ॥३५॥
जितमस्कमुद्भिन्नस्माकमभ्यष्ठां विश्वाः पृतना अरातीः ।
इदमहमामुष्यायणस्यामुष्याः पुत्रस्य वर्चस्तेजः प्राणमायुर्नि वेष्टयामीदमेनमधरांचं पादयामि ।३६॥

*pṛthivīmanu vi krame'haṁ pṛthivyāstaṁ nirbhajāmo yo3smān dveṣṭi yaṁ vayaṁ dviṣmaḥ ।*
*sa mā jīvīt taṁ prāṇo jahātu ॥25॥*
*viṣṇoḥ kramo'si sapatnahāntarikṣasaṁśito vāyutejāḥ ।*
*antarikṣamanu vi krame'hamantarikṣāt taṁ nirbhajāmo yo3smān dveṣṭi yaṁ vayaṁ dviṣmaḥ ।*
*sa mā jīvīt taṁ prāṇo jahātu ॥26॥*
*viṣṇeḥ kramo'si sapatnahā dyausaṁśitaḥ sūryatejāḥ ।*
*divamanu vi krame'haṁ divastaṁ nirbhajāmo yo3smān dveṣṭi yaṁ vayaṁ dviṣmaḥ ।*
*sa mā jīvīt taṁ prāṇo jahātu ॥27॥*
*viṣṇoḥ kramo'si sapatnahā diksaṁśito manastejāḥ ।*
*diśo'nu vi krame'haṁ digbhyastaṁ nirbhajāmo yo3smān dveṣṭi yaṁ vayaṁ dviṣmaḥ ।*
*sa mā jīvīt taṁ prāṇo jahātu ॥28॥*
*viṣṇoḥ kramo'si sapatnahāśāsaṁśito vātatejāḥ ।*
*āśā anu vi krame'hamāśābhyastaṁ nirbhajāmo yo3smān dveṣṭi yaṁ vayaṁ dviṣmaḥ ।*
*sa mā jīvīt taṁ prāṇo jahātu ॥29॥*
*viṣṇeḥ kramo'si sapatnaha ṛksaṁśitaḥ sāmatejāḥ ।*
*ṛcho'nu vi krame'hamṛgbhyastaṁ nirbhajāmo yo3smān dveṣṭi yaṁ vayaṁ dviṣmaḥ ।*
*sā mā jīvīt taṁ prāṇo jahātu ॥30॥*
*viṣṇoḥ kramo'si sapatnahā yāsaṁśito brahmatejāḥ ।*
*yāmanu vi krame'haṁ yāātaṁ nirbhajāmo yo3smān dveṣṭi yaṁ vayaṁ dviṣmaḥ ।*
*sa mā jīvīt taṁ prāṇo jahātu ॥31॥*
*viṣṇoḥ kramo'si sapatnahauṣadhīsaṁśitaḥ somatejāḥ ।*
*Oṣadhīran vi krame'hamoṣadhībhyastaṁ nirbhajāmo yo3smān dveṣṭi yaṁ vayaṁ dviṣmaḥ ।*
*sa mā jīvīt taṁ prāṇo jahātu ॥32॥*
*viṣṇeḥ kramo'si sapatnahāpsusaṁśito varuṇatejāḥ ।*
*āpo'nu vi krame'hamadbhayastaṁ nirbhajāmo yo3smān dveṣṭi yaṁ vayaṁ dviṣmaḥ ।*
*sa mā jīvīt taṁ prāṇe jahātu ॥33॥*
*viṣṇoḥ kramo'si sapatnahā kṛṣisaṁśito'nnatejāḥ ।*
*kṛṣimanu vi krame'haṁ kṛṣyāstaṁ nirbhajāmo yo3smān dveṣṭi yaṁ vayaṁ dviṣmaḥ ।*
*sa mā jīvīt taṁ prāṇo jahātu ॥34॥*
*viṣṇoḥ kramo'si sapatnahā prāṇasaṁśitaḥ puruṣatejāḥ ।*
*prāṇamanu vi krame'haṁ prāṇāt taṁ nirbhajāmo yo3smān dveṣṭi yaṁ vayaṁ dviṣmaḥ ।*
*sa mā jīvīt taṁ prāṇo jahātu ॥35॥*
*jitamaskamudbhinnasmākamabhyaṣṭhāṁ viśvāḥ pṛtanā arātīḥ ।*
*idamahamāmuṣyāyaṇasyāmuṣyāḥ putrasya varchastejaḥ prāṇamāyurni veṣṭayāmīdamenamadharāṁchaṁ pādayāmi ।36॥*

२. वैश्वानरः (Vaiśvānaraḥ) - अ. (Av.) ६.३५.१-३

वैश्वनरो न ऊतय आ प्र यातु परावतः। अग्निर्नः सुष्टुतीरुप ॥१॥
वैश्वनरो न आगमदिमं यां सजूरुप। अग्निरुक्थेष्वंहसु ॥२॥
वैश्वानरोऽङ्गिरसां स्तोममुक्थं च चाक्लृपत्। ऐषु द्यु स्यर्यमत् ॥३॥
*vaiśvanaro na ūtaya ā pra yātu parāvataḥ / agnirnaḥ suṣṭutīrupa //1 //*
*vaiśvanaro na āgamadimaṁ yāṁ sajūrūpa / agniruktheṣvaṁhasu //2 //*
*vaiśvānaro'ṅgirasāṁ stomamukthaṁ cha chāklṛpat / aiṣu dyu syaryamat //3 //*

## २०२. कौशिकः (अनृणकामः) (Kauśikaḥ [Anṛṇakāmaḥ]

१. अग्निः (Agniḥ) - अ. (Av.) ६.११७.१-३; ६.११८.१-३

अ. (Av.) ६.११७.१-३

अपमित्यमप्रतीत्तं यदस्मि यमस्य येन बलिना चरामि ।
इदं तदग्ने अनृणो भवामि त्वं पाशान् विचृतं वेत्थ सर्वान् ॥१॥
इहैव सन्तः प्रति दद्म एनज्जीवा जीवेभ्यो नि हराम एनत् ।
अपमित्य धान्यं१ यज्जघसाहमिदं तदग्ने अनृणो भवामि ॥२॥
अनृणा अस्मिन्ननृणाः परस्मिन् तृतीये लोके अनृणाः स्याम ।
ये देवयानाः पितृयाणाश्च लोकाः सर्वान् पथो अनृणा आ क्षियेम ॥३॥
*apamityamapratīttaṁ yadasmi yamasya yena balinā charāmi /*
*idaṁ tadagne anṛṇo bhavāmi tvaṁ pāśān vichṛtaṁ vettha sarvān //1 //*
*ihaiva santaḥ prati dadma enajjīvā jīvebhyo ni harāma enat /*
*apamitya dhānyaṁ1 yajjaghasāhamidaṁ tadagne anṛṇo bhavāmi //2 //*
*anṛṇā asminnanṛṇāḥ parasmin tṛtīye loke anṛṇāḥ syāma /*
*ye devayānāḥ pitṛyāṇāścha lokāḥ sarvān patho anṛṇā ā kṣiyema //3 //*

ऋ. (Rv.) ६.११८.१-३

यद्धस्ताभ्यां चकृम किल्बिषाण्यक्षाणां गत्नुमुपलिप्समानाः ।
उग्रंपश्ये उग्रजितौ तदद्याप्सरसावनु दत्तामृणं नः ॥१॥
उग्रंपश्ये राष्ट्रभृत् किल्बिषाणि यदक्षवृत्तमनु दत्तं न एतत् ।
ऋणान्नो नर्णमेर्त्समानो यमस्य लोके अधिरज्जुरायत् ॥२॥
यस्मा ऋणं यस्य जायामुपैमि यं याचमानो अभ्यैमि देवाः ।
ते वाचं वादिषु मोत्तरां मद्देवपत्नी अप्सरसावधीतम् ॥३॥
*yaddhastābhyāṁ chakṛma kilbiṣāṇyakṣāṇāṁ gatnumupalipsamānāḥ /*
*ugraṁpaśye ugrajitau tadadyāpsarasāvanu dattāmṛṇaṁ naḥ //1 //*
*ugraṁpaśye rāṣṭrabhṛt kilbiṣāṇi yadakṣavṛttamanu dattaṁ na etat /*
*ṛṇānno narṇamertsamāno yamasya loke adhirajjurāyat //2 //*
*yasmā ṛṇaṁ yasya jāyāmupaimi yaṁ yāchamāno abhyaimi devāḥ /*
*te vāchaṁ vādiṣu rmottarāṁ maddevapatnī apsarasāvadhītam //3 //*

२. अग्न्यादयो मन्त्रोक्ताः (Agnyādayo Mantroktāḥ) - अ. (Av.) ६.१२१.१-३

विषाणा पाशान् विष्याध्यस्मद् य उत्तमा अधमा वारुणा ये ।
दुष्वप्न्यं दुरितं नि ष्वास्मदथ गच्छेम सुकृतस्य लोकम् ॥१॥
यद् दारुणि बध्यसे यच्च रज्ज्वां यद् भूम्यां बध्यसे यच्च वाचा ।
अयं तस्माद् गार्हपत्यो नो अग्निरुदिन्नयाति सुकृतस्य लोकम् ॥२॥
उदगातां भगवती विचृतौ नाम तारके। प्रेहामृतस्य यच्छतां प्रैतु बद्धकमोचनम् ॥३॥
*viṣāṇā pāśān viṣyādhyasmad ya uttamā adhamā vāruṇā ye /*
*duṣvapnyaṁ duritaṁ ni ṣvāsmadatha gachchhema sukṛtasya lokam //1 //*
*yad dāruṇi badhyase yachcha rajjvāṁ yad bhūmyāṁ badhyase yachcha vāchā /*
*ayaṁ tasmād gārhapatyo no agnirudinnayāti sukṛtasya lokam //2 //*
*udagātāṁ bhagavatī vichṛtau nāma tārake / prehāmṛtasya yachchhatāṁ praitu*

*baddhakamochanam //3 //*

३. अन्तरिक्षादयो मन्त्रोक्ताः (Antarikṣādayo Mantroktāḥ) - अ. (Av.) ६.१२०.१-३

यदन्तरिक्षं पृथिवीमुत द्यां यन्मातरं पितरं वा जिहिंसिम ।
अयं तस्माद् गार्हपत्यो नो अग्निरुदिन्नयाति सुकृतस्य लोकम् ॥१॥
भूमिर्मातादितिर्नो जनित्रं भ्रातान्तरिक्षमभिशस्त्या नः ।
द्यौर्नः पिता पित्र्याच्छं भवाति जामिमृत्वा माव पत्सि लोकात् ॥२॥
यत्रा सुहार्दः सुकृतो मदन्ति विहाय रोगं तन्वः१ स्वायाः ।
अश्लोणा अङ्गैरह्रुताः स्वर्गे तत्र पश्येम पितरौ च पुत्रान् ॥३॥

*yadantarikṣaṁ pṛthivīmuta dyāṁ yanmātaraṁ pitaraṁ vā jihiṁsima /*
*ayaṁ tasmād gārhapatyo no agnirudinnayāti sukṛtasya lokam //1 //*
*bhūmirmātāditirno janitraṁ bhrātāntarikṣamamiśastyā naḥ /*
*dyaurnaḥ pitā pitrayāchchhaṁ bhavāti jāmimṛtvā māva patsi lokāt //2 //*
*yatrā suhārdaḥ sukṛto madanti vihāya rogaṁ tanvaḥ1 svāyāḥ /*
*aśloṇā aṅgairahrutāḥ svarge tatra paśyema pitarau cha putrān //3 //*

४. वैश्वानरोऽग्निः (Vaiśvānaro'gniḥ) - अ. (Av.) ६.११९.१-३

यददीव्यन्नृणमहं कृणोम्यदास्यन्नग्न उत संगृणामि ।
वैश्वनरो नो अधिपा वसिष्ठ उदिन्न्याति सुकृतस्य लोकम् ॥१॥
वैश्वानराय प्रति वेदयामि यद्यृणं संगरो देवतासु ।
स एतान् पाशान् वि चृतं वेद सर्वानथ पक्केन सह सं भवेम ॥२॥
वैश्वानरः पविता मा पुनातु यत् संगरमभिधावाम्याशाम् ।
अनाजानन् मनसा याचमानो यत् तत्रैनो अप तत् सुवामि ॥३॥

*yadadīvyannṛṇamahaṁ kṛṇomyadāsyannagna uta saṁgṛṇāmi /*
*vaiśvanaro no adhipā vasiṣṭha udinnyāti sukṛtasya lokam //1 //*
*vaiśvānarāya prati vedayāmi yadyṛṇaṁ saṁgaro devatāsu /*
*sa etān pāśān vi chṛtaṁ veda sarvānatha pakvena saha saṁ bhavema //2 //*
*vaiśvānaraḥ pavitā mā punātu yat saṁgaramabhidhāvāmyāśām /*
*anājānan manasā yāchamāno yat tatraino apa tat suvāmi //3 //*

## २०३. गय आत्रेयः (Gaya Ātreyaḥ)

१. अग्निः (Agniḥ) - ऋ. (Rv.) ५.९.१-७; ५.१०.१-७; सा. (Sv.) ८१

ऋ. (Rv.) ५.९.१-७

त्वामग्ने हविष्मन्तो देवं मर्तास ईळते ।
मन्ये त्वा जातवेदसं स हव्या वक्ष्यानुषक् ॥१॥
अग्निर्होता दास्वतः क्षयस्य वृक्तबर्हिषः ।
सं याासश्चरन्ति यं सं वाजासः श्रवस्यवः ॥२॥
उत स्म यं शिशुं यथा नवं जनिष्टारणी ।
धर्तारं मानुषीणां विशामग्निं स्वध्वरम् ॥३॥
उत स्म दुर्गृभीयसे पुत्रो न ह्वार्याणाम् ।
पुरू यो दग्धासि वनाग्ने पशुर्न यवसे ॥४॥
अध स्म यस्यार्चयः सम्यक्संयन्ति धूमिनः ।
यदीमह त्रितो दिव्युप ध्मातेव धमति शिशीते ध्मातरी यथा ॥५॥
त्वाहमग्न ऊतिभिर्मित्रस्य च प्रशस्तिभिः ।
द्वेषोयुतो न दुरिता तुर्याम मर्त्यानाम् ॥६॥
तं नो अग्ने अभी नरो रयिं सहस्व आ भर ।
स क्षेपयत्स पोषयद्भुवद्वाजस्य सातय उतैधि पृत्सु नो वृधे ॥७॥

*tvāmagne haviṣmanto devaṁ martāsa īḷate /*
*manye tvā jātavedasaṁ sa havyā vakṣayānuṣak //1 //*

*agnirhotā dāsvataḥ kṣayasya vṛktabarhiṣaḥ ।*
*saṁ yāāsaścharanti yaṁ saṁ vājāsaḥ śravasyavaḥ ॥2 ॥*
*uta sma yaṁ śiśuṁ yathā navaṁ janiṣṭāraṇī ।*
*dhartāraṁ mānuṣīṇāṁ viśāmagniṁ svadhvaram ॥3 ॥*
*uta sma durgṛbhīyase putro na hnāryāṇām ।*
*purū yo dagdhāsi vanāgne paśurna yavase ॥4 ॥*
*atha sma yasyārchayaḥ samyaksaṁyanti dhūminaḥ ।*
*yadīmaha trito divyupa dhmāteva dhamati śiśīte dhmātarī yathā ॥5 ॥*
*tvāhamagna ūtibhirmitrasya cha praśastibhiḥ ।*
*dveṣoyuto na duritā turyāma martyānām ॥6 ॥*
*taṁ no agne abhī naro rayiṁ sahasva ā bhara ।*
*sa kṣepayatsa poṣayadbhuvadvājasya sātaya utaidhi pṛtsu no vṛdhe ॥7 ॥*

ऋ. (Rv.) ५.१०.१-७

अग्न ओजिष्ठमा भर द्युम्नमस्मभ्यमध्रिगो। प्र नो राया परीणसा रत्सि वाजाय पन्थाम् ॥१ ॥
त्वं नो अग्ने अद्भुत क्रत्वा दक्षस्य मंहना। त्वे असुर्य१ मारुहत्क्राणा मित्रो न यियः ॥२ ॥
त्वं नो अग्न एषां गयं पुष्टिं च वर्धय। यं स्तोमेभिः प्र सूरयो नरो मघान्यानशुः ॥३ ॥
ये अग्ने चन्द्र ते गिरः शुम्भन्त्यश्वराधसः ।
शुष्मेभिः शुष्मिणो नरो दिवश्चिद्येषां बृहत्सुकीर्तिर्बोधति त्मना ॥४ ॥
त्व त्ये अग्ने अर्चयो भ्राजन्तो यन्ति धृष्णुया। परिज्मानो न विद्युतः स्वानो रथो न वाजयुः ॥५।
नू नो अग्न ऊतये सबाधसश्च रातये। अस्माकासश्च सूरयो विश्वा आशास्तरीषणि ॥६ ॥
त्वं नो अग्ने अंगिरः स्तुतः स्तवान आ भर ।
होतर्विभ्वासहं रयिं स्तोतृभ्यः स्तवसे च न उतैधि पृत्सु नो वृधे ॥७ ॥

*agna Ojiṣṭhamā bhara dyumnamasmabhyamadhrigo ।*
*pra no rāyā parīṇasā ratsi vājāya panthām ॥1 ॥*
*tvaṁ no agne adbhuta kratvā dakṣasya maṁhanā ।*
*tve asurya1 māruhatkrāṇā mitro na yiāyaḥ ॥2 ॥*
*tvaṁ no agna eṣāṁ gayaṁ puṣṭiṁ cha vardhaya ।*
*yaṁ stomebhiḥ pra sūrayo naro maghānyānaśuḥ ॥3 ॥*
*ye agne chandra te giraḥ śumbhantyaśvarādhasaḥ ।*
*śuṣmebhiḥ śuṣmiṇo naro divaśchidyeṣāṁ bṛhatsukīrtirbodhati tmanā ॥4 ॥*
*tva tye agne archayo bhrājanto yanti dhṛṣṇuyā ।*
*parijmāno na vidyutaḥ svāno ratho na vājayuḥ ॥5 ।*
*nū no agna ūtaye sabādhasaścha rātaye ।*
*asmākāsaścha sūrayo viśvā āśāstarīṣaṇi ॥6 ॥*
*tvaṁ no agne aṁgiraḥ stutaḥ stavāna ā bhara ।*
*hotarvibhvāsahaṁ rayiṁ stotṛbhyaḥ stavase cha na utaidhi pṛtsu no vṛdhe ॥7 ॥*

सा. (Sv.) ८१

अग्न ओजिष्ठमा भर द्युम्नमस्मभ्यमध्रिगो। प्र नो राये पनीयसे रत्सि वाजाय पन्थाम् ॥१ ॥

*agna Ojiṣṭhamā bhara dyumnamasmabhyamadhrigo । pra no rāye panīyase ratsi vājāya panthām ॥1 ॥*

## २०४. गयः प्लातः (Gayaḥ Plātaḥ)

१. पथ्या स्वस्तिः (Pathyā Svastiḥ) - ऋ. (Rv.) १०.६३.१५-१६

स्वस्ति नः पथ्यासु धन्वसु स्वस्त्य१प्सु वृजने स्वर्वति ।
स्वस्ति नः पुत्रकृथेषु योनिषु स्वस्ति राये मरुतो दधातन ॥१५ ॥
स्वस्तिरिद्धि प्रपथे श्रेष्ठा रेक्णस्वत्यभि या वाममेति ।
सा नो अमा सो अरणे नि पातु स्वावेशा भवतु देवगोपा ॥१६ ॥

*svasti naḥ pathyāsu dhanvasu svastya1psu vṛjane svarvati* ।
*svasti naḥ putrakṛtheṣu yoniṣu svasti rāye maruto dadhātana* ॥15॥
*svastiriddhi prapathe śreṣṭhā rekṇasvatyabhi yā vāmameti* ।
*sā no amā so araṇe ni pātu svāveśā bhavatu devagopā* ॥16॥

२. विश्वेदेवाः (Viśvedevāḥ) - ऋ. (Rv.) १०.६३.१-१४; १७; १०.६४.१-१७

ऋ. (Rv.) १०.६३.१-१४

परावतो ये दिधिषन्त आप्यं मनुप्रीतासो जनिमा विवस्वतः ।
ययातेर्ये नहुष्यस्य बर्हिषि देवा आसते ते अधि ब्रुवन्तु नः ॥१॥
विश्वा हि वो नमस्यानि वन्द्या नामानि देवा उत यियानि वः ।
ये स्थ जाता अदितेरद्भ्यस्परि ये पृथिव्यास्ते म इह श्रुता हवम् ॥२॥
येभ्यो माता मधुमत्पिन्वते पयः पीयूषं द्यौरदितिरद्रिबर्हाः ।
उक्थशुष्मान वृषभरान्त्स्वप्नसस्ताँ आदित्याँ अनु मदा स्वस्तये ॥३॥
नृचक्षसो अनिमिषन्तो अर्हणा बृहद्देवासो अमृतत्वमानशुः ।
ज्योतीरथा अहिमाया अनागसो दिवो वर्ष्माणं वसते स्वस्तये ॥४॥
सम्राजो ये सुवृधो यामाययुरपरिह्वृता दधिरे दिवि क्षयम् ।
ताँ आ विवास नमसा सुवृक्तिभिर्महो आदित्याँ अदितिं स्वस्तये ॥५॥
को वः स्तोमं राधति यं जुजोषथ विश्वे देवासो मनुषो यति ष्ठन ।
को वोऽध्वरं तुविजाता अरं करद्यो नः पर्षदत्यंहः स्वस्तये ॥६॥
येभ्यो होत्रां प्रथमामायेजे मनुः समिद्धाग्निर्मनसा सप्त होतृभिः ।
त आदित्या अभ्यं शर्म यच्छत सुगा नः कर्त सुपथा स्वस्तये ॥७॥
य ईशिरे भुवनस्य प्रचेतसो विश्वस्य स्थातुर्जगतश्च मन्तवः ।
ते नः कृतादकृतादेनसस्पर्यद्या देवासः पिपृता स्वस्तये ॥८॥
भेरिष्वन्द्रं सुहवं हवामहेंऽहोमुचं सुकृतं दैव्यं जनम् ।
अग्निं मित्रं वरुणं सातये भगं द्यावापृथिवी मरुतः स्वस्तये ॥९॥
सुत्रामाणं पृथिवीं द्यामनेहसं सुशर्माणमदितिं सुप्रणीतिम् ।
दैवीं नावं स्वरित्रामनागसमस्रवन्तीमा रुहेमा स्वस्तये ॥१०॥
विश्वे यजत्रा अधि वोचतोतये त्रायध्वं नो दुरेवाया अभिह्रुतः ।
सत्यया वो देवहूत्या हुवेम शृण्वतो देवा अवसे स्वस्तये ॥११॥
अपामीवामप विश्वामनाहुतिमपारातिं दुर्विदत्रमघायतः ।
आरे देवा द्वेषो अस्मद्युयोतनोरु णः शर्म यच्छता स्वस्तये ॥१२॥
अरिष्टः स मर्तो विश्व एधते प्र प्रजाभिर्जायते धर्मणस्परि ।
यमादित्यासो नयथा सुनीतिभिरति विश्वानि दुरिता स्वस्तये ॥१३॥
यं देवासोऽवथ वाजसातौ यं शूरसाता मरुतो हिते धने ।
प्रातर्यावाणं रथमिन्द्र सानसिमरिष्यन्तमा रुहेमा स्वस्तये ॥१४॥

*parāvato ye didhiṣanta āpyaṁ manuprītāso janimā vivasvataḥ* ।
*yayāterye nahuṣyasya barhiṣi devā āsate te adhi bruvantu naḥ* ॥1॥
*viśvā hi vo namasyāni vandyā nāmāni devā uta yiāyāni vaḥ* ।
*ye stha jātā aditeradbhyaspari ye pṛthivyāste ma iha śrutā havam* ॥2॥
*yebhyeā mātā madhumatpinvate payaḥ pīyūṣaṁ dyauraditiradribarhāḥ* ।
*ukthaśuṣmāna vṛṣabharāntsvapnasastām̐ ādityām̐ anu madā svastaye* ॥3॥
*nṛchakṣaso animiṣanto arhaṇā bṛhaddevāso amṛtatvamānaśuḥ* ।
*jyotīrathā ahimāyā anāgaso divo vaṣarmāṇaṁ vasate svastaye* ॥4॥
*samrājo ye suvṛdho yāmāyayuraparihnṛtā dadhire divi kṣayam* ।
*tām̐ ā vivāsa namasā suvṛktibhirmaho ādityām̐ aditiṁ svastaye* ॥5॥
*ko vaḥ stomaṁ rādhati yaṁ jujoṣatha viśve devāso manuṣo yati ṣṭhana* ।
*ko vo'dhvaraṁ tuvijātā araṁ karadyo naḥ parṣadatyaṁhaḥ svastaye* ॥6॥
*yebhyo hotrāṁ prathamāmāyeje manuḥ samiddhāgnirmanasā sapta hotṛbhiḥ* ।

*ta ādityā abhyaṁ śarma yachchhata sugā naḥ karta supathā svastaye ॥7॥*
*ya īśire bhuvanasya prachetaso viśvasya sthāturjagataścha mantavaḥ ।*
*te naḥ kṛtādakṛtādenasasparyadyā devāsaḥ pipṛtā svastaye ॥8॥*
*bheriṣvandraṁ suhavaṁ havāmaheṁ'homuchaṁ sukṛtaṁ daivyaṁ janam ।*
*agiṁna mitraṁ varuṇaṁ sātaye bhagaṁ dyāvāpṛthivī marutaḥ svastaye ॥9॥*
*sutrāmāṇaṁ pṛthivīṁ dyāmanehasaṁ suśarmāṇamaditiṁ supraṇītim ।*
*daivīṁ nāvaṁ svaritrāmanāgasamasravantīmā ruhemā svastaye ॥10॥*
*viśve yajatrā adhi vochatotaye trāyadhvaṁ no durevāyā abhihrutaḥ ।*
*satyayā vo devahūtyā huvema śṛṇvato devā avase svastaye ॥11॥*
*apāmīvāmapa viśvāmanāhutimapārātiṁ durvidatramaghāyataḥ ।*
*āre devā dveṣo asmadyuyotanoru ṇaḥ śarma yachchhatā svastaye ॥12॥*
*ariṣṭaḥ sa marto viśva edhate pra prajābhirjāyate dharmaṇaspari ।*
*yamādityāso nayathā sunītibhirati viśvāni duritā svastaye ॥13॥*
*yaṁ devāso'vatha vājasātau yaṁ śūrasātā maruto hite dhane ।*
*prātaryāvāṇaṁ rathamindra sānasimaraṣyantamā ruhemā svastaye ॥14॥*

ऋ. (Rv.) १०.६३.१७

एवा प्लतेः सूनुरवीवृधद्वो विश्व आदित्या आदिते मनीषी ।
ईशानासो नरो अमर्त्येनास्तावि जनो दिव्यो गयेन ॥१७॥
*evā plateḥ sūnuravīvṛdhadvo viśva ādityā ādite manīṣī ।*
*īśānāso naro amartyenāstāvi jano divyo gayena ॥17॥*

ऋ. (Rv.) १०.६४.१-१७

कथा देवानां कतमस्य यामनि सुमन्तु नाम शृण्वतां मनामहे ।
को मृळाति कतमो नो मयस्करत्कतम ऊती अभ्या ववर्तति ॥१॥
क्रतूयन्ति क्रतवो हृत्सु धीतयो वेनन्ति वेनाः पतयन्त्या दिशः ।
न मर्डिता विद्यते अन्य एभ्यो देवेषु मे अधि कामा अयंसत ॥२॥
नरा वा शंसं पूषणमगोह्यमग्निं देवेद्धमभ्यर्चसे गिरा ।
सूर्यामासा चन्द्रमसा यमं दिवि त्रितं वातमुषसमक्तुमश्विना ॥३॥
कथा कविस्तुवीरवान्कया गिरा बृहस्पतिर्वावृधते सुवृक्तिभिः ।
अज एकपात्सुहवेभिर्ऋक्वभिरहिः शृणोतु बुध्न्यो३ हवीमनि ॥४॥
दक्षस्य वादिते जन्मनि व्रते राजाना मित्रावरुणा विवाससि ।
अतूर्तपन्थाः पुरुरथो अर्यमा सप्तहोता विषुरूपेषु जन्मसु ॥५॥
ते नो अर्वन्तो हवनश्रुतो हवं विश्वे शृण्वन्तु वाजिनो मितद्रवः ।
सहस्रसा मेधसाताविव त्मना महो ये धनं समिथेषु जभ्रिरे ॥६॥
प्र वो वायुं रथयुजं पुरन्धिं स्तोमैः कृणुध्वं सख्याय पूषणम् ।
ते हि देवस्य सवितुः सवीमनि क्रतुं सचन्ते सचितः सचेतसः ॥७॥
त्रिः सप्त सस्रा नद्यो महीरपो वनस्पतीन्पर्वताँ अग्निमूतये ।
कृशानुमस्तॄन्तिष्यं सधस्थ आ रुद्रं रुद्रेषु रुद्रियं हवामहे ॥८॥
सरस्वती सरयुः सिन्धुरूर्मिभिर्महो महीरवसा यन्तु वक्षणीः ।
देवीरापो मातरः सूदयित्न्वो घृतवत्पयो मधुमन्नो अर्चत ॥९॥
उत माता बृहद्दिवा शृणोतु नस्त्वष्टा देवेभिर्जनिभिः पिता वचः ।
ऋभुक्षा वाजो रिस्पतिर्भगो रण्वः शंसः शशमानस्य पातु नः ॥१०॥
रण्वः संदृष्टौ पितुमाँ इव क्षयो भद्रा रुद्राणां मरुतामुपस्तुतिः ।
गोभिः ष्याम यशसो जनेष्वा सदा देवास इळया सचेमहि ॥११॥
यां मे धियं मरुत इन्द्र देवा अददात वरुण मित्र यूयम् ।
तां पीपयत पयसेव धेनुं कुविद्गिरो अधि रथे वहाथ ॥१२॥
कुविदंग प्रति यथा चिदस्य नः सजात्यस्य मरुतो बुबोधथ ।
नाभा यत्र प्रथमं संनसामहे तत्र जामित्वमदितिर्दधातु नः ॥१३॥

ते हि द्यावापृथिवी मातरा मही देवी देवांजन्मना यिाये इतः ।
उभे बिभृत उभयं भरीमभिः पुरू रेतांसि पितृभिश्च सिंचतः ॥१४॥
वि षा होत्रा विश्वमश्नोति वार्य बृहस्पतिररमतिः पनीयसी ।
ग्रावा यत्र मधुषुदुच्यते बृहदवीवशन्त मतिभिर्मनीषिणः ॥१५॥
एवा कविस्तुवीरवाँ ऋताा द्रविणस्युर्द्रविणसश्चकानः ।
उक्थेभिरत्र मतिभिश्च विप्रोऽपीपयद्गयो दिव्यानि जन्म ॥१६॥
एवा प्लतेः सूनुरवीवृधद्वो विश्व आदित्या अदिते मनीषी ।
ईशानासो नरो अमर्त्येनास्तावि जनो दिव्यो गयेन ॥१७॥

*kathā devānāṁ katamasya yāmani sumantu nāma śṛṇvatāṁ manāmahe* ।
*ko mṛḻāti katamo no mayaskaratkatama ūtī abhyā vavartati* ॥1॥
*kratūyanti kratavo hṛtsu dhītayo venanti venāḥ patayantyā diśaḥ* ।
*na marḍitā vidyate anya ebhyo deveṣu me adhi kāmā ayaṁsata* ॥2॥
*narā vā śaṁsaṁ pūṣaṇamagohyamagiṁna deveddhamabhyarchase girā* ।
*sūryāmāsā chandramasā yamaṁ divi tritaṁ vātamuṣasamaktumaśvinā* ॥3॥
*kathā kavistuvīravānkayā girā bṛhaspatirvāvṛdhate suvṛktibhiḥ* ।
*aja ekapātsuhavebhirṛkvabhirahiḥ śṛṇotu budhnyo3 havīmani* ॥4॥
*dakṣasya vādite janmani vrate rājānā mitrāvaruṇā vivāsasi* ।
*atūrtapanthāḥ pururatho aryamā saptahotā viṣurūpeṣu janmasu* ॥5॥
*te no arvanto havanaśruto havaṁ viśve śṛṇvantu vājino mitadravaḥ* ।
*sahasramā medhasātāviva tmanā maho ye dhanaṁ samitheṣu jabhrire* ॥6॥
*pra vo vāyuṁ rathayujaṁ purandhiṁ stomaiḥ kṛṇudhvaṁ sakhyāya pūṣaṇam* ।
*te hi devasya savituḥ savīmani kratuṁ sachante sachitaḥ sachetasaḥ* ॥7॥
*triḥ sapta sasrā nadyo mahīrapo vanaspatīnparvatāṁ̐ agnimūtaye* ।
*kṛśānumastṝntiṣyaṁ sadhastha ā rudraṁ rudreṣu rudriyaṁ havāmahe* ॥8॥
*sarasvatī sarayuḥ sindhurūrmibhirmaho mahīravasā yantu vakṣaṇīḥ* ।
*devīrāpo mātaraḥ sūdayitnvo ghṛtavatpayo madhumanno archata* ॥9॥
*uta mātā bṛhaddivā śṛṇotu nastvaṣṭā devebhirjanibhiḥ pitā vachaḥ* ।
*ṛbhukṣā vājo riāspatirbhago raṇvaḥ śaṁsaḥ śaśamānasya pātu naḥ* ॥10॥
*raṇvaḥ saṁdṛṣṭau pitumāṁ̐ iva kṣayo bhadrā rudrāṇāṁ marutāmupastutiḥ* ।
*gobhiḥ ṣyāma yaśaso janeṣvā sadā devāsa iḻayā sachemahi* ॥11॥
*yāṁ me dhiyaṁ maruta indra devā adadāta varuṇa mitra yūyam* ।
*tāṁ pīpayata payaseva dhenuṁ kuvidgiro adhi rathe vahātha* ॥12॥
*kuvidaṁga prati yathā chidasya naḥ sajātyasya maruto bubodhatha* ।
*nābhā yatra prathamaṁ saṁnasāmahe tatra jāmitvamaditirdadhātu naḥ* ॥13॥
*te hi dyāvāpṛthivī mātarā mahī devī devāṁjanmanā yiāye itaḥ* ।
*ubhe bibhṛta ubhayaṁ bharīmabhiḥ purū retāṁsi pitṛbhiścha siṁchataḥ* ॥14॥
*vi ṣā hotrā viśvamaśnoti vārya bṛhaspatiraramatiḥ panīyasī* ।
*grāvā yatra madhuṣuduchyate bṛhadavīvaśanta matibhirmanīṣiṇaḥ* ॥15॥
*evā kavistuvīravāṁ̐ ṛtāā draviṇasyurdraviṇasaśchakānaḥ* ।
*ukthebhiratra matibhiścha vipro'pīpayadgayo divyāni janma* ॥16॥
*evā plateḥ sūnuravīvṛdhadvo viśva āditya adite manīṣī* ।
*īśānāso naro amartyenāstāvi jano divyo gayena* ॥17॥

३. स्वर्ग्यायणौ (Svargyāyaṇau) - य. (Yv.)२१.६

सुनावमा रुहेयमस्रवन्तीमनागसम्। शतारित्रां स्वस्तये ।
*sunāvamā ruheyamasravantīmanāgasam । śatāritrāṁ svastaye* ।

## २०५. गयस्कानः (Gayaskānaḥ)

१. अदितिः (Aditiḥ) - य. (Yv.)२१.६

सुत्रामाणं पृथिवीं द्यामनेहसंसुशर्माणमदितिंसुप्रणीतिम् ।

दैवीं नावंस्वरित्रामनागसमस्रवन्तीमा रुहेमा स्वस्तये ॥६॥
*sutrāmāṇaṁ pṛthivīṁ dyāmanehasaṁsṛśarmāṇamaditiṁsupraṇītim /*
*daivīṁ nāvaṁsvaritrāmanāgasamasravantīmā ruhemā svastaye ॥6॥*

## २०६. गरुत्मान् (Garutmān)

१. द्यावापृथिवी सप्तसिन्धवः (Dyāvāpṛthivī Saptasindhavaḥ) - अ. (Av.) ४.६.२

यावती द्यावापृथिवी वरिम्णा यावत् सप्त सिन्धवो वितिष्ठरे ।
वाचं विषस्य दूषणीं तामितो निरवादिषम् ॥२॥
*yāvatī dyāvāpṛthivī varimṇā yāvat sapta sindhavo vitiṣṭhare /*
*vāchaṁ viṣasya dūṣaṇīṁ tāmito niravādiṣam ॥2॥*

२. ब्राह्मणः (Brāhmaṇaḥ) - अ. (Av.) ४.६.१

ब्राह्मणो जो प्रथमो दशशीर्षो दशास्यः । स सोमं प्रथमः पपौ स चकाररसं विषम् ॥१॥
*brāhmaṇo jo prathamo daśaśīrṣo daśāsyaḥ / sa somaṁ prathamaḥ papau sa chakārārasaṁ viṣam ॥1॥*

३. वनस्पतिः (Vanaspatiḥ) - अ. (Av.) ४.७.१-७; ६.१००.१-३

अ. (Av.) ४.७.१-७

वारिदं वारयातै वरणावत्यामधि । तत्रामृतस्यासिक्तं तेना ते वारये विषम् ॥१॥
अरसं प्राच्यंविषमरसं यदुदीच्यम् । अथेदमधराच्यंकरम्भेण वि कल्पते ॥२॥
करम्भं कृत्वा तिर्यपीबस्पाकमुदारथिम् । क्षुधा किल त्वा दुष्टनो जक्षिवान्त्स न रूरुपः ॥३॥
वि ते मदं मदावति शरमिव पातयामसि । प्र त्वा चरुमिव येषन्तं वचसाासथपयामसि ॥४॥
परि ग्राममिवाचितं वचसवा स्थापयामसि । तिष्ठा वृक्षइव स्थाम्नयभ्रिखाते न रूरुपः ॥५॥
पवस्तैस्वा पर्यक्रीणन् दूर्शेभिरजिनैरुत । प्रक्रीरसि त्वमोषधेऽभ्रिखाते न रूरुपः ॥६॥
अनाप्ता ये वः प्रथमा यानि कर्माणि चक्रिरे । वीरान् नो अत्र मा दभन् तद् व एतत् पुरो दधे ॥७।
*vāridaṁ vārayātai varaṇāvatyāmadhi / tatrāmṛtasyāsiktaṁ tenā te vāraye viṣam ॥1॥*
*arasaṁ prāchyaṁviṣamarasaṁ yadudīchyam /*
*athedamadharāchyaṁkarambheṇa vi kalpate ॥2॥*
*karambhaṁ kṛtvā tiryapībaspākamudārathim /*
*kṣudhā kila tvā duṣṭano jakṣivāntsa na rūrupaḥ ॥3॥*
*vi te madaṁ madāvati śaramiva pātayāmasi /*
*pra tvā charumiva yeṣantaṁ vachasāāsathapayāmasi ॥4॥*
*pari grāmamivāchitaṁ vachasavā sthāpayāmasi /*
*tiṣṭhā vṛkṣaiva sthāmnayabhrikhāte na rūrupaḥ ॥5॥*
*pavastaisvā paryakrīṇan dūrśebhirajinairuta /*
*prakrīrasi tvamoṣadhe'bhrikhāte na rūrupaḥ ॥6॥*
*anāptā ye vaḥ prathamā yāni karmāṇi chakrire /*
*vīrān no atra mā dabhan tad va etat puro dadhe ॥7 /*

अ. (Av.) ६.१००.१-३

देव अदुः सूर्यो अदाद् द्यौरदात् पृथिव्यदात् । तिस्रः सरस्वतीरदुः सचिता विषदूषणम् ॥१॥
यद् वो देवा उपजीका असिंचन् धन्वन्युदकम् । तेन देवप्रसूतेनेदं दूषयता विषम् ॥२॥
असुराणां दुहितासि सा देवानामसि स्वसा । दिवस्पृथिव्याः संभूता सा चकर्थारसंविषम् ॥३॥
*deva aduḥ sūryo adād dyauradāt pṛthivyadāt /*
*tisraḥ sarasvatīraduḥ sachitā viṣadūṣaṇam ॥1॥*
*yad vo devā upajīkā asiṁchan dhanvanyudakam /*
*tena devaprasūtenedaṁ dūṣayatā viṣam ॥2॥*
*asurāṇāṁ duhitāsi sā devānāmasi svasā /*
*divaspṛthivyāḥ saṁbhūtā sā chakarthārasaṁviṣam ॥3॥*

४. विषम् (Viṣam) - अ. (Av.) ४.६.४-८

यस्त आस्यत् पंचांगुरिर्वक्राच्चिदधि धन्वनः। अपस्कम्भस्य शल्यान्निरवोचमहं विषम् ॥४॥
शल्याद् विषं निरवोचं प्रांजनादुत पर्णधेः। अपाष्ठाच्छृंगात् कुल्मलान्निरवोचमहं विषम् ॥५॥
अरसस्त इषो शल्योऽथो ते अरसं विषम्। उतारसस्य वृक्षस्य धनुष्टे अरसासरसम् ॥६॥
ये अपीषन् ये अदिहन् ये आस्यन् ये अवासृजन्। सर्वे ते वध्रयः कृता वाध्रिर्विषगिरिः कृतः।७।
वध्रायस्ते खनितारो वध्रिस्त्वमस्योषधे। वध्रिः स पर्वतो गिरिर्यतो जातमिदं विषम् ॥८॥

*yasta āsyat paṁchāṁgurirvakrāchchidadhi dhanvanaḥ |*
*apaskambhasya śalyānniravochamahaṁ viṣam ||4 ||*
*śalyād viṣaṁ niravochaṁ prāṁjanāduta parṇadheḥ |*
*apāṣṭhāchchhṛṁgāt kulmalānniravochamahaṁ viṣam ||5 ||*
*arasasta iṣo śalyo'tho te arasaṁ viṣam |*
*utārasasya vṛkṣasya dhanuṣṭe arasāsarasam ||6 ||*
*ye apīṣan ye adihan ye āsyan ye avāsṛjan |*
*sarve te vadhrayaḥ kṛtā vādhrirviṣagiriḥ kṛtaḥ |7 |*
*vadhrāyaste khanitāro vadhristvamasyoṣadhe |*
*vadhriḥ sa parvato giriryato jātamidaṁ viṣam ||8 ||*

५. विषनिवारणम् (Viṣanivāraṇam) - अ. (Av.) ६.१२.१-३

परि द्यामिव सूर्योऽहीनां जनिमागमम्। रात्री जगदिवान्यद्धंसात् तेना ते वारये विषम् ॥१॥
यद् ब्रह्मभिर्यदृषिभिर्यद् देवैर्विदितं पुरा। यद् भूतं भव्यमासन्वत् तेना ते वारये विषम् ॥२॥
मध्वा पृंचे नद्यः१ पर्वता गिरयो मधु। मधु परुष्णी शीपाला शमास्ने अस्तु शं हृदे ॥३॥

*pari dyāmiva sūryo'hīnāṁ janimāgamam |*
*rātrī jagadivānyaddhaṁsāt tenā te vāraye viṣam ||1 ||*
*yad brahmabhiryadṛṣibhiryad devairviditaṁ purā |*
*yad bhūtaṁ bhavyamāsanvat tenā te vāraye viṣam ||2 ||*
*madhvā pṛṁche nadyaḥ1 parvatā girayo madhu |*
*madhu paruṣṇī śīpālā śamāsne astu śaṁ hṛde ||3 ||*

६. सर्पविषनिवारणम् (Sarpaviṣanivāraṇam) - अ. (Av.) ५.१३.१-११

ददिर्हि मह्य वरुणो दिवः कविर्वचोभिरुग्रैर्नि रिणामि ते विषम् ।
खातमखतमुत सक्तमग्रभमिरेव धन्वन्नि जजास ते विषम् ॥१॥
यत् ते अपोदकं विषं तत् त एतास्वग्रभम् ।
गृह्णामि ते मध्यममुत्तमं रसमुतावमं भियसा नेशदादु ते ॥२॥
वृषा मे रवो नभसा न तन्यतुरुग्रेण ते वचसा बाध आदु ते अहं तमस्य नृभिरग्रभं रसं तमस इव ज्योतिरुदेतु सूर्यः ॥३॥
चक्षुपा ते चक्षुर्हन्मि विषेण हनिम ते विषम् ।
अहे म्रियस्व मा जीवीः प्रत्यगभ्येतु त्वा विषम् ॥४॥
कैरात् पृश्न उपतृण्य बभ्र आ मे श्रृणुतासिता अलीकाः ।
मा मे सख्युः स्तामानमपि ष्ठाताश्रावयन्तो नि विषे रसध्वम् ॥५॥
असितस्य तैमातस्य बभ्रोरपोदकस्य च ।
सात्रासाहस्याहं मन्योरव ज्यामिव धन्वनो वि मुंचामि रथाँइव ॥६॥
आलिगी च विलिगी च पिता च माता च ।
विद्म वः सर्वतो बन्ध्वरसाः किं करिष्यथ ॥७॥
उरुगूलाया दुहिता जाता दास्यसिक्न्या ।
प्रतंकं दद्रुषीणां सर्वासामरसं विषम् ॥८॥
कर्णा श्वावित् तदब्रवीद् गिरेरवचरन्तिका ।
याः काश्चेमाः खनित्रिमास्तासामरसतमं विषम् ॥९॥
ताबुवं न ताबुवं न घेत त्वमसि ताबुवम्। ताबुवेनारसं विषम्॥१०॥
तस्तुवं न तस्तुवं न घेत् त्वमसि तस्तुवम्। तस्तुवेनारसं विषम्॥११॥

*dadirhi mahya varuṇo divaḥ kavirvachobhirugrairni riṇāmi te viṣam /*
*khātamakhatamuta saktamagrabhamireva dhanvanni jajāsa te viṣam //1 //*
*yat te apodakaṁ viṣaṁ tat ta etāsvagrabham /*
*gṛhṇāmi te madhyamamuttamaṁ rasamutāvamaṁ bhiyasā neśadādu te //2 //*
*vṛṣā me ravo nabhasā na tanyaturugreṇa te vachasā bādha ādu te ahaṁ tamasya*
*nṛbhiragrabhaṁ rasaṁ tamasa iva jyotirudetu sūryaḥ //3 //*
*chakṣupā te chakṣurhanmi viṣeṇa hanima te viṣam /*
*ahe mriyasva mā jīvīḥ pratyagabhyetu tvā viṣam //4 //*
*kairāt pṛśna upatṛṇya babhra ā me śṛṇutāsitā alīkāḥ /*
*mā me sakhyuḥ stāmānamapi ṣṭhātāśrāvayanto ni viṣe rasadhvam //5 //*
*asitasya taimātasya babhrorapodakasya cha /*
*sātrāsāhasyāhaṁ manyorava jyāmiva dhanvano vi muṁchāmi rathāṁiva //6 //*
*āligī cha viligī cha pitā cha mātā cha /*
*vidma vaḥ sarvato bandhvarasāḥ kiṁ kariṣyatha //7 //*
*urugūlāyā duhitā jātā dāsyasiknyā /*
*prataṁkaṁ dadruṣīṇāṁ sarvāsāmarasaṁ viṣam //8 //*
*karṇā śvāvit tadabravīd gireravacharantikā /*
*yāḥ kāśchemāḥ khanitrimāstāsāmarasatamaṁ viṣam //9 //*
*tābuvaṁ na tābuvaṁ na gheta tvamasi tābuvam / tābuvenārasaṁ viṣam //10 //*
*tastuvaṁ na tastuvaṁ na ghet tvamasi tastuvam / tastuvenārasaṁ viṣam //11 //*

७. सर्पविषापाकरणम् (Sarpaviṣāpākaraṇam) - अ. (Av.) ७.८८.१; १०.४.१-२६

अ. (Av.) ७.८८.१

अपेह्यरिरस्यरिर्वा असि। विषे विषमपृक्था विषमिद् वा अपृक्थाः। अहिमेवाभ्यपेहि तं जहि ॥१॥
*apehyarirasyarirvā asi /*
*viṣe viṣamapṛkthā viṣamid vā apṛkthāḥ / ahimevābhyapehi taṁ jahi //1 //*

अ. (Av.) १०.४.१-२६

इन्द्रस्य प्रथमो रथो देवानामपरो रथो वरुणस्य तृतीय इत्। अहीनामपमा रथः स्थाणुमारदथार्षत्।१।
दर्भः शोचिस्तरूणकमश्वस्य वारः परुषस्य वारः। रथस्य बन्धुरम् ॥२॥
अव श्वेत पदा जहि पूर्वेण चापरेण च। उदप्लुतमिव दार्वहीनामरसं विषं वारुग्रम् ॥३॥
अरंघुषो निमज्योन्मज्य पुनरब्रवीत्। उदप्लुतमिव दार्वहीनामरसं विषं वारुग्रम् ॥४॥
पैद्वो हन्ति कसर्णीलं पैद्वः श्वित्रमुतासितम्। पैद्वो रथर्व्याः शिरः सं बिभेद पृदाक्वाः ॥५॥
पैद्व प्रेहिं प्रथमोऽनु त्वा वयमेमसि। अहीन् व्यस्यतात् पथो येन स्मा वयमेमसि ॥६॥
इदं पैद्वो अजायतेदमस्य परायणम्। इमान्यर्वतः पदाहिघ्न्यो वाजिनीवतः ॥७॥
संयतं न वि ष्परद् व्यात्तं न सं यमत्। अस्मिन् क्षेत्रे द्वावही स्त्री च पुमांश्च तावुभावरसा ॥८।
अरसास इहाहयो ये अन्ति ये च दूरके। घनेन हन्मि वृश्चिकमहिं दण्डेनागतम् ॥९॥
अघाश्वस्येदं भेषजुमुभ्योः स्वजस्य च। इन्द्रो मेऽहिमघायन्तमहिं पैद्वो अरन्धयत् ॥१०॥
पैद्वस्य मन्महे वयं स्थिरस्य स्थिरधाम्नः। इमे पश्चा पृदाकवः प्रदीध्यत आसते ॥११॥
नष्टासवो नष्टविषा हता इन्द्रेण वज्रिणा। जघानेन्द्रो जघ्निमा वयम् ॥१२॥
हतास्तिरश्चिराजयो निपिष्टासः पृदाकवः। दर्विं करिक्रतं श्वित्रं दर्भेष्वसितं जहि ॥१३॥
कैरातिका कुमारिका सका खनति भेषजम्। हिरण्ययीभिरभ्रिभिर्गिरीणामुप सानुषु ॥१४॥
आयमगन् युवा भिषक् पृश्निहापराजितः। स वै स्वजस्य जम्भन् उभयोवृश्चिकस्य च ॥१५॥
इन्द्रो मेऽहिमरन्धयन्मित्रश्च वरुणश्च। वातापर्जन्योऽभा ॥१६॥
इन्द्रो मेऽहिमरन्धयत् पृदाकुं च पृदाक्वम्। स्वजं तिरश्चिराजिं कसर्णीलं दशोनसिम् ॥१७॥
इन्द्रो जघान प्रथमं जनितारमहे तव। तेषामु तृह्यमाणानां कः स्वित् तेषामसद् रसः ॥१८॥
स हिं शीर्षाण्यग्रभं पौञ्जिष्ठ इव कर्वरम्। सिन्धोर्मध्यं परेत्य व्यनिजमहेर्विषम् ॥१९॥
अहीनां सर्वेषां विषं परा वहन्तु सिन्धवः। हतास्तिरश्चिराजयो निपिष्टासः पृदाकवः ॥२०॥
ओषधीनामहं वृण उर्वरीरिव साधुया। नयाम्यर्वतीरिवाहे निरैतु ते विषम् ॥२१॥

यदग्नौ सूर्ये विषं पृथिव्यामोषधीषु यत्। कान्दाविषं कनक्नकं निरैत्वैतु ते विषम् ॥२२॥
ये अग्निजा ओषधिजा अहीनां ये अप्सुजा विद्युत आबभूवुः ।
येषां जातानि बहुधा महान्ति तेभ्यः सर्पेभ्यो नमसा विधेम ॥२३॥
तौदी नमासि कन्याघृताची नाम वा असि। अधस्पदेन ते पदमा ददे विषदूषणम् ॥२४॥
अंगादंगात् प्र च्यावय हृदयं परि वर्जय। अधा विषस्य यत् तेजोऽवाचीनं तदेतु ते ॥२५॥
आरे अभूद् विषमरौद् विषे विषमप्रगपि ।
अग्निर्विषमहेर्निदधात् सोमो निरणयीत्। दंष्टारमन्वगाद् विषमहिरमृत ॥२६॥

*indrasya prathamo ratho devānāmaparo ratho varuṇasya tṛtīya it /*
*ahīnāmapamā rathaḥ sthāṇumāradathārṣat //1 /*
*darbhaḥ śochistarūṇakamaśvasya vāraḥ paruṣasya vāraḥ / rathasya bandhuram //2 //*
*ava śveta padā jahi pūrveṇa chāpareṇa cha /*
*udaplutamiva dārvahīnāmarasaṁ viṣaṁ vārugram //3 //*
*araṁghuṣo nimajyonmajya punarabravīt /*
*udaplutamiva dārvahīnāmarasaṁ viṣaṁ vārugram //4 //*
*paidvo hanti kasarṇīlaṁ paidvaḥ śvitramutāsitam /*
*paidvo ratharvyāḥ śiraḥ saṁ bibheda pṛdākvāḥ //5 //*
*paidva prehiṁ prathamo'nu tvā vayamemasi /*
*ahīn vyasyatāt patho yena smā vayamemasi //6 //*
*idaṁ paidvo ajāyatedamasya parāyaṇam /*
*imānyarvataḥ padāhighnyo vājinīvataḥ //7 //*
*saṁyataṁ na vi ṣparad vyāttaṁ na saṁ yamat /*
*asmin kṣetre dvāvahī strī cha pumāṁścha tāvubhāvarasā //8 /*
*arasāsa ihāhayo ye anti ye cha dūrake /*
*ghanena hanmi vṛśchikamahiṁ daṇḍenāgatam //9 //*
*aghāśvasyedaṁ bheṣajumubhyoḥ svajasya cha /*
*indro me'himaghāyantamahiṁ paidvo arandhayat //10 //*
*paidvasya manmahe vayaṁ sthirasya sthiradhāmnaḥ /*
*ime paśchā pṛdākavaḥ pradīdhyata āsate //11 //*
*naṣṭāsavo naṣṭaviṣā hatā indreṇa vajriṇā / jaghānendro jaghnimā vayam //12 //*
*hatāstiraśchirājayo nipiṣṭāsaḥ pṛdākavaḥ /*
*darvi karikratam śvitraṁ darbheṣvasitaṁ jahi //13 //*
*kairātikā kumārikā sakā khanati bheṣajam /*
*hiraṇyayībhirabhribhirgirīṇāmupa sānuṣu //14 //*
*āyamagan yuvā bhiṣak pṛśnihāparājitaḥ /*
*sa vai svajasya jambhan ubhayovṛśchikasya cha //15 //*
*indro me'himarandhayanmitraścha varuṇaścha / vātāparjanyo3bhā //16 //*
*indro me'himarandhayat pṛdākuṁ cha pṛdākvam /*
*svajaṁ tiraśchirājiṁ kasarṇīlaṁ daśonasim //17 //*
*indro jaghāna prathamaṁ janitāramahe tava /*
*teṣāmu tṛhyamāṇānāṁ kaḥ svit teṣāmasad rasaḥ //18 //*
*sa hiṁ śīrṣāṇyagrabhaṁ pauñjiṣṭha iva karvaram /*
*sindhormadhyaṁ paretya vyanijamahervisam //19 //*
*ahīnāṁ sarveṣāṁ viṣaṁ parā vahantu sindhavaḥ /*
*hatāstiraśchirājayo nipiṣṭāsaḥ pṛdākavaḥ //20 //*
*Oṣadhīnāmahaṁ vṛṇa urvarīriva sādhuyā / nayāmyarvatīrivāhe niraitu te viṣam //21 //*
*yadagnau sūrye viṣaṁ pṛthivyāmoṣadhīṣu yat /*
*kāndāviṣaṁ kanaknakaṁ niraitvaitu te viṣam //22 //*
*ye agnijā Oṣadhijā ahīnāṁ ye apsujā vidyuta ābabhūvuḥ /*
*yeṣāṁ jātāni bahudhā mahānti tebhyaḥ sarpebhyo namasā vidhema //23 //*

*taudī namāsi kanyāghṛtāchī nāma vā asi /*
*adhaspadena te padamā dade viṣadūṣaṇam //24 //*
*aṁgādaṁgāt pra chyāvaya hṛdayaṁ pari varjaya /*
*adhā viṣasya yat tejo'vāchīnaṁ tadetu te //25 //*
*āre abhūd viṣamaraud viṣe viṣamapragapi /*
*agnirviṣamahernidadhāt somo niraṇayīt / daṁṣṭāramanvagād viṣamahiramṛta //26 //*

८. सुपर्णः (Suparṇaḥ) - अ. (Av.) ४.६.३

सुपर्णस्त्वा गुरुत्मान् विष प्रथममावयत्। नामीमदो नारूरुप उतास्मा अभवः पितुः ॥३॥
*suparṇastvā gurutmān viṣa prathamamāvayat / nāmīmado nārūrupa utāsmā abhavaḥ pituḥ //3 //*

## २०७. गर्गः (Gargaḥ)

१. इन्द्रः (Indraḥ) - ऋ. (Rv.) ६.४७.६-१९; २१; य. (Yv.)२०.५०-५२

ऋ. (Rv.) ६.४७.६-१९

धृषत्पिब कलशे सोममिन्द्र वृत्रहा शूर समरे वसूनाम् ।
माध्यन्दिने सवन आ वृषस्व रयिस्थानो रयिमस्मासु धेहि ॥६॥
इन्द्र प्र णः पुरएतेव पश्य प्र नो नय प्रतरं वस्यो अच्छ ।
भवा सुपारो अतिपारयो नो भवा सुनीतिरुत वामनीतिः ॥७॥
उरुं नो लोकमनु नेषि विद्वान्त्स्वर्वज्ज्योतिरभयं स्वस्ति ।
ऋष्वा त इन्द्र स्थविरस्य बाहू उप स्थेयाम शरणा बृहन्ता ॥८॥
वरिष्ठे न इन्द्र वन्धुरे धा वहिष्ठयोः शतावन्नश्वयोरा ।
इषमा वक्षीषां वर्षिष्ठां मा नस्तारीन्मघवन्रायो अर्यः ॥९॥
इन्द्र मृळ मह्यं जीवातुमिच्छ चोदय धियमयसो न धाराम् ।
यत्किंचाहं त्वायुरिदं वदामि तज्जुषस्व कृधि मा देववन्तम् ॥१०॥
त्रातारमिन्द्रमवितारमिन्द्रं हवेहवे सुहवं शूरमिन्द्रम् ।
ह्वयामि शक्रं पुरुहूतमिन्द्रं स्वस्ति नो मघवा धात्विन्द्रः ॥११॥
इन्द्रः सुत्रामा स्ववाँ अवोभिः सुमळीको भवतु विश्ववेदाः ।
बाधतां द्वेषो अमयं कृणोतु सुवीर्यस्य पतयः स्याम ॥१२॥
तस्य वयं सुमतौ यियस्यापि भद्रे सौमनसे स्याम ।
स सुत्रामा स्ववाँ इन्द्रो अस्मे आराच्चिद् द्वेषः सनुतर्युयोतु ॥१३॥
अव त्वे इन्द्र प्रवतो नोर्मिर्गिरो ब्रह्माणि नियुतो धवन्ते ।
उरू न राधः सवना पुरूण्यपो गा वज्रिन्युवसे समिन्दून् ॥१४॥
क ई स्तवत्कः पृणात्को यजाते यदुग्रमिन्मघवा विश्वहावेत् ।
पादाविव प्रहरन्नन्यमन्यं कृणोति पूर्वमपरं शचीभिः ॥१५॥
श्रृण्वे वीर उग्रमुग्रं दमायन्नन्यमन्यमतिनेनीयमानः ।
एधमानद् विळुभयस्य राजा चोष्कूयते विश इन्द्रो मनुष्यान् ॥१६॥
परा पूर्वेषां सख्या वृणक्ति वितर्तुराणो अपरेभिरेति ।
अनानुभूतीरवधून्वानः पूर्वीरिन्द्रः शरदस्तर्तरीति ॥१७॥
रूपंरूपं प्रतिरूपो बभूव तदस्य रूपं प्रतिचक्षणाय ।
इन्द्रो मायाभिः पुरुरूप ईयते युक्ता ह्यस्य हरयः शता दश ॥१८॥
युजानो हरिता रथे भूरि त्वष्टेह राजति ।
को विश्वाहा द्विषतः पक्ष आसत उतासीनेषु सूरिषु ॥१९॥
*dhṛṣatpiba kalaśe somamindra vṛtrahā śūra samare vasūnām /*
*mādhyandine savana ā vṛṣasva rayisthāno rayimasmāsu dhehi //6 //*
*indra pra ṇaḥ puraeteva paśya pra no naya prataraṁ vasyo achchha /*
*bhavā supāro atipārayo no bhavā sunītiruta vāmanītiḥ //7 //*
*uruṁ no lokamanu neṣi vidvāntsvarvajjyotirabhayaṁ svasti /*

*ṛṣvā ta indra sthavirasya bāhū upa stheyāma śaraṇā bṛhantā //8 //*
*variṣṭhe na indra vandhure dhā vahiṣṭhayoḥ śatāvannaśvayorā /*
*iṣamā vakṣīṣāṁ varṣiṣṭhāṁ mā nastārīnmaghavannāyo aryaḥ //9 //*
*inrada mṛḻa mahyaṁ jīvātumichchha chodaya dhiyamayaso na dhārām /*
*yatkiṁchāhaṁ tvāyuridaṁ vadāmi tajjuṣasva kṛdhi mā devavantam //10 //*
*trātāramindramavitāramindraṁ havehave suhavaṁ śūramindram /*
*hnayāmi śakraṁ puruhūtamindraṁ svasti no maghavā dhātvindraḥ //19 //*
*indraḥ sutrāmā svavām̐ avobhiḥ sumaḻīko bhavatu viśvavedāḥ /*
*bādhatāṁ dveṣo amayaṁ kṛṇotu suvīryasya patayaḥ syāma //12 //*
*tasya vayaṁ sumatau yiāyasyāpi bhadre saumanase syāma /*
*sa sutrāmā svavām̐ indro asme arāchchid dveṣaḥ sanutaryuyotu //13 //*
*ava tve indra pravato normirgiro brahmāṇi niyuto dhavante /*
*urū na rādhaḥ savanā purūṇyapo gā vajrinyuvase samindūn //14 //*
*ka ī stavatkaḥ pṛṇātko yajāte yadugraminmaghavā viśvahāvet /*
*pādāviva praharannanyamanyaṁ kṛṇoti pūrvamaparaṁ śachībhiḥ //15 //*
*śṛṇve vīra ugramugraṁ damāyannanyamanyamatineṇīyamānaḥ /*
*edhamānad viḻubhayasya rājā choṣkūyate viśa indro manuṣyān //16 //*
*parā pūrveṣāṁ sakhyā vṛṇakti vitarturāṇo aparebhireti /*
*anānubhūtīravadhūnvānaḥ pūrvīrindraḥ śaradastartarīti //17 //*
*rūpaṁrūpaṁ pratirūpo babhūva tadasya rūpaṁ pratichakṣaṇāya /*
*indro māyābhiḥ pururūpa īyate yuktā hyasya harayaḥ śatā daśa //18 //*
*yujāno haritā rathe bhūri tvaṣṭeha rājati /*
*ko viśvāhā dviṣataḥ pakṣa āsata utāsīneṣu sūriṣu //19 //*

ऋ. (Rv.) ६.४७.२१

दिवे दिवे सदृशीरन्यमर्द्ध कृष्णा असेधदप सद्मनो जाः ।
अहन्दासा वृषभो वस्नयन्तोदव्रजे वर्चिनं शम्बरं च ॥२१॥
*dive dive sadṛśīranyamarddha kṛṣṇā asedhadapa sadmano jāḥ /*
*ahandāsā vṛṣabho vasnayantodavraje varchinaṁ śambaraṁ cha //21 //*

य. (Yv.)२०.५०-५२

त्रातारमिन्द्रमवितार मिन्द्रंहवेहवे सुहवंशूरमिन्द्रम् ।
ह्वयामि शक्रं पुरुहूतमिन्द्रंस्वस्ति नो मघवा धातिव्न्द्रः ॥५०॥
इन्द्रः सुत्रामा स्ववाँश्ऽ अवोभिः सुमृडीको भवतु विश्ववेदाः बाधतां ।
द्वेषोऽअभयं कृणोतु सुवीर्यस्य पतयः स्याम ॥५१॥
तस्य वयंसुमतौ यियस्यापि भद्रे सौमनसे स्याम ।
स सुत्रामा स्ववाँश्ऽ इन्द्रोऽअस्मेऽआराच्चिद् द्वेषः सनुतर्युयोतु ॥५२॥
*trātāramindramavitāra mindraṁhavehave suhavaṁśūramindram /*
*hnayāmi śakraṁ puruhūtamindraṁsvasti no maghavā dhātivndraḥ //50 //*
*indraḥ sutrāmā svavām̐ś' avobhiḥ sumṛḍīko bhavatu viśvavedāḥ bādhatāṁ /*
*dveṣo'abhayaṁ kṛṇotu suvīryasya patayaḥ syāma //51 //*
*tasya vayaṁsumatau yiāyasyāpi bhadre saumanase syāma /*
*sa sutrāmā svavām̐ś' indro'asme'ārāchchid dveṣaḥ sanutaryuyotu //52 //*

२. दुन्दुभिः (Dundubhiḥ) - ऋ. (Rv.) ६.४७.२९-३०

उप श्वासय पृथिवीमुत द्यां पुरुत्रा ते मनुतां विष्ठितं जगत् ।
स दुन्दुभे सजूरिन्द्रेण देवैर्दूराद्दवीयो अप सेध शत्रून् ॥२९॥
आ क्रन्दय बलमोजो न आ धा निः ष्टनिहि दुरिता बाधमानः ।
अप प्रोथ दुन्दुभे दुच्छुना इत इन्द्रस्य मुष्टिरसि वीळयस्व ॥३०॥
*upa śvāsaya pṛthivīmuta dyāṁ purutrā te manutāṁ viṣṭhitaṁ jagat /*
*sa dundubhe sajūrindreṇa devairdūrāddavīyo apa sedha śatrūn //29 //*

*ā krandaya balamojo na ā dhā niḥ ṣṭanihi duritā bādhamānaḥ /*
*apa protha dundubhe duchchhunā ita indrasya muṣṭirasi vīḷayasva //30 //*

३. दुन्दुभिः इन्द्रश्च (Dundubhiḥ Indraścha) - ऋ. (Rv.) ६.४७.३१

आमूरज प्रत्यावर्तयेमाः केतुमद् दुन्दुभिर्वावदीति ।
समश्वपर्णश्चरन्ति नो नरोऽस्माकमिन्द्र रथिनो जयन्तु ॥३१॥
*āmūraja pratyāvartayemāḥ ketumad dundubhirvāvadīti /*
*samaśvaparṇaścharanti no naro'smākamindra rathino jayantu //31 //*

४. देवभूमिः बृहस्पति-इन्द्रः सोम (Devabhūmiḥ Bṛhaspati-Indraḥ Soma) - ऋ. (Rv.) ६.४७.२०

अगव्यूति क्षेत्रमागन्म देवा उर्वी सती भूमिरंहूरणाभूत् ।
बृहस्पते प्र चिकित्सा गविष्टावित्था सते जरित्र इन्द्र पन्थाम् ॥२०॥
*agavyūti kṣetramāganma devā urvī satī bhūmiraṁhūraṇābhūt /*
*bṛhaspate pra chikitsā gaviṣṭāvitthā sate jaritra indra panthām //20 //*

५. प्रस्तोकस्य सार्जयस्य दानस्तुतिः (Prrastokasya Sārjayasya Dānastutiḥ) - ऋ. (Rv.) ६.४७.२२-२५

प्रस्तोक इन्नु राधसस्त इन्द्र दश कोशयीर्दश वाजिनोऽदात् ।
दिवोदासादतिथिग्वस्य राधः शाम्बरं वसु प्रत्यग्रभीष्म ॥२२॥
दशाश्वन्दश कोशान्दश वस्त्राधिभोजना ।
दशो हिरण्यपिण्डान्दिवोदासादसानिषम् ॥२३॥
दश रथान्प्रष्टिमतः शतं गा अथर्वभ्यः। अश्वथः पायवेऽदात् ॥२४॥
महि राधो विश्वजन्यं दधानान् भरद्वाजान्त्सांर्जयो अभ्ययष्ट ॥२५॥
*prastoka innu rādhasasta indra daśa kośayīrdaśa vājino'dāt /*
*divodāsādatithigvasya rādhaḥ śāmbaraṁ vasu pratyagrabhīṣma //22 //*
*daśāśvandaśa kośāndaśa vastrādhibhojanā /*
*daśo hiraṇyapiṇḍāndivodāsādasāniṣam //23 //*
*daśa rathānpraṣṭimataḥ śataṁ gā atharvabhyaḥ / aśvathaḥ pāyave'dāt //24 //*
*mahi rādho viśvajanyaṁ dadhānān bharadvājāntsāṁrjayo abhyayaṣṭa //25 //*

६. रथः (Rathaḥ) - ऋ. (Rv.) ६.४७.२६-२८

वनस्पते वीड्वंगो हि भूया अस्मत्सखा प्रतरणः सुवीरः ।
गोभिः सन्नद्धो असि वीळयस्वास्थाता ते जयतु जेत्वानि ॥२६॥
दिवस्पृथिव्याः पर्योज उद्धृतं वनस्पतिभ्यः पर्याभृतं सहः ।
अपामोज्मानं परि गोभिरावृतमिन्द्रस्य वज्रं हविषा रथं यज ॥२७॥
इन्द्रस्य वज्रो मरुतामनीकं मित्रस्य गर्भो वरुणस्य नाभिः ।
सेमां नो हव्यदातिं जुषाणो देव रथ प्रति हव्या गृभाय ॥२८॥
*vanaspate vīḍvaṁgo hi bhūyā asmatsakhā prataraṇaḥ suvīraḥ /*
*gobhiḥ sannaddho asi vīḷayasvāsthātā te jayatu jetvāni //26 //*
*divaspṛthivyāḥ paryoja udbhṛtaṁ vanaspatibhyaḥ paryābhṛtaṁ sahaḥ /*
*apāmojmānaṁ pari gobhirāvṛtamindrasya vajraṁ haviṣā rathaṁ yaja //27 //*
*indrasya vajro marutāmanīkaṁ mitrasya garbho varuṇasya nābhiḥ /*
*semāṁ no havyadātiṁ juṣāṇo deva ratha prati havyā gṛbhāya //28 //*

७. सोमः (Somaḥ) - ऋ. (Rv.) ६.४७.१-५

स्वादुष्किलायं मधुमाँ उतायं तीव्रः किलायं रसवाँ उतायम् ।
उतो न्व१स्य पपिवांसमिन्द्रं न कश्चन सहत आहवेषु ॥१॥
अयं स्वादुरिह मदिष्ठ आस यस्येन्द्रो वृत्रहत्ये ममाद ।
पुरूणि यश्च्यौत्ना शम्बरस्य वि नवतिं नव च द३ हन् ॥२॥
अयं मे पीत उदियर्ति वाचमयं मनीषमुशतीमजीगः ।

अयं षळुर्वीरमिमीत धीरो न याभ्यो भुवनं कच्चनारे ॥३॥
अयं स यो वरिमाणं पृथिव्या वर्ष्माणं दिवो अकृणोदयं सः ।
अयं पीयूषं तिसृषु प्रवत्सु सोमो दाधारोर्व१न्तरिक्षम् ॥४॥
अयं विदच्चित्रदृशीकर्मणः शुक्रसद्मनामुषसामनीके ।
अयं महान्महता स्कम्भनेनोद् द्यामस्तभ्नाद् वृषभो मरुतवान् ॥५॥
*svāduṣkilāyaṁ madhumām̐ utāyaṁ tīvraḥ kilāyaṁ rasavām̐ utāyam /*
*uto nva1sya papivāṁsamindraṁ na kaśchana sahata āhaveṣu //1 //*
*ayaṁ svāduriha madiṣṭha āsa yasyendro vṛtrahatye mamāda /*
*purūṇi yaśchyautnā śambarasya vi navatiṁ nava cha da3 han //2 //*
*ayaṁ me pīta udiyarti vāchamayaṁ manīṣamuśatīmajīgaḥ /*
*ayaṁ ṣaḻurvīramimīta dhīro na yābhyo bhuvanaṁ kachchanāre //3 //*
*ayaṁ sa yo varimāṇaṁ pṛthivyā varṣmāṇaṁ divo akṛṇodayaṁ saḥ /*
*ayaṁ pīyūṣaṁ tisṛṣu pravatsu somo dādhārorva1ntarikṣam //4 //*
*ayaṁ vidachchitradṛśīkarmaṇaḥ śukmadmanāmuṣasāmanīke /*
*ayaṁ mahānmahatā skambhanenod dyāmastabhnād vṛṣabho marutavān //5 //*

## २०८. गातुर् आत्रेयः (Gātur Ātreyaḥ)

१. इन्द्रः (Indraḥ) - ऋ. (Rv.) ५.३२.१-१२; सा. (Sv.) ३१५

ऋ. (Rv.) ५.३२.१-१२

अदर्दरुत्समसृजो वि खानि त्वमर्णवान्बद्बधानाँ अरम्णाः ।
महान्तमिन्द्र पर्वतं वि यद्वः सृजो वि धारा अव दानवं हन् ॥१॥
त्वमुत्साँ ऋतुभिर्बद्बधानाँ अरंह ऊधः पर्वतस्य वज्रिन् ।
अहिं चिदुग्र प्रयुतं शयानं जघन्वाँ इन्द्र तविषीमधत्थाः ॥२॥
त्यस्य चिन्महतो निर्मृगस्य वधर्जघान् तविषीभिरिन्द्रः ।
य एक इदप्रतिर्मन्यमान आदस्मादन्यो अजनिष्ट तव्यान् ॥३॥
त्यं चिदेषां स्वधया मदन्तं मिहो नपातं सुवृधं तमोगाम् ।
वृषप्रभर्मा दानवस्य भामं वज्रेण वज्री नि जघान् शुष्णम् ॥४॥
त्यं चिदस्य क्रतुभिर्निषत्तममर्मणो विददिदस्य मर्म ।
यदीं सुक्षत्र प्रभृता मदस्य युयुत्सन्तं तमसि हर्म्ये धाः ॥५॥
त्यं चिदित्था कत्पयं शयानमसूर्ये तमसि वावृधानम् ।
तं चिन्मन्दानो वृषभः सुतस्योच्चैरिन्द्रो अपगूर्या जघान ॥६॥
उद्यदिन्द्रो महते दानवाय वधर्यमिष्ट सहो अप्रतीतम् ।
यदीं वज्रस्य प्रभृतौ ददाभ विश्वस्य जन्तोरधमं चकार ॥७॥
त्यं चिदर्णं मधुपं शयानमसिन्वं वव्रं मह्याददुग्रः ।
अपादमत्रं महता वधेन नि दुर्योण आवृणङ् मृध्रवाचम् ॥८॥
को अस्य शुष्मं तविषीं वरात एको धना भरते अप्रतीतः ।
इमे चिदस्य ज्रयसो नु देवी इन्द्रस्यौजसो भियसा जिहाते ॥९॥
न्यस्मै देवी स्वधितिर्जिहीत इन्द्राय गातुरुशतीव येमे ।
सं यदोजो युवते विश्वमाभिरनु स्वधाव्ने क्षितयो नमन्त ॥१०॥
एकं नु त्वा सत्पतिं पांचजन्यं जातं श्रृणोमि यशसं जनेषु ।
तं मे जगृभ्र आशसो नविष्ठं दोषा वस्तोर्हवमानास इन्द्रम् ॥११॥
एवा हि त्वामृतुथा यातयन्तं मघा विप्रेभ्यो ददतं श्रृणोमि ।
किं ते ब्रह्माणो गृहते सखायो ये त्वाया निदधुः काममिन्द्र ॥१२॥
*adardarutmasṛjo vi khāni tvamarṇavānvadbadhānām̐ aramṇāḥ /*
*mahāntamindra parvataṁ vi yadvaḥ sṛjo vi dhārā ava dānavaṁ han //1 //*
*tvamutsām̐ ṛtubhirbadbadhānām̐ araṁha ūdhaḥ parvatasya vajrin /*
*ahiṁ chidugra prayutaṁ śayānaṁ jaghanvām̐ indra taviṣīmadhatthāḥ //2 //*
*tyasya chinmahato nirmṛgasya vadharjaghān taviṣībhirindraḥ /*

*ya eka idapratirmanyamāna ādasmādanyo ajaniṣṭa tavyān ॥3 ॥*
*tyaṁ chideṣāṁ svadhayā madantaṁ miho napātaṁ suvṛdhaṁ tamogām ।*
*vṛṣaprabharmā dānavasya bhāmaṁ vajreṇa vajrī ni jaghān śuṣṇam ॥4 ॥*
*tyaṁ chidasya kratubhirniṣattamamarmaṇo vidadidasya marma ।*
*yadīṁ sukṣatra prabhṛtā madasya yuyutsantaṁ tamasi harmye dhāḥ ॥5 ॥*
*tyaṁ chiditthā katpayaṁ śayānamasūrye tamasi vāvṛdhānam ।*
*taṁ chinmandāno vṛṣabhaḥ sutasyochchairindro apagūryā jaghāna ॥6 ॥*
*udyadindro mahate dānavāya vadharyabhiṣṭa saho apratītam ।*
*yadīṁ vajrasya prabhṛtau dadābha viśvasya jantoradhamaṁ chakāra ॥7 ॥*
*tyaṁ chidarṇa madhupaṁ śayānamasinvaṁ vavraṁ mahyādadugraḥ ।*
*apādamatraṁ mahatā vadhena ni duryoṇa āvṛṇaṅ mṛdhravācham ॥8 ॥*
*ko asya śuṣmaṁ taviṣīṁ varāta eko dhanā bharate apratītaḥ ।*
*ime chidasya jrayaso nu devī indrasyaujaso bhiyasā jihāte ॥9 ॥*
*nyasmai devī svadhitirjihīta indrāya gāturuśatīva yeme ।*
*saṁ yadojo yuvate viśvamābhiranu svadhāvne kṣitayo namanta ॥10 ॥*
*ekaṁ nu tvā satpatiṁ pāṁchajanyaṁ jātaṁ śṛṇomi yaśasaṁ janeṣu ।*
*taṁ me jagṛbhra āśaso naviṣṭhaṁ doṣā vastorhavamānāsa indram ॥11 ॥*
*evā hi tvāmṛtuthā yātayantaṁ maghā viprebhyo dadataṁ śṛṇomi ।*
*kiṁ te brahmāṇo gṛhate sakhāyo ye tvāyā nidadhuḥ kāmamindra ॥12 ॥*

सा. (Sv.) ३१५

आदर्दरुत्समसृजो वि खानि त्वमर्णवान्बद्बधानाँ अरम्णाः ।
महान्तमिन्द्र पर्वतं वि यद्वः सृजद्धारा अव यद्दानवान्हन् ॥३ ॥
*ādardarutsamasṛjo vi khāni tvamarṇavānbadvadhānāṁ̐ aramṇāḥ ।*
*mahāntamindra parvataṁ vi yadvaḥ sṛjaddhārā ava yaddānavānhan ॥3 ॥*

## २०९. गाथी कौशिकः (Gāthī Kauśikaḥ)

१. अग्निः (Agniḥ) - ऋ. (Rv.) ३.१९.१-५; ३.२१.१-५

ऋ. (Rv.) ३.१९.१-५

अग्निं होतारं प्र वृणे मियेधे गृतसं कविं विश्वविदममूरम् ।
स नो यक्षद्देवतात यजीयन् राये वाजाय वनते मघानि ॥१ ॥
प्र ते अग्ने हविष्मतीमियर्म्यच्छा सुद्युम्नां रातिनीं घृताचीम् ।
प्रदक्षिणिद्देवतातिमुराणः । सं रातिभिर्वसुभिर्यामश्रेत् ॥२ ॥
स तेजीयसा मनसा त्वोत उत शिक्ष स्वपत्यस्य शिक्षोः ।
अग्ने रायो नृतमस्य प्रभूतौ भूयाम ते सुष्टुतयश्च वस्वः ॥३ ॥
भूरीणि हि त्वे दधिरे अनीकाग्ने देवस्य यज्यवो जनासः ।
स आ वह देवतातिं यविष्ठ शर्धो यदद्य दिव्यं यजासि ॥४ ॥
यत्त्वा होतारमनजन्मियेधे निषादयन्तो यजथाय देवाः ।
स त्वं नो अग्नेऽवितेह बोध्यधि श्रवांसि धेहि नस्तनूषु ॥५ ॥
*agniṁ hotāraṁ pra vṛṇe miyedhe gṛtasaṁ kaviṁ viśvavidamamūram ।*
*sa no yakṣaddevatāta yajīyan rāye vājāya vanate maghāni ॥1 ॥*
*pra te agne haviṣmatīmiyarmyachchhā sudyumnāṁ rātinīṁ ghṛtāchīm ।*
*pradakṣiṇiddevatātimurāṇaḥ । saṁ rātibhirvasubhiryāmaśret ॥2 ॥*
*sa tejīyasā manasā tvota uta śikṣa svapatyasya śikṣoḥ ।*
*agne rāyeā nṛtamasya prabhūtau bhūyāma te suṣṭutayaścha vasvaḥ ॥3 ॥*
*bhūrīṇi hi tve dadhire anīkāgne devasya yajyavo janāsaḥ ।*
*sa ā vaha devatātiṁ yaviṣṭha śardho yadadya divyaṁ yajāsi ॥4 ॥*
*yattvā hotāramanajanmiyedhe niṣādayanto yajathāya devāḥ ।*
*sa tvaṁ no agne'viteha bodhyadhi śravāṁsi dhehi nastanūṣu ॥5 ॥*

ऋ. (Rv.) ३.२१.१-५

इमं नो याममृतेषु धेहीमा हव्या जातवेदो जुषस्व ।
स्तोकानामग्ने मेदसो घृतस्य होतः प्राशान प्रथमो निषद्य ॥१॥
घृतवन्तः पावक ते स्तोकाः श्चोतन्ति मेदसः ।
स्वधर्मन्देववीतये श्रेष्ठं नो धेहि वार्यम् ॥२॥
तुभ्यं स्तोका घृतश्चुतोऽग्ने विप्राय सन्त्य ।
ऋषि श्रेष्ठः समिध्यसे यास्य प्राविता भव ॥३॥
तुभ्यं श्चोतन्त्यध्रिगो शचीवः स्तोकासो अग्ने मेदसो घृतस्य ।
कविशस्तो बृहता भानुनागा हव्या जुषस्व मेधिर ॥४॥
ओजिष्ठं ते मध्यतो मेद उदभृतं प्र ते वयं ददामहे ।
श्चोतन्ति ते वसो स्तोका अधि त्वचि प्रति तान्देवशो विहि ॥५॥

*imaṁ no yāmamṛteṣu dhehīmā havyā jātavedo juṣasva /*
*stokānāmagne medaso ghṛtasya hotaḥ prāśāna prathamo niṣadya //1 //*
*ghṛtavantaḥ pāvaka te stokāḥ śrotanti medasaḥ /*
*svadharmandevavītaye śreṣṭhaṁ no dhehi vāryam //2 //*
*tubhyaṁ stokā ghṛtaśchuto'gane viprāya santya /*
*ṛṣi śreṣṭhaḥ samidhyase yāsya prāvitā bhava //3 //*
*tubhyaṁ śchotantyadhrigo śachīvaḥ stokāso agne medaso ghṛtasya /*
*kaviśasto bṛhatā bhānunāgā havyā juṣasva medhira //4 //*
*Ojiṣṭhaṁ te madhyato meda udabhṛtaṁ pra te vayaṁ dadāmahe /*
*śchotanti te vaso stokā adhi tvachi prati tāndevaśo vihi //5 //*

२. पुरीष्या अग्नये (Purīṣyā Agnaye) - ऋ. (Rv.) ३.२२.१-५

अयं सो अग्निर्यस्मिन्त्सोममिन्द्रः सुतं दधे जठरे वावशानः ।
सहस्रिणं वाजमत्यं न सप्तिं ससवान्त्सन्त्स्तूयसे जातवेदः ॥१॥
अग्ने यत्ते दिवि वर्चः पृथिव्यां यदोषधीष्वप्स्वा यजत्र ।
येनान्तरिक्षमुर्वाततन्थ त्वेषः स भानुरर्णवो नृचक्षाः ॥२॥
अग्ने दिवो अर्णमच्छा जिगास्यच्छा देवाँ ऊचिषे धिष्ण्या ये ।
या रोचने परस्तात्सूर्यस्य याश्चावस्तादुपतिष्ठन्त आपः ॥३॥
पुरीष्यासो अग्नयः प्रावणोभिः सजोषसः ।
जुषन्तां यामद्रुहोऽनमीवा इषो महीः ॥४॥
इळामग्ने पुरुदंसं सनिं गोः शश्वत्तमं हवमानाय साध ।
स्यान्नः सूनुस्तनयो विजावाग्ने सा ते सुमतिर्भूत्वस्मे ॥५॥

*ayaṁ so agniryasmintsomamindraḥ sutaṁ dadhe jaṭhare vāvaśānaḥ /*
*sahasriṇaṁ vājamatyaṁ na saptiṁ sasavāntsantstūyase jātavedaḥ //1 //*
*agne yatte divi varchaḥ pṛthivyāṁ yadoṣadhīṣvapsvā yajatra /*
*yenāntarikṣamurvātatantha tveṣaḥ sa bhānurarṇavo nṛchakṣāḥ //2 //*
*agne divo arṇamachchhā jigāsyachchhā devām̐ ūchiṣe dhiṣṇyā ye /*
*yā rochane parastātsūryasya yāśchāvastādupatiṣṭhanta āpaḥ //3 //*
*purīṣyāso agnayaḥ prāvaṇobhiḥ sajoṣasaḥ /*
*juṣantāṁ yāmadruho'namīvā iṣo mahīḥ //4 //*
*iḻāmagne purudaṁsaṁ saniṁ goḥ śaśvattamaṁ havamānāya sādha /*
*syānnaḥ sūnustamayo vijāvāgne sā te sumatirbhūtvasme //5 //*

३. विश्वेदेवाः (Viśvedevāḥ) - ऋ. (Rv.) ३.२०.१-५

अग्निमुषसमश्विना दधिक्रां व्युष्टिषु हवते वह्निरुक्थैः ।
सुज्योतिषो नः शृण्वन्तु देवाः सजोषसो अध्वरं वावशानाः ॥१॥
अग्ने त्री ते वाजिना त्री षधस्था तिस्रस्ते जिह्वा ऋतजात पूर्वीः ।
तिस्र उ ते तन्वो देववातास्ताभिर्नः पाहि गिरो अप्रयुच्छन् ॥२॥

अग्ने भूरीणि तव जातवेदो देव स्वधावोऽमृतस्य नाम ।
याश्च माया मायिनां विश्वमिन्व त्वे पूर्वीः संदधुः पृष्टबन्धो ॥३॥
अग्निर्नेता भग इव क्षितीनां दैवीनां देव ऋतुपा ऋतावा ।
स वृत्रहा सनयो विश्ववेदाः पर्षद्विश्वाति दुरिता गृणन्तम् ॥४॥
दधिक्रामग्निमुषसं च देवीं बृहस्पतिं सवितारं च देवम् ।
अश्विना मित्रावरुणा भगं च वसून रुद्राँ आदित्याँ इह हुवे ॥५॥
*agnimuṣasamaśvinā dadhikrāṁ vyuṣṭiṣu havate vahnirukthaiḥ /*
*sujyotiṣo naḥ śṛṇvantu devāḥ sajoṣaso adhvaraṁ vāvaśānāḥ //1 //*
*agne trī te vājinā trī ṣadhasthā tisraste jihnā ṛtajāta pūrvīḥ /*
*tisra u te tanvo devavātāstābhirnaḥ pāhi giro aprayuchchhan //2 //*
*agne bhūrīṇi tava jātavedo deva svadhāvo'mṛtasya nāma /*
*yāścha māyā māyināṁ viśvaminva tve pūrvīḥ saṁdadhuḥ pṛṣṭabandho //3 //*
*agnirnetā bhaga iva kṣitīnāṁ daivīnāṁ deva ṛtupā ṛtāvā /*
*sa vṛtrahā sanayo viśvavedāḥ parṣadviśvāti duritā gṛṇantam //4 //*
*dadhikrāmagnimuṣasaṁ cha devīṁ bṛhaspatiṁ savitāraṁ cha devam /*
*aśvinā mitrāvaruṇā bhagaṁ cha vasūna rudrām̐ ādityām̐ iha huve //5 //*

## २१०. गार्ग्यः (Gārgyaḥ)

१. अग्निः (Agniḥ) - अ. (Av.) ६.४९.१-३

नहि ते अग्ने तन्वः क्रूरमानंश मर्त्यः ।
कपिर्बभस्ति तेजनं स्वं जरायु गौरिव ॥१॥
शीर्ष्णा शिरोऽप्ससाप्सो अर्दयन्नंशून् बभस्ति हरितेभिरासभिः ॥२॥
सुपर्णा वाचमक्रतोप द्यव्याखरे कृष्णा इषिरा अनर्तिषुः ।
नि यन्नियन्त्युपरस्य निष्कृतिं पुरू रेतो दधिरे सूर्यश्रितः ॥३॥
*nahi te agne tanvaḥ krūramānaṁśa martyaḥ /*
*kapirbabhasti tejanaṁ svaṁ jarāyu gauriva //1 //*
*śīrṣṇā śiro'psasāpso ardayannaṁśūn babhasti haritebhirāsabhiḥ //2 //*
*suparṇā vāchamakratopa dyavyākhare kṛṣṇā iṣirā anartiṣuḥ /*
*ni yanniyantyuparasya niṣkṛtiṁ purū reto dadhire sūryaśritaḥ //3 //*

२. नक्षत्राणि (Nakṣatrāṇi) - अ. (Av.) १९.७.१-५; १९.८.१-७

अ. (Av.) १९.७.१-५

चित्राणि साकं दिवि रोचनानि सरीसृपाणि भुवने जवानि ।
तुर्मिशं सुमतिमिच्छमानो अहानि गीर्भिः सपर्यामि नाकम् ॥१॥
सुहवमग्ने कृत्तिका रोहिणी चास्तु भद्रं मृगशिरः शमार्द्रा ।
पुनर्वसू सूनृता चारु पृष्यो भानुराश्लेषा अयनं मघा मे ॥२॥
पुण्यं पूर्वा फलगुन्यौ चात्र हस्तश्चित्रा शिवाा स्वाति सुखो मे अस्तु।
राधे विशाखे सुहवानुराधा ज्येष्ठा सुनक्षत्रमिरिष्ट मूलम् ॥३॥
अन्नं पूर्वा रासतां मे अषाढा ऊर्ज देवयुत्तरा आ वहन्तु ।
अभिजिन्मे रासतां पुण्यमेव श्रवणः श्रविष्ठाः कुर्वतां सुपुष्टिम् ॥४॥
आ मे महच्छतभिषग् वरीय आ मे द्वया प्रोष्ठपदा सुशर्म ।
आ रेवती चाश्वयुजौ भगं म आ मे रयिं भरण्य आ वहन्तु ॥५॥
*chitrāṇi sākaṁ divi rochanāni sarīsṛpāṇi bhuvane javāni /*
*turmiśaṁ sumatimichchhamāno ahāni gīrbhiḥ saparyāmi nākam //1 //*
*suhavamagne kṛttikā rohiṇī chāstu bhadraṁ mṛgaśiraḥ śamārdrā /*
*punarvasū sūnṛtā chāru pṛṣyo bhānurāśleṣā ayanaṁ maghā me //2 //*
*puṇyaṁ pūrvā rphalagunyau chātra hastaśchitrā śivāā svāti sukho me astu /*
*rādhe viśākhe suhavānurādhā jyeṣṭhā sunakṣatramiriṣṭa mūlam //3 //*
*annaṁ pūrvā rāsatāṁ me aṣāḍhā ūrja devayuttarā ā vahantu /*

*abhijinme rāsatāṁ puṇyameva śravaṇaḥ śraviṣṭhāḥ kurvatāṁ supuṣṭim  //4 //*
*ā me mahachchhatabhiṣag varīya ā me dvayā proṣṭhapadā suśarma  /*
*ā revatī chāśvayujau bhagaṁ ma ā me rayi bharaṇya ā vahantu  //5 //*

अ. (Av.) १९.८.१-७

यानि नक्षत्राणि दिव्य१न्तरिक्षे अप्सु भूमौ यानि नगेषु दिक्षु ।
प्रकल्पयंश्चन्द्रमा यान्येति सर्वाणि ममैतानि शिवानि सन्तु ॥१॥
अष्टाविंशानि शिवानि शग्मानि सह योगं भजन्तु मे ।
योगं प्र पद्ये क्षेमं च क्षेमं प्र पद्ये योगं च नमोऽहोरात्राभ्यामस्तु ॥२॥
स्वस्तितं मे सुप्रातः सुसायं सुदिवं सुमृगं सुशकुनं मे अस्तु ।
सुहवमग्ने स्वस्त्य१मर्त्य गतवा पुनरायाभिन्दन् ॥३॥
अनुहवं परिहवं परिवादं परिक्षवम् ।
सर्वैर्मे रिक्तकुम्भान् परा तान्त्सवितः सुव ॥४॥
अपपापं परिक्षवं पुण्यं भक्षीमहि क्षवम् ।
शिवा ते पाप नासिकां पुण्यगश्चाभि मेहताम् ॥५॥
इमा या ब्रह्मणस्पते विषूचीर्वात ईरते ।
सध्रीचीरिन्द्र ताः कृत्वा मह्यं शिवतमास्कृधि ॥६॥
स्वस्ति नो अस्त्वभयं नो अस्तु नमोऽहोरात्राभ्यामस्तु ॥७॥

*yāni nakṣatrāṇi divya1ntarikṣe apsu bhūmau yāni nageṣu dikṣu  /*
*prakalpayaṁśchandramā yānyeti sarvāṇi mamaitāni śivāni santu  //1 //*
*aṣṭāviṁśāni śivāni śagmāni saha yogaṁ bhajantu me  /*
*yogaṁ pra padye kṣemaṁ cha kṣemaṁ pra padye yogaṁ cha namo'horātrābhyāmastu //2 //*
*svastitaṁ me suprātaḥ susāyaṁ sudivaṁ sumṛgaṁ suśakunaṁ me astu  /*
*suhavamagne svastya1martya gatavā punarāyābhindan  //3 //*
*anuhavaṁ parihavaṁ parivādaṁ parikṣavam  /*
*sarvairme riktakumbhān parā tāntsavitaḥ suva  //4 //*
*apapāpaṁ parikṣavaṁ puṇyaṁ bhakṣīmahi kṣavam  /*
*śivā te pāpa nāsikāṁ puṇyagaśchābhi mehatām  //5 //*
*imā yā brahmaṇaspate viṣūchīrvāta īrate  /*
*sadhrīchīrindra tāḥ kṛtvā mahyaṁ śivatamāskṛdhi  //6 //*
*svasti no astvabhayaṁ no astu namo'horātrābhyāmastu  //7 //*

## २११. गालवः (Gālavaḥ)

१. अग्निः (Agniḥ) - य. (Yv.)१८.५७

इष्टो ऽअग्निराहुतः पिपर्त्तु नऽइष्टंहविः। स्वगेदं देवेभ्यो नमः ॥५७ ॥

*iṣṭo 'agnirāhutaḥ piparttu na'iṣṭaṁhaviḥ / svagedaṁ devebhyo namaḥ  //57  //*

२. इन्द्रः (Indraḥ) - य. (Yv.)१८.५४-५५

दिवो मूर्द्धासि पृथिव्या नाभिरूर्गपामोषधीनाम् ।
विश्वायुः शर्म सप्रथा नमस्पथे ॥५४॥
विश्वस्य मूर्द्धन्नधि तिष्ठसि श्रितः समुद्रे ते हृदयमप्स्वायुरपो दत्तोदधि भिन्त।
दिवस्पर्जन्यादन्तरिक्षात्पृथिव्यास्ततो नो वृरष्ट्यव ॥५५॥

*divo mūrddhāsi pṛthivyā nābhirūrgapāmoṣadhīnām  /*
*viśvāyuḥ śarma saprathā namaspathe  //54 //*
*viśvasya mūrddhannadhi tiṣṭhasi śritaḥ samudre te hṛdayamapsvāyurapo dattodadhi bhinta / divasparjanyādantarikṣātpṛthivyāstato no vṛraṣṭyava  //55 //*

३. प्रजापतिः (Prajāpatiḥ) - य. (Yv.)१८.६१

उद्बुध्यस्वाग्ने प्रति जागृहि त्वमिष्टापूर्ते संसृजेथामयं च ।
अस्मिन्त्सधस्थेऽअध्युत्तरस्मिन् विश्वे देवा यजमानश्च सीदत ॥६१॥

*udbudhyasvāgne prati jāgṛhi tvamiṣṭāpūrte saṁsṛjethāmayaṁ cha ।*
*asmintsadhasthe'adhyuttarasmin viśve devā yajamānaścha sīdata ॥61॥*

४. याः (Yāḥ) - य. (Yv.)१८.५६

इष्टो याो भृगुभिराशीर्दा वसुभिः। तस्य नऽइष्टस्य प्रीतस्य द्रविणेहागमेः ॥५६॥

*iṣṭo yāo bhṛgubhirāśīrdā vasubhiḥ । tasya na'iṣṭasya prītasya draviṇehāgameḥ ॥56॥*

## २१२. गृत्समदः (Gṛtsamadaḥ)

१. अग्निः (Agniḥ) - अ. (Av.) २०.६७.५; य. (Yv.)११.२४; २७-२९; ३६; १७.७५; ८८

अ. (Av.) २०.६७.५

आ वक्षि देवाँ इह विप्र यक्षि चोशन् होतर्नि षदा योनिषु त्रिषु ।
प्रति वीहि प्रस्थितं सोम्यं मधु पिबाग्नीध्रात् तव भागस्य तृप्णुहि ॥५॥

*ā vakṣi devām̐ iha vipra yakṣi chośan hotarni ṣadā yoniṣu triṣu ।*
*prati vīhi prasthitaṁ somyaṁ madhu pibāgnīdhrāt tava bhāgasya tṛpṇuhi ॥5॥*

य. (Yv.)११.२४

आ विश्वतः प्रत्यंचं जिघर्म्यरक्षसा मनसा तज्जुषेत ।
तर्य्यश्री स्पृहयद्वर्णोऽअग्निर्नाभिमृशे तन्वा जर्भुराणः ॥२४॥

*ā viśvataḥ pratyaṁchaṁ jigharmyarakṣasā manasā tajjuṣeta ।*
*taryyaśrī spṛhayadvarṇo'agnirnābhimṛśe tanvā jarbhurāṇaḥ ॥24॥*

य. (Yv.)११.२७-२९

त्वमग्ने द्युभिस्त्वमाशुशुक्षणिस्त्वमद्भ्यस्त्वमश्मनस्परि ।
त्वं वनेभ्यस्त्वमोषधीभ्यस्त्वं नृणां नृपते जायसे शुचिः ॥२७॥
देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम्। पृथिव्याः सधस्थदग्निं पुरीष्यमंगिरस्वत् खनामि।
ज्योतिष्मन्तं त्वाग्ने सुप्रतीकमजस्रेण भानुना दीद्यतम्। शिवं प्रजाभ्योऽहिं सन्तं पृथिव्याः सधस्थादग्निं
पुरीष्यमंगिरस्वत् खनामः ॥२८॥
अपां पृष्ठमसि योनिरग्ने५ समुद्रमभितः पिन्वमानम्। वर्धमानो
महाँश्ऽआ च पुष्करे दिवो मात्रया वरिम्णा प्रथस्व ॥२९॥

*tvamagne dyubhistvamāśuśukṣaṇistvamadbhyastvamaśmanaspari ।*
*tvaṁ vanebhyastvamoṣadhībhyastvaṁ nṛṇāṁ nṛpate jāyase śuchiḥ ॥27॥*
*devasya tvā savituḥ prasave'śvinorbāhubhyāṁ pūṣṇo hastābhyām । pṛthivyāḥ sadhasthadagniṁ purīṣyamaṁgirasvat khanāmi । jyotiṣmantaṁ tvāgne supratīkamajasreṇa bhānunā dīdyatam । śivaṁ prajābhyo'hiṁ santaṁ pṛthivyāḥ sadhasthādagniṁ purīṣyamaṁgirasvat khanāmaḥ ॥28॥*
*apāṁ pṛṣṭhamasi yoniragne5 samudramabhitaḥ pinvamānam । vardhamāno mahām̐ś'ā cha puṣkare divo mātrayā varimṇā prathasva ॥29॥*

य. (Yv.)११.३६

नि होता होतृषदने विदानस्त्वेषा दीदिवाँश्ऽअसदत्सुदक्षः ।
अदब्धव्रतप्रमतिर्वसिष्ठः सहस्रम्भरः शुचिजिह्वोऽअग्निः ॥३६॥

*ni hotā hotṛṣadane vidānastveṣeā dīdivām̐ś'asadatsudakṣaḥ ।*
*adabdhavratapramatirvasiṣṭhaḥ sahasrambharaḥ śuchijihno'agniḥ ॥36॥*

य. (Yv.)१७.७५

विधेम ते परमे जन्मन्नग्ने विधेम स्तोमैस्वरे सधस्थे ।
यस्माद्योनेरुदारिथा यजे तं प्र त्वे हवीं षि जुहुरे समिद्धे ॥७५॥

*vidhema te parame janmannagne vidhema stomaisvare sadhasthe ।*
*yasmādyonerudārithā yaje taṁ pra tve havīṁ ṣi juhure samiddhe ॥75॥*

य. (Yv.)१७.८८

घृतं मिमिक्षे घृतमस्य योनिर्घृते श्रितो घृतम्वस्य धाम ।
अनुष्वधमा वह मादयस्व स्वाहाकृतं वृषभ वक्षि हव्यम्॥८८॥

*ghṛtaṁ mimikṣe ghṛtamasya yonirghṛte śrito ghṛtamvasya dhāma* ।
*anuṣvadhamā vaha mādayasva svāhākṛtaṁ vṛṣabha vakṣi havyam ॥88 ॥*

२. अश्विनौ (Aśvinau) - य. (Yv.)२०.८१-८३

गोमदू षु णासत्याश्वावद्यातमश्विना। वर्त्ती रुद्रा नृपाय्यम् ॥८१॥
न यत्परो नान्तरऽआदधर्षद्वृषण्वसू। दुःशंं सो मर्त्यो रिपूः ॥८२॥
ता नऽआ वोढमश्विना रयिं पिशंगसन्दृशम्। धिष्ण्या वरिवोविदम् ॥८३॥
*gomadū ṣu ṇāsatyāśvāvadyātamaśvinā । varttī rudrā nṛpāyyam ॥81 ॥*
*na yatparo nāntara'ādadharṣadvṛṣaṇvasū । duḥśaṁ so martyo ripūḥ ॥82 ॥*
*tā na'ā voḍhamaśvinā rayiṁ piśaṁgasandṛśam । dhiṣṇyā varivovidam ॥83 ॥*

३. इन्द्रः (Indraḥ) - अ. (Av.) २०.२०.५-७; २०.३४.१-१८; २०.५७.८-१०; २०.६७.६; २०.९५.१

अ. (Av.) २०.२०.५-७

इन्द्रो अंग महद् भयमभी षदप चुच्यवत्। स हि स्थिरो विचर्षणिः ॥५॥
इन्द्रश्च मृडयाति नो न नः पश्चादघं नशत्। भद्रं भवाति नः पुरः ॥६॥
इन्द्र आशाभ्यस्परि सर्वाभ्यो अभयं करत्। तेजा शत्रून् विचर्षणिः ॥७॥
*indro aṁga mahad bhayamabhī ṣadapa chuchyavat । sa hi sthiro vicharṣaṇiḥ ॥5 ॥*
*indraścha mṛḍayāti no na naḥ paśchādaghaṁ naśat । bhadraṁ bhavāti naḥ puraḥ ॥6 ॥*
*indra āśābhyaspari sarvābhyo abhayaṁ karat । tejā śatrūn vicharṣaṇiḥ ॥7 ॥*

अ. (Av.) २०.३४.१-१८

यो जात एव प्रथमो मनस्वान् देवो देवान् क्रतुना पर्यभूषत् ।
यस्य शुष्माद् रोदसी अभ्यसेतां नृम्णस्य मह्ना स जनास इन्द्रः ॥१॥
यः पृथिवीं व्यथमानामदृंहद् यः पर्वतान् प्रकुपिताँ अरम्णात् ।
यो अन्तरिक्षं विममे वरीयो यो द्यामस्तभ्नात् स जनास इन्द्रः ॥२॥
यो हत्वाहिमरिणात् सप्त सिन्धून् यो गा उदाजदपधा वलस्य ।
यो अश्मनोरन्तरग्निं जजान संवृक् समत्सु स जनास इन्द्रः ॥३॥
येनेमा विश्वा च्यवना कृतानि यो दासं वर्णमधरं गुहाकः ।
श्वघ्नीव यो जिगीवाँल्लक्षमाददर्यः पुष्टानि स जनास इन्द्रः ॥४॥
यं स्मा पृच्छन्ति कुह सेति घोरमुतेमाहुर्नैषो अस्तीत्येनम् ।
सो अर्यः पुष्टीर्विजइवा मिनाति श्रदस्मै धत्त स जनास इन्द्रः ॥५॥
यो रध्रस्य चोदिता यः कृशस्य यो ब्रह्मणो नाधमानस्य कीरेः ।
युक्तग्रावणो योविता सुशिप्रः सुतसोमस्य स जनास इन्द्रः ॥६॥
यस्याश्वासः प्रदिशि यस्य गावो यस्य ग्रामा यस्य विश्व रथासः ।
यः सूर्य आ उषसं जजान यो अपां नेता स जनास इन्द्रः ॥७॥
यं क्रन्दसी संयती विह्वयेते परेऽवर उभया अमित्राः ।
समानं चिद्रथमातस्थिवांसा नाना हवेते स जनास इन्द्रः ॥८॥
यस्मान्न ऋते विज्यन्ते जनासो यं युध्यमाना अवसे हवन्ते ।
यो विश्वस्य प्रतिमानं बभूव यो अच्युतच्युत् स जनास इन्द्र ॥९॥
यः शश्वतो मह्येनो दधानानमन्यमानांछर्वा जघान ।
यः शर्धते नानुददाति श्रृध्यां यो दस्योर्हन्ता स जनास इन्द्रः ॥१०॥
यः शम्बरं पर्वतेषु क्षियन्तं चत्वारिंश्यां शरद्यन्वविन्दत् ।
ओजायमानं यो अहिं जघान दानुं शयानं स जनास इन्द्रः ॥११॥
यः शम्बरं पर्यतरत् कसीभिर्योऽचारुकास्नापिबत् सुतस्य ।
अन्तर्गिरौ यजमानं बहुं जनं यस्मिन्नामूर्छत् स जनास इन्द्रः ॥१२॥
यः सप्तरश्मिर्वृषभस्तुविष्मानवासृजत् सर्तवे सप्त सिन्धून् ।
यो रौहिणमस्फुरद् वज्रबाहुर्द्यामारोहन्तं स जनास इन्द्रः ॥१३॥
द्यावा चिदस्मै पृथिवी नमेते शुष्माच्चिदस्य पर्वता भयन्ते ।

यः सोमपा निचितो वज्रबाहुर्यो वज्रहस्तः स जनास इन्द्रः ॥१४॥
यः सुन्वन्तमवति यः पचन्तं यः शंसन्तं यः शशमानमूती ।
यस्य ब्रह्म वर्धनं यस्य सोमो यस्येदं राधः स जनास इन्द्रः ॥१५॥
जातो व्यख्यत् पित्रोरुपस्थे भुवो न वेद जनितुः परस्य ।
स्तविष्यमाणो नो यो अस्मद् व्रता देवानां स जनास इनद्रः ॥१६॥
यः सोमकामो हर्यश्वः सूरिर्यस्माद् रेजन्ते भुवनानि विश्वः ।
यो जघान शम्वरं यश्च शुष्णं य एकवीरः स जनास इन्द्रः ॥१७॥
यः सुन्वते पचते दुध्र आ चिद् वाजं दर्दर्षि स किलासि सत्यः ।
वयं त इन्द्र विश्वह प्रियासः सुवीरासो विदथमा वदेम ॥१८॥

*yo jāta eva prathamo manasvān devo devān kratunā paryabhūṣat* ।
*yasya śuṣmād rodasī abhyasetāṁ nṛmṇasya mahnā sa janāsa indraḥ* ॥1॥
*yaḥ pṛthivīṁ vyathamānāmadṛṁhad yaḥ parvatān prakupitām̐ aramṇāt* ।
*yeā antarikṣaṁ vimame varīyo yo dyāmastabhnāt sa janāsa indraḥ* ॥2॥
*yo hatvāhimariṇāt sapta sindhūn yo gā udājadapadhā valasya* ।
*yo aśmanorantaragniṁ jajāna saṁvṛk samatsu sa janāsa indraḥ* ॥3॥
*yenemā viśvā chyavanā kṛtāni yo dāsaṁ varṇamadharaṁ guhākaḥ* ।
*śvadhnīva yo jigīvām̐llakṣamādadaryaḥ puṣṭāni sa janāsa indraḥ* ॥4॥
*yaṁ smā pṛchchhanti kuha seti ghoramutemāhurnaiṣo astītyenam* ।
*so aryaḥ puṣṭīrvijaivā mināti śradasmai dhatta sa janāsa indraḥ* ॥5॥
*yo radhrasya choditā yaḥ kṛśasya yo brahmaṇeā nādhamānasya kīreḥ* ।
*yuktagrāvaṇo yovitā suśipraḥ sutasomasya sa janāsa indraḥ* ॥6॥
*yasyāśvāsaḥ pradiśi yasya gāvo yasya grāmā yasya viśva rathāsaḥ* ।
*yaḥ sūrya ā uṣasaṁ jajāna yo apāṁ netā sa janāsa indraḥ* ॥7॥
*yaṁ krandasī saṁyatī vihnayete pare'vara ubhayā amitrāḥ* ।
*samānaṁ chidrathamātasthivāṁsā nānā havete sa janāsa indraḥ* ॥8॥
*yasmānna ṛte vijyante janāso yaṁ yudhyamānā avase havante* ।
*yo viśvasya pratimānaṁ babhūva yeā achyutachyut sa janāsa indra* ॥9॥
*yaḥ śaśvato mahyeno dadhānānamanyamānāṁchharvā jaghāna* ।
*yaḥ śardhate nānudadāti śṛdhyāṁ yo dasyorhantā sa janāsa indraḥ* ॥10॥
*yaḥ śambaraṁ parvateṣu kṣiyantaṁ chatvāriṁśyāṁ śaradyanvavindat* ।
*Ojāyamānaṁ yo ahiṁ jaghāna dānuṁ śayānaṁ sa janāsa indraḥ* ॥11॥
*yaḥ śambaraṁ paryatarat kasībhiryo'chārukāsnāpibat sutasya* ।
*antargirau yajamānaṁ bahuṁ janaṁ yasminnāmūrchhat sa janāsa indraḥ* ॥12॥
*yaḥ saptaraśmirvṛṣabhastuviṣmānavāsṛjat sartave sapta sindhūn* ।
*yo rauhiṇamasphurad vajrabāhurdyāmārohantaṁ sa janāsa indraḥ* ॥13॥
*dyāvā chidasmai pṛthivī namete śuṣmāchchidasya parvatā bhayante* ।
*yaḥ somapā nichito vajrabāhuryo vajrahastaḥ sa janāsa indraḥ* ॥14॥
*yaḥ sunvantamavati yaḥ pachantaṁ yaḥ śaṁsantaṁ yaḥ śaśamānamūtī* ।
*yasya brahma vardhanaṁ yasya somo yasyedaṁ rādhaḥ sa janāsa indraḥ* ॥15॥
*jāto vyakhyat pitrorupasthe bhuvo na veda janituḥ parasya* ।
*staviṣyamāṇo no yo asmad vratā devānāṁ sa janāsa inadraḥ* ॥16॥
*yaḥ somakāmo haryaśvaḥ sūriryasmād rejante bhuvanāni viśvaḥ* ।
*yo jaghāna śaṁvaraṁ yaścha śuṣṇaṁ ya ekavīraḥ sa janāsa indraḥ* ॥17॥
*yaḥ sunvate pachate dudhra ā chid vājaṁ dardarṣi sa kilāsi satyaḥ* ।
*vayaṁ ta indra viśvaha priyāsaḥ suvīrāso vidathamā vadema* ॥18॥

अ. (Av.) २०.५७.८-१०

इन्द्रो अंग महद् भयमभी षदप चुच्यवत्। स हि स्थिरो विचर्षणिः ॥८॥
इन्द्रश्च मृळयाति नो न नः पश्चादघं नशत्। भद्रं भवाति नः पुरः ॥९॥

इन्द्र आशभ्यस्परि सर्वाभ्यो अभयं करत्। जेता शत्रून् विचर्षणिः ॥१०॥
*indro aṁga mahad bhayamabhī ṣadapa chuchyavat | sa hi sthiro vicharṣaṇiḥ ||8 ||*
*indraścha mṛḷayāti no na naḥ paśchādaghaṁ naśat | bhadraṁ bhavāti naḥ puraḥ ||9 ||*
*indra āśabhyaspari sarvābhyo abhayaṁ karat | jetā śatrūn vicharṣaṇiḥ ||10 ||*

अ. (Av.) २०.६७.६

एष स्य ते तन्वोनृम्णवर्धनः सह ओजः प्रदिवि बाह्वोर्हितः ।
तुभ्यं सुतो मघवन् तुभ्यमाभृतस्त्वमस्य ब्राह्मणादा तृप् पिब ॥६॥
*eṣa sya te tanvonṛmṇavardhanaḥ saha Ojaḥ pradivi bāhnorhitaḥ |*
*tubhyaṁ suto maghavan tubhyamābhṛtastvamasya brāhmaṇādā tṛpt piba ||6 ||*

अ. (Av.) २०.९५.१

त्रिकद्रुकेषु महिषो यवाशिरं तुविशुष्मस्तृपत् सोममपिबद् विष्णुना सुतं यथावशत् ।
स ई ममाद् महि कर्म कर्तवे महामुरुं सैनं सश्चद् देवो देवं सत्यमिन्द्रं सत्य इन्दुः ॥१॥
*trikadrukeṣu mahiṣo yavāśiraṁ tuviśuṣmastṛpat somamapibad viṣṇunā sutaṁ yathāvaśat |*
*sa ī mamād mahi karma kartave mahāmuruṁ sainaṁ saśchad devo devaṁ satyamindraṁ satya induḥ ||1 ||*

४. ईश्वरः (Īśvaraḥ) - य. (Yv.)२६.३

बृहस्पतेऽअति यदर्योऽअर्हाद् द्युमद्विभाति क्रतुमज्जनेषु ।
यद्दीदयच्छवसऽऋतप्रजात तदस्मासु द्रविणं धेहि चित्रम् ।
उपयामगृहीतोऽसि बृहस्पतये त्वैष ते योनि र्बृहस्पतये त्वा ॥३॥
*bṛhaspate'ati yadaryo'arhād dyumadvibhāti kratumajjaneṣu |*
*yaddīdayachchhavasa'ṛtaprajāta tadasmāsu draviṇaṁ dhehi chitram |*
*upayāmagṛhīto'si bṛhaspataye tvaiṣa te yoni rbṛhaspataye tvā ||3 ||*

५. जायापतिः (Jāyāpatiḥ) - य. (Yv.)११.३१

संवसाथांस्वर्विदा समीचीऽउरसा त्मना। अग्निमन्तर्भरिष्यन्ती ज्योतिष्मन्तमजस्रमित् ॥३१॥
*saṁvasāthāṁsvarvidā samīchī'urasā tmanā | agnimantarbhariṣyantī jyotiṣmantamajasramit ||31 ||*

६. दम्पती (Dampatī) - य. (Yv.)११.३०

शर्म च स्थो वर्म च स्थोऽछिद्रे बहुलेऽउभे। व्यचस्वती संवसाथां भृतमग्निं पुरीष्यम् ॥३०॥
*śarma cha stho varma cha stho'chhidre bahule'ubhe | vyachasvatī saṁvasāthāṁ bhṛtamagniṁ purīṣyam ||30 ||*

७. द्रविणोदा (Draviṇodā) - अ. (Av.) २०.६७.७

यमु पूर्वमहुवे तमिदं हुवे सेदु हव्यो ददिर्यो नाम पत्यते ।
अध्वर्युभिः प्रस्थितं सोम्यं मधु पोत्रात् सोमं द्रविणोदः पिब ऋतुभिः ॥७॥
*yamu pūrvamahuve tamidaṁ huve sedu havyeā dadiryo nāma patyate |*
*adhvaryubhiḥ prasthitaṁ somyaṁ madhu potrāt somaṁ draviṇodaḥ piba ṛtubhiḥ ||7 ||*

८. प्रजापतिः (Prajāpatiḥ) - य. (Yv.)११.२३

आ त्वां जिघर्मि मनसा घृतेन प्रतिक्षियन्तं भुवनानि विश्वा ।
पृथुं तिरश्चा वयसा बृहन्तं व्यचिष्टमन्नै रभसं दृशानम् ॥२३॥
*ā tvāṁ jigharmi manasā ghṛtena pratikṣiyantaṁ bhuvanāni viśvā |*
*pṛthuṁ tiraśchā vayasā bṛhantaṁ vyachiṣṭamannai rabhasaṁ dṛśānam ||23 ||*

९. ब्रह्मणस्पतिः (Brahmaṇaspatiḥ) - य. (Yv.)३४.५८

ब्रह्मणस्पते त्वमस्य यन्ता सूक्तस्य बोधि तनयं च जिन्व ।
विश्वं तद्भद्रं यदवन्ति देवा बृहद्वदेम विदथे सुवीराः ।
य ऽइमा विश्वा विश्वकर्म्मा। यो नः पिता। अन्नापतेऽन्नस्य नो देहि ॥५८॥

*brahmaṇaspate tvamasya yantā sūktasya bodhi tanayaṁ cha jinva /*
*viśvaṁ tadbhadraṁ yadavanti devā bṛhadvadema vidathe suvīrāḥ /*
*ya 'imā viśvā viśvakarmmā / yo naḥ pitā / annāpate'nnasya no dehi //58 //*

१०. मरुतः (Marutaḥ) - अ. (Av.) २०.६७.४

यौः संमिश्लाः पृषतीभिर्ऋष्टिभिर्यामंछुभ्रासो अिंजषु प्रिया उत ।
आसद्या बर्हिर्भरतस्य सूनवः पोत्रादा सोमं पिबता दिवो नरः ॥४॥
*yauḥ saṁmiślāḥ pṛṣatībhirṛṣṭibhiryāmaṁchhubhrāso aiṁjaṣu priyā uta /*
*āsadyā barhirbharatasya sūnavaḥ potrādā somaṁ pibatā divo naraḥ //4 //*

११. मित्रावरुणौ (Mitrāvaruṇau) - य. (Yv.)७.९

अयं वां मित्रावरुणा सुतः सोमऽऋृतावृधा। ममेदिह श्रुतंहवम् ।
उपयामगृहीताऽसि मित्रावरुणाभ्यां त्वा ॥९॥
*ayaṁ vāṁ mitrāvaruṇā sutaḥ soma'ṛṛtāvṛdhā / mamediha śrutaṁhavam /*
*upayāmagṛhītā'si mitrāvaruṇābhyāṁ tvā //9 //*

१२. वायुः (Vāyuḥ) - य. (Yv.)२७.२९; ३२-३३

नियुत्वान्वायवा गह्ययंशुक्रो अयामि ते। गन्तासि सुन्वतो गृहम्॥२९॥
*niyutvānvāyavā gahyayaṁśukro ayāmi te / gantāsi sunvato gṛham //29 //*

य. (Yv.)२७.३२-३३

वायो ये ते सहस्रिणो रथासस्तोभिरा गहि। नियुत्वान्त्सोमपीतये ॥३२॥
एकया च दशभिश्च स्वभूते द्वाभ्यामिष्टये विं शती च ।
तिसृभिश्च वहसे त्रिं शता नियुद्भिर्वायविह ता वि मुंच ॥३३॥
*vāyo ye te sahasriṇo rathāsastobhirā gahi / niyutvāntsomapītaye //32 //*
*ekayā cha daśabhiścha svabhūte dvābhyāmiṣṭaye viṁ śatī cha /*
*tisṛbhiścha vahase triṁ śatā niyudbhirvāyaviha tā vi muṁcha //33 //*

१३. विद्वान् (Vidvān) - य. (Yv.)२६.२४

अमेच नः सुहवा आ हि गन्तन नि बर्हिषि सदतना रणिष्टन ।
अथा मदस्व जुजुषणो अन्धसस्त्वष्टर्देवेभिर्जनिभिः सुमद्गणः ॥२४॥
*amecha naḥ suhavā ā hi gantana ni barhiṣi sadatanā raṇiṣṭana /*
*athā madasva jujuṣaṇo andhasastvaṣṭardevebhirjanibhiḥ sumadgaṇaḥ //24 //*

१४. विश्वेदेवाः (Viśvedevāḥ) - य. (Yv.)७.३४

विश्वे देवासऽआगत श्रृणुता म इमंहवम्। एदं बर्हिर्निषीदत ।
उपयामगृहीतोऽसि विश्वेभ्यस्त्वा देवेभ्यऽएष ते योनिर्विश्वेभ्यस्त्वा देवेभ्य ॥३४॥
*viśve devāsa'āgata śṛṇutā ma imaṁhavam / edaṁ barhirniṣīdata /*
*upayāmagṛhīto'si viśvebhyastvā devebhya'eṣa te yonirviśvebhyastvā devebhya //34 //*

१५. सरस्वतिः (Sarasvatiḥ) - य. (Yv.)३४.११

पंच नद्यः सरस्वतीमपि यन्ति सस्रोतसः। सरस्वती तु पंचधा सो देशेऽभवत्सग्ति् ॥११॥
*paṁcha nadyaḥ sarasvatīmapi yanti sasrotasaḥ / sarasvatī tu paṁchadhā so deśe'bhavatsagti //11 //*

१६. सिनीवाली (Sinīvālī) - य. (Yv.)३४.१०

सिनीवालि पृथुष्टके या देवानामसि स्वमा। जुषस्व हव्यमाहुतं प्रजां देवि दिदिड्ढि नः॥१०॥
*sinīvāli pṛthuṣṭake yā devānāmasi svamā / juṣasva havyamāhutaṁ prajāṁ devi didiḍḍhi naḥ //10 //*

**२१३. गार्त्समदः कूर्मः - द्र. कूर्म गार्त्समदः (Gārtsamadaḥ Kūrmaḥ - See Kūrma Gārtsamadaḥ)**

**२१४. गृत्समदः शौनकः (Gṛtsamadaḥ Śaunakaḥ)**

१. अग्निः (Agniḥ) - ऋ. (Rv.) २.८.१-६; २.९.१-६; २.१०.१-६; २.२.१-१३; २.३.१-११; २.३७.६

ऋ. (Rv.) २.८.१-६

वाजयन्निव नू रथान्योगाँ अग्नेरुप स्तुहि। यशस्तमस्य मीळहुषः ॥१॥
यः सुनीथो ददाशुषेऽजुर्यो जरयन्नरिम्। चारुप्रतीक आहुतः ॥२॥
य उ श्रिया दमेष्वा दोषोषसि प्रशस्यते। यस्य व्रतं न मीयते ॥३॥
आ यः स्वर्ण भानुना चित्रो विभात्यर्चिषा। अंजानो अजरैरभि ॥४॥
अत्रिमनु स्वराज्यमग्निमुक्थानि वावृधुः। विश्वा अधि श्रियो दधे ॥५॥
अग्नेरिन्द्रस्य सोमस्य देवानामूतिभिर्वयम्। अरिष्यन्तः सचेमह्यभि ष्याम पृतन्यतः ॥६॥

*vājayanniva nū rathānyogāṁ agnerupa stuhi I yaśastamasya mīḷahuṣaḥ II1 II*
*yaḥ sunītho dadāśuṣe'juryo jarayannarim I chārupratīka āhutaḥ II2 II*
*ya u śriyā dameṣvā doṣoṣasi praśasyate I yasya vrataṁ na mīyate II3 II*
*ā yaḥ svarśṇa bhānunā chitro vibhātyarchiṣā I aṁjāno ajarairabhi II4 II*
*atrimanu svarājyamagnimukthāni vāvṛdhuḥ I viśvā adhi śriyo dadhe II5 II*
*agnerindrasya somasya devānāmūtibhirvayam I*
*ariṣyantaḥ sachemahyabhi ṣyāma pṛtanyataḥ II6 II*

ऋ. (Rv.) २.९.१-६

नि होता होतृषदने विदानस्त्वेषे दीदिवाँ असदत्सुदक्षः ।
अदब्धव्रतप्रमतिर्वसिष्ठः सहस्रम्भरः शुचिजिह्वो अग्निः ॥१॥
त्वं दूतस्त्वमु नः परस्पास्त्वं वस्य आ वृषभ प्रणेता ।
अग्ने तोकस्य नस्तने तनूनामप्रयुच्छन्दीद्यद्बोधि गोपाः ॥२॥
विधेम ते परमे जन्मन्नग्ने विधेम स्तोमैरवरे सधस्थे ।
यस्माद्योनेरुदारिथा यजे तं प्र त्वे हवींषि जुहुरे समिद्धे ॥३॥
अग्ने यजस्व हविषा यजीयांछ्रुष्टी देष्णमभि गृणीहि राधः ।
त्वं ह्यसि रयिपती रयीणां त्वं शुक्रस्य वचसो मनोता ॥४॥
उभयं ते न क्षीयते वसव्यं दिवेदिवे जायमानस्य दस्म ।
कृधि क्षुमन्तं जरितारमग्ने कृधि पतिं स्वपत्यस्य रायः ॥५॥
सैनानीकेन सुविदत्रो अस्मे यष्टा देवाँ आयजिष्ठः स्वस्ति ।
अदब्धो गोपा उत नः परस्पा अग्ने द्युमदुत रेवद्दिदीहि ॥६॥

*ni hotā hotṛṣadane vidānastveṣe dīdivāṁ asadatsudakṣaḥ I*
*adabdhavratapramatirvasiṣṭhaḥ sahasrambharaḥ śuchijihno agniḥ II1 II*
*tvaṁ dūtastvamu naḥ paraspāstvaṁ vasya ā vṛṣabha praṇetā I*
*agne tokasya nastane tanūnāmaprayuchchhandīdyadbodhi gopāḥ II2 II*
*vidhema te parame janmannagne vidhema stomairavare sadhasthe I*
*yasmādyonerudārithā yaje taṁ pra tve havīṁṣi juhure samiddhe II3 II*
*agne yajasva haviṣā yajīyāṁchhuṣṭī deṣṇamabhi gṛṇīhi rādhaḥ I*
*tvaṁ hyasi rayipatī rayīṇāṁ tvaṁ śukrasya vachaso manotā II4 II*
*ubhayaṁ te na kṣīyate vasavyaṁ divedive jāyamānasya dasma I*
*kṛdhi kṣumantaṁ jaritāramagne kṛdhi patiṁ svapatyasya rāyaḥ II5 II*
*sainānīkena suvidatro asme yaṣṭā devāṁ āyajiṣṭhaḥ svasti I*
*adabdho gopā uta naḥ paraspā agne dyumaduta revaddidīhi II6 II*

ऋ. (Rv.) २.१०.१-६

जोहूत्रो अग्निः प्रथमः पितेवेळस्पदे मनुषा यत्समिद्धः ।
श्रियं वसानो अमृतो विचेता मर्मृजेन्यः श्रवस्यः१ स वाजी ॥१॥

श्रूया अग्निश्चित्रभर्नुहवं मे विश्वाभिर्गीभिरमृतो विचेताः ।
श्यावा रथं वहतो रोहिता वोतारुषाह चक्रे विभृत्रः ॥२॥
उत्तानायामजनयन्त्सुषूतं भुवदग्निः पुरुपेशासु गर्भः ।
शिरिणायां चिदक्तुना महोभिरपरीवृतो वसति प्रचेताः ॥३॥
जिघर्म्यग्निं हविषा घृतेन प्रतिक्षियन्तं भुवनानि विश्वा ।
पृथुं तिरश्चा वयसा बृहन्तं व्यचिष्ठमन्नै रभसं दृशानम् ॥४॥
आ विश्वतः प्रत्यंचं जिघर्म्यरक्षसा मनसा तज्जुषेत ।
मर्यश्रीः स्पृहयद्वर्णो अग्निर्नाभिमृशे तन्वा३ जर्भुराणः ॥५॥
ज्ञेया भागं सहसानो वरेण त्वादूतासो मनुवद्वदेम ।
अनूनमग्निं जुह्वा वचस्या मधुपृचं धनसा जोवीमि ॥६॥

*johūtro agniḥ prathamaḥ pitevelaspade manuṣā yatsamiddhaḥ /*
*śriyaṁ vasāno amṛto vichetā marmṛjenyaḥ śravasyaḥ? sa vājī //1 //*
*śrūyā agniśchitrabharnuhavaṁ me viśvābhirgībhiramṛto vichetāḥ /*
*śyāvā rathaṁ vahato rohitā votāruṣāha chakre vibhṛtraḥ //2 //*
*uttānāyāmajanayantsuṣūtaṁ bhuvadagniḥ purupeśāsu garbhaḥ /*
*śiriṇāyāṁ chidaktunā mahobhiraparīvṛto vasati prachetāḥ //3 //*
*jigharmyagniṁ haviṣā ghṛtena pratikṣiyantaṁ bhuvanāni viśvā /*
*pṛthuṁ tiraśchā vayasā bṛhantaṁ vyachiṣṭhamannai rabhasaṁ dṛśānam //4 //*
*ā viśvataḥ pratyaṁchaṁ jigharmyarakṣasā manasā tajjuṣeta /*
*maryaśrīḥ smṛhayadvarṇo agnirnābhimṛśe tanvā3 jarbhurāṇaḥ //5 //*
*jñeyā bhāgaṁ sahasāno vareṇa tvādūtāso manuvadvadema /*
*anūnamagniṁ juhnā vachasyā madhupṛchaṁ dhanasā jovīmi //6 //*

ऋ. (Rv.) २.२.१-१३

योन वर्धत जातवेदसमग्निं यजध्वं हविषा तना गिरा ।
समिधानं सुप्रयसं स्वर्णरं द्युक्षं होतारं वृजनेषु धूर्षदम् ॥१॥
अभि त्वा नक्तीरुषसो ववाशिरोऽग्ने वत्सं न स्वसरेषु धेनवः ।
दिवइवेदरतिर्मानुषा युगा क्षपो भासि पुरुवार संयतः ॥२॥
तं देवा बुध्ने रजसः सुदंससं दिवस्पृथिव्योररतिं न्येरिरे ।
रथमिव वेद्यं शुक्रशोचिषमग्निं मित्रं न क्षितिषु प्रशंस्यम् ॥३॥
तमुक्षमाणं रजसि स्व आ दमे चन्द्रमिव सुरुचं ह्वार आ दधुः ।
पृश्न्याः पतरं चितयन्तमक्षभिः पाथो न पायुं जनसी उभे अनु ॥४॥
स होता विश्वं परि भूत्वध्वरं तमु हव्यैर्मनुष ऋंजते गिरा ।
हिरिशिप्रो वृधसानासु जर्भुरद् द्यौर्न स्तृभिश्चितयद्रोदसी अनु ॥५॥
स नो रेवत्समिधानः स्वस्तये संददस्वान् रयिमस्मासु दीदिहि ।
आ नः कृणुष्व सुवताय रोदसी अगने हव्या मनुषो देव वीतये ॥६॥
दा नो अग्ने बृहतो दाः सहस्रिणो दुरो न वाजं श्रुत्या अपा वृधि ।
प्राची द्यावापृथिवी ब्रह्मणा कृधि स्व१र्ण शुक्रमुषसो वि दिद्युतुः ॥७॥
स इधान उषसो राम्या अनु स्व१र्ण दीदेहरुषेण भानुना ।
होत्राभिरग्निर्मनुषः स्वध्वरो राजा विशामतिथिश्चारुरायवे ॥८॥
ऐवा नो अग्ने अमृतेषु पूर्व्य धीष्पीपाय बृहद्दिवेषु मानुषा ।
दुहाना धेनुर्वृजनेषु कारवे त्मना शतिनं पुरुरूपमिषणि ॥९॥
वयमग्ने अर्वता वा सुवीर्यं ब्रह्मणा वा चितयेमा जनाँ अति ।
अस्माकं द्युम्नमधि पंच कृष्टिषूच्चा स्व१र्ण शुशुचीतदुष्टरम् ॥१०॥
स नो बोधि सहस्य प्रशंस्यो यस्मिन्त्सुजाता इषयन्त सूरयः ।
यमग्ने यामुपयन्ति वाजिनो नित्ये तोके दीदिवांसं स्वे दमे ॥११॥
उभयासो जातवेदः स्याम ते स्तोतारो अग्ने सूरयश्च शर्मणि ।
वस्वो रायः पुरुश्चन्द्रस्य भूयसः प्रजावतः स्वपत्यस्य शग्धिनः ॥१२॥

ये स्तोतृभ्यो गोअग्रामश्वपेशसमग्ने रातिमुपसृजन्ति सूरयः ।
अस्मांच तांश्च प्र हि नेषि वस्य आ बृहद्वदेम विदथे सुवीराः ॥१३॥
*yona vardhata jātavedasamagnim̐ yajadhvam̐ haviṣā tanā girā /*
*samidhānam̐ suprayasam̐ svarṇaram̐ dyukṣam̐ hotāram̐ vṛjaneṣu dhūryaṣadam //1 //*
*abhi tvā naktīruṣaso vavāśiro'gne vatsam̐ na svasareṣu dhenavaḥ /*
*divaivedaratirmānuṣā yugā kṣapo bhāsi puruvāra sam̐yataḥ //2 //*
*tam̐ devā budhne rajasaḥ sudam̐sasam̐ divaspṛthivyoraratim̐ nyerire /*
*rathamiva vedyam̐ śukraśochiṣamagnim̐ mitram̐ na kṣitiṣu praśam̐syam //3 //*
*tamukṣamāṇam̐ rajasi sva ā dame chandramiva surucham̐ hnāra ā dadhuḥ /*
*pṛśnyāḥ pataram̐ chitayantamakṣabhiḥ pātho na pāyum̐ janasī ubhe anu //4 //*
*sa hotā viśvam̐ pari bhūtvadhvaram̐ tamu havyairmanuṣa ṛm̐jate girā /*
*hiriśipro vṛdhasānāsu jarbhurad dyaurna stṛbhiśchitayadrodasī anu //5 //*
*sa no revatsamidhānaḥ svastaye sam̐dadasvān rayimasmāsu dīdihi /*
*ā naḥ kṛṇuṣva suvatāya rodasī agane havyā manuṣo deva vītaye //6 //*
*dā no agne bṛhato dāḥ sahasriṇo duro na vājam̐ śrutyā apā vṛdhi /*
*prāchī dyāvāpṛthivī brahmaṇā kṛdhi sva1rṇa śukramuṣaso vi didyutuḥ //7 //*
*sa idhāna uṣaso rāmyā anu sva1rṇa dīdeharuṣeṇa bhānunā /*
*hotrābhignirmanuṣaḥ svadhvaro rājā viśāmatithiśchārurāyave //8 //*
*aivā no agne amṛteṣu pūrvya dhīṣpīpāya bṛhaddiveṣu mānuṣā /*
*duhānā dhenurvṛjaneṣu kārave tmanā śatinam̐ pururūpamiṣaṇi //9 //*
*vayamagne arvatā vā suvīrya brahmaṇā vā chitayemā janām̐ ati /*
*asmākam̐ dyumnamadhi pam̐cha kṛṣṭiṣūchchā sva1rṇa śuśuchītaduṣṭaram //10 //*
*sa no bodhi sahasya praśam̐syo yasmintsujātā iṣayanta sūrayaḥ /*
*yamagne yāmupayanti vājino nitye toke dīdivām̐sam̐ sve dame //11 //*
*ubhayāso jātavedaḥ syāma te stotāro agne sūrayaścha śarmaṇi /*
*vasvo rāyaḥ puruśchandrasya bhūyasaḥ prajāvataḥ svapatyasya śagdhinaḥ //12 //*
*ye stotṛbhyeā goagrāmaśvapeśasamagne rātimupasṛjanti sūrayaḥ /*
*asmām̐cha tām̐ścha pra hi neṣi vasya ā bṛhadvadema vidathe suvīrāḥ //13 //*

ऋ. (Rv.) २.३.१-११

समिद्धो अग्निर्निहितः पृथिव्या प्रत्यङ् विश्वानि भुवनान्यस्थात् ।
होता पावकः प्रदिवः सुमेधा देवो देवान्यजत्वग्निरर्हन् ॥१॥
नराशंसः प्रति धामान्यंजन् तिस्रो दिवः प्रति मह्ना स्वर्चिः ।
घृतप्रुषा मनसा हव्यमुन्दन्मूर्धन्यास्य समनक्तु देवान् ॥२॥
ईळितो अग्ने मनसा नो अर्हन्देवान्यक्षि मानुषात्पूर्वो अद्य ।
स आ वह मरुतां शर्धो अच्युतमिन्द्रं नरो बर्हिषदं यजध्वम् ॥३॥
देव बर्हिर्वर्धमानं सुवीरं स्तीर्णं राये सुभरं वेद्यस्याम् ।
घृतेनाक्तं वसवः सीदतेदं विश्वे देवा आदित्या यियासः ॥४॥
वि श्रयन्तामुर्विया हूयमाना द्वारो देवीः सुप्रायणा नमोभिः ।
व्यचस्वतीर्वि प्रथन्तामजुर्या वर्णं पुनाना यशसं सुवीरम् ॥५॥
साध्वपांसि सनता न उक्षिते उषासानक्ता वय्येव रण्विते ।
तन्तुं ततं संवयन्ती समीची यास्य पेशः सुदुधे पयस्वती ॥६॥
दैव्या होतारा प्रथमा विदुष्टर ऋजु यक्षतः समृचा वपुष्टरा ।
देवान्यजन्तावृतुथा समंजतो नाभा पृथिव्या अधि सानुषु त्रिषु ॥७॥
सरस्वती साधयन्ती धियं न इळा देवी भारती विश्वतूर्तिः ।
तिस्रो देवीः स्वधया बर्हिरेदमच्छिद्रं पान्तु शरणं निषद्य ॥८॥
पिशंगरूपः सुभरो वयोधाः श्रुष्टी वीरो जायते देवकामः ।
प्रजां त्वष्टा वि ष्यतु नाभिमस्मे अथा देवानामप्येतु पाथः ॥९॥
वनस्पतिरवसृजन्नुप स्थादग्निर्हविः सूदयाति प्र धीभिः ।

त्रिधा समक्तं नयतु प्रजानन्देवेभ्यो दैव्यः शमितोप हव्यम् ॥१०॥
घृतं मिमिक्षे घृतमस्य योनिर्घृते श्रितो घृतम्वस्य धाम ।
अनुष्वधमा वह मादयस्व स्वाहाकृतं वृषभ वक्षि हव्यम् ॥११॥
*samiddho agnirnihitaḥ pṛthivyā pratyaṅ viśvāni bhuvanānyasthāt /*
*hotā pāvakaḥ pradivaḥ sumedhā devo devānyajatvagnirarhan //1 //*
*narāśaṁsaḥ prati dhāmānyaṁjan tisro divaḥ prati mahnā svarchiḥ /*
*ghṛtapruṣā manasā havyamundanmūrdhanyāsya samanaktu devān //2 //*
*īḷito agne manasā no arhandevānyakṣi mānuṣātpūrvo adya /*
*sa ā vaha marutāṁ śardho achyutamindraṁ naro barhiṣadaṁ yajadhvam //3 //*
*deva barhirvardhamānaṁ suvīraṁ stīrṇa rāye subharaṁ vedyasyām /*
*ghṛtenāktaṁ vasavaḥ sīdatedaṁ viśve devā ādityā yiāyāsaḥ //4 //*
*vi śrayantāmurviyā hūyamānā dvāro devīḥ suprāyaṇā namobhiḥ /*
*vyachasvatīrvi prathantāmajuryā varṇa punānā yaśasaṁ suvīram //5 //*
*sādhvapāṁsi sanatā na ukṣite uṣāsānaktā vayyeva raṇvite /*
*tantuṁ tataṁ saṁvayantī samīchī yāsya peśaḥ sududhe payasvatī //6 //*
*daivyā hotārā prathamā viduṣṭara ṛju yakṣataḥ samṛchā vapuṣṭarā /*
*devānyajantāvṛtuthā samaṁjato nābhā pṛthivyā adhi sānuṣu triṣu //7 //*
*sarasvatī sādhayantī dhiyaṁ na iḷā devī bhāratī viśvatūrtiḥ /*
*tisro devīḥ svadhayā barhiredamachchhidraṁ pāntu śaraṇaṁ niṣadya //8 //*
*piśaṁgarūpaḥ subharo vayodhāḥ śruṣṭī vīro jāyate devakāmaḥ /*
*prajāṁ tvaṣṭā vi ṣyatu nābhimasme athā devānāmapyetu pāthaḥ //9 //*
*vanaspatiravasṛjannupa sthādagnirhaviḥ sūdayāti pra dhībhiḥ /*
*tridhā samaktaṁ nayatu prajānandevebhyo daivyaḥ śamitopa havyam //10 //*
*ghṛtaṁ mimikṣe ghṛtamasya yonirghṛte śrito ghṛtamvasya dhāma /*
*anuṣvadhamā vaha mādayasva svāhākṛtaṁ vṛṣabha vakṣi havyam //11 //*

ऋ. (Rv.) २.३७.६

जोष्यग्ने समिधं जोष्याहुतिं जोषि ब्रह्म जन्यं जोषि सुष्टुतिम् ।
विश्वेभिर्विश्वाँ ऋतुना वसो मह उशन्देवाँ उशतः पायया हविः ॥६॥
*joṣyagne samidhaṁ joṣyāhutiṁ joṣi brahma janyaṁ joṣi suṣṭutim /*
*viśvebhirviśvāṁ̐ ṛtunā vaso maha uśandevāṁ̐ uśataḥ pāyayā haviḥ //6 //*

२. अग्निः शुचिश्च (Agniḥ Śuchiścha) - ऋ. (Rv.) २.३६.४

आ वक्षि देवाँ हह विप्र यक्षि चोशन्होतर्नि षदा योनिषु त्रिषु ।
प्रति वीहि प्रस्थितं सोम्यं मधु पिबाग्नीध्रात्तव भागस्य तृप्णुहि ॥४॥
*ā vakṣi devāṁ̐ haha vipra yakṣi chośanhotarni ṣadā yoniṣu triṣu /*
*prati vīhi prasthitaṁ somyaṁ madhu pibāgnīdhrāttava bhāgasya tṛpṇuhi //4 //*

३. अपान्नपात् (Apānnapāt) - ऋ. (Rv.) २.३५.१-१५

उपेमसृक्षि वाजयुर्वचस्यां चनो दधीत नाद्यो गिरो मे ।
अपां नपादाशुहेमा कुवित्स सुपेशसस्करति जोषिषद्धि ॥१॥
इमं स्वस्मै हृद आ सुतष्टं मन्त्रं वोचेम कुविदस्य वेदत् ।
अपां नपादसुर्यस्य मह्ना विश्वान्यर्यो भुवना जजान ॥२॥
समन्या यन्त्युप यन्त्यन्याः समानमूर्वं नद्यः पृणन्ति ।
तमू शुचिं शुचयो दीदिवांसमपां नपातं परि तस्थुरापः ॥३॥
तमस्मेरा युवतयो युवानं मर्मृज्यमानाः परि यन्त्यापः ।
स शुक्रेभिः शिक्वभी रेवदस्मे दीदायानिध्मो घृतनिर्णिगप्सु ॥४॥
अस्मै तिस्रो अव्यथ्याय नारीर्देवाय देवीर्दिधिषन्त्यन्नम् ।
कृता इवोप हि प्रसर्स्रे अप्सु स पीयूषं धयति पूर्वसूनाम् ॥५॥
अश्वस्यात्र जनिमास्य च स्वर्द्रुहो रिषः संपृचः पाहि सूरीन् ।

आमासु पूर्षु परो अप्रमृष्यं नारातयो वि नशन्नानृतानि ॥६॥
स्व आ दमे सुदुघा यस्य धेनुः स्वधां पीपाय सुभ्वन्नमत्तिः ।
सो अपां नपादूर्जयन्नप्स्व१न्तर्वसुदेयाय विधते वि भाति ॥७॥
यो अप्स्वा शुचिना दैव्येन ऋतावाजस्र उर्विया विभाति ।
वया इदन्या भुवनान्यस्य प्र जायन्ते वीरुधश्च प्रजाभिः ॥८॥
अपां नपादा ह्यस्थादुपस्थं जिह्मानामूर्ध्वो विद्युतं वसानः ।
तस्य ज्येष्ठं महिमानं वहन्तीर्हिरण्यवर्णाः परि यन्ति यह्वीः ॥९॥
हिरण्यरूपः स हिरण्यसन्दृगपां नपात्सेदु हिरण्यवर्णः ।
हिरण्ययात्परि योनेर्निषद्या हिरण्यदा ददत्यन्नमस्मै ॥१०॥
तदस्यानीकमुत चारु नामापीच्यं वर्धते नप्तुरपाम् ।
यमिन्धते युवतयः समित्था हिरण्यवर्ण घृतमन्नमस्य ॥११॥
अस्मै बहूनामवमाय सख्ये यौर्विधेम नमसा हविर्भिः ।
सं सानु मार्जिम दिधिषामि बिल्मैर्दधाम्यन्नैः परि वन्द ऋग्भिः ॥१२॥
स ई वृषाजनयत्तासु गर्भं स ई शिशुर्धयति तं रिहन्ति ।
सो अपां नपादनभिम्लातवर्णोऽन्यस्येवेह तन्वा विवेष ॥१३॥
अस्मिन्पदे परमे तस्थिवांसमध्वस्मभिर्विश्वहा दीदिवांसम् ।
आपो नप्त्रे घृतमन्नं वहन्तीः स्वयमत्कैः परि दीयन्ति यह्वीः ॥१४॥
अयांसमग्ने सुक्षितिं जनायायांसमु मघवद्भ्यः सुवृक्तिम् ।
विश्वं तद्भद्रं यदवन्ति देवा बृहद्वदेम विदथे सुवीराः ॥१५॥

*upemasṛkṣi vājayurvachasyāṁ chano dadhīta nādyāo giro me /*
*apāṁ napādāśuhemā kuvitsa supeśasaskarati joṣiṣaddhi //1 //*
*imaṁ svasmai hṛda ā sutaṣṭaṁ mantraṁ vochema kuvidasya vedat /*
*apāṁ napādasuryasya mahnā viśvānyaryo bhuvanā jajāna //2 //*
*samanyā yantyupa yantyanyāḥ samānamūrva nadyaḥ pṛṇanti /*
*tamū śuchiṁ śuchayo dīdivāṁsamapāṁ napātaṁ pari tasthurāpaḥ //3 //*
*tamasmerā yuvatayo yuvānaṁ marmṛjyamānāḥ pari yantyāpaḥ /*
*sa śukrebhiḥ śikvabhī revadasme dīdāyānidhmo ghṛtanirṇigapsu //4 //*
*asmai tisro avyathyāya nārīrdevāya devīrdidhiṣantyannam /*
*kṛtā ivopa hi prasarsre apsu sa pīyūṣaṁ dhayati pūrvasūnām //5 //*
*aśvasyātra janimāsya cha svardruho riṣaḥ saṁpṛchaḥ pāhi sūrīn /*
*āmāsu pūrṣu paro apramṛṣyaṁ nārātayo vi naśannānṛtāni //6 //*
*sva ā dame sudughā yasya dhenuḥ svadhāṁ pīpāya subhvannamattiḥ /*
*so apāṁ napādūrjayannapsva1ntarvasudeyāya vidhate vi bhāti //7 //*
*yo apsvā śuchinā daivyena ṛtāvājasra urviyā vibhāti /*
*vayā idanyā bhuvanānyasya pra jāyante vīrudhaścha prajābhiḥ //8 //*
*apāṁ napādā hyasthādupasthaṁ jihmānāmūrdhvo vidyutaṁ vasānaḥ /*
*tasya jyeṣṭhaṁ mahimānaṁ vahantīrhiraṇyavarṇāḥ pari yanti yahnīḥ //9 //*
*hiraṇyarūpaḥ sa hiraṇyasandṛgapāṁ napātsedu hiraṇyavarṇaḥ /*
*hiraṇyayātpari yonerniṣadyā hiraṇyadā dadatyannamasmai //10 //*
*tadasyānīkamuta chāru nāmāpīchyaṁ vardhate napturapām /*
*yamindhate yuvatayaḥ samitthā hiraṇyavarṇa ghṛtamannamasya //11 //*
*asmai bahūnāmavamāya sakhye yaurvidhema namasā havirbhiḥ /*
*saṁ sānu mārjima didhiṣāmi bilmairdadhāmyanneḥ pari vanda ṛgbhiḥ //12 //*
*sa ī vṛṣājanayattāsu garbha sa ī śiśurdhayati taṁ rihanti /*
*so apāṁ napādanabhimlātavarṇo'nyasyeveha tanvā viveṣa //13 //*
*asminpade parame tasthivāṁsamadhvasmabhirviśvahā dīdivāṁsam /*
*āpo naptre ghṛtamannaṁ vahantīḥ svayamatkaiḥ pari dīyanti yahnīḥ //14 //*
*ayāṁsamagne sukṣitiṁ janāyāyāṁsamu maghavadbhyaḥ suvṛktim /*

*viśvaṁ tadbhadraṁ yadavanti devā bṛhadvadema vidathe suvīrāḥ* //15 //

४. अपांनपात् (साग्री. सास्वा.) अपांनपादग्निः (सार्षेदी.) (Apāṁnapāt [Ssb. Sas.] Apāṁnapādagniḥ [Sad.])- सा. (Sv.) ६०७

समन्या यन्त्युपयन्त्यन्याः समानमूर्व नद्यस्पृणन्ति ।
तमू शुचिं शुचयो दीदिवांसमपान्नपातमुप यन्त्यापः ॥६॥
*samanyā yantyupayantyanyāḥ samānamūrva nadyaspṛṇanti* /
*tamū śuchiṁ śuchayo dīdivāṁsamapānnapātamupa yantyāpaḥ* //6 //

५. अश्विनौ (Aśvinau) - ऋ. (Rv.) २.३७.५; २.३९.१-८; २.४१.७-९

ऋ. (Rv.) २.३७.५

अर्वांचमद्य यय्यं नृवाहणं रथं युंजाथामिह वां विमोचनम् ।
पृङ्क्तं हवींषि मधुना हि कं गतमथा सोमं पिबतं वाजिनीवसू॥५॥
*arvāṁchamadya yayyaṁ nṛvāhaṇaṁ rathaṁ yuṁjāthāmiha vāṁ vimochanam* /
*pṛṅktaṁ havīṁṣi madhunā hi kaṁ gatamathā somaṁ pibataṁ vājinīvasū* //5 //

ऋ. (Rv.) २.३९.१-८

ग्रावाणेव तदिदर्थ जरेथे गृध्रेव वृक्षं निधिमन्तमच्छ ।
ब्रह्माणेव विदथ उक्थशासा दूतेव हव्या जन्या पुरुत्रा ॥१॥
प्रातर्यावाणा रथ्येव वीराजेव यमा वरमा सचेथे ।
मेने इव तन्वा३ शुम्भमाने दम्पतीव क्रतुविदा जनेषु ॥२॥
श्रृंगेव नः प्रथमा गन्तमर्वाक्छफाविव जर्भुराणा तरोभिः ।
चक्रवाकेव प्रति वस्तोरुस्रार्वांचा यातं रथ्येव शक्रा ॥३॥
नावेव नः पारयतं युगेव नभ्येव न उपधीव प्रधीव ।
श्वानेव नो अरिषण्या तनूनां खृगलेव विस्रसः पातमस्मान ॥४॥
वातेवाजुर्या नद्येव रीतिरक्षी इव चक्षुषा यातमर्वाक् ।
इस्ताविव तन्वे३ शम्भविष्ठा पादेव नो नयतं वस्यो अच्छ ॥५॥
ओष्ठाविव मध्वास्ने वदन्ता स्तनाविव पिप्यतं जीवसे नः ।
नासेव नस्तन्वो रक्षितारा कर्णाविव सुश्रुता भूतमस्मे ॥६॥
हस्तेव शक्तिमभि सदंदी नः क्षमेव नः समजतं रजांसि ।
इमा गिरो अश्विना युष्मयन्तीः क्ष्योत्रेणेव स्वधितिं सं शिशीतम्॥७॥
एतानि वामश्विना वर्धनानि ब्रह्म स्तोमं गृत्समदासो अक्रन् ।
तानि नरा जुजुषाणोप यातं बृहद्वदेम विदथे सुवीरा। ॥८॥
*grāvāṇeva tadidartha jarethe gṛdhreva vṛkṣaṁ nidhimantamachchha* /
*brahmāṇeva vidatha ukthaśāsā dūteva havyā janyā purutrā* //1 //
*prātaryāvāṇā rathyeva vīrājeva yamā varamā sachethe* /
*mene iva tanvā3 śumbhamāne dampatīva kratuvidā janeṣu* //2 //
*śṛṁgeva naḥ prathamā gantamarvākchhaphāviva jarbhurāṇā tarobhiḥ* /
*chakravākeva prati vastorusrārvāṁchā yātaṁ rathyeva śakrā* //3 //
*nāveva naḥ pārayataṁ yugeva nabhyeva na upadhīva pradhīva* /
*śvāneva no ariṣaṇyā tanūnāṁ khṛgaleva visrasaḥ pātamasmāna* //4 //
*vātevājuryā nadyeva rītirakṣī iva chakṣuṣā yātamarvāk* /
*istāviva tanve3 śambhaviṣṭhā pādeva no nayataṁ vasyo achchha* //5 //
*Oṣṭhāviva madhvāsne vadantā stanāviva pipyataṁ jīvase naḥ* /
*nāseva nastanvo rakṣitārā karṇāviva suśrutā bhūtamasme* //6 //
*hasteva śaktimabhi sadaṁdī naḥ kṣameva naḥ samajataṁ rajāṁsi* /
*imā giro aśvinā yuṣmayantīḥ kṣayotreṇeva svadhitiṁ saṁ śiśītam* //7 //
*etāni vāmaśvinā vardhanāni brahma stomaṁ gṛtsamadāso akran* /
*tāni narā jujuṣāṇopa yātaṁ bṛhadvadema vidathe suvīrā* / //8 //

ऋ. (Rv.) २.४१.७-९

गोमदु षु नासत्याश्वावद्यातमश्विना। वर्ती रुद्रा नृपाय्यम् ॥७॥
न यत्परो नान्तर आदर्धशद्वृषण्वसू। दुःशंसो मर्त्यो रिपुः ॥८॥
ता न आ वोळहमश्विना रयिं पिशंगसंदृशम्। धिष्ण्या वरिवोविदम् ॥९॥
*gomadu ṣu nāsatyāśvāvadyātamaśvinā | vartī rudrā nṛpāyyam ॥7॥*
*na yatparo nāntara ādardhaśadvṛṣaṇvasū | duḥśaṁso martyo ripuḥ ॥8॥*
*tā na ā voḷahamaśvinā rayiṁ piśaṁgasaṁdṛśam | dhiṣṇyā varivovidam ॥9॥*

६. इन्द्रः (Indraḥ) - ऋ. (Rv.) २.११.१-२१; २.१२.१-१५; २.१३.१-१३; २.१४.१-१२; २.१५.१-१०; २.१६.१-९; २.१७.१-९; २.१८.१-९; २.१९१-९; २.२०.१-९; २.२१.१-६; २.२२.१-४; २.३०.१-५; ७; ८; १०; २.४१.१०.-१२; सा. (Sv.) २००; ४५७; ४६६; १४८६-८८

ऋ. (Rv.) २.११.१-२१

श्रुधी हवमिन्द्र मा रिषण्यः स्याम ते दावने वसूनाम् ।
इमा हि त्वामूर्जो वर्धयन्ति वसूयवः सिन्धवो न क्षरन्तः ॥१॥
सृजो महीरिन्द्र या अपिन्वः परिष्ठता अहिना शूर पूर्वीः ।
अमर्त्य चिद्दासं मन्यमानमवाभिनदुक्थैर्वावृधानः ॥२॥
उक्थेष्विन्नु शूर येषु चाकन्त्स्तोमेष्विन्द्र रुद्रियेषु च ।
तुभ्येदेता यासु मन्दसानः प्र वायवे सिस्रते न शुभ्राः ॥३॥
शुभ्रं नु ते शुष्मं वर्धयन्तः शुभ्रं वज्रं बाह्वो र्दधानाः ।
शुभ्रस्त्वमिन्द्र वावृधानो अस्मे दासीर्विशः सूर्येण सह्याः ॥४॥
गुहा हितं गुह्यं गूळहमप्स्वपीवृतं मायिनं क्षियन्तम् ।
उतो अपो द्यां तस्तभ्वांसमहन्नहिं शूर वीर्येण ॥५॥
स्तवा नु त इन्द्र पूर्व्या महान्युत स्तवाम नूतना कृतानि ।
स्तवा वज्रं बाह्वोरुशन्तं स्तवा हरी सूर्यस्य केतू ॥६॥
हरी नु त इन्द्र वाजयन्ता घृतश्चुतं स्वारमस्वार्ष्टाम् ।
वि समना भूमिरप्रथिष्टारंस्त पर्वतश्चित्सरिष्यन् ॥७॥
नि पर्वतः साद्यप्रयुच्छन्त्सं मातृभिर्वावशानो अक्रान् ।
दूरे पारे वाणीं वर्धयन्त इन्द्रेषितां धमनिं पप्रथन्नि॥ ॥८॥
इन्द्रो महां सिन्धुमाशयानं मायाविनं वृत्रमस्फुर न्निः ।
अरेजेतां रोदसी भियाने कनिक्रदतो वृष्णो अस्य वज्रात् ॥९॥
अरोरवीद्वृष्णो अस्य वज्रोऽमानुषं यन्मानुषो निजूर्वात् ।
नि मायिनो दानवस्य माया अपादयत्पपिवान्त्सुतस्य ॥१०॥
पिबापिबेदिन्द्र शूर सोमं मन्दन्तु त्वा मन्दिनः सुतासः ।
पृणन्तस्ते कुक्षी वर्धयन्त्वित्था सुतः पौर इन्द्रमाव ॥११॥
त्वं इन्द्राप्यभूम विप्रा धियं वनेम ऋतया सपन्तः ।
अवस्यवो धीमहि प्रशस्तिं सद्यस्ते रायो दावने स्याम ॥१२॥
स्याम ते त इन्द्र ये त ऊती अवस्यव ऊर्ज वर्धयन्तः ।
शुष्मिन्तमं यं चाकनाम देवास्मे रयिं रासि वीरवन्तम् ॥१३॥
रासि क्षयं रासि मित्रमस्मे रासि शर्ध इन्द्र मारुतं नः ।
सजोषसो ये च मन्दसानाः प्र वायवः पान्त्यग्रणीतिम् ॥१४॥
व्यन्त्विन्नु येषु मन्दसानस्तृपत्सोमं पाहि द्रह्यदिन्द्र ।
अस्मान्त्सु पृतस्वा तरुत्रावर्धयो द्यां बृहद्भिरर्कैः ॥१५॥
बृहन्त इन्नु ये ते तरुत्रोक्थेभिर्वा सुम्नमाविवासान् ।
स्तृणानासो बर्हिः पस्त्यावत्त्वोता इदिन्द्र वाजमग्मन् ॥१६॥
उग्रेष्विन्नु शूर मन्दसानस्त्रिकद्रुकेषु पाहि सोममिन्द्र ।
प्रदोधुवच्छ्मश्रुषु प्रीणानो याहि हरिभ्यां सुतस्य पीतिम् ॥१७॥
धिष्वा शवः शूर येन वृत्रमवाभिनद्दानुमौर्णवाभम् ।

अपावृणोर्ज्योतिरार्याय नि सव्यतः सादि दस्युरिन्द्र ॥१८॥
सनेम ये त ऊतिभिस्तरन्तो विश्वाः स्पृध आर्येण दस्यून् ।
अस्मभ्यं तत्त्वाष्ट्रं विश्वरूपमरन्धयः साख्यस्य त्रिताय ॥१९॥
अस्य सुवानस्य मन्दिनस्त्रितस्य न्यर्बुदं वावृधानो अस्तः ।
अवर्तयत्सूर्यो न चक्रं भिनद्वलमिन्द्रो अंगिरस्वान् ॥२०॥
नूनं सा ते प्रति वरं जरित्रे दुहीयदिन्द्र दक्षिणा मघोनी ।
शिक्षा स्तोतृभ्यो माति धग्भगो नो बृहद्वदेम विदथे सुवीराः ॥२१॥

*śrudhī havamindra mā riṣaṇyaḥ syāma te dāvane vasūnām /*
*imā hi tvāmūrjo vardhayanti vasūyavaḥ sindhavo na kṣarantaḥ //1 //*
*sṛjo mahīrindra yā apinvaḥ pariṣṭhatā ahinā śūra pūrvīḥ /*
*amartya chiddāsaṁ manyamānamavābhinadukthairvāvṛdhānaḥ //2 //*
*uktheṣvinnu śūra yeṣu chākantstomoṣvindra rudriyeṣu cha /*
*tubhyedetā yāsu mandasānaḥ pra vāyave sisrate na śubhrāḥ //3 //*
*śubhraṁ nu te śuṣmaṁ vardhayantaḥ śubhraṁ vajraṁ bāhno rdadhānāḥ /*
*śubhrastvamindra vāvṛdhāno asme dāsīrviśaḥ sūryeṇa sahyāḥ //4 //*
*guhā hitaṁ guhyaṁ gūḷahamapsvapīvṛtaṁ māyinaṁ kṣiyantam /*
*uto apo dyāṁ tastabhvāṁsamahannahiṁ śūra vīryeṇa //5 //*
*stavā nu ta indra pūrvyā mahānyuta stavāma nūtanā kṛtāni /*
*stavā vajraṁ bāhnoruśantaṁ stavā harī sūryasya ketū //6 //*
*harī nu ta indra vājayantā ghṛtaśchutaṁ svāramasvārṣṭām /*
*vi samanā bhūmiraprathiṣṭāraṁsta parvataśchitsariṣyan //7 //*
*ni parvataḥ sādyaprayuchchhantsaṁ mātṛbhirvāvaśāno akrān /*
*dūre pāre vāṇaṁī vardhayanta indreṣitāṁ dhamani paprathanni //8 //*
*indro mahāṁ sindhumāśayānaṁ māyāvinaṁ vṛtramasphura nniḥ /*
*arejetāṁ rodasī bhiyāne kanikradato vṛṣṇo asya vajrāt //9 //*
*aroravīdvṛṣṇo asya vajro'mānuṣaṁ yanmānuṣo nijūrvāt /*
*ni māyino dānavasya māyā apādayatpapivāntsutasya //10 //*
*pibāpibedindra śūra somaṁ mandantu tvā mandinaḥ sutāsaḥ /*
*pṛṇantaste kukṣī vardhayantvitthā sutaḥ paura indramāva //11 //*
*tvaṁ indrāpyabhūma viprā dhiyaṁ vanema ṛtayā sapantaḥ /*
*avasyavo dhīmahi praśasiṁta sadyaste rāyo dāvane syāma //12 //*
*syāma te ta indra ye ta ūtī avasyava ūrja vardhayantaḥ /*
*śuṣmintamaṁ yaṁ chākanāma devāsme rayiṁ rāsi vīravantam //13 //*
*rāsi kṣayaṁ rāsi mitramasme rāsi śardha indra mārutaṁ naḥ /*
*sajoṣaso ye cha mandasānāḥ pra vāyavaḥ pāntyagraṇītim //14 //*
*vyantvinnu yeṣu mandasānastṛpatsomaṁ pāhi drahyadindra /*
*asmāntsu pṛtasvā tarutrāvardhayo dyāṁ bṛhadbhirarkaiḥ //15 //*
*bṛhanta innu ye te tarutrokthebhirvā sumnamāvivāsān /*
*stṛṇānāso barhiḥ pastyāvattvotā idindra vājamagman //16 //*
*ugreṣvinnu śūra mandasānastrikadrukeṣu pāhi somamindra /*
*pradodhuvachchhmaśruṣu prīṇāno yāhi haribhyāṁ sutasya pītim //17 //*
*dhiṣvā śavaḥ śūra yena vṛtramavābhinaddānumaurṇavābham /*
*apāvṛṇorjyotirāryāya ni savyataḥ sādi dasyurindra //18 //*
*sanema ye ta ūtibhistaranto viśvāḥ spṛdha āryeṇa dasyūn /*
*asmabhyaṁ tattvāṣṭraṁ viśvarūpamarandhayaḥ sākhyasya tritāya //19 //*
*asya suvānasya mandinastritasya nyarbudaṁ vāvṛdhāno astaḥ /*
*avartayatsūryo na chakraṁ bhinadvalamindro aṁgirasvān //20 //*
*nūnaṁ sā te prati varaṁ jaritre duhīyadindra dakṣiṇā maghonī /*
*śikṣā stotṛbhyeā māti dhagbhago no bṛhadvadema vidathe suvīrāḥ //21 //*

ऋ. (Rv.) २.१२.१-१५

यो जात एव प्रथमो मनस्वान्देवो देवान्क्रतुना पर्यभूषत् ।
यस्य शुष्माद्रोदसी अभ्यसेतां नृम्णस्य मह्रा स जनास इन्द्रः ॥१॥
यः पृथिवीं व्यथमानामदृंहद्यः पर्वतान्प्रकुपिताँ अरम्णात् ।
यो अन्तरिक्षं विममे वरीयो यो द्यामस्तभ्नात्स जनास इन्द्रः ॥२॥
यो हत्वाहिमरिणात्सप्त सिन्धून्यो गा उदाजदपधा वलस्य ।
यो अश्मनोरन्तरग्निं जजान संवृक्स मत्सु स जनास इन्द्रः ॥३॥
येनेमा विश्वा च्यवना कृतानि यो दासं वर्णमधरं गुहाकः ।
श्वघ्नीव यो जिगीवाँ लक्षमाददर्यः पुष्टानि स जनास इन्द्रः ॥४॥
यं स्मा पृच्छन्ति कुह सेति घोरमुतेमाहुर्नैषो अस्तीत्येनम् ।
सो अर्यः पुष्टीर्विज इवा मिनाति श्रदस्मै धत्त स जनास इन्द्रः ॥५॥
यो रध्रस्य चोदिता यः कृशस्य यो ब्रह्मणो नाधमानस्य कीरेः ।
युक्तग्रावणो योऽविता सुशिप्रः सुतसोमस्य स जनास इन्द्रः ॥६॥
यस्याश्वसः प्रदिशि यस्य गावो यस्य ग्रामा यस्य विश्वे रथासः ।
यः सूर्य य उषसं जजान यो अपां नेता स जनास इन्द्रः ॥७॥
यं क्रन्दसी संयति विह्वयेते परेऽवर उभया अमित्राः ।
समानं चिद्रथमातस्थिवांसा नाना हवेते स जनास इन्द्रः ॥८॥
यस्मान्न ऋते विजयन्ते जनासो यं युध्यमाना अवसे हवन्ते ।
यो विश्वस्य प्रतिमानं बभूव यो अच्युतच्युत् स जनास इन्द्रः ॥९॥
यः शश्वतो मह्येनो दधानानमन्यमानांछर्वा जघान् ।
यः शर्धते नानुददाति शृध्यां यो दस्योर्हन्ता स जनास इन्द्रः ॥१०॥
यः शम्बरं पर्वतेषु क्षियन्तं चत्वारिंश्यां शरद्यन्वविन्दत् ।
ओजायमानं यो अहिं जघान दानुं शयानं स जनास इन्द्रः ॥११॥
यः सप्तरश्मिर्वृषभस्तुविष्मानवासृजत्सर्तवे सप्त सिन्धून् ।
यो रौहिणमस्फुरद्वज्रबाहुर्द्यामारोहन्तं स जनास इन्द्र ॥१२॥
द्यावा चिदस्मै पृथिवी नमेते शुष्माच्चिदस्य पर्वता भयन्ते ।
सोमपा निचितो वज्रबाहुर्यो वज्रहस्त स जनास इन्द्रः ॥१३॥
यः सुन्वन्तमवति यः पचन्तं यः शंसन्तं यः शशमानमूती ।
यस्य ब्रह्म वर्धनं यस्य सोमो यस्येदं राधः स जनास इन्द्रः ॥१४॥
यः सुन्वते पचते दुध्र आ चिद्वाजं दर्दर्षि स किलासि सत्यः ।
वयं त इन्द्र विश्वह प्रियासः सुवीरासो विदथमा वदेम ॥१५॥

*yo jāta eva prathamo manasvāndevo devānkratunā paryabhūṣat /*
*yasya śuṣmādrodasī abhyasetāṁ nṛmṇasya mahrā sa janāsa indraḥ //1 //*
*yaḥ pṛthivīṁ vyathamānāmadṛṁhadyaḥ parvatānprakupitām̐ aramṇāt /*
*yo antarikṣaṁ vimame varīyeā yo dyāāmastabhnātsa janāsa indraḥ //2 //*
*yo hatvāhimariṇātsapta sindhūnyo gā udājadapadhā valasya /*
*yo aśmanorantaragniṁ jajāna saṁvṛksa matsu sa janāsa indraḥ //3 //*
*yenemā viśvā chyavanā kṛtāni yo dāsaṁ varṇamadharaṁ guhākaḥ /*
*śvadhnīva yo jigīvām̐ lakṣamādadaryaḥ puṣṭāni sa janāsa indraḥ //4 //*
*yaṁ smā pṛchchhanti kuha seti ghoramutemāhurnaiṣo astītyenam /*
*so aryaḥ puṣṭīrvija ivā mināti śradasmai dhatta sa janāsa indraḥ //5 //*
*yo radhrasya choditā yaḥ kṛśasya yo brahmaṇo nādhamānasya kīreḥ /*
*yuktagrāvaṇo yo'vitā suśipraḥ sutasomasya sa janāsa indraḥ //6 //*
*yasyāśvasaḥ pradiśi yasya gāvo yasya grāmā yasya viśve rathāsaḥ /*
*yaḥ sūrya ya uṣasaṁ jajāna yo apāṁ netā sa janāsa indraḥ //7 //*
*yaṁ krandasī saṁyati vihnayete pare'vara ubhayā amitrāḥ /*
*samānaṁ chidrathamātasthivāṁsā nānā havete sa janāsa indraḥ //8 //*

*yasmānna ṛte vijayante janāso yaṁ yudhyamānā avase havante /*
*yo viśvasya pratimānaṁ babhūva yo achyutachyut sa janāsa indraḥ //9 //*
*yaḥ śaśvato mahmeno dadhānānamanyamānāṁchharvā jaghān /*
*yaḥ śardhate nānudadāti śṛdhyāṁ yo dasyorhantā sa janāsa indraḥ //10 //*
*yaḥ śambaraṁ parvateṣu kṣiyantaṁ chatvāriṁśyāṁ śaradyanvavindat /*
*Ojāyamānaṁ yo ahiṁ jaghāna dānuṁ śayānaṁ sa janāsa indraḥ //11 //*
*yaḥ saptaraśmirvṛṣabhastuviṣmānavāsṛjatsartave sapta sindhūn /*
*yo rauhiṇamasphuradvajrabāhurdyāmārohantaṁ sa janāsa indra //12 //*
*dyāvā chidasmai pṛthivī namete śuṣmāchchidasya parvatā bhayante /*
*somapā nichito vajrabāhuryo vajrahasta sa janāsa indraḥ //13 //*
*yaḥ sunvantamavati yaḥ pachantaṁ yaḥ śaṁsantaṁ yaḥ śaśamānamūtī /*
*yasya brahma vardhanaṁ yasya somo yasyedaṁ rādhaḥ sa janāsa indraḥ //14 //*
*yaḥ sunvate pachate dudhra ā chidvājaṁ dardarṣi sa kilāsi satyaḥ /*
*vayaṁ ta indra viśvaha priyāsaḥ suvīrāso vidathamā vadema //15 //*

ऋ. (Rv.) २.१३.१-१३

ऋतुर्जनित्री तस्य अपस्परि मक्षू जात आविशद्यासु वर्धते ।
तदाहना अभवत् पिप्युषी पर्योऽशोः पीयूषं प्रथमं तदुक्थ्यम् ॥१॥
सध्रीमा यन्ति परि बिभ्रतीः पयो विश्वप्स्न्याय प्र भरन्त भोजनम् ।
समानो अध्वा प्रवतामनुष्यदे यस्ताकृणोः प्रथमं सास्युक्थ्यः ॥२॥
अन्वेको वदति यद्ददाति तद्रूपा मिनन्तदपा एक ईयते ।
विश्वा एकस्य विनुदस्तितिक्षते यस्ताकृणोः प्रथमं सास्युक्थ्यः ॥३॥
प्रजाभ्यः पुष्टिं विभजन्त आसते रयिमिव पृष्ठं प्रभवन्तमायते ।
असिन्दवन्दंष्ट्रैः पितुरत्ति भोजनं यस्ताकृणोः प्रथमं सास्युक्थ्यः ॥४॥
अधाकृणो पृथिवीं संदृशे दिवे ये धौतीनामहिहन्नारिणक्पथः ।
तं त्वा स्तोमेभिरुदभिर्न बाजिनं देवं देवा अजनन्त्सास्युक्थ्यः ॥५॥
यो भोजनं च दयसे च वर्धनमार्द्रादा शुष्कं मधुमद्दुदोहिथ ।
स शेवधिं नि दधिषे विवस्वति विश्वस्यैक ईशिषे सास्युक्थ्यः ॥६॥
यः पुष्पिणीश्च प्रस्वश्च धर्मणाधि दाने व्य१वनीरधारयः ।
यश्चासमा अजनो दिद्युतो दिव उरुरूर्वाँ अभितः सास्युक्थ्यः ॥७॥
यो नार्मरं सहवसुं निहन्त्वे पृक्षाय च दासवेशाय चावहः ।
ऊर्जयन्त्या अपरिविष्टमास्यमुतैवाद्य पुरुकृत्सास्युक्थ्यः ॥८॥
शतं वा यस्य दश साकमाद्य एकस्य श्रुष्टौ यद्ध चोदमाविथ ।
अरज्जौ दस्यून्त्समुनब्दभीतये सुप्राव्यो अभवः सास्युक्थ्यः ॥९॥
विश्वेदनु रोधना अस्य पौंस्यं ददुरस्मै दधिरे कृत्नवे धनम् ।
षळस्तभना विष्टिरः पंच संदृशः परि परो अभवः सास्युक्थ्यः ॥१०॥
सुप्रवाचनं तव वीर वीर्य१ यदेकेन क्रतुना विन्दसे वसु ।
जातूष्ठिरस्य प्र वयः सहस्वतो या चकर्थ सेन्द्र विश्वास्युक्थ्यः ॥११॥
अरमयः सरपसस्तराय कं तुर्वीतये च वय्याय च स्रुतिम् ।
नीचा सन्तमुदनयः परावृजं प्रान्धं श्रोणं श्रवयन्त्सास्युक्थ्यः ॥१२॥
अस्मभ्यं तद्वसो दानाय राधः समर्थयस्व बहु ते वसव्यम् ।
इन्द्र यच्चित्रं श्रवस्या अनु द्यून्बृहद्वदेम विदथे सुवीराः ॥१३॥

*ṛturjanitrī tasya apaspari makṣū jāta āviśadyāsu vardhate /*
*tadāhanā abhavat pipyuṣī paryo'śoḥ pīyūṣaṁ prathamaṁ tadukthyam //1 //*
*sadhrīmā yanti pari bibhratīḥ payo viśvapsnyāya pra bharanta bhojanam /*
*samāno adhvā pravatāmanuṣyade yastākṛṇoḥ prathamaṁ sāsyukthyaḥ //2 //*
*anveko vadati yaddadāti tadrūpā minantadapā eka īyate /*
*viśvā ekasya vinudastitikṣate yastākṛṇoḥ prathamaṁ sāsyukthyaḥ //3 //*

*prajābhyaḥ puṣṭiṁ vibhajanta āsate rayimiva pṛṣṭhaṁ prabhavantamāyate* ।
*asindavandaṁṣṭraiḥ pituratti bhojanaṁ yastākṛṇoḥ prathamaṁ sāsyukthyaḥ* ॥4॥
*adhākṛṇo pṛthivīṁ saṁdṛśe dive ye dhautīnāmahihannāriṇakpathaḥ* ।
*taṁ tvā stomebhirudabhirna bājinaṁ devaṁ devā ajanantsāsyukthyaḥ* ॥5॥
*yo bhojanaṁ cha dayase cha vardhanamārdrādā śuṣkaṁ madhumaddudohitha* ।
*sa śevadhiṁ ni dadhiṣe vivasvati viśvasyaika īśiṣe sāsyukthyaḥ* ॥6॥
*yaḥ puṣpiṇīścha prasvaścha dharmaṇādhi dāne vya1vanīradhārayaḥ* ।
*yaśchāsamā ajano didyuto diva ururūvam̐ār abhitaḥ sāsyukthyaḥ* ॥7॥
*yo nārmaraṁ sahavasuṁ nihantve pṛkṣāya cha dāsaveśāya chāvahaḥ* ।
*ūrjayantyā apariviṣṭamāsyamutaivādya purukṛtsāsyukthyaḥ* ॥8॥
*śataṁ vā yasya daśa sākamādya ekasya śruṣṭau yaddha chodamāvitha* ।
*arajjau dasyūntsamunabdabhītaye suprāvyo abhavaḥ sāsyukthyaḥ* ॥9॥
*viśvedanu rodhanā asya pauṁsyaṁ dadurasmai dadhire kṛtnave dhanam* ।
*ṣaḻastabhanā viṣṭiraḥ paṁcha saṁdṛśaḥ pari paro abhavaḥ sāsyukthyaḥ* ॥10॥
*supravāchanaṁ tava vīra vīrya1 yadekena kratunā vindase vasu* ।
*jātūṣṭhirasya pra vayaḥ sahasvato yā chakartha sendra viśvāsyukthyaḥ* ॥11॥
*aramayaḥ sarapasastarāya kaṁ turvītaye cha vayyāya cha srutim* ।
*nīchā santamudanayaḥ parāvṛjaṁ prāndhaṁ śroṇaṁ śravayantsāsyukthyaḥ* ॥12॥
*asmabhyaṁ tadvaso dānāya rādhaḥ samarthayasva bahu te vasavyam* ।
*indra yachchitraṁ śravasyā anu dyūnbṛhadvadema vidathe suvīrāḥ* ॥13॥

ऋ. (Rv.) २.१४.१-१२

अध्वर्यवो भरतेन्द्राय सोममामत्रेभिः सिंचता मद्यमन्धः ।
कामी हि वीरः सदमस्य पीतिं जुहोत वृष्णे तदिदेष वष्टि ॥१॥
अध्वर्यवो यो अपो वव्रिवांसं वृत्रं जघानाशन्येव वृक्षम् ।
तस्मा एतं भरत तद्वशायँ एष इन्द्रो अर्हति पीतिमस्य ॥२॥
अध्वर्यवो यो दृभीकं जघान यो गा उदाजदप हि वलं वः ।
तस्मा एतमन्तरिक्षे न वातमिन्द्रं सोमैरोर्णुत जूर्न वस्त्रैः ॥३॥
अध्वर्यवो य उरणं जघान नव चख्वांसं नवतिं च बाहून् ।
यो अर्बुदमव नीचा बबाधे तमिन्द्रं सोमस्य भृथे हिनोत ॥४॥
अध्वर्यवो यः स्वश्नं जघान यः शुष्णमशुषं यो व्यंसम् ।
यः पिप्रुं नमुचिं यो रुधिक्रां तस्मा इन्द्रायान्धसो जुहोत ॥५॥
अध्वर्यवो यः शतं शम्बरस्य पुरो बिभेदाश्मनेव पूर्वीः ।
यो वर्चिनः शतमिन्द्रः सहस्रमपावपद्भरता सोममस्मै ॥६॥
अध्वर्यवो यः शतमा सहस्रं भूम्या उपस्थेऽवपज्जघन्वान् ।
कुत्सस्यायोरतिथिग्वस्य वीरान्न्यावृणग्भरता सोमस्मै ॥७॥
अध्वर्यवो यन्नरः कामयाध्वे श्रुष्टी वहन्तो नशथा तदिन्द्रे ।
गभस्तिपूतं भरत श्रुतायेन्द्राय सोमं यज्यवो जुहोत ॥८॥
अध्वर्यवः कर्तना श्रुष्टिमस्मै वने निपूतं वन उन्नयध्वम् ।
जुषाणो हस्त्यमभि वावशे व इन्द्राय सोमं मदिरं जुहोत ॥९॥
अध्वर्यवः पयसोधर्यथा गोः सोमेभिरीं पृणता भोजमिन्द्रम् ।
वेदाहमस्य निभृतं म एतद्दित्सन्तं भूयो यजतिश्चिकेत ॥१०॥
अध्वर्यवो यो दिव्यस्य वस्वो यः पार्थिवस्य क्षम्यस्य राजा ।
तमूर्दरं न पृणता येवेनेन्द्रं सोमेभिस्तदपो वो अस्तु ॥११॥
अस्मभ्यं तद्वसो दानाय राधः समर्थयस्व बहु ते वसव्यम् ।
इन्द्र यच्चित्रं श्रवस्या अनु द्यून्बृहद्वदेम विदथे सुवीराः ॥१२॥

*adhvaryavo bharatendrāya somamāmatrebhiḥ siṁchatā madyamandhaḥ* ।
*kāmī hi vīraḥ sadamasya pītiṁ juhota vṛṣṇe tadideṣa vaṣṭi* ॥1॥
*adhvaryavo yo apo vavrivāṁsaṁ vṛtraṁ jaghānāśanyeva vṛkṣam* ।

*tasmā etaṁ bharata tadvaśāyaṁ eṣa indro arhati pītimasya ॥2 ॥*
*adhvaryavo yo dṛbhīkaṁ jaghāna yo gā udājadapa hi valaṁ vaḥ ।*
*tasmā etamantarikṣe na vātamindraṁ somairorṇuta jūrna vastraiḥ ॥3 ॥*
*adhvaryavo ya uraṇaṁ jaghāna nava chakhvāṁsaṁ navatiṁ cha bāhūn ।*
*yo arbudamava nīchā babādhe tamindraṁ somasya bhṛthe hinota ॥4 ॥*
*adhvaryavo yaḥ svaśnaṁ jaghāna yaḥ śuṣṇamaśuṣaṁ yo vyaṁsam ।*
*yaḥ pipruṁ namuchiṁ yo rudhikrāṁ tasmā indrāyāndhaso juhota ॥5 ॥*
*adhvaryavo yaḥ śataṁ śambarasya puro bibhedāśmaneva pūrvīḥ ।*
*yo varchinaḥ śatamindraḥ sahasramapāvapadbharatā somamasmai ॥6 ॥*
*adhvaryavo yaḥ śatamā sahasraṁ bhūmyā upasthe'vapajjaghanvān ।*
*kutsasyāyoratithigvasya vīrānnyāvṛṇagbharatā somasmai ॥7 ॥*
*adhvaryavo yannaraḥ kāmayādhve śruṣṭī vahanto naśathā tadindre ।*
*gabhastipūtaṁ bharata śrutāyendrāya somaṁ yajyavo juhota ॥8 ॥*
*adhvaryavaḥ kartanā śruṣṭimasmai vane nipūtaṁ vana unnayadhvam ।*
*juṣāṇo hastyamabhi vāvaśe va indrāya somaṁ madiraṁ juhota ॥9 ॥*
*adhvaryavaḥ payasodharyathā goḥ somebhirīṁ pṛṇatā bhojamindram ।*
*vedāhamasya nibhṛtaṁ ma etadditsantaṁ bhūyo yajatiśchiketa ॥10 ॥*
*adhvaryavo yo divyasya vasvo yaḥ pārthivasya kṣamyasya rājā ।*
*tamūrdaraṁ na pṛṇatā yevenendraṁ somebhistadapo vo astu ॥11 ॥*
*asmabhyaṁ tadvaso dānāya rādhaḥ samarthayasva bahu te vasavyam ।*
*indra yachchtriṁ śravasyā anu dyūnbṛhadvadema vidathe suvīrāḥ ॥12 ॥*

ऋ. (Rv.) २.१५.१-१०

प्र घा नवस्य महतो महानि सत्या सत्यस्य करणानि वोचम् ।
त्रकद्रुकेष्वपिबत्सुतस्यास्य मदे अहिमिन्द्रो जघान ॥१॥
अवंशे द्यामस्तभयद् बृहन्तमा रोदसी अपृणदन्तरिक्षम् ।
स धारयत्पृथिवीं पप्रथच्च सोमस्य ता मद इन्द्रश्चकार ॥२॥
सद्मेव प्राचो वि मिमाय मानैर्वज्रेण खान्यतृणन्नदीनाम् ।
वृथासृजत्पथिभिर्दीर्घयाथैः सोमस्य ता मद इन्द्रश्चकार ॥३॥
स प्रवोळ्हृन्परिगत्या दभीतेर्विश्वमधागायुधमिद्धे अग्नौ ।
सं गोभिरश्वैरसृजद्रथेभिः सोमस्य ता मद इन्द्रश्चकार ॥४॥
स ई महीं धुनिमेतोररम्णात्सो अस्नातॄनपारयत्स्वस्ति ।
त उत्स्नाय रयिमभि प्र तस्थुः सोमस्य ता मद इन्द्रश्चकार ॥५॥
सोदंचं सिन्धुमरिणान्महित्वा वज्रेणान उषसः सं पिपेष ।
अजवसो जविनीभिर्विवृश्चन्त्सोमस्य ता मद इन्द्रश्चकार ॥६॥
स विद्वाँ अपगोहं कनीनामाविर्भवन्नुदतिष्ठत्परावृक् ।
प्रति श्रोणः स्थाद्व्य१नगचष्ट सोमस्य ता मद इन्द्रश्चकार ॥७॥
भिनद्वलमंगिरोभिगृणानो वि पर्वतस्य दृंहितान्यैरत् ।
रिणग्रोधांसि कृत्रिमाण्येषां सोमस्य ता मद इन्द्रश्चकार ॥८॥
स्वप्नेनाभ्युप्या चुमुरिं धुनिं च जघन्थ दस्युं प्र दभीतिमावः ।
रम्भी चिदत्र विविदे हिरण्यं सोमस्य ता मद इन्द्रश्चकार ॥९॥
नूनं सा ते प्रति वरं जरित्रे दुहीयदिन्द्र दक्षिणा मघोनी ।
शिक्षा स्तोतृभ्यो माति धग्भगो नो बृहद्वदेम विदथे सुवीराः ॥१०॥

*pra ghā navasya mahato mahāni satyā satyasya karaṇāni vocham ।*
*trakadrukeṣvapibatsutasyāsya made ahimindro jaghāna ॥1 ॥*
*avaṁśe dyāmastabhayad bṛhantamā rodasī apṛṇadantarikṣam ।*
*sa dhārayatpṛthivīṁ paprathachcha somasya tā mada indraśchakāra ॥2 ॥*
*sadmeva prācho vi mimāya mānairvajreṇa khānyatṛṇannadīnām ।*
*vṛthāsṛjatpathibhirdīrghayāthaiḥ somasya tā mada indraśchakāra ॥3 ॥*

*sa pravoḷahṝnparigatyā dabhītervisvamadhāgāyudhamiddhe agnau* ।
*saṁ gobhiraśvairasṛjadrathebhiḥ somasya tā mada indraśchakāra* ॥4॥
*sa ī mahīṁ dhunimetorāramṇātso asnātṝnapārayatsvasti* ।
*ta utsnāya rayimabhi pra tasthuḥ somasya tā mada indraśchakāra* ॥5॥
*sodaṁchaṁ sindhumariṇānmahitvā vajreṇāna uṣasaḥ saṁ pipeṣa* ।
*ajavaso javinībhirvivṛśchantsomasya tā mada indraśchakāra* ॥6॥
*sa vidvāṁ̐ apagohaṁ kanīnāmavirbhavannudatiṣṭhatparāvṛk* ।
*prati śroṇaḥ sthādvaya1nagachaṣṭa somasya tā mada indraśchakāra* ॥7॥
*bhinadvalamaṁgirobhigṛṇāno vi parvatasya dṛṁhitānyairat* ।
*riṇagrodhāṁsi kṛtrimāṇyeṣāṁ somasya tā mada indraśchakāra* ॥8॥
*svapnenābhyupyā chumuriṁ dhuniṁ cha jaghantha dasyuṁ pra dabhītimāvaḥ* ।
*rambhī chidatra vivide hiraṇyaṁ somasya tā mada indraśchakāra* ॥9॥
*nūnaṁ sā te prati varaṁ jaritre duhīyadindra dakṣiṇā maghonī* ।
*śikṣā stotṛbhyo māti dhagbhago no bṛhadvadema vidathe suvīrāḥ* ॥10॥

ऋ. (Rv.) २.१६.१-९

प्र वः सतां ज्येष्ठतमाय सुष्टुतिमग्नाविव समिधाने हविर्भरे ।
इन्द्रमजुर्यं जरयन्तमुक्षितं सनाद्युवानमवसे हवामहे ॥१॥
यस्मादिन्द्राद् बृहतः किं चनेमृते विश्वान्यस्मिन्त्सम्भृताधि वीर्या ।
जठरे सोमं तन्वी३ सहो महो हस्ते वज्रं भरति शीर्षणि क्रतुम् ॥२॥
न क्षेणीभ्यां परिभ्वे त इन्द्रियं न समुद्रैः पर्वतैरिन्द्र ते रथः ।
न ते वज्रमन्वश्नोति कश्चन यदाशुभिः पतसि योजना पुरु ॥३॥
विश्वे ह्यस्मै यजताय धृष्णवे क्रतुं भरन्ति वृषभाय सश्चते ।
वृषा यजस्व हविषा विदुष्टरः पिबेन्द्र सोमं वृषभेण भानुना ॥४॥
वृष्णः कोशः पवते मध्व ऊर्मिर्वृषभान्नाय वृषभाय पातवे ।
वृषणध्वर्यू वृषभासो अद्रयो वृषणं सोमं वृषभाय सुष्वति ॥५॥
वृषा ते वज्र उत ते वृषा रथो वृषणा हरी वृषभाण्यायुधा ।
वृष्णो मदस्य वृषभ त्वमीशिष इन्द्र सोमस्य वृषभस्य तृप्णुहि ॥६॥
प्र ते नावं न समने वचस्युवं ब्रह्माणा यामि सवनेषु दाधृषिः ।
कुविन्नो अस्य वचसो निबोधिषदिन्द्रमुत्सं न वसुनः सिचामहे ॥७॥
पुरा संबाधादभ्यां ववृत्स्व नो धेनुर्न वत्सं यवसस्य पिप्युषी ।
सकृत्सु ते , सुमतिभिः शतक्रतो सं पत्नीभिर्न वृषणो नसीमहि ॥८॥
नूनं सा ते प्रति वरं जरित्रे दुहीयदिन्द्र दक्षिणा मघोनी ।
शिक्षा स्तोतृभ्यो माति धग्भगो नो बृहद्वदेम विदथे सुवीराः ॥९॥

*pra vaḥ satāṁ jyeṣṭhatamāya suṣṭutimagnāviva samidhāne havirbhare* ।
*indramajurya jarayantamukṣitaṁ sanādyuvānamavase havāmahe* ॥1॥
*yasmādindrād bṛhataḥ kiṁ chanemṛte viśvānyasmintsambhṛtādhi vīryā* ।
*jaṭhare somaṁ tanvī3 saho maho haste vajraṁ bharati śīrṣaṇi kratum* ॥2॥
*na kṣeṇībhyāṁ paribhve ta indriyaṁ na samudraiḥ parvatairindra te rathaḥ* ।
*na te vajramanvaśnoti kaśchana yadāśubhiḥ patasi yojanā puru* ॥3॥
*viśve hyasmai yajatāya dhṛṣṇave kratuṁ bharanti vṛṣabhāya saśchate* ।
*vṛṣā yajasva haviṣā viduṣṭaraḥ pibendra somaṁ vṛṣabheṇa bhānunā* ॥4॥
*vṛṣṇaḥ kośaḥ pavate madhva ūrmirvṛṣabhānnāya vṛṣabhāya pātave* ।
*vṛṣaṇadhvaryū vṛṣabhāso adrayo vṛṣaṇaṁ somaṁ vṛṣabhāya suṣvati* ॥5॥
*vṛṣā te vajra uta te vṛṣā ratho vṛṣaṇā harī vṛṣabhāṇyāyudhā* ।
*vṛṣṇo madasya vṛṣabha tvamīśiṣa indra somasya vṛṣabhasya tṛpṇuhi* ॥6॥
*pra te nāvaṁ na samane vachasyuvaṁ brahmāṇā yāmi savaneṣu dādhṛṣiḥ* ।
*kuvinno asya vachaso nibodhiṣadindramutsaṁ na vasunaḥ sichāmahe* ॥7॥
*purā saṁbādhādabhyāṁ vavṛtsva no dhenurna vatsaṁ yavasasya pipyuṣī* ।

*sakṛtsu te , sumatibhiḥ śatakrato saṁ patnībhirna vṛṣaṇo nasīmahi* ॥8॥
*nūnaṁ sā te prati varaṁ jaritre duhīyadindra dakṣiṇā maghonī* ।
*śikṣā stotṛbhyo māti dhagbhago no bṛhadvadema vidathe suvīrāḥ* ॥9॥

ऋ. (Rv.) २.१७.१-९

तदस्मै नव्यमंगिरस्वदर्चत शुष्मा यदस्य प्रत्नथोदीरते ।
विश्वा यद्गोत्रा सहसा परीवृता मदे सोमस्य दृंहितान्यैरयत् ॥१॥
स भूतु यो ह प्रथमाय धायस ओजो मिमानो महिमानमातिरत् ।
शूरो यो युत्सु तन्वं परिव्यत शीर्षणिद्यां महिना प्रत्यमुंचत ॥२॥
अधाकृणोः प्रथमं वीर्य महद्यदस्याग्रे ब्रह्मणा शुष्ममैरयः ।
रथेष्ठेन , हर्यश्वेन विच्युताः प्र जीरयः सिस्रते सध्र्य१क् पृथक् ॥३॥
अधा यो विश्वा भुवनाभि मज्मनेशानकृत्प्रवया अभ्यवर्धत ।
आद्रोदसी ज्योतिषा वह्निरातनोत्सीव्यन्तमांसि दुधिता समव्ययत् ॥४॥
स प्राचीनान्पर्वतान्दृंहदोजसाधराचीनमकृणोदपामपः ।
अधारयत्पृथिवीं विश्वधायसमस्तभ्नान्मायया द्यामवस्रसः ॥५॥
सास्मा अरं बाहुभ्यां यं पिताकृणोद्विश्वस्मादा जनुषो वेदसस्परि ।
येना पृथिव्यां नि क्रिविं शयध्यै वज्रेण हत्व्यवृणक्तुविष्वणिः ॥६॥
अमाजूरिव पित्रोः सचा सती समानादा सदसस्त्वामिये भगम् ।
कृधि प्रकेतमुप मास्या भर दद्धि भागं तन्वो३ येन मामहः ॥७॥
भोजं त्वामिन्द्रं वयं हुवेम ददिष्ट्वमिन्द्रापांसि वाजान् ।
अविड्ढीन्द्र चित्रया न ऊती कृधि वृषन्निन्द्र वस्यसो नः ॥८॥
नूनं सा ते प्रति वरं जरित्रे दुहीयदिन्द्र दक्षिणा मघोनी ।
शिक्षा स्तोतृभ्यो माति धग्भगो नो बृहद्वदेम विदथे सुवीराः ॥९॥

*tadasmai navyamaṁgirasvadarchata śuṣmā yadasya pratnathodīrate* ।
*viśvā yadgotrā sahasā parīvṛtā made somasya dṛṁhitānyairayat* ॥1॥
*sa bhūtu yo ha prathamāya dhāyasa Ojo mimāno mahimānamātirat* ।
*śūro yo yutsu tanvaṁ parivyata śīrṣaṇidyāṁ mahinā pratyamuṁchata* ॥2॥
*adhākṛṇoḥ prathamaṁ vīrya mahadyadasyāgre brahmaṇā śuṣmamairayaḥ* ।
*ratheṣṭhena , haryaśvena vichyutāḥ pra jīrayaḥ sisrate sadhyra1k pṛthak* ॥3॥
*adhā yo viśvā bhuvanābhi majmaneśānakṛtpravayā abhyavardhata* ।
*ādrodasī jyotiṣā vahnirātanotsīvyantamāṁsi dudhitā samavyayat* ॥4॥
*sa prāchīnānparvatāndṛṁhadojasādharāchīnamakṛṇodapāmapaḥ* ।
*adhārayatpṛthivīṁ viśvadhāyasamastabhnānmāyayā dyāmavasrasaḥ* ॥5॥
*sāsmā araṁ bāhubhyāṁ yaṁ pitākṛṇodviśvasmādā januṣo vedasaspari* ।
*yenā pṛthivyāṁ ni kriviṁ śayadhyai vajreṇa hatvyavṛṇaktuviṣvaṇiḥ* ॥6॥
*amājūriva pitroḥ sachā satī samānādā sadasastvāmiye bhagam* ।
*kṛdhi praketamupa māsyā bhara daddhi bhāgaṁ tanvo3 yena māmahaḥ* ॥7॥
*bhojaṁ tvāmindraṁ vayaṁ huvema dadiṣṭvamindrāpāṁsi vājān* ।
*aviḍḍhīndra chitrayā na ūtī kṛdhi vṛṣannindra vasyaso naḥ* ॥8॥
*nūnaṁ sā te prati varaṁ jaritre duhīyadindra dakṣiṇā maghonī* ।
*śikṣā stotṛbhyo māti dhagbhago no bṛhadvadema vidathe suvīrāḥ* ॥9॥

ऋ. (Rv.) २.१८.१-९

प्राता रथो नवो योजि सस्निश्चतुर्युगस्त्रिकशः सप्तरश्मिः ।
दशारित्रो मनुष्यः स्वर्षाः स इष्टिभिर्मतिभी रंह्यो भूत् ॥१॥
सास्मा अरं प्रथमं स द्वितीयमुतो तृतीयं मनुषः स होता ।
अन्यस्या गर्भमन्य ऊ जनन्त सो अन्येभिः सचते जेन्यो वृषा ॥२॥
हरी नु कं रथ इन्द्रस्य योजमायै सूक्तेन वचसा नवेन ।
मो षु त्वामत्र बहवो हि विप्रा नि रीरमन्यजमानासो अन्ये ॥३॥

आ द्वाभ्यां हरिभ्यामिन्द्र याह्या चतुर्भिरा षड्भिर्हूयमानः ।
आष्टाभिर्दशभिः सोमपेयमयं सुतः सुमख मा मृधस्कः ॥४॥
आ विंशत्या त्रिंशता याह्यर्वाङ चत्वारिंशता हरिभिर्युजानः ।
आ पंचाशता सुरथेभिरिन्द्रा षष्ट्या सप्तत्या सोमपेयम् ॥५॥
आशीत्या नवत्या याह्यर्वाङ शतेन हरिभिरुह्यमानः ।
अयं हि तेशुनहोत्रेषु सोम इन्द्र त्वाया परिषिक्तो मदाय ॥६॥
मम ब्रह्मेन्द्र याह्यच्छा विश्वा हरी धुरि धिष्वा रथस्य ।
पुरुत्रा हि विहव्यो बभूथस्मिंछूर सवने मादयस्व ॥७॥
न म इन्द्रेण सख्यं वि योषदस्मभ्यमस्य दक्षिणा दुहीत ।
उप ज्येष्ठे वरूथे गभस्तौ प्रायेप्राये जिगीवांसः स्याम ॥८॥
नूनं सा ते प्रति वरं जरित्रे दुहीयदिन्द्र दक्षिणा मघोनी ।
शिक्षा स्तोतृभ्यो माति धग्भगो नो बृहद्वदेम विदथे सुवीराः ॥९॥

*prātā ratheā navo yoji sasniśchaturyugāstrikaśaḥ saptaraśmiḥ /*
*daśāritreā manuṣyaḥ svarṣāḥ sa iṣṭibhirmatibhī raṁhyo bhūt //1 //*
*sāsmā araṁ prathamaṁ sa dvitīyamuto tṛtīyaṁ manuṣaḥ sa hotā /*
*anyasyā garbhamanya ū jananta so anyebhiḥ sachate jenyo vṛṣā //2 //*
*harī nu kaṁ ratha indrasya yojamāyai sūktena vachasā navena /*
*mo ṣu tvāmatra bahavo hi viprā ni rīramanyajamānāso anye //3 //*
*ā dvābhyāṁ haribhyāmindra yāhyā chaturbhirā ṣaḍbhirhūyamānaḥ /*
*āṣṭābhirdaśabhiḥ somapeyamayaṁ sutaḥ sumakha mā mṛdhaskaḥ //4 //*
*ā viṁśatyā triṁśatā yāhyarvāṅa chatvāriṁśatā haribhiryujānaḥ /*
*ā paṁchāśatā surathebhirindrā ṣaṣṭyā saptatyā somapeyam //5 //*
*āśītyā navatyā yāhyarvāṅa śatena haribhiruhyamānaḥ /*
*ayaṁ hi teśunahotreṣu soma indra tvāyā pariṣikto madāya //6 //*
*mama brahmendra yāhyachchhā viśvā harī dhuri dhiṣvā rathasya /*
*purutrā hi vihavyo babhūthasmiṁchhūra savane mādayasva //7 //*
*na ma indreṇa sakhyaṁ vi yoṣadasmabhyamasya dakṣiṇā duhīta /*
*upa jyeṣṭhe varūthe gabhastau prāyeprāye jigīvāṁsaḥ syāma //8 //*
*nūnaṁ sā te prati varaṁ jaritre duhīyadindra dakṣiṇā maghonī /*
*śikṣā stotṛbhyo māti dhagbhago no bṛhadvadema vidathe suvīrāḥ //9 //*

ऋ. (Rv.) २.१९.१-९;

अपाय्यस्यान्धसो मदाय मनीषिणः सुवानस्य प्रयसः ।
यस्मिन्निन्द्रः प्रदिवि वावृधान ओको दधे ब्रह्मण्यन्तश्च नरः ॥१॥
अस्य मन्दानो मध्वो वज्रहस्तोऽहिमिन्द्रो अर्णोवृतं वि वृश्चत् ।
प्र यद्वयो न स्वसराण्यच्छा प्रयांसि च नदीनां चक्रमन्त ॥२॥
स माहिन इन्द्रो अर्णो अपां प्रैरयदहिहाच्छा समुद्रम् ।
अजनयत्सूर्यं विदद्गा अक्तुनाह्नां वयुनानि साधत् ॥३॥
सो अप्रतीनि मनवे पुरूणीन्द्रो दाशद्दाशुषे हन्ति वृत्रम् ।
सद्यो यो नृभ्यो अतसाय्यो भूत्पस्पृधानेभ्यः सूर्यस्य सातौ ॥४॥
स सुन्वत इन्द्रः सूर्यमा देवो रिणङ्मर्त्याय स्तवान् ।
आ यद्रयिं गुहदवद्यमस्मै भरदंशं नैतशो दशस्यन् ॥५॥
स रन्धयत्सदिवः सारथये शुष्णमशुषं कुयवं कुत्साय ।
दिवोदासाय नवतिं च नवेन्द्रः पुरो व्यैरच्छम्बरस्य ॥६॥
एवा त इन्द्रोचथमहेम श्रवस्या न त्मना वाजयन्तः ।
अश्याम तत्साप्तमाशुषाणा ननमो वधरदेवस्य पीयोः ॥७॥
एवा ते गृत्समदाः शूर मन्मावस्यवो न वायुनानि तक्षुः ।
ब्रह्मण्यन्त इन्द्र ते नवीय इषमूर्ज सुक्षितिं सुम्नमश्युः ॥८॥

नूनं सा ते प्रति वरं जरित्रे दुहीयदिन्द्र दक्षिणा मघोनी ।
शिक्षा स्तोतृभ्यो माति धग्भगो नो बृहद्वदेम विदथे सुवीराः ॥९॥
*apāyyasyāndhaso madāya manīṣiṇaḥ suvānasya prayasaḥ /*
*yasminnindraḥ pradivi vāvṛdhāna Oko dadhe brahmaṇyantaścha naraḥ //1 //*
*asya mandāno madhvo vajrahasto'himindro arṇovṛtaṁ vi vṛśchat /*
*pra yadvayo na svasarāṇyachchhā prayāṁsi cha nadīnāṁ chakramanta //2 //*
*sa māhina indro arṇo apāṁ prairayadahihāchchhā samudram /*
*ajanayatsūrya vidadgā aktunāhnāṁ vayunāni sādhat //3 //*
*so apratīni manave purūṇīndro dāśaddāśuṣe hanti vṛtram /*
*sadyo yo nṛbhyo atasāyyo bhūtpaspṛdhānebhyaḥ sūryasya sātau //4 //*
*sa sunvata indraḥ sūryamā devo riṇaṁmartyāya stavān /*
*ā yadrayiṁ guhadavadyamasmai bharadaṁśaṁ naitaśo daśasyan //5 //*
*sa randhayatsadivaḥ sārathaye śuṣṇamaśuṣaṁ kuyavaṁ kutsāya /*
*divodāsāya navati cha navendraḥ puro vyairachchhambarasya //6 //*
*evā ta indrochathamahema śravasyā na tmanā vājayantaḥ /*
*aśyāma tatsāptamāśuṣāṇā nanamo vadharadevasya pīyoḥ //7 //*
*evā te gṛtsamadāḥ śūra manmāvasyavo na vāyunāni takṣuḥ /*
*brahmaṇyanta indra te navīya iṣamūrja sukṣitiṁ sumnamaśyuḥ //8 //*
*nūnaṁ sā te prati varaṁ jaritre duhīyadindra dakṣiṇā maghonī /*
*śikṣā stotṛbhyo māti dhagbhago no bṛhadvadema vidathe suvīrāḥ //9 //*

ऋ. (Rv.) २.२०.१-९

वयं ते वय इन्द्र विद्धि षु णः प्र भरामहे वाजयुर्न रथम् ।
विपन्यवो दीध्यतो मनीषा सुम्नमियक्षन्तस्त्वावतो नॄन् ॥१॥
त्वं न इन्द्र त्वाभिरूती त्वायतो अभिष्टिपासि जनान् ।
त्वमिनो दाशुषो बरूतेत्थाधीरभि यो नक्षति त्वा ॥२॥
स नो युवेन्द्रो जोहूत्रः सखा शिवो नरामस्तु पाता ।
यः शंसन्तं यः शशमानमूती पचन्तं च स्तुवन्तं च प्रणेषत् ॥३॥
तमु स्तुष इन्द्रं तं गृणीषे यस्मिन्पुरा वावृधुः शाशदुश्च ।
स वस्वः कामं पीपरदियानो ब्रह्मण्यतो नूतनस्यायोः ॥४॥
सो अंगिरसामुचथा जुजुष्वान्ब्रह्मा तूतोदिन्द्रो गातुमिष्णन् ।
मुष्णन्नुषसः सूर्येण स्तवानश्नंस्य चिच्छिश्नथत्पूर्व्याणि ॥५॥
स ह श्रुत इन्द्रो नाम देव ऊर्ध्वो भुवन्मनुषे दस्मतमः ।
अव प्रियमर्शसानस्य साह्वाञ्छिरो भरद्दासस्य स्वधावान् ॥६॥
स वृत्रहेन्द्रः कृष्णयोनिः पुरन्दरो दासीरैरयद्वि ।
अजनयन्मनवे क्षामपश्च सत्रा शंसं यजमानस्य तूतोत् ॥७॥
तस्मै तवस्य१मनु दायि सत्रेन्द्राय देवेभिरर्णसातौ ।
प्रति यदस्य वज्रं बाह्वोर्धुर्हत्वी दस्यून्पुर आयसीर्नि तारीत् ॥८॥
नूनं सा ते प्रति वरं जरित्रे दुहीयदिन्द्र दक्षिणा मघोनी ।
शिक्षा स्तोतृभ्यो माति धग्भगो नो बृहद्वदेम विदथे सुवीराः ॥९॥
*vayaṁ te vaya indra viddhi ṣu ṇaḥ pra bharāmahe vājayurna ratham /*
*vipanyavo dīdhyato manīṣā sumnamiyakṣantastvāvato nṝn //1 //*
*tvaṁ na indra tvābhirūtī tvāyato abhiṣṭipāsi janān /*
*tvamino dāśuṣo barūtetthādhīrabhi yo nakṣati tvā //2 //*
*sa no yuvendro johūtraḥ sakhā śivo narāmastu pātā /*
*yaḥ śaṁsantaṁ yaḥ śaśamānamūtī pachantaṁ cha stuvantaṁ cha praṇeṣat //3 //*
*tamu stuṣa indraṁ taṁ gṛṇīṣe yasminpurā vāvṛdhuḥ śāśaduścha /*
*sa vasvaḥ kāmaṁ pīparadiyāno brahmaṇyato nūtanasyāyoḥ //4 //*
*so aṁgiārasāmuchathā jujuṣvānbrahmā tūtodindro gātumiṣṇan /*

*muṣṇannuṣasaḥ sūryeṇa stavānaśnnaṁsya chichchhiśnathatpūrvyāṇi* ॥5॥
*sa ha śruta indro nāma deva ūrdhvo bhuvanmanuṣe dasmatamaḥ* ।
*ava priyamarśasānasya sāhvāñchhiro bharaddāsasya svadhāvān* ॥6॥
*sa vṛtrahendraḥ kṛṣṇayoniḥ purandaro dāsīrairayadvi* ।
*ajanayanmanave kṣāmapaścha satrā śaṁsaṁ yajamānasya tūtot* ॥7॥
*tasmai tavasya1manu dāyi satrendrāya devebhirarṇasātau* ।
*prati yadasya vajraṁ bāhnordhurhatvī dasyūnpura āyasīrni tārīt* ॥8॥
*nūnaṁ sā te prati varaṁ jaritre duhīyadindra dakṣiṇā maghonī* ।
*śikṣā stotṛbhyo māti dhagbhago no bṛhadvadema vidathe suvīrāḥ* ॥9॥

ऋ. (Rv.) २.२१.१-६

विश्वजिते धनजिते स्वर्जिते सत्राजिते नृजित उर्वराजिते ।
अश्वजिते गोजिते अब्जिते भरेन्द्राय सोमं यजमाय हर्यतम् ॥१॥
अभिभुवेऽभिभंगाय वन्वतेऽषाळहाय सहमानाय वेधसे ।
तुविग्रये वह्नये दुष्टरीतवे सत्रासाहे नम इन्द्राय वोचत ॥२॥
सत्रासाहो जनभक्षो जनंसहश्च्यवनो युध्मो अनु जोषमुक्षितः ।
वृतंचयः सहुरिर्विक्ष्वारित इन्द्रस्य वोचं प्र कृतानि वीर्या ॥३॥
अनानुदो वृषभो दोधतो वधो गम्भीर ऋष्वो असमष्टकाव्यः ।
रध्रचोदः श्नथनो वीळितस्पृथुरिन्द्रः सुया उषसः स्वर्जनत् ॥४॥
योन गातुमप्तुरो विविद्रिरे धियो हिन्वाना उशिजो मनीषिणः ।
अभिस्वरा निषदा गा अवस्यव इन्द्रे हिन्वाना द्रविणान्याशत ॥५॥
इन्द्र श्रेष्ठानि द्रविणानि धेहि चित्तिं दक्षस्य सुभगत्वमस्मे ।
पोषं रयीणामरिष्टिं तनूनां स्वाद्मानं वाचः सुदिनत्वमह्नाम् ॥६॥

*viśvajite dhanajite svarjite satrājite nṛjita urvarājite* ।
*aśvajite gojite abjite bharendrāya somaṁ yajamāya haryatam* ॥1॥
*abhibhuve'bhibhaṁgāya vanvate'ṣāḷahāya sahamānāya vedhase* ।
*tuvigraye vahnaye duṣṭarītave satrāsāhe nama indrāya vochata* ॥2॥
*satrāsāho janabhakṣo janaṁsahaśchyavano yudhmo anu joṣamukṣitaḥ* ।
*vṛtaṁchayaḥ sahurirvikṣavārita indrasya vochaṁ pra kṛtāni vīryā* ॥3॥
*anānudo vṛṣabho dodhato vadho gambhīra ṛṣvo asamaṣṭakāvyaḥ* ।
*radhrachodaḥ śnathano vīḷitaspṛthurindraḥ suyā uṣasaḥ svarjanat* ॥4॥
*yona gātumapturo vividrire dhiyo hinvānā uśijo manīṣiṇaḥ* ।
*abhisvarā niṣadā gā avasyava indre hinvānā draviṇānyāśata* ॥5॥
*indra śreṣṭhāni draviṇāni dhehi chittiṁ dakṣasya subhagatvamasme* ।
*poṣaṁ rayīṇāmariṣṭiṁ tanūnāṁ svādmānaṁ vāchaḥ sudinatvamahnām* ॥6॥

ऋ. (Rv.) २.२२.१-४

त्रिकद्रुकेषु महिषो यवाशिरं तुविशुष्मस्तृपत्सोममपिबद्विष्णुना सुतं यथावशत् ।
स ई ममाद् महि कर्म कर्तवे महामुरुं सैनं सश्चद्देवो देव सत्यमिन्द्रं सत्य इन्दुः ॥१॥
अध त्विषीमाँ अभ्योजसा क्रिविं युधाभवदा रोदसी अपृणदस्य मज्मना प्र वावृधे ।
अधत्तान्यं जठरे प्रेमरिच्यत सैनं सश्चद्देवो देवं सत्यमिन्द्रं सत्य इन्दुः ॥२॥
साकं जातः क्रतुना साकमोजसा ववक्षिथ साकं वृद्धो वीर्यैः सामहिर्मृधो विचर्षणिः ।
दाता राधः स्तुवते काम्यं वसु सैनं सश्चद्देवो देवं सत्यमिन्द्रं सत्यं इन्दुः ॥३॥
तव त्यन्नर्य नृतोऽप इन्द्र प्रथमं पूर्व्यं दिवि प्रवाच्यं कृतम् ।
यद्देवस्य शवसा प्रारिणा असुं रिणन्नपः। भुवद्विश्वमभ्यादेवमोजसा विदादूर्ज शतक्रतुर्विदादिषम् ॥४॥

*trikadrukeṣu mahiṣo yavāśiraṁ tuviśuṣmastṛpatsomamapibadviṣṇunā sutaṁ yathāvaśat* ।
*sa ī mamād mahi karma kartave mahāmuruṁ sainaṁ saśchaddevo deva satyamindraṁ satya induḥ* ॥1॥
*adha tviṣīmāṁ̐ abhyojasā kriviṁ yudhābhavadā rodasī apṛṇadasya majmanā pra*

*vāvṛdhe /*
*adhattānyaṁ jaṭhare premarichyata sainaṁ saśchaddevo devaṁ satyamindraṁ satya induḥ //2 //*
*sākaṁ jātaḥ kratunā sākamojasā vavakṣitha sākaṁ vṛddho vīryaiḥ sāmahirmṛdho vicharṣaṇiḥ /*
*dātā rādhaḥ stuvate kāmyaṁ vasu sainaṁ saśchaddevo devaṁ satyamindraṁ satyaṁ induḥ //3 //*
*tava tyannarya nṛto'pa indra prathamaṁ pūrvya divi pravāchyaṁ kṛtam /*
*yaddevasya śavasā prāriṇā asuṁ riṇannapaḥ / bhuvadviśvamabhyādevamojasā vidādūrja śatakraturvidādiṣam //4 //*

ऋ. (Rv.) २.३०.१-५

ऋतं देवाय कृण्वते सवित्र इन्द्रायाहिघ्ने न रमन्त आपः ।
अहरहर्यात्यक्तुरपां कियात्या प्रथमः सर्ग आसाम् ॥१॥
यो वृत्राय सिनमत्राभरिष्यत्प्र तं जनित्री विदुष उवाच ।
पथो रदन्तीरनु जोषमस्मै दिवेदिवे धुनयो यन्त्यर्थम् ॥२॥
ऊर्ध्वो ह्यस्थादध्यन्तरिक्षेधा वृत्राय प्र वधं जभार ।
मिहं वसान उप हीमदुद्रोत्तिग्मायुधो अजयच्छत्रुमिन्द्रः ॥३॥
बृहस्पते तपुषाश्नेव विध्य वृकद्वरसो असुरस्य वीरान् ।
यथा जघन्थ धृषता पुरा चिदेवा जहि शत्रुमस्माकमिन्द्र ॥४॥
अव क्षिप दिवो अश्मानमुच्चा येन शत्रुं मन्दसानो निजूर्वाः ।
तोकस्य सातौ तनयस्य भूरेरस्माँ अर्ध कृणुतादिन्द्र गोनाम् ॥५॥

*ṛtaṁ devāya kṛṇvate savitra indrāyāhighne na ramanta āpaḥ /*
*aharaharyātyakturapāṁ kiyātyā prathamaḥ sarga āsām //1 //*
*yo vṛtrāya sinamatrābhariṣyatpra taṁ janitrī viduṣa uvācha /*
*patho radantīranu joṣamasmai divedive dhunayo yantyartham //2 //*
*ūrdhvo hyasthādadhyantarikṣedhā vṛtrāya pra vadhaṁ jabhāra /*
*mihaṁ vasāna upa hīmadudrottigmāyudho ajayachchhannumindraḥ //3 //*
*bṛhaspate tapuṣāśneva vidhya vṛkadvaraso asurasya vīrān /*
*yathā jaghantha dhṛṣatā purā chidevā jahi śatrumasmākamindra //4 //*
*ava kṣipa divo aśmānamuchchā yena śatruṁ mandasāno nijūrvāḥ /*
*tokasya sātau tanayasya bhūrerasmāṁ ardha kṛṇutādindra gonām //5 //*

ऋ. (Rv.) २.३०.७-८

न मा तमन्न श्रमन्नोत तन्द्रन्न वोचाम मा सुनोतेति सोमम् ।
यो मे पृणाद्यो ददद्यो निवोधाद्यो मा सुन्वन्तमुप गोभिरायत् ॥७॥
सरस्वति त्वमस्माँ अविड्ढि मरुत्वती धृषती जेषि शत्रून् ।
त्यं चिच्छर्धन्तं तविषीयमाणमिन्द्रो हन्ति वृषभं शण्डिकानाम् ॥८॥

*na mā tamanna śramannota tandranna vochāma mā sunoteti somam /*
*yo me pṛṇādyo dadadyo nivodhādyo mā sunvantamupa gobhirāyat //7 //*
*sarasvati tvamasmāṁ aviḍḍhi marutvatī dhṛṣatī jeṣi śatrūn /*
*tyaṁ chichchhardhantaṁ taviṣīyamāṇamindro hanti vṛṣabhaṁ śaṇḍikānām //8 //*

ऋ. (Rv.) २.३०.१०

अस्माकेभिः सत्वभिः शूर शूरैर्वीर्या कृधि यानि ते कर्त्वानि ।
ज्योगभूवन्ननुधूपितासो हत्वी तेषामा भरा नो वसूनि ॥१०॥

*asmākebhiḥ satvabhiḥ śūra śūrairvīryā kṛdhi yāni te kartvāni /*
*jyogabhūvannanudhūpitāso hatvī teṣāmā bharā no vasūni //10 //*

ऋ. (Rv.) २.४१.१०-१२

इन्द्रो अंग महद्भयमभी षदप चुच्यवत्। स हि स्थिरो विचर्षणिः ॥१०॥

इन्द्रश्च मृळयाति नो न नः पश्चदघं नशत्। भद्रं भवाति नः पुरः ॥११॥
इन्द्र आशाभ्यस्परि सर्वाभ्यो अभयं करत्। जेता शत्रून्विचर्षणिः ॥१२॥
*indro aṁga mahadbhayamabhī ṣadapa chuchyavat |*
*sa hi sthiro vicharṣaṇiḥ ||10 ||*
*indraścha mṛḷayāti no na naḥ paśchadaghaṁ naśat |*
*bhadraṁ bhavāti naḥ puraḥ ||11 ||*
*indra āśābhyaspari sarvābhyo abhayaṁ karat | jetā śatrūnvicharṣaṇiḥ ||12 ||*

सा. (Sv.) २००
इन्द्रो अंग महद्भयमभी षदप चुच्यत्। स हि स्थिरो विचर्षणिः ॥७॥
*indro aṁga mahadbhayamabhī ṣadapa chuchyat | sa hi sthiro vicharṣaṇiḥ ||7 ||*

सा. (Sv.) ४५७
त्रिकद्रुकेषु महिषो यवाशिरं तुविशुष्मस्तृम्पत्सोममपिबद्विष्णुनां सुतं यथावशम् ।
स ई ममाद महि कर्म कर्तवे महामरु सैनं सश्चद्देवो देवं सत्य इन्दुः सत्यमिन्द्रम् ॥१॥
*trikadrukeṣu mahiṣo yavāśiraṁ tuviśuṣmastṛmpatsomamapibadviṣṇunāṁ sutaṁ yathāvaśam |*
*sa ī mamāda mahi karma kartave mahāmaru sainaṁ saśchaddevo devaṁ satya induḥ satyamindram ||1 ||*

सा. (Sv.) ४६६
तव त्यन्नर्य नृतोऽप इन्द्र प्रथमं पूर्व्य दिवि प्रवाच्यं कृतम् ।
यो देवस्य शवसा प्रारिणा असु रिणन्नपः ।
भुवो विश्वमभ्यदेवमोजसा विदेदूर्ज शतक्रतुर्विदेदिषम् ॥१०॥
*tava tyannarya nṛto'pa indra prathamaṁ pūrvya divi pravāchyaṁ kṛtam |*
*yo devasya śavasā prāriṇā asu riṇannapaḥ |*
*bhuvo viśvamabhyadevamojasā videdūrja śatakraturvidediṣam ||10 ||*

सा. (Sv.) १४८६-८८
त्रिकद्रुकेषु महिषो यवाशिरं तुविशुष्मस्तृम्पत् सोममपिबद्विष्णुना सुतं यथावशम् ॥१॥
स ई ममाद महि कर्म कर्तवे महामुरुं सैनं सश्चद्देवो देवं सत्यं इदुः: सत्यमिन्द्रम् ॥२॥
अध त्विषीमाँ अभ्योजसा कृविं युधाभवदा रोदसी अपृणदस्य मज्मना प्र वावृधे ।
अधत्तान्यं जठरे प्रेमरिच्यत प्र चेतय सैनं सश्चद्देवो देवं सत्य इन्दुः सत्यमिन्द्रम्॥३।
*trikadrukeṣu mahiṣo yavāśiraṁ tuviśuṣmastṛmpat somamapibadviṣṇunā sutaṁ yathāvaśam ||1 ||*
*sa ī mamāda mahi karma kartave mahāmuruṁ sainaṁ saśchaddevo devaṁ satyaṁ iduḥḥ satyamindram ||2 ||*
*adha tviṣīmām̐ abhyojasā kṛviṁ yudhābhavadā rodasī apṛṇadasya majmanā pra vāvṛdhe |*
*adhattānyaṁ jaṭhare premarichyata pra chetaya sainaṁ saśchaddevo devaṁ satya induḥ satyamindram ||3 |*

७. इन्द्रस् त्वष्टा वा (Indras Tvaṣṭā Vā) - ऋ. (Rv.) २.३२.२-३
मा नो गुह्या रिप आयोरहन्दभन्मा न आभ्यो रीरधो दुच्छुनाभ्यः ।
मा नो वि यौः सख्या विद्धि तस्य नः सुम्नायता मनसा तत्त्वेमहे ॥२॥
अहेळता मनसा श्रुष्टिमा वह दुहानां धेनुं पिप्युषीमसश्चतम् ।
पद्याभिराशुं वचसा च वाजिनं त्वां हिनोमि पुरुहूत विश्वहा ॥३॥
*mā no guhyā ripa āyorahandabhanmā na ābhyo rīradho duchchhunābhyaḥ |*
*mā no vi yauḥ sakhyā viddhi tasya naḥ sumnāyatā manasā tattvemahe ||2 ||*
*aheḷatā manasā śruṣṭimā vaha duhānāṁ dhenuṁ piṣyuṣīmasaśchatam |*
*padyābhirāśuṁ vachasā cha vājinaṁ tvāṁ hinomi puruhūta viśvahā ||3 ||*

८. इन्द्रो नभश्च (Indro Nabhaścha) - ऋ. (Rv.) २.३६.५

एष स्य ते तन्वो नृम्णवर्धनः सह ओजः प्रदिवि वाह्वोर्हितः ।
तुभ्यं सुतो मघवन्तुभ्यमाभृतस्त्वमस्य ब्राह्मणादा तृपत्पिब ॥५॥
*eṣa sya te tanvo nṛmṇavardhanaḥ saha Ojaḥ pradivi vāhnorhitaḥ* /
*tubhyaṁ suto maghavantubhyamābhṛtastvamasya brāhmaṇādā tṛpatpiba* //5//

९. इन्द्रो मघश्च (Indro Maghaścha) - ऋ. (Rv.) २.३६.१

तुभ्यं हिन्वानो वसिष्ट गा अपोऽधुक्षन्त्सीमविभिरद्रिभिर्नरः ।
पिबेन्द्र स्वाहा प्रहुतं वषट्कृतं होत्रादा सोमं प्रथमो य ईशिषे ॥१॥
*tubhyaṁ hinvāno vasiṣta gā apo'dhukṣantsīmavibhiradribhirnaraḥ* /
*pibendra svāhā prahutaṁ vaṣaṭkṛtaṁ hotrādā somaṁ prathamo ya īśiṣe* //1//

१०. इन्द्रवायुः (Indravāyuḥ) - ऋ. (Rv.) २.४१.३

शुक्रस्याद्य गवाशिर इन्द्रवायू नियुत्वतः । आ यातं पिबतं नरा ॥३॥
*śukrasyādya gavāśira indravāyū niyutvataḥ / ā yātaṁ pibataṁ narā* //3//

११. इन्द्रासोमौ (Indrāsomau) - ऋ. (Rv.) २.३०.६

प्र हि क्रतुं वृहथो यं वनुथे रध्रस्य स्थो यजमानस्य चोदौ ।
इन्द्रासोमा युवमस्माँ अविष्टमस्मिन्भयस्थे कृणुतमु लोकम् ॥६॥
*pra hi kratuṁ vṛhatho yaṁ vanuthe radhrasya stho yajamānasya chodau* /
*indrāsomā yuvamasmāṁ aviṣṭamasminbhayasthe kṛṇutamu lokam* //6//

१२. कपिंजल इव इन्द्रः (Kapiṁjala Iva Indraḥ) - ऋ. (Rv.) २.४२.१-३; २.४३.१-३

ऋ. (Rv.) २.४२.१-३

कनिक्रदज्जनुषं प्रबुवाण इयर्ति वाचमरितेव नावम् ।
सुमंगलश्च शकुने भवासि मा त्वा का चिदभिभा विश्व्या विदत् ॥१॥
मा त्वा श्येन उद्वधीन्मा सुपर्णो मा त्वा विददिषुमान्वीरो अस्ता ।
पित्र्यामनु प्रदिशं कनिक्रदत्सुमंगलो भद्रवादी वदेह ॥२॥
अव क्रन्द दक्षिणतो गृहाणां सुमंगलो भद्रवादी शकुन्ते ।
मा नः स्तेन ईशत माघशंसो बृहद्वदेम विदथे सुवीराः ॥३॥
*kanikradajjanuṣaṁ prabuvāṇa iyarti vāchamariteva nāvam* /
*sumaṁgalaścha śakune bhavāsi mā tvā kā chidabhibhā viśvyā vidat* //1//
*mā tvā śyena udvadhīnmā suparṇo mā tvā vidadiṣumānvīro astā* /
*pitrayāmanu pradiśaṁ kanikradatsumaṁgalo bhadravādī vadeha* //2//
*ava kranda dakṣiṇato gṛhāṇāṁ sumaṁgalo bhadravādī śakunte* /
*mā naḥ stena īśata māghaśaṁso bṛhadvadema vidathe suvīrāḥ* //3//

ऋ. (Rv.) २.४३.१-३

प्रदक्षिणिदभि गृणन्ति कारवो वयो वदन्त ऋतुथा शकुन्तयः ।
उभे वाचौ वदति सामगा इव गायत्रं च त्रैष्टुभं चानु राजति ॥१॥
उदगातेव शकुने साम गायसि ब्रह्मपुत्र इव सवनेषु शंससि ।
वृषेव वाजी शिशुमतीरपीत्या सर्वतो नः शकुने भद्रमा वद ।
विश्वतो नः शकुने पुण्यमा वद ॥२॥
आवदंस्त्वं शकुने भद्रमा वद तूष्णीमासीनः सुमति चिकिद्धि नः ।
यदत्पतन्वदसि कर्करिर्यथ बृहद्वदेम विदथे सुवीराः ॥३॥
*pradakṣiṇidabhi gṛṇanti kāravo vayo vadanta ṛtuthā śakuntayaḥ* /
*ubhe vāchau vadati sāmagā iva gāyatraṁ cha traiṣṭubhaṁ chānu rājati* //1//
*udagāteva śakune sāma gāyasi brahmaputra iva savaneṣu śaṁsasi* /
*vṛṣeva vājī śiśumatīrapītyā sarvato naḥ śakune bhadramā vada* /
*viśvato naḥ śakune puṇyamā vada* //2//
*āvadaṁstvaṁ śakune bhadramā vada tūṣṇīmāsīnaḥ sumatie chikiddhi naḥ* /

*yadatpatanvadasi karkariryatha bṛhadvadema vidathe suvīrāḥ //3 //*

१३. त्वष्टा शुक्रश्च (Tvaṣṭā Śukraścha) - ऋ. (Rv.) २.३६.३

अमेव नः सुहवा आ हि गन्तन नि बर्हिषि सदतना रणिष्टन ।
अथा मन्दस्व जुजुषाणो अन्धसस्त्वष्टर्देवेभिर्जनिभिः सुमद्गणः ॥३ ॥
*ameva naḥ suhavā ā hi gantana ni barhiṣi sadatanā raṇiṣṭana /*
*athā mandasva jujuṣāṇo andhasastvaṣṭardevebhirjanibhiḥ sumadgaṇaḥ //3 //*

१४. द्यावापृथिव्यौ (Dyāvāpṛthivyau) - ऋ. (Rv.) २.३२.१

अस्य मे द्यावापृथिवी ऋतायतो भूतमवित्री वचसः सिषासतः ।
ययोरायुः प्रतरं ते इदं पुर उपस्तुते वसूयुर्वा महो दधे ॥१ ॥
*asya me dyāvāpṛthivī ṛtāyato bhūtamavitrī vachasaḥ siṣāsataḥ /*
*yayorāyuḥ prataraṁ te idaṁ pura upastute vasūyurvā maho dadhe //1 //*

१५. द्यावापृथिव्यौ हविर्धाने वा (Dyāvāpṛthivyau Havirdhāne Vā) - ऋ. (Rv.) २.४१.१९-२१

प्रेतां यास्य शंभुवा युवामिदा वृणीमहे। अग्निं च हव्यवाहनम् ॥१९ ॥
द्यावा नः पृथिवी इमं सिध्रमद्य दिविस्पृशम्। यां देवेषु यच्छताम् ॥२० ॥
आ वामुपस्थमद्रुहा देवाः सीदन्तु यियाः। इहाद्य सोमपीतये ॥२१ ॥
*pretāṁ yāsya śaṁbhuvā yuvāmidā vṛṇīmahe / agniṁ cha havyavāhanam //19 //*
*dyāvā naḥ pṛthivī imaṁ sidhramadya divispṛśam / yāṁ deveṣu yachchhatām //20 //*
*ā vāmupasthamadruhā devāḥ sīdantu yiāyāḥ / ihādya somapītaye //21 //*

१६. द्रविणोदा (Draviṇodā) - ऋ. (Rv.) २.३७.१-४

मन्दस्व होत्रादनु जोषमन्धसोऽध्वर्यवः स पूर्णां वष्ट्यासिचम् ।
तस्मा एतं भरत तद्वशो ददिर्होत्रात्सोमं द्रविणोदः पिब ऋतुभिः ॥१ ॥
यमु पूर्वमहुवे तमिदं हुवे सेदु हव्यो ददिर्यो नाम पत्यते ।
अध्वर्युभिः प्रस्थितं सोम्यं मधु पोत्रात्सोमं द्रविणोदः पिब ऋतुभिः ॥२ ॥
मेद्यन्तु ते वह्नयो येभिरीयसेऽरिषण्यन्वीळयस्वा वनस्पते ।
आयूया धृष्णो अभिगूर्या त्वं नेष्ट्रात्सोमं द्रविणोदः पिब ऋतुभिः ॥३ ॥
अपाद्धोत्रादुत पोत्रादमत्तोत नेष्ट्रादजुषत प्रयो हितम् ।
तुरीयं पात्रममृक्तममर्त्यं द्रविणोदाः पिबतु द्राविणोदसः ॥४ ॥
*mandasva hotrādanu joṣamandhaso'dhvaryavaḥ sa pūrṇā vaṣṭyāsicham /*
*tasmā etaṁ bharata tadvaśo dadirhotrātsomaṁ draviṇodaḥ piba ṛtubhiḥ //1 //*
*yamu pūrvamahuve tamidaṁ huve sedu havyo dadiryo nāma patyate /*
*adhvaryubhiḥ prasthitaṁ somyaṁ madhu potrātsomaṁ draviṇodaḥ piba ṛtubhiḥ //2 //*
*medyanatu te vahnayo yebhirīyase'riṣaṇyanvīḷayasvā vanaspate /*
*āyūyā dhṛṣṇo abhigūryā tvaṁ neṣṭrātsomaṁ draviṇodaḥ piba ṛtubhiḥ //3 //*
*apāddhotrāduta potrādamattota neṣṭrādajuṣata prayo hitam /*
*turīyaṁ pātramamṛktamamartya draviṇodāḥ pibatu drāviṇodasaḥ //4 //*

१७. बृहस्पतिः (Bṛhaspatiḥ) - ऋ. (Rv.) २.२३.२-४ , ६-८ , १० , १२-१६ , १८; २.३०.९

ऋ. (Rv.) २.२३.२-४

देवाश्चिते असुर्य प्रचेतसो बृहस्पते यियं भागमानशुः ।
उस्राइव सूर्यो ज्योतिषा महो विश्वेषामिज्जनिता ब्रह्मणामसि ॥२ ॥
आ विबाध्या परिरापस्तमांसि च ज्योतिष्मन्तं रथमृतस्य तिष्ठसि।
बृहस्पते भीममित्रदम्भनं रक्षोहणं गोत्रभिदं स्वर्विदम् ॥३ ॥
सुनीतिभिर्नयसि त्रायसे जनं यस्तुभ्यं दाशान्न तमंहो अश्नवत् ।
ब्रह्मद्विषस्तपनो मन्युमीरसि बृहस्पते महि तत्ते महित्वनम् ॥४ ॥
*devāśchite asurya prachetaso bṛhaspate yiāyaṁ bhāgamānaśuḥ /*

*usrāiva sūryo jyotiṣā maho viśveṣāmijjanitā brahmaṇāmasi //2 //*
*ā vibādhyā parirāpastamāṁsi cha jyotiṣmantaṁ rathamṛtasya tiṣṭhasi /*
*bṛhaspate bhīmamitradambhanaṁ rakṣohaṇaṁ gotrabhidaṁ svarvidam //3 //*
*sunītibhirnayasi trāyase janaṁ yastubhyaṁ dāśānna tamaṁho aśnavat /*
*brahmadviṣastapano manyumīrasi bṛhaspate mahi tatte mahitvanam //4 //*

ऋ. (Rv.) २.२३.६-८
त्वं नो गोपाः पथिकृद्विक्षणस्तव व्रताय पतिभिर्जरामहे ।
बृहस्पते यो नो अभि ह्वरो दधे स्वा तं मर्मर्तु दुच्छुना हरस्वती ॥६॥
उत वा यो नो मर्चयादनागसो रातीवा मर्तः सानुको वृकः ।
बृहस्पते अप तं वर्तया पथः सुगं नो अस्यै देववीतये कृधि ॥७॥
त्रतारं त्वा तनूनां हवामहेऽवस्पर्तरधिवक्तारमस्मयुम् ।
बृहस्पते देवनिदो नि बर्हय मा दुरेवा उत्तरं सुम्नमुन्नशन् ॥८॥
*tvaṁ no gopāḥ pathikṛdvikṣaṇastava vratāya patibhirjarāmahe /*
*bṛhaspate yo no abhi hvaro dadhe svā taṁ marmartu duchchhunā harasvatī //6 //*
*uta vā yo no marchayādanāgaso rātīvā martaḥ sānuko vṛkaḥ /*
*bṛhaspate apa taṁ vartayā pathaḥ sugaṁ no asyai devavītaye kṛdhi //7 //*
*tratāraṁ tvā tanūnāṁ havāmahe'vaspartaradhivaktāramasmayum /*
*bṛhaspate devanido ni barhaya mā durevā uttaraṁ sumnamunnaśan //8 //*

ऋ. (Rv.) २.२३.१०
त्वया वयमुत्तमं धीमहे वयो बृहस्पते पप्रिणा सस्निना युजा ।
मा नो दुःशंसो अभिदिप्सुरीशत प्र सुशंसा मतिभिस्तारिषीमहि ॥१०॥
*tvayā vayamuttamaṁ dhīmahe vayo bṛhaspate papriṇā sasninā yujā /*
*mā no duḥśaṁso abhidipsurīśata pra suśaṁsā matibhistāriṣīmahi //10 //*

ऋ. (Rv.) २.२३.१२-१६
अदेवेन मनसा यो रिषण्यति शासामुग्रो मन्यमानो जिघांसति ।
बृहस्पते मा प्रणक्तस्य नो वधो नि कर्म मन्युं दुरेवस्य शर्धतः ॥१२॥
भरेषु हव्यो नमसोपसद्यो गन्ता वाजेषु सनिता धनंधनम् ।
विश्वा इदर्यो अभिदिप्स्वो३ मृधो बृहस्पतिर्वि ववर्हा रथाँइव ॥१३॥
तेजिष्ठया तपनी रक्षसस्तप ये त्वा निदे दधिरे दृष्टवीर्यम् ।
आविस्तत्कृष्व यदसत्त उक्थ्यं१ बृहस्पते वि परिरापो अर्दय ॥१४॥
बृहस्पते अति यदर्यो अहाद्द्युमद्विभाति क्रतुमज्जनेषु ।
यद्दीदयच्छवस ऋतप्रजात तदस्मासु द्रविणं धेहि चित्रम् ॥१५॥
मा नः स्तेनेभ्यो ये अभि द्रुहस्पदे निरामिणो रिपवोऽन्नेषु जागृधुः ।
आ देवानामोहते वि व्रयो हृदि बृहस्पते न परः साम्नो विदुः ॥१६॥
*adevena manasā yo riṣaṇyati śāsāmugro manyamāno jighāṁsati /*
*bṛhaspate mā praṇaktasya no vadho ni karma manyuṁ durevasya śardhataḥ //12 //*
*bhareṣu havyo namasopasadyo gantā vājeṣu sanitā dhanaṁdhanam /*
*viśvā idaryo abhidipsvo3 mṛdho bṛhaspatirvi vavarhā rathāṁ̐iva //13 //*
*tejiṣṭhayā tapanī rakṣasastapa ye tvā nide dadhire dṛṣṭavīryam /*
*āvistatkṛṣva yadasatta ukthyaṁ1 bṛhaspate vi parirāpo ardaya //14 //*
*bṛhaspate ati yadaryo ahāddyumadvibhāti kratumajjaneṣu /*
*yaddīdayachchhavasa ṛtaprajāta tadasmāsu draviṇaṁ dhehi chitram //15 //*
*mā naḥ stenebhyo ye abhi druhaspade nirāmiṇeā ripavo'nneṣu jāgṛdhuḥ /*
*ā devānāmohate vi vrayo hṛdi bṛhaspate na paraḥ sāmno viduḥ //16 //*

ऋ. (Rv.) २.२३.१८
तव श्रिये व्यजिहीत पर्वतो गवां गोत्रमुदसृजो यदंगिरः ।
इन्द्रेण युजा तमसा परीवृतं बृहस्पते निरपामौबजो अर्णवम् ॥१८॥

*tava śriye vyajihīta parvato gavāṁ gotramudasṛjo yadaṁgirah |*
*indreṇa yujā tamasā parīvṛtaṁ bṛhaspate nirapāmaubajo arṇavam ||18 ||*

ऋ. (Rv.) २.३०.९
यो नः सनुत्य उत वा जिघत्नुरभिख्याय तं तिगितेन विध्य ।
बृहस्पत आयुधैर्जेषि शत्रून्द्रुहे रीषन्तं परि धेहि राजन् ॥९॥
*yo naḥ sanutya uta vā jighatnurabhikhyāya taṁ tigitena vidhya |*
*bṛhaspata āyudhairjeṣi śatrūndruhe rīṣantaṁ pari dhehi rājan ||9 ||*

१८. ब्रह्मणस्पतिः (Brahmaṇaspatiḥ) - ऋ. (Rv.) २.२३.१; ५; ९; ११; १७; १९; २.२४.१-११; १३.१६; २.२५.१-५; २.२६.१-४

ऋ. (Rv.) २.२३.१
गणानां त्वा गणपतिं हवामहे कविं कवीनामुपमश्रवस्तमम् ।
ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत आ नः शृण्वन्नूतिभिः सीद सादनम् ॥१॥
*gaṇānāṁ tvā gaṇapatiṁ havāmahe kaviṁ kavīnāmupamaśravastamam |*
*jyeṣṭharājaṁ brahmaṇāṁ brahmaṇaspata ā naḥ śṛṇvannūtibhiḥ sīda sādanam ||1 ||*

ऋ. (Rv.) २.२३.५
न तमंहो न दुरितं कुतश्चन नारातयस्तितिरुर्न द्वयाविनः ।
विश्वा इदस्माद्ध्वरसो वि बाधसे यं सुगोपा रक्षसि ब्रह्मणस्पते ॥५॥
*na tamaṁho na duritaṁ kutaśchana nārātayastitirurna dvayāvinaḥ |*
*viśvā idasmādūdhvaraso vi bādhase yaṁ sugopā rakṣasi brahmaṇaspate ||5 ||*

ऋ. (Rv.) २.२३.९
त्वया वयं सुवृधा ब्रह्मणस्पते स्पार्हा वसु मनुष्या ददीमहि ।
या नो दूरो तळितो या अरातयोऽभि सन्ति जम्भया ता अनप्नसः ॥९॥
*tvayā vayaṁ suvṛdhā brahmaṇaspate spārhā vasu manuṣyā dadīmahi |*
*yā no dūro taḷito yā arātayo'bhi santi jambhayā tā anapnasaḥ ||9 ||*

ऋ. (Rv.) २.२३.११
अनानुदो वृषभो जग्मिराहवं निष्टप्ता शत्रुं पृतनासु सासहिः ।
असि सत्य ऋणया ब्रह्मणस्पत उग्रस्य चिद्दमिता वीळुहर्षिणः ॥११॥
*anānudo vṛṣabho jagmirāhavaṁ niṣṭpatā śatruṁ pṛtanāsu sāsahiḥ |*
*asi satya ṛṇayā brahmaṇaspata ugrasya chiddamitā vīḷuharṣiṇaḥ ||11 ||*

ऋ. (Rv.) २.२३.१७
विश्वेभ्यो हि त्वा भुवनेभ्यस्परि त्वष्टाजनत्साम्नः साम्नः कविः ।
स ऋणचिदृणया ब्रह्मणस्पतिर्द्रुहो हन्ता मह ऋतस्य धर्तरि ॥१७॥
*viśvebhyo hi tvā bhuvanebhyaspari tvaṣṭājanatsāmnaḥ sāmnaḥ kaviḥ |*
*sa ṛṇachidṛṇayā brahmaṇaspatirdruho hantā maha ṛtasya dhartari ||17 ||*

ऋ. (Rv.) २.२३.१९
ब्रह्मणस्पते त्वमस्य यन्ता सूक्तस्य बोधि तनयं च जिन्व ।
विश्व तद्भद्रं यदवन्ति देवा बृहद्वदेम विदथे सुवीराः ॥१९॥
*brahmaṇaspate tvamasya yantā sūktasya bodhi tanayaṁ cha jinva |*
*viśva tadbhadraṁ yadavanti devā bṛhadvadema vidathe suvīrāḥ ||19 ||*

ऋ. (Rv.) २.२४.१-११
सेमामविड्ढि प्रभृतिं य ईशिषेऽया विधेम नवया महा गिरा ।
यथा नो मीढ्वान्स्तवते सखा तव बृहस्पते सीषधः सोत नो मतिम् ॥१॥
यो नन्त्वान्यनमन्न्योजसोतादर्दर्मन्युना शम्बराणि वि ।
प्राच्यावयदच्युता ब्रह्मणस्पतिरा चाविशद्वसुमन्तं वि पर्वतम् ॥२॥
तद्देवानां देवतमाय कर्त्वमश्रश्नन्दृळहाव्रदन्त वीळिता ।
उद्गा आजदभिनद्ब्रह्मणा वलमगूहत्तमो व्यचक्षयत् स्वः ॥३॥

अश्मास्यमवतं ब्रह्मणस्पतिर्मधुधारमभि यमोजसातृणत् ।
तमेव विश्वे पपिरे स्वर्दृशो बहु साकं सिसिचुरुत्समुद्रिणम् ॥४॥
सना ता का चिद्भुवना भवीत्या माद्भिः शद्भिर्दुरो वरन्त वः ।
अयतन्ता चरतो अन्यदन्यदिद्या चकार वयुनां ब्रह्मणस्पतिः ॥५॥
अभिनक्षन्तो अभि ये तमानशुर्निधिं पणीनां परमं गुहा हितम ।
ते विद्वांसः प्रतिचक्ष्यानृता पुनर्यत उ आयन्तदुदीयुराविशम् ॥६॥
ऋतावानः प्रतिचक्ष्यानृता पुनरात आ तस्थुः कवयो महस्पथः ।
ते बाहुभ्यां धमितमग्निमश्मनि नकिः षो अस्त्यरणो जहुर्हि तम् ॥७॥
ऋतज्येन क्षिप्रेण ब्रह्मणस्पतिर्यत्र वष्टि प्र तदश्नोति धन्वना ।
तस्य साधवीरिषवो याभिरस्यति नृचक्षसो दृशये कर्णयोनयः ॥८॥
स संनयः स विनयः पुरोहितः स सुष्टुतः स युधि ब्रह्मणस्पतिः ।
चाक्ष्मो यद्वाजं भरते मती धनादित्सूर्यस्तपति तप्यतुर्वृथा ॥९॥
विभु प्रभु प्रथमं मेहनावतो बृहस्पतेः सुविदत्राणि राध्या ।
इमा सातानि वेन्यस्य वाजिनो येन जना उभये भुंजते विशः ॥१०॥
योऽवरे वृजने विश्वथा विभुर्महामु रण्वः शवसा ववक्षिथ ।
स देवो देवान्प्रति पप्रथे मृथु विश्वेदु ता परिभूर्ब्रह्मणस्पतिः ॥११॥

*semāmaviḍḍhi prabhṛtiṁ ya īśiṣe'yā vidhema navayā mahā girā /*
*yathā no mīḍhvānstavate sakhā tava bṛhaspate sīṣadhaḥ sota no matim //1 //*
*yo nantvānyanamannyojasotādardarmanyunā śambarāṇi vi /*
*prāchyāvayadachyutā brahmaṇaspatirā chāviśadvasumantaṁ vi parvatam //2 //*
*taddevānāṁ devatamāya kartvamaśrathnandṛḷahāvradanta vīḷitā /*
*udgā ājadabhinadbrahmaṇā valamagṛhattamo vyachakṣayat svaḥ //3 //*
*aśmāsyamavataṁ brahmaṇaspatirmadhudhāramabhi yamojasātṛṇat /*
*tameva viśve papire svardṛśo bahu sākaṁ sisichurutsamudriṇam //4 //*
*sanā tā kā chidbhuvanā bhavītyā mādbhiḥ śadbhirduro varanta vaḥ /*
*ayatantā charato anyadanyadidyā chakāra vayunāṁ brahmaṇaspatiḥ //5 //*
*abhinakṣanto abhi ye tamānaśurnidhiṁ paṇīnāṁ paramaṁ guhā hitama /*
*te vidvāṁsaḥ pratichakṣayānṛtā punaryata u āyantadudīyurāviśam //6 //*
*ṛtāvānaḥ pratichakṣayānṛtā punarāta ā tasthuḥ kavayo mahaspathaḥ /*
*te bāhubhyāṁ dhamitamagnimaśmani nakiḥ ṣo astyaraṇo jahurhi tam //7 //*
*ṛtajyena kṣipreṇa brahmaṇaspatiryatra vaṣṭi pra tadaśnoti dhanvanā /*
*tasya sādhavīriṣavo yābhirasyati nṛchakṣaso dṛśaye karṇayonayaḥ //8 //*
*sa saṁnayaḥ sa vinayaḥ purohitaḥ sa suṣṭutaḥ sa yudhi brahmaṇaspatiḥ /*
*chākṣamo yadvājaṁ bharate matī dhanāditsūryastapati tapyaturvṛthā //9 //*
*vibhu prabhu prathamaṁ mehanāvato bṛhaspateḥ suvidatrāṇi rādhyā /*
*imā sātāni venyasya vājino yena janā ubhaye bhuṁjate viśaḥ //10 //*
*yo'vare vṛjane viśvathā vibhurmahāmu raṇvaḥ śavasā vavakṣitha /*
*sa devo devānprati paprathe mṛthu viśvedu tā paribhūrbrahmaṇaspatiḥ //11 //*

ऋ. (Rv.) २.२४.१३-१६

उताशिष्ठा अनु श्रृण्वन्ति वह्नयः सभेयो विप्रो भरते मती धना ।
वीळुद्वेषा अनु वश ऋणमाददिः स ह वाजी समिथे ब्रह्मणस्पतिः ॥१३॥
ब्रह्मणस्पतेरभवद्यथावशं सत्यो मन्युर्महि कर्मा करिष्यतः ।
यो गा उदाजत्स दिवे वि चाभजन्महीव रीतिः शवसासरत्पृथक् ॥१४॥
ब्रह्मणस्पते सुयमस्य विश्वहा रायः स्याम रथ्यो३ वयस्वतः ।
वीरेषु वीराँ उप पृङ्घि नस्त्वं यदीशानो ब्रह्मणा वेषि मे हवम् ॥१५॥
ब्रह्मणस्पते त्वमस्य यन्ता सूक्तस्य बोधि तनयं च जिन्व ।
विश्वं तद्भद्रं यदवन्ति देवा बृहद्वदेम विदथे सुवीराः ॥१६॥

*utāśiṣṭhā anu śṛṇvanti vahnayaḥ sabheyo vipro bharate matī dhanā /*

*vīḷudveṣā anu vaśa ṛṇamādadiḥ sa ha vājī samithe brahmaṇaspatiḥ //13 //*
*brahmaṇaspaterabhavadyathāvaśaṁ satyo manyurmahi karmā kariṣyataḥ /*
*yo gā udājatsa dive vi chābhajanmahīva rītiḥ śavasāsaratpṛthak //14 //*
*brahmaṇaspate suyamasya viśvahā rāyaḥ syāma rathyo3 vayasvataḥ /*
*vīreṣu vīrām̐ upa pṛndhi nastvaṁ yadīśāno brahmaṇā veṣi me havam //15 //*
*brahmaṇaspate tvamasya yantā sūktasya bodhi tanayaṁ cha jinva /*
*viśvaṁ tadbhadraṁ yadavanti devā bṛhadvadema vidathe suvīrāḥ //16 //*

ऋ. (Rv.) २.२५.१-५

इन्धनो अग्निं वनवद्वनुष्यतः कृतब्रह्मा शूशुवद्रातहव्य इत् ।
जातेन जातमति स प्र सर्सृते यंयं युजं कृणुते ब्रह्मणस्पतिः ॥१॥
वीरेभिर्वीरान्वनवद्वनुष्यतो गोभी रयिं पप्रथद् बोधति त्मना ।
तोकं च तस्य तनयं च वर्धते यंयं युजं कृणुते ब्रह्मणस्पतिः ॥२॥
सिन्धुर्न क्षोदः शिमीवाँ ऋघायतो वृषेव वध्रीँरभि वष्ट्योजसा ।
अग्नेरिव प्रसितिर्नाह वर्तवे यंयं युजं कृणुते ब्रह्मणस्वतिः ॥३॥
तस्मा अर्षन्ति दिव्या असश्चतसः स्तवभिः प्रथमो गोषु गच्छति ।
अनिभृष्टतविषिर्हन्त्योजसा यंयं युजं कृणुते ब्रह्मणस्पतिः ॥४॥
तस्मा इद्विश्वे धुनयन्त सिन्धवोऽच्छिद्रा शर्म दधिरे पुरूणि ।
देवानां सुम्ने सुभगः स एधते यंयं युजं कृणुते ब्रह्मणस्पतिः ॥५॥

*indhano agniṁ vanavadvanuṣyataḥ kṛtabrahmā śūśuvadrātahavya it /*
*jātena jātamati sa pra sarsṛte yaṁyaṁ yujaṁ kṛṇute brahmaṇaspatiḥ //1 //*
*vīrebhirvīrānvanavadvanuṣyato gobhī rayiṁ paprathad bodhati tmanā /*
*tokaṁ cha tasya tanayaṁ cha vardhate yaṁyaṁ yujaṁ kṛṇute brahmaṇaspatiḥ //2 //*
*sindhurna kṣodaḥ śimīvām̐ ṛghāyato vṛṣeva vadhrīm̐rabhi vaṣṭyojasā /*
*agneriva prasitirnāha vartave yaṁyaṁ yujaṁ kṛṇute brahmaṇasvatiḥ //3 //*
*tasmā arṣanti divyā asaśchatasaḥ stavabhiḥ prathamo goṣu gachchhati /*
*anibhṛṣṭataviṣirhantyojasā yaṁyaṁ yujaṁ kṛṇute brahmaṇaspatiḥ //4 //*
*tasmā idviśve dhunayanta sindhavo'chchhidrā śarma dadhire purūṇi /*
*devānāṁ sumne subhagaḥ sa edhate yaṁyaṁ yujaṁ kṛṇute brahmaṇaspatiḥ //5 //*

ऋ. (Rv.) २.२६.१-४

ऋजुरिच्छंसो वनवद्वनुष्यतो देवयन्निददेवयन्तमभ्यसत् ।
सुप्रावीरिद्वनवत्पृत्सु दुष्टरं यज्वेदयज्योर्वि भजाति भोजनम् ॥१॥
यजस्व वीर प्र विहि मनायतो भद्रं मनः कृणुष्व वृत्रतूर्ये ।
हविष्कृणुष्व सुभगो यथाससि ब्रह्मणस्तेरव आ वृणीमहे ॥२॥
स इज्जनेन स विशा स जन्मना स पुत्रैर्वाजं भरते धना नृभिः ।
देवानां यः पितरमाविवासति श्रद्धामना हविषा ब्रह्मणस्पतिम् ॥३॥
यो अस्मै हव्यैर्घृतवद्भिरविधत्प्र तं प्राचा नयति ब्रह्मणस्पतिः ।
उरुष्यतीमंहसो रक्षती रिषोंऽहोश्चिदस्मा उरुचक्रिरद्भुतः ॥४॥

*ṛjurichchhaṁso vanavadvanupyato devayannidadevayantamabhyasat /*
*suprāvīridvanavatpṛtsu duṣṭaraṁ yajvedayajyorvi bhajāti bhojanam //1 //*
*yajasva vīra pra vihi manāyato bhadraṁ manaḥ kṛṇuṣva vṛtratūrye /*
*haviṣkṛṇuṣva subhago yathāsasi brahmaṇasterava ā vṛṇīmahe //2 //*
*sa ijjanena sa viśā sa janmanā sa putrairvājaṁ bharate dhanā nṛbhiḥ /*
*devānāṁ yaḥ pitaramāvivāsati śraddhāmanā haviṣā brahmaṇaspatim //3 //*
*yo asmai havyairghṛtavadbhiravidhatpra taṁ prāchā nayati brahmaṇaspatiḥ /*
*uruṣyatīmaṁhaso rakṣatī riṣoṁ3hośchidasmā uruchakriradbhutaḥ //4 //*

१९. ब्रह्मणस्पतिर् इन्द्रश्च (Brahmaṇaspatir Indraścha) - ऋ. (Rv.) २.२४.१२

विश्वं सत्यं मघवाना युवोरिदापश्चन प्र मिनन्ति व्रतं वाम् ।

अच्छेन्द्राब्रह्मणस्पती हविर्नोऽन्नं युजेव वाजिना जिगातम् ॥१२॥
*viśvaṁ satyaṁ maghavānā yuvoridāpaśchana pra minanti vrataṁ vām* ।
*achchhendrābrahmaṇaspatī havirno'nnaṁ yujeva vājinā jigātam* ॥12॥

२०. मरुतः (Marutaḥ) - ऋ. (Rv.) २.३०.११; २.३४.१-१५ -

ऋ. (Rv.) २.३०.११

तं वः शर्ध मारुतं सुम्नयुर्गिरोप ब्रुवे नमसा दैव्यं जनम् ।
यथा रयिं सर्ववीरं नशामहा अपत्यसाचं श्रुत्यं दिवेदिवे ॥११॥
*taṁ vaḥ śardha mārutaṁ sumnayurgiropa bruve namasā daivyaṁ janam* ।
*yathā rayiṁ sarvavīraṁ naśāmahā apatyasāchaṁ śrutyaṁ divedive* ॥11॥

ऋ. (Rv.) २.३४.१-१५

धारावरा मरुतो धृष्ण्वोजसो मृगा न भीमास्तविषीभिरर्चिनः ।
अग्नयो न शुशुचाना ऋजीषिणो भृमिं धमन्तो अप गा अवृण्वत ॥१॥
द्यावो न स्तृभिश्चितयन्त खादिनो व्य१ भ्रिया न द्युतयन्त वृष्टयः ।
रुद्रो यद्वो मरुतो रुक्मवक्षसो वृषाजनि पृश्न्याः शुक्र ऊध्नि ॥२॥
उक्षन्ते अश्वाँ अत्याँ इवाजिषु नदस्य कर्णैस्तुरयन्त आशुभिः ।
हिरण्यशिप्रा मरुतो दविध्वतः पृक्षं याथ पृषतीभिः समन्यवः ॥३॥
पृक्षे ता विश्वा भुवना ववक्षिरे मित्राय वा सदमा जीरदानवः ।
पृषदश्वासो अनवभ्रराधस ऋजिप्यासो न वयुनेषु धूर्षदः ॥४॥
इन्धन्वभिर्धेनुभी रप्शदूधभिरध्वस्मभिः पाथिभिर्भ्राजदृष्टयः ।
आ हंसासो न स्वसराणि गन्तन मधोर्मदाय मरुतः समन्यवः ॥५॥
आ नो ब्रह्माणि मरुतः समन्यवो नरां न शंसः सवनानि गन्तन ।
अश्वामिव पिप्यत धेनुमूधनि कर्ता धियं जरित्रे वाजपेशसम् ॥६॥
तं नो दात मरुतो वाजिनं रथ आपानं ब्रह्म चितयद्दिवेदिवे ।
इषं स्तोतृभ्यो वृजनेषु कारवे सनिं मेधामरिष्टं दुष्टरं सहः ॥७॥
यद्युंजते मरुतो रुक्मवक्षसोऽश्वान्रथेषु भग आ सुदानवः ।
धेनुर्न शिश्वे स्वसरेषु पिन्वते जनाय रातहविषे महीमिषम् ॥८॥
यो नो मरुतो वृकताति मर्त्यो रिपुर्दधे वसवो रक्षता रिषः ।
वर्तयत तपुषा चक्रियाभि तमव रुद्रा अशसो हन्तना वधः ॥९॥
चित्रं तद्वो मरुतो याम चेकिते पृश्न्या यदूधरप्यापयो दुहुः ।
यद्वा निदे नवमानस्य रुद्रियास्त्रितं जराय जुरतामदाभ्याः ॥१०॥
तान्वो महो मरुत एवयाव्नो विष्णोरेषेभ्य प्रभृथे हवामहे ।
हिरण्यवर्णान्ककुहान्यतस्रुचो ब्रह्मण्यसन्तः शंस्यं राध ईमहे ॥११॥
ते दशग्वाः प्रथमा यामूहिरे ते नो हिन्वन्तूषसो व्युष्टिषु ।
उषा न रामीररुणैरपोर्णुते महो ज्योतिषा शुचता गोअर्णसा ॥१२॥
ते क्षोणीभिररुणेभिर्नाञ्जिभी रुद्रा ऋतस्य सदनेषु वावृधुः ।
निमेघमा अत्येन पाजसा सुश्चन्द्रं वर्ण दधिरे सुपेशसम् ॥१३॥
ताँ इयानो महि वरूथमूतय उप घेदेना नमसा गृणीमसि ।
त्रितो न यान्पंच होतृनभिष्टय आववर्तदवारंचक्रियावसे ॥१४॥
यया रध्रं पारयथात्यंहो यया निदो मुंचथ वन्दितारम् ।
अर्वाची सा मरुतो या व ऊतिरो षु वाश्रेव सुमतिर्जिगातु ॥१५॥
*dhārāvarā maruto dhṛṣṇvojaso mṛgā na bhīmāstaviṣībhirarchinaḥ* ।
*agnayo na śuśuchānā ṛjīṣiṇo bhṛmiṁ dhamanto apa gā avṛṇvata* ॥1॥
*dyāvo na stṛbhiśchitayanta khādino vya1 bhriyā na dyutayanta vṛṣṭayaḥ* ।
*rudro yadvo maruto rukmavakṣaso vṛṣājani pṛśnyāḥ śukra ūdhni* ॥2॥
*ukṣante aśvām̐ atyam̐ ivājiṣu nadasya karṇaisturayanta āśubhiḥ* ।
*hiraṇyaśiprā maruto davidhvataḥ pṛkṣaṁ yātha pṛṣatībhiḥ samanyavaḥ* ॥3॥

*pṛkṣe tā viśvā bhuvanā vavakṣire mitrāya vā sadamā jīradānavaḥ /*
*pṛṣadaśvāso anavabhrarādhasa ṛjipyāso na vayuneṣu dhūrṣadaḥ //4 //*
*indhanvabhirdhenubhī rapśadūdhabhiradhvasmabhiḥ pāthibhirbhrājadṛṣṭayaḥ /*
*ā haṁsāso na svasararāṇi gantana madhormadāya marutaḥ samanyavaḥ //5 //*
*ā no brahmāṇi marutaḥ samanyavo narāṁ na śaṁsaḥ savanāni gantana /*
*aśvāmiva pipyata dhenumūdhani kartā dhiyaṁ jaritre vājapeśasam //6 //*
*taṁ no dāta maruto vājinaṁ ratha āpānaṁ brahma chitayaddivedive /*
*iṣaṁ stotṛbhyo vṛjaneṣu kārave saniṁ medhāmariṣṭaṁ duṣṭaraṁ sahaḥ //7 //*
*yadyuṁjate maruto rukmavakṣaso'śvānnatheṣu bhaga ā sudānavaḥ /*
*dhenurna śiśve svasareṣu pinvate janāya rātahaviṣe mahīmiṣam //8 //*
*yo no maruto vṛkatāti martyo ripurdadhe vasavo rakṣatā riṣaḥ /*
*vartayata tapuṣā chakriyābhi tamava rudrā aśaso hantanā vadhaḥ //9 //*
*chitraṁ tadvo maruto yāma chekite pṛśnyā yadūdharapyāpayo duhuḥ /*
*yadvā nide navamānasya rudriyāstritaṁ jarāya juratāmadābhyāḥ //10 //*
*tānvo maho maruta evayāvno viṣṇoraṣebhya prabhṛthe havāmahe /*
*hiraṇyavarṇānkakuhānyatasrucho brahmaṇyasantaḥ śaṁsyaṁ rādha īmahe //11 //*
*te daśagvāḥ prathamā yāmūhire te no hinvantūṣaso vyuṣṭiṣu /*
*uṣā na rāmīraruṇaurapornute maho jyotiṣā śuchatā goarṇasā //12 //*
*te kṣoṇībhiraruṇebhirnāñjibhī rudrā ṛtasya sadaneṣu vāvṛdhuḥ /*
*nimeghamā atyena pājasā suśchandraṁ varṇa dadhire supeśasam //13 //*
*tām̐ iyāno mahi varūthamūtaya upa ghedenā namasā gṛṇīmasi /*
*trito na yānpaṁcha hotṝnabhiṣṭaya āvavartadavārāṁchakriyāvase //14 //*
*yayā radhraṁ pārayathātyaṁho yayā nido muṁchatha vanditāram /*
*arvāchī sā maruto yā va ūtiro ṣu vāśreva sumatirjigātu //15 //*

२१. मरुतो माधवश्च (Maruto Mādhavaścha) - ऋ. (Rv.) २.३६.३

अमेव नः सुहवा आ हि गन्तन नि बर्हिषि सदतना रणिष्टन ।
अथा मन्दस्व जुजुषाणो अन्धसस्त्वष्टर्देवेभिर्जनिभिः सुमद्गणः ॥३ ॥
*ameva naḥ suhavā ā hi gantana ni barhiṣi sadatanā raṇiṣṭana /*
*athā mandasva jujuṣāṇo andhasastvaṣṭardevebhirjanibhiḥ sumadgaṇaḥ //3 //*

२२. मित्रावरुणौ (Mitrāvaruṇau) - ऋ. (Rv.) २.४१.४-६; सा. (Sv.) ९१०-१२

ऋ. (Rv.) २.४१.४-६

अयं वां मित्रावरुणा सुतः सोम ऋतावृधा। ममेदिह श्रुतं हवम् ॥४ ॥
राजानावनभिद्रुहा ध्रुवे सदस्युत्तमे। सहस्रस्थूण आसाते ॥५ ॥
ता सम्राजा घृतासुती आदित्या दानुनस्पती। सचेते अनवह्वरम् ॥६ ॥
*ayaṁ vāṁ mitrāvaruṇā sutaḥ soma ṛtāvṛdhā / mamediha śrutaṁ havam //4 //*
*rājānāvanabhidruhā dhruve sadasyuttame / sahasrasthūṇa āsāte //5 //*
*tā samrājā ghṛtāsutī ādityā dānunaspatī / sachete anavahnaram //6 //*

सा. (Sv.) ९१०-१२

असं परं मित्रावरुणा सुतः सोम ऋतावृधा। ममेदिह श्रुतं हवम् ॥१ ॥
राजानावनभिद्रुहा ध्रुवे सदस्युत्तमे। सहस्रस्थूण आशाते ॥२ ॥
ता सम्राजा घृतासुती आदित्या दानुनस्पती। सचेते अनवह्वरम् ॥ ३ ॥
*asaṁ paraṁ mitrāvaruṇā sutaḥ soma ṛtāvṛdhā / mamediha śrutaṁ havam //1 //*
*rājānāvanabhidruhā dhruve sadasyuttame / sahasrasthūṇa āśāte //2 //*
*tā samrājā ghṛtāsutī ādityā dānunaspatī / sachete anavahnaram // 3 //*

२३. मित्रावरुणौ नभस्यश्च (Mitrāvaruṇau Nabhasyaścha) - ऋ. (Rv.) २.३६.६

जुषेथां यां बोधतं हवस्य मे सत्तो होता निविदः पूर्व्या अनु ।
अच्छा राजाना नम एत्यावृतं प्रशास्त्रादा पिबतं सोम्यं मधु ॥६ ॥

*juṣethāṁ yāṁ bodhataṁ dṛvasya me satto hotā nividaḥ pūrvyā anu /*
*achchhā rājānā nama etyāvṛtaṁ praśāstrādā pibataṁ somyaṁ madhu //6 //*

२४. राका (Rākā) - ऋ. (Rv.) २.३२.४-५

राकामहं सुहवां सुष्टुती हुवे श्रृणोतु नः सुभगा बोधतु त्मना ।
सीव्यत्वपः सूच्याच्छिद्यमानया ददातु वीरं शतदायमुक्थ्यम् ॥४॥
यास्ते राके सुमतयः सुपेशसो याभिर्ददासि दाशुषे वसूनि ।
ताभिर्नो अद्य सुमना उपागहि सहस्रपोषं सुभगे रराणा ॥५॥
*rākāmahaṁ suhavāṁ suṣṭutī huve śṛṇotu naḥ subhagā bodhatu tmanā /*
*sīvyatvapaḥ sūchyāchchhiedyamānayā dadātu vīraṁ śatadāyamukthyam //4 //*
*yāste rāke sumatayaḥ supeśaso yābhirdadāsi dāśuṣe vasūni /*
*tābhirno adya sumanā upāgahi sahasrapoṣaṁ subhage rarāṇā //5 //*

२५. रुद्रः (Rudraḥ) - ऋ. (Rv.) २.३३.१-१५

आ ते पिर्तमरुतां सुम्नमेतु मा नः सूर्यस्य संदृशो युयोथाः ।
अभि नो वीरो अर्वति क्षमेत प्र जायेमहि रुद्र प्रजाभिः ॥१॥
त्वादत्तेभी रुद्र शंतमेभिः शतं हिमा अशीय भेषजेभिः ।
व्य१स्मद्द्वेषो वितरं व्यंहो व्यमीवाश्चातयस्वा विषूचीः ॥२॥
श्रेष्ठो जातस्य रुद्र श्रियासि तवस्तमस्तवसां वज्रबाहो ।
पर्षि णः पारमंहसः स्वस्ति विश्वा अभीति रपसो युयोधि ॥३॥
मा त्वा रुद्र चुक्रुधामा नमोभिर्मा दुष्टुती वृषभ मा सहूती ।
उन्नो वीराँ अर्पय भेषजेभिभिराषक्तमं त्वा भिषजां श्रृणोमि ॥४॥
हवीमभिर्हवते यो हविर्भिरव स्तोमेभी रुद्रं दिषीय ।
ऋदूदरः सुहवो मा नो अस्यै बभ्रुः सुशिप्रो रीरधन्मनायै ॥५॥
उन्मा ममन्द वृषभो मरुत्वान्त्वक्षीयसा वयसा नाधमानम् ।
घृणीव च्छायामरपा अशीया विवासेयं रुद्रस्य सुम्नम् ॥६॥
क्व स्य ते रुद्र मृळयाकुर्हस्तो यो अस्ति भेषजो जलाषः ।
अपभर्ता रपसो दैव्यस्याभी नु मा वृषभ चक्षमीथाः ॥७॥
प्र बभ्रवे वृषभाय श्वितीचे महो महीं सुष्टुतिमीरयामि ।
नमस्या कल्मलीकिनं नमोभिर्गृणीमसि त्वेषं रुद्रस्य नाम ॥८॥
स्थिरोभिरंगैः पुरुरूप उग्रो बभ्रुः शुक्रेभिः पिपिशे हिरण्यैः ।
ईशानादस्य भुवनस्य भ्रेरेर्न वा उ योषद्रुद्रादसुर्यम् ॥९॥
अर्हन्बिभर्षि सायकानि धन्बार्हन्निष्कं यजतं विश्वरूपम् ।
अर्हन्निदं दयसे विश्वमभ्वं न वा ओजीयो रुद्र त्वदस्ति ॥१०॥
स्तुहि श्रुतं गर्तसदं युवानं मृगं न भीममुपहत्नुमुग्रम् ।
मृळा जरित्रे रुद्र स्तवानोऽन्यं ते अस्मन्नि वपन्तु सेनाः ॥११॥
कुमारश्चित्पितरं वन्दमानं प्रति नानाम रुद्रोपयन्तम् ।
भूरेर्दातारं सत्पतिं गृणीषे स्तुतस्त्वं भेषजा रास्यस्मे ॥१२॥
या वो भेषजा मरुतः शुचीनि या शंतमा वृषणो या मयोभु ।
यानि मनुरवृणीता पिता नस्ता शं च योश्च रुद्रस्य वश्मि ॥१३॥
परि णो हेती रुद्रस्य वृज्याः त्वेषस्य दुर्मतिर्मही गात् ।
अव स्थिरा मघवद्भ्यस्तनुष्व मीढ्वस्तोकाय तनयाय मृळ ॥१४॥
एवा बभ्रो वृषण चेकितान यथा देव न हृणीषे न हंसि ।
हवनश्रुन्नो रुद्रेह बोधि बृहद्वदेम विदथे सुवीराः ॥१५॥
*ā te pirtamarutāṁ sumnametu mā naḥ sūryasya saṁdṛśo yuyothāḥ /*
*abhi no vīro arvati kṣameta pra jāyemahi rudra prajābhiḥ //1 //*
*tvādattebhī rudra śaṁtamebhiḥ śataṁ himā aśīya bheṣajebhiḥ /*
*vya1smaddveṣo vitaraṁ vyaṁho vyamīvāśchātayasvā viṣūchīḥ //2 //*

*śreṣṭho jātasya rudra śriyāsi tavastamastavasāṁ vajrabāho ।*
*parṣi ṇaḥ pāramaṁhasaḥ svasti viśvā abhīti rapaso yuyodhi ॥3॥*
*mā tvā rudra chukrudhāmā namobhirmā duṣṭutī vṛṣabha mā sahūtī ।*
*unno vīrām̐ arpaya bheṣajebhibhirāṣaktamaṁ tvā bhiṣajāṁ śṛṇomi ॥4॥*
*havīmabhirhavate yo havirbhirava stomebhī rudraṁ diṣīya ।*
*ṛdūdaraḥ suhavo mā no asyai babhruḥ suśipro rīradhanmanāyai ॥5॥*
*unmā mamanda vṛṣabho marutvāntvakṣīyasā vayasā nādhamānam ।*
*ghṛṇīva chchhāyāmarapā aśīyā vivāseyaṁ rudrasya sumnam ॥6॥*
*kvapa sya te rudra mṛḷayākurhasto yo asti bheṣajo jalāṣaḥ ।*
*apabhartā rapaso daivyasyābhī nu mā vṛṣabha chakṣamīthāḥ ॥7॥*
*pra babhrave vṛṣabhāya śvitīche maho mahīṁ suṣṭutimīrayāmi ।*
*namasyā kalmalīkinaṁ namobhirgṛṇīmasi tveṣaṁ rudrasya nāma ॥8॥*
*sthirobhiraṁgaiḥ pururūpa ugro babhruḥ śukrebhiḥ pipiśe hiraṇyaiḥ ।*
*īśānādasya bhuvanasya bhrarerna vā u yoṣadrudrādasuryam ॥9॥*
*arhanbibharṣi sāyakāni dhanbārhanniṣkaṁ yajataṁ viśvarūpam ।*
*arhannidaṁ dayase viśvamabhvaṁ na vā Ojīyo rudra tvadasti ॥10॥*
*stuhi śrutaṁ gartasadaṁ yuvānaṁ mṛgaṁ na bhīmamupahatnumugram ।*
*mṛḷā jaritre rudra stavāno'nyaṁ te asmanni vapantu senāḥ ॥11॥*
*kumāraśchitpitaraṁ vandamānaṁ prati nānāma rudropayantam ।*
*bhūrerdātāraṁ satpatiṁ gṛṇīṣe stutastvaṁ bheṣajā rāsyasme ॥12॥*
*yā vo bheṣajā marutaḥ śuchīni yā śaṁtamā vṛṣaṇo yā mayobhu ।*
*yāni manuravṛṇītā pitā nastā śaṁ cha yośca rudrasya vaśmi ॥13॥*
*pari ṇo hetī rudrasya vṛjyāḥ tveṣasya durmatirmahī gāt ।*
*ava sthirā maghavadbhyastanuṣva mīḍhvastokāya tanayāya mṛḷa ॥14॥*
*evā babhro vṛṣaṇa chekitāna yathā deva na hṛṇīṣe na haṁsi ।*
*havanaśrunno rudreha bodhi bṛhadvadema vidathe suvīrāḥ ॥15॥*

२६. लिङेक्ताः (Liṅektāḥ) - ऋ. (Rv.) २.३२.८

या गुंगूर्या सिनीवाली या राका या सरस्वती। इन्द्राणीमह्व ऊतये वरुणानीं स्वस्तये ॥८॥
*yā guṁgūryā sinīvālī yā rākā yā sarasvatī । indrāṇīmahna ūtaye varuṇānīṁ svastaye ॥8॥*

२७. वायुः (Vāyuḥ) - ऋ. (Rv.) २.४१.१-२; सा. (Sv.) ६००

ऋ. (Rv.) २.४१.१-२

वायो ये ते सहस्रिणो रथासस्तेभिरा गहि। नियुत्वान्त्सोमपीतये ॥१॥
नियुत्वान्वायवा गह्ययं शुक्रो अयामि ते। गन्तामि सुन्वतो गृहम्॥२॥
*vāyo ye te sahasriṇo rathāsastebhirā gahi । niyutvāntsomapītaye ॥1॥*
*niyutvānvāyavā gahyayaṁ śukro ayāmi te । gantāmi sunvato gṛham ॥2॥*

सा. (Sv.) ६००

नियुत्वान्वायवा गह्ययं शुक्रो अयायिते। गन्तासि सुन्वतो गृहम् ॥६॥
*niyutvānvāyavā gahyayaṁ śukro ayāyite । gantāsi sunvato gṛham ॥6॥*

२८. विश्वेदेवाः (Viśvedevāḥ) - ऋ. (Rv.) २.३१.१-७; २.४१.१३-१५

ऋ. (Rv.) २.३१.१-७

अस्माकं मित्रावरुणावतं रथमादित्यै रुद्रैर्वसुभिः सचाभुवा ।
प्र यद्वयो न पप्तन्वस्मनस्परि श्रवस्यवो हृषीवन्तो वनर्षदः ॥१॥
अध स्मा न उदवता सजोषसो रथं देवासो अभि विक्षु वाजयुभ् ।
यदाशवः पद्याभिस्तित्रतो रजः पृथिव्याः सानौ जङ्घनन्त पाणिभिः ॥२॥
उत स्य न इन्द्रो विश्वचर्षणिर्दिवः शर्धेन मारुतेन सुक्रतुः ।
अनु नु स्थात्यवृकाभिरूतिभि रथं महे सनये वाजसातये ॥३॥

उत स्य देवो भुवनस्य सक्षणिस्त्वष्टा ग्नाभिः सजोषा जूजुवद्रथम् ।
इळा भगो बृहद्दिवोत रोदसी पूषा पुरंधिरश्विनावधा पती ॥४॥
उत त्ये देवी सुभगे मिथुदृशेषासानक्ता जगतामपीजुवा ।
स्तुषे यद्वां पृथिवि नव्यसा वचः स्थातुश्च वयस्त्रिवया उपस्तिरे ॥५॥
उत वः शंसमुशिजामिव श्मस्यहिर्बुध्न्यो३ऽज एकपादुत ।
त्रित ऋभुक्षाः सविता चनो दधेऽपां नपादाशुहेमा धिया शमि ॥६॥
एता वो वश्म्युद्यता यजत्राअतक्षन्नायवो नव्यसे सम् ।
श्रवस्यवो वाजं चकानाः सप्तिर्न रथ्यो अह धीतिमश्याः ॥७॥

*asmākaṁ mitrāvaruṇāvataṁ rathamādityai rudrairvasubhiḥ sachābhuvā /*
*pra yadvayo na paptanvasmanaspari śravasyavo hṛṣīvanto vanarṣadaḥ //1 //*
*adha smā na udavatā sajoṣaso rathaṁ devāso abhi vikṣu vājayubh /*
*yadāśavaḥ padyābhistitrato rajaḥ pṛthivyāḥ sānau jaṅghananta pāṇibhiḥ //2 //*
*uta sya na indro viśvacharṣaṇirdivaḥ śardhena mārutena sukratuḥ /*
*anu nu sthātyavṛkābhirūtibhi rathaṁ mahe sanaye vājasātaye //3 //*
*uta sya devo bhuvanasya sakṣaṇistvaṣṭā gnābhiḥ sajoṣā jūjuvadratham /*
*iḷā bhago bṛhaddivota rodasī pūṣā puraṁdhiraśvināvadhā patī //4 //*
*uta tye devī subhage mithudṛśeṣāsānaktā jagatāmapījuvā /*
*stuṣe yadvāṁ pṛthivi navyasā vachaḥ sthātuścha vayastrivayā upastire //5 //*
*uta vaḥ śaṁsamuśijāmiva śmasyahirbudhnyo3'ja ekapāduta /*
*trita ṛbhukṣāḥ savitā chano dadhe'pāṁ napādāśuhemā dhiyā śami //6 //*
*etā vo vaśmyudyatā yajatrāatakṣannāyavo navyase sam /*
*śravasyavo vājaṁ chakānāḥ saptirna rathyo aha dhītimaśyāḥ //7 //*

ऋ. (Rv.) २.४१.१३-१५

विश्वे देवास आ गत शृणुता म इमं हवम्। एदं बर्हिर्नि षीदत ॥१३॥
तीव्रो वो मधुमाँ अयं शुनहोत्रेषु मत्सरः एतं पिबत काम्यम् ॥१४॥
इन्द्रज्येष्ठा मरुद्गणा देवासः पूषरातयः विश्वे मम श्रुता हवम् ॥१५॥

*viśve devāsa ā gata śuṇutā ma imaṁ havam / edaṁ barhirni ṣīdata //13 //*
*tīvro vo madhumāṁ̐ ayaṁ śunahotreṣu matsaraḥ etaṁ pibata kāmyam //14 //*
*indrajyeṣṭhā marudgaṇā devāsaḥ pūṣarātayaḥ viśve mama śrutā havam //15 //*

२९. सरस्वती (Sarasvatī) - ऋ. (Rv.) २.४१.१६-१८

अम्बितमे नदीतमे देवितमे सरस्वति। अप्रशस्ता इव स्मासि प्रशस्तिमम्ब नस्कृधि ॥१६॥
त्वे विश्वा सरस्वति श्रितायूंषि देवयाम्। शुनहोत्रेषु मत्स्व प्रजा देवि दिदिड्ढि नः ॥१७॥
इमा ब्रह्म सरस्वति जुषस्व वाजिनीवति।
या ते मन्म गृत्समदा ऋतावरि प्रिया देवेषु जुह्वति ॥१८॥

*ambitame nadītame devitame sarasvati / apraśastā iva smāsi praśastimamba naskṛdhi //16 //*
*tve viśvā sarasvati śritāyūṁṣi devayām / śunahotreṣu matsva prajā devi didiḍḍhi naḥ //17 //*
*imā brahma sarasvati juṣasva vājinīvati /*
*yā te manma gṛtsamadā ṛtāvari priyā deveṣu juhnati //18 //*

३०. सविता (Savitā) - ऋ. (Rv.) २.३८.१-११

उदु ष्य देवः सविता सवाय शश्वत्तमं तदपा वह्निरस्थात् ।
नूनं देवेभ्यो वि हि धाति रत्नमथाभजद्वीतिहोत्रं स्वस्तौ ॥१॥
विश्वस्य हि श्रुष्टये देव ऊर्ध्वः प्र बाहवा पृथुपाणिः सिसर्ति ।
आपश्चिदस्य व्रत आ निमृग्रा अयं चिद्वातो रमते परिज्मन् ॥२॥
आशुभिश्चिद्यान्वि मुचाति नूनमरीरमदतमानं चिदेतोः ।
अह्यर्षूणां चिन्न्ययाँ अविष्यामनु व्रतं सवितुर्मोक्यागात् ॥३॥

पुनः समभव्यद्वितंतं वयन्ती मध्या कर्तोर्न्यधाच्छक्म धीरः ।
उत्संहायास्थद्व्य१तूँरदर्धररमतिः सविता देव आगात् ॥४॥
ना नौकांसि दुर्यो विश्वमायुर्वि तिष्ठते प्रभवः शोको अग्नेः ।
ज्येष्ठं माता सूनवे भागमाधादन्वस्य केतमिषितं सवित्रा ॥५॥
समाववर्ति विष्ठितो जिगीषुर्विश्वेषां कामश्चरताममाभूत् ।
शश्वँ अपो विकृतं हित्व्यागादनु व्रतं सवितुर्दैव्यस्य ॥६॥
त्वया हितमप्यमप्सु भागं धन्वान्या मृगयसो वि तस्थुः ।
वनानि विभ्यो नकिरस्य तानि व्रता देवस्य सवितुर्मिनन्ति ॥७॥
याद्राध्यं१ वरुणो योनिमप्यमनिशितं निमिषि जर्भुराणः ।
विश्वो मार्ताण्डो व्रजमा पशुर्गात्स्थशो जन्मानि सविता व्याकः ॥८॥
न यस्येन्द्रो वरुणो न मित्रो व्रतमर्यमा न मिनन्ति रुद्रः ।
नारातयस्तमिदं स्वस्ति हुवे देवं सवितारं नमोभिः ॥९॥
भगं धियं वाजयन्तः पुरन्धिं नराशंसो ग्नास्पतिर्नो अव्याः ।
आये वामस्य संगथे रयीणां प्रिया देवस्य सवितुः स्याम ॥१०॥
अस्मभ्यं तद्दिवो अद्भ्यः पृथिव्यास्त्वया दत्तं काम्यं राध आ गात् ।
शं यत्स्तोतृभ्य आपये भवात्युरुशंसाय सवितर्जरित्रे ॥११॥

*udu ṣya devaḥ savitā savāya śaśvattamamaṁ tadapā vahnirasthāt* ।
*nūnaṁ devebhyo vi hi dhāti ratnamathābhajadvītihotraṁ svastau* ॥1॥
*viśvasya hi śruṣṭaye deva ūrdhvaḥ pra bāhavā pṛthupāṇiḥ sisarti* ।
*āpaśchidasya vrata ā nimṛgrā ayaṁ chidvāto ramate parijman* ॥2॥
*āśubhiśchidyānvi muchāti nūnamarīramadatamānaṁ chidetoḥ* ।
*ahyarṣūṇāṁ chinnayayām̐ aviṣyāmanu vrataṁ saviturmokyāgāt* ॥3॥
*punaḥ sabhavyadvitataṁ vayantī madhyā kartornyadhāchchhakma dhīraḥ* ।
*utsaṁhāyāsthadvṛya1tūm̐radardhararamatiḥ savitā deva āgāt* ॥4॥
*nā naukāṁsi duryo viśvamāyurvi tiṣṭhate prabhavaḥ śoko agneḥ* ।
*jyeṣṭhaṁ mātā sūnave bhāgamādhādanvasya ketamiṣitaṁ savitrā* ॥5॥
*samāvavarti viṣṭhito jigīṣurviśveṣāṁ kāmaścharatāmamābhūt* ।
*śaśvam̐ apo vikṛtaṁ hitvyāgādanu vrataṁ saviturdaivyasya* ॥6॥
*tvayā hitamapyamapsu bhāgaṁ dhanvānyā mṛgayaso vi tasthuḥ* ।
*vanāni vibhyo nakirasya tāni vratā devasya saviturminanti* ॥7॥
*yādrādhyaṁ1 varuṇo yonimapyamaniśitaṁ nimiṣi jarbhurāṇaḥ* ।
*viśvo mārtāṇḍo vrajamā paśurgātsthaśo janmāni savitā vyākaḥ* ॥8॥
*na yasyendro varuṇeā na mitro vratamaryamā na minanti rudraḥ* ।
*nārātayastamidaṁ svasti huve devaṁ savitāraṁ namobhiḥ* ॥9॥
*bhagaṁ dhiyaṁ vājayantaḥ purandhiṁ narāśaṁso gnāspatirno avyāḥ* ।
*āye vāmasya saṁgathe rayīṇāṁ priyā devasya savituḥ syāma* ॥10॥
*asmabhyaṁ taddivo adbhyaḥ pṛthivyāstvayā dattaṁ kāmyaṁ rādha ā gāt* ।
*śaṁ yatstotṛbhya āpaye bhavātyuruśaṁsāya savitarjaritre* ॥11॥

३१. सिनीवाली (Sinīvālī) - ऋ. (Rv.) २.३२.६-७

सिनीवालि पृथुष्टके या देवानामसि स्वसा। जुषस्व हव्यमाहुतं प्रजा देवि दिदिड्ढि नः ॥६॥
याः सुबाहुः स्वंगुरिः सुषूमा बहुसूवरी। तस्यै विश्पत्न्यै हविः सिनीवाल्यै जुहोतन ॥७॥

*sinīvāli pṛthuṣṭake yā devānāmasi svasā* ।
*juṣasva havyamāhutaṁ prajā devi didiḍḍhi naḥ* ॥6॥
*yāḥ subāhuḥ svaṁguriḥ suṣūmā bahusūvarī* ।
*tasyai viśpatnyai haviḥ sinīvālyai juhotana* ॥7॥

३२. सोमापूषणौ (Somāpūṣaṇau) - ऋ. (Rv.) २.४०.१-५

सोमापूषणा जनना रयीणां जनना दिवो जनना पृथिव्याः ।

जातौ विश्वस्य भुवनस्य गोपौ देवा अकृण्वन्नमृतस्य नाभिम् ॥१॥
इमौ देवौ जायमानौ जुषन्तेमौ तमांसि गूहतामजुष्टा ।
आभ्यामिन्द्रः पक्वमामास्वन्तः सोमापूषभ्यां जनदुस्रियासु ॥२॥
सोमापूषणा रजसो विमानं सप्तचक्रं रथमविश्वमिन्वम् ।
विषूवृतं मनसा युज्यमानं तं जिन्वथो वृषणा पंचरश्मिम् ॥३॥
दिव्य१न्यः सदनं चक्र उच्चा पृथिव्यामन्यो अध्यन्तरिक्षे ।
तावस्मभ्यं पुरुवारं पुरुक्षुं रायस्पोषं वि ष्यतां नाभिमस्मे ॥४॥
विश्वान्यन्यो भुवना जजान विश्वमन्यो अभिचक्षाण एति ।
सोमापूषणाववतं धियं मे युवाभ्यां विश्वाः पृतना जयेम ॥५॥
*somāpūṣaṇā jananā rayīṇāṁ jananā divo jananā pṛthivyāḥ* ।
*jātau viśvasya bhuvanasya gopau devā akṛṇvannamṛtasya nābhim* ॥1॥
*imau devau jāyamānau juṣantemau tamāṁsi gūhatāmajuṣṭā* ।
*ābhyāmindraḥ pakvamāmāsvantaḥ somāpūṣabhyāṁ janadusriyāsu* ॥2॥
*somāpūṣaṇā rajaso vimānaṁ saptachakraṁ rathamaviśvaminvam* ।
*viṣūvṛtaṁ manasā yujyamānaṁ taṁ jinvatho vṛṣaṇā paṁcharaśmim* ॥3॥
*divya1nyaḥ sadanaṁ chakra uchchā pṛthivyāmanyo adhyantarikṣe* ।
*tāvasmabhyaṁ puruvāraṁ purukṣuṁ rāyaspoṣaṁ vi ṣyatāṁ nābhimasme* ॥4॥
*viśvānyanyo bhuvanā jajāna viśvamanyo abhichakṣāṇa eti* ।
*somāpūṣaṇāvavataṁ dhiyaṁ me yuvābhyāṁ viśvāḥ pṛtanā jayema* ॥5॥

३३. सोमापूषणावदितिश्च (Somāpūṣaṇāvaditiścha) - ऋ. (Rv.) २.४०.६
धियं पूषां जिन्वतु विश्वमिन्वो रयिं सोमो रयिपतिर्दधातु ।
अवतु देव्यदितिरनर्वा बृहद्वदेम विदथे सुवीराः ॥६॥
*dhiyaṁ pūṣāṁ jinvatu viśvaminvo rayiṁ somo rayipatirdadhātu* ।
*avatu devyaditiranarvā bṛhadvadema vidathe suvīrāḥ* ॥6॥

२१५. गृत्समदः शौनकः (साग्री. सास्वा. ऋसर्व.) कुत्स आंगिरसः (सार्षेदी.) (Gṛtsamadaḥ Śaunakaḥ [Ssb. Sas. Rss.] Kutsa Āṁgirasaḥ [SAD.])

१. पवमानः सोमः (Pavamānaḥ Somaḥ) - सा. (Sv.) ५६४
अंजते व्यंजुते समंजते क्रतुं रिहन्ति मध्वाभ्यंजुते ।
सिन्धोरुछ्वासे पतयन्तमुक्षणं हिरण्यपावाः पशुमप्सु गृभ्णते ॥११॥
*aṁjate vyaṁjute samaṁjate kratuṁ rihanti madhvābhyaṁjute* ।
*sindhoruchhvāse patayantamukṣaṇaṁ hiraṇyapāvāḥ paśumapsu gṛbhṇate* ॥11॥

२१६. गृत्समदः शौनकः (सार्षेदी.) कुत्स आंगिरसः गृत्समदः (साग्री.सास्वा.) (Gṛtsamadaḥ Śaunakaḥ [Sad.] Kutsa Āṁgirasaḥ Gṛtsamadaḥ [Ssb.Sas.])

१. पवमानः सोमः (Pavamānaḥ Somaḥ) - सा. (Sv.) ५९०
त्वया वयं पवमानेन सोम भरे कृतं वि चिनुयाभ शश्वत् ।
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥५॥
*tvayā vayaṁ pavamānena soma bhare kṛtaṁ vi chinuyābha śaśvat* ।
*tanno mitro varuṇo māmahantāmaditiḥ sindhuḥ pṛthivī uta dyauḥ* ॥5॥

**२१७. गृत्समदः आंगिरसः शौनहोत्रो भार्गवः (Gṛtsamadaḥ Āṁgirasaḥ Śaunahotro Bhārgavaḥ)**

१. देवता (Devatā) - ऋ. (Rv.) २.१.१-१६
त्वमग्ने द्युभिस्त्वमाशुशुक्षणिस्त्वमद्भ्यस्त्वमश्मनस्परि ।
त्वं वनेभ्यस्त्वमोषधीभ्यस्त्वं नृणां नृपते जायसे शुचिः ॥१॥
त्वाग्ने होत्रं तव पोत्रमृत्वियं तव नेष्ट्रं त्वमग्निदृतायतः ।
तव प्रशास्त्रं त्वमध्वरीयसि ब्रह्मा चासि गृहपतिश्च नो दमे ॥२॥
त्वमग्न इन्द्रो वृषभः सतामसि त्वं विष्णुरुरुगायो नमस्यः ।

त्वं ब्रह्मा रयिविद्ब्रह्मणस्पते त्वं विधर्तः सचसे पुरन्ध्या ॥३॥
त्वमग्ने राजा वरुणो धृतव्रतस्त्वं मित्रो भवसि दस्म ईड्यः ।
त्वमर्यमा सत्पतिर्यस्य संभुजं त्वमंशो विदथे देव भाजयुः ॥४॥
त्वमग्ने त्वष्टा विधते सुवीर्यं तव ग्नावो मित्रमहः सजात्यम् ।
त्वमाशुहेमा ररिषे स्वश्व्यं त्वं नरां शर्धो असि पुरूवसुः ॥५॥
त्वमग्ने रुद्रो असुरो महो दिवस्त्वं शर्धो मारुतं पृक्ष ईशिषे ।
त्वं वातैररुणैर्यासि शंगयस्त्वं पूषा विधतः पासि नु त्मना ॥६॥
त्वं भगो नृपते वस्व ईशिषे त्वं पायुर्दमे यस्तेऽविधत् ॥७॥
त्वामग्ने दम आ विश्पतिं विशस्त्वां राजानं सुविदत्रमृंजते ।
त्वं विश्वानि स्वनीक पत्यसे त्वं सहस्राणि शता दश प्रति ॥८॥
त्वामग्ने पितरमिष्टिभिर्नरस्त्वां भ्रात्राय शम्या तनूरुचम् ।
त्वं पुत्रो भवसि यस्तेऽविधत्त्वं सखा सुशेवः पास्याधृषः ॥९॥
त्वमग्ने ऋभुराके नमस्य१स्त्वं वाजस्य क्षुमतो राय ईशिषे ।
त्वं वि भास्यनु दक्षि दावने त्वं विशिक्षुरसि याामातानिः ॥१०॥
त्वमग्ने अदितिर्देव दाशुषे त्वं होत्रा भारती वर्धसे गिरा ।
त्वमिळा शतहिमासि दक्षसे त्वं वृत्रहा वसुपते सरस्वती ॥११॥
त्वमग्ने सुभृत उत्तमं वयस्तव स्पार्हे वर्ण आ सन्दृशि श्रियः ।
त्वं वाजः प्रतरणो बृहन्नसि त्वं रयिर्बहुलो विश्वतस्पृथुः ॥१२॥
त्वामग्न आदित्यास आस्यं१ त्वां जिह्वां शुचयश्चक्रिरे कवे ।
त्वां रातिषाचो अध्वरेषु सश्चिरे त्वे देवा हविरदन्त्याहुतम् ॥१३॥
त्वे अग्ने विश्वे अमृतासो अद्रुह आसा देवा हविरदन्त्याहुतम् ।
त्वया मर्तासः स्वदन्त आसुतिं त्वं गर्भो वीरुधां जिषे शुचिः ॥१४॥
त्वं तान्त्सं च प्रति चासि मज्मनाग्ने सुजात प्र च देव रिच्यसे ।
पृक्षो यदत्र महिना वि ते भुवदनु द्यावापृथिवी रोदसी उभे ॥१५॥
ये स्तोतृभ्यो गोअग्रामश्वपेशसमग्ने रातिमुपसृजन्ति सूरयः ।
अस्मांच तांश्च प्र हि नेषि वस्य आ बृहद्वदेम विदथे सुवीराः ॥१६॥

*tvamagne dyubhistvamāśuśukṣaṇistvamadbhyastvamaśmanaspari /*
*tvaṁ vanebhyastvamoṣadhībhyastvaṁ nṛṇāṁ nṛpate jāyase śuchiḥ //1 //*
*tvāgne hotraṁ tava potramṛtviyaṁ tava neṣṭraṁ tvamagnidṛtāyataḥ /*
*tava praśāstraṁ tvamadhvarīyasi brahmā chāsi gṛhapatiścha no dame //2 //*
*tvamagna indro vṛṣabhaḥ satāmasi tvaṁ viṣṇururugāyo namasyaḥ /*
*tvaṁ brahmā rayividbrahyaṇaspate tvaṁ vidhartaḥ sachase purandhyā //3 //*
*tvamagne rājā varuṇo dhṛtavratastvaṁ mitro bhavasi dasma īḍyaḥ /*
*tvamaryamā satpatiryasya saṁbhujaṁ tvamaṁśo vidathe deva bhājayuḥ //4 //*
*tvamagne tvaṣṭā vidhate suvīrya tava gnāvo mitramahaḥ sajātyam /*
*tvamāśuhemā rariṣe svaśvyaṁ tvaṁ narāṁ śardho asi purūvasuḥ //5 //*
*tvamagne rudro asuro maho divastvaṁ śardho mārutaṁ pṛkṣa īśiṣe /*
*tvaṁ vātairaruṇairyāsi śaṁgayastvaṁ pūṣā vidhataḥ pāsi nu tmanā //6 //*
*tvaṁ bhago nṛpate vasva īśiṣe tvaṁ pāyurdame yaste'vidhat //7 //*
*tvāmagne dama ā viśpatiṁ viśastvāṁ rājānaṁ suvidatramṛṁjate /*
*tvaṁ viśvāni svanīka patyase tvaṁ sahasrāṇi śatā daśa prati //8 //*
*tvāmagne pitaramiṣṭibhirnarastvāṁ bhrātrāya śamyā tanūrucham /*
*tvaṁ putro bhavasi yasta'vidhattvaṁ sakhā suśevaḥ pāsyādhṛṣaḥ //9 //*
*tvamagne ṛbhurāke namasya1stvaṁ vājasya kṣumato rāya īśiṣe /*
*tvaṁ vi bhāsyanu dakṣi dāvane tvaṁ viśikṣurasi yāāmātāniḥ //10 //*
*tvamagne aditirdeva dāśuṣe tvaṁ hotrā bhāratī vardhase girā /*
*tvamiḷā śatahimāsi dakṣase tvaṁ vṛtrahā vasupate sarasvatī //11 //*
*tvamagne subhṛta uttamaṁ vayastava spārhe varṇa ā sandṛśi śriyaḥ /*

*tvaṁ vājaḥ prataraṇo bṛhannasi tvaṁ rayirbahulo viśvataspṛthuḥ //12 //*
*tvāmagna ādityāsa āsyaṁ1 tvāṁ jihnāṁ śuchayaśchakrire kave /*
*tvāṁ rātiṣācho adhvareṣu saśchire tve devā haviradantyāhutam //13 //*
*tve agne viśve amṛtāso adruha āsā devā haviradantyāhutam /*
*tvayā martāsaḥ svadanta āsutiṁ tvaṁ garbho vīrudhāṁ jiāṣe śuchiḥ //14 //*
*tvaṁ tāntsaṁ cha prati chāsi majmanāgne sujāta pra cha deva richyase /*
*pṛkṣo yadatra mahinā vi te bhuvadanu dyāvāpṛthivī rodasī ubhe //15 //*
*ye stotṛmyo goagrāmaśvapeśasamagne rātimupasṛjanti sūrayaḥ /*
*asmāṁcha tāṁścha pra hi neṣi vasya ā bṛhadvadema vidathe suvīrāḥ //16 //*

## २१८. गोतमः (Gotamaḥ)

१. अग्निः (Agniḥ) - य. (Yv.)३.११; ५.४ , ६ , ८ , ९; २५.४७; ३३.३ , १६

य. (Yv.)३.११

अपप्रयन्तोऽअध्वरं मन्त्रं वोचेमाग्नये। आरेऽअस्मे च शृण्वते ॥११॥
*apaprayanto'adhvaraṁ mantraṁ vochemāgnaye / āre'asme cha śṛṇvate //11 //*

य. (Yv.)५.४

अग्नावग्निश्चरति प्रविष्टऽऋषीणां पुत्रोऽअभिशस्तिपावा ।
स नः स्योनः सुयजा यजेह देवेभ्यो हव्यंसदमप्रयुच्छन्त्स्वाहा ॥४॥
*agnāvagniścharati praviṣṭa'ṛṣīṇāṁ putro'abhiśastipāvā /*
*sa naḥ syonaḥ suyajā yajeha devebhyo havyaṁsadamaprayuchchhantsvāhā //4 //*

य. (Yv.)५.६

अग्ने व्रतपास्त्वे व्रतपा या तव तनूरियंसा मयि यो मम तनूरेषा सा त्वयि ।
सह नौ व्रतपते व्रतान्यनु मे दीक्षां दीक्षापतिर्मन्यतामनु तपस्तपस्पतिः ॥६॥
*agne vratapāstve vratapā yā tava tanūriyaṁsā mayi yo mama tanūreṣā sā tvayi /*
*saha nau vratapate vratānyanu me dīkṣāṁ dīkṣāpatirmanyatāmanu tapastapaspatiḥ //6 //*

य. (Yv.)५.८-९

या तेऽअग्नेऽयःशया तनूर्वर्शिष्ठा गह्वरेष्ठा। उग्रं वचोऽअपावधीत्त्वेषं वचोऽअपावधीत् स्वाहा ।
या तेऽअग्ने रजः शया तनूर्वर्शिष्ठा गह्वरेष्ठा। उग्रं वचोऽअपावधीत्त्वेषं वचोऽअपावधीत् स्वाहा ।
या तेऽअग्ने हरिशया तनूर्वर्शिष्ठा गह्वरेष्ठा। उग्रं वचोऽअपावधीत्त्वेषं वचोऽअपावधीत् स्वाहा॥८।
तप्तायनी मेऽसि वित्तायनी मेऽस्यवतान्मा नाथितादवतान्मा व्यथितात्।
विदेदग्निर्नभो नामाग्नेऽअंगिरऽआयुना नाम्नेहि योऽस्यां पृथिव्यामसि यत्तेऽनाधृष्टं नाम यियं तेनत्वा दधे
विदेदग्निर्नभो नामाग्नेऽअंगिरऽआयुना नाम्नेहि यो द्वितीयस्यां पृथिव्यामसियत्तेऽनाधृष्टं नाम यियं तेन त्वा दधे
विदेदग्निर्नभो नामाग्नेऽअंगिरऽआयुना नाम्नेहि यस्तृतीयस्यां पृथिव्यामसि यत्तेऽनाधृष्टं नाम यियं तेन त्वा दधे।
अनु त्वा देववीतये॥९।
*yā te'agne'yaḥśayā tanūrvarśiṣṭhā gahnareṣṭhā / ugraṁ vacho'apāvadhīttveṣaṁ vacho'apāvadhīt svāhā /*
*yā te'agne rajaḥ śayā tanūrvarśiṣṭhā gahnareṣṭhā / ugraṁ vacho'apāvadhīttveṣaṁ vacho'apāvadhīt svāhā /*
*yā te'agne hariśayā tanūrvarśiṣṭhā gahnareṣṭhā / ugraṁ vacho'apāvadhīttveṣaṁ vacho'apāvadhīt svāhā //8 /*
*taptāyanī me'si vittāyanī me'syavatānmā nāthitādavatānmā vyathitāt /*
*videdagnirnabho nāmāgne'aṁgira'āyunā nāmnehi yo'syāṁ pṛthivyāmasi yatte'nādhṛṣṭaṁ nāma yiāyaṁ tenatvā dadhe videdagnirnabho nāmāgne'aṁgira'āyunā nāmnehi yo dvitīyasyāṁ pṛthivyāmasiyatte'nādhṛṣṭaṁ nāma yiāyaṁ tena tvā dadhe videdagnirnabho nāmāgne'aṁgira'āyunā nāmnehi yastṛtīyasyāṁ pṛthivyāmasi yatte'nādhṛṣṭaṁ nāma yiāyaṁ tena tvā dadhe / anu tvā devavītaye //9 /*

य. (Yv.)२५.४७

अग्ने त्वं नोऽ अन्तमऽउत त्राता शिवो भवा वरुथ्यः ।
वसुरग्निर्वसुश्रवाऽअच्छा नक्षि द्युमत्तमंरयिं दाः ॥४७ ॥
*agne tvaṁ no' antama'uta trātā śivo bhavā varuthyaḥ /*
*vasuragnirvasuśravā'achchhā nakṣi dyumattamaṁrayiṁ dāḥ //47 //*

य. (Yv.)३३.३

यजा नो मित्रावरुणा यजा देवाँश्ऽ ऋतं बृहत्। अग्ने यिाय स्वं दमम् ॥३ ॥
*yajā no mitrāvaruṇā yajā devāṁś' ṛtaṁ bṛhat / agne yiāya svaṁ damam //3 //*

य. (Yv.)३३.१६

विश्वेषामदितिर्यियानां विश्वेषामतिथिर्मानुषाणाम् ।
अग्निर्देवानामवऽआवृणानः सुमृडीको भवतु जातवेदाः ॥१६ ॥
*viśveṣāmaditiryiāyānāṁ viśveṣāmatithirmānuṣāṇām /*
*agnirdevānāmava'āvṛṇānaḥ sumṛḍīko bhavatu jātavedāḥ //16 //*

२. अश्विनौ (Aśvinau) - य. (Yv.)२८.७

होता यक्षद्दैव्या होतारा भिषजा सखाया हविषेन्द्रं भिषज्यतः ।
कवी देवौ प्रचेतसाविन्द्राय धत्तऽइन्द्रियं वीतामाज्यस्य होतर्यज ॥७ ॥
*hotā yakṣaddaivyā hotārā bhiṣajā sakhāyā haviṣendraṁ bhiṣajyataḥ /*
*kavī devau prachetasāvindrāya dhatta'indriyaṁ vītāmājyasya hotaryaja //7 //*

३. आत्मा (Ātmā) - य. (Yv.)२५.४३-४४

मा त्वा तपत् प्रियऽआत्मापियन्तं मा स्वधितिस्तन्वऽआ तिष्ठिपत्ते ।
मा ते गृध्नुरविशस्तातिहाय छिद्रा गात्राण्यसिना मिथू कः ॥४३ ॥
न वाऽउऽएतन म्रियसे न रिष्यसि देवांश्ऽइदेषि पथिभिः सुगेभिः ।
हरी ते युंजा पृषतीऽअभूतामुपास्थाद्वाजी धुरि रासभस्य ॥४४ ॥
*mā tvā tapat priya'ātmāpiyantaṁ mā svadhitistanva'ā tiṣṭhipatte /*
*mā te gṛdhnuraviśastātihāya chhidrā gātrāṇyasinā mithū kaḥ //43 //*
*na vā'u'etana mriyase na riṣyasi devāṁś'ideṣi pathibhiḥ sugebhiḥ /*
harī te yuṁjā pṛṣatī'abhūtāmupāsthādvājī dhuri rāsabhasya ॥44 ॥

४. इन्द्रः (Indraḥ) - अ. (Av.) २०.१५.१-६; २०.२५.१-६; २०.४१.१-३; २०.५६.१-६; २०.६३.५-६; २०.१०९.१-३; य. (Yv.)३.५१-५२

अ. (Av.) २०.१५.१-६

प्र मंहिष्ठाय बृहते बृहद्रये सत्यशुष्माय तवसे मतिं भरे ।
अपामिव प्रवणे यस्य दुर्धरं राधो विश्वायु शवसे अपावृतम् ॥१ ॥
अध ते विश्वमनु हासदिष्टय आपो निम्नेव सवना हविष्मतः ।
यत् पर्वते न समशीत हर्यत इन्द्रस्य वज्रः श्नथिता हिरण्ययः ॥२ ॥
अस्मै भीमाय नमसा समध्वर उषो न शुभ्र आ भरा पनीयसे ।
यस्य धाम श्रवसे नामेन्द्रिय ज्योतिरकारि हरितो नायसे ॥३ ॥
इमे त इन्द्र ते वयं पुरुष्टुत ये त्वारभ्य चरामसि प्रभूवसो ।
नहि त्वदन्यो गिर्वणो गिरः सघत् क्षोणीरिव प्रति नो हर्य तद् वचः ॥४ ॥
भूरि त इन्द्र वीर्य१ तव स्मस्य स्तोतुर्मघवन् काममा पृण ।
अनु ते द्यौर्बृहती वीर्यमम इयं च ते पृथिवी नेम ओजसे ॥५ ॥
त्वं तमिन्द्र पर्वतं महामुरुं वज्रेण वज्रिन् पर्वशश्चकर्तिथ ।
अवासृजो निवृताः सर्तवा अपः सत्रा विश्वं दधिषे केवलं सहः ॥६ ॥
*pra maṁhiṣṭhāya bṛhate bṛhadraye satyaśuṣmāya tavase matiṁ bhare /*
*apāmiva pravaṇe yasya durdharaṁ rādho viśvāyu śavase apāvṛtam //1 //*
*adha te viśvamanu hāsadiṣṭaya āpo nimneva savanā haviṣmataḥ /*
*yat parvate na samaśīta haryata indrasya vajraḥ śnathitā hiraṇyamaḥ //2 //*

*asmai bhīmāya namasā samadhvara uṣo na śubhra ā bharā panīyase* ।
*yasya dhāma śravase nāmendriya jyotirakāri harito nāyase* ॥3॥
*ime ta indra te vayaṁ puruṣṭuta ye tvārabhya charāmasi prabhūvaso* ।
*nahi tvadanyo girvaṇo giraḥ saghat kṣoṇīriva prati no harya tad vachaḥ* ॥4॥
*bhūri ta indra vīrya1 tava smasya stoturmaghavan kāmamā pṛṇa* ।
*anu te dyaurbṛhatī vīryamama iyaṁ cha te pṛthivī nema Ojase* ॥5॥
*tvaṁ tamindra parvataṁ mahāmuruṁ vajreṇa vajrin parvaśaśchakartitha* ।
*avāsṛjo nivṛtāḥ sartavā apaḥ satrā viśvaṁ dadhiṣe kevalaṁ sahaḥ* ॥6॥

अ. (Av.) २०.२५.१-६

अश्वावति प्रथमो गोषु गच्छति सुप्रावीरिन्द्र मर्त्यस्वोतिभिः ।
तमित् पृणक्षि वसुना भवीयसा सिन्धुमापो यथाभितो विचेतसः ॥१॥
आपो न देवीरुप यन्ति होत्रियमवः पश्यन्ति विततं यथा रजः ।
पार्चैर्देवासः प्र णयन्ति देवयुं ब्रह्मप्रियं जोषन्ते वराइव ॥२॥
अधि द्वयोरदधा उक्थ्यं१ वचो यतस्रुचा मिथुना या सपर्यतः ।
असंयत्तो व्रते ते क्षेति पुष्यति भद्रा शक्तिर्यजमानाय सुन्वते ॥३॥
आदंगिराः प्रथमं दधिरे वय इद्धाग्नयः शम्या ये सुकृत्यया ।
सर्व पणेः समविन्दन्त भोजनमश्वावन्तं गोमन्तमा पशुं नरः ॥४॥
यौरथर्वा प्रथमः पथस्तते ततः सूर्यो व्रतपा वेन आजनि ।
आ गा आजदुशना काव्यः सचा यमस्य जातममृतं यजामहे ॥५॥
बर्हिर्वा यत् स्वपत्याय वृज्यतेऽर्को वा श्लोकमाघोषते दिवि ।
ग्रावा यत्र वदति कारुरुक्थ्य१ स्तस्येदिन्द्रो अभिपित्वेषु रण्यति ॥६॥

*aśvāvati prathamo goṣu gachchhati suprāvīrindra martyasvotibhiḥ* ।
*tamit pṛṇakṣi vasunā bhavīyasā sindhumāpo yathābhito vichetasaḥ* ॥1॥
*āpo na devīrupa yanti hotriyamavaḥ paśyanti vitataṁ yathā rajaḥ* ।
*pārchairdevāsaḥ pra ṇayanti devayuṁ brahmapriyaṁ joṣante varāiva* ॥2॥
*adhi dvayoradadhā ukthyaṁ1 vacho yatasruchā mithunā yā saparyataḥ* ।
*asaṁyatto vrate te kṣeti puṣyati bhadrā śaktiryajamānāya sunvate* ॥3॥
*ādaṁgirāḥ prathamaṁ dadhire vaya iddhāgnayaḥ śamyā ye sukṛtyayā* ।
*sarva paṇeḥ samavindanta bhojanamaśvāvantaṁ gomantamā paśuṁ naraḥ* ॥4॥
*yauratharvā prathamaḥ pathastate tataḥ sūryo vratapā vena ājani* ।
*ā gā ājaduśanā kāvyaḥ sachā yamasya jātamamṛtaṁ yajāmahe* ॥5॥
*barhirvā yat svapatyāya vṛjyate'rko vā ślokamāghoṣate divi* ।
*grāvā yatra vadati kārurukthya1 stasyedindro abhipitveṣu raṇyati* ॥6॥

अ. (Av.) २०.४१.१-३

इन्द्रो दधीचो अस्थभिर्वृत्राण्यप्रतिष्कुतः । जघान नवतीर्नव ॥१॥
इच्छन्नश्वस्य यच्छिरः पर्वतेष्वपश्रितम् । तद् विदच्छर्यणावति ॥२॥
अत्राह गोरमन्वत नाम त्वष्टुरपीच्यम् । इत्था चन्द्रमसो गृहे ॥३॥

*indro dadhīcho asthabhirvṛtrāṇyapratiṣkutaḥ । jaghāna navatīrnava* ॥1॥
*ichchhannaśvasya yachchhiraḥ parvateṣvapaśritam । tad vidachchharyaṇāvati* ॥2॥
*atrāha goramanvata nāma tvaṣṭurapīchyam । itthā chandramaso gṛhe* ॥3॥

अ. (Av.) २०.५६.१-६

इन्द्रो मदाय वावृधे शवसे वृत्रहा नृभिः ।
तमिन्महत्स्वाजिषूतेमर्भे हवामहे स वाजेषु प्र नोऽविषत् ॥१॥
असि हि वीर सेन्योऽसि भूरि परादिदः ।
असि दभ्रस्य चिद् वृधो यजमानाय शिक्षसि सुन्वते भूरि ते वसु ॥२॥
यदुदीरत आजयो धृष्णवे धीयते धना ।
यक्ष्वा मदच्युता हरी कं हनः कं वसौ दधोऽस्माँ इन्द्र वसौ दधः ॥३॥

मदे मदे हि नो ददिर्यूथा गवामृजुक्रतुः ।
सं गृभाय पुरू शतोभयाहस्त्या वसु शिशीहि राय आ भर ॥४॥
मादयस्व सुते सचा शवसे शूर राधसे ।
विद्मा हि त्वा पुरूवसुमुप कामान्त्ससृज्महेऽथा नोऽविता भव ॥५॥
एते त इन्द्र जन्तवो विश्वं पुष्यन्ति वार्यम् ।
अन्तर्हि ख्यो जनानामर्यो वेदो अदाशुषां तेषां नो वेद आ भर ॥६॥

*indro madāya vāvṛdhe śavase vṛtrahā nṛbhiḥ /*
*taminmahatsvājiṣūtemarbhe havāmahe sa vājeṣu pra no'viṣat //1 //*
*asi hi vīra senyo'si bhūri parādadiḥ /*
*asi dabhrasya chid vṛdho yajamānāya śikṣasi sunvate bhūri te vasu //2 //*
*yadudīrata ājayo dhṛṣṇave dhīyate dhanā /*
*yakṣavā madachyutā harī kaṁ hanaḥ kaṁ vasau dadho'smāṁ̐ indra vasau dadhaḥ //3 //*
*made made hi no dadiryūthā gavāmṛjukrtuḥ /*
*saṁ gṛbhāya purū śatobhayāhastyā vasu śiśīhi rāya ā bhara //4 //*
*mādayasva sute sachā śavase śūra rādhase /*
*vidmā hi tvā purūvasumupa kāmāntsasṛjmahe'thā no'vitā bhava //5 //*
*ete ta indra jantavo viśvaṁ puṣyanti vāryam /*
*antarhi khyo janānāmaryo vedo adāśuṣāṁ teṣāṁ no veda ā bhara //6 //*

अ. (Av.) २०.६३.५-६

कदा मर्तमराधसं पदा क्षुम्पमिव स्फुरत्। कदा नः शुश्रवद् गिर इन्द्रो अंग ॥५॥
यश्चिद्धि त्वा बहुभ्य आ सुतावाँ आविवासति। उग्रं तत् पत्यते शव इन्द्रो अंग ॥६॥

*kadā martamarādhasaṁ padā kṣumpamiva sphurat / kadā naḥ śuśravad gira indro aṁga //5 //*
*yaśchiddhi tvā bahubhya ā sutāvāṁ̐ āvivāsati / ugraṁ tat patyate śava indro aṁga //6 //*

अ. (Av.) २०.१०९.१-३

स्वादोरित्था विषूवतो मध्वः पिबन्ति गौर्यः ।
या इन्द्रेण सयावरीर्वृष्णा मदन्ति शोभसे वस्वीरनु स्वराज्यम् ॥१॥
ता अस्य पृशनायुवः सोमं श्रीणन्ति पृश्नयः ।
प्रिया इन्द्रस्य धेनवो वज्रं हिन्वन्ति सायकं वस्वीरनु स्वराज्यम् ॥२॥
ता अस्य नमसा सहः सपर्यन्ति प्रचेतसः ।
व्रतान्यस्य सश्चिरे पुरूणि पूर्वचित्तये वस्वीरनु स्वराज्यम् ॥३॥

*svādoritthā viṣūvato madhvaḥ pibanti gauryaḥ /*
*yā indreṇa sayāvarīrvṛṣṇā madanti śobhase vasvīranu svarājyam //1 //*
*tā asya pṛśanāyuvaḥ somaṁ śrīṇanti pṛśnayaḥ /*
*priyā indrasya dhenavo vajraṁ hinvanti sāyakaṁ vasvīranu svarājyam //2 //*
*tā asya namasā sahaḥ saparyanti prachetasaḥ /*
*vratānyasya saśchire purūṇi pūrvachittaye vasvīranu svarājyam //3 //*

य. (Yv.)३.५१-५२

अक्षन्नमीमदन्त ह्यव प्रियाऽअधूषत।
अस्तोषत स्वभानवो विप्रा नविष्ठया मती योजा न्विन्द्र ते हरी ॥५१॥
सुसन्दृशं त्वा वयं मघवन् वन्दिषीमहि।
प्र नूनं पूर्णबन्धुर स्तुतो यासि वशाँश्ऽअनु योजा न्विन्द्र ते हरी ॥५२॥

*akṣannamīmadanta hyava priyā'adhūṣata /*
*astoṣata svabhānavo viprā naviṣṭhayā matī yojā nvindra te harī //51 //*
*susandṛśaṁ tvā vayaṁ maghavan vandiṣīmahi /*
*pra nūnaṁ pūrṇabandhura stuto yāsi vaśāṁ̐ś'anu yojā nvindra te harī //52 //*

५. ईश्वरः (Īśvaraḥ) - य. (Yv.)७.५; २५.१८ , १९

य. (Yv.)७.५

अन्तस्ते द्यावापृथिवी दधाम्यन्तर्दधाम्युर्वन्तरिक्षम् ।
सजूर्देवेभिरवरैः परैश्चान्तर्य्यामे मघवन् मादयस्व ॥५॥
*antaste dyāvāpṛthivī dadhāmyantardadhāmyurvantarikṣam /*
*sajūrdevebhiravaraiḥ paraiśchāntaryyāme maghavan mādayasva //5 //*

य. (Yv.)२५.१८-१९

तमीशानं जगतस्तस्थुषस्पतिं धियिंजन्वमवसे हूमहे वयम् ।
पूषा नो यथा वेदसामसद् वृधे रक्षिता पायुरदब्धः स्वस्तये ॥१८॥
स्वस्ति नऽइन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः ।
स्वस्ति नस्ताक्षर्योऽअरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ॥१९॥
*tamīśānaṁ jagatastasthuṣaspatiṁ dhiyiṁjanvamavase hūmahe vayam /*
*pūṣā no yathā vedasāmasad vṛdhe rakṣitā pāyuradabdhaḥ svastaye //18 //*
*svasti na'indro vṛddhaśravāḥ svasti naḥ pūṣā viśvavedāḥ /*
*svasti nastākṣaryo'ariṣṭanemiḥ svasti no bṛhaspatirdadhātu //19 //*

६. गृहपतयः (Gṛhapatayaḥ) - य. (Yv.)८.३३ , ३५

य. (Yv.)८.३३

आतिष्ठ वृहन्नथं युक्ता ते ब्रह्मणा हरी। अर्वाचीनंसु ते मनो ग्रावा कृणोतु वग्नुना।
उपयामगृहीतोऽसीन्द्राय त्वा षोडशिनऽएष ते योनिरिन्द्राय त्वा षोडशिने ॥३३॥
*ātiṣṭha vṛhannathaṁ yuktā te brahmaṇā harī / arvāchīnaṁsu te mano grāvā kṛṇotu vagnunā /*
*upayāmagṛhīto'sīndrāya tvā ṣoḍaśina'eṣa te yonirindrāya tvā ṣoḍaśine //33 //*

य. (Yv.)८.३५

इन्द्रमिद्धरी वहतोऽप्रति धृष्टशवसम्। ऋषीणां च स्तुतीरुप यां च मानुषाणाम् ।
उपयामगृहीतोऽसीन्द्राय त्वा षोडशिनऽएष ते यानिरिन्द्राय त्वा षोडशिने ॥३॥
*indramiddharī vahato'prati dhṛṣṭaśavasam / ṛṣīṇāṁ cha stutīrupa yāṁ cha mānuṣāṇām /*
*upayāmagṛhīto'sīndrāya tvā ṣoḍaśina'eṣa te yānirindrāya tvā ṣoḍaśine //3 //*

७. जातवेदा (Jātavedā) - य. (Yv.)१३.३४-३५

ध्रुवासि धरुणेतो जो प्रथममेभ्यो यो निभ्योऽअधि जातवेदाः ।
स गायत्र्या त्रिष्टुभानुष्टुभा च देवेभ्यो हव्यं वहतु प्रजानन् ॥३४॥
इषे रोय रमस्व सहसे द्युम्नऽऊर्जेऽअपत्याय ।
सम्राडसि स्वराडसि सारस्वतौ त्वोत्सौ प्रावताम्॥३५॥
*dhruvāsi dharuṇeto jo prathamamebhyo yo nibhyo'adhi jātavedāḥ /*
*sa gāyatrayā triṣṭubhānuṣṭubhā cha devebhyo havyaṁ vahatu prajānan //34 //*
*iṣe roya ramasva sahase dyumna'ūrje'apatyāya /*
*samrāḍasi svarāḍasi sārasvatau tvotsau prāvatām //35 //*

८. दम्पती (Dampatī) - य. (Yv.)८.३१

मरुतो यस्य हि क्षये पाथा दिवो विमहसः। स सुगोपातमो जनः ॥३१॥
*maruto yasya hi kṣaye pāthā divo vimahasaḥ / sa sugopātamo janaḥ //31 //*

९. द्यावापृथिवी (Dyāvāpṛthivī) - य. (Yv.)१३.३२

मही द्यौः पृथिवी च नऽइमं यां मिमिक्षताम्। पिपृतां नो भरीमभिः ॥३२॥
*mahī dyauḥ pṛthivī cha na'imaṁ yāṁ mimikṣatām / pipṛtāṁ no bharīmabhiḥ //32 //*

१०. पवमानः सोमः (Pavamānaḥ Somaḥ) - ऋ. (Rv.) ९.३१.१-६; ९.६७.७-९

ऋ. (Rv.) ९.३१.१-६

प्र सोमासः स्वाध्यः१ पवमानासो अक्रमुः। रयिं कृण्वन्ति चेतनम् ॥१॥
दिवस्पृथिव्या अधि भवेन्दो द्युम्नवर्धनः। भवा वाजानां पतिः ॥२॥
तुभ्यं वाता अभिप्रियस्तुभ्यमर्षन्ति सिन्धवः। सोम वर्धन्ति ते महः ॥३॥
आ प्यायस्व समेतु ते विश्वतः सोम वृष्ण्यम्। भवा वाजस्य संगथे ॥४॥
तुभ्यं गावो घृतं पयो बभ्रो दुदुह्रे अक्षितम्। वर्षिष्ठे अधि सानवि ॥५॥
स्वायुधस्य ते सुतो भुवनस्य पते वयम्। इन्दो सखित्वमुश्मसि ॥६॥

*pra somāsaḥ svādhyaḥ१ pavamānāso akramuḥ । rayiṁ kṛṇvanti chetanam ॥1॥*
*divaspṛthivyā adhi bhavendo dyumnavardhanaḥ । bhavā vājānāṁ patiḥ ॥2॥*
*tubhyaṁ vātā abhipriyastubhyamarṣanti sindhavaḥ । soma vardhanti te mahaḥ ॥3॥*
*ā pyāyasva sametu te viśvataḥ soma vṛṣṇyam । bhavā vājasya saṁgathe ॥4॥*
*tubhyaṁ gāvo ghṛtaṁ payo babhro duduhre akṣitam । varṣiṣthe adhi sānavi ॥5॥*
*svāyudhasya te suto bhuvanasya pate vayam । indo sakhitvamuśmasi ॥6॥*

ऋ. (Rv.) ९.६७.७-९

पवमानास इन्दवस्तिरः पवित्रमाशवः। इन्द्र यामेभिराशत ॥७॥
ककुहः सोम्यो रस इन्द्ररिन्द्राय पूर्व्यः। आयुः पवत आयवे ॥८॥
हिन्वन्ति सूरमुस्रयः पवमानं मधुश्चुतम्। अभि गिरा समस्वरन् ॥९॥

*pavamānāsa indavastiraḥ pavitramāśavaḥ । indra yāmebhirāśata ॥7॥*
*kakuhaḥ somyo rasa indrarindruāya pūrvyaḥ । āyuḥ pavata āyave ॥8॥*
*hinvanti sūramusrayaḥ pavamānaṁ madhuśchutam । abhi girā samasvaran ॥9॥*

११. प्रजा (Prajā) - य. (Yv.)२५.४५

सुगव्यं नो वाजी स्वश्व्यं पुं सः पुत्राँश्ऽ उत विश्वापुषंरयिम् ।
अनागास्त्वं नोऽअदितिः कृणोतु क्षत्रं नोऽअश्वे वनतांहविष्मान् ॥४५॥

*sugavyaṁ no vājī svaśvyaṁ puṁ saḥ putrām̐ś' uta viśvāpuṣaṁrayim ।*
*anāgāstvaṁ no'aditiḥ kṛṇotu kṣatraṁ no'aśve vanatāṁhaviṣmān ॥45॥*

१२. प्रजापतिः (Prajāpatiḥ) - य. (Yv.)१३.३०

अपां गम्भन्त्सीद मा त्वा सूर्य्योऽभिताप्सीन्माग्निर्वैश्वानरः ।
अच्छिन्नपत्राः प्रजाऽअनुवीक्षस्वानु त्वा दिव्या वृष्टिः सचताम् ॥३०॥

*apāṁ gambhantsīda mā tvā sūryyo'bhitāpsīnmāgnirvaiśvānaraḥ ।*
*achchhinnapatrāḥ prajā'anuvīkṣasvānu tvā divyā vṛṣṭiḥ sachatām ॥30॥*

१३. प्राणः (Prāṇaḥ) - य. (Yv.)७.१

वाचस्पतये पवस्व वृष्णोऽअं शुभ्यां गभस्तिपूतः। देवो देवेभ्यः पवस्व येषां भागोऽसि ॥१॥

*vāchaspataye pavasva vṛṣṇo'aṁ śubhyāṁ gabhastipūtaḥ । devo devebhyaḥ pavasva yeṣāṁ bhāgo'si ॥1॥*

१४. मरुतः (Marutaḥ) - अ. (Av.) २०.१.२; २०.१३.२

अ. (Av.) २०.१.२

मरुतो यस्य हि क्षये पाथा दिवो विमहसः। स सुगोपातमो जनः ॥२॥

*maruto yasya hi kṣaye pāthā divo vimahasaḥ । sa sugopātamo janaḥ ॥2॥*

अ. (Av.) २०.१३.२

आ वो वहन्तु सप्तयो रघुष्यदो रघुपत्वानः प्र जिगात बाहुभिः ।
सीदता बर्हिरुरु वः सदस्कृतं मादयध्वं मरुतो मध्वो अन्धसः ॥२॥

*ā vo vahantu saptayo raghuṣyado raghupatvānaḥ pra jigāta bāhubhiḥ ।*
*sīdatā barhiruru vaḥ sadaskṛtaṁ mādayadhvaṁ maruto madhvo andhasaḥ ॥2॥*

१५. मघवा (Maghavā) - य. (Yv.)७.४

उपयामगृहीतोऽस्यन्तर्य्यच्छ मघवन् पाहि सोमम्। उरुष्य रायऽएषो यजस्व ॥४॥

*upayāmagṛhīto'syantaryyachchha maghavan pāhi somam / uruṣya rāya'eṣo yajasva //4 //*

१६. मित्रादयः (Mitrādayaḥ) - य. (Yv.)२५.२४

मा नो मित्रो वरुणोऽअर्य्यमायुरिन्द्रऽऋभुक्षा मरुतः परिख्यन् ।
यद्वाजिनो देवजा तस्य सप्तेः प्रवक्ष्यामो विदथे वीर्याणि ॥२४॥

*mā no mitro varuṇo'aryyamāyurindra'ṛbhukṣā marutaḥ parikhyan /*
*yadvājino devajā tasya sapteḥ pravakṣayāmo vidathe vīryāṇi //24 //*

१७. याः - य. (Yv.)५.३ , १३; २५.२६ , २८ , २९

य. (Yv.)५.३

भवतं नः समनसौ सचेतसावरेपसौ ।
मा यांहिंसिष्टं मा यापतिं जातवेदसौ शिवौ भवतमद्य नः ॥३॥

*bhavataṁ naḥ samanasau sachetasāvarepasau /*
*mā yāṁhiṁsiṣṭaṁ mā yāpatiṁ jātavedasau śivau bhavatamadya naḥ //3 //*

य. (Yv.)५.१३

ध्रुवोऽसि पृथिवी दृंह ध्रुवक्षिदस्यन्तरिक्षं दृंहाच्युतक्षिदसि दिवं दृंहाग्नेः पुरीषमसि ॥१३॥

*dhruvo'si pṛthivī dṛṁha dhruvakṣidasyantarikṣaṁ dṛṁhāchyutakṣidasi divaṁ dṛṁhāgneḥ purīṣamasi //13 //*

य. (Yv.)२५.२६

एष छागः पुरोऽअश्वेन वाजिना पूष्णो भागो नीयते विश्वदेव्यः ।
अभिप्रियं यत्पुरोडाशमर्वता त्वष्टेदेनंसौश्रवसाय जिन्वति ॥२६॥

*eṣa chhāgaḥ puro'aśvena vājinā pūṣṇo bhāgo nīyate viśvadevyaḥ /*
*abhipriyaṁ yatpuroḍāśamarvatā tvaṣṭedenaṁsauśravasāya jinvati //26 //*

य. (Yv.)२५.२८-२९

होताध्वर्युरावयाऽअग्निमिन्धो ग्रावग्राभऽउत शंस्ता सुविप्रः ।
तेन योन स्वरङ्कृतेन स्विष्टेन वक्षणा आ पृणध्वम् ॥२८॥
यूपव्रस्काऽउत ये यूपवाहश्चषालं येऽअश्वयूपाय तक्षिति ।
ये चार्वते पचनं सम्भरन्त्युतो तेषामभिगूर्त्तिर्नऽइन्वतु ॥२९॥

*hotādhvaryurāvayā'agnimindho grāvagrābha'uta śaṁstā supraḥ /*
*tena yona svaraṅkṛtena sviṣṭena vakṣaṇā ā pṛṇadhvam //28 //*
*yūpavraskā'uta ye yūpavāhaśchaṣālaṁ ye'aśvayūpāya takṣiti /*
*ye chārvate pachanaṁ sambharantyuto teṣāmabhigūrttirna'invatu //29 //*

१८. यामानः (Yāmānaḥ) - य. (Yv.)२५.४२

एकस्त्वष्टुरश्वस्या विशस्ता द्वा यन्तारा भवतस्तथऽऋतुः ।
या ते गात्राणामृतुथा कृणोमि ता-ता पिण्डानां प्र जुहोम्यग्नौ ॥४२॥

*ekastvaṣṭuraśvasyā viśastā dvā yantārā bhavatastatha'ṛtuḥ /*
*yā te gātrāṇāmṛtuthā kṛṇomi tā-tā piṇḍānāṁ pra juhomyagnau //42 //*

१९. योगी (Yogī) - य. (Yv.)७.६

स्वाङ्कृतोऽसि विश्वेभ्यऽइन्द्रियेभ्यो दिव्येभ्यः पार्थिवेभ्यो मनस्त्वाष्टु स्वाहा त्वा सुभव सूर्य्याय देवेभ्यस्त्वा मरीचिपेभ्यऽउदानाय त्वा ॥६॥

*svāṅkṛto'si viśvebhya'indriyebhyo divyebhyaḥ pārthivebhyo manastvāṣṭu svāhā tvā subhava sūryyāya devebhyastvā marīchipebhya'udānāya tvā //6 //*

२०. वरुणः (Varuṇaḥ) - य. (Yv.)१३.३१

वीन्त्समुद्रान्त्समसृपत् स्वर्गानपां पतिर्वृषभऽइष्टकानाम् ।

पुरीषं वसानः सुकृतस्य लोके तत्र गच्छ यत्र पूर्वे परेताः ॥३१॥
*vīntsamudrāntsamasṛpat svargānapāṁ patirvṛṣabha'iṣṭakānām /*
*purīṣaṁ vasānaḥ sukṛtasya loke tatra gachchha yatra pūrve paretāḥ //31 //*

२१. वाक् (Vāk) - य. (Yv.)५.१०-१२

सिं ह्यसि सपत्नसाही देवेभ्यः कल्पस्व सिं ह्यसि सपत्नसाही देवेभ्यः शुन्धस्व
सिं ह्यसि सपत्नसाही देवेभ्यः शुम्भस्व ॥१०॥
इन्द्रघोषस्त्वा वसुभिः पुरस्तात्पातु प्रचेतास्त्वा रुद्रैः पश्चात्पातु मनोजवास्त्वा पितृभिर्दक्षिणतः पातु विश्वकर्मा त्वादित्यैरुत्तरतः पात्विदमहं तप्तं वार्बहिर्धा यान्निः सृजामि ॥११॥
सिं ह्यसि स्वाहा सिं ह्यस्यादित्यवनिः स्वाहा सिं ह्यसि ब्रह्मवनिः क्षत्रवनिः स्वाहा
सिं ह्यसि सुप्रजावनी रायस्पोषवनिः स्वाहा
सिं ह्यस्यावह देवान्यजमानाय स्वाहा भूतेभ्यस्त्वा ॥१२॥
*siṁ hyasi sapatnasāhī devebhyaḥ kalpasva siṁ hyasi sapatnasāhī devebhyaḥ śundhasva*
*siṁ hyasi sapatnasāhī devebhyaḥ śumbhasva //10 //*
*indraghoṣastvā vasubhiḥ purastātpātu prachetāstvā rudraiḥ paśchātpātu manojavāstvā pitṛbhirdakṣiṇataḥ pātu viśvakarmā tvādityairuttarataḥ pātvidamahaṁ taptaṁ vārbahirdhā yāānniḥ sṛjāmi //11 //*
*siṁ hyasi svāhā siṁ hyasyādityavaniḥ svāhā siṁ hyasi brahmavaniḥ kṣatravaniḥ svāhā*
*siṁ hyasi suprajāvanī rāyaspoṣavaniḥ svāhā*
*siṁ hyasyāvaha devānyajamānāya svāhā bhūtebhyastvā //12 //*

२२. वायुः (Vāyuḥ) - य. (Yv.)२५.१७

तन्नो वातो मयोभु वातु भेषजं तन्माता पृथिवी तत्पिता द्यौः ।
तद् ग्रावाणाः सोमसुतो मयोभुवस्तदश्विना शृणुतं धिष्ण्या युवम् ॥१७॥
*tanno vāto mayobhu vātu bheṣajaṁ tanmātā pṛthivī tatpitā dyauḥ /*
*tad grāvāṇāḥ somasuto mayobhuvastadaśvinā śṛṇutaṁ dhiṣṇyā yuvam //17 //*

२३. विद्वान् (Vidvān) - य. (Yv.)२५.४८

तं त्वा शोचिष्ठ दीदिवः सुम्नाय नूनमीमहे सखिभ्यः ।
स नो बोधि श्रुधी हवमुरुष्या णोऽअघायतः समस्मात् ॥४८॥
*taṁ tvā śochiṣṭha dīdivaḥ sumnāya nūnamīmahe sakhibhyaḥ /*
*sa no bodhi śrudhī havamuruṣyā ṇo'aghāyataḥ samasmāt //48 //*

२४. विद्वांसः (Vidvāṁsaḥ) - य. (Yv.)७.३; २५.२५; ३०, ३७, ३९

य. (Yv.)७.३

स्वाङ्कृतोऽसि विश्वेभ्यऽइन्द्रियेभ्यो दिव्येभ्यः पार्थिवेभ्यो मनस्त्वाष्टु स्वाहा त्वा सुभव सूर्य्याय देवेभ्यस्त्वा मरीचिपेभ्यो देवां शो यस्मै त्वेडे तत्सत्यमुपरिप्रुता भंगेनहतोऽसौ
फट् प्राणाय त्वा व्यानाय त्वा ॥३॥
*svāṅkṛto'si viśvebhya'indriyebhyo divyebhyaḥ pārthivebhyo manastvāṣṭu svāhā tvā subhava sūryyāya devebhyastvā marīchipebhyo devāṁ śo yasmai tveḍe tatsatyamuparipr̥utā bhaṁgenahato'sau*
*phaṭ prāṇāya tvā vyānāya tvā //3 //*

य. (Yv.)२५.२५

यन्निर्णिजा रेक्णसा पावृतस्य रातिं गृभीतां मुखतो नयन्ति ।
सुप्राङ्गो मेम्यद्विश्वरूपऽइन्द्रापूष्णो प्रियमप्येति पाथः ॥२५॥
*yannirṇijā rekṇasā pāvṛtasya rātiṁ gṛbhītāṁ mukhato nayanti /*
*suprāñjo memyadviśvarūpa'indrāpūṣṇo priyamapyeti pāthaḥ //25 //*

य. (Yv.)२५.३०

उप प्रागात्सुमन्मेऽधायि मन्म देवानामाशाऽउप वीतपृष्ठः ।
अन्वेनं विप्राऽऋषयो मदन्ति देवानां पुष्टे पुष्टे चकृमा सुबन्धुम् ॥३० ॥
*upa prāgātsumanme'dhāyi manma devānāmāśā'upa vītapṛṣṭhaḥ /*
*anvenaṁ viprā'ṛṣayo madanti devānāṁ puṣṭe puṣṭe chakṛmā subandhum //30 //*

य. (Yv.)२५.३७

मा त्वाग्निर्ध्वनयीद् धूमगन्धिर्मोखा भ्राजन्त्यभि विक्त जघ्रिः ।
इष्टं वीतमभिगूर्त्तं वषट्कृतं तं देवासः प्रति गृभ्णन्त्यश्वम् ॥३७ ॥
*mā tvāgnirdhvanayīd dhūmagandhirmokhā bhrājantyabhi vikta jaghriḥ /*
*iṣṭaṁ vītamabhigūrtta vaṣaṭkṛtaṁ taṁ devāsaḥ prati gṛbhṇantyaśvam //37 //*

य. (Yv.)२५.३९

यदश्वाय वासऽउपस्तृणन्त्यधीवासं या हिरण्यान्यस्मै ।
सन्दानमर्वन्तं पड्वीशं प्रिया देवेष्वा यामयन्ति ॥३९ ॥
*yadaśvāya vāsa'upastṛṇantyadhīvāsaṁ yā hiraṇyānyasmai /*
*sandānamarvantaṁ paḍvīśaṁ priyā deveṣvā yāmayanti //39 //*

२५. विद्युत् (Vidyut) - य. (Yv.)५.५

आपतये त्वा परिपतये गृह्णामि तनूनप्त्रे शाक्वराय शक्वनऽओजिष्ठाय । अनाधृष्टमस्यनाधृष्यं
देवानामोजोऽनभिशस्त्यभिशस्तिपाऽअनभिशस्तेन्यमंजसा सत्यमुपगेषंस्विते मा धाः ॥५ ॥
*āpataye tvā paripataye gṛhṇāmi tanūnaptre śākvarāya śakvana'Ojiṣṭhāya /*
*anādhṛṣṭamasyanādhṛṣyaṁ*
*devānāmojo'nabhiśastyabhiśastpiā'anabhiśastenyamaṁjasā satyamupageṣaṁsvite mā dhāḥ //5 //*

२६. विश्वेदेवाः (Viśvedevāḥ) - य. (Yv.)१३.२७-२९; २५.३५ , ४६

य. (Yv.)१३.२७-२९

मधु वाताऽऋतायते मधु क्षरन्ति सिन्धवः । माध्वीर्नः सन्त्वोषधीः ॥२७ ॥
मधु नक्तमुतोषसो मधुमत्पार्थिवंरजः । मधु द्यौरस्तु नः पिता ॥२८ ॥
मधुमान्नो वनस्पतिर्मधुमाँश्ऽ अस्तु सूर्य्यः । माध्वीर्गावो भवन्तु नः ॥२९ ॥
*madhu vātā'ṛtāyate madhu kṣaranti sindhavaḥ / mādhvīrnaḥ santvoṣadhīḥ //27 //*
*madhu naktamutoṣaso madhumatpārthivaṁraṁjaḥ / madhu dyaurastu naḥ pitā //28 //*
*madhumānno vanaspatirmadhumām̐ś' astu sūryyaḥ / mādhvīrgāvo bhavantu naḥ //29 //*

य. (Yv.)२५.३५

ये वाजिनं परिपश्यन्ति पक्वं यऽईमाहुः सुरभिर्निर्हरेति ।
ये चार्वतो मां सभिक्षामुपासतऽउतो तेषामभिगूर्त्तिर्नऽइन्वतु ॥३५ ॥
*ye vājinaṁ paripaśyanti pakvaṁ ya'īmāhuḥ surabhirnirhareti /*
*ye chārvato māṁ sabhikṣāmupāsata'uto teṣāmabhigūrttirna'invatu //35 //*

य. (Yv.)२५.४६

इमा नु कं भुवना सीषधामेन्द्रश्च विश्वे च देवाः ।
आदित्यैरिन्द्रः सगणो मरुद्भिरस्मभ्यं भेषजा करत् ।
यां च नस्तन्वं च प्रजां चादित्यैरिन्द्रः सह सीषधाति ॥४६ ॥
*imā nu kaṁ bhuvanā sīṣadhāmendraścha viśve cha devāḥ /*
*ādityerindraḥ sagaṇo marudbhirasmabhyaṁ bheṣajā karat /*
*yāṁ cha nastanvaṁ cha prajāṁ chādityairindraḥ saha sīṣadhāti //46 //*

२७. विष्णुः (Viṣṇuḥ) - य. (Yv.)५.१-२; १३.३३

य. (Yv.)५.१-२

अग्नेस्तनूरसि विष्णवे त्वा सोमस्य तनूरसि विष्णवे त्वाऽतिथेरातिथ्यमसि विष्णवे त्वावा श्येनायतवा सोमभृते विष्णवे त्वाऽग्नये त्वा रायस्पोषदे विष्णवे त्वा ॥१॥
अग्नेर्जनित्रमसि वृषणौ स्थऽउर्वश्यस्यायुरसि पुरूरवाऽअसि। गायत्रेण त्वा छन्दसा मन्थामि त्रैष्टुभेन त्वा छन्दसा मन्थामि जागतेन त्वा छन्दसा मन्थामि॥२॥

*agnestanūrasi viṣṇave tvā somasya tanṛrasi viṣṇave tvā'titherātithyamasi viṣṇave tvāvā śyenāyatavā somabhṛte viṣṇave tvā'gnaye tvā rāyaspoṣade viṣṇave tvā //1 //*
*agnerjanitramasi vṛṣaṇau stha'urvaśyasyāyurasi purūravā'asi / gāyatreṇa tvā chhandasā manthāmi traiṣṭubhena tvā chhandasā manthāmi jāgatena tvā chhandasā manthāmi //2 //*

य. (Yv.)१३.३३

विष्णोः कर्माणि पश्यत यतो व्रतानि पस्पशे। इन्द्रस्य युज्यः सखा ॥३३॥
*viṣṇoḥ karmāṇi paśyata yato vratāni paspaśe / indrasya yujyaḥ sakhā //33 //*

२८. सविता (Savitā) - य. (Yv.)५.१४

युंजते मनऽउत युंजते धियो विप्रा विप्रस्य बृहतो विपश्चितः ।
वि होत्रा दधे वयुनाविदेकऽइन्मही देवस्य सवितुः परिष्टुतिः स्वाहा॥१४॥
*yuṁjate mana'uta yuṁjate dhiyo viprā viprasya bṛhato vipaśchitaḥ /*
*vi hotrā dadhe vayunāvideka'inmahī devasya savituḥ pariṣṭutiḥ svāhā //14 //*

२९. सोमः (Somaḥ) - य. (Yv.)५.७; ७.२; १२.११२-११४; ३४.२०-२३

य. (Yv.)५.७

अं शुरं शुष्टे देव सोमाप्यायतामिन्द्रायैकधनविदे ।
आ तुभ्यमिन्द्रः प्यायतामा त्वमिन्द्राय प्यायस्व ।
आप्याययास्मान्त्सखीन्त्सन्न्या मेधया स्वस्ति ते देव सोम सुत्यामशीय ।
एष्टा रायः प्रेषे भगायऽऋतमृतवादिभ्यो नमो द्यावापृथिवीभ्याम्॥७॥
*aṁ śuraṁ śuṣṭe deva somāpyāyatāmindrāyaikadhanavide /*
*ā tubhyamindraḥ pyāyatāmā tvamindrāya pyāyasva /*
*āpyāyayāsmāntsakhīntsannyā medhayā svasti te deva soma sutyāmaśīya /*
*eṣṭā rāyaḥ preṣe bhagāya'ṛtamṛtavādibhyo namo dyāvāpṛthivībhyām //7 //*

य. (Yv.)७.२

मधुमतीर्नऽइषस्कृधि यत्ते सोमादाभ्यं नाम जागृवि तस्मै ते सोम सोमाय स्वाहा स्वाहोवृन्रिक्षमन्वेमि॥२॥
*madhumatīrna'iṣaskṛdhi yatte somādābhyaṁ nāma jāgṛvi tasmai te soma somāya svāhā svāhovṛnrikṣamanvemi //2 //*

य. (Yv.)१२.११२-११४

आप्यायस्व स्मेतु ते विश्वतः सोम वृष्ण्यम्।
भवा वाजस्य संगथे ॥११२।
सं ते पयां सि समु यन्तु वाजाः सं वृष्ण्यान्यभिमातिषाहः।
आप्यायमानोऽअमृताय सोम दिवि श्रवां स्युत्तमानि धिष्व ॥११३॥
आप्यायस्व मदिन्तम सोम विश्वेभिरं शुभिः ।
भवा नः सप्रथस्तमः सखा वृधे॥११४॥
*āpyāyasva smetu te viśvataḥ soma vṛṣṇyam /*
*bhavā vājasya saṁgathe //112 /*
*saṁ te payāṁ si samu yantu vājāḥ saṁ vṛṣṇyānyabhimātiṣāhaḥ /*
*āpyāyamāno'amṛtāya soma divi śravāṁ syuttamāni dhiṣva //113 //*
*āpyāyasva madintama soma viśvebhiraṁ śubhiḥ /*
*bhavā naḥ saprathastamaḥ sakhā vṛdhe //114 //*

य. (Yv.)३४.२०-२३

अषाढं युत्सु पृत्नासु पप्रिंस्वर्षामप्सां वृजनस्य गोपाम् ।
भरेषुजांसुक्षितिंसुश्रवसं जयन्तं त्वामनु मदेम सोम ॥२०॥
सोमो धेनुंसोमोऽअर्वन्तमाशुंसोमो वीरं कर्मण्यं ददाति ।
सादन्यं विदथ्यंसभेयं पितृश्रवणं यो ददाशदस्मै ॥२१॥
त्वमिमाऽओषधीः सोम विश्वास्त्वमपोऽअजनयस्त्वं गाः ।
त्वमा ततन्थोर्वन्तरिक्षं त्वं ज्योतिषा वि तमो ववर्थ ॥२२॥
देवेन नो मनसा देव सोम रायो भागंसहसावन्नभि युध्य ।
मा त्वा तनदीशिषे वीर्य्यस्योभयेभ्यः प्र चिकित्सा गविष्टौ ॥२३॥

*aṣāḍhaṁ yutsu pṛtnāsu papriṁsvarṣāmapsāṁ vṛjanasya gopām /*
*bhareṣujāṁsukṣitiṁsuśravasaṁ jayantaṁ tvāmanu madema soma //20 //*
*somo dhenuṁsomo'arvantamāśuṁsomo vīraṁ karmaṇyaṁ dadāti /*
*sādanyaṁ vidathyaṁsabheyaṁ pitṛśravaṇaṁ yo dadāśadasmai //21 //*
*tvamimā'Oṣadhīḥ soma viśvāstvamapo'ajanayastvaṁ gāḥ /*
*tvamā tatanthorvantarikṣaṁ tvaṁ jyotiṣā vi tamo vavartha //22 //*
*devena no manasā deva soma rāyo bhāgaṁsahasāvannabhi yudhya /*
*mā tvā tanadīśiṣe vīryyasyobhayebhyaḥ pra chikitsā gaviṣṭau //23 //*

## २१९. गोतमो राहूगणः (Gotamo Rāhūgaṇaḥ)

१. अग्निः (Agniḥ) - ऋ. (Rv.) १.७४.१-९; १.७५.१-५; १.७६.१-५; १.७७.१-५; १.७८.१-५; १.७९.१-१२; सा. (Sv.) ९९; १३७९; १३८०; १३८२; १५२४-१५२६; १५३५-३७; १५६१-६३

ऋ. (Rv.) १.७४.१-९

उपप्रयन्तो अध्वरं मन्त्रं वोचेमाग्नये। आरे अस्मे च शृण्वते ॥१॥
यः सनीहितीषु पूर्व्यः संजग्मानासु कृष्टिषु। अरक्षद्दाशुषे गयम् ॥२॥
उत ब्रुवन्तु जन्त्व उदग्निर्वृत्रहाजनि। धनंजयो रणेरणे ॥३॥
यस्य दूतो असि क्षये वेषि हव्यानि वीतये। दस्मत्कृणोषध्वरम् ॥४॥
तमित्सुहव्यमंगिरः सुदेवं सहसो यहो। जना आहुः सुबर्हिषम् ॥५॥
आ च वहासि ताँ इह देवाँ उप प्रशस्तये। हव्या सुश्चन्द्र वीतये ॥६॥
न योरुपब्दिरश्व्यः शृण्वे रथस्य कच्चन। यदग्ने यासि दूत्यम् ॥७॥
त्वोतो वाजयह्रयोऽभि पूर्वसमादपरः। प्र दाश्वाँ अग्ने अस्थात् ॥८॥
उत द्युमत्सुवीर्यं बृहदग्ने विवाससि। देवेभ्यो देव दाशुषे ॥९॥

*upaprayanto adhvaraṁ mantraṁ vochemāgnaye / āre asme cha śṛṇvate //1 //*
*yaḥ sanīhitīṣu pūrvyaḥ saṁjagmānāsu kṛṣṭiṣu / arakṣaddāśuṣe gayam //2 //*
*uta bruvantu jantva udagnirvṛtrahājani / dhanaṁjayo raṇeraṇe //3 //*
*yasya dūto asi kṣaye veṣi havyāni vītaye / dasmatkṛṇoṣadhvaram //4 //*
*tamitsuhavyamaṁgiāraḥ sudevaṁ sahaso yaho / janā āhuḥ subarhiṣam //5 //*
*ā cha vahāsi tām̐ iha devām̐ upa praśastaye / havyā suśchandra vītaye //6 //*
*na yorupabdiraśvyaḥ śṛṇve rathasya kachchana / yadagne yāsi dūtyam //7 //*
*tvoto vājayahrayo'bhi pūrvasamādaparaḥ / pra dāśvām̐ agne asthāt //8 //*
*uta dyumatsuvīrya bṛhadagne vivāsasi / devebhyo deva dāśuṣe //9 //*

ऋ. (Rv.) १.७५.१-५

जुषस्व सप्रथस्तमं वचो देवप्सरस्तमम्। हव्या जुह्वान आसनि ॥१॥
अथा ते अंगिारस्तमाग्ने वेधस्तम प्रियम्। वोचेम ब्रह्म सानसि ॥२॥
कस्ते जामिर्जनानामग्ने को दाश्वध्वरः। को ह कस्मिन्नसि श्रितः ॥३॥
त्वं जामिर्जनानामग्ने मित्रो असि प्रियः। सखा सखिभ्य ईड्यः ॥४॥
यजा नो मित्रावरुणा यजा देवाँ ऋतं बृहत्। अग्ने यक्षि स्वं दमम् ॥५॥

*juṣasva saprathastamaṁ vacho devapsarastamam / havyā juhnāna āsani //1 //*
*athā te aṁgiārastamāgne vedhastama priyam / vochema brahma sānasi //2 //*

*kaste jāmirjanānāmagne ko dāśvadhvaraḥ । ko ha kasminnasi śritaḥ ॥3 ॥*
*tvaṁ jāmirjanānāmagne mitro asi priyaḥ । sakhā sakhibhya īḍyaḥ ॥4 ॥*
*yajā no mitrāvaruṇā yajā devām̐ ṛtaṁ bṛhat । agne yakṣi svaṁ damam ॥5 ॥*

ऋ. (Rv.) १.७६.१-५

का त उपेतिर्मनसो वराय भुवदग्ने शंतमा का मनीषा ।
को वा यौः परि दक्षं त आप केन वा ते मनसा दाशेम ॥१ ॥
एह्यग्न इह होता नि षीदादब्धः सु पुरएता भवा नः ।
अवतां त्वा रोदसी विश्वमिन्वे यजा महे सौमनसाय देवान ॥२ ॥
प्र सु विश्वान् रक्षसो धक्ष्यग्ने भवा यानामभिशस्तिपावा ।
अथा वह सोमपतिं हरिभ्यामातिथ्यमस्मै चकृमा सुदाव्ने ॥३ ॥
प्रजावता वचसा वह्निरासा च हुवे नि च सत्सीह देवैः ।
वेषि होत्रमुत पोत्रं यजत्र बोधि प्रयन्तर्जनतर्वसूनाम् ॥४ ॥
यथा विप्रस्य मनुषो हविर्भिर्देवाँ अयजः कविभिः कविः सन् ।
एवा होतः सत्यतर त्वमद्याग्ने मन्द्रया जुह्वा यजस्व ॥५ ॥

*kā ta upetirmanaso varāya bhuvadagne śaṁtamā kā manīṣā ।*
*ko vā yauḥ pari dakṣaṁ ta āpa kena vā te manasā dāśema ॥1 ॥*
*ehyagna iha hotā ni ṣīdādabdhaḥ su puraetā bhavā naḥ ।*
*avatāṁ tvā rodasī viśvaminve yajā mahe saumanasāya devāna ॥2 ॥*
*pra su viśvān rakṣaso dhakṣayagne bhavā yāānāmabhiśastipāvā ।*
*athā vaha somapatiṁ haribhyāmātithyamasmai chakṛmā sudāvne ॥3 ॥*
*prajāvatā vachasā vahnirāsā cha huve ni cha satsīha devaiḥ ।*
*veṣi hotramuta potraṁ yajatra bodhi prayantarjanatarvasūnām ॥4 ॥*
*yathā viprasya manuṣo havirbhirdevām̐ ayajaḥ kavibhiḥ kaviḥ san ।*
*evā hotaḥ satyatara tvamadyāgne mandrayā juhnā yajasva ॥5 ॥*

ऋ. (Rv.) १.७७.१-५

कथा दाशेमाग्नये कास्मै देवजुष्टोच्यते भामिने गीः ।
यो मर्त्येष्वमृत ऋतावा होता यजिष्ठ इत्कृणोति देवान् ॥१ ॥
यो अध्वरेषु शंतम ऋतावा होता तमू नमोभिरा कुणुध्वम् ।
अग्निर्यद् वेर्मर्ताय देवान्त्स चा बोधाति मनसा यजाति ॥२ ॥
स हि क्रतुः स मर्यः स साधुर्मित्रो न भूदद्भुतस्य रथीः ।
तं मेधेषु प्रथमं देवयन्तीर्विश उप ब्रुवते दस्ममारीः ॥३ ॥
स नो नृणां नृतमो रिशादा अग्निर्गिरोऽवसा वेतु धीतिम् ।
तना च ये मघवानः शविष्ठा वाजप्रसूता इषयन्त मन्म ॥४ ॥
एवाग्निर्गोतमेभिऋर्तावा विप्रेभिरस्तोष्ट जातवेदाः ।
स एषु द्युम्नं पीपयत्स वाजं स पुष्टिं याति जोषमा चिकित्वान् ॥५ ॥

*kathā dāśemāgnaye kāsmai devajuṣṭochyate bhāmine gīḥ ।*
*yo martyeṣvamṛta ṛtāvā hotā yajiṣṭha itkṛṇoti devān ॥1 ॥*
*yo adhvareṣu śaṁtama ṛtāvā hotā tamū namobhirā kuṇudhvam ।*
*agniryad vermartāya devāntsa chā bodhāti manasā yajāti ॥2 ॥*
*sa hi kratuḥ sa maryaḥ sa sādhurmitro na bhūdadbhutasya rathīḥ ।*
*taṁ medheṣu prathamaṁ devayantīrviśa upa bruvate dasmamārīḥ ॥3 ॥*
*sa no nṛṇāṁ nṛtamo riśādā agnirgiro'vasā vetu dhītim ।*
*tanā cha ye maghavānaḥ śaviṣṭhā vājaprasūtā iṣayanta manma ॥4 ॥*
*evāgnirgotamebhirṛtāvā viprebhirastoṣṭa jātavedāḥ ।*
*sa eṣu dyumnaṁ pīpayatsa vājaṁ sa puṣṭiṁ yāti joṣamā chikitvān ॥5 ॥*

ऋ. (Rv.) १.७८.१-५

अभि त्वा गोतमा गिरा जातवेदो विचर्षणे। द्युम्नैरभि प्र णोनुमः ॥१ ॥

तमु त्वा गोतमो गिरा रायस्कामो दुवस्यति। द्युम्नैरभि प्र णोनुमः ॥२॥
तमु त्वा वाजसातममंगिरस्वद्धवामहे। द्युम्नैरभि प्र णोनुमः ॥३॥
तमु त्वा वृत्रहन्तमं यो दस्यूँरवधूनुषे। द्युम्नैरभि प्र णोनुमः ॥४॥
अवोचाम रहूगणा अग्नये मधुमद्वचः। द्युम्नैरभि प्र णोनुमः ॥५॥
*abhi tvā gotamā girā jātavedo vicharṣaṇe / dyumnairabhi pra ṇonumaḥ //1 //*
*tamu tvā gotamo girā rāyaskāmo duvasyati / dyumnairabhi pra ṇonumaḥ //2 //*
*tamu tvā vājasātamamaṁgirasvaddhavāmahe / dyumnairabhi pra ṇonumaḥ //3 //*
*tamu tvā vṛtrahantamaṁ yo dasyūm̐ravadhūnuṣe / dyumnairabhi pra ṇonumaḥ //4 //*
*avochāma rahūgaṇā agnaye madhumadvachaḥ / dyumnairabhi pra ṇonumaḥ //5 //*

ऋ. (Rv.) १.७९.१-१२

हिरण्यकेशो रजसो विसारेऽहिर्धुनिर्वात इव ध्रजीमान ।
शुचिभ्राजा उषसो नवेदा यशस्वतीरपस्युवो न सत्याः ॥१॥
आ ते सुपर्णा अमिनन्तँ एवैः कृष्णो नोनाव वृषभे यदीदम् ।
शिवाभिर्न स्मयमानाभिरागात्पतन्ति मिहः स्तनयन्त्यभ्रा ॥२॥
यदीमृतस्य पयसा पियानो नयन्नृतस्य पथिभी रजिष्ठैः ।
अर्यमा मित्रो वरुणः परिज्मा त्वचं पृंचन्त्युपरस्य योनौ ॥३॥
अग्ने वाजस्य गोमत ईशानः सहसो यहो। अस्मे धेहि जातवेदो महि श्रवः ॥४॥
स इधानो वसुष्कविरग्निरीळेन्यो गिरा। रेवदस्मभ्यं पुर्वणीक दीदिहि ॥५॥
क्षपो राजन्नुत त्मनाग्ने वस्तोरुतोषसः। स तिग्मजम्भ रक्षसो दह प्रति ॥६॥
अवा नो अग्न ऊतिभिर्गायत्रस्य प्रभर्मणि। विश्वासु धीषु वन्द्य ॥७॥
आ नो अग्ने रयिं भर सत्रासाहं वरेण्यम्। विश्वासु पृत्सु दुष्टरम् ॥८॥
आ नो अग्ने सुचेतुना रयिं विश्वायुपोषसम्। मार्डीकं धेहि जीवसे ॥९॥
प्र पूतास्तिग्मशेचिषे वाचो गोतमाग्नये। भरस्व सुम्नयुर्गिरः ॥१०॥
यो नो अग्नेऽभिदासत्यन्ति दूरे पदीष्ट सः। अस्माकमिद् वृधे भव ॥११॥
सहस्राक्षो विचर्षणिरग्नी रक्षांसि सेधति। होता गृणीत उक्थ्यः ॥१२॥
*hiraṇyakeśo rajaso visāre'hirdhunirvāta iva dhrajīmāna /*
*śuchibhrājā uṣaso navedā yaśasvatīrapasyuvo na satyāḥ //1 //*
*ā te suparṇā aminantam̐ evaiḥ kṛṣṇo nonāva vṛṣabhe yadīdam /*
*śivābhirna smayamānābhirāgātpatanti mihaḥ stanayantyabhrā //2 //*
*yadīmṛtasya payasā piyāno nayannṛtasya pathibhī rajiṣṭhaiḥ /*
*aryamā mitro varuṇaḥ parijmā tvachaṁ pṛṁchantyuparasya yonau //3 //*
*agne vājasya gomata īśānaḥ sahaso yaho / asme dhehi jātavedo mahi śravaḥ //4 //*
*sa idhāno vasuṣkaviragnirīḻenyo girā / revadasmabhyaṁ purvaṇīka dīdihi //5 //*
*kṣapo rājannuta tmanāgne vastorutoṣasaḥ / sa tigmajambha rakṣaso daha prati //6 //*
*avā no agna ūtibhirgāyatrasya prabharmaṇi / viśvāsu dhīṣu vandya //7 //*
*ā no agne rayiṁ bhara satrāsāhaṁ vareṇyam / viśvāsu pṛtsu duṣṭaram //8 //*
*ā no agne suchetunā rayiṁ viśvāyupoṣasam / mārḍīkaṁ dhehi jīvase //9 //*
*pra pūtāstiaigmaśechiṣe vācho gotamāgnaye / bharasva sumnayurgiraḥ //10 //*
*yeā no agne'bhidāsatyanti dūre padīṣṭa saḥ / asmākamid vṛdhe bhava //11 //*
*sahasrākṣo vicharṣaṇiragnī rakṣāṁsi sedhati / hotā gṛṇīta ukthyaḥ //12 //*

सा. (Sv.) ९९

अग्ने वाजस्य गोमत ईशानः सहसो यहो। अस्मे देहि जातवेदो महि श्रवः ॥३॥
*agne vājasya gomata īśānaḥ sahaso yaho / asme dehi jātavedo mahi śravaḥ //3 //*

सा. (Sv.) १३७९-१३८०

उपप्रयन्तो अध्वरं मन्त्रं वोचेमाग्नये। आरे अस्मे च शृण्वते ॥१॥
यः स्नीहितीषु पूर्व्यः संजग्मानासु कृष्टिषु। अरक्षद्दाशुषे गयम् ॥२॥
*upaprayanto adhvaraṁ mantraṁ vochemāgnaye / āre asme cha śṛṇvate //1 //*

*yaḥ snīhitīṣu pūrvyaḥ saṁjagmānāsu kṛṣṭiṣu । arakṣaddāśuṣe gayam ॥2 ॥*

सा. (Sv.) १३८२

उत ब्रुवन्तु जन्वत उदग्निर्वृत्रहाजनि। धनंजयो रणेरणे ॥४ ॥

*uta bruvantu janvata udagnirvṛtrahājani । dhanaṁjayo raṇeraṇe ॥4 ॥*

सा. (Sv.) १५२४-१५२६

अवा नो अग्न ऊतिभिर्गायत्रस्य प्रभर्मणि। विश्वासु धीषु वन्द्य ॥१ ॥

आ नो अग्ने रयिं भर सत्रासाहं वरेण्यम्। विश्वासु पृत्सु दुष्टरम् ॥२ ॥

आ नो अग्ने सुचेतुना रयिं विश्वयुपोषम्। मार्डीकं धेहि जीवसे ॥३ ॥

*avā no agna ūtibhirgāyatrasya prabharmaṇi । viśvāsu dhīṣu vandya ॥1 ॥*

*ā no agne rayiṁ bhara satrāsāhaṁ vareṇyam । viśvāsu pṛtsu duṣṭaram ॥2 ॥*

*ā no agne suchetunā rayiṁ viśvayupoṣam । mārḍīkaṁ dhehi jīvase ॥3 ॥*

सा. (Sv.) १५३५-३७

कस्ते जामिर्जनानामग्ने को दाश्वध्वरः। को ह कस्मिन्नसि श्रितः ॥१ ॥

त्वं जामिर्जनानामग्ने मित्रो असि प्रियः। सखा सखिभ्य ईड्यः ॥२ ॥

यजा नो मित्रावरुणा यजा देवाँ ऋतं बृहत्। अग्ने यक्षिस्वं दमम् ॥३ ॥

*kaste jāmirjanānāmagne ko dāśvadhvaraḥ । ko ha kasminnasi śritaḥ ॥1 ॥*

*tvaṁ jāmirjanānāmagne mitro asi priyaḥ । sakhā sakhibhya īḍyaḥ ॥2 ॥*

*yajā no mitrāvaruṇā yajā devāṁ̐ ṛtaṁ bṛhat । agne yakṣisvaṁ damam ॥3 ॥*

सा. (Sv.) १५६१-६३

अग्ने वाजस्य गोमत ईशानः सहसो यहो। अस्मे देहि जातवेदो महि श्रवः ॥१ ॥

स इधानो वसुष्कविरग्निरीडेन्यो गिरा। रेवदस्मभ्यं पुर्वणीक दीदिहि ॥२ ॥

क्षपो राजन्नुत त्मनाग्ने वस्तोरुतोषसः। स तिग्मजम्भ रक्षसो दह प्रति ॥३ ॥

*agne vājasya gomata īśānaḥ sahaso yaho । asme dehi jātavedo mahi śravaḥ ॥1 ॥*

*sa idhāno vasuṣkaviragnirīḍenyo girā । revadasmabhyaṁ purvaṇīka dīdihi ॥2 ॥*

*kṣapo rājannuta tmanāgne vastorutoṣasaḥ । sa tigmajambha rakṣaso daha prati ॥3 ॥*

२. अग्निषोमौ (Agniṣomau) - ऋ. (Rv.) १.९३.१-१२

अग्नीषेमाविमं सु मे श्णुतं वृषणा हवम् । प्रति सूक्तानि हर्यतं भवतं दाशुषे मयः ॥१ ॥

अग्नीषोमा यो अद्य वामिदं बचः सपर्यति। तस्मै धत्तं सुवीर्य गवां पोषं स्वश्व्यम् ॥२ ॥

अग्नीषोमा य आहुतिं यो वां दाशाद्धविष्कृतिम्। स प्रजया सुवीर्य विश्वमायुर्व्यश्नवत् ॥३ ॥

अग्नीषोमा चेति तद्वीर्य वा यदमुष्णीतमवसं पणि गाः ।

अवातिरतं बृसयस्य शेषेऽविन्दतं ज्योतिरेकं बहुभ्यः ॥४ ॥

युवमेतानि दिवि रोचनान्यग्निश्च सोम सक्रतू अधत्तम् ।

युवं सिन्धूँरभिशस्तेरवद्यादग्नीषोमावमुंचतं गृभीतान् ॥५ ॥

आन्यं दिवो मातरिश्व जभरामथ्नादन्यं परि श्येनो अद्रेः ।

अग्नीषोमा ब्रह्मणा वावृधानोरुं याय चक्रथुरु लोकम् ॥६ ॥

अग्नीषोमा हविषः पंस्थितस्य वीतं हर्यतं वृषणा जुषेथाम् ।

सुशर्माणा स्ववसा हि भूतमथा धत्तं यजमानाय शं योः ॥७ ॥

अग्नीषोमा सवेदसा सहूती वनतं गिरः। सं देवत्रा बभूवथुः ॥९ ॥

अग्नीषोमावनेन वांयो वां घृतेन दाशति। तस्मै दीदयतं बृहत् ॥१० ॥

अग्नीषोमाविमानि नो युवं हव्या जुजोषतम्। आ यातमुप नः सचा ॥११ ॥

अग्नीषोमा पिपृतमर्वतो न आ प्यायन्तामुस्त्रिया हव्यसूदः ।

अस्मे बलानि मघवत्सु धत्तं कृणुतं नो अध्वरं श्रुष्टिमन्तम् ॥१२ ॥

*agnīṣemāvimaṁ su me śṛṇutaṁ vṛṣaṇā havam ।*

*prati sūktāni haryataṁ bhavataṁ dāśuṣe mayaḥ ॥1 ॥*

*agnīṣomā yeā adya vāmidaṁ bachaḥ saparyati ।*

*tasmai dhattaṁ suvīrya gavāṁ poṣaṁ svaśvyam ॥2 ॥*

*agnīṣomā ya āhutiṁ yo vāṁ dāśāddhaviṣkṛtim ।*

*sa prajayā suvīrya viśvamāyurvyaśnavat //3 //*
*agnīṣomā cheti tadvīrya vā yadamuṣṇītamavasaṁ paṇi gāḥ /*
*avātiratam̐ bṛsayasya śeṣe'vindataṁ jyotirekaṁ bahubhyaḥ //4 //*
*yuvametāni divi rochanānyagniścha soma sakratū adhattam /*
*yuvaṁ sindhūm̐rabhiśasteravadyādagnīṣomāvamuṁchataṁ gṛbhītān //5 //*
*ānyaṁ divo mātariśva jabharāmathnādanyaṁ pari śyeno adreḥ /*
*agnīṣomā brahmaṇā vāvṛdhānoruṁ yāāya chakrathuru lokam //6 //*
*agnīṣomā haviṣaḥ paṁsthitasya vītaṁ haryataṁ vṛṣaṇā juṣethām /*
*suśarmāṇā svavasā hi bhūtamathā dhattaṁ yajamānāya śaṁ yoḥ //7 //*
*agnīṣomā savedasā sahūtī vanataṁ giraḥ / saṁ devatrā babhūvathuḥ //9 //*
*agnīṣomāvanena vām̐yo vāṁ ghṛtena dāśati / tasmai dīdayataṁ bṛhat //10 //*
*agnīṣomāvimāni no yuvaṁ havyā jujoṣatam / ā yātamupa naḥ sachā //11 //*
*agnīṣomā pipṛtamarvato na ā pyāyantāmusriyā havyasūdaḥ /*
*asme balāni maghavatsu dhattaṁ kṛṇutaṁ no adhvaraṁ śruṣṭimantam //12 //*

३. अश्विनौ (Aśvinau) - सा. (Sv.) १७३४-१७३६

अश्विना वर्तिरस्मदा गोमद्दस्रा हिरण्यवत्। अर्वाग्रथं समनसा नि यच्छतम् ॥१॥
एह देवा मयोभुवा दस्रा हिरण्यवर्त्तनी। उषर्बुधो वहन्तु सोमपीतये ॥२॥
यावित्था श्लोकमा दिवो ज्योतिर्जनाय चक्रथुः। आ न ऊर्ज वहतमश्विना युवम् ॥३॥
*aśvinā vartirasmadā gomaddasrā hiraṇyavat / arvāgrathaṁ samanasā ni yachchhatam //1 //*
*eha devā mayobhuvā dasrā hiraṇyavarttanī / uṣarbudho vahantu somapītaye //2 //*
*yāvitthā ślokamā divo jyotirjanāya chakrathuḥ / ā na ūrja vahatamaśvinā yuvam //3 //*

४. इन्द्रः (Indraḥ) - ऋ. (Rv.) १.८०.१-१६; १.८१.१-९; १.८२.१-६; १.८३.१-६; १.८४.१-२०; सा. (Sv.) १७९; २४७; ३४४; ३४७; ४०९; ४१६; ४२३; ४२४; ९१३-९१५; ९४९-९५१; १००२-१००७; १०२८-१०३०; १३४१-१३४३; १७२३-१७२४

ऋ. (Rv.) १.८०.१-१६

इत्था हि सोम इन्मदे ब्रह्म चकार वर्धनम् ।
शविष्ठ वज्रिन्नोजसा पृथिव्या निः शशा अहिमर्चन्ननु स्वराज्यम् ॥१॥
स त्वामदद्वृषा मदः सोमः श्येनाभृतः सुतः ।
येना वृत्रं निदद्भ्यो जघन्थ वज्रिन्नोजसार्चन्ननु स्वराज्यम् ॥२॥
प्रेह्यभीहि धृष्णुहि न ते वज्रो नि यंसते ।
इन्द्र नृम्णं हि ते शवो हनो वृत्रं जया अपोऽर्चन्ननु स्वराज्यम् ॥३॥
निरिन्द्र भूम्या अधि वृत्रं जघन्थ निर्दिवः ।
सृजा मरुत्वतीरव जीवधन्या इमा अपोऽर्चन्ननु स्वराज्यम् ॥४॥
इन्द्रो वृत्रस्य दोधतः सानु वज्रेण हीळितः ।
अभिक्रम्याव जिघ्नतेऽपः सर्माय चोदयन्नर्चन्ननु स्वराज्यम् ॥५॥
अधि सानौ नि जिघ्नते वज्रेण शतपर्वणा ।
मन्दान इन्द्रो अन्धसः सखिभ्यो गातुमिच्छत्यर्चन्ननु स्वराज्यम् ॥६॥
इन्द्र तुभ्यमिदद्रिवोऽनुत्तं वज्रिन्वीर्यम् ।
यद्ध त्यं मायिनं मृगं तमु त्वं माययावधीरर्चन्ननु स्वराज्यम् ॥७॥
वि ते वज्रासो अस्थिरन्नवतिं नाव्या३अनु ।
महत्त इन्द्र वीर्यं बाह्वोस्ते बलं हितमर्चन्ननु स्वराज्यम् ॥८॥
सहस्रं साकमर्चत परि ष्टोभत विंशतिः ।
शतैनमन्वनोनवुरिन्द्राय ब्रह्मोद्यतमर्चन्ननु स्वराज्यम् ॥९॥
इन्द्रो वृत्रस्य तविषीं निहन्त्सहसा सहः ।
महत्तदस्य पौंस्यं वृत्रं जघन्वाँ असृजदर्चन्ननु स्वराज्यम् ॥१०॥
इमे चित्तव मन्यवे वेपेते भियसा मही ।

यदिन्द्र वज्रिन्नोजसा वृत्रं मरुत्वाँ अवधीरर्चन्ननु स्वराज्यम् ॥११॥
न वेपसा न तन्यतेन्द्रं वृत्रो वि बीभयत् ।
अभ्येनं वज्र आयसः सहस्रभृष्टिरायतार्चन्ननु स्वराज्यम् ॥१२॥
यद्वृत्रं तव चाशनिं वज्रेण समयोधयः ।
अहिमिन्द्र जिघांसतो दिवि ते बद्बधे शवोऽर्चन्ननु स्वराज्यम् ॥१३॥
अभिष्टने ते अद्रिवो यत्स्था जगच्च रेजते ।
त्वष्टा चित्तव मन्यव इन्द्र वेविज्यते भियार्चन्ननु स्वराज्यम् ॥१४॥
नहि नु यादधीमसीन्द्रं को वीर्या परः ।
तस्मिन्नृम्णमुत क्रतुं देवा ओजांसि सं दधुरर्चन्ननु स्वराज्यम् ॥१५॥
यामथर्वा मनुष्पिता दध्यङ् धियमत्नत ।
तस्मिन्ब्रह्माणि पूर्वथेन्द्र उक्था समग्मतार्चन्ननु स्वराज्यम् ॥१६॥

*itthā hi soma inmade brahma chakāra vardhanam /*
*śaviṣṭha vajrinnojasā pṛthivyā niḥ śaśā ahimarchannanu svarājyam //1 //*
*sa tvāmadadvṛṣā madaḥ somaḥ śyenābhṛtaḥ sutaḥ /*
*yenā vṛtraṁ nidadbhyo jaghantha vajrinnojasārchannanu svarājyam //2 //*
*prehyabhīhi dhṛṣṇuhi na te vajro ni yaṁsate /*
*indra nṛmṇaṁ hi te śavo hano vṛtraṁ jayā apo'rchannanu svarājyam //3 //*
*nirindra bhūmyā adhi vṛtraṁ jaghantha nirdivaḥ /*
*sṛjā marutvatīrava jīvadhanyā imā apo'rchannanu svarājyam //4 //*
*indro vṛtrasya dodhataḥ sānu vajreṇa hīḻitaḥ /*
*abhikramyāva jighnate'paḥ sarmāya chodayannarchannanu svarājyam //5 //*
*adhi sānau ni jighnate vajreṇa śataparvaṇā /*
*mandāna indro andhasaḥ sakhibhyo gātumichchhatyarchannanu svarājyam //6 //*
*indra tubhyamidadrivo'nuttaṁ vajrinvīryam /*
*yaddha tyaṁ māyinaṁ mṛgaṁ tamu tvaṁ māyayāvadhīrarchannanu svarājyam //7 //*
*vi te vajrāso asthirannavatiṁ nāvyā3anu /*
*mahatta indra vīrya bāhnoste balaṁ hitamarchannanu svarājyam //8 //*
*sahasraṁ sākamarchata pari ṣṭobhata viṁśatiḥ /*
*śatainamanvanonavurindrāya brahmodyatamarchannanu svarājyam //9 //*
*indro vṛtrasya taviṣīṁ nihantsahasā sahaḥ /*
*mahattadasya pauṁsyaṁ vṛtraṁ jaghanvāṁ̐ asṛjadarchannanu svarājyam //10 //*
*ime chittava manyave vepete bhiyasā mahī /*
*yadindra vajrinnojasā vṛtraṁ marutvāṁ̐ avadhīrarchannanu svarājyam //11 //*
*na vepasā na tanyatendraṁ vṛtreā vi bībhayat /*
*abhyenaṁ vajra āyasaḥ sahasrabhṛṣṭirāyatārchannanu svarājyam //12 //*
*yadvṛtraṁ tava chāśaniṁ vajreṇa samayodhayaḥ /*
*ahimindra jighāṁsato divi te badbadhe śavo'rchannanu svarājyam //13 //*
*abhiṣṭane te adrivo yatsthā jagachcha rejate /*
*tvaṣṭā chittava manyava indra vevijyate bhiyārchannanu svarājyam //14 //*
*nahi nu yādadhīmasīndraṁ ko vīryā paraḥ /*
*tasminnṛmṇamuta kratuṁ devā Ojāṁsi saṁ dadhurarchannanu svarājyam //15 //*
*yāmatharvā manuṣpitā dadhyaṅ dhiyamatnata /*
*tasminbrahmāṇi pūrvathendra ukthā samagmatārchannanu svarājyam //16 //*

ऋ. (Rv.) १.८१.१-९

इन्द्रो मदाय वावृधे शवसे वृत्रहा नृभिः ।
तमिन्महत्स्वाजिषूतेमर्भे हवामहे स वाजेषु प्र नोऽविषत् ॥१॥
असि हि वीर सेन्योऽसि भूरि परादादिः ।
असि दभ्रस्य चिद्वृधो यजमानाय शिक्षसि सुन्वते भूरि ते वसु ॥२॥

यदुदीरत आजयो धृष्णवे धीयते धना ।
युक्ष्वा मदच्युता हरी कं हनः कं वसौ दधेऽस्माँ इन्द्र वसौ दधः ॥३॥
क्रत्वा महाँ अनुष्वधं भीम आ वावृधे शवः ।
श्रिय ऋष्व उपाकयोर्नि शिप्री हरिवान्दधे हस्तयोर्वज्रमायसम् ॥४॥
आ पप्रौ पार्थिवं रजो बद्बधे रोचना दिवि ।
न त्वावाँ इन्द्र कश्चन न जातो न जनिष्यतेऽति विश्वं ववक्षिथ ॥५॥
यो अर्यो मर्तभोजनं पराददाति दाशुषे ।
इन्द्रो अस्मभ्यं शिक्षतु वि भजा भूरि ते वसु भक्षीय तव राधसः ॥६॥
मदेमदे हि नो ददिर्यूथा गवामृजुक्रतुः
सं गृभाय पुरू शतोभयाहस्त्या वसु शिशीहि राय आ भर ॥७॥
मादयस्व सुते सचा शवसे शूर राधसे ।
विद्मा हि त्वा पुरूवसुमुप कामान्त्ससृज्महेऽथा नोऽविता भव ॥८॥
एते त इन्द्र जन्तवो विश्वं पुष्यन्ति वार्यम् ।
अन्तर्हि खयो जनानामर्यो वेदो अदाशुषां तेषों नो वेद आ भर ॥९॥

*indro madāya vāvṛdhe śavase vṛtrahā nṛbhiḥ ।*
*taminmahatsvājiṣūtemarbhe havāmahe sa vājeṣu pra no'viṣat ॥1॥*
*asi hi vīra senyo'si bhūri parādadiḥ ।*
*asi dabhrasya chidvṛdho yajamānāya śikṣasi sunvate bhūri te vasu ॥2॥*
*yadudīrata ājayo dhṛṣṇave dhīyate dhanā ।*
*yukṣavā madachyutā harī kaṁ hanaḥ kaṁ vasau dadhe'smām̐ indra vasau dadhaḥ ॥3॥*
*kratvā mahām̐ anuṣvadhaṁ bhīma ā vāvṛdhe śavaḥ ।*
*śriya ṛṣva upākayorni śigrī harivāndadhe hastayorvajramāyasam ॥4॥*
*ā paprau pārthivaṁ rajo badbadhe rochanā divi ।*
*na tvāvām̐ indra kaśchana na jāto na janiṣyate'ti viśvaṁ vavakṣitha ॥5॥*
*yo aryo martabhojanaṁ parādadāti dāśuṣe ।*
*indro asmabhyaṁ śikṣatu vi bhajā bhūri te vasu bhakṣīya tava rādhasaḥ ॥6॥*
*mademade hi no dadiryūthā gavāmṛjukratuḥ*
*saṁ gṛbhāya purū śatobhayāhastyā vasu śiśīhi rāya ā bhara ॥7॥*
*mādayasva sute sachā śavase śūra rādhase ।*
*vidmā hi tvā purūvasumupa kāmāntsasṛjmahe'thā no'vitā bhava ॥8॥*
*ete ta indra jantavo viśvaṁ puṣyanti vāryam ।*
*antarhi khayo janānāmaryo vedo adāśuṣāṁ teṣoṁ no veda ā bhara ॥9॥*

ऋ. (Rv.) १.८२.१-६

उपो शु श्रृणुहि गिरो मघवन्मातथा इव ।
यदा नः सूनृतावतः कर आदर्थयास इद्योजा न्विन्दं ते हरी ॥१॥
अक्षन्नमीमदन्त ह्यव प्रिया अधूषत ।
अस्तोषत स्वभानवो विप्रा नविष्ठया मती योजा न्विन्द्र ते हरी ॥२॥
सुसंदृशं त्वा वयं मघवन्वन्दिशीमहि ।
प्र नूनं पूर्णवन्धुरः स्तुतो याहि वशाँ अनु योजा न्विन्द्र ते हरी ॥३॥
स घा तं वृषणं रथमधि तिष्ठाति गोविदम् ।
यः पात्रं हरियोजनं पूर्णमिन्द्र चिकेतति योजा न्विन्द्र ते हरी ॥४॥
युक्तस्ते अस्तु दक्षिण उत सव्यः शतक्रतो ।
तेन जायामुप प्रियां मन्दानो याह्यन्धसो योजा न्विन्द्र ते हरी ॥५॥
युनज्मि ते ब्रह्मणा केशिना हरी उप प्र याहि दधिषे गभस्त्योः ।
उत्त्वा सुतासो रभसा अमन्दिषुः पूषण्वान्वज्रिन्समु पत्न्यामदः ॥६॥

*upo śu śṛṇuhi giro maghavanmātathā iva ।*

*yadā naḥ sūnṛtāvataḥ kara ādarthayāsa idyojā nvindaṁ te harī //1 //*
*akṣannamīmadanta hyava priyā adhūṣata /*
*astoṣata svabhānavo viprā naviṣṭhayā matī yojā nvindra te harī //2 //*
*susaṁdṛśaṁ tvā vayaṁ maghavanvandiśīmahi /*
*pra nūnaṁ pūrṇavandhuraḥ stuto yāhi vaśām̐ anu yojā nvindra te harī //3 //*
*sa ghā taṁ vṛṣaṇaṁ rathamadhi tiṣṭhāti govidam /*
*yaḥ pātraṁ hariyojanaṁ pūrṇamindra chiketati yojā nvindra te harī //4 //*
*yuktaste astu dakṣiṇa uta savyaḥ śatakrato /*
*tena jāyāmupa priyāṁ mandāno yāhyandhaso yojā nvindra te harī //5 //*
*yunajmi te brahmaṇā keśinā harī upa pra yāhi dadhiṣe gabhastyoḥ /*
*uttvā sutāso rabhasā amandiṣuḥ pūṣaṇvānvajrinsamu patnyāmadaḥ //6 //*

ऋ. (Rv.) १.८३.१-६

अश्वावति प्रथमो गोषु गच्छति सुप्रावीरिन्द्र मर्त्यस्त्वोतिभिः ।
तमित्पृणक्षि वसुना भवीयसा सिन्धुमापो यथाभितो विचेतसः ॥१॥
आपो न देवीरुप यन्ति होत्रियमवः पश्यन्ति विततं यथा रजः ।
प्राचैर्देवासः प्र णयन्ति देवयुं ब्रह्मप्रियं जोषयन्ते वरा इव ॥२॥
अधि द्वयोरदधा उक्थ्यं१वचो यतस्रुचा मिथुना या सपर्यतः ।
असंयत्तो व्रते ते क्षेति पुष्यति भद्रा शक्तिर्यजमानाय सुन्वते ॥३॥
आदंगिराः प्रथमं दधिरे वय इद्धाग्नयः शम्या ये सुकृत्यया ।
सर्व पणेः समविन्दन्त भोजनमश्वावन्तं गोमन्तमा पशुं नरः ॥४॥
यौरथर्वा प्रथमः पथस्तते ततः सूर्यो व्रतपा वेन आजनि ।
आ गा आजदुशना काव्यः सचा यमस्य जातममृतं यजामहे ॥५॥
बर्हिर्वा यत्स्वपत्याय वृज्यतेऽर्को वा श्लोकमाघोषते दिवि ।
ग्रावा यत्र वदति कारुरुक्थ्य१स्तस्येदिन्द्रो अभिपित्वेषु रण्यति ॥६॥

*aśvāvati prathamo goṣu gachchhati suprāvīrindra martyastvotibhiḥ /*
*tamitpṛṇakṣi vasunā bhavīyasā sindhumāpo yathābhito vichetasaḥ //1 //*
*āpo na devīrupa yanti hotriyamavaḥ paśyanti vitataṁ yathā rajaḥ /*
*prāchairdevāsaḥ pra ṇayanti devayuṁ brahmapriyaṁ joṣayante varā iva //2 //*
*adhi dvayoradadhā ukthyaṁ1vacho yatasruchā mithunā yā saparyataḥ /*
*asaṁyatto vrate te kṣeti puṣyati bhadrā śaktiryajamānāya sunvate //3 //*
*ādaṁgiārāḥ prathamaṁ dadhire vaya iddhāgnayaḥ śamyā ye sukṛtyayā /*
*sarva paṇeḥ samavindanta bheājanamaśvāvantaṁ gomantamā paśuṁ naraḥ //4 //*
*yauratharvā prathamaḥ pathastate tataḥ sūryo vratapā vena ājani /*
*ā gā ājaduśanā kāvyaḥ sachā yamasya jātamamṛtaṁ yajāmahe //5 //*
*barhirvā yatsvapatyāya vṛjyate'rko vā ślokamāghoṣate divi /*
*grāvā yatra vadati kārurukthya1stasyedindro abhipitveṣu raṇyati //6 //*

ऋ. (Rv.) १.८४.१-२०

असावि सोम इन्द्र ते शविष्ठ धृष्णवा गहि ।
आ त्वा पृणक्तिवन्द्रियं रजः सूर्यो न रश्मिमिः ॥१॥
इन्द्रमिद्धरी वहतोऽप्रतिधृष्टशवसम् । ऋषीणां च स्तुतीरुप यां च मानुषाणाम् ॥२॥
आ तिष्ठ वृत्रहन्नथं युक्ता ते ब्रह्मणा हरी। अर्वाचीनं सु ते मनो ग्रावा कृणोतु वग्नुना ॥३॥
इममिन्द्र सुतं पिब ज्येष्ठममर्त्य मदम् । शुक्रस्य त्वाभ्यक्षरन्धारा ऋतस्य सादने ॥४॥
इन्द्राय नूनमर्चतोक्थानि च ब्रवीतन् । सुता अमत्सुरिन्दवो ज्येष्ठं नमस्यता सहः ॥५॥
नकिष्टवद्रथीतरो हरी यदिन्द्र यच्छसे । नकिष्ट्वानु मज्मना नाकिः स्वश्व आनशे ॥६॥
य एक इद्विदयते वसु मर्ताय दाशुषे । ईशानो अप्रतिष्कुत इन्द्रो अंग ॥७॥
कदा मर्तमराधसं पदा क्षुम्पमिव स्फुरत् । कदा नः शुश्रवद् गिर इन्द्रो अंग ॥८॥
यश्चिद्धि त्वा बहुभ्य आ सुतावाँ आविवासति। उग्रं तत्पत्यते शव इन्द्रो अंग ॥९॥
सवदोरित्था विषूवतो मध्वः पिबन्ति गौर्यः ।

या इन्द्रेण सयावरीवृषणा मदन्ति शोभसे वस्वीरनु स्वराज्यम् ॥१०॥
ता अस्य पृशनायुवः सोमं श्रीणन्ति पृश्नयः ।
प्रिया इन्द्रस्य धेनवो वज्रं हिन्वन्ति सायकं वस्वीरनु स्वराज्यम् ॥११॥
ता अस्य नमसा सहः सपर्यन्ति प्रचेतसः ।
व्रतान्यस्य सश्चिरे पुरूणि पूर्वचित्तये वस्वीरनु स्वराज्यम् ॥१२॥
इन्द्रो दधीचो अस्थभिवृत्राण्यप्रतिष्कुतः। जघान नवतीर्नव ॥१३॥
इच्छन्नश्वस्य यच्छिरः पर्वतेष्वपश्रितम्। तद्विदच्छर्यणावति ॥१४॥
अत्राह गोरमन्वत नाम त्वष्टुरपीच्यम् । इत्था चन्द्रमसो गृहे ॥१५॥
को अद्य युङ्क्ते धुरि गा ऋतस्य शिमीवतो भामिनो दुर्हृणायून् ।
आसन्निषून्हृत्स्वसो मयोभून्य एषां भृत्यामृणधत्स जीवात् ॥१६॥
क ईषते तुजयते को बिभाय को मंसते सन्तमिन्द्रं को अन्ति ।
कस्तोकाय क इभायोत रायेऽधि ब्रवत्तन्वे३ को जनाय ॥१७॥
को अग्निमीट्टे हविषा घृतेन स्रुचा यजाता ऋतुभिर्ध्रुवेभिः ।
कस्मै देवा आ वहानाशु होम को मंसते वीतिहोत्रः सुदेवः ॥१८॥
त्वमंग प्र शंसिषो देवः शविष्ठ मर्त्यम् । न त्वदन्यो मधवन्नस्ति मर्डितेन्द्र ब्रवीमि ते वचः ॥१९॥
मा ते राधांसि मा त ऊतयो वसोऽस्मान्कदा चना दभन् ।
विश्वा च न उपमिमीहि मानुष वसूनि चर्षणिभ्य आ ॥२०॥
*asāvi soma indra te śaviṣṭha dhṛṣṇavā gahi /*
*ā tvā pṛṇaktivandriyaṁ rajaḥ sūryo na raśmimiḥ //1 //*
*indramiddharī vahato'pratidhṛṣṭaśavasam /*
*ṛṣīṇāṁ cha stutīrupa yāṁ cha mānuṣāṇām //2 //*
*ā tiṣṭha vṛtrahannathaṁ yuktā te brahmaṇā harī /*
*arvāchīnaṁ su te mano grrāvā kṛṇotu vagnunā //3 //*
*imamindra sutaṁ piba jyeṣṭhamamartya madam /*
*śukrasya tvābhyakṣarandhārā ṛtasya sādane //4 //*
*indrāya nūnamarchatokthāni cha bravītan /*
*sutā amatsurindavo jyeṣṭhaṁ namasyatā sahaḥ //5 //*
*nakiṣṭvadrathītaro harī yadindra yachchhase /*
*nakiṣṭvānu majmanā nākiḥ svaśva ānaśe //6 //*
*ya eka idvidayate vasu martāya dāśuṣe / īśāno apratiṣkuta indro aṁga //7 //*
*kadā martamarādhasaṁ padā kṣumpamiva sphurat /*
*kadā naḥ śuśravad gira indro aṁga //8 //*
*yaśchiddhi tvā bahubhya ā sutāvām̐ āvivāsati / ugraṁ tatpatyate śava indro aṁga //9 //*
*savadoritthā viṣūvato madhvaḥ pibanti gauryaḥ /*
*yā indreṇa sayāvarīvṛṣaṇā madanti śobhase vasvīranu svarājyam //10 //*
*tā asya pṛśanāyuvaḥ somaṁ śrīṇanti pṛśnayaḥ /*
*priyā indrasya dhenavo vajraṁ hinvanti sāyakaṁ vasvīranu svarājyam //11 //*
*tā asya namasā sahaḥ saparyanti prachetasaḥ /*
*vratānyasya saśchire purūṇi pūrvachittaye vasvīranu svarājyam //12 //*
*indro dadhīcho asthabhivṛtrāṇyapratiṣkutaḥ / jaghāna navatīrnava //13 //*
*ichchhannaśvasya yachchhiraḥ parvateṣvapaśritam / tadvidachchharyaṇāvati //14 //*
*atrāha goramanvata nāma tvaṣṭurapīchyam / itthā chandramaso gṛhe //15 //*
*ko adya yuṅkte dhuri gā ṛtasya śimīvato bhāmino durhṛṇāyūn /*
*āsanniṣūnhṛtsvaso mayobhūnya eṣāṁ bhṛtyāmṛṇadhatsa jīvāt //16 //*
*ka īṣate tujayate ko bibhāya ko maṁsate santamindraṁ ko anti /*
*kastokāya ka ibhāyota rāye'dhi bravattanve3 ko janāya //17 //*
*ko agnimīṭṭe haviṣā ghṛtena sruchā yajātā ṛtubhirdhruvebhiḥ /*
*kasmai devā ā vahānāśu homa ko maṁsate vītihotraḥ sudevaḥ //18 //*

*tvamaṁga pra śaṁsiṣo devaḥ śaviṣṭha martyam ।*
*na tvadanyo madhavannasti marḍitendra bravīmi te vachaḥ ॥19 ॥*
*mā te rādhāṁsi mā ta ūtayo vaso'smānkadā chanā dabhan ।*
*viśvā cha na upamimīhi mānuṣa vasūni charṣaṇibhya ā ॥20 ॥*

सा. (Sv.) १७९

इन्द्रो दधीचो अस्थभिर्वृत्राण्यप्रतिष्कुतः । जघान नवतीर्नव ॥५॥
*indro dadhīcho asthabhirvṛtrāṇyapratiṣkutaḥ । jaghāna navatīrnava ॥5 ॥*

सा. (Sv.) २४७

त्वमंग प्र शंसिषो देवः शविष्ठ मर्त्यम् । न त्वदन्यो मघवन्नस्ति मर्डितेन्द्र ब्रवीमि ते वचः ॥५॥
*tchamaṁga pra śaṁsiṣo devaḥ śaviṣṭha martyam ।*
*na tvadanyeā maghavannasti marḍitendra bravīmi te vachaḥ ॥5 ॥*

सा. (Sv.) ३४४

इममिन्द्र सुतं पिब ज्येष्ठममर्त्य मदम् । शुक्रस्य त्वाभ्यक्षरन्धारा ऋतस्य सादने ॥३॥
*imamindra sutaṁ piba jyeṣṭhamamartya madam ।*
*śukrasya tvābhyakṣarandhārā ṛtasya sādane ॥3 ॥*

सा. (Sv.) ३४७

असावि सोम इन्द्र ते शविष्ठ धृष्णवा गहि । आ त्वा पृणक्त्विन्द्रियं रजः सूर्यो न रश्मिभिः ।६ ।
*asāvi soma indra te śaviṣṭha dhṛṣṇavā gahi ।*
*ā tvā pṛṇaktvindriyaṁ rajaḥ sūryo na raśmibhiḥ ।6 ।*

सा. (Sv.) ४०९

स्वादोरित्था विषूवतो मधोः पिबन्ति गौर्यः ।
या इन्द्रेण सयावरीर्वृष्णा मदन्ति शोभथा वस्वीरनु स्वराज्यम् ॥१॥
*svādoritthā viṣūvato madhoḥ pibanti gauryaḥ ।*
*yā indreṇa sayāvarīrvṛṣṇā madanti śobhathā vasvīranu svarājyam ॥1 ॥*

सा. (Sv.) ४१६

उपो षु श्रृणुही गिरो मघवन्मातथा इव ।
कदा नः सूनृतावतः कर इदर्थयास इद्योजा न्विन्द्र ते हरी ॥८॥
*upo ṣu śṛṇuhī giro maghavanmātathā iva ।*
*kadā naḥ sūnṛtāvataḥ kara idarthayāsa idyojā nvindra te harī ॥8 ॥*

सा. (Sv.) ४२३-२४

क्रतवा महाँ अनुष्वधं भीम आ वावृते शवः ।
श्रिय ऋष्व उपाकयोर्नि शिप्री हरिवान् दधे हस्त्योर्वज्रमायसम् ॥५॥
स घा तं वृषण रथमधि तिष्ठाति गोविदम् ।
यः पात्रं हारियोजनं पूर्णमिन्द्र चिकेतति योजा न्विन्द्र ते हरी ॥६॥
*kratavā mahām̐ anuṣvadhaṁ bhīma ā vāvṛte śavaḥ ।*
*śriya ṛṣva upākayorni śiprī harivān dadhe hastyorvajramāyasam ॥5 ॥*
*sa ghā taṁ vṛṣaṇa rathamaghi tiṣṭhāti govidam ।*
*yaḥ pātraṁ hāriyojanaṁ pūrṇamindra chiketati yojā nvindra te harī ॥6 ॥*

सा. (Sv.) ९१३-९१५

इन्द्रो दधीचो अस्थभिर्वृत्राण्यप्रतिष्कुतः । जघान नवतीर्नव ॥१॥
इच्छन्नश्वस्य यच्छिरः पर्वतेष्वपश्रितम् । तद्विदच्छर्यणावति ॥२॥
अत्राह गोरमन्वत नाम त्वष्टुरपीच्यम् । इत्था चन्द्रमसो गृहे ॥३॥
*indro dadhīcho asthabhirvṛtrāṇyapratiṣkutaḥ । jaghāna navatīrnava ॥1 ॥*
*ichchhannaśvasya yachchhiraḥ parvateṣvapaśritam । tadvidachchharyaṇāvati ॥2 ॥*
*atrāha goramanvata nāma tvaṣṭurapīchyam । itthā chandramaso gṛhe ॥3 ॥*

सा. (Sv.) ९४९-९५१

इममिन्द्र सुतं पिब ज्येष्ठममर्त्य मदम् । शुक्रस्य त्वाभ्यक्षरन्धारा ऋतस्य सादने ॥१॥

न किष्ट्वद्रथीतरो हरी यदिन्द्र यच्छसे। न मिष्ट्वानु मज्मना न किः स्वश्व आनशे ॥२॥
इन्द्राय नूनमर्चतोक्थानि च ब्रवीतन। सुता अमत्सुरिन्दवो ज्येष्ठं नमस्यता सहः ॥३॥
*imamindra sutaṁ piba jyeṣṭhamamartya madam |*
*śukrasya tvābhyakṣarandhārā ṛtasya sādane ||1 ||*
*na kiṣṭvadrathītaro harī yadindra yachchhase |*
*na miṣṭvānu majmanā na kiḥ svaśva ānaśe ||2 ||*
*indrāya nūnamarchatokthāni cha bravītana |*
*sutā amatsurindavo jyeṣṭhaṁ namasyatā sahaḥ ||3 ||*

सा. (Sv.) १००श्-१००७

इन्द्रो मदाय वावृधे शवसे वृत्रहा नृभिः ।
तामिन्महत्स्वाजिषूतिमर्भे हवामहे स वाजेषु प्र नोऽविषत् ॥१॥
असि हि वीर सेन्योऽसि भूरि परादादिः ।
असि दभ्रस्य चिद्धृधो यजमानाय शिक्षसि सुन्वते भूरि ते वसु ॥२॥
यदुदीरत आजयो धृष्णवे धीयते धनम् ।
युङ्क्ष्वा मदच्युता हरी कं हनः कं वसौ दधोऽस्माँ इन्द्र वसौ दधः ॥३॥
स्वादोरित्था विषूवतो मधोः पिबन्ति गौर्यः ।
या इन्द्रेण सयावरीर्वृष्णा मदन्ति शोभथा वस्वीरनु स्वराज्यम् ॥१॥
ता अस्य पृशनायुवः सोमं श्रीणन्ति पृश्नयः ।
प्रिया इन्द्रस्य धेनवो वज्रं हिन्वन्ति सायकं वस्वीरनु स्वराज्यम् ॥२॥
ता अस्य नमसा सहः सपर्यन्ति प्रचेतसः ।
व्रतान्यस्य सश्चिरे पुरूणि पूर्वचित्तये वस्वीरनु स्वराज्यम् ॥३॥
*indro madāya vāvṛdhe śavase vṛtrahā nṛbhiḥ |*
*tāminmahatsvājiṣūtimarbhe havāmahe sa vājeṣu pra no'viṣat ||1 ||*
*asi hi vīra senyo'si bhūri parādadiḥ |*
*asi dabhrasya chiddhṛdho yajamānāya śikṣasi sunvate bhūri te vasu ||2 ||*
*yadudīrata ājayo dhṛṣṇave dhīyate dhanam |*
*yuṅkṣavā madachyutā harī kaṁ hanaḥ kaṁ vasau dadho'smām̐ indra vasau dadhaḥ ||3 ||*
*svādoritthā viṣūvato madhoḥ pibanti gauryaḥ |*
*yā indreṇa sayāvarīrvṛṣṇā madanti śobhathā vasvīranu svarājyam ||1 ||*
*tā asya pṛśanāyuvaḥ somaṁ śrīṇanti pṛśnayaḥ |*
*priyā indrasya dhenavo vajraṁ hinvanti sāyakaṁ vasvīranu svarājyam ||2 ||*
*tā asya namasā sahaḥ saparyanti prachetasaḥ |*
*vratānyasya saśchire purūṇi pūrvachittaye vasvīranu svarājyam ||3 ||*

सा. (Sv.) १०२८-१०३०

असावि सोम इन्द्र ते शविष्ठ धृष्णवा गहि। आत्वा पृणक्त्विन्द्रियं रजः सूर्यो न रश्मिभिः ॥१॥
आ तिष्ठ वृत्रहन्रथं युक्ता ते ब्रह्मणा हरी। अर्वाचीनं सु ते मनो ग्रावा कृणोतु वग्नुना ॥२॥
इन्द्रमिद्धरी वहतोऽप्रतिधृष्टशवसम् । ऋषीणां सुष्टुतीरुप यां च मानुषाणाम् ॥३॥
*asāvi soma indra te śaviṣṭha dhṛṣṇavā gahi |*
*ātvā pṛṇaktvindriyaṁ rajaḥ sūryo na raśmibhiḥ ||1 ||*
*ā tiṣṭha vṛtrahanrathaṁ yuktā te brahmaṇā harī |*
*arvāchīnaṁ su te mano grāvā kṛṇotu vagnunā ||2 ||*
*indramiddharī vahato'pratidhṛṣṭaśavasam |*
*ṛṣīṇāṁ suṣṭutīrupa yāṁ cha mānuṣāṇām ||3 ||*

सा. (Sv.) १३४१-१३४३

य एक इद्विदयते वसु मर्ताय दाशुषे। ईशानो अप्रतिष्कुत इन्द्रो अंगः ॥१॥
यश्चिद्धि त्वा बहुभ्य आ सुतावाँ आविवासति। उग्रं तत्पत्यते शव इन्द्रो अंगः ॥२॥

कदा मर्तमराधसं पदा क्षुम्पमिव सफुरत्। कदा नः शुश्रवद्गिर इन्द्रो अंग ॥३॥
*ya eka idvidayate vasu martāya dāśuṣe I īśāno apratiṣkuta indro aṁgaḥ II1 II*
*yaśchiddhi tvā bahubhya ā sutāvām̐ āvivāsati I ugra tatpatyate śava indro aṁgaḥ II2 II*
*kadā martamarādhasaṁ padā kṣumpamiva saphurat I*
*kadā naḥ śuśravadgira indro aṁga II3 II*

सा. (Sv.) १७२३-१७२४

त्वमंग प्र शंसिषो देवः शविष्ठ मर्त्यम् । न त्वदन्यो मघवन्नस्ति मर्डितेन्द्र ब्रवीमि ते वचः। ॥१॥
मा ते राधांसि मा त ऊतयो वसोऽस्माकन्कदा चना दभन् ।
विश्वा च न उपमिमीहि मानुष वसूनि चर्षणिभ्य आ ॥२॥
*tvamaṁga pra śaṁsiṣo devaḥ śaviṣṭha martyam I*
*na tvadanyo maghavannasti marḍitendra bravīmi te vachaḥ I II1 II*
*mā te rādhāṁsi mā ta ūtayo vaso'smākankadā chanā dabhan I*
*viśvā cha na upamimīhi mānuṣa vasūni charṣaṇibhya ā II2 II*

५. इन्द्रः (साग्री. सास्वा. सार्षेदी.); इन्द्रापूषणौ (ऋसर्व. १.८४.१) (Indraḥ [Ssb. Sas. Sad.]; Indrāpūṣaṇau [Rss. 1.84.1) - सा. (Sv.) १४७

अत्राह गोरमन्वत नाम त्वष्टुरपीच्यम्। इत्था चन्द्रमसो गृहे ॥३॥
*atrāha goramanvata nāma tvaṣṭurapīchyam I itthā chandramaso gṛhe II3 II*

६. इन्द्रः (साग्री. सास्वा. सार्षेदी.); विश्वेदेवाः (ऋसर्व.१. ९०.१) - सा. (Sv.) २१८ (Indraḥ [Ssb. Sas. Sad.]; Viśvedevāḥ [Rss.1. 90.1]) - Sā. (Sv.) 218)

ऋजुनीती नो वरुणो मित्रो नयति विद्वान्। अर्यमा देवैः सजोषाः ॥५॥
*ṛjunītī no varuṇo mitro nayati vidvān I aryamā devaiḥ sajoṣāḥ II5 II*

७. उषा (Uṣā) - ऋ. (Rv.) १.९२.१-१८; सा. (Sv.) १७३१-३३; १७५५-५७;

ऋ. (Rv.) १.९२.१-१८

एता उ त्याउषसः केतुमक्रत पूर्वे अर्धे रजसो भानुमंजते ।
निष्कृण्वाना आयुधानीव धृष्णवः प्रति गावोऽरुषीर्यन्ति मातरः ॥१॥
उदपप्तन्नरुणा भानवो वृथा स्वायुजो अरुषीर्गा अयुक्षत ।
अक्रन्नुषासो वयुनानि पूर्वथा रुशन्तं भानुमरुषीरशिश्रयुः ॥२॥
अर्चन्ति नारीरपसो न विष्टिभिः समानेन योजनेना परावतः ।
इषं वहन्तीः सुकृते सदानवे विश्वेदह यजमानाय सुन्वते ॥३॥
अधि पेशंसि वपते नृतुरिवापोर्णुते वक्ष उस्रेव बर्जहम् ।
ज्योतिर्विश्वस्मै भुवनाय कुण्वती गावो न व्रजं व्युश्षा आवर्तमः ॥४॥
प्रत्यर्ची रुशदस्य अदर्शि वि तिष्ठते बाधते कृष्णमभ्वम् ।
स्वरुं न पेशो विदथेष्वंजिंचित्रं दिवो दुहिता भनुमश्रेत् ॥५॥
अतारिष्म तमसस्पपारमस्योषा उच्छन्ती वयुना कृणोति ।
श्रिये छन्दो न स्मयते विभाती सुप्रतीका सौमनसायाजीगः ॥६॥
भास्वती नेत्री सूनृतानां दिवः स्तवे दुहिता गोमेभिः ।
प्रजावतो नृवतो अश्वबुध्यानुषो गोअग्राँ उप मासि वाजान् ॥७॥
उषस्तमश्यां यशसं सुवीरं दासप्रवर्गं रयिमश्वबुध्यम् ।
सुदंससा श्रवसा या विभासि वाजप्रसूता सुभगे बृहन्तम् ॥८॥
विश्वानि देवी भुवनाभिचक्ष्या प्रतीची चक्षुरुर्बिया वि भाति ।
विश्वं जीवं चरसे बोधयन्ती विश्वस्य वाचमविदन्मनायोः ॥९॥
पुनः पुनर्जायमाना पुराणी समानं वर्णमभि शुम्भमाना ।
श्वघ्नीव कृत्नुर्विज आमिनाना मर्तस्य देवी जरयन्त्यायुः ॥१०॥
व्यूर्ण्वती दिवो अन्ताँ अबोध्यप स्वसारं सनुतर्युयोति ।
प्रमिनती मनुष्या युगानि योषा जारस्य चक्षसा वि भाति ॥११॥
पशून्न चित्रा सुभगा प्रथाना सिन्धुर्न क्षोद उर्विया व्यश्वैत् ।

अमिनती दैव्यानि व्रतानि सूर्यस्य चेति रश्मिभिर्दृशाना ॥१२॥
उषस्तच्चित्रमा भरामस्मभ्यं वाजिनीवति। येन तोकं च तनयं च धामहे ॥१३॥
उषो अद्येह गोमत्यश्वावति विभवरि। रेवदस्मे व्युच्छ सूनृतावति ॥१४॥
युक्ष्वा हि वाजिनीवत्यश्वाँ अद्यारुणाँ उषः। अथा नो विश्वा सौभगान्या वह ॥१५॥
अश्विना वर्तिरस्मदा गोमद्दस्रा हिरण्यवत्। अर्वाग्रथं समनसा नि यच्छतम् ॥१६॥
यावित्था श्लोकमा दिवो ज्योतिर्जनाय चक्रथुः। आ न ऊर्जं वहतमश्विना युवम् ॥१७॥
एह देवा मयोभुवा दस्रा हिरण्यवर्तनी। उषर्बुधो वहन्तु सोमपीतये ॥१८॥

*etā u tyāuṣasaḥ ketumakrata pūrve ardhe rajaso bhānumaṁjate /*
*niṣkṛṇvānā āyudhānīva dhṛṣṇavaḥ prati gāvo'ruṣīryanti mātaraḥ //1 //*
*udapaptannaruṇā bhānavo vṛthā svāyujo aruṣīrgā ayukṣata /*
*akrannuṣāso vayunāni pūrvathā ruśantaṁ bhānumaruṣīraśiśrayuḥ //2 //*
*archanti nārīrapaso na viṣṭibhiḥ samānena yojanenā parāvataḥ /*
*iṣaṁ vahantīḥ sukṛte sadānave viśvedaha yajamānāya sunvate //3 //*
*adhi peśaṁsi vapate nṛturivāporṇute vakṣa usreva barjaham /*
*jyotirviśvasmai bhuvanāya kuṇvatī gāvo na vrajaṁ vyu1ṣā āvartamaḥ //4 //*
*pratyarchī ruśadasya adarśi vi tiṣṭhate bādhate kṛṣṇamabhvam /*
*svaruṁ na peśo vidatheṣvaṁjiṁchatraṁ divo duhitā bhanumaśret //5 //*
*atāriṣma tamasaspapāramasyoṣā uchchhantī vayunā kṛṇoti /*
*śriye chhando na smayate vibhātī supratīkā saumanasāyājīgaḥ //6 //*
*bhāsvatī netrī sūnṛtānāṁ divaḥ stave duhitā gomebhiḥ /*
*prajāvato nṛvato aśvabudhyānuṣo goagrāṁ upa māsi vājān //7 //*
*uṣastamaśyāṁ yaśasaṁ suvīraṁ dāsapravarga rayimaśvabudhyam /*
*sudaṁsasā śravasā yā vibhāsi vājaprasūtā subhage bṛhantam //8 //*
*viśvāni devī bhuvanābhichakṣayā pratīchī chakṣururbiyā vi bhāti /*
*viśvaṁ jīvaṁ charase bodhayantī viśvasya vāchamavidanmanāyoḥ //9 //*
*punaḥ punarjāyamānā purāṇī samānaṁ varṇamabhi śumbhamānā /*
*śvadhnīva kṛtnurvija āminānā martasya devī jarayantyāyuḥ //10 //*
*vyūrṇvatī divo antāṁ abodhyapa svasāraṁ sanutaryuyoti /*
*praminatī manuṣyā yugāni yoṣā jārasya chakṣasā vi bhāti //11 //*
*paśūnna chitrā subhagā prathānā sindhurna kṣoda urviyā vyaśvait /*
*aminatī daivyāni vratāni sūryasya cheti raśmibhirdṛśānā //12 //*
*uṣastachchitramā bharāmasmabhyaṁ vājinīvati /*
*yena tokaṁ cha tanayaṁ cha dhāmahe //13 //*
*uṣo adyeha gomatyaśvāvati vibhavari / revadasme vyuchchha sūnṛtāvati //14 //*
*yukṣavā hi vājinīvatyaśvaṁ adyāruṇāṁ uṣaḥ / athā no viśvā saubhagānyā vaha //15 //*
*aśvinā vartirasmadā gomaddasrā hiraṇyavat /*
*arvāgrathaṁ samanasā ni yachchhatam //16 //*
*yāvitthā ślokamā divo jyotirjanāya chakrathuḥ /*
*ā na ūjaṁr vahatāmaśvinā yuvam //17 //*
*eha devā mayobhuvā dasrā hiraṇyavartanī / uṣarbudho vahantu somapītaye //18 //*

सा. (Sv.) १७३१-१७३३

उषस्तच्चित्रमा भरास्मभ्यं वाजिनीवति। येन तोकं च तनयं च धामहे ॥१॥
उषो अद्येह गोमत्यश्वावति विभावरि। रेवदस्मे व्युच्छ सूनृतावति ॥२॥
युंक्ष्वा हि वाजिनीवत्यश्वाँ अद्यारुणाँ उषः। अथा नो विश्वा सौभगान्या वह ॥३॥

*uṣastachchitramā bharāsmabhyaṁ vājinīvati /*
*yena tokaṁ cha tanayaṁ cha dhāmahe //1 //*
*uṣo adyeha gomatyaśvāvati vibhāvari / revadasme vyuchchha sūnṛtāvati //2 //*
*yuṁkṣavā hi vājinīvatyaśvāṁ adyāruṇāṁ uṣaḥ / athā no viśvā saubhagānyā vaha //3 //*

सा. (Sv.) १७५५-१७५७

एता उ त्या उषसः केतुमक्रत पूर्वे अर्धे रजसो भानुमंजते ।
निष्कृण्वाना आयुधानीव धृष्णवः प्रति गावोऽरुषीर्यन्ति मातरः ॥१॥
उदपप्तन्नरुणा भानवो वृथा स्वायुजो अरुषीर्गा अयुक्षत ।
अक्रन्नुषासो वयुनानि पूर्वथा रुशन्तं भानुमरुषीरशिश्रयुः ॥२॥
अर्चन्ति नारीरपसो न विष्टिभिः समानेन योजनेना परावतः ।
इषं वहन्तीः सुकृतो सुदानवे विश्वेदह यजमानाय सुन्वते ॥३॥

*etā u tyā uṣasaḥ ketumakrata pūrve ardhe rajaso bhānumaṁjate /*
*niṣkṛṇvānā āyudhānīva dhṛṣṇavaḥ prati gāvo'ruṣīryanti mātaraḥ //1 //*
*udapaptannaruṇā bhānavo vṛthā svāyujo aruṣīrgā ayukṣata /*
*akrannuṣāso vayunāni pūrvathā ruśantaṁ bhānumaruṣīraśiśrayuḥ //2 //*
*archanti nārīrapaso na viṣṭibhiḥ samānena yojanenā parāvataḥ /*
*iṣaṁ vahantīḥ sukṛto sudānave viśvedaha yajamānāya sunvate //3 //*

८. मरुतः (Marutaḥ) - ऋ. (Rv.) १.८५.१-२; १.८६.१-१०; १.८७.१-६; १.८८.१-६; सा. (Sv.) १५९४

ऋ. (Rv.) १.८५.१-२

प्र ये शम्भन्ते जनयो न सप्तयो यामन् रुद्रस्य सूनवः सुदंससः ।
रोदसी हि मरुतश्चक्रिरे वृधे मदन्ति वीरा विदथेषु घृष्वयः ॥१॥
त उक्षितासो महिमानसाशत दिवि रुद्रासो अधिचक्रिरे सदः ।
अर्चन्तो अर्क जनयन्त इन्द्रियमधि श्रियो दधिरे पृश्निमातरः ॥२॥

*pra ye śambhante janayo na saptayo yāman rudrasya sūnavaḥ sudaṁsasaḥ /*
*rodasī hi marutaśchakrire vṛdhe madanti vīrā vidatheṣu ghṛṣvayaḥ //1 //*
*ta ukṣitāso mahimānasāśata divi rudrāso adhichakrire sadaḥ /*
*archanto arka janayanta indriyamadhi śriyo dadhire pṛśnimātaraḥ //2 //*

ऋ. (Rv.) १.८६.१-१०

मरुतो यस्य हि क्षये पाथा दिवो विमहसः। स सुगोपातमो जनः ॥१॥
यौर्वा यावाहसो विप्रस्य वा मतीनाम्। मरुतः श्रृणुता हवम् ॥२॥
उत वा यस्य वाजिनोऽनु विप्रमतक्षत। स गन्ता गोमति व्रजे ॥३॥
अस्य वीरस्य बर्हिषि सुतः सोमो दिविष्टिषु। उक्थं मदश्च शस्यते ॥४॥
अस्य श्रोषन्त्वा भुवो विश्वा यश्चर्षणीरभि। सूरं चित्सस्रुषीरिषः ॥५॥
पूर्वीभिर्हि ददाशिम शरद्भिर्मरुतो वयम्। अवोभिश्चर्षणीनाम् ॥६॥
सुभगः स प्रयज्यवो मरुतो अस्तु मर्त्यः। यस्य प्रयांसि पर्षथ ॥७॥
शशमानस्य वा नरः स्वेदस्य सत्यशवसः। विदा कामस्य वेनतः ॥८॥
यूयं तत्सत्यशवस आविष्कर्त महित्वना। विध्यता विद्युता रक्षः ॥९॥
गूहता गुह्यं तमो वि यात विश्वमत्रिणम्। ज्योतिष्कर्ता यदुश्मसि ॥१०॥

*maruto yasya hi kṣaye pāthā divo vimahasaḥ / sa sugopātamo janaḥ //1 //*
*yaurvā yāvāhaso viprasya vā matīnām / marutaḥ śṛṇutā havam //2 //*
*uta vā yasya vājino'nu vipramatakṣata / sa gantā gomati vraje //3 //*
*asya vīrasya barhiṣi sutaḥ somo diviṣṭiṣu / ukthaṁ madaścha śasyate //4 //*
*asya śroṣantvā bhuvo viśvā yaścharṣaṇīrabhi / sūraṁ chitsasruṣīriṣaḥ //5 //*
*pūrvībhirhi dadāśima śaradbhirmaruto vayam / avobhiścharṣaṇīnām //6 //*
*subhagaḥ sa prayajyavo maruto astu martyaḥ / yasya prayāṁsi parṣatha //7 //*
*śaśamānasya vā naraḥ svedasya satyaśavasaḥ / vidā kāmasya venataḥ //8 //*
*yūyaṁ tatsatyaśavasa āviṣkarta mahitvanā / vidhyatā vidyutā rakṣaḥ //9 //*
*gūhatā guhyaṁ tamo vi yāta viśvamatriṇam / jyotiṣkartā yaduśmasi //10 //*

ऋ. (Rv.) १.८७.१-६

प्रत्वक्षसः प्रतवसो विरप्शिनोऽनानता अविथुरा ऋजीषिणः ।

जुष्टमासो नृतमासो अंजिभिर्व्यानज्रे कि चिदुस्रा इव स्तृभिः ॥१॥
उपह्वरेषु यदचिध्वं ययिं वय इव मरुतः केन चित्पथा ।
श्चोतन्ति कोशा उप वो रथेष्वा घृतमुक्षता मधुवर्णमर्चते ॥२॥
प्रैषमज्मेषु विथुरेव रेजते भूमिर्यामेषु यद्ध युंजते शुभे ।
ते क्रीळयो धुनयो भ्राजदृष्टयः स्वयं महित्वं पनयन्त धूतयः ॥३॥
स हि स्वसृत्पृषदश्वो युवा गणो३ऽया ईशानस्तविषीभिरावृतः ।
असि सत्य ऋणायावनेद्योऽस्या धियः प्राविताथा वृषा गणः ॥४॥
पितुः प्रत्नस्य जन्मना वदामसि जिह्वा प्र जिगाति चक्षसा ।
यदीमिन्द्रं शम्यृक्वाण आशतादिन्नामानि यियानि दधिरे ॥५॥
श्रियसे कं भानुभिः सं मिमिक्षिरे ते रश्मिभिस्त ऋक्वभिः सुखादयः ।
ते वाशीमन्त इष्मिणो अभीरवो विद्रे प्रियस्य मारुतस्य धाम्नः ॥६॥

*pratvakṣasaḥ pratavaso virapśino'nānatā avithurā ṛjīṣiṇaḥ /*
*juṣṭamāso nṛtamāso aiṁjabhirvyānajre ki chidusrā iva stṛbhiḥ //1 //*
*upahnareṣu yadachidhvaṁ yayiṁ vaya iva marutaḥ kena chitpathā /*
*śchotanti kośā upa vo ratheṣvā ghṛtamukṣatā madhuvarṇamarchate //2 //*
*praiṣamajmeṣu vithureva rejate bhūmiryāmeṣu yaddha yuṁjate śubhe /*
*te krīḷayo dhunayo bhrājadṛṣṭayaḥ svayaṁ mahitvaṁ panayanta dhūtayaḥ //3 //*
*sa hi svasṛtpṛṣadaśvo yuvā gaṇo3'yā īśānastaviṣībhirāvṛtaḥ /*
*asi satya ṛṇāyāvanedyo'syā dhiyaḥ prāvitāthā vṛṣā gaṇaḥ //4 //*
*pituḥ pratnasya janmanā vadāmasi jihnā pra jigāti chakṣasā /*
*yadīmindraṁ śamyṛkvāṇa āśatādinnāmāni yiāyāni dadhire //5 //*
*śriyase kaṁ bhānubhiḥ saṁ mimikṣire te raśmibhista ṛkvabhiḥ sukhādayaḥ /*
*te vāśīmanta iṣmiṇo abhīravo vidre priyasya mārutasya dhāmnaḥ //6 //*

ऋ. (Rv.) १.८८.१-६

आ विद्युन्मद्भिर्मरुतः स्वर्कै रथेभिर्यात ऋष्टिमद्भिरश्वपर्णैः ।
आ वर्षिष्ठया न इषा वयो न पप्तता सुमायाः ॥१॥
तेऽरुणेभिर्वरमा पिशंगैः शुभे कं यान्ति रथतूर्भिरश्वैः ।
रुक्मो न चित्रः स्वधितीवान्पव्या रथस्य जङ्घनन्त भूम ॥२॥
श्रिये कं वो अधि तनूषु वाशीर्मेधा वना न कृणवन्त ऊध्वा ।
युष्मभ्यं कं मरुतः सुजातास्तुविद्युम्नासो धनयन्ते अद्रिम् ॥३॥
अहानि गृध्राः पर्या व आगुरिमां धियं वाकार्या च देवीम् ।
ब्रह्म कृण्वन्तो गोतमासो अर्कैरूर्ध्वं नुनुद्र उत्सधिं पिबध्यै ॥४॥
एतत्त्यन्न योजनमचेति सस्वर्ह यन्मरुतो गोतमो वः ।
पश्यन् हिरण्यचक्रान्योदंष्ट्रान् विधातो वराहून् ॥५॥
एषा स्या वो मरुतोऽनुभर्त्री प्रति ष्टोभति वाघतो न वाणी ।
अस्तोभयद् वृथासामनु स्वधां गभस्त्योः ॥६॥

*ā vidyunmadbhirmarutaḥ svarkai rathebhiryāta ṛṣṭimadbhiraśvaparṇaiḥ /*
*ā varṣiṣṭhayā na iṣā vayo na paptatā sumāyāḥ //1 //*
*te'ruṇebhirvaramā piśaṁgaiḥ śubhe kaṁ yānti rathatūrbhiraśvaiḥ /*
*rukmo na chitraḥ svadhitīvānpavyā rathasya jaṅghananta bhūma //2 //*
*śriye kaṁ vo adhi tanūṣu vāśīrmedhā vanā na kṛṇavanta ūdhvā /*
*yuṣmabhyaṁ kaṁ marutaḥ sujātāstuvidyumnāso dhanayante adrim //3 //*
*ahāni gṛdhrāḥ paryā va āgurimāṁ dhiyaṁ vākāryā cha devīm /*
*brahma kṛṇvanto gotamāso arkairūrdhva nunudra utsadhiṁ pibadhyai //4 //*
*etattyanna yojanamacheti sasvarha yanmaruto gotamo vaḥ /*
*paśyan hiraṇyachakrānyodaṁṣṭrān vidhāto varāhūn //5 //*
*eṣā syā vo maruto'nubhartrī prati ṣṭobhati vāghato na vāṇī /*
*astobhayad vṛthāsāmanu svadhāṁ gabhastyoḥ //6 //*

सा. (Sv.) १५९४

शशमानस्य वा नरः स्वेदस्य सत्यशवसः। विदामाकस्य वेनतः ॥१॥

*śaśamānasya vā naraḥ svedasya satyaśavasaḥ / vidāmākasya venataḥ //1 //*

९. विश्वेदेवाः (Viśvedevāḥ) - ऋ. (Rv.) १.८९.१-१०; १.९०.१-९; सा. (Sv.) १८७४-१८७५

ऋ. (Rv.) १.८९.१-१०

आ नो भद्राः क्रतवो यन्तु विश्वतोऽदब्धासो अपरीतास उद्भिदः ।
देवा नो यथा सदमिद्वृधे असन्नप्रायुवो रक्षितारो दिवेदिवे ॥१॥
देवानां भद्रा सुमतिऋर्जूयतां देवानां रातिरभि नो नि वर्तताम् ।
देवानां सख्यमुप सेदिमा वयं देवा न आयुः प्र तिरन्तु जीवसे ॥२॥
तान्पूर्वया निविदा हूमहे वयं भगं मित्रमदितिं दक्षमस्रिधम् ।
अर्यमणं वरुणं सोममश्विना सरस्वती नः सुभगा मयस्करत् ॥३॥
तन्नो वातो मयोभु वातु भेषजं तन्माता पृथिवी तत्पिता द्यौः ।
तद्ग्रावाणः सोमसुतो मयोभुवस्तदश्विना शृणुतं धिष्ण्या युवम् ॥४॥
तमीशानं जगतस्तस्थुषस्पतिं धियंजिन्वमवसे हूमहे वयम् ।
पूषा नो यथा वेदसामसद् वृधे रक्षिता पायुरदब्धः स्वस्तये ॥५॥
स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्वदेवाः ।
स्वस्ति नस्ताक्षर्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ॥६॥
पृषदश्वा मरुतः पृश्निमातरः शुभंयावानो विदथेषु जग्मयः ।
अग्निजिह्वा मनवः सूरचक्षसो विश्वे नो देवा अवसा गमन्निह ॥७॥
भद्रं कर्णेभि शुणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः ।
स्थिरैरंगैस्तुष्टुवांसस्तनूभिर्व्यशेम देवहितं यदायुः ॥८॥
शतमिन्नु शरदो अन्ति देवा यत्रा नश्चक्रा जरसं तनूनाम् ।
पुत्रासो यत्र पितरो भवन्ति मा नो मध्या रीरिषतायुर्गन्तोः ॥९॥
अदितिर्द्यौरदितिरन्तरिक्षमदितिर्माता स पिता स पुत्रः ।
विश्वे देवा अदितिः पंच जना अदितिर्जातमदितिर्जनित्वम् ॥१०॥

*ā no bhadrāḥ kratavo yantu viśvato'dabdhāso aparītāsa udbhidaḥ /*
*devā no yathā sadamidvṛdhe asannaprāyuvo rakṣitāro divedive //1 //*
*devānāṁ bhadrā sumatirṛjūyatāṁ devānāṁ rātirabhi no ni vartatām /*
*devānāṁ sakhyamupa sedimā vayaṁ devā na āyuḥ pra tirantu jīvase //2 //*
*tānpūrvayā nividā hūmahe vayaṁ bhagaṁ mitramaditiṁ dakṣamasridham /*
*aryamaṇaṁ varuṇaṁ somamaśvinā sarasvatī naḥ subhagā mayaskarat //3 //*
*tanno vāto mayobhu vātu bheṣajaṁ tanmātā pṛthivī tatpitā dyauḥ /*
*tadgrāvāṇaḥ somasuto mayobhuvastadaśvinā śṛṇutaṁ dhiṣṇyā yuvam //4 //*
*tamīśānaṁ jagatastasthuṣaspatiṁ dhiyaṁjinvamavase hūmahe vayam /*
*pūṣā no yathā vedasāmasad vṛdhe rakṣitā pāyuradabdhaḥ svastaye //5 //*
*svasti na indro vṛddhaśravāḥ svasti naḥ pūṣā viśvadevāḥ /*
*svasti nastākṣaryo ariṣṭanemiḥ svasti no bṛhaspatirdadhātu //6 //*
*pṛṣadaśvā marutaḥ pṛśnimātaraḥ śubhaṁyāvāno vidatheṣu jagmayaḥ /*
*agnijihnā manavaḥ sūrachakṣaso viśve no devā avasā gamanniha //7 //*
*bhadraṁ karṇebhi śuṇuyāma devā bhadraṁ paśyemākṣabhiryajatrāḥ /*
*sthirairaṁgaistuṣṭuvāṁsastanūbhirvyaśema devahitaṁ yadāyuḥ //8 //*
*śataminnu śarado anti devā yatrā naśchakrā jarasaṁ tanūnām /*
*putrāso yatra pitaro bhavanti mā no madhyā rīriṣatāyurgantoḥ //9 //*
*aditirdyauraditirantarikṣamaditirmātā sa pitā sa putraḥ /*
*viśve devā aditiḥ paṁcha janā aditirjātamaditirjanitvam //10 //*

ऋ. (Rv.) १.९०.१-९

ऋजुनीति नो वरुणो मित्रो नयतु विद्वान्। अर्यमा देवैः सजोषाः ॥१॥

ते हि वस्वो वसवानास्ते अप्रमूरा महोभिः। व्रता रक्षन्ते विश्वहा ॥२॥
ते अस्मभ्यं शर्म यंसन्नमृता मर्त्येभ्यः। बाधमाना अप द्विषः ॥३॥
वि नः पथः सुविताय चियन्त्विन्द्रो मरुतः। पूषा भगो वन्द्यासः ॥४॥
उत नो धियो गोअग्राः पूषन्विष्णवेवयावः। कर्ता नः स्वस्तिमतः ॥५॥
मधु वाता ऋतायते मधु क्षरन्ति सिन्धवः। माध्वीर्नः सन्त्वोषधीः ॥६॥
मधु नक्तमुतोषसो मधुमत्पार्थिवं रजः। मधु द्यौरस्तु नः पिता ॥७॥
मधुमान्नो वनस्पतिर्मधुमाँ अस्तु सूर्यः। मध्वीर्गावो भवन्तु नः ॥८॥
शं नो मित्रः शं वरुणः शं नो भवत्यवर्यमा। शं न इन्द्रो बृहस्पतिः शं नो विष्णुरुरुक्रमः ॥९॥

*ṛjunīti no varuṇo mitro nayatu vidvān / aryamā devaiḥ sajoṣāḥ //1 //*
*te hi vasvo vasavānāste apramūrā mahobhiḥ / vratā rakṣante viśvahā //2 //*
*te asmabhyaṁ śarma yaṁsannamṛtā martyebhyaḥ / bādhamānā apa dviṣaḥ //3 //*
*vi naḥ pathaḥ suvitāya chiyantvindro marutaḥ / pūṣā bhago vandyāsaḥ //4 //*
*uta no dhiyo goagrāḥ pūṣanviṣṇavevayāvaḥ / kartā naḥ svastimataḥ //5 //*
*madhu vātā ṛtāyate madhu kṣaranti sindhavaḥ / mādhvīrnaḥ santvoṣadhīḥ //6 //*
*madhu naktamutoṣaso madhumatpārthivaṁ rajaḥ / madhu dyaurastu naḥ pitā //7 //*
*madhumānno vanaspatirmadhumām̐ astu sūryaḥ / madhvīrgāvo bhavantu naḥ //8 //*
*śaṁ no mitraḥ śaṁ varuṇaḥ śaṁ no bhavatyavaryamā /*
*śaṁ na indro bṛhaspatiḥ śaṁ no viṣṇururukramaḥ //9 //*

सा. (Sv.) १८७४-७५

भद्रं कर्णेभिः श्रृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः ।
स्थिरैरंगैस्तुष्टुवा सस्तनूभिर्व्यशेमहि देवहितं यदायुः ॥२॥
स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः ।
स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ॥३॥

*bhadraṁ karṇebhiḥ śṛṇuyāma devā bhadraṁ paśyemākṣabhiryajatrāḥ /*
*sthirairaṁgaistuṣṭuvā sastanūbhirvyaśemahi devahitaṁ yadāyuḥ //2 //*
*svasti na indro vṛddhaśravāḥ svasti naḥ pūṣā viśvavedāḥ /*
*svasti nastārkṣayo ariṣṭanemiḥ svasti no bṛhaspatirdadhātu //3 //*

१०. सोमः (Somaḥ) - ऋ. (Rv.) १.९१.१-२३; सा. (Sv.) ६०३-६०४

ऋ. (Rv.) १.९१.१-२३

त्वं सोम प्र चिकितो मनीषा त्वं रजिष्ठमनु नेषि पन्थाम् ।
तव प्रणीती पितरो न इन्दो देवेषु रत्नमभजन्त धीराः ॥१॥
त्वं सोम क्रतुभिः सुक्रतुर्भूस्त्वं दक्षैः सुदक्षो विश्ववेदाः ।
त्वं वृषा वृषत्वेभिर्महित्वा द्युम्नेभिर्द्युम्न्यभवो नृचक्षाः ॥२॥
राज्ञो नु ते वरुणस्य व्रतानि बृहद्गभीरं तव सोम धाम ।
शुचिष्ट्वमसि प्रियो न मित्रो दक्षाय्यो अर्यमेवासि सोम ॥३॥
या ते धामानि दिवि या पृथिव्यां या पर्वतेष्वोषधीष्वप्सु ।
तेभिर्नो विश्वैः सुमना अहेळन्राजन्त्सोम प्रति हव्या गृभाय ॥४॥
त्वं सोमासि सत्पतिस्त्वं राजोत वृत्रहा। त्वं भद्रो असि क्रतुः ॥५॥
त्वं च सोम नो वशो जीवातुं न मरामहे। प्रियस्तोत्रो वनस्पतिः ॥६॥
त्वं सोम महे भगं त्वं यून ऋतायते। दक्षं दधासि जीवसे ॥७॥
त्वं नः सोम विश्वतो रक्षा राजन्नघायतः। न रिष्येत्त्वावतः सखा ॥८॥
सोम यास्ते मयोभुव ऊतयः सन्ति दाशुषे। ताभिर्नोऽविता भव ॥९॥
इमं यामिदं वाचो जुजुषाण उपागहि। सोम त्वं नो वृधे भव ॥१०॥
सोम गीर्भिष्ट्वा वयं वर्धयामो वचोविदः। सुमृळीको न आ विश ॥११॥
गयस्फानो अमीवहा वसुवित्पुष्टिवर्धनः। सुमित्रः सोम नो भव ॥१२॥
सोम रारन्धि नो हृदि गावो न यवसेष्वा। मर्य इव स्व ओक्ये ॥१३॥
यः सोम सख्ये तव रारणद्देव मर्त्यः। तं दक्षः सचते कविः ॥१४॥

उरुष्या णो अभिशस्तेः सोम नि पाह्यंहसः। सखा सुशेव एधि नः ॥१५॥
आ प्यायस्व समेतु ते विश्वतः सोम वृष्ण्यम्। भवा वाजस्य संगथे ॥१६॥
आ प्यायस्व मदिन्तम सोम विश्वेभिरंशुभिः। भवा नः सुश्रवस्तमः सखा वृधे ॥१७॥
सं ते पयांसि समु यन्तु वाजाः सं वृष्ण्यान्यभिमातिषाहः ।
आप्यायमानो अमृताय सोम दिवि श्रवांस्युत्तमानि धिष्व ॥१८॥
या ते धामानि हविषा यजन्ति ता ते विश्वा परिभूरस्तु याम् ।
गयस्फानः प्रतरणः सुवीरोऽवीरहा प्र चरा सोम दुर्यान् ॥१९॥
सोमो धेनुं सोमो अर्वन्तमांशु सोमो वीरे कर्मण्यं ददाति ।
सादन्यं विदथ्यं सभेयं पितृश्रवणं यो ददाशदस्मै ॥२०॥
अषाळ्हं युत्सु पृतनासु पप्रिं स्वर्षामप्सां वृजनस्य गोपाम् ।
भरेषुजां सुक्षितिं सुश्रवसं जयन्तं त्वामनु मदेम सोम ॥२१॥
त्वमिमा ओषधीः सोम विश्वास्त्वमपो अजनयस्त्वं गाः ।
त्वमा ततन्थोर्व१न्तरिक्षं त्वं ज्योतिषा वि तमो ववर्थ ॥२२॥
देवेन नो मनसा देव सोम रायो भागं सहसावन्नभि युध्य ।
मा त्वा तनदीशिषे वीर्यस्योभयेभ्यः प्र चिकित्सा गविष्टौ ॥२३॥

*tvaṁ soma pra chikito manīṣā tvaṁ rajiṣṭhamanu neṣi panthām /*
*tava praṇītī pitaro na indo deveṣu ratnamabhajanta dhīrāḥ //1 //*
*tvaṁ soma kratubhiḥ sukraturbhūstvaṁ dakṣaiḥ sudakṣo viśvavedāḥ /*
*tvaṁ vṛṣā vṛṣatvebhirmahitvā dyumnebhirdyumnyabhavo nṛchakṣāḥ //2 //*
*rāāo nu te varuṇasya vratāni bṛhadgabhīraṁ tava soma dhāma /*
*śuchiṣṭvamasi priyo na mitro dakṣāyyo aryamevāsi soma //3 //*
*yā te dhāmāni divi yā pṛthivyāṁ yā parvateṣvoṣadhīṣvapsu /*
*tebhirno viśvaiḥ sumanā aheḻannājantsoma prati havyā gṛbhāya //4 //*
*tvaṁ somāsi satpatistvaṁ rājota vṛtrahā / tvaṁ bhadro asi kratuḥ //5 //*
*tvaṁ cha soma no vaśo jīvātuṁ na marāmahe / priyastotro vanaspatiḥ //6 //*
*tvaṁ soma mahe bhagaṁ tvaṁ yūna ṛtāyate / dakṣaṁ dadhāsi jīvase //7 //*
*tvaṁ naḥ soma viśvato rakṣā rājannaghāyataḥ / na riṣyettvāvataḥ sakhā //8 //*
*soma yāste mayobhuva ūtayaḥ santi dāśuṣe / tābhirno'vitā bhava //9 //*
*imaṁ yāmidaṁ vācho jujuṣāṇa upāgahi / soma tvaṁ no vṛdhe bhava //10 //*
*soma gīrbhiṣṭvā vayaṁ vardhayāmo vachovidaḥ / sumṛḻīko na ā viśa //11 //*
*gayasphāāno amīvahā vasuvitpuṣṭivardhanaḥ / sumitraḥ soma no bhava //12 //*
*soma rārandhi no hṛdi gāvo na yavaseṣvā / marya iva sva Okye //13 //*
*yaḥ soma sakhye tava rāraṇaddeva martyaḥ / taṁ dakṣaḥ sachate kaviḥ //14 //*
*uruṣyā ṇo abhiśasteḥ soma ni pāhyaṁhasaḥ / sakhā suśeva edhi naḥ //15 //*
*ā pyāyasva sametu te viśvataḥ soma vṛṣṇyam / bhavā vājasya saṁgathe //16 //*
*ā pyāyasva madintama soma viśvebhiraṁśubhiḥ /*
*bhavā naḥ suśravastamaḥ sakhā vṛdhe //17 //*
*saṁ te payāṁsi samu yantu vājāḥ saṁ vṛṣṇyānyabhimātiṣāhaḥ /*
*āpyāyamāno amṛtāya soma divi śravāṁsyuttamāni dhiṣva //18 //*
*yā te dhāmāni haviṣā yajanti tā te viśvā paribhūrastu yām /*
*gayasphānaḥ prataraṇaḥ suvīro'vīrahā pra charā soma duryān //19 //*
*somo dhenuṁ somo arvantamāṁśu somo vīre karmaṇyaṁ dadāti /*
*sādanyaṁ vidathyaṁ sabheyaṁ pitṛśravaṇaṁ yo dadāśadasmai //20 //*
*aṣāḻhaṁ yutsu pṛtanāsu papriṁ svarṣāmapsāṁ vṛjanasya gopām /*
*bhareṣujāṁ sukṣitiṁ suśravasaṁ jayantaṁ tvāmanu madema soma //21 //*
*tvamimā Oṣadhīḥ soma viśvāstvamapo ajanayastvaṁ gāḥ /*
*tvamā tatanthorva1ntarikṣaṁ tvaṁ jyotiṣā vi tamo vavartha //22 //*
*devena no manasā deva soma rāyo bhāgaṁ sahasāvannabhi yudhya /*
*mā tvā tanadīśiṣe vīryasyobhayebhyaḥ pra chikitsā gaviṣṭau //23 //*

सा. (Sv.) ६०३-६०४

सं ते पयांसि समु यन्तु वाजाः सं वृष्ण्यान्यभिमातिषाहः ।
आप्यायमानो अमृताय सोम दिवि श्रवांस्युत्तमानि धिष्व ॥२॥
त्वमिमा ओषधीः सोम विश्वास्त्वमपो अजनयस्त्वं गाः ।
त्वमातनोरुर्वा३न्तरिक्षं त्वं ज्योतिषा वि तमो ववर्थः ॥३॥

*saṁ te payāṁsi samu yantu vājāḥ saṁ vṛṣṇyānyabhimātiṣāhaḥ /*
*āpyāyamāno amṛtāya soma divi śravāṁsyuttamāni dhiṣva //2 //*
*tvamimā Oṣadhīḥ soma viśvāstvamapo ajanayastvaṁ gāḥ /*
*tvamātanorurvā3ntarikṣaṁ tvaṁ jyotiṣā vi tamo vavarthaḥ //3 //*

## २२०. गोधा (Godhā)

१. इन्द्रः (Indraḥ) - ऋ. (Rv.) १०.१३४.६-७; सा १७६

ऋ. (Rv.) १०.१३४.६-७

पूर्वेण मघवन्पदाजो वयां यथा यमो ।
देवी जनित्र्यजीजनद् भद्रा जनित्र्यजीजनत् ॥६॥
नाकिर्देवा मिनीमसि नकिरा योपयामसि मन्त्रश्रुत्यं चरामसि।
पक्षेभिरपिकक्षेभिरत्राभि सं रभामहे ॥७॥

*pūrveṇa maghavanpadājo vayāṁ yathā yamo /*
*devī janitrayajījanad bhadrā janitrayajījanat //6 //*
*nākirdevā minīmasi nakirā yopayāmasi mantraśrutyaṁ charāmasi /*
*pakṣebhirapikakṣebhiratrābhi saṁ rabhāmahe //7 //*

सा. (Sv.) १७६

न कि देवा इनीमसि न क्या योपयामसि। मन्त्रश्रुत्यं चरामसि ॥२॥

*na ki devā inīmasi na kyā yopayāmasi / mantraśrutyaṁ charāmasi //2 //*

## २२१. गोपथः (Gopathaḥ)

१. रात्रिः (Rātriḥ) - अ. (Av.) १९.४७.१-९; १९.४८.१-६; १९.४९.१-१०; १९.५०.१-७

अ. (Av.) १९.४७.१-९

आ रात्रि पार्थिवं रजः पितुरप्रायि धामभिः।
दिवः सदांसि बृहती वि तिष्ठस आ त्वेषं वर्तते तमः ॥१॥
न यस्याः पारं ददृशे न योयुवद् विश्वमस्यां नि विशते यदेजति ।
अरिष्टासस्त उर्वि तमस्वति रात्रि पारमशीमहि भद्रे पारमशीमहि ॥२॥
ये ते रात्रि नृचक्षसो द्रष्टारो नवतिर्नव ।
अशीतिः सन्त्यष्टा उतो ते सप्त सप्ततिः ॥३॥
षष्टिश्च षट् च रेवति पंचाशत् पंच सुम्नयि ।
चत्वारश्चत्वारिंशच्च त्रयस्त्रिंशच्च वाजिनि ॥४॥
द्वौ च ते विंशतिश्च ते रात्र्येकादशावमाः ।
तेभिर्नो अद्य पायुभिर्नु पाहि दुहितर्दिवः ॥५॥
रक्षा माकिर्नो अघशंस ईशत मा नो दुःशंस ईशत ।
मा नो अद्य गवां स्तेनो मवीनां वृक ईशत ॥६॥
माश्वानां भद्रे तस्करो मा नृणां यातुधान्यः । परमेभिः पाथिभि स्तेनो धावतु तस्करः ।
परेण दत्वती रज्जुः परेणाघायुरर्षतु ॥७॥
अध रात्रि तृष्टधूममशीर्षाणमहिं कृणु हनू वृकस्य जम्भयास्तेन तं द्रुपदे जहि ॥८॥
त्वयि रात्रि वसामसि स्वपिष्यामसि जागृहि। गोभ्यो नः शर्म यच्छाश्वेभ्यः पुरुषेभ्यः ॥९॥

*ā rātri pārthivaṁ rajaḥ pituraprāyi dhāmabhiḥ /*
*divaḥ sadāṁsi bṛhatī vi tiṣṭhasa ā tveṣaṁ vartate tamaḥ //1 //*
*na yasyāḥ pāraṁ dadṛśe na yoyuvad viśvamasyāṁ ni viśate yadejati /*

*ariṣṭāsasta urvi tamasvati rātri pāramaśīmahi bhadre pāramaśīmahi //2 //*
*ye te rātri nṛchakṣaso dṛṣṭāro navatirnava /*
*aśītiḥ santyaṣṭā uto te sapta saptatiḥ //3 //*
*ṣaṣṭiścha ṣaṭ cha revati paṁchāśat paṁcha sumnayi /*
*chatvāraśchatvāriṁśachcha trayastriṁśachcha vājini //4 //*
*dvau cha te viṁśatiścha te rātrayekādaśāvamāḥ /*
*tebhirno adya pāyubhirnu pāhi duhitardivaḥ //5 //*
*rakṣā mākirno aghaśaṁsa īśata mā no duḥśaṁsa īśata /*
*mā no adya gavāṁ steno mavīnāṁ vṛka īśata //6 //*
*māśvānāṁ bhadre taskaro mā nṛṇāṁ yātudhānyaḥ / paramebhiḥ pāthibhi steno dhāvatu taskaraḥ /*
*pareṇa datvatī rajjuḥ pareṇāghāyurarṣatu //7 //*
*adha rātri tṛṣṭadhūmamaśīrṣāṇamahiṁ kṛṇu hanū vṛkasya jambhayāstena taṁ drupade jahi //8 //*
*tvayi rātri vasāmasi svapiṣyāmasi jāgṛhi / gobhyo naḥ śarma yachchhāśvebhyaḥ puruṣebhyaḥ //9 //*

अ. (Av.) १९.४८.१-६

अथो यानि च यस्मा ह यानि चान्तः परीणहि। तानि ते परि दद्मसि ॥१॥
रात्रि मातरुषसे नः परि देहि। उषा नो अह्ने परि ददात्वहस्तुभ्यं विभावरि॥२॥
यत् किं चेदं पतयति यत् किं चेदं सरीसृपम् ।
यत् किं च पर्वतायासत्वं तस्मात् त्वं रात्रि पाहि नः ॥३॥
सा पश्चात् पाहि सा पुरः सोत्तरादधरादुत ।
गोपाय नो विभावरि स्तोतारस्त इह स्मसि ॥४॥
ये रात्रिमनुतिष्ठन्ति ये च भूतेषु जाग्रति ।
पशून ये सर्वान् रक्षन्ति ते न आत्मसु जाग्रति ते नः पशुषु जाग्रति ॥५॥
वेद वै रात्रि ते नाम घृताची नाम वा असि ।
तां त्वा भरद्वाजो वेद सा नो वित्तेऽधि जागृति ॥६॥

*atho yāni cha yasmā ha yāni chāntaḥ parīṇahi / tāni te pari dadmasi //1 //*
*rātri mātaruṣase naḥ pari dehi / uṣā no ahne pari dadātvahastubhyaṁ vibhāvari //2 //*
*yat kiṁ chedaṁ patayati yat kiṁ chedaṁ sarīsṛpam /*
*yat kiṁ cha parvatāyāsatvaṁ tasmāt tvaṁ rātri pāhi naḥ //3 //*
*sā paśchāt pāhi sā puraḥ sottarādadharāduta /*
*gopāya no vibhāvari stotārasta iha smasi //4 //*
*ye rātrimanutiṣṭhanti ye cha bhūteṣu jāgrati /*
*paśūna ye sarvān rakṣanti te na ātmasu jāgrati te naḥ paśuṣu jāgrati //5 //*
*veda vai rātri te nāma ghṛtāchī nāma vā asi /*
*tāṁ tvā bharadvājo veda sā no vitte'dhi jāgṛti //6 //*

अ. (Av.) १९.४९.१-१०

इषिरा योषा युवतिर्दमूना रात्री देवस्य सवितुर्भगस्य ।
अश्वक्षभा सुहवा संभृतश्रीरा पप्रौ द्यावापृथिवी महित्वा ॥१॥
अति विश्वान्यरुहद् गम्भीरो वर्षिष्ठमरुहन्त श्रविष्ठाः ।
उशती रात्र्यनु सा भद्राभि तिष्ठते मित्रइव स्वधाभिः ॥२॥
वर्ये वन्दे सुभगे सुजात आजगन् रात्रि सुमना इह स्याम् ।
अस्मांस्त्रायस्व नर्याणि जाता अथो यानि गव्यानि पुष्ट्या ॥३॥
सिंहस्य रात्र्युशती पींषस्य व्याघ्रस्य द्वीपिनो वर्च आ ददे ।
अश्वस्य ब्रध्नं पुरुषस्य मायुं पुरु रूपाणि कृणुषे विभाती ॥४॥
शिवां रात्रिमनुसूर्यं च हिमस्य माता सुहवा नो अस्तु ।
अस्य स्तोमस्य सुभगे नि बोध येन त्वा वन्दे विश्वासु दिक्षु ॥५॥

स्तोमस्य नो विभावरि रात्रि राजेव जोषसे ।
असाम सर्ववीरा भवाम सर्ववेदसो व्युच्छन्तीरनूषसः ॥६॥
शम्या ह नाम दधिषे मम दिप्सन्ति ये धना ।
रात्रीहि तानसुतपा य स्तेनो न विद्यते यत् पुनर्न विद्यते ॥७॥
भद्रासि रात्रि चमसो न विष्टो विष्वङ् गोरूपं युवतिर्बिभर्षि ।
चक्षुष्मती मे उशती वपूंषि प्रति त्वं दिव्या न क्षाममुक्थाः ॥८॥
यो अद्य स्तेन आयत्यघायुर्मर्त्यो रिपुः ।
रात्री तस्य प्रतीत्य प्र ग्रीवाः प्र शिरो हनत् ॥९॥
प्र पादौ यथायति प्र हस्तौ न यथशिषत् ।
यो मलिम्लुरुपायति स संपिष्टो अपायति ।
अपायति स्वपायति शुष्के स्थाणावपायति ॥१०॥

*iṣirā yoṣā yuvatirdamūnā rātrī devasya saviturbhagasya /*
*aśvakṣabhā suhavā saṁbhṛtaśrīrā paprau dyāvāpṛthivī mahitvā //1 //*
*ati viśvānyaruhad gambhīro varṣiṣṭhamaruhanta śraviṣṭhāḥ /*
*uśatī rātrayanu sā bhradābhi tiṣṭhate mitraiva svadhābhiḥ //2 //*
*varye vande subhage sujāta ājagan rātri sumanā iha syām /*
*asmāṁstrāyasva naryāṇi jātā atho yāni gavyāni puṣṭyā //3 //*
*siṁhasya rātrayuśatī pīṁṣasya vyāghrasya dvīpino varcha ā dade /*
*aśvasya bradhnaṁ puruṣasya māyuṁ puru rūpāṇi kṛṇuṣe vibhātī //4 //*
*śivāṁ rātrimanusūrya cha himasya mātā suhavā no astu /*
*asya stomasya subhage ni bodha yena tvā vande viśvāsu dikṣu //5 //*
*stomasya no vibhāvari rātri rājeva joṣase /*
*asāma sarvavīrā bhavāma sarvavedaso vyuchchhantīranūṣasaḥ //6 //*
*śamyā ha nāma dadhiṣe mama dipsanti ye dhanā /*
*rātrīhi tānasutapā ya steno na vidyate yat punarna vidyate //7 //*
*bhadrāsi rātri chamaso na viṣṭo viṣvaṅ gorūpaṁ yuvatirbibharṣi /*
*chakṣuṣmatī me uśatī vapūṁṣi prati tvaṁ divyā na kṣāmamukthāḥ //8 //*
*yo adya stena āyatyaghāyurmartyo ripuḥ /*
*rātrī tasya pratītya pra grīvāḥ pra śiro hanat //9 //*
*pra pādau yathāyati pra hastau na yathaśiṣat /*
*yo malimlurupāyati sa saṁpiṣṭo apāyati /*
*apāyati svapāyati śuṣke sthāṇāvapāyati //10 //*

अ. (Av.) १९.५०.१-७

अध रात्रि तृष्टधूममशीर्षाणमहिं कृणु। अक्षौ वृकस्य निर्जह्यास्तेन तं द्रुपदे जहि ॥१॥
ये ते रात्र्यनड्वाहस्तीक्ष्णशृंगाः स्वाशवः। तेभिर्नो अद्य पारयाति दुर्गाणि विश्वहा ॥२॥
रात्रिंरात्रिमरिष्यन्तस्तरेम तन्वावयम्। गम्भीरमप्लवाइव न तरेयुररातयः ॥३॥
यथा शाम्याकः प्रपतन्नपवान् नानुविद्यते। एवा रात्रि प्र पातय यो अस्माँ अभ्यघायति ॥४॥
अप स्तेनं वासो गोअजमुत तस्करम्। अथो यो अर्वतः शिरोऽभिधाय निनीषति ॥५॥
यदद्या रात्रि सुभगे विभजन्त्ययो वसु। यदेतदस्मान् भोजय यथोदन्यानुपायसि ॥६॥
उषसे नः परि देहि सर्वान् रात्र्यनागसः। उषा नो अह्ने आ भजादहस्तुभ्यं विभावरि ॥७॥

*adha rātri tṛṣṭadhūmamaśīrṣāṇamahiṁ kṛṇu / akṣau vṛkasya nirjahyāstena taṁ drupade jahi //1 //*
*ye te rātrayanaḍvāhastīkṣaṇaśṛṅgāḥ svāśavaḥ / tebhirno adya pārayāti durgāṇi viśvahā //2 //*
*rātriṁrātrimariṣyantastarema tanvāvayam / gambhīramaplavāiva na tareyurarātayaḥ //3 //*
*yathā śāmyākaḥ prapatannapavān nānuvidyate / evā rātri pra pātaya yo asmām̐ abhyaghāyati //4 //*

*apa stenaṁ vāso goajamuta taskaram | atho yo arvataḥ śiro'bhidhāya ninīṣati ||5 ||*
*yadadyā rātri subhage vibhajantyayo vasu | yadetadasmān bhojaya yathodanyānupāyasi ||6 ||*
*uṣase naḥ pari dehi sarvān rātrayanāgasaḥ | uṣā no ahne ā bhajādahastubhyaṁ vibhāvari ||7 ||*

२. वाजी (Vājī) - अ. (Av.) १९.२५.१

अश्रान्तस्य त्वा मनसा युनज्मि प्रथमस्य च। उत्कूलमुद्वहो भवोदुह्य प्रति धावतात् ॥१॥
*aśrāntasya tvā manasā yunajmi prathamasya cha | utkūlamudvaho bhavoduhma prati dhāvatāt ||1 ||*

## २२२. गोपवन आत्रेयः (Gopavana Ātreyaḥ)

१. अग्निः (Agniḥ) - ऋ. (Rv.) ८.७४.१-१२; सा. (Sv.) २९; ८७; ८९; १५६४-६६

ऋ. (Rv.) ८.७४.१-१२

विशेविशो वो अतिथि वाजयन्तः पुरुप्रियम्। अग्निं वो दुर्य वचः स्तुषे शूषस्य मन्मभिः ॥१॥
यं जनासो हविष्मन्तो मित्रं न सर्पिरासुतिम्। प्रशंसन्ति प्रशस्तिभिः ॥२॥
पन्यासं जातवेदसं यो देवतात्युद्यता। हव्यान्यैरयद्दिवि ॥३॥
आगन्म वृत्रहन्तमं ज्येष्ठमग्निमानवम्। यस्य श्रुतर्वा बृहन्नार्क्षो अनीक एधते ॥४॥
अमृतं जातवेदसं तिस्तमांसि दर्शतम्। घृताहवनमीड्यम् ॥५॥
सबाधो य जना इमे३ग्निं हव्येभिरीळते। जुह्वानासो यतस्रुचः ॥६॥
इयं ते नव्यसी मतिरग्ने अधाय्यस्मदा। मन्द्र सुजात सुक्रतोऽमूर दस्मातिथे ॥७॥
सा ते अग्ने शंतमा चनिष्ठा भवतु प्रिया। तया वर्धस्व सुष्टुतः ॥८॥
सा द्युम्नैर्द्युम्निनी बृहदुपोप श्रवसि श्रवः। दधीत वृत्रतूर्ये ॥९॥
अश्वमिद्गां रथप्रां त्वेषमिन्द्रं न सत्पतिम्। यस्य श्रवांसि तूर्वथ पन्यंपन्यं च कृष्टयः ॥१०॥
य त्वा गोपवनो गिरा चनिष्ठदग्ने अंगिरः। स पावक श्रुधी हवम् ॥११॥
यं त्वा जनास ईळते सबाधो वाजसातये। स बोधि वृत्रतूर्ये ॥१२॥

*viśeviśo vo atithi vājayantaḥ purupriyam |*
*agniṁ vo durya vachaḥ stuṣe śūṣasya manmabhiḥ ||1 ||*
*yaṁ janāso haviṣmanto mitraṁ na sarpirāsutim | praśaṁsanti praśastibhiḥ ||2 ||*
*panyāsaṁ jātavedasaṁ yo devatātyudyatā | havyānyairayaddivi ||3 ||*
*āganma vṛtrahantamaṁ jyeṣṭhamagnimānavam |*
*yasya śrutarvā bṛhannārkṣo anīka edhate ||4 ||*
*amṛtaṁ jātavedasaṁ tistamāṁsi darśatam | ghṛtāhavanamīḍyam ||5 ||*
*sabādho ya janā ime3giṁna havyebhirīḷate | juhnānāso yatasruchaḥ ||6 ||*
*iyaṁ te navyasī matiragne adhāyyasmadā |*
*mandra sujāta sukrato'mūra dasmātithe ||7 ||*
*sā te agne śaṁtamā chaniṣṭhā bhavatu priyā | tayā vardhasva suṣṭutaḥ ||8 ||*
*sā dyumnairdyumninī bṛhadupopa śravasi śravaḥ | dadhīta vṛtratūrye ||9 ||*
*aśvamidgāṁ rathaprāṁ tveṣamindraṁ na satpatim |*
*yasya śravāṁsi tūrvatha panyaṁpanyaṁ cha kṛṣṭayaḥ ||10 ||*
*ya tvā gopavano girā chaniṣṭhadagne aṁgiraḥ | sa pāvaka śrudhī havam ||11 ||*
*yaṁ tvā janāsa īḷate sabādho vājasātaye | sa bodhi vṛtratūrye ||12 ||*

सा. (Sv.) २९

तं त्वा गोपवनो गिरा जनिष्ठदग्ने अंगिरः। स पावक श्रुधी हवम् ॥९॥
*taṁ tvā gopavano girā janiṣṭhadagne aṁgiraḥ | sa pāvaka śrudhī havam ||9 ||*

सा. (Sv.) ८७

विशोविशो वो अतिथि वाजयन्तः पुरुप्रियम्। अग्निं वो दुर्य वचः स्तुषे शूषस्य मन्मभिः ॥७॥
*viśoviśo vo atithi vājayantaḥ purupriyam | agiṁna vo durya vachaḥ stuṣe śūṣasya manmabhiḥ ||7 ||*

सा. (Sv.) ८९

अगन्म वृत्रहन्तमं ज्येष्ठमग्निमानवम्। यः स्म श्रुतर्वन्नार्क्षे बृहदनीक इध्यते ॥९॥

*aganma vṛtrahantamaṁ jyeṣṭhamagnimānavam /*
*yaḥ sma śrutarvannārkṣe bṛhadanīka idhyate //9 //*

सा. (Sv.) १५६४-६६

विशो विशो वो अतिथिं वाजयन्तः पुरुप्रियम्। अग्निं वो दुर्य वच स्तुषे शूषस्य मन्मभिः ॥१॥
यं जनासो हविष्मन्तो मित्रं न सर्पिरासुतिम्। प्रशंसन्ति प्रशस्तिभिः ॥२॥
पन्यांसं जातवेदसं यो देवतात्युद्यता। हव्यान्यैरयद्दिवि ॥३॥

*viśo viśo vo atithiṁ vājayantaḥ purupriyam /*
*agniṁ vo durya vacha stuṣe śūṣasya manmabhiḥ //1 //*
*yaṁ janāso haviṣmannto mitraṁ na sarpirāsutim / praśaṁsanti praśastibhiḥ //2 //*
*panyāṁsaṁ jātavedasaṁ yo devatātyudyatā / havyānyairayaddivi //3 //*

२. श्रुतवर्ण आर्क्षस्य दानस्तुतिः (Śrutavarṇa Ārkṣasya Dānastutiḥ) - ऋ. (Rv.) ८.७४.१३-१५

अहं हुवान आर्क्षे श्रुतर्वणि मदच्युति॥ शर्धासीव स्तुकाविनां मृक्षा शीर्षा चतुर्णाम् ॥१३॥
मां चत्वार आशवः शविष्ठस्य द्रवित्नवः। सुरथासो अभि प्रयो वक्षन्वयो न तुग्रयम्॥१४॥
सत्यमित्तवा महेनदि परुष्ण्यव देदिशम्। नेमापो अश्वदातरः शविष्ठादस्ति मर्त्यः ॥१५॥

*ahaṁ huvāna ārkṣe śrutarvaṇi madachyuti //*
*śardhāsīva stukāvināṁ mṛkṣā śīrṣā chaturṇām //13 //*
*māṁ chatvāra āśavaḥ śaviṣṭhasya dravitnavaḥ /*
*surathāso abhi prayo vakṣanvayo na tugrayam //14 //*
*satyamittavā mahenadi paruṣṇyava dediśam /*
*nemāpo aśvadātaraḥ śaviṣṭhādasti martyaḥ //15 //*

## २२३. गोपवन आत्रेयः सप्तवध्रिर् वा (Gopavana Ātreyaḥ Saptavadhrir Vā)

१. अश्विनौ (Aśvinau) - ऋ. (Rv.) ८.७३.१-१८

उदीराथामृतायते युञ्जाथमश्विना रथम्। अन्ति षदभूतु वामवः ॥१॥
निमिषश्चिज्जवीयसा रथेना यातमश्विना। अन्ति षदभूतु वामवः ॥२॥
उप स्तृणीतमत्रये हिमेन घर्ममश्विना। अन्ति षदभूतु वामवः ॥३॥
कुह स्थः कुह जग्मथुः कुह श्येनेव पेत्थुः। अन्ति षदभूतु वामवः ॥४॥
यदद्य कर्हि कर्हि चिच्छुश्रूयातमिमं हवम्। अन्ति षदभूतु वामवः ॥५॥
अश्विना यामहूतमा नेदिष्ठं याम्याप्यम्। अन्ति षदभूतु वामवः ॥६॥
अवन्तमत्रये गृहं कृणुतं युवमश्विना। अन्ति षदभूतु वामवः ॥७॥
वरेथे अग्निमातपो वदते वल्ग्वत्रये। अन्ति षदभूतु वामवः ॥८॥
प्र सप्तवध्रिराशसा धारामग्नेरशायत। अन्ति षदभूतु वामवः ॥९॥
इहा गतं वृषण्वसू शुणुतं म इमं हवम्। अन्ति षदभूतु वामवः ॥१०॥
किमिदं वां पुराणवज्जरतोरिव शस्यते। अन्ति षदभूतु वामवः ॥११॥
समानं वां सजात्यं समानो बन्धुरश्विना। अन्ति षदभूतु वामवः ॥१२॥
यो वां रजांस्यश्विना रथो वियाति रोदसी। अन्ति षदभूतु वामवः ॥१३॥
आ नो गव्येभिरश्व्यैः सहस्रैरुप गच्छतम्। अन्ति षदभूतु वामवः ॥१४॥
मा नो गव्येभिरश्व्यैः सहस्रेभिरति ख्यतम्। अन्ति षदभूतु वामवः ॥१५॥
रुणप्सुरुषा अभूदकर्ज्योतिर्ऋतावरी। अन्ति षदभूतु वामवः ॥१६॥
अश्विना सु विचाकशद्वृक्षं परशुमाँ इव। अन्ति षदभूतु वामवः ॥१७॥
पुरं न धृष्णवा रुज कृष्णया बाधितो विषा। अन्ति षदभूतु वामवः ॥१८॥

*udīrāthāmṛtāyate yujjāthamaśvinā ratham / anti ṣadabhūtu vāmavaḥ //1 //*
*nimiṣaśchijjavīyasā rathenā yātamaśvinā / anti ṣadabhūtu vāmavaḥ //2 //*
*upa stṛṇītamatraye himena gharmamaśvinā / anti ṣadabhūtu vāmavaḥ //3 //*

*kuha sthaḥ kuha jagmathuḥ kuha śyeneva petthuḥ । anti ṣadabhūtu vāmavaḥ ॥4॥*
*yadadma karhi karhi chichchhuśrūyātamimaṁ havam । anti ṣadabhūtu vāmavaḥ ॥5॥*
*aśvinā yāmahūtamā nediṣṭhaṁ yāmyāpyam । anti ṣadabhūtu vāmavaḥ ॥6॥*
*avantamatraye gṛhaṁ kṛṇutaṁ yuvamaśvinā । anti ṣadabhūtu vāmavaḥ ॥7॥*
*varethe agnimātapo vadate valgvatraye । anti ṣadabhūtu vāmavaḥ ॥8॥*
*pra saptavardhirāśasā dhārāmagneraśāyata । anti ṣadabhūtu vāmavaḥ ॥9॥*
*ihā gataṁ vṛṣaṇvasū śuṇutaṁ ma imaṁ havam । anti ṣadabhūtu vāmavaḥ ॥10॥*
*kimidaṁ vāṁ purāṇavajjaratoriva śasyate । anti ṣadabhūtu vāmavaḥ ॥11॥*
*samānaṁ vāṁ sajātyaṁ samāno bandhuraśvinā । anti ṣadabhūtu vāmavaḥ ॥12॥*
*yeā vāṁ rajāṁsyaśvinā ratho viyāti rodasī । anti ṣadabhūtu vāmavaḥ ॥13॥*
*ā no gavyebhiraśvyaiḥ sahasrairupa gachchhatam । anti ṣadabhūtu vāmavaḥ ॥14॥*
*mā no gavyebhiraśvyaiḥ sahasrebhirati khyatam । anti ṣadabhūtu vāmavaḥ ॥15॥*
*ruṇapsuruṣā abhūdakarjyotirṛtāvarī । anti ṣadabhūtu vāmavaḥ ॥16॥*
*aśvinā su vichākaśadvṛkṣaṁ paraśumām̐ iva । anti ṣadabhūtu vāmavaḥ ॥17॥*
*puraṁ na dhṛṣṇavā ruja kṛṣṇayā bādhito viṣā । anti ṣadabhūtu vāmavaḥ ॥18॥*

## २२४. गोरवीति शाक्त्यः (Goravīti Śāktyaḥ)

१. इन्द्रः (Indraḥ) - सा. (Sv.) ३१९ , ३३१

सा. (Sv.) ३१९

वयः सुपर्णा उप सेदुरिन्द्रं प्रियमेधा ऋषयो नाधमानाः ।
अप ध्वान्तमूर्णुहि पूर्धि चक्षुर्मुमुग्ध्या ३ स्मान्निधयेव बद्धान् ॥७॥
*vayaḥ suparṇā upa sedurindraṁ priyamedhā ṛṣayo nādhamānāḥ ।*
*apa dhvāntamūrṇuhi pūrdhi chakṣurmumugdhyā 3 smānnidhayeva baddhān ॥7॥*

सा. (Sv.) ३३१

चक्रं यदस्याप्स्वा निषत्तमुतो तमदस्मै मध्विच्चच्छद्यात् ।
पृथिव्यामतिषितं यदूधः पयो गोष्वदधा ओषधीषु ॥९॥
*chakraṁ yadasyāpsvā niṣattamuto tamadasmai madhvichchachchhadyāt ।*
*pṛthivyāmatiṣitaṁ yadūdhaḥ payo goṣvadadhā Oṣadhīṣu ॥9॥*

३. पवमानः सोमः (Pavamānaḥ Somaḥ) - सा. (Sv.) ५७८; ६९२-६९३

सा. (Sv.) ५७८

पवस्व मधुमत्तम इन्द्राय सोम क्रतुवित्तमो मदः । महि द्युक्षतमो मदः ॥९॥
*pavasva madhumattama indrāya soma kratuvittamo madaḥ । mahi dyukṣatamo madaḥ ॥9॥*

सा. (Sv.) ६९२-६९३

पवस्व मधुमत्तम इन्द्राय सोम क्रतुवित्तमो मदः । महि द्युक्षतमो मदः ॥१॥
यस्य ते पीत्वा वृषभो वृषायतेऽस्य पीत्वा स्विर्वदः ।
स सुप्रकेतो अभ्यक्रमीदिषोऽच्छा वाजं नैतशः ॥२॥
*pavasva madhumattama indrāya soma kratuvittamo madaḥ । mahi dyukṣatamo madaḥ ॥1॥*
*yasya te pītvā vṛṣabho vṛṣāyate'sya pītvā rsvvidaḥ ।*
*sa supraketo abhyakramīdiṣo'chchhā vājaṁ naitaśaḥ ॥2॥*

## २२५. गोषूक्त्यश्वसूक्तिनौ (Goṣūktyaśvasūktinau)

१. इन्द्रः (Indraḥ) - अ. (Av.) २०.२७.१-६; २०.२८.१-४; २०.२९.१-५; २०.३९.२-५; २०.६१.१-६; २०.६२.८-१०; २०.१०६.१-३

अ. (Av.) २०.२७.१-६

यदिन्द्राहं यथा त्वमीशीय वस्व एक इत् । स्तोता मे गोषखा स्यात् ॥१॥
शिक्षेयमस्मै दित्सेयं शचीपते मनीषिणे । यदहं गोपतिः स्याम् ॥२॥

धेनुष्ट इन्द्र सूनृता यजामनाय सुन्वते। गामश्वं पिप्युषी दुहे ॥३॥
न ते वर्तास्ति राधस इन्द्र देवो न मर्त्यः। यद् दित्ससि स्तुतो मघम् ॥४॥
या इन्द्रमवर्धयद् यद् भूमिं व्यवर्तयत्। चक्राण ओपशं दिवि ॥५॥
वावृधानस्य ते वयं विश्वा धनानि जिग्युषः। ऊतिमिन्द्रा वृणीमहे ॥६॥

*yadindrāhaṁ yathā tvamīśīya vasva eka it | stotā me goṣakhā syāt ||1 ||*
*śikṣeyamasmai ditseyaṁ śachīpate manīṣiṇe | yadahaṁ gopatiḥ syām ||2 ||*
*dhenuṣṭa indra sūnṛtā yajāmanāya sunvate | gāmaśvaṁ pipyuṣī duhe ||3 ||*
*na te vartāsti rādhasa indra devo na martyaḥ | yad ditsasi stuto magham ||4 ||*
*yā indramavardhayad yad bhūmiṁ vyavartayat | chakrāṇa Opaśaṁ divi ||5 ||*
*vāvṛdhānasya te vayaṁ viśvā dhanāni jigyuṣaḥ | ūtimindrā vṛṇīmahe ||6 ||*

अ. (Av.) २०.२८.१-४

व्यन्तरिक्षमतिरन्मदे सोमस्य रोचना। इन्द्रो यदभिनद् वलम् ॥१॥
उद्गा आदजंगिरोभ्य आविष्कृण्वन् गुहा सतीः। अर्वांचं नुनुदे वलम् ॥२॥
इन्द्रेण रोचना दिवो दृढानि दृंहितानि च। स्थिराणि न पराणुदे ॥३॥
अपामूर्मिर्मदन्निव स्तोम इन्द्राजिरायते। वि ते मदा अराजिषुः ॥४॥

*vyantarikṣamatiranmade somasya rochanā | indro yadabhinad valam ||1 ||*
*udgā ādajaṁgiārobhya āviṣkṛṇvan guhā satīḥ | arvāṁchaṁ nunude valam ||2 ||*
*indreṇa rochanā divo dṛḍhāni dṛṁhitāni cha | sthirāṇi na parāṇude ||3 ||*
*apāmūrmirmadanniva stoma indrājirāyate | vi te madā arājiṣuḥ ||4 ||*

अ. (Av.) २०.२९.१-५

त्वं हि स्तोमवर्धन इन्द्रास्युक्थवर्धनः। स्तोतृणामुत भद्रकृत् ॥१॥
इन्द्रमित् केशिना हरी सोमपेयाया वक्षतः। उप यां सुराधसम् ॥२॥
अपां फेनेन नमुचेः शिर इन्द्रोदवर्तयः। विश्वा यदजय स्पृधः ॥३॥
मायाभिरुत्सिसृप्सत इन्द्र द्यामारुरुक्षतः। अव दस्यूँरधूनुथाः ॥४॥
असुन्वामिन्द्र संसदं विषूचीं व्यनाशयः। सोमपा उत्तरो भवन् ॥५॥

*tvaṁ hi stomavardhana indrāsyukthavardhanaḥ | stotṛṇāmuta bhadrakṛt ||1 ||*
*indramit keśinā harī somapeyāyā vakṣataḥ | upa yāṁ surādhasam ||2 ||*
*apāṁ phenena namucheḥ śira indrodavartayaḥ | viśvā yadajaya spṛdhaḥ ||3 ||*
*māyābhirutsisṛpsata indra dyāmārurukṣataḥ | ava dasyūm̐radhūnuthāḥ ||4 ||*
*asunvāmindra saṁsadaṁ viṣūchīṁ vyanāśayaḥ | somapā uttaro bhavan ||5 ||*

अ. (Av.) २०.३९.२-५

व्य१न्तरिक्षमतिरन्मदे सोमस्य रोचना। इन्द्रो यदभिनद् वलम् ॥२॥
उद् गा आजदंगिरोभ्य आविष्कृण्वन् गुहा सतीः। अर्वांचं नुनुदे वलम् ॥३॥
इन्द्रेण रोचना दिवो दृढानि दृंहितानि च। स्थिराणि न पुराणुदे ॥४॥
अपामूर्मिर्मदन्निव स्तोम इन्द्राजिरायते। वि ते मदा अराजिषुः ॥५॥

*vya1ntarikṣamatiranmade somasya rochanā | indro yadabhinad valam ||2 ||*
*ud gā ājadaṁgirobhya āviṣkṛṇvan guhā satīḥ | arvāṁchaṁ nunude valam ||3 ||*
*indreṇa rochanā divo dṛḍhāni dṛṁhitāni cha | sthirāṇi na purāṇude ||4 ||*
*apāmūrmirmadanniva stoma indrājirāyate | vi te madā arājiṣuḥ ||5 ||*

अ. (Av.) २०.६१.१-६

तं ते मदं गृणीमसि वृषणं पृत्सु सासहिम्। उ लोककृत्नुमद्रिवो हरिश्रियम् ॥१॥
येन ज्योतींष्यायवे मनवे च विवेदिथ। मन्दानो अस्य बर्हिषो वि राजसि ॥२॥
तदद्या चित्त उक्थिनोऽनु ष्टुवन्ति पूर्वथा। वृषपत्नीरपो जया दिवेदिवे ॥३॥
तम्वभि प्र गायत पुरुहूतं पुरुष्टुतम्। इन्द्रं गीर्भिस्तविषमा विवासत ॥४॥
यस्य द्विबर्हसो बृहत् सहो दाधार रोदसी। गिरीँरज्राँ अपः स्वर्वृषत्वना ॥५॥
स राजसि पुरुष्टुतँ एको वृत्राणि जिघ्नसे। इन्द्र जैत्रा श्रवस्याच यन्तवे ॥६॥

*taṁ te madaṁ gṛṇīmasi vṛṣaṇaṁ pṛtsu sāsahim | u lokakṛtnumadrivo hariśriyam ||1 ||*

*yena jyotīṁṣyāyave manave cha viveditha । mandāno asya barhiṣo vi rājasi ॥2 ॥*
*tadadyā chitta ukthino'nu ṣṭuvanti pūrvathā । vṛṣapatnīrapo jayā divedive ॥3 ॥*
*tamvabhi pra gāyata puruhūtaṁ puruṣṭutam । indraṁ gīrbhistaviṣamā vivāsata ॥4 ॥*
*yasya dvibarhaso bṛhat saho dādhāra rodasī । girīm̐rajrām̐ apaḥ svarvṛṣatvanā ॥5 ॥*
*sa rājasi puruṣṭutam̐ eko vṛtrāṇi jighnase । indra jaitrā śravasyācha yantave ॥6 ॥*

अ. (Av.) २०.६२.८-१०

तम्वभि प्र गायत पुरुहूतं पुरुष्टुतम् । इन्द्रं गीर्भिस्तविषमा विवासत ॥८॥
यस्य द्विवर्हसो बृहत् सहो दाधार रोदसी । गिरीँरज्राँ अपः स्वर्वृषत्वना ॥९॥
स राजसि पुरुष्टुतँ एको वृत्राणि जिघ्नसे । इन्द्र जैत्रा श्रवस्याच यन्तवे ॥१०॥

*tamvabhi pra gāyata puruhūtaṁ puruṣṭutam । indraṁ gīrbhistaviṣamā vivāsata ॥8 ॥*
*yasya dvivarhaso bṛhat saho dādhāra rodasī । girīm̐rajrām̐ apaḥ svarvṛṣatvanā ॥9 ॥*
*sa rājasi puruṣṭutam̐ eko vṛtrāṇi jighnase । indra jaitrā śravasyācha yantave ॥10 ॥*

अ. (Av.) २०.१०६.१-३

तव त्यदिन्द्रियं बृहत् तव शुष्ममुत क्रतुम । वज्रं शिशाति धिषणा वरेण्यम् ॥१॥
तव द्यौरिन्द्र पौंस्यं पृथिवी वर्धति श्रवः । तवामापः पर्वतासश्च हिन्विरे ॥२॥
त्वां विष्णुर्बृहन् क्षयो मित्रो गृणाति वरुणः । त्वां शर्धो मदत्यनु मारुतम् ॥३॥

*tava tyadindriyaṁ bṛhat tava śuṣmamuta kratuma ।*
*vajraṁ śiśāti dhiṣaṇā vareṇyam ॥1 ॥*
*tava dyaurindra pauṁsyaṁ pṛthivī vardhati śravaḥ ।*
*tavāmāpaḥ parvatāsaścha hinvire ॥2 ॥*
*tvāṁ viṣṇurbṛhan kṣayeā mitro gṛṇāti varuṇaḥ ।*
*tvāṁ śardho madatyanu mārutam ॥3 ॥*

## २२६. गोषूक्त्यश्वसूक्तिनौ काण्वायनौ (Goṣūkti and Aśvasūkti of Kaṇvāyana)

१. इन्द्रः (Indraḥ) - ऋ. (Rv.) ८.१४.१-१५; ८.१५.१-१३; सा. (Sv.) १२१; १२२ ; २११; ३८२ ; ३८३; ८८०-८८२ ; १६३९-१६४१; १८३४-१८३६

ऋ. (Rv.) ८.१४.१-१५

यदिन्द्राहं यथा त्वमीशीय वस्व एक इत् । स्तोता मे गोषखा स्यात् ॥३४॥
शिक्षेयमस्मै दित्सेयं शचीपते पनीषिणे । यदहं गोपतिः स्याम् ॥२॥
धेनुष्ट इन्द्र सूनृता यजमानाय सुन्वते । गामश्वं पिप्युषी दुहे ॥३॥
न ते वर्तास्ति राधस इन्द्र देवो न मर्त्यः । यद्दित्ससि स्तुतो मघम् ॥४॥
या इन्द्रमवर्धयद्यद्भूमि व्यवर्तयत् । चक्राण ओपशं दिवि ॥५॥
वावृधानस्य ते वयं विश्वा धनानि जिग्युषः । ऊतिमिन्द्रा वृणीमहे ॥६॥
व्य१न्तरिक्षमतिरन्मदे सोमस्य रोचना । इन्द्रो यदभिनद्वलम् ॥७॥
उद्गा आजदंगिरोभ्य आविष्कृण्वन्गुहा सतीः । अर्वांचं ननुदे वलम् । ॥८॥
इन्द्रेण रोचना दिवो दृळ्हानि दृंहितानि च । स्थिराणि न पराणुदे ॥९॥
अपामूर्मिर्मदन्निव स्तोम इन्द्राजिरायते । वि ते मदा अराजिषुः ॥१०॥
त्वं हि स्तोमवर्धन इन्द्रास्युक्थवर्धनः । स्तोतॄणमुत भद्रकृत । ॥११॥
इन्द्रमित्केशिना हरी सोमपेयाय वक्षतः । उप यां सुराधसम् ॥१२॥
अपां फेनेन नमुचेः शिर इन्द्रोदवर्तयः । विश्वा यदजयः स्पृधः ॥१३॥
मायाभिरुत्सिसृप्सत इन्द्र द्यामारुरुक्षतः । अव दस्यूँरधूनुथाः ॥१४॥
असुन्वामिन्द्र संसदं विषूचीं व्यनाशयः । सोमपा उत्तरो भवन् ॥१५॥

*yadindrāhaṁ yathā tvamīśīya vasva eka it । stotā me goṣakhā syāt ॥34 ॥*
*śikṣeyamasmai ditseyaṁ śachīpate panīṣiṇe । yadahaṁ gopatiḥ syām ॥2 ॥*
*dhenuṣṭa indra sūnṛtā yajamānāya sunvate । gāmaśvaṁ pipyuṣī duhe ॥3 ॥*
*na te vartāsti rādhasa indra devo na martyaḥ । yadditsasi stuto magham ॥4 ॥*
*yā indramavardhayadyadbhūmi vyavartayat । chakrāṇa Opaśaṁ divi ॥5 ॥*
*vāvṛdhānasya te vayaṁ viśvā dhanāni jigyuṣaḥ । ūtimindrā vṛṇīmahe ॥6 ॥*

*vya1ntarikṣamatiranmade somasya rochanā । indro yadabhinadvalam ॥7॥*
*udgā ājadaṁgirobhya āviṣkṛṇvanguhā satīḥ । arvāñchaṁ nanude valam । ॥8॥*
*indreṇa rochanā divo dṛḻhāni dṛṁhitāni cha । sthirāṇi na parāṇude ॥9॥*
*apāmūrmirmadanniva stoma indrājirāyate । vi te madā arājiṣuḥ ॥10॥*
*tvaṁ hi stomavardhana indrāsyukthavardhanaḥ । stotṝṇamuta bhadrakṛta । ॥11॥*
*indramitkeśinā harī somapeyāya vakṣataḥ । upa yāṁ surādhasam ॥12॥*
*apāṁ phenena namucheḥ śira indrodavartayaḥ । viśvā yadajayaḥ spṛdhaḥ ॥13॥*
*māyābhirutsisṛpsata indra dyāmārurukṣataḥ । ava dasyūm̐radhūnuthāḥ ॥14॥*
*asunvābhindra saṁsadaṁ viṣūchīṁ vyanāśayaḥ । somapā uttaro bhavan ॥15॥*

ऋ. (Rv.) ८.१५.१-१३

तम्वभि प्र गायत पुरुहूतं पुरुष्टुतम्। इन्द्र गीर्भिस्तविषमा विवासत ॥१॥
यस्य द्विबर्हसो बृहत्सहो दाधार रोदसी। गिरीँरज्राँ अपः स्वर्वृषत्वना ॥२॥
स राजसि पुरुष्टुतँ एको वृत्राणि जिघ्नसे। इन्द्र जैत्रा श्रवस्या च यन्तवे ॥३॥
तं ते मदं गृणीमसि वृषणं पृत्सु सासहिम्। उ लोककृत्नुमद्रिवो हरिश्रियम् ॥४॥
येन ज्योतीष्यायवे मनवे च विवेदिथ। मन्दानो अस्य बर्हिषो वि राजसि ॥५॥
तदद्या चित्त उक्थिनोऽनु ष्टुवन्ति पूर्वथा। वृषपत्नीरपो जया दिवेदिवे ॥६॥
तव त्यदिन्द्रियं बृहत्तव शुष्ममुत क्रतुम्। वज्रं शिशाति धिषणा वरेण्यम् ॥७॥
तव द्यौरिन्द्र पौंस्यं पृथिवी वर्धति श्रवः। त्वामापः पर्वतासश्च हिन्विरे॥८॥
त्वां विष्णुर्बृहन् क्षयो मित्रो गृणाति वरुणः । त्वां शर्धो मदत्यनु मारुतम् ॥९॥
त्वं वृषा जनानां मंहिष्ठ इन्द्र जिषे। सत्रा विश्वा स्वपत्यानि दधिषे ॥१०॥
सत्रात्वं पुरुष्टुतँ एको वृत्राणि तोशसे। नान्य इन्द्रात् करणं भूय इन्वति ॥११॥
यदिन्द्र मन्मशस्त्वा नाना हवन्त ऊतये। अस्माकेभिर्नृभिरत्रा स्वर्जय ॥१२॥
अरं क्षयाय नो महे विश्वा रूपाण्याविशन्। इन्द्रं जैत्राय हर्षया शचीपतिम् ॥१३॥

*tamvabhi pra gāyata puruhūtaṁ puruṣṭutam । indra gīrbhistaviṣamā vivāsata ॥1॥*
*yasya dvibarhaso bṛhatsaho dādhāra rodasī । girīm̐rajrām̐ apaḥ svarvṛṣatvanā ॥2॥*
*sa rājasi puruṣṭutam̐ eko vṛtrāṇi jighnase । indra jaitrā śravasyā cha yantave ॥3॥*
*taṁ te madaṁ gṛṇīmasi vṛṣaṇaṁ pṛtsu sāsahim ।*
*u lokakṛtnumadrivo hariśriyam ॥4॥*
*yena jyotīṣyāyave manave cha viveditha । mandāno asya barhiṣo vi rājasi ॥5॥*
*tadadyā chitta ukthino'nu ṣṭuvanti pūrvathā । vṛṣapatnīrapo jayā divedive ॥6॥*
*tava tyadindriyaṁ bṛhattava śuṣmamuta kratum ।*
*vajraṁ śiśāti dhiṣaṇā vareṇyam ॥7॥*
*tava dyaurindra pauṁsyaṁ pṛthivī vardhati śravaḥ ।*
*tvāmāpaḥ parvatāsaścha hinvire ॥8॥*
*tvāṁ viṣṇurbṛhan kṣayo mitro gṛṇāti varuṇaḥ ।*
*tvāṁ śardho madatyanu mārutam ॥9॥*
*tvaṁ vṛṣā janānāṁ maṁhiṣṭha indra jiāṣe । satrā viśvā svapatyāni dadhiṣe ॥10॥*
*satrātvaṁ puruṣṭutam̐ eko vṛtrāṇi tośase । nānya indrāt karaṇaṁ bhūya invati ॥11॥*
*yadindra manmaśastvā nānā havanta ūtaye । asmākebhirnṛbhiratrā svarjaya ॥12॥*
*araṁ kṣayāya no mahe viśvā rūpāṇyāviśan ।*
*indraṁ jaitrāya harṣayā śachīpatim ॥13॥*

सा. (Sv.) १२१-२२

या इन्द्रमवर्धयद्यद्भूमिं व्यवर्तयत्। चक्राण ओपशं दिवि ॥७॥
यदिन्द्राहं यथा त्वमीशीय वस्व एक इत्। स्तोता मे गोसखा स्यात्॥८॥

*yā indramavardhayadyadbhūmiṁ vyavartayat । chakrāṇa Opaśaṁ divi ॥7॥*
*yadindrāhaṁ yathā tvamīśīya vasva eka it । stotā me gosakhā syāt ॥8॥*

सा. (Sv.) २११

अपां फेनेन नमुचेः शिर इन्द्रोदवर्तयः। विश्वा यदजय स्पृधः ॥८॥

*apāṁ phenena namucheḥ śira indrodavartayaḥ | viśvā yadajaya spṛdhaḥ ||8 ||*

सा. (Sv.) ३८२-८३

तमु अभि प्र गायत पुरुहूतं पुरुष्टुतम्। इन्द्र गीर्भिस्तविषमा विवासत ॥२॥

तं ते मदं गृणीमसि वृषणं पृक्षु सासहिम्। उ लोलकृत्नुमद्रिवो हरिश्रियम् ॥३॥

*tamu abhi pra gāyata puruhūtaṁ puruṣṭutam | indra gīrbhistaviṣamā vivāsata ||2 ||*

*taṁ te madaṁ gṛṇīmasi vṛṣaṇaṁ pṛkṣu sāsahim | u lolakṛtnumadrivo hariśriyam ||3 ||*

सा. (Sv.) ८८०-८८२

तं ते मदं गृणीमसि वृषणं पृक्षु सासहिम्। उ लोककृत्नुमद्रिवो हरिश्रियम् ॥१॥

येन ज्योतिष्यायवे मनवे च विवेदिथ। मन्दानो अस्य बर्हिषो वि राजसि ॥२॥

तदद्या चित्त उक्थिनोऽनु ष्टुवन्ति पूर्वथा। वृषपत्नीरपो जया दिवे दिवे ॥३॥

*taṁ te madaṁ gṛṇīmasi vṛṣaṇaṁ pṛkṣu sāsahim | u lokakṛtnumadrivo hariśriyam ||1 ||*

*yena jyotiṣyāyave manave cha viveditha | mandāno asya barhiṣo vi rājasi ||2 ||*

*tadadyā chitta ukthino'nu ṣṭuvanti pūrvathā | vṛṣapatnīrapo jayā dive dive ||3 ||*

सा. (Sv.) १६३९-१६४१

या इन्द्रमवर्धयद्यद्भूमिं व्यवर्तयत्। चक्राण ओपशं दिवि ॥१॥

व्या३न्तरिक्षमतिरन्मदे सोमस्य रोचना। इन्द्रो यदभिनद्वलम् ॥२॥

उद्गा आजदंगिरोभ्य आविष्कृण्वन्गुहा सतीः। अर्वांचं नुनुदे वलम्॥३॥

*yā indramavardhayadyadbhūmiṁ vyavartayat | chakrāṇa Opaśaṁ divi ||1 ||*

*vyā3ntarikṣamatiranmade somasya rochanā | indro yadabhinadvalam ||2 ||*

*udgā ājadaṁgirobhya āviṣkṛṇvanguhā satīḥ | arvāṁchaṁ nunude valam ||3 ||*

सा. (Sv.) १८३४-१८३६

यदिन्द्राहं यथा त्वमीशीय वस्व एक इत्। स्तोता मे गोसखा स्यात्॥१॥

शिक्षेयमस्मै दित्सेयं शचीपते मनीषिणे। यदहं गोपतिः स्याम् ॥२॥

धेनुष्ट इन्द्र सूनृता यजमानाय सुन्वते। गामश्वं पिप्युषी दुहे॥३॥

*yadindrāhaṁ yathā tvamīśīya vasva eka it | stotā me gosakhā syāt ||1 ||*

*śikṣeyamasmai ditseyaṁ śachīpate manīṣiṇe | yadahaṁ gopatiḥ syām ||2 ||*

*dhenuṣṭa indra sūnṛtā yajamānāya sunvate | gāmaśvaṁ pipyuṣī duhe ||3 ||*

## २२७. गौतमः (Gautamaḥ)

१. इन्द्रः (Indraḥ) - य. (Yv.)६.३७

त्वमंग प्रशं सिषो देवः शविष्ठ मर्त्यम्।

न त्वदन्यो मघवन्नस्ति मर्डितेन्द्र ब्रवीमि ते वचः ॥३७॥

*tvamaṁga praśaṁ siṣo devaḥ śaviṣṭha martyam |*

*na tvadanyo maghavannasti marḍitendra bravīmi te vachaḥ ||37 ||*

## २२८. गौतमः - नोधा - द्र.नोधा (Gautamaḥ - Nodhā - Seenodhā)

## २२९. गौर् आंगिरसः (Gaur Āṁgirasaḥ)

१. सूर्यः (Sūryaḥ) - सा. (Sv.) ४५८

अयं सहस्रमानवो दृशः कवीनां मतिर्ज्योतिर्विधर्म ।

ब्रध्नः समीचीरुषसः समैरयदरेपसः सचेतसः स्वसरे मन्युमन्श्चिता गोः ॥२॥

*ayaṁ sahasramānavo dṛśaḥ kavīnāṁ matirjyotirvidharma |*

*bradhnaḥ samīchīruṣasaḥ samairayadarepasaḥ sachetasaḥ svasare manyumanśchitā goḥ ||2 ||*

## २३०. गौरिवीतिः (Gaurivītiḥ)

१. इन्द्रः (Indraḥ) - ऋ. (Rv.) १०.७३.१-११; १०.७४.१-६; य. (Yv.)३३.२८; ६४

ऋ. (Rv.) १०.७३.१-११

जनिष्ठा उग्रः सहसे तुराय मन्द्र ओजिष्ठो वहुलाभिमानः ।
अवर्धन्निन्द्रं मरुतश्चिदत्र माता यद्वीरं दधनद्धनिष्ठा ॥१॥
द्रुहो निषत्ता पृशनी चिदेवैः पुरू शंसेन वावुधुष्ट इन्द्रम् ।
अभीवृतेव ता महापदेन ध्वान्तात्प्रपित्वादुदरन्त गर्भाः ॥२॥
ऋष्वा ते पादा प्र यज्जिगास्यवर्धन्वाजा उत ये चिदत्र ।
त्वमिन्द्र सालावृकान्त्सहस्रमासन्दधिषे अश्विना ववृत्याः ॥३॥
समना तूर्णिरुप यासि यामा नासत्या सख्याय वक्षि ।
वसाव्यामिन्द्र धारयः सहस्राश्विना ददतुर्मघानिं ॥४॥
मन्दमान ऋतादधि प्रजायै सखिभिरिन्द्र इषिरेभिरर्थम् ।
अभिर्हि माया उप दस्युमागान्मिहः प्र तम्रा अवपत्तमांसि ॥५॥
सनामाना चिद् ध्वसयो न्यस्मा अवाहन्निन्द्र उषसो यथा नः ।
ऋष्वैरगच्छः सखिभिर्निकामैः साकं प्रतिष्ठा हृद्या जघन्थ ॥६॥
त्वं जघन्थ नमुचिं मखस्युं दासं कृण्वान् ऋषये विमायम् ।
त्वं चकर्थ मनवे स्योनान्पथो देवत्रांजसेव यानान् ॥७॥
त्वमेतानि पप्रिषे वि नामेशान इन्द्र दधिषे गभस्तौ ।
अनु त्वा देवाः शवसा मदन्त्युपरिबुध्नान्वनिनश्चकर्थ ॥८॥
चक्रं यदस्याप्स्वा निषत्तमुतो तदस्मै मध्विच्चच्छद्यात् ।
पृथिव्यामतिषितं यदूधः पयो गोष्वदधा ओषधीषु ॥९॥
अश्वदियायेति यद्वदन्त्योजसो जातमुत मन्य एनम् ।
मन्योरियाय हर्म्येषु तस्थौ यतः प्रजा इन्द्रो अस्य वेद ॥१०॥
वयः सुपर्णा उप सेदुरिन्द्रं प्रियमेधा ऋषयो नाधमानाः ।
अप ध्वान्तमूर्णुहि पूर्धि चक्षुर्मुमुग्ध्य१ स्मान्निधयेव बद्धान् ॥११॥

*janiṣṭhā ugraḥ sahase turāya mandra Ojiṣṭho vahulābhimānaḥ /*
*avardhannindraṁ marutaśchidatra mātā yadvīraṁ dadhnaddhaniṣṭhā //1 //*
*druho niṣattā pṛśanī chidevaiḥ purū śaṁsena vāvudhuṣṭa indram /*
*abhīvṛteva tā mahāpadena dhvāntātprapitvādudaranta garbhāḥ //2 //*
*ṛṣvā te pādā pra yajjigāsyavardhanvājā uta ye chidatra /*
*tvamindra sālāvṛkāntsahasramāsandadhiṣe aśvinā vavṛtyāḥ //3 //*
*samanā tūrṇirupa yāsi yāmā nāsatyā sakhyāya vakṣi /*
*vasāvyāmindra dhārayaḥ sahasrāśvinā dadaturmaghāniṁ //4 //*
*mandamāna ṛtādadhi prajāyai sakhibhirindra iṣirebhirartham /*
*abhirhi māyā upa dasyumāgānmihaḥ pra tamrā avapattamāṁsi //5 //*
*sanāmānā chid dhvasayo nyasmā avāhannindra uṣaso yathā naḥ /*
*ṛṣvairagachchhaḥ sakhibhirnikāmaiḥ sākaṁ pratiṣṭhā hṛdyā jaghntha //6 //*
*tvaṁ jaghantha namuchiṁ makhasyuṁ dāsaṁ kṛṇvān ṛṣaye vimāyam /*
*tvaṁ chakartha manave syonānpatho devatrāṁjaseva yānān //7 //*
*tvametāni papriṣe vi nāmeśāna indra dadhiṣe gabhastau /*
*anu tvā devāḥ śavasā madantyuparibudhnānvaninaśchakartha //8 //*
*chakraṁ yadasyāpsvā niṣattamuto tadasmai madhvichchachchhadyāt /*
*pṛthivyāmatiṣitaṁ yadūdhaḥ payo goṣvadadhā Oṣadhīṣu //9 //*
*aśvadiyāyeti yadvadantyojaso jātamuta manya enam /*
*manyoriyāya harmyeṣu tasthau yataḥ prajā indro asya veda //10 //*
*vayaḥ suparṇā upa sedurindraṁ priyamedhā ṛṣayo nādhamānāḥ /*
*apa dhvāntamūrṇuhi pūrdhi chakṣurmumugdhya1 smānnidhayeva baddhān //11 //*

ऋ. (Rv.) १०.७४.१-६

वसूनां वा चर्कृष इयक्षन्धिया वा यौर्वा रोदस्योः ।
अर्वन्तो वा ये रयिमन्तः सातौ वनुं वा ये सुश्रुणं सुश्रुतो धुः ॥१॥
हव एषामसुरो नक्षत द्यां श्रवस्यता मनसा निंसत क्षाम् ।
चक्षाणा यत्र सुविताय देवा द्यौर्न वारेभिः कृणवन्त स्वैः ॥२॥
इयमेषाममृतानां गीः सर्वताता ये कृपणन्त रत्नम् ।
धियं च यां च साधन्तस्ते नो धान्तु वसव्य१ मसामि ॥३॥
आ तत्त इन्द्रायवः पनन्ताभि य ऊर्व गोमन्तं तितृत्सान् ।
सकृत्स्वं१ ये पुरुपुत्रां महीं स्रहस्रधारां बृहतीं दुदुक्षन् ॥४॥
शचीव इन्द्रमवसे कृणुध्वमनानतं दमयन्तं पृतन्यून् ।
ऋभुक्षणं मघवानं सुवृक्तिं भर्ता यो वज्रं नर्य पुरुक्षुः ॥५॥
यद्वावान पुरुतमं पुराषाळा वृत्रहेन्द्रो नामान्यप्राः ।
अचेति प्रासहस्पतिस्तुविष्मान्यदीमुश्मसि कर्तवे करत्तत् ॥६॥

*vasūnāṁ vā charkṛṣa iyakṣandhiyā vā yaurvā rodasyoḥ ।*
*arvanto vā ye rayimantaḥ sātau vanuṁ vā ye suśruṇaṁ suśruto dhuḥ ॥1॥*
*hava eṣāmasuro nakṣata dyāṁ śravasyatā manasā niṁsata kṣām ।*
*chakṣāṇā yatra suvitāya devā dyaurna vārebhiḥ kṛṇavanta svaiḥ ॥2॥*
*iyameṣāmamṛtānāṁ gīḥ sarvatātā ye kṛpaṇanta ratnam ।*
*dhiyaṁ cha yāṁ cha sādhantaste no dhāntu vasavya1 masāmi ॥3॥*
*ā tatta indrāyavaḥ panantābhi ya ūrva gomantaṁ titṛtsān ।*
*sakṛtsvaṁ1 ye puruputrāṁ mahīṁ srahasradhārāṁ bṛhatīṁ dudukṣan ॥4॥*
*śachīva indramavase kṛṇudhvamanānataṁ damayantaṁ pṛtanyūn ।*
*ṛbhukṣaṇaṁ maghavānaṁ suvṛktiṁ bhartā yo vajraṁ narya purukṣuḥ ॥5॥*
*yadvāvāna purutamaṁ purāṣāḻā vṛtrahendro nāmānyaprāḥ ।*
*acheti prāsahaspatistuviṣmānyadīmuśmasi kartave karattat ॥6॥*

य. (Yv.)३३.२८

आ तत्तऽइन्द्रायवः पनन्ताभि यऽऊर्व गासेमन्तं तितृत्सान् ।
सकृत्स्वं ये पुरुपुत्रां महींसहस्रधारां बृहतीं दुदुक्षन् ॥२८॥

*ā tatta'indrāyavaḥ panantābhi ya'ūrva gāsemantaṁ titṛtsān ।*
*sakṛtsvaṁ ye puruputrāṁ mahīṁsahasradhārāṁ bṛhatīṁ dudukṣan ॥28॥*

य. (Yv.)३३.६४

जनिष्ठाऽउग्रः सहसे तुराय मन्द्रऽओजिष्ठो बहुलाभिमानः ।
अवर्द्धन्निन्द्रं मरुतश्चिदत्र माता यद्वीरं दधनद्धनिष्ठा ॥६४॥

*janiṣṭhā'ugraḥ sahase turāya mandra'Ojiṣṭho bahulābhimānaḥ ।*
*avarddhannindraṁ marutaśchidatra mātā yadvīraṁ dadhanaddhaniṣṭhā ॥64॥*

२. पवमानः सोमः (Pavamānaḥ Somaḥ)

ऋ. (Rv.) ९.१०८.१-२

पवस्व मधुमत्तम इन्द्राय सोम क्रतुवित्तमो मदः । महि द्युक्षतमो मदः ॥१॥
यस्य ते पीत्वा वृषभो वृषायतेऽस्य पीता स्वर्विदः ।
स सुप्रकेतो अभ्यक्रमीदिषोऽच्छा वाजं नैतशः ॥२॥

*pavasva madhumattama indrāya soma kratuvittamo madaḥ ।*
*mahi dyukṣatamo madaḥ ॥1॥*
*yasya te pītvā vṛṣabho vṛṣāyate'sya pītā svarvidaḥ ।*
*sa supraketo abhyakramīdiṣo'chchhā vājaṁ naitaśaḥ ॥2॥*

## २३१. गौरिवीतिः शाक्त्यः (Gaurivītiḥ Śāktyaḥ)

१. इन्द्रः (Indraḥ) - ऋ. (Rv.) ५.२९.१-१५

त्र्यर्यमा मनुषो देवताता त्री रोचना दिव्या धारयन्त ।
अर्चन्ति त्वा मरुतः पूतदक्षास्त्वमेषामृषिरिन्द्रासि धीरः ॥१॥
अनु यदीं मरुतो मन्दसानमार्चन्निन्द्रं पपिवांसं सुतस्य ।
आदत्त वज्रमभि यदहिं हन्नपो यह्वीरसृजत्सर्तवा उ ॥२॥
उत ब्रह्माणो मरुतो मे अस्येन्द्रः सोमस्य सुषुतस्य पेयाः ।
तद्धि हव्यं मनुषे गा अविन्ददहन्नहिं पपिवाँ इन्द्रो अस्य ॥३॥
आद्रोदसी वितरं विष्कभायत्संविव्यानश्चिद्भियसे मृगं कः ।
जिगर्तिमिन्द्रो अपजर्गुराणः प्रति श्वसन्तमव दानवं हन् ॥४॥
अध क्रत्वा मघवन्तुभ्यं देवा अनु विश्वे अददुः सोमपेयम् ।
यत्सूर्यस्य हरितः पतन्तीः पुरः सतीरुपरा एतशे कः ॥५॥
नव यदस्य नवतिं च भोगान्त्साकं वज्रेण मघवा विवृश्चत् ।
अर्चन्तीन्द्रं मरुतः सधस्थे त्रैष्टुभेन वचसा बाधत द्याम् ॥६॥
सखा सख्ये अपचत्तूयमग्निरस्य क्रत्वा महिषा त्री शतानि ।
त्री साकमिन्द्रो मनुषः सरांसि सुतं पिबद्वृत्रहत्याय सोमम् ॥७॥
त्री यच्छता महिषाणामधो मास्त्री सरांसि मघवा सोम्यापाः ।
कारं न विश्वे अह्वन्त देवा भरमिन्द्राय यदहिं जघान ॥८॥
उशना यत्सहस्यैऽरयातं गृहमिन्द्र जूजुवानेभिश्वैः ।
वन्वानो अत्र सरथं ययाथा कुत्सेन देवैरवनोर्ह शुष्णम् ॥९॥
प्रान्यच्चक्रमवृहः सूर्यस्य कुत्सायान्यद्वरिवो यातवेऽकः ।
अनासो दस्यूँरमृणो वधेन नि दुर्योण आवृणङ् मृध्रवाचः ॥१०॥
स्तोमासस्त्वा गौरिवीतेव र्धन्नरन्धयो वैदथिनाय पिप्रुम् ।
आ त्वामृजिश्वा सख्याय चक्रे पचन्पक्तीरपिबः सोममस्य ॥११॥
नवग्वासः सुतसोमास इन्द्रं दशग्वासो अभ्यर्चन्त्यर्कैः ।
गव्यं चिदूर्वमपिधानवन्तं तं चिन्नरः शशमाना अप व्रन् ॥१२॥
कथो नु ते परि चराणि विद्वान्वीर्या मघवन्या चकर्थ ।
या चो नुनव्या कृणवः शविष्ठ प्रेदु ता ते विदथेषु ब्रवाम् ॥१३॥
एता विश्वा चकृवाँ इन्द्र भूर्यपरीतो जनुषा वीर्येण ।
या चिन्नु वज्रिन्कृणवो दधृष्वान्न ते वर्ता तविष्या अस्ति तस्याः ॥१४॥
इन्द्र ब्रह्म क्रियमाणा जुषस्व या ते शविष्ठ नव्या अकर्म ।
वस्त्रेव भद्रा सुकृता वसूयू रथं न धीरः स्वपा अतक्षम् ॥१५॥

*trayaryamā manuṣo devatātā trī rochanā divyā dhārayanta /*
*archanti tvā marutaḥ pūtadakṣāstvameṣāmṛṣirindrāsi dhīraḥ //1 //*
*anu yadīṁ maruto mandasānamārchannindraṁ papivāṁsaṁ sutasya /*
*ādatta vajramabhi yadahiṁ hannapo yahnīrasṛjatsartavā u //2 //*
*uta brahmāṇo maruto me asyendraḥ somasya suṣutasya peyāḥ /*
*taddhi havyaṁ manuṣe gā avindadahannahiṁ papivām̐ indro asya //3 //*
*ādrodasī vitaraṁ viṣkabhāyatsaṁvivyānaśchadbhiyase mṛgaṁ kaḥ /*
*jigartimindro apajargurāṇaḥ prati śvasantamava dānavaṁ han //4 //*
*adha kratvā maghavantubhyaṁ devā anu viśve adaduḥ somapeyam /*
*yatsūryasya haritaḥ patantīḥ puraḥ satīruparā etaśe kaḥ //5 //*
*nava yadasya navatiṁ cha bhogāntsākaṁ vajreṇa maghavā vivṛśchat /*
*archantīndraṁ marutaḥ sadhasthe traiṣṭubhena vachasā bādhata dyām //6 //*
*sakhā sakhye apachattūyamagnirasya kratvā mahiṣā trī śatāni /*
*trī sākamindro manuṣaḥ sarāṁsi sutaṁ pibadvṛtrahatyāya somam //7 //*
*trī yachchhatā mahiṣāṇāmadho māstrī sarāṁsi maghavā somyāpāḥ /*

*kāraṁ na viśve ahnanta devā bharamindrāya yadahiṁ jaghāna //8 //*
*uśanā yatsahasyai3rayātaṁ gṛhamindra jūjuvānebhiśvaiḥ /*
*vanvāno atra sarathaṁ yayāthā kutsena devairavanorha śuṣṇam //9 //*
*prānyachchakramavṛhaḥ sūryasya kutsāyānyadvarivo yātave'kaḥ /*
*anāso dasyūm̐ramṛṇo vadhena ni duryoṇa āvṛṇaṅ mudhravāchaḥ //10 //*
*stomāsastvā gaurivīteva rdhannarandhayo vaidathināya piprum /*
*ā tvāmṛjiśvā sakhyāya chakre pachanpaktīrapibaḥ somamasya //11 //*
*navagvāsaḥ sutasomāsa indraṁ daśagvāso abhyarchantyarkaiḥ /*
*gavyaṁ chidūrvamapidhānavantaṁ taṁ chinnaraḥ śaśamānā apa vran //12 //*
*katho nu te pari charāṇi vidvānvīryā maghavanyā chakartha /*
*yā cho nunavyā kṛṇavaḥ śaviṣṭha predu tā te vidatheṣu bravām //13 //*
*etā viśvā chakṛvām̐ indra bhūryaparīto januṣā vīryeṇa /*
*yā chinnu vajrinkṛṇavo dadhṛṣvānna te vartā taviṣyā asti tasyāḥ //14 //*
*indra brahma kriyamāṇā juṣasva yā te śaviṣṭha navyā akarma /*
*vastreva bhadrā sukṛtā vasūyū rathaṁ na dhīraḥ svapā atakṣam //15 //*

२. इन्द्रः उशना वा (Indraḥ Uśanā Vā) - ऋ. (Rv.) ५.२९.९

उशना यत्सहस्यै३रयातं गृहमिन्द्र जूजुवानेभिरश्वैः ।
वन्वानो अत्र सरथं ययाथ कुत्सेन देवैरवनोर्ह शुष्णम् ॥९॥
*uśanā yatsahasyai3rayātaṁ gṛhamindra jūjuvānebhiraśvaiḥ /*
*vanvāno atra sarathaṁ yayātha kutsena devairavanorha śuṣṇam //9 //*

## २३२. गर्गो भारद्वाजः (ऋसर्व. ६.४७.११); भारद्वाजः (साग्री. सास्वा. सार्षेदी.) (Gargo Bhāradvājaḥ [Rss. 6.47.11); Bhāradvājaḥ [Ssb. Sas. Sad.]

१. इन्द्रः (Indraḥ) - सा. (Sv.) ३३३

त्रातारमिन्द्रमवितारमिन्द्रं हवेहवे सुहवं शूरमिन्द्रम् ।
हुवे नु शक्रं पुरुहूतमिन्द्रमिदं हविर्मघवा वेत्विन्द्रः ॥२॥
*trātāramindramavitāramindraṁ havehave suhavaṁ śūramindram /*
*huve nu śakraṁ puruhūtamindramidaṁ havirmaghavā vetvindraḥ //2 //*

## २३३. घर्मः सौर्यः (Gharmaḥ Sauryaḥ)

१. विश्वेदेवाः (Viśvedevāḥ) - ऋ. (Rv.) १०.१८१.३

तेऽविन्दन्मनसा दीध्याना यजुः ष्कन्नं प्रथमं देवयानम् ।
धातुर्द्युतानात्सवितुश्च विष्णोरा सूर्यादभरन्घर्ममेते ॥३॥
*te'vindanmanasā dīdhyānā yajuḥ ṣkannaṁ prathamaṁ devayānam /*
*dhāturdyutānātsavituścha viṣṇorā sūryādabharangharmamete //3 //*

## २३४. घोर आंगिरसः (Ghora Āṁgirasaḥ)

१. इन्द्रः (Indraḥ) - ऋ. (Rv.) ३.३६.१०

अस्मे प्र यन्धि मघवन्नृजीषिन्निन्द्र रायो विश्वावारस्य भूरेः ।
अस्मे शतं शरदो जीवसे धा अस्मे वीरांछश्वत इन्द्र शिप्रिन् ॥१०॥
*asme pra yandhi maghavannṛjīṣinnindra rāyo viśvāvārasya bhūreḥ /*
*asme śataṁ śarado jīvase dhā asme vīrāṁchhaśvata indra śiprin //10 //*

## २३५. घोषा काक्षीवती (Ghoṣā Kākṣīvatī)

१. अश्विनौ (Aśvinau) - ऋ. (Rv.)१०.३९.१-१४; १०.४०.१-१४

ऋ. (Rv.) १०.३९.१-१४

यो वां परिज्मा सुवृदश्विना रथे दोषामुषासो हव्यो हविष्मता ।
शश्वत्तमासस्तमु वामिदं वयं पितुर्न नाम सुहवं हवामहे ॥१॥
चोदयतं सूनृताः पिन्वतं धिय उत्पुरन्धीरीरयतं तदुश्मसि ।

यशसं भागं कृणुतं नो अश्विना सोमं न चारुं मघवत्सु नस्कृतम् ॥२॥
अमाजुरश्चिद्भवथो युवं भगोऽनाशोश्चिदवितारापमस्य चित् ।
अन्धस्य चिन्नासत्या कृशस्य चिद्युवामिदाहुर्भिषजा रुतस्य चित् ॥३॥
युवं च्यवानं सनयं यथा रथं पुनर्युवानं चरथाय तक्षथुः ।
निष्टौग्रयमूहथुरद्भ्यस्परि विश्वेत्ता वां सवनेषु प्रवाच्या ॥४॥
पुराणा वां वीर्या३ प्र ब्रवा जनेऽथो हासथुर्भिषजा मयोभुवा ।
ता वां नु नव्यावावसे करामहेऽयं नासत्या श्रदरिर्यथा दधत् ॥५॥
इयं वामह्वे श्रृणतं मे अश्विना पुत्रायेव पितरा मह्यं शिक्षतम् ।
अनापिराा असजात्यामतिः पुरा तस्या अभिशस्तेरव स्पृतम् ॥६॥
युवं रथेन विमदाय शुन्ध्युवं न्यूहथुः पुरुमित्रस्य योषाणाम् ।
युवं हवं वध्रिमत्या अगच्छतं युवं सुषुतिं चक्रथुः पुरन्धये ॥७॥
युवं विप्रस्य जरणामुपेयुषः पुनः कलेरकृणुतं युवद्वयः ।
युवं वन्दनमृश्यदादुदूपथुर्युवं सद्यो विश्पलामेतवे कृथः ॥८॥
युवं ह रेभं वृषणा गुहा हितमुदैरयतं ममृवांसमश्विना ।
युवमृबीसमुत तप्तमत्रय ओमन्वन्तं चक्रथुः सप्तवध्रये ॥९॥
युवं श्वेतं पेदवेऽश्विानाश्वं नवभिर्वाजैर्नवती च वाजिनम् ।
चर्कृत्यं ददथुर्द्रावयत्सखं भगं न नृभ्यो हव्यं मयोभुवम् ॥१०॥
न तं राजानावदिते कुतश्चन नांहो अश्नोति दुरितं नाकिर्भयम् ।
यमश्विना सुहवा रुद्रवर्तनी पुरोरथं कृणुथः पत्न्या सह ॥११॥
आ तेन यातं मनसो जवीयसा रथं यं वामृभवश्चक्रुरश्विना ।
यस्य योगे दुहिता जायते दिव उभे अहनी सुदिने विवस्वतः ॥१२॥
ता वर्तिर्यातं जयुषा वि पर्वतमपिन्वतं शयवे धेनुमश्विना ।
वृकस्य चिद्वर्तिकामन्तरास्याद्युवं शचीभिर्ग्रसिताममुंचतम् ॥१३॥
एतं वां स्तोममश्विनावकर्मातक्षाम भृगवो न रथम् ।
न्यमृक्षाम योषणां न मर्ये नित्यं न सूनुं तनयं दधानाः ॥१४॥

*yo vāṁ parijmā suvṛdaśvinā rathe dopāmuṣāso havyo haviṣmatā* ।
*śaśvattamāsastamu vāmidaṁ vayaṁ piturna nāma suhavaṁ havāmahe* ॥1॥
*chodayataṁ sūnṛtāḥ pinvataṁ dhiya utpurandhīrīrayataṁ taduśmasi* ।
*yaśasaṁ bhāgaṁ kṛṇutaṁ no aśvinā somaṁ na chāruṁ maghavatsu naskṛtam* ॥2॥
*amājuraśchidbhavatho yuvaṁ bhago'nāśośchidavitārāpamasya chit* ।
*andhasya chinnāsatyā kṛśasya chidyuvāmidāhurbhiṣajā rutasya chit* ॥3॥
*yuvaṁ chyavānaṁ sanayaṁ yathā rathaṁ punaryuvānaṁ charathāya takṣathuḥ* ।
*niṣṭaugrayamūhathuradbhyaspari viśvettā vāṁ savaneṣu pravāchyā* ॥4॥
*purāṇā vāṁ vīryā3 pra bravā jane'tho hāsathurbhiṣajā mayobhuvā* ।
*tā vāṁ nu navyāvavase karāmahe'yaṁ nāsatyā śradariryathā dadhat* ॥5॥
*iyaṁ vāmahne śṛṇataṁ me aśvinā putrāyeva pitarā mahyaṁ śikṣatam* ।
*anāpirāā asajātyāmatiḥ purā tasyā abhiśasterava spṛtam* ॥6॥
*yuvaṁ rathena vimadāya śundhyuvaṁ nyūhathuḥ purumitrasya yoṣāṇām* ।
*yuvaṁ havaṁ vadhrimatyā agachchhataṁ yuvaṁ suṣutiṁ chakrathuḥ purandhaye* ॥7॥
*yuvaṁ viprasya jaraṇāmupeyuṣaḥ punaḥ kalerakṛṇutaṁ yuvadvayaḥ* ।
*yuvaṁ vandanamṛśyadādudūpathuryuvaṁ sadyo viśpalāmetave kṛthaḥ* ॥8॥
*yuvaṁ ha rebhaṁ vṛṣaṇā guhā hitamudairayataṁ mamṛvāṁsamaśvinā* ।
*yuvamṛbīsamuta taptamatraya Omanvantaṁ chakrathuḥ saptavadhraye* ॥9॥
*yuvaṁ śvetaṁ pedave'śviānāśvaṁ navabhirvājairnavatī cha vājinam* ।
*charkṛtyaṁ dadathurdrāvayatsakhaṁ bhagaṁ na nṛbhyeā havyaṁ mayobhuvam* ॥10॥
*na taṁ rājānāvadite kutaśchana nāṁho aśnoti duritaṁ nākirbhayam* ।

*yamaśvinā suhavā rudravartanī purorathaṁ kṛṇuthaḥ patnyā saha //11 //*
*ā tena yātaṁ manaso javīyasā rathaṁ yaṁ vāmṛbhavaśchakruraśvinā /*
*yasya yoge duhitā jāyate diva ubhe ahanī sudine vivasvataḥ //12 //*
*tā vartiryātaṁ jayuṣā vi parvatamapinvataṁ śayave dhenumaśvinā /*
*vṛkasya chidvartikāmantarāsyādyuvaṁ śachībhirgrasitāmamuṁchatam //13 //*
*etaṁ vāṁ stomamaśvināvakarmātakṣāma bhṛgavo na ratham /*
*nyamṛkṣāma yoṣaṇāṁ na marye nityaṁ na sūnuṁ tanayaṁ dadhānāḥ //14 //*

ऋ. (Rv.) १०.४०.१-१४

रथं यान्तं कुह को ह वां नरा प्रति द्युमन्तं सुविताय भूषति ।
प्रातर्यावाणं विभ्वं विशेविशे वस्तोर्वस्तोर्वहमानं धिया शमि ॥१॥
कुह स्विद्दोषा कुह वस्तोरश्विना कुहाभिपित्वं करतः कुहोषतुः ।
को वां शयुत्रा विधवेव देवरं मर्य न योषा कृणुते सधस्थ आ ॥२॥
प्रातर्जरेथे जरणेव कापया वस्तोर्वस्तोर्यजता गच्छथो गृहम् ।
कस्य ध्वस्रा भवथः कस्य वा नरा राजपुत्रेव सवनाव गच्छथः ॥३॥
युवां मृगेव वारणा मृगण्यवो दोषा वस्तोर्हविषा नि ह्वयामहे ।
युवं होत्रामृतुथा जुह्वते नरेषं जनाय वहथः शुभस्पती ॥४॥
युवो ह घोषा पर्यश्विना यती राा ऊचे दुहिता पृच्छे वां नरा ।
भूतं मे अह्न उत भूतमक्तवेऽश्वावते रथिने शक्तमर्वते ॥५॥
युवं कवी ष्ठः पर्यश्विना रथं विशो न कुत्सो जरितुर्नशायथः ।
युवोर्ह मक्षा मर्यश्विना मध्वासा भरत निष्कृतं न योषणा ॥६॥
युवं ह भुज्युं युवमश्विना वशं युवं शिंजारमुशनामुपारथुः ।
युवो ररावा परि सख्यमासते युवोरहमवसा सुम्नमा चके ॥७॥
युवं ह कृशं युवमश्विना शयुं युवं विधन्तं विधवामुरुष्यथः ।
युवं सनिभ्यः स्तनयन्तमश्विनाप व्रजमूर्णुथः सप्तास्यम् ॥८॥
जनिष्ट योषा पतयत्कनीनको वि चारुहन्वीरुधो दंसना अनु ।
आस्मै रीयन्ते निवनेव सिन्धवोऽस्मा अह्ने भवति तत्पतित्वनम् ॥९॥
जीवं रुदन्ति वि मयन्ते अध्वरे दीर्घामनु प्रसितिं दीधियुर्नरः ।
वामं पितृभ्यो य इदं समेरिरे मयः पतिभ्यो जनयः परिष्वजे ॥१०॥
न तस्य विद्म तदु षु प्र वोचत युवा ह यद्युवत्याः क्षेति योनिषु ।
प्रियोस्रियस्य वृषभस्य रेतिनो गृहं गमेमाश्विना तदुश्मसि ॥११॥
आ वामगन्त्सुमतिर्वाजिनीवसू न्यश्विना हृत्सु कामा अयंसत ।
अभूतं गोपा मिथुना शुभस्पती प्रिया अर्यम्णो दुर्यां अशीमहि ॥१२॥
ता मन्दसाना मनुषो दुरोण आ धत्तं रयिं सहवीर वचस्यवे ।
कृतं तीर्थं सुप्रपाणं शुभस्पती स्थाणु पथेष्ठामप दुर्मतिं हतम् ॥१३॥
क्व स्विदद्य कतमास्वश्विना विक्षु दस्रा मादयेते शुभस्पती ।
क ईं नि येमे कतमस्य जग्मतुर्विप्रस्य वा यजमानस्य वा गृहम् ॥१४॥

*rathaṁ yāntaṁ kuha ko ha vāṁ narā prati dyumantaṁ suvitāya bhūṣati /*
*prātaryāvāṇaṁ vibhvaṁ viśeviśe vastorvastorvahamānaṁ dhiyā śami //1 //*
*kuha sviddoṣā kuha vastoraśvinā kuhābhipitvaṁ karataḥ kuhoṣatuḥ /*
*ko vāṁ śayutrā vidhaveva devaraṁ marya na yoṣā kṛṇute sadhastha ā //2 //*
*prātarjarethe jaraṇeva kāpayā vastorvastoryajatā gachchhatho gṛham /*
*kasya dhvasrā bhavathaḥ kasya vā narā rājaputreva savanāva gachchhathaḥ //3 //*
*yuvāṁ mṛgeva vāraṇā mṛgaṇyavo doṣā vastorhaviṣā ni hnayāmahe /*
*yuvaṁ hotrāmṛtuthā juhnate nareṣaṁ janāya vahathaḥ śubhaspatī //4 //*
*yuvo ha ghoṣā paryaśvinā yatī rāā ūche duhitā pṛchchhe vāṁ narā /*
*bhūtaṁ me ahna uta bhūtamaktave'śvāvate rathine śaktamarvate //5 //*
*yuvaṁ kavī ṣṭhaḥ paryaśvinā rathaṁ viśo na kutso jariturnaśāyathaḥ /*

*yuvorha makṣā maryaśvinā madhvāsā bharata niṣkṛtaṁ na yoṣaṇā ।।6 ।।*
*yuvaṁ ha bhujyuṁ yuvamaśvinā vaśaṁ yuvaṁ śiṁjāramuśanāmupārathuḥ ।*
*yuvo rarāvā pari sakhyamāsate yuvorahamavasā sumnamā chake ।।7 ।।*
*yuvaṁ ha kṛśaṁ yuvamaśvinā śayuṁ yuvaṁ vidhantaṁ vidhavāmuruṣyathaḥ ।*
*yuvaṁ sanibhyaḥ stanayantamaśvināpa vrajamūrṇuthaḥ saptāsyam ।।8 ।।*
*janiṣṭha yoṣā patayatkanīnako vi chāruhanvīrudho daṁsanā anu ।*
*āsmai rīyante nivaneva sindhavo'smā ahne bhavati tatpatitvanam ।।9 ।।*
*jīvaṁ rudanti vi mayante adhvare dīrghāmanu prasitiṁ dīdhiyurnaraḥ ।*
*vāmaṁ pitṛbhyo ya idaṁ samerire mayaḥ patibhyo janayaḥ pariṣvaje ।।10 ।।*
*na tasya vidma tadu ṣu pra vochata yuvā ha yadyuvatyāḥ kṣeti yoniṣu ।*
*priyosriyasya vṛṣabhasya retino gṛhaṁ gamemāśvinā taduśmasi ।।11 ।।*
*ā vāmagantsumatirvājinīvasū nyaśvinā hṛtsu kāmā ayaṁsata ।*
*abhūtaṁ gopā mithunā śubhaspatī priyā aryamṇo duyam̐ār aśīmahi ।।12 ।।*
*tā mandasānā manuṣo duroṇa ā dhattaṁ rayiṁ sahavīra vachasyave ।*
*kṛtaṁ tīrtha suprapāṇaṁ śubhaspatī sthāṇu patheṣṭhāmapa durmatiṁ hatam ।।13 ।।*
*kva svidadya katamāsvaśvinā vikṣu dasrā mādayete śubhaspatī ।*
*ka ī ni yeme katamasya jagmaturviprasya vā yajamānasrū vā gṛham ।।14 ।।*

## २३६. चक्षुर् मानवः (Chakṣur Mānavaḥ)

१. पवमानः सोमः (Pavamānaḥ Somaḥ) - ऋ. (Rv.) ९.१०६.४-६; सा. (Sv.) ५६७

ऋ. (Rv.) ९.१०६.४-६

प्र धन्वा सोम जागृविरिन्द्रायेन्दो परि स्रव। द्युमन्तं शुष्ममा भरा स्वर्विदम् ॥४॥
इन्द्राय वृषणं मदं पवस्व विश्वदर्शतः। सहस्रयामा पथिकृद्विचक्षणः ॥५॥
अस्मभ्यं गातुवित्तमो देवेभ्यो मधुमत्तमः। सहस्रं याहि पथिभिः कनिक्रदत् ॥६॥

*pra dhanvā soma jāgṛvirindrāyendo pari srava । dyumantaṁ śuṣmamā bharā svarvidam ।।4 ।।*
*indrāya vṛṣaṇaṁ madaṁ pavasva viśvadarśataḥ । sahasrayāmā pathikṛdvichakṣaṇaḥ ।।5 ।।*
*asmabhyaṁ gātuvittamo devebhyo madhumattamaḥ । sahasraṁ yāhi pathibhiḥ kanikradat ।।6 ।।*

सा. (Sv.) ५६७

प्र धन्वा सोम जागृविरिन्द्रायेन्दो परि स्रव। द्युमन्तं शुष्ममा भर स्वर्विदम् ॥२॥

*pra dhanvā soma jāgṛvirindrāyendo pari srava । dyumantaṁ śuṣmamā bhara svarvidam ।।2 ।।*

## २३७. चक्षुः सौर्यः (Chakṣuḥ Sauryaḥ)

१. सूर्यः (Sūryaḥ) - ऋ. (Rv.) १०.१५८.१-५

सूर्यो नो दिवस्पातु वातो अन्तरिक्षात्। अग्निर्नः पार्थिवेभ्यः ॥१॥
जोषा सवितर्यस्य ते हरः शतं सवाँ अर्हति। पाहि नो दिद्युतः पतन्त्याः ॥२॥
चक्षुर्नो देवः सविता चक्षुर्न उप पर्वतः। चक्षुर्धाता दधातु नः ॥३॥
चक्षुर्नो धेहि चक्षुषे चक्षुर्विख्यै तनूभ्यः। सं चेदं वि च पश्येम ॥४॥
सुमन्दृशं त्वा वयं प्रति पश्येम सूर्य। वि पश्येम नृचक्षसः ॥५॥

*sūryo no divaspātu vāto antarikṣāt । agnirnaḥ pārthivebhyaḥ ।।1 ।।*
*joṣā savitaryasya te haraḥ śataṁ savām̐ arhati । pāhi no didyutaḥ patantyāḥ ।।2 ।।*
*chakṣurno devaḥ savitā chakṣurna upa parvataḥ । chakṣurdhātā dadhātu naḥ ।।3 ।।*
*chakṣurno dhehi chakṣuṣe chakṣurvikhyai tanūbhyaḥ । saṁ chedaṁ vi cha paśyema ।।4 ।।*
*sumandṛśaṁ tvā vayaṁ prati paśyema sūrya । vi paśyema nṛchakṣasaḥ ।।5 ।।*

## २३८. चातनः (Chātanaḥ)

१. अग्निः (Agniḥ) - अ. (Av.) १.२८.१-२; १.७.१-२; ४-७; १.८.३-४; १.१६.१; २.१८.१-५; ६.३२.१; ६.३४.१-५; ८.३.१-२६

अ. (Av.) १.२८.१-२

उप प्रागाद् देवो अग्नी रक्षोहामीवचातनः। दहन्नप द्वयाविनो यातुधानान् किमीदिनः ॥१॥
प्रति दह यातुधानान् प्रति देव किमीदिनः। प्रतीचीः कृष्णवर्तने सं दह यातुधान्यः ॥२॥

*upa prāgād devo agnī rakṣohāmīvachātanaḥ /*
*dahannapa dvayāvino yātudhānān kimīdinaḥ //1 //*
*prati daha yātudhānān prati deva kimīdinaḥ /*
*pratīchīḥ kṛṣṇavartane saṁ daha yātudhānyaḥ //2 //*

अ. (Av.) १.७.१-२

स्तुवानमग्न आ वह यातुधानं किमीदिनम्। त्वं हि देव वन्दितो हन्ता दस्योर्बभूविथ ॥१॥
आज्यस्य परमेष्ठिंजातवेदस्तनूवशिन्। अग्ने तौलस्य प्राशान यातुधानान् वि लापय ॥२॥

*stuvānamagna ā vaha yātudhānaṁ kimīdinam /*
*tvaṁ hi deva vandito hantā dasyorbabhūvitha //1 //*
*ājyasya parameṣṭhiṁjātavedastanūvaśin /*
*agne taulasya prāśāna yātudhānān vi lāpaya //2 //*

अ. (Av.) १.७.४-७

अग्निः पूर्व आ रभतां प्रेन्द्रो नुदतु बाहुमान् ।
ब्रवीतु सर्वो यातुमानयमस्मीत्येत्य ॥४॥
पश्याम ते वीर्यजातवेदः प्र णो ब्रूहि यातुधानान् नृचक्षः ।
त्वया सर्वे परितप्ताः पुरस्तात् त आ यन्तु प्रब्रुवाणा उपेदम् ॥५॥
आ रभस्व जातवेदोऽस्माकार्थाय जिाषे ।
दूतो नो अग्ने भूत्वा यातुधानान् वि लापय ॥६॥
त्वमग्ने यातुधानानुपबद्धाँ इहा वह ।
अथैषामिन्द्रा वज्रेणापि शीर्षाणि वृश्चतु ॥७॥

*agniḥ pūrva ā rabhatāṁ prendro nudatu bāhumān /*
*bravītu sarvo yātumānayamasmītyetya //4 //*
*paśyāma te vīryajātavedaḥ pra ṇo brūhi yātudhānān nṛchakṣaḥ /*
*tvayā sarve paritaptāḥ purastāt ta ā yantu prabruvāṇā upedam //5 //*
*ā rabhasva jātavedo'smākārthāya jiāṣe /*
*dūto no agne bhūtvā yātudhānān vi lāpaya //6 //*
*tvamagne yātudhānānupabaddhām̐ ihā vaha /*
*athaiṣāmindrā vajreṇāpi śīrṣāṇi vṛśchatu //7 //*

अ. (Av.) १.८.३-४

यातुधानस्य सोमप जहि प्रजां नयस्व च ।
नि स्तुवानस्य पातय परमक्ष्युतावरम् ॥३॥
यत्रैषामग्ने जनिमानि वेत्थ गुहा स्तामत्त्रिणां जातवेदः ।
तांस्त्वं ब्रह्मणा वावृधानो जह्येषां शततर्हमग्ने ॥४॥

*yātudhānasya somapa jahi prajāṁ nayasva cha /*
*ni stuvānasya pātaya paramakṣayutāvaram //3 //*
*yatraiṣāmagne janimāni vettha guhā stāmattriṇāṁ jātavedaḥ /*
*tāṁstvaṁ brahmaṇā vāvṛdhāno jahyeṣāṁ śatatarhamagne //4 //*

अ. (Av.) १.१६.१

येऽमावास्यां३ रात्रिमुदस्थुर्व्राजमत्त्रिणः। अग्निस्तुरीयो यातुहा सो अस्मभ्यमधि ब्रवत् ॥१॥

*ye'māvāsyāṁ3 rātrimudasthurvrājamattriṇaḥ /*
*agnisturīyo yātuhā so asmabhyamadhi bravat //1 //*

अ. (Av.) २.१८.१-५

भ्रातृव्यक्षयणमसि भ्रातृव्यचातनं मे दाः स्वाहा ॥१॥
सपत्नक्षयणमसि सपत्नचातनं मे दाः स्वाहा ॥२॥
अरायक्षयणमस्यरायचातनं मे दाः स्वाहा ॥३॥
पिशाचक्षयणमसि पिशाचचातनं मे दाः स्वाहा ॥४॥
सदान्वाक्षयणमसि सदान्वाचातनं मे दाः स्वाहा ॥५॥

*bhrātṛvyakṣayaṇamasi bhrātṛvyachātanaṁ me dāḥ svāhā ॥1॥*
*sapatkṣayaṇamasi sapatnachātanaṁ me dāḥ svāhā ॥2॥*
*arāyakṣayaṇamasyarāyachātanaṁ me dāḥ svāhā ॥3॥*
*piśāchakṣayaṇamasi piśāchachātanaṁ me dāḥ svāhā ॥4॥*
*sadānvākṣayaṇamasi sadānvāchātanaṁ me dāḥ svāhā ॥5॥*

अ. (Av.) ६.३२.१

अन्तर्दावे जुहुता स्वे३तद् यातुधानक्षणं घृतेन ।
आराद् रक्षांसि प्रति दह त्वमग्ने न नो गृहाणामुप तीतपासि ॥१॥

*antardāve juhutā sve3tad yātudhānakṣaṇaṁ ghṛtena ।*
*ārād rakṣāṁsi prati daha tvamagne na no gṛhāṇāmupa tītapāsi ॥1॥*

अ. (Av.) ६.३४.१-५

प्राग्नये वाचमीरय वृषभाय क्षितीनाम्। स नः पर्षदति द्विषः ॥१॥
यो रक्षांसि निजूर्वत्यग्निस्तिग्मेन शोचिषा। स नः पर्षदति द्विषः ॥२॥
यः परस्याः परावतस्तिरो धन्वातिरोचते। स नः पर्षदति द्विषः ॥३॥
यो विश्वाभि विपश्यति भुवना सं च पश्यति। स नः पर्षदति द्विषः ॥४॥
यो अस्य पारे रजसः शुक्रो अग्निरजायत। स नः पर्षदति द्विषः ॥५॥

*prāgnaye vāchamīraya vṛṣabhāya kṣitīnām । sa naḥ parṣadati dviṣaḥ ॥1॥*
*yo rakṣāṁsi nijūrvatyagnistigmena śochiṣā । sa naḥ parṣadati dviṣaḥ ॥2॥*
*yaḥ parasyāḥ parāvatastiro dhanvātirochate । sa naḥ parṣadati dviṣaḥ ॥3॥*
*yo viśvābhi vipaśyati bhuvanā saṁ cha paśyati । sa naḥ parṣadati dviṣaḥ ॥4॥*
*yo asya pāre rajasaḥ śukro agnirajāyata । sa naḥ parṣadati dviṣaḥ ॥5॥*

अ. (Av.) ८.३.१-२६

रक्षोहणं वाजिनमा जिघर्मि मित्रं प्रथिष्ठमुप यामि शर्म ।
शिशानो अग्निः क्रतुभिः समिद्धः स नो दिवा स रिषः पातु नक्तम् ॥१॥
अयोदंष्ट्रो अर्चिषा यातुधानानुप स्पृश जातवेदः समिद्धः ।
आ जिह्वया मूरदेवान् रभस्व क्रव्यादो वृष्ट्वापि धत्स्वासन् ॥२॥
उभोभयाविन्नुप धेहि दंष्ट्रौ हिंस्रः शिशानोऽवरं परं च ।
उतान्तरिक्षे परि याह्यग्ने जम्भैः सं धेह्यभि यातुधानान् ॥३॥
अग्ने त्वचं यातुधानस्य भिन्धि हिंस्राशनिर्हरसा हन्त्वेनम् ।
प्र पर्वाणि जातवेदः श‍ृणीहि क्रव्यात् क्रविष्णुर्वि चिनोत्वेनम् ॥४॥
यत्रेदानीं पश्यसि जातवेदस्तिष्ठन्तमग्न उत वा चरन्तम् ।
उतान्तरिक्षे पतन्तं यातुधानं तमस्ता विध्य शर्वा शिशानः ॥५॥
यौरिषूः संनममानो अग्ने वाचा शल्याँ अशनिभिर्दिहानः ।
ताभिर्विध्य हृदये यातुधानान् प्रतीचो बाहून् प्रति भङ्ग्ध्येषाम् ॥६॥
उतारब्धान्त्स्पृणुहि जातवेद उतारेभाणाँ ऋष्टिभिर्यातुधानान् ।
अग्ने पूर्वो नि जहि शोशुचान आमादः क्ष्विङ्कास्तमदन्त्वेनीः ॥७॥
इह प्र ब्रूहि यतमः सो अग्ने यातुधानो य इदं कृणोति ।
तमा रभस्व समिधा यविष्ठ नृचक्षसश्चक्षुषे रन्धयैनम् ॥८॥
तीक्ष्णेनाग्ने चक्षुषा रक्ष यां प्रांचं वसुभ्यः प्र णय प्रचेतः ।
हिंस्रं रक्षांस्यभि शोशुचानं मा त्वा दभन् यातुधाना नृचक्षः ॥९॥
नृचक्षा रक्षः परि पश्य विक्षु तस्य त्रीणि प्रति श‍ृणीह्यग्रा ।

तस्याग्ने पृष्टीर्हरसा श्रृणीहि त्रेधा मूलं यातुधानस्य वृश्च ॥१०॥
त्रिर्यातुधानः प्रसितिं त एत्वृतं यो अग्ने अनृतेन हन्ति ।
तमर्चिषा स्फूर्जयंजातवदेः समक्षमेनं गृणते नि युङ्ग्धि ॥११॥
यदग्ने अद्य मिथुना शपातो यद् वाचस्तृष्टं जनयन्त रेभाः ।
मन्योर्मनसः शरव्या३ जायते या तया विध्य हृदये यातुधानान् ॥१२॥
परा श्रृणीहि तपसा यातुधानान् पराग्ने रक्षो हरसा श्रृणीहि ।
परार्चिषा मूरदेवांछृणीहि परासुतृपः शोशुचतः श्रृणीहि ॥१३॥
पराद्य देवा वृजिनं श्रृणन्तु प्रत्यगेनं शपथा यन्तु सृष्टाः ।
वाचास्तेनं शरव ऋच्छन्तु मर्मन् विश्वस्यैतु प्रसितिं यातुधानः ॥१४॥
यः पौरुषेयेण क्रविषा समङ्क्ते यो अश्व्येन पशुना यातुधानः ।
यो अघ्न्याया भरति क्षीरमग्ने तेषां शीर्षाणि हरसापि वृश्च ॥१५॥
विषं गवां यातुधाना भरन्तामा वृश्चन्तामदितये दुरेवाः ।
परैणान् देवः सविता ददातु परा भागमोषधीनां जयन्ताम् ॥१६॥
संवत्सरीणं पय उस्रियायास्तस्य माशीद् यातुधानो नृचक्षः ।
पीयूषमग्ने यतमस्तितृप्सात् तं प्रत्यंचमर्चिषा विध्य मर्मणि ॥१७॥
सनादग्ने मृणसि यातुधानान् न त्वा रक्षांसि पृतनासु जिग्युः ।
सहमूराननु दह क्रव्यादो मा ते हेत्या मुक्षत दैव्यायाः ॥१८॥
त्वं नो अग्ने अधरादुदक्तस्त्वं पश्चादुत रक्षा पुरस्तात् ।
प्रति त्ये ते अजरासस्तपिष्ठा अघशंसं शोशुचतो दहन्तु ॥१९॥
पश्चात् पुरस्तादधरादुतोत्तरात् कविः काव्येन परि पाह्यग्ने ।
सखा सखायमजरो जरिम्णे अग्ने मर्तां अमर्त्यस्त्वं नः ॥२०॥
तदग्ने चक्षुः प्रति धेहि रेभे शफारुजो येन पश्यसि यातुधानान् ।
अथर्ववज्ज्योतिषा दैव्येन सत्यं धूर्वन्तमचितं न्योष ॥२१॥
परि त्वाग्ने पुरं वयं विप्रं सहस्य धीमहि ।
धुषद्वर्णं दिवेदिवे हन्तारं भंगुरावतः ॥२२॥
विषेण भंगुरावतः प्रति स्म रक्षसो जहि ।
अग्ने तिग्मेन शोचिषा तपुरग्राभिर्चिभिः ॥२३॥
वि ज्योतिषा बृहता भात्यग्निराविर्विश्वानि कृणुते महित्वा ।
प्रादेवीर्मायाः सहते दुरेवाः शिशीते श्रृंगे रक्षोभ्यो विनिक्ष्वे ॥२४॥
ये ते श्रृंगे अजरे जातवेदस्तिग्महेती ब्रह्मसंशिते ।
ताभ्यां दुर्हार्दमभिदासन्तं किमीदिनं प्रत्यंचमर्चिषा जातवेदो वि निक्ष्व ॥२५॥
अग्नी रक्षांसि सेधति शुक्रशोचिरमर्त्यः। शुचिः पावक ईड्यः ॥२६॥

*rakṣohaṇaṁ vājinamā jigharmi mitraṁ prathiṣṭhamupa yāmi śarma ।*
*śiśāno agniḥ kratubhiḥ samiddhaḥ sa no divā sa riṣaḥ pātu naktam ॥1॥*
*ayodaṁṣṭro archiṣā yātudhānānupa spṛśa jātavedaḥ samiddhaḥ ।*
*ā jihnayā mūradevān rabhasva kravyādo vṛṣṭvāpi dhatsvāsan ॥2॥*
*ubhobhayāvinnupa dhehi daṁṣṭrau hiṁsraḥ śiśāno'varaṁ paraṁ cha ।*
*utāntarikṣe pari yāhyagne jambhaiḥ saṁ dhehyabhi yātudhānān ॥3॥*
*agne tvachaṁ yātudhānasya bhindhi hiṁsrāśanirharasā hantvenam ।*
*pra parvāṇi jātavedaḥ śṛṇīhi kravyāt kraviṣṇurvi chinotvenam ॥4॥*
*yatredānīṁ paśyasi jātavedastiṣṭhantamagna uta vā charantam ।*
*utāntarikṣe patantaṁ yātudhānaṁ tamastā vidhya śarvā śiśānaḥ ॥5॥*
*yauriṣūḥ saṁnamamāno agne vāchā śalyām̐ aśanibhirdihānaḥ ।*
*tābhirvidhya hṛdaye yātudhānān pratīcho bāhūn prati bhaṅgdhyeṣām ॥6॥*
*utārabdhāntspṛṇuhi jātaveda utārebhāṇām̐ ṛṣṭibhiryātudhānān ।*
*agne pūrvo ni jahi śośuchāna āmādaḥ kṣaviṅkāstamadantvenīḥ ॥7॥*
*iha pra brūhi yatamaḥ so agne yātudhāno ya idaṁ kṛṇoti ।*

*tamā rabhasva samidhā yaviṣṭha nṛchakṣasaśchakṣuṣe randhayainam //8 //*
*tīkṣaṇenāgne chakṣuṣā rakṣa yāṁ prāṁchaṁ vasubhyaḥ pra ṇaya prachetaḥ /*
*hiṁsraṁ rakṣāṁsyabhi śośuchānaṁ mā tvā dabhan yātudhānā nṛchakṣaḥ //9 //*
*nṛchakṣā rakṣaḥ pari paśya vikṣu tasya trīṇi prati śṛṇīhyagrā /*
*tasyāgne pṛṣṭīrharasā śṛṇīhi tredhā mūlaṁ yātudhānasya vṛścha //10 //*
*triryātudhānaḥ prasitiṁ ta etvṛtaṁ yo agne anṛtena hanti /*
*tamarchiṣā sphūrjayaṁjātavadeḥ samakṣamenaṁ gṛṇate ni yuṅgdhi //11 //*
*yadagne adya mithunā śapāto yad vāchastṛṣṭaṁ janayanta rebhāḥ /*
*manyormanasaḥ śaravyā3 jāyate yā tayā vidhya hṛdaye yātudhānān //12 //*
*parā śṛṇīhi tapasā yātudhānān parāgne rakṣo harasā śṛṇīhi /*
*parārchiṣā mūradevāṁchhṛṇīhi parāsutṛpaḥ śośuchataḥ śṛṇīhi //13 //*
*parādya devā vṛjinaṁ śṛṇantu pratyagenaṁ śapathā yantu sṛṣṭāḥ /*
*vāchāstenaṁ śarava ṛchchhantu marman viśvasyaitu prasitiṁ yātudhānaḥ //14 //*
*yaḥ pauruṣeyeṇa kraviṣā samaṅkte yo aśvyena paśunā yātudhānaḥ /*
*yo aghnyāyā bharati kṣīramagne teṣāṁ śīrṣāṇi harasāpi vṛścha //15 //*
*viṣaṁ gavāṁ yātudhānā bharantāmā vṛśchantāmaditaye durevāḥ /*
*paraiṇān devaḥ savitā dadātu parā bhāgamoṣadhīnāṁ jayantām //16 //*
*saṁvatsarīṇaṁ paya usriyāyāstasya māśīd yātudhāno nṛchakṣaḥ /*
*pīyūṣamagne yatamastitṛpsāt taṁ pratyaṁchamarchiṣā vidhya marmaṇi //17 //*
*sanādagne mṛṇasi yātudhānān na tvā rakṣāṁsi pṛtanāsu jigyuḥ /*
*sahamūrānanu daha kravyādo mā te hetyā mukṣata daivyāyāḥ //18 //*
*tvaṁ no agne adharādudaktastvaṁ paśchāduta rakṣā purastāt /*
*prati tye te ajarāsastapiṣṭhā aghaśaṁsaṁ śośuchato dahantu //19 //*
*paśchāt purastādadharādutottarāt kaviḥ kāvyena pari pāhyagne /*
*sakhā sakhāyamajaro jarimṇe agne martāṁ amartyastvaṁ naḥ //20 //*
*tadagne chakṣuḥ prati dhehi rebhe śaphārujo yena paśyasi yātudhānān /*
*atharvavajjyotiṣā daivyena satyaṁ dhūrvantamachitaṁ nyeāṣa //21 //*
*pari tvāgne puraṁ vayaṁ vipraṁ sahasya dhīmahi /*
*dhuṣadvarṇa divedive hantāraṁ bhaṁgurāvataḥ //22 //*
*viṣeṇa bhaṁgurāvataḥ prati sma rakṣaso jahi /*
*agne tigmena śochiṣā tapuragrābhirchibhiḥ //23 //*
*vi jyotiṣā bṛhatā bhātyagnirāvirviśvāni kṛṇute mahitvā /*
*prādevīrmāyāḥ sahate durevāḥ śiśīte śṛṁge rakṣobhyo vinikṣave //24 //*
*ye te śṛṁge ajare jātavedastigmahetī brahmasaṁśite /*
*tābhyāṁ durhārdamabhidāsantaṁ kimīdinaṁ pratyaṁchamarchiṣā jātavedo vi nikṣava //25 //*
*agnī rakṣāṁsi sedhati śukraśochiramartyaḥ / śuchiḥ pāvaka īḍyaḥ //26 //*

२. अग्निः सत्यौजा (Agniḥ Satyaujā) - अ. (Av.) ४.३६.१-१०

तान्सत्यौजाः प्र दहत्वग्निर्वैश्वानरो वृषा।
यो नो दुरस्याद् दिप्साच्चाथो यो नो अरातियात् ॥१॥
यो नो दिप्सददिप्सतो दिप्सतो यश्च दिप्सति। वैश्वानरस्य दंष्ट्रयोरग्नेरपि दधामि तम् ॥२॥
या आगरे मृगयन्ते प्रतिक्रोशेऽमवास्ये। क्रव्यादो अन्यान् दिप्सतः सर्वाँस्तान्सहसा सहे ॥३॥
सहे पिशाचान्त्सहसैषां द्रविणं ददे। सर्वान् दुरस्यतो हन्मि सं म आकूतिर्ऋध्यताम् ॥४॥
ये देवास्तेन हासन्ते सूर्येण मिमते जवम्। नदीषु पर्वतेषु ये सं तैः पशुभिर्विदे ॥५॥
तपनो अस्मि पिशाचानां व्याघ्रो गोमतामिव।
श्वानः सिंहमिव दृष्ट्वा ते न विन्दन्ते न्यंचनम् ॥६॥
न पिशाचैः सं शक्नोमि न स्तैनैर्न वनर्गुभिः। पिशाचास्तस्मान्नश्यन्ति यमहं ग्राममाविशे ॥७॥
यं ग्राममाविशत इदमुग्रं सहो मम। पिशाचास्तस्मान्नश्यन्ति न पापमुप जानते ॥८॥

ये मा क्रोधयन्ति लपिता हस्तिनं मशकाइव। तानंह मन्ये दुर्हितांजने अल्पशूयनिव ॥९॥
अभि तं निऋर्तिर्धत्तामश्वमिवाश्वाभिधान्या। मल्वो यो मह्यं क्रुध्यति स उ पाशान्न मुच्यते ॥१०।

*tāntsatyaujāḥ pra dahatvagnirvaiśvānaro vṛṣā /*
*yo no durasyād dipsāchchātho yo no arātiyāt //1 //*
*yo no dipsadadipsato dipsato yaścha dipsati /*
*vaiśvānarasya daṁṣṭrayoragnerapi dadhāmi tam //2 //*
*yā āgare mṛgayante pratikrośe'mavāsye /*
*kravyādo anyān dipsataḥ savāṁstāntsahasā sahe //3 //*
*sahe piśāchāntsahasaiṣāṁ draviṇaṁ dade /*
*sarvān durasyato hanmi saṁ ma ākūtirṛdhyatām //4 //*
*ye devāstena hāsante sūryeṇa mimate javam /*
*nadīṣu parvateṣu ye saṁ taiḥ paśubhirvide //5 //*
*tapano asmi piśāchānāṁ vyāghro gomatāmiva /*
*śvānaḥ siṁhamiva dṛṣṭvā te na vindante nyaṁchanam //6 //*
*na piśāchaiḥ saṁ śaknomi na stainairna vanargubhiḥ /*
*piśāchāstasmānnaśyanti yamahaṁ grāmamāviśe //7 //*
*yaṁ grāmamāviśata idamugraṁ saho mama /*
*piśāchāstasmānnaśyanti na pāpamupa jānate //8 //*
*ye mā krodhayanti lapitā hastinaṁ maśakāiva /*
*tānaṁha manye durhitāṁjane alpaśūyaniva //9 //*
*abhi taṁ nirṛtirdhattāmaśvamivāśvābhidhānyā /*
*malvo yo mahyaṁ krudhyati sa u pāśānna muchyate //10 /*

३. अग्निभूत पतीन्द्राः मन्त्रोक्ता (Agnibhūta Patīndrāḥ Mantroktā) - अ. (Av.) २.१४.१-६

निःसालां धृष्णुं धिष्णमेकवाद्यां जिघत्स्वम्। सर्वाश्चण्डस्य नस्योनाशयामः सदान्वाः ॥१॥
निर्वो गोष्ठादजामसि निरक्षान्निरुपानसात्। निर्वो मगुन्द्या दुहितरो गृहेभ्यश्चातयामहे ॥२॥
असौ यो अधराद् गृहस्तत्र सन्त्वराय्यः। तत्र सेदिर्न्युच्यतु सर्वाश्च यातुधान्यः ॥३॥
भूतपतिर्निरजत्विन्द्रश्चेतः सदान्वाः। गृहस्य बुध्न आसीनास्ता इन्द्रो वज्रेणाधि तिष्ठतु ॥४॥
यदि स्थ क्षेत्रियाणां यदि वा पुरुषेषिताः। यदि स्थ दस्युभ्यो जाता नश्यतेतः सदान्वाः ॥५॥
परि धामान्यासामाशुर्गाष्ठमिवासरम्। अजैषं सर्वानाजीन् वा नश्यतेतः सदान्वाः ॥६॥

*niḥsālāṁ dhṛṣṇuṁ dhiṣṇamekavādyāṁ jighatsvam /*
*sarvāśchaṇḍasya naptyonāśayāmaḥ sadānvāḥ //1 //*
*nirvo goṣṭhādajāmasi nirakṣānnirupānasāt /*
*nirvo magundyā duhitaro gṛhebhyaśchātayāmahe //2 //*
*asau yo adharād gṛhastatra santvarāyyaḥ /*
*tatra sedirnyuchyatu sarvāścha yātudhānyaḥ //3 //*
*bhūtapatirnirajatvindraśchetaḥ sadānvāḥ /*
*gṛhasya budhna āsīnāstā indro vajreṇādhi tiṣṭhatu //4 //*
*yadi stha kṣetriyāṇāṁ yadi vā puruṣeṣitāḥ /*
*yadi stha dasyubhyo jātā naśyatetaḥ sadānvāḥ //5 //*
*pari dhāmānyāsāmāśurgāṣṭhamivāsaram /*
*ajaiṣaṁ sarvānājīn vā naśyatetaḥ sadānvāḥ //6 //*

४. इन्द्रः (Indraḥ) - अ. (Av.) १.७.३

वि लपन्तु यातुधाना अत्त्रिणो ये किमीदिनः। अथेदमग्ने नो हविरिन्द्रश्च प्रति हर्यतम् ॥३॥

*vi lapantu yātudhānā attriṇo ye kimīdinaḥ /*
*athedamagne no havirindraścha prati haryatam //3 //*

५. इन्द्रासोमादयो मन्त्रोक्ता (Indrāsomādayo Mantroktā) - अ. (Av.) ८.४.१-२५

इन्द्रासोमा तपतं रक्ष उब्जतं न्यर्पयतं वृषणा तमोवृधः ।
परा श्रृणीतमचितो न्योषतं हतं नुदेथां नि शिशीतमत्त्रिणः ॥१॥

इन्द्रासोमा समघशंसमस्य१घं तपुर्ययस्तु चरुरग्निमाँ इव ।
ब्रह्मद्विषे क्रव्यादे घोरचक्षसे द्वेषो धत्तमनवायं किमीदिने ॥२॥
इन्द्रासोमा दुष्कृतो वव्रे अन्तरनारम्भणे तमसि प्र विध्यतम् ।
यतो नैषां पुनरेकश्चनोदयत् तद् वामस्तु सहसे मन्युमच्छवः ॥३॥
इन्द्रासोमा वर्तयतं दिवो वधं सं पृथिव्या अघशंसाय तर्हणम् ।
उत् तक्षतं स्वर्य१ पर्वतेभ्यो येन रक्षो वावृधानं निजूर्वथः ॥४॥
इन्द्रासोमा वर्तयतं दिवस्पर्यग्नितप्ते भिर्युवमश्महन्मभिः ।
तपुर्वधेभिरजरेभिरत्रिणो नि पर्शाने विध्यतं यन्तु निस्वरम् ॥५॥
इन्द्रासोमा परि वां भूतु विश्वत इयं मतिः कक्ष्याश्वेव वाजिना ।
यां वां होत्रां पपरिहिनोमि मेध्येमा ब्रह्माणि नृपती इव जिन्वतम् ॥६॥
प्रति स्मरेथां तुज्यद्भिरेवैर्हतं द्रुहो रक्षसो भंगुरावतः ।
इन्द्रासोमा दुष्कृते मा सुगं भूद यो मा कदा चिदभिदासति द्रुहुः ॥७॥
यो मा पाकेन मनसा चरन्तमभिचष्टे अनृतेभिर्वचोभिः ।
आप इव काशिना संगृभीता असन्नस्त्वासत इन्द्र वक्ता ॥८॥
ये पाकशंसं विहरन्त एवैर्ये वा भद्रं दूषयन्ति स्वधाभिः ।
अहये वा तान् प्रददातु सोम आ वा दधातु निर्ऋतेरुपस्थे ॥९॥
यो नो रसं दिप्सति पित्वो अग्ने अश्वानां गवां यस्तनूनाम् ।
रिपु स्तेन स्तेयकृद् दभ्रमेतु नि ष हीयतां तन्वा३ तना च ॥१०॥
परः सो अस्तु तन्वा३ तना च तिस्रः पृथिवीरधो अस्तु विश्वाः ।
प्रति शुष्यतु यशो अस्य देवा यो मा दिवा दिप्सति यश्च नक्तम् ॥११॥
सुविाानं चिकितुषे जनाय सच्चासच्च वचसी पस्पृधाते ।
तयोर्यत् सत्यं यतरदृजीयस्तदित् सोमोऽवति हन्त्यासत् ॥१२॥
न वा उ सोमो वृजिनं हिनोति न क्षत्रियं मिथुया धारयन्तम् ।
हन्ति रक्षो हन्त्यासद् वदन्तमुभाविन्द्रस्य प्रसितौ शयाते ॥१३॥
यदि वाहमनृतदेवो अस्मि मोघं वा देवाँ अप्यूहे अग्ने ।
किमस्मभ्यं जातवेदो हृणीषे द्रोघवाचस्ते निर्ऋथं सचन्ताम् ॥१४॥
अद्या मुरीय यदि यातुधानो अस्मि यदि वायुस्ततप पुरुषस्य ।
अधा स वीरैर्दशभिर्वि यूया यो मा मोघं यातुधानेत्याह ॥१५॥
यो मायातुं यातुधानेत्याह यो वा रक्षाः शुचिरस्मीत्याह ।
इन्द्रस्तं हन्तु महता वधेन विश्वस्य जन्तोरधमस्पदीष्ट ॥१६॥
प्र या जिगाति खर्गलेव नक्तमप दुहुस्तन्वं१ गूहमाना ।
वव्रमन्तमव सा पदीष्ट ग्रावाणो घ्नन्तु रक्षस उपब्दैः ॥१७॥
वि तिष्ठध्वं मरुतो विक्ष्वि१च्छत गृभायत रक्षस सं पिनष्टन ।
वयो ये भूत्वा पतयन्ति नक्तभिर्ये वा रिपो दधिरे देवे अध्वरे ॥१८॥
प्र वर्त्तय दिवोऽश्मानमिन्द्र सोमशितं मघवन्त्सं शिशाधि ।
प्राक्तो अपाक्तो अधरादुदक्तो३भि जहि रक्षसः पर्वतेन ॥१९॥
एत उ त्ये पतयन्ति श्वयातव इन्द्रं दिप्सन्ति दिप्सवोऽदाभ्यम् ।
शिशीते शक्रः पिशुनेभ्यो वधं नूनं सृजदशनिं यातुमद्भ्यः ॥२०॥
इन्द्रो यातूनामभवत् पराशरो हविर्मथीनामभ्या३ विवासताम् ।
अभीदु शक्रः परशुर्यथा वनं पात्रेव भिन्दन्त्सत एतु रक्षसः ॥२१॥
उलूकयातुं शुशुलूकयातुं जहि श्वयातुमुत कोकयातुम् ।
सुपर्णयातुमुत गृध्रायातुं दृषदेव प्र मृण रक्ष इन्द्र ॥२२॥
मा नो रक्षो अभि नड् यातुमावदपोच्छन्तु मिथुना ये किमीदिनः ।
पृथिवी नः पार्थिवात् पात्वंहसोऽन्तरक्षिं दिव्यात् पात्वस्मान् ॥२३॥
इन्द्र जहि पुमांसं यातुधानमुत स्त्रियं मायया शाशदानाम् ।
विग्रीवासो मूरदेवा ऋदन्तु मा ते दृशन्त्सूर्यमुच्चरन्तम् ॥२४॥

प्रति चक्ष्व वि चक्ष्वेन्द्रश्च सोम जागृतम् ।
रक्षोभ्यो वधमस्यतमशनिं यातुमद्भ्यः ॥२५॥

*indrāsomā tapataṁ rakṣa ubjataṁ nyarpayataṁ vṛṣaṇā tamovṛdhaḥ /*
*parā śṛṇītamachito nyoṣataṁ hataṁ nudethāṁ ni śiśītamattriṇaḥ //1 //*
*indrāsomā samaghaśaṁsamasya1ghaṁ tapuryayastu charuragnimām̐ iva /*
*brahmadviṣe kravyāde ghorachakṣase dveṣo dhattamanavāyaṁ kimīdine //2 //*
*indrāsomā duṣkṛto vavre antaranārambhaṇe tamasi pra vidhyatam /*
*yato naiṣāṁ punarekaśchanodayat tad vāmastu sahase manyumachchhavaḥ //3 //*
*indrāsomā vartayataṁ divo vadhaṁ saṁ pṛthivyā aghaśaṁsāya tarhaṇam /*
*ut takṣataṁ svarya1 parvatebhyo yena rakṣo vāvṛdhānaṁ nijūrvathaḥ //4 //*
*indrāsomā vartayataṁ divasparyagnitapte bhiryuvamaśmahanmabhiḥ /*
*tapurvadhebhirajarebhirattriṇo ni parśāne vidhyataṁ yantu nisvaram //5 //*
*indrāsomā pari vāṁ bhūtu viśvata iyaṁ matiḥ kakṣayāśveva vājinā /*
*yāṁ vāṁ hotrāṁ paparihinomi medhyemā brahmāṇi nṛpatī iva jinvatam //6 //*
*prati smarethāṁ tujyadbhirevairhataṁ druho rakṣaso bhaṁgurāvataḥ /*
*indrāsomā duṣkṛte mā sugaṁ bhūda yo mā kadā chidabhidāsati druhuḥ //7 //*
*yo mā pākena manasā charantamabhichaṣṭe anṛtebhirvachobhiḥ /*
*āpa iva kāśinā saṁgṛbhītā asannastvāsata indra vaktā //8 //*
*ye pākaśaṁsaṁ viharanta evairye vā bhadraṁ dūṣayanti svadhābhiḥ /*
*ahaye vā tān pradadātu soma ā vā dadhātu nirṛterupasthe //9 //*
*yo no rasaṁ dipsati pitvo agne aśvānāṁ gavāṁ yastanūnām /*
*ripu stena steyakṛd dabhrametu ni ṣa hīyatāṁ tanvā3 tanā cha //10 //*
*paraḥ so astu tanvā3 tanā cha tisraḥ pṛthivīradho astu viśvāḥ /*
*prati śuṣyatu yaśo asya devā yo mā divā dipsati yaścha naktam //11 //*
*suviāānaṁ chikituṣe janāya sachchāsachcha vachasī paspṛdhāte /*
*tayoryat satyaṁ yataradṛjīyastadit somo'vati hantyāsat //12 //*
*na vā u somo vṛjinaṁ hinoti na kṣatriyaṁ mithuyā dhārayantam /*
*hanti rakṣo hantyāsad vadantamubhāvindrasya prasitau śayāte //13 //*
*yadi vāhamanṛtadevo asmi moghaṁ vā devām̐ apyūhe agne /*
*kimasmabhyaṁ jātavedo hṛṇīṣe droghavāchaste nirṛthaṁ sachantām //14 //*
*adyā murīya yadi yātudhāno asmi yadi vāyustatapa puruṣasya /*
*adhā sa vīrairdaśabhirvi yūyā yo mā moghaṁ yātudhānetyāha //15 //*
*yo māyātuṁ yātudhānetyāha yo vā rakṣāḥ śuchirasmītyāha /*
*indrastaṁ hantu mahatā vadhena viśvasya jantoradhamaspadīṣṭa //16 //*
*pra yā jigāti khargaleva naktamapa duhustanvaṁ1 gūhamānā /*
*vavramanntamava sā padīṣṭa grāvāṇo ghnantu rakṣasa upabdaiḥ //17 //*
*vi tiṣṭhadhvaṁ maruto vikṣavi1chchhata gṛbhāyata rakṣasa saṁ pinaṣṭana /*
*vayo ye bhūtvā patayanti naktabhirye vā ripo dadhire deve adhvare //18 //*
*pra varttaya divo'śmānamindra somaśitaṁ maghavantsaṁ śiśādhi /*
*prākto apākto adharādudakto3bhi jahi rakṣasaḥ parvatena //19 //*
*eta u tye patayanti śvayātava indraṁ dipsanti dipsavo'dābhyam /*
*śiśīte śakraḥ piśunebhyo vadhaṁ nūnaṁ sṛjadaśaniṁ yātumadbhyaḥ //20 //*
*indro yātūnāmabhavat parāśaro havirmathīnāmabhyā3 vivāsatām /*
*abhīdu śakraḥ paraśuryathā vanaṁ pātreva bhindantsata etu rakṣasaḥ //21 //*
*ulūkayātuṁ śuśulūkayātuṁ jahi śvayātumuta kokayātum /*
*suparṇayātumuta gṛdhrāyātuṁ dṛṣadeva pra mṛṇa rakṣa indra //22 //*
*mā no rakṣo abhi naḍ yātumāvadapochchhantu mithunā ye kimīdinaḥ /*
*pṛthivī naḥ pārthivāt pātvaṁhaso'ntarakṣiṁ divyāt pātvasmān //23 //*
*indra jahi pumāṁsaṁ yātudhānamuta striyaṁ māyayā śāśadānām /*

*vigrīvāso mūradevā ṛdantu mā te dṛśantsūryamuchcharantam ||24 ||*
*prati chakṣava vi chakṣavendraścha soma jāgṛtam |*
*rakṣobhyo vadhamasyatamaśaniṁ yātumadbhyaḥ ||25 ||*

६. जातवेदाः मन्त्रोक्ता (Jātavedāḥ Mantroktā) - अ. (Av.) ५.२९.१-१५

पुरस्ताद् युक्त वह जातवेदोऽग्ने विद्धि क्रियमाणं यथेदम् ।
त्वं भिषग् भेषजस्यासि कर्ता त्वया गामश्वं पुरुषं सनेम ॥१॥
तथा तदग्ने कृणु जातवेदो विश्वेभिर्देवैः सह संविदानः ।
यो नो दिदेव यतमो जघास यथा सो अस्य परिधिष्पताति ॥२॥
यथा सो अस्य परिधिष्पताति तथा तदग्ने कृणु जातवेदः ।
विश्वेभिर्देवैः सह संविदानः ॥३॥
अक्ष्यौ३ नि विध्य हृदय नि विध्य जिह्वां नि तृन्द्धि प्र दतो मृणीहि ।
पिशाचो अस्य यतमो जघासाग्ने यविष्ठ प्रति तं श्रृणीहि ॥४॥
यदस्य हृतं विहृतं यत् पराभृतमात्मनो जग्धं यतमत् पिशाचैः ।
तदग्ने विद्वान् पुनरा भर त्वं शरीरे मांसमसुमेरयामः ॥५॥
आमे सुपक्वे शबले विपक्वे यो मा पिशाचो अशने ददम्भ ।
तदात्मना प्रजया पिशाचा वि यातयन्तामगदो३यमस्तु ॥६॥
क्षीरे मा मन्थे यतमो ददम्भाकृष्टपच्ये अशने धान्ये३ यः ।
तदात्मना प्रजया पिशाचा वि यातयन्तामगदो३यमस्तु ॥७॥
अपां मा पाने यतमो ददम्भ क्रव्याद् यातूनां शयने शयानम् ।
तदात्मना प्रजया पिशाचा वि यातयन्तामगदो३ यमस्तु ॥८॥
दिवो मा नक्तं यतमो ददम्भ क्रव्याद् यातूनां शयने शयानम् ।
तदात्मना प्रजया पिशाचा वि यातयन्तामगदो३यमस्तु ॥९॥
क्रव्यादमग्ने रुधिरं पिशाचं मनोहनं जहि जातवेदः ।
तमिन्द्रो वाजी वज्रेण हन्तु च्छिनत्तु सोमः शिरो अस्य धृष्णुः ॥१०॥
सनादग्ने मृणसि यातुधानान् न त्वा रक्षांसि पृतनासु जिग्युः ।
सहमूराननु दह क्रव्यादो मा ते हेत्या मुक्षत दैव्यायाः ॥११॥
समाहर जातवेदो यद्धृतं यत् पराभृतम् ॥१२॥
सोमस्येव जातवेदो अंशुरा प्यायतामयम् ।
अग्ने विरप्शिनं मेध्यमयक्ष्मं कृणु जीवतु ॥१३॥
एतास्ते अग्ने समिधः पिशाचजम्भनीः ।
तास्त्वं जुषस्व प्रति चैना गृहाण जातवेदः ॥१४॥
तार्ष्टाघीरग्ने समिधः प्रति गृह्णाह्यर्चिषा ।
जहातु क्रव्याद्रूपं यो अस्य मांसं जिहीर्षति ॥१५॥

*purastād yukta vaha jātavedo'gne viddhi kriyamāṇaṁ yathedam |*
*tvaṁ bhiṣag bheṣajasyāsi kartā tvayā gāmaśvaṁ puruṣaṁ sanema ||1 ||*
*tathā tadagne kṛṇu jātavedo viśvebhirdevaiḥ saha saṁvidānaḥ |*
*yo no dideva yatamo jaghāsa yathā so asya paridhiṣpatāti ||2 ||*
*yathā so asya paridhiṣpatāti tathā tadagne kṛṇu jātavedaḥ |*
*viśvebhirdevaiḥ saha saṁvidānaḥ ||3 ||*
*akṣayau3 ni vidhya hṛdaya ni vidhya jihnāṁ ni tṛnddhi pra dato mṛṇīhi |*
*piśācho asya yatamo jaghāsāgne yaviṣṭha prati taṁ śṛṇīhi ||4 ||*
*yadasya hṛtaṁ vihṛtaṁ yat parābhṛtamātmano jagdhaṁ yatamat piśāchaiḥ |*
*tadagne vidvān punarā bhara tvaṁ śarīre māṁsamasumerayāmaḥ ||5 ||*
*āme supakve śabale vipakve yo mā piśācho aśane dadambha |*
*tadātmanā prajayā piśāchā vi yātayantāmagado3yamastu ||6 ||*
*kṣīre mā manthe yatamo dadambhākṛṣṭapachye aśane dhānye3 yaḥ |*
*tadātmanā prajayā piśāchā vi yātayantāmagado3yamastu ||7 ||*

*apāṁ mā pāne yatamo dadambha kravyād yātūnāṁ śayane śayānam* ।
*tadātmanā prajayā piśāchā vi yātayantāmagado3 yamastu* ॥8॥
*divo mā naktaṁ yatamo dadambha kravyād yātūnāṁ śayane śayānam* ।
*tadātmanā prajayā piśāchā vi yātayantāmagado3yamastu* ॥9॥
*kravyādamagne rudhiraṁ piśāchaṁ manohanaṁ jahi jātavedaḥ* ।
*tamindro vājī vajreṇa hantu chchhinattu somaḥ śiro asya dhṛṣṇuḥ* ॥10॥
*sanādagne mṛṇasi yātudhānān na tvā rakṣāṁsi pṛtanāsu jigyuḥ* ।
*sahamūrānanu daha kravyādo mā te hetyā mukṣata daivyāyāḥ* ॥11॥
*samāhara jātavedo yaddhṛtaṁ yat parābhṛtam* ॥12॥
*somasyeva jātavedo aṁśurā pyāyatāmayam* ।
*agne virapśinaṁ medhyamayakṣamaṁ kṛṇu jīvatu* ॥13॥
*etāste agne samidhaḥ piśāchajambhanīḥ* ।
*tāstvaṁ juṣasva prati chainā gṛhāṇa jātavedaḥ* ॥14॥
*tārṣṭāghīragne samidhaḥ prati gṛhṇāhyarchiṣā* ।
*jahātu kravyādrūpaṁ yo asya māṁsaṁ jihīrṣati* ॥15॥

७. पृश्निपर्णी (Pṛśniparṇī) - अ. (Av.) २.२५.१-५

शं नो देवी पृश्निपर्ण्यशं निर्ऋत्या अकः। उग्रा हि कण्वजम्भनी तामभक्षि सहस्वतीम् ॥१॥
सहमानेयं प्रथमा पृश्निपर्ण्यजायत। तयाहं दुर्णाम्नां शिरो वृश्चामि शकुनेरिव ॥२॥
अरायमसृक्पावानं यश्च स्फातिं जिहीर्षति। गर्भादं कण्वं नाशय पृश्निपर्णि सहस्व च ॥३॥
गिरिमेनाँ आ वेशय कण्वांजीवितयोपनान्। तांस्त्वं देवि पृश्निपर्ण्यग्निरिवानुदहन्निहि ॥४॥
पराच एनान् प्र णुद कण्वांजीवितयोपनान्।
तमांसि यत्र गच्छन्ति तत् क्रव्यादो अजीगमम् ॥५॥

*śaṁ no devī pṛśniparṇyaśaṁ nirṛtyā akaḥ* ।
*ugrā hi kaṇvajambhanī tāmabhakṣi sahasvatīm* ॥1॥
*sahamāneyaṁ prathamā pṛśniparṇyajāyata* ।
*tayāhaṁ durṇāmnāṁ śiro vṛśchāmi śakuneriva* ॥2॥
*arāyamasṛkpāvānaṁ yaścha sphātiṁ jihīrṣati* ।
*garbhādaṁ kaṇvaṁ nāśaya pṛśniparṇi sahasva cha* ॥3॥
*girimenāṁ̐ ā veśaya kaṇvāṁjīvitayopanān* ।
*tāṁstvaṁ devi pṛśniparṇyagnirivānudahannihi* ॥4॥
*parācha enān pra ṇuda kaṇvāṁjīvitayopanān* ।
*tamāṁsi yatra gachchhanti tat kravyādo ajīgamam* ॥5॥

८. बृहस्पतिर् अग्नीषोमौ च (Bṛhaspatir Agnīṣomau Cha) - अ. (Av.) १.८.१-२

इदं हविर्यातुधानान् नदी फेनमिवा वहत्। य इदं स्त्री पुमानकरिह स स्तुवता जनः ॥१॥
अयं स्तुवान आगमदिमं स्म प्रति हर्यत। बृहस्पते वशे लब्ध्वाग्नीषोमा वि विध्यतम् ॥२॥

*idaṁ haviryātudhānān nadī phenamivā vahat* ।
*ya idaṁ strī pumānakariha sa stuvatā janaḥ* ॥1॥
*ayaṁ stuvāna āgamadimaṁ sma prati haryata* ।
*bṛhaspate vaśe labdhvāgnīṣomā vi vidhyatam* ॥2॥

९. यातुधान्यः (Yātudhānyaḥ) - अ. (Av.) १.२८.३-४

मा शशाप शपनेन याघं मूरमादधे। या रसस्य जातमारेभे तोकमत्तु सा ॥३॥
पुत्रमत्तु यातुधानीः स्वसारमुत नप्त्यम् ।
अधा मिथो विकेश्यो३ वि घ्नता यातुधान्यो३ वि तृह्यन्मराय्यः ॥४॥

*mā śaśāpa śapanena yāghaṁ mūramādadhe* ।
*yā rasasya jātamārebhe tokamattu sā* ॥3॥
*putramattu yātudhānīḥ svasāramuta naptyam* ।
*adhā mitho vikeśyo3 vi ghnatā yātudhānyo3 vi tṛhyanmarāyyaḥ* ॥4॥

१०. रुद्रः (Rudraḥ) - अ. (Av.) ६.३२.२
रुद्रो वो ग्रीवा अशरैत् पिशाचाः पृष्टीर्वोऽपि श्रृणातु यातुधानाः ।
वीरुद् वो विश्वतोवीर्या यमेन समजीगमत् ॥२ ॥
*rudro vo grīvā aśarait piśāchāḥ pṛṣṭīrvo'pi śṛṇātu yātudhānāḥ /*
*vīrud vo viśvatovīryā yamena samajīgamat //2 //*

११. वरुणः अग्निः इन्द्रश्च (Varuṇaḥ Agniḥ Indraścha) - अ. (Av.) १.१६.२
सीसायाध्याह वरुणः सीसायाग्निरुपावति। सीसं म इन्द्रः प्रायच्छत् तदंग यातुचातनम् ॥२ ॥
*sīsāyādhyāha varuṇaḥ sīsāyāgnirupāvati /*
*sīsaṁ ma indraḥ prāyachchhat tadaṁga yātuchātanam //2 //*

१२. सीसम् (Sīsam) - अ. (Av.) १.१६.३-४
इदं विष्कन्धं सहत इदं बाधते अत्त्रिणः। अनेन विश्वा ससहे या जातानि पिशाच्याः ॥३ ॥
यदि नो गां हंसि यद्यश्वं यदि पूरुषम्। तं त्वा सीसेन विध्यामो यथा नोऽसो अवीरहा ॥४ ॥
*idaṁ viṣkandhaṁ sahata idaṁ bādhate attriṇaḥ /*
*anena viśvā sasahe yā jātāni piśāchyāḥ //3 //*
*yadi no gāṁ haṁsi yadyaśvaṁ yadi pūruṣam /*
*taṁ tvā sīsena vidhyāmo yathā no'so avīrahā //4 //*

## २३९. चित्रः (Chitraḥ)

१. अग्निः (Agniḥ) - य. (Yv.)११.४५
शिवो भव प्रजाभ्यो मानुषीभ्यस्त्वमंगिरः ।
मा द्यावापृथिवीऽअभि शोचीर्मान्तरिक्षं मा वनस्पतीन् ॥४५ ॥
*śivo bhava prajābhyo mānuṣībhyastvamaṁgiraḥ /*
*mā dyāvāpṛthivī'abhi śochīrmāntarikṣaṁ mā vanaspatīn //45 //*

## २४०. चित्रमहा वासिष्ठः (Chitramahā Vāsiṣṭhaḥ)

१. अग्निः (Agniḥ) - ऋ. (Rv.) १०.१२२.१-८
वसुं न चित्रमहसं गृणीषे वामं शेवमतिथिमद्विषेण्यम् ।
स रासते शुरुधो विश्वधायसोऽग्निर्होता गृहपतिः सुवीर्यम् ॥१ ॥
जुषाणो अग्ने प्रति हर्य मे वचो विश्वानि विद्वान् वयुनानि सुक्रतो ।
घृतनिर्णिग्ब्रह्मणे मातुमेरय तव देवा अजनयन्ननु व्रतम् ॥२ ॥
सप्त धामानि परियन्नमर्त्यो दाशद्दाशुषे सुकृते मामहस्व ।
सुवीरेण रयिणाग्ने स्वाभुवा यस्त आनट् समिधा तं जुषस्व ॥३ ॥
यास्य केतुं प्रथमं पुरोहितं हविष्मन्त ईळते सप्त वाजिनम् ।
श्रृण्वन्तमग्निं घृतपृष्ठमुक्षणं पृणन्तं देवं पृणते सुवीर्यम् ॥४ ॥
त्वं दूतः प्रथमो वरेण्यः स हूयमानो अमृताय मत्स्व ।
त्वां मर्जयन्मरुतो दाशुषो गृहे त्वां स्तोमेभिर्भृगवो वि रुरुचुः ॥५ ॥
इषं दुहन्त्सुदुघां विश्वधायसं यज्ञप्रिये यजमानाय सुक्रतो ।
अग्ने घृतस्नुस्त्रिऋतानि दीद्यद्वर्तिर्यज्ञं परियन्त्सुक्रतूयसे ॥६ ॥
त्वामिदस्या उषसो व्युष्टिषु दूतं कृण्वाना अयजन्त मानुषाः ।
त्वा देवा महयाय्याय वावृधुराज्यमग्ने निमृजन्तो अध्वरे ॥७ ॥
नि त्वा वसिष्ठा अह्वन्त वाजिनं गृणन्तो अग्ने विदथेषु वेधसः ।
रायस्पोषं यजमानेषु धारय यूयं पात स्वस्तिभिः सदा नः ॥८ ॥
*vasuṁ na chitramahasaṁ gṛṇīṣe vāmaṁ śevamatithimadviṣeṇyam /*
*sa rāsate śurudho viśvadhāyaso'ginarhotā gṛhapatiḥ suvīryam //1 //*
*juṣāṇo agne prati harya me vacho viśvāni vidvān vayunāni sukrato /*
*ghṛtanirṇigbrahmaṇe mātumeraya tava devā ajanayannanu vratam //2 //*
*sapta dhāmāni pariyannamartyo dāśaddāśuṣe sṛkṛte māmahasya /*
*suvīreṇa rayiṇāgne svābhuvā yasta ānaṭ samidhā taṁ juṣasva //3 //*

*yāsya ketuṁ prathamaṁ purohitaṁ haviṣmanta īḻate sapta vājinam /*
*śṛṇvantamagniṁ ghṛtapṛṣṭhamukṣaṇaṁ pṛṇantaṁ devaṁ pṛṇate suvīryam //4 //*
*tvaṁ dūtaḥ prathamo vareṇyaḥ sa hūyamāno amṛtāya matsva /*
*tvāṁ marjayanmaruto dāśuṣo gṛhe tvāṁ stomebhirbhṛgavo vi ruruchuḥ //5 //*
*iṣaṁ duhantsudughāṁ viśvadhāyasaṁ yāpriye yajamānāya sukrato /*
*agne ghṛtasnustrirṛtāni dīdyadvartiryāṁ pariyantsukratūyase //6 //*
*tvāmidasyā uṣaso vyuṣṭiṣu dūtaṁ kṛṇvānā ayajanta mānuṣāḥ /*
*tvā devā mahayāyyāya vāvṛdhurājyamagne nimṛjanto adhvare //7 //*
*ni tvā vasiṣṭhā ahnanta vājinaṁ gṛṇanto agne vidatheṣu vedhasaḥ /*
*rāyasposaṁ yajamāneṣu dhāraya yūyaṁ pāta svastibhiḥ sadā naḥ //8 //*

## २४१. जगद्वीजं पुरुषः (Jagadvījaṁ Puruṣaḥ)

१. अश्वत्थः (Aśvatthaḥ) - अ. (Av.) ३.६.१-८

पुमान् पुंसः परिजातोऽश्वत्थः खदिरादधि ।
स हन्तु शत्रून् मामकान् यानहं द्वेप्मि ये च माम् ॥१॥
तानश्वत्थ निः शृणीहि शत्रून् वैबाध दोधतः ।
इन्द्रेण वृत्रघ्ना मेदी मित्रेण वरुणेन च ।
यथाश्वत्थ निरभनोऽन्तर्महत्यर्णवे ।
एवा तान्त्सर्वान्निर्भङ्गि यानहं द्वेष्मि ये च माम् ॥३॥
यः सहमानश्चरसि सासहान इव ऋषभः ।
तेनाश्वत्थ त्वया वयं सपत्नान्त्सहिषीमहि ॥४॥
सिनात्वेनान् निऋर्तिर्मृत्योः पाशैरमोक्यैः ।
अश्वत्थ शत्रून् मामकान् यानहं द्वेष्मि ये च माम् ॥५॥
यथाश्वत्थ वानस्पत्यानारोहन् कृणुषेऽधरान् ।
एवा मे शत्रेर्मूर्धानं विष्वग् भिन्धि सहस्व च ॥६॥
तेऽधरांचः प्र प्लवन्तां छिन्नाा नौरिव बन्धनात् ।
न वैबाधप्रणुत्तानां पुनरस्ति निवर्त्तनम् ॥७॥
प्रैणान् नुदे मनसा प्र चित्तेनोत ब्रह्मणा ।
प्रैणान् वृक्षस्य शाखयाश्वत्थस्य नुदामहे ॥८॥

*pumān puṁsaḥ parijāto'śvatthaḥ khadirādadhi /*
*sa hantu śatrūn māmakān yānahaṁ dvepmi ye cha mām //1 //*
*tānaśvattha niḥ śṛṇīhi śatrūn vaibādha dodhataḥ /*
*indreṇa vṛtraghnā medī mitreṇa varuṇena cha /*
*yathāśvattha nirabhano'ntarmahatyarṇave /*
*evā tāntsarvānnirbhaṅgdhi yānahaṁ dveṣmi ye cha mām //3 //*
*yaḥ sahamānaścharasi sāsahāna iva ṛṣabhaḥ /*
*tenāśvattha tvayā vayaṁ sapatnanāntsahiṣīmahi //4 //*
*sinātvenān niṛrrtirmṛtyoḥ pāśairamokyaiḥ /*
*aśvattha śatrūn māmakān yānahaṁ dveṣmi ye cha mām //5 //*
*yathāśvattha vānaspatyānārohan kṛṇuṣe'dharān /*
*evā me śatrermūrdhānaṁ viṣvag bhindhi sahasva cha //6 //*
*te'dharāṁchaḥ pra plavantāṁ chhinnāā nauriva bandhanāt /*
*na vaibādhapraṇuttānāṁ punarasti nivarttanam //7 //*
*praiṇān nude manasā pra chittenota brahmaṇā /*
*praiṇān vṛkṣasya śākhayāśvatthasya nudāmahe //8 //*

## २४२. जमदग्निः (Jamadagniḥ)

१. अग्निः (Agniḥ) - य. (Yv.)११.७३ , ७४; २९.२८ , ३५

य. (Yv.)११.७३-७४

यदग्ने कानि कानि चिदा ते दारुणि दध्मसि। सर्व तदस्तु ते घृतं तज्जुषस्व यविष्ठ्य ॥७३॥
यदत्त्युपजिह्विका यद्वम्रोऽअतिसर्पति। सर्व तदस्तु ते घृतं तज्जुषस्व यविष्ठ्य ॥७४॥
*yadagne kāni kāni chidā te dāruṇi dadhmasi |*
*sarva tadastu te ghṛtaṁ tajjuṣasva yaviṣṭhya ||73 ||*
*yadattyupajihnikā yadvamro'atisarpati |*
*sarva tadastu te ghṛtaṁ tajjuṣasva yaviṣṭhya ||74 ||*

य. (Yv.)२९.२८

आजुह्वानऽईड्यो वन्द्यश्चा याह्यग्ने वसुभिः सजोषाः ।
त्वं देवानामसि यह्व होता सऽएनान्यक्षीषितो यजीयान् ॥२८॥
*ājuhnāna'īḍyo vandyaśchā yāhyagne vasubhiḥ sajoṣāḥ |*
*tvaṁ devānāmasi yahna hotā sa'enānyakṣīṣito yajīyān ||28 ||*

य. (Yv.)२९.३५

उपावसृज त्मन्या समंजन्देवानां पाथऽऋतुथा हवीं षि ।
वनस्पतिः शमिता देवोऽअग्निः स्वदन्तु हव्यं मधुना घृतेन ॥३५॥
*upāvasṛja tmanyā samaṁjandevānāṁ pātha'ṛtuthā havīṁ ṣi |*
*vanaspatiḥ śamitā devo'agniḥ svadantu havyaṁ madhunā ghṛtena ||35 ||*

२. अन्तरिक्षम् (Antarikṣam) - य. (Yv.)२९.२९

प्राचीनं बर्हिः प्रदिशा पृथिव्या वस्तोरस्या वृज्यतेऽअग्रेऽअह्वाम् ।
व्यु प्रथते वितरं वरीयो देवेभ्योऽअदित्ये स्योनम् ॥२९॥
*prāchīnaṁ barhiḥ pradiśā pṛthivyā vastorasyā vṛjyate'agre'ahnām |*
*vyu prathate vitaraṁ varīyo devebhyo'aditye syonam ||29 ||*

३. कामात्मा (Kāmātmā) - अ. (Av.) ६.८.१-३; ६.९.१-३

अ. (Av.) ६.८.१-३

यथा वृक्षं लिबुजा समन्तं परिषस्वजे ।
एवा परि ष्वजस्व मां यथा मां कामिन्यसो यथा मन्नापगा असः ॥१॥
यथा सुपर्णः प्रपतन् पक्षौ निहन्ति भूम्याम् ।
एवा नि हन्मि ते मनो यथा मां कामिन्यसो यथा मन्नापगा असः ॥२॥
यथेमे द्यावापृथिवी सद्यः पर्येति सूर्यः ।
एवा पर्येमि ते मनो यथा मां कामिन्यसो यथा मन्नापगा असः ॥३॥
*yathā vṛkṣaṁ libujā samantaṁ pariṣasvaje |*
*evā pari ṣvajasva māṁ yathā māṁ kāminyaso yathā mannāpagā asaḥ ||1 ||*
*yathā suparṇaḥ prapatan pakṣau nihanti bhūmyām |*
*evā ni hanmi te mano yathā māṁ kāminyaso yathā mannāpagā asaḥ ||2 ||*
*yatheme dyāvāpṛthivī sadyaḥ paryeti sūryaḥ |*
*evā paryemi te mano yathā māṁ kāminyaso yathā mannāpagā asaḥ ||3 ||*

अ. (Av.) ६.९.१-३

वांछ मे तन्वं१ पादौ वांछाक्ष्यौ३ वांछ सक्थ्यौ ।
अक्ष्यौवृषण्यन्त्याः केशा मां ते कामेन शुष्यन्तु ॥१॥
मम त्वा दोषणिश्रिषं कृणोमि हृदयश्रिषम् ।
यथा मम क्रतावसो मम चित्तमुपायसि ॥२॥
यासां नाभिशरेहणं हृदि संवननं कृतम् ।
गावो घृतस्य मातरोऽमूं सं वानयन्तु मे ॥३॥
*vāṁchha me tanvaṁ1 pādau vāṁchhākṣayau3 vāṁchha sakthyau |*

*akṣayauvṛṣaṇyantyāḥ keśā māṁ te kāmena śuṣyantu ॥1॥*
*mama tvā doṣaṇiśriṣaṁ kṛṇomi hṛdayaśriṣam ।*
*yathā mama kratāvaso mama chittamupāyasi ॥2॥*
*yāsāṁ nābhiśarehaṇaṁ hṛdi saṁvananaṁ kṛtam ।*
*gāvo ghṛtasya mātaro'mūṁ saṁ vānayantu me ॥3॥*

४. पवमानः सोमः (Pavamānaḥ Somaḥ) - ऋ. (Rv.) ९.६२.१-३०; ९.६७.१६-१८

ऋ. (Rv.) ९.६२.१-३०

एते असृग्रमिन्दवस्तिरः पवित्रमाशवः। विश्वान्यभि सौभगा ॥१॥
विघ्नन्तो दुरिता पुरु सुगा तोकाय वाजिनः। तना कृण्वन्तो अर्वते ॥२॥
कृण्वन्तो वरिवो गवेऽभ्यर्षन्ति सुष्टुतिम्। इळामस्मभ्यं संयतम् ॥३॥
असाव्यंशुर्मदायाप्सु दक्षो गिरिष्ठाः। श्येनो न योनिमासदत् ॥४॥
शुभ्रमन्धो देववातमप्सु धूतो नृभिः सुतः। स्वदन्ति गावः पयोभिः ॥५॥
आदीमश्वं न हेतारोऽशुभन्नमृताय। मध्वो रसं सधमादे ॥६॥
यास्ते धारा मधुश्चुतोऽसृग्रमिन्द ऊतये। ताभिः पवित्रमासदः ॥७॥
सो अर्षेन्द्राय पीतये तिरो रोमाण्यव्यया। सीदन्योना वनेष्वा ॥८॥
त्वमिन्दो परि स्रव स्वादिष्ठो अंगिरोभ्यः। वरिवोविद् घृतं पयः ॥९॥
अयं विचर्षणिर्हितः पवमानः स चेतति। हिन्वान आप्यं बृहत् ॥१०॥
एष वृषा वृषव्रतः पवमानो अशस्तिहा। करद्वसूनि दाशुषे ॥११॥
आ पवस्व सहस्रिणं रयिं गोमन्तमश्विनम्। पुरुश्चन्द्रं पुरुस्पृहम् ॥१२॥
एष स्य परि षिच्यते मर्मृज्यमान आयुभिः। उरुगायः कविक्रतुः ॥१३॥
सहस्रोतिः शतामघो विमानो रजसः कविः। इन्द्राय पवते मदः ॥१४॥
गिरा जात इह स्तुत इन्दुरिन्द्राय धीयते। विर्योना वसताविव ॥१५॥
पवमानः सुतो नृभिः सोमो वाजमिवासरत्। चमूषु शक्मनासदम् ॥१६॥
तं त्रिपृष्ठे त्रिवन्धुरे रथे युंजन्ति यातवे। ऋषीणां सप्त धीतिभिः ॥१७॥
तं सोतारो धनस्पृतमाशुं वाजाय यातवे। हरिं हिनोत वाजिनम् ॥१८॥
आविशन्कलशं सुतो विश्वा अर्षन्नभि श्रियः। शूरो न गोषु तिष्ठति ॥१९॥
आ त इन्दो मदाय कं पयो दुहन्त्यायवः। देवा देवेभ्यो मधु ॥२०॥
आ नः सोमं पवित्र आ सृजता मधुमत्तमम्। देवेभ्यो देवश्रुत्तमम् ॥२१॥
एते सोमा असृक्षत गृणानाः श्रवसे महे। मदिन्तमस्य धारया ॥२२॥
अभि गव्यानि वीतये नृम्णा पुनानो अर्षसि। सन्द्वाजः परि स्रव ॥२३॥
उत नो गोमतीरिषो विश्वा अर्ष परिष्टुभः। गृणानो जमदग्निना ॥२४॥
पवस्व वाचो अग्रियः सोम चित्राभिरूतिभिः अभि विश्वानि काव्या ॥२५।
त्वं समुद्रिया अपोऽग्रियो वाच ईरयन्। पवस्व विश्वमेजय ॥२६॥
तुभ्येमा भुवना कवे महिम्ने सोम तस्थिरे। तुभ्यमर्षन्ति सिन्धवः ॥२७॥
प्र ते दिवो न वृष्टयो धारा यन्त्यसश्चतः। अभि शुक्रामुपस्तिरम् ॥२८॥
इन्द्रायेन्दुं पुनीतनोग्रं दक्षाय साधनम्। ईशानं वीतिराधसम् ॥२९॥
पवमान ऋतः कवि सोमः पवित्रमासदत्। दधत्स्तोत्रे सुवीर्यम् ॥३०॥

*ete asṛgramindavastiraḥ pavitramāśavaḥ । viśvānyabhi saubhagā ॥1॥*
*vighnanto duritā puru sugā tokāya vājinaḥ । tanā kṛṇvanto arvate ॥2॥*
*kṛṇvanto varivo gave'bhyarṣanti suṣṭutim । iḷāmasmabhyaṁ saṁyatam ॥3॥*
*asāvyaṁśurmadāyāpsu dakṣo giriṣṭhāḥ । śyeno na yonimāsadat ॥4॥*
*śubhramandho devavātamapsu dhūto nṛbhiḥ sutaḥ । svadanti gāvaḥ payobhiḥ ॥5॥*
*ādīmaśvaṁ na hetāro'śubhannamṛtāya । madhvo rasaṁ sadhamāde ॥6॥*
*yāste dhārā madhuśchuto'sṛgraminda ūtaye । tābhiḥ pavitramāsadaḥ ॥7॥*
*so arṣendrāya pītaye tiro romāṇyavyayā । sīdanyonā vaneṣvā ॥8॥*
*tvamindo pari srava svādiṣṭho aṁgirobhyaḥ । varivovid ghṛtaṁ payaḥ ॥9॥*
*ayaṁ vicharṣaṇirhitaḥ pavamānaḥ sa chetati । hinvāna āpyaṁ bṛhat ॥10॥*

*eṣa vṛṣā vṛṣavrataḥ pavamāno aśastihā । karadvasūni dāśuṣe ॥11 ॥*
*ā pavasva sahasriṇaṁ rayiṁ gomantamaśvinam । puruśchandraṁ puruspṛham ॥12 ॥*
*eṣa sya pari ṣichyate marmṛjyamāna āyubhiḥ । urugāyaḥ kavikratuḥ ॥13 ॥*
*sahasrotiḥ śatāmagho vimāno rajasaḥ kaviḥ । indrāya pavate madaḥ ॥14 ॥*
*girā jāta iha stuta indrurindrāya dhīyate । viryonā vasatāviva ॥15 ॥*
*pavamānaḥ suto nṛbhiḥ somo vājamivāsarat । chamūṣu śakmanāsadam ॥16 ॥*
*taṁ tripṛṣṭhe trivandhure rathe yuṁjanti yātave । ṛṣīṇāṁ sapta dhītibhiḥ ॥17 ॥*
*taṁ sotāro dhanaspṛtamāśuṁ vājāya yātave । hariṁ hinota vājinam ॥18 ॥*
*āviśankalaśaṁ suto viśvā arṣannabhi śriyaḥ । śūro na goṣu tiṣṭhati ॥19 ॥*
*ā ta indo madāya kaṁ payo duhantyāyavaḥ । devā devebhyo madhu ॥20 ॥*
*ā naḥ somaṁ pavitra ā sṛjatā madhumattamam । devebhyo devaśruttamam ॥21 ॥*
*ete somā asṛkṣata gṛṇānāḥ śravase mahe । madintamasya dhārayā ॥22 ॥*
*abhi gavyāni vītaye nṛmṇā punāno arṣasi । sandvājaḥ pari srava ॥23 ॥*
*uta no gomatīriṣo viśvā arṣa pariṣṭubhaḥ । gṛṇāno jamadagninā ॥24 ॥*
*pavasva vācho agriyaḥ seāma chitrābhirūtibhiḥ abhi viśvāni kāvyā ॥25 ।*
*tvaṁ samudriyā apo'griyo vācha īrayan । pavasva viśvamejaya ॥26 ॥*
*tubhyemā bhuvanā kave mahimne soma tasthire । tubhyamarṣanti sindhavaḥ ॥27 ॥*
*pra te divo na vṛṣṭayo dhārā yantyasaśchataḥ । abhi śukrāmupastiram ॥28 ॥*
*indrāyenduṁ punītanograṁ dakṣāya sādhanam । īśānaṁ vītirādhasam ॥29 ॥*
*pavamāna ṛtaḥ kavi somaḥ pavitramāsadat । dadhatstotre suvīryam ॥30 ॥*

ऋ. (Rv.) ९.६७.१६-१८

पवस्व सोम मन्दयिन्नन्द्राय मधुमत्तमः ॥१६ ॥
असृग्रन्देववीतये वाजयन्तो रथाइव ॥१७ ॥
ते सुतासो मदिन्तमाः शुक्रा वायुमसृक्षत ॥१८ ॥

*pavasva soma mandayinnandrāya madhumattamaḥ ॥16 ॥*
*asṛgrandevavītaye vājayanto rathāiva ॥17 ॥*
*te sutāso madintamāḥ śukrā vāyumasṛkṣata ॥18 ॥*

५. मित्रावरुणौ (Mitrāvaruṇau) - य. (Yv.)३३.८७

ऋधिग्त्थिा स मर्त्यः शशमे देवतातये। यो नूनं मित्रावरुणावभिष्टयऽआचक्रे हव्यदातये ॥८७ ॥

*ṛdhigtthiā sa martyaḥ śaśame devatātaye । yo nūnaṁ mitrāvaruṇāvabhiṣṭaya'āchakre havyadātaye ॥87 ॥*

६. वाग् (Vāg) - य. (Yv.)२९.३३

आ नो यां भारती तूयमेत्विडा मनुष्वदिह चेतयन्ती ।
तिस्रो देवीर्बर्हिरेदंस्योनंसरस्वती स्वपसः सदन्तु ॥३३ ॥

*ā no yāṁ bhāratī tūyametviḍā manuṣvadiha chetayantī ।*
*tisro devīrbarhiredaṁsyonaṁsarasvatī svapasaḥ sadantu ॥33 ॥*

७. वायुः (Vāyuḥ) - य. (Yv.)३३.८५

आ नो यां दिविस्पृशं वायो याहि सुम्नमभिः ।
अन्तः पवित्रऽउपरि श्रीणानोऽयंशुक्रोऽअयामि ते ॥८५ ॥

*ā no yāṁ divispṛśaṁ vāyo yāhi sumnamabhiḥ ।*
*antaḥ pavitra'upari śrīṇāno'yaṁśukro'ayāmi te ॥85 ॥*

८. विद्वान् (Vidvān) - य. (Yv.)२९.२५-२७

समिद्धोऽअद्य मनुषो दुरोणे देवो देवान्यजसि जातवेदः ।
आ च वह मित्रमहश्चिकित्वान्त्वं दूतः कविरसि प्रचेताः ॥२५ ॥
तनूनपात्पथऽऋतस्य यानान्मध्वा समंजन्त्स्वदया सुजिह्व ।
मन्मानि धीभिरुत यामृन्धन्देवत्रा च कृणुह्यध्वरं नः ॥२६ ॥
नराशं सस्य महिमानमेषामुप स्तोषाम यजतस्य यौः ।

ये सुक्रतवः शुचयोधियन्धाः स्वदन्ति देवाऽउभयानि हव्या ॥२७॥
*samiddho'adya manuṣo duroṇe devo devānyajasi jātavedaḥ /*
*ā cha vaha mitramahaśchikitvāntvaṁ dūtaḥ kavirasi prachetāḥ //25 //*
*tanūnapātpatha'ṛtasya yānānmadhvā samaṁjantsvadayā sujihna /*
*manmāni dhībhiruta yāmṛndhandevatrā cha kṛṇuhyadhvaraṁ naḥ //26 //*
*narāśaṁ sasya mahimānameṣāmupa stoṣāma yajatasya yauḥ /*
*ye sukratavaḥ śuchayodhiyandhāḥ svadanti devā'ubhayāni havyā //27 //*

९. विद्वांसः (Vidvāṁsaḥa) - य. (Yv.)२९.३२ , ३६

य. (Yv.)२९.३ २

दैव्या होतारा प्रथमा सुवाचा मिमाना यां मनुषो यजध्यै ।
प्रचोदयन्ता विदथेषु कारू प्राचीनं ज्योतिः प्रदिशा दिशन्ता ॥३२॥
*daivyā hotārā prathamā suvāchā mimānā yāṁ manuṣo yajadhyai /*
*prachodayantā vidatheṣu kārū prāchīnaṁ jyotiḥ pradiśā diśantā //32 //*

य. (Yv.)२९.३६

सद्यो जातो व्यमिमीत यामग्निर्देवा नामभवत्पुरोगाः ।
अस्य होतुः प्रदिश्यृतस्य वाचि स्वाहाकृतंहविरदन्तु देवाः ॥३६॥
*sadyo jāto vyamimīta yāmagnirdevā nāmabhavatpurogāḥ /*
*asya hotuḥ pradiśyṛtasya vāchi svāhākṛtaṁhaviradantu devāḥ //36 //*

१०. विश्वेदेवाः (Viśvedevāḥ) - य. (Yv.)३३.३९

धन्वना गा धन्वनाजिं जयेम धन्वना तीव्राः समदो जयेम ।
धनुः शत्रेरपकामं कृणोति धन्वना सर्वाः प्रदिशो जयेम ॥३९॥
*dhanvanā gā dhanvanājiṁ jayema dhanvanā tīvrāḥ samado jayema /*
*dhanuḥ śatrerapakāmaṁ kṛṇoti dhanvanā sarvāḥ pradiśo jayema //39 //*

११. स्त्रियः (Striyaḥ) - य. (Yv.) २९.३०-३१

व्यचस्वतीरुर्विया वि श्रयन्तां पतिभ्यो न जनयः शुम्भमानाः ।
देवीर्द्वारो बृहतीर्विङ्वमिन्वा देवेभ्यो भवत सुप्रायणाः ॥३०॥
आ सुष्वयन्ती यजतेऽउपाकेऽउषासानत्तफा सदतां नि योनौ ।
दिव्ये योषणे बृहती सुरुक्मेऽअधि श्रियॄ शुत्राफपिशं दधाने ॥३१॥
*vyachasvatīrurviyā vi śrayantāṁ patibhyo na janayaḥ śumbhamānāḥ /*
*devīrdvāro bṛhatīrviṅavaminvā devebhyo bhavata suprāyaṇāḥ //30 //*
*ā suṣvayantī yajate'upāke'uṣāsānattaphā sadatāṁ ni yonau /*
*divye yoṣaṇe bṛhatī surukme'adhi śriyṝ śutrāphapiśaṁ dadhāne //31 //*

१२. सूर्य्यः (Sūryyaḥ) - य. (Yv.) ३३.४०

बट् सूर्य्य श्रवसा महाँ२असि सत्रा देव महाँ२ऽअसि ।
मह्य देवानामसुर्य्यः पुरोहितो विभु ज्योतिरदाभ्यम् ॥४०॥
*baṭ sūryya śravasā mahāṁ̐2asi satrā deva mahāṁ̐2'asi /*
*mahya devānāmasuryyaḥ purohito vibhu jyotiradābhyam //40 //*

**२४३. जमदग्निः (अभिसंमनस्कामः) (Jamadagniḥ (Abhisaṁmanaskāmaḥ)**

१. अश्विनौ (AŚVINAU) - अ. (Av.) ६.१०२.१-३

यथायं वाहो अश्विना समैति सं च वर्तते। एवा मामभि ते मनः समैतु सं च वर्त्तताम्॥१॥
आहं खिदामि ते मनो राजाश्वः पृष्ट्यामिव ।रेष्मच्छिन्नं यथा तृणं मयि ते वेष्टतां मनः ॥२॥
आंजनस्य मदुघस्य कुष्ठस्य नलदस्य च। तुरो भगस्य हस्ताभ्यामनुरोधनमुद्भरे॥३॥
*yathāyaṁ vāho aśvinā samaiti saṁ cha vartate /*
*evā māmabhi te manaḥ samaitu saṁ cha varttatām //1 //*
*āhaṁ khidāmi te mano rājāśvaḥ pṛṣṭyāmiva /reṣmachchhinnaṁ yathā tṛṇaṁ mayi te veṣṭatāṁ manaḥ //2 //*

*āṁjanasya madughasya kuṣṭhasya naladasya cha I turo bhagasya hastābhyāmanurodhanamudbhare II3 II*

## २४४. जमदग्निः भार्गवः (Jamadagniḥ Bhārgavaḥ)

१. अग्निः (Agniḥ)- य. (Yv.)२९.१३-१८,२०

य. (Yv.) २९.१३-१८

यमेन दत्तं त्रितऽएनमायुनगिन्द्रऽ एण प्रथमोऽअध्यतिष्ठत् ।
गन्धर्वोऽअस्य रशनामगृभ्णात्सूरादश्वं सववो निरतष्ट ॥१३ ॥
असि यमोऽअस्यादित्योऽअर्वन्नसि त्रितो गुह्येन व्रतेन ।
असि सोमेन समया विपृक्तऽआहुस्ते त्रीणि दिवि बन्धनानि ॥१४ ॥
त्रीणि तऽआहुर्दिवि बन्धनानि त्रीण्यप्सु त्रीण्यन्तः समुद्रे ।
उतेव मे वरुणश्छन्त्यस्यर्वन्यत्रा तऽआहुः परमं जनित्रम् ॥१५ ॥
इमा ते वाजिन्नवमार्जनानीमा शफानां सनितुर्निधाना ।
अत्रा ते भद्रा रशनाऽ अपश्यमृतस्य याऽअभिरक्षन्ति गोपा ॥१६ ॥
आत्मानं ते मनसारादजानामवो दिवा पतयन्तं पतंगम् ।
शिरोऽअपश्यं पथिभिः सुगेभिररेणुभिर्जेहमानं पतत्रि ॥१७ ॥
अत्रा ते रूपमुत्तममपश्यं जिगीषमाणमिषऽआ पदे गोः ।
यदा ते मर्त्तोऽअनु भोगमानडादिद् ग्रसिष्ठऽओषधीरजीगः ॥१८ ॥

*yamena dattaṁ trita'enamāyunagindra' eṇa prathamo'adhyatiṣṭhat I*
*gandharvo'asya raśanāmagṛbhṇātsūrādaśvaṁ savavo nirataṣṭa II13 II*
*asi yamo'asyādityo'arvannasi trito guhyena vratena I*
*asi somena samayā vipṛkta'āhuste trīṇi divi bandhanāni II14 II*
*trīṇi ta'āhurdivi bandhanāni trīṇyapsu trīṇyantaḥ samudre I*
*uteva me varuṇaśchhantyasyarvanyatrā ta'āhuḥ paramaṁ janitram II15 II*
*imā te vājinnavamārjanānīmā śaphānāṁ saniturnidhānā I*
*atrā te bhadrā raśanā' apaśyamṛtasya yā'abhirakṣanti gopā II16 II*
*ātmānaṁ te manasārādajānāmavo divā patayantaṁ pataṁgam I*
*śiro'apaśyaṁ pathibhiḥ sugebhirareṇubhirjehamānaṁ patatri II17 II*
*atrā te rūpamuttamamapaśyaṁ jigīṣamāṇamiṣa'ā pade goḥ I*
*yadā te martto'anu bhogamānaḍādid grasiṣṭha'Oṣadhīrajīgaḥ II18 II*

य. (Yv.) २९.२०

हिरण्यशृंगोऽयोऽअस्य पादा मनोजवाऽअवरऽइन्द्रऽआसीत् ।
देवाऽइदस्य हविरद्यमायन्योऽअर्वन्तं प्रथमोऽअध्यतिष्ठत् ॥२० ॥

*hiraṇyaśṛṁgo'yo'asya pādā manojavā'avara'indra'āsīt I*
*devā'idasya haviradyamāyanyo'arvantaṁ prathamo'adhyatiṣṭhat II20 II*

२. अश्विनौ (Aśvinau) - ऋ. (Rv.) ८.१०१.७-८

आ मे वचांस्युद्यता द्युमत्तमानि कर्त्त्वा । उभा यातं नासत्या सजोषसा प्रति हव्यानि वीतये ॥७ ॥
रातिं यद्वामरक्षसं हवामहे युवाभ्यां वाजिनीवसू । प्राचीं होत्रां प्रतिरन्तावितं नरा जमदग्निना ॥८ ॥

*ā me vachāṁsyudyatā dyumattamāni karttvā I*
*ubhā yātaṁ nāsatyā sajoṣasā prati havyāni vītaye II7 II*
*rātiṁ yadvāmarakṣasaṁ havāmahe yuvābhyāṁ vājinīvasū I*
*prāchīṁ hotrāṁ pratirantāvitaṁ narā jamadagninā II8 II*

३. आदित्याः (Ādityāḥ) - ऋ. (Rv.) ८.१०१.६

ते हिन्विरे अरुणं जेन्यं वस्वेकं पुत्रं तिसृणाम् । ते धमान्यमृता मर्त्यानामदब्धा अभिचक्षते ॥६ ॥

*te hinvire aruṇaṁ jenyaṁ vasvekaṁ putraṁ tisṛṇām I*
*te dhamānyamṛtā martyānāmadabdhā abhichakṣate II6 II*

४. इन्द्रः (Indraḥ) - सा. (Sv.) २५५
प्र मित्राय प्रार्यम्णे सचथ्यमृतावसो। वरूथ्ये३वरुणे छन्द्यं वचः स्तोत्रं राजसु गायति ॥३ ॥
*pra mitrāya prāryamṇe sachathyamṛtāvaso /*
*varūthye3varuṇe chhandyaṁ vachaḥ stotraṁ rājasu gāyati //3 //*

५. उषा सूर्यप्रभावाः (Uṣā Sūryaprabhāvāḥ) - ऋ. (Rv.) ८.१०१.१३
इयं या नीर्च्यिर्कणी रूपा रोहिण्या कृता। चित्रेव प्रत्यदर्श्यायत्य१न्तर्दशसु बाहुषु ॥१३ ॥
*iyaṁ yā nīrchyirkaṇī rūpā rohiṇyā kṛtā /*
*chitreva pratyadarśyāyatya1ntardaśasu bāhuṣu //13 //*

६. गौः (Gauḥ)- ऋ. (Rv.) ८.१०१.१५-१६
मता रुद्राणां दुहिता वसूनां स्वसादित्यानाममृतस्य नाभिः।
प्र नु वोचं चिकितुषे जनाय मा गामनागामदितिं वधिष्ट ॥१५ ॥
वचोविदं वाचमुदीरयन्तीं विश्वाभिर्धीभिरुपतिष्ठमानाम्।
देवीं देवेभ्य पर्येयुषीं गामा मावृक्त मर्त्यो दभ्रचेताः ॥१६ ॥
*matā rudrāṇāṁ duhitā vasūnāṁ svasādityānāmamṛtasya nābhiḥ /*
*pra nu vochaṁ chikituṣe janāya mā gāmanāgāmaditiṁ vadhiṣṭa //15 //*
*vachovidaṁ vāchamudīrayantīṁ viśvābhirdhībhirupatiṣṭhamānām /*
*devīṁ devebhya paryeyuṣīṁ gāmā māvṛkta martyo dabhrachetāḥ //16 //*

७. पवमानः (Pavamānaḥ) - ऋ. (Rv.) ८.१०१.१४
प्रजा ह तिस्रो अत्यायमीयुर्न्य१न्या अर्कमभितो विविश्रे।
बृहद्ध तस्थौ भुवनेष्वन्तः पवमानो हरित आ विवेश ॥१४ ॥
*prajā ha tisro atyāyamīyurnya1nyā arkamabhito viviśre /*
*bṛhaddha tasthau bhuvaneṣvantaḥ pavamāno harita ā viveśa //14 //*

८. पवमानः सोमः (Pavamānaḥ Somaḥ)- सा. (Sv.) ४७३; ४८९; ५०८; ७७५-७७७; ८३०-८३२; ९८९; ९८०; ९८१; १००८-१०१०; १०६१-१०६३; १८१०-१८१२
सा. (Sv.) ४७३
असाव्यं शुर्मदायाप्सु दक्षो गिरिष्ठाः। श्यनो न योनिमासदत् ॥७ ॥
*asāvyaṁ śurmadāyāpsu dakṣo giriṣṭhāḥ / śyano na yonimāsadat //7 //*
सा. (Sv.) ४८९
आविशन्कलशं सुतो विश्वा अर्षन्नभिः श्रियः। इन्दुरिन्द्राय धीयते ॥३ ॥
*āviśankalaśaṁ suto viśvā arṣannabhiḥ śriyaḥ / indurindrāya dhīyate //3 //*
सा. (Sv.) ५०८
अयं विचर्षणिर्हितः पवमानः स चेतति। हिन्वान आप्यं बृहत् ॥१२ ॥
*ayaṁ vicharṣaṇirhitaḥ pavamānaḥ sa chetati / hinvāna āpyaṁ bṛhat //12 //*
सा. (Sv.) ७७५-७७७
पवस्व वाचो अग्रियः सोम चित्राभिरूतिभिः। अभि विश्वानि काव्या ॥१ ॥
त्वं समुद्रिया आपोऽग्रियो वाच ईरयन्। पवस्व विश्वचर्षणे ॥ २ ॥
तुभ्येमा भुवना कवे महिम्ने सोम तस्थिरे। तुभ्यं धावन्ति धेनवः ॥३ ॥
*pavasva vācho agriyaḥ soma chitrābhirūtibhiḥ / abhi viśvāni kāvyā //1 //*
*tvaṁ samudriyā āpo'griyo vācha īrayan / pavasva viśvacharṣaṇe // 2 //*
*tubhyemā bhuvanā kave mahimne soma tasthire / tubhyaṁ dhāvanti dhenavaḥ //3 //*
सा. (Sv.) ८३०-८३२
एते असृग्रमिन्दवस्तिरः पवित्रमाशवः। विश्वान्यभि सौभगा ॥१ ॥
विघ्नन्तो दुरिता पुरु सुगा तोकाय वाजिनः। त्मना कृण्वन्तो अर्वतः ॥२ ॥
कृण्वन्तो वरिवो गवेऽभ्यर्षन्ति सुष्टुतिम्। इडामस्मभ्यं संयतम् ॥३ ॥
*ete asṛgramindavastiraḥ pavitramāśavaḥ / viśvānyabhi saubhagā //1 //*
*vighnanto duritā puru sugā tokāya vājinaḥ / tmanā kṛṇvanto arvataḥ //2 //*

*kṛṇvanto varivo gave'bhyarṣanti suṣṭutim । iḍāmasmabhyaṁ saṁyatam ॥3 ॥*

सा. (Sv.) ९७९-९८१

यास्ते धारा मधुश्चुतोऽसृग्रमिन्द ऊतये। ताभिः पवित्रमासदः ॥१ ॥
सो अर्षेन्द्राय पीतये तिरो वाराण्यव्यया। सीदन्नृतस्य योनिमा ॥२ ॥
त्वं सोम परि स्रव स्वादिष्ठो अंगिरोभ्यः। वरिवोविद्घृतं पयः ॥३ ॥

*yāste dhārā madhuśchuto'sṛgraminda ūtaye । tābhiḥ pavitramāsadaḥ ॥1 ॥*
*so arṣendrāya pītaye tiro vārāṇyavyayā । sīdannṛtasya yonimā ॥2 ॥*
*tvaṁ soma pari srava svādiṣṭho aṁgirobhyaḥ । varivovidaghutaṁ payaḥ ॥3 ॥*

सा. (Sv.) १००८-१०१०

असाव्यंशुर्मदायाप्सु दक्षो गिरिष्ठाः। श्येनो न योनिमासदत् ॥१ ॥
शुभ्रमन्धो देववातमप्सु धौतं नृभिः सुतम्। स्वदन्ति गावः पयोभिः ॥ २ ॥
आदीमश्वं न हेतारमशूशुभन्नमृताय। मधो रसं सधमादे ॥३ ॥

*asāvyaṁśurmadāyāpsu dakṣo giriṣṭhāḥ । śyeno na yonimāsadat ॥1 ॥*
*śubhramandho devavātāmapsu dhautaṁ nṛbhiḥ sutam ।*
*svadanti gāvaḥ payobhiḥ ॥2 ॥*
*ādīmaśvaṁ na hetāramaśūśubhannamṛtāya । madho rasaṁ sadhamāde ॥3 ॥*

सा. (Sv.) १०६१-१०६३

एते सोमा असृक्षत गृणानाः शवसे महे। मदिन्तमस्य धारया ॥१ ॥
अभि गव्यानि वीतये नृम्णा पुनानो अर्षसि। सन्द्वाजः परि स्रव ॥२ ॥
उत नो गोमतीरिषो विश्वा अर्ष परिष्टुभः। गृणानो जमदग्निना ॥३ ॥

*ete somā asṛkṣata gṛṇānāḥ śavase mahe । madintamasya dhārayā ॥1 ॥*
*abhi gavyāni vītaye nṛmṇā punāno arṣasi । sandvājaḥ pari srava ॥2 ॥*
*uta no gomatīriṣo viśvā arṣa pariṣṭubhaḥ । guṇāno jamadagninā ॥3 ॥*

सा. (Sv.) १८१०-१८१२

पवस्व सोम मन्दयन्निन्द्राय मधुमत्तमः ।१ ॥
ते सुतासो विपश्चितः शुक्रा वायुमसृक्षत ॥२ ॥
असृग्रं देववीतये वाजयन्तो रथा इव ॥३ ॥

*pavasva soma mandayannindrāya madhumattamaḥ ।1 ॥*
*te sutāso vipaśchitaḥ śukrā vāyumasṛkṣata ॥2 ॥*
*asṛgraṁ devavītaye vājayanto rathā iva ॥3 ॥*

९. मनुष्यः (Manuṣyaḥ)- य. (Yv.) २९.१९; २४

य. (Yv.) २९.१९

अनु त्वा रथोऽअनु मर्योऽअर्वन्ननु गावोऽनु भगः कनीनाम्।
अनु व्रातासस्तव सख्यमीयुरनु देवा ममिरे वीर्यं ते ॥१९ ॥

*anu tvā ratho'anu maryo'arvannanu gāvo'nu bhagaḥ kanīnām ।*
*anu vrātāsastava sakhyamīyuranu devā mamire vīryaṁ te ॥19 ॥*

य. (Yv.) २९.२४

उप प्रागात्परमं यत्सधस्थमर्वाँअच्छा पितरं मातरं च।
अद्या देवांजुष्टतमो हि गम्याऽअथा शास्ते दाशुषे वार्याणि ॥२४ ॥

*upa prāgātparamaṁ yatsadhasthamarvām̐achchhā pitaraṁ mātaraṁ cha ।*
*adyā devāṁjuṣṭatamo hi gamyā'athā śāste dāśuṣe vāryāṇi ॥24 ॥*

१०. मनुष्याः (Manuṣyāḥ)- य. (Yv.) २९.२१; २३

य. (Yv.) २९.२१

प्राचीनं बर्हिः प्रदिशा पृथिव्या वस्तोरस्या वृज्यते अग्रे अह्नाम्।
व्यु प्रथते वितरं वरीयो देवेभ्यो अदितये स्योनम् ॥ २९ ॥

*prāchīnaṁ barhiḥ pradiśā pṛthivyā vastorasyā vṛjyate agre ahnām ।*

*vyu prathate vitaraṁ varīyo devebhyo aditaye syonam ॥ 29 ॥*

य. (Yv.) २९.२३

उप प्रागाच्छसनं वाज्यर्वा देवद्रीचा मनसा दीध्यानः ।
अजः पुरो नीयते नाभिरस्यानु पश्चात्कवयो यन्ति रेभाः ॥ २३ ॥

*upa prāgāchchhasanaṁ vājyarvā devadrīchā manasā dīdhyānaḥ ।*
*ajaḥ puro nīyate nābhirasyānu pśchatkavayo yanti rebhāḥ ॥ 23 ॥*

११. मित्रावरुणौ (Mitrāvaruṇau) - ऋ. (Rv.) ८.१०१.१-४

ऋधगित्था स मर्त्यः शशमे देवतातये। यो नूनं मित्रावरुणावभिष्टय आचक्रे हव्यदातये ॥१ ॥
वर्षिष्ठक्षत्रा उरुचक्षसा नरा राजाना दीर्घश्रुत्तमा।
ता बाहुता न दंसना रथर्यतः सकं सूर्यस्य रश्मिभिः ॥ २ ॥
प्र यो वां मित्रावरुणाजिरो दूतो अद्रवत्। अयः शीर्षा मदरेघुः ॥३ ॥
न यः संपृच्छे न पुनर्हवीतये न संवादाय रमते।
तस्मान्नो अद्य समृतेरुरुष्यतं बाहुभ्यां न उरुष्यतम् ॥ ४ ॥

*ṛdhagitthā sa martyaḥ śaśame devatātaye ।*
*yo nūnaṁ mitrāvaruṇāvabhiṣṭaya āchakre havyadātaye ॥1 ॥*
*varṣiṣṭhakṣatrā uruchakṣasā narā rājānā dīrghaśruttamā ।*
*tā bāhutā na daṁsanā ratharyataḥ sakaṁ sūryasya raśmibhiḥ ॥ 2 ॥*
*pra yo vāṁ mitrāvaruṇājiro dūto adravat । ayaḥ śīrṣā madareghuḥ ॥3 ॥*
*na yaḥ saṁpṛchchhe na punarhavītaye na saṁvādāya ramate ।*
*tasmānno adya samṛteruruṣyataṁ bāhubhyāṁ na uruṣyatam ॥ 4 ॥*

१२. मित्रावरुणौ आदित्याश्च- (Mitrāvaruṇau Ādityāścha-) ऋ. (Rv.) ८.१०१.५

प्र मित्राय प्रार्यम्णे सचथ्यमृतावसो। वरूथ्यं१ वरुणे छन्द्यं वचः स्तोत्रं राजसु गायत ॥५ ॥

*pra mitrāya prāryamṇe sachathyamṛtāvaso ।*
*varūthyaṁ1 varuṇe chhandyaṁ vachaḥ stotraṁ rājasu gāyata ॥5 ॥*

१३. यजमानः (Yajamānaḥ)- य. (Yv.) २९.१२

यदक्रन्दः प्रथमं जायमानऽउद्यन्त्समुद्रादुत वा पुरीषात्।
श्येनस्य पक्षा हरिणस्य बाहूऽउपस्तुत्यं महि जातं तेऽअर्वन् ॥१२ ॥

*yadakrandaḥ prathamaṁ jāyamāna'udyantsamudrāduta vā purīṣāt ।*
*śyenasya pakṣā hariṇasya bāhū'upastutyaṁ mahi jātaṁ te'arvan ॥12 ॥*

१४. वायुः (Vāyuḥ)- ऋ. (Rv.) ८.१०१.९-१०

आ नो यज्ञं दिविस्पृशं वायो याहि सुमन्मभिः ।
अन्तः पवित्र उपरि श्रीणानो३यं शुक्रो अयामि ते ॥९ ॥
वेत्यध्वर्युः पथिभी रजिष्ठैः प्रति हव्यानि वीतये।
अधा नियुत्व उभयस्य नः पिब शुचिं सोमं गवाशिरम् ॥१० ॥

*ā no yajñaṁ divispṛśaṁ vāyo yāhi sumanmabhiḥ ।*
*antaḥ pavitra upari śrīṇāno3yaṁ śukro ayāmi te ॥9 ॥*
*vetyadhvaryuḥ pathibhī rajiṣṭhaiḥ prati havyāni vītaye ।*
*adhā niyutva ubhayasya naḥ piba śuchiṁ somaṁ gavāśiram ॥10 ॥*

१५. वायवः (Vāyavaḥ) - य. (Yv.)२९.२२

तव शरीरं पतयिष्ण्वर्वन्तव चित्तं वातऽइव ध्रजीमान् ।
तव शृंगाणि विष्ठिता पुरुत्रारण्येषु जर्भुराणा चरन्ति ॥२२ ॥

*tava śarīraṁ patayiṣṇvarvantava chittaṁ vāta'iva dhrajīmān ।*
*tava śṛṁgāṇi viṣṭhitā purutrāraṇyeṣu jarbhurāṇā charanti ॥22 ॥*

१६. सूर्यः (Sūryaḥ) - ऋ. (Rv.) ८.१३.११-१२; सा. (Sv.) १७८८- ८९

ऋ. (Rv.) ८.१३.११-१२

तूतुजानो महेमतेऽश्वभिः प्रुषितप्सुभिः। आ याहि यामाशुभिः शमिद्धिते ॥११ ॥

इन्द्र शविष्ठ सत्पते रयिं गृणत्सु धारय। श्रयः सुरिभ्यो अमृतं वसुत्वनम्॥१२ ॥

*tūtujāno mahemate'śvabhiḥ pruṣitapsubhiḥ । ā yāhi yāmāśubhiḥ śamiddhite ॥11 ॥*

*indra śaviṣṭha satpate rayiṁ gṛṇatsu dhāraya ।*

*śrayaḥ suribhyo amṛtaṁ vasutvanam ॥12 ॥*

सा. (Sv.) १७८८-८९

बण्महाँ असि सूर्य बडादित्य महाँ असि ।

महस्ते सतो महिमा पनिष्टम् मह्नास देव महाँ असि ॥१॥

बट् सूर्य श्रवसा महाँ असि सत्रा देवा महाँ असि ।

मह्ना देवानामसूर्यः पुरोहितो विभु ज्योतिरदाभ्यम् ॥२॥

*baṇmahām̐ asi sūrya baḍāditya mahām̐ asi ।*

*mahaste sato mahimā paniṣṭam mahnāsa deva mahām̐ asi ॥1 ॥*

*baṭ sūrya śravasā mahām̐ asi satrā devā mahām̐ asi ।*

*mahnā devānāmasūryaḥ purohito vibhu jyotiradābhyam ॥2 ॥*

१७. सूर्यः (ऋसर्व.) ८.१०१.११ (सार्षेदी.) इन्द्रः (साग्री. सास्वा.) (Sūryaḥ [Rss.] 8.101.11 [Sad.] Indraḥ [Ssb. Sas.]) - सा. (Sv.) २७६

वण्महाँ असि सूर्य बडादित्य महाँ असि।

महस्ते सतो महिमा पनिष्टम मह्ना देव महाँ असि॥४॥

*vaṇmahām̐ asi sūrya baḍāditya mahām̐ asi ।*

*mahaste sato mahimā paniṣṭama mahnā deva mahām̐ asi ॥4 ॥*

## २४५. जमदग्नी रामो वा (Jamadagnī Rāmo Vā)

१. आप्रियः (Āprriyaḥ) - ऋ. (Rv.) १०.११०.१-११

समिद्धो अद्य मनुषो दुरोणे देवो देवान्यजसि जातवेदः ।

आ च वह मित्रमहश्चिकित्वान्त्वं दूतः कविरसि प्रचेताः ॥१॥

तनूनपात्पथ ऋतस्य यानान्मध्वा समंजन्त्स्वदया सुजिह्व ।

मन्मानि धीभिरुत यामृन्धन्देवत्रा च कृणुह्यध्वरं नः ॥२॥

आजुह्वान ईड्यो वन्द्यश्चा याह्यग्ने वसुभिः सजोषाः ।

त्वं देवानामसि यह्व होता स एनान्यक्षीषितो यजीयान् ॥३॥

प्राचीनं बर्हिः प्रदिशा पृथिव्या वस्तोरस्या वृज्यते अग्रे अह्नाम ।

व्यु प्रथते वितरं वरीयो देवेभ्यो अदित्ये स्योनम् ॥४॥

व्यचस्वतीरुर्विया वि श्रयन्तां पतिभ्यो न जनयः शुम्भमानाः ।

देवीर्द्वारो बृहतीर्विश्वमिन्वा देवेभ्यो भवत सुप्रायणाः ॥५॥

आ सुष्वयन्ती यजते उपाके उषासानक्ता सदतां नि योनौ ।

दिव्ये योषणे बृहती सुरुक्मे अधि श्रियं शुक्रपिशं दधाने ॥६॥

दैव्या होतारा प्रथमा सुवाचा मिमाना यां मनुषो यजध्यै ।

प्रचोदयन्ता विदथेषु कारू प्राचीनं ज्योतिः प्रदिशा दिशन्ता ॥७॥

आ नो यां भारती तूयमेत्विळा मनुष्वदिह चेतयन्ती ।

तिस्रो देवीर्बर्हिरेदं स्योनं सरस्वती स्वपसः सदन्तु ॥८॥

य इमे द्यावापृथिवी जनित्री रूपैरपिंशद्भुवनानि विश्वा ।

तमद्य होतरिषितो यजीयान्देवं त्वष्टारमिह यक्षि विद्वान् ॥९॥

उपावसृज त्मन्या समंजन्देवानां पाथ ऋतुथा हवींषि ।

वनस्पतिः शमिता देवो अग्निः खदन्तु हव्यं मधुना घृतेन ॥१०॥

सद्यो जातो व्यमिमीत यामग्निर्देवानामभवत्पुरोगाः ।

अस्य होतुः प्रदिश्यृतस्य वाचि स्वाहाकृतं हविरदन्तु देवाः ॥११॥

*samiddho adya manuṣo duroṇe devo devānyajasi jātavedaḥ ।*

*ā cha vaha mitramahaśchikitvāntvaṁ dūtaḥ kavirasi prachetāḥ ॥1 ॥*

*tanūnapātpatha ṛtasya yānānmadhvā samaṁjantsvadayā sujihna ।*

*manmāni dhībhiruta yāmṛndhandevatrā cha kṛṇuhyadhvaraṁ naḥ //2 //*
*ājuhnāna īḍyo vandyaśchā yāhyagne vasubhiḥ sajoṣāḥ /*
*tvaṁ devānāmasi yahna hotā sa enānyakṣīṣito yajīyān //3 //*
*prāchīnaṁ barhiḥ pradiśā pṛthivyā vastorasyā vṛjyate agre ahnāma /*
*vyu prathate vitaraṁ varīyo devebhyo aditye syonam //4 //*
*vyachasvatīrurviyā vi śrayantāṁ patibhyo na janayaḥ śumbhamānāḥ /*
*devīrdvāro bṛhatīrviśvaminvā devebhyo bhavata suprāyaṇāḥ //5 //*
*ā suṣvayantī yajate upāke uṣāsānaktā sadatāṁ ni yonau /*
*divye yoṣaṇe bṛhatī surukme adhi śriyaṁ śukrapiśaṁ dadhāne //6 //*
*daivyā hotārā prathamā suvāchā mimānā yāṁ manuṣo yajadhyai /*
*prachodayantā vidatheṣu kārū prāchīnaṁ jyotiḥ pradiśā diśantā //7 //*
*ā no yāṁ bhāratī tūyametviḻā manuṣvadiha chetayantī /*
*tisro devīrbarhiredaṁ syonaṁ sarasvatī svapasaḥ sadantu //8 //*
*ya ime dyāvāpṛthivī janitrī rūpairapiṁśadbhuvanāni viśvā /*
*tamadya hotariṣito yajīyāndevaṁ tvaṣṭāramiha yakṣi vidvān //9 //*
*upāvasṛja tmanyā samaṁjandevānāṁ pātha ṛtuthā havīṁṣi /*
*vanaspatiḥ śamitā devo agniḥ khadantu havyaṁ madhunā ghṛtena //10 //*
*sadyo jāto vyamimīta yāmagnirdevānāmabhavatpurogāḥ /*
*asya hotuḥ pradiśyṛtasya vāchi svāhākṛtaṁ haviradantu devāḥ //11 //*

## २४६. जयः (Jayaḥ)

१. इन्द्रः (Indraḥ) - ऋ. (Rv.) १०.१८०.१-३; य. (Yv.)१८७१

ऋ. (Rv.) १०.१८०.१-३

प्र ससाहिषे पुरुहूत शत्रूंज्येष्ठस्ते शुष्म इह रातिरस्तु ।
इन्द्रा भर दक्षिणेना वसूनि पतिः सिन्धूनामसि रेवतीनाम् ॥१॥
मृगो न भीमः कुचरो गिरिष्ठाः परावत आ जगन्था परस्याः ।
सृकं संशाय पविमिन्द्र तिग्मं वि शत्रून्ताळिह वि मृधो नुदख ॥२॥
इन्द्र क्षत्रमभि वाममोजोऽजायथा वृषभ चर्षणीनाम् ।
आपानुदो जनममित्रयन्तमुरुं देवेभ्यो अकृणोरु लोकम् ॥३॥
*pra sasāhiṣe puruhūta śatrūṁjyeṣṭhaste śuṣma iha rātirastu /*
*indrā bhara dakṣiṇenā vasūni patiḥ sindhūnāmasi revatīnām //1 //*
*mṛgo na bhīmaḥ kucharo giriṣṭhāḥ parāvata ā jaganthā parasyāḥ /*
*sṛkaṁ saṁśāya pavimindra tigmaṁ vi śatrūntāḻiha vi mṛdho nudakha //2 //*
*indra kṣatramabhi vāmamojo'jāyathā vṛṣabha charṣaṇīnām /*
*āpānudo janamamitrayantamuruṁ devebhyo akṛṇoru lokam //3 //*

य. (Yv.)१८.७१

मृगो न भीमः कुचरो गिरिष्ठाः परावतऽआजगन्था परस्याः ।
सृकंसं शाय पविमिन्द्र तिग्मं वि शत्रून्ताढि वि मृधो नुदस्व ॥७१॥
*mṛgo na bhīmaḥ kucharo giriṣṭhāḥ parāvata'ājaganthā parasyāḥ /*
*sṛkaṁsaṁ śāya pavimindra tigmaṁ vi śatrūntāḍhi vi mṛdho nudasva //71 //*

## २४७. जय ऐन्द्रः (Jaya Aindraḥ)

१. इन्द्रः (Indraḥ) - सा. (Sv.) १८७३

मृगो न भीमः कृचरो गिरिष्ठाः परावत आ जगन्था परस्याः ।
सृकं सं शाय पविमिन्द्र तिग्मं वि शत्रूं ताढि विमृधो नुदस्व ॥१॥
*mṛgo na bhīmaḥ kṛcharo giriṣṭhāḥ parāvata ā jaganthā parasyāḥ /*
*sṛkaṁ saṁ śāya pavimindra tigmaṁ vi śatrūṁ tāḍhi vimṛdho nudasva //1 //*

## २४८. जरिता (Jaritā)

१. अग्निः (Agniḥ) - ऋ. (Rv.) १०.१४२.१-२

अयमग्ने जरिता त्वे अभूदपि सहसः सूनो नह्य१न्यदस्त्याप्यम् ।
भद्रं हि शर्म त्रिवरूथमस्ति त आरे हिंसानामप दिद्युमा कृधि ॥१॥
प्रवत्ते अग्ने जनिमा पितूयतः साचीव विश्वा भुवना न्यृंजसे ।
प्र सप्तयः प्र सनिषन्त नो धियः पुरश्चरन्ति पशुपाइव त्मना ॥२॥

*ayamagne jaritā tve abhūdapi sahasaḥ sūno nahya1nyadastyāpyam /*
*bhadraṁ hi śarma trivarūthamasti ta āre hiṁsānāmapa didyumā kṛdhi //1 //*
*pravatte agne janimā pitṛyataḥ sāchīva viśvā bhuvanā nyṛṁjase /*
*pra saptayaḥ pra saniṣanta no dhiyaḥ puraścharanti paśupāiva tmanā //2 //*

## २४९. जाटिकायनः (Jāṭikāyanaḥ)

१. इन्द्रः (Indraḥ) - अ. (Av.) ६.३३.१-३

यस्येदमा रजो युजस्तुजे जना वनं स्वः। इन्द्रस्य रन्त्यं बृहत् ॥१॥
नाधृष आ दधृषते धृषाणो धृषितः शवः। पुरा यथा व्यथिः श्रव इन्द्रस्य नाधृषे शवः ॥२॥
स नो ददातु तां रयिमुरुं पिशंगसंदृशम्। इन्द्रः पतिस्तुविष्टमो जनेष्वा ॥३॥

*yasyedamā rajo yujastuje janā vanaṁ svaḥ / indrasya rantyaṁ bṛhat //1 //*
*nādhṛṣa ā dadhṛṣate dhṛṣāṇo dhṛṣitaḥ śavaḥ /*
*purā yathā vyathiḥ śrava indrasya nādhṛṣe śavaḥ //2 //*
*sa no dadātu tāṁ rayimuruṁ piśaṁgasaṁdṛśam / indraḥ patistuviṣṭamo janeṣvā //3 //*

२. विवस्वान् (Vivasvān) - अ. (Av.) ६.११६.१-३

यद् यामं चक्रुर्निखनन्तो अग्रे कार्षीवणा अन्नविदो न विद्यया ।
वैवस्वते राजनि तज्जुहोम्यथ यियं मधुमदस्तु नोऽन्नम् ॥१॥
वैवस्वतः कृणवद् भागधेयं मधुभागो मधुना सं सृजाति ।
मातुर्यदेन इषितं न आगन् यद् वा पितापराद्धो जिहीडे ॥२॥
यदीदं मातुर्यदि वा पितुर्नः परि भ्रातुः पुत्राच्चेतस एन आगन् ।
यावन्तो अस्मान् पितरः सचन्ते तेषां सर्वेषां शिवो अस्तु मन्युः ॥३॥

*yad yāmaṁ chakrurnikhananto agre kārṣīvaṇā annavido na vidyayā /*
*vaivasvate rājani tajjuhomyatha yiāyaṁ madhumadastu no'nnam //1 //*
*vaivasvataḥ kṛṇavad bhāgadheyaṁ madhubhāgo madhunā saṁ sṛjāti /*
*māturyadena iṣitaṁ na āgan yad vā pitāparāddho jihīḍe //2 //*
*yadīdaṁ māturyadi vā piturnaḥ pari bhrātuḥ putrāchchetasa ena āgan /*
*yāvanto asmān pitaraḥ sachante teṣāṁ sarveṣāṁ śivo astu manyuḥ //3 //*

## २५०. जुहुर् ब्रह्मजाया ऊर्ध्वनाभा वा ब्राह्मः (Juhur Brahmajāyā Ūrdhvanābhā Vā Brāhmaḥ)

१. विश्वेदेवाः (Viśvedevāḥ) - ऋ. (Rv.) १०.१०९.१-७

तेऽवदन्प्रथमा ब्रह्मकिल्बिषेऽकूपारः सलिलो मातरिश्वा ।
वीळुहरास्तप उग्रो मयोभूरापो देवीः प्रथमजा ऋतेन ॥१॥
सोमो राजा प्रथमो ब्रह्मजायां पुनः प्रायच्छहणीयमानः ।
अन्वर्तिता वरुणो मित्र आसीदग्निर्होता हस्तगृह्या निनाय ॥२॥
हस्तेनैव ग्राह्य आधिरस्या ब्रह्मजाययेयमिति चेदवोचन् ।
न दूताय प्रह्ये तस्थ एषा तथा राष्ट्रं गुपितं क्षत्रियस्य ॥३॥
भीमा जाया ब्राह्मणस्योपनीता दुर्धां दधाति परमे व्योमन् ॥४॥
ब्रह्मचारी चरति वेविषद्विषः स देवानां भवत्येकमंगम् ।
तेन जायामन्वविन्दद् बृहस्पतिः सोमेन नीतां जुह्वं१न देवाः ॥५॥
पूनर्वै देवा अददुः पुनर्मनुष्या उत ।
राजानः सत्यं कृण्वाना ब्रह्मजाया पुनर्ददुः ॥६॥

पुनर्दाय ब्रह्मजायां कृत्वी देवैर्निकिल्बिषम् ।
ऊर्जं पृथिव्या भक्त्वायोरुगायमुपासते ॥७ ॥
*te'vadanprathamā brahmakilbiṣe'kūpāraḥ salilo mātariśvā /*
*vīḷuharāstapa ugro mayobhūrāpo devīḥ prathamajā ṛtena //1 //*
*somo rājā prathamo brahmajāyāṁ punaḥ prāyachchhahaṇīyamānaḥ /*
*anvartitā varuṇo mitra āsīdagnirhotā hastagṛhyā nindruāya //2 //*
*hastenaiva grāhya ādhirasyā brahmajāyayeyamiti chedavochan /*
*na dūtāya prahye tastha eṣā tathā rāṣṭraṁ gupitaṁ kṣatriyasya //3 //*
*bhīmā jāyā brāhmaṇasyopanītā durdhā dadhāti parame vyoman //4 //*
*brahmachārī charati veviṁṣadviṣaḥ sa devānāṁ bhavatyekamaṅgam /*
*tena jāyāmanvavindad bṛhaspatiḥ somena nītāṁ juhnaṁ1na devāḥ //5 //*
*pūnarvai devā adaduḥ punarmanuṣyā uta /*
*rājānaḥ satyaṁ kṛṇvānā brahmajāyā punardaduḥ //6 //*
*punardāya brahmajāyāṁ kṛtvī devairnikilbiṣam /*
*ūrja pṛthivyā bhaktvāyorugāyamupāsate //7 //*

## २५१. जूतिः (Jūtiḥ)

१. केशिनः (Keśinaḥ) - ऋ. (Rv.) १०.१३६.१

केश्यश्गिंन केशी विषं केशी बिभर्ति रोदसी। केशी विश्वं स्वर्दृशे केशीदं ज्योतिरुच्यते ॥१ ॥
*keśya1giṁna keśī viṣaṁ keśī bibharti rodasī /*
*keśī viśvaṁ svardṛśe keśīdaṁ jyotiruchyate //1 //*

## २५२. जेता माधुच्छन्दसः (Jetā Mādhuchchhandasaḥ)

१. इन्द्रः (Indraḥ) - ऋ. (Rv.) १.११.१-८; सा. (Sv.) ३४३; ३५९; १२५०-१२५२

ऋ. (Rv.) १.११.१-८

इन्द्रं विश्वा अवीवृधन्त्समुद्रव्यचसं गिरः। रथीतमं रथीनां वाजानां सत्पतिं पतिम् ॥१ ॥
सख्ये त इन्द्र वाजिनो मा भेम शवसस्पते। त्वामभि प्र णोनुमो जेतारमपराजितम् ॥२ ॥
पूर्वीरिन्द्रसय रातयो न वि दस्यन्त्यूतयः। यदी वाजस्य गोमतः स्तोतृभ्यो मंहते मघम् ॥३ ॥
पुरां भिन्दुर्युवा कविरमितौजा अजायत। इन्द्रो विश्वस्य कर्मणो धर्ता वज्री पुरुष्टुतः ॥४ ॥
त्वं वलस्य गोमतोऽपावरद्रिवो बिलम्। त्वां देवा अबिभ्युषस्तुज्यमानास आविषुः ॥५ ॥
त्वाहं शूर रातिभिः प्रत्यायं सिन्धुमावदन्। उपातिष्ठन्त गिर्वणो विदुष्टे तस्य कारवः ॥६ ॥
मायाभिरिन्द्र मायिनं त्वं शुष्णमवातिरः। विदुष्टे तस्य मेधिरास्तेषां श्रवांस्युत्तिर ॥७ ॥
इन्द्रमीशानमोजसाभि स्तोमा अनूषत। सहस्रं यस्य रातय उत वा सन्ति भूयसीः ॥८ ॥
*indraṁ viśvā avīvṛdhantsamudravyachasaṁ giraḥ /*
*rathītamaṁ rathīnāṁ vājānāṁ satpatiṁ patim //1 //*
*sakhye ta indra vājino mā bhema śavasaspate /*
*tvāmabhi pra ṇonumo jetāramaparājitam //2 //*
*pūrvīrindrasaya rātayo na vi dasyantyūtayaḥ /*
*yadī vājasya gomataḥ stotṛbhyo maṁhate magham //3 //*
*purāṁ bhinduryuvā kaviramitaujā ajāyata /*
*indro viśvasya karmaṇo dhartā vajrī puruṣṭutaḥ //4 //*
*tvaṁ valasya gomato'pāvaradrivo bilam /*
*tvāṁ devā abibhyuṣastujyamānāsa āviṣuḥ //5 //*
*tvāhaṁ śūra rātibhiḥ pratyāyaṁ sindhumāvadan /*
*upātiṣṭhanta girvaṇo viduṣṭe tasya kāravaḥ //6 //*
*māyābhirindra māyinaṁ tvaṁ śuṣṇamavātiraḥ /*
*viduṣṭe tasya medhirāsteṣāṁ śravāṁsyuttira //7 //*
*indramīśānamojasābhi stomā anūṣata /*
*sahasraṁ yasya rātaya uta vā santi bhūyasīḥ //8 //*

सा. (Sv.) ३४३

इन्द्र विश्वा अवीवृधन्त्समुद्रव्यचसं गिरः। रथीतमं रथीनां वाजानां सत्पतिं पतिम् ॥२॥

*indra viśvā avīvṛdhantsamudravyachasaṁ giraḥ |*

*rathītamaṁ rathīnāṁ vājānāṁ satpatiṁ patim ||2 ||*

सा. (Sv.) ३५९

पुरां भिन्दुर्युवा कविरमितौजा अजायत। इन्द्रो विश्वस्य कर्मणो धर्ता वज्री पुरुष्टुतः ॥८॥

*purāṁ bhinduryuvā kaviramitaujā ajāyata |*

*indro viśvasya karmaṇo dhartā vajrī puruṣṭutaḥ ||8 ||*

सा. (Sv.) १२५०-१२५२

पुरां भिन्दुर्युवा कविरमितौजा अजायत। इन्द्रो विश्वस्य कर्मणो धर्ता वज्री पुरुष्टुतः ॥१॥

त्वं वलस्य गोमतोऽपावरद्रिवो बिलम्। त्वां देवा अबिभ्युषस्तुज्यमानास आविषुः ॥२॥

इन्द्रमीशानमोजसाभि स्तोमैरनूषत। सहस्रं यस्य रातय उत वा सन्ति भूयसीः ॥३॥

*purāṁ bhinduryuvā kaviramitaujā ajāyata |*

*indro viśvasya karmaṇo dhartā vajrī puruṣṭutaḥ ||1 ||*

*tvaṁ valasya gomato'pāvaradrivo bilam |*

*tvāṁ devā abibhyuṣastujyamānāsa āviṣuḥ ||2 ||*

*indramīśānamojasābhi stomairanūṣata |*

*sahasraṁ yasya rātaya uta vā santi bhūyasīḥ ||3 ||*

२. पवमानः सोमः (Pavamānaḥ Somaḥ) - सा. (Sv.) ८२७-८२९

इन्द्र विश्वा अवीवृधन्त्समुद्रव्यचसं गिरः रथीतमं रथीनां वाजानां सत्पतिं पतिम् ॥१॥

सख्ये त इन्द्र वाजिनो मा भेम शवसस्पते। त्वामभि प्र नोनुमो जेतारमपराजितम् ॥२॥

पूर्वीरिन्द्रस्य रातयो न वि दस्यन्त्यूतयः। यदा वाजस्य गोमत स्तोतृभ्यो मंहते मघम् ॥३॥

*indra viśvā avīvṛdhantsamudravyachasaṁ giraḥ rathītamaṁ rathīnāṁ vājānāṁ satpatiṁ patim ||1 ||*

*sakhye ta indra vājino mā bhema śavasaspate |*

*tvāmabhi pra nonumo jetāramaparājitam ||2 ||*

*pūrvīrindrasya rātayo na vi dasyantyūtayaḥ |*

*yadā vājasya gomata stotṛbhyo maṁhate magham ||3 ||*

## २५३. तपुर्मूर्धा बार्हस्पत्यः (Tapurmūrdhā Bārhaspatyaḥ)

१. बृहस्पतिः (Bṛhaspatiḥ) - ऋ. (Rv.) १०.१८२.१-३

बृहस्पतिर्नयतु दुर्गहा तिरः पुनर्नेषदघशंसाय मन्म ।

क्षिपदशस्तिमप दुर्मतिं हन्नथा करद्यजमानाय शं योः ॥१॥

नराशंसो नोऽवतु प्रयाजे शं नो अस्त्वनुयाजो हवेषु ।

क्षिपदशस्तिमप दुर्मतिं हन्नथा करद्यजमानाय शं योः ॥२॥

तपुर्मूर्धा तपतु रक्षसे ये ब्रह्मद्विषः शरवे हन्तवा उ ।

क्षिपदशस्तिमप दुर्मतिं हन्नथा करद्यजमानाय शं योः ॥३॥

*bṛhaspatirnayatu durgahā tiraḥ punarneṣadaghaśaṁsāya manma |*

*kṣipadaśastimapa durmatiṁ hannathā karadyajamānāya śaṁ yoḥ ||1 ||*

*narāśaṁso no'vatu prayāje śaṁ no astvanuyājo haveṣu |*

*kṣipadaśastimapa durmatiṁ hannathā karadyajamānāya śaṁ yoḥ ||2 ||*

*tapurmūrdhā tapatu rakṣase ye brahmadviṣaḥ śarave hantavā u |*

*kṣipadaśastimapa durmatiṁ hannathā karadyajamānāya śaṁ yoḥ ||3 ||*

## २५४. तान्वः पार्थ्यः (Tānvaḥ Pārthyaḥ)

१. विश्वेदेवाः (Viśvedevāḥ) - ऋ. (Rv.) १०.९३.१-१५

महि द्यावापृथिवी भूतमुर्वी नारी यह्वी न रोदसी सदं नः ।

तेभिर्नः पातं सह्यस एभिर्नः पातं शूषणि ॥१॥

योयो स मर्त्यो देवान्त्सपर्यति ।
यः सुम्नैर्दीर्घश्रुत्तम आविवासात्येनान् ॥२॥
विश्वेषामिरज्यवो देवानां वार्महः ।
विश्वे हि विश्वमहसो विश्वे योषु यियाः ॥३॥
ते घाराजानो अमृतस्य मन्द्रा अर्यमा मित्रो वरुणः परिज्मा ।
कद्रुद्रो नृणां स्तुतो मरुतः पूषणो भगः ॥४॥
उत नो नक्तमपां वृषण्वसू ससूर्यामासा सदनाय सधन्या ।
सचा यत्साद्येषामहिर्बुध्नेषु बुध्न्यः ॥५॥
उत नो देवावश्विना शुभस्पती धामभिर्मित्रावरुणा उरुष्यताम् ।
महः स राय एषतेऽति धन्वेव दुरिता ॥६॥
उत नो रुद्रा चिन्मृळतामश्विना विश्वे देवासो रथस्पतिर्भगः ।
ऋभुर्वाज ऋभुक्षणः परिज्मा विश्ववेदसः ॥७॥
ऋभुऋर्भुक्षा ऋभुर्विधतो मद आ ते हरी जूजुवानस्य वाजिना ।
दुष्टरं यस्य साम चिदृधग्याो न मानुषः ॥८॥
कृधी नो अह्रयो दव सवितः स च स्तुषे मघोनाम् ।
सही न इन्द्रो वह्निभिर्न्येषां चर्षणीनां चक्रं रश्मिं न योयुवे ॥९॥
ऐषु द्यावापृथिवी धातं महदस्मे वीरेषु विश्वचर्षणि श्रवः ।
पृक्षं वाजस्य सातये पृक्षं रायोत तुर्वणे ॥१०॥
एतं शंसमिन्द्रास्मयुष्ट्वं कूचित्सन्तं सहसावन्नभिष्टये सदा पाह्यभिष्टये ।
मेदतां वेदता वसो ॥११॥
एतं मे स्तोमं तना न सूर्ये द्युतद्यामनं वावृधन्त नृणाम् ।
संवननं नाश्व्यं तष्टेवानपच्युतम् ॥१२॥
वावर्त येषां राया युक्तैषां हिरण्ययी । नेमधिता न पौंस्या वृथेव विष्टान्ता ॥१३॥
प्र तद्दुःशीमे पृथवाने वेने प्र रामे वोचमसुरे मघवत्सु ।
ये युक्त्वाय पंच शतास्मयु पथा विश्राव्येषाम् ॥१४॥
अधीन्न्वत्र सप्ततिं च सप्त च ।
सद्यो दिदिष्ट तान्वः सद्यो दिदिष्ट पार्थ्यः सद्यो दिदिष्ट मायवः ॥१५॥

*mahi dyāvāpṛthivī bhūtamurvī nārī yahnī na rodasī sadaṁ naḥ /*
*tebhirnaḥ pātaṁ sahyasa ebhirnaḥ pātaṁ śūṣaṇi //1 //*
*yoyo sa martyo devāntsaparyati /*
*yaḥ sumnaidīrghaśruttama āvivāsātyenān //2 //*
*viśveṣāmirajyavo devānāṁ vārmahaḥ /*
*viśve hi viśvamahaso viśve yoṣu yiāyāḥ //3 //*
*te ghārājāno amṛtasya mandrā aryamā mitro varuṇaḥ parijmā /*
*kadrudro nṛṇāṁ stuto marutaḥ pūṣaṇo bhagaḥ //4 //*
*uta no naktamapāṁ vṛṣaṇvasū sasūryāmāsā sadanāya sadhanyā /*
*sachā yatsādyeṣāmahirbudhneṣu budhnyaḥ //5 //*
*uta no devāvaśvinā śubhaspatī dhāmabhirmitrāvaruṇā uruṣyatām /*
*mahaḥ sa rāya eṣate'ti dhanveva duritā //6 //*
*uta no rudrā chinmṛḷatāmaśvinā viśve devāso rathaspatirbhagaḥ /*
*ṛbhurvāja ṛbhukṣaṇaḥ parijmā viśvavedasaḥ //7 //*
*ṛbhuṛrbhukṣā ṛbhurvidhato mada ā te harī jūjuvānasya vājinā /*
*duṣṭaraṁ yasya sāma chidṛdhagyāo na mānuṣaḥ //8 //*
*kṛdhī no ahrayo dava savitaḥ sa cha stuṣe maghonām /*
*sahī na indro vahnibhirnyeṣāṁ charṣaṇīnāṁ chakraṁ raśiṁma na yoyuve //9 //*
*aiṣu dyāvāpṛthivī dhātaṁ mahadasme vīreṣu viśvacharṣaṇi śravaḥ /*
*pṛkṣaṁ vājasya sātaye pṛkṣaṁ rāyota turvaṇe //10 //*
*etaṁ śaṁsamindrāsmayuṣṭvaṁ kūchitsantaṁ sahasāvannabhiṣṭaye sadā*

*pāhyabhiṣṭaye /*
*medatāṁ vedatā vaso //11 //*
*etaṁ me stomaṁ tanā na sūrye dyutadyāmanaṁ vāvṛdhanta nṛṇām /*
*saṁvananaṁ nāśvyaṁ taṣṭevānapachyutam //12 //*
*vāvarta yeṣāṁ rāyā yuktaiṣāṁ hiraṇyayī /*
*nemadhitā na pauṁsyā vṛtheva viṣṭāntā //13 //*
*pra tadduḥśīme pṛthavāne vene pra rāme vochamasure maghavatsu /*
*ye yuktvāya paṁcha śatāsmayu pathā viśrāvyeṣām //14 //*
*adhīnnvatra saptatiṁ cha sapta cha /*
*sadyo didiṣṭa tānvaḥ sadyo didiṣṭa pārthyaḥ sadyo didiṣṭa māyavaḥ //15 //*

## २५५. तापसः (Tāpasaḥ)

१. अग्निः (Agniḥ) - य. (Yv.)९.२८; १२.३१-३२

य. (Yv.)९.२८

अग्नेऽअच्छा वदेह नः प्रति नः सुमना भव।
प्र नो यच्छ सहस्रजित् त्वंहि धनदाऽअसि स्वाहा ॥२८॥
*agne'achchhā vadeha naḥ prati naḥ sumanā bhava /*
*pra no yachchha sahasrajit tvaṁhi dhanadā'asi svāhā //28 //*

य. (Yv.)१२.३१-३२

उदु त्वा विश्वे देवा अग्ने भरन्तु चित्तिभिः। स नो भव शिवस्त्वंसुप्रतीको विभावसुः ॥३१॥
प्रेदग्ने ज्योतिष्मान् याहि शिवेभिरर्चिभिष्ट्वम्। बृहद्भिर्भानुभिर्भासन्मा हिं सीस्तन्वा प्रजाः ॥३२॥
*udu tvā viśve devā agne bharantu chittibhiḥ /*
*sa no bhava śivastvaṁsupratīko vibhāvasuḥ //31 //*
*predagne jyotiṣmān yāhi śivebhirarchibhiṣṭvam /*
*bṛhadbhirbhānubhirbhāsanmā hiṁ sīstanvā prajāḥ //32 //*

२. अर्य्यमादि मन्त्रोक्ताः (Aryyamādi Mantroktāḥ) - य. (Yv.)९.२७ , २९

य. (Yv.)९.२७

अर्य्यमणं बृहस्पतिमिन्द्रं दानाय चोदय। वाचं विष्णुंसरस्वतींसवितारं च वाजिनंस्वाहा ॥२७॥
*aryyamaṇaṁ bṛhaspatimindraṁ dānāya chodaya / vāchaṁ viṣṇuṁsarasvatīṁsavitāraṁ cha vājinaṁsvāhā //27 //*

य. (Yv.)९.२९

प्र नो यच्छत्वर्य्यमा प्र पूषा प्र बृहस्पतिः। प्र वाग्देवी ददातु नः स्वाहा ॥२९॥
*pra no yachchhatvaryyamā pra pūṣā pra bṛhaspatiḥ /*
*pra vāgdevī dadātu naḥ svāhā //29 //*

३. पूषादयो मन्त्रोक्ताः (Pūṣādayo Mantroktāḥ) - य. (Yv.)९.३२

पूषा पंचाक्षरेण पंच दिशऽउदजयत्ताऽउज्जेषंसविता षडक्षरेण षड् ऋतूनुदजयत्तानुज्जेषं मरुतः सप्ताक्षरेण सप्त ग्राम्यान् पशूनुदजयँस्तानुज्जेषं बृहस्पतिरष्टाक्षरेण गायत्रीमुदजयत्तामुज्जेषम् ॥३२॥
*pūṣā paṁchākṣareṇa paṁcha diśa'udajayattā'ujjeṣaṁsavitā ṣaḍakṣareṇa ṣaḍ ṛtūnudajayattānujjeṣaṁ marutaḥ saptākṣareṇa sapta grāmyān paśūnudajayaṁ̐stānujjeṣaṁ bṛhaspatiraṣṭākṣareṇa gāyatrīmudajayattāmujjeṣam //32 //*

४. मित्रादयो मन्त्रोक्ताः (Mitrādayo Mantroktāḥ) - य. (Yv.)९.३३

मित्रो नवाक्षरेण त्रिवृत्तंस्तोममुदजयत् तमुज्जेषं वरुणो दशाक्षरेण विराजमुदजयत्तामुज्जेषमिन्द्रऽएकादशाक्षरेण त्रिष्टुभमुदजयत्तामुज्जेषं विश्वे देवा द्वादशक्षरेण जगतीमुदजयँस्तामुज्जेषम् ॥३३॥
*mitro navākṣareṇa trivṛttaṁstomamudajayat tamujjeṣaṁ varuṇo daśākṣareṇa virājamudajayattāmujjeṣamindra'ekādaśākṣareṇa triṣṭubhamudajayattāmujjeṣaṁ viśve devā dvādaśakṣareṇa jagatīmudajayaṁ̐stāmujjeṣam //33 //*

५. मन्त्रोक्ताः (Mantroktāḥ) - य. (Yv.)९.३१

अग्निरेकाक्षरेण प्राणमुदजयत् तमुज्जेषमश्विनौ द्व्यक्षरेण द्विपदो मनुष्यानुदजयतां तानुज्जेषं विष्णुस्त्र्यक्षरेण त्रीँल्लोकानुदजयत्तानुज्जेषंसोमश्चतुरक्षेण चतुष्पदः पशूनुदजयत्तानुज्जेषम् ॥३१॥

*agnirekākṣareṇa prāṇamudajayat tamujjeṣamaśvinau dvyakṣareṇa dvipado manuṣyāānudajayatāṁ tānujjeṣaṁ viṣṇustrayakṣareṇa trīm̐llokānudajayattānujjeṣaṁsomaśchaturakṣeṇa chatuṣpadaḥ paśūnudajayattānujjeṣam ॥31॥*

६. वस्वादयो मन्त्रोक्ताः (Vasvādayo Mantroktāḥ) - य. (Yv.)९.३४

वसवस्त्रयोदशाक्षरेण त्रयोदशं स्तोममुदजयँस्तमुज्जेषं रुद्राश्चतुर्दशाक्षरेण चतुर्दशं स्तोममुदजयँम्तमुज्जेषम्। आदित्याः पंचदशाक्षरेण पंचदशं स्तोममुदजयँस्तमुज्जेषमदितिः षोडशाक्षरेण षोडशं स्तोममुदजयत्तमुज्जेषं प्रजापतिः सप्तदशाक्षरेण सप्तदशं स्तोममुदजयत्तमुज्जेषम् ॥३४॥

*vasavastrayodaśākṣareṇa trayodaśaṁ stomamudajayam̐stamujjeṣaṁ rudrāśchaturdaśākṣareṇa chaturdaśaṁ stomamudajayam̐mtamujjeṣam ।*
*ādityāḥ paṁchadaśākṣareṇa paṁchadaśaṁ stomamudajayam̐stamujjeṣamaditiḥ ṣoḍaśākṣareṇa ṣoḍaśaṁ stomamudajayattamujjeṣaṁ prajāpatiḥ saptadaśākṣareṇa saptadaśaṁ stomamudajayattamujjeṣam ॥34॥*

७. सम्राट् (Samrāṭ) - य. (Yv.)९.३०

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम्।
सरस्वत्यै वाचो यन्तुर्यन्त्रिये दधामि बृहस्पतेष्ट्वा साम्राज्येनाभिषिंचाम्यसौ ॥३०॥

*devasya tvā savituḥ prasave'śvinorbāhubhyāṁ pūṣṇo hastābhyām ।*
*sarasvatyai vācho yanturyantriye dadhāmi bṛhaspateṣṭvā sāmrājyenābhiṣiṁchāmyasau ॥30॥*

८. सोमाग्नयादित्य-विष्णु-सूर्य्य बृहस्पतयः (Somāgnayāditya-Viṣṇu-Sūryya Bṛhaspatayaḥ) - य. (Yv.)९.२६

सोमंराजानमवसेऽग्निमन्वारभामहे। आदित्यान्विष्णुंसूर्य्यं ब्रह्माणं च बृहस्पतिंस्वाहा ॥२६॥

*somaṁrājānamavase'gnimanvārabhāmahe ।*
*ādityānviṣṇuṁsūyṁrya brahmāṇaṁ cha bṛhaspatiṁsvāhā ॥26॥*

## २५६. तिरश्चीर् आंगिरसः (Tiraśchīr Āṁgirasaḥ)

१. इन्द्रः (Indraḥ) - ऋ. (Rv.) ८.९५.१-९; सा. (Sv.) ३४६; ३४९; ८८३-८८५; १४०२-१४०४

ऋ. (Rv.) ८.९५.१-९

आ त्वा गिरो रथीरिवास्थुः सुतेषु गिर्वणः। अभि त्वा समनू षतेन्द्र वत्सं न मातरः ॥१॥
आ त्वा शुक्रा अचुच्यवुः सुतास इन्द्र गिर्वणः। पिबा त्व१ स्यान्धस इन्द्र विश्वासु ते हितम्॥२।
पिबा सोमं मदाय कमिन्द्र श्येनाभृतं सुतम्। त्वं हि शश्वतीनां पती राजा विशामसि ॥३॥
श्रुधी हवं तिरश्च्या इन्द्र यस्त्वा सपर्यति। सुवीर्यस्य गोमतो रायस्पूर्धि महाँ असि ॥४॥
इन्द्र यस्ते नवीयसीं गिरं मन्द्रामजीजनत्। चिकित्विन्मनसं धियं प्रत्नामृतस्य पिप्युषीम् ॥५॥
तमु ष्टवाम यं गिर इन्द्रमुक्थानि वावृधुः। पुरूण्यस्य पौंस्या सिषासन्तो वनामहे ॥६॥
एतो न्विन्द्रं स्तवाम शुद्ध शुद्धेन साम्ना। शुद्धैरुक्थैर्वावृध्वांसं शुद्ध आशीर्वान्ममत्तु ॥७॥
इन्द्र शुद्धो न आ गहि शुद्धः शुद्धाभिरूतिभिः। शुद्धो रयिं नि धारय शुद्धो ममद्धि सोम्यः ॥८।
इन्द्र शुद्धो हि नो रयिं शुद्धो रत्नानि दाशुषे। शुद्धो वृत्राणि जिघ्नसे शुद्धो वाजं सिषाससि।९।

*ā tvā giro rathīrivāsthuḥ suteṣu girvaṇaḥ ।*
*abhi tvā samanū ṣatendra vatsaṁ na mātaraḥ ॥1॥*
*ā tvā śukrā achuchyavuḥ sutāsa indra girvaṇaḥ ।*
*pibā tva1 syāndhasa indra viśvāsu te hitam ॥2।*
*pibā somaṁ madāya kamindra śyenābhṛtaṁ sutam ।*
*tvaṁ hi śaśvatīnāṁ patī rājā viśāmasi ॥3॥*

*śrudhī havaṁ tiraśchyā indra yastvā saparyati* ।
*suvīryasya gomato rāyaspūrdhi mahāṁ̐ asi* ॥4॥
*indra yaste navīyasīṁ giraṁ mandrāmajījanat* ।
*chikitvinmanasaṁ dhiyaṁ pratnāmṛtasya pipyuṣīm* ॥5॥
*tamu ṣṭavāma yaṁ gira indramukthāni vāvṛdhuḥ* ।
*purūṇyasya pauṁsyā siṣāsanto vanāmahe* ॥6॥
*eto nvindraṁ stavāma śuddha śuddhena sāmnā* ।
*śuddhairukthervāvṛdhvāṁsaṁ śuddha āśīrvānmamattu* ॥7॥
*indra śuddho na ā gahi śuddhaḥ śuddhābhirūtibhiḥ* ।
*śuddho rayiṁ ni dhāraya śuddho mamaddhi somyaḥ* ॥8।
*indra śuddho hi no rayiṁ śuddho ratnāni dāśuṣe* ।
*śuddho vṛtrāṇi jighnase śuddho vājaṁ siṣāsasi* ।9।

सा. (Sv.) ३४६

श्रुधी हवं तिरश्च्या इन्द्र यस्त्वा सपर्यति। सुवीर्यस्य गोमतो रायस्पूर्धि महाँ असि ॥५॥
*śrudhī havaṁ tiraśchyā indra yastvā saparyati* ।
*suvīryasya gomato rāyaspūrdhi mahāṁ̐ asi* ॥5॥

सा. (Sv.) ३४९

आ त्वा गिरो रथीरिवास्थुः सुतेषु गिर्वणः। अभि त्वा समनूषत गावो वत्सं न धेनवः ॥८॥
*ā tvā giro rathīrivāsthuḥ suteṣu girvaṇaḥ* ।
*abhi tvā samanūṣata gāvo vatsaṁ na dhenavaḥ* ॥8॥

सा. (Sv.) ८८३-८८५

श्रुधी हवं तिरश्च्या इन्द्र यस्त्वा सपर्यति। सुवीर्यस्य गोमतो रायस्पूर्धि महाँ असि ॥१॥
यस्य इन्द्र नवीयसीं गिर मन्द्रामजीजनत्। चिकित्विमनसं धियं प्रत्नामृतस्य पिप्युषीम् ॥२॥
तमु ष्टवाम य गिर इन्द्र मुक्थ्यानि वावृधुः। पुरूण्यस्य पौंस्या सिषासन्तो वनामहे ॥३॥
*śrudhī havaṁ tiraśchyā indra yastvā saparyati* ।
*suvīryasya gomato rāyaspūrdhi mahāṁ̐ asi* ॥1॥
*yasya indra navīyasīṁ gira mandrāmajījanat* ।
*chikitvimanasaṁ dhiyaṁ pratnāmṛtasya pipyuṣīm* ॥2॥
*tamu ṣṭavāma ya gira indra mukthyāni vāvṛdhuḥ* ।
*purūṇyasya pauṁsyā siṣāsanto vanāmahe* ॥3॥

सा. (Sv.) १४०२-१४०४

एतो न्विन्द्रं स्तवाम शुद्धं शुद्धेन साम्ना। शुद्धैरुक्थैर्वावृध्वांसं शुद्धैराशीर्वान्ममत्तु ॥१॥
इन्द्र शुद्धो न आ गहि शुद्धः शुद्धाभिरूतिभिः। शुद्धो रयिं नि धारय शुद्धो ममद्धि सोम्य ॥२॥
इन्द्र शुद्धा हि नो रयिं शुद्धो रत्नानि दाशुषे। शुद्धो वृत्राणि जिघ्नसे शुद्धो वाजं सिषाससि।३।
*eto nvindraṁ stavāma śuddhaṁ śuddhena sāmnā* ।
*śuddhairukthairvāvṛdhvāṁsaṁ śuddhairāśīrvānmamattu* ॥1॥
*indra śuddho na ā gahi śuddhaḥ śuddhābhirūtibhiḥ* ।
*śuddho rayiṁ ni dhāraya śuddho mamaddhi somya* ॥2॥
*indra śuddhā hi no rayiṁ śuddho ratnāni dāśuṣe* ।
*śuddho vṛtrāṇi jighnase śuddho vājaṁ siṣāsasi* ।3।

## २५७. तिरश्चीर् आंगिरसो द्युतानो वा (Tiraśchīr Āṁgiraso Dyutāno Vā)

१. इन्द्रः (Indraḥ) - अ. (Av.) २०.१३७.७-८; १०-१४

अ. (Av.) २०.१३७.७-८

अव द्रप्सो अंशुमतीमतिष्ठदियानः कृष्णो दशभिः सहस्रैः ।
आवत् तमिन्द्रः शच्या धमन्तमपस्नेहितीर्नृमणा अधत्त ॥७॥
द्रप्समपश्यं विषुणे चरन्तमुपह्वरे नद्योअंशुमत्याः ।
नभो न कृष्णमवतस्थिवांस मिष्यामि वो वृषणो युध्यताजौ ॥८॥

*ava drapso aṁśumatīmatiṣṭhadiyānaḥ kṛṣṇo daśabhiḥ sahasraiḥ |*
*āvat tamindraḥ śachyā dhamantamapasnehitīrnṛmaṇā adhatta ||7 ||*
*drapsamapaśyaṁ viṣuṇe charantamupahnare nadyoaṁśumatyāḥ |*
*nabho na kṛṣṇamavatasthivāṁsa miṣyāmi vo vṛṣaṇo yudhyatājau ||8 ||*

अ. (Av.) २०.१३७.१०-१४

त्वं ह त्यत् सप्तभ्यो जायमानोऽशत्रुभ्यो अभवः शत्रुरिन्द ।
गूढे द्यावापृथिवी अन्वविन्दो विभुमद्भ्यो भुवनेभ्यो रणं धाः ॥१० ॥
त्वं ह त्यदप्रतिमानमोजो वज्रेण वज्रिन् धृषितो जघन्थ ।
त्वं शुष्णस्यावातिरो वधत्रैस्त्वं गा इन्द्र शच्येदविन्दः ॥११ ॥
तमिन्द्रं वाजयामसि महे वृत्राय हन्तवे। स वृषा वृषभो भुवत् ॥१२ ॥
इन्द्रः स दामने कृत ओजिष्ठः स मदे हितः। द्युम्नी श्लोकी स सोम्य ॥१३ ॥
गिरा वज्रो न संभृतः सबलो अन्पच्युतः। ववक्ष ऋष्वो अस्तृतः ॥१४ ॥
*tvaṁ ha tyat saptabhyo jāyamāno'śatrubhyo abhavaḥ śatrurinda |*
*gūḍhe dyāvāpṛthivī anvavindo vibhumadbhyo bhuvanebhyo raṇaṁ dhāḥ ||10 ||*
*tvaṁ ha tyadapratimānamojo vajreṇa vajrin dhṛṣito jaghantha |*
*tvaṁ śuṣṇasyāvātiro vadhatraistvaṁ gā indra śachyedavindaḥ ||11 ||*
*tamindraṁ vājayāmasi mahe vṛtrāya hantave | sa vṛṣā vṛṣabho bhuvat ||12 ||*
*indra: sa dāmane kṛta Ojiṣṭhaḥ sa made hitaḥ | dyumnī ślokī sa somya ||13 ||*
*girā vajro na saṁbhṛtaḥ sabalo anpachyutaḥ | vavakṣa ṛṣvo astṛtaḥ ||14 ||*

२. इन्द्रोबृहस्पतिश्च (Indrobṛhaspatiścha) - अ. (Av.) २०.१३७.९

अध द्रप्सो अंशुमत्या उपस्थे ऽधारयत् तन्वंतित्विषाणः ।
विशो अदेवीरभ्या३चरन्तीबृहस्पतिना युजेन्द्रः ससाहे ॥९ ॥
*adha drapso aṁśumatyā upasthe 'dhārayat tanvaṁtitviṣāṇaḥ |*
*viśo adevīrabhyā3charantībṛhaspatinā yujendraḥ sasāhe ||9 ||*

## २५८. त्रय ऋषिगणाः (Traya Ṛṣigaṇāḥ)

१. पवमानः सोमः (Pavamānaḥ Somaḥ) - ऋ. (Rv.) ९.८६.३१-४०

प्र रेभ एत्यति वारमव्ययं वृषा वनेष्वव चक्रदद्धरिः।
सं धीतयो वावशाना अनूषत शिशुं रिहन्ति मतयः पनिप्रतम्। ॥३१ ॥
स सूर्यस्य रश्मिभिः परि व्यत तन्तुं तन्वानस्त्रिवृतं यथा विदे ।
नयन्नृतस्य प्रशिषो नवीयसीः पतिर्जनीनामुप याति निष्कृतम् ॥३२ ॥
राजा सिन्धूनां पवते पतिर्दिव ऋतस्य याति पथिभिः कनिक्रदत् ।
सहस्रधारः परि षिच्यते हरिः पुनानो वाचं जनयन्नुपावसुः ॥३३ ॥
पवमान मह्यर्णो वि धावसि सूरो न चित्रो अव्ययानि पव्यया ।
गभस्तिपूतो नृभिरद्रिभिः सुतो महे वाजाय धन्याय धन्वसि ॥३४ ॥
इषमूर्ज पवमानाभ्यर्षसि श्येनो न वंसु कलशेषु सीदसि ।
इन्द्राय मद्वा मद्यो मदः सुतो दिवो विष्टम्भ उपमो विचक्षणः ॥३५ ॥
सप्त स्वसारो अभि मातरः शिशुं नवं जज्ञानं जेन्यं विपश्चितम् ।
अपां गन्धर्वं दिव्यं नृचक्षसं सोमं विश्वस्य भुवनस्य राजसे ॥३६ ॥
ईशान इमा भुवनानि वीयसे युजान इन्दो हरितः सुपर्ण्यः ।
तास्ते क्षरन्तु मधुमद्घृतं पयस्तव व्रते सोम तिष्ठन्तु कृष्टयः ॥३७ ॥
त्वं नृ चक्षा असि सोम विश्वतः पवमान वृषभ ता वि धावसि ।
स नः पवस्व वसुमद्धिरण्यवद्वयं स्याम भुवनेषु जीवसे ॥३८ ॥
गोवित्पवस्व वसुविद्धिरण्यविद्रेतोधा इन्द्रो भुवनेष्वर्पितः ।
त्वं सुवीरो असि सोम विश्ववित्तं त्वा विप्रा उप गिरेम आसते ॥३९ ॥
उन्मध्व ऊर्मिर्वनना अतिष्ठिपदपो वसानो महिषो वि गाहते ।
राजा पवित्ररथो वाजमारुहत्सहस्रभृष्टिर्जयति श्रवो बृहत् ॥४० ॥

*pra rebha etyati vāramavyayaṁ vṛṣā vaneṣvava chakradaddhariḥ |*
*saṁ dhītayo vāvaśānā anūṣata śiśuṁ rihanti matayaḥ panipnatam | ||31 ||*
*sa sūryasya raśmibhiḥ pari vyata tantuṁ tanvānastrivṛtaṁ yathā vide |*
*nayannṛtasya praśiṣo navīyasīḥ patirjanīnāmupa yāti niṣkṛtam ||32 ||*
*rājā sindhūnāṁ pavate patirdiva ṛtasya yāti pathibhiḥ kanikradat |*
*sahasradhāraḥ pari ṣichyate hariḥ punāno vāchaṁ janayannupāvasuḥ ||33 ||*
*pavamāna mahyarṇo vi dhāvasi sūro na chitro avyayāni pavyayā |*
*gabhastipūto nṛbhiradribhiḥ suto mahe vājāya dhanyāya dhanvasi ||34 ||*
*iṣamūrja pavamānābhyarṣasi śyeno na vaṁsu kalaśeṣu sīdasi |*
*indrāya madvā madyo madaḥ suto divo viṣṭambha upamo vichakṣaṇaḥ ||35 ||*
*sapta svasāro abhi mātaraḥ śiśuṁ navaṁ jāānaṁ jenyaṁ vipaśchitam |*
*apāṁ gandharva divyaṁ nṛchakṣasaṁ somaṁ viśvasya bhuvanasya rājase ||36 ||*
*īśāna imā bhuvanāni vīyase yujāna indo haritaḥ suparṇyaḥ |*
*tāste kṣarantu madhumadghṛtaṁ payastava vrate soma tiṣṭhantu kṛṣṭayaḥ ||37 ||*
*tvaṁ nṛ chakṣā asi soma viśvataḥ pavamāna vṛṣabha tā vi dhāvasi |*
*sa naḥ pavasva vasumaddhiraṇyavadvayaṁ syāma bhuvaneṣu jīvase ||38 ||*
*govitpavasva vasuviddhiraṇyavidretodhā indro bhuvaneṣvarpitaḥ |*
*tvaṁ suvīro asi soma viśvavittaṁ tvā viprā upa girema āsate ||39 ||*
*unmadhva ūrmirvananā atiṣṭhipadapo vasāno mahiṣo vi gāhate |*
*rājā pavitraratho vājamāruhatsahasrabhṛṣṭirjayati śravo bṛhat ||40 ||*

**२५९. त्रसदस्युः (Trasadasyuḥ)**

१. मित्रावरुणौ (Mitrāvaruṇau) - य. (Yv.)७.१०

राया वयंससवां मो मदेम हव्येन देवा यवसेन गावः ।
तां धेनुं मित्रावरुणा युवं नो विश्वाहा धत्तमनपम्फुरन्तीमेष ते योनिॠर्तायुभ्यां त्वा ॥१० ॥
*rāyā vayaṁsasavāṁ mo madema havyena devā yavasena gāvaḥ |*
*tāṁ dhenuṁ mitrāvaruṇā yuvaṁ no viśvāhā dhattamanapamphurantīmeṣa te yonirṛtāyubhyāṁ tvā ||10 ||*

**२५९. त्रसदस्यू , अरुणः - द्र.अरुण त्रसदस्यू (Trasadasyū , Aruṇaḥ - Seearuṇa Trasadasyū)**

**२६०. त्रसदस्युः पौरुकुत्सः (Trasadasyuḥ Paurukutsaḥ)**

१. आत्मा (Ātmā) - ऋ. (Rv.) ४.४२.१-६

मम द्विता राष्ट्रं क्षत्रियस्य विश्वायोर्विश्वे अमृता यथा नः ।
क्रतुं सचन्ते वरुणस्य देवा राजामि कृष्टेरुपमस्य वव्रेः ॥१ ॥
अहं राजा वरुणो मह्यं तान्यसुर्याणि प्रथमा धारयन्त ।
क्रतुं सचन्ते वरुणस्य देवा राजामि कृष्टेरुपमस्य वव्रेः ॥२ ॥
अहमिन्द्रो वरुणस्ते महित्वोर्वी गभीरे रजसी सुमेके ।
त्वष्टेव विश्वा भुवनानि विद्वान्त्समैरयं रोदसी धारयं च ॥३ ॥
अहमपो अपिन्वमुक्षमाणा धारयं दिवं सदन ऋतस्य ।
ऋतेन पुत्रो अदितेॠर्तावोत त्रिधातु प्रथयद्वि भूम ॥४ ॥
मां नरः स्वश्वा वाजयन्तो मां वृताः समरणे हवन्ते ।
कृणोम्याजिं मघवाहमिन्द्र इयर्मि रेणुमभिभूत्योजाः ॥५ ॥
अहं ता विश्वा चकरं नकिर्मा दैव्यं सहो वरते अप्रतीतम् ।
यन्मा सोमासो ममदन्यदुक्थोभे भयेते रजसी अपारे ॥६ ॥
*mama dvitā rāṣṭraṁ kṣatriyasya viśvāyorviśve amṛtā yathā naḥ |*
*kratuṁ sachante varuṇasya devā rājāmi kṛṣṭerupamasya vavreḥ ||1 ||*
*ahaṁ rājā varuṇo mahyaṁ tānyasuryāṇi prathamā dhārayanta |*
*kratuṁ sachante varuṇasya devā rājāmi kṛṣṭerupamasya vavreḥ ||2 ||*
*ahamindro varuṇaste mahitvorvī gabhīre rajasī sumeke |*

*tvaṣṭeva viśvā bhuvanāni vidvāntsamairayaṁ rodasī dhārayaṁ cha //3 //*
*ahamapo apinvamukṣamāṇā dhārayaṁ divaṁ sadana ṛtasya /*
*ṛtena putro aditeṛrtāvota tridhātu prathayadvi bhūma //4 //*
*māṁ naraḥ svaśvā vājayanto māṁ vṛtāḥ samaraṇe havante /*
*kṛṇomyājiṁ maghavāhamindra iyarmi reṇumabhibhūtyojāḥ //5 //*
*ahaṁ tā viśvā chakaraṁ nakirmā daivyaṁ saho varate apratītam /*
*yanmā somāso mamadanyadukthobhe bhayete rajasī apāre //6 //*

२. इन्द्रः (Indraḥ) - सा. (Sv.) ४३७-४४०

विश्वतोदावन्विश्वतो न आ भर यं त्वा शविष्ठमीमहे ॥१॥
एष ब्रह्मा य ऋत्विय इन्द्रो नाम श्रुतो गृणे ॥२॥
ब्रह्माण इन्द्रं महयन्तो अर्कैरवर्धयन्नहये हन्तवा उ ॥३॥
अनवस्ते रथमश्वाय तक्षुस्त्वष्टा वज्रं पुरुहूत द्युमन्तम् ॥४॥
*viśvatodāvanviśvato na ā bhara yaṁ tvā śaviṣṭhamīmahe //1 //*
*eṣa brahmā ya ṛtviya indro nāma śruto gṛṇe //2 //*
*brahmāāṇa indraṁ mahayanto arkairavardhayannahaye hantavā u //3 //*
*anavaste rathamaśvāya takṣustvaṣṭā vajraṁ puruhūta dyumantam //4 //*

३. इन्द्रावरुणौ (Indrāvaruṇau) - ऋ. (Rv.) ४.४२.७-१०

विदुष्टे विश्वा भुवनानि तस्य ता प्र ब्रवीषि वरुणाय वेधः ।
त्वं वृत्राणि शृण्विषे जघन्वान्त्वं वृताँ अरिणा इन्द्र सिन्धून् ॥७॥
अस्माकमत्र पितरस्त आसन्त्सप्त ऋषयो दौर्गहे बध्यमाने ।
त आयजन्त त्रसदस्युमस्या इन्द्रं न वृत्रतुरमर्धदेवम् ॥८॥
पुरुकुत्सानी हि वामदाशद्धव्येभिरिन्द्रावरुणा नमोभिः ।
अथा राजानं त्रसदस्युमस्या वृत्रहणं ददथुरर्धदेवम् ॥९॥
राया वयं ससवांसो मदेम हव्येन देवा यवसेन गावः ।
तां धेनुमिन्द्रावरुणा युवं नो विश्वाहा धत्तमनपस्फरन्तीम् ॥१०॥
*viduṣṭe viśvā bhuvanāni tasya tā pra bravīṣi varuṇāya vedhaḥ /*
*tvaṁ vṛtrāṇi śṛṇviṣe jaghanvāntvaṁ vṛtām̐ ariṇā indra sindhūn //7 //*
*asmākamatra pitarasta āsantsapta ṛṣayo daurgahe badhyamāne /*
*ta āyajanta trasadasyumasyā indraṁ na vṛtraturamardhadevam //8 //*
*purukutsānī hi vāmadāśaddhavyebhirindrāva3ṇā namobhiḥ /*
*athā rājānaṁ trasadasyumasyā vṛtrahaṇaṁ dadathurardhadevam //9 //*
*rāyā vayaṁ sasavāṁso madema havyena devā yavasena gāvaḥ /*
*tāṁ dhenumindrāvaruṇā yuvaṁ no viśvāhā dhattamanapaspharantīm //10 //*

**२६१. त्रसदस्युः पौरुकुत्सः (साग्री. सास्वा.); वामदेवः (सार्षेदी.) (Trasadasyuḥ Paurukutsaḥ [Ssb. Sas.]; Vāmadevaḥ [Sad.])**

१. इन्द्रः (Indraḥ) - सा. (Sv.) ४४१ , ४४४ , ४४६

सा. (Sv.) ४४१

शं पदं मघं रयीषिणे न काममव्रतो हिनोति न स्पृशद्रयिम् ॥५॥
*śaṁ padaṁ maghaṁ rayīṣiṇe na kāmamavrato hinoti na spṛśadrayim //5 //*

सा. (Sv.) ४४४

उप प्रक्षे मधुमति क्षियन्तः पुष्येम रयिं धीमहे त इन्द्र ॥८॥
*upa prakṣe madhumati kṣiyantaḥ puṣyema rayiṁ dhīmahe ta indra //8 //*

सा. (Sv.) ४४६

प्र व इन्द्राय वृत्रहन्तमाय विप्राय गाथं गायत यं जुजोषते ॥१०॥
*pra va indrāya vṛtrahantamāya viprāya gāthaṁ gāyata yaṁ jujoṣate //10 //*

२. इन्द्रः (Indraḥ) (सार्षेदी.); विश्वेदेवाः (Viśvedevāḥ) (साग्री. सास्वा.) - सा. (Sv.) ४४२
सदा गावः शुचयो विश्वधायसः सदा देवा अरेपसः ॥६॥
*sadā gāvaḥ śuchayo viśvadhāyasaḥ sadā devā arepasaḥ* //6 //

३. इन्द्रः (Indraḥ) (साग्री. सास्वा.) मरुतः (सार्षेदी.) - सा. (Sv.) ४४५
अर्चन्यर्क मरुतः स्वर्का आ स्तोभति श्रुतो युवा स इन्द्रः ॥९॥
*archanyarka marutaḥ svarkā ā stobhati śruto yuvā sa indraḥ* //9 //

## २६२. त्रितः (Tritaḥ)

१. अग्निः (Agniḥ) - ऋ. (Rv.) १०.१.१-७; १०.२.१-७; १०.३.१-७; १०.४.१-७; १०.५.१-७; १०.६.१-७; १०.७.१-७; य. (Yv.)११.४३ , ४४ , ४६-४८; १३.१५-१७

ऋ. (Rv.) १०.१.१-७
अग्रे बृहन्नुषसामूर्ध्वो अस्थान्निर्जगन्वान्तमसो ज्योतिषागात् ।
अग्निर्भानुना रुशता स्वंग आ जातो विश्वा सद्मान्यप्राः ॥१॥
स जातो गर्भो असि रोदस्योरग्ने चारुर्विभृत ओषधीषु ।
चित्रः शिशुः परि तमांस्यक्तून्प्र मातृभ्यो अधि कनिक्रदद्गाः ॥२॥
विष्णुरित्था परममस्य विद्वांजातो बृहन्नभि पाति तृतीयम् ।
आसा यदस्य पयो अक्रत स्वं सचेतसो अभ्यर्चन्त्यत्र ॥३॥
अत उ त्वा पितुभृतो जनित्रीरन्नावृधं प्रति चरन्त्यन्नैः ।
ता ई प्रतयेषि पुनरन्यरूपा असि त्वं विक्षु मानुषीषु होता ॥४॥
होतारं चित्ररथमध्वरस्य यास्ययास्य केतुं रुशन्तम् ।
प्रत्यर्धि देवस्यदेवस्य मह्ना श्रिया त्व१ग्निमतिथि जनानाम् ॥५॥
स तु वस्त्राण्यध पेशनानि वसानो अग्निर्नाभा पृथिव्याः ।
अरुषो जातः पद इळायाः पुरोहितो राजन्यक्षीह देवान् ॥६॥
आ हि द्यावापृथिवी अग्न उभे सदा पुत्रो न मातरा ततन्थ ।
प्र याह्यच्छोशतो यविष्ठाथा वह सहस्येह देवान्॥७॥
*agre bṛhannuṣasāmūrdhvo asthānnirjaganvāntamaso jyeātiṣāgāt* /
*agnirbhānunā ruśatā svaṁga ā jāto viśvā sadmānyaprāḥ* //1 //
*sa jāto garbho asi rodasyoragne chārurvibhṛta Oṣadhīṣu* /
*chitraḥ śiśuḥ pari tamāṁsyaktūnpra mātṛbhyo adhi kanikradadgāḥ* //2 //
*viṣṇuritthā paramamasya vidvāṁjāto bṛhannabhi pāti tṛtīyam* /
*āsā yadasya payeā akrata svaṁ sachetaso abhyarchantyatra* //3 //
*ata u tvā pitubhṛto janitrīrannāvṛdhaṁ prati charantyannaiḥ* /
*tā ī pratayeṣi punaranyarūpā asi tvaṁ vikṣu mānuṣīṣu hotā* //4 //
*hotāraṁ chitrarathamadhvarasya yāsyayāsya ketuṁ ruśantam* /
*pratyardhi devasyadevasya mahnā śriyā tva1gnimatithi janānām* //5 //
*sa tu vastrāṇyadha peśanāni vasāno agnirnābhā pṛthivyāḥ* /
*aruṣo jātaḥ pada iḷāyāḥ purohito rājanyakṣīha devān* //6 //
*ā hi dyāvāpṛthivī agna ubhe sadā putro na mātarā tatantha* /
*pra yāhyachchhośato yaviṣṭhāthā vaha sahasyeha devān* //7 //

ऋ. (Rv.) १०.२.१-७
पिप्रीहि देवाँ उशतो यविष्ठ विद्वाँ ऋतूँॠतुपते यजेह ।
ये दैव्या ऋत्विजस्तेभिरग्ने त्वं होतृणामस्यायजिष्ठः ॥१॥
वेषि होत्रमुत पोत्रं जनानां मन्धातासि द्रविणोदा ऋतावा ।
स्वाहा वयं कृणवामा हवींषि देवो देवान्यजत्वग्निरर्हन् ॥२॥
आ देवानामपि पन्थामगन्म यच्छक्रवाम तदनु प्रवोळहुम् ।
अग्निर्विद्वान्त्स यजात्सेदु होता सो अध्वरान्त्स ऋतून्कल्पयाति ॥३॥
यद्वो वयं प्रमिनाम व्रतानि विदुषां देवा अविदुष्टरासः ।

अग्निष्टद्विश्वमा पृणाति विद्वान्येभिर्देवाँ ऋतुभिः कल्पयाति ॥४॥
यत्पाकत्रा मनसा दीनदक्षा न यास्य मन्वते मर्त्यासः ।
अग्निष्टद्धोता क्रतुर्विद्विजानन्यजिष्ठो देवाँ ऋतुशो यजाति ॥५॥
विश्वेषां ह्यध्वराणामनीकं चित्रं केतुं जनिता त्वा जजान ।
स आ यजस्व नृवतीरनु क्षाः सपार्हा इषः क्षुमतीर्विश्वजन्याः ॥६॥
यं त्वा द्यावापृथिवी यं त्वापस्त्वष्टा यं त्वा सुजनिमा जजान ।
पन्थामनु प्रविद्वान्पितृयाणं द्युमदग्ने समिधानो वि भाहि ॥७॥
*piprīhi devāṁ̐ uśato yaviṣṭha vidvāṁ̐ ṛtūṁ̐ṛrtupate yajeha* ।
*ye daivyā ṛtvijastebhiragne tvaṁ hotṝṇāmasyāyajiṣṭhaḥ* ॥1॥
*veṣi hotramuta potraṁ janānāṁ mandhātāsi draviṇodā ṛtāvā* ।
*svāhā vayaṁ kṛṇavāmā havīṁṣi devo devānyajatvagnirarhan* ॥2॥
*ā devānāmapi panthāmaganma yachchhakravāma tadanu pravoḷahum* ।
*agnirvidvāntsa yajātsedu hotā so adhvarāntsa ṛtūnkalpayāti* ॥3॥
*yadvo vayaṁ pramināma vratāni viduṣāṁ devā aviduṣṭarāsaḥ* ।
*agniṣṭadviśvamā pṛṇāti vidvānyebhirdevāṁ̐ ṛtubhiḥ kalpayāti* ॥4॥
*yatpākannāā manasā dīnadakṣā na yāsya manvate martyāsaḥ* ।
*agniṣṭaddhotā kraturvidvijānanyajiṣṭho devāṁ̐ ṛtuśo yajāti* ॥5॥
*viśveṣāṁ hyadhvarāṇāmanīkaṁ chitraṁ ketuṁ janitā tvā jajāna* ।
*sa ā yajasva nṛvatīranu kṣāḥ sapārhā iṣaḥ kṣumatīrviśvajanyāḥ* ॥6॥
*yaṁ tvā dyāvāpṛthivī yaṁ tvāpastvaṣṭā yaṁ tvā sujanimā jajāna* ।
*panthāmanu pravidvānpitṛyāṇaṁ dyṛmadagne samidhāno vi bhāhi* ॥7॥

ऋ. (Rv.) १०.३.१-७

इनो राजन्नरतिः समिद्धो रौद्रो दक्षाय सुषुमाँ अदर्शि ।
चिकिद्वि भाति भासा बृहतासिक्नीमेति रुशतीमपाजन् ॥१॥
कृष्णां यदेनीमभि वर्पसा भूज्जनयन्योषां बृहतः पितुर्जाम् ।
ऊर्ध्वं भानुं सूर्यस्य स्तभायन्दिवो वसुभिररतिर्वि भाति ॥२॥
भद्रो भद्रया सचमान आगात्स्वसारं जारो अभ्येति पश्चात् ।
सुप्रकेतैर्द्युभिरग्निर्वितिष्ठन् रुशद्भिर्वर्णैरभि राममस्थात् ॥३॥
अस्य यामासो बृहतो न वग्नूनिन्धाना अग्नेः सख्युः शिवस्य।
ईड्यस्य वृष्णो बृहतः स्वासो भामासो यामन्नक्तवश्चिकित्रे ॥४॥
स्वना न यस्य भामासः पवन्ते रोचमानस्य बृहतः सुदिवः ।
ज्येष्ठेभिर्यस्तेजिष्ठैः क्रीळुमद्भिर्वर्षिष्ठेभिर्भानुभिर्नक्षति द्याम् ॥५॥
अस्य शुष्मासो ददृशानपवेर्जेहमानस्य स्वनयन्नियुद्भिः ।
प्रत्नेभिर्यो रुशद्भिर्देवतमो वि रेभद्भिररतिर्भाति विभ्वा ॥६॥
स आ वक्षि महि न आ च सत्सि दिवस्पृथिव्योररतिर्युवत्योः।
अग्निः सुतुकः सुतुकेभिरश्वै रभस्वद्भी रभस्वाँ एह गम्याः ॥७॥
*ino rājannaratiḥ samiddho raudro dakṣāya suṣumāṁ̐ adarśi* ।
*chikidvi bhāti bhāsā bṛhatāsikrīmeti ruśatīmapājan* ॥1॥
*kṛṣṇāṁ yadenīmabhi varpasā bhūjjanayanyoṣāṁ bṛhataḥ piturjām* ।
*ūrdhva bhānuṁ sūryasya stabhāyandivo vasubhiraratirvi bhāti* ॥2॥
*bhadro bhadrayā sachamāna āgātsvasāraṁ jāro abhyeti paśchāt* ।
*supraketairdyubhiragnirvitiṣṭhan ruśadbhirvarṇairabhi rāmamasthāt* ॥3॥
*asya yāmāso bṛhato na vagnūnindhānā agneḥ sakhyuḥ śivasya* ।
*īḍyasya vṛṣṇo bṛhataḥ svāso bhāmāso yāmannaktavaśchikitre* ॥4॥
*svanā na yasya bhāmāsaḥ pavante rochamānasya bṛhataḥ sudivaḥ* ।
*jyeṣṭhebhiryastejiṣṭhaiḥ krīḷumadbhirvarṣiṣṭhebhirbhānubhirnakṣati dyām* ॥5॥
*asya śuṣmāso dadṛśānapaverjehamānasya svanayanniyudbhiḥ* ।
*pratnebhiryo ruśadbhirdevatamo vi rebhadbhiraratirbhāti vibhvā* ॥6॥

*sa ā vakṣi mahi na ā cha satsi divaspṛthivyoraratiryuvatyoḥ* ।
*agniḥ sutukaḥ sutukebhiraśvai rabhasvadbhī rabhasvām̐ eha gamyāḥ* ॥7॥

ऋ. (Rv.) १०.४.१-७

प्र ते यक्षि प्र त इयर्मि मन्म भुवो यथा वन्द्यो नो हवेषु ।
धन्वन्निव प्रपा असि त्वमग्न इयक्षवे पूरवे प्रत्न राजन् ॥१॥
यं त्वा जनासो अभि संचरन्ति गाव उष्णमिव व्रजं यविष्ठ ।
दूतो देवानामसि मर्त्यानामन्तर्महाँश्चरसि रोचनेन ॥२॥
शिशुं न त्वा जेन्यं वर्धयन्ती माता बिभर्ति सचनस्यमाना ।
धनोरधि प्रवता यासि हर्यज्जिगीषसे पशुरिवावसृष्टः ॥३॥
मूना अमूर न वयं चिकित्वो महित्वमग्ने त्वमंग वित्से ।
शये वव्रिश्चरति जिह्वायादन्नोरिह्यते युवतिं वश्पितिः सन् ॥४॥
कूचिज्जायते सनयासु नव्यो वने तस्थौ पलितो धूमकेतुः ।
अस्नातापो वृषभो न प्र वेति सचेतसो यं प्रणयन्त मर्ताः ॥५॥
तनूत्यजेव तस्करा वनर्गू रशनाभिर्दशभिरभ्यधीताम् ।
इयं ते अग्ने नव्यसी मनीषा युक्ष्वा रथं न शुचयद्भिरंगैः ॥६॥
ब्रह्म च ते जातवेदो नमश्चेयं च गीः सदमिद्वर्धनी भूत् ।
रक्षा णो अग्ने तनयानि तोका रक्षोत नस्तन्वो१ अप्रयुच्छन् ॥७॥

*pra te yakṣi pra ta iyarmi manma bhuvo yathā vandyo no haveṣu* ।
*dhanvanniva prapā asi tvamagna iyakṣave pūrave pratna rājan* ॥1॥
*yaṁ tvā janāso abhi saṁcharanti gāva uṣṇamiva vrajaṁ yaviṣṭha* ।
*dūto devānāmasi martyānāmantarmahām̐ścharasi rochanena* ॥2॥
*śiśuṁ na tvā jenyaṁ vardhayantī mātā bibharti sachanasyamānā* ।
*dhanoradhi pravatā yāsi haryajjigīṣase paśurivāvasṛṣṭaḥ* ॥3॥
*mūnā amūra na vayaṁ chikitvo mahitvamagne tvamaṁga vitse* ।
*śaye vavriścharati jihnāyādannorihyate yuvatiṁ vaśpitiḥ san* ॥4॥
*kūchijjāyate sanayāsu navyo vane tasthau palito dhūmaketuḥ* ।
*asnātāpo vṛṣabho na pra veti sachetaso yaṁ praṇayanta martāḥ* ॥5॥
*tanūtyajeva taskarā vanargū raśanābhirdaśabhirabhyadhītām* ।
*iyaṁ te agne navyasī manīṣā yṛkṣavā rathaṁ na śuchayadbhiraṁgaiḥ* ॥6॥
*brahma cha te jātavedo namaścheyaṁ cha gīḥ sadamidvardhanī bhūt* ।
*rakṣā ṇo agne tanayāni tokā rakṣota nastanvo1 aprayuchchhan* ॥7॥

ऋ. (Rv.) १०.५.१-७

एकः समुद्रो धरुणो रयीणमस्मद्धृदो भूरिजन्मा वि चष्टे ।
सिषक्त्यूधर्निण्योरुपस्थ उत्सस्य मध्ये निहितं पदं वेः ॥१॥
समानं नीळं वृषणो वसानाः संजग्मिरे महिषा अर्वतीभिः ।
ऋतस्य पदं कवयो नि पान्ति गुहा नामानि दधिरे पराणि ॥२॥
ऋतायिनी मायिनी सं दधाते मित्वा शिशुं जातुर्वर्धयन्ती ।
विश्वस्य नाभि चरतो ध्रुवस्य कवेश्चित्तन्तुं मनसा वियन्तः ॥३॥
ऋतस्य हि वर्तनयः सुजातमिषो वाजाय प्रदिवः सचन्ते ।
अधीवासं रोदसी वावसाने घृतैरन्नैर्वावृधाते मधूनाम् ॥४॥
सप्त स्वसॄररुषीर्वावशानो विद्वान्मध्व उज्जभारा दृशे कम् ।
अन्तर्येमे अन्तरिक्षे पुराजा इच्छन्वव्रिमविदत्पूषणस्य ॥५॥
सप्त मर्यादाः कवयस्ततक्षुस्तासामेकामिदभ्यंहुरो गात् ।
आयोर्ह स्कम्भ उपमस्य नीळे पथां विसर्गे धरुणेषु तस्थौ ॥६॥
असच्च सच्च परमे व्योभन् दक्षस्य जन्मन्नदितेरुपस्थे ।
अग्निर्ह नः प्रथमजा ऋतस्य पूर्व आयुनि वृषभश्च धेनुः ॥७॥

*ekaḥ samudro dharuṇo rayīṇamasmaddhṛdo bhūrijanmā vi chaṣṭe* ।

*siṣaktyūdharniṇyorupastha utsasya madhye nihitaṁ padaṁ veḥ //1 //*
*samānaṁ nīḷaṁ vṛṣaṇo vasānāḥ saṁjagmire mahiṣā arvatībhiḥ /*
*ṛtasya padaṁ kavayo ni pānti guhā nāmāni dadhire parāṇi //2 //*
*ṛtāyinī māyinī saṁ dadhāte mitvā śiśuṁ jāturvardhayantī /*
*viśvasya nābhi charato dhruvasya kaveśchittantuṁ manasā viyantaḥ //3 //*
*ṛtasya hi vartanayaḥ sujātamiṣo vājāya pradivaḥ sachante /*
*adhīvāsaṁ rodasī vāvasāne ghṛtairannairvāvṛdhāte madhūnām //4 //*
*sapta svasṝraruṣīrvāvaśāno vidvānmadhva ujjabhārā dṛśe kam /*
*antaryeme antarikṣe purājā ichchhanvavrimavidatpūṣaṇasya //5 //*
*sapta maryādāḥ kavayastatakṣustāsāmekāmidabhyaṁhuro gāt /*
*āyorha skambha upamasya nīḷe pathāṁ visarge dharuṇeṣu tasthau //6 //*
*asachcha sachcha parame vyoman dakṣasya janmannaditerupasthe /*
*agnirha naḥ prathamajā ṛtasya pūrva āyuni vṛṣabhaścha dhenuḥ //7 //*

ऋ. (Rv.) १०.६.१-७

अयं स यस्य शर्मन्नवोभिरग्नेरेधते जरिताभिष्टौ ।
ज्येष्ठेभिर्यो भानुभिर्ऋषूणां पर्येति परिवीतो विभावा ॥१॥
यो भानुभिर्विभवा विभत्यग्निर्देवेभिर्ऋतावाजस्रः ।
आ यो विवाय सख्या सखिभ्योऽपरिहृतो अत्यो न सप्तिः ॥२॥
ईशे यो विश्वस्या देववीतेरीशे विश्वायुरुषसो व्युष्टौ ।
आ यस्मिन्मना हवींष्यग्नावरिष्टरथः स्कभ्नाति शूषैः ॥३॥
शूषेभिर्वृधो जुषाणो अर्कैर्देवाँ अच्छा रघुपत्वा जिगाति ।
मन्द्रो होता स जुह्वा३यजिष्ठः सम्मिश्लो अग्निरा जिघर्ति देवान् ॥४॥
तमुस्रामिन्द्रं न रेजमानमग्निं गीर्भिर्नमोभिरा कृणुध्वम् ।
आ यं विप्रासो मतिभिर्गृणन्ति जातवेदसं जुह्वं सहानाम् ॥५॥
सं यस्मिन्विश्वा वसूनि जग्मुर्वाजे नाश्वा सप्तीवन्त एवैः ।
अस्मे ऊतीरिन्द्रवाततमा अर्वाचीना अग्न आ कृणुष्व ॥६॥
अधा ह्यग्ने मह्ना निषद्या सद्यो जज्ञानो हव्यो बभूथ ।
तं ते देवासो अनु केतमायन्नधावर्धन्त प्रथमास ऊमाः ॥७॥

*ayaṁ sa yasya śarmannavobhiragneredhate jaritābhiṣṭau /*
*jyeṣṭhebhiryo bhānubhirṛṣūṇāṁ paryeti parivīto vibhāvā //1 //*
*yo bhānubhirvibhavā vibhatyagnirdevobhirṛtāvājasraḥ /*
*ā yo vivāya sakhyā sakhibhyo'parihnṛto atyo na saptiḥ //2 //*
*īśe yeā viśvasyā devavīterīśe viśvāyuruṣaso vyuṣṭau /*
*ā yasminmanā havīṁṣyagnāvariṣṭarathaḥ skabhnāti śūṣaiḥ //3 //*
*śūṣebhirvṛdho juṣāṇo arkairdevām̐ achchhā raghupatvā jigāti /*
*mandro hotā sa juhnā3yajiṣṭhaḥ sammiślo agnirā jigharti devān //4 //*
*tamusrāmindraṁ na rejamānamagiṁna gīrbhirnamobhirā kṛṇudhvam /*
*ā yaṁ viprāso matibhirgṛṇanti jātavedasaṁ juhnaṁ sahānām //5 //*
*saṁ yasminviśvā vasūni jagmurvāje nāśvā saprīvanta eveḥ /*
*asme ūtīrindravātatamā arvāchīnā agna ā kṛṇuṣva //6 //*
*adhā hyagne mahnā niṣadyā sadyo jāāno havyo babhūtha /*
*taṁ te devāso anu ketamāyannadhāvardhanta prathamāsa ūmāḥ //7 //*

ऋ. (Rv.) १०.७.१-७

स्वस्ति नो दिवो अग्ने पृथिव्या विश्वयुर्धेहि यजथाय देव ।
सचेमहि तव दस्म प्रकेतैरुरुष्या ण उरुभिर्देव शंसैः ॥१॥
इमा अग्ने मतयस्तुभ्यं जाता गोभिरश्वैराभि गृणन्ति राधः ।
यदा ते मर्तो भोगमानड्वसो दधानो मतिभिः सुजात ॥२॥
अग्निं मन्ये पितरमग्निमापिग्निं भ्रातरं सदमित्सखायम् ।

अग्नेरनीकं बृहतः सपर्य दिवि शुक्रं यजतं सूर्यस्य ॥३॥
सिध्राा अग्ने धियो अस्मे सनत्रीर्य त्रायसे दम आ नित्यहोता।
ऋतावा स रोहिदश्वः पृरुक्षुर्द्युभिरस्मा अहभिर्वाममस्तु ॥४॥
द्युभिर्हितं मित्रमिव प्रयोगं प्रत्नमृत्विजमध्वरस्य जारम् ।
बहुभ्यामग्निमायवोऽजनन्त विक्षु होतारं न्यसादयन्त ॥५॥
स्वयं यजस्व दिवि देव देवान्किं ते पाकः कृणवदप्रचेताः।
यथायज ऋतुभिर्देव देवानेवा यजस्व तन्वं सुजात ॥६॥
भवा नो अग्नेऽवितोत गोपा भवा वयस्कृदुत नो वयोधाः।
रास्वा च नः सुमहो हव्यदातिं त्रास्वोत नस्तन्वो३ अप्रयुच्छन् ॥७॥

*svasti no divo agne pṛthivyā viśvayurdhehi yajathāya deva /*
*sachemahi tava dasma praketairuruṣyā ṇa urubhirdeva śaṁsaiḥ //1 //*
*imā agne matayastubhyaṁ jātā gobhiraśvairābhi gṛṇanti rādhaḥ /*
*yadā te marto bhogamānaḍvaso dadhāno matibhiḥ sujāta //2 //*
*agni manye pitaramagnimāpignim bhrātaraṁ sadamitsakhāyam /*
*agneranīkaṁ bṛhataḥ saparya divi śukraṁ yajataṁ sūryasya //3 //*
*sidhrāā agne dhiyo asme sanatrīrya trāyase dama ā nityahotā /*
*ṛtāvā sa rohidaśvaḥ pṛrukṣurdyubhirasmā ahabhirvāmamastu //4 //*
*dyubhirhitaṁ mitramiva prayogaṁ pratnamṛtvijamadhvarasya jāram /*
*bahubhyāmagnimāyavo'jananta vikṣu hotāraṁ nyasādayanta //5 //*
*svayaṁ yajasva divi deva devāniṁka te pākaḥ kṛṇavadaprachetāḥ /*
*yathāyaja ṛtubhirdeva devānevā yajasva tanvaṁ sujāta //6 //*
*bhavā no agne'vitota gopā bhavā vayaskṛduta no vayodhāḥ /*
*rāsvā cha naḥ sumaho havyadātiṁ trāsvota nastanvo3 aprayuchchhan //7 //*

य. (Yv.)११.४३-४४

स जातो गर्भोऽअसि रोदस्योरग्ने चारुर्विभृतऽओषधीषु ।
चित्रः शिशुः परि तमां स्यक्तून् प्र मातृभ्योऽअधि कनिक्रदद् गाः ॥४३॥
स्थिरो भव वीड्वंगऽआशुर्भव वाज्यर्वन्। पृथुर्भव सुषदस्त्वमग्नेः पुरीषवाहणः ॥४४॥

*sa jāto garbho'asi rodasyoragne chārurvibhṛta'Oṣadhīṣu /*
*chitraḥ śiśuḥ pari tamāṁ syaktūn pra mātṛbhyo'adhi kanikradad gāḥ //43 //*
*sthiro bhava vīḍvaṁga'āśurbhava vājyarvan / pṛthurbhava suṣadastvamagneḥ purīṣavāhaṇaḥ //44 //*

य. (Yv.)११.४६-४८

प्रैतु वाजी कनिक्रदन्नानदद्रासभः पत्वा। भरन्नग्निं पुरीष्यं मा पाद्यायुषः पुरा। वृषाग्निं वृषणं भरन्नपां गर्भंसमुद्रियम्। अग्नऽआयाहि वीतये ॥४६॥
ऋतंसत्यमृतंसत्यमग्निं पुरीष्यमंगिरस्वद्भरामः। ओषधयः प्रतिमोदध्वमग्निमेतं शिवमायन्तमभ्यत्र युष्माः। व्यस्यन् विश्वाऽअनिरा अमीवा निषीदन्नोऽअप दुर्मतिं जाहि ॥४७॥
ओषधयः प्रतिगृभ्णीत पुष्पवतीः सुपिप्पलाः।
अयं वो गर्भऽऋत्वियः प्रत्नं सधस्थमासदत् ॥४८॥

*praitu vājī kanikradannānadadrāsabhaḥ patvā / bharannagniṁ purīṣyaṁ mā pādyāyuṣaḥ purā / vṛṣāgniṁ vṛṣaṇaṁ bharannapāṁ garbhaṁsamudriyam / agna'āyāhi vītaye //46 //*
*ṛtaṁsatyamṛtaṁsatyamagniṁ purīṣyamaṁgirasvadbharāmaḥ / Oṣadhayaḥ pratimodadhvamagnimetaṁ śivamāyantamabhyatra yuṣmāḥ / vyasyan viśvā'anirā amīvā niṣīdanno'apa durmatiṁ jāhi //47 //*
*Oṣadhayaḥ pratigṛbhṇīta puṣpavatīḥ supippalāḥ /*
*ayaṁ vo garbha'ṛtviyaḥ pratnaṁ sadhasthamāsadat //48 //*

य. (Yv.)१३.१५-१७

भुवो यास्य रजसश्च नेता यत्रा नियुद्भिः सचसे शिवाभिः ।

दिवि मूर्द्धानं दधिषे स्वर्षा जिह्नामग्ने चकृषे हव्यवाहम् ॥१५॥
ध्रुवासि धरुणास्तृता विश्वकर्मणा।
मा त्वा समुद्रऽउद्वधीन्मा सुपर्णोऽव्यथमाना पृथिवीं दृं ह ॥१६॥
प्रजापतिष्ट्वा सादयत्वपां पृष्ठे समुद्रस्येमन्। व्यचस्वतीं प्रथस्वतीं प्रथस्व पृथिव्यसि ॥१७॥
*bhuvo yāsya rajasaścha netā yatrā niyudbhiḥ sachase śivābhiḥ /*
*divi mūrddhānaṁ dadhiṣe svarṣā jihnāmagne chakṛṣe havyavāham //15 //*
*dhuvāsi dharuṇāstṛtā viśvakarmaṇā /*
*mā tvā samudra'udvadhīnmā suparṇo'vyathamānā pṛthivīṁ dṛṁ ha //16 //*
*prajāpatiṣṭvā sādayatvapāṁ pṛṣṭhe samudrasyeman / vyachasvatīṁ prathasvatīṁ prathasva pṛthivyasi //17 //*

२. इन्द्रः (Indraḥ) - य. (Yv.)३३.९०

चन्द्रमाऽअप्स्वन्तरा सुपर्णो धावते दिवि। रयिं पिशंग बहुलं पुरुस्पृहंहरिरेति कनिक्रदत्॥९०॥
*chandramā'apsvantarā suparṇo dhāvate divi / rayiṁ piśaṁga bahulaṁ puruspṛhaṁharireti kanikradat //90 //*

३. जीवेश्वरौ (Jīveśvarau) - य. (Yv.)१२.१४

हं सः शुचिषद्वसुरन्तरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत् ।
नृषद्वरसदृतसद् व्योमसदब्जा गोजाऽऋतजाऽअद्रिजाऽऋतं बृहत्॥१४॥
*haṁ saḥ śuchiṣadvasurantarikṣasaddhotā vediṣadatithirduroṇasat /*
*nṛṣadvarasadṛtasad vyomasadabjā gojā'ṛtajā'adrijā'ṛtaṁ bṛhat //14 //*

## २६३. त्रित आप्त्यः (Trita Āptyaḥ)

१. अग्निः (Agniḥ) - सा. (Sv.) १५४६-१५४८

इनो राजन्नरतिः समिद्धो रौद्रो दक्षाय सुषुमाँ अदर्शि ।
चिकिद्विभाति भासा बृहतासिक्नीमेति रुशतीमपाजन् ॥१॥
कृष्णां यदेनीमभि वर्पसाभूज्जनयन्योषां बृहतः पितुर्जाम्।
ऊर्ध्व भानुं सूर्यस्य स्तभायन् दिवो वसुभिररतिर्वि भाति ॥२॥
भद्रो भद्रया सचमान आगात्स्वसारं जारो अभ्येति पश्चात् ।
सुप्रकेतैर्द्युभिरग्निर्वितिष्ठन्रुशद्भिर्वर्णैरभि राममस्थात् ॥३॥
*ino rājannaratiḥ samiddho raudro dakṣāya suṣumām̐ adarśi /*
*chikidvibhāti bhāsā bṛhatāsiknīmeti ruśatīmapājan //1 //*
*kṛṣṇāṁ yadenīmabhi varpasābhūjjanayanyoṣāṁ bṛhataḥ piturjām /*
*ūrdhva bhānuṁ sūryasya stabhāyan divo vasubhiraratirvi bhāti //2 //*
*bhadro bhadrayā sachamāna āgātsvasāraṁ jāro abhyeti paśchāt /*
*supraketairdyubhiragnirvitiṣṭhanruśadbhirvarṇairabhi rāmamasthāt //3 //*

२. आदित्याः (Ādityāḥ) - ऋ. (Rv.) ८.४७.१-१३

महि वो महतामवो वरुण मित्र दाशुषे ।
यमादित्या अभि द्रुहो रक्षथा नेमघं नशदनेहसो व ऊतयः सुऊतयो व ऊतयः ॥१॥
विदा देवा अघानामादित्यासो अपाकृतिम् ।
पक्षा वयो यथोपरि व्य१स्मे शर्म यच्छतानेहसो व ऊतयः सुऊतयो व ऊतयः ॥२॥
व्य१स्मे शर्म तत्पक्षा बयो न यन्तन ।
विश्वानि विश्ववेदसो वरूथ्या मनामहेऽनेहसो व ऊतयः सुऊतयो व ऊतयः ॥३॥
यस्मा अरासत क्षयं जीवातुं च प्रचेतसः ।
मनोर्विश्वस्य घेदिम आदित्या राय ईशतेऽनेहसो व ऊतयः सुऊतयो व ऊतयः ॥४॥
परि णो वृणजन्नघा दुर्गाणि रथ्यो यथा ।
स्यामेन्द्रिस्य शर्मण्यादित्यानामुतावस्यनेहसो व ऊतयः सुऊतयो व ऊतयः ॥५॥
परिह्वृतेदना जनो युष्मादत्तस्य वायति ।
देवा अदभ्रमाश वो यमादित्या अहेतनानेहसो व ऊतयः सुऊतयो व ऊतयः ॥६॥

न तं तिग्मं चन त्यजो न द्रासदभि तं गुरु ।
यस्मा उ शर्म सप्रथ आदित्यासो अराध्वमनेहसो व ऊतयः सुऊतयो व ऊतयः ॥७॥
युष्मे देवा अपि ष्मसि युध्यन्तइव वर्मसु ।
यूयं महो न एनसो यूयमर्भादुरुष्यतानेहसो व ऊतयः सुऊतयो व ऊतयः ॥८॥
अदितिर्न उरुष्यत्वदितिः शर्म यच्छतु ।
माता मित्रस्य रेवतोऽर्यम्णो वरुणस्य चानेहसो व ऊतयः सुऊतयो व ऊतयः ॥९॥
यद्देवाः शर्म शरणं यद्भद्रं यदनातुरम् ।
त्रिधातु यद्वरूथ्यं१ तदस्मासु वि यन्तनानेहसो व ऊतयः सुऊतयो व ऊतयः ॥१०॥
आदित्या अव हि ख्यताधि कूलादिव स्पशः ।
सुतीर्थमर्वतो यथानु नो नेषथा सुगमनेहसो व ऊतयः सुऊतयो व ऊतयः ॥११॥
नेह भद्रं रक्षस्विने नावयै नोपया उत ।
गवे च भद्रं धेनवे वीराय च श्रवस्यतेऽनेहसो व ऊतयः सुऊतयो व ऊतयः ॥१२॥
यदाविर्यदपीच्यं१ देवासो अस्ति दुष्कृतम् ।
त्रितेतद्विश्वमाप्त्य आरे अस्मद्दधातनानेहसो व ऊतयः सुऊतयो व ऊतयः ॥१३॥

*mahi vo mahatāmavo varuṇa mitra dāśuṣe /*
*yamādityā abhi druho rakṣathā nemaghaṁ naśadanehaso va ūtayaḥ suūtayo va ūtayaḥ //1 //*
*vidā devā aghānāmādityāso apākṛtim /*
*pakṣā vayo yathopari vya1sme śarma yachchhatānehaso va ūtayaḥ suūtayo va ūtayaḥ //2 //*
*vya1sme śarma tatpakṣā bayo na yantana /*
*viśvāni viśvavedaso varūthyā manāmahe'nehaso va ūtayaḥ suūtayo va ūtayaḥ //3 //*
*yasmā arāsata kṣayaṁ jīvātuṁ cha prachetasaḥ /*
*manorviśvasya ghedima ādityā rāya īśate'nehaso va ūtayaḥ suūtayo va ūtayaḥ //4 //*
*pari ṇo vṛṇajannaghā durgāṇi rathyo yathā /*
*syāmendrisya śarmaṇyādityānāmutāvasyanehaso va ūtayaḥ suūtayo va ūtayaḥ //5 //*
*parihnṛtedanā jano yuṣmādattasya vāyati /*
*devā adabhramāśa vo yamādityā ahetanānehaso va ūtayaḥ suūtayo va ūtayaḥ //6 //*
*na taṁ tigmaṁ chana tyajo na drāsadabhi taṁ guru /*
*yasmā u śarma sapratha ādityāso arādhvamanehaso va ūtayaḥ suūtayo va ūtayaḥ //7 //*
*yuṣme devā api ṣmasi yudhyantaiva varmasu /*
*yūyaṁ maho na enaso yūyamarbhāduruṣyatānehaso va ūtayaḥ suūtayo va ūtayaḥ //8 //*
*aditirna uruṣyatvaditiḥ śarma yachchhatu /*
*mātā mitrasya revato'ryamṇo varuṇasya chānehaso va ūtayaḥ suūtayo va ūtayaḥ //9 //*
*yaddevāḥ śarma śaraṇaṁ yadrabhadraṁ yadanāturam /*
*tridhātu yadvarūthyaṁ1 tadasmāsu vi yantanānehaso va ūtayaḥ suūtayo va ūtayaḥ //10 //*
*ādityā ava hi khyatādhi kūlādiva spaśaḥ /*
*sutīrthamarvato yathānu no neṣathā sugamanehaso va ūtayaḥ suūtayo va ūtayaḥ //11 //*
*neha bhadraṁ rakṣasvine nāvayai nopayā uta /*
*gave cha bhadraṁ dhenave vīrāya cha śravasyate'nehaso va ūtayaḥ suūtayo va ūtayaḥ //12 //*
*yadāviryadapīchyaṁ1 devāso asti duṣkṛtam /*
*tritetadviśvamāptya āre asmaddadhātanānehaso va ūtayaḥ suūtayo va ūtayaḥ //13 //*

३. आदित्या उषा च (Ādityā Uṣā Cha) - ऋ. (Rv.) ८.४७.१४-१८

यच्च गोषु दुःष्वप्न्यं यच्चास्मे दुहितर्दिवः ।
त्रिताय तद्विभावर्याप्त्याय परा वहानेहसो व ऊतयः सुऊतयो व ऊतयः ॥१४॥

निष्कं वा घा कृणवते स्रजं वा दुहितर्दिवः ।
त्रिते दुःष्वप्न्यं सर्वमाप्त्ये परि दद्मस्यनेहसो व ऊतयः सुऊतयो व ऊतयः ॥१५॥
तदन्नाय तदपसे तं भागमुपसेदुषे ।
त्रिताय च द्विताय चोषो दुःष्वप्न्यं वहानेहसो व ऊतयः सुऊतयो व ऊतयः ॥१६॥
यथा कलां यथा शफं यथ ऋणं संनयामसि ।
एवा दुःष्वप्न्यं सर्वमाप्त्ये सं नयामस्यनेहसो व ऊतयः सुऊतयो व ऊतयः ॥१७॥
अजैष्माद्यासनाम चाभूमानागसो वयम् ।
उषो यस्माद्दुःष्वप्न्यादभैष्माप तदुच्छत्वनेहसो व ऊतयः सुऊतयो व ऊतयः ॥१८॥

*yachcha goṣu duḥsvapnaṁ yachchāsme duhitardivaḥ ।*
*tritāya tadvibhāvaryāptyāya parā vahānehaso va ūtayaḥ suūtayo va ūtayaḥ ॥14॥*
*niṣkaṁ vā ghā kṛṇavate srajaṁ vā duhitardivaḥ ।*
*trite duḥsvapnyaṁ sarvamāptye pari dadmasyanehaso va ūtayaḥ suūtayo va ūtayaḥ ॥15॥*
*tadannāya tadapase taṁ bhāgamupaseduṣe ।*
*tritāya cha dvitāya choṣo duḥsvapnyaṁ vahānehaso va ūtayaḥ suūtayo va ūtayaḥ ॥16॥*
*yathā kalāṁ yathā śaphaṁ yatha ṛṇaṁ saṁnayāmasi ।*
*evā duḥsvapnyaṁ sarvamāptye saṁ nayāmasyanehaso va ūtayaḥ suūtayo va ūtayaḥ ॥17॥*
*ajaiṣmādyāsanāma chābhūmānāgaso vayam ।*
*uṣo yasmādduḥsvapnyādabhaiṣmāpa taduchchhatvanehaso va ūtayaḥ suūtayo va ūtayaḥ ॥18॥*

४. पवमानः सोमः (Pavamānaḥ Somaḥ) - सा. (Sv.) १०१; ४७१; ४७८; ५७०; ७६४-७६६; ८६९-८७१; १०१३-१०१५

सा. (Sv.) १०१

जाानः सप्त मातृभिर्मेधामाशासत श्रिये। अयं ध्रुवा रयीणां चिकेतदा ॥५॥

*jāānaḥ sapta mātṛbhirmedhāmāśāsata śriye । ayaṁ dhruvā rayīṇāṁ chiketadā ॥5॥*

सा. (Sv.) ४७१

तिस्रो वाच उदीरते गावो मिमन्ति धेनवः। हरिरेति कनिक्रदत् ॥५॥

*tisro vācha udīrate gāvo mimanti dhenavaḥ । harireti kanikradat ॥5॥*

सा. (Sv.) ४७८

प्र सोमासो विपश्चितोऽपो नयन्त ऊर्मयः। वनानि महिषा इव ॥२॥

*pra somāso vipaśchito'po nayanta ūrmayaḥ । vanāni mahiṣā iva ॥2॥*

सा. (Sv.) ५७०

प्राणा शिशुर्महीनां हिन्वन्नृतस्य दीधितिम्। विश्वा परि प्रिया भुवदध द्विता ॥५॥

*prāṇā śiśurmahīnāṁ hinvannṛtasya dīdhitim । viśvā pari priyā bhuvadadha dvitā ॥5॥*

सा. (Sv.) ७६४-७६६

प्र सोमासो विपश्चितोऽपो नयन्त ऊर्मयः। वनानि महिषा इव ॥१॥
अभि द्रोणानि बभ्रवः शुक्राा ऋतस्य धारया। वाजं गोमन्तमक्षरन् ॥२॥
सुता इन्द्राय वायवे वरुणाय मरुद्भ्यः। सोमा अर्षन्तु विष्णवे ॥३॥

*pra somāso vipaśchito'po nayanta ūrmayaḥ । vanāni mahiṣā iva ॥1॥*
*abhi droṇāni babhravaḥ śukrāā ṛtasya dhārayā । vājaṁ gomantamakṣaran ॥2॥*
*sutā indrāya vāyave varuṇāya marudbhyaḥ । somā arṣantu viṣṇave ॥3॥*

सा. (Sv.) ८६९-८७१

तिस्रो वाच उदीरते गावो मिमन्ति धेनवः। हरिरेति कनिक्रदत् ॥१॥
अभि ब्रह्मीरनूषत यह्वीऋर्तस्य मातरः। मर्जयन्तीर्दिवः शिशुम् ॥२॥
रायः समुद्रां श्चतुरोस्मभ्यं सोम विश्वतः। आ पवस्व सहस्रिणः ॥३॥

*tistro vācha udīrate gāvo mimanti dhenavaḥ | harireti kanikradat ||1 ||*
*abhi brahmīranūṣata yahnīrṛtasya mātaraḥ | marjayantīrdivaḥ śiśum ||2 ||*
*rāyaḥ samudrāṁ śchaturosmabhyaṁ soma viśvataḥ | ā pavasva sahastriṇaḥ ||3 ||*

सा. (Sv.) १०१३-१०१५

प्राणा शिशुर्महीनां हिन्वन्नृतस्य दीधितिम्। विश्वा परि प्रिया भुवदध द्विता ॥१॥
उप त्रितस्य पाष्यो३रभक्त युद्गुहा पदम्। यास्य सप्त धामभिरध प्रियम् ॥२॥
त्रीणि त्रितस्य धारया पृष्ठेष्वैरयद्रयिम्। मिमीते अस्य योजना वि सुक्रतुः ॥३॥

*prāṇā śiśurmahīnāṁ hinvannṛtasya dīdhitim | viśvā pari priyā bhuvadadha dvitā ||1 ||*
*upa tritasya pāṣyo3rabhakta yudguhā padam | yāsya sapta dhāmabhiradha priyam ||2 ||*
*trīṇi tritasya dhārayā pṛṣṭheṣvairayadrayim | mimīte asya yojanā vi sukratuḥ ||3 ||*

## २६४. त्रित आप्त्यः (साग्री. सास्वा. सार्षेदी) (Trita Āptyaḥ [Ssb. Sas. Sad.])

त्रित आप्त्यः कुत्स आंगिरसो वा (ऋसर्व. १०.१०५.५; १०.१०५.१)

१. विश्वेदेवाः (Viśvedevāḥ) - ऋ. (Rv.) १.१०५.१-१९; सा. (Sv.) ३६८; ४१७

ऋ. (Rv.) १.१०५.१-१९

चन्द्रमा अप्स्व१न्तरा सुपर्णो धावते दिवि ।
न वो हिरण्यनेमयः पदं विन्दन्ति विद्युतो वित्तं मे अस्य रोदसी ॥१॥
अर्थमिद्वा न अर्थिन आ जाया युवते पतिम् ।
तुंजाते वृष्ण्यं पयः परिदाय रसं दुहे वित्तं मे अस्य रोदसी ॥२॥
मो षु देवा अदः स्व१रव पादि दिवस्परि ।
मा सोम्यस्य शंभुवः शूने भूम कदा चन वित्तं मे अस्य रोदसी ॥३॥
यां पृच्छाम्यवमं स तद्दूतो वि वोचति ।
क्व ऋतं पूर्व्यं गतं कस्तद्बिभर्ति नूतनो वित्तं मे अस्य रोदसी ॥४॥
अमी ये देवाः स्थन त्रिष्वा रोचने दिवः ।
कद्व ऋतं कदनृतं क्व प्रत्ना व आहुतिर्वित्तं मे अस्य रोदसी ॥५॥
कद्व ऋतस्य धर्णसि कद्वरुणस्य चक्षणम् ।
कदर्यम्णो महस्पथाति क्रामेम दूढ्यो वित्तं मे अस्य रोदसी ॥६॥
अहं सो अस्मि यः पुरा सुते वदामि कानि चित् ।
तं मा व्यन्त्याध्यो३ वृको न तृष्णजं मृगं वित्तं मे अस्य रोदसी ॥७॥
सं मा तपन्त्यभितः सपत्नीरिव पर्शवः ।
मूषो न शिश्ना व्यदन्ति माध्यः स्तोतारं ते शतक्रतो वित्तं मे अस्य रोदसी॥८॥
अमी ये सप्त रश्मयस्तत्रा मे नाभिरातता ।
त्रितस्तद्वेदाप्त्यः स जामित्वाय रेभति वित्तं मे अस्य रोदसी ॥९॥
अमी ये पंचोक्षणो मध्ये तस्थुर्महो दिवः ।
देवत्रा नु प्रवाच्यं सध्रीचीना नि वावृतु र्वित्तं मे अस्य रोदसी ॥१०॥
सुपर्णा एत आसते मध्य आरोधने दिवः ।
ते सेधन्ति पथो वृकं तरन्तं यह्वतीरपो वित्तं मे अस्य रोदसी ॥११॥
नव्यं तदुक्थ्यं हितं देवासः सुप्रवाचनम् ।
ऋतमर्षन्ति सिन्धवः सत्यं तातान सूर्यो वित्तं मे अस्य रोदसी ॥१२॥
अग्ने तव त्यदुक्थ्यं देवेष्वस्त्याप्यम् ।
स नः सत्तो मनुष्वदा देवान्यक्षि विदुष्टरो वित्तं मे अस्य रोदसी ॥१३॥
सत्तो होता मनुष्वदा देवाँ अच्छा विदुष्टरः ।
अग्निर्हव्या सुषूदति देवो देवेषु मेधिरो वित्तं मे अस्य रोदसी ॥१४॥
ब्रह्मा कृणोति वरुणो गातुविदं तमीमहे ।
व्यूर्णोति हृदा मतिं नव्यो जायतामृतं वित्तं मे अस्य रोदसी ॥१५॥
असौ यः पन्था आदित्यो दिवि प्रवाच्यं कृतः ।

न स देवा अतिक्रमे तं मर्तासो न पश्यथ वित्तं मे अस्य रोदसी ॥१६॥
त्रितः कूपेऽवहितो देवान्हवत ऊतये ।
तच्छुश्राव बृहस्पतिः कृण्वन्नंहूरणादुरु वित्तं मे अस्य रोदसी ॥१७॥
अरुणो मा सकृद्वृकः पथा यन्तं ददर्श हि ।
उज्जिहीते निचाय्या तष्टेव पृष्ट्यामयी वित्तं मे अस्य रोदसी ॥१८॥
एनांगूषेण वयमिन्द्रवन्तोऽभि ष्याम वृजने सर्ववीराः ।
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥१९॥

*chandramā apsva1ntarā suparṇo dhāvate divi ।*
*na vo hiraṇyanemayaḥ padaṁ vindanti vidyuto vittaṁ me asya rodasī ॥1॥*
*arthamidvā na arthina ā jāyā yuvate patim ।*
*tuṁjāte vṛṣṇyaṁ payaḥ paridāya rasaṁ duhe vittaṁ me asya rodasī ॥2॥*
*mo ṣu devā adaḥ sva1rava pādi divaspari ।*
*mā somyasya śaṁbhuvaḥ śūne bhūma kadā chana vittaṁ me asya rodasī ॥3॥*
*yāṁ pṛchchhāmyavamaṁ sa taddūto vi vochati ।*
*kva ṛtaṁ pūrvya gataṁ kastadbibharti nūtano vittaṁ me asya rodasī ॥4॥*
*amī ye devāḥ sthana triṣvā rochane divaḥ ।*
*kadvaṛtaṁ kadanṛtaṁ kva pratnā va āhutirvittaṁ me asya rodasī ॥5॥*
*kadva ṛtasya dharṇasi kadvaruṇasya chakṣaṇam ।*
*kadaryamṇo mahaspathāti krāmema dūḍhyo vittaṁ me asya rodasī ॥6॥*
*ahaṁ so asmi yaḥ purā sute vadāmi kāni chit ।*
*taṁ mā vyantyādhyo3 vṛko na tṛṣṇajaṁ mṛgaṁ vittaṁ me asya rodasī ॥7॥*
*saṁ mā tapantyabhitaḥ sapatnīriva parśavaḥ ।*
*mūṣo na śiśnā vyadanti mādhyaḥ stotāraṁ te śatakrato vittaṁ me asya rodasī ॥8॥*
*amī ye sapta raśmayastatrā me nābhirātatā ।*
*tritastadvedāptyaḥ sa jāmitvāya robhati vittaṁ me asya rodasī ॥9॥*
*amī ye paṁchokṣaṇau madhye tasthurmaho divaḥ ।*
*devatrā nu pravāchyaṁ sadhrīchīnā ni vāvṛtu rvittaṁ me asya rodasī ॥10॥*
*suparṇā eta āsate madhya ārodhane divaḥ ।*
*te sedhanti patho vṛkaṁ tarantaṁ yahnatīrapo vittaṁ me asya rodasī ॥11॥*
*navyaṁ tadukthyaṁ hitaṁ devāsaḥ supravāchanam ।*
*ṛtamarṣanti sindhavaḥ satyaṁ tātāna sūryo vittaṁ me asya rodasī ॥12॥*
*agne tava tyadukthyaṁ deveṣvastyāpyam ।*
*sa naḥ satto manuṣvadā devānyakṣi viduṣṭaro vittaṁ me asya rodasī ॥13॥*
*satto hotā manuṣvadā devām̐ achchhā viduṣṭaraḥ ।*
*agnirhavyā suṣūdati devo deveṣu medhiro vittaṁ me asya rodasī ॥14॥*
*brahmā kṛṇoti varuṇo gātuvidaṁ tamīmahe ।*
*vyūrṇoti hṛdā matiṁ navyo jāyatāmṛtaṁ vittaṁ me asya rodasī ॥15॥*
*asau yaḥ panthā ādityo divi pravāchyaṁ kṛtaḥ ।*
*na sa devā atikrame taṁ martāso na paśyatha vittaṁ me asya rodasī ॥16॥*
*tritaḥ kūpe'vahito devānhavata ūtaye ।*
*tachchhuśrāva bṛhaspatiḥ kṛṇvannahūṁraṇāduru vittaṁ me asya rodasī ॥17॥*
*aruṇo mā sakṛdvṛkaḥ pathā yantaṁ dadarśa hi ।*
*ujjihīte nichāyyā taṣṭeva pṛṣṭyāmayī vittaṁ me asya rodasī ॥18॥*
*enāṁgūṣeṇa vayamindravanto'bhi ṣyāma vṛjane sarvavīrāḥ ।*
*tanno mitro varuṇo māmahantāmaditiḥ sindhuḥ pṛthivī uta dyauḥ ॥19॥*

सा. (Sv.) ३६८

अमी ये देवा स्थन मध्य आ रोचने दिवः। कद्व ऋतं कदमृतं का प्रत्ना व आहुतिः ॥९॥
*amī ye devā sthana madhya ā rochane divaḥ । kadva ṛtaṁ kadamṛtaṁ kā pratnā va āhutiḥ ॥9॥*

सा. (Sv.) ४१७

चन्द्रमा अप्स्वा३न्तरा सुपर्णो धावते दिवि ।
न वो हिरण्यनेमयः पदं विन्दन्ति विद्युतो वित्तं मे अस्य रोदसी ॥ ९ ॥
*chandramā apsvā3ntarā suparṇo dhāvate divi* ।
*na vo hiraṇyanemayaḥ padaṁ vindanti vidyuto vittaṁ me asya rodasī* ॥ 9 ॥

## २६५. त्रिशिराः (Triśirāḥ)

१. अग्निः (Agniḥ) - य. (Yv.)१३.१५-१६ , १८-१९

य. (Yv.)१३.१५-१६

भुवो यास्य रजसश्च नेता यत्रा नियुद्भिः सचसे शिवाभिः ।
दिवि मूर्द्धानं दधिषे स्वर्षा जिह्वामग्ने चकृषे हव्यवाहम् ॥१५॥
ध्रुवासि धरुणास्तृता विश्वकर्मणा।
मा त्वा समुद्रऽउद्वधीन्मा सुपर्णोऽव्यथमाना पृथिवीं दृंह ॥१६॥
*bhuvo yāsya rajasaścha netā yatrā niyudbhiḥ sachase śivābhiḥ* ।
*divi mūrddhānaṁ dadhiṣe svarṣā jihnāāmagne chakṛṣe havyavāham* ॥15॥
*dhruvāsi dharuṇāstṛtā viśvakarmaṇā* ।
*mā tvā samudra'udvadhīnmā suparṇo'vyathamānā pṛthivīṁ dṛṁ ha* ॥16॥

य. (Yv.)१३.१८-१९

भूरसि भूमिरस्यदितिरसि विश्वधाया विश्वस्य भुवनस्य धर्त्री ।
पृथिवीं यच्छ पृथिवीं दृंह पृथिवीं मा हिं सीः ॥१८॥
विश्वस्मै प्राणायापानाय व्यानायोदानाय प्रतिष्ठायै चरित्राय ।
अग्निष्ट्वाभिपातु मह्या स्वस्त्या छर्दिषा शन्तमेन तया देवतयांगिरस्वद् ध्रुवा सीद ॥१९॥
*bhūrasi bhūmirasyaditirasi viśvadhāyā viśvasya bhuvanasya dhartrī* ।
*pṛthivīṁ yachchha pṛthivīṁ dṛṁ ha pṛthivīṁ mā hiṁ sīḥ* ॥18॥
*viśvasmai prāṇāyāpānāya vyānāyodānāya pratiṣṭhāyai charitrāya* ।
*agniṣṭvābhipātu mahyā svastyā chhardiṣā śantamena tayā devatayāṁgirasvad dhruvā sīda* ॥19॥

२. प्रजापतिः (Prajāpatiḥ) - य. (Yv.)१३.१७

प्रजापतिष्ट्वा सादयत्वपां पृष्ठे समुद्रस्येमन्। व्यचस्वतीं प्रथस्वतीं प्रथस्व पृथिव्यसि ॥१७॥
*prajāpatiṣṭvā sādayatvapāṁ pṛṣṭhe samudrasyeman* । *vyachasvatīṁ prathasvatīṁ prathasva pṛthivyasi* ॥17॥

## २६६. त्रिशिराः त्वाष्ट्रः (Triśirāḥ Tvāṣṭraḥ)

१. अग्निः (Agniḥ) - ऋ. (Rv.) १०.८.१-६; सा. (Sv.) ७१

ऋ. (Rv.) १०.८.१-६

प्र केतुना बृहता यात्यग्निरा रोदसी वृषभो रोरवीति ।
दिविश्चिदन्ताँ उपमाँ उदानळपामुपस्थे महिषो ववर्ध ॥१॥
मुमोद गर्भो वृषभः ककुद्मानस्रेमा वत्सः शिमीवाँ अरावीत् ।
स देवतात्युद्यतानि कृण्वन्त्स्वेषु क्षयेषु प्रथमो जिगाति ॥२॥
आ यो मूर्धानं पित्रोररब्ध न्यध्वरे दधिरे सूरो अर्णः ।
अस्य पत्मन्नरुषीरश्वबुध्ना ऋतस्य योनौ तन्वो जुषन्त ॥३॥
उषउषो हि वसो अग्रमेषि त्वं यमयोरभवा विभावा ।
ऋताय सप्त दधिषे पदानि जनयन्मित्रं तन्वे३ स्वायै ॥४॥
भुवश्चक्षुर्मह ऋतस्य गोपा भुवो वरुणो यदृताय वेषि ।
भुवो अपां नपाज्जातवेदो भुवो दूतो यस्य हव्यं जुजोषः ॥५॥
भुवो यास्य रजसश्च नेता यत्रा नियुदभिः सचसे शिवाभिः ।
दिवि मूर्धानं दधिषे स्वर्षा जिह्वामग्ने चकृषे हव्यवाहम्॥६॥

*pra ketunā bṛhatā yātyagnirā rodasī vṛṣabho roravīti /*
*diviśchidantām̐ upamām̐ udānaḻapāmupasthe mahiṣo vavardha //1 //*
*mumoda garbho vṛṣabhaḥ kakudmānasremā vatsaḥ śimīvām̐ arāvīt /*
*sa devatātyudyatāni kṛṇvantsveṣu kṣayeṣu prathamo jigāti //2 //*
*ā yo mūrdhānaṁ pitrorarabdha nyadhvare dadhire sūro arṇaḥ /*
*asya patmannaruṣīraśvabudhnā ṛtasya yonau tanvo juṣanta //3 //*
*uṣauṣo hi vaso agrameṣi tvaṁ yamayorabhavā vibhāvā /*
*ṛtāya sapta dadhiṣe padāni janayanmitraṁ tanve3 svāyai //4 //*
*bhuvaśchakṣurmaha ṛtasya gopā bhuvo varuṇo yadṛtāya veṣi /*
*bhuvo apāṁ napājjātavedo bhuvo dūto yasya havyaṁ jujoṣaḥ //5 //*
*bhuvo yāsya rajasaścha netā yatrā niyudabhiḥ sachase śivābhiḥ /*
*divi mūrdhānaṁ dadhiṣe svarṣā jihnāmagne chakṛṣe havyavāham //6 //*

सा. (Sv.) ७१

प्र केतुना बृहता यात्यग्निरा रोदसी वृषभो रोरवीति ।
दिवश्चिदन्तादुपमामुदानडपामुपस्थे महिषो ववर्ध ॥९॥
*pra ketunā bṛhatā yātyagnirā rodasī vṛṣabho roravīti /*
*divaśchidantādupamāmudānaḍapāmupasthe mahiṣo vavardha //9 //*

२. इन्द्रः (Indraḥ) - ऋ. (Rv.) १०.८.७-९

अस्रू त्रितः क्रतुना वव्रे अन्तरिच्छन्धीतिं पितुरेवैः परस्य ।
सचस्यमानः पित्रोरुपस्थे जामि ब्रुवाण आयुधानि वेति ॥७॥
स पित्र्याण्यायुधानि विद्वानिन्द्रेषित आप्त्यो अभ्युध्यत् ।
त्रिशीर्षाणं सप्तरश्मिं जघन्वान्त्वाष्ट्रस्य चिन्निः ससृजे त्रितो गाः ॥८॥
भूरीदिन्द्र उदिन्क्षन्तमोजोऽवाभिनत्सत्पतिर्मन्यमानम् ।
त्वाष्ट्रस्य चिद्विश्वरूपस्य गोनामाचक्राणस्त्रीणि शीर्षा परा वर्क् ॥९॥
*asrū tritaḥ kratunā vavre antarichchhandhītiṁ piturevaiḥ parasya /*
*sachasyamānaḥ pitrorupasthe jāmi bruvāṇa āyudhāni veti //7 //*
*sa pitrayāṇyāyudhāni vidvānindreṣita āptyo abhyudhyat /*
*triśīrṣāṇaṁ saptaraśmiṁ jaghanvāntvāṣṭrasya chinniḥ sasṛje trito gāḥ //8 //*
*bhūrīdindra udinkṣantamojo'vābhinatsatpatirmanyamānam /*
*tvāṣṭrasya chidviśvarūpasya gonāmāchakrāṇastrīṇi śīrṣā parā vark //9 //*

## २६७. त्रिशिरास् त्वाष्ट्रः सिन्धुद्वीपो वा अम्बरीषः (Triśirās Tvāṣṭraḥ Sindhudvīpo Vā Ambarīṣaḥ)

१. आपः (Āpaḥ) - ऋ. (Rv.) १०.९.१-९; सा. (Sv.) १८३७-३९

ऋ. (Rv.) १०.९.१-९

आपो हि ष्ठा मयोभुवस्ता न ऊर्जे दधातन। महे रणाय चक्षसे ॥१॥
यो वः शिवतमो रसस्तस्य भजयतेह नः। उशतीरिव मातरः ॥२।
तस्मा अरंगमाम वो यस्य क्षयाय जिन्वथ। आपो जनयथा च नः ॥३॥
शं नो देवीरभिष्टय आपो भवन्तु पीतये। शं योरभि स्रवन्तु नः ॥४॥
ईशाना वार्याणां क्षयन्तीश्चर्षणीनाम्। अपो याचामि भेषजम् ॥५॥
अप्सु मे सोमो अब्रवीदन्तर्विश्वानि भेषजा। अग्निं च विश्वशम्भुवम् ॥६॥
आपः पृणीत भेषजं वरूथं तन्वे३ मम। ज्योक्च सूर्यं दृशे ॥७॥
इदमापः प्र वहत यत्किं च दुरितं मयि। यद्वाहमभिदुद्रोह यद्वा शेप उतानृतम् ॥८॥
आपो अद्यान्वचारिषं रसेन समगस्महि। पयस्वानग्न आ गहि तं मा सं सृज वर्चसा ॥९॥
*āpo hi ṣṭhā mayobhuvastā na ūrje dadhātana / mahe raṇāya chakṣase //1 //*
*yo vaḥ śivatamo rasastasya bhajayateha naḥ / uśatīriva mātaraḥ //2 /*
*tasmā araṁgamāma vo yasya kṣayāya jinvatha / āpo janayathā cha naḥ //3 //*
*śaṁ no devīrabhiṣṭaya āpo bhavantu pītaye / śaṁ yorabhi sravantu naḥ //4 //*
*īśānā vāryāṇāṁ kṣayantīścharṣaṇīnām / apo yāchāmi bheṣajam //5 //*

*apsu me somo abravīdantarviśvāni bheṣajā | agniṁ cha viśvaśambhuvam ||6 ||*
*āpaḥ pṛṇīta bheṣajaṁ varūthaṁ tanve3 mama | jyokcha sūrya dṛśe ||7 ||*
*idamāpaḥ pra vahata yatiṁka cha duritaṁ mayi |*
*yadvāhamabhidudroha yadvā śepa utānṛtam ||8 ||*
*āpo adyānvachāriṣaṁ rasena samagasmahi |*
*payasvānagna ā gahi taṁ mā saṁ sṛja varchasā ||9 ||*

सा. (Sv.) १८३७-३९

आपो हि ष्ठा मयोभुवस्ता न ऊर्जे दधातन। महे रणाय चक्षसे ॥१॥
यो वः शिवतमो रसस्तस्य भाजयतेह नः। उशतीरिव मातरः ॥२॥
तस्मा अरं गमाम वो यस्य क्षयाय जिन्वथ। आपो जनयथा च नः ॥३॥
*āpo hi ṣṭhā mayobhuvastā na ūrje dadhātana | mahe raṇāya chakṣase ||1 ||*
*yo vaḥ śivatamo rasastasya bhājayateha naḥ | uśatīriva mātaraḥ ||2 ||*
*tasmā araṁ gamāma vo yasya kṣayāya jinvatha | āpo janayathā cha naḥ ||3 ||*

**२६८. त्रिशोकः (Triśokaḥ)**

१. इन्द्रः (Indraḥ) - अ. (Av.) २०.२२.१-३; २०.४३.१-३; य. (Yv.)३३.२४

अ. (Av.) २०.२२.१-३

अभि त्वा वृषभा सुते सुतं सृजामि पीतये। तृम्पा व्यश्नुही मदम् ॥१॥
मा त्वा मूरा अविष्यवो मोपहस्वान् आ दभन्। माकीं ब्रह्माद्विषो वनः ॥२॥
इह त्वा गोपरीणसा महे मन्दन्तु राधसे। सरो गौरो यथा पिब ॥३॥
*abhi tvā vṛṣabhā sute sutaṁ sṛjāmi pītaye | tṛmpā vyaśnuhī madam ||1 ||*
*mā tvā mūrā aviṣyavo mopahasvān ā dabhan | mākīṁ brahmādviṣo vanaḥ ||2 ||*
*iha tvā goparīṇasā mahe mandantu rādhase | saro gauro yathā piba ||3 ||*

अ. (Av.) २०.४३.१-३

भिन्धि विश्व अप द्विषः परि बाधो जही मृधः। वसु स्पार्ह तदा भर ॥१॥
यद् वीळाविन्द्र यत् स्थिरे यत् पर्शाने पराभृतम्। वसु सपार्ह तदा भर ॥२॥
यस्य ते विश्वमानुषो भूरेर्दत्तस्य वेदति। वसु स्पार्ह तदा भर ॥३॥
*bhindhi viśva apa dviṣaḥ pari bādho jahī mṛdhaḥ | vasu spārha tadā bhara ||1 ||*
*yad vīḷāvindra yat sthire yat parśāne parābhṛtam | vasu sapārha tadā bhara ||2 ||*
*yasya te viśvamānuṣo bhūrerdattasya vedati | vasu spārha tadā bhara ||3 ||*

य. (Yv.)३३.२४

बृहन्निदिध्मऽएषां भूरि शस्तं पृथुः स्वरुः। यषामिन्द्रो युवा सखा ॥२४॥
*bṛhannididhma'eṣāṁ bhūri śastaṁ pṛthuḥ svaruḥ | yaṣāmindro yuvā sakhā ||24 ||*

२. विश्वेदेवाः (Viśvedevāḥ) - य. (Yv.)७.३२

आ घा येऽअग्निमिन्धते स्तृणन्ति बर्हिरानुषक्। येषामिन्द्रो युवा सखा।
उपयामगृहीतोऽस्यग्नीन्द्राभ्यां त्वैष ते योनिरग्नीन्द्राभ्यां त्वा ॥३२॥
*ā ghā ye'agnimindhate stṛṇanti barhirānuṣak | yeṣāmindro yuvā sakhā |*
*upayāmagṛhīto'syagnīndrābhyāṁ tvaiṣa te yoniragnīndrābhyāṁ tvā ||32 ||*

**२६९. त्रिशोक काण्वः (Triśoka Kāṇvaḥ)**

१. अग्नीन्द्रौ (Agnīndrau) - सा. (Sv.) १३३८

आ घा ये अग्निमिन्धते स्तृणन्ति बर्हिरानुषक्। येषामिन्द्रो युवा सखा ॥१॥
*ā ghā ye agnimindhate stṛṇanti barhirānuṣak | yeṣāmindro yuvā sakhā ||1 ||*

२. इन्द्रः (Indraḥ) - ऋ. (Rv.) ८.४५.२-४२; सा. (Sv.) १३१; १३३; १३४; १६१; २०४; २०७; २१६; ७३१-७३३; १०७०-१०७२; १३३९-१३४०

ऋ. (Rv.) ८.४५.२-४२

बृहन्निदिध्म एषां भूरि शस्तं पृथुः स्वरुः। येषामिन्द्रो युवा सखा ॥२॥

अयुद्ध इद्युधा वृतं शूर आजति सत्वभिः। येषामिन्द्रो युवा सखा ॥३॥
आ बुन्दं वृत्रहा ददे जातः पृच्छद्वि मातरम्। क उग्राः के ह शृण्विरे ॥४॥
प्रति त्वा शवसी वदद् गिरावप्सो न योधिषत्। यस्ते शत्रुत्वमाचके ॥५॥
उत त्वं मघवंछृणु यस्ते वष्टि ववक्षि तत्। यद्वीळयासि वीळु तत् ॥६॥
यदाजिं यात्याजिकृदिन्द्रः स्वश्वयुरुप। रथीतमो रथीनाम् ॥७॥
वि षु विश्वा अभियुजो वज्रिन्विष्वग्यथा वृह। भवा नः सुश्रवस्तमः ॥८॥
अस्माकं सु रथं पुर इन्द्रः कृणोतु सातये। न यं धूर्वन्ति धूर्तयः ॥९॥
वृज्याम ते परि द्विषोऽरं ते शक्र दावने। गमेमेदिन्द्र गोमतः ॥१०॥
शनैश्चिद्यन्तो अद्रिवोऽश्ववन्तः शतग्विनः। विवक्षणा अनेहसः ॥११॥
ऊर्ध्वा हि ते दिवेदिवे सहस्रा सूनृता शता। जरितृभ्यो विमंहते ॥१२॥
विद्मा हि त्वा धनंजयमिन्द्र दृळहा चिदारुजम्। आदारिणं यथा गयम् ॥१३॥
ककुहं चित्त्वा कवे मन्दन्तु धृष्णविन्दवः। आ त्वा पणिं यदीमहे ॥१४॥
यस्ते रेवाँ अदाशुरिः प्रममर्ष मघत्तये। तस्य नो वेद आ भर ॥१५॥
इम उ तवा वि चक्षते सखाय इन्द्र सोमिनः। पुष्टावन्तो यथा पशुम् ॥१६॥
उत त्वाबधिरं वयं श्रुत्कर्णं सन्तमूतये। दूरादिह हवामहे ॥१७॥
यच्छुश्रूया इमं हवं दुर्मर्षं चक्रिया उत। भवेरापिर्नो अन्तमः ॥१८॥
यच्चिद्धि ते अपि व्यथिर्जगन्वांसो अमन्महि। गोदा इदिन्द्र बोधि नः ॥१९॥
आ त्वा रम्भं न जिव्रयो ररभ्मा शवसस्पते। उश्मसि त्वा सधस्थ आ ॥२०॥
स्तोत्रमिन्द्राय गायत पुरुनृम्णाय सत्वने। नकिर्यं वृण्वते युधि ॥२१॥
अभि त्वा वृषभा सुते सुतं सृजामि पीतये। तृम्पा व्यश्नुही मदम् ॥२२॥
मा त्वा मूरा अविष्यवो मोपहस्वान् आ दभन्। मकीं ब्रह्मद्विषो वनः ॥२३॥
इह त्वा गोपरीणसा महे मन्दन्तु राधसे। सरो गौरो यथा पिब ॥२४॥
यो वृत्रहा परावति सना नवा च चुच्युवे। ता संसत्सु प्र वोचत ॥२५॥
अपिबत् कद्रुवः सुतमिन्द्रः सहस्राबाह्वे। अत्रादेदिष्ट पौंस्यम् ॥२६॥
सत्यं तत्तुर्वशे यदौ विदानो अह्नवाय्यम्। वयानट् तुर्वणे शमि ॥२७॥
तरणिं वो जनानां त्रदं वाजस्य गोमतः। समानमु प्र शंसिषम् ॥२८॥
ऋभुक्षणं न वर्तव उक्थेषु तुग्र्यावृधम्। इन्द्र सोम सचा सुते ॥२९॥
यः कृतदिद्धि योन्यं त्रिशोकाय गिरिं पृथुम्। गोभ्यो गातुं निरेतवे ॥३०॥
यद्दधिषे मनस्यसि मन्दानः प्रेदियक्षसि। मा तत्करिन्द्र मृळय ॥३१॥
दभ्रं चिद्धि त्वावतः कृतं शृण्वे अधि क्षमि। जिगात्विन्द्र ते मनः ॥३२॥
तवेदु ताः सुकीर्तयोऽसन्नुत प्रशस्तयः। यदिन्द्र मृळयासि नः ॥३३॥
मा न एकस्मिन्नागसि मा द्वयोरुत त्रिषु। वधीर्मा शूर भूरिषु ॥३४॥
बिभया हि त्वावत उग्रादभिप्रभंगिणः। दस्मादहमृतीषहः ॥३५॥
मा सख्युः शूनमा विदे मा पुत्रस्य प्रभूवसो। आवृत्वद्भूत ते मनः ॥३६॥
को नु मर्या अमिथितः सखासखायमब्रवीत्। जहा को अस्मदीषते ॥३७॥
एवारे वृषभा सुतेऽसिन्वन्भूर्यावयः। श्वघ्नीव निवता चरन् ॥३८॥
आ त एता वचोयुजा हरी गृभ्णे सुमद्रथा। यदीं ब्रह्मभ्य इद्ददः ॥३९॥
भिन्धि विश्व अप द्विषः परि बाधो जही मृधः। वसु स्पार्हं तदा भर ॥४०॥
यद्वीळाविन्द्र यत्स्थिरे यत्पर्शाने पराभृतम्। वसु स्पार्हं तदा भर ॥४१॥
यस्य ते विश्वमानुषो भूरेर्दत्तस्य वेदति। वसु स्पार्हं तदा भर॥४२॥

*bṛhannididhma eṣāṁ bhūri śastaṁ pṛthuḥ svaruḥ। yeṣāmindro yuvā sakhā ॥2॥*
*ayuddha idyudhā vṛtaṁ śūra ājati satvabhiḥ। yeṣāmindro yuvā sakhā ॥3॥*
*ā bundaṁ vṛtrahā dade jātaḥ pṛchchhadvi mātaram। ka ugrāḥ ke ha śṛṇvire ॥4॥*
*prati tvā śavasī vadad girāvapso na yodhiṣat। yaste śatrutvamāchake ॥5॥*
*uta tvaṁ maghavaṁchhṛṇu yaste vaṣṭi vavakṣi tat। yadvīḷayāsi vīḷu tat ॥6॥*
*yadājiṁ yātyājikṛdindraḥ svaśvayurupa। rathītamo rathīnām ॥7॥*
*vi ṣu viśvā abhiyujo vajrinviṣvagyathā vṛha। bhavā naḥ suśravastamaḥ ॥8॥*

*asmākaṁ su rathaṁ pura indraḥ kṛṇotu sātaye | na yaṁ dhūrvanti dhūrtayaḥ ||9 ||*
*vṛjyāma te pari dviṣo'raṁ te śakra dāvane | gamemedindra gomataḥ ||10 ||*
*śanauśchedyanto adrivo'śvavantaḥ śatagvinaḥ | vivakṣaṇā anehasaḥ ||11 ||*
*ūrdhvā hi te divedive sahasrā sūnṛtā śatā | jaritṛbhyo vimaṁhate ||12 ||*
*vidmā hi tvā dhanaṁjayamindra dṛḷahā chidārujam | ādāriṇaṁ yathā gayam ||13 ||*
*kakuhaṁ chittvā kave mandantu dhṛṣṇavindavaḥ | ā tvā paṇiṁ yadīmahe ||14 ||*
*yaste revām̐ adāśuriḥ pramamarṣa maghattaye | tasya no veda ā bhara ||15 ||*
*ima u tavā vi chakṣate sakhāya indra sominaḥ | puṣṭāvanto yathā paśum ||16 ||*
*uta tvābadhiraṁ vayaṁ śrutkarṇa santamūtaye | dūrādiha havāmahe ||17 ||*
*yachchhuśrūyā imaṁ havaṁ durmarṣa chakriyā uta | bhaverāpirno antamaḥ ||18 ||*
*yachchiddhi te api vyathirjaganvāṁso amanmahi | godā idindra bodhi naḥ ||19 ||*
*ā tvā rambhaṁ na jivrayo rarabhmā śavasaspate | uśmasi tvā sadhastha ā ||20 ||*
*stotramindrāya gāyata purunṛmṇāya satvane | nakirya vṛṇvate yudhi ||21 ||*
*abhi tvā vṛṣabhā sute sutaṁ sṛjāmi pītaye | tṛmpā vyaśnuhī madam ||22 ||*
*mā tvā mūrā aviṣyavo mopahasvān ā dabhan | makīṁ brahmadviṣo vanaḥ ||23 ||*
*iha tvā goparīṇasā mahe mandantu rādhase | saro gauro yathā piba ||24 ||*
*yo vṛtrahā parāvati sanā navā cha chuchyuve | tā saṁsatsu pra vochata ||25 ||*
*apibat kadruvaḥ sutamindraḥ sahasrābāhne | atrādediṣṭa pauṁsyam ||26 ||*
*satyaṁ tattuvraśe yadau vidāno ahnavāyyam | vayānaṭ turvaṇe śami ||27 ||*
*taraṇiṁ vo janānāṁ tradaṁ vājasya gomataḥ | samānamu pra śaṁsiṣam ||28 ||*
*ṛbhukṣaṇaṁ na vartava ukthеṣu tugryāvṛdham | indra soma sachā sute ||29 ||*
*yaḥ kṛtadidvi yonyaṁ triśokāya giriṁ pṛthum | gobhyo gātuṁ niretave ||30 ||*
*yaddadhiṣe manasyasi mandānaḥ prediyakṣasi | mā tatkarindra mṛḷaya ||31 ||*
*dabhraṁ chiddhi tvāvataḥ kṛtaṁ śṛṇve adhi kṣami | jigātvindra te manaḥ ||32 ||*
*tavedu tāḥ sukīrtayo'sannuta praśastayaḥ | yadindra mṛḷayāsi naḥ ||33 ||*
*mā na ekasminnāgasi mā dvayoruta triṣu | vadhīrmā śūra bhūriṣu ||34 ||*
*bibhayā hi tvāvata ugrādabhiprabhaṁgiṇaḥ | dasmādahamṛtīṣahaḥ ||35 ||*
*mā sakhyuḥ śūnamā vide mā putrasya prabhūvaso | āvṛtvadbhūta te manaḥ ||36 ||*
*ko nu maryā amithitaḥ sakhāsakhāyamabravīt | jahā ko asmadīṣate ||37 ||*
*evāre vṛṣabhā sute'sinvanbhūryāvayaḥ | śvaghnīva nivatā charan ||38 ||*
*ā ta etā vachoyujā harī gṛbhṇe sumadrathā | yadīṁ brahmabhya iddadaḥ ||39 ||*
*bhindhi viśva apa dviṣaḥ pari bādho jahī mṛdhaḥ | vasu spārha tadā bhara ||40 ||*
*yadvīḷāvindra yatsthire yatparśāne parābhṛtam | vasu spārha tadā bhara ||41 ||*
*yasya te viśvamānuṣo bhūrerdattasya vedati | vasu spārha tadā bhara ||42 ||*

## २७०. त्र्यरुणस् त्रैवृष्णः त्रसदस्युः पौरुकुत्स्यः (Trayaruṇas Traivṛṣṇaḥ Trasadasyuḥ Paurukutsyaḥ)

१. पवमानः सोमः (Pavamānaḥ Somaḥ) - ऋ. (Rv.)९.११०.१-१२; सा. (Sv.) ४२८; ४३२; १३६४-६६; १४९४-९६; १५०६-०८

**ऋ.** (Rv.) ९.११०.१-१२

पर्यू षु प्र धन्व वाजसातये परि वृत्राणि सक्षणिः ।
द्विषस्तरध्या ऋणया न ईयसे ॥१॥
अनु हि त्वा सुतं सोम मदामसि महे समर्यराज्ये ।
वाजाँ अभि पवमान प्र गाहसे ॥२॥
अजीजनो हि पवमान सूर्यं विधारे शक्मना पयः ।
गोजीरया रंहमाणः पुरन्ध्या ॥३॥
अजीजनो अमृत मर्त्येष्वाँ ऋतस्य धर्मन्नमृतस्य चारुणः ।
सदासरो वाजमच्छा सनिष्यदत् ॥४॥
अभ्यभि हि श्रवसा ततर्दिथोत्सं न कं चिज्जनपानमक्षितम् ।

शर्याभिर्न भरमाणो गभस्त्योः ॥५॥
आदीं के चित्पश्यमानास आप्यं वसुरुचो दिव्या अभ्यनूषत ।
वारं न देवः सविता व्यूर्णुते ॥६॥
त्वे सोम प्रथमा वृक्तबर्हिषो महे वाजाय श्रवसे धियं दधुः ।
स त्वं नो वीर वीर्याय चोदय ॥७॥
दिवः पीयूषं पूर्व्यं यदुक्थ्यं महो गहाद्दिव आ निरधुक्षत ।
इन्द्रमभि जायमानं समस्वरन् ॥८॥
अध यदिमे पवमान रोदसी इमा च विश्वा भुवनाभि मज्मना ।
यूथे न निःष्ठा वृषभो वि तिष्ठसे ॥९॥
सोमः पुनानो अव्यये वारे शिशुर्न क्रीळन्पवमानो अक्षाः ।
सहस्रधारः शतवाज इन्दुः ॥१०॥
एष पुनानो मधुमाट्ट ऋतावेन्द्रायेन्दुः पवते स्वादुरूर्मिः ।
वाजसनिर्वरिवोविद्वयोधाः ॥ ११ ॥
स पवस्व सहमानः पृतन्यून्त्सेधन्रक्षांस्यप दुर्गहाणि ।
स्वायुधः सासह्वान्त्सोम शत्रून् ॥१२॥

*paryū ṣu pra dhanva vājasātaye pari vṛtrāṇi sakṣaṇiḥ |*
*dviṣastaradhyā ṛṇayā na īyase ||1 ||*
*anu hi tvā sutaṁ soma madāmasi mahe samaryarājye |*
*vājām̐ abhi pavamāna pra gāhase ||2 ||*
*ajījano hi pavamāna sūryaṁ vidhāre śakmanā payaḥ |*
*gojīrayā raṁhamāṇaḥ purandhyā ||3 ||*
*ajījano amṛta martyeṣvām̐ ṛtasya dharmannamṛtasya chāruṇaḥ |*
*sadāsaro vājamachchhā saniṣyadat ||4 ||*
*abhyabhi hi śravasā tatardithotsaṁ na kaṁ chijjanapānamakṣitam |*
*śaryābhirna bharamāṇo gabhastyoḥ ||5 ||*
*ādīṁ ke chitpaśyamānāsa āpyaṁ vasurucho divyā abhyanūṣata |*
*vāraṁ na devaḥ savitā vyūrṇute ||6 ||*
*tve soma prathamā vṛktabarhiṣo mahe vājāya śravase dhiyaṁ dadhuḥ |*
*sa tvaṁ no vīra vīryāya chodaya ||7 ||*
*divaḥ pīyūṣaṁ pūrvyaṁ yadukthyaṁ maho gahāddiva ā niradhukṣata |*
*indramabhi jāyamānaṁ samasvaran ||8 ||*
*adha yadime pavamāna rodasī imā cha viśvā bhuvanābhi majmanā |*
*yūthe na niḥṣṭhā vṛṣabho vi tiṣṭhase ||9 ||*
*somaḥ punāno avyaye vāre śiśurna krīḻanpavamāno akṣāḥ |*
*sahasradhāraḥ śatavāja induḥ ||10 ||*
*eṣa punāno madhumāṭṭa ṛtāvendrāyenduḥ pavate svādurūrmiḥ |*
*vājasanirvarivovidvayodhāḥ || 11 ||*
*sa pavasva sahamānaḥ pṛtanyūntsedhanrakṣāṁsyapa durgahāṇi |*
*svāyudhaḥ sāsahvāntsoma śatrūn ||12 ||*

सा. (Sv.) ४२८

पर्यू षु प्र धन्व वाजसातये परि वृत्राणि सक्षणिः। द्विषस्तरध्या ऋणया न ईरसे ॥२॥
*paryū ṣu pra dhanva vājasātaye pari vṛtrāṇi sakṣaṇiḥ | dviṣastaradhyā ṛṇayā na īrase ||2 ||*

सा. (Sv.) ४३२

अनु ति त्वा सुतं सोम मदामसि महे समर्यराज्ये। वाजाँ अभि पवमान प्र गाहसे ॥३॥
*anu ti tvā sutaṁ soma madāmasi mahe samaryarājye |*
*vājām̐ abhi pavamāna pra gāhase ||3 ||*

सा. (Sv.) १३६४-१३६६

पर्यू षु प्र धन्व वाजसातये परि वृत्राणि सक्षणिः ।
द्विषस्तरध्या ऋणया न ईरसे ॥१॥
अजीजनो हि पवमान सूर्यं विधारे शक्मना पयः ।
गोजीरया रंहमाणः पुरन्ध्या ॥२॥
अनु हि त्वा सुतं सोम मदामसि महे समर्यराज्ये ।
वाजाँ अभि पवमान प्र गाहसे ॥३॥

*paryū ṣu pra dhanva vājasātaye pari vṛtrāṇi sakṣaṇiḥ /*
*dviṣastaradhyā ṛṇayā na īrase //1 //*
*ajījano hi pavamāna sūryaṁ vidhāre śakmanā payaḥ /*
*gojīrayā raṁhamāṇaḥ purandhyā //2 //*
*anu hi tvā sutaṁ soma madāmasi mahe samaryarājye /*
*vājām̐ abhi pavamāna pra gāhase //3 //*

सा. (Sv.) १४९४-९६

प्रत्नं पीयूषं पूर्व्यं यदुक्थ्यं महो गाहाद्दिव आ निरधुक्षत ।
इन्द्रमभि जायमानं समस्वरन् ॥१॥
आदीं के चित्पश्यमानास आप्यं वसुरुचो दिव्या अभ्यनूषत ।
दिवो न वार सविता व्यूर्णते ॥२॥
अध यदिम पवमान रोदसी इमा च विश्वाा भुवनाभि मज्मना ।
यूथे न निष्ठा वृषभा वि राजसि ॥३॥

*pratnaṁ pīyūṣaṁ pūrvyaṁ yadukthyaṁ maho gāhāddiva ā niradhukṣata /*
*indramabhi jāyamānaṁ samasvaran //1 //*
*ādīṁ ke chitpaśyamānāsa āpyaṁ vasurucho divyā abhyanūṣata /*
*divo na vāra savitā vyūrṇate //2 //*
*adha yadima pavamāna rodasī imā cha viśvāā bhuvanābhi majmanā /*
*yūthe na niṣṭhā vṛṣabhā vi rājasi //3 //*

सा. (Sv.) १५०६-१५०८

त्वे सोम प्रथमा वृक्तबर्हिषो महे वाजाय श्रवसे धियं दधुः ।
स त्वं नो वीर वीर्याय चोदय ॥१॥
अभ्यभि हि श्रवसा ततर्दिथोत्सं न कं चिज्जनपानमक्षितम् ।
शर्याभिर्न भरमाणो गभस्त्योः ॥२॥
अजीजनो अमृत मर्त्याय कमृतस्य धर्मन्नमृतसय चारुणः ।
सदासरो वाजमच्छा सनिष्यदत् ॥३॥

*tve soma prathamā vṛktabarhiṣo mahe vājāya śravase dhiyaṁ dadhuḥ /*
*sa tvaṁ no vīra vīryāya chodaya //1 //*
*abhyabhi hi śravasā tatardithotsaṁ na kaṁ chijjanapānamakṣitam /*
*śaryābhirna bharamāṇo gabhastyoḥ //2 //*
*ajījano amṛta martyāya kamṛtasya dharmannamṛtasaya chāruṇaḥ /*
*sadāsaro vājamachchhā saniṣyadat //3 //*

## २७१. त्र्यरुणस् त्रैवृष्णः त्रसदस्युः पौरुकुत्स्यः अश्वमेधश्च भरतोऽत्रिर्वा (Trayaruṇas Traivṛṣṇaḥ Trasadasyuḥ Paurukutsyaḥ Aśvamedhaścha Bharato'trirvā)

१. अग्निः (Agniḥ) - ऋ. (Rv.) ५.२७.१-५

अनस्वन्ता सत्पतिर्मामहे मे गावा चेतिष्ठो असुरो मघोनः ।
त्रैवृष्णो अग्ने दशभिः सहस्रैर्वैश्वानर त्र्यरुणश्चिकेत ॥१॥
यो मे शता च विंशतिं च गोनां हरी च युक्ता सुधुरा ददाति ।
वैश्वानर सुष्टुतो वावृधानोऽग्ने यच्छ त्र्यरुणाय शर्म ॥२॥
एवा ते अग्ने सुमतिं चकानो नविष्ठाय नवमं त्रसदस्युः ।

यो मे गिरस्तुविजातस्य पूर्वीर्युक्तेनाभि त्र्यरुणो गृणाति ॥३॥
यो म इति प्रवोचत्यश्वमेधाय सूरये। दददृचा सनिं यते ददन्मेधामृतायते ॥४॥
यस्य मा परुषाः शतमुद्धर्षयन्त्युक्षणः । अश्वमेधस्य दानाः सोमा इव त्र्याशिरः ॥५॥
*anasvantā satpatirmāmahe me gāvā chotiṣṭho asuro maghonaḥ /*
*traivṛṣṇo agne daśabhiḥ sahasrairvaiśvānara trayaruṇāśchiketa //1 //*
*yo me śatā cha viṁśatiṁ cha gonāṁ harī cha yuktā sudhurā dadāti /*
*vaiśvānara suṣṭuto vāvṛdhāno'gne yachchha trayaruṇāya śarma //2 //*
*evā te agne sumatiṁ chakāno naviṣṭhāya navamaṁ trasadasyuḥ /*
*yo me girastuvijātasya pūrvīryuktenābhi trayaruṇo gṛṇāti //3 //*
*yo ma iti pravochatyaśvamedhāya sūraye /*
*dadadṛchā saniṁ yate dadanmedhāmṛtāyate //4 //*
*yasya mā paruṣāḥ śatamuddharṣayantyukṣaṇaḥ /*
*aśvamedhasya dānāḥ somā iva trayāśiraḥ //5 //*

२. इन्द्राग्निः (Indrāgniḥ) - ऋ. (Rv.) ५.२७.६

इन्द्राग्नी शतदाव्न्यश्वमेधे सुवीर्यम्। क्षत्रं धारयतं बृहद्दिवि सूर्यमिवाजरम् ॥६॥
*indrāgnī śatadāvnyaśvamedhe suvīryam /*
*kṣatraṁ dhārayataṁ bṛhaddivi sūryamivājaram //6 //*

## २७२. त्वष्टा गर्भकर्ता विष्णुर् वा प्राजापत्यः (Tvaṣṭā Garbhakartā Viṣṇur Vā Prājāpatyaḥ)

१. लिंगोक्ता (गर्भार्थ आशीः) (Liṁgokttā (Garbhārtha Āśīḥ) - ऋ. (Rv.) १०.१८४.१-३

विष्णुर्योनिं कल्पयतु त्वष्टा रूपाणि पिंशतु। आ सिंचतु प्रजापतिर्धाता गर्भं दधातु ते ॥१॥
गर्भं धेहि सिनीवालि गर्भं धेहि सरस्वति। गर्भं ते अश्विनौ देवावा धत्तां पुष्करस्रजा ॥२॥
हिरण्ययी अरणी यं निर्मन्थतो अश्विना। तं ते गर्भं हवामहे दशमे मासि सूतवे ॥३॥
*viṣṇuryoniṁ kalpayatu tvaṣṭā rūpāṇi piṁśatu /*
*ā siṁchatu prajāpatirdhātā garbha dadhātu te //1 //*
*garbha dhehi sinīvāli garbha dhehi sarasvati /*
*garbha te aśvinau devāvā dhattāṁ puṣkarasrajā //2 //*
*hiraṇyayī araṇī yaṁ nirmanthato aśvinā /*
*taṁ te garbha havāmahe daśame māsi sūtave //3 //*

## २७३. दक्षः (Dakṣaḥ)

१. अध्वर्युः (Adhvaryuḥ) - य. (Yv.)३३.७३

दैव्यावध्वर्यू आ गतंरथेन सूर्यत्वचा। मध्वा यांसमंजाथे। तं प्रत्नथा। अयं वेनः ॥७३॥
*daivyāvadhvaryū ā gataṁrathena sūryatvachā /*
*madhvā yāṁsamaṁjāthe / taṁ pratnathā / ayaṁ venaḥ //73 //*

२. विद्वान् (Vidvān) - य. (Yv.)३३.७२

काव्ययोराजानेषु क्रत्वा दक्षस्य दुरोणे। रिशदसा सधस्थऽआ ॥७२॥
*kāvyayorājāneṣu kratvā dakṣasya duroṇe / riśadasā sadhastha'ā //72 //*

३. हिरण्यतेजः (Hiraṇyatejaḥ) - य. (Yv.)३४.५०-५२

आयुष्यं वर्च्चस्यंरायस्पोषमौद्भिदम्। इदंहिरण्यं वर्च्चस्वज्जैत्रायाविशतादु माम् ॥५०॥
न तद्रक्षां सि न पिशाचास्तरन्ति देवानामोजः प्रथमजंह्येतत् ।
यो बिभर्ति दाक्षायणंहिरण्यंस देवेषु कृणुते दीर्घमायुः स मनुष्येषु कृणुते दीर्घमायुः ॥५१॥
यदाबध्नन्दाक्षायणा हिरण्यंशतानीकाय सुमनस्यमानाः ।
तन्मऽआ बध्नामि शतशारदायायुष्मांजरदष्टिर्यथासम् ॥५२॥
*āyuṣyaṁ varchchasyaṁrāyaspoṣamaudbhidam /*
*idaṁhiraṇyaṁ varchchasvajjaitrāyāviśatādu mām //50 //*
*na tadrakṣāṁ si na piśāchāstaranti devānāmojaḥ prathamajaṁhyetat /*
*yo bibharti dākṣāyaṇaṁhiraṇyaṁsa deveṣu kṛṇute dīrghamāyuḥ sa manuṣyeṣu*

*kṛṇute dīrghamāyuḥ //51 //*
*yadābadhnandākṣāyaṇā hiraṇyaṁśatānīkāya sumanasyamānāḥ /*
*tanma'ā badhnāmi śataśāradāyāyuṣmāṁjaradaṣṭiryathāsam //52 //*

## २७४. दधिक्रावा (Dadhikrāvā)

१. बृहस्पतिः (Bṛhaspatiḥ) - य. (Yv.)९.१४-१५

एष स्य वाजी क्षिपणि तुरण्यति ग्रीवायां बद्धोऽअपिकक्षऽआसनि ।
क्रतुं दधिक्राऽअनु संसनिष्यदत्पथामंकां स्यन्वापनीफणत् स्वाहा ॥१४॥
उत स्मास्य द्रवतस्तुरण्यतः पर्ण न वेरनुवाति प्रगर्धिनः ।
श्येनस्येव ध्रजतोऽअंकसं परि दधिक्राव्णः सहोर्जा तरित्रतः स्वाहा ॥१५॥
*eṣa sya vājī kṣipaṇi turaṇyati grīvāyāṁ baddho'apikakṣa'āsani /*
*kratuṁ dadhikrā'anu saṁsaniṣyadatpathāmaṁkāṁ syanvāpanīphaṇat svāhā //14 //*
*uta smāsya dravatasturaṇyataḥ parṇa na veranuvāti pragardhinaḥ /*
*śyenasyeva dhrajato'aṁkasaṁ pari dadhikrāvṇaḥ sahorjā taritrataḥ svāhā //15 //*

## २७५. दध्यङ् आथर्वणः (Dadhyaṅ Ātharvaṇaḥ)

१. अग्निः (Agniḥ) - य. (Yv.)३६.१; ३७.१५

य. (Yv.)३६.१

ऋचं वाचं प्र पद्ये मनो यजुः प्र पद्ये साम प्राणं प्र पद्ये चक्षुः श्रोत्रं प्र पद्ये।
वागोजः सहौजो मयि प्राणापानौ ॥१॥
*ṛchaṁ vāchaṁ pra padye mano yajuḥ pra padye sāma prāṇaṁ pra padye chakṣuḥ śrotraṁ pra padye /*
*vāgojaḥ sahaujo mayi prāṇāpānau //1 //*

य. (Yv.)३७.१५

समग्निरग्निना गत सं दैवेन सवित्रा संसूर्य्येणारोचिष्ट ।
स्वाहा समग्निस्तपसा गत सं दैव्येन सवित्रा संसूर्य्येणारूरुचत ॥१५॥
*samagniragninā gata saṁ daivena savitrā saṁsūryyeṇārochiṣṭa /*
*svāhā samagnistapasā gata saṁ daivyena savitrā saṁsūryyeṇārūruchata //15 //*

२. आपः (Āpaḥ) - य. (Yv.)३६.१२

शन्नो देवीरभिष्टयऽ आपो भवन्तु पीतये। शंयोरभि स्रवन्तु नः ॥१२॥
*śanno devīrabhiṣṭaya' āpo bhavantu pītaye / śaṁyorabhi sravantu naḥ //12 //*

३. इन्द्रः (Indraḥ) - सा. (Sv.) १७७; य. (Yv.)३६.७ , ८

सा. (Sv.) १७७

दोषो आगाद् बृहद्गाय द्युमद्गामन्नाथर्वण। स्तुहि देवं सवितारम् ॥३॥
*doṣo āgād bṛhadgāya dyumadgāmannātharvaṇa / stuhi devaṁ savitāram //3 //*

य. (Yv.)३६.७-८

कया त्वं नऽऊत्याभि प्र मन्दसे। कया स्तोतृभ्यऽआ भर ॥७॥
इन्द्रो विश्वस्य राजति। शन्नोऽअस्तु द्विपदे शं चतुष्पदे ॥८॥
*kayā tvaṁ na'ūtyābhi pra mandase / kayā stotṛbhya'ā bhara //7 //*
*indro viśvasya rājati / śanno'astu dvipade śaṁ chatuṣpade //8 //*

४. ईश्वरः (Īśvaraḥ) - य. (Yv.)३६.१७-१९ , २१ , २२; ३७.१४ , १६, १८

य. (Yv.)३६.१७-१९

द्यौः शान्तिरन्तरिक्षंशान्तिः पृथिवी शन्तिरापः शान्तिरोषधयः शान्तिः। वनस्पतयः शान्तिर्विश्वे देवाः शान्तिर्ब्रह्म शान्ति सर्वंशान्तिः शान्तिरेव शान्तिः सा मा शश्रितरेधि ॥१७॥
दृते दुं ह मा मित्रस्य मा चक्षुसा सर्वाणि भूतानि समीक्षन्ताम् ।
मित्रस्याहं चक्षुषा सर्वाणि भूतानि समीक्षे। मित्रस्य चक्षुषा समीक्षामहे ॥१८॥
दृते दृं ह मा। ज्योक्ते संदृशि जीव्यासं ज्योक्ते संदृशि जीव्यासम् ॥१९॥

*dyauḥ śāntirantarikṣaṁśāntiḥ pṛthivī śantirāpaḥ śāntiroṣadhayaḥ śāntiḥ |*
*vanaspatayaḥ śāntirviśve devāḥ śāntirbrahma śānti sarvaṁśāntiḥ śāntireva śāntiḥ sā mā śaśritaredhi ||17 ||*
*dṛte duṁ ha mā mitrasya mā chakṣusā sarvāṇi bhūtāni samīkṣantām |*
*mitrasyāhaṁ chakṣuṣā sarvāṇi bhūtāni samīkṣe | mitrasya chakṣuṣā samīkṣāmahe ||18 ||*
*dṛte dṛṁ ha mā | jyokte saṁdṛśi jīvyāsaṁ jyokte saṁdṛśi jīvyāsam ||19 ||*

य. (Yv.)३६.२१-२२

नमस्तेऽअस्तु विद्युते नमस्ते स्तनयित्नवे। नमस्ते भगवन्नस्तु यतः स्वः समीहसे ॥२१॥
यतो यतः समीहसे ततो नोऽअभयं कुरु। शं नः कुरु प्रजाभ्योऽभयं नः पशुभ्यः ॥२२॥
*namaste'astu vidyute namaste stanayitnave | namaste bhagavannastu yataḥ svaḥ samīhase ||21 ||*
*yato yataḥ samīhase tato no'abhayaṁ kuru | śaṁ naḥ kuru prajābhyo'bhayaṁ naḥ paśubhyaḥ ||22 ||*

य. (Yv.)३७.१४

गर्भो देवानां पिता मतीनां पतिः प्रजानाम। सं देवो देवेन सवित्रा गत संसूर्य्येण रोचते॥१४॥
*garbho devānāṁ pitā matīnāṁ patiḥ prajānāma | saṁ devo devena savitrā gata saṁsūryyeṇa rochate ||14 ||*

य. (Yv.)३७.१६

धर्त्ता दिवो वि भाति तपसस्पृथिव्यां धर्त्ता देवो देवानाममर्त्यस्तपोजाः।
वाचमस्मे नि यच्छ देवायुवम् ॥१६॥
*dharttā divo vi bhāti tapasaspṛthivyāṁ dharttā devo devānāmamartyastapojāḥ |*
*vāchamasme ni yachchha devāyuvam ||16 ||*

य. (Yv.)३७.१८

विश्वासां भुवां पते विश्वस्य मनसस्पते विश्वस्य वचसम्पते सर्वस्य वचसस्पते। देवश्रुत्त्वं देव घर्म देवो देवान् पाह्यत्र प्रावीरनु वां देववीतये। मधु माध्वीभ्यां मधु माधूचीभ्याम् ॥१८॥
*viśvāsāṁ bhuvāṁ pate viśvasya manasaspate viśvasya vachasampate sarvasya vachasaspate | devaśruttvaṁ deva gharma devo devān pāhyatra prāvīranu vāṁ devavītaye | madhu mādhvībhyāṁ madhu mādhūchībhyām ||18 ||*

५. द्यावापृथिवी (Dyāvāpṛthivī) - य. (Yv.)३७.३

देवी द्यावापृथिवी मखस्व वामद्य शिरो राध्यासं
देवयजने पृथिव्याः। मखाय त्वा मखस्य त्वा शीर्ष्णे॥३॥
*devī dyāvāpṛthivī makhasva vāmadya śiro rādhyāsaṁ*
*devayajane pṛthivyāḥ | makhāya tvā makhasya tvā śīrṣṇe ||3 ||*

६. पृथिवी (Pṛthivī) - य. (Yv.)३७.१२

अनाधृष्टा पुरस्तादग्नेराधिपत्यऽआयुर्मे दाः। पुत्रवती दक्षिणतऽइन्द्रस्याधिपत्ये प्रजां मे दाः।
सुषदा पश्चाद्देवस्य सवितुराधिपत्ये चक्षुर्मे दाः। आश्रुतिरुत्तरतो धातुराधिपत्ये रायस्पोषं मे दाः।
विधृतिरुपरिष्टाद् बृहस्पतेराधिपत्यऽओजो मे दाः। विश्वाभ्यो मा नाष्ट्राभ्यस्पाहि मनोरश्वासि ॥१२॥
*anādhṛṣṭā purastādagnerādhipatya'āyurme dāḥ | putravatī dakṣiṇata'indrasyādhipatye prajāṁ me dāḥ |*
*suṣadā paśchāddevasya saviturādhipatye chakṣurme dāḥ | āśrutiruttarato dhāturādhipatye rāyaspoṣaṁ me dāḥ |*
*vidhṛtiruparișṭād bṛhaspaterādhipatya'Ojo me dāḥ | viśvābhyo mā nāṣṭrābhyaspāhi manoraśvāsi ||12 ||*

७. बृहस्पतिः (Bṛhaspatiḥ) - य. (Yv.)३६.२

यन्मे छिद्रं चक्षुषो हृदस्य मनसो वातितृण्णं बृहस्पतिर्मे तद्दधातु।
शं नो भवतु भुवनस्य यस्पतिः ॥२॥

*yanme chhidraṁ chakṣuṣo hṛdasya manaso vātitṛṇṇaṁ bṛhaspatirme taddadhātu । śaṁ no bhavatu bhuvanasya yaspatiḥ ॥2 ॥*

८. मित्रादयो लिंगोक्ताः (Mitrādayo Liṁgoktāḥ) - य. (Yv.)३६.९

शन्नो मित्रः शं वरुणः शन्नो भवन्त्वर्य्यमा। शन्नऽइन्द्रो बृहस्पतिः शन्नो विष्णुरुरुक्रमः ॥९॥

*śanno mitraḥ śaṁ varuṇaḥ śanno bhavantvaryyamā । śanna'indro bṛhaspatiḥ śanno viṣṇururukramaḥ ॥9 ॥*

९. याः (Yāḥ) - य. (Yv.)३७.४-६; ८

य. (Yv.)३७.४-६

देव्यो वम्र्यो भूतस्य प्रथमजा मखस्य वोऽद्य शिरो राध्यासं देवयजने पृथिव्याः ।
मखाय त्वा मखस्य त्वा शीर्ष्णे ॥४॥
इयत्यग्रऽआसीन्मखस्य तेऽद्य शिरो राध्यासं देवयजने पृथिव्याः ।
मखाय त्वा मखस्य त्वा शीर्ष्णे ॥५॥
इन्द्रस्यौजः स्थ मखस्य वोऽद्य शिरो राध्यासं देवयजने पृथिव्याः। मखाय त्वा मखस्य त्वा
शीर्ष्णे। मखाय त्वा मखस्य त्वा शीर्ष्णे। मखाय त्वा मखस्य त्वा शीर्ष्णे॥६॥

*devyo vamryo bhūtasya prathamajā makhasya vo'dya śiro rādhyāsaṁ devayajane pṛthivyāḥ ।*
*makhāya tvā makhasya tvā śīrṣṇe ॥4 ॥*
*iyatyagra'āsīnmakhasya te'dya śiro rādhyāsaṁ devayajane pṛthivyāḥ ।*
*makhāya tvā makhasya tvā śīrṣṇe ॥5 ॥*
*indrasyaujaḥ stha makhasya vo'dya śiro rādhyāsaṁ devayajane pṛthivyāḥ । makhāya tvā makhasya tvā*
*śīrṣṇe । makhāya tvā makhasya tvā śīrṣṇe । makhāya tvā makhasya tvā śīrṣṇe ॥6 ॥*

य. (Yv.)३७.८

मखस्य शिरोऽसि मखाय त्वा मखस्य त्वा शीर्ष्णो। मखस्य शिरोऽसि मखाय त्वा मखस्य त्वा
शीर्ष्णे। मखस्य शिरोऽसि मखाय त्वा मखस्य त्वा शीर्ष्णे। मखाय त्वा मखस्य त्वा शीर्ष्णे।
मखाय त्वा मखस्य त्वा शीर्ष्णे। मखाय त्वा मखस्य त्वा शीर्ष्णे॥८॥

*makhasya śiro'si makhāya tvā makhasya tvā śīrṣṇo । makhasya śiro'si makhāya tvā makhasya tvā*
*śīrṣṇe । makhasya śiro'si makhāya tvā makhasya tvā śīrṣṇe । makhāya tvā makhasya tvā śīrṣṇe ।*
*makhāya tvā makhasya tvā śīrṣṇe । makhāya tvā makhasya tvā śīrṣṇe ॥8 ॥*

१०. लिंगोक्ताः (Liṁgoktāḥ) - य. (Yv.)३६.११

अहानि शं भवन्तु नः शंरात्रीः प्रति धीयताम्। शन्नऽइन्द्राग्नी भवतामवोभिः
शन्नऽइन्द्रावरुणा रातहव्या। शन्नऽइन्द्रापूषणा वाजसातौ शमिन्द्रासोमा सुविताय शंयोः ॥११॥

*ahāni śaṁ bhavantu naḥ śaṁrātrīḥ prati dhīyatām । śanna'indrāgnī bhavatāmavobhiḥ śanna'indrāvaruṇā rātahavyā । śanna'indrāpūṣaṇā vājasātau śamindrāsomā suvitāya śaṁyoḥ ॥11 ॥*

११. वातादयः (Vātādayaḥ) - य. (Yv.)३६.१०

शन्नो वातः पवतांशन्नम्तपतु सूर्य्यः। शन्न कनिक्रदद्देवः पर्जन्योऽअभि वर्षतु ॥१०॥

*śanno vātaḥ pavatāṁśannamtapatu sūryyaḥ । śanna kanikradaddevaḥ parjanyo'abhi varṣatu ॥10 ॥*

१२. विद्वान् (Vidvān) - य. (Yv.)३७.९; १३

य. (Yv.)३७.९

अश्वस्य तवा वृष्णः शक्ना धूपयामि देवयजने पृथिव्याः। मखाय त्वा मखस्य त्वा शीर्ष्णे। अश्वस्य त्वा वृष्णः
शक्ना धूपयामि देवयजने पृथिव्याः। मखाय त्वा मखस्य त्वा शीर्ष्णे। अश्वस्य त्वा वृष्णः शक्ना धूपयामि
देवयजने पृथिव्याः। मखाय त्वा मखस्य त्वा शीर्ष्णे। मखाय त्वा मखस्य त्वा शीर्ष्णे। मखाय त्वा मखस्य त्वा

शीर्ष्णे। मखाय त्वा मखस्य त्वा शीर्ष्णे ॥ ९॥

*aśvasya tavā vṛṣṇaḥ śaknā dhūpayāmi devayajane pṛthivyāḥ । makhāya tvā makhasya tvā śīrṣṇe । aśvasya tvā vṛṣṇaḥ śaknā dhūpayāmi devayajane pṛthivyāḥ । makhāya tvā makhasya tvā śīrṣṇe । aśvasya tvā vṛṣṇaḥ śaknā dhūpayāmi devayajane pṛthivyāḥ । makhāya tvā makhasya tvā śīrṣṇe । makhāya tvā makhasya tvā śīrṣṇe । makhāya tvā makhasya tvā śīrṣṇe । makhāya tvā makhasya tvā śīrṣṇe ॥ 9 ॥*

य. (Yv.)३७.१३

स्वाहा मरुद्भिः परि श्रीयस्व दिवः संस्पृशस्पाहि। मधु मधु मधु ॥१३॥

*svāhā marudbhiḥ pari śrīyasva divaḥ saṁspṛśaspāhi । madhu madhu madhu ॥13 ॥*

१३. विद्वांसः (Vidvāṁsaḥ) - य. (Yv.)३७.१०

ऋजवे त्वा साधवे त्वा सुक्षित्यै त्वा। मखाय त्वा मखस्य त्वा शीष्णे । मखाय त्वा मखस्य त्वा शीर्ष्णे।
मखाय त्वा मखस्य त्वा शीर्ष्णे ॥१०॥

*ṛjave tvā sādhave tvā sukṣityai tvā । makhāya tvā makhasya tvā śīṣṇe । makhāya tvā makhasya tvā śīrṣṇe । makhāya tvā makhasya tvā śīrṣṇe ॥10 ॥*

१४. सविता (Savitā) - य. (Yv.)३७.११

यमाय त्वा मखाय त्वा सूर्य्यम्य त्वा तपसे।
देवस्त्वा सविता मध्वानक्तु पृथिव्याः संस्पृशम्पाहि। अर्चिरसि शोचिरसि तपोऽसि ॥ ११ ॥

*yamāya tvā makhāya tvā sūryyamya tvā tapase ।*
*devastvā savitā madhvānaktu pṛthivyāḥ saṁspṛśampāhi । archirasi śochirasi tapo'si ॥11 ॥*

१५. सूर्यः (Sūryaḥ) - य. (Yv.)३६.२४

तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत्। पश्येम शरदः शतं जीवेम शरदः शतं श्रृणुयाम शरदः शतं प्र ब्रवाम शरदः शतमदीनाः स्याम शरदः शतं भूयश्च शरदः शतात् ॥ २४ ॥

*tachchakṣurdevahitaṁ purastāchchhukramuchcharat । paśyema śaradaḥ śataṁ jīvema śaradaḥ śataṁ śṛṇuyāma śaradaḥ śataṁ pra bravāma śaradaḥ śatamadīnāḥ syāma śaradaḥ śataṁ bhūyaścha śaradaḥ śatāt ॥ 24 ॥*

१६. सोमः (Somaḥ) - य. (Yv.)३६.२३

सुमित्रिया नऽआपऽओषधयः सन्तु दुर्मित्रियास्तस्मै सन्तु योऽस्मान् द्वेष्टि यं च वयं द्विष्मः ॥२३।

*sumitriyā na'āpa'Oṣadhayaḥ santu durmitriyāstasmai santu yo'smān dveṣṭi yaṁ cha vayaṁ dviṣmaḥ ॥23 ।*

## २७६. दमनः (Damanaḥ)

१. अग्निः (Agniḥ) - य. (Yv.)३५.१९

क्रव्यादमग्निं प्र हिणोमि दूरं यमराज्यं गच्छतु रिप्रवाहः ।
इहैवायमितरो जातवेदा देवेभ्यो हव्यं वहतु प्रजानन् ॥१९॥

*kravyādamagniṁ pra hiṇomi dūraṁ yamarājyaṁ gachchhatu ripravāhaḥ ।*
*ihaivāyamitaro jātavedā devebhyo havyaṁ vahatu prajānan ॥19 ॥*

## २७७. दमनो यामायनः (Damano Yāmāyanaḥ)

१. अग्निः (Agniḥ) - ऋ. (Rv.) १०.१६.१-१४

मैनमग्ने वि दहो माभि शोचो मास्य त्वचं चिक्षिपो मा शरीरम् ।
यदा श्रृतं कृण्वो जातवेदोऽथेमेनं प्र हिणुतात्पितृभ्यः ॥१॥
श्रृतं यदा करसि जातवेदोऽथेमेनं परि दत्तात्पितृभ्यः ।
यदा गच्छात्यसुनीतिमेतामथा देवानां वशनीर्भवाति ॥२॥
सूर्यं चक्षुर्गच्छतु वातमात्मा द्यां च गच्छ पृथिवीं च धर्मणा ।
अपो वा गच्छ यदि तत्र ते हितमोषधीषु प्रति तिष्ठा शरीरैः ॥३॥
अजो भागस्तपसा तं तपस्व तं ते शोचिस्तपतु तं ते अर्चिः ।

यास्ते शिवास्तन्वो जातवेदस्ताभिर्वहैनं सुकृतामु लोकम् ॥४॥
अव सृज पुनरग्ने पितृभ्यो यस्त आहुतश्चरति स्वधाभिः ।
आयुर्वसान उप वेतु शेषः सं गच्छतां तन्वा जातवेदः ॥५॥
यत्ते कृष्णः शकुन आतुतोद पिपीलः सर्प उत वा श्वापदः ।
अग्निष्टद्विश्वदगदं कृणोतु सोमश्च यो ब्राह्मणाँ आविवेश ॥६॥
अग्नेर्वर्म परि गोभिर्व्ययस्व सं प्रोर्णुष्व पीवसा मेदसा च ।
नेत्त्वा धृष्णुर्हरसा जर्हृषाणो दधृग्विधक्ष्यन्पर्यंखयाते ॥७॥
इममग्ने चमसं मा वि जिह्वरः प्रियो देवानामुत सोम्यानाम् ।
एष यश्चमसो देवपानस्तस्मिन्देवा अमृता मादयन्ते ॥८॥
क्रव्यादमग्निं प्र हिणोमि दूरं यमराज्ञो गच्छतु रिप्रवाहः ।
इदहैवायमितरो जातवेदा देवेभ्यो हव्यं वहतु प्रजानन् ॥९॥
यो अग्निः क्रव्यात्प्रविवेश वो गृहमिमं पश्यन्नितरं जातवेदसम् ।
तं हरामि पितृयाज्ञाय देवं स घर्ममिन्वात्परमे सधस्थे ॥१०॥
यो अग्निः क्रव्यवाहनः पितृन्यक्षदृतावृधः । प्रेदु हव्यानि वोचति देवेभ्यश्चर पितृभ्य आ ॥११॥
उशन्तस्त्वा नि धीमह्युशन्तः समिधीमहि । उशन्नुशत आ वह पितृन्हविषे अत्तवे ॥१२॥
यं त्वमग्ने समदहस्तमु निर्वापया पुनः । कियाम्ब्वत्र रोहतु पाकदूर्वा व्यल्कशा ॥१३॥
शीतिके शीतिकावति ह्लादिके ह्लादिकावति ।
मण्डूक्या३ सु संगम इमं स्व१ग्नि हर्षय ॥१४॥

*mainamagne vi daho mābhi śocho māsya tvachaṁ chikṣipo mā śarīram* /
*yadā śṛtaṁ kṛṇvo jātavedo'themenaṁ pra hiṇutātpitṛbhyaḥ* //1 //
*śṛtaṁ yadā karasi jātavedo'themenaṁ pari dattātpitṛbhyaḥ* /
*yadā gachchhātyasunītimetāmathā devānāṁ vaśanīrbhavāti* //2 //
*sūrya chakṣurgachchhatu vātamātmā dyāṁ cha gachchha pṛthivīṁ cha dharmaṇā* /
*apo vā gachchha yadi tatra te hitamoṣadhīṣu prati tiṣṭhā śarīraiḥ* //3 //
*ajo bhāgastapasā taṁ tapasva taṁ te śochistapatu taṁ te archiḥ* /
*yāste śivāstanvo jātavedastābhirvahainaṁ sukṛtāmu lokam* //4 //
*ava sṛja punaragne pitṛbhyo yasta āhutaścharati svadhābhiḥ* /
*āyurvasāna upa vetu śeṣaḥ saṁ gachchhatāṁ tanvā jātavedaḥ* //5 //
*yatte kṛṣṇaḥ śakuna ātutoda pipīlaḥ sarpa uta vā śvāpadaḥ* /
*agniṣṭadviśvadagadaṁ kṛṇotu somaścha yo brāhmaṇāṁ̐ āviveśa* //6 //
*agnervarma pari gobhirvyayasva saṁ prorṇuṣva pīvasā medasā cha* /
*nettvā dhṛṣṇurharasā jarhṛṣāṇo dadhṛgvidhakṣayanparyaṁkhayāte* //7 //
*imamagne chamasaṁ mā vi jihnaraḥ priyo devānāmuta somyānām* /
*eṣa yaśchamaso devapānastasmindevā amṛtā mādayante* //8 //
*kravyādamagniṁ pra hiṇomi dūraṁ yamarāāo gachchhatu ripravāhaḥ* /
*idahaivāyamitaro jātavedā devebhyo havyaṁ vahatu prajānan* //9 //
*yo agniḥ kravyātpraviveśa vo gṛhamimaṁ paśyannitaraṁ jātavedasam* /
*taṁ harāmi pitṛyāāya devaṁ sa gharmaminvātparame sadhasthe* //10 //
*yo agniḥ kravyavāhanaḥ pitṝnyakṣadṛtāvṛdhaḥ / predu havyāni vochati devebhyaśchara pitṛbhya ā* //11 //
*uśantastvā ni dhīmahyuśantaḥ samidhīmahi* /
*uśannuśata ā vaha pitṛnhaviṣe attave* //12 //
*yaṁ tvamagne samadahastamu nirvāpayā punaḥ* /
*kiyāmbvatra rohatu pākadūrvā vyalkaśā* //13 //
*śītike śītikāvati hlādike hlādikāvati* /
*maṇḍūkyā3 su saṁgama imaṁ sva1gni harṣaya* //14 //

## २७८. दिव्यो दक्षिणा वा प्राजापत्याः (Divyo Dakṣiṇā Vā Prājāpatyāḥ)

१. दक्षिणा तद्दातारो वा (Dakṣiṇā Taddātāro Vā) - ऋ. (Rv.) १०.१०७.१-११

आविरभून्महि माघोनमेषां विश्वं जीवं तमसो निरमोचि ।
महि ज्योतिः पितृभिर्दत्तमागादुरुः पन्था दक्षिणाया अदर्शि ॥१॥
उच्चा दिवि दक्षिणावन्तो अस्थुर्ये अश्वदाः सह ते सूर्येण ।
हिरण्यदा अमृतत्वं भजन्ते वासोदाः सोम प्र तिरन्त आयुः ॥२॥
दैवी पूर्तिर्दक्षिणा देवयज्या न कवारिभ्यो नहि ते पृणन्ति ।
अथा नरः प्रयतदक्षिणासोऽवद्यभिया बहवः पृणन्ति ॥३॥
शतधरं वायुमर्कं स्वर्विदं नृचक्षसस्ते अभि चक्षते हविः ।
ये पृणन्ति प्र च यच्छन्ति संगमे ते दक्षिणां दुहते सप्तमातरम् ॥४॥
दक्षिणावान्प्रथमो हूत एति दक्षिणावान्ग्रामणीरग्रमेति ।
तमेव मन्ये नृपतिं जनानां यः प्रथमो दक्षिणामाविवाय ॥५॥
तमेव ऋषिं तमु ब्रह्माणमाहुर्यज्ञन्यं सामगामुक्थशासम् ।
स शुक्रस्य तन्वो वेद तिस्रो यः प्रथमो दक्षिणया रराध ॥६॥
दक्षिणाश्वं दक्षिणा गां ददाति दक्षिणा चन्द्रमुत यद्धिरण्यम् ।
दक्षिणान्नं वनुते यो न आत्मा दक्षिणां वर्म कृणुते विजानन् ॥७॥
न भोजा मम्रुर्न न्यर्थमीयुर्न रिष्यन्ति न व्यथन्ते ह भोजाः ।
इदं यद्विश्वं भुवनं स्वश्चैतत्सर्वं दक्षिणैभ्यो ददाति ॥८॥
भोजा जिग्युः सुरभिं योनिमग्रे भोजा जिग्युर्वध्वं१ या सुवासाः ।
भोजा जिग्युरन्तः पेयं सुराया भोजा जिग्युर्ये अहूताः प्रयन्ति ॥९॥
भोजायाश्वं सं मृजन्त्याशुं भोजायास्ते कन्या३ शुम्भमाना ।
भोजस्येदं पुष्करिणीव वेश्म परिष्कृतं देवमानेव चित्रम् ॥१०॥
भोजमश्वाः सुष्ठुवाहो वहन्ति सुवृद्रथो वर्तते दक्षिणायाः ।
भोजं देवासोऽवता भरेषु भोजः शत्रून्त्समनीकेषु जेता ॥११॥

*āvirabhūnmahi māghonameṣāṁ viśvaṁ jīvaṁ tamaso niramochi /*
*mahi jyotiḥ pitṛbhirdattamāgāduruḥ panthā dakṣiṇāyā adarśi //1//*
*uchchā divi dakṣiṇāvanto asthurye aśvadāḥ saha te sūryeṇa /*
*hiraṇyadā amṛtatvaṁ bhajante vāsodāḥ soma pra tiranta āyuḥ //2//*
*daivī pūrtirdakṣiṇā devayajyā na kavāribhyo nahi te pṛṇanti /*
*athā naraḥ prayatadakṣiṇāso'vadyabhiyā bahavaḥ pṛṇanti //3//*
*śatadharaṁ vāyumarka svarvidaṁ nṛchakṣasaste abhi chakṣate haviḥ /*
*ye pṛṇanti pra cha yachchhanti saṁgame te dakṣiṇāṁ duhate saptamātaram //4//*
*dakṣiṇāvānprathamo hūta eti dakṣiṇāvāngrāmaṇīragrameti /*
*tameva manye nṛpatiṁ janānāṁ yaḥ prathamo dakṣiṇāmāvivāya //5//*
*tameva ṛṣiṁ tamu brahmāṇamāhuryānyaṁ sāmagāmukthaśāsam /*
*sa śukrasya tanvo veda tisro yaḥ prathamo dakṣiṇayā rarādha //6//*
*dakṣiṇāśvaṁ dakṣiṇā gāṁ dadāti dakṣiṇā chandramuta yaddhiraṇyam /*
*dakṣiṇānnaṁ vanute yo na ātmā dakṣiṇāṁ varma kṛṇute vijānan //7//*
*na bhojā mamrurna nyarthamīyurna riṣyanti na vyathante ha bhojāḥ /*
*idaṁ yadviśvaṁ bhuvanaṁ svaśchaitatsarva dakṣiṇaibhyo dadāti //8//*
*bhojā jigyuḥ surabhiṁ yonibhagre bhejā jirgyurvadhvaṁ1 yā suvāsāḥ /*
*bhejā jigyurantaḥ peyaṁ surāyā bhejā jigyurye ahūtāḥ prayanti //9//*
*bhejāyāśvaṁ saṁ mṛjantyāśuṁ bhejāpayāste kanyā3 śumbhamānā /*
*bhojasyedaṁ puṣkariṇīva veśma pariṣkṛtaṁ devamāneva chitram //10//*
*bhojamaśvāḥ suṣṭhuvāho vahanti suvradratho vartate dakṣiṇāyāḥ /*
*bhejaṁ devāso'vatā bhareṣu bhojaḥ śatrūntsamanīkeṣu jetā //11//*

## २७९. दीर्घतमा (Dīrghatamā)

१. अग्निः (Agniḥ) - य. (Yv.)६.१८; १२.४२; ३८.१७; ३९.१०-१३

य. (Yv.)६.१८

सं ते मनो मनसा सं प्राणः प्राणेन गच्छताम्। रेडस्यग्निष्ट्वा श्रीणात्वापस्त्वा समरिणन्वातस्य त्वा ध्राज्यै पूष्णो रंह्याऽऊष्मणो व्यथिषत्प्रयुतं द्वेषः ॥१८॥

*saṁ te mano manasā saṁ prāṇaḥ prāṇena gachchhatām / reḍasyagniṣṭvā śrīṇātvāpastvā samariṇanvātasya tvā dhrājyai pūṣṇo raṁ hyā'ūṣmaṇo vyathiṣatprayutaṁ dveṣaḥ //18 //*

य. (Yv.)१२.४२

बोधा मेऽअस्य वचसो यविष्ठ मं हिष्ठस्य प्रभृतस्य स्वधावः।
पीयति त्वोऽअनु त्वो गृणाति वन्दारुष्टे तन्वं वन्देऽअग्ने ॥४२॥

*bodhā me'asya vachaso yaviṣṭha maṁ hiṣṭhasya prabhṛtasya svadhāvaḥ /*
*pīyati tvo'anu tvo gṛṇāti vandāruṣṭe tanvaṁ vande'agne //42 //*

य. (Yv.)३८.१७

अभीमं महिमा दिवं विप्रो बभूव सप्रथाः। उत श्रवसा पृथिवींसं सीदस्व महाँश्ऽ असि रोचस्व देववीतमः। वि धूममग्नेऽअरुषं मियेद्ध्य सृज प्रशस्त दर्शतम्॥१७॥

*abhīmaṁ mahimā divaṁ vipro babhūva saprathāḥ / uta śravasā pṛthivīṁsaṁ sīdasva mahām̐ś' asi rochasva devavītamaḥ / vi dhūmamagne'aruṣaṁ miyeddhya sṛja praśasta darśatam //17 //*

य. (Yv.)३९.१०-१३

लोमभ्यः स्वाहा लोमभ्यः स्वाहा त्वचे स्वाहा त्वचे स्वाहा लोहिताय स्वाहा लोहिताय स्वाहा मेदोभ्यः स्वाहा मेदोभ्यः स्वाहा। मां सेभ्यः स्वाहा मं सेभ्यः स्वाहा स्नावभ्यः स्वाहा स्नावभ्यः स्वाहास्थभ्यः स्वाहास्थभ्यः स्वाहा मज्जभ्यः स्वाहा मज्जभ्यः स्वाहा।
रेतसे स्वाहा पायवे स्वाहा ॥१०॥
आयासाय स्वाहा प्रायासाय स्वाहा संयासाय स्वाहा वियासाय स्वाहोद्यासाय स्वाहा।
शुचे स्वाहा शोचते स्वाहा शोच मानाय स्वाहा शोकाय स्वाहा ॥११॥
तपसे स्वाहा तप्यते स्वाहा तप्यमानाय स्वाहा तप्ताय स्वाहा घर्माय स्वाहा।
निष्कृत्यै स्वाहा प्रायश्चित्यै स्वाहा भेषजाय स्वाहा ॥१२॥
यमाय स्वाहान्तकाय स्वाहा मृत्यवे स्वाहा। ब्रह्मणे स्वाहा ब्रह्महत्यायै स्वाहा विश्वेभ्यो देवेभ्यः स्वाहा द्यावापृथिवीभ्यांस्वाहा॥१३॥

*lomabhyaḥ svāhā lomabhyaḥ svāhā tvache svāhā tvache svāhā lohitāya svāhā lohitāya svāhā medobhyaḥ svāhā medobhyaḥ svāhā / māṁ sebhyaḥ svāhā maṁ sebhyaḥ svāhā snāvabhyaḥ svāhā snāvabhyaḥ svāhāsthabhyaḥ svāhāsthabhyaḥ svāhā majjabhyaḥ svāhā majjabhyaḥ svāhā / retase svāhā pāyave svāhā //10 //*
*āyāsāya svāhā prāyāsāya svāhā saṁyāsāya svāhā viyāsāya svāhodyāsāya svāhā /*
*śuche svāhā śochate svāhā śocha mānāya svāhā śokāya svāhā //11 //*
*tapase svāhā tapyate svāhā tapyamānāya svāhā taptāya svāhā gharmāya svāhā /*
*niṣkṛtyai svāhā prāyaśchityai svāhā bheṣajāya svāhā //12 //*
*yamāya svāhāntakāya svāhā mṛtyave svāhā / brahmaṇe svāhā brahmahatyāyai svāhā viśvebhyo devebhyaḥ svāhā dyāvāpṛthivībhyāṁsvāhā //13 //*

२. अग्न्यादयो लिंगोक्ताः (Agnyādayo Liṁgoktāḥ) - य. (Yv.)३९.८

अग्निंहृदयेनाशनिंहृदयाग्रेण पशुपतिं कृत्स्नहृदयेन भवं यक्ना।
शर्व मतस्नाभ्यामीशानं मन्युना महादेवमन्तः-पर्शव्येनोग्रं देवं वनिष्ठुना वसिष्ठहनुः शिंगीनि कोश्याभ्याम्॥८॥

*agniṁhṛdayenāśaniṁhṛdayāgreṇa paśupatiṁ kṛtsnahṛdayena bhavaṁ yaknā /*
*śarva matasnābhyāmīśānaṁ manyunā mahādevamantaḥ-parśavyenograṁ devaṁ*

*vaniṣṭhunā vasiṣṭhahanuḥ*
*śiṁgīni kośyābhyām ॥8 ॥*

३. अप या सूर्याः (Apa Yā Sūryāḥ) - य. (Yv.)६.२३

हविष्मतीरिमाऽआपो हविष्माँश्ऽआविवासति। हविष्मान्देवोऽ अध्वरो हविष्माँश्ऽअस्तु सूर्यः ॥२३ ॥
*haviṣmatīrimā'āpo haviṣmām̐ś'āvivāsati । haviṣmāndevo' adhvaro haviṣmām̐ś'astu sūryaḥ ॥23 ॥*

४. अश्विनौ (Aśvinau) - य. (Yv.)३८.६; १०; १२; १३

य. (Yv.)३८.६

गायत्रं छन्दोऽसि त्रैष्टुभं छन्दोऽसि द्यावापृथिवीभ्यां परि गृह्णाम्यन्तरिक्षे णोप यच्छामि इन्द्राश्विना मधुनः सारघस्य घर्म पात वसवो यजत वाट्। स्वाहा सूर्य्यस्य रश्मये वृष्टिवनये ॥६ ॥
*gāyatraṁ chhando'si traiṣṭubhaṁ chhando'si dyāvāpṛthivībhyāṁ pari gṛhṇāmyantarikṣe ṇopa yachchhāmi indrāśvinā madhunaḥ sāraghasya gharma pāta vasavo yajata vāṭ । svāhā sūryyasya raśmaye vṛṣṭivanaye ॥6 ॥*

य. (Yv.)३८.१०

विश्वाऽआशा दक्षिणसद्विश्वान्देवानयाडिह। स्वाहाकृतस्य घर्मस्य मधोः पिबतमश्विना ॥१० ॥
*viśvā'āśā dakṣiṇasadviśvāndevānayāḍiha । svāhākṛtasya gharmasya madhoḥ pibatamaśvinā ॥10 ॥*

य. (Yv.)३८.१२-१३

अश्विना घर्म पातंहार्द्वानमहर्दिवाभिरूतिभिः। तन्त्रायिणे नमो द्यावापृथिवीभ्याम् ॥१२ ॥
आपातामश्विना घर्ममनु द्यावापृथिवी अमं साताम्। इहैव रातयः सन्तु ॥१३ ॥
*aśvinā gharma pātaṁhārdvānamahardivābhirūtibhiḥ । tantrāyiṇe namo dyāvāpṛthivībhyām ॥12 ॥*
*āpātāmaśvinā gharmamanu dyāvāpṛthivī amaṁ sātām । ihaiva rātayaḥ santu ॥13 ॥*

५. आत्मा (Ātmā) - य. (Yv.)४०.१-३; ५-१७

य. (Yv.)४०.१-३

ईशा वास्यमिदंसर्व यत्किंच जगत्यां जगत्। तेन त्यक्तेन भुंजीथा मा गृधः कस्य स्विद्धनम् ॥१ ॥
कुर्वन्नेवेह कर्माणि जिजीविषेच्छतंसमाः। एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे ॥२ ॥
असुर्या नाम ते लोका अन्धेन तमसावृताः । ताँस्ते प्रेत्यापि गच्छन्ति ये के चात्महनो जनाः ॥३ ॥
*īśā vāsyamidaṁsarva yatiṁkaṁcha jagatyāṁ jagat । tena tyaktena bhuṁjīthā mā gṛdhaḥ kasya sviddhanam ॥1 ॥*
*kurvanneveha karmāṇi jijīviṣechchhataṁsamāḥ । evaṁ tvayi nānyatheto'sti na karma lipyate nare ॥2 ॥*
*asuryā nāma te lokā andhena tamasāvṛtāḥ । tām̐ste pretyāpi gachchhanti ye ke chātmahano janāḥ ॥3 ॥*

य. (Yv.)४०.५-१७

तदेजति तन्नेजति तद्दूरे तद्वन्तिके। तदन्तरस्य सर्वस्य तदु सर्वस्यास्य बाह्यतः ॥५ ॥
यस्तु सर्वाणि भूतान्यात्मन्नेवानुपश्यति। सर्वभूतेषु चात्मानं ततो न वि चिकित्सति ॥६ ॥
यस्मिन्त्सर्वाणि भूतान्यात्मैवाभूद्विजानतः। तत्र को मोहः कः शोक एकत्वमनुपश्यतः ॥७ ॥
स पर्यगाच्छुक्रमकायमव्रणमस्नाविरंशुद्धमपापविद्धम् ।
कविर्मनीषी परिभूः स्वयम्भूर्याथातथ्यतोऽर्थान् व्यदधाच्छाश्वतीभ्यः समाभ्यः ॥८ ॥
अन्धं तमः प्रविशन्ति येऽसंभूतिमुपासते। ततो भूय इव ते तमो य उ सम्भूत्यांरताः ॥९ ॥
अन्यदेवाहुः सम्भवादन्यदाहुरसम्भवात्। इति शुश्रुम धीराणां ये नस्तद्विचचक्षिरे ॥१० ॥
सम्भूतिं च विनाशं च यस्तद्वेदोभयंसह। विनाशेन मृत्युं तीर्त्वा सम्भूत्यामृतमश्नुते ॥११ ॥
अन्धं तमः प्र विशन्ति येऽविद्यामुपासते। ततो भूय इव ते तमो य उ विद्यायांरताः ॥१२ ॥
अन्यदेवाहुर्विद्याया अन्यदाहुरविद्यायाः। इति शुश्रुम धीराणां ये नस्तद्विचचक्षिरे ॥१३ ॥

विद्यां चाविद्यां च यस्तद्वेदोभयंसह। अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते ॥१४॥
वायुरनिलममृतमथेदं भस्मान्तंशरीरम्। ओ३म् क्रतो स्मर। क्लिबे स्मर। कृतं स्मर ॥१५॥
अग्ने नय सुपथा राये अस्मान्विश्वानि देव वयुनानि विद्वान ।
युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नम उक्तिं विधेम ॥१६॥
हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम्। योऽसावादित्ये पुरुषः सोऽसावहम्। ओ३म् खं ब्रह्म ॥१७॥
*tadejati tannejati taddūre tadvantike I*
*tadantarasya sarvasya tadu sarvasyāsya bāhyataḥ II5 II*
*yastu sarvāṇi bhūtānyātmannevānupaśyati I*
*sarvabhūteṣu chātmānaṁ tato na vi chikitsati II6 II*
*yasmintsarvāṇi bhūtānyātmaivābhūdvijānataḥ I*
*tatra ko mohaḥ kaḥ śoka ekatvamanupaśyataḥ II7 II*
*sa paryagāchchhukramakāyamavraṇamasnāviraṁśuddhamapāpaviddham I*
*kavirmanīṣī paribhūḥ svayambhūryāthātathyato'rthān vyadadhāchchhāśvatībhyaḥ samābhyaḥ II8 II*
*andhaṁ tamaḥ praviśanti ye'saṁbhūtimupāsate I*
*tato bhūya iva te tamo ya u sambhūtyāṁratāḥ II9 II*
*anyadevāhuḥ sambhavādanyadāhurasambhavāt I*
*iti śuśruma dhīrāṇāṁ ye nastadvichachakṣire II10 II*
*sambhūtiṁ cha vināśaṁ cha yastadvedobhayaṁsaha I*
*vināśena mṛtyuṁ tīrtvā sambhūtyāmṛtamaśnute II11 II*
*andhaṁ tamaḥ pra viśanti ye'vidyāmupāsate I*
*tato bhūya iva te tamo ya u vidyāyāṁratāḥ II12 II*
*anyadevāhurvidyāyā anyadāhuravidyāyāḥ I*
*iti śuśruma dhīrāṇāṁ ye nastadvichachakṣire II13 II*
*vidyāṁ chāvidyāṁ cha yastadvedobhayaṁsaha I*
*avidyayā mṛtyuṁ tīrtvā vidyayā'mṛtamaśnute II14 II*
*vāyuranilamamṛtamathedaṁ bhasmāntaṁśarīram I*
*O3m krato smara I klibe smara I kṛtaṁ smara II15 II*
*agne naya supathā rāye asmānviśvāni deva vayunāni vidvāna I*
*yuyodhyasmajjuhurāṇameno bhūyiṣṭhāṁ te nama uktiṁ vidhema II16 II*
*hiraṇmayena pātreṇa satyasyāpihitaṁ mukham I*
*yo'sāvāditye puruṣaḥ so'sāvaham I O3m khaṁ brahma II17 II*

६. आपः (Āpaḥ) - य. (Yv.)६.१७; ३८.२३

य. (Yv.)६.१७

इदमापः प्रवहतावद्यं च मलं च यत्। यच्चाभिदुद्रोहानृतं यच्च शेपेऽअभीरुणम्।
आपो मा तस्मादेनसः पवमानश्च मुंचतु ॥१७॥
*idamāpaḥ pravahatāvadyaṁ cha malaṁ cha yat I*
*yachchābhidudrohānṛtaṁ yachcha śepe'abhīruṇam I*
*āpo mā tasmādenasaḥ pavamānaścha muṁchatu II17 II*

य. (Yv.)३८.२३

सुमित्रिया नऽआपऽओषधयः सन्तु दुर्मित्रियास्तस्मै सन्तु योस्मान् द्वेष्टि यं च वयं द्विष्मः ॥२३॥
*sumitriyā na'āpa'Oṣadhayaḥ santu durmitriyāstasmai santu yosmān dveṣṭi yaṁ cha vayaṁ dviṣmaḥ II23 II*

७. इन्द्रः (Indraḥ) - य. (Yv.)३८.८; २६

य. (Yv.)३८.८

इन्द्राय त्वा वसुमते रुद्रवते स्वाहेन्द्राय त्वादित्यवते स्वाहेन्द्राय त्वाभिमातिघ्ने स्वाहा। सवित्रे त्वऽऋभुमते विभुमते वाजवते स्वाहा बृहस्पतये त्वा विश्वदेव्यावते स्वाहा॥८॥

*indrāya tvā vasumate rudravate svāhendrāya tvādityavate svāhendrāya tvābhimātighne svāhā । savitre tva'ṛbhumate vibhumate vājavate svāhā bṛhaspataye tvā viśvadevyāvate svāhā ॥8 ॥*

य. (Yv.)३८.२६

यावती द्यावापृथिवी यावच्च सप्त सिन्धवो वितस्थिरे ।
तावन्तमिन्द्र ते ग्रहमूर्जा गृह्णाम्यक्षितं मयि गृह्णाम्यक्षितम् ॥२६ ॥

*yāvatī dyāvāpṛthivī yāvachcha sapta sindhavo vitasthire ।*
*tāvantamindra te grahamūrjā gṛhṇāmyakṣitaṁ mayi gṛhṇāmyakṣitam ॥26 ॥*

८. ईश्वरः (Īśvaraḥ) - य. (Yv.)३७.१७; ३८.२५

य. (Yv.)३७.१७

अपश्यं गोपामनिपद्यमानमा च परा च पथिभिश्चरन्तम् ।
स सध्रीचीः स विषूचीर्वसानऽआ वरीवर्त्ति भुवनेष्वन्तः ॥१७ ॥

*apaśyaṁ gopāmanipadyamānamā cha parā cha pathibhiścharantam ।*
*sa sadhrīchīḥ sa viṣūchīrvasāna'ā varīvartti bhuvaneṣvantaḥ ॥17 ॥*

य. (Yv.)३८.२५

एधोऽस्येधिषीमहि समिदसि तेजोऽसि तेजो मयि धेहि ॥२५ ॥

*edho'syedhiṣīmahi samidasi tejo'si tejo mayi dhehi ॥25 ॥*

९. अग्रादयो लिंगोक्ताः (Agrādayo Liṁgoktāḥ) - य. (Yv.)३९.९

उग्रं लोहितेन मित्रंसौव्रत्येन रुद्रं दौर्व्रत्येनेन्द्रं प्रक्रीडेन मरुतो बलेन साध्यान् प्रमुदा ।
भुवस्य कण्ठ्यंरुद्रस्यान्तः पाश्र्व्यं महादेवस्य यकृच्छर्वस्य वनिष्ठुः पशुपतेः पुरीतत् ॥९ ॥

*ugraṁ lohitena mitraṁsauvratyena rudraṁ daurvratyenendraṁ prakrīḍena maruto balena sādhyān pramudā ।*
*bhuvasya kaṇṭhyaṁrudrasyāntaḥ pārśvya mahādevasya yakṛchchharvasya vaniṣṭhuḥ paśupateḥ purītat ॥9 ॥*

१०. त्वष्टा (Tvaṣṭā) - य. (Yv.)६.२०

ऐन्द्रः प्राणोऽअंगेऽअंगे निदीध्यदैन्द्रऽउदानोऽअंगेऽअंगे निधीतः ।
देव त्वष्टर्भूरि ते सं समेतु सलक्ष्मा यद्विषुरूपं भवाति ।
देवत्रा यन्तमवसे सखायोऽनु त्वा माता पितरो मदन्तु ॥२० ॥

*aindraḥ prāṇo'aṁge'aṁge nidīdhyadaindra'udāno'aṁge'aṁge nidhītaḥ ।*
*deva tvaṣṭarbhūri te saṁ sametu salakṣamā yadviṣurūpaṁ bhavāti ।*
*devatrā yantamavase sakhāyo'nu tvā mātā pitaro madantu ॥20 ॥*

११. दिगादयो लिंगोक्ताः (Digādayo Liṁgoktāḥ) - य. (Yv.)३९.२

दिग्भ्यः स्वाहा चन्द्राय स्वाहा नक्षत्रेभ्यः स्वाहा ऽद्भयः
स्वाहा वरुणाय स्वाहा। नाभ्यै स्वाहा पूताय स्वाहा ॥२ ॥

*digbhyaḥ svāhā chandrāya svāhā nakṣatrebhyaḥ svāhā 'dbhayaḥ*
*svāhā varuṇāya svāhā । nābhyai svāhā pūtāya svāhā ॥2 ॥*

१२. द्यावापृथिवी (Dyāvāpṛthivī) - य. (Yv.)३८.१४

इषे पिन्वस्वोर्जे पिन्वस्त्र ब्रह्मणे पिन्वस्व क्षत्राय पिन्वस्व द्यावापृथिवीभ्यां पिन्वस्व ।
धर्मासि सुधर्मामेन्यस्मे नृम्णानि धारय ब्रह्म धारय क्षत्रं धारय विशं धारय ॥१४ ॥

*iṣe pinvasvorje pinvastra brahmaṇe pinvasva kṣatrāya pinvasva dyāvāpṛthivībhyāṁ pinvasva ।*
*dharmāsi sudharmāmenyasme nṛmṇāni dhāraya brahma dhāraya kṣatraṁ dhāraya viśaṁ dhāraya ॥14 ॥*

१३. पूषादयो लिंगोक्ताः (Pūṣādayo Liṁgoktāḥ) - य. (Yv.)३८.१५

स्वाहा पूष्णे शरसे स्वाहा ग्रावभ्यः स्वाहा प्रतिरवेभ्यः। स्वाहा पितृभ्यऽऊर्ध्वबर्हिर्भ्यो घर्मपावभ्यः स्वाहा द्यावापृथिवीभ्यांस्वाहा विश्वेभ्यो देवेभ्यः ॥१५ ॥

*svāhā pūṣṇe śarase svāhā grāvabhyaḥ svāhā pratiravebhyaḥ । svāhā pitṛbhya'ūrdhvabarhirbhyo gharmapāvabhyaḥ svāhā dyāvāpṛthivībhyāṁsvāhā viśvebhyo devebhyaḥ ॥15 ॥*

१४. प्रजापतिः (Prajāpatiḥ) - य. (Yv.)३९.५

प्रजापतिः सम्भ्रियमाणः सम्राट् सम्भृतो वैश्वदेवः सं सन्नो घर्मः प्रवृक्तस्तेजऽउद्यतऽआश्विनः पयस्यानीयमाने पौष्णो विष्पन्दमाने मारुतः क्नथन् । मैत्रः शरसि सन्ताय्यमाने वायव्यो ह्रियमाणऽआग्नेयो हूयमानो वाग्घुतः ॥५॥

*prajāpatiḥ sambhriyamāṇaḥ samrāṭ sambhṛto vaiśvadevaḥ saṁ sanno gharmaḥ pravṛktasteja'udyata'āśvinaḥ payasyānīyamāne pauṣṇo viṣpandamāne mārutaḥ knathan । maitraḥ śarasi santāyyamāne vāyavyo hriyamāṇa'āgneyo hūyamāno vāgghutaḥ ॥5 ॥*

१५. प्राणादयो लिंगोक्ताः (Prāṇādayo Liṁgoktāḥ) - य. (Yv.)३९.१

स्वाहा प्राणेभ्यः साधिपतिकेभ्यः ।
पृथिव्यै स्वाहाग्नये स्वाहान्तरिक्षाय स्वाहा वायवे स्वाहा दिवे स्वाहा सूर्य्याय स्वाहा ॥१॥

*svāhā prāṇebhyaḥ sādhipatikebhyaḥ ।*
*pṛthivyai svāhāgnaye svāhāntarikṣāya svāhā vāyave svāhā dive svāhā sūryyāya svāhā ॥1 ॥*

१६. बृहस्पतिः (Bṛhaspatiḥ) - य. (Yv.)६.८

रेवती रमध्वं बृहस्पते धारया वसूनि। ऋतस्य त्वा देवहविः पाशेन प्रति मुंचामि धर्षा मानुषः ॥८॥

*revatī ramadhvaṁ bṛhaspate dhārayā vasūni । ṛtasya tvā devahaviḥ pāśena prati muṁchāmi dharṣā mānuṣaḥ ॥8 ॥*

१७. ब्रह्मः (Brahmaḥ) - य. (Yv.)४०.४

अनेजदेकं मनसो जीवीयो नैनद्देवाऽआप्नुवन् पूर्वमर्षत् ।
तद्धावतोऽन्यानत्येति तिष्ठत्तस्मिन्नपो मातरिश्वा दधाति ॥४॥

*anejadekaṁ manaso jīvīyo nainaddevā'āpnuvan pūrvamarṣat ।*
*taddhāvato'nyānatyeti tiṣṭhattasminnapo mātariśvā dadhāti ॥4 ॥*

१८. मरुतः (Marutaḥ) - य. (Yv.)३९.७

उग्रश्च भीमश्च ध्वान्तश्च धुनिश्च। सासह्वाँश्चभियुग्वा च विक्षिपः स्वाहा ॥७॥

*ugraścha bhīmaścha dhvāntaścha dhuniścha । sāsahnāṁśchabhiyugvā cha vikṣipaḥ svāhā ॥7 ॥*

१९. याः (Yāḥ) - य. (Yv.)३८.११; १८-२२; २७; २८

य. (Yv.)३८.११

दिवि धाऽइमं यामिमं यां दिवि धाः। स्वाहाग्नये यियाय शं यजुर्भ्यः ॥११॥

*divi dhā'imaṁ yāmimaṁ yāṁ divi dhāḥ । svāhāgnaye yiāyāya śaṁ yajurbhyaḥ ॥11 ॥*

य. (Yv.)३८.१८-२२

या ते घर्म दिव्या शुग्या गायत्र्यांहविर्धाने। सा तऽआ प्यायतान्निष्ट्यायतां तस्य ते स्वाहा ।
या ते घर्मान्तरिक्षे शुग्या त्रिष्टुब्भ्याग्नीध्रे। सा तऽआ प्यायतान्निष्ट्यायतां तस्यै ते स्वाहा ।
या ते घर्म पृथिव्यांशुग्या जगत्यांसदस्या। सा तऽआ प्यायतान्निष्ट्यायतां तस्यै ते स्वाहा॥१८॥
क्षत्रस्य त्वा परस्पाय ब्रह्मणस्तन्वं पाहि। विश्स्त्वा धर्मणा वयमनु क्रामाम सुविताय नव्यसे॥१९॥
चतुः स्रक्तिर्नाभिर्ऋतस्य सप्रथाः स नो विश्वायुः सप्रथाः स नः सर्वायुः सप्रथाः।
अप द्वेषोऽअप ह्वरोऽन्यव्रतस्य सश्चिम ॥२०॥
घर्मैतत्ते पुरीषं तेन वर्द्धस्व चा च प्यायस्व । वर्द्धिषीमहि च वयमा च प्यासिषीमहि ॥२१॥
अचिक्रदद्वृषा हरिर्महान्मित्रो न दर्शतः। संसूर्य्येण दिद्युतदुदधिर्निधिः॥२२॥

*yā te gharma divyā śugyā gāyatrayāṁhavirdhāne । sā ta'ā pyāyatānniṣṭyāyatāṁ tasya te svāhā ।*
*yā te gharmāntarikṣe śugyā triṣṭubbhyāgnīdhre । sā ta'ā pyāyatānniṣṭyāyatāṁ tasyai te*

*svāhā* ।
*yā te gharma pṛthivyāṁśugyā jagatyāṁsadasyā । sā ta'ā pyāyatānniṣṭyāyatāṁ tasyai te svāhā ॥18 ॥*
*kṣatrasya tvā paraspāya brahmaṇastanvaṁ pāhi । viśstvā dharmaṇā vayamanu krāmāma suvitāya navyase ॥19 ॥*
*chatuḥ sraktirnābhirṛtasya saprathāḥ sa no viśvāyuḥ saprathāḥ sa naḥ sarvāyuḥ saprathāḥ ।*
*apa dveṣo'apa hnaro'nyavratasya saśchima ॥20 ॥*
*gharmaitatte purīṣaṁ tena varddhasva chā cha pyāyasva । varddhiṣīmahi cha vayamā cha pyāsiṣīmahi ॥21 ॥*
*achikradadvaṣā harirmahānmitro na darśataḥ । saṁsūryyeṇa didyutadudadhirnidhiḥ ॥22 ॥*

य. (Yv.)३८.२७-२८

मयि त्यदिन्द्रियं बृहन्मयि दक्षो मयि क्रतुः ।
घर्मास्त्रिशुग्वि राजति विराजा ज्योतिषा सह ब्रह्मणा तेजसा सह ॥२७॥
पयसो रेतऽआभृतं तस्य दोहमशी मुत्तरामुत्तरांसमाम् ।
त्विषः संवृक् क्रत्वे दक्षस्य ते सुषुम्णस्य ते सुषुम्णाग्निहुतः ।
इन्द्रपीतस्य प्रजापतिभक्षितस्य मधुमतऽउपहूतऽउपहूतस्य भक्षयामि ॥२८॥
*mayi tyadindriyaṁ bṛhanmayi dakṣo mayi kratuḥ ।*
*gharmāstraśugvi rājati virājā jyotiṣā saha brahmaṇā tejasā saha ॥27 ॥*
*payaso reta'ābhṛtaṁ tasya dohamaśī muttarāmuttarāṁsamām ।*
*tviṣaḥ saṁvṛk kratve dakṣasya te suṣumṇasya te suṣumṇāgnihutaḥ ।*
*indrapītasya prajāpatibhakṣitasya madhumata'upahūta'upahūtasya bhakṣayāmi ॥28 ॥*

२०. रुद्रादयः (Rudrādayaḥ) - य. (Yv.)३८.१६

स्वाहा रुद्राय रुद्रहूतये स्वाहा सं ज्योतिषा ज्योतिः। अहः केतुना जुषतां सुज्योतिर्ज्योतिषा स्वाहा। रात्रिः केतुना जुषतां सुज्योतिर्ज्योतिषा स्वाहा।
मधु हुतमिन्द्रतमेऽअग्नावश्याम ते देव घर्म नमस्तेऽअस्तु मा मा हिं सीः ॥१६॥
*svāhā rudrāya rudrahūtaye svāhā saṁ jyotiṣā jyotiḥ । ahaḥ ketunā juṣatāṁ sujyotirjyotiṣā svāhā । rātriḥ ketunā juṣatāṁ sujyotirjyotiṣā svāhā ।*
*madhu hutamindratame'agnāvaśyāma te deva gharma namaste'astu mā mā hiṁ sīḥ ॥16 ॥*

२१. वरुणः (Varuṇaḥ) - य. (Yv.)६.२२

मापो मौषधीर्हिं सीर्धाम्नो धाम्नो राजँस्ततो वरुण नो मुंच ।
यदाहुरघ्न्याऽ इति वरुणेति शपामहे ततो वरुण नो मुंच ।
सुमित्रिया नऽआपऽओषधयः सन्तु दुर्मित्रियास्तस्मै सन्तु योऽस्मान् द्वेष्टि यं च वयं द्विष्मः ॥२२।
*māpo mauṣadhīrhiṁ sīrdhāmno dhāmno rājaṁ̐stato varuṇa no muṁcha ।*
*yadāhuraghnyā' iti varuṇeti śapāmahe tato varuṇa no muṁcha ।*
*sumitriyā na'āpa'Oṣadhayaḥ santu durmitriyāstasmai santu yo'smān dveṣṭi yaṁ cha vayaṁ dviṣmaḥ ॥22 ।*

२२. वाक् (Vāk) - य. (Yv.)३८.५

यस्ते स्तनः शशयो यो मयोभृर्यो रत्नधा वसुविद्यः सुदत्रः ।
यन विश्वा पुष्यसि वार्य्याणि सरस्वति तमिह धातवेऽकः। उर्वन्तरिक्षमन्वेमि ॥५॥
*yaste stanaḥ śaśayo yo mayobhṛryo ratnadhā vasuvidyaḥ sudatraḥ ।*
*yana viśvā puṣyasi vāryyāṇi sarasvati tamiha dhātave'kaḥ ।*
*urvantarikṣamanvemi ॥5 ॥*

२३. वागादयो लिंगोक्ताः (Vāgādayo Liṁgoktāḥ) - य. (Yv.)३९.३

वाचे स्वाहा प्राणाय स्वाहा प्राणाय स्वाहा। चक्षुषे स्वाहा चक्षुषे स्वाहा।

श्रोत्राय स्वाहा श्रोत्राय स्वाहा ॥३॥

*vāche svāhā prāṇāya svāhā prāṇāya svāhā । chakṣuṣe svāhā chakṣuṣe svāhā ।*
*śrotrāya svāhā śrotrāya svāhā ॥3॥*

२४. वातः (Vātaḥ) - य. (Yv.)३८.७

समुद्राय त्वा वाताय स्वहा सरिराय त्वा वाताय स्वाहा ।
अनाधृष्याय त्वा वाताय स्वाहा। अप्रतिधृष्याय त्वा वाताय स्वाहा ।
अवस्यवे त्वा वाताय स्वाहा। अशिमिदाय त्वा वाताय स्वाहा ॥७॥

*samudrāya tvā vātāya svahā sarirāya tvā vātāya svāhā ।*
*anādhṛṣyāya tvā vātāya svāhā । apratidhṛṣyāya tvā vātāya svāhā ।*
*avasyave tvā vātāya svāhā । aśimidāya tvā vātāya svāhā ॥7॥*

२५. वायुः (Vāyuḥ) - य. (Yv.)३८.९

यमाय त्वांगिरस्वते पितृमते स्वाहा। स्वाहा घर्माय स्वाहा घर्मः पित्रे ॥९॥

*yamāya tvāṁgirasvate pitṛmate svāhā । svāhā gharmāya svāhā gharmaḥ pitre ॥9॥*

२६. विद्वांसः (Vidvāṁsaḥ) - य. (Yv.)६.६

परिवीरसि परि त्वा दैवीर्विशो व्ययन्तां परीमं यजमानंरायो मनुष्याणाम् ।
दिवः सूनुरस्येष ते पृथिव्याँल्लोकऽआरण्यस्ते पशुः॥६॥

*parivīrasi pari tvā daivīrviśo vyayantāṁ parīmaṁ yajamānaṁrāyo manuṣyāṇām ।*
*divaḥ sūnurasyeṣa te pṛthivyāṁlloka'āraṇyaste paśuḥ ॥6॥*

२७. विष्णुः (Viṣṇuḥ) - य. (Yv.)६.३

या ते धामान्युश्मसि गमध्यै यत्र गावो भूरिशृंगाऽअयासः। अत्राह तदुरुगायस्य विष्णोः परमं पदमवभारि भूरि।
ब्रह्मवनि त्वा क्षत्रवनि रायस्पोषवनि पर्य्यूहामि।
ब्रह्म दृंह क्षत्रं दृंहायुर्दृंह प्रजां दृं ह ॥३॥

*yā te dhāmānyuśmasi gamadhyai yatra gāvo bhūriśṛṁgā'ayāsaḥ । atrāha*
*tadurugāyasya viṣṇoḥ paramaṁ padamavabhāri bhūri ।*
*brahmavani tvā kṣatravani rāyaspoṣavani paryyūhāmi ।*
*brahma dṛṁha kṣatraṁ dṛṁhāyurdṛṁha prajāṁ dṛṁ ha ॥3॥*

२८. विश्वेदेवाः (Viśvedevāḥ) - य. (Yv.)६.१९

घृतं घृतपावानः पिबत वसां वसापावानः पिबतान्तरिक्षस्य हविरसि स्वाहा। दिशः प्रदिशऽआदिशो
विदिशऽउद्दिशो दिग्भ्यः स्वाहा ॥१९॥

*ghṛtaṁ ghṛtapāvānaḥ pibata vasāṁ vasāpāvānaḥ pibatāntarikṣasya havirasi svāhā ।*
*diśaḥ pradiśa'ādiśo vidiśa'uddiśo digbhyaḥ svāhā ॥19॥*

२९. श्रीः (Śrīḥ) - य. (Yv.)३९.४

मनसः काममाकूतिं वाचः सत्यमशीय।
पशूनांरूपमन्नस्य रसो यशः श्रीः श्रयतां मयि स्वाहा ॥४॥

*manasaḥ kāmamākūtiṁ vāchaḥ satyamaśīya ।*
*paśūnāṁrūpamannasya raso yaśaḥ śrīḥ śrayatāṁ mayi svāhā ॥4॥*

३०. सविता दयः (Savitā Dayaḥ) - य. (Yv.)३९.६

सविता प्रथमेऽहन्नग्निर्द्वितीये वायुम्तृतीयऽआदित्यश्चतुर्थे चन्द्रमाः पंचमऽऋतुः षष्ठे
मरुतः सप्तमे बृहस्पतिरष्टमे। मित्रो नवमे वरुणो दशमऽइन्द्रऽएकादशे विश्वे देवा द्वादशे ॥६॥

*savitā prathame'hannagnirdvitīye vāyumtṛtīya'ādityaśchaturthe chandramāḥ*
*paṁchama'ṛtuḥ ṣaṣṭhe*
*marutaḥ saptame bṛhaspatiraṣṭame । mitro navame varuṇo daśama'indra'ekādaśe*
*viśve devā dvādaśe ॥6॥*

३१. सविता, अश्विनौ, पूषा (Savitā, Aśvinau, Pūṣā) - य. (Yv.)६.९

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बा हुभ्यां पूष्णो हस्ताभ्याम्। अग्नीषोमाभ्यां जुष्टं नियुनज्मि।

अद्भ्यस्त्वौषधीभ्योऽनु त्वा माता मन्यतामनु पितानु भ्राता सगर्भ्योऽनु सखा सयूत्थ्यः। अग्नीषोमाभ्यां त्वा जुष्टं प्रोक्षामि ॥९॥

*devasya tvā savituḥ prasave'śvinorbā hubhyāṁ pūṣṇo hastābhyām / agnīṣomābhyāṁ juṣṭaṁ niyunajmi /*

*adbhyastvauṣadhībhyo'nu tvā mātā manyatāmanu pitānu bhrātā sagarbhyo'nu sakhā sayūtthyaḥ / agnīṣomābhyāṁ tvā juṣṭaṁ prokṣāmi //9 //*

३२. सेनापतिः (Senāpatiḥ) - य. (Yv.)६.२१

समुद्रं गच्छ स्वाहाऽन्तरिक्षं गच्छ स्वाहा देवं सवितारं गच्छ स्वाहा। मित्रावरुणौ गच्छ स्वाहाऽहोरात्रे गच्छ स्वाहा छन्दां सि गच्छ स्वाहा द्यावापृथिवी गच्छ स्वाहा यां गच्छ स्वहा सोमं गच्छ स्वाहा दिव्यं नभो गच्छ स्वाहाग्ंिन वैश्वानरं गच्छ स्वाहा मनो मे हार्द्दि यच्छ दिवं ते धूमो गच्छतु स्वर्ज्योतिः पृथिवीं भस्मनापृण स्वाहा ॥२१॥

*samudraṁ gachchha svāhā'ntarikṣaṁ gachchha svāhā devaṁ savitāraṁ gachchha svāhā / mitrāvaruṇau gachchha svāhā'horātre gachchha svāhā chhandāṁ si gachchha svāhā dyāvāpṛthivī gachchha svāhā yāṁ gachchha svahā somaṁ gachchha svāhā divyaṁ nabho gachchha svāhāgiṁna vaiśvānaraṁ gachchha svāhā mano me hārddi yachchha divaṁ te dhūmo gachchhatu svarjyotiḥ pṛthivīṁ bhasmanāpṛṇa svāhā //21 //*

## २८०. दीर्घतमा औचथ्यः (Dīrghatamā Auchathyaḥ)

१. अग्निः (Agniḥ) - ऋ. (Rv.) १.१४०.१-१३; १.१४१.१-१३; १.१४२.१-४; १.१४३.१-८; १.१४४.१-७; १.१४५.१-५; १.१४६.१-५; १.१४७.१-५; १.१४८.१-५; १.१४९.१-५; १.१५०.१-३; सा. (Sv.) ९७; १७७४-७६

ऋ. (Rv.) १.१४०.१-१३

वेदिषदे प्रियधामाय सुद्युते धासिमिव प्र भरा योनिमग्नये ।
वस्त्रेणेव वासया मन्मना शुचिं ज्योतीरथं शुक्रवर्ण तमोहनम् ॥१॥
अभि द्विजन्मा त्रिवृदन्नमृज्यते संवत्सरे वावृधे जग्धमी पुनः ।
अन्यस्यासा जिह्वया जेन्यो वृषा न्य१न्येन वनिनो मृष्ट वारणः ॥२॥
कृष्णप्रुतौ वेविजे अस्य सक्षिता उभा तरेते अभि मातरा शिशुम् ।
प्राचाजिह्वं ध्वसयन्तं तृषुच्युतमा साच्यं कुपयं वर्धनं पितुः ॥३॥
मुमुक्ष्वो३ मनवे मानवस्यते रघुद्रुवः कृष्णसीतास ऊ जुवः ।
असमना अजिरासो रघुष्यदो वातजूता उप युज्यन्त आशवः ॥४॥
आदस्य ते ध्वसयन्तो वृथेरते कृष्णमभ्वं महि वर्पः करिक्रतः ।
यत्सीं महीमवनिं प्राभि मर्मृशदभिश्वसन्त्स्तनयन्नेति नानदत् ॥५॥
भूषन्न योऽधि बभ्रूषु नम्नते वृषेव पत्नीरभ्येति रोरुवत् ।
ओजायमानस्तन्वश्च शुम्भते भीमो न शृंगा दविधाव दुर्गृभिः ॥६॥
स संस्तिरो विष्टिरः सं गृभायति जानन्नेव जानतीर्नित्य आ शये ।
पुनर्वर्धन्ते अपि यन्ति देव्यमन्यद्वर्पः पित्रोः कृण्वते सचा ॥७॥
तमग्रुवः केशिनीः सं हि रेभिर ऊर्ध्वास्तस्थुर्ममुषीः प्रायवे पुनः ।
तासां जरां प्रमुंवचन्नेति नानददसुं परं जनयंजीवमस्तृतम् ॥८॥
अधीवासं परि मातू रिहन्नह तुविग्रेभिः सत्वभिर्याति वि ज्रयः ।
वयो दधत्पद्वते रेरिहत्सदान श्येनी सचते वर्तनीरह ॥९॥
अस्माकमग्ने मघवत्सु दीदिह्यध श्वसीवान्वृषभो दमूनाः ।
अवास्या शिशुमतीरदीदेर्वर्मेव युत्सु परिजर्भुराणः ॥१०॥
इदमग्ने सुधितं दुर्धितादधि प्रियादु चिन्मन्मनः प्रेयो अस्तु ते ।
यत्ते शुक्रं तन्वो३ रोचते शुचि तेनास्मभ्यं वनसे रत्नमा त्वम् ॥११॥
रथाय नावमुत नो गृहाय नित्यारित्रां पद्वतीं रास्यग्ने ।
अस्माकं वीराँ उत नो मघोनो जनाँश्च या पारयाच्छर्म या च ॥१२॥

अभी नो अग्न उक्थमिज्जुगुर्या द्यावाक्षामा सिन्धवश्च स्वगूर्ताः ।
गव्यं यव्यं यन्तो दीर्घाहेषं वरमरुण्यो वरन्त ॥१३॥
*vediṣade priyadhāmāya sudyute dhāsimiva pra bharā yonimagnaye /*
*vastreṇeva vāsayā manmanā śuchiṁ jyotīrathaṁ śukravarṇa tamohanam //1 //*
*abhi dvijanmā trivṛdannamṛjyate saṁvatsare vāvṛdhe jagdhamī punaḥ /*
*anyasyāsā jihnayā jenyo vṛṣā nya1nyena vanino mṛṣṭa vāraṇaḥ //2 //*
*kṛṣṇaprutau vevije asya sakṣitā ubhā tarete abhi mātarā śiśum /*
*prāchājihnaṁ dhvasayantaṁ tṛṣuchyutamā sāchyaṁ kupayaṁ vardhanaṁ pituḥ //3 //*
*mumukṣavo3 manave mānavasyate raghudruvaḥ kṛṣṇasītāsa ū juvaḥ /*
*asamanā ajirāso raghuṣyado vātajūtā upa yujyanta āśavaḥ //4 //*
*ādasya te dhvasayanto vṛtherate kṛṣṇamabhvaṁ mahi varpaḥ karikrataḥ /*
*yatsīṁ mahīmavaniṁ prābhi marmṛśadabhiśvasantstanayanneti nānadat //5 //*
*bhūṣanna yo'dhi babhrūṣu namnate vṛṣeva patnīrabhyeti roruvat /*
*Ojāyamānastanvaścha śumbhate bhīmo na śṛṁgā davidhāva durgṛbhiḥ //6 //*
*sa saṁstiro viṣṭiraḥ saṁ gṛbhāyati jānanneva jānatīrnitya ā śaye /*
*punarvardhante api yanti devyamanyadvarpaḥ pitroḥ kṛṇvate sachā //7 //*
*tamagruvaḥ keśinīḥ saṁ hi rebhira ūrdhvāstarsthumamruṣīḥ prāyave punaḥ /*
*tāsāṁ jarāṁ pramuṁvachanneti nānadadasuṁ paraṁ janayaṁjīvamastṛtam //8 //*
*adhīvāsaṁ pari mātū rihannaha tuvigrebhiḥ satvabhiryāti vi jrayaḥ /*
*vayo dadhatpadvate rerihatsadāna śyenī sachate vartanīraha //9 //*
*asmākamagne maghavatsu dīdihyadha śvasīvānvṛṣabho damūnāḥ /*
*avāsyā śiśumatīradīdervarmeva yutsu parijarbhurāṇaḥ //10 //*
*idamagne sudhitaṁ durdhitādadhi priyādu chinmanmanaḥ preyo astu te /*
*yatte śukraṁ tanvo3 rochate śuchi tenāsmabhyaṁ vanase ratnamā tvam //11 //*
*rathāya nāvamuta no gṛhāya nityāritrāṁ padvatīṁ rāsyagne /*
*asmākaṁ vīrām̐ uta no maghono janām̐ścha yā pārayāchchharma yā cha //12 //*
*abhī no agna ukthamijjuguryā dyāvākṣāmā sindhavaścha svagūrtāḥ /*
*gavyaṁ yavyaṁ yanto dīrghāheṣaṁ varamaruṇyo varanta //13 //*

ऋ. (Rv.) १.१४१.१-१३

बळित्था तद्वपुषे धायि दर्शतं देवस्य भर्गः सहसो यतो जनि ।
यदीमुप ह्वरते साधते मतिर्ऋतस्य धेना अनयन्त सस्रुतः ॥१॥
पृक्षो वपुः पितुमान्नित्य आ शये द्वितीयमा सप्तशिवासु मातृषु ।
तृतीयमस्य वृषभस्य दोहसे दशप्रमतिं जनयन्त योषणः ॥२॥
निर्यदीं बुध्नान्महिषस्य वर्पस ईशानासः शवसा क्रन्त सूरयः ।
यदीमनु प्रदिवो मध्व आधवे गुहा सन्तं मातरिश्वा मथायति ॥३॥
प्र यत्पितुः परमान्नीयते पर्या पृक्षुधो वीरुधो दंसु रोहति ।
उभा यदस्य जनुषं यदिन्वत आदिद्यविष्ठो अभवद्घृणा शुचिः ॥४॥
आदिन्मातृराविशद्यास्वा शुचिरहिंस्यमान उर्विया वि वावृधे ।
अनु यत्पूर्वा अरुहत्सनाजुवो नि नव्यसीष्ववरासु धावते ॥५॥
आदिद्धोतारं वृणते दिविष्टिषु भगमिव पपृचानास ऋञ्जते ।
देवान्यत्क्रत्वा मज्मना पुरुष्टुतो मर्तं शंसं विश्वधा वेति धायसे ॥६॥
वि यदस्थाद्यजतो वातचोदितो ह्वारो न वक्वा जरणा अनाकृतः ।
तस्य पत्मन्दक्षुषः कृष्णजंहसः शुचिजन्मनो रज आ व्यध्वनः ॥७॥
रथो नयातः शिक्वभिः कृतो द्यामंगेभिररुषेभिरीयते ।
आदस्य ते कृष्णासो दक्षि सूरयः शूरस्येव त्वेषथादीषते वयः ॥८॥
त्वया ह्यग्ने वरुणो धृतव्रतो मित्रः शाशद्रे अर्यमा सुदानवः ।
यत्सीमनु क्रतुना विश्वथा विभुररान्न नेमिः परिभूरजायथाः ॥९॥
त्वमग्ने शशमानाय सुन्वते रत्नं यविष्ठ देवतातिमिन्वसि ।

तं त्वा नु नव्यं सहसो युवन्वयं भगं न कारे महिरत्न धीमहि ॥१०॥
अस्मे रयिं न स्वर्थं दमूनसं भगं दक्षं न पपृचासि धर्णसिम् ।
रश्मींरिव यो यमति जन्मनी उभे देवानां शंसमृत आ च सुक्रतुः ॥११॥
उत नः सुद्योत्मा जीराश्वो होता मन्द्रः शृणवच्चन्द्ररथः ।
स नो नेषन्नेषतमैरमूरोऽग्निर्वामं सुवितं वस्यो अच्छ ॥१२॥
अस्ताव्यग्निः शिमीवद्भिरर्कैः साम्राज्याय प्रतरं दधानः ।
अमी च ये मघवानो वयं च मिहं न सूरो अति निष्टतन्यु ॥१३॥

*baḻitthā tadvapuṣe dhāyi darśataṁ devasya bhargaḥ sahaso yato jani /*
*yadīmupa hnarate sādhate matirṛtasya dhenā anayanta sasrutaḥ //1 //*
*pṛkṣo vapuḥ pitumānnitya ā śaye dvitīyamā saptaśivāsu mātṛṣu /*
*tṛtīyamasya vṛṣabhasya dohase daśapramatiṁ janayanta yoṣaṇaḥ //2 //*
*niryadīṁ budhnānmahiṣasya varpasa īśānāsaḥ śavasā kranta sūrayaḥ /*
*yadīmanu pradivo madhva ādhave guhā santaṁ mātariśvā mathāyati //3 //*
*pra yatpituḥ paramānnīyate paryā pṛkṣudho vīrudho daṁsu rohati /*
*ubhā yadasya januṣaṁ yadinvata ādidyaviṣṭho abhavadghṛṇā śuchiḥ //4 //*
*ādinmātṝrāviśadyāsvā śuchirahismāna urviyā vi vāvṛdhe /*
*anu yatpūrvā aruhatsanājuvo ni navyasīṣvavarāsu dhāvate //5 //*
*ādiddhotāraṁ vṛṇate diviṣṭiṣu bhagamiva papṛchānāsa ṛṁjate /*
*devānyatkratvā majmanā puruṣṭuto marta śaṁsaṁ viśvadhā veti dhāyase //6 //*
*vi yadasthādyajato vātachodito hnāro na vakvā jaraṇā anākṛtaḥ /*
*tasya patmandakṣuṣaḥ kṛṣṇajaṁhasaḥ śuchijanmano raja ā vyadhvanaḥ //7 //*
*ratho nayātaḥ śikvabhiḥ kṛto dyāmaṁgebhiraruṣebhirīyate /*
*ādasya te kṛṣṇāso dakṣi sūrayaḥ śūrasyeva tveṣathādīṣate vayaḥ //8 //*
*tvayā hyagne varuṇo dhṛtavrato mitraḥ śāśadre aryamā sudānavaḥ /*
*yatsīmanu kratunā viśvathā vibhurarānna nemiḥ paribhūrajāyathāḥ //9 //*
*tvamagne śaśamānāya sunvate ratnaṁ yaviṣṭha devatātiminvasi /*
*taṁ tvā nu navyaṁ sahaso yuvanvayaṁ bhagaṁ na kāre mahiratna dhīmahi //10 //*
*asme rayiṁ na svartha damūnasaṁ bhagaṁ dakṣaṁ na papṛchāsi dharṇasim /*
*raśm̐mīriva yo yamati janmanī ubhe devānāṁ śaṁsamṛta ā cha sukratuḥ //11 //*
*uta naḥ sudyotmā jīrāśvo hotā mandraḥ śṛṇavachchandrarathaḥ /*
*sa no neṣanneṣatamairamūro'gnirvāmaṁ suvitaṁ vasyo achchha //12 //*
*astāvyagniḥ śimīvadbhiārarkaiḥ sāmrājyāya prataraṁ dadhānaḥ /*
*amī cha ye maghavāno vayaṁ cha mihaṁ na sūro ati niṣṭatanyu //13 //*

ऋ. (Rv.) १.१४२.१-४

समिद्धो अग्न आ वह देवाँ अद्य यतस्रुचे ।
तन्तुं तनुष्व पूर्व्यं सुतसोमाय दाशुषे ॥१॥
घृतवन्तमुप मासि मधुमन्तं तनूनपात् ।
यां विप्रस्य मावतः शशमानस्य दाशुषः ॥२॥
शुचिः पावको अद्भुतो मध्वा यां मिमिक्षति ।
नराशंसस्त्रिरा दिवो देवो देवेषु यियः ॥३॥
ईळितो अग्न आ वहेन्द्र चित्रमिह प्रियम् ।
इयं हि त्वा मतिर्ममाच्छा सुजिह्व वच्यते ॥४॥

*samiddho agna ā vaha devām̐ adya yatasruche /*
*tantuṁ tanuṣva pūrvya sutasomāya dāśuṣe //1 //*
*ghṛtavantamupa māsi madhumantaṁ tanūnapāt /*
*yāṁ viprasya māvataḥ śaśamānasya dāśuṣaḥ //2 //*
*śuchiḥ pāvako adbhūto madhvā yāṁ mimikṣati /*
*narāśaṁsastrirā divo devo deveṣu yiāyaḥ //3 //*

*īḷito agna ā vahendra chitramiha priyam* ।
*iyaṁ hi tvā matirmamāchchhā sujihna vachyate* ॥4॥

ऋ. (Rv.) १.१४३.१-८

प्र तव्यसीं नव्यसीं धीतिमग्नये वाचो मतिं सहसः सूनवे भरे ।
अपां नपाद्यो वसुभिः सह प्रियो होता पृथिव्यां न्यसीदद्दृत्वियः ॥१॥
स जायमानः परमे व्योमन्याविरग्निरभवन्मातरिश्वने ।
अस्य क्रत्वा समिधानस्य मज्मना प्र द्यावा शोचिः पृथिवी अरोचयत् ॥२॥
अस्य त्वेषा अजरा अस्य भानवः सुसंदृशः सुप्रतीकस्य सुद्युतः ।
भात्वक्षसो अत्यक्तुर्न सिन्धवोऽग्ने रेजन्ते अससन्तो अजराः ॥३॥
यमेरिरे भृगवो विश्ववेदसं नाभा पृथिव्या भुवनस्य मज्मना ।
अग्निं तं गीर्भिर्हिनुहि स्व आ दमे य एको वस्वो वरुणो न राजति ॥४॥
न यो वराय मरुतामिव स्वनः सेनेव सृष्टा दिव्या यथाशनिः ।
अग्निर्जम्भैस्तिगितैरत्ति भर्वति योधो न शत्रून्त्स वना न्यृंजते ॥५॥
कुविन्नो अग्निरुचथस्य वीरसद्वसुष्कुविद्वसुभिः काममावरत् ।
चोदः कुवित्तुतुज्यात्सातये धियः शुचिप्रतीकं तमया धिया गृणे ॥६॥
घृतप्रतीकं व ऋतस्य धूर्षदमग्निं मित्रं न समिधान ऋंजते ।
इन्धानो अक्रो विदथेषु दीद्यच्छुक्रवर्णामुदु नो यंसते धियम् ॥७॥
अप्रयुच्छन्नप्रयुच्छद्भिरग्ने शिवेभिर्नः पायुभिः पाहि शग्मैः ।
अदब्धेभिरदृपितेभिरिष्टेऽनिमिषद्भिः परि पाहि नो जाः ॥८॥

*pra tavyasīṁ navyasīṁ dhītimagnaye vācho matiṁ sahasaḥ sūnave bhare* ।
*apāṁ napādyo vasubhiḥ saha priyo hotā pṛthivyāṁ nyasīdadṛtviyaḥ* ॥1॥
*sa jāyamānaḥ parame vyomanyāviragnirabhavanmātariśvane* ।
*asya kratvā samidhānasya majmanā pra dyāvā śochiḥ pṛthivī arochayat* ॥2॥
*asya tveṣā ajarā asya bhānavaḥ susaṁdṛśaḥ supratīkasya sudyutaḥ* ।
*bhātvakṣaso atyakturna sindhavo'gne rejante asasanto ajarāḥ* ॥3॥
*yamerire bhṛgavo viśvavedasaṁ nābhā pṛthivyā bhuvanasya majmanā* ।
*agniṁ taṁ gīrbhirhinuhi sva ā dame ya eko vasvo varuṇo na rājati* ॥4॥
*na yo varāya marutāmiva svanaḥ seneva sṛṣṭā divyā yathāśaniḥ* ।
*agnirjambhaistigitairatti bharvati yodho na śatrūntsa vanā nyṛṁjate* ॥5॥
*kuvinno agniruchathasya vīrasadvasuṣkuvidvasubhiḥ kāmamāvarat* ।
*chodaḥ kuvittutujyātsātaye dhiyaḥ śuchipratīkaṁ tamayā dhiyā gṛṇe* ॥6॥
*ghṛtapratīkaṁ va ṛtasya dhūrṣadamagniṁ mitraṁ na samidhāna ṛṁjate* ।
*indhāno akro vidatheṣu dīdyachchhukravarṇāmudu no yaṁsate dhiyam* ॥7॥
*aprayuchchhannaprayuchchhadbhiragne śivebhirnaḥ pāyubhiḥ pāhi śagmaiḥ* ।
*adabdhebhiradṛpitebhiriṣṭe'nimiṣadbhiḥ pari pāhi no jāḥ* ॥8॥

ऋ. (Rv.) १.१४४.१-७

एति प्र होता व्रतमस्य माययोर्ध्वां दधानः शुचिपेशसं धियम् ।
अभि स्रुचः क्रमते दक्षिणावृतो या अस्य धाम प्रथमं ह निंसते ॥१॥
अभीमृतस्य दोहना अनूषत योनौ देवस्य सदने परीवृताः ।
अपामुपस्थे विभृतो यदावसदध स्वधा अधयद्याभिरीयते ॥२॥
युयूषतः सवयसा तदिद्वपुः समानमर्थं वितरित्रता मिथः ।
आदीं भगो न हव्यः समस्मदा वोळहुर्न रश्मीन्त्समयंस्त सारथिः ॥३॥
यमीं द्वा सवयसा सपर्यतः समाने योना मिथुना समोकसा ।
दिवा न नक्तं पलितो युवाजनि पुरू चरन्नजरो मानुषा युगा ॥४॥
तमं हिन्वन्ति धीतयो दश व्रिशो देवं मर्तास ऊतये हवामहे ।
धनोरधि प्रवत आ स ऋण्वत्यभिव्रजद्भिर्वयुना नवाधित ॥५॥
त्वं ह्यग्ने दिव्यस्य राजसि त्वं पार्थिवस्य पशुपा इव त्मना ।

एनी त एते बृहती अभिश्रिया हिरण्ययी वक्करी बर्हिराशाते ॥६॥
अग्ने जुषस्व प्रति हर्य तद्वचो मन्द्र स्वधाव ऋतजात सुक्रतो ।
यो विश्वतः प्रत्यङ्ङसि दर्शतो रण्वः संदृष्टौ पितुमाँ इव क्षयः ॥७॥
*eti pra hotā vratamasya māyayordhvā dadhānaḥ śuchipeśasaṁ dhiyam /*
*abhi sruchaḥ kramate dakṣiṇāvṛto yā asya dhāma prathamaṁ ha niṁsate //1 //*
*abhīmṛtasya dohanā anūṣata yonau devasya sadane parīvṛtāḥ /*
*apāmusthe vibhṛto yadāvasadadha svadhā adhayadyābhirīyate //2 //*
*yuyūṣataḥ savayasā tadidvapuḥ samānamartha vitaritratā mithaḥ /*
*ādīṁ bhago na havyaḥ samasmadā voḷahurna raśmīntsamayaṁsta sārathiḥ //3 //*
*yamīṁ dvā savayasā saparyataḥ samāne yonā mithunā samokasā /*
*divā na naktaṁ palito yuvājani purū charannajaro mānuṣā yugā //4 //*
*tamaṁ hinvanti dhītayo daśa vriśo devaṁ martāsa ūtaye havāmahe /*
*dhanoradhi pravata ā sa ṛṇvatyabhivrajadbhirvayunā navādhita //5 //*
*tvaṁ hyagne divyasya rājasi tvaṁ pārthivasya paśupā iva tmanā /*
*enī ta ete bṛhatī abhiśriyā hiraṇyayī vakvarī barhirāśāte //6 //*
*agne juṣasva prati harya tadvacho mandra svadhāva ṛtajāta sukrato /*
*yo viśvataḥ pratyaṁṅsi darśato raṇvaḥ saṁdṛṣṭau pitumāṁ̐ iva kṣayaḥ //7 //*

ऋ. (Rv.) १.१४५.१-५

तं पृच्छता स जगामा स वेद स चिकित्वाँ ईयते सा न्वीयते ।
तस्मिन्त्सन्ति प्रशिषस्तस्मिन्निष्टयः स वाजस्य शवसः शुष्मिणस्पतिः ॥१॥
तमित्पृच्छन्ति न सिमो वि पृच्छति स्वेनेव धीरो मनसा यदग्रभीत् ।
न मृष्यते प्रथमं नापरं वचोऽस्य क्रत्वा सचते अप्रदृपितः ॥२॥
तमिद् गच्छन्ति जुह्व१ स्तमर्वतीर्विश्वान्येकः श्रृणवद्वचांसि मे ।
पुरुप्रैषस्ततुरिर्यासाधनोऽच्छिद्रोतिः शिशुरादत्त सं रभः ॥३॥
उपस्थायं चरति यत्समारत सद्यो जातस्तत्सार युज्येभिः ।
अभि श्वान्तं मृशते नान्द्ये मुदे यदीं गच्छन्त्युशतीरपिष्ठितम् ॥४॥
स ई मृगो अप्यो वनर्गुरुप त्वच्युपमस्यां नि धायि ।
व्यब्रवीद्वयुना मर्त्येभ्योऽग्निर्विद्वाँ ऋतचिद्धि सत्यः ॥५॥
*taṁ pṛchchhatā sa jagāmā sa veda sa chikitvāṁ̐ īyate sā nvīyate /*
*tasmintsanti praśiṣastasminniṣṭayaḥ sa vājasya śavasaḥ śuṣmiṇaspatiḥ //1 //*
*tamitpṛchchhanti na simo vi pṛchchhati sveneva dhīro manasā yadagrabhīt /*
*na mṛṣyate prathamaṁ nāparaṁ vacho'sya kratvā sachate apradṛpitaḥ //2 //*
*tamid gachchhanti juhna1 stamarvatīrviśvānyekaḥ śṛṇavadvachāṁsi me /*
*purupraiṣastaturiryāsādhano'chchhidrotiḥ śiśurādatta saṁ rabhaḥ //3 //*
*upasthāyaṁ charati yatsamārata sadyo jātastatsāra yujyebhiḥ /*
*abhi śvāntaṁ mṛśate nāndye mude yadīṁ gachchhantyuśatīrapiṣṭhitam //4 //*
*sa ī mṛgo apyo vanargurupa tvachyupamasyāṁ ni dhāyi /*
*vyabravīdvayunā martyebhyo'gnirvidvāṁ̐ ṛtachiddhi satyaḥ //5 //*

ऋ. (Rv.) १.१४६.१-५

त्रिमूर्धानं सप्तरश्मिं गृणीषेऽनूनमग्निं पित्रोरुपस्थे ।
निषत्तमस्य चरतो ध्रुवस्य विश्वा दिवो रोचनापप्रिवांसम् ॥१॥
उक्षा महाँ अभि ववक्ष एने अजरस्तथावितऊतिऋष्वः ।
उर्व्याः पदो नि दधाति सानौ रिहन्त्यूधो अरुषासो अस्य ॥२॥
समानं वत्समभि संचरन्ती विष्वग्धेनु वि चरतः सुमेके ।
अनपवृज्याँ अध्वनो मिमाने विश्वान्केताँ अधि महो दधाने ॥३॥
धीरासः पदं कवयो नयन्ति नाना हृदा रक्षमाणा अजुर्यम् ।
सिषासन्तः पर्यपश्यन्त सिन्धुमाविरेभ्यो अभवत्सूर्यो नॄन् ॥४॥
दिदृक्षेण्यः परि काष्ठासु जेन्य ईळेन्यो महो अर्भाय जीवसे ।

मुरुत्रा यदभवत्सूरहैभ्यो गर्भेभ्यो मघवा विश्वदर्शतः ॥५॥

*trimūrdhānaṁ saptariśmma gṛṇīṣe'nūnamagimna pitreārupasthe /*
*niṣattamasya charato dhruvasya viśvā divo rochanāpaprivāṁsam //1 //*
*ukṣā mahām̐ abhi vavakṣa ene ajarastathāvitaūtirṛṣvaḥ /*
*uvyāḥ pado ni dadhāti sānau rihantyūdho aruṣāso asya //2 //*
*samānaṁ vatsamabhi saṁcharantī viśvagdhenu vi charataḥ sumeke /*
*anapavṛjyām̐ adhvano mimāne viśvānketām̐ adhi maho dadhāne //3 //*
*dhīrāsaḥ padaṁ kavayo nayanti nānā hṛdā rakṣamāṇā ajuryam /*
*siṣāsantaḥ paryapaśyanta sindhumāvirebhyo abhavatsūryo nṝn //4 //*
*didṛkṣeṇyaḥ pari kāṣṭhāsu jenya īḷenyo maho arbhāya jīvase /*
*murutrā yadabhavatsūrahaibhyo garbhebhyo maghavā viśvadarśataḥ //5 //*

ऋ. (Rv.) १.१४७.१-५

कथा ते अग्ने शुचयन्त आयोर्ददाशुर्वाजेभिराशुषाणाः ।
उभे यत्तोके तनये दधाना ऋतस्य सामन् रण्यन्त देवाः ॥१॥
बोधा मे अस्य वचसो यविष्ठ मंहिष्ठस्य प्रभृतस्य स्वधावः ।
पीयति त्वो अनु त्वो गृणाति वन्दारुस्ते तन्वं वन्दे अग्ने ॥२॥
ये पायवो मामतेयं ते अग्ने पश्यन्तो अन्धं दुरितादरक्षन् ।
ररक्ष तान्त्सुकृतो विश्ववेदा दिप्सन्त इद्रिपवो नाह देभुः ॥३॥
यो नो अग्ने अररिवाँ अघायुररातीवा मर्चयति द्वयेन ।
मन्त्रो गुरुः पुनरस्तु सो अस्मा अनु मृक्षीष्ट तन्वं दुरुक्तैः ॥४॥
उत वा यः सहस्य प्रविद्वान्मर्तो मर्त मर्चयति द्वयेन ।
अतः पाहि स्तवमान स्तुवन्तमग्ने माकिर्नो दुरिताय धायीः ॥५॥

*kathā te agne śuchayanta āyordadāśurvājobhirāśuṣāṇāḥ /*
*ubhe yattoke tanaye dadhānā ṛtasya sāman raṇyanta devāḥ //1 //*
*bodhā me asya vachaso yaviṣṭha maṁhiṣṭhasya prabhṛtasya svadhāvaḥ /*
*pīyati tvo anu tvo gṛṇāti vandāruste tanvaṁ vande agne //2 //*
*ye pāyavo māmateyaṁ te agne paśyanto andhaṁ duritādarakṣan /*
*rarakṣa tāntsukṛto viśvavedā dipsanta idripavo nāha debhuḥ //3 //*
*yo no agne ararivām̐ aghāyurarātīvā marchayati dvayena /*
*mantro guruḥ punarastu so asmā anu mṛkṣīṣṭa tanvaṁ duruktaiḥ //4 //*
*uta vā yaḥ sahasya pravidvānmarto marta marchayati dvayena /*
*ataḥ pāhi stavamāna stuvantamagne mākirno duritāya dhāyīḥ //5 //*

ऋ. (Rv.) १.१४८.१-५

मथीद्यदीं विष्टो मातरिश्वा होतारं विश्वाप्सुं विश्वदेव्यम् ।
नि यं दधुर्मनुष्यासु विक्षु स्वर्ण चित्रं वपुषे विभावम् ॥१॥
ददानमिन्न ददभन्त मन्माग्निर्वरूथं मम तस्य चाकन् ।
जुषन्त विश्वान्यस्य कर्मोपस्तुतिं भरमाणस्य कारोः ॥२॥
नित्ये चिन्नु यं सदने जगृभ्रे प्रशस्तिभिर्दधिरे यियासः ।
प्र सू नयन्त गृभयन्त इष्टावश्वासो न रथ्यो रारहाणाः ॥३॥
पुरूणि दस्मो नि रिणाति जम्भैराद्रोचते वन आ विभावा ।
आदस्य वातो अनु वाति शोचिरस्तुर्न शर्यामसनामनु द्यून् ॥४॥
न यं रिपवो न रिषण्यवो गर्भे सन्तं रेषणा रेषयन्ति ।
अन्धा अपश्या न दभन्नभिख्या नित्यास ई प्रेतारो अरक्षन् ॥५॥

*mathīdyadīṁ viṣṭo mātariśvā hotāraṁ viśvāpsuṁ viśvadevyam /*
*ni yaṁ dadhurmanuṣyāsu vikṣu sva1rṇa chitraṁ vapuṣe vibhāvam //1 //*
*dadānaminna dadabhanta manmāgnirvarūthaṁ mama tasya chākan /*
*juṣanta viśvānyasya karmopastutiṁ bharamāṇasya kāroḥ //2 //*
*nitye chinnu yaṁ sadane jagṛbhre praśastibhirdadhire yiāyāsaḥ /*

*pra sū nayanta gṛbhayanta iṣṭāvaśvaso na rathyo rārahāṇāḥ //3 //*
*purūṇi dasmo ni riṇāti jambhairādrochate vana ā vibhāvā /*
*ādasya vāto anu vāti śochirasturna śaryāmasanāmanu dyūn //4 //*
*na yaṁ ripavo na riṣaṇyavo garbhe santaṁ reṣaṇā reṣayanti /*
*andhā apaśyā na dabhannabhikhyā nityāsa ī pretāro arakṣan //5 //*

ऋ. (Rv.) १.१४९.१-५

महः स राय एषते पतिर्दन्निन इनस्य वसुनः पद आ। उप ध्रजन्तमद्रयो विधन्नित् ॥१॥
स यो वृषा नरां न रोदस्योः श्रवोभिरस्ति जीवपीतसर्गः। प्र यः सस्राणः शिश्रीत योनौ ॥२॥
आ यः पुरं नार्मिणीमदीदेदत्यः कविर्नभन्यो३ नार्वा। सूरो न रुरुक्वांछतात्मा ॥३॥
अभि द्विजन्मा त्री रोचनानि विश्वा रजांसि शुशुचानो अस्थात्। होता यजिष्ठो अपां सधस्थे।४।
अयं स होता यो द्विजन्मा विश्वा दधे वार्याणि श्रवस्या। मर्तो यो अस्मै सुतुको ददाश ॥५॥

*mahaḥ sa rāya eṣate patirdannina inasya vasunaḥ pada ā / upa dhrajantamadrayo vidhannit //1 //*
*sa yo vṛṣā narāṁ na rodasyoḥ śravobhirasti jīvapītasargaḥ / pra yaḥ sasrāṇaḥ śiśrīta yonau //2 //*
*ā yaḥ puraṁ nārmiṇīmadīdedatyaḥ kavirnabhanyo3 nārvā / sūro na rurukvāṁchhatātmā //3 //*
*abhi dvijanmā trī rochanāni viśvā rajāṁsi śuśuchāno asthāt / hotā yajiṣṭho apāṁ sadhasthe /4 /*
*ayaṁ sa hotā yo dvijanmā viśvā dadhe vāryāṇi śravasyā / marto yo asmai sutuko dadāśa //5 //*

ऋ. (Rv.) १.१५०.१-३

पुरु त्वा दाश्वन्वोचेऽरिरग्ने तव स्विदा। तोदस्येव शरण आ महस्य ॥१॥
व्यनिनस्य धनिनः प्रहोषे चिदररुषः। कदा चन प्रजिगतो अदेवयोः ॥२॥
स चन्द्रो विप्र मर्त्यो महो व्राधन्तमो दिवि। प्रप्रेत्ते अग्ने वनुषः स्याम ॥३॥

*puru tvā dāśvanvoche'riragne tava svidā / todasyeva śaraṇa ā mahasya //1 //*
*vyaninasya dhaninaḥ prahoṣe chidararuṣaḥ / kadā chana prajigato adevayoḥ //2 //*
*sa chandro vipra martyo maho vrādhantamo divi / praprette agne vanuṣaḥ syāma //3 //*

सा. (Sv.) ९७

पुरु त्वा दाशिवाँ वोचेऽरिरग्ने तव स्विदा। तोदस्येव शरण आ महस्य ॥१॥

*puru tvā dāśivāṁ voche'riragne tava svidā / todasyeva śaraṇa ā mahasya //1 //*

सा. (Sv.) १७७४-१७७६

आ यः पुरं नार्मिणीमदीदेदत्यः कविर्नभन्यो३ नार्वा। सूरो न रुरुक्वां छतात्मा ॥१॥
अभि द्विजन्मा त्री रोचनानि विश्वा रजांसि शशुचानो अस्थात्। होता यजिष्ठो अपां सधस्थे।२।
अयं स होता यो द्विजन्मा विश्वा दधे वार्याणि श्रवस्या। मर्तो यो अस्मै सुतुको ददाश ॥३॥

*ā yaḥ puraṁ nārmiṇīmadīdedatyaḥ kavirnabhanyo3 nārvā / sūro na rurukvāṁ chhatātmā //1 //*
*abhi dvijanmā trī rochanāni viśvā rajāṁsi śaśuchāno asthāt / hotā yajiṣṭho apāṁ sadhasthe /2 /*
*ayaṁ sa hotā yo dvijanmā viśvā dadhe vāryāṇi śravasyā / marto yo asmai sutuko dadāśa //3 //*

२. अग्निः (Agniḥ) सूर्यो वायुश्च - ऋ. (Rv.) १.१६४.४४

त्रयः केशिन ऋतुथा वि चक्षते संवत्सरे वपत एक एषाम् ।
विश्वमेको अभि चष्टे शचीभिर्ध्राजिरेकस्य ददृशे न रूपम् ॥४४॥

*trayaḥ keśina ṛtuthā vi chakṣate saṁvatsare vapata eka eṣām /*
*viśvameko abhi chaṣṭe śachībhirdhrājirekasya dadṛśe na rūpam //44 //*

३. अश्वोऽग्निः (Aśvo'gniḥ) - ऋ. (Rv.) १.१६३.१-१३

यदक्रन्दः प्रथमं जायमान उद्यन्त्समुद्रादुत वां पुरीषात् ।
श्येनस्य पक्षा हरिणस्य वाहू उपस्तुत्यं महि जातं ते अर्वन् ॥१॥
यमन दत्तं त्रित एनमायुनगिन्द्र एणं प्रथमो अध्यतिष्ठत् ।
गन्धर्वो अस्य रशनामगृभ्णात्सूरादश्वं वसवो निरतष्ट ॥२॥
असि यमो अस्यादित्यो अर्वन्नसि त्रितो गुह्येन व्रतेन ।
असि सोमेन समया विपृक्त आहुस्ते त्रीणि दिवि बन्धनानि ॥३॥
त्रीणि त आहुर्दिवि बन्धनानि त्रीण्यप्सु त्रीण्यन्तः समुद्रे ।
उतेव मे वरुणश्छन्त्स्यर्वन्यत्रा त आहुः परमं जनित्रम् ॥४॥
इमा ते वाजिन्नवमार्जनानीमा शफानां सनितुर्निधाना ।
अत्रा ते भद्रा रशना अपश्यमृतस्य या अभिरक्षन्ति गोपाः ॥५॥
आत्मानं ते मनसारादजानामवो दिवा पतयन्तं पतंगम् ।
शिरो अपश्यं पथिभिः सुगेभिररेणुभिर्जेहमानं पतत्रि ॥६॥
अत्रा ते रूपमुत्तममपश्यं जिगीषमाणमिष आ पदे गोः ।
यदा ते मर्तो अनु भोगमानळादिद्ग्रसिष्ठ ओषधीरजीगः ॥७॥
अनु त्वा रथो अनु मर्यो अर्वन्ननु गावोऽनु भगः कनीनाम् ।
अनु व्रातासस्तव सख्यमीयुरनु देवा ममिरे वीर्यं ते ॥८॥
हिरण्यश्रृंगोऽयो अस्य पादा मनोजवा अवर इन्द्र आसीत् ।
देवा इदस्य हविरद्यमायन्यो अर्वन्तं प्रथमो अध्यतिष्ठत् ॥९॥
ईर्मान्तासः सिलिकमध्यमासः सं शूरणासो दिव्यासो अत्याः ।
हंसाइव श्रेणिशो यतन्ते यदाक्षिषुर्दिव्यमज्ममश्वाः ॥१०॥
तव शरीरं पतयिष्ण्वर्वन्तव चित्तं वातइव ध्रजीमान ।
तव श्रृंगाणि विष्ठिता पुरुत्रारण्येषु जर्भुराणा चरन्ति ॥११॥
उप प्रागाच्छसनं वाज्यर्वा देवद्रीचा मनसा दीध्यानः ।
अजः पुरो नीयते नाभिरस्यानु पश्चात्कवयो यन्ति रेभाः ।१२॥
उप प्रागात्परमं यत्सधस्थमर्वाँ अच्छा पितरं मातरं च ।
अद्या देवांजुष्टतमो हि गम्या अथा शास्ते दाशुषे वार्याणि ॥१३॥

*yadakrandaḥ prathamaṁ jāyamāna udyantsamudrāduta vāṁ purīṣāt /*
*śyenasya pakṣā hariṇasya vāhū upastutyaṁ mahi jātaṁ te arvan //1 //*
*yamana dattaṁ trita enamāyunagindra eṇaṁ prathamo adhyatiṣṭhat /*
*gandharvo asya raśanāmagṛbhṇātsūrādaśvaṁ vasavo niratașṭa //2 //*
*asi yamo asyādityo arvannasi trito guhyena vratena /*
*asi somena samayā vipṛkta āhuste trīṇi divi bandhanāni //3 //*
*trīṇi ta āhurdivi bandhanāni trīṇyapsu trīṇyantaḥ samudre /*
*uteva me varuṇaśchhantsyarvanyatrā ta āhuḥ paramaṁ janitram //4 //*
*imā te vājinnavamārjanānīmā śaphānāṁ saniturnidhānā /*
*atrā te bhadrā raśanā apaśyamṛtasya yā abhirakṣanti gopāḥ //5 //*
*ātmānaṁ te manasārādajānāmavo divā patayantaṁ pataṁgam /*
*śiro apaśyaṁ pathibhiḥ sugebhirareṇubhirjehamānaṁ patatri //6 //*
*atrā te rūpamuttamamapaśyaṁ jigīṣamāṇamiṣa ā pade goḥ /*
*yadā te marto anu bhogamānaḷādidgrasiṣṭha Oṣadhīrajīgaḥ //7 //*
*anu tvā ratho anu maryo arvannanu gāvo'nu bhagaḥ kanīnām /*
*anu vrātāsastava sakhyamīyuranu devā mamire vīrya te //8 //*
*hiraṇyaśṛṁgo'yo asya pādā manojavā avara indra āsīt /*
*devā idasya haviradyamāyanyo arvantaṁ prathamo adhyatiṣṭhat //9 //*
*īrmāntāsaḥ silikamadhyamāsaḥ saṁ śūraṇāso divyāso atyāḥ /*
*haṁsāiva śreṇiśo yatante yadākṣiṣurdivyamajmamaśvāḥ //10 //*

*tava śarīraṁ patayiṣṇvarvantava chittaṁ vātaiva dhrajīmāna* ।
*tava śṛṅgāṇi viṣṭhitā purutrāraṇyeṣu jarbhurāṇā charanti* ॥11॥
*upa prāgāchchhasanaṁ vājyarvā devadrīchā manasā dīdhyānaḥ* ।
*ajaḥ puro nīyate nābhirasyānu paśchātkavayo yanti rebhāḥ* ॥12॥
*upa prāgātparamaṁ yatsadhasthamarvāṁ achchhā pitaraṁ mātaraṁ cha* ।
*adyā devāṁjuṣṭatamo hi gamyā athā śāste dāśuṣe vāryāṇi* ॥13॥

४. अश्विनौ (Aśvinau) - सा. (Sv.) १७५८-१७६०

अबोध्यग्निर्ज्म उदेति सूर्यो व्यू३षाश्चन्दा मह्यावो अर्चिषा ।
आयुक्षातामश्विना यातवे रथं प्रासावीद्देवः सविता जगत्पृथक् ॥१॥
युद्युंजाथे वृषणमिश्वना रथं घृतेन नो मधुना क्षत्रमुक्षतम् ।
अस्माकं ब्रह्म पृतनासु जिन्वतं वयं धना शूरसाता भजेमहि ॥२॥
अर्वाङ् त्रिचक्रो मधुवाहनो रथे जीराश्वो अश्विनोर्यातु सुष्टुतः ।
त्रिबन्धुरो मघवा विश्वसौभगः शं न आ वक्षद्विपदे चतुष्पदे ॥३॥
*abodhyagnirjma udeti sūryo vyū3ṣāśchandā mahyāvo archiṣā* ।
*āyukṣātāmaśvinā yātave rathaṁ prāsāvīddevaḥ savitā jagatpṛthak* ॥1॥
*yudyuṁjāthe vṛṣaṇamiśvanā rathaṁ ghṛtena no madhunā kṣatramukṣatam* ।
*asmākaṁ brahma pṛtanāsu jinvataṁ vayaṁ dhanā śūrasātā bhajemahi* ॥2॥
*arvāṅ trichakro madhuvāhano rathe jīrāśvo aśvinoryātu suṣṭutaḥ* ।
*tribandhuro maghavā viśvasaubhagaḥ śaṁ na ā vakṣadvipade chatuṣpade* ॥3॥

५. आपः (Āpaḥ) - ऋ. (Rv.) १.१६४.४२

तस्याः समुद्रा अधि वि क्षरन्ति तेन जीवन्ति प्रदिशश्चतस्रः ।
ततः क्षरत्यक्षरं तद्विश्वमुप जीवति ॥४२॥
*tasyāḥ samudrā adhi vi kṣaranti tena jīvanti pradiśaśchatasraḥ* ।
*tataḥ kṣaratyakṣaraṁ tadviśvamupa jīvati* ॥42॥

६. इन्द्रः (Indraḥ) - ऋ. (Rv.) १.१४२.१३

स्वाहाकृतान्या गह्युप हव्यानि वीतये। इन्द्रा गहि श्रुधी हवं त्वां हवन्ते अध्वरे ॥१३॥
*svāhākṛtānyā gahyupa havyāni vītaye । indrā gahi śrudhī havaṁ tvāṁ havante adhvare* ॥13॥

७. उषासा-नक्ता (Uṣāsā-Naktā) - ऋ. (Rv.) १.१४२.७

आ भन्दमाने उपाके नक्तोषासा सुपेशसा। यह्वी ऋतस्य मातरा सीदतां बर्हिरा सुमत् ॥७॥
*ā bhandamāne upāke naktoṣāsā supeśasā । yahnī ṛtasya mātarā sīdatāṁ barhirā sumat* ॥7॥

८. ऋभवः (Ṛbhavaḥ) - ऋ. (Rv.) १.१६१.१-१४

किमु श्रेष्ठः किं यविष्ठो न आजगन्किमीयते दूत्यं१ कद्यदूचिम् ।
न निन्दिम चमसं यो महाकुलोऽग्ने भ्रातर्द्रुण इद्भूतिमूदिम ॥१॥
एकं चमसं चतुरः कृणोतन तद्वो देवा अब्रुवन्तद्व आगमम् ।
सौधन्वना यद्येवा करिष्यथ साकं देवैर्यज्ञियासो भविष्यथ ॥२॥
अग्निं दूतं प्रति यदब्रवीतनाश्वः कर्त्वो रथ उतेह कर्त्वः ।
धेनुः कर्त्वा युवशा कर्त्वा द्वा तानि भ्रातरनु वः कृत्वयेमसि ॥३॥
चकृवांस ऋभवस्तदपृच्छत क्वेदभूद्यः स्य दूतो न आजगन् ।
यदावाख्यच्चमसांचतुरः कृतानादित्त्वष्टा ग्नास्वन्तनर्यानजे ॥४॥
हनामैनाँ इति त्वष्टा यदब्रवीच्चमसं ये देवपानमनिन्दिषुः ।
अन्या नामानि कृण्वते सुते सचाँ अन्यैरेनान्कन्या३ नामभिः स्परत् ॥५॥
इन्द्रो हरी युयुजे अश्विना रथं बृहस्पतिर्विश्वरूपामुपाजत ।
ऋभुर्विभ्वा वाजो देवाँ अगच्छत स्वपसो यियं भगमैतन ॥६॥
निर्श्चमणो गामरिणीत धीतिभिर्या जरन्ता युवशा ताकृणोतन ।

सौधन्वा अश्वादश्वमतक्षत युक्त्वा रथमुप देवाँ अयातन ॥७॥
इदमुदकं पिबतेत्यब्रवीतनेदं वा घा पिबता मुंजनेजनम् ।
सौधन्वना यदि तन्नेव हर्यथ तृतीय घा सवने मादयाध्वै ॥८॥
आपो भूयिष्ठा इत्येको अब्रवीदग्निर्भूयिष्ठ इत्यन्यो अब्रवीत् ।
वधर्यन्तीं बहुभ्यः प्रैको अब्रवीदृता वदन्तश्चमसाँ अपिंशत ॥९॥
श्रोणामेक उदकं गामवाजति मांसमेकः पिंशति सूनयाभृतम् ।
आ निम्रुचः शकृदेको अपाभरत्किं स्वित्पुत्रेभ्यः पितरा उपावतुः ॥१०॥
उद्वत्स्वस्मा अकृणोतना गृहे तदद्येदमृभवो नानु गच्छथ ॥११॥
सम्मील्य यद्भुवना पर्यसर्पत क्व स्वित्तात्या पितरा व आसतुः ।
अशपतः यः करस्नं व आददे यः प्राब्रवीत्प्रो तस्मा अब्रवीतन ॥१२॥
सुषुप्वांस ऋभवस्तदपृच्छतागोह्य क इदं नो अबूबुधत् ।
श्वानं बस्तो बोधयितारमब्रवीत्संवत्सर इदमद्या व्यख्यत ॥१३॥
दिवा यान्ति मरुतो भूम्याग्निरयं वातो अन्तरिक्षेण याति ।
अद्भिर्याति वरुणः समुद्रैर्युष्माँ इच्छन्तः शवसो नपातः ॥१४॥

*kimu śreṣṭhaḥ kiṁ yaviṣṭho na ājagankimīyate dūtyaṁ1 kadyadūchim /*
*na nindima chamasaṁ yo mahākulo'gne bhrātardruṇa idbhūtimūdima //1 //*
*ekaṁ chamasaṁ chaturaḥ kṛṇotana tadvo devā abruvantadva āgamam /*
*saudhanvanā yadyevā kariṣyatha sākaṁ devairyiāyāso bhaviṣyatha //2 //*
*agniṁ dūtaṁ prati yadabravītanāśvaḥ kartvo ratha uteha kartvaḥ /*
*dhenuḥ kartvā yuvaśā kartvā dvā tāni bhrātaranu vaḥ kṛtvayemasi //3 //*
*chakṛvāṁsa ṛbhavastadapṛchchhata kvedabhūdyaḥ sya dūto na ājagan /*
*yadāvākhyachchamasāṁchaturaḥ kṛtānādittvaṣṭā gnāsvantanaryānaje //4 //*
*hanāmainām̐ iti tvaṣṭā yadabravīchchamasaṁ ye devapānamanindiṣuḥ /*
*anyā nāmāni kṛṇvate sute sachām̐ anyairenānkanyā3 nāmabhiḥ sparat //5 //*
*indro harī yayuje aśvinā rathaṁ bṛhaspatirviśvarūpāmupājata /*
*ṛbhurvibhvā vājo devām̐ agachchhata svapaso yiāyaṁ bhagamaitana //6 //*
*nirśchamaṇo gāmariṇīta dhītibhiryā jarantā yuvaśā tākṛṇotana /*
*saudhanvā aśvādaśvamatakṣata yuktvā rathamupa devām̐ ayātana //7 //*
*idamudakaṁ pibatetyabravītanedaṁ vā ghā pibatā muṁjanejanam /*
*saudhanvanā yadi tanneva haryatha tṛtīya ghā savane mādayādhvai //8 //*
*āpo bhūyiṣṭhā ityeko abravīdagnirbhūyiṣṭha ityanyo abravīt /*
*vadharyantīṁ bahubhyaḥ praiko abravīdṛtā vadantaśchamasām̐ apiṁśata //9 //*
*śroṇāmeka udakaṁ gāmavājati māṁsamekaḥ piṁśati sūnayābhṛtam /*
*ā nimruchaḥ śakṛdeko apābharatiṁka svitputrebhyaḥ pitarā upāvatuḥ //10 //*
*udvatsvasmā akṛṇotanā gṛhe tadadyedamṛbhavo nānu gachchhatha //11 //*
*sammīlya yadbhuvanā paryasarpata kva svittātyā pitarā va āsatuḥ /*
*aśapataḥ yaḥ karasnaṁ va ādade yaḥ prābravītpro tasmā abravītana //12 //*
*suṣupvāṁsa ṛbhavastadapṛchchhatāgohya ka idaṁ no abūbudhat /*
*śvānaṁ basto bodhāyitāramabravītsaṁvatsara idamadyā vyakhyata //13 //*
*divā yānti maruto bhūmyāgnirayaṁ vāto antarikṣeṇa yāti /*
*adbhiryāti varuṇaḥ samudrairyuṣmām̐ ichchhantaḥ śavaso napātaḥ //14 //*

९. त्वष्टा (Tvaṣṭā) - ऋ. (Rv.) १.१४२.१०

तन्नस्तुरीपमद्भुतं पुरु वारं पुरु त्मना। त्वष्टा पोषाय वि ष्यतु राये नाभा नो अस्मयुः ॥१०॥
*tannasturīpamadbhutaṁ puru vāraṁ puru tmanā / tvaṣṭā poṣāya vi ṣyatu rāye nābhā no asmayuḥ //10 //*

१०. देव्यो द्वारः (Devyo Dvāraḥ) - ऋ. (Rv.) १.१४२.६

वि श्रयन्तामृतावृधः प्रयै देवेभ्यो महीः। पावकासः पुरुस्पृहो द्वारो देवीरसश्चतः ॥६॥
*vi śrayantāmṛtāvṛdhaḥ prayai devebhyo mahīḥ / pāvakāsaḥ puruspṛho dvāro*

*devīrasaśchataḥ //6 //*

११. देव्यौ होतारौ (Devyau Hotārau) - ऋ. (Rv.) १.१४२.८

मन्द्रजिह्वा जुगुर्वणी होतारा दैव्या कवी। यां नो यक्षतामिमं सिध्रमद्य दिविस्पृशम्॥८॥

*mandrajihnā jugurvaṇī hotārā daivyā kavī / yāṁ no yakṣatāmimaṁ sidhramadya divispṛśam //8 //*

१२. द्यावापृथिव्यौ (Dyāvāpṛthivyau) - ऋ. (Rv.) १.१५९.१-५; १.१६०.१-५

ऋ. (Rv.) १.१५९.१-५

प्र द्यावा यौः पृथिवी ऋतावृधा मही स्तुषे विदथेषु प्रचेतसा ।
देवेभिर्ये देवपुत्रे सुदंससेत्था धिया वार्याणि प्रभूषतः ॥१॥
उत मन्ये पितुरद्रुहो मनो मातुर्महि स्वतवस्तद्धवीमभिः ।
सुरेतसा पितरा भूम चक्रतुरुरु प्रजाया अमृतं वरीमभिः ॥२॥
ते सूनवः स्वपसः सुदंससो मही जार्मातरा पूर्वचित्तये ।
स्थातुश्च सत्यं जगतश्च धर्मणि पुत्रस्य पाथः पदमद्वयाविनः ॥३॥
ते मायिनो ममिरे सुप्रचेतसो जामी सयोनी मिथुना समोकसा ।
नव्यंनव्यं तन्तुमा तन्वते दिवि समुद्रे अन्तः कवयः सुदीतयः ॥४॥
तद्राधो अद्य सवितुर्वरेण्यं वयं देवस्य प्रसवे मनामहे ।
अस्मभ्यं द्यावापृथिवी सुचेतुना रयिं धत्तं वसुमन्तं शतग्विनम् ॥५॥

*pra dyāvā yauḥ pṛthivī ṛtāvṛdhā mahī stuṣe vidatheṣu prachetasā /*
*devebhirye devaputre sudaṁsasetthā dhiyā vāryāṇi prabhūṣataḥ //1 //*
*uta manye pituradruho mano māturmahi svatavastaddhavīmabhiḥ /*
*suretasā pitarā bhūma chakraturuuru prajāyā amṛtaṁ varīmabhiḥ //2 //*
*te sūnavaḥ svapasaḥ sudaṁsaso mahī jārmātarā pūrvachittaye /*
*sthātuścha satyaṁ jagataścha dharmaṇi putrasya pāthaḥ padamadvayāvinaḥ //3 //*
*te māyino mamire suprachetaso jāmī sayonī mithunā samokasā /*
*navyaṁnavyaṁ tantumā tanvate divi samudre antaḥ kavayaḥ sudītayaḥ //4 //*
*tadrādho adya saviturvareṇyaṁ vayaṁ devasya prasave manāmahe /*
*asmabhyaṁ dyāvāpṛthivī suchetunā rayiṁ dhattaṁ vasumantaṁ śatagvinam //5 //*

ऋ. (Rv.) १.१६०.१-५

ते हि द्यावापृथिवी विश्वशंभुव ऋतावरी रजसो धारयत्कवी ।
सुजन्मनी धिषणे अन्तरीयते देवी देवी धर्मणा सूर्यः शुचिः ॥१॥
उरुव्यचसा महिनी असश्चता पिता माता च भुवनानि रक्षतः ।
सुधृष्टमे वपुष्ये३ न रोदसी पिता यत्सीमभि रूपैरवासयत् ॥२॥
स वह्निः पुत्रः पित्रोः पवित्रवान्पुनाति धीरो भुवनानि मायया ।
धेनुं च पृश्निं वृषभं सुरेतसं विश्वाहा शुक्रं पयो अस्य दुक्षत ॥३॥
अयं देवानामपसामपस्तमो यो जजान रोदसी विश्वशंभुवा ।
वि यो ममे रजसी सुक्रतूययाजरेभिः स्कम्भनेभि समानृचे ॥४॥
ते नो गृणाने महिनी महि श्रवः क्षत्रं द्यावापृथिवी धासथो बृहत् ।
येनाभि कृष्टीस्ततनाम विश्वहा पनाय्यमोजो अस्मे समिन्वतम् ॥५॥

*te hi dyāvāpṛthivī viśvaśaṁbhuva ṛtāvarī rajaso dhārayatkavī /*
*sujanmanī dhiṣaṇe antarīyate devī devī dharmaṇā sūryaḥ śuchiḥ //1 //*
*uruvyachasā mahinī asaśchatā pitā mātā cha bhuvanāni rakṣataḥ /*
*sṛdhṛṣṭame vapuṣye3 na rodasī pitā yatsīmabhi rūpairavāsayat //2 //*
*sa vahniḥ putraḥ pitroḥ pavitravānpunāti dhīro bhuvanāni māyayā /*
*dhenuṁ cha pṛśiṁna vṛṣabhaṁ suretasaṁ viśvāhā śukraṁ payo asya dukṣata //3 //*
*ayaṁ devānāmapasāmapastamo yo jajāna rodasī viśvaśaṁbhuvā /*
*vi yo mame rajasī sukratūyayājarebhiḥ skambhanebhi samānṛche //4 //*
*te no gṛṇāne mahinī mahi śravaḥ kṣatraṁ dyāvāpṛthivī dhāsatho bṛhat /*

*yenābhi kṛṣṭīstatanāma viśvahā panāyyamojo asme saminvatam* ॥5॥

१३. बर्हिः (Barhiḥ) - ऋ. (Rv.) १.१४२.५

स्तृणानासो यतस्रुचो बर्हिर्यो स्वध्वरे। वृंजे देवव्यचस्तममिन्द्राय शर्म सप्रथः ॥५॥
*stṛṇānāso yatasrucho barhiryo svadhvare । vṛṁje devavyachastamamindrāya śarma saprathaḥ* ॥5॥

१४. मित्रादयो लिंगोक्ता (Mitrādayo Liṁgoktā) - ऋ. (Rv.) १.१६२.१-२२

मा नो मित्रो वरुणो अर्यमायुरिन्द्र ऋभुक्षा मरुतः परि ख्यन् ।
यद्वाजिनो देवजातस्य सप्तेः प्रवक्ष्यामो विदथे वीर्याणि ॥१॥
यन्निर्णिजा रेक्णसा पावृतस्य रातिं गृभीतां मुखतो नयन्ति ।
सुप्राङ्गो मेम्यद्विश्वरूप इन्द्रापूष्णोः प्रियमप्येति पाथः ॥२॥
एष च्छागः पुरो अश्वेन वाजिना पूष्णो भागो नीयते विश्वदेव्यः ।
अभिप्रियं यत्पुरोळाशमर्वता त्वष्टेदेनं सौश्रवसाय जिन्वति ॥३॥
यद्धविष्यमृतुशो देवयानं त्रिर्मानुषाः पर्यश्वं नयन्ति ।
अत्रा पूष्णः प्रथमो भाग इति यां देवेभ्यः प्रतिवेदयन्नजः ॥४॥
होताध्वर्युरावया अग्निमिन्धो ग्रावग्राभ उत शंस्ता सुविप्रः ।
तेन योन स्वरंकृतेन स्विष्टेन वक्षणा आ पृणध्वम् ॥५॥
यूपव्रस्का उत ये यूपवाहाश्चषालं ये अश्वयूपाय तक्षति ।
ये चार्वते पचनं सम्भरन्त्युतो तेषमभिगूर्तिर्न इन्वतु ॥६॥
उप प्रागात्सुमन्मेऽधायि मन्म देवानामाशा उप वीतपृष्ठः ।
अन्वेनं विप्रा ऋषयो मदन्ति देवानां पुष्टे चकृमा सुबन्धुम् ॥७॥
यद्वाजिनो दाम सन्दानमर्वतो या शीर्षण्या रशना रज्जुरस्य ।
यद्वा घास्य प्रभृतमास्ये३ तृणं सर्वा ता ते अपि देवेष्वस्तु ॥८॥
यदश्वस्य क्रविषो मक्षिकाश यद्वा स्वरौ स्वधितौ रिप्तमस्ति ।
यद्धस्तयोः शमितुर्यन्नखेषु सर्वा ता ते अपि देवेष्वस्तु ॥९॥
यद्धवध्यमुदरस्यापवाति य आमस्य क्रविषो गन्धो अस्ति ।
सुकृता तच्छमितारः कृण्वन्तूत मेधं श्रृतपाकं पचन्तु ॥१०॥
यत्ते गत्रादग्निना पच्यमानादभि शूलं निहतस्यावधावति ।
मा तद्भूम्यामा श्रिषन्मा तृणेषु देवेभ्यस्तदुशद्भ्यो रातमस्तु ॥११॥
ये वाजिनं परिपश्यन्ति पक्कं य ईमाहुः सुरभिर्निर्हरेति ।
ये चार्वतो मांसभिक्षामुपासत उतो तेषामभिगूर्तिर्न इन्वतु ॥१२॥
यन्नीक्षणं मांस्पचन्या उखाया या पात्राणि यूष्ण आसेचनानि ।
ऊष्मण्यापिधाना चरूणामंकाः सूनाः परि भूषन्त्यश्वम् ॥१३॥
निक्रमणं निषदनं विवर्तनं यच्च पड्बीशमर्वतः ।
यच्च पपौ यच्च घासिं जघास सर्वा ता ते अपि देवेष्वस्तु ॥१४॥
मा त्वाग्निर्ध्वनयीद्धूमगन्धिर्मोखा भ्राजन्त्यभि विक्त जघ्रिः ।
इष्टं वीतमभिगूर्तं वषट्कृतं तं देवासः प्रति गृभ्णन्त्यश्वम् ॥१५॥
यदश्वाय वास उपस्तृणन्त्यधीवासं या हिरण्यान्यस्मै ।
सन्दानमर्वन्तं पड्बीशं प्रिया देवेष्वा यामयन्ति ॥१६॥
यत्ते सादे महसा शूकृतस्य पार्ष्ण्या वा कश्या वा तुतोद ।
स्रुचेव ता हविषो अध्वरेषु सर्वा ता ते ब्रह्मणा सूदयामि ॥१७॥
चतुस्त्रिंशद्वाजिनो देवबन्धोर्वङ्क्रीरश्वस्य स्वधितिः समेति ।
अच्छिद्रा गात्रा वयुना कृणोत परुष्परुरनुघुष्या वि शस्त ॥१८॥
एकस्त्वष्टुरश्वस्या विशस्ता द्वा यन्तारा भवतस्तथ ऋतुः ।
या ते गात्राणामृतुथा कृणोमि ताता पिण्डानां प्र जुहोम्यग्नौ ॥१९॥
मा त्वा तपत्प्रिय आत्मापियन्तं मा स्वधितिस्तन्व१ आ तिष्ठिपत्ते ।
मा ते गृध्नुरविशस्तातिहाय छिद्रा गात्रण्यसिना मिथू कः ॥२०॥

न वा उ एतन्म्रियसे न रिष्यसि देवाँ इदेषि पथिभिः सुगेभिः ।
हरी ते युंजा पृषती अभूतामुपास्थाद्वाजी धुरि रासभस्य ॥२१॥
सुगव्यं नो वाजी स्वश्व्यं पुंसः पुत्राँ उत विश्वापुषं रयिम् ।
अनागास्त्वं नो अदितिः कृणोतु क्षत्रं नो अश्वे वनतां हविष्मान् ॥२२॥

*mā no mitro varuṇo aryamāyurindra ṛbhukṣā marutaḥ pari khyan /*
*yadvājino devajātasya sapteḥ pravakṣayāmo vidathe vīryāṇi //1 //*
*yannirṇijā rekṇasā pāvṛtasya rātiṁ gṛbhītāṁ mukhato nayanti /*
*suprāñjo memyadviśvarūpa indrāpūṣṇoḥ priyamapyeti pāthaḥ //2 //*
*eṣa chchhāgaḥ puro aśvena vājinā pūṣṇo bhāgo nīyate viśvadevyaḥ /*
*abhipriyaṁ yatpuroḷāśamarvatā tvaṣṭedenaṁ sauśravasāya jinvati //3 //*
*yaddhaviṣyamṛtuśo devayānaṁ trirmānuṣāḥ paryaśvaṁ nayanti /*
*atrā pūṣṇaḥ prathamo bhāga iti yāṁ devebhyaḥ prativedayannajaḥ //4 //*
*hotādhvaryurāvayā agnimindho grāvagrābha uta śaṁstā suvigraḥ /*
*tena yona svaraṁkṛtena sviṣṭena vakṣaṇā ā pṛṇadhvam //5 //*
*yūpavraskā uta ye yūpavāhāśchaṣālaṁ ye aśvayūpāya takṣati /*
*ye chārvate pachanaṁ sambharantyuto teṣamabhigūrtirna invatu //6 //*
*upa prāgātsumanme'dhāyi manma devānāmāśā upa vītapṛṣṭhaḥ /*
*anvenaṁ viprā ṛṣayo madanti devānāṁ puṣṭe chakṛmā subandhum //7 //*
*yadvājino dāma sandānamarvato yā śīrṣaṇyā raśanā rajjurasya /*
*yadvā ghāsya prabhṛtamāsye3 tṛṇaṁ sarvā tā te api deveṣvastu //8 //*
*yadaśvasya kraviṣo makṣikāśa yadvā svarau svadhitau riptamasti /*
*yaddhastayoḥ śamituryannakheṣu sarvā tā te api deveṣvastu //9 //*
*yaddhavadhyamudarasyāpavāti ya āmasya kraviṣo gandho asti /*
*sukṛtā tachchhamitāraḥ kṛṇvantūta medhaṁ śṛtapākaṁ pachantu //10 //*
*yatte gatrādagninā pachyamānādabhi śūlaṁ nihatasyāvadhāvati /*
*mā tadbhūmyāmā śriṣanmā tṛṇeṣu devebhyastaduśadbhyo rātamastu //11 //*
*ye vājinaṁ paripaśyanti pakvaṁ ya īmāhuḥ surabhirnirhareti /*
*ye chārvato māṁsabhikṣāmupāsata uto teṣāmabhigūrtirna invatu //12 //*
*yannīkṣaṇaṁ māṁspachanyā ukhāyā yā pātrāṇi yūṣṇa āsechanāni /*
*ūṣmaṇyāpidhānā charūṇāmaṁkāḥ sūnāḥ pari bhūṣantyaśvam //13 //*
*nikramaṇaṁ niṣadanaṁ vivartanaṁ yachcha paḍbīśamarvataḥ /*
*yachcha papau yachcha ghāsiṁ jaghāsa sarvā tā te api deveṣvastu //14 //*
*mā tvāgnirdhvanayīddhūmagandhirmokhā bhrājantyabhi vikta jaghriḥ /*
*iṣṭaṁ vītamabhigūrta vaṣaṭkṛtaṁ taṁ devāsaḥ prati gṛbhṇantyaśvam //15 //*
*yadaśvāya vāsa upastṛṇantyadhīvāsaṁ yā hiraṇyānyasmai /*
*sandānamarvantaṁ paḍbīśaṁ priyā deveṣvā yāmayanti //16 //*
*yatte sāde mahasā śūkṛtasya pārṣṇyā vā kaśyā vā tutoda /*
*srucheva tā haviṣo adhvareṣu sarvā tā te brahmaṇā sūdayāmi //17 //*
*chatustriṁśadvājino devabandhervaṅkrīraśvasya svadhitiḥ sameti /*
*achchhidrā gātrā vayunā kṛṇota paruṣparuranughuṣyā vi śasta //18 //*
*ekastvaṣṭuraśvasyā viśastā dvā yantārā bhavatastatha ṛtuḥ /*
*yā te gātrāṇāmṛtuthā kṛṇomi tātā piṇḍānāṁ pra juhomyagnau //19 //*
*mā tvā tapatpriya ātmāpiyantaṁ mā svadhitistanva1 ā tiṣṭhipatte /*
*mā te gṛdhnuraviśastātihāya chhidrā gātraṇyasinā mithū kaḥ //20 //*
*na vā u etanmriyase na riṣyasi devāṁ̐ ideṣi pathibhiḥ sugebhiḥ /*
*harī te yuṁjā pṛṣatī abhūtāmupāsthādvājī dhuri rāsabhasya //21 //*
*sugavyaṁ no vājī svaśvyaṁ puṁsaḥ putrāṁ̐ uta viśvāpuṣaṁ rayim /*
*anāgāstvaṁ no aditiḥ kṛṇotu kṣatraṁ no aśve vanatāṁ haviṣmān //22 //*

१५. मित्रावरुणौ (Mitrāvaruṇau) - ऋ. (Rv.) १.१५१.१-९; १.१५२.१-७; १.१५३.१-४

ऋ. (Rv.) १.१५१.१-९

मित्रं न यं शिम्या गोषु गव्यवः स्वाध्यो विदथे अप्सु जीजनन् ।
अरेजेतां रोदसी पाजसा गिरा प्रति प्रियं यजतं जनुषामव ॥१॥
यद्ध त्यद्वां पुरुमीळ्हस्य सोमिनः प्र मित्रासो न दधिरे स्वाभुवः ।
अध क्रतुं विदतं गातुमर्चत उत श्रुतं वृषणा पस्त्यावतः ॥२॥
आ वां भूषन्क्षितयो जन्म रोदस्योः प्रवाच्यं वृषणा दक्षसे महे ।
यदीमृताय भरथो यदर्वते प्र होत्रया शिम्या वीथो अध्वरम् ॥३॥
प्र सा क्षितिरसुर या महि प्रिया ऋतावानावृतमा घोषथो बृहत् ।
युवं दिवो बृहतो दक्षमाभुवं गां न धुर्युप युंजाथे अपः ॥४॥
मही अत्र महिना वारमृण्वथोऽरेणवस्तुज आ सद्मन्धेनवः ।
स्वरन्ति ता उपरताति सूर्यमा निम्रुच उषसस्तक्ववीरिव ॥५॥
आ वामृताय केशिनीरनूषत मित्र यत्र वरुण गातुमर्चथः ।
अव त्मना सृजतं पिन्वतं धियो युवं विप्रस्य मन्मनामिरज्यथः ॥६॥
यो वां योः शशमानो ह दाशति कविर्होता यजति मन्मसाधनः ।
उपाह तं गच्छथो वीथो अध्वरमच्छा गिरः सुमतिं गन्तमस्मयू ॥७॥
युवां यौः प्रथमा गोभिरंजत ऋतावाना मनसो न प्रयुक्तिषु ।
भरन्ति वां मन्मना संयता गिरोऽदृप्यता मनसा रेवदाशाथे ॥८॥
रेवद्वयो दधाथे रेवदाशाथे नरा मायाभिरितऊति महिनम् ।
न वां द्यावोऽहभिर्नोत सिन्धवो न देवत्वं पणयो नानशुर्मघम् ॥९॥

*mitraṁ na yaṁ śimyā goṣu gavyavaḥ svādhyo vidathe apsu jījanan |*
*arejetāṁ rodasī pājasāā girā prati priyaṁ yajataṁ januṣāmava ||1||*
*yaddha tyadvāṁ purumīḻahasya sominaḥ pra mitrāso na dadhire svābhuvaḥ |*
*adha kratuṁ vidataṁ gātumarchata uta śrutaṁ vṛṣaṇā pastyāvataḥ ||2||*
*ā vāṁ bhūṣankṣitayo janma rodasyoḥ pravāchyaṁ vṛṣaṇā dakṣase mahe |*
*yadīmṛtāya bharatho yadavrate pra hotrayā śimyā vītho adhvaram ||3||*
*pra sā kṣitirasura yā mahi priyā ṛtāvānāvṛtamā ghoṣatho bṛhat |*
*yuvaṁ divo bṛhato dakṣamābhuvaṁ gāṁ na dhuryupa yuṁjāthe apaḥ ||4||*
*mahī atra mahinā vāramṛṇvatho'reṇavastuja ā sadmandhenavaḥ |*
*svaranti tā uparatāti sūryamā nimrucha uṣasastakvavīriva ||5||*
*ā vāmṛtāya keśinīranūṣata mitra yatra varuṇa gātumarchathaḥ |*
*ava tmanā sṛjataṁ pinvataṁ dhiyo yuvaṁ viprasya manamanāmirajyathaḥ ||6||*
*yo vāṁ yoḥ śaśamāno ha dāśati kavirhotā yajati manmasādhanaḥ |*
*upāha taṁ gachchhatho vītho adhvaramachchhā giraḥ sumatiṁ gantamasmayū ||7||*
*yuvāṁ yauḥ prathamā gobhiraṁjata ṛtāvānā manaso na prayuktiṣu |*
*bharanti vāṁ manmanā saṁyatā giro'dṛpyatā manasā revadāśāthe ||8||*
*revadvayo dadhāthe revadāśāthe narā māyābhiritaūti mahinam |*
*na vāṁ dyāvo'habhirnota sindhavo na devatvaṁ paṇayo nānaśurmagham ||9||*

ऋ. (Rv.) १.१५२.१-७

युवं वस्त्राणि पीवसा वसाथे युवोरच्छिद्रा मन्तवो ह सर्गाः ।
अवातिरतमनृतानि विश्व ऋतेन मित्रावरुणा सचेथे ॥१॥
एतच्चन त्वो वि चिकेतदेषां सत्यो मन्त्रः कविशस्त ऋघावान् ।
त्रिरश्रिं हन्ति चतुरश्रिरुग्रो देवनिदो ह प्रथमा अजूर्यन् ॥२॥
अपादेति प्रथमा पद्वतीनां कस्तद्वां मित्रावरुणा चिकेत ।
गर्भो भारं भरत्या चिदस्य ऋतं पिपर्त्यनृतं नि तारीत् ॥३॥
प्रयन्तमित्परि जारं कनीनां पश्यामसि नोपनिपद्यमानम् ।
अनवपृग्णा वितता वसानं प्रियं मित्रस्य वरुणस्य धाम ॥४॥

अनश्वे जातो अनभीशुरर्वा कनिक्रदत्पतयदूर्ध्वसानुः ।
अचित्तं ब्रह्म जुजुषुर्युवानः प्र मित्रे धाम वरुणे गृणन्तः ॥५॥
आ धेनवो मामतेयमवन्तीर्ब्रह्मप्रियं पीपयन्त्ससिमन्नूधन् ।
पित्वो भिक्षेत वयुनानि विद्वानासाविवासन्नदितिमुरुष्येत् ॥६॥
आ वां मित्रावरुणा हव्यजुष्टिं नमसा देवाववसा ववृत्याम् ।
अस्माकं ब्रह्म पृतनासु सह्या अस्माकं वृष्टिर्दिव्या सुपारा ॥७॥
*yuvaṁ vastrāṇi pīvasā vasāthe yuvorachchhidrā mantavo ha sargāḥ /*
*avātiratamanṛtāni viśva ṛtena mitrāvaruṇā sachethe //1 //*
*etachchana tvo vi chiketadeṣāṁ satyo mantraḥ kaviśasta ṛghāvān /*
*triraśriṁ hanti chaturaśrirugro devanido ha prathamā ajūryan //2 //*
*apādeti prathamā padvatīnāṁ kastadvāṁ mitrāvaruṇā chiketa /*
*garbho bhāraṁ bharatyā chidasya ṛtaṁ pipartyanṛtaṁ ni tārīt //3 //*
*prayantamitpari jāraṁ kanīnāṁ paśyāmasi nopanipadyamānam /*
*anavapṛgṇā vitatā vasānaṁ priyaṁ mitrasya varuṇasya dhāma //4 //*
*anaśve jāto anabhīśurarvā kanikradatpatayadūrdhvasānuḥ /*
*achittaṁ brahma jujuṣuryuvānaḥ pra mitre dhāma varuṇe gṛṇantaḥ //5 //*
*ā dhenavo māmateyamavantīrbrahmapriyaṁ pīpayantsasimannūdhan /*
*pitvo bhikṣeta vayunāni vidvānāsāvivāsannaditimuruṣyet //6 //*
*ā vāṁ mitrāvaruṇā havyajuṣṭiṁ namasā devāvavasā vavṛtyām /*
*asmākaṁ brahma pṛtanāsu sahyā asmākaṁ vṛṣṭirdivyā supārā //7 //*

ऋ. (Rv.) १.१५३.१-४

यजामहे वां महः सजोषा हव्येभिर्मित्रावरुणा नमोभिः ।
घृतैर्घृतस्नू अध यद्वामस्मे अध्वर्यवो न धीतिभिर्भरन्ति ॥१॥
प्रस्तुतिर्वा धाम न प्रयुत्तिरयामि मित्रावरुणा सुवृक्तिः ।
अनक्ति यद्वां विदथेषु होता सुम्नं वां सूरिर्वृषणावियक्षन् ॥२॥
पीपाय धेनुरदितिऋर्तय जनाय मित्रावरुणा हविर्दे ।
हिनोति यद्वां विदथे सपर्यन्त्स रातहव्यो मानुषो न होता ॥३॥
उत वां विक्षु मद्यास्वन्धो गाव आपश्च पीपयन्त देवीः ।
उतो नो अस्य पूर्व्यः पतिर्दन्वीतं पातं पयस उस्रियायाः ॥४॥
*yajāmahe vāṁ mahaḥ sajoṣā havyebhirmitrāvaruṇā namobhiḥ /*
*ghṛtairghṛtasnū adha yadvāmasme adhvaryavo na dhītibhirbharanti //1 //*
*prastutirvā dhāma na prayuttirayāmi mitrāvaruṇā suvṛktiḥ /*
*anakti yadvāṁ vidatheṣu hotā sumnaṁ vāṁ sūrirvṛṣaṇāviyakṣan //2 //*
*pīpāya dhenuraditirṛtāya janāya mitrāvaruṇā havirde /*
*hinoti yadvāṁ vidathe saparyantsa rātahavyo mānuṣo na hotā //3 //*
*uta vāṁ vikṣu madyāsvandho gāva āpaścha pīpayanta devīḥ /*
*uto no asya pūrvyaḥ patirdanvītaṁ pātaṁ payasa usriyāyāḥ //4 //*

१६. वनस्पतिः (Vanaspatiḥ) - ऋ. (Rv.) १.१४२.११

अवसृजन्नुप त्मना देवान्यक्षि वनस्पते। अग्निर्हव्या सुषूदति देवो देवेषु मेधिरः ॥११॥
*avasujannupa tmanā devānyakṣi vanaspate / agnirhavyā suṣūdati devo deveṣu medhiraḥ //11 //*

१७. वाक् (Vāk) - ऋ. (Rv.) १.१६४.४२; ४५

ऋ. (Rv.) १.१६४.४२

तस्याः समुद्रा अधि वि क्षरन्ति तेन जीवन्ति प्रदिशश्चतस्रः ।
ततः क्षरत्यक्षरं तद्विश्वमुप जीवति ॥४२॥
*tasyāḥ samudrā adhi vi kṣaranti tena jīvanti pradiśaśchatasraḥ /*
*tataḥ kṣaratyakṣaraṁ tadviśvamupa jīvati //42 //*

ऋ. (Rv.) १.१६४.४५

चत्वारि वाक्परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः ।
गुहा त्रीणि निहिता नेंगयन्ति तुरीयं वाचो मनुष्या वदन्ति ॥४५॥
*chatvāri vākparimitā padāni tāni vidurbrāhmaṇā ye manīṣiṇaḥ /*
*guhā trīṇi nihitā neṁgayanti turīyaṁ vācho manuṣyā vadanti //45 //*

१८. विश्वेदेवाः (Viśvedevāḥ) - ऋ. (Rv.) १.१६४.१-४१

अस्य वामस्य पलितस्य होतुस्तस्य भ्राता मध्यमो अस्त्यश्नः ।
तृतीयो भ्राता घृतपृष्ठो अस्यात्रापश्यं विश्पति सप्तपुत्रम् ॥१॥
सप्त युंजन्ति रथमेकचक्रमेको अश्वो वहति सप्तनामा ।
त्रिनाभि चक्रमजरमनर्व यत्रेमा विश्व भुवनाधि तस्थुः ॥२॥
इमं रथमधि ये सप्त तस्थुः सप्तचक्रं सप्त वहन्त्यश्वः ।
सप्त स्वसारो अभि सं नवन्ते यत्र गवां निहिता सप्त नाम ॥३॥
को ददर्श प्रथमं जायमानमस्थन्वन्तं यदनस्था बिभर्ति ।
भूम्या असुरसृगात्मा क्व स्वित्को विद्वांसुप गात्प्रष्टुमेतत् ॥४॥
पाकः पृच्छामि मनसाविजानन्देवानामेना निहिता पदानि ।
वत्से बष्कयेऽधिं सप्त तन्तून्वि तत्निरे कवय ओतवा उ ॥५॥
अचिकित्विांचतुषश्चिदत्र कवीन्पृच्छामि विद्मने न विद्वान् ।
वि यस्तस्तम्भ षळिमा रजांस्यजस्य रूपे किमपि स्विदकम् ॥६॥
इह ब्रवीतु य ईमंग वेदास्य वामस्य निहितं पदं वेः ।
शीर्ष्णः क्षीरं दुह्रते गावो अस्य वव्रिं वसाना उदकं पदापुः ॥७॥
माता पितरमृत आ बभज धीत्यग्रे मनसा सं हि जग्मे ।
सा बीभत्सुर्गर्भरसा निविद्धा नमस्वन्त इदुपवाकमीयुः ॥८॥
युक्ता मातासीद्धुरि दक्षिणाया अतिष्ठद्गर्भो वृजनीष्वन्तः ।
अमीमेद्वत्सो अनु गामपश्यद्विश्वरूप्यं त्रिषु योजनेषु ॥९॥
तिस्रो मातृस्त्रीन्पितृन्बिभ्रदेक ऊर्ध्वस्तस्थौ नेमव ग्लापयन्ति ।
मन्त्रयन्ते दिवो अमुष्य पृष्ठे विश्वविदं वाचमविश्वमिन्वाम् ॥१०॥
द्वादशारं नहि तज्जराय वर्वर्ति चक्रं परि द्यामृतस्य ।
आ पुत्रा अग्ने मिथुनासो अत्र सप्त शतानि विंशतिश्च तस्थुः ॥११॥
पंचपादं पितरं द्वादशाकृतिं दिव आहुः परे अर्धे पुरीषिणम् ।
अथेमे अन्य उपरे विचक्षणं दिव आहुः परे अर्धे पुरीषिणम् ।
अथेमे अन्य उपरे विचक्षणं सप्तचक्रे षळर आहुरर्पितम् ॥१२॥
पंचारे चक्रे परिवर्तमाने तस्मिन्ना तस्थुर्भुवनानि विश्वा ।
तस्य नाक्षस्तप्यते भूरिभारः सुनादेव न शीर्यते सनाभिः ॥१३॥
सनेमि चक्रमजरं वि वावृत उत्तानायां दश युक्ता वहन्ति ।
सूर्यस्य चक्षू रजसैत्यावृतं तस्मिन्नार्पिता भुवनानि विश्वा ॥१४॥
साकंजानां सप्तथमाहुरेकजं षळिद्यमा ऋषयो देवजा इति।
तेषामिष्टानि विहितानि धामशः स्थात्रे रेजन्ते विकृतानि रूपशः ॥१५॥
स्त्रियः सतीस्ताँ उ मे पुंस आहुः पश्यदक्षण्वान्न वि चेतदन्धः ।
कविर्यः पुत्रः स ईमा चिकेत यस्ता विजानात्स पितुष्पितासत् ॥१६॥
अवः परेण पर एनावरेण पदा वत्सं बिभ्रती गौरुदस्थात् ।
सा कद्रीची कं स्विदर्ध स्विदर्ध परागात्क स्वित्सूते नहि यूथे अन्तः ॥१७॥
अवः परेण पितरं यो अस्यानुवेद पर एनावरेण ।
कवीयमानः क इह प्र वोचद्देवं कुतो अधि प्रजातम् ॥१८॥
ये अर्वांचस्ताँ उ पराच आहुर्ये परांचस्ताँ उ अर्वाच आहुः ।
इन्द्रश्च या चक्रथुः सोम तानि धुरा न युक्ता रजसो वहन्ति ॥१९॥
द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परि षस्वजाते ।

तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभि चाकशीति ॥२०॥
यत्रा सुपर्णा अमृतस्य भागमनिमेषं विदथाभिस्वरन्ति ।
इनो विश्वस्य भुवनस्य गोपाः स मा धीरः पाकमत्रा विवेश ॥२१॥
यस्मिन्वृक्षे मध्वदः सुपुर्णा निविशन्ते सुवते चाधि विश्वे ।
तस्येदाहुः पिप्पलं स्वाद्वग्रे तन्नोन्नशद्यः पितरं न वेद ॥२२॥
यद्गायत्रे अधि गायत्रमाहितं त्रैष्टुभाद्वा त्रैष्टुभं निरतक्षत ।
यद्वा जगज्जगत्याहितं पदं य इत्तद्विदुस्ते अमृतत्वमानशुः ॥२३॥
गायत्रेण प्रति मिमीते अर्कमर्केण साम त्रैष्टुभेन वाकम् ।
वाकेन वाकं द्विपदा चतुष्पदाक्षरेण मिमते सप्त वाणीः ॥२४॥
जगता सिन्धुं दिव्यस्तभायद्रथन्तरे सूर्य पर्यपश्यत् ।
गायत्रस्य समिधस्तिस्र आहुस्ततो मह्वा प्र रिरिचे महित्वा ॥२५॥
उप ह्वये सुदुघां धेनुमेतां सुहस्तो गोधुगुत दोहदेनाम् ।
श्रेष्ठं सवं सविता साविषन्नोऽभीद्धो घर्मस्तदु षु प्र वोचम् ॥२६॥
हिङ्कृण्वती वसुपत्नी वसूनां वत्समिच्छन्ती मनसाभ्यागात् ।
दुहामश्विभ्यां पयो अघ्न्येयं सा वर्धतां महते सौभगाय ॥२७॥
गौरमीमेदनु वत्सं मिषन्तं मूर्धानं हिङ्ङकृणोन्मातवा उ ।
सृक्वाणं घर्ममभि वावशाना मिमाति मायुं पयते पयोभिः ॥२८॥
अयं स शिङ्क्ते येन गौरभीवृता मिमाति मायुं ध्वसनावधि श्रिता ।
सा चित्तिभिर्नि हि चकार मर्त्यं विद्युद्भवन्ती प्रति वव्रिमौहत ॥२९॥
अनच्छये तुरगातु जीवमेजद् ध्रुवं मध्य आ पस्त्यानाम् ।
जीवो मृतस्य चरति स्वधाभिरमर्त्यो मर्त्येना सयोनिः ॥३०॥
अपश्यं गोपामनिपद्यमानमा च परा च पथिभिश्चरन्तम् ।
स सध्रीचीः स विषूचीर्वसान आ वरीवर्ति भुवनेष्वन्तः ॥३१॥
य ई चकार न सो अस्य वेद य ई ददर्श हिरुगिन्नु तस्मात् ।
स मातुर्योना परिवीतो अन्तर्बहुप्रजा निर्ऋतिमा विवेश ॥३२॥
द्यौर्मे पिता जनिता नाभिरत्र बन्धुर्मे माता पृथिवी महीयम् ।
उत्तानयोश्चम्वो३र्योनिरन्तरत्रा पिता दुहितुर्गर्भमाधात् ॥३३॥
पृच्छामि त्वा परमन्तं पृथिव्याः पृच्छामि यत्र भुवनस्य नाभिः ।
अयं सोमो वृष्णो अश्वस्य रेतः पृच्छामि वाचः परमं व्योम ॥३४॥
इयं वेदिः परो अन्तः पृथिव्या अयं यो भुवनस्य नाभिः ।
अयं सोमो वृष्णो अश्वस्य रेतो ब्रह्मायं वाचः परमं व्योम ॥३५॥
सप्तार्धगर्भा भुवनस्य रेतो विष्णोस्तिष्ठन्ति प्रदिशा विधर्मणि ।
ते धीतिभिर्मनसा ते विपश्चितः परिभुवः परि भवन्ति विश्वतः ॥३६॥
न वि जानामि यदिवेदमस्मि निण्यः सन्नद्धो मनसा चरामि ।
यदा मागन्प्रथमजा ऋतस्यादिद्वाचो अश्नुवे भागमस्याः ॥३७॥
अपाङ् प्राङेति स्वधया गृभीतोऽमर्त्यो मर्त्येना सयोनिः ।
ता शश्वन्ता विषूचीना वियन्ता न्य१न्यं चिक्युर्न नि चिक्युरन्यम् ॥३८॥
ऋचो अक्षरे परमे व्योमन्यस्मिन्देवा अधि विश्वे निषेदुः ।
यस्तन्न वेद किमृचा करिष्यति य इत्त द्विदुस्त इमे समासते ॥३९॥
सूयवसाद्भगवती हि भूया अथो वयं भगवन्तः स्याम ।
अद्धि तृणमघ्न्ये विश्वदानीं पिब शुद्धमुदकमाचरन्ती ॥४०॥
गौरीर्मिमाय सलिलानि तक्षत्येकपदी द्विपदी सा चतुष्पदी ।
अष्टापदी नवपदी बभूवुषी सहस्राक्षरा परमे व्योमन्॥४१॥

*asya vāmasya palitasya hotustasya bhrātā madhyamo astyaśnaḥ /*
*tṛtīyo bhrātā ghṛtapuṣṭho asyātrāpaśyaṁ viśpati saptaputram //1//*
*sapta yuṁjanti rathamekachakrameko aśvo vahati saptanāmā /*
*trinābhi chakramajaramanarva yatremā viśva bhuvanādhi tasthuḥ //2//*

*imaṁ rathamadhi ye sapta tasthuḥ saptachakraṁ sapta vahantyaśvaḥ* ।
*sapta svasāāro abhi saṁ navante yatra gavāṁ nihitā sapta nāma* ॥3॥
*ko dadarśa prathamaṁ jāyamānamasthanvantaṁ yadanasthā bibharti* ।
*bhūmyā asurasṛgātmā kva svitko vidvāṁsmupa gātpraṣṭumetat* ॥4॥
*pākaḥ pṛchchhāmi manasāvijānandevānāmenā nihitā padāni* ।
*vatse baṣkaye'dhiṁ sapta tantūnvi tatnire kavaya Otavā u* ॥5॥
*achikitvāiṁchatuṣaśchidatra kavīnpṛchchhāmi vidmane na vidvān* ।
*vi yastastambha ṣaḻimā rajāṁsyajasya rūpe kimapi sviedakam* ॥6॥
*iha bravītu ya īmaṁga vedāsya vāmasya nihitaṁ padaṁ veḥ* ।
*śīrṣṇaḥ kṣīraṁ duhrate gāvo asya vavriṁ vasānā udakaṁ padāpuḥ* ॥7॥
*mātā pitaramṛta ā babhaja dhītyagre manasā saṁ hi jagme* ।
*sā bībhatsurgarbharasā nividdhā namasvanta idupavākamīyuḥ* ॥8॥
*yuktā mātāsīddhuri dakṣiṇāyā atiṣṭhadgarbho vṛjanīṣvantaḥ* ।
*amīmedvatso anu gāmapaśyadviśvarūpyaṁ triṣu yojaneṣu* ॥9॥
*tisro mātṝstrīnpitṝnbibhradeka ūrdhvastasthau nemava glāpayanti* ।
*mantrayante divo amuṣya pṛṣṭhe viśvavidaṁ vāchamaviśvaminvām* ॥10॥
*dvādaśāraṁ nahi tajjarāya varvarti chakraṁ pari dyāmṛtasya* ।
*ā putrā agne mithunāso atra sapta śatāni viṁśatiścha tasthuḥ* ॥11॥
*paṁchapādaṁ pitaraṁ dvādaśākṛtiṁ diva āhuḥ pare ardhe purīṣiṇam* ।
*atheme anya upare vichakṣaṇaṁ diva āhuḥ pare ardhe purīṣiṇam* ।
*atheme anya upare vichakṣaṇaṁ saptachakre ṣaḻara āhurarpitam* ॥12॥
*paṁchāre chakre parivartamāne tasminnā tasthurbhuvanāni viśvā* ।
*tasya nākṣastapyate bhūribhāraḥ sunādeva na śīryate sanābhiḥ* ॥13॥
*sanemi chakramajaraṁ vi vāvṛta uttānāyāṁ daśa yuktā vahanti* ।
*sūryasya chakṣū rajasaityāvṛtaṁ tasminnārpritā bhuvanāni viśvā* ॥14॥
*sākaṁjānāṁ saptathamāhurekajaṁ ṣaḻidyamā ṛṣayo devajā iti* ।
*teṣāmiṣṭāni vihitāni dhāmaśaḥ sthātre rejante vikṛtāni rūpaśaḥ* ॥15॥
*striyaḥ satīstāṁ̐ u me puṁsa āhuḥ paśyadakṣaṇvānna vi chetadandhaḥ* ।
*kaviryaḥ putraḥ sa īmā chiketa yastā vijānātsa pituṣpitāsat* ॥16॥
*avaḥ pareṇa para enāvareṇa padā vatsaṁ bibhratī gaurudasthāt* ।
*sā kadrīchī kaṁ svidardha svidardha parāgātkva svitsūte nahi yūthe antaḥ* ॥17॥
*avaḥ pareṇa pitaraṁ yo asyānuveda para enāvareṇa* ।
*kavīyamānaḥ ka iha pra vochaddevaṁ kuto adhi prajātam* ॥18॥
*ye arvāṁchastāṁ̐ u parācha āhurye parāṁchastāṁ̐ u arvācha āhuḥ* ।
*indraścha yā chakrathuḥ soma tāni dhurā na yuktā rajaso vahanti* ॥19॥
*dvā suparṇā sayujā sakhāyā samānaṁ vṛkṣaṁ pari ṣasvajāte* ।
*tayoranyaḥ pippalaṁ svādvattyanaśnannanyo abhi chākaśīti* ॥20॥
*yatrā suparṇā amṛtasya bhāgamanimeṣaṁ vidathabhisvaranti* ।
*ino viśvasya bhuvanasya gopāḥ sa mā dhīraḥ pākamatrā viveśa* ॥21॥
*yasminvṛkṣe madhvadaḥ supurṇā niviśante suvate chādhi viśve* ।
*tasyedāhuḥ pippalaṁ svādvagre tannonnaśadyaḥ pitaraṁ na veda* ॥22॥
*yadgāyatre adhi gāyatramāhitaṁ traiṣṭubhādvā traiṣṭubhaṁ niratakṣata* ।
*yadvā jagajjagatyāhitaṁ padaṁ ya ittadviduste amṛtatvamānaśuḥ* ॥23॥
*gāyatreṇa prati mimīte arkamarkeṇa sāma traiṣṭubhena vākam* ।
*vākena vākaṁ dvipadā chatuṣpadākṣareṇa mimate sapta vāṇīḥ* ॥24॥
*jagatā sindhuṁ divyastabhāyadrathantare sūrya paryapaśyat* ।
*gāyatrasya samidhastisra āhustato mahnā pra ririche mahitvā* ॥25॥
*upa hnaye sudughāṁ dhenumetāṁ suhasto godhuguta dohadenām* ।
*śreṣṭhaṁ savaṁ savitā sāviṣanno'bhīddho gharmastadu ṣu pra vocham* ॥26॥
*hiṁkṛṇvatī vasupatnī vasūnāṁ vatsamichchhantī manasābhyāgāt* ।

*duhāmaśvibhyāṁ payo aghnyeyaṁ sā vardhatāṁ mahate saubhagāya ॥27॥*
*gauramīmedanu vatsaṁ miṣantaṁ mūrdhānaṁ hiṅṅkṛṇonmātavā u ।*
*sṛkvāṇaṁ gharmamabhi vāvaśānā mimiāti māyuṁ payate payobhiḥ ॥28॥*
*ayaṁ sa śiṅkte yena gaurabhīvṛtā mimāti māyuṁ dhvasanāvadhi śritā ।*
*sā chittibhirni hi chakāra martya vidyudbhavantī prati vavrimauhata ॥29॥*
*anachchhaye turagātu jīvamejad dhruvaṁ madhya ā pastyānām ।*
*jīvo mṛtasya charati svadhābhiramartyo martyenā sayoniḥ ॥30॥*
*apaśyaṁ gopāmanipadyamānasā cha parā cha pathibhiścharantam ।*
*sa sadhrīchīḥ sa viṣūchīrvasāna ā varīvarti bhuvaneṣvantaḥ ॥31॥*
*ya ī chakāra na so asya veda ya ī dadarśa hiruginnu tasmāt ।*
*sa māturyonā parivīto antarbahuprajā nirṛtimā viveśa ॥32॥*
*dyaurme pitā janitā nābhiratra bandhurme mātā pṛthivī mahīyam ।*
*uttānayośchamvo3ryonirantaratrā pitā duhiturgarbhamādhāt ॥33॥*
*pṛchchhāmi tvā paramantaṁ pṛthivyāḥ pṛchchhāmi yatra bhuvanasya nābhiḥ ।*
*ayaṁ somo vṛṣṇo aśvasya retaḥ pṛchchhāmi vāchaḥ paramaṁ vyoma ॥34॥*
*iyaṁ vediḥ paro antaḥ pṛthivyā ayaṁ yāo bhuvanasya nābhiḥ ।*
*ayaṁ somo vṛṣṇo aśvasya reto brahmāyaṁ vāchaḥ paramaṁ vyoma ॥35॥*
*saptārdhagarbhā bhuvanasya reto viṣṇostiṣṭhanti pradiśā vidharmaṇi ।*
*te dhītibhirmanasā te vipaśchitaḥ paribhuvaḥ pari bhavanti viśvataḥ ॥36॥*
*na vi jānāmi yadivedamasmi niṇyaḥ sannaddho manasā charāmi ।*
*yadā māganprathamajā ṛtasyādidvācho aśnuve bhāgamasyāḥ ॥37॥*
*apāṅ prāṅeti svadhayā gṛbhīto'martyo martyenā sayoniḥ ।*
*tā śaśvantā viṣūchīnā viyantā nya1nyaṁ chikyurna ni chikyuranyam ॥38॥*
*ṛcho akṣare parame vyomanyasmindevā adhi viśve niṣeduḥ ।*
*yastanna veda kimṛchā kariṣyati ya itta dvidusta ime samāsate ॥39॥*
*sūyavasādbhagavatī hi bhūyā atho vayaṁ bhagavantaḥ syāma ।*
*addhi tṛṇamaghnye viśvadānīṁ piba śuddhamudakamācharantī ॥40॥*
*gaurīrmimāya salilāni takṣatyekapadī dvipadī sā chatuṣpadī ।*
*aṣṭāpadī navapadī babhūvuṣī sahasrākṣarā parame vyoman ॥41॥*

१९. विष्णुः (Viṣṇuḥ) - ऋ. (Rv.) १.१५४.१-६; १.१५५.१-६; १.१५६.१-५

ऋ. (Rv.) १.१५४.१-६

विष्णोर्नु कं वीर्याणि प्र वोचं यः पार्थिवानि विमसे रजांसि ।
यो अस्कभायदुत्तरं सधस्थं विचक्रमाणस्त्रेधोरुगायः ॥१॥
प्र तद्विष्णुः स्तवते वीर्येण मृगो न भीमः कुचरो गिरिष्ठाः ।
यस्योरुषु त्रिषु विक्रमणेष्वधिक्षियन्ति भुवनानि विश्वा ॥२॥
प्र विष्णवे शूषमेतु मन्म गिरिक्षित उरुगायाय वृष्णे ।
य इदं दीर्घ प्रयतं सधस्थमेको विममे त्रिभिरित्पदेभिः ॥३॥
यस्य त्री पूर्णा मधुना पदान्यक्षीयमाणा स्वधया मदन्ति ।
य उ त्रिधातु पृथिवीमुत द्यामेको दाधार भुवनानि विश्वा ॥४॥
तदस्य प्रियमभि पाथे अश्यां नरो यत्र देवयवो मदन्ति ।
उरुक्रमस्य स हि बन्धुरित्था विष्णोः पदे परमे मध्व उत्सः ॥५॥
ता वां वास्तून्युश्मसि गमध्यै यत्र गावो भूरिश्रृंगा अयासः ।
अत्राह तदुरुगायस्य वृष्णः परमं पदमव भाति भूरि ॥६॥

*viṣṇornu kaṁ vīryāṇi pra vochaṁ yaḥ pārthivāni vimase rajāṁsi ।*
*yo askabhāyaduttaraṁ sadhasthaṁ vichakramāṇastredhorugāyaḥ ॥1॥*
*pra tadviṣṇuḥ stavate vīryeṇa mṛgo na bhīmaḥ kucharo giriṣṭhāḥ ।*
*yasyoruṣu triṣu vikramaṇeṣvadhikṣiyanti bhuvanāni viśvā ॥2॥*
*pra viṣṇave śūṣametu manma girikṣita urugāyāya vṛṣṇe ।*

*ya idaṁ dīrgha prayataṁ sadhasthameko vimame tribhiritpadebhiḥ //3 //*
*yasya trī pūrṇā madhunā padānyakṣīyamāṇā svadhayā madanti /*
*ya u tridhātu pṛthivīmuta dyāmeko dādhāra bhuvanāni viśvā //4 //*
*tadasya priyamabhi pāthe aśyāṁ naro yatra devayaveā madanti /*
*urukramasya sa hi bandhuritthā viṣṇoḥ pade parame madhva utsaḥ //5 //*
*tā vāṁ vāstūnyuśmasi gamadhyai yatra gāvo bhūriśṛṅgā ayāsaḥ /*
*atrāha tadurugāyasya vṛṣṇaḥ paramaṁ padamava bhāti bhūri //6 //*

ऋ. (Rv.) १.१५५.१-६

प्र वः पान्तमन्धसो धियायते महे शूराय विष्णवे चार्चत ।
या सानुनि पर्वतानामदाभ्या महस्तस्थतुरर्वतेव साधुना ॥१॥
त्वेषमित्था समरणं शिमीवतोरिन्द्राविष्णू सुतपा वामुरुष्यति ।
या मर्त्याय प्रतिधीयमानमित्कृशानोरस्तुरसनामुरुष्यथः ॥२॥
ता ई वर्धन्ति मह्यस्य पौंस्यं नि मातरा नयति रेतसे भुजे ।
दधाति पुत्रोऽवरं परं पितुर्नाम तृतीयमधि रोचने दिवः ॥३॥
तत्तदिदस्य पौंस्यं गृणीमसीनस्य त्रातुरवृकस्य मीळ्हुषः ।
यः पार्थिवानि त्रिभिरिद्विगामभिरुरु क्रमिष्टोरुगायाय जीवसे ॥४॥
द्वे इदस्य क्रमणे स्वर्दृशोऽभिख्याय मर्त्यो भुरण्यति ।
तृतीयमस्य नकिरा दधर्षति वयश्चन पतयन्तः पतत्रिणः ॥५॥
चतुर्भिः साकं नवतिं च नामभिश्चक्रं न वृत्तं वयतीँरवीविपत् ।
बृहच्छरीरो विमिमान ऋक्वभिर्युवाकुमारः प्रत्येत्याहवम् ॥६॥

*pra vaḥ pāntamandhaso dhiyāyate mahe śūrāya viṣṇave chārchata /*
*yā sānuni parvatānāmadābhyā mahastasthaturarvateva sādhunā //1 //*
*tveṣamitthā samaraṇaṁ śimīvatorindrāviṣṇū sutapā vāmuruṣyati /*
*yā martyāya pratidhīyamānamitkṛśānorasturasanāmuruṣyathaḥ //2 //*
*tā ī vardhanti mahyasya pauṁsyaṁ ni mātarā nayati retase bhuje /*
*dadhāti putro'varaṁ paraṁ piturnāma tṛtīyamadhi rochane divaḥ //3 //*
*tattadidasya pauṁsyaṁ gṛṇīmasīnasya trāturavṛkasya mīḷahuṣaḥ /*
*yaḥ pārthivāni tribhiridvigāmabhiruru kramiṣṭorugāyāya jīvase //4 //*
*dve idasya kramaṇe svardṛśo'bhikhyāya martyo bhuraṇyati /*
*tṛtīyamasya nakirā dadharṣati vayaśchana patayantaḥ patatriṇaḥ //5 //*
*chaturbhiḥ sākaṁ navati cha nāmabhiśchakraṁ na vṛttaṁ vayatīm̐ravīvipat /*
*bṛhachchharīro vimimāna ṛkvabhiryuvākumāraḥ pratayetyāhavam //6 //*

ऋ. (Rv.) १.१५६.१-५

भवा मित्रो न शेव्यो घृतासुतिर्विभूतद्युम्न एवया उ सप्रथाः ।
अधा ते विष्णो विदुषा चिदर्ध्यः स्तोमो यज्ञश्च राध्यो हविष्मता ॥१॥
यः पूर्व्याय वेधसे नवीयसे सुमज्जानये विष्णवे ददाशति ।
यो जातमस्य महतो महि ब्रवत्सेदु श्रवोभिर्युज्यं चिदभ्यसत् ॥२॥
तमु स्तोतारः पूर्व्यं यथा विद ऋतस्य गर्भं जनुषा पिपर्तन ।
आस्य जानन्तो नाम चिद्विवक्तन महस्ते विष्णो सुमतिं भजामहे ॥३॥
तमस्य राजा वरुणस्तमश्विना क्रतुं सचन्त मारुतस्य वेधसः ।
दाधार दक्षमुत्तममहर्विदं व्रजं च विष्णुः सखिवाँ अपोर्णुते ॥४॥
आ यो विवाय सचथाय दैव्य इन्द्राय विष्णुः सुकृते सुकृत्तरः ।
वेधा अजिन्वत्त्रिषधस्थ आर्यमृतस्य भागे यजमानमाभजत् ॥५॥

*bhavā mitro na śevyo ghṛtāsutirvibhūtadyumna evayā u saprathāḥ /*
*adhā te viṣṇo viduṣā chidardhyaḥ stomo yāścha rādhyo haviṣmatā //1 //*
*yaḥ pūrvyāya vedhase navīyase sumajjānaye viṣṇave dadāśati /*
*yeā jātamasya mahato mahi bravatsedu śravobhiryujyaṁ chidabhyasat //2 //*
*tamu stotāraḥ pūrvya yathā vida ṛtasya garbha januṣā pipartana /*

*āsya jānanto nāma chidvivaktana mahaste viṣṇo sumatiṁ bhajāmahe //3 //*
*tamasya rājā varuṇastamaśvinā kratuṁ sachanta mārutasya vedhasaḥ /*
*dādhāra dakṣamuttamamaharvidaṁ vrajaṁ cha viṣṇuḥ sakhivām̐ aporṇute //4 //*
*ā yo vivāya sachathāya daivya indrāya viṣṇuḥ sukṛte sukṛttaraḥ /*
*vedhā ajinvattriṣadhastha āryamṛtasya bhāge yajamānamābhajat //5 //*

२०. शकधूमः (Śakadhūmaḥ) - ऋ. (Rv.) १.१६४.४३
शकमयं धूमारादपश्यं विषूवता पर एनावरेण ।
उक्षाणं पृश्निमपचन्त वीरास्तानि धर्माणि प्रथमान्यासन् ॥४३॥
*śakamayaṁ dhūmārādapaśyaṁ viṣūvatā para enāvareṇa /*
*ukṣāṇaṁ pṛśnimapachanta vīrāstāni dharmāṇi prathamānyāsan //43 //*

२१. संवत्सरात्मा (Saṁvatsarātmā) - ऋ. (Rv.) १.१६४.४८
द्वादश प्रधयश्चक्रमेकं त्रीणि नभ्यानि क उ तच्चिकेत ।
तस्मिन्त्साकं त्रिशता न शंकवोऽर्पिताः षष्टिर्न चलाचलासः ॥४८॥
*dvādaśa pradhayaśchakramekaṁ trīṇi nabhyāni ka u tachchkieta /*
*tasmintsākaṁ triśatā na śaṁkavo'rpitāḥ ṣaṣṭirna chalāchalāsaḥ //48 //*

२२. सरस्वती (Sarasvatī) - ऋ. (Rv.) १.१६४.४९
यस्ते स्तनः शशयो ये मयोभूर्येन विश्वा पुष्यसि वार्याणि ।
यो रत्नधा वसुविद्यः सुदत्रः सरस्वति तमिह धातवे कः ॥४९॥
*yaste stanaḥ śaśayo yeā mayobhūryena viśvā puṣyasi vāryāṇi /*
*yo ratnadhā vasuvidyaḥ sudatraḥ sarasvati tamiha dhātave kaḥ //49 //*

२३. सरस्वती लाभारत्यः (Sarasvatī Lābhāratyaḥ) - ऋ. (Rv.) १.१४२.९
शुचिर्देवेष्वर्पिता होत्रा मरुत्सु भारती। इळा सरस्वती मही बर्हिः सीदन्तु यियाः ॥९॥
*śuchirdeveṣvarpitā hotrā marutsu bhāratī / iḻā sarasvatī mahī barhiḥ sīdantu yiāyāḥ //9 //*

२४. सरस्वान् सूर्यो वा (Sarasvān Sūryo Vā) - ऋ. (Rv.) १.१६४.५२
दिव्यं सुपर्ण वायसं बृहन्तमपां गर्भ दर्शतमोषधीनाम् ।
अभीपतो वृष्टिभिस्तर्पयन्तं सरस्वन्तमवसे जोहवीमि ॥५२॥
*divyaṁ suparṇa vāyasaṁ bṛhantamapāṁ garbha darśatamoṣadhīnām /*
*abhīpato vṛṣṭibhistarpayantaṁ sarasvantamavase johavīmi //52 //*

२५. साध्याः (Sādhyāḥ) - ऋ. (Rv.) १.१६४.५०
योन यामयजन्त देवास्तानि धर्माणि प्रथमान्यासन् ।
ते ह नाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः ॥५०॥
*yona yāmayajanta devāstāni dharmāṇi prathamānyāsan /*
*te ha nākaṁ mahimānaḥ sachanta yatra pūrve sādhyāḥ santi devāḥ //50 //*

२६. सूर्यः (Sūryaḥ) - ऋ. (Rv.) १.१६४.४६-४७
इन्द्रं मित्रं वरुणमग्निमाहुरथो दिव्यः स सुपर्णो गरुत्मान् ।
एकं सद्विप्रा बहुधा वदन्त्यग्निं यमं मातरिश्वानमाहुः ॥४६॥
कृष्णं नियानं हरयः सुपर्णा अपो वसाना दिवमुत्पतन्ति ।
त आववृत्रन्त्सदनादृतस्यादिद्घृतेन पृथिवी व्युद्यते ॥४७॥
*indraṁ mitraṁ varuṇamagnimāhuratho divyaḥ sa suparṇo garutmān /*
*ekaṁ sadviprā bahudhā vadantyagniṁ yamaṁ mātariśvānamāhuḥ //46 //*
*kṛṣṇaṁ niyānaṁ harayaḥ suparṇā apo vasānā divamutpatanti /*
*ta āvavṛtrantsadanādṛtasyādidghṛtena pṛthivī vyudyate //47 //*

२७. सूर्यः पर्जन्यो अग्नयो वा (Sūryaḥ Parjanyo Agnayo Vā) - ऋ. (Rv.) १.१६४.५१
समानमेतदुदकमुच्चैत्यव चाहभिः। भूमिं पर्जन्या जिन्वन्ति दिवं जिन्वन्त्यग्नयः ॥५१॥
*samānametadudakamuchchaityava chāhabhiḥ / bhūmiṁ parjanyā jinvanti divaṁ*

*jinvantyagnayaḥ //51 //*

२८. सोमः (Somaḥ) - ऋ. (Rv.) १.१६४.४३२

शकमयं धूममारादपश्यं विषूवता पर एनावरेण ।

उक्षाणं पृश्निमपचन्त वीरास्तानि धर्माणि प्रथमान्यासन् ॥४३॥

*śakamayaṁ dhūmamārādapaśyaṁ viṣūvatā para enāvareṇa /*

*ukṣāṇaṁ pṛśnimapachanta vīrāstāni dharmāṇi prathamānyāsan //43 //*

२९. स्वाहाकृतिः (Svāhākṛtiḥ) - ऋ. (Rv.) १.१४२.१२

पूषण्वते मरुत्वते विश्वदेवाय वायवे। स्वाहा गायत्रवेपसे हव्यमिन्द्राय कर्तन ॥१२॥

*pūṣaṇvate marutvate viśvadevāya vāyave / svāhā gāyatravepase havyamindrāya kartana //12 //*

## २८१. दीर्घतमा औतथ्यः (Dīrghatamā Autathyaḥ)

१. ईश्वर सभाध्यक्षौ (Īśvara Sabhādhyakṣau) - य. (Yv.)५.२९

परि त्वा गिर्वणो गिरऽइमा भवन्तु विश्वतः। वृद्धायुमनु वृद्धयो जुष्टा भवन्तु जुष्टयः ॥२९॥

*pari tvā girvaṇo gira'imā bhavantu viśvataḥ / vṛddhāyumanu vṛddhayo juṣṭā bhavantu juṣṭayaḥ //29 //*

२. याः (Yāḥ) - य. (Yv.)५.२२-२३; २५-२८

य. (Yv.)५.२२-२३

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् ।

आददे नार्यसी दमहंरक्षसां ग्रीवाऽअपिकृन्तामि ।

बृहन्नसि बृहद्रवा बृहतीमिन्द्राय वाचं वद ॥२२॥

रक्षोहणं बलगहनं वैष्णवीमिदमहं तं बलगमुत्किरामि यं मे निष्टयो यममात्यो निचखानेदमहं तं बलगमुत्किरामि यं मे समानो यमसमानो निचखानेदमहं तं बलगमुत्किरामि यं मे सबन्धुर्यमसबन्धुर्निचखानेदमहं तं बलगमुत्किरामि यं मे सजातो यमसजातो निचखानोत्कृत्याङ्किरामि॥२३॥

*devasya tvā savituḥ prasave'śvinorbāhubhyāṁ pūṣṇo hastābhyām /*

*ādade nāryasī damahaṁrakṣasāṁ grīvā'apikṛntāmi /*

*bṛhannasi bṛhadravā bṛhatīmindrāya vāchaṁ vada //22 //*

*rakṣohaṇaṁ balagahanaṁ vaiṣṇavīmidamahaṁ taṁ balagamutkirāmi yaṁ me niṣṭayo yamamātyo nichakhānedamahaṁ taṁ balagamutkirāmi yaṁ me samāno yamasamāno nichakhānedamahaṁ taṁ balagamutkirāmi yaṁ me sabandhuryamasabandhurnichakhānedamahaṁ taṁ balagamutkirāmi yaṁ me sajāto yamasajāto nichakhānotkṛtyāṅkarāmi //23 //*

य. (Yv.)५.२५-२८

रक्षोहणो वो वलगहनः प्रोक्षाामि वैष्णवान्नक्षोहणो वो बलगहनोऽवनयामि वैष्णवान्नक्षोहणो वो बलगहनोऽवस्तृणामि वैष्णवान्नक्षोहणौ वां बलगहनाऽउपदधामि वैष्णवी रक्षोहणौ वां बलगहनौ पर्यूहामि वैष्णवी वैष्णवमसि वैष्णवा स्थ ॥२५॥

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम्। आददे नार्यसीदमहंरक्षसां ग्रीवाऽअपिकृन्तामि। यवोऽसि यवयास्मद्द्वेषो यवयारातीर्दिवे त्वाऽन्तरिक्षाय त्वा पृथिव्यै त्वा शुन्धन्ताँल्लोकाः पितृषदनाः पितृषदनमसि ॥२६॥

उद्दिवंस्तभानान्तरिक्षं पृण दृंहस्व पृथिव्यां द्युतानस्त्वा मारुतो मिनोतु मित्रावरुणौ ध्रुवेण धर्मणा। ब्रह्मवनि त्वा क्षत्रवनि रायस्पोषवनि पर्यूहामि। ब्रह्म दृंह क्षत्रं दृंह हायुदृंह प्रजां दृंह ॥२७॥

ध्रुवासि ध्रुवोऽयं यजमानोऽस्मिन्नायतने प्रजया पशुभिर्भूयात् ।

घृतेन द्यावापृथिवी पूर्येथामिन्द्रस्य छदिरसि विश्वजनस्य छाया ॥२८॥

*rakṣohaṇo vo valagahanaḥ prokṣāāmi vaiṣṇavānnakṣohaṇo vo balagahano'vanayāmi vaiṣṇavānnakṣohaṇo vo balagahano'vastṛṇāmi vaiṣṇavānnakṣohaṇau vāṁ balagahanā'upadadhāmi vaiṣṇavī rakṣohaṇau vāṁ balagahanau paryūhāmi vaiṣṇavī vaiṣṇavamasi vaiṣṇavā stha //25 //*

*devasya tvā savituḥ prasave'śvinorbāhubhyāṁ pūṣṇo hastābhyām । ādade nāryasīdamahaṁrakṣasāṁ grīvā'apikṛntāmi । yavo'si yavayāsmaddveṣo yavayārātīrdive tvā'ntarikṣāya tvā pṛthivyai tvā śundhantām̐llokāḥ pitṛṣadanāḥ pitṛṣadanamasi ॥26॥*
*uddivaṁstabhānāntarikṣaṁ pṛṇa dṛṁ hasva pṛthivyāṁ dyutānastvā māruto minotu mitrāvaruṇau dhruveṇa dharmaṇā । brahmavani tvā kṣatravani rāyaspoṣavani paryūhāmi । brahma dṛṁ ha kṣatraṁ dṛṁ hāyudṛṁ ha prajāṁ dṛṁ ha ॥27॥*
*dhruvāsi dhruvo'yaṁ yajamāno'sminnāyatane prajayā paśubhirbhūyāt । ghṛtena dyāvāpṛthivī pūryethāmindrasya chhadirasi viśvajanasya chhāyā ॥28॥*

३. विष्णुः (Viṣṇuḥ) - य. (Yv.)५.१८-२१

विष्णोर्नु कं वीर्याणि प्रवोचं यः पार्थिवानि विममे रजां सि ।
योऽअस्कभायदुत्तरंसधस्थं विचक्रमाणस्त्रेधोरुगायो विष्णवे त्वा ॥१८॥
दिवो वा विष्णऽउत वा पृथिव्या महो वा विष्णऽउरोरन्तरिक्षात्। उभा हि हस्ता वसुना पृणस्वा प्रयच्छ दक्षिणादोत सव्याद्विष्णवे त्वा ॥१९॥
प्र तद्विष्णु स्तवते वीर्य्येण मृगो न भीमः कुचरो गिरिष्ठाः ।
यस्योरुषु त्रिषु विक्रमणे ष्वधिक्षियन्ति भुवनानि विश्वा ॥२०॥
विष्णो रराटमसि विष्णोः श्नप्त्रे स्थो विष्णोः स्यूरसि विष्णोऽर्ध्रुवोऽसि।
वैष्णवमसि विष्णवे त्वा ॥२१॥

*viṣṇornu kaṁ vīryāṇi pravochaṁ yaḥ pārthivāni vimame rajāṁ si ।*
*yo'askabhāyaduttaraṁsadhasthaṁ vichakramāṇastredhorugāyo viṣṇave tvā ॥18॥*
*divo vā viṣṇa'uta vā pṛthivyā maho vā viṣṇa'urorantarikṣāt । ubhā hi hastā vasunā pṛṇasvā prayachchha dakṣiṇādota savyādviṣṇave tvā ॥19॥*
*pra tadviṣṇu stavate vīryyeṇa mṛgo na bhīmaḥ kucharo giriṣṭhāḥ ।*
*yasyoruṣu triṣu vikramaṇe ṣvadhikṣiyanti bhuvanāni viśvā ॥20॥*
*viṣṇo rarāṭamasi viṣṇoḥ śnaptre stho viṣṇoḥ syūrasi viṣṇo'rdhruvo'si ।*
*vaiṣṇavamasi viṣṇave tvā ॥21॥*

४. सूर्य्यविद्वांसौ (Sūryyavidvāṁsau) - य. (Yv.)५.२४

स्वराडसि सपत्नहा सत्रराडस्यभिमातिहा जनराडसि रक्षोहा सर्वराडस्यमित्रहा ॥२४॥
*svarāḍasi sapatnahā satrarāḍasyabhimātihā janarāḍasi rakṣohā sarvarāḍasyamitrahā ॥24॥*

## २८२. दुर्मित्रः (सूमित्रो वा) कौत्सः (Durmitraḥ (Sūmitro Vā) Kautsaḥ)

१. इन्द्रः (Indraḥ) - सा. (Sv.) २२८

कदा वसो स्तोत्रं हर्यत आ अव श्मशा रुधद्वाः। दीर्घ सुतं वाताप्याय ॥६॥
*kadā vaso stotraṁ haryata ā ava śmaśā rudhadvāḥ । dīrgha sutaṁ vātāpyāya ॥6॥*

## २८३. देवस्युर् वान्दनः (Devasyur Vāndanaḥ)

१. विश्वेदेवाः (Viśvedevāḥ) - ऋ. (Rv.) १०.१००.१-१२

इन्द्र दृह्य मघवन्त्वावदिद्भुज इह स्तुतः सुतपा बोधि नो वृधे ।
देवेभिर्नः सविता प्रावतु श्रुतमा सर्वतातिमदितिं वृणीमहे ॥१॥
भराय सु भरत भगमृत्वियं प्र वायवे शुचिपे क्रन्ददिष्टये ।
गौरस्य यः पयसः पीतिमानश आ सर्वतातिमदितिं वृणीमहे ॥२॥
आ नो देवः सविता साविषद्वय ऋजूयते यजमानाय सुन्वते ।
यथा देवान्प्रतिभूषेम पाकवदा सर्वतातिमदितिं वृणीमहे ॥३॥
इन्द्रो अस्मे सुमना अस्तु विश्वहा राजा सोमः सुवितस्याध्येतु नः ।
यथायथा मित्रधितानि सं दधुरा सर्वतातिमदितिं वृणीमहे ॥४॥
इन्द्र उक्थेन शवसा परुर्दधे बृहस्पते प्रतरीतास्यायुषः ।
याो मनुः प्रमतिर्नः पिता हि कमा सर्वतातिमदितिं वृणीमहे ॥५॥

इन्द्रस्य नु सुकृतं दैव्यं सहोऽग्निर्गृहे जरिता मेधिरः कविः ।
याश्च भूद्विदथे चारुरन्तम आ सर्वतातिमदितिं वृणीमहे ॥६॥
न वो गुहा चकृम भूरि दुष्कृतं नाविष्ट्यं वसवो देवहेळनम् ।
माकिर्नो देवा अनृतस्य वर्पस आ सर्वतातिमदितिं वृणीमहे ॥७॥
अपामीवां सविता साविषन्य१ ग्वरीय इदप सेधन्त्वद्रयः ।
ग्रावा यत्र मधुषुदुच्यते बृहदा सर्वतातिमदितिं वृणीमहे ॥७॥
अपामीवां सविता साविषन्य्‌ ग्वरीय इदप सेधन्त्वद्रयः ।
ग्रावा यत्र मधुषुदुच्यते बृहदा सर्वतातिमदितिं वृणीमहे ॥८॥
ऊर्ध्वो ग्रावा वसवोऽस्तु सोतरि विश्वा द्वेषांसि सनुतर्युयोत ।
स नो देवः सविता पायुरीड्य आ सर्वतातिमदिति वृणीमहे ॥९॥
ऊर्ज गावो यवसे पीवो अत्तन ऋतस्य याः सदने कोशे अङ्ध्वे ।
तनूरेव तन्वो अस्तु भेषजमा सर्वतातिमदितिं वृणीमहे ॥१०॥
क्रतुप्रावा जरिता शश्वतामव इन्द्र इदभद्रा प्रमतिः सुतावताम् ।
पूर्णमूधर्दिव्यं यस्य सिक्तय आ सर्वतातिमदितिं वृणीमहे ॥११॥
चित्रस्ते भानुः क्रतुप्रा अभिष्टिः सन्ति स्पृधो जरणिप्रा अधृष्टाः ।
राजिष्ठया रज्या पश्व आ गोस्तूतूर्षति पर्यग्रं दुवस्यु ॥१२॥

*indra dṛhya maghavantvāvadidbhuja iha stutaḥ sutapā bodhi no vṛdhe /*
*devebhirnaḥ savitā prāvatu śrutamā sarvatātimadirti vṛṇīmahe //1 //*
*bharāya su bharata bhagamṛtviyaṁ pra vāyave śuchipe krandadiṣṭaye /*
*gaurasya yaḥ payasaḥ pītimānaśa ā sarvatātimaditiṁ vṛṇīmahe //2 //*
*ā no devaḥ savitā sāviṣadvaya ṛjūyate yajamānāya sunvate /*
*yathā devānpratibhūṣema pākavadā sarvatātimaditiṁ vṛṇīmahe //3 //*
*indro asme sumanā astu viśvahā rājā somaḥ suvitasyādhyetu naḥ /*
*yathāyathā mitradhitāni saṁ dadhurā sarvatātimaditiṁ vṛṇīmahe //4 //*
*indra ukthena śavasā parurdadhe bṛhaspate pratarītāsyāyuṣaḥ /*
*yāo manuḥ pramatirnaḥ pitā hi kamā sarvatātimaditiṁ vṛṇīmahe //5 //*
*indrasya nu sukṛtaṁ daivyaṁ saho'gnirgṛhe jaritā medhiraḥ kaviḥ /*
*yāścha bhūdvidathe chārurantama ā sarvatātimaditiṁ vṛṇīmahe //6 //*
*na vo guhā chakṛma bhūri duṣkṛtaṁ nāviṣṭyaṁ vasavo devaheḷanam /*
*mākirno devā anṛtasya varpasa ā sarvatātimaditiṁ vṛṇīmahe //7 //*
*apāmīvāṁ savitā sāviṣannya1 gvarīya idapa sedhantvadrayaḥ /*
*grāvā yatra madhuṣuduchyate bṛhadā sarvatātimaditiṁ vṛṇīmahe //7 //*
*apāmīvāṁ savitā sāviṣannyṛ gvarīya idapa sedhantvadrayaḥ /*
*grāvā yatra madhuṣuduchyate bṛhadā sarvatātimaditiṁ vṛṇīmahe //8 //*
*ūrdhvo grāvā vasavo'stu sotari viśvā dveṣāṁsi sanutaryuyota /*
*sa no devaḥ savitā pāyurīḍya ā sarvatātimaditi vṛṇīmahe //9 //*
*ūrja gāvo yavase pīvo attana ṛtasya yāḥ sadane kośe aṅdhve /*
*tanūreva tanvo astu bheṣajamā sarvatātimaditiṁ vṛṇīmahe //10 //*
*kratuprāvā jaritā śaśvatāmava indra idabhadrā pramatiḥ sutāvatām /*
*pūrṇamūdhardivyaṁ yasya siktaya ā sarvatātimaditiṁ vṛṇīmahe //11 //*
*chitraste bhānuḥ kratuprā abhiṣṭiḥ santi spṛdho jaraṇiprā adhṛṣṭāḥ /*
*rājiṣṭhayā rajyā paśva ā gostūtūrṣati paryagraṁ duvasyu //12 //*

## २८४. दृळहच्युतः आगस्त्यः (Dṛḷahachyutaḥ Āgastyaḥ)

१. पवमानः सोमः (Pavamānaḥ Somaḥ) - ऋ. (Rv.) ९.२५.१-६; सा. (Sv.) ४७४; ९१९-९२१

ऋ. (Rv.) ९.२५.१-६

पवस्व दक्षसाधनो देवेभ्यः पीतये हरे। मरुद्भ्यो वायवे मदः ॥१॥

पवमान धिया हितो३भि योनि कानिक्रदत्। धर्मणा वायुमा विश ॥२॥
सं देवैः शेभते वृषा कविर्योनावधि प्रियः। वृत्रहा देववीतमः ॥३॥
विश्व रूपाण्याविशन्पुनानो याति हर्यतः। यत्रामृतास आसते ॥४॥
अरुषो जनयन्गिरः सोमः पवत आयुषक्। अरुषो जनयन्गिरः पवत आयुषक्।
इन्द्रं गच्छन्कविक्रतुः ॥५॥
*pavasva dakṣasādhano devebhyaḥ pītaye hare | marudbhyo vāyave madaḥ ॥1॥*
*pavamāna dhiyā hito3bhi yoni kānikradat | dharmaṇā vāyumā viśa ॥2॥*
*saṁ devaiḥ śebhate vṛṣā kaviryonāvadhi priyaḥ | vṛtrahā devavītamaḥ ॥3॥*
*viśva rūpāṇyāviśanpunāno yāti haryataḥ | yatrāmṛtāsa āsate ॥4॥*
*aruṣo janayangiraḥ somaḥ pavata āyuṣak | aruṣo janayangiraḥ pavata āyuṣak |*
*indraṁ gachchhankavikratuḥ ॥5॥*
आ पवस्व मदिन्तम पवित्रं धारया कवे। अर्कस्य योनिमासदम् ॥६॥
*ā pavasva madintama pavitraṁ dhārayā kave | arkasya yonimāsadam ॥6॥*

सा. (Sv.) ४७४
पवस्व दक्षसाधनो देवेभ्यः पतये हरे। मरुद्भ्यो वायवे मदः ॥८॥
*pavasva dakṣasādhano devebhyaḥ pataye hare | marudbhyo vāyave madaḥ ॥8॥*

सा. (Sv.) ९१९-९२१
पवस्व दक्षसाधनो देवेभ्यः पीतये हरे। मरुद्भ्यो वायवे मदः ॥१॥
सं देवैः शोभते वृषा कविर्योनावधि प्रियः। पवमानो अदाभ्यः ॥२॥
पवमान धिया हितो३ऽभि योनिं कनिक्रदत्। धर्मणा वायुमारुहः ॥३॥
*pavasva dakṣasādhano devebhyaḥ pītaye hare | marudbhyo vāyave madaḥ ॥1॥*
*saṁ devaiḥ śobhate vṛṣā kaviryonāvadhi priyaḥ | pavamāno adābhyaḥ ॥2॥*
*pavamāna dhiyā hito3'bhi yoniṁ kanikradat | dharmaṇā vāyumāruhaḥ ॥3॥*

## २८५. देवजामयः इन्द्रमातरः (Devajāmayaḥ Indramātaraḥ)

१. इन्द्रः (Indraḥ) - सा. (Sv.) १२०
त्वमिन्द्र बलादधि सहसो जात ओजसः। त्वं सन्वृषन्वृषेदसि ॥६॥
*tvamindra balādadhi sahaso jāta Ojasaḥ | tvaṁ sanvṛṣanvṛṣedasi ॥6॥*

## २८६. देवमुनिर् ऐम्मदः (Devamunir Aimmadaḥ)

१. अरण्यानी (Araṇyānī) - ऋ. (Rv.) १०.१४६.१-६
अरण्यान्यरण्यान्यसौ या प्रेव नश्यसि। कथा ग्रामं न पृच्छसि न त्वा भीरिव विन्दतीँ३ ॥१॥
वृषारवाय वदते यदुपावति चिच्चिकः। आघाटिभिरिव धावयन्नरण्यानिर्महीयते ॥२॥
उत गावइवादन्त्युत वेश्मेव दृश्यते। उतो अरण्यानिः सायं शकटीरिव सर्जति ॥३॥
गामंगैष आ ह्वयति दार्वंगैषो अपावधीत्। वसन्नरण्यान्यां सायमक्रुक्षदिति मन्यते ॥४॥
न वा अरण्यानिर्हन्त्यन्यश्चेन्नाभिगच्छति। स्वादोः फलस्य जग्ध्वाय यथाकामं नि पद्यते ॥५॥
आंजनगन्धिं सुरभिं बह्वन्नामकृषीवलाम्। प्राहं मृगाणां मातरमरण्यानिमशंसिषम् ॥६॥
*araṇyānyaraṇyānyasau yā preva naśyasi | kathā grāmaṁ na pṛchchhasi na tvā bhīriva vindatīm̐3 ॥1॥*
*vṛṣāravāya vadate yadupāvati chichchikaḥ | āghāṭibhiriva dhāvayannaraṇyānirmahīyate ॥2॥*
*uta gāvaivādantyuta veśmeva dṛśyate | uto araṇyāniḥ sāyaṁ śakaṭīriva sarjati ॥3॥*
*gāmaṁgaiṣa ā hnayati dārvaṁgaiṣo apāvadhīt | vasannaraṇyānyāṁ sāyamakrukṣaditi manyate ॥4॥*
*na vā araṇyānirhanyanyaśchennābhigachchhati | svādoḥ phalasya jagdhvāya yathākāmaṁ ni padyate ॥5॥*
*āṁjanaganiṁdha surabhiṁ bahnannāmakṛṣīvalām | prāhaṁ mṛgāṇāṁ mātaramaraṇyānimaśaṁsiṣam ॥ 6 ॥*

## २८७. देवलः (Devalaḥ)

१. अग्निः (Agniḥ) - य. (Yv.)२.१७

यं परिधिं पर्यधत्थाऽअग्ने देवपणिभिर्गुह्यमानः ।
तं तऽएतमनु जोषं भराम्येष मेत्त्वदप चेतयाताऽअग्नेः प्रियं पाथोऽपीतम् ॥१७ ॥
*yaṁ paridhiṁ paryadhatthā'agne devapaṇibhirguhyamānaḥ ।*
*taṁ ta'etamanu joṣaṁ bharāmyeṣa mettvadapa chetayātā'agneḥ priyaṁ pātho'pītam ॥17 ॥*

२. सोमः (Somaḥ) - य. (Yv.)३३.६२

उपास्मै गायता नरः पवमानायेन्दवे । अभि देवाँश्ऽ इयक्षते ॥६२ ॥
*upāsmai gāyatā naraḥ pavamānāyendave । abhi devām̐ś' iyakṣate ॥62 ॥*

## २८८. देववातः (Devavātaḥ)

१. अग्निः (Agniḥ) - य. (Yv.)९.३७

अग्ने सहस्व पृतनाऽअभिमातीरपास्य । दुष्टरस्तरन्नरातीर्वर्चो धा यावाहसि ॥३७ ॥
*agne sahasva pṛtanā'abhimātīrapāsya । duṣṭarastarannarātīrvarcho dhā yāvāhasi ॥37 ॥*

२. अग्न्यादयो मन्त्रोक्ताः (Agnyādayo Mantroktāḥ) - य. (Yv.)१०.२३

अग्नये गृहपतये स्वाहा सोमाय वनस्पतये स्वाहा मरुतामोजसे
स्वाहेन्द्रस्येन्द्रियाय स्वाहा । पृथिवि मातर्मा मा हिं सीर्मोऽअहं त्वाम् ॥२३ ॥
*agnaye gṛhapataye svāhā somāya vanaspataye svāhā marutāmojase*
*svāhendrasyendriyāya svāhā । pṛthivi mātarmā mā hiṁ sīrmo'ahaṁ tvām ॥23 ॥*

३. इन्द्रः (Indraḥ) - य. (Yv.)१०.२२

मा तऽइन्द्र ते वयं तुराषाडयुक्तासोऽअब्रह्मता विदसाम ।
तिष्ठा रथमधि यं वज्रहस्ता रश्मीन्देव यमसे स्वश्वान् ॥२२ ॥
*mā ta'indra te vayaṁ turāṣāḍayuktāso'abrahmatā vidasāma ।*
*tiṣṭhā rathamadhi yaṁ vajrahastā raśmīndeva yamase svaśvān ॥22 ॥*

४. क्षेत्रपतिः (Kṣetrapatiḥ) - य. (Yv.)१०.२६

स्योनसि सुषदासि क्षत्रस्य योनिरसि । स्योनामासीद सुषदामासीद क्षत्रस्य योनिमासीद ॥२६ ॥
*syonasi suṣadāsi kṣatrasya yonirasi । syonāmāsīda suṣadāmāsīda kṣatrasya yonimāsīda ॥26 ॥*

५. प्रजापतिः (Prajāpatiḥ) - य. (Yv.)१०.२०

प्रजापते न त्वेदतान्यन्यो विश्वा रूपाणि परि ता बभूव ।
यत्कामास्ते जुहुमस्तन्नोऽअस्त्वयममुष्य पिताऽसावस्य पिता वयंस्याम पतयो रयीणांस्वाहा । रुद्र यत्ते क्रिवि परं नाम तस्मिन् हुतमस्मेष्टमसि स्वाहा ॥२० ॥
*prajāpate na tvedatānyanyo viśvā rūpāṇi pari tā babhūva ।*
*yatkāmāste juhumastanno'astvayamamuṣya pitā'sāvasya pitā vayaṁsyāma patayo rayīṇāṁsvāhā । rudra yatte krivi paraṁ nāma tasmin hutamasmeṣṭamasi svāhā ॥20 ॥*

६. रक्षोघ्नः (Rakṣodhnaḥ) - य. (Yv.)९.३८-३९

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् । उपां शोर्वीर्य्येण जुहोमि हतंरक्षः स्वाहा रक्षसां त्वा वधायावधिष्म रक्षोऽवधिष्मामुमसौ हतः ॥३८ ॥
सविता त्वा सवानांसुवतामग्निर्गृहपतीनांसोमो वनस्पतीनाम् । बृहस्पतिर्वाचऽइन्द्रो ज्यैष्ठ्याय रुद्रः पशुभ्यो मित्रः सत्यो वरुणो धर्मपतीनाम् ॥३९ ॥
*devasya tvā savituḥ prasave'śvinorbāhubhyāṁ pūṣṇo hastābhyām । upāṁ śorvīryyeṇa juhomi hataṁrakṣaḥ svāhā rakṣasāṁ tvā vadhāyāvadhiṣma rakṣo'vadhiṣmāmumasau hataḥ ॥38 ॥*
*savitā tvā savānāṁsuvatāmagnirgṛhapatīnāṁsomo vanaspatīnām ।*
*bṛhaspatirvācha'indro jyaiṣṭhyāya rudraḥ paśubhyo mitraḥ satyo varuṇo*

*dharmapatīnām //39 //*

७. यजमानः (Yajamānaḥ) - य. (Yv.)९.४०; १०.१८; १९

य. (Yv.)९.४०

इमं देवाऽअसपत्नंसुवध्वं महते क्षत्राय महते ज्यैष्ठ्याय महते जानराज्यायेन्द्रस्येन्द्रियाय।
इममुमुष्य पुत्रममुष्यै पुत्रमस्यै विशऽएष वोऽमी राजा सोमोऽस्माकं ब्राह्मणानांराजा ॥४०॥

*imaṁ devā'asapatnaṁsuvadhvaṁ mahate kṣatrāya mahate jyaiṣṭhyāya mahate jānarājyāyendrasyendriyāya /*
*imamamuṣya putramamuṣyai putramasyai viśa'eṣa vo'mī rājā somo'smākaṁ brāhmaṇānāṁrājā //40 //*

य. (Yv.)१०.१८-१९

इमं देवाऽअसपत्नंसुवध्वं महते क्षत्राय महते ज्यैष्ठ्याय महते जानराज्यायेन्द्रस्येन्द्रियाय। इममुमुष्य पुत्रममुष्यै पुत्रमस्यै विशऽएष वोऽमी राजा सोमोऽस्माकं ब्राह्मणानांराजा ॥१८॥
प्र पर्वतस्य वृषभस्य पृष्ठान्नवश्चरन्ति स्वसिचऽइयानाः। ताऽआववृत्रन्नधरागुदक्ताऽअहिं
बुध्न्यमनु रीयमाणाः। विष्णो र्विक्रमणमसि विष्णोर्विक्रान्तमसि विष्णोः क्रान्तमसि ॥१९॥

*imaṁ devā'asapatnaṁsuvadhvaṁ mahate kṣatrāya mahate jyaiṣṭhyāya mahate jānarājyāyendrasyendriyāya / imamamuṣya putramamuṣyai putramasyai viśa'eṣa vo'mī rājā somo'smākaṁ brāhmaṇānāṁrājā //18 //*
*pra parvatasya vṛṣabhasya pṛṣṭhānnavaścharanti svasicha'iyānāḥ / tā'āvavṛtrannadharāgudaktā'ahiṁ*
*budhnyamanu rīyamāṇāḥ / viṣṇo rvikramaṇamasi viṣṇorvikrāntamasi viṣṇoḥ krāntamasi //19 //*

## २८९. देववात भरतौ (Devavāta Bharatau)

१. अग्निः (Agniḥ) - य. (Yv.)३.१४

अयं ते योनिर्ऋत्वियो यतो जातोऽअरोचथाः। तं जानन्नग्नऽआरोहाथा नो वर्द्धया रयिम् ॥ १४॥

*ayaṁ te yonirṛtviyo yato jāto'arochathāḥ / taṁ jānannagna'ārohāthā no varddhayā rayim // 14 //*

## २९०. देवश्रवाः (Devaśravāḥ)

१. प्रजापतिः (Prajāpatiḥ) - य. (Yv.)७.२९-३०

कोऽसि कतमोऽसि कस्यासि को नामासि। यस्य ते नामामन्महि यं त्वा सोमेनातीतृपाम । भूर्भुवः स्वः सुप्रजाः प्रजाभिः स्यांसुवीरो वीरैः सुपोषः पोषैः ॥२९॥
उपयामगृहीतोऽसि मध्वे त्वोमयामगृहीतोऽसि माध्वाय त्वोपयामगृहीतोऽसि शुक्राय त्वोपयामगृहीतोऽसि शुचये त्वोपयामगृहीतोऽसि नभसे त्वोपयामगृहीतोऽसि नभस्याय तवोपयामगृहीतोऽसीषे त्वोपयामगृहीतोऽस्यूर्ज्जे त्वोपयामगृहीतोऽसि सहसे त्वोपयामगृहीतोऽसि सहस्याय त्वोपयामगृहीतोऽसि तपसे त्वोपयामगृहीतोऽसि तपस्याय त्वोपयामगृहीतोऽस्यं हसस्पतये त्वा ॥३०॥

*ko'si katamo'si kasyāsi ko nāmāsi / yasya te nāmāmanmahi yaṁ tvā somenātītṛpāma / bhūrbhuvaḥ svaḥ suprajāḥ prajābhiḥ syāṁsuvīro vīraiḥ supoṣaḥ poṣaiḥ //29 //*
*upayāmagṛhīto'si madhve tvomayāmagṛhīto'si mādhvāya tvopayāmagṛhīto'si śukrāya tvopayāmagṛhīto'si śuchaye tvopayāmagṛhīto'si nabhase tvopayāmagṛhīto'si nabhasyāya tavopayāmagṛhīto'sīṣe tvopayāmagṛhīto'syūrjje tvopayāmagṛhīto'si sahase tvopayāmagṛhīto'si sahasyāya tvopayāmagṛhīto'si tapase tvopayāmagṛhīto'si tapasyāya tvopayāmagṛhīto'syaṁ hasaspataye tvā //30 //*

२. याः (Yāḥ) - य. (Yv.)७.२६

यस्ते द्रप्स स्कन्दति यस्तेऽअं शुर्ग्रावच्युतो धिषणयोरुपस्थात्। अध्वर्य्योर्वा परि
वा यः पवित्रात्तं ते जुहोमि मनसा वषट्कृतंस्वाहा देवानामुत्क्रमणमसि ॥२६॥

*yaste drapsa skandati yaste'aṁ śurgrāvachyuto dhiṣaṇayorupasthāt / adhvaryyorvā pari*

*vā yaḥ pavitrāttaṁ te juhomi manasā vaṣaṭkutaṁsvāhā*
*devānāmutkramaṇamasi ॥26 ॥*

३. यापतिः (Yāpatiḥ) - य. (Yv.)७.२७-२८

प्राणाय मे वर्चोदा वर्चसे पवस्व व्यानाय मे वर्चोदा वर्चसे पवस्वोदानाय मे वर्चोदा वर्चसे पवस्ववाचे मे
वर्चोदा वर्चसे पवस्व क्रतूदक्षाभ्यां मे वर्चोदा वर्चसे पवस्व श्रोत्राय मे वर्चोदा वर्चसे
पवस्व चक्षुर्भ्या मे वर्चोदसौ वर्चसे पवेथाम् ॥२७॥
आत्मने मे वर्चोदा वर्चसे पवस्वौजसे मे वर्चोदा
वर्चसे पवस्वायुषे मे वर्चोदा वर्चसे पवस्व विश्वाभ्यो मे प्रजाभ्यो वर्चोदसौ वर्चसे पवेथाम्॥२८।
*prāṇāya me varchodā varchase pavasva vyānāya me varchodā varchase*
*pavasvodānāya me varchodā varchase pavasvavāche me varchodā varchase pavasva*
*kratūdakṣābhyāṁ me varchodā varchase pavasva śrotrāya me varchodā varchase*
*pavasva chakṣurbhyā me varchodasau varchase pavethām ॥27 ॥*
*ātmane me varchodā varchase pavasvaujase me varchodā*
*varchase pavasvāyuṣe me varchodā varchase pavasva viśvābhyo me prajābhyo*
*varchodasau varchase pavethām ॥28 ।*

## २९१. देवश्रवा यामायनः (Devaśravā Yāmāyanaḥ)

१. आपः (Āpaḥ) - ऋ. (Rv.) १०.१७.१०-१४

आपो अस्मान्मातरः शुन्धयन्तु घृतेन नो घृतप्वः पुनन्तु ।
विश्वं हि रिप्रं प्रवहन्ति देवीरुदिदाभ्यः शुचिरा पूत एमि ॥१०॥
द्रप्सश्चस्कन्द प्रथमाँ अनु द्यूनिमं च योनिमनु यश्च पूर्वः ।
समानं योनिमनु संचरन्तं द्रप्सं जुहोम्यनु सप्त होत्राः ॥११॥
यस्ते द्रप्सः सकन्दति यस्ते अंशुर्बाहुच्युतो धिषणाया उपस्थात् ।
अध्वर्योर्वा परि वा यः पवित्रात्तं ते जुहोमि मनसा वषड्कृतम् ॥१२॥
यस्ते द्रप्सः स्कन्नो यस्ते अंशुरवश्च यः परः स्रुचा ।
अयं देवो बृहस्पतिः सं तं सिंचतु राधसे ॥१३॥
पयस्वतीरोषधयः पयस्वन्मामकं वचः । अपां पयस्वदित्पयस्तेन मा सह शुन्धत ॥१४॥
*āpeā asmānmātaraḥ śundhayantu ghṛtena no ghṛtapvaḥ punantu ।*
*viśvaṁ hi ripraṁ pravahanti devīrudidābhyaḥ śuchirā pūta emi ॥10 ॥*
*drapsaśchaskanda prathamām̐ anu dyūnimaṁ cha yonimanu yaścha pūrvaḥ ।*
*samānaṁ yonimanu saṁcharantaṁ drapsaṁ juhomyanu sapta hotrāḥ ॥11 ॥*
*yaste drapsaḥ sakandati yaste aṁśurbāhuchyuto dhiṣaṇāyā upasthāt ।*
*adhvaryorvā pari vā yaḥ pavitrāttaṁ te juhomi manasā vaṣaṭkṛtam ॥12 ॥*
*yaste drapsaḥ skanno yaste aṁśuravaścha yaḥ paraḥ sruchā ।*
*ayaṁ devo bṛhaspatiḥ saṁ taṁ siṁchatu rādhase ॥13 ॥*
*payasvatīroṣadhayaḥ payasvanmāmakaṁ vachaḥ । apāṁ payasvaditpayastena mā*
*saha śundhata ॥14 ॥*

२. आपः सोमो वा (Āpaḥ Somo Vā) - ऋ. (Rv.) १०.१७.११-१३

द्रप्सश्चस्कन्द प्रथमाँ अनु द्यूनिमं च योनिमनु यश्च पूर्वः ।
समानं योनिमनु संचरन्तं द्रप्सं जुहोम्यनु सप्त होत्राः ॥११॥
यस्ते द्रप्सः सकन्दति यस्ते अंशुर्बाहुच्युतो धिषणाया उपस्थात् ।
अध्वर्योर्वा परि वा यः पवित्रात्तं ते जुहोमि मनसा वषड्कृतम् ॥१२॥
यस्ते द्रप्सः स्कन्नो यस्ते अंशुरवश्च यः परः स्रुचा ।
अयं देवो बृहस्पतिः सं तं सिंचतु राधसे॥१३॥
*drapsaśchaskanda prathamām̐ anu dyūnimaṁ cha yonimanu yaścha pūrvaḥ ।*
*samānaṁ yonimanu saṁcharantaṁ drapsaṁ juhomyanu sapta hotrāḥ ॥11 ॥*
*yaste drapsaḥ sakandati yaste aṁśurbāhuchyuto dhiṣaṇāyā upasthāt ।*
*adhvaryorvā pari vā yaḥ pavitrāttaṁ te juhomi manasā vaṣaṭkṛtam ॥12 ॥*

*yaste drapsaḥ skanno yaste aṁśuravaścha yaḥ paraḥ sruchā /*
*ayaṁ devo bṛhaspatiḥ saṁ taṁ siṁchatu rādhase //13 //*

३. पूषा (Pūṣā) - ऋ. (Rv.) १०.१७.३-६

पूषा त्वेतश्च्यावयतु प्र विद्वाननष्टपशुर्भुवनस्य गोपाः ।
स त्वैतेभ्यः परि ददत्पितृभ्योऽग्निर्देवेभ्यः सुविदत्रियेभ्यः ॥३॥
आयुर्विश्वायुः परि पासति त्वा पूषा त्वा पातु प्रपथे पुरस्तात् ।
यत्रासते सुकृतो यत्र ते ययुस्तत्र त्वा देवः सविता दधातु ॥४॥
पूषेमा आशा अनु वेद सर्वाः सो अस्माँ अभयतमेन नेषत् ।
स्वस्तिदा आघृणिः सर्ववीरोऽप्रयुच्छन्पुर एतु प्रजानन् ॥५॥
प्रपथे पथामजनिष्ट पूषा प्रपथे दिवः प्रपथे पृथिव्याः ।
उभे अभि प्रियतमे सधस्थे आ च परा च चरति प्रजानन् ॥६॥

*pūṣā tvetaśchayāvayatu pra vidvānanaṣṭapaśurbhuvanasya gopāḥ /*
*sa tvaitebhyaḥ pari dadatpitṛbhyo'gnirdevebhyaḥ suvidatriyebhyaḥ //3 //*
*āyurviśvāyuḥ pari pāsati tvā pūṣā tvā pātu prapathe purastāt /*
*yatrāsate sukṛto yatra te yayustatra tvā devaḥ savitā dadhātu //4 //*
*pūṣemā āśā anu veda sarvāḥ so asmām̐ abhayatamena neṣat /*
*svastidā āghṛṇiḥ sarvavīro'prayuchchhanpura etu prajānan //5 //*
*prapathe pathāmajaniṣta pūṣā prapathe divaḥ prapathe pṛthivyāḥ /*
*ubhe abhi priyatame sadhasthe ā cha parā cha charati prajānan //6 //*

४. सरण्यूः (Saraṇyūḥ) - ऋ. (Rv.) १०.१७.१-२

त्वष्टा दुहित्रे वहतुं कृणोतीतीदं विश्वं भुवनं समेति ।
यमस्य माता पर्युह्यमाना महो जाया विवस्वतो ननाश ॥१॥
अपागूहन्नमृतां मर्त्येभ्यः कृत्वी सवर्णामदुर्विवस्वते ।
उताश्विनावभरद्यत्तदासीदजहादु द्वा मिथुना सरण्यूः ॥२॥

*tvaṣṭā duhitre vahatuṁ kṛṇotītīdaṁ viśvaṁ bhuvanaṁ sameti /*
*yamasya mātā paryuhyamānā maho jāyā vivasvato nanāśa //1 //*
*apāgūhannamṛtāṁ martyebhyaḥ kṛtvī savarṇāmadadurvivasvate /*
*utāśvināvabharadyattadāsīdajahādu dvā mithunā saraṇyūḥ //2 //*

५. सरस्वती (Sarasvatī) - ऋ. (Rv.) १०.१७.७-९

सरस्वतीं देवयन्तो हवन्ते सरस्वतीमध्वरे तायमाने ।
सरस्वतीं सुकृतो अह्वयन्त सरस्वती दाशुषे वार्यं दात् ॥७॥
सरस्वति या सरथं ययाथ स्वधाभिर्देवि पितृभिर्मदन्ती ।
आसद्यास्मिन्बर्हिषि मादयस्वानमीवा इष आ धेह्यस्मे ॥८॥
सरस्वतीं यां पितरो हवन्ते दक्षिणा यामभिनक्षमाणाः ।
सहस्रार्घमिळो अत्र भागं रायस्पोषं यजमानेषु धेहि ॥९॥

*sarasvatīṁ devayanto havante sarasvatīmadhvare tāyamāne /*
*sarasvatīṁ sukṛto ahnayanta sarasvatī dāśuṣe vārya dāt //7 //*
*sarasvati yā sarathaṁ yayātha svadhābhirdevi pitṛbhirmadantī /*
*āsadyāsminbarhiṣi mādayasvānamīvā iṣa ā dhehyasme //8 //*
*sarasvatīṁ yāṁ pitaro havante dakṣiṇā yāmabhinakṣamāṇāḥ /*
*sahasrārghamiḷo atra bhāgaṁ rāyaspoṣaṁ yajamāneṣu dhehi //9 //*

## २९२. देवश्रवो देववातः (Devaśravā Yāmāyanaḥ)

१. होता (Hotā) - य. (Yv.)११.३५

सीद होतः स्वऽउ लोके चिकित्वान्त्सादया यांसुकृतस्य योनौ ।
देवावीर्देवान् हविषा यजास्यग्ने बृहद्यजमाने वयो धाः ॥३५॥

*sīda hotaḥ sva'u loke chikitvāntsādayā yāṁsukṛtasya yonau /*

*devāvīrdevān haviṣā yajāsyagne bṛhadyajamāne vayo dhāḥ //35 //*

**२९३. देवश्रव-देववातौ (Devaśrava-Devavātau)**

१. अग्निः (Agniḥ) - य. (Yv.)१८.६६-६७

अग्निरस्मि जन्मना जातवेदा घृतं मे चक्षुरमृतं मऽआसन् ।
अर्कस्त्रिधातू रजसो विमानोऽजस्रो घर्मो हविरस्मि नाम ॥६६॥
ऋचो नामास्मि यजूं सि नामास्मि सामानि नामास्मि ।
येऽअग्नयः पांचजन्याऽअस्यां पृथिव्यामधि । तेषामसि त्वमुत्तमः प्र नो जीवातवे सुव ॥६७॥
*agnirasmi janmanā jātavedā ghṛtaṁ me chakṣuramṛtaṁ ma'āsan /*
*arkastridhātū rajaso vimāno'jasro gharmo havirasmi nāma //66 //*
*ṛcho nāmāsmi yajūṁ si nāmāsmi sāmāni nāmāsmi /*
*ye'agnayaḥ pāṁchajanyā'asyāṁ pṛthivyāmadhi / teṣāmasi tvamuttamaḥ pra no jīvātave suva //67 //*

२. विश्वकर्मा अग्निर् वा (Viśvakarmā Agnir Vā) - य. (Yv.)१८.६२

येन वहसि सहस्रं येनाग्ने सर्ववेदसम् । तेनेमं यां नो नय स्वर्देवेषु गन्तवे ॥६२॥
*yena vahasi sahasraṁ yenāgne sarvavedasam / tenemaṁ yāṁ no naya svardeveṣu gantave //62 //*

**२९४. देवाः (Devāḥ)**

१. अग्निः (Agniḥ) - य. (Yv.)१८.१

वाजश्च मे प्रसवश्च मे प्रयतिश्च मे प्रसितिश्च मे धीतिश्च मे क्रतुश्च मे स्वरश्च मे श्लोकश्च मे श्रवश्च मे श्रुतिश्च मे ज्योतिश्च मे स्वश्च मे योन कल्पन्ताम् ॥१॥
*vājaścha me prasavaścha me prayatiścha me prasitiścha me dhītiścha me kratuścha me svaraścha me ślokaścha me śravaścha me śrutiścha me jyotiścha me svaścha me yona kalpantām //1 //*

२. अग्निः सौचीकः (Agniḥ Sauchīkaḥ) - ऋ. (Rv.) १०.५१.१; ३; ५; ७; ९; १०.५३.१-३; १०.५३.६-११

ऋ. (Rv.) १०.५१.१

महत्तदुल्बं स्थविरं तदासीद्येनाविष्टितः प्रविवेशिथापः ।
विश्वा अपश्यद्बहुधा ते अग्ने जातवेदस्तन्वो देव एकः ॥१॥
*mahattadulbaṁ sthaviraṁ tadāsīdyenāviṣṭitaḥ praviveśithāpaḥ /*
*viśvā apaśyadbahudhā te agne jātavedastanvo deva ekaḥ //1 //*

ऋ. (Rv.) १०.५१.३

ऐच्छाम त्वा बहुधा जातवेदः प्रविष्टमग्ने अप्स्वोषधीषु ।
तं त्वा यमो अचिकेच्चित्रभानो दशान्तरुष्यादतिरोचमानम् ॥३॥
*aichchhāma tvā bahudhā jātavedaḥ praviṣṭamagne apsvoṣadhīṣu /*
*taṁ tvā yamo achikechchitrabhāno daśāntaruṣyādatirochamānam //3 //*

ऋ. (Rv.) १०.५१.५

एहि मनुर्देवयुर्यज्ञकामोऽरंकृत्या तमसि क्षेष्यग्ने ।
सुगान्पथः कृणुहि देवयानान्वह हव्यानि सुमनस्यमानः ॥५॥
*ehi manurdevayuryākāmo'raṁkṛtyā tamasi kṣeṣyagne /*
*sugānpathaḥ kṛṇuhi devayānānvaha havyāni sumanasyamānaḥ //5 //*

ऋ. (Rv.) १०.५१.७

कुर्मस्त आयुरजरं यदग्ने यथा युक्तो जातवेदो न रिष्याः ।
अथा वहासि सुमनस्यमानो भागं देवेभ्यो हविषः सुजात ॥७॥
*kurmasta āyurajaraṁ yadagne yathā yukto jātavedo na riṣyāḥ /*
*athā vahāsi sumanasyamāno bhāgaṁ devebhyo haviṣaḥ sujāta //7 //*

ऋ. (Rv.) १०.५१.९

तव प्रयाजा अनुयाजाश्च केवल ऊर्जस्वन्तो हविषः सन्तु भागाः ।
तवाग्ने याो३ऽयमस्तु सर्वतुभ्यं नमन्तां प्रदिशश्चतस्रः ॥९॥
*tava prayājā anuyājāścha kevala ūrjasvanto haviṣaḥ santu bhāgāḥ /*
*tavāgne yāo3'yamastu sarvatubhyaṁ namantāṁ pradiśaśchatasraḥ //9 //*

ऋ. (Rv.) १०.५३.१-३

यमैच्छाम मनसा सो३ऽयमागाद्यास्य विद्वान्परुषश्चिकित्वान् ।
स नो यक्षद्देवताता यजीयान्नि हि षत्सदन्तरः पूर्वो अस्मत् ॥१॥
अराधि होता निषदा यजीयानभि प्रयांसि सुधितानि हि ख्यत् ।
यजामहै यियान्हन्त देवाँ ईळामहा ईड्याँ आज्येन ॥२॥
साध्वीमकर्देववीतिं नो अद्य यास्य जिह्नामविदाम गुह्याम् ।
स आयुरागत्सुरभिर्वसानो भद्रामकर्देवहूतिं नो अद्य ॥३॥
*yamaichchhāma manasā so3'yamāgādyāsya vidvānparuṣaśchikitvān /*
*sa no yakṣaddevatātā yajīyānni hi ṣatsadantaraḥ pūrvo asmat //1 //*
*arādhi hotā niṣadā yajīyānabhi prayāṁsi sudhitāni hi khyat /*
*yajāmahai yiāyānhanta devāṁ̐ īḷāmahā īḍyāṁ̐ ājyena //2 //*
*sādhvīmakardevavītiṁ no adya yāsya jihnāmavidāma guhyām /*
*sa āyurāgatsurabhirvasāno bhadrāmakardevahūtiṁ no adya //3 //*

ऋ. (Rv.) १०.५३.६-११

तन्तुं तन्वन्नजसो भनुमन्विहि ज्योतिष्मतः पथो रक्ष धिया कृतान् ।
अनुल्बणं वयत जोगुवामपो मनुर्भव जनया दैव्यं जनम् ॥६॥
अक्षानहो नह्यतनोत सोम्या इष्कृणुध्वं रशना ओत पिंशत ।
अष्टाबन्धुरं वहताभितो रथं येन देवासो अनयन्नभि प्रियम् ॥७॥
अश्मन्वती रीयते सं रभध्वमुत्तिष्ठत प्र तरता सखायः ।
अत्रा जहाम ये असन्नशेवाः ये शिवान्वयमुत्तरेमाभि वाजान् ॥८॥
त्वष्टा माया वेदपसामष्पस्तमो बिभ्रत्पात्रा देवपानानि शंतमा ।
सतो नूनं कवयः सं शिशीत वाशीभिर्याभिरमृताय तक्षथ ।
विद्वांसः पदा गुह्यानि कर्तन येन देवासो अमृतत्वमानशुः ॥१०॥
गर्भे योषामदधुर्वत्समासन्यपीच्येन मनसोत जिह्नया ।
स विश्वाहा सुमना योग्या अभि सिषासनिर्वनते कार इज्जितिम् ॥११॥
*tantuṁ tanvannajaso bhanumanvihi jyotiṣmataḥ patho rakṣa dhiyā kṛtān /*
*anulbaṇaṁ vayata joguvāmapo manurbhava janayā daivyaṁ janam //6 //*
*akṣānaho nahyatanota somyā iṣkṛṇudhvaṁ raśanā Ota piṁśata /*
*aṣṭābandhuraṁ vahatābhito rathaṁ yena devāso anayannabhi priyam //7 //*
*aśmanvatī rīyate saṁ rabhadhvamuttiṣṭhata pra taratā sakhāyaḥ /*
*atrā jahāma ye asannaśevāḥ ye śivānvayamuttaremābhi vājān //8 //*
*tvaṣṭā māyā vedapasāmaṣpastamo bibhratpātrā devapānāni śaṁtamā /*
*sato nūnaṁ kavayaḥ saṁ śiśīta vāśībhiryābhiramṛtāya takṣatha /*
*vidvāṁsaḥ padā guhyāni kartana yena devāso amṛtatvamānaśuḥ //10 //*
*garbhe yoṣāmadadhurvatsamāsanyapīchyena manasota jihnayā /*
*sa viśvāhā sumanā yogyā abhi siṣāsanirvanate kāra ijjitim //11 //*

३. अन्नवान् विद्वान् (Annavān Vidvān) - य. (Yv.)१८.३२

वाजो नः सप्त प्रदिशश्चतस्रो वो परावतः। वाजो नो विश्वै र्देवैर्धनसाताविहावतु ॥३२॥
*vājo naḥ sapta pradiśaśchatasro vo parāvataḥ / vājo no viśvai rdevairdhanasātāvihāvatu //32 //*

४. आत्मानः (Ātmānaḥ) - य. (Yv.)१८.८-३०

शं च मे मयश्च मे प्रियं च मेऽनुकामश्च मे कामश्च मे सौमनसश्च मे भगश्च मे द्रविणं च मे भद्रं च मे श्रयश्च मे

वसीयश्च मे यशश्च मे योन कल्पन्ताम् ॥८॥
ऊर्क् च मे सूनृता च मे पयश्च मे रसश्च मे घृतं च मे मधु च मे सग्धिश्च मे सपीतिश्च मे कृषिश्च मे वृष्टिश्च मे जैत्रं च मऽऔद्भिद्यं च मे योन कल्पन्ताम् ॥९॥
रयिश्च मे रायश्च मे पुष्टं च मे पुष्टिश्च मे विभु च मे प्रभु च मे पूर्ण च मे पुर्णतरं च मे कुयवं च मेऽक्षितं च मेऽन्नं च मेऽक्षुच्च मे योन कल्पन्ताम् ॥१०॥
वित्तं च मे वेद्यं च मे भूतं च मे भविष्यच्च मे सुगं च मे सुपथ्यं च मऽऋद्धं च मऽऋद्धिश्च मेक्लृप्तं च मे क्लृप्तिश्च मे मतिश्च मे सुमतिश्च मे योन कल्पन्ताम् ॥११॥
व्रीहयश्च मे यवाश्च मे माषाश्च मे तिलाश्च मे मुद्गाश्च मे खल्वाश्च मे प्रियंगवश्च मेऽणवश्चमे श्यामाकाश्च मे नीवाराश्च मे गोधूमाश्च मे मसूराश्च मे योन कल्पन्ताम् ॥१२॥
अश्मा च मे मृत्तिका च मे गिरयश्च मे पर्वताश्च मे सिकताश्च मे वनस्पतयश्च मे हिरण्यं च मेऽयश्च मे श्यामं च मे लोहंच मे सीसं च मे त्रपु च मे योन कल्पन्ताम् ॥१३॥
अग्निश्च मऽआपश्च मे वीरुधश्च मऽओषधयश्च मे कृष्टपच्याश्च मेऽकृष्टपच्याश्च मे ग्राम्याश्च मे पशवऽआरण्याश्च मे वित्तंच मे वित्तिश्च मे भूतंच मे भूतिश्च मे योन कल्पन्ताम् ॥१४॥
वसु च मे वसतिश्च मे कर्म च मे शक्तिश्च मेऽर्थश्च मऽएमश्च मऽइत्या च मे गतिश्च मे योन कल्पन्ताम्॥१५॥
अग्निश्च मऽइन्द्रश्च मे सोमश्च मऽइन्द्रश्च मे सविता च मऽइन्द्रश्च मे सरस्वती च मऽइन्द्रश्चमे पूषा च मऽइन्द्रश्च मे बृहस्पतिश्च मऽइन्द्रश्च मे योन कल्पन्ताम् ॥१६॥
मित्रश्च मऽइन्द्रश्च मे वरुणश्च मऽइन्द्रश्च मे धाता च मऽइन्द्रश्च मे त्वष्टा च मऽइन्द्रश्च मे मरुतश्च म इन्द्रश्च मे विश्वे च मे देवाऽइन्द्रश्च मे योन कल्पन्ताम् ॥१७॥
पृथिवी च मऽइन्द्रश्च मे ऽन्तरिक्षं च मऽइन्द्रश्च मे द्यौश्च मऽइन्द्रश्च मे समाश्च मऽइन्द्रश्च मे नक्षत्राणि च मऽइन्द्रश्च मे दिशश्च मऽइन्द्रश्च मे योन कल्पल्ताम् ॥१८॥
अं शुश्च मे रश्मिश्च मेऽदाभ्यश्च मेऽधिपतिश्च मऽउपां शुश्च मेऽन्तर्यामश्च मऽऐन्द्रवायवश्च मे मैत्रावरुणश्च मऽआश्विनश्च मे प्रतिप्रस्थनश्च मे शुक्रश्च मेमन्थी च मे योन कल्पन्ताम् ॥१९॥
आग्रयणश्च मे वैश्वदेवश्च मे ध्रुवश्च मे वैश्वानरश्च मऽऐन्द्राग्नश्च मे महावैश्वदेवश्च मे मरुत्वतीयाश्च मे निष्केवल्यश्च मे सावित्रश्च मे सारस्वतश्च मे पात्नीवतश्च मे हारियोजनश्च मे योन कल्पन्ताम् ॥२०॥
स्रुचश्च मे चमसाश्च मे वायव्यानि च मे द्रोणकलशश्च मे ग्रावाणश्च मेऽधिषवणे च मे पूतभृच्चमऽआधवनीयश्च मे वेदिश्च मे बर्हिश्च मेऽवभृथश्च मे स्वगाकारश्च मे योन कल्पन्ताम्॥२१॥
अग्निश्च मे घर्मश्च मेऽर्कश्च मे सूर्यश्च मे प्राणश्च मेऽश्वमेधश्च मे पृथिवी च मेऽदितिश्च मे दितिश्च मे द्यौश्च मेऽङ्गुलयः शक्वरयो दिशश्च मे योन कल्पन्ताम् ॥२२॥
व्रतं च मऽऋतवश्च मे तपश्च मे संवत्सरश्च मेऽहोरात्रेऽऊर्वष्ठीवे बृहद्रथन्तरे च मे योन कल्पन्ताम्।२३॥
एका च मे तिस्रश्च मे तिस्रश्च मे पंच च मे पंच च मे सप्त च मे सप्त च मे नव च मे नव च मऽएकादश च मऽएकादश च मे त्रयोदश च मे त्रयोदश च मे पंचदश च मे पंचदश च मे सप्तदश च मे सप्तदश च मे नवदश च मे नवदश च मऽएकविं शतिश्च मऽएकविं शतिश्च मे त्रयोविंशँतिश्च मे पंचविं शतिश्च मे पंचविं शतिश्च मे सप्तविं शतिश्च मे सप्तविं शतिश्च मे नवविं शतिश्च मेऽएकत्रिं शच्च मऽएकत्रिं शच्च मे त्रयस्त्रिं शच्च मे योन कल्पन्ताम् ॥२४॥
चतस्रश्च मेऽष्टौ च मेऽष्टौ च मे द्वादश च मे द्वादश च मे षोडश च मे षोडश च मे विं शतिश्च मे विं शतिश्च मे चतुर्विं शतिश्च मे चतुर्विं शतिश्च मेऽष्टाविं शतिश्च मेऽष्टाविं शतिश्च मे द्वात्रिं शच्च मे द्वात्रिं शच्च मे षट्त्रिं शच्च मे षट्त्रिं शच्च मे चत्वारिं शच्च मे चत्वारिं शच्च मे चतुश्चत्वारिं शच्च मे चतुश्चत्वारिं शच्च मेऽष्टाचत्वारिं शच्च मे योन कल्पन्ताम् ॥२५॥
त्र्यविश्च मे त्र्यवी च मे दित्यवाट् च मे दित्यौही च मे पंचाविश्च मे पंचावी च मे त्रिवत्सश्च मेत्रिवत्सा च मे तुर्यवाट् च मे तुर्यौही च मे योन कल्पन्ताम् ॥२६॥
पष्ठवाट् च मे षष्ठौही च मऽउक्षा च मे वशा च मऽऋषभश्च मे वेहश्च मेऽनड्वाँश्च मे धेनुश्चमे योन कल्पन्ताम् ॥२७॥
वाजाय स्वाहा प्रसवाय स्वाहापिजाय स्वहा क्रतवे स्वाहा वसवे स्वाहाऽहर्पतये स्वाहाह्ने मुग्धाय स्वाहा मुग्धाय वैनं शिनाय स्वाहा विनं शिनऽआन्त्यायनाय स्वाहान्त्याय भौवनाय स्वाहा भुवनस्य पतये स्वाहाधिपतये स्वाहा प्रजापतयेस्वाहा।
इयं ते राणिमत्राय यन्तासि यमनऽऊर्जे त्वा वृष्ट्यै त्वा प्रजानां त्वाधिपत्याय ॥२८॥

आयुर्योन कल्पतां प्राणो योन कल्पतां चक्षुर्योन कल्पतां श्रोत्रं योन कल्पतां वाग्योन कल्पतां मनो योन कल्पतामात्मा योन कल्पतां ब्रह्मा योन कल्पतांज्योतिर्योन कल्पतां स्वर्योन कल्पतां पृष्ठं योन कल्पतां यो योन कल्पताम्। स्तोमश्च यजुश्चऽऋक् च साम च बृहच्च रथन्तरंच।
स्वर्देवाऽअगन्मामृताऽअभूम प्रजापतेः प्रजाऽअभूम वेट् स्वाहा ॥२९॥
वाजस्य नु प्रसवे मातरं महीमदिति नाम वचसा करामहे।
यस्यामिदं विश्वं भुवनमाविवेश तस्यां नो देवः सविता धर्म्म साविषत् ॥ ३० ॥

*śaṁ cha me mayaścha me priyaṁ cha me'nukāmaścha me kāmaścha me saumanasaścha me bhagaścha me draviṇaṁ cha me bhadraṁ cha me śrayaścha me vasīyaścha me yaśaścha me yona kalpantām //8 //*

*ūrk cha me sūnṛtā cha me payaścha me rasaścha me ghṛtaṁ cha me madhu cha me sagdhiścha me sapītiścha me kṛṣiścha me vṛṣṭiścha me jaitraṁ cha ma'audbhidyaṁ cha me yona kalpantām //9 //*

*rayiścha me rāyaścha me puṣṭaṁ cha me puṣṭiścha me vibhu cha me prabhu cha me pūrṇa cha me purṇataraṁ cha me kuyavaṁ cha me'kṣitaṁ cha me'nnaṁ cha me'kṣuchcha me yona kalpantām //10 //*

*vittaṁ cha me vedyaṁ cha me bhūtaṁ cha me bhaviṣyachcha me sugaṁ cha me supathyaṁ cha ma'ṛddhaṁ cha ma'ṛddhiścha meklṛptaṁ cha me klṛptiścha me matiścha me sumatiścha me yona kalpantām //11 //*

*vrīhayaścha me yavāścha me māṣāścha me tilāścha me mudgāścha me khalvāścha me priyaṁgavaścha me'ṇavaścha me śyāmākāścha me nīvārāścha me godhūmāścha me masūrāścha me yona kalpantām //12 //*

*aśmā cha me mṛttikā cha me girayaścha me parvatāścha me sikatāścha me vanaspatayaścha me hiraṇyaṁ cha me'yaścha me śyāmaṁ cha me lohaṁcha me sīsaṁ cha me trapu cha me yona kalpantām //13 //*

*agniścha ma'āpaścha me vīrudhaścha ma'Oṣadhayaścha me kṛṣṭapachyāścha me'kṛṣṭapachyāścha me grāmyāścha me paśava'āraṇyāścha me vittaṁcha me vittiścha me bhūtaṁcha me bhūtiścha me yona kalpantām //14 //*

*vasu cha me vasatiścha me karma cha me śaktiścha me'rthaścha ma'emaścha ma'ityā cha me gatiścha me yona kalpantām //15 //*

*agniścha ma'indraścha me somaścha ma'indraścha me savitā cha ma'indraścha me sarasvatī cha ma'indraśchame pūṣā cha ma'indraścha me bṛhaspatiścha ma'indraścha me yona kalpantām //16 //*

*mitraścha ma'indraścha me varuṇaścha ma'indraścha me dhātā cha ma'indraścha me tvaṣṭā cha ma'indraścha me marutaścha ma indraścha me viśve cha me devā'indraścha me yona kalpantām //17 //*

*pṛthivī cha ma'indraścha me 'ntarikṣaṁ cha ma'indraścha me dyauścha ma'indraścha me samāścha ma'indraścha me nakṣatrāṇi cha ma'indraścha me diśaścha ma'indraścha me yona kalpaltām //18 //*

*aṁ śuścha me raśmiścha me'dābhyaścha me'dhipatiścha ma'upāṁ śuścha me'ntaryāmaścha ma'aindravāyavaścha me maitrāvaruṇaścha ma'āśvinaścha me pratiprasthanaścha me śukraścha memanthī cha me yona kalpantām //19 //*

*āgrayaṇaścha me vaiśvadevaścha me dhruvaścha me vaiśvānaraścha ma'aindrāgnaścha me mahāvaiśvadevaścha me marutvatīyāścha me niṣkevalyaścha me sāvitraścha me sārasvataścha me pātnīvataścha me hāriyojanaścha me yona kalpantām //20 //*

*sruchaścha me chamasāścha me vāyavyāni cha me droṇakalaśaścha me grāvāṇaścha me'dhiṣavaṇe cha me pūtabhṛchchama'ādhavanīyaścha me vediścha me barhiścha me'vabhṛthaścha me svagākāraścha me yona kalpantām //21 //*

*agniścha me gharmaścha me'rkaścha me sūryaścha me prāṇaścha me'śvamedhaścha*

*me pṛthivī cha me'ditiścha me ditiścha me dyauścha me'ṁgulayaḥ śakvarayo diśaścha me yona kalpantām //22 //*
*vrataṁ cha ma'ṛtavaścha me tapaścha me saṁvatsaraścha me'horātre'ūrvīṣṭhīve bṛhadrathantare cha me yona kalpantām /23 //*
*ekā cha me tisraścha me tisraścha me paṁcha cha me paṁcha cha me sapta cha me sapta cha me nava cha me nava cha ma'ekādaśa cha ma'ekādaśa cha me trayodaśa cha me trayodaśa cha me paṁchadaśa cha me paṁchadaśa cha me saptadaśa cha me saptadaśa cha me navadaśa cha me navadaśa cha ma'ekaviṁ śatiścha ma'ekaviṁ śatiścha me trayoviśaṁ̐tiścha me paṁchaviṁ śatiścha me paṁchaviṁ śatiścha me saptaviṁ śatiścha me saptaviṁ śatiścha me navaviṁ śatiścha me'ekatriṁ śachcha ma'ekatriṁ śachcha me trayasriṁ śachcha me yona kalpantām //24 //*
*chatasraścha me'ṣṭau cha me'ṣṭau cha me dvādaśa cha me dvādaśa cha me ṣoḍaśa cha me ṣoḍaśa cha me viṁ śatiścha me viṁ śatiścha me chaturviṁ śatiścha me chaturviṁ śatiścha me'ṣṭāviṁ śatiścha me'ṣṭāviṁ śatiścha me dvātriṁ śachcha me dvātriṁ śachcha me ṣaṭtriṁ śachcha me ṣaṭtriṁ śachcha me chatvāriṁ śachcha me chatvāriṁ śachcha me chatuśchatvāriṁ śachcha me chatuśchatvāriṁ śachcha me'ṣṭāchatvāriṁ śachcha me yona kalpantām //25 //*
*trayaviścha me trayavī cha me dityavāṭ cha me dityauhī cha me paṁchāviścha me paṁchāvī cha me trivatsaścha metrivatsā cha me turyavāṭ cha me turyauhī cha me yona kalpantām //26 //*
*paṣṭhavāṭ cha me ṣaṣṭhauhī cha ma'ukṣā cha me vaśā cha ma'ṛṣabhaścha me vehaścha me'naḍvāṁ̐ścha me dhenuśchame yona kalpantām //27 //*
*vājāya svāhā prasavāya svāhāpijāya svahā kratave svāhā vasave svāhā'harpataye svāhāhne mugdhāya svāhā mugdhāya vainaṁ śināya svāhā vinaṁ śina'āntyāyanāya svāhāntyāya bhauvanāya svāhā bhuvanasya pataye svāhādhipataye svāhā prajāpatayesvāhā /*
*iyaṁ te rāṇimatrāya yantāsi yamana'ūrje tvā vṛṣṭyai tvā prajānāṁ tvādhipatyāya //28 //*
*āyuryona kalpatāṁ prāṇo yona kalpatāṁ chakṣuryona kalpatāṁ śrotraṁ yona kalpatāṁ vāgyona kalpatāṁ mano yona kalpatāmātmā yona kalpatāṁ brahmā yona kalpatāṁjyotiryona kalpatāṁ svaryona kalpatāṁ pṛṣṭhaṁ yona kalpatāṁ yo yona kalpatām / stomaścha yajuścha'ṛk cha sāma cha bṛhachcha rathantaraṁcha / rsvdevā'aganmāmṛtā'abhūma prajāpateḥ prajā'abhūma veṭ svāhā //29 //*
*vājasya nu prasave mātaraṁ mahīmaditi nāma vachasā karāmahe /*
*yasyāmidaṁ viśvaṁ bhuvanamāviveśa tasyāṁ no devaḥ savitā dharmma sāviṣat //30 //*

५. गृहपतयः (Gṛhapatayaḥ) - य. (Yv.)८.५३

युवं तमिन्द्रापर्वता पुरोयुधा यो नः पृतन्यादप तन्तमिद्धतं वज्रेण तन्तमिद्धतम्। दूरे चत्ताय छन्त्सद् गहनं यदिनक्षत्। अस्माकंशत्रून् परि शूर विश्वतो दर्म्मा दर्षीष्ट विश्वतः।
भूर्भुवः स्वः सुप्रजाः प्रजाभिः स्याम सुवीरा वीरैः सुपोषाः पोषैः ॥५३॥

*yuvaṁ tamindrāparvatā puroyudhā yo naḥ pṛtanyādapa tantamiddhataṁ vajreṇa tantamiddhatam / dūre chattāya chhantsad gahanaṁ yadinakṣat / asmākaṁśatrūn pari śūra viśvato darmmā darṣīṣṭa viśvataḥ /*
*bhūrbhuvaḥ svaḥ suprajāḥ prajābhiḥ syāma suvīrā vīraiḥ supoṣāḥ poṣaiḥ //53 //*

६. प्रजापतिः (Prajāpatiḥ) - य. (Yv.)८.५२; १८.२-७; ४४

य. (Yv.)८.५२

सत्रस्यऽऋद्धिरस्यगन्म ज्योतिरमृताऽअभूम।
दिवं पृथिव्याऽअध्यारुहामाविदाम देवान्त्स्वर्ज्योतिः ॥ ५२ ॥
*satrasya'ṛddhirasyaganma jyotiramṛtā'abhūma /*
*divaṁ pṛthivyā'adhyāruhāmāvidāma devāntsvarjyotiḥ // 52 //*

य. (Yv.)१८.२-७

प्राणश्च मेऽपानश्च मे व्यानश्च मेऽसुश्च मे चित्तं च मऽआधीतं च मे वाक् च मे मानश्च मे
चक्षुश्च मे श्रोत्रं च मे दक्षश्च मे बलं योन कल्पन्ताम् ॥२॥
ओजश्च मे सहश्च मऽआत्मा च मे तनूश्च मे शर्म चमे वर्म च मेऽङ्गानि च मेऽस्थीनि च मे
परूं षि च मे शरीराणि च मऽआयुश्च मे जरा च मे योन कल्पन्ताम् ॥३॥
ज्यैष्ठ्यं च मऽआधिपत्यं च मे मन्युश्च मे भामश्च मेऽमश्च मेऽम्भश्च मे जेमा च मे महिमा च मेवरिमा च मे
प्रथिमा च मे वर्षिमा च मे द्राघिमा च मे वृद्धं च मे वृद्धिश्च मे योन कल्पन्ताम्।४
सत्यं च मे श्रद्धा च मे जगच्च मे धनं च मे विश्वं च मे महश्च मे क्रीडा च मे मोदश्च मे जातं च मे जनिष्यमाणं
च मे सूक्तं च मे सुकृतं च मे योन कल्पन्ताम् ॥५॥
ऋतं च मेऽमृतं च मेऽयक्ष्मं च मेऽनामयच्च मे जीवातुश्च मे दीर्घायुत्वं च मेऽनमित्रं च मेऽभयं च मे सुखं च मे
शयनं च मे सूषाश्च मे सुदिनं च मे योन कल्पन्ताम् ॥६॥
यन्ता च मे धर्ता च मे क्षेमश्च मे धृतिश्च मे विश्वं च मे महश्च मे
संविच्च मे क्षात्रं च मे सूश्च मे प्रसूश्च मे सीरं च मे लयश्च मे योन कल्पन्ताम् ॥७॥

*prāṇaścha me'pānaścha me vyānaścha me'suścha me chittaṁ cha ma'ādhītaṁ cha me vāk cha me mānaścha me*
*chakṣuścha me śrotraṁ cha me dakṣaścha me balaṁ yona kalpantām ॥2॥*
*Ojaścha me sahaścha ma'ātmā cha me tanūścha me śarma chame varma cha me'ṁgāni cha me'sthīni cha me*
*parūṁ ṣi cha me śarīrāṇi cha ma'āyuścha me jarā cha me yona kalpantām ॥3॥*
*jyaiṣṭhyaṁ cha ma'ādhipatyaṁ cha me manyuścha me bhāmaścha me'maścha me'mbhścha me jemā cha me mahimā cha mevarimā cha me prathimā cha me varṣimā cha me drāghimā cha me vṛddhaṁ cha me vṛddhiścha me yona kalpantām ।4*
*satyaṁ cha me śraddhā cha me jagachcha me dhanaṁ cha me viśvaṁ cha me mahaścha me krīḍā cha me modaścha me jātaṁ cha me janiṣyamāṇaṁ cha me sūktaṁ cha me sukṛtaṁ cha me yona kalpantām ॥5॥*
*ṛtaṁ cha me'mṛtaṁ cha me'yakṣamaṁ cha me'nāmayachcha me jīvātuścha me dīrghāyutvaṁ cha me'namitraṁ cha me'bhayaṁ cha me sukhaṁ cha me śayanaṁ cha me sūṣāścha me sudinaṁ cha me yona kalpantām ॥6॥*
*yantā cha me dhartā cha me kṣemaścha me dhṛtiścha me viśvaṁ cha me mahaścha me*
*saṁvichcha me kṣātraṁ cha me sūścha me prasūścha me sīraṁ cha me layaścha me yona kalpantām ॥7॥*

य. (Yv.)१८.४४

स नो भुवनस्य पते प्रजापते यस्य तऽउपरि गृहा यस्य वेह।
अस्मै ब्रह्मणेऽस्मै क्षत्राय महि शर्म यच्छ स्वाहा ॥४४॥

*sa no bhuvanasya pate prajāpate yasya ta'upari gṛhā yasya veha ।*
*asmai brahmaṇe'smai kṣatrāya mahi śarma yachchha svāhā ॥44॥*

७. प्रजापतयो गृहस्थाः (Prajāpatayo Gṛhasthāḥ) - य. (Yv.)८.५१

इह रतिरिह रमध्वमिह धृतिरिह स्वधृतिः स्वाहा। उपसृजन्धरुणं मात्रे धरुणो मातरं धयन्। रायस्पोषमस्मासु
दीधरत् स्वाहा ॥५१॥

*iha ratiriha ramadhvamiha dhṛtiriha svdhṛtiḥ svāhā । upasṛjandharuṇaṁ mātre dharuṇo mātaraṁ dhayan । rāyaspoṣamasmāsu dīdharat svāhā ॥51॥*

८. प्रजापतयः (Prajāpatayaḥ) - य. (Yv.)८.४८

व्रेशीनां त्वा पत्मन्नाधूनोमि। कुकूननानां त्वा पत्मन्नाधूनोमि। भन्दनानां त्वा पत्मन्नाधूनोमि।
मदिन्तमानां त्वा पत्मन्नाधूनोमि। मधुन्तमानां त्वा पत्मन्नाधूनोमि।
शुक्रंऽआधूनोम्यह्नो रूपे सूर्य्यस्य रश्मिषु॥४८॥

*vreśīnāṁ tvā patmannādhūnomi । kukūnanānāṁ tvā patmannādhūnomi ।*
*bhandanānāṁ tvā patmannādhūnomi ।*
*madintamānāṁ tvā patmannādhūnomi । madhuntamānāṁ tvā patmannādhūnomi ।*
*śukraṁ'ādhūnomyahno rūpe sūryyasya raśmiṣu ॥48 ॥*

९. याः (Yāḥ) - य. (Yv.)१८.४२

भुज्युः सुपर्णो याो गन्धर्वस्तस्य दक्षिणाऽअप्सरस स्तावा नाम ।
स नऽइदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा वाट् ताभ्यः स्वाहा ॥४२ ॥
*bhujyuḥ suparṇo yāo gandharvastasya dakṣiṇā'apsarasa stāvā nāma ।*
*sa na'idaṁ brahma kṣatraṁ pātu tasmai svāhā vāṭ tābhyaḥ svāhā ॥42 ॥*

१०. वातः (Vātaḥ) - य. (Yv.)१८.४१

इषिरो विश्वव्यचा वातो गन्धर्वस्तस्यापोऽअप्सरसऽऊर्जो नाम ।
स नऽइदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा वाट् ताभ्यः स्वाहा ॥४१ ॥
*iṣiro viśvavyachā vāto gandharvastasyāpo'apsarasa'ūrjo nāma ।*
*sa na'idaṁ brahma kṣatraṁ pātu tasmai svāhā vāṭ tābhyaḥ svāhā ॥41 ॥*

११. विश्वकर्मा (Viśvakarmā) - य. (Yv.)१८.४३

प्रजापतिर्विश्वकर्मा मनो गन्धर्वस्तस्यऽऋक्सामान्यप्सरसऽएष्टयो नाम ।
स नऽइदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा वाट् ताभ्यः स्वाहा ॥४३ ॥
*prajāpatirviśvakarmā mano gandharvastasya'ṛksāmānyapsarasa'eṣṭayo nāma ।*
*sa na'idaṁ brahma kṣatraṁ pātu tasmai svāhā vāṭ tābhyaḥ svāhā ॥43 ॥*

१२. विश्वेदेवाः (Viśvedevāḥ) - य. (Yv.)१८.३१

विश्वेऽअद्य मरुतो विश्वऽऊती विश्वे भवन्त्वग्नयः समिद्धाः ।
विश्वे नो देवाऽअवसागमन्तु विश्वमस्तु द्रविणं वाजोऽअस्मे ॥३१ ॥
*viśve'adya maruto viśva'ūtī viśve bhavantvagnayaḥ samiddhāḥ ।*
*viśve no devā'avasāgamantu viśvamastu draviṇaṁ vājo'asme ॥31 ॥*

१३. प्रजापतयः (Prajāpatayaḥ) - य. (Yv.)८.४९

ककुभंरूपं वृषभस्य रोचते बृहच्छुक्रः शुक्रस्य पुरोगः सोमः सोमस्य पुरोगाः ।
यत्ते सोमादाभ्यं नाम जागृवि तस्मै त्वा गृह्णामि तस्मै ते सोम सोमाय स्वाहा ॥४९ ॥
*kakubhaṁrūpaṁ vṛṣabhasya rochate bṛhachchhukraḥ śukrasya purogaḥ seāmaḥ somasya purogāḥ ।*
*yatte somādābhyaṁ nāma jāgṛvi tasmai tvā gṛhṇāmi tasmai te soma somāya svāhā ॥49 ॥*

## २९५. देवश्रवा देववातश्च भारतौ (Devaśravā Devavātaścha Bhāratau)

१. अग्निः (Agniḥ) - ऋ. (Rv.) ३.२३.१-५

निर्मथितः सुधित आ सधस्थे युवा कविरध्वरस्य प्रणेता ।
जूर्यत्स्वग्निरजरो वनेष्वत्रा दधे अमृतं जातवेदाः ॥१ ॥
अमन्थिष्टां भारता रेवदग्निं देवश्रवा देववातः सुदक्षम् ।
अग्ने वि पश्य बृहताभि रायेषां नो नेता भवतादनु द्यून् ॥२ ॥
दश क्षिपः पूर्व्यं सीमजीजनन्सुजातं मातृषु प्रियम् ।
अग्निं स्तुहि दैववातं देवश्रवो यो जनानामसद्वशी ॥३ ॥
नि त्वा दधे वर आ पृथिव्या इळायास्पदे सुदिनत्वे अह्नाम् ।
दृषद्वत्यां मानुष आपयायां सरस्वत्यां रेवदग्ने दिदीहि ॥४ ॥
इळामग्ने पुरुदंसं सनि गोः शश्वत्तमं हवमानाय साध ।
स्यान्नः सूनुस्तनयो विजावाग्ने सा ते सुमतिर्भूत्वस्मे ॥५ ॥
*nirmathitaḥ sudhita ā sadhasthe yuvā kaviradhvarasya praṇetā ।*
*jūryatsvagnirajaro vaneṣvatrā dadhe amṛtaṁ jātavedāḥ ॥1 ॥*
*amanthiṣṭāṁ bhāratā revadagniṁ devaśravā devavātaḥ sudakṣam ।*

*agne vi paśya bṛhatābhi rāyeṣāṁ no netā bhavatādanu dyūn //2 //*
*daśa kṣipaḥ pūrvya sīmajījanansujātaṁ mātṛṣu priyam /*
*agiṁna stuhi daivavātaṁ devaśravo yo janānāmasadvaśī //3 //*
*ni tvā dadhe vara ā pṛthivyā iḻāyāspade sudinatve ahnām /*
*dṛṣadvatyāṁ mānuṣa āpayāyāṁ sarasvatyāṁ revadagne didīhi //4 //*
*iḻāmagne purudaṁsaṁ sani goḥ śaśvattamaṁ havamānāya sādha /*
*syānnaḥ sūnustanyo vijāvāgne sā te sumatirbhūtvasme //5 //*

## २९६. देवातिथिः (Devātithiḥ)

१. इन्द्रः (Indraḥ) - अ. (Av.) २०.१२०.१-२; २०.१२१.१-२

अ. (Av.) २०.१२०.१-२

यदिन्द्र प्रागपागुदङ्न्यग्वा हूयसे नृभिः । सिमा पुरू नृषूतो अस्यानवेऽसि प्रशर्ध तुर्वशे ॥१॥
यद्वा रुमे रुशमे श्यावके कृप इन्द्र मादयसे सचा ।
कण्वासस्त्वा ब्रह्माभि स्तोमवाहस इन्द्रा यच्छन्त्या गहि ॥२॥
*yadindra prāgapāgudaṁnyagvā hūyase nṛbhiḥ / simā purū nṛṣūto asyānave'si praśardha turvaśe //1 //*
*yadvā rume ruśame śyāvake kṛpa indra mādayase sachā /*
*kaṇvāsastvā brahmābhi stomavāhasa indrā yachchhantyā gahi //2 //*

अ. (Av.) २०.१२१.१-२

अभि त्वा शूर नोनुमोऽदुग्धाइव धेनवः । ईशानमस्य जगतः स्वर्दृशमीशानमिन्द्र तस्थुषः ॥१॥
न त्वावाँ अन्यो दिव्यो न पार्थिवो न जातो न जनिष्यते ।
अश्वायन्तो मघवन्निन्द्र वाजिनो गव्यन्तस्त्वा हवामहे ॥२॥
*abhi tvā śūra nonumo'dugdhāiva dhenavaḥ / īśānamasya jagataḥ svardṛśamīśānamindra tasthuṣaḥ //1 //*
*na tvāvām̐ anyo divyo na pārthivo na jāto na janiṣyate /*
*aśvāyanto maghavannindra vājino gavyantastvā havāmahe //2 //*

## २९७. देवातिथिः काण्वः (Devātithiḥ Kāṇvaḥ)

१. इन्द्रः (Indraḥ) - सा. (Sv.) २५२; २७७; २७९; ३०८; १२३१-३२; १६०५-१६०६; १७२१-२२

सा. (Sv.) २५२

यथा गौरो अपा कृतं तृष्यन्नेत्यवेरिणम् ।
आपित्वे नः प्रपित्वे तूयमा गहि कण्वेषु सु सचा पिब ॥१०॥
*yathā gauro apā kṛtaṁ tṛṣyannetyaveriṇam /*
*āpitve naḥ prapitve tūyamā gahi kaṇveṣu su sachā piba //10 //*

सा. (Sv.) २७७

अश्वी रथी सुरूप इद्गोमान् यदिन्द्र ते सखा ।
श्वत्रभाजा वयसा सचते सदा चन्द्रैर्याति सभामुप ॥५॥
*aśvī rathī surūpa idgomān yadindra te sakhā /*
*śvatrabhājā vayasā sachate sadā chandrairyāti sabhāmupa //5 //*

सा. (Sv.) २७९

यदिन्द्र प्रागपागुदङ्न्यग्वा हूयसे नृभिः । सिमा पुरू नृषूतो अस्यानवेऽसि प्रशर्ध तुर्वशे ॥७॥
*yadindra prāgapāgudaḍnyagvā hūyase nṛbhiḥ / simā purū nṛṣūto asyānave'si praśardha turvaśe //7 //*

सा. (Sv.) ३०८

अध्वर्यो द्रावया तवं सोममिन्द्रः पिपासति । उपोनूनं युयुजे वृषणा हरी आ च जगाम वृत्रहा ॥६॥
*adhvaryo drāvayā tavaṁ somamindraḥ pipāsati / uponūnaṁ yuyuje vṛṣaṇā harī ā cha jagāma vṛtrahā //6 //*

सा. (Sv.) १२३१-३२

यदिन्द्र प्रागपागुदङ्न्यग्वा हूयसे नृभिः । सिमा पुरू नृषूतो अस्यानवेऽसि प्रशर्ध तुर्वशे ॥१॥
यद्वा रुमे रुशमे श्यावके कृप इन्द्र मादयसे सचा ।
कण्वासस्त्वा स्तोमेभिर्ब्रह्मवाहस इन्द्रा यच्छन्त्या गहि ॥२॥

*yadindra prāgapāgudaḍnyagvā hūyase nṛbhiḥ । simā purū nṛṣūto asyānave'si praśardha turvaśe ॥1॥*
*yadvā rume ruśame śyāvake kṛpa indra mādayase sachā ।*
*kaṇvāsastavā stomebhirbrahmāvāhasa indrā yachchhantyā gahi ॥2॥*

सा. (Sv.) १६०५-१६०६

मा भेम मा श्रमिष्मोग्रस्य सख्ये तव । महत्ते वृष्णो अभिचक्ष्यं कृतं पश्येम तुर्वशं यदुम् ॥१॥
सव्यामनु स्फिग्यं वावसे वृषा न दानो अस्य रोषति ।
मध्वा संपृक्ताः सारघेण धेनवस्तूयमेहि द्रवा पिब ॥२॥

*mā bhema mā śramiṣmograsya sakhye tava । mahatte vṛṣṇo abhichakṣayaṁ kṛtaṁ paśyema turvaśaṁ yadum ॥1॥*
*savyāmanu sphigyaṁ vāvase vṛṣā na dāno asya roṣati ।*
*madhvā saṁpṛktāḥ sāragheṇa dhenavastūyamehi dravā piba ॥2॥*

सा. (Sv.) १७२१-२२

यथा गौरो अपा कृतं तृष्यन्नेत्यवेरिणम् ।
आपित्वे नः प्रपित्वे तूयमा गहि कण्वेषु सु सचा पिब ॥१॥
मन्दन्तु त्वा मघवन्निन्द्रेन्दवो राधोदेयाय सुन्वते ।
आमुष्या सोममपिबश्चमू सुतं ज्येष्ठं तद्दधिषे सहः ॥२॥

*yathā gauro apā kṛtaṁ tṛṣyannetyaveriṇam ।*
*āpitve naḥ prapitve tūyamā gahi kaṇveṣu su sachā piba ॥1॥*
*mandantu tvā maghavannindrendavo rādhodeyāya sunvate ।*
*āmuṣyā somamapibaśchamū sutaṁ jyeṣṭhaṁ taddadhiṣe sahaḥ ॥2॥*

## २९८. देवातिथिः काण्वः (Devātithiḥ Kāṇvaḥ)

१. इन्द्रः (Indraḥ) - ऋ. (Rv.) ८.४.१-१४

यदिन्द्र प्रागपागुदङ् न्यग्वा हूयसे नृभिः ।
सिमा पुरू नृषूतो अस्यानवेऽसि प्रशर्ध तुर्वशे ॥१॥
यद्वा रुमे रुशमे श्यावके कृप इन्द्र मादयसे सचा ।
कण्वासस्त्वा बृह्मभिः स्तोमवाहस इन्द्रा यच्छन्त्या गहि ॥२॥
यथा गौरो अपा कृतं तृष्यन्नेत्यवेरिणम् ।
आपित्वे नः प्रपित्वे तूयमा गहि कण्वेषु सु सचा पिब ॥३॥
मन्दन्तु त्वं मघवन्निन्द्रेन्दवो राधोदेयाय सुन्वते ।
आमुष्या सोममपिबश्चमू सुतं ज्येष्ठं तद्दधिषे सहः ॥४॥
प्र चक्रे सहसा सहो बभंज मन्युमोजसा ।
विश्वे त इन्द्र पृतनायवो यहो नि वृक्षाइव येमिरे ॥५॥
सहस्रेणेव सचते यवीयुधा यस्त आनळुपस्तुतिम् ।
पुत्रं प्रावर्गं कृणुते सुवीर्ये दाश्नोति नम उक्तिभिः ॥६॥
मा भेम मा श्रमिष्मोग्रस्य सख्ये तव ।
महत्ते वृष्णो अभिचक्ष्यं कृतं पश्येम तुर्वशं यदुम् ॥७॥
सव्यामनु स्फिग्यं वावसे वृषा न दानो अस्य रोषति ।
मध्वा सम्पृक्ताः सारघेण धेनवस्तृयमेहि द्रवा पिब ॥८॥
अश्वी रथी सुरूप इद् गोमाँ इदिन्द्र ते सखा ।
श्वात्रभाजा वयसा सचते सदा चन्द्रो याति सभामुप ॥९॥
ऋश्यो न तृष्यन्नवपानमा गहि पिबा सोमं वशाँ अनु ।

निमेघमानो मघवन्दिवेदिव ओजिष्ठं दधिषे सहः ॥१०॥
अध्वर्यो द्रावया त्वं सोममिन्द्रः पिपासति ।
उप नूनं युयुजे वृषणा हरी आ च जगाम वृत्रहा ॥११॥
स्वयं चित्स मन्यते दाशुरिर्जनो यत्रा सोमस्य तृम्पसि ।
इदं ते अन्न युज्यं समुक्षितं तस्येहि प्र द्रवा पिब ॥१२॥
रथेष्ठायाध्वर्यवः सोममिन्द्राय सोतन । अधि बृध्नस्याद्रयो वि चक्षते सुन्वन्तो दाश्वध्वरम् ॥१३॥
उप ब्रध्नं वावाता वृषणा हरी इन्द्रमपसु वक्षतः ।
अर्वांचं त्वा सप्तयोऽध्वरश्रियो वहन्तु सवनेदुप ॥१४॥
*yadindra prāgapāgudaṁ nyagvā hūyase nṛbhiḥ /*
*simā purū nṛṣūto asyānave'si praśardha tṛrvaśe //1 //*
*yadvā rume ruśame śyāvake kṛpa indra mādayase sachā /*
*kaṇvāsastvā bṛhmabhiḥ stomavāhasa indrā yachchhantyā gahi //2 //*
*yathā gauro apā kṛtaṁ tṛṣyannetyaveriṇam /*
*āpitve naḥ prapitve tūyamā gahi kaṇveṣu su sachā piba //3 //*
*mandantu tvaṁ maghavannindrendavo rādhodeyāya sunvate /*
*āmuṣyā somamapibaśchamū sutaṁ jyeṣṭhaṁ taddadhiṣe sahaḥ //4 //*
*pra chakre sahasā saho babhaṁja manyumojasā /*
*viśve ta indra pṛtanāyavo yaho ni vṛkṣāiva yemire //5 //*
*sahasreṇeva sachate yavīyudhā yasta ānaḷupastutim /*
*putraṁ prāvarga kṛṇute suvīrye dāśnoti nama uktibhiḥ //6 //*
*mā bhema mā śramiṣmograsya sakhye tava /*
*mahatte vṛṣṇo abhichakṣayaṁ kṛtaṁ paśyema turvaśaṁ yadum //7 //*
*savyāmanu sphigyaṁ vāvase vṛṣā na dāno asya roṣati /*
*madhvā sampṛktāḥ sāragheṇa dhenavastṛyamehi dravā piba //8 //*
*aśvī rathī surūpa id gomām̐ idindra te sakhā /*
*śvatrabhājā vayasā sachate sadā chandro yāti sabhāmupa //9 //*
*ṛśyo na tṛṣyannavapānamā gahi pibā somaṁ vaśām̐ anu /*
*nimeghamāno maghavandivediva Ojiṣṭhaṁ dadhiṣe sahaḥ //10 //*
*adhvaryo drāvayā tvaṁ somamindraḥ pipāsati /*
*upa nūnaṁ yuyuje vṛṣaṇā harī ā cha jagāma vṛtrahā //11 //*
*svayaṁ chitsa manyate dāśurirjano yatrā somasya tṛmpasi /*
*idaṁ te anna yujyaṁ samukṣitaṁ tasyehi pra dravā piba //12 //*
*ratheṣṭhāyādhvaryavaḥ somamindrāāya sotana / adhi bṛdhnasyādrayo vi chakṣate sunvanto dāśvadhvaram //13 //*
*upa bradhnaṁ vāvātā vṛṣaṇā harī indramapasu vakṣataḥ /*
*arvāṁchaṁ tvā saptayo'dhvaraśriyo vahantu savanedupa //14 //*

२. इन्द्रः पूषा वा (Indraḥ Pūṣā Vā) - ऋ. (Rv.) ८.४.१५-१८

प्र पूषणं वृणीमहे युज्याय पुरूवसुम् ।
स शक्र शिक्ष पुरुहूत नो धिया तुजे राये विमोचन ॥१५॥
सं नः शिशीहि भुरिजोरिव क्षुरं रास्व रायो विमोचन ।
त्वे तन्नः पूषन्नृंजसे वेमि स्तोतव आघृणे ।
न तस्य वेम्यरणं हि तद्वसो स्तुषे पज्राय साम्ने ॥१७॥
परा गावो यवसं कच्चिदाघृणे नित्यं रेक्णो अमर्त्य ।
अस्माकं पूषन्नविता शिवो भव मंहिष्ठो वाजसातये ॥१८॥
*pra pūṣaṇaṁ vṛṇīmahe yujyāya purūvasum /*
*sa śakra śikṣa puruhūta no dhiyā tuje rāye vimochana //15 //*
*saṁ naḥ śiśīhi bhurijoriva kṣuraṁ rāsva rāyo vimochana /*
*tve tannaḥ pūṣannṛṁjase vemi stotava āghṛṇe /*

*na tasya vemyaraṇaṁ hi tadvaso stuṣe pajrāya sāmne ॥17॥*
*parā gāvo yavasaṁ kachchidāghṛṇe nityaṁ rekṇo amartya ।*
*asmākaṁ pūṣannavitā śivo bhava maṁhiṣṭho vājasātaye ॥18॥*

३. कुरुंगस्य दानस्तुतिः (Kuruṁgasya Dānastutiḥ) - ऋ. (Rv.) ८.४.१९-२१

स्थूरं राधः शताश्वं कुरुंगस्य दिविष्टिषु । रास्त्वेषस्य सुभगस्य रातिषु तुर्वशेष्वमन्महि ॥१९॥
धीभिः सातानि काण्वस्य वाजिनः प्रियमेधैरभिद्युभिः ।
षष्टि सहस्रानु निर्मजामजे निर्यूथानि गवामृषिः ॥२०॥
वृक्षाश्चिन्मे अभिपित्वे अरारणुः । गां भजन्त मेहनाश्वं भजन्त मेहना ॥२१॥

*sthūraṁ rādhaḥ śatāśvaṁ kuruṁgasya diviṣṭiṣu । rāāstveṣasya subhagasya rātiṣu turvaśeṣvamanmahi ॥19॥*
*dhībhiḥ sātāni kāṇvasya vājinaḥ priyamedhairabhidyubhiḥ ।*
*ṣaṣṭi sahasrānu nirmajāmaje niryūthāni gavāmṛṣiḥ ॥20॥*
*vṛkṣāśchinme abhipitve arāraṇuḥ । gāṁ bhajanta mehanāśvaṁ bhajanta mehanā ॥21॥*

## २९९. देवापिर् आर्ष्टिषेणः (Devāpir Ārṣṭiṣeṇaḥ)

१. देवाः (Devāḥ) - ऋ. (Rv.) १०.९८.१-१२

बृहस्पते प्रति मे देवतामिहि मित्रो वा यद्वरुणो वासि पूषा ।
आदित्यैर्वा यद्वसुभिर्मरुत्वान्त्स पर्जन्यं शन्तनवे वृषाय ॥१॥
आ देवो दूतो अजिरश्चिकित्वान्त्वद्देवापे अभि मामगच्छत् ।
प्रतीचीनः प्रति मामा ववृत्स्व दधामि ते द्युमतीं वाचमासन् ॥२॥
अस्मे धेहि द्युमतीं वाचमासन् बृहस्पते अनमीवामिषिराम् ।
यया वृष्टिं शन्तनवे वनाव दिवो द्रप्सो मधुमाँ आ विवेश ॥३॥
आ नो द्रप्सा मधुमन्तो विशन्त्विन्द्र देह्यधिरथं सहस्रम् ।
नि षीद होत्रमृतुथा यजस्व देवान्देवापे हविषा सपर्य ॥४॥
आर्ष्टिषेणो होत्रमृषिर्निषीदन् देवापिर्देवसुमतिं चिकित्वान् ।
स उत्तरस्मादधरं समुद्रमपो दिव्या असृजद्वर्ष्या अभि ॥५॥
अस्मिन्त्समुद्रे अध्युत्तरस्मिन्नापो देवेभिर्निवृता अतिष्ठन् ।
ता अद्रवन्नार्ष्टिषेणेन सृष्टा देवापिना प्रेषिता मृक्षिणीषु ॥६॥
यद्देवापिः शन्तनवे पुरोहितो होत्राय वृतः कृपयन्नदीधेत् ।
देवश्रुतं वृष्टिवनिं रराणो बृहस्पतिर्वाचमस्मा अयच्छत् ॥७॥
यं त्वा देवापिः शुशुचानो अग्न आर्ष्टिषेणो मनुष्यः समीधे ।
विश्वेभिर्देवैरनुमद्यमानः प्र पर्जन्यमीरया वृष्टिमन्तम् ॥८॥
त्वां पूर्व ऋषयो गीर्भिरायन्त्वामध्वरेषु पुरुहूत विश्वे ।
सहस्राण्यधिरथान्यस्मे आ नो यां रोहिदश्वोप याहि ॥९॥
एतान्यग्ने नवतिर्नव त्वे आहुतान्यधिरथा सहस्रा ।
तेभिर्वर्धस्व तन्वः शूर पूर्वीर्दिवो नो वृष्टिमिषितो रिरीहि ॥१०॥
एतान्यग्ने नवतिं सहस्रा सं प्र यच्छ वृष्ण इन्द्राय भागम् ।
विद्वान्पथ ऋतुशो देवयानानप्यौलानं दिवि देवेषु धेहि ॥११॥
अग्ने बाधस्व वि मृधो वि दुर्गहापामीवामप रक्षांसि सेध ।
अस्मात्समुद्राद् बृहतो दिवो नोऽपां भूमानमुप नः सृजेह ॥१२॥

*bṛhaspate prati me devatāmihi mitro vā yadvaruṇo vāsi pūṣā ।*
*ādityairvā yadvasubhirmarutvāntsa parjanyaṁ śantanave vṛṣāya ॥1॥*
*ā devo dūto ajiraśchikitvāntvaddevāpe abhi māmagachchhat ।*
*pratīchīnaḥ prati māmā vavṛtsva dadhāmi te dyumatīṁ vāchamāsan ॥2॥*
*asme dhehi dyumatīṁ vāchamāsan bṛhaspate anamīvāmiṣirām ।*
*yayā vṛṣṭiṁ śantanave vanāva divo drapso madhumām̐ ā viveśa ॥3॥*

*ā no drapsā madhumanto viśantvindra dehyadhiratham sahasram* ।
*ni ṣīda hotramṛtuthā yajasva devāndevāpe haviṣā saparya* ॥4॥
*ārṣṭiṣeṇo hotramṛṣirniṣīdan devāpirdevasumatim chikitvān* ।
*sa uttarasmādadharam samudramapo divyā asṛjadvarṣyā abhi* ॥5॥
*asmintsamudre adhyuttarasminnāpo devebhirnivṛtā atiṣṭhan* ।
*tā adravannārṣṭiṣeṇena sṛṣṭā devāpinā preṣitā mṛkṣiṇīṣu* ॥6॥
*yaddevāpiḥ śantanave purohito hotrāya vṛtaḥ kṛpayannadīdhet* ।
*devaśrutam vṛṣṭivanim rarāṇo bṛhaspatirvāchamasmā ayachchhat* ॥7॥
*yam tvā devāpiḥ śuśuchāno agna ārṣṭiṣeṇo manuṣyaḥ samīdhe* ।
*viśvebhirdevairanumadyamānaḥ pra parjanyamīrayā vṛṣṭimantam* ॥8॥
*tvām pūrva ṛṣayo gīrbhirāyantvāmadhvareṣu puruhūta viśve* ।
*sahasrāṇyadhirathānyasme ā no yām rohidaśvopa yāhi* ॥9॥
*etānyagne navatirnava tve āhutānyadhirathā sahasrā* ।
*tebhirvardhasva tanvaḥ śūra pūrvīrdivo no vṛṣṭimiṣito ririhi* ॥10॥
*etānyagne navatim sahasrā sam pra yachchha vṛṣṇa indrāya bhāgam* ।
*vidvānpatha ṛtuśo devayānānapyaulānam divi deveṣu dhehi* ॥11॥
*agne bādhasva vi mṛdho vi durgahāpāmīvāmapa rakṣāmsi sedha* ।
*asmātsamudrād bṛhato divo no'pām bhūmānamupa naḥ sṛjeha* ॥12॥

**३००. द्युतानो मारुतः (साग्री. सास्वा. सार्षेदी.); तिरश्चीर् आंगिरसः (ऋसर्व. ८.९६.७; १३; १६) (Dyutāno Mārutaḥ [Ssb. Sas. Sad.]; Tiraśchīr Āṁgirasaḥ [Rss. 8.96.7; 13; 16])**

१. इन्द्रः (Indraḥ) - सा. (Sv.) ३२३; ३२४; ३२६

सा. (Sv.) ३२३-२४

अव द्रप्सो अंशुमतीमतिष्ठदियानः कृष्णो दशभिः सहस्रैः ।
आवत्तमिन्द्रः शच्या धमन्तमप स्नीहितिं नृमणा अधद्राः ॥१॥
वृत्रस्य त्वा श्वसथादीषमाणा विश्वे देवा अजहुर्ये सखायः ।
मरुद्भिरिन्द्र सख्यं ते अस्त्वथेमा विश्वाः पृतना जयासि ॥२॥
*ava drapso amśumatīmatiṣṭhadiyānaḥ kṛṣṇo daśabhiḥ sahasraiḥ* ।
*āvattamindraḥ śachyā dhamantamapa snīhitim nṛmaṇā adhadrāḥ* ॥1॥
*vṛtrasya tvā śvasathādīṣamāṇā viśve devā ajahurye sakhāyaḥ* ।
*marudbhirindra sakhyam te astvathemā viśvāḥ pṛtanā jayāsi* ॥2॥

सा. (Sv.) ३२६

त्वं ह त्यत्सप्तभ्यो जायमानोऽशत्रुभ्यो अभवः शत्रुरिन्द्र ।
गूढे द्यावापृथिवी अन्वविन्दो विभुमद्भ्यो भुवनेभ्यो रणं धाः ॥४॥
*tvam ha tyatsaptabhyo jāyamāno'śatrubhyo abhavaḥ śatrurindra* ।
*gūḍhe dyāvāpṛthivī anvavindo vibhumadbhyo bhuvanebhyo raṇam dhāḥ* ॥4॥

**३०१. द्युतानो मारुतः (साग्री. सार्षेदी.); तिरश्चीर् द्युतानो वा मारुतः (ऋसर्व.) (Dyutāno Mārutaḥ [Ssb. Sad.]; Tiraśchīr Dyutāno Vā Mārutaḥ [Rss.])**

१. इन्द्रः (Indraḥ) - ऋ. (Rv.) ८.९६.१-१३; ८.९६.१६-२१

ऋ. (Rv.) ८.९६.१-१३

अस्मा उषास आतिरन्त याममिन्द्राय नक्तमूर्म्याः सुवाचः ।
अस्मा आपो मातरः सप्त तस्थुर्नृभ्यस्तराय सिन्धवः सुपाराः ॥१॥
अतिविद्धा विथुरेणा चिदस्त्रा त्रिः सप्त सानु संहिता गिरीणाम् ।
न तद्देवो न मर्त्यस्तुतुर्याद्यानि प्रवृद्धो वृषभश्चकार ॥२॥
इन्द्रस्य वज्र आयसो निमिश्ल इन्द्रस्य बाह्वोर्भूयिष्ठमोजः ।
शीर्षन्निन्द्रस्य क्रतवो निरेक आसन्नेषन्त श्रुत्या उपाके ॥३॥
मन्ये त्वा यियं यियानां मन्ये त्वा च्यवनमच्युतानाम् ।

मन्ये त्वा सत्वनामिन्द्र केतुं मन्ये त्वा वृषभं चर्षणीनाम् ॥४॥
आ यद्वज्रं बाह्वोरिन्द्र धत्से मदच्युतमहये हन्त्वा उ ।
प्र पर्वता अन्वन्त प्र गावः प्र ब्रह्माणो अभिनक्षन्त इन्द्रम् ॥५॥
तमु ष्टवाम य इमा जजान विश्वा जातान्यवराण्यस्मात् ।
इन्द्रेण मित्रं दिधिषेम गीर्भिरुपो नमोभिर्वृषभं विशेम ॥६॥
वृत्रस्य त्वा श्वसथादीषमाणा विश्वे देवा अजहुर्ये सखायः ।
मरुद्भिरिन्द्र सख्यं ते अस्त्वथेमा विश्वाः पृतना जयासि ॥७॥
त्रिः षष्टिस्त्वा मरुतो वावृधाना उस्रा इव राशयो यियासः ।
उप त्वेमः कृधि नो भागधेयं शुष्मं त एना हविषा विधेम ॥८॥
तिग्ममायुधं मरुतामनीकं कस्त इन्द्र प्रति वज्रं दधर्ष ।
अनायुधासो असुरा अदेवाश्चक्रेण ताँ अप वप ऋजीषिन् ॥९॥
मह उग्राय तवसे सुवृक्तिं प्रेरय शिवतमाय पश्वः ।
गिर्वाहसे गिर इन्द्राय पूर्वीर्धेहि तन्वे कुविदंग देवत् ॥१०॥
उक्थवाहसे विभ्वे मनीषां द्रुणा न पारमीरया नदीनाम् ।
नि स्पृश धिया तन्वि श्रुतस्य जुष्टतरस्य कुविदंग वेदत् ॥११॥
तद्विविड्ढि यत्त इन्द्रो जुजोषत्स्तुहि सुष्टुतिं नमसा विवास ।
उप भूष जरितर्मा रुवण्यः श्रावया वाचं कुविदंग वेदत् ॥१२॥
अव द्रप्सो अंशुमतीमतिष्ठदियानः कृष्णो दशभिः सहस्रैः ।
जावत्तमिन्द्रः शच्या धमन्तमप स्नेहितीर्नृमणा अधत्त ॥१३॥

*asmā uṣāsa ātiranta yāmamindrāya naktamūrmyāḥ suvāchaḥ* /
*asmā āpo mātaraḥ sapta tasthurnṛbhyastarāya sindhavaḥ supārāḥ* //1 //
*atividdhā vithureṇā chidastrā triḥ sapta sānu saṁhitā girīṇām* /
*na taddevo na martyastuturyādyāni pravṛddho vṛṣabhaśchakāra* //2 //
*indrasya vajra āyaso nimiśla indrasya bāhnorbhūyiṣṭhamojaḥ* /
*śīrṣannindrasya kratavo nireka āsanneṣanta śrutyā upāke* //3 //
*manye tvā yiāyaṁ yiāyānāṁ manye tvā chyavanamachyutānām* /
*manye tvā satvanāmindra ketuṁ manye tvā vṛṣabhaṁ charṣaṇīnām* //4 //
*ā yadvajraṁ bāhnorindra dhatse madachyutamahaye hantvā u* /
*pra parvatā anvanta pra gāvaḥ pra brahmāṇo abhinakṣanta indram* //5 //
*tamu ṣṭavāma ya imā jajāna viśvā jātānyavarāṇyasmāt* /
*indreṇa mitraṁ didhiṣema gīrbhirupo namobhirvṛṣabhaṁ viśema* //6 //
*vṛtrasya tvā śvasathādīṣamāṇā viśve devā ajahurye sakhāyaḥ* /
*marudbhirindra sakhyaṁ te astvathemā viśvāḥ pṛtanā jayāsi* //7 //
*triḥ ṣaṣṭistvā maruto vāvṛdhānā usrā iva rāśayo yiāyāsaḥ* /
*upa tvemaḥ kṛdhi no bhāgadheyaṁ śuṣmaṁ ta enā haviṣā vidhema* //8 //
*tigmamāyudhaṁ marutāmanīkaṁ kasta indra prati vajraṁ dadharṣa* /
*anāyudhāso asurā adevāśchakreṇa tām̐ apa vapa ṛjīṣin* //9 //
*maha ugrāya tavase suvṛktiṁ preraya śivatamāya paśvaḥ* /
*girvāhase gira indrāya pūrvīrdhehi tanve kuvidaṁga devat* //10 //
*ukthavāhase vibhve manīṣāṁ druṇā na pāramīrayā nadīnām* /
*ni spṛśa dhiyā tanvi śrutasya juṣṭatarasya kuvidaṁga vedat* //11 //
*tadviviḍḍhi yatta indro jujoṣatstuhi suṣṭutiṁ namasā vivāsa* /
*upa bhūṣa jaritarmā ruvaṇyaḥ śrāvayā vāchaṁ kuvidaṁga vedat* //12 //
*ava drapso aṁśumatīmatiṣṭhadiyānaḥ kṛṣṇo daśabhiḥ sahasraiḥ* /
*jāvattamindraḥ śachyā dhamantamapa snehitīrnṛmaṇā adhatta* //13 //

ऋ. (Rv.) ८.९६.१६-२१

त्वं ह त्यत्सप्तभ्यो जायमानोऽशत्रुभ्यो अभवः शत्रुरिन्द्र ।
गूळ्हे द्यावापृथिवी अन्वविन्दो विभुमद्भ्यो भुवनेभ्यो रणं धाः ॥१६॥

त्वं ह त्यदप्रतिमानमोजो वज्रेण वज्रिन्धृषितो जघन्थ ।
त्वं शुष्णस्यावातिरो वधत्रैस्त्वं गा इन्द्र शच्येदविन्दः ॥१७॥
त्वं ह त्यद्वृषभ चर्षणीनां घनो वृत्राणां तविषो बभूथ ।
त्वं सिन्धूँरसृजस्तस्तभानान् त्वमपो अजयो दासपत्नीः ॥१८॥
स सुक्रतू रणिता यः सुतेष्वनुत्तमन्युर्यो अहेव रेवान् ।
य एक इन्नर्यपांसि कर्ता स वृत्रहा प्रतीदन्यमाहुः ॥१९॥
स वृत्रहेन्द्रश्चर्षणीधृत्तं सुष्टुत्या हव्यं हुवेम ।
स प्राविता मघवा नोऽधिवक्ता स वाजस्य श्रवस्यस्य दाता ॥२०॥
स वृत्रहेन्द्र ऋभुक्षाः सद्यो जाानो हव्यो बभूव ।
कृण्वन्नपांसि नर्या पुरूणि सोमो न पीतो हव्यः सखिभ्यः ॥२१॥

*tvaṁ ha tyatsaptabhyo jāyamāno'śatrubhyo abhavaḥ śatrurindra* ।
*gūḷahe dyāvāputhivī anvavindo vibhumadbhyo bhuvanebhyo raṇaṁ ghāḥ* ॥16॥
*tvaṁ ha tyadapratimānamojo vajreṇa vajrindhṛṣito jaghantha* ।
*tvaṁ śuṣṇasyāvātiro vadhatraistvaṁ gā indra śachyedavindaḥ* ॥17॥
*tvaṁ ha tyadvṛṣabha charṣaṇīnāṁ ghano vṛtrāṇāṁ taviṣo babhūtha* ।
*tvaṁ sindhūm̐rasṛjastastabhānān tvamapo ajayo dāsapatnīḥ* ॥18॥
*sa sukratū raṇitā yaḥ suteṣvanuttamanyuryo aheva revān* ।
*ya eka innaryapāṁsi kartā sa vṛtrahā pratīdanyamāhuḥ* ॥19॥
*sa vṛtrahendraścharṣaṇīdhṛttaṁ suṣṭutyā havyaṁ huvema* ।
*sa prāvitā maghavā no'dhivaktā sa vājasya śravasyasya dātā* ॥20॥
*sa vṛtrahendra ṛbhukṣāḥ sadyo jāāno havyo babhūva* ।
*kṛṇvannapāṁsi naryā purūṇi somo na pīto havyaḥ sakhibhyaḥ* ॥21॥

२. इन्द्राबृहस्पती (Indrābṛhaspatī) - ऋ. (Rv.) ८.९६.१५

अध द्रप्सो अंशुमत्या उपस्थेऽधारयत्तन्वं तित्विषाणः ।
विशो अदेवीरभ्या३ चरन्तीबृहस्पतिना युजेन्द्रः ससाहे ॥१५॥

*adha drapso aṁśumatyā upasthe'dhārayattanvaṁ titviṣāṇaḥ* ।
*viśo adevīrabhyā3 charantībṛhaspatinā yujendraḥ sasāhe* ॥15॥

३. इन्द्रः मरुतश्च (Indraḥ Marutaścha) - ऋ. (Rv.) ८.९६.१४

द्रप्समपश्यं विषुणे चरन्तमुपह्वरे नद्यो अंशुमत्याः ।
नभो न कृष्णमवतस्थिवांसमिष्यामि वो वृषणो युध्यताजौ ॥१४॥

*drapsamapaśyaṁ viṣuṇe charantamupahnare nadyo aṁśumatyāḥ* ।
*nabho na kṛṣṇamavatasthivāṁsamiṣyāmi vo vṛṣaṇo yudhyatājau* ॥14॥

## ३०२. द्युम्नो विश्वचर्षणिः (Dyumno Viśvacharṣaṇiḥ)

१. अग्निः (Agniḥ) - ऋ. (Rv.) ५.२३.१-४

अग्ने सहन्तमा भर द्युम्नस्य प्रासहा रयिम् । विश्वा यश्चर्षणीरभ्या३सा वाजेषु सासहत् ॥१॥
तमग्ने पृतनाषहं रयिं सहस्व आ भर । त्वं हि सत्यो अद्भुतो दाता वाजस्य गोमतः ॥२॥
विश्वे हि त्वा सजोषसो जनासो वृक्तबर्हिषः । होतारं सद्मसु प्रियं व्यन्ति वार्या पुरु ॥३॥
स हि ष्मा विश्वचर्षणिरभिमाति सहो दधे ।
अग्न एषु क्षयेष्वा रेवन्नः शुक्र दीदिहि द्युमत्पावक दीदिहि ॥४॥

*agne sahantamā bhara dyumnasya prāsahā rayim* ।
*viśvā yaścharṣaṇīrabhyā3sā vājeṣu sāsahat* ॥1॥
*tamagne pṛtanāṣahaṁ rayiṁ sahasva ā bhara* ।
*tvaṁ hi satyo adbhūto dātā vājasya gomataḥ* ॥2॥
*viśve hi tvā sajoṣaso janāso vṛktabarhiṣaḥ* ।
*hotāraṁ sadmasu priyaṁ vyanti vāryā puru* ॥3॥
*sa hi ṣmā viśvacharṣaṇirabhimāti saho dadhe* ।
*agna eṣu kṣayeṣvā revannaḥ śukra dīdihi dyumatpāvaka dīdihi* ॥4॥

## ३०३. द्रविणोदाः (Draviṇodāḥ)

१. सवित्रादयो मन्त्रोक्ताः (Savitrādayo Mantroktāḥ) - अ. (Av.) १.१८.१-४

निर्लक्ष्म्यंललाम्यं१ निनरातिं सुवामसि ।
अथ या भद्रा तानि नः प्रजाया अरातिं नयामसि ॥१ ॥
निररणिं सविता साविषत् पदोर्निर्हस्तयोर्वरुणो मित्रां अर्यमा ।
निरस्मभ्यमनुमती रराणा प्रेमां देवा असाविषुः सौभगाय ॥२ ॥
यत्त आत्मनि तन्वांघोरमस्ति यद्वा केशेषु प्रतिचक्षणे वा ।
सर्व तद् वाचाप हन्मो वयं देवस्त्वा सविता सूदयतु ॥३ ॥
रिश्पदीं वृषदीतं गोषेधां विधमामुत। विलीढ्यंललाम्यं१ ता अस्मन्नाशयामसि ॥४ ॥

*nirlakṣamyaṁlalāmyaṁ1 ninarātiṁ suvāmasi ।*
*atha yā bhadrā tāni naḥ prajāyā arātiṁ nayāmasi ॥1 ॥*
*niraraṇiṁ savitā sāviṣat padornirhastayorvaruṇo mitrāṁ aryamā ।*
*nirasmabhyamanumatī rarāṇā premāṁ devā asāviṣuḥ saubhagāya ॥2 ॥*
*yatta ātmani tanvāṁghoramasti yadvā keśeṣu pratichakṣaṇe vā ।*
*sarva tad vāchāpa hanmo vayaṁ devastvā savitā sūdayatu ॥3 ॥*
*riśpadīṁ vṛṣadītaṁ goṣedhāṁ vidhamāmuta । vilīḍhyaṁlalāmyaṁ1 tā asmannāśayāmasi ॥4 ॥*

## ३०४. द्रुह्णणः(आयुर्वर्चोबलकामः) (Druhnaṇaḥ [Āyurvarchobalakāmaḥ])

१. अग्निः (Agniḥ) - अ. (Av.) ६.६३.४

संसमिद् युवसे वृषन्नग्ने विश्वान्यर्य आ। इडस्पदे समिध्यसे स नो वसून्या भर ॥४ ॥

*saṁsamid yuvase vṛṣannagne viśvānyarya ā ।*
*iḍaspade samidhyase sa no vasūnyā bhara ॥4 ॥*

२. निर्ऋतिः (Nirṛtiḥ) - अ. (Av.) ६.६३.१

यत् ते देवी निर्ऋतिराबबन्ध दाम ग्रीवास्वविमोक्यं यत् ।
तत् ते वि ष्याम्यायुषे वर्चसे वलायादोमदमन्नमद्धि प्रसूतः ॥१ ॥

*yat te devī nirṛtirābabandha dāma grīvāsvavimokyaṁ yat ।*
*tat te vi ṣyāmyāyuṣe varchase valāyādomadamannamaddhi prasūtaḥ ॥1 ॥*

३. मृत्युः (Mṛtyuḥ) - अ. (Av.) ६.६३.३

अयमस्ये द्रुपदे बोधिष इहाभिहितो मृत्युभिर्ये सहस्रम् ।
यमेन त्वं पितृभिः संविदान उत्तमं नाकमधि रोहयेमम् ॥३ ॥

*ayamasye drupade bodhiṣa ihābhihito mṛtyubhirye sahasram ।*
*yamena tvaṁ pitṛbhiḥ saṁvidāna uttamaṁ nākamadhi rohayemam ॥3 ॥*

४. यमः (Yamaḥ) - अ. (Av.) ६.६३.२

नमोऽस्तु ते निर्ऋते निग्मतेजोऽयस्मयान् वि चृता बन्धपाशान् ।
यमो मह्यं पुनरित् त्वां ददाति तस्मै यमाय नमो अस्तु मृत्यवे ॥२ ॥

*namo'stu te nirṛte nigmatejo'yasmayān vi chṛtā bandhapāśān ।*
*yamo mahyaṁ punarit tvāṁ dadāti tasmai yamāya namo astu mṛtyave ॥2 ॥*

## ३०५. द्रोणः (Droṇaḥ)

१. अग्निः (Agniḥ) - ऋ. (Rv.) १०.१४२.३-४

उत वा उ परि वृणक्षि बप्सद्बहोरग्न उलपस्य स्वधावः ।
उत खिल्या उर्वराणां भवन्ति मा ते हेतिं तविषीं चुक्रुधाम ॥३ ॥
यदुद्वतो निवतो यासि वप्सत्पृथगेषि प्रंगर्धिनीव सेना ।
यदा ते वातो अनुवाति शोचिर्वप्तेव श्मश्रु वपसि प्र भूम ॥४ ॥

*uta vā u pari vṛṇakṣi bapsadbahoragna ulapasya svadhāvaḥ ।*
*uta khilyā urvarāṇāṁ bhavanti mā te hetiṁ taviṣīṁ chukrudhāma ॥3 ॥*

*yadudvato nivato yāsi vapsatpṛthageṣi praṁgardhinīva senā /*
*yadā te vāto anuvāti śochirvapteva śmaśru vapasi pra bhūma //4 //*

## ३०६. द्वित आप्त्यः (Dvita Āptyaḥ)

१. पवमानः सोमः (Pavamānaḥ Somaḥ) - ऋ. (Rv.) ९.१०३.१-६; सा. (Sv.) ५७३; ५७७

ऋ. (Rv.) ९.१०३.१-६

प्र पुनानाय वेधसे सोमाय वच उद्यतम्। भृतिं न भरा मतिभिर्जुजोषते ॥१॥
परि वाराण्यव्यया गोभिरंजानो अर्षति। त्री षधस्था पुनानः कृणुते हरिः ॥२॥
परि कोशं मधुश्चुतमव्यये वारे अर्षति। अभि वाणीॠर्षीणां सप्त नूषत ॥३॥
परि णेता मतीनां विश्वदेवो अदाभ्यः। सोमः पुनानश्चम्वोर्विशद्धरिः ॥४॥
परि देवीरनु स्वधा इन्द्रेण याहि सरथम्। पुनानो वाघद्वाघद्भिरमर्त्यः ॥५॥
परि सप्तिर्न वाजयुर्देवो देवेभ्यः सुताः। व्यानशिः पवमानो वि धावति ॥६॥

*pra punānāya vedhase somāya vacha udyatam / bhṛtiṁ na bharā matibhirjujoṣate //1 //*
*pari vārāṇyavyayā gobhiraṁjāno arṣati / trī ṣadhasthā punānaḥ kṛṇute hariḥ //2 //*
*pari kośaṁ madhuśchutamavyaye vāre arṣati / abhi vāṇīrṛṣīṇāṁ sapta nūṣata //3 //*
*pari ṇetā matīnāṁ viśvadevo adābhyaḥ / somaḥ punānaśchamvorviśaddhūriḥ //4 //*
*pari devīranu svadhā indreṇa yāhi saratham / punāno vāghadvāghadbhiramartyaḥ //5 //*
*pari saptirna vājayurdevo devebhyaḥ sutāḥ / vyānaśiḥ pavamāno vi dhāvati //6 //*

सा. (Sv.) ५७३

प्र पुनानाय वेधसे सोमाय वच उच्यते। भृतिं न भरा मतिभिर्जुजोषते ॥८॥
*punānāya vedhase somāya vacha uchyate / bhṛtiṁ na bharā matibhirjujoṣate //8 //*

सा. (Sv.) ५७७

परि कोशं मधुश्चुतं सोमः पुनानो अर्षति। अभि वाणीॠर्षीणां सप्ता नूषत ॥१२॥
*pari kośaṁ madhuśchutaṁ somaḥ punāno arṣati / abhi vāṇīrṛṣīṇāṁ saptā nūṣata //12 //*

## ३०७. द्वितो मृक्तवाहा आत्रेयः (Dvito Mṛktavāhā Ātreyaḥ)

१. अग्निः (Agniḥ) - ऋ. (Rv.) ५.१८.१-५; सा. (Sv.) ८५

ऋ. (Rv.) ५.१८.१-५

प्रातरग्निः पुरुप्रियो विशः स्तवेतातिथिः। विश्वनि यो अमर्त्यो हव्या मर्तेषु रण्यति ॥१॥
द्विताय मृक्तवाहसे स्वस्य दक्षस्य मंहना । इन्दुं स धत्त आनुषक्स्तोता चित्ते अमर्त्य ॥२॥
तं वो दीर्घायुशोचिषं गिरा हुवे मघोनाम्। अरिष्टो येषां रथो व्यश्वदावन्नीयते ॥३॥
चित्रा वा येषु दीधितिरासन्नुक्था पान्ति ये। स्तीर्णं बर्हिः स्वर्णरे श्रवांसि दधिरे परि ॥४॥
ये मे पंचाशतं दुदुरश्वानां सधस्तुति।
द्युमदग्ने महि श्रवो बृहत्कृधि मघोनां नृवदमृत नृणाम् ॥५॥

*prātaragniḥ purupriyo viśaḥ stavetātithiḥ / viśvani yo amartyo havyā marteṣu raṇyati //1 //*
*dvitāya mṛktavāhase svasya dakṣasya maṁhanā / induṁ sa dhatta ānuṣakstotā chitte amartya //2 //*
*taṁ vo dīrghāyuśochiṣaṁ girā huve maghonām / ariṣṭo yeṣāṁ ratho vyaśvadāvannīyate //3 //*
*chitrā vā yeṣu dīdhitirāsannukthā pānti ye / stīrṇa barhiḥ svarṇare śravāṁsi dadhire pari //4 //*
*ye me paṁchāśataṁ duduraśvānāṁ sadhastuti /*
*dyumadagne mahi śravo bṛhatkṛdhi maghonāṁ nṛvadamṛta nṛṇām //5 //*

सा. (Sv.) ८५

प्रातरग्निः पुरुप्रियो विश स्तवेतातिथिः । विश्वे यस्मिन्नमर्त्ये हव्यं मर्तास इन्धते ॥५॥

*prātaragniḥ purupriyo viśa stavetātithiḥ । viśve yasminnamartye havyaṁ martāsa indhate ॥5॥*

## ३०८. धरुण आंगिरसः (Dharuṇa Āṅgirasaḥ)

१. अग्निः (Agniḥ) - ऋ. (Rv.) ५.१५.१-५

प्र वेधसे कवये वेद्याय गिरं भरे यशसे पूर्व्याय ।
घृतप्रसत्तो असुरः सुशेवो रायो धर्ता धरुणो वस्वो अग्निः ॥१॥
ऋतेन ऋतं धरुणं धारयन्त यास्य शाके परमे व्योमन् ।
दिवो धर्मन्धरुणे सेदुषो नृंजातैरजाताँ अभि ये ननक्षुः ॥२॥
अंहोयवस्तन्वस्तन्वते वि वयो महद्दुष्टरं पूर्व्याय ।
स संवतो नवजातस्तुतुर्यात्सिंहं न क्रुद्धमभितः परि ष्ठुः ॥३॥
मातेव यद्भरसे पप्रथानो जनंजनं धायसे चक्षसे च ।
वयोवयो जरसे यद्दधानः परि त्मना विषुरूपो जिगासि ॥४॥
वाजो नु ते शवसस्पात्वन्तमुरुं दोघं धरुणं देव रायः ।
पदं न तायुर्गुहा दधानो महो राये चितयन्नत्रिमस्यः ॥५॥

*pra vedhase kavaye vedyāāya giraṁ bhare yaśase pūrvyāya ।*
*ghṛtaprasatto asuraḥ suśevo rāyo dhartā dharuṇo vasvo agniḥ ॥1॥*
*ṛtena ṛtaṁ dharuṇaṁ dhārayanta yāsya śāke parame vyoman ।*
*divo dharmandharuṇe seduṣo nṛṁjātairajātām̐ abhi ye nanakṣuḥ ॥2॥*
*aṁhoyavastanvastanvate vi vayo mahadduṣṭaraṁ pūrvyāya ।*
*sa saṁvato navajātastuturyātiṁsahaṁ na kruddhamabhitaḥ pari ṣṭhuḥ ॥3॥*
*māteva yadbharase paprathāno janaṁjanaṁ dhāyase chakṣase cha ।*
*vayovayo jarase yaddadhānaḥ pari tmanā viṣurūpo jigāsi ॥4॥*
*vājo nu te śavasaspātvantamuruṁ doghaṁ dharuṇaṁ deva rāyaḥ ।*
*padaṁ na tāyurguhā dadhāno maho rāye chitayannatrimasyaḥ ॥5॥*

## ३०९. ध्रुवः (Dhruvaḥ)

१. अग्निः (Agniḥ) - य. (Yv.)१२.११

आ त्वाहार्षमन्तरभूर्ध्रुवास्तिष्ठाविचाचलिः । विशस्त्वा सर्वा वांछन्तु मा त्वद्राष्ट्रमधिभ्रशत् ॥११॥

*ā tvāhārṣamantarabhūrdhruvāstiṣṭhāvichāchaliḥ । viśastvā sarvā vāṁchhantu mā tvadrāṣṭramadhibhraśat ॥11॥*

२. राः स्तुतिः (Rāāḥ Stutiḥ) - ऋ. (Rv.) १०.१७३.१-६

आ त्वाहार्षमन्तरेधि ध्रुवास्तिष्ठाविचाचलिः । विशस्त्वा सर्वा वांछन्तु मा त्वद्राष्ट्रमधि भ्रशत् ॥१॥
इहैवैधि माप च्योष्ठाः पर्वतइवाविचाचलिः । इन्द्रइवेह ध्रुवस्तिष्ठेह राष्ट्रमु धारय ॥२॥
इममिन्द्रो अदीधरद् ध्रुवं ध्रुवेण हविषा । तस्मै सोमो अधि ब्रवत्तस्मा उ ब्रह्मणस्पतिः ॥३॥
ध्रुवा द्यौर्ध्रुवा पृथिवी ध्रुवासः पर्वता इमे । ध्रुवं विश्वमिदं जगद् ध्रुवो राजा विशामयम् ॥४॥
ध्रुवं ते राजा वरुणो ध्रुवं देवो बृहस्पतिः । ध्रुवं त इन्द्रश्चाग्निश्च राष्ट्रं धारयतां ध्रुवम् ॥५॥
ध्रुवं ध्रुवेण हविषाभि सोमं मृशामसि । अथो त इन्द्रः केवलीर्विशो बलिहृतस्करत् ॥६॥

*ā tvāhārṣamantaredhi dhruvāstiṣṭhāvichāchaliḥ ।*
*viśastvā sarvā vāṁchhantu mā tvadrāṣṭramadhi bhraśat ॥1॥*
*ihaivaidhi māpa chyoṣṭhāḥ parvataivāvichāchaliḥ ।*
*indraiveha dhruvastiṣṭheha rāṣṭramu dhāraya ॥2॥*
*imamindro adīdharad dhruvaṁ dhruveṇa haviṣā ।*
*tasmai somo adhi bravattasmā u brahmaṇaspatiḥ ॥3॥*
*dhruvā dyaurdhruvā pṛthivī dhruvāsaḥ parvatā ime ।*
*dhruvaṁ viśvamidaṁ jagad dhruvo rājā viśāmayam ॥4॥*

*dhruvaṁ te rājā varuṇo dhruvaṁ devo bṛhaspatiḥ ।*
*dhruvaṁ ta indraśchāgniścha rāṣṭraṁ dhārayatāṁ dhruvam ॥5॥*
*dhruvaṁ dhruveṇa haviṣābhi somaṁ mṛśāmasi ।*
*atho ta indraḥ kevalīrviśo balihṛtaskarat ॥6॥*

## ३१०. नकुलः (Nakulaḥ)

१. सविता (Savitā): - सा. (Sv.) ४६४

अभि त्यं देवं सवितारमोण्योः कविक्रतुमर्चामि सत्यसवं रत्नधामभि प्रियं मतिम् ।
ऊर्ध्वा यस्यामतिर्भा अदिद्युतत्सवीमनि हिरण्यपाणिरमिमीत सुक्रतुः कृपा स्वः ॥८॥
*abhi tyaṁ devaṁ savitāramoṇyoḥ kavikratumarchāmi satyasavaṁ ratnadhāmabhi priyaṁ matim ।*
*ūrdhvā yasyāmatirbhā adidyutatsavīmani hiraṇyapāṇiramimīta sukratuḥ kṛpā svaḥ ॥8॥*

## ३११. नभः प्रभेदनो वैरूपः (Nabhaḥ Prrabhedano Vairūpaḥ)

१. इन्द्रः (Indraḥ) - ऋ. (Rv.) १०.११२.१-१०

इन्द्र पिब प्रतिकामं सुतस्यप्रातःसावस्तव हि पूर्वपीतिः ।
हर्षस्व हन्तवे शूर शत्रूनुक्थेभिष्टे वीर्या प्र ब्रवाम ॥१॥
यस्ते रथो मनसो जवीयानेन्द्र तेन सोमपेयाय याहि ।
तूयमा ते हरयः प्र द्रवन्तु येभिर्यासि वृषभिर्मन्दमानः ॥२॥
हरित्वता वर्चसा सूर्यस्य श्रेष्ठै रूपैस्तन्वं स्पर्शयस्व ।
अस्माभिरिन्द्र सखिभिर्हुवानः सध्रीचीनो मादयस्वा निषद्य ॥३॥
यस्य त्यत्ते महिमानं मदेष्विमे मही रोदसी नाविविक्ताम् ।
तदोक आ हरिभिरिन्द्र युक्तैः प्रियेभिर्याहि प्रियमन्नमच्छ ॥४॥
यस्य शश्वत्पपिवाँ इन्द्र शत्रूननानुकृत्या रण्या चकर्थ ।
स ते पुरन्धिं तविषीमियर्ति स ते मदाय सुत इन्द्र सोमः ॥५॥
इदं ते पात्रं सनवित्तमिन्द्र पिबा सोममेना शतक्रतो ।
पूर्ण आहावो मदिरस्य मध्वो यं विश्व इदभिहर्यन्ति देवाः ॥६॥
वि हि त्वामिन्द्र पुरुधा जनासो हितप्रयसो वृषभ ह्वयन्ते ।
अस्माकं ते मधुमत्तमानीमा भुवन्त्सवना तेषु हर्य ॥७॥
प्र त इन्द्र पूर्व्याणि प्र नूनं वीर्या वोचं प्रथमा कृतानि ।
सतीनमन्युरश्रथायो अद्रिं सुवेदनामकृणोर्ब्रह्मणे गाम् ॥८॥
नि षु सीद गणपते गणेषु त्वामाहुर्विप्रतमं कवीनाम् ।
न ऋते त्वत्क्रियते किंचनारे महामर्कं मघविंचत्रमर्च ॥९॥
अभिख्या नो मघवन्नाधमानान्त्सखे बोधि वसुपते सखीनाम् ।
रणं कृधि रणकृत्सत्यशुष्माभक्ते चिदा भजा राये अस्मान् ॥१०॥
*indra piba pratikāmaṁ sutasyaprātaḥsāvastava hi pūrvapītiḥ ।*
*harṣasva hantave śūra śatrūnukthebhiṣṭe vīryā pra bravāma ॥1॥*
*yaste ratho manaso javīyānendra tena somapeyāya yāhi ।*
*tūyamā te harayaḥ pra dravantu yebhiryāsi vṛṣabhirmandamānaḥ ॥2॥*
*haritvatā varchasā sūryasya śreṣṭhai rūpaistanvaṁ sparśayasva ।*
*asmābhirindra sakhibhirhuvānaḥ sadhrīchīno mādayasvā niṣadya ॥3॥*
*yasya tyatte mahimānaṁ madeṣvime mahī rodasī nāviviktām ।*
*tadoka ā haribhirindra yuktaiḥ priyebhiryāhi priyamannamachchha ॥4॥*
*yasya śaśvatpapivām̐ indra śatrūnanānukṛtyā raṇyā chakartha ।*
*sa te purandhi taviṣīmiyarti sa te madāya suta indra somaḥ ॥5॥*
*idaṁ te pātraṁ sanavittamindra pibā somamenā śatakrato ।*
*pūrṇa āhāvo madirasya madhvo yaṁ viśva idabhiharyanti devāḥ ॥6॥*
*vi hi tvāmindra purudhā janāso hitaprayaso vṛṣabha hnayante ।*

*asmākaṁ te madhumattamānīmā bhuvantsavanā teṣu harya //7 //*
*pra ta indra pūrvyāṇi pra nūnaṁ vīryā vochaṁ prathamā kṛtāni /*
*satīnamanyuraśrathāyo adriṁ suvedanāmakṛṇerbrahmaṇe gām //8 //*
*ni ṣu sīda gaṇapate gaṇeṣu tvāmāhurvipratamaṁ kavīnām /*
*na ṛte tvatkriyate kiṁchanāre mahāmarka maghaviṁchatramarcha //9 //*
*abhikhyā no maghavannādhamānāntsakhe bodhi vasupate sakhīnām /*
*raṇaṁ kṛdhi raṇakṛtsatyaśuṣmābhakte chidā bhajā rāye asmān //10 //*

## ३१२. नरः (Naraḥ)

१. इन्द्रः (Indraḥ) - ऋ. (Rv.) ६.३५.१-५; ६.३६.१-५

ऋ. (Rv.) ६.३५.१-५

कदा भुवन्नथक्षयाणि ब्रह्म कदा स्तोत्रे सहस्रपोष्यं दाः ।
कदा स्तोमं वासयोऽस्य राया कदा धियः करसि वाजरत्नाः ॥१॥
कर्हि स्वित्तदिन्द्र यन्नृभिर्नृन्वीरैर्वीरान्नीळयासेजयाजीन् ।
त्रिधातु गा अधि जयासि गोष्विन्द्र द्युम्नं स्वर्वद्धेह्यस्मे ॥२॥
कर्हि स्वित्तदिन्द्र यज्जरित्रे विश्वप्सु ब्रह्म कृणवः शविष्ठ ।
कदा धियो न नियुतो युवासे कदा गोमघा हवनानि गच्छाः ॥३॥
स गोमघा जरित्रे अश्वश्चन्द्राः वाजश्रवसो अधि धेहि पृक्षः ।
पीपिहीषः सुदुघामिन्द्र धेनुं भरद्वाजेषु सुरुचो रुरुच्याः ॥४॥
तमा नूनं वृजनमन्यथा चिच्छूरो यच्छक्र वि दुरो गृणीषे ।
मा निररं शुक्रदुघस्य धेनोरांगिरसान्ब्रह्मणा विप्र जिन्व ॥५॥

*kadā bhuvannathakṣayāṇi brahma kadā stotre sahasrapoṣyaṁ dāḥ /*
*kadā stomaṁ vāsayo'sya rāyā kadā dhiyaḥ karasi vājaratnāḥ //1 //*
*karhi svittadindra yannṛbhirnṝnvīrairvīrānnīḷayāsejayājīn /*
*tridhātu gā adhi jayāsi goṣvindra dyumnaṁ svarvaddhehyasme //2 //*
*karhi svittadindra yajjaritre viśvapsu brahma kṛṇavaḥ śaviṣṭha /*
*kadā dhiyo na niyuto yuvāse kadā gomaghā havanāni gachchhāḥ //3 //*
*sa gomaghā jaritre aśvaśchandrāḥ vājaśravaso adhi dhehi pṛkṣaḥ /*
*pīpihīṣaḥ sudughāmindra dhenuṁ bharadvājeṣu surucho ruruchyāḥ //4 //*
*tamā nūnaṁ vṛjanamanyathā chichchhūro yachchhakra vi duro gṛṇīṣe /*
*mā nirararṁ śukradughasya dhenorāṁgirasānbrahmaṇā vipra jinva //5 //*

ऋ. (Rv.) ६.३६.१-५

सत्रा मदासस्त्व विश्वजन्याः सत्रा रायोऽध ये पार्थिवासः ।
सत्रा वाजानामभवो विभक्ता यद्देवेषु धारयथा असुर्यम् ॥१॥
अनु प्र येजे जन ओजो अस्य सत्रा दधिरे अनु वीर्याय ।
स्यूमगृभे दुधयेऽर्वते च क्रतुं वृंजन्त्यपि वृत्रहत्ये ॥२॥
तं सध्रीचरूतयो वृष्ण्यानि पौंस्यानि नियुतः सश्चुरिन्द्रम् ।
समुद्रं न सिन्धव उक्थशुष्मा उरुव्यचसं गिर आ विशन्ति ॥३॥
स रायस्खामुप सृजा गृणानः पुरुश्चन्द्रस्य त्वमिन्द्र वस्वः ।
पतिर्बभूथासमो जनानामेको विश्वस्य भुवनस्य राजा ॥४॥
स सतु श्रुधि श्रुत्या यो दुवोयुर्द्यौर्न भूमामि रायो अर्यः ।
असो यथा नः शवसा चकानो युगेयुगे वयसा चेकितानः ॥५॥

*satrā madāsastva viśvajanyāḥ satrā rāyo'dha ye pārthivāsaḥ /*
*satrā vājānāmabhavo vibhaktā yaddeveṣu dhārayathā asuryam //1 //*
*anu pra yeje jana Ojo asya satrā dadhire anu vīryāya /*
*syūmagṛbhe dudhaye'rvate cha kratuṁ vṛṁjantyapi vṛtrahatye //2 //*
*taṁ sadhrīcharūtayo vṛṣṇyāni pauṁsyāni niyutaḥ saśchurindram /*
*samudraṁ na sindhava ukthaśuṣmā uruvyachasaṁ gira ā viśanti //3 //*

*sa rāyaskhāmupa sṛjā gṛṇānaḥ puruśchandrasya tvamindra vasvaḥ* ।
*patirbabhūthāsamo janānāmeko viśvasya bhuvanasya rājā* ॥4॥
*sa satu śrudhi śrutyā yo duvoyurdyaurna bhūmāmi rāyo aryaḥ* ।
*aso yathā naḥ śavasā chakāno yugeyuge vayasā chekitānaḥ* ॥5॥

## ३१३. नहुषो मानवः (Nahuṣo Mānavaḥ)

१. पवमानः सोमः (Pavamānaḥ Somaḥ) - ऋ. (Rv.) ९.१३.७-९; सा. (Sv.) ५४६; ८१८-८२०

ऋ. (Rv.) ९.१३.७-९

वाश्रा अर्षन्तीन्दवोऽभि वत्सं न धेनवः। दधन्विरे गभस्त्योः ॥७॥
जुष्ट इन्द्राय मत्सरः पवमान कनिक्रदत्। विश्वा अप द्विषो जहि ॥८॥
अपघ्नन्तो अराव्णः पवमान स्वर्दृशः। योनावृतस्य सीदत् ॥९॥
*vāśrā arṣantīndavo'bhi vatsaṁ na dhenavaḥ । dadhanvire gabhastyoḥ* ॥7॥
*juṣṭa indrāya matsaraḥ pavamāna kanikradat । viśvā apa dviṣo jahi* ॥8॥
*apaghnanto arāvṇaḥ pavamāna svardṛśaḥ । yonāvṛtasya sīdat* ॥9॥

सा. (Sv.) ५४६

अयं पूषा रयिर्भगः सोमः पुनानो अर्षति। पतिर्विश्वस्य भूमनो व्यख्यद्रोदसी उभे ॥२॥
*ayaṁ pūṣā rayirbhagaḥ somaḥ punāno arṣati । patirviśvasya bhūmano vyakhyadrodasī ubhe* ॥2॥

सा. (Sv.) ८१८-२०

अयं पूषा रयिर्भगः सोमः पुनानो अर्षति। पतिर्विश्वस्य भूमनो व्यख्यद्रोदसी उभे ॥१॥
समु प्रिया अनूषत गावो मदाय घृष्वयः। सोमासः कृण्वते पथः पवमानास इन्दवः ॥२॥
य ओजिष्ठस्तमा भर पवमान श्रवाय्यम्। यः पंच चर्षणीरभि रयिं येन वनामहे ॥३॥
*ayaṁ pūṣā rayirbhagaḥ somaḥ punāno arṣati* ।
*patirviśvasya bhūmano vyakhyadrodasī ubhe* ॥1॥
*samu priyā anūṣata gāvo madāya ghṛṣvayaḥ* ।
*somāsaḥ kṛṇvate pathaḥ pavamānāsa indavaḥ* ॥2॥
*ya Ojiṣṭhastamā bhara pavamāna śravāyyam* ।
*yaḥ paṁcha charṣaṇīrabhi rayiṁ yena vanāmahe* ॥3॥

## ३१४. नाभाकः काण्वः (Nābhākaḥ Kāṇvaḥ)

१. अग्निः (Agniḥ) - ऋ. (Rv.) ८.३९.१-१०

अग्निमस्तोष्यृग्मियमग्निभीळा यजध्यै ।
अग्निर्देवाँ अनुक्त न उभे हि विदथे कविरन्तश्चरति दूत्यं१ नभन्तामन्यके समे ॥१॥
न्यग्ने नव्यसा वचस्तनूषु शंसमेषाम् ।
न्यराती रराव्णां विश्वा अर्यो अरातीरितो युच्छन्त्वामुरो नभन्तामन्यके समे ॥२॥
अग्ने मन्मानि तुभ्यं कं घृतं न जुह्व आसनि ।
स देवेषु प्र चिकिद्धि त्वं ह्यसि पूर्व्यः शिवो दूतो विवस्वतो नभन्तामन्यके समे ॥३॥
तत्तदग्निर्वयो दधे यथायथा कृपण्यति ऊर्जाहुतिर्वसूनां शं च योश्च स मयो दधे विश्वस्यै देवहूत्यै नभन्तामन्यके समे ॥४॥
स चिकेत सहीयसाग्निश्चित्रेण कर्मणा ।
स होता शश्वतीनां दक्षिणाभिरभीवृत इनोति च प्रतीव्यं१ नभन्तामन्यके समे ॥५॥
अग्निर्जाता देवानामग्निर्वेद मर्तानामपीच्यम् ।
अग्निः स द्रविणोदा अग्निर्द्वारा व्यूर्णुते स्वाहुतो नवीयसा रभन्तामन्यके समे ॥६॥
अग्निर्देवेषु संवसुः स विक्षु यियास्वा ।
स मुदा काव्या पुरु विश्वं भूमेव पुष्यति देवो देवेषु यियो नभन्तामन्यके समे ॥७॥
यो अग्निः सप्तमानुषः श्रितो विश्वेषु सिन्धुषु ।
तमागन्म त्रिपस्त्यं मन्धातुर्दस्युहन्तममग्निं यो षु पूर्व्य नभन्तामन्यके समे ॥८॥

अग्निस्त्रीणि त्रिधतून्या क्षेति विदथा कविः ।
स त्रींरेकादशाँ इह यक्षच्च पिप्रयच्च नो विप्रो दूतः परिष्कृतो नभन्तामन्यके समे ॥९॥
त्वं नो अग्न आयुषु त्वं देवेषु पूर्व्य वस्व एक इरजयसि ।
त्वामापः परिस्रुतः परि यन्ति स्वसेतवो नभन्तामन्यके समे ॥१०॥

*agnimastoṣyṛgmiyamagnibhīḻā yajadhyai* /
*agnirdevāṁ̐ anukta na ubhe hi vidathe kavirantaścharati dūtyaṁ1 nabhantāmanyake same* //1 //
*nyagne navyasā vachastanūṣu śaṁsameṣām* /
*nyarātī rarāvṇāṁ viśvā aryo arātīrito yuchchhantvāmuro nabhantāmanyake same* //2 //
*agne manmāni tubhyaṁ kaṁ ghṛtaṁ na juhna āsani* /
*sa deveṣu pra chikiddhi tvaṁ hyasi pūrvyaḥ śivo dūto vivasvato nabhantāmanyake same* //3 //
*tattadagnirvayo dadhe yathāyathā kṛpaṇyati ūrjāhutirvasūnāṁ śaṁ cha yośchasa mayo dadhe viśvasyai devahūtyai nabhantāmanyake same* //4 //
*sa chiketa sahīyasāgniśchitreṇa karmaṇā* /
*sa hotā śaśvatīnāṁ dakṣiṇābhirabhīvṛta inoti cha pratīvyaṁ1 nabhantāmanyake same* //5 //
*agnirjātā devānāmagnirveda martānāmapīchyam* /
*agniḥ sa draviṇodā agnirdvārā vyūrṇute svāhuto navīyasā rabhantāmanyake same* //6 //
*agnirdeveṣu saṁvasuḥ sa vikṣu yiāyāsvā* /
*sa mudā kāvyā puru viśvaṁ bhūmeva puṣyati devo deveṣu yiāyo nabhantāmanyake same* //7 //
*yo agniḥ saptamānuṣaḥ śrito viśveṣu sindhuṣu* /
*tamāganma tripastyaṁ mandhāturdasyuhantamamagiṁna yoṣu pūrvya nabhantāmanyake same* //8 //
*agnistrīṇi tridhatūnyā kṣeti vidathā kaviḥ* /
*sa trīrekādaśāṁ̐ iha yakṣachcha piprayachcha no vipro dūtaḥ pariṣkṛto nabhantāmanyake same* //9 //
*tvaṁ no agna āyuṣu tvaṁ deveṣu pūrvya vasva eka irajayasi* /
*tvāmāpaḥ parisrutaḥ pari yanti svasetavo nabhantāmanyake same* //10 //

२. इन्द्राग्नी (Indrāgnī) - ऋ. (Rv.) ८.४०.१-१२

इन्द्राग्नी युवं सु नः सहन्ता दासथो रयिम् ।
येन दृळहा समत्स्वा वीळु चित्साहिषीमह्यग्निर्वनेव वात इन्नभन्तामन्यके समे ॥१॥
नाहि वां वव्रयामहेऽथेन्द्रमिद्यजामहे शविष्ठं नृणां नरम् ।
स नः कदा चिदर्वता गमदा वाजसातये गमदा मेधसातये नभन्तामन्यके समे ॥२॥
ता हि मध्यं भराणामिन्द्राग्नी अधिक्षितः ।
ता उ कवित्वना कवी पृच्छ्यमाना सखीयते सं धीतमश्नुतं नरा नभन्तामन्यके समे ॥३॥
अभ्यर्च नभाकवदिन्द्राग्नी यजसा गिरा ।
ययोर्विश्वमिदं जगदियं द्यौः पृथिवी मह्यु१पस्थे बिभृतो वसु नभन्तामन्यके समे ॥४॥
प्र ब्रह्माणि नभाकवदिन्द्राग्निभ्यामिरज्यत ।
या सप्तबुध्नमर्णवं जिह्मबारमपोर्णुत इन्द्र ईशान ओजसा नभन्तामन्यके समे ॥५॥
अपि वृश्च पुराणवद् व्रततेरिव गुष्पितमोजो दासस्य दम्भय ।
वयं तदस्य संभृतं वस्विन्द्रेण वि भजेमहि नभन्तामन्यके समे ॥६॥
यदिन्द्राग्नी जना इमे विह्वयन्ते तना गिरा ।
अस्माकेभिर्नृभिर्वयं सासह्याम पृतन्यतो वनुयाम वनुष्यतो नभन्तामन्यके समे ॥७॥
या नु श्वेताववो दिव उच्चरात उप द्युभिः ।

इन्द्राग्न्योरनु व्रतमुहाना यन्ति सिन्धवो यान्त्सीं बन्धादमुंचतां नभन्तामन्यके समे ॥८॥
पूर्वीष्ट इन्द्रोपमातयः पूर्वीरुत प्रशस्तयः सूनो हिन्वस्य हरिवः ।
वस्वो वीरस्यापृचो या नु साधन्त नो धियो नभन्तामन्यके समे ॥९॥
तं शिशीता सुवृक्तिभिस्त्वेषं सत्वानमृग्मियम् ।
उतो नु चिद्य ओजसा शुष्णस्याण्डानि भेदति जेषत्स्वर्वतीरपो नभन्तामन्यके समे ॥१०॥
तं शिशीता स्वध्वरं सत्यं सत्वानमृत्वियम् ।
उतो नु चिद्य ओहत आण्डा शुष्णस्य भेदत्यजैः स्वर्वतीरपो नभन्तामन्यके समे ॥११॥
एवेन्द्राग्निभ्यां पितृवन्नवीयो मन्धातृवदंगिरस्वदवाचि ।
त्रिधातुना शर्मणा पातमस्मान् वयं स्याम पतयो रयीणाम् ॥१२॥

*indrāgnī yuvaṁ su naḥ sahantā dāsatho rayim ।*
*yena dṛḷahā samatsvā vīḷu chitsāhiṣīmahyagnirvaneva vāta innabhantāmanyake same ॥1॥*
*nāhi vāṁ vavrayāmahe'thendramidyajāmahe śaviṣṭhaṁ nṛṇāṁ naram ।*
*sa naḥ kadā chidarvatā gamadā vājasātaye gamadā medhasātaye nabhantāmanyake same ॥2॥*
*tā hi madhyaṁ bharāṇāmindrāgnī adhikṣitaḥ ।*
*tā u kavitvanā kavī pṛchchhyamānā sakhīyate saṁ dhītamaśnutaṁ narā nabhantāmanyake same ॥3॥*
*abhyarcha nabhākavadindrāgnī yajasā girā ।*
*yayorviśvamidaṁ jagadiyaṁ dyauḥ pṛthivī mahyu1pasthe bibhṛto vasu nabhantāmanyake same ॥4॥*
*pra brahmāṇi nabhākavadindrāgnibhyāmirajyata ।*
*yā saptabudhnamarṇavaṁ jihmabāramaporṇuta indra īśāna Ojasā nabhantāmanyake same ॥5॥*
*api vṛścha purāṇavad vratateriva guṣpitamojo dāsasya dambhaya ।*
*vayaṁ tadasya saṁbhṛtaṁ vasvindreṇa vi bhajemahi nabhantāmanyake same ॥6॥*
*yadindrāgnī janā ime vihnayante tanā girā ।*
*asmākebhirnṛbhirvayaṁ sāsahyāma pṛtanyato vanuyāma vanuṣyato nabhantāmanyake same ॥7॥*
*yā nu śvetāvavo diva uchcharāta upa dyubhiḥ ।*
*indrāgnyoranu vratamuhānā yanti sindhavo yāntsīṁ bandhādamuṁchatāṁ nabhantāmanyake same ॥8॥*
*pūrvīṣṭa indropamātayaḥ pūrvīruta praśastayaḥ sūno hinvasya harivaḥ ।*
*vasvo vīrasyāpṛcho yā nu sādhanta no dhiyo nabhantāmanyake same ॥9॥*
*taṁ śiśītā sṛvṛktibhistveṣaṁ satvānamṛgmiyam ।*
*uto nu chidya Ojasā śuṣṇasyāṇḍāni bhedati jeṣatsvarvatīrapo nabhantāmanyake same ॥10॥*
*taṁ śiśītā svadhvaraṁ satyaṁ satvānamṛtviyam ।*
*uto nu chidya Ohata āṇḍā śuṣṇasya bhedatyajaiḥ svarvatīrapo nabhantāmanyake same ॥11॥*
*evendrāgnibhyāṁ pitṛvannavīyo mandhātṛvadaṁgirasvadavāchi ।*
*tridhātunā śarmaṇā pātamasmān vayaṁ syāma patayo rayīṇām ॥12॥*

३. वरुणः (Varuṇaḥ) - ऋ. (Rv.) ८.४१.१-१०; ८.४२.१-३

ऋ. (Rv.) ८.४१.१-१०

अस्मा ऊ षु प्रभूतये वरुणाय मरुद्भ्योऽर्चा विदुष्टरेभ्यः ।
यो धीता मानुषाणां पश्वो गाइव रक्षति नभन्तामन्यके समे ॥१॥
तमू षु समना गिरा पितृणां च मन्मभिः ।
नाभकस्य प्रशस्तिभिर्यः सिन्धूनामुपोदये सप्तस्वसा स मध्यमो नभन्तामन्यके समे ॥२॥

स क्षपः परि षस्वजे न्युस्स्रो मायया दधे स विश्वं परि दर्शतः ।
तस्य वेनीरनु व्रतमुषस्तिस्रो अवर्धयन्नभन्तामन्यके समे ॥३॥
यः ककुभे निधारयः पृथिव्यामधि दर्शतः ।
स माता पूर्व्यं पदं तद्वरुणस्य सप्त्यं स हि गोपा इवेर्यो नभन्तामन्यके समे ॥४॥
यो धर्ता भुवनानां य उस्राणामपीच्या३ वेद नामानि गुह्या ।
स कविः काव्या पुरु रूपं द्यौरिव पुष्यति नभन्तामन्यके समे ॥५॥
यस्मिन् विश्वानि काव्या चक्रे नाभिरिव श्रिता ।
त्रितं जूती सपर्यत व्रजे गावो न संयुजे युजे अश्वां अयुक्षत नभन्तामन्यके समे ॥६॥
य आस्वत्क आशये विश्वा जातान्येषाम् ।
परि धामानि मर्मृशद्वरुणस्य पुरो गये विश्वे देवा अनु व्रतं नभन्तामन्यके समे ॥७॥
स समुद्रो अपीच्यस्तुरो द्यामिव रोहति नि यदासु यजुर्दधे ।
स माया अर्चिना पदास्तृणान्नाकमारुहन्नभन्तामन्यके समे ॥८॥
यस्य श्वेता विचक्षणा तिस्रो भूमीरधिक्षितः ।
त्रिरुतराणि पप्रतुर्वरुणस्य ध्रुवं सदः स सप्तानामिरज्यति नभन्तामन्यके समे ॥९॥
यः श्वेताँ अधिनिर्णिजश्चक्रे कृष्णाँ अनु व्रता ।
स धाम पूर्व्यं ममे यः स्कम्भेन वि रोदसी अजो न द्यामधारयन्नभन्तामन्यके समे ॥१०॥

*asmā ū ṣu prabhūtaye varuṇāya marudbhyo'rchā viduṣṭarebhyaḥ* ।
*yo dhītā mānuṣāṇāṁ paśvo gāiva rakṣati nabhantāmanyake same* ॥1॥
*tamū ṣu samanā girā pitṝṇāṁ cha manmabhiḥ* ।
*nābhakasya praśastibhiryaḥ sindhūnāmupodaye saptasvasā sa madhyamo nabhantāmanyake same* ॥2॥
*sa kṣapaḥ pari ṣasvaje nyuśsro māyayā dadhe sa viśvaṁ pari darśataḥ* ।
*tasya venīranu vratamuṣastisro avardhayannabhantāmanyake same* ॥3॥
*yaḥ kakubhe nidhārayaḥ pṛthivyāmadhi darśataḥ* ।
*sa mātā pūrvya padaṁ tadvaruṇasya saptyaṁ sa hi gopā iveryo nabhantāmanyake same* ॥4॥
*yo dhartā bhuvanānāṁ ya usrāṇāmapīchyā3 veda nāmāni guhyā* ।
*sa kaviḥ kāvyā puru rūpaṁ dyauriva puṣyati nabhantāmanyake same* ॥5॥
*yasmin viśvāni kāvyā chakre nābhiriva śritā* ।
*tritaṁ jūtī saparyata vraje gāvo na saṁyuje yuje aśvāṁ ayukṣata nabhantāmanyake same* ॥6॥
*ya āsvatka āśaye viśvā jātānyeṣām* ।
*pari dhāmāni marmṛśadvaruṇasya puro gaye viśve devā anu vrataṁ nabhantāmanyake same* ॥7॥
*sa samudro apīchyasturo dyāmiva rohati ni yadāsu yajurdaghe* ।
*sa māyā archinā padāstṛṇānnākamāruhannabhantāmanyake same* ॥8॥
*yasya śvetā vichakṣaṇā tisro bhūmīradhikṣitaḥ* ।
*trirutarāṇi papraturvaruṇasya dhruvaṁ sadaḥ sa saptānāmirajyati nabhantāmanyake same* ॥9॥
*yaḥ śvetām̐ adhinirṇijaśchakre kṛṣṇām̐ anu vratā* ।
*sa dhāma pūrvya mame yaḥ skambhena vi rodasī ajo na dyāmadhārayannabhantāmanyake same* ॥10॥

ऋ. (Rv.) ८.४२.१-३

अस्तभ्नाद् द्यामसुरो विश्ववेदा अमिमीत वरिमाणं पृथिव्याः ।
असीदद्विश्वा भुवनानि सम्राड् विश्वेत्तानि वरुणस्य व्रतानि ॥१॥
एवा वन्दस्व वरुणं बृहन्तं नमस्या धीरममृतस्य गोपाम् ।
स नः शर्म त्रिवरूथं वि यंसत्पातं नो द्यावापृथिवी उपस्थे ॥२॥
इमां धियं शिक्षमाणस्य देव क्रतुं दक्षं वरुण सं शिशाधि ।

ययाति विश्वा दुरिता तरेम सुतर्माणमधि नावं रुहेम ॥३ ॥
*astabhnād dyāmasuro viśvavedā amimīta varimāṇaṁ pṛthivyāḥ /*
*asīdadviśvā bhuvanāni samrāḍ viśvettāni varuṇasya vratāni //1 //*
*evā vandasva varuṇaṁ bṛhantaṁ namasyā dhīramamṛtasya gopām /*
*sa naḥ śarma trivarūthaṁ vi yaṁsatpātaṁ no dyāvāpṛthivī upasthe //2 //*
*imāṁ dhiyaṁ śikṣamāṇasya deva kratuṁ dakṣaṁ varuṇa saṁ śiśādhi /*
*yayāti viśvā duritā tarema sutarmāṇamadhi nāvaṁ ruhema //3 //*

## ३१५. नाभाकः काण्वः अर्चनाना वा (Nābhākaḥ Kāṇvaḥ Archanānā Vā)

१. अश्विनौ (Aśvinau) - ऋ. (Rv.) ८.४२.४-६

आ वा ग्रावाणो अश्विना धीभिर्विप्रा अचुच्यवुः । नासत्या सोमपीतये नभन्तामन्यके समे ॥४ ॥
यथा वामत्रिरश्विना गीर्भिर्विप्रो अजोहवीत । नासत्या सोमपीतये नभन्तामन्यके समे ॥५ ॥
एवा वामह्व ऊतये यथाहुवन्त मेधिराः । नासतया सोमपीतये नभन्तामन्यके समे ॥६ ॥
*ā vā grāvāṇo aśvinā dhībhirviprā achuchyavuḥ /*
*nāsatyā somapītaye nabhantāmanyake same //4 //*
*yathā vāmatriraśvinā gīrbhirvipro ajohavīta /*
*nāsatyā somapītaye nabhantāmanyake same //5 //*
*evā vāmahna ūtaye yathāhuvanta medhirāḥ /*
*nāsatayā somapītaye nabhantāmanyake same //6 //*

## ३१६. नाभानेदिष्टः (Nābhānediṣṭaḥ)

१. अग्निः (Agniḥ) - य. (Yv.)११.७५-७८

अहरहरप्रयावं भरन्तोऽश्वायेव तिष्ठते घासमस्मै ।
रायस्पोषेण समिषा मदन्तोऽग्ने मा ते प्रतिवेशा रिषाम ॥७५ ॥
नाभा पृथिव्याः समिधानेऽअग्नौ रायस्पोषाय बृहते हवामहे ।
इरम्मदं बृहदुक्थं यजत्रं जेतारमग्निं पृतनासु सासहिम् ॥७६ ॥
याः सेनाऽअभीत्वरीराव्याधिनीरुगणाऽउत ।
ये स्तेना ये च तस्करास्ताँस्तेऽअग्नेऽपिदधाम्यास्ये ॥७७ ॥
दं ष्ट्राभ्यां मलिम्लून् जम्भ्यैस्तस्कराँश्ऽउत ।
हनुभ्यांस्तेनान् भगवस्ताँस्त्वं खाद सुखादितान् ॥७८ ॥
*aharaharaprayāvaṁ bharanto'śvāyeva tiṣṭhate ghāsamasmai /*
*rāyaspoṣeṇa samiṣā madanto'gne mā te prativeśā riṣāma //75 //*
*nābhā pṛthivyāḥ samidhāne'agnau rāyaspoṣāya bṛhate havāmahe /*
*irammadaṁ bṛhadukthaṁ yajatraṁ jetāramagiṁna pṛtanāsu sāsahim //76 //*
*yāḥ senā'abhītvīrāvyādhinīrugaṇā'uta /*
*ye stenā ye cha taskarāstām̐ste'agne'pidadhāmyāsye //77 //*
*daṁ ṣṭrābhyāṁ malimlūn jambhyaistaskarām̐ś'uta /*
*hanubhyāṁstenān bhagavastām̐stvaṁ khāda sukhāditān //78 //*

२. अध्यापकोपदेशकौ (Adhyāpakopadeśakau) - य. (Yv.)११.८०

योऽअस्मभ्यमरातीयाद्यश्च नो द्वेषते जनः ।
निन्दाद्योऽअस्मान् धिप्साच्च सर्व तं भस्मसा कुरु ॥८० ॥
*yo'asmabhyamarātīyādyaścha no dveṣate janaḥ /*
*nindādyo'asmān dhipsāchcha sarva taṁ bhasmasā kuru //80 //*

३. पुरोहित-यजमानौ (Purohita-Yajamānau) - य. (Yv.)११.८१; ८३

य. (Yv.)११.८१

सं शितं मे ब्रह्म सं शितं वीर्य बलम् । सं शितं क्षत्रं जिष्णु यस्याहमस्मि पुरोहितः ॥८१ ॥
*saṁ śitaṁ me brahma saṁ śitaṁ vīrya balam / saṁ śitaṁ kṣatraṁ jiṣṇu*
*yasyāhamasmi purohitaḥ //81 //*

य. (Yv.)११.८३

अन्नपतेऽन्नस्य नो देह्यनमीवस्य शुष्मिणः।
प्रप्र दातारं तारिषऽऊर्ज नो धेहि द्विपदे चतुष्पदे ॥८३॥
*annapate'nnasya no dehyanamīvasya śuṣmiṇaḥ I*
*prapra dātāraṁ tāriṣa'ūrja no dhehi dvipade chatuṣpade II83 II*

४. बृहस्पतिः (Bṛhaspatiḥ) - य. (Yv.)९.१७

ते नोऽअर्वन्तो हवनश्रुतो हवं विश्वे शृण्वन्तु वाजिनो मितद्रवः।
सहस्रसा मेधसाता सनिष्यवो महो ये धनंसमिथेषु जभ्रिरे ॥१७॥
*te no'arvanto havanaśruto havaṁ viśve śṛṇvantu vājino mitadravaḥ I*
*sahasrasā medhasātā saniṣyavo maho ye dhanaṁsamitheṣu jabhrire II17 II*

५. वाजी (Vājī) - य. (Yv.)११.१२

प्रतूर्त वाजिन्नाद्रव वरिष्ठामनु संवतम्।
दिवि ते जन्म परममन्तरिक्षे तव नाभिः पृथिव्यामधि योनिरित् ॥१२॥
*pratūrta vājinnādrava variṣṭhāmanu saṁvatam I*
*divi te janma paramamantarikṣe tava nābhiḥ pṛthivyāmadhi yonirit II12 II*

६. सभापतिर्यजमानः (Sabhāpatiryajamānaḥ) - य. (Yv.)११.८२

उदेषां बाहूऽअतिरमुद्वर्चोऽअथो बलम्। क्षिणोमि ब्रह्मणामित्रानुन्नयामि स्वाँ२ऽअहम् ॥८२॥
*udeṣāṁ bāhū'atiramudvarcho'atho balam I kṣiṇomi brahmaṇāmitrānunnayāmi svām̐2'aham II82 II*

७. सेनापतिः (Senāpatiḥ) - य. (Yv.)११.७९

ये जनेषु मलिम्लव स्तेनासस्तस्करा वने। ये कक्षेष्वघायवस्ताँस्ते दधामि जम्भयोः ॥७९॥
*ye janeṣu malimlava stenāsastaskarā vane I ye kakṣeṣvaghāyavastām̐ste dadhāmi jambhayoḥ II79 II*

## ३१७. नाभानेदिष्ठो मानवः (Nābhānediṣṭho Mānavaḥ)

१. विश्वेदेवाः (Viśvedevāḥ) - ऋ. (Rv.) १०.६१.१-२७; १०.६२.७

ऋ. (Rv.) १०.६१.१-२७

इदमित्था रौद्रं गूर्तवाचा ब्रह्म क्रत्वा शच्यामन्तराजौ ।
क्राणा यदस्य पितरा मंहनेष्ठाः पर्षत्पक्थे अहन्ना सप्त होतॄन् ॥१॥
स इद्दानाय दभ्याय वन्वंच्यवानः सूदैरमिमीत वेदिम् ।
तूर्वयाणो गूर्तवचस्तमः क्षोदो न रेत इतऊति सिंचत् ॥२॥
मनो न येषु हवनेषु तिग्मं विपः शच्या वनुथो द्रवन्ता ।
आ यः शर्याभिस्तुविनृम्णो अस्याश्रीणीतादिशं गभस्तौ ॥३॥
कृष्णा यद्गोभिष्वरुणीषुसीदद्दिवो नपाताश्विना हुवे वाम् ।
वीतं मे यामा गतं मे अन्नं ववन्वांसा नेषमस्मृतध्रू ॥४॥
प्रथिष्ट यस्य वीरकर्ममिष्णदनुष्ठितं नु नर्यो अपौहत् ।
पुनस्तदा वृहति यत्कनाया दुहितुरा अनुभृतमनर्वा ॥५॥
मध्या यत्कर्त्वमभवदभीके कामं कृण्वाने पितरि युवत्याम् ।
मनानग्रेतो जहतुर्वियन्ता सानौ निषिक्तं सुकृतस्य यानौ ॥६॥
पिता यत्स्वां दुहितरमधिष्कन्क्ष्मया रेतः संजग्मानो नि षिंचत् ।
स्वाध्योऽजनयन्ब्रह्म देवा वास्तोष्पतिं व्रतपां निरतक्षन्॥७॥
स ई वृषा न फेनमस्यदाजौ स्मदा परैदप दभ्रचेताः ।
सरत्पदा न दक्षिणा परावृङ् न ता नु मे पृशन्यो जगृभ्रे ॥८॥
मक्षू न वह्निः प्रजाया उपब्दिरग्निं न नग्न उप सीददूधः ।
सनितेध्मं सनितोत वाजं स धर्ता जो सहसा यवीयुत् ॥९॥
मक्षू कनायाः सख्यं नवग्वा ऋतं वदन्त ऋतयुक्तिमग्मन् ।

द्विबर्हसो य उप गोपमागुरदक्षिणासो उच्युता दुदुक्षन् ॥१०॥
मक्षू कनायाः सख्यं नवीयो राधो न रेत ऋतमित्तुरण्यन् ।
शुचि यत्ते रेकण आयजन्त सबर्दुघायाः पय उस्रियायाः ॥११॥
पश्वा यत्पश्चा वियुता बुध्न्तेति ब्रवीति वक्तरी रराणः ।
वसोर्वसुत्वा करवोऽनेहा विश्वं विवेष्टि द्रविणमुप क्षु ॥१२॥
तदिन्न्वस्य परिषद्वानो अग्मन्पुरू सदन्तो नार्षदं बिभित्सन् ।
वि षुष्णस्य संग्रथितमनर्वा विदत्पुरुप्रजातस्य गुहा यत् ॥१३॥
भर्गो ह नामोत यस्य देवाः स्व१र्ण ये त्रिषधस्थे निषेदुः ।
अग्निर्ह नामोत जातवेदाः श्रुधी नो होतऋर्तस्य होताध्रुक् ॥१४॥
उत त्या मे रौद्रावर्चिमन्ता नासत्याविन्द्र गूर्तये यजध्यै ।
मनुष्वद्वृक्तबर्हिषे रराणा मन्दू हितप्रयसा विक्षु यज्यू ॥१५॥
अयं स्तुतो राजा वन्दि वेधा अपश्च विपस्तरति स्वसेतुः ।
स कक्षीवन्तं रेजयत्सो अग्निं नेमिं न चक्रमर्वतो रघुद्रु ॥१६॥
स द्विबन्धुर्वैतरणो यष्टा सबर्धुं धेनुमस्वं दुहध्यै ।
सं यन्मित्रावरुणा वृंज उक्थैर्ज्येष्ठेभिरर्यमणं वरूथैः ॥१७॥
तद्बन्धुः सूरिर्दिवि ते धियंधा नाभानेदिष्ठो रपति प्र वेनन् ।
सा नो नाभिः परमास्य वा घाहं तत्पश्चा कतिथश्चिदास ॥१८॥
इयं मे नाभिरिह मे सधस्थमिमे मे देवा अयमस्मि सर्वः ।
द्विजा अह प्रथमजा ऋतस्येदं धेनुरदुहज्जायमाना ॥१९॥
अधासु मन्द्रो अरतिर्विभावाव स्यति द्विवर्तनिर्वनेषाट् ।
ऊर्ध्वा यच्छ्रेणिर्न शिशुर्दन्मक्षू स्थिरं शेवृधं सूत माता ॥२०॥
अधा गाव उपमातिं कनाया अनु श्वान्तस्य कस्य चित्परेयुः ।
श्रुधि त्वं सुद्रविणो नस्त्वं याळाश्वघ्नस्य वावृधे सूनृताभिः ॥२१॥
अध त्वमिन्द्र विद्ध्य१ स्मान्महो राये नृपते वज्रबाहुः ।
रक्षा च नो मघोनः पाहि सूरीननेहस्ते हरिवो अभिष्टौ ॥२२॥
अध यद्राजाना गविष्टौ सरत्सरण्युः कारवे जरण्युः ।
विप्रः प्रेष्ठः स ह्येषां बभूव परा च वक्षदुत पर्षदेनान् ॥२३॥
अधा न्वस्य जेन्यस्य पुष्टौ वृथा रेभन्त ईमहे तदू नु ।
सरण्युरस्य सूनुरश्वो विप्रश्चासि श्रवसश्च सातौ ॥२४॥
युवोर्यदि सख्यायास्मे शर्धाय स्तोमं जुजुषे नमस्वान् ।
विश्वत्र यस्मिन्ना गिरः समीचीः पूर्वीव गातुर्दाशत्सूनृतायै ॥२५॥
स गृणानो अद्भिर्देववानिति सुबन्धुर्नमसा सूक्तैः ।
वर्धदुक्थैर्वचोभिरा हि नूनं व्यध्वैति पयस उस्रियायाः ॥२६॥
त ऊ षु णो महो यजत्रा भूत देवास ऊतये सजोषाः ।
ये वाजाँ अनयता वियन्तो ये स्था निचेतारो अमूराः ॥२७॥

*idamitthā raudraṁ gūrtavāchā brahma kratvā śachyāmantarājau /*
*krāṇā yadasya pitarā maṁhaneṣṭhāḥ parṣatpakthe ahannā sapta hotṝn //1 //*
*sa iddānāya dabhyāya vanvaṁchyavānaḥ sūdairamimīta vedim /*
*tūrvayāṇo gūrtavachastamaḥ kṣodo na reta itaūti siṁchat //2 //*
*mano na yeṣu havaneṣu tigmaṁ vipaḥ śachyā vanutho dravantā /*
*ā yaḥ śaryābhistuvinṛmṇo asyāśrīṇītādiśaṁ gabhastau //3 //*
*kṛṣṇā yadgobhiṣvaruṇīṣusīdaddivo napātāśvinā huve vām /*
*vītaṁ me yāmā gataṁ me annaṁ vavanvāṁsā neṣamasmṛtadhrū //4 //*
*prathiṣṭa yasya vīrakarmamiṣṇadanuṣṭhitaṁ nu naryo apauhat /*
*punastadā vṛhati yatkanāyā duhiturā anubhṛtamanarvā //5 //*
*madhyā yatkartvamabhavadabhīke kāmaṁ kṛṇvāne pitari yuvatyām /*
*manānagreto jahaturviyantā sānau niṣiktaṁ sukṛtasya yānau //6 //*

*pitā yatsvāṁ duhitaramadhiṣkankṣamayā retaḥ saṁjagmāno ni ṣiṁchat* ।
*svādhyo'janayanbrahma devā vāstoṣpatiṁ vratapāṁ niratakṣan* ॥7॥
*sa ī vṛṣā na phenamasyadājau smadā paraidapa dabhrachetāḥ* ।
*saratpadā na dakṣiṇā parāvṛṅ na tā nu me pṛśanyo jagṛbhre* ॥8॥
*makṣū na vahniḥ prajāyā upabdiragiṁna na nagna upa sīdadūdhaḥ* ।
*sanitedhmaṁ sanitota vājaṁ sa dhartā jo sahasā yavīyut* ॥9॥
*makṣū kanāyāḥ sakhyaṁ navagvā ṛtaṁ vadanta ṛtayuktimagman* ।
*dvibarhaso ya upa gopamāguradakṣiṇāso uchyutā dudukṣan* ॥10॥
*makṣū kanāyāḥ sakhyaṁ navīyo rādho na reta ṛtamitturaṇyan* ।
*śuchi yatte rekaṇa āyajanta sabardughāyāḥ paya usriyāyāḥ* ॥11॥
*paśvā yatpaśchā viyutā budhnteti bravīti vaktarī rarāṇaḥ* ।
*vasorvasutvā karavo'nehā viśvaṁ viveṣṭi draviṇamupa kṣu* ॥12॥
*tadinnvasya pariṣadvāno agmanpurū sadanto nārṣadaṁ bibhitsan* ।
*vi ṣuṣṇasya saṁgrathitamanarvā vidatpuruprajātasya guhā yat* ॥13॥
*bhargo ha nāmota yasya devāḥ sva1rṇa ye triṣadhasthe niṣeduḥ* ।
*agnirha nāmota jātavedāḥ śrudhī no hotaṛrtasya hotādhruk* ॥14॥
*uta tyā me raudrāvarchimantā nāsatyāvindra gūrtaye yajadhyai* ।
*manuṣvadvṛktabarhiṣe rarāṇā mandū hitaprayasā vikṣu yajyū* ॥15॥
*ayaṁ stuto rājā vandi vedhā apaścha vipastarati svasetuḥ* ।
*sa kakṣīvantaṁ rejayatso agniṁ nemiṁ na chakramarvato raghudru* ॥16॥
*sa dvibandhurvaitaraṇo yaṣṭā sabardhu dhenumasvaṁ duhadhyai* ।
*saṁ yanmitrāvaruṇā vṛṁja ukthairjyeṣṭhabhiraryamaṇaṁ varūthaiḥ* ॥17॥
*tadbandhuḥ sūrirdivi te dhiyaṁdhā nābhānediṣṭho rapati pra venan* ।
*sā no nābhiḥ paramāsya vā ghāhaṁ tatpaśchā katithaśchidāsa* ॥18॥
*iyaṁ me nābhiriha me sadhasthamime me devā ayamasmi sarvaḥ* ।
*dvijā aha prathamajā ṛtasyedaṁ dhenuraduhajjāyamānā* ॥19॥
*adhāsu mandro aratirvibhāvāva syati dvivartanirvaneṣāṭ* ।
*ūrdhvā yachchhreṇirna śiśurdanmakṣū sthiraṁ śevṛdhaṁ sūta mātā* ॥20॥
*adhā gāva upamātiṁ kanāyā anu śvāntasya kasya chitpareyuḥ* ।
*śrudhi tvaṁ sudraviṇo nastvaṁ yāḻāśvaghnasya vāvṛdhe sūnṛtābhiḥ* ॥21॥
*adha tvamindra viddhya1 smānmaho rāye nṛpate vajrabāhuḥ* ।
*rakṣā cha no maghonaḥ pāhi sūrīnanehaste harivo abhiṣṭau* ॥22॥
*adha yadrājānā gaviṣṭau saratsaraṇyuḥ kārave jaraṇyuḥ* ।
*vipraḥ preṣṭhaḥ sa hyeṣāṁ babhūva parā cha vakṣaduta parṣadenān* ॥23॥
*adhā nvasya jenyasya puṣṭau vṛthā rebhanta īmahe tadū nu* ।
*saraṇyurasya sūnuraśvo vipraśchāsi śravasaścha sātau* ॥24॥
*yuvoryadi sakhyāyāsme śardhāya stomaṁ jujuṣe namasvān* ।
*viśvatra yasminnā giraḥ samīchīḥ pūrvīva gāturdāśatsūnṛtāyai* ॥25॥
*sa gṛṇāno adbhirdevavāniti subandhurnamasā sūktaiḥ* ।
*vardhadukthairvachobhirā hi nūnaṁ vyadhvaiti payasa usriyāyāḥ* ॥26॥
*ta ū ṣu ṇo maho yajatrā bhūta devāsa ūtaye sajoṣāḥ* ।
*ye vājāṁ̐ anayatā viyanto ye sthā nichetāro amūrāḥ* ॥27॥

ऋ. (Rv.) १०.६२.७

इन्द्रेण युजा निः सृजन्त वाघतो व्रजं गोमन्तमश्विनम् ।
सहस्रं मे ददतो अष्टकर्ण्यः१ श्रवो देवेष्वक्रत ॥७॥

*indreṇa yujā niḥ sṛjanta vāghato vrajaṁ gomantamaśvinam* ।
*sahasraṁ me dadato aṣṭakarṇyaḥ? śravo deveṣvakrata* ॥7॥

२. विश्वेदेवा अंगिरसो वा (Viśvedevā Aṁgiraso Vā) - ऋ. (Rv.) १०.६२.१-६

ये योन दक्षिणया समक्ता इन्द्रस्य सख्यममृतत्वमानश ।

तेभ्यो भद्रमंगिरसो वो अस्तु प्रति गृभ्णीत मानवं सुमेधसः ॥१॥
य उदाजन्पितरो गोमयं वस्वृतेनाभिन्दन्परिवत्सरे वलम् ।
दीर्घयुत्वमंगिरसो वो अस्तु प्रति गृभणीत मानवं सुमेधसः ॥२॥
य ऋतेन सूर्यमारोहयन् दिव्यप्रथयन्पृथिवीं मातरं वि ।
सप्रजास्त्वमंगिरसो वो अस्तु प्रति गृभ्णीत मानवं सुमेधसः ॥३॥
अयं नाभा वदति वल्गु वो गृहे देवपुत्रा ऋषयस्तच्छृणोतन ।
सुब्रह्मण्यमंगिरसो वो अस्तु प्रति गृभ्णीत मानवं सुमेधसः ॥४॥
विरूपास इदृषयस्त इद्गम्भीरवेपसः । ते अंगिरसः सूनवस्ते अग्नेः परि जिरे ॥५॥
ये अग्नेः परि जिरे विरूपासो दिवस्परि। नवग्वो नु दशग्वो अंगिरस्तमः सचा देवेषु मंहते ॥६॥

*ye yona dakṣiṇayā samaktā indrasya sakhyamamṛtatvamānaśa /*
*tebhyo bhadramaṁgiraso vo astu prati gṛbhṇīta mānavaṁ sumedhasaḥ //1 //*
*ya udājanpitaro gomayaṁ vasvṛtenābhindanparivatsare valam /*
*dīrghayutvamaṁgiraso vo astu prati gṛbhaṇīta mānavaṁ sumedhasaḥ //2 //*
*ya ṛtena sūryamārohayan divyaprathayanpṛthivīṁ mātaraṁ vi /*
*saprajāstvamaṁgiraso vo astu prati gṛbhṇīta mānavaṁ sumedhasaḥ //3 //*
*ayaṁ nābhā vadati valgu vo gṛhe devaputrā ṛṣayastachchhṛṇotana /*
*subrahmaṇyamaṁgiraso vo astu prati gṛbhṇīta mānavaṁ sumedhasaḥ //4 //*
*virūpāsa idṛṣayasta idgambhīravepasaḥ / te aṁgirasaḥ sūnavaste agneḥ pari jiāre //5 //*
*ye agneḥ pari jiāre virūpāso divaspari / navagvo nu daśagvo aṁgirastamaḥ sachā deveṣu maṁhate //6 //*

३. सावर्णे दानस्तुतिः (Sāvarṇe Dānastutiḥ) - ऋ. (Rv.) १०.६२.८-११

प्र नूनं जायतामयं मनुस्तोक्मेव रोहतु। यः सहस्रं शताश्वं सद्यो दानाय मंहते ॥८॥
न तमश्नोति कश्चन दिवइव सान्वारभम्। सावर्ण्यस्य दक्षिणा वि सिन्धुरिव पप्रथे ॥९॥
उत दासा परिविषे स्मद्दिष्टी गोपरीणसा। यदुस्तुर्वश्च मामहे ॥१०॥
सहस्रदा ग्रामणीर्मा रिषन्मनुः सूर्येणास्य यतमानैतु दक्षिणा ।
सावर्णेर्देवाः प्र तिरन्त्वायुर्यस्मिन्नश्रान्ता असनाम वाजम् ॥११॥

*pra nūnaṁ jāyatāmayaṁ manustokmeva rohatu / yaḥ sahasraṁ śatāśvaṁ sadyo dānāya maṁhate //8 //*
*na tamaśnoti kaśchana divaiva sānvārabham / sāvarṇyasya dakṣiṇā vi sindhuriva paprathe //9 //*
*uta dāsā pariviṣe smaddiṣṭī gopariṇasā / yadusturvaścha māmahe //10 //*
*sahasradā grāmaṇīrmā riṣanmanuḥ sūryeṇāsya yatamānaitu dakṣiṇā /*
*sāvarṇerdevāḥ pra tirantvāyuryasminnaśrāntā asanāma vājam //11 //*

## ३१८. नारदः काण्वः (Nāradaḥ Kāṇvaḥ)

१. इन्द्रः (Indraḥ) - ऋ. (Rv.) ८.१३.१-३३; सा. (Sv.) ३८१; ७४६-४८

ऋ. (Rv.) ८.१३.१-३३

इन्द्रः सुतेषु सोमेषु क्रतुं पुनीत उक्थ्यम्। विदे वृधस्य दक्षसो महान्हि षः ॥१॥
स प्रथमे व्योमनि देवानां सदने वृधः। सुपारः सुश्रवस्तमः समप्सुजित् ॥२॥
तमह्वे वाजसातय इन्द्रं भराय शुष्मिणम्। भवा नः सुम्ने अन्तमः सखा वृधे ॥३॥
इयं त इन्द्र गिर्वणो रातिः क्षरति सुन्वतः। मन्दानो अस्य बर्हिषो वि राजसि ॥४॥
नूनं तदिन्द्र दद्धि नो यत्त्वा सुन्वन्त ईमहे। रयिं नश्चित्रमा भरा स्वर्विदम् ॥५॥
स्तोता यत्ते विचर्षणिरतिप्रशर्धयद् गिरः। वया इवानु रोहते जुषन्त यत् ॥६॥
प्रत्नवज्जनया गिरः शृणुधी जरितुर्हवम्। मदेमदे ववक्षिथा सुकृत्वने ॥७॥
क्रीळन्त्यस्य सूनृता आपो न प्रवता यतीः। अया धिया य उच्यते पतिर्दिवः ॥८॥
उतो पतिर्य उच्यते कृष्टीनामेक इद्वशी। नमोवृधैरवस्युभिः सुते रण ॥९॥
सतुहि श्रुतं विपश्चितं हरी यस्य प्रसक्षिणा। गन्तारा दाशुषो गृहं नमस्विनः ॥१०॥
तूतुजानो महेमतेऽश्वेभिः प्रुषितप्सुभिः। आ याहि यामाशुभिः शमिद्धि ते ॥११॥

इन्द्र शविष्ठ सत्पते रयिं गृणत्सु धारय। श्रवः सूरिभ्यो अमृतं वसुत्वनम् ॥१२॥
हवे त्वा सूर उदिते हवे मध्यन्दिने दिवः। जुषाण इन्द्र सप्तिभिर्न आ गहि ॥१३॥
आ तू गहि प्र तु द्रव मत्स्वा सुतस्य गोमतः। तन्तुं तनुष्व पूर्व्यं यथा विदे ॥१४॥
यच्छक्रासि परावति यदर्वावति वृत्रहन्। यद्वा समुद्रे अन्धसोऽवितेदसि ॥१५॥
इन्द्रं वर्धन्तु नो गिर इन्द्रं सुतास इन्दवः। इन्द्रे हविष्मतीर्विशो अराणिषुः ॥१६॥
तमिद्विप्रा अवस्यवः प्रवत्वतीभिरूतिभिः। इन्द्र क्षेणीरवर्धयन्वया इव ॥१७॥
त्रिकद्रुकेषु चेतनं देवासो यामव्रत। तमिद्वर्धन्तु नो गिरः सदावृधम् ॥१८॥
स्तोता यत्ते अनुव्रत उक्थान्यृतुथा दधे। शुचिः पावक उच्यते सो अद्भुतः ॥१९॥
तदिद्रुद्रस्य चेतति यह्वं प्रत्नेषु धामसु। मनो यत्रा वि तद्दधुर्विचेतसः ॥२०॥
यदि मे सख्यमावर इमस्य पाह्यन्धसः। येन विश्वा अति द्विषो अतारिम ॥२१॥
कदा त इन्द्र गिर्वणः स्तोता भवाति शंतमः। कदा नो गव्ये अश्व्ये वसौ दधः ॥२२॥
उत ते सुष्टुता हरी वृषणा वहतो रथम्। अजुर्यस्य मदिन्तमं यमीमहे ॥२३॥
तमीमहे पुरुष्टुतं यह्वं प्रत्नाभिरूतिभिः। नि बर्हिषि प्रिये सददध द्विता ॥२४॥
वर्धस्वा सु पुरुष्टुत ऋषिष्टुताभिरूतिभिः। धुक्षस्व पिप्युषीमिषमवा च नः ॥२५॥
इन्द्र त्वमवितेदसीत्था स्तुवतो अद्रिवः। ऋतादियर्मि ते धियं मनोयुजम् ॥२६॥
इह त्या सधमाद्या युजानः सोमपीतये। हरी इन्द्र प्रतद्वसू अभि स्वर ॥२७॥
अभि स्वरन्तु ये तव रुद्रासः सक्षत श्रियम्। उतो मरुत्वतीर्विशो अभि प्रयः ॥२८॥
इमा अस्य प्रमतूर्तयः पदं जुषन्त यद्दिवि। नाभा यास्य सं दधुर्यथा विदे ॥२९॥
अयं दीर्घाय चक्षसे प्राचि प्रयत्यध्वरे। मिमीते यामानुषग्विचक्ष्य ॥३०॥
वृषायमिन्द्र ते रथ उतो ते वृषणा हरी। वृषा त्वं शतक्रतो वृषा हवः ॥३१॥
वृषा ग्रावा वृषा मदो वृषा सोमो अयं सुतः। वृषा यो यमिन्वसि वृषा हवः ॥३२॥
वृषा त्वा वृषण हुवे वज्रिंचित्राभिरूतिभिः। वावन्थ हि प्रतिष्टुतिं वृषा हवः ॥३३॥

*indraḥ suteṣu someṣu kratuṁ punīta ukthyam /*
*vide vṛdhasya dakṣaso mahānhi ṣaḥ //1 //*
*sa prathame vyomani devānāṁ sadane vṛdhaḥ /*
*supāraḥ suśravastamaḥ samapsujit //2 //*
*tamahne vājasātaya indraṁ bharāya śuṣmiṇam /*
*bhavā naḥ sumne antamaḥ sakhā vṛdhe //3 //*
*iyaṁ ta indra girvaṇo rātiḥ kṣarati sunvataḥ /*
*mandāno asya barhiṣo vi rājasi //4 //*
*nūnaṁ tadindra daddhi neā yattvā sunvanta īmahe /*
*rayiṁ naśchitramā bharā svarvidam //5 //*
*stotā yatte vicharṣaṇiratipraśardhayad giraḥ / vayā ivānu rohate juṣanta yat //6 //*
*pratnavajjanayā giraḥ śṛṇudhī jariturhavam / mademade vivakṣithā sukṛtvane //7 //*
*krīḷantyasya sūnṛtā āpo na pravatā yatīḥ / ayā dhiyā ya uchyate patirdivaḥ //8 //*
*uto patirya uchyate kṛṣṭīnāmeka idvaśī / namovṛdhairavasyubhiḥ sute raṇa //9 //*
*satuhi śrutaṁ vipaśchitaṁ harī yasya prasakṣiṇā / gantārā dāśuṣo gṛhaṁ namasvinaḥ //10 //*
*tūtujāno mahemate'śvebhiḥ pruṣitapsubhiḥ / ā yāhi yāmāśubhiḥ śamiddhi te //11 //*
*indra śaviṣṭha satpate rayiṁ gṛṇatsu dhāraya /*
*śravaḥ sūribhyo amṛtaṁ vasutvanam //12 //*
*have tvā sūra udite have madhyandine divaḥ / juṣāṇa indra saptibhirna ā gahi //13 //*
*ā tū gahi pra tu drava matsvā sutasya gomataḥ /*
*tantuṁ tanuṣva pūrvya yathā vide //14 //*
*yachchhakrāsi parāvati yadarvāvati vṛtrahan / yadvā samudre andhaso'vitedasi //15 //*
*indraṁ vardhantu no gira indraṁ sutāsa indavaḥ /*
*indre haviṣmatīrviśo arāṇiṣuḥ //16 //*
*tamidviprā avasyavaḥ pravatvatībhirūtibhiḥ / indra kṣeṇīravardhayanvayā iva //17 //*

*trikadrukeṣu chetanaṁ devāso yāmatnata |*
*tamidvardhantu no giraḥ sadāvṛdham ||18 ||*
*stotā yatte anuvrata ukthānyṛtuthā dadhe | śuchiḥ pāvaka uchyate so adbhutaḥ ||19 ||*
*tadidrudrasya chetati yahnaṁ pratneṣu dhāmasu |*
*mano yatrā vi taddadhurvichetasaḥ ||20 ||*
*yadi me sakhyamāvara imasya pāhyandhasaḥ | yena viśvā ati dviṣo atārima ||21 ||*
*kadā ta indra girvaṇaḥ stotā bhavāti śaṁtamaḥ |*
*kadā no gavye aśvye vasau dadhaḥ ||22 ||*
*uta te suṣṭutā harī vṛṣaṇā vahato ratham | ajuryasya madintamaṁ yamīmahe ||23 ||*
*tamīmahe puruṣṭutaṁ yahnaṁ pratnābhirūtibhiḥ |*
*ni barhiṣi priye sadadadha dvitā ||24 ||*
*vardhasvā su puruṣṭuta ṛṣiṣṭutābhirūtibhiḥ |*
*dhukṣasva pipyuṣīmiṣamavā cha naḥ ||25 ||*
*indra tvamavitedasītthā stuvato adrivaḥ | ṛtādiyarmi te dhiyaṁ manoyujam ||26 ||*
*iha tyā sadhamādyā yujānaḥ somapītaye | harī indra pratadvasū abhi svara ||27 ||*
*abhi svarantu ye tava rudrāsaḥ sakṣata śriyam | uto marutvatīrviśo abhi prayaḥ ||28 ||*
*imā asya pramatūrtayaḥ padaṁ juṣanta yaddivi |*
*nābhā yāsya saṁ dadhuryathā vide ||29 ||*
*ayaṁ dīrghāya chakṣase prāchi prayatyadhvare | mimīte yāmānuṣagvichakṣaya ||30 ||*
*vṛṣāyamindra te ratha uto te vṛṣaṇā harī | vṛṣā tvaṁ śatakrato vṛṣā havaḥ ||31 ||*
*vṛṣā grāvā vṛṣā mado vṛṣā somo ayaṁ sutaḥ | vṛṣā yo yaminvasi vṛṣā havaḥ ||32 ||*
*vṛṣā tvā vṛṣaṇa huve vajriiṁchatrābhirūtibhiḥ |*
*vāvantha hi pratiṣṭutiṁ vṛṣā havaḥ ||33 ||*

सा. (Sv.) ३८१

इन्द्र सुतेषु सोमेषु क्रतुं पुनीष उक्थ्यम्। विदे वृधस्य दक्षस्य महां हि षः ॥१॥
*indra suteṣu someṣu kratuṁ punīṣa ukthyam |*
*vide vṛdhasya dakṣasya mahāṁ hi ṣaḥ ||1 ||*

सा. (Sv.) ७४६-७४८

इन्द्र सुतेषु क्रतुं पुनीष उक्थ्यम्। विदे वृधस्य दक्षस्य महाँ हि षः ॥१॥
स प्रथमे व्योमनि देवानां सदने वृधः। सुपारः सुश्रवस्तमः समप्सुजित् ॥२॥
तमु हुवे वाजसातय इन्द्रं भराय शुष्मिणम्। भवा नः सुम्न अन्तम सखा वृधे ॥३॥
*indra suteṣu kratuṁ punīṣa ukthyam | vide vṛdhasya dakṣasya mahāṁ̐ hi ṣaḥ ||1 ||*
*sa prathame vyomani devānāṁ sadane vṛdhaḥ |*
*supāraḥ suśravastamaḥ samapsujit ||2 ||*
*tamu huve vājasātaya indraṁ bharāya śuṣmiṇam |*
*bhavā naḥ sumna antama sakhā vṛdhe ||3 ||*

## ३१९. नारायणः (Nārāyaṇaḥ)

१. ईश्वरः (Īśvaraḥ) - य. (Yv.)३०.१३

ऋतये स्तेनहृदयं वैरहत्याय पिशुनं विविक्त्यै क्षत्तारमौपद्रष्ट्र्यायानुक्षत्तारं बलायानुचरं भूम्ने परिष्कन्दं प्रियाय प्रियवादिनमरिष्ट्याऽअश्वसादंस्वर्गाय लोकाय भागदुघं वर्षिष्ठाय नाकाय परिवेष्टारम् ॥१३॥
*ṛtaye stenahṛdayaṁ vairahatyāya piśunaṁ vivivatyai kṣattāramaupadraṣṭryāyānukṣattāraṁ balāyānucharaṁ bhūmne pariṣkandaṁ priyāya priyavādinamariṣṭyā'aśvasādaṁsvargāya lokāya bhāgadughaṁ varṣiṣṭhāya nākāya pariveṣṭāram ||13 ||*

२. ईशानः (Īśānaḥ) - य. (Yv.)३१.२

पुरुषऽएवेदंसर्व यद्भूतं यच्च भाव्यम्। उतामृतत्वस्येशानो यदन्नेनातिरोहति ॥२॥
*puruṣa'evedaṁsarva yadbhūtaṁ yachcha bhāvyam |*
*utāmṛtatvasyeśāno yadannenātirohati ||2 ||*

३. परमेश्वरः (Parameśvaraḥ) - य. (Yv.)३०.५-६

ब्रह्मणे ब्राह्मणं क्षत्राय राजन्यं मरुद्भ्यो वैश्यं तपसे शूद्रं तमसे तस्करं नारकाय वीरहणं पाप्मने क्लीबमाक्रयायाऽअयोगूं कामाय पुँश्चलूमतिक्रुष्टाय मागधम् ॥५॥

नृत्ताय सूतं गीताय शैलूषं धर्माय सभाचरं नरिष्ठायै भीमलं नर्माय रेभंहसाय कारि मानन्दाय स्त्रीषखं प्रमदे कुमारीपुत्रं मेधायै रथकारं धैर्य्याय तक्षाणम् ॥६॥

*brahmaṇe brāhmaṇaṁ kṣatrāya rājanyaṁ marudbhyo vaiśyaṁ tapase śūdraṁ tamase taskaraṁ nārakāya vīrahaṇaṁ pāpmane klībamākrayāyā'ayogūṁ kāmāya puṁścalūmatikruṣṭāya māgadham //5 //*

*nṛttāya sūtaṁ gītāya śailūṣaṁ dharmāya sabhācaraṁ nariṣṭhāyai bhīmalaṁ narmāya rebhaṁhasāya kāri mānandāya strīṣakhaṁ pramade kumārīputraṁ medhāyai rathakāraṁ dhairyyāya takṣāṇam //6 //*

४. पुरुषः ब्रह्मप्रकाशनम् (Puruṣaḥ Brahmaprakāśanam) - अ. (Av.) १०.२.१-३३; १९.६.१-१६

अ. (Av.) १०.२.१-३३

केन पार्ष्णी आभृते पूरुषस्य केन मांसं संभृतं केन गुल्फौ ।
केनांगुलीः पेशनीः केन खानि केनोच्छ्लंखौ मध्यतः कः प्रतिष्ठाम् ॥१॥
कस्मान्नु गुल्फावधरावकृण्वन्नष्ठीवन्तावुत्तरौ पुरुषस्य ।
जंघे निर्ऋत्य न्यदधुः क्वस्विज्जानुनोः सन्धी क उ तच्चिकेत ॥२॥
चतुष्टयं युज्यते संहितान्त जानुभ्यामूर्ध्वं शिथिरं कबन्धम् ।
श्रोणी यदूरू क उ तज्जजान याभ्यां कुसिन्धं सुदृढं बभूव ॥३॥
कति देवाः कतमे त आसन् य उरो ग्रीवाश्चिक्युः पुरुषस्य ।
कति स्तनौ व्यदधुः कः कफोडौ कति स्कन्धान् कति पृष्टीरचिन्वन् ॥४॥
को अस्य बाहू समभरद् वीर्यकरवादिति । अंसौ को अस्य तद् देवः कुसिन्धे अध्या दधौ ॥५॥
कः सप्त खानि वि ततर्द शीर्षणि कर्णाविमौ नासिके चक्षणी मुखम् ।
येषां पुरुत्रा विजयस्य मह्मनि चतुष्पादो द्विपदो यन्ति यामम् ॥६॥
हन्वोहि जिह्वामदधात् पुरूचीमधा महीमधि शिश्राय वाचम् ।
स आ वरीवर्ति भुवनेष्वन्तरपो वसानः क उ तच्चिकेत ॥७॥
मस्तिष्कमस्य यतमो ललाटं कलाटिकां प्रथमो यः कपालम् ।
चित्सा चित्यं हन्वो५ पुरुषस्य दिवं रुरोह कतमः स देवः ॥८॥
प्रियाप्रियाणि बहुला स्वप्नं संबाधतन्द्यः । आनन्दानुग्रो नन्दांश्च कस्माद् वहति पुरुषः ॥९॥
आर्तिरवर्तिर्निर्ऋतिः कुतो नु पुरुषेऽमतिः । राद्धिः समृद्धिरव्यृद्धिर्मतिरुदितयः कुतः ॥१०॥
को अस्मिन्नापो व्यदधाद् विषूवृतः पुरूवृतः सिन्धुसृत्याय जाताः ।
तीव्रा अरुणा लोहिनीस्ताम्रधूम्रा ऊर्ध्वा अवाचीः पुरुषे तिरश्चीः ॥११॥
को अस्मिन् रूपमदधात् को मह्मानं च नाम च ।
गातुं को अस्मिन् कः केतुं कश्चरित्राणि पुरुषे ॥१२॥
को अस्मिन् प्राणमवयत् को अपानं व्यानमु ।
समानमस्मिन् को देवोऽधि शिश्राय पूरुषे ॥१३॥
को अस्मिन् यामदधादेको देवोऽधि पूरुषे।
को अस्मिन्त्सत्यं कोऽनृतं कुतो मृत्युः कुतोऽमृतम् ॥१४॥
को अस्मै वासः पर्यदधात् को अस्यायुरकल्पयत् ।
बलं को अस्मै प्रायच्छत् को अस्याकल्पयज्जवम् ॥१५॥
केनापो अन्वतनुत केनाहरकरोद् रुचे । उषसं केनान्वैद्ध केन सायंभवं ददे ॥१६॥
को अस्मिन् रेतो न्यदधात् तन्तुरा तायतामिति ।
मेधां को अस्मिन्नध्यौहत् को बाणं को नृतो दधौ ॥१७॥
केनेमां भूमिमौर्णोत् केन पर्यभवद् दिवम् । केनाभि मह्ना पर्वतान् केन कर्माणि पूरुषः ॥१८॥
केन पर्जन्यमन्वेति केन सोमं विचक्षणम् । केन यां च श्रद्धां च केनास्मिन् निहितं मनः ॥१९॥

केन श्रोत्रियमाप्नोति केनेमं परमेष्ठिनम् । केनेममग्निं पूरुषः केन संवत्सरं ममे ॥२०॥
ब्रह्म श्रोत्रियमाप्नोति ब्रह्मेमं परमेष्ठिनम् । ब्रह्मेममग्निं पूरुषो ब्रह्म संवत्सरं ममे ॥२१॥
केन देवाँ अनु क्षियति केन दैवजनीर्विशः । केनेदमन्यन्नक्षत्रं केन सत् क्षत्रमुच्यते ॥२२॥
ब्रह्म देवाँ अनु क्षियति ब्रह्म दैवजनीर्विशः । ब्रह्मेदमन्यन्नक्षत्रं ब्रह्म सत् क्षत्रमुच्यते ॥२३॥
केनयं भूमिर्विहिता केन द्यौरुत्तरा हिता । केनेदमूर्ध्वं तिर्यक् चान्तरिक्षं व्यचो हितम् ॥२४॥
ब्रह्मणा भूमिर्विहिता ब्रह्म द्यौरुत्तरा हिता । ब्रह्मेदमूर्ध्वं तिर्यक् चान्तरिक्षं व्यचो हितम् ॥२५॥
मूर्धानमस्य संसीव्याथर्वा हृदयं च यत् । मस्तिष्कादूर्ध्वः प्रैरयत् पवमानोऽधि शीर्षतः ॥२६॥
तद् वा अथर्वणः शिरो देवकोशः समुब्जितः। तत् प्राणो अभि रक्षति शिरो अन्नमथो मनः ॥२७॥
ऊर्ध्वो नु सृष्टा३स्तिर्यङ् नु सृष्टाः३ सर्वा दिशः पुरुष आ बभूवाँ३ ।
पुरं यो ब्रह्मणो वेद यस्याः पुरुष उच्यते ॥२८॥
यो वै तां ब्रह्मणा वेदामृतेनावृतां पुरम् । तस्मै ब्रह्म च ब्राह्माश्च चक्षुः प्राणं प्रजां ददुः ॥२९॥
न वै तं चक्षुर्जहाति न प्राणो जरसः पुरा ।
पुरं यो ब्रह्मणो वेद यस्याः पुरुष उच्यते ॥३०॥
अष्टाचक्रा नवद्वारा देवानां पूरयोध्या । तस्या हिरण्ययः कोशः स्वर्गो ज्योतिषावृतः ॥३१॥
तस्मिन् हिरण्यये कोशे त्र्यरे त्रिप्रतिष्ठिते ।
तस्मिन् यद् यक्षमात्मन्वत् तद् वै ब्रह्मविदो विदुः ॥३२॥
प्रभ्राजमानां हरिणीं यशसा संपरीवृताम् । पुरं हिरण्ययीं ब्रह्मा विवेशापराजिताम् ॥३३॥

*kena pārṣṇī ābhṛte pūruṣasya kena māṁsaṁ saṁbhṛtaṁ kena gulphau /*
*kenāṁgulīḥ peśanīḥ kena khāni kenochchhlaṁkhau madhyataḥ kaḥ pratiṣṭhām //1 //*
*kasmānnu gulphāvadharāvakṛṇvannaṣṭhīvantāvuttarau puruṣasya /*
*jaṁghe nirṛtya nyadadhuḥ kvasvijjānunoḥ sandhī ka u tachchiketa //2 //*
*chatuṣṭayaṁ yujyate saṁhitānta jānubhyāmūrdhva śithiraṁ kabandham /*
*śroṇī yadūrū ka u tajjajāna yābhyāṁ kusindhaṁ sudṛḍhaṁ babhūva //3 //*
*kati devāḥ katame ta āsan ya uro grīvāśchikyuḥ puruṣasya /*
*kati stanau vyadadhuḥ kaḥ kaphoḍau kati skandhān kati pṛṣṭīrachinvan //4 //*
*ko asya bāhū samabharad vīryakaravāditi /*
*aṁsau ko asya tad devaḥ kusindhe adhyā dadhau //5 //*
*kaḥ sapta khāni vi tatarda śīrṣaṇi karṇāvimau nāsike chakṣaṇī mukham /*
*yeṣāṁ purutrā vijayasya mahmani chatuṣpādo dvipado yanti yāmam //6 //*
*hanvohi jihnāmadadhāt purūchīmadhā mahīmadhi śiśrāya vācham /*
*sa ā varīvarti bhuvaneṣvantarapo vasānaḥ ka u tachchiketa //7 //*
*mastiṣkamasya yatamo lalāṭaṁ kalāṭikāṁ prathamo yaḥ kapālam /*
*chitsā chityaṁ hanvo5 puruṣasya divaṁ ruroha katamaḥ sa devaḥ //8 //*
*priyāpriyāṇi bahulā svapnaṁ saṁbādhatandryaḥ /*
*ānandānugro nandāṁścha kasmād vahati puruṣaḥ //9 //*
*ārtiravartirnirṛtiḥ kuto nu puruṣe'matiḥ /*
*rāddhiḥ samṛddhiravyṛddhirmatiruditayaḥ kutaḥ //10 //*
*ko asminnāpo vyadadhād viṣūvṛtaḥ purūvṛtaḥ sindhusṛtyāya jātāḥ /*
*tīvrā aruṇā lohinīstāmradhūmrā ūrdhvā avāchīḥ puruṣe tiraśchīḥ //11 //*
*ko asmin rūpamadadhāt ko mahnānaṁ cha nāma cha /*
*gātuṁ ko asmin kaḥ ketuṁ kaścharitrāṇi puruṣe //12 //*
*ko asmin prāṇamavayat ko apānaṁ vyānamu /*
*samānamasmin ko devo'dhi śiśrāya pūruṣe //13 //*
*ko asmin yāmadadhādeko devo'dhi pūruṣe /*
*ko asmintsatyaṁ ko'nṛtaṁ kuto mṛtyuḥ kuto'mṛtam //14 //*
*ko asmai vāsaḥ paryadadhāt ko asyāyurakalpayat /*
*balaṁ ko asmai prāyachchhat ko asyākalpayajjavam //15 //*
*kenāpo anvatanuta kenāharakarod ruche /*

*uṣasaṁ kenānvainddha kena sāyaṁbhavaṁ dade* ॥16॥
*ko asmin reto nyadadhāt tanturā tāyatāmiti* ।
*medhāṁ ko asminnadhyauhat ko bāṇaṁ ko nṛto dadhau* ॥17॥
*kenemāṁ bhūmimaurṇot kena paryabhavad divam* ।
*kenābhi mahnā parvatān kena karmāṇi pūruṣaḥ* ॥18॥
*kena parjanyamanveti kena somaṁ vichakṣaṇam* ।
*kena yāṁ cha śraddhāṁ cha kenāsmin nihitaṁ manaḥ* ॥19॥
*kena śrotriyamāpnoti kenemaṁ parameṣṭhinam* ।
*kenemamagiṁna pūruṣaḥ kena saṁvatsaraṁ mame* ॥20॥
*brahma śrotriyamāpnoti brahmemaṁ parameṣṭhinam* ।
*brahmemamagiṁna pūruṣo brahma saṁvatsaraṁ mame* ॥21॥
*kena devāṁ̐ anu kṣiyati kena daivajanīrviśaḥ* ।
*kenedamanyannakṣatraṁ kena sat kṣatramuchyate* ॥22॥
*brahma devāṁ̐ anu kṣiyati brahma daivajanīrviśaḥ* ।
*brahmedamanyannakṣatraṁ brahma sat kṣatramuchyate* ॥23॥
*kenayaṁ bhūmirvihitā kena dyauraruttarā hitā* ।
*kenedamūrdhva tiryak chāntarikṣaṁ vyacho hitam* ॥24॥
*brahmaṇā bhūmirvihitā brahma dyauruttarā hitā* ।
*brahmedamūrdhva tiryak chāntarikṣaṁ vyacho hitam* ॥25॥
*mūrdhānamasya saṁsīvyātharvā hṛdayaṁ cha yat* ।
*mastiṣkādūrdhvaḥ prairayat pavamāno'dhi śīrṣataḥ* ॥26॥
*tad vā atharvaṇaḥ śiro devakośaḥ samubjitaḥ* ।
*tat prāṇo abhi rakṣati śiro annamatho manaḥ* ॥27॥
*ūrdhvo nu sṛṣṭā3stiryaṅ nu sṛṣṭāḥ3 sarvā diśaḥ puruṣa ā babhūvāṁ̐3* ।
*puraṁ yo brahmaṇo veda yasyāḥ puruṣa uchyate* ॥28॥
*yo vai tāṁ brahmaṇā vedāmṛtenāvṛtāṁ puram* ।
*tasmai brahma cha brāhmāścha chakṣuḥ prāṇaṁ prajāṁ daduḥ* ॥29॥
*na vai taṁ chakṣurjahāti na prāṇo jarasaḥ purā* ।
*puraṁ yo brahmaṇo veda yasyāḥ puruṣa uchyate* ॥30॥
*aṣṭāchakrā nabadvārā devānāṁ pūrayodhyā* ।
*tasyā hiraṇyayaḥ kośaḥ svargo jyotiṣāvṛtaḥ* ॥31॥
*tasmin hiraṇyaye kośe trayare tripratiṣṭhite* ।
*tasmin yad yakṣamātmanvat tad vai brahmavido viduḥ* ॥32॥
*prabhrājamānāṁ hariṇīṁ yaśasā saṁparīvṛtām* ।
*puraṁ hiraṇyayīṁ brahmā viveśāparājitām* ॥33॥

अ. (Av.) १९.६.१-१६

सहस्रबाहुः पुरुषः सहस्राक्षः सहस्रपात् । स भूमिं विश्वतो वृत्वात्यतिष्ठद् दशांगुलम् ॥१॥
त्रिभिः पद्भिर्द्यामरोहत् पादस्येहाभवत् पुनः ।
तथा व्यक्रामद् विष्वङ्ङशनानशने अनु ॥२॥
तावन्तो अस्य महिमानस्ततो ज्यायांश्च पूरुषः ।
पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि ॥३॥
पुरुष एवेदं सर्व यद् भूतं यच्च भाव्यम् । उतामृतत्वस्येश्वरो यदन्येनाभवत् सह ॥४॥
यत् पुरुषं व्यदधुः कतिधा व्यकल्पयन् ।
मुखं किमस्य किं बाहू किमूरू पादा उच्येते ॥५॥
ब्राह्मणोस्य मुखमासीद् बाहू राजन्योऽभवत् ।
मध्यं तदस्य यद् वैश्यः पद्भ्यां शूद्रो अजायत ॥६॥
चन्द्रमा मनसो जातश्चक्षोः सूर्यो अजायत ।
मुखादिन्द्रश्चाग्निश्च प्राणाद् वायुरजायत ॥७॥

नाभ्या आसीदन्तरिक्षं शीर्ष्णो द्यौः समवर्तत ।
पद्भ्यां भूमिर्दिशः श्रोत्रात् तथा लोकाँ अकल्पयन् ॥८॥
विराडग्रे समभवद् विराजो अधि पूरुषः । स जातो अत्यरिच्यत पश्चाद् भूमिमतो पुरः ॥९॥
यत् पुरुषेण हविषा देवा यामतन्वत । वसन्तो अस्यासीदाज्यं ग्रीष्म इध्मः शरद्धविः ॥१०॥
तं यां प्रावृषा प्रौक्षन् पुरुषं जातमग्रशः । तेन देवा अयजन्त साध्या वसवश्च ये ॥११॥
तस्मादश्वा अजायन्त ये च के चोभयादतः ।
गावो ह जिरे तस्मात् तस्माज्जातो अजावयः ॥१२॥
तस्माद् याात् सर्वहुत ऋचः सामानि जरित्रे । छन्दो ह जिरे तस्माद्यजुस्तस्मादजायत ॥१३॥
तस्माद्यात्सर्वहुतः संभृतं पृषदाज्यम् । पशूँस्तांश्चक्रे वायव्यानारण्या ग्राम्याश्व ये ॥१४॥
सप्तास्यासन् परिधयस्त्रिः सप्त समिधः कृताः ।
देवा यद् यां तन्वाना अबध्नन् पुरुषं पशुम् ॥१५॥
मूर्घ्नो देवस्य बृहतो अंशवः सप्त सप्ततीः । राज्ञः सोमस्याजायन्त जातस्य पुरुषादधि ॥१६॥

*sahasrabāhuḥ puruṣaḥ sahasrākṣaḥ sahasrapāt /*
*sa bhūmiṁ viśvato vṛtvātyatiṣṭhad daśāṁgulam //1 //*
*tribhiḥ padbhirdyāmarohat pādasyehābhavat punaḥ /*
*tathā vyakrāmad viṣvaṅṅśanānaśane anu //2 //*
*tāvanto asya mahimānastato jyāyāṁścha pūruṣaḥ /*
*pādo'sya viśvā bhūtāni tripādasyāmṛtaṁ divi //3 //*
*puruṣa evedaṁ sarva yad bhūtaṁ yachcha bhāvyam /*
*utāmṛtatvasyeśvaro yadanyenābhavat saha //4 //*
*yat puruṣaṁ vyadadhuḥ katidhā vyakalpayan /*
*mukhaṁ kimasya kiṁ bāhū kimūrū pādā uchyete //5 //*
*brāhmaṇosya mukhamāsīd bāhū rājanyo'bhavat /*
*madhyaṁ tadasya yad vaiśyaḥ padbhyāṁ śūdro ajāyata //6 //*
*chandramā manaso jātaśchakṣoḥ sūryo ajāyata /*
*mukhādindraśchāgniścha prāṇād vāyurajāyata //7 //*
*nābhyā āsīdantarikṣaṁ śīrṣṇo dyauḥ samavartata /*
*padbhyāṁ bhūmirdiśaḥ śrotrāt tathā lokām̐ akalpayan //8 //*
*virāḍagre samabhavad virājo adhi pūruṣaḥ /*
*sa jāto atyarichyata paśchād bhūmimato puraḥ //9 //*
*yat puruṣeṇa haviṣā devā yāmatanvata /*
*vasanto asyāsīdājyaṁ grīṣma idhmaḥ śaraddhaviḥ //10 //*
*taṁ yāṁ prāvṛṣā praukṣan puruṣaṁ jātamagraśaḥ /*
*tena devā ayajanta sādhyā vasavaścha ye //11 //*
*tasmādaśvā ajāyanta ye cha ke chobhayādataḥ /*
*gāvo ha jiāre tasmāt tasmājjāto ajāvayaḥ //12 //*
*tasmād yāāt sarvahuta ṛchaḥ sāmāni jaritre /*
*chhando ha jiāre tasmādyajustasmādajāyata //13 //*
*tasmādyāātsarvahutaḥ saṁbhṛtaṁ pṛṣadājyam /*
*paśūm̐stāṁśchakre vāyavyānāraṇyā grāmyāśva ye //14 //*
*saptāsyāsan paridhayastriḥ sapta samidhaḥ kṛtāḥ /*
*devā yad yāṁ tanvānā abadhnan puruṣaṁ paśum //15 //*
*mūrghno devasya bṛhato aṁśavaḥ sapta saptatīḥ /*
*rājñaḥ somasyājāyanta jātasya puruṣādadhi //16 //*

५. पुरुषः (Puruṣaḥ) - ऋ. (Rv.) १०.९०.१-१६; य. (Yv.)३१.१; ३; ४; ६; ८-१६

ऋ. (Rv.) १०.९०.१-१६

सहस्रीशीर्षा पुरुषः सहस्राक्षः सहस्रपात् । स भूमिं विश्वतो वृत्वात्यतिष्ठद्दशांगुलम् ॥१॥
पुरुष एवेदं सर्व यदभूतं यच्च भाव्यम् । उतामृतत्वस्येशानो यदन्नेनातिरोहति ॥२॥

एतावानस्य महिमातो ज्यायाँश्च पूरुषः । पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि ॥३॥
त्रिपादूर्ध्व उदैत्पुरुषः पादोऽस्येहाभवत्पुनः । ततो विष्वङ् व्यक्रामत्साशनानशने अभि ॥४॥
तस्माद्विराळजायत विराजो अधि पूरुषः । स जातो अत्यरिच्यत पश्चाद्भूमिमथो पुरः ॥५॥
यत्पुरुषेण हविषा देवा यामतन्वत । वसन्तो अस्यासीदाज्यं ग्रीष्म इध्मः शरद्धविः ॥६॥
तं यां बर्हिषि प्रौक्षन्पुरुषं जातमग्रतः । तेन देवा अयजन्त साध्या ऋषयश्च ये ॥७॥
तस्माद्याात्सर्वहुतः संभृतं पृषदाज्यम् । पशून्ताँश्चक्रे वायव्यानारण्यान्ग्राम्याश्च ये ॥८॥
तस्माद्यज्ञात्सर्वहुत ऋचः सामानि जरि । छन्दांसि जज्ञिरे तस्माद्यजुस्तस्मादजायत ॥९॥
तस्मादश्वा अजायन्त ये के चोभयादतः । गावो ह जिरे तस्मात्तस्माज्जाता अजावयः ॥१०॥
यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन् । मुखं किमस्य कौ बाहू का ऊरू पादा उच्येते ॥११॥
ब्राह्मणोऽस्य मुखमासीद् बाहू राजन्यः कृतः । ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायत ॥१२॥
चन्द्रमा मनसो जातश्चक्षोः सूर्यो अजायत । मुखादिन्द्रश्चाग्निश्च प्राणाद्वायुरजायत ॥१३॥
नाभ्या आसीदन्तरिक्षं शीर्ष्णो द्यौः समवर्तत ।
पद्भ्यां भूमिर्दिशः श्रोत्रात्तथा लोकाँ अकल्पयन् ॥१४॥
सप्तास्यासन्परिधयस्त्रिः सप्त समिधः कृताः ।
देवा यद्यां तन्वाना अबध्नन्पुरुषं पशुम् ॥१५॥
योन यामयजन्त देवास्तानि धर्माणि प्रथमान्यासन् ।
ते ह नाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः ॥१६॥

*sahasrīśīrṣā puruṣaḥ sahasrākṣaḥ sahasrapāt* /
*sa bhūmiṁ viśvato vṛtvātyatiṣṭhaddaśāṁgulam* //1 //
*puruṣa evedaṁ sarva yadabhūtaṁ yachcha bhāvyam* /
*utāmṛtatvasyeśāno yadannenātirohati* //2 //
*etāvānasya mahimāto jyāyāṁścha pūruṣaḥ* /
*pādo'sya viśvā bhūtāni tripādasyāmṛtaṁ divi* //3 //
*tripādūrdhva udaitpuruṣaḥ pādo'syehābhavatpunaḥ* /
*tato viṣvaṁ vyakrāmatsāśanānaśane abhi* //4 //
*tasmādvirāḷajāyata virājo adhi pūruṣaḥ* /
*sa jāto atyarichyata paśchādbhūmimatho puraḥ* //5 //
*yatpuruṣeṇa haviṣā devā yāmatanvata* /
*vasanto asyāsīdājyaṁ grīṣma idhmaḥ śaraddhaviḥ* //6 //
*taṁ yāṁ barhiṣi praukṣanpuruṣaṁ jātamagrataḥ* /
*tena devā ayajanta sādhyā ṛṣayaścha ye* //7 //
*tasmādyāātsarvahutaḥ saṁbhṛtaṁ pṛṣadājyam* /
*paśūntāṁśchakre vāyavyānāraṇyāngrāmyāścha ye* //8 //
*tasmādyajñātsarvahuta ṛchaḥ sāmāni jarie* / *chhandāṁsi jajñire*
*tasmādyajustasmādajāyata* //9 //
*tasmādaśvā ajāyanta ye ke chobhayādataḥ* /
*gāvo ha jiāre tasmāttasmājjātā ajāvayaḥ* //10 //
*yatpuruṣaṁ vyadadhuḥ katidhā vyakalpayan* /
*mukhaṁ kimasya kau bāhū kā ūrū pādā uchyete* //11 //
*brāhmaṇo'sya mukhamāsīd bāhū rājanyaḥ kṛtaḥ* /
*ūrū tadasya yadvaiśyaḥ padbhyāṁ śūdro ajāyata* //12 //
*chandramā manaso jātaśchakṣoḥ sūryo ajāyata* /
*mukhādindraśchāgniścha prāṇādvāyurajāyata* //13 //
*nābhyā āsīdantarikṣaṁ śīrṣṇo dyauḥ samavartata* /
*padbhyāṁ bhūmirdiśaḥ śrotrāttathā lokāṁ akalpayan* //14 //
*saptāsyāsanparidhayastriḥ sapta samidhaḥ kṛtāḥ* /
*devā yadyāṁ tanvānā abadhnanpuruṣaṁ paśum* //15 //
*yona yāmayajanta devāstāni dharmāṇi prathamānyāsan* /

*te ha nākaṁ mahimānaḥ sachanta yatra pūrve sādhyāḥ santi devāḥ ॥16॥*

य. (Yv.)३१.१

सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्। स भूमिंसर्वत स्पृत्वाऽत्यतिष्ठद्दशांगुलम् ॥१॥

*sahasraśīrṣā puruṣaḥ sahasrākṣaḥ sahasrapāt ।*

*sa bhūmiṁsarvata spṛtvā'tyatiṣṭhaddaśāṁgulam ॥1॥*

य. (Yv.)३१.३-४

एतावानस्य महिमातो ज्यायाँश्च पूरुषः। पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि ॥३॥

त्रिपादूर्ध्व उदैत्पुरुषः पादोऽस्येहाभवत् पुनः। ततो विष्वङ् व्यक्रामत्साशनानशने अभि ॥४॥

*etāvānasya mahimāto jyāyām̐ścha pūruṣaḥ ।*

*pādo'sya viśvā bhūtāni tripādasyāmṛtaṁ divi ॥3॥*

*tripādūrdhva udaitpuruṣaḥ pādo'syehābhavat punaḥ ।*

*tato viṣvaṁ vyakrāmatsāśanānaśane abhi ॥4॥*

य. (Yv.)३१.६

तस्माद्याात्सर्वहुतः सम्भृतं पृषदाज्यम्। पशूँस्ताँश्चक्रे वायव्यानारण्या ग्राम्याश्च ये ॥६॥

*tasmādyāātsarvahutaḥ sambhṛtaṁ pṛṣadājyam ।*

*paśūm̐stām̐śchakre vāyavyānāraṇyā grāmyāścha ye ॥6॥*

य. (Yv.)३१.८-१६

तस्मादश्वा अजायन्त ये के चोभयादतः । गावो ह जिरे तस्मात्तस्माज्जाता अजावयः ॥८॥

तं यां बर्हिषि प्रौक्षन् पुरुषं जातमग्रतः । तेन देवा अयजन्त साध्या ऋषयश्च ये ॥९॥

यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन् । मुखं किमस्यासीत् किं बाहू किमूरू पादा उच्येते ॥१०॥

ब्राह्मणोऽस्य मुखमासीद्बाहू राजन्यः कृतः । ऊरू तदस्य यद्वैश्यः पद्भ्यांशूद्रो अजायत ॥११॥

चन्द्रमा मनसो जातश्चक्षोः सूर्यो अजायत । श्रोत्राद्वायुश्च प्राणश्च मुखादग्निरजायत ॥१२॥

नाभ्या आसीदन्तरिक्षंशीर्ष्णो द्यौः समवर्तत ।

पद्भ्यां भूमिर्दिशः श्रोत्रात्तथा लोकाँश् अकल्पयन् ॥१३॥

यत्पुरुषेण हविषा देवा यामतन्वत । वसन्तोऽस्यासीदाज्यं ग्रीष्म इध्मः शरद्धविः ॥१४॥

सप्तास्यासन् परिधयस्त्रिः सप्त समिधः कृताः। देवा यद्यां तन्वाना अबध्नन् पुरुषं पशुम् ॥१५॥

योन यामयजन्त देवास्तानि धर्माणि प्रथमान्यासन् ।

ते ह नाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः ॥१६॥

*tasmādaśvā ajāyanta ye ke chobhayādataḥ ।*

*gāvo ha jiāre tasmāttasmājjātā ajāvayaḥ ॥8॥*

*taṁ yāṁ barhiṣi praukṣan puruṣaṁ jātamagrataḥ ।*

*tena devā ayajanta sādhyā ṛṣayaścha ye ॥9॥*

*yatpuruṣaṁ vyadadhuḥ katidhā vyakalpayan ।*

*mukhaṁ kimasyāsīt kiṁ bāhū kimūrū pādā uchyete ॥10॥*

*brāhmaṇo'sya mukhamāsīdbāhū rājanyaḥ kṛtaḥ ।*

*ūrū tadasya yadvaiśyaḥ padbhyāṁśūdro ajāyata ॥11॥*

*chandramā manaso jātaśchakṣoḥ sūryo ajāyata ।*

*śrotrādvāyuścha prāṇaścha mukhādagnirajāyata ॥12॥*

*nābhyā āsīdantarikṣaṁśīrṣṇo dyauḥ samavartata ।*

*padbhyāṁ bhūmirdiśaḥ śrotrāttathā lokām̐ś akalpayan ॥13॥*

*yatpuruṣeṇa haviṣā devā yāmatanvata ।*

*vasanto'syāsīdājyaṁ grīṣma idhmaḥ śaraddhaviḥ ॥14॥*

*saptāsyāsan paridhayastriḥ sapta samidhaḥ kṛtāḥ ।*

*devā yadyāṁ tanvānā abadhnan puruṣaṁ paśum ॥15॥*

*yona yāmayajanta devāstāni dharmāṇi prathamānyāsan ।*

*te ha nākaṁ mahimānaḥ sachanta yatra pūrve sādhyāḥ santi devāḥ ॥16॥*

६. राजेश्वरौ (Rājeśvarau) - य. (Yv.)३०.१४-२२

मन्यवेऽयस्तापं क्रोधाय निसरं योगाय योक्तारं शोकायाभिसर्त्तारं क्षेमाय विमोक्तारमुत्कूलनिकूलेभ्यस्त्रिष्ठिन वपुषे मानस्कृतं शीलायांजनीकारीं निर्ऋत्यै कोशकारीं यमायासूम् ॥१४॥

यमाय यमसूमथर्वभ्योऽवतोकां संवत्सराय पर्यायिणीं परिवत्सरायाविजातामिदावत्सरयातीत्वरीमिद्वन्त्सराया तिष्कद्वरीं वत्सराय विजर्जरां संवत्सराय पलिक्रीमृभुभ्योऽजिनसन्धंसाध्येभ्यश्चर्मम्नम् ॥१५॥

सरोभ्यो धैवरमुपस्थावराभ्यो दाशं वैशान्ताभ्यो बैन्दं नड्वलाभ्यः शौष्कलं पाराय मार्गारमवाराय केवर्त्त तीर्थेभ्यऽआन्दं विषमेभ्यो मैनालंस्वनेभ्यः पर्णकं गुहाभ्यः किरातं सानुभ्यो जम्भकं पर्वतेभ्यः किम्पूरुषम् ॥१६॥

बीभत्सायै पौल्कसं वर्णाय हिरण्यकारं तुलायै वाणिजं पश्वादोषाय ग्लाविनं विश्वेभ्यो भूतेभ्यः सिध्मलं भूत्यै जागरणमभूत्यै स्वपनमार्त्यै जनवादिनं व्यृद्ध्याऽअपगल्भंसं शराय प्रच्छिदम् ॥१७॥

अक्षराजाय कितवं कृतायादिनवदर्श त्रेतायै कल्पिनं द्वापरायाधिकल्पिनमास्कन्दाय सभास्थाणुं मृत्यवे गोव्यच्छमन्तकाय गोघातं क्षुधे यो गां विकृन्तन्तं
भिक्षमाणऽउप तिष्ठति दुष्कृताय चरकाचार्य पाप्मने सैलगम ॥१८॥

प्रतिश्रुत्कायाऽअर्तनं घोषय भषमन्ताय बहुवादिनमनन्ताय मूकँ शब्दायाडम्बराघातं
महसे वीणावादं क्रोशाय तूणवध्ममवरस्पराय शङ्खवध्मं वनाय वनपमन्यतोरण्याय दावपम् ॥१९।

नर्माय पुँश्चलूंहसाय कारिं यादसे शाबल्यां ग्रामण्यं
गणकमभिक्रोशकं तान्महसे वीणावादं पाणिघ्नं तूणवध्मं तान्नृत्तायानन्दाय तलवम् ॥२०॥

अग्नये पीवानं पृथिव्यै पीठसर्पिणं वायवे चाण्डालमन्तरिक्षाय वंशनर्तिनं दिवे खलतिं सूर्याय हर्यक्षं नक्षत्रेभ्यः किर्मिरं चन्द्रमसे किलासमह्ने शुक्लं पिंगाक्षं रात्र्यै कृष्णं पिंगाक्षम् ॥२१॥

अथैतानष्टौ विरूपाना लभतेऽतिदीर्घं चातिह्रस्वं चातिस्थूलं चातिकृशं चातिशुकलं
चातिकृष्णं चातिकुल्वं चातिलोमशं च। अशूद्राऽअब्राह्मणास्ते प्राजापत्याः।
मागधः पुँश्चली कितवः क्लीबोऽशूद्राऽअब्राह्मणास्ते प्राजापत्याः ॥२२॥

*manyave'yastāpaṁ krodhāya nisaraṁ yogāya yoktāraṁ śokāyābhisarttāraṁ kṣemāya vimoktāramutkūlanikūlebhyastriṣṭhina vapuṣe mānaskṛtaṁ śīlāyāṁjanīkārīṁ nirṛtyai kośakārīṁ yamāyāsūm ॥14॥*

*yamāya yamasūmatharvabhyo'vatokāṁ saṁvatsarāya paryāyiṇīṁ parivatsarāyāvijātāmidāvatsarayātītvarīmidvantsarāyā tiṣkadvarīṁ vatsarāya vijarjarāṁ saṁvatsarāya palikrīmṛbhubhyo'jinasandhaṁsādhyebhyaścharmamnam ॥15॥*

*sarobhyo dhaivaramupasthāvarābhyo dāśaṁ vaiśāntābhyo baindaṁ naḍvalābhyaḥ śauṣkalaṁ pārāya mārgāramavārāya kevartta tīrthebhya'āndaṁ viṣamebhyo mainālaṁsvanebhyaḥ parṇakaṁ guhābhyaḥ kirātaṁ sānubhyo jambhakaṁ parvatebhyaḥ kimpūruṣam ॥16॥*

*bībhatsāyai paulkasaṁ varṇāya hiraṇyakāraṁ tulāyai vāṇijaṁ paśvādoṣāya glāvinaṁ viśvebhyo bhūtebhyaḥ sidhmalaṁ bhūtyai jāgaraṇamabhūtyai svapanamārtyai janavādinaṁ vyṛddhyā'apagalbhaṁsaṁ śarāya prachchhidam ॥17॥*

*akṣarājāya kitavaṁ kṛtāyādinavadarśa tretāyai kalpinaṁ dvāparāyādhikalpinamāskandāya sabhāsthāṇuṁ mṛtyave govyachchhamantakāya goghātaṁ kṣudhe yo gāṁ vikṛntantaṁ*
*bhikṣamāṇa'upa tiṣṭhati duṣkṛtāya charakāchārya pāpmane sailagama ॥18॥*

*pratiśrutkāyā'artanaṁ ghoṣaya bhaṣamantāya bahuvādinamanantāya mūkam̐ śabdāyāḍambarāghātaṁ*
*mahase vīṇāvādaṁ krośāya tūṇavadhmamavarasparāya śaṅravadhmaṁ vanāya vanapamanyatoraṇyāya dāvapam ॥19।*

*narmāya pum̐śchalūṁhasāya kāriṁ yādase śābalyāṁ grāmaṇyaṁ gaṇakamabhikrośakaṁ tānmahase vīṇāvādaṁ pāṇighnaṁ tūṇavadhmaṁ tānnṛttāyānandāya talavam ॥20॥*

*agnaye pīvānaṁ pṛthivyai pīṭhasarpiṇaṁ vāyave chāṇḍālamantarikṣāya vaṁśanartinaṁ dive khalatiṁ sūryāya haryakṣaṁ nakṣatrebhyaḥ kirmiraṁ*

*chandramase kilāsamahṇe śuklaṁ piṁgākṣaṁ rātrayai kṛṣṇaṁ piṁgākṣam //21 //*
*athaitānaṣṭau virūpānā labhate'tidīrgha chātihrasvaṁ chātisthūlaṁ chātikṛśaṁ chātiśukalaṁ*
*chātikṛṣṇaṁ chātikulvaṁ chātilomaśaṁ cha / aśūdrā'abrāhmaṇāste prājāpatyāḥ /*
*māgadhaḥ puṁśchalī kitavaḥ klībo'śūdrā'abrāhmaṇāste prājāpatyāḥ //22 //*

७. रुद्रः (Rudraḥ) - य. (Yv.)३.६२-६३

त्र्यायुषं जमदग्नेः कश्यपस्य त्र्यायुषम्। यद्देवेषु त्र्यायुषं तन्नोऽअस्तु त्र्यायुषम् ॥६२॥
शिवो नामासि स्वधितिस्ते पिता नमस्तेऽअस्तु मा मा हिं सीः।
निवर्त्तयाम्यायुषेऽन्नाद्याय प्रजननाय रायस्पोषाय सुप्रजास्त्वाय सुवीर्य्याय ॥६३॥
*trayāyuṣaṁ jamadagneḥ kaśyapasya trayāyuṣam /*
*yaddeveṣu trayāyuṣaṁ tanno'astu trayāyuṣam //62 //*
*śivo nāmāsi svadhitiste pitā namaste'astu mā mā hiṁ sīḥ /*
*nivarttayāmyāyuṣe'nnādyāya prajananāya rāyaspoṣāya suprajāstvāya suvīryyāya //63 //*

८. विद्वान् (Vidvān) - य. (Yv.)३०.९-१२

सन्धये जारं गेहायोपपतिमार्त्यै परिवित्तं निर्ऋत्यै परिविविदानमराद्ध्याऽएदिधिषुः पतिं निष्कृत्यै
पेशस्कारींसाांनाय समरकारीं प्रकामोद्यायोपसदं वर्णायानुरुधं बलायोपदाम् ॥९॥
उत्सादेभ्यः कुब्जं प्रमदे वामनं द्वार्भ्यः स्रामंस्वप्नायान्धमधर्माय बधिरं पवित्राय भिषजं
प्रानाय नक्षत्रदर्शमाशिक्षायै प्रश्निनमुपशिक्षायाऽअभिप्रश्निनं मर्यादायै प्रश्नविवाकम् ॥१०॥
अर्मेभ्यो हस्तिपं जवायाश्वपं पुष्ट्यै गोपालं वीर्यायाविपालं तेजसेऽजपालमिरायै कीनाशं
कीलालाय सुराकारं भद्राय गृहपंश्रेयसे वित्तधमाध्यक्षयायानुक्षत्तारम् ॥११॥
भायै दार्वाहारं प्राभायाऽअग्न्येधं ब्रध्नस्य विष्टपायाभिषेक्तारं वर्षिष्ठाय नाकाय परिवेष्टारं
देवलोकाय पेशितारं मनुष्यलोकाय प्रकरितारंसर्वेभ्यो लोकेभ्यऽउपसेक्तारमवऽऋत्यै
वधायोपमन्थितारं मेधाय वासः पल्पूलीं प्र कामाय रजयित्रीम्॥१२॥
*sandhaye jāraṁ gehāyopapatimārtyai parivittaṁ nirṛtyai*
*parivividānamarāddhyā'edidhiṣuḥ patiṁ niṣkṛtyai peśaskārīṁsāāṁnāya samarakārīṁ*
*prakāmodyāāyopasadaṁ varṇāyānurudhaṁ balāyopadām //9 //*
*utsādebhyaḥ kubjaṁ pramade vāmanaṁ dvārbhyaḥ*
*srāmaṁsvapnāyāndhamadharmāya badhiraṁ pavitrāya bhiṣajaṁ*
*prāṇāya nakṣatradarśamāśikṣāyai praśninamupaśikṣāyā'abhipraśninaṁ maryādāyai*
*praśnavivākam //10 //*
*armebhyo hastipaṁ javāyāśvapaṁ puṣṭyai gopālaṁ vīryāyāvipālaṁ*
*tejase'japālamirāyai kīnāśaṁ*
*kīlālāya surākāraṁ bhadrāya gṛhapaṁśreyase*
*vittadhamādhyakṣayāyānukṣattāram //11 //*
*bhāyai dārvāhāraṁ prābhāyā'agnyedhaṁ bradhnasya viṣṭapāyābhiṣektāraṁ*
*varṣiṣṭhāya nākāya pariveṣṭāraṁ*
*devalokāya peśitāraṁ manuṣyalokāya prakaritāraṁsarvebhyo*
*lokebhya'upasektāramava'ṛtyai*
*vadhāyopamanthitāraṁ medhāya vāsaḥ palpūlīṁ pra kāmāya rajayitrīm //12 //*

९. विद्वांसः (Vidvāṁsaḥ) - य. (Yv.)३०.७-८

तपसे कौलालं मायायै कर्मारंरूपाय मणिकारं शुभे वपंशरव्यायाऽइषुकारंहेत्यै
धनुष्कारं कर्मणे ज्याकारं दिष्टाय रज्जुसर्ज मृत्यवे मृगयुमन्तकाय श्वनिनम् ॥७॥
नदीभ्यः पौञ्जिष्ठमृक्षीकाभ्यो नैषादं पुरुषव्याघ्राय दुर्मदं गन्धर्वाप्सरोभ्यो व्रात्यं
प्रयुग्भ्यऽउन्मत्तं सर्पदेवजनेभ्योऽप्रतिपदमयेभ्यःकितवमीर्यतायाऽअकितवं
पिशाचेभ्यो विदलकारीं यातुधानेभ्यः कण्टकीकारीम्॥८॥
*tapase kaulālaṁ māyāyai karmāraṁrūpāya maṇikāraṁ śubhe*
*vapaṁśaravyāyā'iṣukāraṁhetyai*

*dhanuṣkāraṁ karmaṇe jyākāraṁ diṣṭāya rajjusarja mṛtyave mṛgayumantakāya śvaninam //7 //*
*nadībhyaḥ pauñjiṣṭhamṛkṣīkābhyo naiṣādaṁ puruṣavyāghrāya durmadaṁ gandharvāpsarobhyo vrātyaṁ*
*prayugbhya'unmattaṁ*
*sarpadevajanebhyo'pratipadamayebhyaḥkitavamīryatāyā'akitavaṁ*
*piśāchebhyo vidalakārīṁ yātudhānebhyaḥ kaṇṭakīkārīṁ //8 //*

१०. सविता (Savitā) - य. (Yv.)३०.१-३

देव सवितः प्र सुव यां प्र सुव यापतिं भगाय ।
दिव्यो गन्धर्वः केतपूः केतं नः पुनातु वाचस्पतिर्वाचं नः स्वदतु ॥१॥
तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि। धियो यो नः प्रचोदयात् ॥२॥
विश्वानि देव सवितर्दुरितानि परा सुव। यद्भद्रं तन्नऽआ सुव॥३॥
*deva savitaḥ pra suva yāṁ pra suva yāpatiṁ bhagāya /*
*divyo gandharvaḥ ketapūḥ ketaṁ naḥ punātu vāchaspatirvāchaṁ naḥ svadatu //1 //*
*tatsaviturvareṇyaṁ bhargo devasya dhīmahi / dhiyo yo naḥ prachodachāt //2 //*
*viśvāni deva savitarduritāni parā suva / yadbhadraṁ tanna'ā suva //3 //*

११. स्रष्टा (Sraṣṭā) - य. (Yv.)३१.५

ततो विराडजायत विराजोऽअधि पुरुषः। स जातोऽअत्यरिच्यत पश्चद्भूमिमथो पुरः ॥५॥
*tato virāḍajāyata virājo'adhi puruṣaḥ / sa jāto'atyarichyata paśchadbhūmimatho puraḥ //5 //*

१२. स्रष्टेश्वरः (Sraṣṭeśvaraḥ) - य. (Yv.)३१.७

तस्माद्याात्सर्वहुतऽऋचः सामानि जिरे। छन्दां सि जिार तस्माद्यजुस्त स्मादजायत ॥७॥
*tasmādyāātsarvahuta'ṛchaḥ sāmāni jiāre / chhandāṁ si jiāra tasmādyajusta smādajāyata //7 //*

३२०. **नारायणः (साग्री. सास्वा.); साध्यो नारायणः (सार्षेदी.) (Nārāyaṇaḥ [Ssb. Sas.]; Sādhyo Nārāyaṇaḥ [Sad.])**

१. पुरुषः (Puruṣaḥ) - सा. (Sv.) ६१७-६२१

सहस्रशीर्षाः पुरुषः सहस्राक्षः सहस्रपात् । स भूमिं सर्वतो वृत्वात्यतिष्ठद्दशांगुलम् ॥३॥
त्रिपादूर्ध्व उदैत्पुरुषः पादोऽस्येहाभवत्पुनः । तथा विष्वङ् व्यक्रामदशनानशने अभि ॥४॥
पुरुष एवेदं सर्व यद्भूतं यच्च भाव्यम् । पादोऽस्य सर्वा भूतानि त्रिपादस्यामृतं दिवि ॥५॥
तावानस्य महिमा ततो ज्यायाँ श्च पूरुषः। उतामृतत्वस्येशानो यदन्नेनातिरोहति ॥६॥
ततो विराडजायत विराजो अधि पूरुषः । स जातो अत्यरिच्यत पश्चादूभूमिमथो पुरः ॥७॥
*sahasraśīrṣāḥ puruṣaḥ sahasrākṣaḥ sahasrapāt / sa bhūmiṁ sarvato vṛtvātyatiṣṭhaddaśāṁgulam //3 //*
*tripādūrdhva udaitpuruṣaḥ pādo'syehābhavatpunaḥ / tathā viṣvaṅ vyakrāmadaśanānaśane abhi //4 //*
*puruṣa evedaṁ sarva yadbhūtaṁ yachcha bhāvyam / pādo'sya sarvā bhūtāni tripādasyāmṛtaṁ divi //5 //*
*tāvānasya mahimā tato jyāyāṁ̐ ścha pūruṣaḥ / utāmṛtatvasyeśāno yadannenātirohati //6 //*
*tato virāḍajāyata virājo adhi pūruṣaḥ / sa jāto atyarichyata paśchādūbhūmimatho puraḥ //7 //*

## ३२१. निध्रुविः काश्यपः (Nidhruviḥ Kāśyapaḥ)

१. पवमानःसोमः (Pavamānaḥsomaḥ) - ऋ. (Rv.) ९.६३.१-३०; सा. (Sv.) ४८३; ४९२ ; ४९३; ५०१; १२१६-१८; १२३५-३७; १६९९-१७०१

ऋ. (Rv.) ९.६३.१-३०

आ पवस्व सहस्रिणं रयिं सोम सुवीर्यम्। अस्मे श्रवांसि धारय ॥१॥
इषमूर्जं च पिन्वस इन्द्राय मत्सरिन्तमः। चमूष्वा नि षीदसि ॥२॥
सुत इन्द्राय विष्णवे सोमः कलशे अक्षरत्। मधुमाँ अस्तु वायवे ॥३॥
एते असृग्रमाशवोऽति ह्वरांसि बभ्रवः। सोमा ऋतस्य धारया ॥४॥
इन्द्रं वर्धन्तो अप्तुरः कृण्वन्तो विश्वमार्यम्। अपघ्नन्तो अराव्णः ॥५॥
सुता अनु स्वमा रजोऽभ्यर्षन्ति बभ्रवः। इन्द्रं गच्छन्त इन्दवः ॥६॥
अया पवस्व धारया यया सूर्यमरोचयः। हिन्वानो मानुषीरपः ॥७॥
अयुक्त सूर एतशं पवमानो मनावधि। अन्तरिक्षेण यातवे ॥८॥
उत त्या हरितो दश सूरो अयुक्त यातवे। इन्दुरिन्द्र इति ब्रुवन् ॥९॥
परीतो वायवे सुतं गिर इन्द्राय मत्सरम्। अव्यो वारेषु सिंचत ॥१०॥
पवमान विदा रयिमस्मभ्यं सोम दुष्टरम्। यो दूणाशो वनुष्यता ॥११॥
अभ्यर्ष सहस्रिणं रयिं गोमन्तमश्विनम्। अभि वाजमुत श्रवः ॥१२॥
सोमो देवो न सूर्योऽद्रिभिः पवते सुतः। दधानः कलशे रसम् ॥१३॥
एते धामान्यार्या शुक्रा ऋतस्य धारया। वाजं गोमन्तमक्षरन् ॥१४॥
सुता इन्द्राय वज्रिणे सोमासो दध्याशिरः। पवित्रमत्यक्षरन् ॥१५॥
प्रसोम मधुमत्तमो राये अर्ष पवित्र आ। मदो यो देववीतमः ॥१६॥
तमी मृजन्त्यायवो हरिं नदीषु वाजिनम्। इन्दुमिन्द्राय मत्सरम् ॥१७॥
आ पवस्व हिरण्यवदश्वावत् सोम वीरवत्। वाजं गोमन्तमा भर ॥१८॥
परि वाजे न वाजयुमव्यो वारेषु सिंचत। इन्द्राय मधुमत्तमम् ॥१९॥
कविं मृजन्ति मर्ज्य धीभिर्विप्रा अवस्यवः। वृषा कनिक्रदर्षति ॥२०॥
वृषणं धीभिरप्तुरं सोममृतस्य धारया। मती विप्राः समस्वरन् ॥२१॥
पवस्व देवायुषगिन्द्रं गच्छतु ते मदः। वायुमा रोह धर्मणा ॥२२॥
पवमान नि तोशसे रयिं सोम श्रवाय्यम्। प्रियः समुद्रमा विश ॥२३॥
अपघ्नन् पवसे मृधः क्रतुवित्सोम मत्सरः। नुदस्वादेवयुं जनम् ॥२४॥
पवमाना असृक्षत सोमाः शुक्रास इन्दवः। अभि विश्वानि काव्या ॥२५॥
पवमानास आशवः शुभ्रा असृग्रमिन्दवः। घ्नन्तो विश्वा अप द्विषः ॥२६॥
पवमाना दिवस्पर्यन्तरिक्षादसृक्षत। पृथिव्या अधि सानवि ॥२७॥
पुनानः सोम धारयेन्दो विश्वा अप स्रिधः। जहि रक्षांसि सुक्रतो ॥२८॥
अपघ्नन्त्सोम रक्षसोऽभ्यर्ष कनिक्रदत्। द्युमन्तं शुष्ममुत्तमम् ॥२९॥
अस्मे वसूनि धारय सोम दिव्यानि पार्थिवा। इन्दो विश्वानि वार्या ॥३०॥

*ā pavasva sahasriṇaṁ rayiṁ soma suvīryam / asme śravāṁsi dhāraya //1 //*
*iṣamūrja cha pinvasa indrāya matsarintamaḥ / chamūṣvā ni ṣīdasi //2 //*
*suta indrāya viṣṇave somaḥ kalaśe akṣarat / madhumām̐ astu vāyave //3 //*
*ete asṛgramāśavo'ti hnarāṁsi babhravaḥ / somā ṛtasya dhārayā //4 //*
*indraṁ vardhanto apturaḥ kṛṇvanto viśvamāryam / apaghnanto arāvaṇaḥ //5 //*
*sutā anu svamā rajo'bhyarṣanti babhravaḥ / indra gachchhanta indavaḥ //6 //*
*ayā pavasva dhārayā yayā sūryamarochayaḥ / hinvāno mānuṣīrapaḥ //7 //*
*ayukta sūra etaśaṁ pavamāno manāvadhi / antarikṣeṇa yātave //8 //*
*uta tyā harito daśa sūro ayukta yātave / indurindra iti bruvan //9 //*
*parīto vāyave sutaṁ gira indrāya matsaram / avyo vāreṣu siṁchata //10 //*
*pavamāna vidā rayimasmabhyaṁ soma duṣṭaram / yo dūṇāśo vanuṣyatā //11 //*
*abhyarṣa sahasriṇaṁ rayi gomantamaśvinam / abhi vājamuta śravaḥ //12 //*
*somo devo na sūryo'dribhiḥ pavate sutaḥ / dadhānaḥ kalaśe rasam //13 //*

*ete dhāmānyāryā śukrāā ṛtasya dhārayā / vājaṁ gomantamakṣaran //14 //*
*sutā indrāya vajriṇe somāso dadhyāśiraḥ / pavitramatyakṣaran //15 //*
*prasoma madhumattamo rāye arṣa pavitra ā / mado yo devavītamaḥ //16 //*
*tamī mṛjantyāyavo hariṁ nadīṣu vājinam / indumindrāya matsaram //17 //*
*ā pavasva hiraṇyavadaśvāvat soma vīravat / vājaṁ gomantamā bhara //18 //*
*pari vāje na vājayumavyo vāreṣu siṁchata / indrāya madhumattamam //19 //*
*kaviṁ mṛjanti marjya dhībhirviprā avasyavaḥ / vṛṣā kanikradarṣati //20 //*
*vṛṣaṇaṁ dhībhirapturaṁ somamṛtasya dhārayā / matī viprāḥ samasvaran //21 //*
*pavasva devāyuṣagndriṁ gachchhatu te madaḥ / vāyumā roha dharmaṇā //22 //*
*pavamāna ni tośase rayiṁ soma śravāyyam / priyaḥ samudramā viśa //23 //*
*apaghnan pavase mṛdhaḥ kratuvitsoma matsaraḥ / nudasvādevayuṁ janam //24 //*
*pavamānā asṛkṣata somāḥ śukrāsa indavaḥ / abhi viśvāni kāvyā //25 //*
*pavamānāsa āśavaḥ śubhrā asṛgramindavaḥ / ghnanto viśvā apa dviṣaḥ //26 //*
*pavamānā divasparyantarikṣādasṛkṣata / pṛthivyā adhi sānavi //27 //*
*punānaḥ soma dhārayendo viśvā apa sridhaḥ / jahi rakṣāṁsi sukrato //28 //*
*apadhnantsoma rakṣaso'bhyarṣa kanikradat / dyumantaṁ śuṣmamuttamam //29 //*
*asme vasūni dhāraya soma divyāni pārthivā / indo viśvāni våryā //30 //*

सा. (Sv.) ४८३

पवस्व देव आयुषगिन्द्रं गच्छतु ते मदः। वायुमा रोह धर्मणा ॥७॥
*pavasva deva āyuṣagindraṁ gachchhatu te madaḥ / vāyumā roha dharmaṇā //7 //*

सा. (Sv.) ४९२-९३

अपघ्नन्पवस मृधः क्रतुवित्सोम मत्सरः। नुदस्वादेवयुं जनम् ॥६॥
अया पवस्व धारया यया सूर्यमरोचयः। हिन्वानो मनुषीरपः ॥७॥
*apaghnanpavasa mṛdhaḥ kratuvitsoma matsaraḥ / nudasvādevayuṁ janam //6 //*
*ayā pavasva dhārayā yayā sūryamarochayaḥ / hinvāno manuṣīrapaḥ //7 //*

सा. (Sv.) ५०१

आ पवस्व सहस्रिणं रयिं सोम सुवीर्य्यम्। अस्मे श्रवांसि धारय ॥५॥
*ā pavasva sahasriṇaṁ rayiṁ soma suvīryyam / asme śravāṁsi dhāraya //5 //*

सा. (Sv.) १२१६-१८

अया पवस्व धारया यया सूर्यमरोचयः। हिन्वानो मानुषीरपः ॥१॥
अयुक्त सूर एतशं पवमानो मनावधि। अन्तरिक्षेण यातवे ॥२॥
उत त्या हरितो रथे सूरो अयुक्त यातवे। इन्द्रुरिन्द्र इति ब्रुवन् ॥३॥
*ayā pavasva dhārayā yayā sūryamarochayaḥ / hinvāno mānuṣīrapaḥ //1 //*
*ayukta sūra etaśaṁ pavamāno manāvadhi / antarikṣeṇa yātave //2 //*
*uta tyā harito rathe sūro ayukta yātave / indrurindra iti bruvan //3 //*

सा. (Sv.) १२३५-३७

पवस्व देव आयुषगिन्द्रं गच्छतु ते मदः। वयुमा रोह धर्मणा ॥१॥
पवमान नि तोशसे रयिं सोम श्रवाय्यम्। इन्दो समुद्रमा विश ॥२॥
अपघ्नन्पवसे मृधः क्रतुवित्सोम मत्सरः। नुदस्वादेवयुं जनम् ॥३॥
*pavasva deva āyuṣagindraṁ gachchhatu te madaḥ / vayumā roha dharmaṇā //1 //*
*pavamāna ni tośase rayiṁ soma śravāyyam / indo samudramā viśa //2 //*
*apaghnanpavase mṛdhaḥ kratuvitsoma matsaraḥ / nudasvādevayuṁ janam //3 //*

सा. (Sv.) १६९९-१७०१

पवमाना असृक्षत सोमाः शुक्रास इन्दवः। अभि विश्वानि काव्या ॥१॥
पवमाना दिवस्पर्यन्त्रिक्षादसृक्षत। पृथिव्या अधि सानवि ॥२॥
पवमानास आशवः शुभ्रा असृग्रमिन्दवः। घ्नन्तो विश्वा अप द्विषः ॥३॥
*pavamānā asṛkṣata somāḥ śukrāsa indavaḥ / abhi viśvāni kāvyā //1 //*

*pavamānā divasparyanrikṣādasṛkṣata । pṛthivyā adhi sānavi ॥2 ॥*
*pavamānāsa āśavaḥ śubhrā asṛgramindavaḥ । ghnanto viśvā apa dviṣaḥ ॥3 ॥*

## ३२२. निपातिथिः काण्वः (Nipātithiḥ Kāṇvaḥ)

१. इन्द्रः (Indraḥ) - ऋ. (Rv.) ८.३४.१-१५; सा. (Sv.) ३४८; १८०७-१८०९

ऋ. (Rv.) ८.३४.१-१५

एन्द्र याहि हरिभिरुप कण्वस्य सुष्टुतिम् । दिवो अमुष्य शासतो दिवं यय दिवावसो ॥१ ॥
आ त्वा ग्रावा वदन्निह सोमी घोषेण यच्छतु । दिवो अमुष्य शासतो दिवं यय दिवावसो ॥२ ॥
अत्रा वि नेमिरेषामुरां न धूनुते वृकः । दिवो अमुष्य शासतो दिवं यय दिवावसो ॥३ ॥
आ त्वा कण्वा इहावसे हवन्ते वाजसातये । दिवो अमुष्य शासतो दिवं यय दिवावसो ॥४ ॥
दधामि ते सुतानां वृष्णे न पूर्वपाय्यम् । दिवो अमुष्य शासतो दिवं यय दिवावसो ॥५ ॥
स्मत्पुरन्धिर्न आ गहि विश्वतोधीर्न ऊतये । दिवो अमुष्य शासतो दिवं यय दिवावसो ॥६ ॥
आ नो याहि महेमते सहस्रोते शतामघ । दिवो अमुष्य शासतो दिवं यय दिवावसो ॥७ ॥
आ त्वा होता मनुर्हितो देवत्रा वक्षदीड्यः । दिवो अमुष्य शासतो दिवं यय दिवावसो ॥८ ॥
आ त्वा मदच्युता हरी श्येनं पोव वक्षतः । दिवो अमुष्य शासतो दिवं यय दिवावसो ॥९ ॥
आ याह्यर्य आ परि स्वाहा सोमस्य पीतये । दिवो अमुष्य शासतो दिवं यय दिवावसो ॥१० ॥
आ नो याह्युपश्रुत्युक्थेषु रणया इह । दिवो अमुष्य शासतो दिवं यय दिवावसो ॥११ ॥
सरूपैरा सु नो गहि संभृतैः सम्भृताश्वः । दिवो अमुष्य शासतो दिवं यय दिवावसो ॥१२ ॥
आ याहि पर्वतेभ्यः समुद्रस्याधि विष्टपः । दिवो अमुष्य शासतो दिवं यय दिवावसो ॥१३ ॥
आ नो गव्यान्यश्व्या सहस्रा शूर दर्दृहि । दिवो अमुष्य शासतो दिवं यय दिवावसो ॥१४ ॥
आ नः सहस्रशो भरायुतानि शतानि च । दिवो अमुष्य शासतो दिवं यय दिवावसो ॥१५ ॥

*endra yāhi haribhirupa kaṇvasya suṣṭutim ।*
*divo amuṣya śāsato divaṁ yaya divāvaso ॥1 ॥*
*ā tvā grāvā vadanniha somī ghoṣeṇa yachchhatu ।*
*divo amuṣya śāsato divaṁ yaya divāvaso ॥2 ॥*
*atrā vi nemireṣāmurāṁ na dhūnute vṛkaḥ ।*
*divo amuṣya śāsato divaṁ yaya divāvaso ॥3 ॥*
*ā tvā kaṇvā ihāvase havante vājasātaye ।*
*divo amuṣya śāsato divaṁ yaya divāvaso ॥4 ॥*
*dadhāmi te sutānāṁ vṛṣṇe na pūrvapāyyam ।*
*divo amuṣya śāsato divaṁ yaya divāvaso ॥5 ॥*
*smatpurandhirna ā gahi viśvatodhīrna ūtaye ।*
*divo amuṣya śāsato divaṁ yaya divāvaso ॥6 ॥*
*ā no yāhi mahemate sahasrote śatāmagha ।*
*divo amuṣya śāsato divaṁ yaya divāvaso ॥7 ॥*
*ā tvā hotā manurhito devatrā vakṣadīḍyaḥ ।*
*divo amuṣya śāsato divaṁ yaya divāvaso ॥8 ॥*
*ā tvā madachyutā harī śyenaṁ pova vakṣataḥ ।*
*divo amuṣya śāsato divaṁ yaya divāvaso ॥9 ॥*
*ā yāhyarya ā pari svāhā somasya pītaye ।*
*divo amuṣya śāsato divaṁ yaya divāvaso ॥10 ॥*
*ā no yāhyupaśrutyuktheṣu raṇayā iha ।*
*divo amupya śāsato divaṁ yaya divāvaso ॥11 ॥*
*sarūpairā su no gahi saṁbhṛtaiḥ sambhṛtāśvaḥ ।*
*divo amuṣya śāsato divaṁ yaya divāvaso ॥12 ॥*
*ā yāhi parvatebhyaḥ samudrasyādhi viṣṭapaḥ ।*
*divo amuṣya śāsato divaṁ yaya divāvaso ॥13 ॥*
*ā no gavyānyaśvyā sahasrā śūra dardṛhi ।*
*divo amuṣya śāsato divaṁ yaya divāvaso ॥14 ॥*

*ā naḥ sahasraśo bharāyutāni śatāni cha ।*
*divo amuṣya śāsato divaṁ yaya divāvaso ॥15 ॥*

सा. (Sv.) ३४८

एन्द्र याहि हरिभिरुप कण्वस्य सुष्टुतिम् । दिवो अमुष्य शासतो दिवं यय दिवावसो ॥७ ॥
*endra yāhi haribhirupa kaṇvasya suṣṭutim । divo amuṣya śāsato divaṁ yaya divāvaso ॥7 ॥*

सा. (Sv.) १८०७-१८०९

एन्द्र याहि हरिभिरुप कण्वस्य सुष्टुतिम्। दिवो अमुष्य शासतो दिवं यय दिवावसो ॥१ ॥
अत्रा वि नेमिरेषामुरां न धूनुते वृकः। दिवो अमुष्य शासतो दिवं यय दिवावसो ॥२ ॥
आ त्वा ग्रावा वदन्निह सोमी घोषेण वक्षतु । दिवो अमुष्य शासतो दिवं यय दिवावसो ॥३ ॥
*endra yāhi haribhirupa kaṇvasya suṣṭutim ।*
*divo amuṣya śāsato divaṁ yaya divāvaso ॥1 ॥*
*atrā vi nemireṣāmurāṁ na dhūnṛte vṛkaḥ ।*
*divo amuṣya śāsato divaṁ yaya divāvaso ॥2 ॥*
*ā tvā grāvā vadanniha somī ghoṣeṇa vakṣatu ।*
*divo amuṣya śāsato divaṁ yaya divāvaso ॥3 ॥*

## ३२३. नृमेधः (Nṛmedhaḥ)

१. इन्द्रः (Indraḥ) - ऋ. (Rv.) ८.९८.१-१२; अ. (Av.) २०.५८.१-२; २०.६२.५-७; २०.६४.१-३; २०.१००.१-३; २०.१०४.३-४; २०.१०५.१-३; २०.१०८.१-३; य. (Yv.)३३.६६; ६७; ९५; ९६

ऋ. (Rv.) ८.९८.१-१२

इन्द्राय साम गायत विप्राय बृहते बृहत्। धर्मकृते विपश्चिते पनस्यवे ॥१ ॥
त्वमिन्द्राभिभूरसि त्वं सूर्यमरोचयः। विश्वकर्मा विश्वदेवो महाँ असि ॥२ ॥
विभ्राजंज्योतिषा स्व१रगच्छो रोचनं दिवः। देवास्त इन्द्र सख्याय येमिरे ॥३ ॥
एन्द्र नो गधि प्रियः सत्राजिदगोह्यः। गिरिर्न विश्वतस्पृथुः पतिर्दिवः ॥४ ॥
अभि हि सत्य सोमपा उभे बभूथ रोदसी। इन्द्रासि सुन्वतो वृधः पतिर्दिवः ॥५ ॥
त्वं हि शश्वतीनामिन्द्र दर्ता पुरामसि। हन्ता दस्योर्मनोर्वृधः पतिर्दिवः ॥६ ॥
अधा हीन्द्र गिर्वण उप त्वा कामान्महः समृज्महे। उदेव यन्त उदभिः ॥७ ॥
वार्ण त्वा यव्याभिर्वर्धन्ति शूर ब्रह्माणि। वावृध्वांसं चिदद्रिवो दिवेदिवे ॥८ ॥
युंजन्ति हरी इषिरस्य गाथयोरौ रथ उरुयुगे। इन्द्रवाहा वचोयुजा ॥९ ॥
त्वं न इन्द्रा भरँ ओजो नृम्णं शतक्रतो विचर्षणे। आ वीरं पृतनाषहम् ॥१० ॥
त्वं हि नः पिता वसो त्वं माता शतक्रतो बभूविथ। अधा ते सुम्नमीमहे ॥११ ॥
त्वां शुष्मिन् पुरुहूत वाजयन्तमुप ब्रुवे शतक्रतो। स नो रास्व सुवीर्यम् ॥१२ ॥
*indrāya sāma gāyata viprāya bṛhate bṛhat । dharmakṛte vipaśchite panasyave ॥1 ॥*
*tvamindrābhibhūrasi tvaṁ sūryamarochayaḥ । viśvakarmā viśvadevo mahāṁ̐ asi ॥2 ॥*
*vibhrājaṁjyotiṣā sva1ragachchho rochanaṁ divaḥ । devāsta indra sakhyāya yemire ॥3 ॥*
*endra no gadhi priyaḥ satrājidagohyaḥ । girirna viśvataspṛthuḥ patirdivaḥ ॥4 ॥*
*abhi hi satya somapā ubhe babhūtha rodasī । indrāsi sunvato vṛdhaḥ patirdivaḥ ॥5 ॥*
*tvaṁ hi śaśvatīnāmindra dartā purāmasi । hantā dasyormanorvṛdhaḥ patirdivaḥ ॥6 ॥*
*adhā hīndra girvaṇa upa tvā kāmānmahaḥ samṛjmahe । udeva yanta udabhiḥ ॥7 ॥*
*vārṇa tvā yavyābhirvardhanti śūra brahmāṇi ।*
*vāvṛdhvāṁsaṁ chidadrivo divedive ॥8 ॥*
*yuṁjanti harī iṣirasya gāthayorau ratha uruyuge । indravāhā vachoyujā ॥9 ॥*
*tvaṁ na indrā bharaṁ̐ Ojo nṛmṇaṁ śatakrato vicharṣaṇe ।*
*ā vīraṁ pṛtanāṣaham ॥10 ॥*
*tvaṁ hi naḥ pitā vaso tvaṁ mātā śatakrato babhūvitha । adhā te sumnamīmahe ॥11 ॥*
*tvāṁ śuṣmin puruhūta vājayantamupa bruve śatakrato । sa no rāsva suvīryam ॥12 ॥*

अ. (Av.) २०.५८.१-२

श्रायन्तइव सूर्य विश्वेदिन्द्रस्य भक्षत। वसूनि जाते जनमान ओजसा प्रति भागं न दीधिम ॥१॥
अनर्शरातिं वसुदामुप स्तुहि भद्रा इन्द्रस्य रातयः।
सो अस्य कामं विधतो न रोषति मनो दानाय चोदयन् ॥२॥

*śrāyantaiva sūrya viśvedindrasya bhakṣata /*
*vasūni jāte janamāna Ojasā prati bhāgaṁ na dīdhima //1 //*
*anarśarātiṁ vasudāmupa stuhi bhadrā indrasya rātayaḥ /*
*so asya kāmaṁ vidhato na roṣati mano dānāya chodayan //2 //*

अ. (Av.) २०.६२.५-७

इन्द्राय साम गायत विप्राय बृहते बृहत्। धर्म कृते विपश्चिते पनस्यवे ॥५॥
त्वमिन्द्राभिभूरसि त्वं सूर्यमरोचयः। विश्वकर्मा विश्वदेवो महाँ असि ॥६॥
विभ्राजं ज्योतिषा स्व१रगच्छो रोचनं दिवः। देवास्त इन्द्र सख्याय येमिरे ॥७॥

*indrāya sāma gāyata viprāya bṛhate bṛhat / dharma kṛte vipaśchite panasyave //5 //*
*tvamindrābhibhūrasi tvaṁ sūryamarochayaḥ / viśvakarmā viśvadevo mahām̐ asi //6 //*
*vibhrājaṁ jyotiṣā sva1ragachchho rochanaṁ divaḥ /*
*devāsta indra sakhyāya yemire //7 //*

अ. (Av.) २०.६४.१-३

एन्द्र नो गधि प्रियः सत्राजिदगोह्यः। गिरिर्न विश्वतस्पृथुः पर्तिर्दिवः ॥१॥
अभि हि सत्य सोमपा उभे बभूथ रोदसी। इन्द्रासि सुन्वतो वृधः पतिर्दिवः ॥२॥
त्वं हि शश्वतीनामिन्द्र दर्ता पुरामसि। हन्ता दस्योर्मनोर्वृधः पतिर्दिवः ॥३॥

*endra no gadhi priyaḥ satrājidagohyaḥ / girirna viśvataspṛthuḥ partirdivaḥ //1 //*
*abhi hi satya somapā ubhe babhūtha rodasī / indrāsi sunvato vṛdhaḥ patirdivaḥ //2 //*
*tvaṁ hi śaśvatīnāmindra dartā purāmasi / hantā dasyormanorvṛdhaḥ patirdivaḥ //3 //*

अ. (Av.) २०.१००.१-३

अधा हीन्द्र गिर्वण उप त्वा कामान्महः ससृज्महे। उदेव यन्त उदभिः ॥१॥
वार्ण त्वा यव्याभिर्वर्धन्ति शूर ब्रह्माणि। वावृध्वांसं चिदद्रिवो दिवेदिवे ॥२॥
युंजन्ति हरी इषिरस्य गाथयोरौ रथ उरुयुगे। इन्द्रवाहा वचोयुजा ॥३॥

*adhā hīndra girvaṇa upa tvā kāmānmahaḥ sasṛjmahe / udeva yanta udabhiḥ //1 //*
*vārṇa tvā yavyābhirvardhanti śūra brahmāṇi / vāvṛdhvāṁsaṁ chidadrivo divedive //2 //*
*yuṁjanti harī iṣirasya gāthayorau ratha uruyuge / indravāhā vachoyujā //3 //*

अ. (Av.) २०.१०४.३-४

आ नो विश्वासु हव्य इन्द्रः समत्सु भूषतु।
उप ब्रह्माणि सवनानि वृत्रहा परमज्या ऋचीषमः ॥३॥
त्वं दाता प्रथमो राधसामस्यसि सत्य ईशानकृत् ।
तुविद्युम्नस्य युज्या वृणीमहे पुत्रस्य शवसो महः ॥४॥

*ā no viśvāsu havya indraḥ samatsu bhūṣatu /*
*upa brahmāṇi savanāni vṛtrahā paramajyā ṛchīṣamaḥ //3 //*
*tvaṁ dātā prathamo rādhasāmasyasi satya īśānakṛt /*
*tuvidyumnasya yujyā vṛṇīmahe putrasya śavaso mahaḥ //4 //*

अ. (Av.) २०.१०५.१-३

त्वमिन्द्र प्रतूर्तिष्वभि विश्वा असि स्पृधः। अशस्तिहा जनिता विश्वतूरसि त्वं तूर्य तरुष्यतः ॥१॥
अनु ते शुष्मं तुरयन्तमीयतुः क्षोणी शिशुं न मातरा ।
विश्वास्ते स्पृधः श्नथयन्त मन्यवे वृत्रं यदिन्द्र तूर्वसि ॥२॥
इत ऊती वो अजरं प्रहेतारमप्रहितम् । आशुं जेतारं हेतारं रथीतममतूर्तं तुग्र्यावृधम् ॥३॥

*tvamindra pratūrtiṣvabhi viśvā asi spṛdhaḥ / aśastihā janitā viśvatūrasi tvaṁ tūrya taruṣyataḥ //1 //*

*anu te śuṣmaṁ turayantamīyatuḥ kṣoṇī śiśuṁ na mātarā |*
*viśvāste spṛdhaḥ śnathayanta manyave vṛtraṁ yadindra tūrvasi ||2 ||*
*ita ūtī vo ajaraṁ prahetāramaprahitam | āśuṁ jetāraṁ hetāraṁ rathītamamatūrta tugryāvṛdham ||3 ||*

अ. (Av.) २०.१०८.१-३

त्वं न इन्द्रा भरँ ओजो नृम्णं शतक्रतो विचर्षणे। आ वीरं पृतनाषहम् ॥१॥
त्वं हि नः पिता वसो त्वं माता शतक्रतो बभूविथ। अधा ते सुम्नमीमहे ॥२॥
त्वां शुष्मिन् पुरुहूत वाजयन्तमुप ब्रुवे शतक्रतो। स नो रास्व सुवीर्यम् ॥३॥
*tvaṁ na indrā bharam̐ Ojo nṛmṇaṁ śatakrato vicharṣaṇe | ā vīraṁ pṛtanāṣaham ||1 ||*
*tvaṁ hi naḥ pitā vaso tvaṁ mātā śatakrato babhūvitha | adhā te sumnamīmahe ||2 ||*
*tvāṁ śuṣmin puruhūta vājayantamupa bruve śatakrato | sa no rāsva suvīryam ||3 ||*

य. (Yv.)३३.६६-६७

त्वमिन्द्र प्रतूर्त्तिष्वभि विश्वाऽअसि स्पृधः।
अशस्तिहा जनिता विश्वतूरसि त्वं तूर्य्य तरुष्यतः ॥६६॥
अनु ते शुष्मं तुरयन्तमीयतुः क्षोणी शिशुं न मातरा ।
विश्वास्ते स्पृधः श्नथयन्त मन्यवे वृत्रं यदिन्द्र तूर्वसि ॥६७॥
*tvamindra pratūrttiṣvabhi viśvā'asi spṛdhaḥ |*
*aśastihā janitā viśvatūrasi tvaṁ tūryya taruṣyataḥ ||66 ||*
*anu te śuṣmaṁ turayantamīyatuḥ kṣoṇī śiśuṁ na mātarā |*
*viśvāste spṛdhaḥ śnathayanta manyave vṛtraṁ yadindra tūrvasi ||67 ||*

य. (Yv.)३३.९५-९६

अपाधमदभिशस्तीरशस्तिहाथेन्द्रो द्युमन्याभवत् ।
देवास्तऽइन्द्र सख्याय येमिरे बृहाद्भानो मरुद्गण ॥९५॥
प्र बऽइन्द्राय बृहते मरुतो ब्रह्मार्चत ।
वृत्रंहनति वृत्रहा शतक्रतुर्वज्रेण शत पर्वणा॥९६॥
*apādhamadabhiśastīraśastihāthendro dyumanyābhavat |*
*devāsta'indra sakhyāya yemire bṛhādbhāno marudgaṇa ||95 ||*
*pra ba'indrāya bṛhate maruto brahmārchata |*
*vṛtraṁhanati vṛtrahā śatakraturvajreṇa śata parvaṇā ||96 ||*

२. पवमानः सोमः (Pavamānaḥ Somaḥ) - ऋ. (Rv.) ९.२७.१-६; ९.२९.१-६

ऋ. (Rv.) ९.२७.१-६

एष कविरभिष्टुतः पवित्रे अधि तोशते। पुनानो घ्नन्नप स्रिधः ॥१॥
एष इन्द्राय वायवे स्वर्जित्परि षिच्यते। पवित्रे दक्षसाधनः ॥२॥
एष नृभिर्वि नीयते दिवो मूर्धा वृषा सुतः। सोमो वनेषु विश्ववित् ॥३॥
एष गव्युरचिक्रदत् पवमानो हिरण्ययुः। इन्दुः सत्राजिदस्तृतः ॥४॥
एष सूर्येण हासते पवमानो अधि द्यवि। पवित्रे मत्सरो मदः ॥५॥
एष शुष्म्यसिष्यददन्तरिक्षे वृषा हरिः। पुनान इन्दुरिन्द्रमा॥६॥
*eṣa kavirabhiṣṭutaḥ pavitre adhi tośate | punāno ghnannapa sridhaḥ ||1 ||*
*eṣa indrāya vāyave svarjitpari ṣichyate | pavitre dakṣasādhanaḥ ||2 ||*
*eṣa nṛbhirvi nīyate divo mūrdhā vṛṣā sutaḥ | somo vaneṣu viśvavit ||3 ||*
*eṣa gavyurachikradat pavamāno hiraṇyayuḥ | induḥ satrājidastṛtaḥ ||4 ||*
*eṣa sūryeṇa hāsate pavamāno adhi dyavi | pavitre matsaro madaḥ ||5 ||*
*eṣa śuṣmyasiṣyadadantarikṣe vṛṣā hariḥ | punāna indurindramā ||6 ||*

ऋ. (Rv.) ९.२९.१-६

प्रास्य धारा अक्षरन्वृष्णः सुतस्यौजसा। देवाँ अनु प्रभूषतः ॥१॥
सप्तिं मृजन्ति वेधसो गृणन्तः कारवो गिरा। ज्योतिर्जानमुक्थ्यम् ॥२॥
सुषहा सोम तानि ते पुनानाय प्रभूवसो। वर्धा समुद्रमुक्थ्यम् ॥३॥

विश्वा वसूनि संजयन्पवस्व सोम धारया। इनु द्वेषांसि सध्र्यक् ॥४॥
रक्षा सु नो अररुषः स्वनात्समस्य कस्य चित्। निदो यत्र मुमुच्महे ॥५॥
एन्दो पार्थिवं रयिं दिव्यं पवस्व धारया। द्युमन्तं शुष्ममा भर ॥६॥
*prāsya dhārā akṣaranvṛṣṇaḥ sutasyaujasā I devāṁ anu prabhūṣataḥ II1 II*
*saptiṁ mṛjanti vedhaso gṛṇantaḥ kāravo girā I jyotirjāānamukthyam II2 II*
*suṣahā soma tāni te punānāya prabhūvaso I vardhā samudramukthyam II3 II*
*viśvā vasūni saṁjayanpavasva soma dhārayā I inu dveṣāṁsi sadhyrak II4 II*
*rakṣā su no araruṣaḥ svanātsamasya kasya chit I nido yatra mumuchmahe II5 II*
*endo pārthivaṁ rayiṁ divyaṁ pavasva dhārayā I dyumantaṁ śuṣmamā bhara II6 II*

३. सूर्यः (Sūryaḥ) - य. (Yv.)३३.४१

श्रायन्तऽइव सूर्य्यं विश्वेदिन्द्रस्य भक्षत।
वसूनि जाते जनमानऽओजसा प्रति भागं न दीधिम ॥४१॥
*śrāyanta'iva sūryya viśvedindrasya bhakṣata I*
*vasūni jāte janamāna'Ojasā prati bhāgaṁ na dīdhima II41 II*

३२४. नृमेधः आंगिरसः (Nṛmedhaḥ Āṁgirasa:)

१. इन्द्रः (Indraḥ) - सा. (Sv.) २६७; २८३; ३०२ ; ३११; ३९३; ४०५-४०६; ७१०-१२; ८१३-१४; १०२५-२७; ११६९-७१; १२४७-४९; १३१९-२०; १६३७-३८

सा. (Sv.) २६७

श्रायन्त इव सूर्यं विश्वेदिन्द्रस्य भक्षत। वसूनि जातो जनिमान्योजसा प्रति भागं न दीधिम।५॥
*śrāyanta iva sūrya viśvedindrasya bhakṣata I vasūni jāto janimānyojasā prati bhāgaṁ na dīdhima I5 II*

सा. (Sv.) २८३

इत ऊती वो अजरं प्रहेतारमप्रहितम्। आशुं जेतारं होतारं रथीतममतूर्तं तुग्रियावृधम् ॥१॥
*ita ūtī vo ajaraṁ prahetāramaprahitam I āśuṁ jetāraṁ hotāraṁ rathītamamatūrta tugriyāvṛdham II1 II*

सा. (Sv.) ३०२

त्वामिदा ह्यो नरोऽपीप्यन्वज्रिन्भूर्णयः। स इन्द्र स्तोमवाहस इह श्रुध्युप स्वसरमा गहि ॥१०॥
*tvāmidā hyo naro'pīpyanvajrinbhūrṇayaḥ I sa indra stomavāhasa iha śrudhyupa svasaramā gahi II10 II*

सा. (Sv.) ३११

त्वमिन्द्र प्रतूर्तिष्वभि विश्वा असि स्पृधः। अशस्तिहा जनिता वृत्रतूरसि त्वं तूर्य तरुष्यतः ॥९॥
*tvamindra pratūrtiṣvabhi viśvā asi spṛdhaḥ I aśastihā janitā vṛtratūrasi tvaṁ tūrya taruṣyataḥ II9 II*

सा. (Sv.) ३९३

एन्द्र नो गधि प्रिय सत्राजिदगोह्य। गिरिर्न विश्वतः पृथुः पतिर्दिवः ॥३॥
*endra no gadhi priya satrājidagohyā I girirna viśvataḥ pṛthuḥ patirdivaḥ II3 II*

सा. (Sv.) ४०५-४०६

त्वं न इन्द्रा भर ओजो नृम्णं शतक्रतो विचर्षणे। आ वीरं पृतनासहम् ॥७॥
अधा हीन्द्र गिर्वण उप त्वा काम ईमहे ससृग्महे। उदेव ग्मन्त उदभिः ॥८॥
*tvaṁ na indrā bhara Ojo nṛmṇaṁ śatakrato vicharṣaṇe I ā vīraṁ pṛtanāsaham II7 II*
*adhā hīndra girvaṇa upa tvā kāma īmahe sasṛgmahe I udeva gmanta udabhiḥ II8 II*

सा. (Sv.) ७१०-१२

अधा हीन्द्र गिर्वण उप त्वा काम ईमहे ससृग्महे। उदेव ग्मन्त उदभिः ॥१॥
वार्ण त्वा यव्याभिर्वर्धन्ति शूर ब्रह्माणि। वावृध्वांसं चिदद्रिवो दिवेदिवे ॥२॥
युंजन्ति हरी इषिरस्य गाथयोरौ रथ उरुयुगे वचोयुजा इन्द्रवाहा स्वर्विदा ॥३॥
*adhā hīndra girvaṇa upa tvā kāma īmahe sasṛgmahe I udeva gmanta udabhiḥ II1 II*

*vārṇa tvā yavyābhirvardhanti śūra brahmāṇi । vāvṛdhvāṁsaṁ chidadrivo divedive ॥2 ॥*
*yuṁjanti harī iṣirasya gāthayorau ratha uruyuge vachoyujā indravāhā svarvidā ॥3 ॥*

सा. (Sv.) ८१३-१४

त्वामिदा ह्यो नरोऽपीप्यन्वज्रिन् भूर्णयः ।
स इन्द्र स्तोमवाहस इह श्रुध्युप स्वसरमा गहि ॥१ ॥
मत्स्वा सुशिप्रिन्हरिवस्तमीमहे त्वया भूषन्ति वेधसस्तव श्रवांस्युपमान्युक्थ्य सुतेष्विन्द्रगिर्वणः ।२ ।
*tvāmidā hyo naro'pīpyanvajrin bhūrṇayaḥ ।*
*sa indra stomavāhasa iha śrudhyupa svasaramā gahi ॥1 ॥*
*matsvā suśiprinharivastamīmahe tvayā bhūṣanti vedhasastava śravāṁsyupamānyukthya suteṣvindragirvaṇaḥ ।2 ।*

सा. (Sv.) १०२५-२७

इन्द्राय साम गायत विप्राय बृहते बृहत् । ब्रह्मकृते विपश्चिते पनस्यवे ॥१ ॥
त्वमिन्द्राभिभूरसि त्वं सूर्यमरोचयः । विश्वकर्मा विश्वदेवो महाँ असि ॥२ ॥
विभ्राजं ज्योतिषा स्वा३रगच्छो रोचनं दिवः । देवास्त इन्द्र सख्याय येमिरे ॥३ ॥
*indrāya sāma gāyata viprāya bṛhate bṛhat । brahmakṛte vipaśchite panasyave ॥1 ॥*
*tvamindrābhibhūrasi tvaṁ sūryamarochayaḥ । viśvakarmā viśvadevo mahām̐ asi ॥2 ॥*
*vibhrājaṁ jyotiṣā svā3ragchchho rochanaṁ divaḥ । devāsta indra sakhyāya yemire ॥3 ॥*

सा. (Sv.) ११६९-७१

त्वं न इन्द्रा भर ओजो नृम्णं शतक्रतो विचर्षणे । आ वीरं पृतनासहम् ॥१ ॥
त्वं हि नः पिता वसो त्वं माता शतक्रतो बभूविथ । अथा ते सुम्नमीमहे ॥२ ॥
त्वा शुष्मिन्पुरुहूत वाजयन्तमुप ब्रुवे सहस्कृत । स नो रास्व सुवीर्यम् ॥३ ॥
*tvaṁ na indrā bhara Ojo nṛmṇaṁ śatakrato vicharṣaṇe । ā vīraṁ pṛtanāsaham ॥1 ॥*
*tvaṁ hi naḥ pitā vaso tvaṁ mātā śatakrato babhūvitha । athā te sumnamīmahe ॥2 ॥*
*tvā śuṣminpuruhūta vājayantamupa bruve sahaskṛta । sa no rāsva suvīryam ॥3 ॥*

सा. (Sv.) १२४७-४९

एन्द्र नो गधि प्रिय सत्राजिदगोह्य । गिरिर्न विश्वतः पृथुः पतिर्दिवः ॥१ ॥
अभि हि सत्य सोमपा उभे बभूथ रोदसी । इन्द्रासि सुन्वतो वृधः पतिर्दिवः ॥२ ॥
त्वं हिशश्वतीनामिन्द्र धर्ता पुरामसि । हन्ता दस्योर्मनोवृधः पतिर्दिवः ॥३ ॥
*endra no gadhi priya satrājidagohyā । girirna viśvataḥ pṛthuḥ patirdivaḥ ॥1 ॥*
*abhi hi satya somapā ubhe babhūtha rodasī । indrāsi sunvato vṛdhaḥ patirdivaḥ ॥2 ॥*
*tvaṁ hiśaśvatīnāmindra dhartā purāmasi । hantā dasyormanovṛdhaḥ patirdivaḥ ॥3 ॥*

सा. (Sv.) १३१९-२०

श्रायन्त इव सूर्य विश्वेदिन्द्रस्य भक्षत ।
वसूनि जातो जनिमान्योजसा प्रति भागं न दीधिमः ॥१ ॥
अलर्षिरातिं वसुदामुप स्तुहि भद्रा इन्द्रस्य रातयः ।
यो अस्य कामं विधतो न रोषति मनो दानाय चोदयन् ॥२ ॥
*śrāyanta iva sūrya viśvedindrasya bhakṣata ।*
*vasūni jāto janimānyojasā prati bhāgaṁ na dīdhimaḥ ॥1 ॥*
*alarṣirātiṁ vasudāmupa stuhi bhadrā indrasya rātayaḥ ।*
*yo asya kāmaṁ vidhato na roṣati mano dānāya chodayan ॥2 ॥*

सा. (Sv.) १६३७-३८

त्वमिन्द्र प्रतूर्तिष्वभि विश्वा असि स्पृधः । अशस्तिहा जनिता वृत्रतूरसि त्वं तूर्य तरुष्यतः ॥१ ॥
अनु ते शुष्मं तुरयन्तमीयतुः क्षोणी शिशुं न मातरा ।
विश्वास्ते स्पृधः शनथयन्त मन्यवे वृत्रं यदिन्द्र तूर्वसि ॥२ ॥
*tvamindra pratūrtiṣvabhi viśvā asi spṛdhaḥ । aśastihā janitā vṛtratūrasi tvaṁ tūrya*

*taruṣyataḥ ॥1॥*
*anu te śuṣmaṁ turayantamīyatuḥ kṣoṇī śiśuṁ na mātarā ।*
*viśvāste spṛdhaḥ śanathayanta manyave vṛtraṁ yadindra tūrvasi ॥2॥*

२. पवमानः सोमः (Pavamānaḥ Somaḥ) - सा. (Sv.) १२८६-१२९१; १७६५-१७६७

सा. (Sv.) १२८६-९१

एष कविरभिष्टुतः पवित्रे अधि तोशते। पुनानो घ्नन्प द्विषः ॥१॥
एष इन्द्राय वायवे स्वर्जित्परि षिच्यते। पवित्रे दक्षसाधनः ॥२॥
एष नृभिर्वि नीयते दिवो मूर्धा वृषा सुतः। सोमो वनेषु विश्ववित् ॥३॥
एष गव्युरचिक्रदत्पवमानो हिरण्ययुः। इन्दुः सत्राजिदस्तुतः ॥४॥
एष शुष्म्यसिष्यददन्तरिक्षे वृषा हरिः। पुनान इन्दुरिन्द्रमा ॥५॥
एष शुषयदाभ्यः सोमः पुनानो अर्षति। देवावीरघशंसहा॥६॥
*eṣa kavirabhiṣṭutaḥ pavitre adhi tośate । punāno dhnanpa dviṣaḥ ॥1॥*
*eṣa indrāya vāyave svarjitpari ṣichyate । pavitre dakṣasādhanaḥ ॥2॥*
*eṣa nṛbhirvi nīyate divo mūrdhā vṛṣā sutaḥ । somo vaneṣu viśvavit ॥3॥*
*eṣa gavyurachikradatpavamāno hiraṇyayuḥ । induḥ satrājidastutaḥ ॥4॥*
*eṣa śuṣmyasiṣyadadantarikṣe vṛṣā hariḥ । punāna indurindramā ॥5॥*
*eṣa śuṣayadābhyaḥ somaḥ punāno arṣati । devāvīraghaśaṁsahā ॥6॥*

सा. (Sv.) १७६५-६७

प्रास्य धारा अक्षरन्वृष्णः सुतस्यौजसः। देवाँ अनु प्रभूषतः ॥१॥
सपिंत मृजन्ति वेधसो गृणन्तः कारवो गिरा। ज्योतिर्जानमुक्थ्यम् ॥२॥
सुषहा सोम तानि ते पुनानाय प्रभूवसो। वर्धा समुद्रमुक्थ्य ॥३॥
*prāsya dhārā akṣaranvṛṣṇaḥ sutasyaujasaḥ । devām̐ anu prabhūṣataḥ ॥1॥*
*sapiṁta mṛjanti vedhaso gṛṇantaḥ kāravo girā । jyotirjāānamukthyam ॥2॥*
*suṣahā soma tāni te punānāya prabhūvaso । vardhā samudramukthya ॥3॥*

## ३२५. नृमेध आंगिरसः (प्रथमः पादः); इध्मवाहो दार्ढच्युतः (त्रयः पादाः) (Nṛmedha Āṁgirasaḥ [Prathamaḥ Pādaḥ]; Idhmavāho Dārḍhachyutaḥ [Trayaḥ Pādāḥ])

१. पवमानः सोमः (Pavamānaḥ Somaḥ) - सा. (Sv.) १२८५

एष सूर्येण हासते संवसानो विवस्वता। पतिर्वाचो अदाभ्यः ॥६॥
*eṣa sūryeṇa hāsate saṁvasāno vivasvatā । patirvācho adābhyaḥ ॥6॥*

## ३२६. नृमेध पुरुमेधौ (Nṛmedha Purumedhau)

१. इन्द्रः (Indraḥ) - ऋ. (Rv.) ८.८९.१-७; ८.९०.१-६; य. (Yv.)२०.३०

ऋ. (Rv.) ८.८९.१-७

बृहदिन्द्राय गायत मरुतो वृत्रहन्तमम् । येन ज्योतिरजनयन्नृतावृधो देवं देवाय जागृवि ॥१॥
अपाधमदभिशस्तीरशस्तिहाथेन्द्रो द्युम्न्याभवत् ।
देवास्त इन्द्र सख्याय येमिरे बृहद्भानो मरुद्गण ॥२॥
प्र व इन्द्राय बृहते मरुतो ब्रह्मार्चत । वृत्रं हनति वृत्रहा शतक्रतुर्वज्रेण शतपर्वणा ॥३॥
अभि प्र भर धृषता धृषन्मनः श्रवश्चित्ते असद् बृहत् ।
अर्षन्त्वापो जवसा वि मातरो हनो वृत्रं जया स्वः ॥४॥
यज्जायथा अपूर्व्य मघवन्वृत्रहत्याय । तत्पृथिवीमप्रथयस्तदस्तभ्ना उत द्याम् ॥५॥
तत्ते याो अजायत तदर्क उत हस्कृतिः। तद्विश्वमभिभूरसि यज्जातं यच्च जन्त्वम् ॥६॥
अमासु पक्वमैरय आ सूर्य रोहयो दिवि । घर्म न सामान्तपता सुवृक्तिभिर्जुष्टं गिर्वणसे बृहत् ॥७॥
*bṛhadindrāya gāyata maruto vṛtrahantamam ।*
*yena jyotirajanayannṛtāvṛdho devaṁ devāya jāgṛvi ॥1॥*
*apādhamadabhiśastīraśastihāthendro dyumnyābhavat ।*
*devāsta indra sakhyāya yemire bṛhadbhāno marudgaṇa ॥2॥*
*pra va indrāya bṛhate maruto brahmārchata ।*

*vṛtraṁ hanati vṛtrahā śatakraturvajreṇa śataparvaṇā ॥3॥*
*abhi pra bhara dhṛṣatā dhṛṣanmanaḥ śravaśchitte asad bṛhat ।*
*arṣantvāpo javasā vi mātaro hano vṛtraṁ jayā svaḥ ॥4॥*
*yajjāyathā apūrvya maghavanvṛtrahatyāya ।*
*tatpṛthivīmaprathayastadastabhnā uta dyām ॥5॥*
*tatte yāo ajāyata tadarka uta haskṛtiḥ ।*
*tadviśvamabhibhūrasi yajjātaṁ yachcha jantvam ॥6॥*
*amāsu pakvamairaya ā sūrya rohayo divi ।*
*gharma na sāmāntapatā suvṛktibhirjuṣṭaṁ girvaṇase bṛhat ॥7॥*

ऋ. (Rv.) ८.९०.१-६

आ नो विश्वासु हव्य इन्द्रः समतसु भूषतु ।
उप ब्रह्माणि सवनानि वृत्रहा परमज्या ऋचीषमः ॥१॥
त्वं दाता प्रथमो राधसामस्यसि सत्य ईशानकृत् ।
तुविद्युम्नस्य युज्या वृणीमहे पुत्रस्य शवसो महः ॥२॥
ब्रह्मा त इन्द्र गिर्वणः क्रियन्ते अनतिद्भुता ।
इमा जुषस्व हर्यश्व योजनेन्द्र या ते अमन्महि ॥३॥
त्वं हि सत्यो मघवन्ननानतो वृत्राभूरि न्यृंजसे ।
स त्वं शविष्ठ वज्रहस्त दाशुषेऽर्वांचं रयिमा कृधि ॥४॥
त्वमिन्द्र यशा अस्यृजीषी शवसस्पते ।
त्वं वृत्रणि हंस्यप्रतीन्येक इदनुत्ता चर्षणीधृता ॥५॥
तमु त्वा नूनमसुर प्रचेतसं राधो भागमिवेमहे ।
महीव कृत्तिः शरणा त इन्द्र प्र ते सुम्ना नो अश्नवन् ॥६॥

*ā no viśvāsu havya indraḥ samatasu bhūṣatu ।*
*upa brahmāṇi savanāni vṛtrahā paramajyā ṛchīṣamaḥ ॥1॥*
*tvaṁ dātā prathamo rādhasāmasyasi satya īśānakṛt ।*
*tuvidyumnasya yujyā vṛṇīmahe putrasya śavaso mahaḥ ॥2॥*
*brahmā ta indra girvaṇaḥ kriyante anatidbhutā ।*
*imā juṣasva haryaśva yojanendra yā te amanmahi ॥3॥*
*tvaṁ hi satyo maghavannanānato vṛtrābhūri nyṛṁjase ।*
*sa tvaṁ śaviṣṭha vajrahasta dāśuṣe'rvāṁchaṁ rayimā kṛdhi ॥4॥*
*tvamindra yaśā asyṛjīṣī śavasaspate ।*
*tvaṁ vṛtraṇi haṁsyapratīnyeka idanuttā charṣaṇīdhṛtā ॥5॥*
*tamu tvā nūnamasura prachetasaṁ rādho bhāgamivemahe ।*
*mahīva kṛttiḥ śaraṇā ta indra pra te sumnā no aśnavan ॥6॥*

य. (Yv.)२०.३०

बृहदिन्द्राय गायत मरुतो वृत्रहन्तमम्। येन ज्योतिरजनयन्नृतावृधो देवं देवाय जागृवि ॥३०॥
*bṛhadindrāya gāyata maruto vṛtrahantamam । yena jyotirajanayannṛtāvṛdho devaṁ devāya jāgṛvi ॥30॥*

## ३२७. नृमेध-पुरुमेधौ आंगिरसौ (Nṛmedha-Purumedhau Āṁgirasau)

१. इन्द्रः (Indraḥ) - सा. (Sv.) २४८; २५७-५८; २६९; ६०१; १४११-१२; १४२९-३१; १४९२-९३

सा. (Sv.) २४८

त्वमिन्द्र यशा अस्यृजीषी शवसस्पतिः। त्वं वृत्राणि हंस्यप्रतीन्येक इत्पुर्वनुत्तश्चर्षणीधृतिः ॥६॥
*tvamindra yaśā asyṛjīṣī śavasaspatiḥ ।*
*tvaṁ vṛtrāṇi haṁsyapratīnyeka itpurvanuttaścharṣaṇīdhṛtiḥ ॥6॥*

सा. (Sv.) २५७-५८

प्र व इन्द्राय बृहते मरुतो ब्रह्मार्चत। वृत्रं हनति वृत्रहा शतक्रतुर्वज्रेण शतपर्वणा ॥५॥

बृहदिन्द्राय गायत मरुतो वृत्रहन्तमम् । येन ज्योतिरजनयन्नृतावृधो देवं देवाय जागृवि ॥६ ॥
*pra va indrāya bṛhate maruto brahmārchata ।*
*vṛtraṁ hanati vṛtrahā śatakraturvajreṇa śataparvaṇā ॥5 ॥*
*bṛhadindrāya gāyata maruto vṛtrahantamam ।*
*yena jyotirajanayannṛtāvṛdho devaṁ devāya jāgṛvi ॥6 ॥*

सा. (Sv.) २६९

आ नो विश्वासु हव्यमिन्द्र समत्सु भूषत । उप ब्रह्माणि सवनानि वृत्रहन्परमज्या ऋचीषम ॥७ ॥
*ā no viśvāsu havyamindra samatsu bhūṣata ।*
*upa brahmāṇi savanāni vṛtrahanparamajyā ṛchīṣama ॥7 ॥*

सा. (Sv.) ६०१

यज्जायथा अपूर्व्य मघवन्वृत्रहयाय । तत्पृथिवीमप्रथयस्तदस्तभ्ना उतो दिवम् ॥७ ॥
*yajjāyathā apūrvya maghavanvṛtrahayāya ।*
*tatpṛthivīmaprathayastadastabhnā uto divam ॥7 ॥*

सा. (Sv.) १४११-१२

त्वमिन्द्र यशा अस्यृजीषी शवसस्पतिः । त्वं वृत्राणि हं स्यप्रतीन्येक इत्पुर्वनुत्तश्चर्षणीधृतिः ॥१ ॥
तमुत्वा नूनमसुर प्रचेतसं राधो भागमिवेमहे ।
महीव कृत्तिः शरणा त इन्द्र प्र ते सुम्ना नो अश्नवन् ॥२ ॥
*tvamindra yaśā asyṛjīṣī śavasaspatiḥ ।*
*tvaṁ vṛtrāṇi haṁ syapratīnyeka itpurvanuttaścharṣaṇīdhṛtiḥ ॥1 ॥*
*tamutvā nūnamasura prachetasaṁ rādho bhāgamivemahe ।*
*mahīva kṛttiḥ śaraṇā ta indra pra te sumnā no aśnavan ॥2 ॥*

सा. (Sv.) १४२९-३१

यज्जायथा अपूर्व्य मघवन्वृत्रहत्याय । तत्पृथिवीमप्रथयस्तदस्तभ्ना उतो दिवम् ॥१ ॥
तत्ते याो अजायत तदर्क उत हस्कृतिः । तद्विश्वमभिभूरसि यज्जातं यच्च जन्त्वम् ॥२ ॥
आमासु पक्वमैरय आ सूर्य रोहयो दिवि । घर्म न सामन्तपता सुवृक्तिभिर्जुष्टं गिर्वणसे बृहत् ॥३
*yajjāyathā apūrvya maghavanvṛtrahatyāya ।*
*tatpṛthivīmaprathayastadastabhnā uto divam ॥1 ॥*
*tatte yāo ajāyata tadarka uta haskṛtiḥ ।*
*tadviśvamabhibhūrasi yajjātaṁ yachcha jantvam ॥2 ॥*
*āmāsu pakvamairaya ā sūrya rohayo divi ।*
*gharma na sāmantapatā suvṛktibhirjuṣṭaṁ girvaṇase bṛhat ॥3*

सा. (Sv.) १४९२-९३

आ नो विश्वासु हव्यमिन्द्रं समत्सु भूषत ।उप ब्रह्माणि सवनानि वृत्रहन् परमज्या ऋचीषम ॥१ ॥
त्वं दाता प्रथमो राधसामस्यसि सत्य ईशानकृत् ।
तुविद्युम्नस्य युजया वृणीमहे पृत्रस्य शवसो महः ॥२ ॥
*ā no viśvāsu havyamindraṁ samatsu bhūṣata ।upa brahmāṇi savanāni vṛtrahan paramajyā ṛchīṣama ॥1 ॥*
*tvaṁ dātā prathamo rādhasāmasyasi satya īśānakṛt ।*
*tuvidyumnasya yujayā vṛṇīmahe pṛtrasya śavaso mahaḥ ॥2 ॥*

## ३२८. नृमेधः वामदेवो वा (Nṛmedhaḥ Vāmadevo Vā)

१. इन्द्रः (Indraḥ) - सा. (Sv.) १७६८-१७७०

एष ब्रह्मा य ऋत्विय इन्द्रो नाम श्रुतो गुणे ॥१ ॥
त्वामिच्छवसस्पते यन्ति गिरो न संयतः ॥२ ॥
*eṣa brahmā ya ṛtviya indro nāma śruto guṇe ॥1 ॥*
*tvāmichchhavasaspate yanti giro na saṁyataḥ ॥2 ॥*

## ३२९. नेमो भार्गवः (Nemo Bhārgavaḥ)

१. इन्द्रः (Indraḥ) - ऋ. (Rv.) ८.१००.१-९; ८.१००.१२

ऋ. (Rv.) ८.१००.१-९

अयं त एमि तन्वा पुरस्ताद्विश्वे देवा अभि मा यन्ति पश्चात् ।
यदा मह्यं दीधरो भागमिन्द्रादिन्मया कृणवो वीर्याणि ॥१॥
दधामि ते मधुनो भक्षमग्रे हितस्ते भागः सुतो अस्तु सोमः ।
असश्च त्वं दक्षिणतः सखा मेऽधा वृत्राणि जङ्घनाव भूरि ॥२॥
प्र सु स्तोमं भरत वाजयन्त इन्द्राय सत्यं यदि सत्यमस्ति ।
नेन्द्रो अस्तीति नेम उ त्व आह क ईं ददर्श कमभि ष्टवाम ॥३॥
अयमस्मि जरितः पश्य मेह विश्वा जातान्यभ्यस्मि मह्ना ।
ऋतस्य मा प्रदिशो वर्धयन्त्यादर्दिरो भुवना दर्दरीमि ॥४॥
आ यन्मा वेना अरुहन्नृतस्यँ एकमासीनं हर्यतस्य पृष्ठे ।
मनश्चिन्मे हृद आ प्रत्यवोचदचिक्रदंछिशुमन्तः सखायः ॥५॥
विश्वेत्ता ते सवनेषु या चकर्थ मघवन्निन्द्र सुन्वते ।
पारावतं यत्पुरुसंभृतं वस्वपावृणोः शरभाय ऋषिबन्धवे ॥६॥
प्र नूनं धावता पृथङ्नेह यो वो अवावरीत् ।
नि षीं वृत्रस्य मर्मणि वज्रमिन्द्रो अपीपतत् ॥७॥
मनोजवा अयमान आयसीमतरत्पुरम् । दिवं सुपर्णो गत्वाय सोमं वज्रिण आभरत् ॥८॥
समुद्रे अन्तः शयत उदना वज्रो अभीवृतः। भरन्त्यस्मै संयतः पुरः प्रस्रवणा बलिम् ॥९॥

*ayaṁ ta emi tanvā purastādviśve devā abhi mā yanti paśchāt /*
*yadā mahyaṁ dīdharo bhāgamindrādinmayā kṛṇavo vīryāṇi //1 //*
*dadhāmi te madhuno bhakṣamagre hitaste bhāgaḥ suto astu somaḥ /*
*asaścha tvaṁ dakṣiṇataḥ sakhā me'dhā vṛtrāṇi jaṅghanāva bhūri //2 //*
*pra su stomaṁ bharata vājayanta indrāya satyaṁ yadi satyamasti /*
*nendro astīti nema u tva āha ka ī dadarśa kamabhi ṣṭavāma //3 //*
*ayamasmi jaritaḥ paśya meha viśvā jātānyabhyasmi mahnā /*
*ṛtasya mā pradiśo vardhayantyādardiro bhuvanā dardarīmi //4 //*
*ā yanmā venā aruhannṛtasyam̐ ekamāsīnaṁ haryatasya pṛṣṭhe /*
*manaśchinme hṛda ā pratyavochadikradiṁchhaśumantaḥ sakhāyaḥ //5 //*
*viśvettā te savaneṣu yā chakartha maghavannindra sunvate /*
*pārāvataṁ yatpurusaṁbhṛtaṁ vasvapāvṛṇoḥ śarabhāya ṛṣibandhave //6 //*
*pra nūnaṁ dhāvatā pṛthaṁneha yo vo avāvarīt /*
*ni ṣīṁ vṛtrasya marmaṇi vajramindro apīpatat //7 //*
*manojavā ayamāna āyasīmataratpuram /*
*divaṁ suparṇo gatvāya somaṁ vajriṇa ābharat //8 //*
*samudre antaḥ śayata udanā vajro abhīvṛtaḥ /*
*bharantyasmai saṁyataḥ puraḥ prasravaṇā balim //9 //*

ऋ. (Rv.) ८.१००.१२

सखे विष्णो वितरं वि क्रमस्व द्यौर्देहि लोकं वज्राय विष्कभे ।
हनाव वृत्रं रिणचाव सिन्धूनिन्द्रस्य यन्तु प्रसवे विसृष्टाः ॥१२॥

*sakhe viṣṇo vitaraṁ vi kramasva dyaurdehi lokaṁ vajrāya viṣkabhe /*
*hanāva vṛtraṁ riṇachāva sindhūnindrasya yantu prasave visṛṣṭāḥ //12 //*

२. वाक् (Vāk) - ऋ. (Rv.) ८.१००.१०; ८.१००.११

ऋ. (Rv.) ८.१००.१०

यद्वाग् वदन्त्यविचेतनानि राष्ट्री देवानां निषसाद मन्द्रा ।
चतस्र ऊर्ज दुदुहे पयाँसि क्व स्विदस्याः परमं जगाम ॥१०॥

*yadvāg vadantyavichetanāni rāṣṭrī devānāṁ niṣasāda mandrā /*

*chatasra ūrja duduhe payāṁsi kva svidasyāḥ paramaṁ jagāma //10 //*

ऋ. (Rv.) ८.१००.११

देवीं वाचमजनयन्त देवास्तां विश्वरूपाः पशवो वदन्ति ।
सा नो मन्द्रेषमूर्जं दुहाना धेनुर्वागस्मानुप सुष्टुतैतु ॥११॥
*devīṁ vāchamajanayanta devāstāṁ viśvarūpāḥ paśavo vadanti /*
*sā no mandreṣamūrja duhānā dhenurvāgasmānupa suṣṭutaitu //11 //*

## ३३०. नोधा (Nodhā)

१. इन्द्रः (Indraḥ) - ऋ. (Rv.) ८.८८.१-६; अ. (Av.) २०.९.१-२; २०.३५.१-१६; २०.४९.४; ५; य. (Yv.)३४.१६; १७

ऋ. (Rv.) ८.८८.१-६

तं वो दस्ममृतीषहं वसोर्मन्दानमन्धसः ।
अभि वत्सं न स्वसरेषु धेनव इन्द्रं गीर्भिर्नवामहे ॥१॥
द्युक्षं सुदानुं तविषीभिरावृतं गिरिं न पुरुभोजसम् ।
क्षुमन्तं वाजं शतिनं सहस्रिणं मक्षू गोमन्तमीमहे ॥२॥
न त्वा बृहन्तो अद्रयो वरन्त इन्द्र वीळवः ।
यद्दित्ससि स्तुवते मावते वसु नकिष्टदा मिनाति ते ॥३॥
योद्धासि क्रत्वा शवसोत दंसना विश्वा जाताभि मज्मना ।
आ त्वायमर्क ऊतये ववर्तति यं गोतमा अजीजनन् ॥४॥
प्र हि रिरिक्ष ओजसा दिवो अन्तेभ्यस्परि ।
न त्वा विव्याच रज इन्द्र पार्थिवमनु स्वधां ववक्षिथ ॥५॥
नकिः परिष्टिर्मघवन्मघस्य ते यद्दाशुषे दशस्यसि ।
अस्माकं बोध्युचथस्य चोदिता मंहिष्ठो वाजसातये ॥६॥
*taṁ vo dasmamṛtīṣahaṁ vasormandānamandhasaḥ /*
*abhi vatsaṁ na svasareṣu dhenava indraṁ gīrbhirnavāmahe //1 //*
*dyukṣaṁ sudānuṁ taviṣībhirāvṛtaṁ giriṁ na purubhojasam /*
*kṣumantaṁ vājaṁ śatinaṁ sahasriṇaṁ makṣū gomantamīmahe //2 //*
*na tvā bṛhanto adrayo varanta indra vīḷavaḥ /*
*yadditsasi stuvate māvate vasu nakiṣṭadā mināti te //3 //*
*yoddhāsi kratvā śavasota daṁsanā viśvā jātābhi majmanā /*
*ā tvāyamarka ūtaye vavartati yaṁ gotamā ajījanan //4 //*
*pra hi ririkṣa Ojasā divo antebhyaspari /*
*na tvā vivyācha raja indra pārthivamanu svadhāṁ vavakṣitha //5 //*
*nakiḥ pariṣṭirmaghavanmaghasya te yaddāśuṣe daśasyasi /*
*asmākaṁ bodhyuchathasya choditā maṁhiṣṭho vājasātaye //6 //*

अ. (Av.) २०.९.१-२

तं वो दस्ममृतीषहं वसोर्मन्दानमन्धसः ।
अभि वत्सं न स्वसरेषु धेनव इन्द्रं गीर्भिर्नवामहे ॥१॥
द्युक्षं सुदानु तविषीभिरावृतं गिरिं न पुरुभोजसम् ।
क्षुमन्तं वाजं शतिनं सहस्रिणं मक्षू गोमन्तमीमहे ॥२॥
*taṁ vo dasmamṛtīṣahaṁ vasormandānamandhasaḥ /*
*abhi vatsaṁ na svasareṣu dhenava indraṁ gīrbhirnavāmahe //1 //*
*dyukṣaṁ sudānu taviṣībhirāvṛtaṁ giriṁ na purubhojasam /*
*kṣumantaṁ vājaṁ śatinaṁ sahasriṇaṁ makṣū gomantamīmahe //2 //*

अ. (Av.) २०.३५.१-१६

अस्मा इदु प्र तवसे तुराय प्रयो न हर्मि स्तोमं महिनाय ।
ऋचीषमायाध्रिगव ओहमिन्द्राय ब्रह्माणि राततमा ॥१॥

अस्मा इदु प्रयइव प्र यंसि भराम्यांगूषं बाधे सुवृक्ति ।
इन्द्राय हृदा मनसा मनीषा प्रत्नाय पत्ये धियो मर्जयन्त ॥२॥
अस्मा इदु त्यमुपमं स्वर्षा भराम्यांगूषमास्येन ।
मा हिष्ठमच्छोक्तिभिर्मतीनां सुवृक्तिभिः सरिं वावधध्यै ॥३॥
अस्मा इदु स्तोमं स हिनोमि रथं न तष्टेव तत्सिनाय ।
गितरश्च गिर्वाहसे सुवृक्तीन्द्राय विश्वमिन्वं मेधिराय ॥४॥
अस्मा इदु सप्तिमिव श्रवस्येन्द्रायार्कं जुह्वा३ समंजे ।
वीरं दानौकसं वन्दध्यै पुरां गूर्तश्रवसं दर्माणम् ॥५॥
अस्मा इदु त्वष्टा तक्षद् वज्रं स्वपस्तमं स्वर्य१ रणाय ।
वृत्रस्य चिद् विदद् येन मर्म तुजन्नीशानस्तुजता कियेधाः ॥६॥
अस्येदु मातुः सवनेषु सद्यो महः पितुं पपिवांचार्वन्ना ।
मुषायद् विष्णुः पचतं सहीयान् विध्यद् वराहं तिरो अद्रिमस्ता ॥७॥
अस्मा इदु गनाश्चिद् देवपत्नीरिन्द्रायार्कमहिहत्या ऊवुः ।
परि द्यावापृथिवी जभ्र उर्वी नास्य ते महिमानं परि ष्टः ॥८॥
अस्येदेव प्र रिरिचे महित्वं दिवस्पृथिव्याः पर्यन्तरिक्षात् ।
स्वराळिन्द्रो दम आ विश्वगूर्तः स्वरिरमत्रो ववक्षे रणाय ॥९॥
अस्येदेव शवसा शुषन्तं वि वृश्चद् वज्रेण वृत्रमिन्द्रः ।
गा न व्राणा अवनीरमुंचदभि श्रवो दावने सचेताः ॥१०॥
अस्येदु त्वेषसा रन्त सिन्धवः परि यद् वज्रेण सीमयच्छत् ।
ईशानकृद् दाशुषे दशस्यन् तुर्वीतये गाधं तुर्वणिः कः ॥११॥
अस्मा इदु प्र भरा तूतुजानो वृत्राय वज्रमीशानः कियेधाः ।
गोर्न पर्व वि रदा तिरश्चेष्यन्नर्णास्यपां चरध्यै ॥१२॥
अस्येदु प्र ब्रूहि पूर्व्याणि तुरस्य कर्माणि नव्य उक्थैः ।
युधे यदिष्णान आयुधान्यृघायमाणो निरिणाति शत्रून् ॥१३॥
अस्येदु भिया गिरयश्च दृढा द्यावा च भूमा जनुषस्तुजेते ।
उपो वेनस्य जोगुवान् ओणिं सद्यो भुवद् वीर्याय नोधाः ॥१४॥
अस्मा इदु त्यदनु दाय्येषामेको यद् वव्ने भूरेरीशानः ।
प्रैतशं सूर्ये पस्पृधानं सौवश्व्ये सुष्विमावदिन्द्रः ॥१५॥
एवा ते हारियोजना सुवृक्तीन्द्र ब्रह्माणि गोतमासो अक्रन् ।
ऐषु विश्वपेशसं धियं धाः प्रातर्मक्षू धियावसुर्जगम्यात् ॥१६॥

*asmā idu pra tavase turāya prayo na harmi stomaṁ mahināya /*
*ṛchīṣamāyādhrigava Ohamindrāya brahmāṇi rātatamā //1 //*
*asmā idu prayaiva pra yaṁsi bharāmyāṁgūṣaṁ bādhe suvṛkti /*
*indrāya hṛdā manasā manīṣā pratnāya patye dhiyo marjayanta //2 //*
*asmā idu tyamupamaṁ svarṣā bharāmyāṁgūṣamāsyena /*
*mā hiṣṭhamachchhoktibhirmatīnāṁ suvṛktibhiḥ sariṁ vāvadhadhyai //3 //*
*asmā idu stomaṁ sa hinomi rathaṁ na taṣṭeva tatsināya /*
*gitaraścha girvāhase suvṛktīndrāya viśvaminvaṁ medhirāya //4 //*
*asmā idu saptimiva śravasyendrāyārka juhnā3 samaṁje /*
*vīraṁ dānaukasaṁ vandadhyai purāṁ gūrtaśravasaṁ darmāṇam //5 //*
*asmā idu tvaṣṭā takṣad vajraṁ svapastamaṁ svarya1 raṇāya /*
*vṛtrasya chid vidad yena marma tujannīśānastujatā kiyedhāḥ //6 //*
*asyedu mātuḥ savaneṣu sadyo mahaḥ pituṁ papivāṁchārvannā /*
*muṣāyad viṣṇuḥ pachataṁ sahīyān vidhyad varāhaṁ tiro adrimastā //7 //*
*asmā idu ganāśchid devapatnīrindrāyārkamahihatyā ūvuḥ /*
*pari dyāvāpṛthivī jabhra urvī nāsya te mahimānaṁ pari ṣṭaḥ //8 //*
*asyedeva pra ririche mahitvaṁ divaspṛthivyāḥ paryantarikṣāt /*

*svarāḷindro dama ā viśvagūrtaḥ svariramatro vavakṣe raṇāya //9 //*
*asyedeva śavasā śuṣantaṁ vi vṛśchad vajreṇa vṛtramindraḥ /*
*gā na vrāṇā avanīramuṁchadabhi śravo dāvane sachetāḥ //10 //*
*asyedu tveṣasā ranta sindhavaḥ pari yad vajreṇa sīmayachchhat /*
*īśānakṛd dāśuṣe daśasyan turvītaye gādhaṁ turvaṇiḥ kaḥ //11 //*
*asmā idu pra bharā tūtujāno vṛtrāya vajramīśānaḥ kiyedhāḥ /*
*gorna parva vi radā tiraścheṣyannarṇāsyapāṁ charadhyai //12 //*
*asyedu pra brūhi pūrvyāṇi turasya karmāṇi navya ukthaiḥ /*
*yudhe yadiṣṇāna āyudhānyṛghāyamāṇo niriṇāti śatrūn //13 //*
*asyedu bhiyā girayaścha dṛḍhā dyāvā cha bhūmā januṣastujete /*
*upo venasya joguvān Oṇiṁ sadyo bhuvad vīryāya nodhāḥ //14 //*
*asmā idu tyadanu dāyyeṣāmeko yad vavne bhūrerīśānaḥ /*
*praitaśaṁ sūrye paspṛdhānaṁ sauvaśvye suṣvimāvadindraḥ //15 //*
*evā te hāriyojanā suvṛktīndra brahmāṇi gotamāso akran /*
*aiṣu viśvapeśasaṁ dhiyaṁ dhāḥ prātarmakṣū dhiyāvasurjagamyāt //16 //*

अ. (Av.) २०.४९.४-५

तं वो दस्ममृतीषहं वसोर्मन्दानमन्धसः ।
अभि वत्सं न स्वसरेषु धेनव इन्द्रं गीर्भिर्नवामहे ॥४॥
द्युक्षं सुदानुं तविषीभिरावृतं गिरिं न पुरुभोजसम् ।
क्षुमन्तं वाजं शतिनं सहस्रिणं मक्षू गोमन्तमीमहे ॥५॥

*taṁ vo dasmamṛtīṣahaṁ vasormandānamandhasaḥ /*
*abhi vatsaṁ na svasareṣu dhenava indraṁ gīrbhirnavāmahe //4 //*
*dyukṣaṁ sudānuṁ taviṣībhirāvṛtaṁ giriṁ na purubhojasam /*
*kṣumantaṁ vājaṁ śatinaṁ sahasriṇaṁ makṣū gomantamīmahe //5 //*

य. (Yv.)३४.१६-१७

प्र मन्महे शवसानाय शूषमांगूषं गिर्वणसेऽअंगिरस्वत् ।
सुवृक्तिभिः स्तुवतऽऋग्मियायार्चामार्क नरे विश्रुताय ॥१६॥
प्र वो महे महि नमो भरध्वमांगूष्यंशवसानाय साम ।
येना नः पूर्वे पितरः पदााऽअर्चन्तोऽअंगिरसो गाऽअविन्दन् ॥१७॥

*pra manmahe śavasānāya śūṣamāṁgūṣaṁ girvaṇase'aṁgiramvat /*
*suvṛktibhiḥ stuvata'ṛgmiyāyārchāmārka nare viśrutāya //16 //*
*pra vo mahe mahi namo bharadhvamāṁgūṣyaṁśavasānāya sāma /*
*yenā naḥ pūrve pitaraḥ padāā'archanto'aṁgiraso gā'avindan //17 //*

२. पवमानः सोमः (Pavamānaḥ Somaḥ) - ऋ. (Rv.) ९.९३.१-५

साकमुक्षो मर्जयन्त स्वसारो दश धीरस्य धीतयो धनुत्रीः ।
हरिः पर्यद्रवज्जाः सूर्यस्य द्रोणं ननक्षे अत्यो न वाजी ॥१॥
सं मातृभिर्न शिशुर्वावशानो वृषा दधन्वे पुरुवारो अद्भिः ।
मर्यो न योषामभि निष्कृतं यन्त्सं गच्छते कलश उस्रियाभिः ॥२॥
उत प्र पिप्य ऊधरघ्न्याया इन्दुर्धाराभिः सचते सुमेधाः ।
मूर्धानं गावः पयसा चमूष्वभि श्रीणन्ति वसुभिर्न निक्तैः ॥३॥
स नो देवेभिः पवमान रदेन्दो रयिमश्विनं वावशानः ।
रथिरायतामुशती पुरन्धिरस्मद्र्य१गा दावने वसूनाम् ॥४॥
नू नो रयिमुप मास्व नृवन्तं पुनानो वाताप्यं विश्वश्चन्द्रम् ।
प्र वन्दितुरिन्दो तार्यायुः प्रातर्मक्षू धियावसुर्जगम्यात् ॥५॥

*sākamukṣo marjayanta svasāro daśa dhīrasya dhītayo dhanutrīḥ /*
*hariḥ paryadravajjāḥ sūryasya droṇaṁ nanakṣe atyo na vājī //1 //*
*saṁ mātṛbhirna śiśurvāvaśāno vṛṣā dadhanve puruvāro adbhiḥ /*
*maryo na yoṣāmabhi niṣkṛtaṁ yantsaṁ gachchhate kalaśa usriyābhiḥ //2 //*

*uta pra pipya ūdharadhnyāyā indurdhārābhiḥ sachate sumedhāḥ* ।
*mūrdhānaṁ gāvaḥ payasā chamūṣvabhi śrīṇanti vasubhirna niktaiḥ* ॥3 ॥
*sa no devebhiḥ pavamāna radendo rayimaśvinaṁ vāvaśānaḥ* ।
*rathirāyatāmuśatī purandhirasmadrya1gā dāvane vasūnām* ॥4 ॥
*nū no rayimupa māsva nṛvantaṁ punāno vātāpyaṁ viśvaśchandram* ।
*pra vanditurindo tāryāyuḥ prātarmakṣū dhiyāvasurjagamyāt* ॥5 ॥

## ३३१. नोधा गौतमः (Nodhā Gautamaḥ)

१. अग्निः (Agniḥ) - ऋ. (Rv.) १.५८.१-९; १.६०.१-५

ऋ. (Rv.) १.५८.१-९

नू चितसहोजा अमृतो नि तुन्दते होता यद्दूतो अभवद्विवस्वतः ।
वि साधिष्ठेभिः पथिभी रजो मम आ देवताता हविषा विवासति ॥१ ॥
आ स्वमद्म युवमानो अजरस्तृष्वविष्यन्नतसेषु तिष्ठति ।
अत्यो न पृष्ठं प्रुषितस्य रोचते दिवो न सानु स्तनयन्नचिक्रदत् ॥२ ॥
क्राणा रुद्रेभिर्वसुभिः पुरोहितो होता निषत्तो रयिषाळमर्त्यः ।
रथो न विक्षृंजसान आयुषु व्यानुषग्वार्या देव ऋण्वति ॥३ ॥
वि वातजूतो अतसेषु तिष्ठते वृथा जुहूभिः सृण्या तुविष्वणिः ।
तृषु यदग्ने वनिनो वृषायसे कृष्णं त एम रुशदूर्मे अजर ॥४ ॥
तपुर्जम्भो वन आ वातचोदितो यूथे न साह्वाँ अव वाति वंसगः ।
अभिव्रजन्नक्षितं पाजसा रजः स्थातुश्चरथं भयते पतत्रिणः ॥५ ॥
दधुष्ट्वा भृगवो मानुषेष्वा रयिं न चारुं सुहवं जनेभ्यः ।
होतारमग्ने अतिथि वरेण्यं मित्रं न शेवं दिव्याय जन्मने ॥६ ॥
होतारं सप्त जुह्वो३यजिष्ठं यं वाघतो वृणते अध्वरेषु ।
अग्निं विश्वेषामरतिं वसूनां सपर्यामि प्रयमा यामि रत्नम् ॥७ ॥
अच्छिद्रा सूनो सहसो नो अद्य स्तोतृभ्यो मित्रमहः शर्म यच्छ ।
अग्ने गणन्तमंहस उरुष्योर्जो नपात्पूर्भिरायसीभिः ॥८ ॥
भवा वरूथं गृणते विभावो भवा मघवन्मघवद्भ्यः शर्म ।
अरुष्याग्ने अंहसो गृणन्तं प्रातर्मक्षू धियावसुर्जगम्यात् ॥९ ॥

*nū chitasahojā amṛto ni tundate hotā yaddūto abhavadvivasvataḥ* ।
*vi sādhiṣṭhebhiḥ pathibhī rajo mama ā devatātā haviṣā vivāsati* ॥1 ॥
*ā svamadma yuvamāno ajarastṛṣvaviṣyannataseṣu tiṣṭhati* ।
*atyo na pṛṣṭhaṁ pruṣitasya rochate divo na sānu stanayannachikradat* ॥2 ॥
*krāṇā rudrebhirvasubhiḥ purohito hotā niṣatto rayiṣāḷamartyaḥ* ।
*ratho na vikṣavṛṁjasāna āyuṣu vyānuṣagvāryā deva ṛṇvati* ॥3 ॥
*vi vātajūto ataseṣu tiṣṭhate vṛthā juhūbhiḥ sṛṇyā tuviṣvaṇiḥ* ।
*tṛṣu yadagne vanino vṛṣāyase kṛṣṇaṁ ta ema ruśadūrme ajara* ॥4 ॥
*tapurjambho vana ā vātachodito yūthe na sāhnām̐ ava vāti vaṁsagaḥ* ।
*abhivrajannakṣitaṁ pājasā rajaḥ sthātuścharathaṁ bhayate patatriṇaḥ* ॥5 ॥
*dadhuṣṭvā bhṛgavo mānuṣeṣvā rayiṁ na chāruṁ suhavaṁ janebhyaḥ* ।
*hotāramagne atithi vareṇyaṁ mitraṁ na śevaṁ divyāya janmane* ॥6 ॥
*hotāraṁ sapta juhno3yajiṣṭhaṁ yaṁ vāghato vṛṇate adhvareṣu* ।
*agiṁna viśveṣāmaratiṁ vasūnāṁ saparyāmi prayamā yāmi ratnam* ॥7 ॥
*achchhidrā sūno sahaso no adya stotṛbhyo mitramahaḥ śarma yachchha* ।
*agne gaṇantamaṁhasa uruṣyorjo napātpūrbhirāyasībhiḥ* ॥8 ॥
*bhavā varūthaṁ gṛṇate vibhāvo bhavā maghavanmaghavadbhyaḥ śarma* ।
*aruṣyāgne aṁhaso gṛṇantaṁ prātarmakṣū dhiyāvasurjagamyāt* ॥9 ॥

ऋ. (Rv.) १.६०.१-५

वह्निं यशसं विदथस्य केतुं सुप्राव्यं दूतं सद्योअर्थम् ।

द्विजन्मानं रयिमिव प्रशस्तं रातिं भरद् भृगवे मातरिश्वा ॥१॥
अस्य शासुरुभयासः सचन्ते हविष्मन्त उशिजो ये च मर्ताः ।
दिवश्चित्पूर्वो न्यसादि होतापृच्छ्यो विश्पतिर्विक्षु वेधाः ॥२॥
तं नव्यसी हृद आ जायमानमस्मत्सुकीर्तिर्मधुजिह्वमश्याः ।
यमृत्विजो वृजने मानुषासः प्रयस्वन्त आयवो जीजन्त ॥३॥
उशिक्पावको वसुर्मानुषेषु वरेण्यो होताधायि विक्षु ।
दमूना गृहपतिर्दम आँ अग्निर्भुवद्रयिपती रयीणाम् ॥४॥
तं त्वा वयं पतिमग्ने रयीणां प्र शंसामो मतिभिर्गोतमासः ।
आशुं न वाजम्भरं मर्जयन्तः प्रातर्मक्षू धियावसुर्जगम्यात् ॥५॥

*vahni yaśasaṁ vidathasya ketuṁ suprāvyaṁ dūtaṁ sadyoartham /*
*dvijanmānaṁ rayimiva praśastaṁ rātiṁ bharad bhṛgave mātariśvā //1//*
*asya śāsurubhayāsaḥ sachante haviṣmanta uśijo ye cha martāḥ /*
*divaśchitpūrvo nyasādi hotāpṛchchhyo viśpatirvikṣu vedhāḥ //2//*
*taṁ navyasī hṛda ā jāyamānamasmatsukīrtirmadhujihnamaśyāḥ /*
*yamṛtvijo vṛjane mānuṣāsaḥ prayasvanta āyavo jījanta //3//*
*uśikpāvako vasurmānuṣeṣu vareṇyo hotādhāyi vikṣu /*
*damūnā gṛhapatirdama āṁ̐ agnirbhuvadrayipatī rayīṇām //4//*
*taṁ tvā vayaṁ patimagne rayīṇāṁ pra śaṁsāmo matibhirgotamāsaḥ /*
*āśuṁ na vājambharaṁ marjayantaḥ prātarmakṣū dhiyāvasurjagamyāt //5//*

२. अग्निर्वैश्वानरः (Agnirvaiśvānaraḥ) - ऋ. (Rv.) १.५९.१-७

वया इदग्ने अग्नयस्ते अन्ये त्वे वि अमृता मादयन्ते ।
वैश्वानर नाभिरसि क्षितीनां स्थेणेव जनाँ उपमिद्ययन्थ ॥१॥
मूर्धा दिवो नाभिरग्निः पृथिव्या अथाभवदरती रोदस्योः ।
तं त्वा देवासोऽजनयन्त देवं वैश्वानर ज्योतिरिदार्याय ॥२॥
आ सूर्ये न रश्मयो ध्रुवासो वैश्वानरे दधिरेऽग्ना वसूनि ।
या पर्वतेष्वोषधीष्वप्सु या मानुषेष्वसि तस्य राजा ॥३॥
बृहती इव सूनवे रोदसी गिरो होता मनुष्यो३ न दक्षः ।
स्वर्वते सत्यशुष्माय पूर्वी र्वैश्वानराय नृतमाय यह्वीः ॥४॥
दिवश्चित्ते बृहतो जातवेदो वैश्वानर प्र रिरिचे महित्वम् ।
राजा कृष्टीनामसी मानुषीणां युधा देवेभ्यो वरिवश्चकर्थ ॥५॥
प्र नू महित्वं वृषभस्य वोचं यं पूरवो वृत्रहणं सचन्ते ।
वैश्वानरो दस्युमग्निर्जघन्वाँ अधूनोत्काष्ठा अव शम्बरं भेत् ॥६॥
वैश्वानरो महिम्ना विश्वकृष्टिर्भरद्वाजेषु यजतो विभावा ।
शातवनेये शतिनीभिरग्निः पुरुणीथे जरते सूनृतावान् ॥७॥

*vayā idagne agnayaste anye tve vie amṛtā mādayante /*
*vaiśvānara nābhirasi kṣitīnāṁ stheṇeva janāṁ̐ upamidyayantha //1//*
*mūrdhā divo nābhiragniḥ pṛthivyā athābhavadaratī rodasyoḥ /*
*taṁ tvā devāso'janayanta devaṁ vaiśvānara jyotiridāryāya //2//*
*ā sūrye na raśmayo dhruvāso vaiśvānare dadhire'gnā vasūni /*
*yā parvateṣvoṣadhīṣvapsu yā mānuṣeṣvasi tasya rājā //3//*
*bṛhatī iva sūnave rodasī giro hotā manuṣyo3 na dakṣaḥ /*
*svarvate satyaśuṣmāya pūrvī rvaiśvānarāya nṛtamāya yahnīḥ //4//*
*divaśchitte bṛhato jātavedo vaiśvānara pra ririche mahitvam /*
*rājā kṛṣṭīnāmasī mānuṣīṇāṁ yudhā devebhyo varivaśchakartha //5//*
*pra nū mahitvaṁ vṛṣabhasya vochaṁ yaṁ pūravo vṛtrahaṇaṁ sachante /*
*vaiśvānaro dasyumagnirjaghanvāṁ̐ adhūnotkāṣṭhā ava śambaraṁ bhet //6//*
*vaiśvānaro mahimnā viśvakṛṣṭirbharadvājeṣu yajato vibhāvā /*
*śātavaneye śatinībhiragniḥ puruṇīthe jarate sūnṛtāvān //7//*

३. इन्द्रः (Indraḥ) - ऋ. (Rv.) १.६१.१-१६; १.६२.१-१३; १.६३.१-९; १.६४.१-१५; सा. (Sv.) २३६; २९६; ३१२; ६८५-६८६; य. (Yv.)३४.१६-१७

ऋ. (Rv.) १.६१.१-१६

अस्मा इदु प्र तवसे तुराय प्रयो न हर्मि स्तोमं महिनाय ।
ऋचीषमायाध्रिगव ओहमिन्द्राय ब्रह्माणि राततमा ॥१॥
अस्मा इदु प्रय इव प्र यंसि भराम्यांगूषं बाधे सुवृक्ति ।
इन्द्राय हृदा मनसा मनीषा प्रत्नाय पत्ये धियो मर्जयन्त ॥२॥
अस्मा इदु त्यमुपमं स्वर्षा भराम्यांगूषमास्येन ।
मंहिष्ठमच्छोक्तिभिर्मतीनां सुवृक्तिभिः सूरिं वावृधध्यै ॥३॥
अस्मा इदु स्तोमं सं हिनोमि रथं न तष्टेव तत्सिनाय ।
गिरश्च गिर्वाहसे सुवृक्तीन्द्राय विश्वमिन्वं मेधिराय ॥४॥
अस्मा इदु सप्तिमिव श्रवस्येन्द्रायार्क जुह्वा३ समंजे ।
वीरं दानौकसं वन्दध्यै पुरां गूर्तश्रवसं दर्माणम् ॥५॥
अस्मा इदु त्वष्टा तक्षद्वज्रं स्वपस्तमं स्वर्य१रणाय ।
वृत्रस्य चिद्विदद्येन मर्म तुजन्नीशानस्तुजता कियेधाः ॥६॥
अस्येदु मातुः सवनेषु सद्यो महः पितुं पपिवांचार्वन्ना ।
मुषायद्विष्णुः५ पचतं सहीयान्विध्यद्वराहं तिरो अद्रिमस्ता ॥७॥
अस्मा इदु ग्नाश्चिद् देवपत्नीरिन्द्रायार्कमहिहत्य ऊवुः ।
परि द्यावापृथिवी जभ्र उर्वी नास्य ते महिमानं परि ष्टः ॥८॥
अस्येदेव प्र रिरिचे महित्वं दिवस्पृथिव्याः पर्यन्तरिक्षात् ।
स्वराळिन्द्रो दम आ विश्वगूर्तः स्वरिरमत्रो ववक्षे रणाय ॥९॥
अस्येदेव शवसा शुषन्तं वि वृश्चद्वज्रेण वृत्रमिन्द्रः ।
गा न व्राणा अवनीरमुंचदभि श्रवो दावने सचेताः ॥१०॥
अस्येदु त्वेषसा रन्त सिन्धवः परि यद्वज्रेण सीमयच्छत् ।
ईशानकृद्दाशुषे दशस्यन्तुर्वीतये गाधं तुर्वणिः कः ॥११॥
अस्मा इदु प्र भरा तूतुजानो वृत्राय वज्रमीशानः कियेधाः ।
गोर्न पर्व वि रदा तिरश्चेष्यन्नर्णांस्यपां चरध्यै ॥१२॥
अस्येदु प्र ब्रूहि पूर्व्याणि तुरस्य कर्माणि नव्य उक्थैः ।
युधे यदिष्णान आयुधान्यृघयमाणो निरिणाति शत्रून् ॥१३॥
अस्येदु भिया गिरयश्च दृळहा द्यावा च भूमा जनुषस्तुजेते ।
उपो वेनस्य जोगुवान ओणिं सद्यो भुवद्वीर्याय नोधाः ॥१४॥
अस्मा इदु त्यदनु दाय्येषामेको यद्वव्ने भूरेरीशानः ।
प्रैतशं सूर्ये पस्पृधानं सौवश्व्ये सुष्विमावदिन्द्रः ॥१५॥
एवा ते हारियोजना सुवृक्तीन्द्र ब्रह्माणि गोतमासो अक्रन् ।
ऐषु विश्वपेशसं धियं धाः प्रातर्मक्षू धियावसुर्जगम्यात् ॥१६॥

*asmā idu pra tavase turāya prayo na harmi stomaṁ mahināya* /
*ṛchīṣamāyādhrigava Ohamindrāya brahmāṇi rātatamā* //1 //
*asmā idu praya iva pra yaṁsi bharāmyāṁgūṣaṁ bādhe suvṛkti* /
*indrāya hṛdā manasā manīṣā pratnāya patye dhiyo marjayanta* //2 //
*asmā idu tyamupamaṁ svarṣā bharāmyāṁgūṣamāsyena* /
*maṁhiṣṭhamachchhoktibhirmatīnāṁ suvṛktibhiḥ sūriṁ vāvṛdhadhyai* //3 //
*asmā idu stomaṁ saṁ hinomi rathaṁ na taṣṭeva tatsināya* /
*giraścha girvāhase suvṛktīndrāya viśvaminvaṁ medhirāya* //4 //
*asmā idu saptimiva śravasyendrāyārka juhnā3 samaṁje* /
*vīraṁ dānaukasaṁ vandadhyai purāṁ gūrtaśravasaṁ darmāṇam* //5 //
*asmā idu tvaṣṭā takṣadvajraṁ svapastamaṁ svarya1raṇāya* /
*vṛtrasya chidvidadyena marma tujannīśānastujatā kiyedhāḥ* //6 //

*asyedu mātuḥ savaneṣu sadyo mahaḥ pituṁ papivāṁchārvannā /*
*muṣāyadviṣṇu5 pachataṁ sahīyānvidhyadvarāhaṁ tiro adrimastā //7 //*
*asmā idu gnāśchid devapatnīrindrāyārkamahihatya ūvuḥ /*
*pari dyāvāpṛthivī jabhra urvī nāsya te mahimānaṁ pari ṣṭaḥ //8 //*
*asyedeva pra ririche mahitvaṁ divaspṛthivyāḥ paryanrikṣāt /*
*svarāḷindro dama ā viśvagūrtaḥ svariramatro vavakṣe raṇāya //9 //*
*asyedeva śavasā śuṣantaṁ vi vṛśchadvajreṇa vṛtramindraḥ /*
*gā na vrāṇā avanīramuṁchadabhi śravo dāvane sachetāḥ //10 //*
*asyedu tveṣasā ranta sindhavaḥ pari yadvajreṇa sīmayachchhat /*
*īśānakṛddāśuṣe daśasyanturvītaye gādhaṁ turvaṇiḥ kaḥ //11 //*
*asmā idu pra bharā tṛtujāno vṛtrāya vajramīśānaḥ kiyedhāḥ /*
*gorna parva vi radā tiraścheṣyannarṇāsyapāṁ charadhyai //12 //*
*asyedu pra brūhi pūrvyāṇi turasya karmāṇi navya ukthaiḥ /*
*yudhe yadiṣṇāna āyudhānyṛghayamāṇo niriṇāti śatrūn //13 //*
*asyedu bhiyā girayaścha dṛḷhā dyāvā cha bhūmā januṣastujete /*
*upo venasya joguvāna Oṇiṁ sadyo bhuvadvīryāya nodhāḥ //14 //*
*asmā idu tyadanu dāyyeṣāmeko yadvavne bhūrerīśānaḥ /*
*praitaśaṁ sūrye paspṛdhānaṁ sauvaśvye suṣvimāvadindraḥ //15 //*
*evā te hāriyojanā suvṛktīndra brahmāṇi gotamāso akran /*
*aiṣu viśvapeśasaṁ dhiyaṁ dhāḥ prātarmakṣū dhiyāvasurjagamyāt //16 //*

ऋ. (Rv.) १.६२.१-१३

प्र मन्महे शवसानाय शूषमांगूषं गिर्वणसे अंगिरस्वत् ।
सुवृक्तिभिः स्तुवत ऋग्मियायार्चामार्क नरे विश्रुताय ॥१॥
प्र वो महे महि नमो भरध्वमांगूष्यं शवसानाय साम ।
येना नः पूर्वे पितरः पदज्ञा अर्चन्तो अंगिरसो गा अविन्दन् ॥२॥
इन्द्रस्यांगिरसां चेष्टौ विदत्सरमा तनयाय धासिम् ।
बृहस्पतिर्भिनदद्रिं विदद्गाः समुस्रियाभिर्वावशन्त नरः ॥३॥
स सुष्टुभा स स्तुभा सप्त विप्रैः स्वरेणाद्रिं स्वर्यो३ नवग्वैः ।
सरण्युभिः फलिगमिन्द्र शक्र वलं रवेण दरयो दशग्वैः ॥४॥
गृणानो अंगिरोभिर्दस्म वि वरुषसा सूर्येण गोभिरन्धः ।
वि भूम्या अप्रथय इन्द्र सानु दिवो रज उपरमस्तभायः ॥५॥
तदु प्रयक्षतममस्य कर्म दस्मस्य चारुतममस्ति दंसः ।
उपह्वरे यदुपरा अपिन्वन्मध्वर्णसो नद्य१श्चतस्रः ॥६॥
द्विता वि वव्रे सनजा सनीळे अयास्यः स्तवमानेभिरर्कैः ।
भगो न मेने परमे व्योमन्नधरयद्रोदसी सुदंसाः ॥७॥
सनाद्दिवं परि भूमा विरूपे पुनर्भुवा युवती स्वेभिरेवैः ।
कृष्णेभिरक्तोषा रुशद्भिर्वपुर्भिरा चरतो अन्यान्या ॥८॥
सनेमि सख्यं स्वपस्यमानः सूनुर्दाधार शवसा सुदंसाः ।
आमासु चिद्दधिषे पक्वमन्तः पयः कृष्णासु रुशद्रोहिणीषु ॥९॥
सनात्सनीळा अवनीरवाता व्रता रक्षन्ते अमृताः सहोभिः ।
पुरू सहस्रा जनयो न पत्नीर्दुवस्यन्ति स्वसारो अह्रयाणम् ॥१०॥
सनायुवो नमसा नव्यो अर्कैर्वसूयवो मतयो दस्म दद्रुः ।
पतिं न पत्नीरुशतीरुशन्तं स्पृशन्ति त्वा शवसावन्मनीषाः ॥११॥
सनादेव तव रायो गभस्तौ न क्षीयन्ते नोप दस्यन्ति दस्म ।
द्युमाँ असि क्रतुमाँ इन्द्र धीरः शिक्षा शचीवस्तव नः शचीभिः ॥१२॥
सनायते गोतम इन्द्र नव्यमतक्षद् ब्रह्म हरियोजनाय ।
सुनीथाय नः शवसान नोधाः प्रातर्मक्षू धियावसुर्जगम्यात् ॥१३॥

*pra manmahe śavasānāya śūṣamāṁgūṣaṁ girvaṇase aṁgirasvat /*

*suvṛktibhiḥ stuvata ṛgmiyāyārchāmārka nare viśrutāya ॥1॥*
*pra vo mahe mahi namo bharadhvamāṁgūṣyaṁ śavasānāya sāma ।*
*yenā naḥ pūrve pitaraḥ padāā archanto aṁgiraso gā avindan ॥2॥*
*indrasyāṁgirasāṁ cheṣṭau vidatsaramā tanayāya dhāsim ।*
*bṛhaspatirbhinadadriṁ vidadgāḥ samusriyābhirvāvaśanta naraḥ ॥3॥*
*sa suṣṭubhā sa stubhā sapta vipraiḥ svareṇādriṁ svaryo3 navagvaiḥ ।*
*saraṇyubhiḥ phaligamindra śakra valaṁ raveṇa darayo daśagvaiḥ ॥4॥*
*gṛṇāno aṁgirobhirdasma vi varuṣasā sūryeṇa gobhirandhaḥ ।*
*vi bhūmyā aprathaya indra sānu divo raja uparamastabhāyaḥ ॥5॥*
*tadu prayakṣatamamasya karma dasmasya chārutamamasti daṁsaḥ ।*
*upahnare yadupară apinvanmadhvarṇaso nadya1śchatasraḥ ॥6॥*
*dvitā vi vavre sanajā sanīḻe ayāsyaḥ stavamānebhirarkaiḥ ।*
*bhago na mene parame vyomannadharayadrodasī sudaṁsāḥ ॥7॥*
*sanāddivaṁ pari bhūmā virūpe punarbhuvā yuvatī svebhirevaiḥ ।*
*kṛṣṇebhiraktoṣā ruśadbhirvapurbhirā charato anyānyā ॥8॥*
*sanemi sakhyaṁ svapasyamānaḥ sūnurdādhāra śavasā sudaṁsāḥ ।*
*āmāsu chiddadhiṣe pakvamantaḥ payaḥ kṛṣṇāsu ruśadrohiṇīṣu ॥9॥*
*sanātsanīḻā avanīravātā vratā rakṣante amṛtāḥ sahobhiḥ ।*
*purū sahasrā janayo na patnīrduvasyanti svasāro ahrayāṇam ॥10॥*
*sanāyuvo namasā navyo arkairvasūyavo matayo dasma dadruḥ ।*
*patiṁ na patnīruśatīruśantaṁ spṛśanti tvā śavasāvanmanīṣāḥ ॥11॥*
*sanādeva tava rāyo gabhastau na kṣīyante nopa dasyanti dasma ।*
*dyumāṁ̐ asi kratumāṁ̐ indra dhīraḥ śikṣā śachīvastava naḥ śachībhiḥ ॥12॥*
*sanāyate gotama indra navyamatakṣad brahma hariyojanāya ।*
*sunīthāya naḥ śavasāna nodhāḥ prātarmakṣū dhiyāvasurjagamyāt ॥13॥*

ऋ. (Rv.) १.६३.१-९

त्वं महाँ इन्द्र यो ह शुष्मैर्द्यावा जाानः पृथिवी अमे धाः ।
यद्ध ते विश्वा गिरयश्चिदभ्वा भिया दृळहासः किरणा नैजन् ॥१॥
आ यद्धरी इन्द्र विव्रता वेरा ते वज्रं जरिता बाह्वोर्धात् ।
येनाविहर्यतक्रतो अमित्रान्पुर इष्णासि पुरुहूत पूर्वीः ॥२॥
त्वं सत्य इन्द्र धृष्णुरेतान्त्वमृभुक्षा नर्यस्त्वं षाट् ।
त्वं शुष्णं वृजने पृक्ष आणौ यूने कुत्साय द्युमते सचाहन् ॥३॥
त्वं ह त्यदिन्द्र चोदीः सखा वृत्रं यद्वज्रिन्वृषकर्मन्नुभ्नाः ।
यद्ध शूर वृषमणः पराचैर्वि दस्यूँर्योनावकृतो वृथाषाट् ॥४॥
त्वं ह त्यदिन्द्रारिषण्यन्दृळहस्य चिन्मर्तानामजुष्टौ ।
व्य१स्मदा काष्ठा अर्वते वर्घनेव वज्रिंछनथिह्यमित्रान् ॥५॥
त्वां ह त्यदिन्द्रार्णसातौ स्वर्मीळहे नर आजा हवन्ते ।
तव स्वसधाव इयमा समर्य ऊतिर्वाजेष्वतसाय्या भूत् ॥६॥
त्वं ह त्यदिन्द्र सप्त युध्यन्पुरो वज्रिन्पुरुकुत्साय दर्दः ।
बर्हिर्न घत्सुदासे वृथा वर्गहो राजन्वरिवः पूरवे कः ॥७॥
तवं त्यां न इन्द्र देव चित्रामिषमापो न पीपयः परिजन्म् ।
यया शूर प्रत्यस्मभ्यं यंसि त्मनमूर्ज न विश्वध क्षरध्यै ॥८॥
अकारि त इन्द्र गोतमेभिर्ब्रह्माण्योक्ता नमसा हरिभ्याम् ।
सुपेशसं वाजमा भरा नः प्रातर्मक्षू धियावसुर्जगम्यात् ॥९॥

*tvaṁ mahāṁ̐ indra yo ha śuṣmairdyāvā jāānaḥ pṛthivī ame dhāḥ ।*
*yaddha te viśvā girayaśchidabhvā bhiyā dṛḻahāsaḥ kiraṇā naijan ॥1॥*
*ā yaddharī indra vivratā verā te vajraṁ jaritā bāhnordhāt ।*
*yenāviharyatakrato amitrānpura iṣṇāsi puruhūta pūrvīḥ ॥2॥*

*tvaṁ satya indra dhṛṣṇuretāntvamṛbhukṣā naryastvaṁ ṣāṭ* ।
*tvaṁ śuṣṇaṁ vṛjane pṛkṣa āṇau yūne kutsāya dyumate sachāhan* ॥3॥
*tvaṁ ha tyadindra chodīḥ sakhā vṛtraṁ yadvajrinvṛṣakarmannubhnāḥ* ।
*yaddha śūra vṛṣamaṇaḥ parāchairvi dasyūm̐ryonāvakṛto vṛthāṣāṭ* ॥4॥
*tvaṁ ha tyadindrāriṣaṇyandṛḷahasya chinmartānāmajuṣṭau* ।
*vya1smadā kāṣṭhā arvate varghaneva vajriṁchhnathihyamitrān* ॥5॥
*tvāṁ ha tyadindrārṇasātau svarmīḷahe nara ājā havante* ।
*tava svasadhāva iyamā samarya ūtirvājeṣvatasāyyā bhūt* ॥6॥
*tvaṁ ha tyadindra sapta yudhyanpuro vajrinpurukutsāya dardaḥ* ।
*barhirna ghatsudāse vṛthā vargaho rājanvarivaḥ pūrave kaḥ* ॥7॥
*tavaṁ tyāṁ na indra deva chitrāmiṣamāpo na pīpayaḥ parijanm* ।
*yayā śūra pratyasmabhyaṁ yaṁsi tmanamūrja na viśvadha kṣaradhyai* ॥8॥
*akāri ta indra gotamebhirbrahmāṇyoktā namasā haribhyām* ।
*supeśasaṁ vājamā bharā naḥ prātarmakṣū dhiyāvasurjagamyāt* ॥9॥

ऋ. (Rv.) १.६४.१-१५

वृष्णे शर्धाय सुमखाय वेधसे नोधः सुवृक्तिं प्र भरा मरुद्भ्यः ।
अपो न धीरो मनसा सुहस्त्यो गिरः समंजे विदथेष्वाभुवः ॥१॥
ते जिरे दिव ऋष्वास उक्षणो रुद्रस्य मर्या असुरा अरेपसः ।
पावकासः शुचयः सूर्या इव सत्वानो न द्रप्सिनो घोरवर्पसः ॥२॥
युवानो रुद्रा अजरा अभोग्घनो ववक्षुरध्रिगावः पर्वता इव ।
दृळहा चिद्विश्वा भुवनानि पार्थिवा प्र च्यावयन्ति दिव्यानि मज्मना ॥३॥
चित्रैरिंजिभिर्वपुषे व्यंजते वक्षःसु रुक्माँ अधि येतिरे शुभे ।
अंसेष्वेषां नि मिमृक्षुरृष्टयः साकं जिरे स्वधया दिवो नरः ॥४॥
ईशानकृतो धुनयो रिशादसो वातान्विद्युतस्तविषीभिरक्रत ।
दुहन्त्यूधर्दिव्यानि धूतयो भूमिं पिन्वन्ति पयसा परिज्रयः ॥५॥
पिन्वन्त्यपो मरुतः सुदानवः पयो घृतवद्विदथेष्वाभुवः ।
अत्यं न मिहे वि नयन्ति वाजिनमुत्सं दुहन्ति स्तनयन्तमक्षितम् ॥६॥
महिषासो मायिनश्चित्रभानवो गिरयो न स्वतवसो रघुष्यदः ।
मृगा इव हस्तिनः खादथा वना यदारुणीषु तविषीरयुग्ध्वम् ॥७॥
सिंहा इव नानदति प्रचेतसः पिशा इव सुपिशो विश्ववेदसः ।
क्षपो जिन्वन्तः पृषतीभिऋष्टिभिः समित्सबाधः शवसाहिमन्यवः ॥८॥
रोदसी आ वदता गणश्रियो नृषाचः शूराः शबसाहिमन्यवः ।
आ वन्धुरेष्वमतिर्न दर्शता विद्युन्न तस्थो मरुतो रथेषु वः ॥९॥
विश्ववेदसो रयिभिः समोकसः संमिश्लासस्तविषीभिर्विरप्शिनः ।
अस्तार इशुं दधिरे गभस्त्योरनन्तशुष्मा वृषखादयो नरः ॥१०॥
हिरण्ययेभिः पविभिः पयोवृध उज्जिघ्नन्त आपथ्यो३ न पर्वतान् ।
मखा अयासः स्वसृतो ध्रुवच्युतो दुध्रकृतो मरुतो भ्राजदृष्टयः ॥११॥
घृषुं पावकं वनिनं विचर्षणिं रुद्रस्य सूनुं हवसा गृणीमसि ।
रजस्तुरं तवसं मारुतं गणमृजीषिणं वृषणं सश्चत श्रिये ॥१२॥
प्र नू स मर्तः शवसा जनाँ अति तस्थौ व ऊती मरुतो यमावत ।
अर्वद्भिर्वाजं भरते धना नृभिरापृच्छ्यं क्रतुमा क्षेति पुष्यति ॥१३॥
चर्कृत्यं मरुतः पृत्सु दुष्टरं द्युमन्तं शुष्मं मघवत्सु धत्तन ।
धनस्पृतमुक्थ्यं विश्वचर्षणिं तोकं पुष्येम तनयं शतं हिमाः ॥१४॥
नू ष्ठिरं मरुतो वीरवन्तमृतीषाहं रयिमस्मासु धत्त ।
सहस्रिणं शतिनं शूशुवांसं प्रातर्मक्षू धियावसुर्जगम्यात् ॥१५॥

*vṛṣṇe śardhāya sumakhāya vedhase nodhaḥ suvṛktri pra bharā marudbhyaḥ* ।
*apo na dhīro manasā suhastyo giraḥ samaṁje vidatheṣvābhuvaḥ* ॥1॥

*te jiāre diva ṛṣvāsa ukṣaṇo rudrasya maryā asurā arepasaḥ /*
*pāvakāsaḥ śuchayaḥ sūryā iva satvāno na drapsino ghoravarpasaḥ //2 //*
*yuvāno rudrā ajarā abhogghano vavakṣuradhrigāvaḥ parvatā iva /*
*dṛḷahā chidviśvā bhuvanāni pārthivā pra chyāvayanti divyāni majmanā //3 //*
*chitrairiṁjabhirvapuṣe vyaṁjate vakṣaḥsu rukmām̐ adhi yetire śubhe /*
*aṁseṣveṣāṁ ni mimṛkṣurṛṣṭayaḥ sākaṁ jiāre svadhayā divo naraḥ //4 //*
*īśānakṛto dhunayo riśādaso vātānvidyutastaviṣībhirakrata /*
*duhantyūdhardivyāni dhūtayo bhūmiṁ pinvanti payasā parijrayaḥ //5 //*
*pinvantyapo marutaḥ sudānavaḥ payo ghṛtavadvidatheṣvābhuvaḥ /*
*atyaṁ na mihe vi nayanti vājinamutsaṁ duhanti stanayantamakṣitam //6 //*
*mahiṣāso māyinaśchitrabhānavo girayo na svatavaso raghuṣyadaḥ /*
*mṛgā iva hastinaḥ khādathā vanā yadāruṇīṣu taviṣīrayugdhvam //7 //*
*siṁhā iva nānadati prachetasaḥ piśā iva supiśo viśvavedasaḥ /*
*kṣapeā jinvantaḥ pṛṣatībhirṛṣṭibhiḥ samitsabādhaḥ śavasāhimanyavaḥ //8 //*
*rodasī ā vadatā gaṇaśriyo nṛṣāchaḥ śūrāḥ śabasāhimanyavaḥ /*
*ā vandhureṣvamatirna darśatā vidyunna tastho maruto ratheṣu vaḥ //9 //*
*viśvavedaso rayibhiḥ samokasaḥ saṁmiślāsastaviṣībhirvirapśinaḥ /*
*astāra iśuṁ dadhire gabhastyoranantaśuṣmā vṛṣakhādayo naraḥ //10 //*
*hiraṇyayebhiḥ pavibhiḥ payovṛdha ujjighnanta āpathyo3 na parvatān /*
*makhā ayāsaḥ svasṛto dhruvachyuto dudhrakṛto maruto bhrājadṛṣṭayaḥ //11 //*
*ghṛṣuṁ pāvakaṁ vaninaṁ vicharṣaṇiṁ rudrasya sūnuṁ havasā gṛṇīmasi /*
*rajasturaṁ tavasaṁ mārutaṁ gaṇamṛjīṣiṇaṁ vṛṣaṇaṁ saśchata śriye //12 //*
*pra nū sa martaḥ śavasā janām̐ ati tasthau va ūtī maruto yamāvata /*
*arvadbhirvājaṁ bharate dhanā nṛbhirāpṛchchhyaṁ kratumā kṣeti puṣyati //13 //*
*charkṛtyaṁ marutaḥ pṛtsu duṣṭaraṁ dyumantaṁ śuṣmaṁ maghavatsu dhattana /*
*dhanaspṛtamukthyaṁ viśvacharṣaṇiṁ tokaṁ puṣyema tanayaṁ śataṁ himāḥ //14 //*
*nū ṣṭhiraṁ maruto vīravantamṛtīṣāhaṁ rayimasmāsu dhatta /*
*sahasriṇaṁ śatinaṁ śūśuvāṁsaṁ prātarmarkṣū dhiyāvasurjagamyāt //15 //*

सा. (Sv.) २३६

तं वो दस्ममृतीषहं वसोर्मन्दानमन्धसः । अभि वत्सं न स्वसरेषु धेनव इन्द्रं गीर्भिर्नवामहे ॥४॥
*taṁ vo dasmamṛtīṣahaṁ vasormandānamandhasaḥ / abhi vatsaṁ na svasareṣu dhenava indraṁ gīrbhirnavāmahe //4 //*

सा. (Sv.) २९६

न त्वा बृहन्तो अद्रयो वरन्त इन्द्र वीडवः ।
यच्छिक्षसि स्तुवते मावते वसु न किष्टदा मिनाति ते ॥४॥
*na tvā bṛhanto adrayo varanta indra vīḍavaḥ /*
*yachchhikṣasi stuvate māvate vasu na kiṣṭadā mināti te //4 //*

सा. (Sv.) ३१२

प्र यो रिरिक्ष ओजसा दिवः सदोभ्यस्परि ।
न त्वा विव्याच रज इन्द्र पार्थिवमति विश्वं ववक्षिथ ॥१०॥
*pra yo ririkṣa Ojasā divaḥ sadobhyaspari /*
*na tvā vivyācha raja indra pārthivamati viśvaṁ vavakṣitha //10 //*

सा. (Sv.) ६८५-८६

त वो दस्ममृतीषहं वसोर्मन्दानमन्धसः ।
अभि वत्सं न स्वसरेषु धेनव इन्द्रं गीर्भिर्नवामहे ॥१॥
द्युक्षं सुदानुं तविषीभिरावृतं गिरिं न पुरुभोजसम् ।
क्षुमन्तं वाजं शतिं शतिनं सहस्रिणं मक्षू गोमनतमीमहे ॥२॥
*ta vo dasmamṛtīṣahaṁ vasormandānamandhasaḥ /*

*abhi vatsaṁ na svasareṣu dhenava indraṁ gīrbhirnavāmahe ॥1॥*
*dyukṣaṁ sudānuṁ taviṣībhirāvṛtaṁ giriṁ na purubhojasam ।*
*kṣumantaṁ vājaṁ śatiṁ śatinaṁ sahasriṇaṁ makṣū gomanatamīmahe ॥2॥*

य. (Yv.)३४.१६-१७

प्र मन्महे शवसानाय शूषमांगूषं गिर्वणसेऽअंगिरस्वत्।
सुवृक्तिभिः स्तुवतऽऋग्मियायार्चामार्क नरे विश्रुताय ॥१६॥
प्र वो महे महि नमो भरध्वमाङ्गूष्यंशवसानाय साम ।
येना नः पूर्वे पितरः पदााऽअर्चन्तोऽअंगिरसो गाऽअविन्दन् ॥१७॥

*pra manmahe śavasānāya śūṣamāṁgūṣaṁ girvaṇase'aṁgirasvat ।*
*suvṛktibhiḥ stuvata'ṛgmiyāyārchāmārka nare viśrutāya ॥16॥*
*pra vo mahe mahi namo bharadhvamāṅgūṣyaṁśavasānāya sāma ।*
*yenā naḥ pūrve pitaraḥ padāā'archanto'aṁgiraso gā'avindan ॥17॥*

४. पवमानः सोमः (Pavamānaḥ Somaḥ) - सा. (Sv.) १४१८-१४२०

साकमुक्षो मर्जयन्त स्वसारो दश धीरस्य धीतयो धनुत्रीः ।
हरिः पर्यद्रवज्जाः सूर्यस्य द्रोणं ननक्षे अत्यो न वाजी ॥१॥
सं मातृभिर्न शिशुर्वावशानो वृषा दधन्वे पुरुवारो अद्भिः ।
मर्यो न योषामभिः निष्कृतंक यन्त्सं गच्छते कलश उस्रियाभिः ॥२॥
उत प्र पिप्य ऊधरघ्याया इन्दुर्धाराभिः सचते सुमेधाः ।
मूर्धानं गावः पयसा चमूष्वभि श्रीणन्ति वसुभिर्न निक्तैः ॥३॥

*sākamukṣo marjayanta svasāro daśa dhīrasya dhītayo dhanutrīḥ ।*
*hariḥ paryadravajjāḥ sūryasya droṇaṁ nanakṣe atyo na vājī ॥1॥*
*saṁ mātṛbhirna śiśurvāvaśāno vṛṣā dadhanve puruvāro adbhiḥ ।*
*maryo na yoṣāmabhiḥ niṣkṛtaṁka yantsaṁ gachchhate kalaśa usriyābhiḥ ॥2॥*
*uta pra pipya ūdharaghnyāyā indurdhārābhiḥ sachate sumedhāḥ ।*
*mūrdhānaṁ gāvaḥ payasā chamūṣvabhi śrīṇanti vasubhirna niktaiḥ ॥3॥*

**३३२. नोधा गौतमः (साग्री. सास्वा. ऋसर्व.); नृमेधा काक्षीवतः (सार्षेदी.) (Nodhā Gautamaḥ [Ssb. Sas. Rss.]; Nṛmedhā Kākṣīvataḥ [Sad.])**

१. पवमानः सोमः (Pavamānaḥ Somaḥ) - सा. (Sv.) ५३८

साकमुक्षो मर्जयन्त स्वसारो दश धीरस्य धीतयो धनुत्रीः ।
हरिः पर्यद्रवज्जाः सूर्यस्य द्रोणं ननक्षे अत्यो न वाजी ॥६॥

*sākamukṣo marjayanta svasāro daśa dhīrasya dhītayo dhanutrīḥ ।*
*hariḥ paryadravajjāḥ sūryasya droṇaṁ nanakṣe atyo na vājī ॥6॥*

**३३३. प्रणयः असुराः (Praṇayaḥ Asurāḥ)**

१. सरमा (Saramā) - ऋ. (Rv.)१०.१०८.१; ३; ५; ७; ९

ऋ. (Rv.)१०.१०८.१

किमिच्छन्ती सरमा प्रेदमानड् दूरे ह्यध्वा जगुरिः पराचैः ।
कास्मेहितिः का परितक्म्यासीत्कथं रसाया अतरः पयांसि ॥१॥

*kimichchhantī saramā predamānaḍ dūre hyadhvā jaguriḥ parāchaiḥ ।*
*kāsmehitiḥ kā paritakmyāsītkathaṁ rasāyā ataraḥ payāṁsi ॥1॥*

ऋ. (Rv.)१०.१०८.३

कीदृङ्ङिन्द्रः सरमे का दृशीका यस्येदं दूतीरसरः पराकात् ।
आ च गच्छान्मित्रमेना दधामाथा गवां गोपतिर्नो भवाति ॥३॥

*kīdṛṅḍindraḥ sarame kā dṛśīkā yasyedaṁ dūtīrasaraḥ parākāt ।*
*ā cha gachchhānmitramenā dadhāmāthā gavāṁ gopatirno bhavāti ॥3॥*

ऋ. (Rv.)१०.१०८.५

इमा गावः सरमे या ऐच्छः परि दिवो अन्तान्सुभगे पतन्ती ।

कस्त एना अव सृजादयुध्व्युतास्माकमायुधा सन्ति तिग्मा ॥५॥

*imā gāvaḥ sarame yā aichchhaḥ pari divo antānsubhage patantī /*

*kasta enā ava sṛjādayudhvyutāsmākamāyudhā santi tigmā //5 //*

ऋ. (Rv.)१०.१०८.७

अयं निधिः सरमे अद्रिबुध्नो गोभिरश्वेभिर्वसुभिर्न्यृष्टः ।

रक्षिन्ति तं पणयो ये सुगोपा रेकु पदमलकमा जगन्थ ॥७॥

*ayaṁ nidhiḥ sarame adribudhno gobhiraśvebhirvasubhirnyṛṣṭaḥ /*

*rakṣinti taṁ paṇayo ye sugopā reku padamalakamā jagantha //7 //*

ऋ. (Rv.)१०.१०८.९

एवा च त्वं सरम आजगन्थ प्रबाधिता सहसा दैव्येन ॥

स्वसारं त्वा कृणवै मा पुनर्गा अप ते गवां सुभगे भजाम ॥९॥

*evā cha tvaṁ sarama ājagantha prabādhitā sahasā daivyena //*

*svasāraṁ tvā kṛṇavai mā punargā apa te gavāṁ subhage bhajāma //9 //*

## ३३४. पतंगः प्राजापत्यः (Pataṁgaḥ Prājāpatyaḥ)

१. मायाभेदः (Māyābhedaḥ) - ऋ. (Rv.)१०.१७७.१-३

पतंगमक्तमसुरस्य मायया हृदा पश्यन्ति मनसा विपश्चितः ।

समुद्रे अन्तः कवयो वि चक्षते मरीचीनां पदमिच्छन्ति वेधसः ॥१॥

पतंगो वाचं मनसा बिभर्ति तां गन्धर्वोऽवदद् गर्भे अन्तः ।

तां द्योतमानां स्वर्यं मनीषामृतस्य पदे कवयो नि पान्ति ॥२॥

अपश्यं गोपामनिपद्यमानसा च परा च पथिभिश्चरन्तम् ।

स सध्रीचीः स विषूचीर्वसान आ वरीवर्ति भुवनेष्वन्तः ॥३॥

*pataṁgamaktamasurasya māyayā hṛdā paśyanti manasā vipaśchitaḥ /*

*samudre antaḥ kavayo vi chakṣate marīchīnāṁ padamichchhanti vedhasaḥ //1 //*

*pataṁgo vāchaṁ manasā bibharti tāṁ gandharvo'vadad garbhe antaḥ /*

*tāṁ dyotamānāṁ svarya manīṣāmṛtasya pade kavayo ni pānti //2 //*

*apaśyaṁ gopāmanipadyamānasā cha parā cha pathibhiścharantam /*

*sa sadhrīchīḥ sa viṣūchīrvasāna ā varīvarti bhuvaneṣvantaḥ //3 //*

## ३३५. प्रतिवेदनः (Prativedanaḥ)

१. अग्निः (Agniḥ) - अ. (Av.) २.३६.१

आ नो अग्ने सुमतिं संभलो गमेदिमां कुमारीं सह नो भगेन ।

जुष्टा वरेषु समनेषु वल्गुरोषं पत्या सौभगमस्त्वस्यै ॥१॥

*ā no agne sumatiṁ saṁbhalo gamedimāṁ kumārīṁ saha no bhagena /*

*juṣṭā vareṣu samaneṣu valguroṣaṁ patyā saubhagamastvasyai //1 //*

२. अग्नीषोमौ (Agnīṣomau) - अ. (Av.) २.३६.३

इयमग्ने नारी पतिं विदेष्ट सोमो हि राजा सुभगां कृणोति ।

सुवाना पुत्रान् महिषी भवाति गत्वा पतिं सुभगा वि राजतु ॥३॥

*iyamagne nārī patiṁ videṣṭa somo hi rājā subhagāṁ kṛṇoti /*

*suvānā putrān mahiṣī bhavāti gatvā patiṁ subhagā vi rājatu //3 //*

३. ओषधिः (Oṣadhiḥ) - अ. (Av.) २.३६.८

आ ते नयतु सविता नयतु पतिर्यः प्रतिकाम्यः । त्वमस्यै धेह्योषधे ॥८॥

*ā te nayatu savitā nayatu patiryaḥ pratikāmyaḥ / tvamasyai dhehyoṣadhe //8 //*

४. इन्द्रः (Indraḥ) - अ. (Av.) २.३६.४

यथाखरो मघवंश्चारुरेष प्रियो मृगाणां सुषदा बभूव ।

एवा भगस्य जुष्टेयमस्तु नारी सम्प्रिया पत्याविराधयन्ती ॥४॥

*yathākharo maghavaṁśchārureṣa priyo mṛgāṇāṁ suṣadā babhūva /*

*evā bhagasya juṣṭeyamastu nārī sampriyā patyāvirādhayantī //4 //*

५. धनपतिः (Dhanapatiḥ) - अ. (Av.) २.३६.६

आ क्रन्दय धनपते वरमामनसं कृणु। सर्व प्रदक्षिणं कृणु यो वरः प्रतिकाम्यः ॥६॥

*ā krandaya dhanapate varamāmanasaṁ kṛṇu / sarva pradakṣiṇaṁ kṛṇu yo varaḥ pratikāmyaḥ //6 //*

६. सूर्यः (Sūryaḥ) - अ. (Av.) २.३६.५

भगस्य नावमा रोह पूर्णामनुपदस्वतीम्। तयोपप्रतारय यो वरः प्रतिकाम्यः ॥५॥

*bhagasya nāvamā roha pūrṇāmanupadasvatīm / tayopapratāraya yeā varaḥ pratikāmyaḥ //5 //*

७. सोमः, अर्यमा, धाता (Somaḥ, Aryamā, Dhātā) - अ. (Av.) २.३६.२

सोमजुष्टं ब्रह्मजुष्टमर्यम्णा संभृतं भगम्। धातुर्देवस्य सत्येन कृणोमि पतिवेदनम् ॥२॥

*somajuṣṭaṁ brahmajuṣṭamaryamṇā saṁbhṛtaṁ bhagam / dhāturdevasya satyena kṛṇomi pativedanam //2 //*

८. हिरण्यम् भगः (Hiraṇyam Bhagaḥ) - अ. (Av.) २.३६.७.

इदं हिरण्यं गुल्गुल्वयमौक्षो अथो भगः। एते पतिभ्यस्त्वामदुः प्रतिकामाय वेत्तवे ॥७॥

*idaṁ hiraṇyaṁ gulgulvayamaukṣo atho bhagaḥ / ete patibhyastvāmaduḥ pratikāmāya vettave //7 //*

## ३३६. परमेष्ठी (Parameṣṭhī)

१. अग्निः (Agniḥ) - य. (Yv.)१५.१-२; २०-५६; १७.७७

य. (Yv.)१५.१-२

अग्ने जातान् प्रणुदा नः सपत्नान् प्रत्यजातान्नुद जातवेदः ।
अधि नो ब्रूहि सुमनाऽअहेडँस्तव स्याम शँर्मस्त्रिवरूथऽउद्भौ ॥१॥
सहसा जातान् प्रणुदा नः सपत्नान् प्रत्यजातान् जातवेदो नुदस्व ।
अधि नो ब्रूहि सुमनस्यमानो वयंस्याम प्रणुदा नः सपत्नान् ॥२॥

*agne jātān praṇudā naḥ sapatnān pratyajātānnuda jātavedaḥ /*
*adhi no brūhi sumanā'aheḍaṁstava syāma śaṁrmastrivarūtha'udbhau //1 //*
*sahasā jātān praṇudā naḥ sapatnān pratyajātān jātavedo nudasva /*
*adhi no brūhi sumanasyamāno vayaṁsyāma praṇudā naḥ sapatnān //2 //*

य. (Yv.)१५.२०-५६

अग्निर्मूर्द्धा दिवः ककुत्पतिः पृथिव्याःऽअयम्। अपारेतां सि जिन्वति ॥२०॥
अयमग्निः सहस्रिणो वाजस्य शतिनस्पतिः। मूर्धा कवी रयीणाम् ॥२१॥
त्वामग्ने पुष्करादध्यथर्वा निरमन्थत। मूर्ध्नो विश्वस्य वाघतः ॥२२॥
भुवो यास्य रजसश्च नेता यत्रा नियुद्भि सचसे शिवाभिः ।
दिवि मूर्धानं दधिषे स्वर्षा जिह्वामग्ने चकृषे हव्यवाहम् ॥२३॥
अबोध्यग्निः समिधा जनानां प्रति धेनुमि वायतीमुषासम् ।
यह्वा इव प्र वयामुज्जिहानाः प्र भानवः सिस्रते नाकमच्छ ॥२४॥
अवोचाम कवये मेध्याय वचो वन्दारु वृषभाय वृष्णे ।
गविष्ठिरो नमसा स्तोममग्नौ दिवीव रुक्ममुरुव्यंचमश्रेत् ॥२५॥
अयमिह प्रथमो धायि धातृभिर्होता यजिष्ठोऽअध्वरेष्वीड्यः ।
यमप्नवानो भृगवो विरुरुचुर्वनेषु चित्रं विभ्वं विशेविशे ॥२६॥
जनस्य गोपा ऽ अजनिष्ट जागृविरग्निः सुदक्षः सुविताय नव्यसे ।
घृतप्रतीको बृहता दिविस्पृशा द्युमद्विभाति भरतेभ्यः शुचिः ॥२७॥
त्वामग्ने ऽ अंगिरसो गुहा हितमन्वविन्दिंछश्रियाणं वनेवने ।
स जायसे मथयमानः सहो महत् त्वामाहुः सहसस्पुत्रमंगिरः ॥२८॥
सखायः सं वः सम्यंचमिषंस्तोमं चाग्नये। वर्षिष्ठाय क्षितीनामूर्जो नप्त्रे सहस्वते ॥२९॥

सं समिद्युवसे वृषन्नग्ने विश्वान्यर्य्य ऽ आ। इडस्पदे समिध्यसे स नो वसून्याभर ॥३०॥
त्वां चित्रश्रवस्तम हवन्ते विक्षु जन्तवः। शेचिष्केशं पुरुप्रियाग्ने हव्याय वोढवे ॥३१॥
एना वो ऽ अग्निं नमसोर्जो नपातमाहुवे।
प्रियं चेतिष्ठमरतिं स्वध्वरं विश्वस्य दूतममृतम् ॥३२॥
विश्वस्य दूतममृतं विश्वस्य दूतममृतम्।
स योजते ऽ अरुषा विश्वभौजसा स दुद्रवत् स्वाहुतः ॥३३॥
स दुद्रवत् स्वाहुतः स दुद्रवत् स्वाहुतः।
सुब्रह्मा याः सुशमी वसूनां देवंराधो जनानाम् ॥३४॥
अग्ने वाजस्य गोपत ऽ ईशानः सहसो यहो। अस्मे धेहि जातवेदो महि श्रवः ॥३५॥
स ऽ इधानो वसुष्कविरग्निरीडेन्यो गिरा। रेवदस्मभ्यं पुर्वणीक दीदिहि ॥३६॥
क्षपो राजन्नुत त्मनाग्ने वस्तोरुतोषसः। स तिग्मजम्भ रक्षसो दह प्रति ॥३७॥
भद्रो नो ऽ अग्निराहुतो भद्रा रातिः सुभग भद्रो ऽ अध्वरः। भद्रा ऽ उत प्रशस्तयः ॥३८॥
भद्रा ऽ उत प्रशस्तयो भद्रं मनः कृणुष्व वृत्रतूर्य्ये। येना समत्सु सासहः ॥३९॥
येना समत्सु सासहोऽव स्थिरा तनुहि भूरि शर्धताम्। वनेमा ते ऽ अभिष्टिभिः ॥४०॥
अग्निं तं मन्ये यो वसुरस्तं यं यन्ति धेनवः ।
अस्तमर्वन्त ऽ आशवोऽस्तं नित्यासो वाजिनऽइषंस्तोतृभ्य ऽ आ भर ॥४१॥
सोऽअग्निर्यो वसुर्गृणे सं यमायन्ति धेनवः ।
समर्वन्तो रघुद्रुवः संसुजातासः सूरयऽइषं स्तोतृभ्यऽआ भर ॥४२॥
उभे सुश्चन्द्र सर्पिषो दर्वी श्रीणीष ऽ आसनि ।
उतो न ऽ उत्पुपूर्या ऽ उक्थेषु शवसस्पत ऽ इषंस्तोतृभ्य ऽ आ भर ॥४३॥
अग्ने तमद्याश्वं न स्तोमैः क्रतुं न भद्रंहृदिस्पृशम्। ऋध्यामा त ऽ ओहैः ॥४४॥
अधा ह्यग्ने क्रतोर्भद्रस्य दक्षस्य साधोः। रथीऋर्तस्य बृहतो बभूथ ॥४५॥
एभिर्नो ऽ अर्कैर्भवा नो अर्वाङ् स्वर्ण ज्योतिः। अग्ने विश्वेभिः सुमना ऽ अनीकैः ॥४६॥
अग्निं होतारं मन्ये दास्वन्तं वसुंसुनुं सहसो जातवेदसं विप्रं न जातवेदसम्।
य ऽ ऊर्ध्वया स्वध्वरो देवो देवाच्या कृपा।
घृतस्य विभ्राष्टिमनु वष्टि शोचिषाऽऽजुह्वानस्य सर्पिषः ॥४७॥
अग्ने त्वं नो ऽ अन्तम ऽ उत त्राता शिवो भवा वरूथ्यः।
वसुरग्निर्वसुश्रवा ऽ अच्छा नक्षि द्युमत्तमं रयिन्दाः।
तं त्वा शेचिष्ठ दीदिवः सुम्नाय नूनमीमहे सखिभ्यः ॥४८॥
येन ऽ ऋषयस्तपसा सत्रमायन्निन्धाना ऽ अग्निंस्वराभरन्तः ।
तस्मिन्नहं निदधे नाके ऽ अग्निं यमाहुर्मनव स्तीर्णबर्हिषम् ॥४९॥
तं पत्नीभिरनु गच्छेम देवाः पुत्रैर्भ्रातृभिरुत वा हिरण्यैः ।
नाकं गृभ्णानाः सुकृतस्य लोके तृतीये पृष्ठे ऽ अधि रोचने दिवः ॥५०॥
आ वाचो मध्यमरुहद्भुरण्युरयमग्निः सत्पतिश्चेकितानः ।
पृष्ठे पृथिव्या निहितो दविद्युतदधस्पदं कृणुतां ये पृतन्यवः ॥५१॥
अयमग्निर्वीरतमो वयोधाः सहस्रियो द्योततामप्रयुच्छन् ।
विभ्राजमानः सरिरस्य मध्य ऽ उप प्र याहि दिव्यानि धाम ॥५२॥
सम्प्रच्यवध्वमुप संप्रयाताग्ने पथो देवयानान् कृणुध्वम् ।
पुनः कृण्वाना पितरा युवानान्वातां सीत् त्वयि तन्तुमेतम् ॥५३॥
उद् बुध्यस्वाग्ने प्रति जागृहि त्वमिष्टापूर्ते संसृजेथामयं च ।
अस्मिन् सधस्थे अध्युत्तरस्मिन् विश्वे देवा यजमानश्च सीदत ॥५४॥
येन वहसि सहस्रं येनाग्नि सवेवेदसम्। तेनेमं यां नो नय स्वर्देवेषु गन्तवे ॥५५॥
अयं ते योनिऋर्त्वियो यतो जातो ऽ अरोचथाः।
तं जानन्नग्न ऽ आ रोहाथा नो वर्धया रयिम्॥५६॥

*agnirmurddhā divaḥ kakṛtpatiḥ pṛthivyāḥ'ayam | apāṁretāṁ si jinvati ॥20॥*
*ayamagniḥ sahasriṇo vājasya śatinaspatiḥ | mūrdhā kavī rayīṇām ॥21॥*

*tvāmagne puṣkarādadhyatharvā niramanthata । mūrdhno viśvasya vāghataḥ ॥22॥*
*bhuvo yāsya rajasaścha netā yatrā niyudbhi sachase śivābhiḥ ।*
*divi mūrdhānaṁ dadhiṣe svarṣā jihnāmagne chakṛṣe havyavāham ॥23॥*
*abodhyagniḥ samidhā janānāṁ prati dhenumi vāyatīmuṣāsam ।*
*yahnā iva pra vayāmujjihānāḥ pra bhānavaḥ sisrate nākamachchha ॥24॥*
*avochāma kavaye medhyāya vacho vandāru vṛṣabhāya vṛṣṇe ।*
*gaviṣṭhiro namasā stomamagnau divīva rukmamuruvyaṁchamaśret ॥25॥*
*ayamiha prathamo dhāyi dhātṛbhirhotā yajiṣṭho'adhvareṣvīḍyaḥ ।*
*yamapnavāno bhṛgavo viruruchurvaneṣu chitraṁ vibhvaṁ viśeviśe ॥26॥*
*janasya gopā ' ajaniṣṭa jāgṛviragniḥ sudakṣaḥ suvitāya navyase ।*
*ghṛtapratīko bṛhatā divispṛśā dyumadvibhāti bharatebhyaḥ śuchiḥ ॥27॥*
*tvāmagne ' aṁgiraso guhā hitamanvavindiṁchhaśriyāṇaṁ vanevane ।*
*sa jāyase mathayamānaḥ saho mahat tvāmāhuḥ sahasasputramaṁgiraḥ ॥28॥*
*sakhāyaḥ saṁ vaḥ samyaṁchamiṣaṁstomaṁ chāgnaye ।*
*varṣiṣṭhāya kṣitīnāmūrjo naptre sahasvate ॥29॥*
*saṁ samidyuvase vūṣannagne viśvānyaryya ' ā ।*
*iḍaspade samidhyase sa no vasūnyābhara ॥30॥*
*tvāṁ chitraśravastama havante vikṣu jantavaḥ ।*
*śechiṣkeśaṁ purupriyāgne havyāya voḍhave ॥31॥*
*enā vo ' agniṁ namasorjo napātamāhuve ।*
*priyaṁ chetiṣṭhamaratiṁ svadhvaraṁ viśvasya dūtamamṛtam ॥32॥*
*viśvasya dūtamamṛtaṁ viśvasya dūtamamṛtam ।*
*sa yojate ' aruṣā viśvabhaujasā sa dudravat svāhutaḥ ॥33॥*
*sa dudravat svāhutaḥ sa dudravat svāhutaḥ ।*
*subahmā yāḥ suśamī vasūnāṁ devaṁrādho janānām ॥34॥*
*agne vājasya gopata ' īśānaḥ sahaso yaho । asme dhehi jātavedo mahi śravaḥ ॥35॥*
*sa ' idhāno vasuṣkaviragnirīḍenyo girā । revadasmabhyaṁ purvaṇīka dīdihi ॥36॥*
*kṣapo rājannuta tmanāgne vastorutoṣasaḥ । sa tigmajambha rakṣaso daha prati ॥37॥*
*bhadro no ' agnirāhuto bhadrā rātiḥ subhaga bhadro ' adhvaraḥ ।*
*bhadrā ' uta praśastayaḥ ॥38॥*
*bhadrā ' uta praśastayo bhadraṁ manaḥ kṛṇuṣva vṛtratūryye ।*
*yenā samatsu sāsahaḥ ॥39॥*
*yenā samatsu sāsaho'va sthirā tanuhi bhūri śardhatām । vanemā te ' abhiṣṭibhiḥ ॥40॥*
*agniṁ taṁ manye yo vasurastaṁ yaṁ yanti dhenavaḥ ।*
*astamarvanta ' āśavo'staṁ nityāso vājina'iṣaṁstotṛbhya ' ā bhara ॥41॥*
*so'agniryo vasurgṛṇe saṁ yamāyanti dhenavaḥ ।*
*samarvanto raghudruvaḥ saṁsujātāsaḥ sūraya'iṣaṁ stotṛbhya'ā bhara ॥42॥*
*ubhe suśchandra sarpiṣo darvī śrīṇīṣa ' āsani ।*
*uto na ' utpupūryā ' uktheṣu śavasaspata ' iṣaṁstotṛbhya ' ā bhara ॥43॥*
*agne tamadyāśvaṁ na stomaiḥ kratuṁ na bhadraṁhṛdispṛśam ।*
*ṛdhyāmā ta ' Ohaiḥ ॥44॥*
*adhā hyagne kratorbhadrasya dakṣasya sādhoḥ । rathīṛrtasya bṛhato babhūtha ॥45॥*
*ebhirno ' arkairbhavā no arvāṅ rsvṇa jyotiḥ । agne viśvebhiḥ sumanā ' anīkaiḥ ॥46॥*
*agniṁ hotāraṁ manye dāsvantaṁ vasuṁsunuṁ sahaso jātavedasaṁ vipraṁ na jātavedasam ।*
*ya ' ūrdhvayā svadhvaro devo devāchyā kṛpā ।*
*ghṛtasya vibhrāṣṭimanu vaṣṭi śochiṣā''juhnānasya sarpiṣaḥ ॥47॥*
*agne tvaṁ no ' antama ' uta trātā śivo bhavā varūthyaḥ ।*
*vasuragnirvasuśravā ' achchhā nakṣi dyumattamaṁ rayindāḥ ।*
*taṁ tvā śechiṣṭha dīdivaḥ sumnāya nūnamīmahe sarivabhyaḥ ॥48॥*

*yena ' ṛṣayastapasā satramāyannindhānā ' agniṁsvarābharantaḥ ।*
*tasminnahaṁ nidadhe nāke ' agniṁ yamāhurmanava stīrṇabarhiṣam ॥49 ॥*
*taṁ patnībhiranu gachchhema devāḥ putrairbhrātṛbhiruta vā hiraṇyaiḥ ।*
*nākaṁ gṛbhṇānāḥ sukṛtasya loke tṛtīye pṛṣṭhe ' adhi rochane divaḥ ॥50 ॥*
*ā vācho madhyamaruhadbhuraṇyurayamagniḥ satpatiśchekitānaḥ ।*
*pṛṣṭhe pṛthivyā nihito davidyutadadhaspadaṁ kṛṇutāṁ ye pṛtanyavaḥ ॥51 ॥*
*ayamagnirvīratamo vayodhāḥ sahasriyo dyotatāmaprayuchchhan ।*
*vibhrājamānaḥ sarirasya madhya ' upa pra yāhi divyāni dhāma ॥52 ॥*
*samprachyavadhvamupa saṁprayātāgne patho devayānān kṛṇudhvam ।*
*punaḥ kṛṇvānā pitarā yuvānānvātāṁ sīt tvayi tantumetam ॥53 ॥*
*ud budhyasvāgne prati jāgṛhi tvamiṣṭāpūrte saṁsṛjethāmayaṁ cha ।*
*asmin sadhasthe adhyuttarasmin viśve devā yajamānaścha sīdata ॥54 ॥*
*yena vahasi sahasraṁ yenāgni savevedasam ।*
*tenemaṁ yāṁ no naya svardeveṣu gantave ॥55 ॥*
*ayaṁ te yonirṛtviyo yato jāto ' arochathāḥ ।*
*taṁ jānannagna ' ā rohāthā no vardhayā rayim ॥56 ॥*

य. (Yv.)१७.७७

अग्ने तमद्याश्वन्न स्तोमैः क्रतुन्न भद्रंहृदिस्पृशम्। ऋध्यामा त ऽ ओहैः ॥७७ ॥
*agne tamadyāśvanna stomaiḥ kratunna bhadraṁhṛdispṛśam । ṛdhyāmā ta ' ohaiḥ ॥77 ॥*

२. आदित्यः (Ādityaḥ) - य. (Yv.)१५.१२

सम्राडसि प्रतीची दिगादित्यास्ते देवाऽअधिपतयो वरुणो हेतीनां प्रतिधर्त्ता सप्तदशस्त्वा स्तोमः पृथिव्यांश्रयतु मरुत्वतीयमुक्थमव्यथायै स्तभ्नातु वैरूपं साम
प्रतिष्ठित्याऽअन्तरिक्ष ऽ ऋषयस्त्वा प्रथमजा देवेषु दिवो माया वरिम्णा प्रथन्तु विधर्त्ता चायमधिपतिश्च ते त्वा सर्वे संविदाना नाकस्य पृष्ठे स्वर्गे लोके यजमानं च सादयन्तु ॥१२ ॥
*samrāḍasi pratīchī digādityāste devā'adhipatayo varuṇo hetīnāṁ pratidharttā saptadaśastvā stomaḥ pṛthivyāṁśrayatu marutvatīyamukthamavyathāyai stabhnātu vairūpaṁ sāma*
*pratiṣṭhityā'antarikṣa ' ṛṣayastvā prathamajā deveṣu divo māyā varimṇā prathantu vidharttā chāyamadhipatiścha te tvā sarve saṁvidānā nākasya pṛṣṭhe svarge loke yajamānaṁ cha sādayantu ॥12 ॥*

३. इन्द्राग्नी (Indrāgnī) - य. (Yv.)१५.५९

लोकं पृण छिद्रं पृणाथो सीद ध्रुवा त्वम्। इन्द्राग्नी त्वा बृहस्पतिरस्मिन् योनावसीषदन्॥५९ ॥
*lokaṁ pṛṇa chhidraṁ pṛṇātho sīda dhruvā tvam ।*
*indrāgnī tvā bṛhaspatirasmin yonāvasīṣadan ॥59 ॥*

४. ग्रीष्मर्तुः (Grīṣmartuḥ) - य. (Yv.)१५.१६

अयं दक्षिणा विश्वकर्मा तस्य रथस्वनश्च रथेचित्रश्च सेनानीग्रामण्यौ। मेनका च सहजन्या चाप्सरसौ यातुधाना हेति रक्षां सि प्रहेतिस्तेभ्यो नमो अस्तु ते नोऽवन्तु ते नो मृडयनतु ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां जम्भे दध्मः ॥१६ ॥
*ayaṁ dakṣiṇā viśvakarmā tasya rathasvanaścha rathechitraścha senānīgrāmaṇyau । menakā cha sahajanyā chāpsarasau yātudhānā heti rakṣāṁ si prahetistebhyo namo astu te no'vantu te no mṛḍayanatu te yaṁ dviṣmo yaścha no dveṣṭi tameṣāṁ jambhe dadhmaḥ ॥16 ॥*

५. दम्पतिः (Dampatiḥ) - य. (Yv.)१५.३

षोडशी स्तोम ओजो द्रविणं चतुश्चत्वारिं श स्तोमो वर्चो द्रविणम्। अग्नेः पुरीषमस्यप्सो नाम तां त्वा विश्वे अभि गृणन्तु देवाः। स्तोमपृष्ठा घृतवतीह सीद प्रजावदस्मे द्रविणा यजस्व ॥३ ॥
*ṣoḍaśī stoma ojo draviṇaṁ chatuśchatvāriṁ śa stomo varcho draviṇam । agneḥ*

*purīṣamasyapso nāma tāṁ tvā viśve abhi gṛṇantu devāḥ |*
*stomapṛṣṭhā ghṛtavatīha sīda prajāvadasme draviṇā yajasva ||3 ||*

६. प्रजापतिः (Prajāpatiḥ) - य. (Yv.)१५.८-९

प्रतिपदसि प्रतिपदे त्वा ऽनुपदस्यनुपदे त्वा सम्पदसि सम्पदे त्वा तेजोऽसि तेजसे त्वा ॥८॥
त्रिवृदसि त्रिवृते त्वा प्रवृदसि प्रवृते त्वा विवृदसि विवृते त्वा सवृदसि सवृते त्वा ऽऽक्रमोऽस्याक्रमाय त्वो संक्रमोऽसि स्रक्रमाय त्वोत्क्रमोऽस्युत्क्रमाय त्वोत्क्रान्तिरस्युत्क्रान्त्यै त्वा ऽधिपतिनोर्जोर्ज जिन्वे
*pratipadasi pratipade tvā 'nupadasyanupade tvā sampadasi sampade tvā tejo'si tejase tvā ||8 ||*
*trivṛdasi trivṛte tvā pravṛdasi pravṛte tvā vivṛdasi vivṛte tvā savṛdasi savṛte tvā ''kramo'syākramāya tvo saṁkramo'si srakramāya tvotkramo'syutkramāya tvotkrāntirasyutkrāntyai tvā 'dhipatinorjorja jinve ||9 ||*

७. मरुतः (Marutaḥ) - य. (Yv.)१५.१३

स्वराडस्युदीची दिङ्मरुतस्ते देवा अधिपतयः सोमो हेतीनां प्रतिधर्तैकविं शस्त्वा स्तोमः पृथिव्यांश्रयतु निष्केवल्यमुक्थमव्यथायै स्तभ्नातु वैराजंसाम प्रतिष्ठित्या अन्तरिक्ष ऋषयस्त्वा प्रथमजा देवेषु दिवो मात्रया वरिम्णा प्रथन्तु विधर्ता चायमधिपतिश्च तै त्वा सर्वे संविदाना नाकस्य पृष्ठे स्वर्गे लोके यजमानं च सादयन्तु ॥१३॥
*svarāḍasyudīchī diṅmarutaste devā adhipatayaḥ somo hetīnāṁ pratidhartaikaviṁ śastvā stomaḥ pṛthivyāṁśrayatu niṣkevalyamukthamavyathāyai stabhnātu vairājaṁsāma pratiṣṭhityā antarikṣa ṛṣayastvā prathamajā deveṣu divo mātrayā varimṇā prathantu vidhartā chāyamadhipatiścha tai tvā sarve saṁvidānā nākasya pṛṣṭhe svarge loke yajamānaṁ cha sādayantu ||13 ||*

८. रुद्रः (Rudraḥ) - य. (Yv.)१६.४

शिवेन वचसा त्वा गिरिशाच्छा वदामसि। यथा नः सर्वमिज्जगदयक्ष्मंसुमना असत् ॥४॥
*śivena vachasā tvā giriśāchchhā vadāmasi | yadhā naḥ sarvamijjagadayakṣamaṁsumanā asat ||4 ||*

९. रुद्राः (Rudrāḥ) - य. (Yv.)१५.११

विराडसि दक्षिणा दिग्रुद्रास्ते देवा अधिपतय इन्द्रो हेतीनां प्रतिधर्ता पंचदशस्त्वा स्तोमः
पृथिव्यांश्रयतु प्र उगमुक्थमव्यथायै स्तभ्नातु बृहत्साम प्रतिष्ठित्या अन्तरिक्ष
ऋषयस्त्वा प्रथमजा देवेषु दिवो मात्रया वरिम्णा प्रथन्तु विधर्ता चायमधिपतिश्च ते त्वा
सर्वे संविदाना नाकस्य पृष्ठे स्वर्गे लोके यजमानं च सादयन्तु ॥११॥
*virāḍasi dakṣiṇā digrudrāste devā adhipataya indro hetīnāṁ pratidhartā paṁchadaśastvā stomaḥ*
*pṛthivyāṁśrayatu pra ugamukthamavyathāyai stabhnātu bṛhatsāma pratiṣṭhityā antarikṣa*
*ṛṣayastvā prathamajā deveṣu divo mātrayā varimṇā prathantu vidhartā chāyamadhipatiścha te tvā*
*sarve saṁvidānā nākasya pṛṣṭhe svarge loke yajamānaṁ cha sādayantu ||11 ||*

१०. वर्षर्तुः (Varṣartuḥ) - य. (Yv.)१५.१७

अयं पश्चद्विश्वव्यचास्तस्य रथप्रोतश्चसमरथश्च सेनानीग्रामण्यौ।
प्रम्लोचन्ती चानुम्लोचन्ती चाप्सरसौ व्याघ्रा हेतिः सर्पाः प्रहेतिस्तेभ्यो नमो अस्तु ते नोऽवन्तु ते नो मृडयन्तु ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां जम्भे दध्मः ॥१७॥
*ayaṁ paśchadviśvavyachāstasya rathaprotaśchasamarathaścha senānīgrāmaṇyau |*
*pramlochantī chānumlochantī chāpsarasau vyāghrā hetiḥ sarpāḥ prahetistebhyo namo astu te no'vantu te no mṛḍayantu te yaṁ dviṣmo yaścha no dveṣṭi tameṣāṁ jambhe dadhmaḥ ||17 ||*

११. वसन्तर्तुः (Vasantartuḥ) - य. (Yv.) १५.१५

अयं पुरो हरिकेशः सूर्यरश्मिस्तस्य रथगृत्सश्च रथौजाश्च सेनानीग्रामण्यौ। पुञ्जिकस्थला च क्रतुस्थला चाप्सरसौ दङ्क्ष्णवः पशवो हेतिः पौरुषेयो वधः प्रहेतिस्तेभ्यो नमो अस्तु ते नोऽवन्तु ते नो मृडयन्तु ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां जम्भे दध्मः ॥१५॥

*ayaṁ puro harikeśaḥ sūryaraśmistasya rathagṛtsaścha rathaujāścha senānīgrāmaṇyau । puñjikasthalā cha kratusthalā chāpsarasau daṅkṣaṇavaḥ paśavo hetiḥ pauruṣeyo vadhaḥ prahetistebhyo namo astu te no'vantu te no mṛḍayantu te yaṁ dviṣmo yaścha no dveṣṭi tameṣāṁ jambhe dadhmaḥ ॥15॥*

१२. वसवः (Vasavaḥ) - य. (Yv.)१५.१०

रायसि प्राची दिग्वसवस्ते देवा अधिपतयोऽग्निर्हेतीनां प्रतिधर्ता त्रिवृत् त्वा स्तोमः
पृथिव्यांश्रयत्वाज्यमुक्थमव्यथायै स्तभ्नातु रथन्तरंसाम प्रतिष्ठित्या
अन्तरिक्ष ऋषयस्त्वा प्रथमजा देवेषु दिवो मात्रया वरिम्णा प्रथन्तु विधर्ता चायमधिपतिश्च
ते त्वा सर्वे संविदाना नाकस्य पृष्ठे स्वर्गे लोके यजमानं च सादयन्तु ॥१०॥

*rāyasi prāchī digvasavaste devā adhipatayo'gnirhetīnāṁ pratidhartā trivṛt tvā stomaḥ*
*pṛthivyāṁśrayatvājyamukthamavyathāyai stabhnātu rathantaraṁsāma pratiṣṭhityā*
*antarikṣa ṛṣayastvā prathamajā deveṣu divo mātrayā varimṇā prathantu vidhartā chāyamadhipatiścha*
*te tvā sarve saṁvidānā nākasya pṛṣṭhe svarge loke yajamānaṁ cha sādayantu ॥10॥*

१३. विदुषी (Viduṣī) - य. (Yv.) १५.५८

परमेष्ठी त्वा सादयतु दिवस्पृष्ठे ज्योतिष्मतीम्। विश्वस्मै प्राणायापानाय व्यानाय विश्वं
ज्योतिर्यच्छ। सूर्यस्तेऽधिपतिस्तया देवतयाऽङ्गिरस्वद् ध्रुवा सीद ॥५८॥

*parameṣṭhī tvā sādayatu divaspṛṣṭhe jyotiṣmatīm । viśvasmai prāṇāyāpānāya vyānāya viśvaṁ*
*jyotiryachchha । sūryaste'dhipatistayā devatayā'ṅgirasvad dhruvā sīda ॥58॥*

१४. विद्वांसः (Vidvāṁsaḥ) - य. (Yv.)१५.४-७

एवश्छन्दो वरिवश्छन्दः शम्भूश्छन्दः परिभूश्छन्द आच्छच्छन्दो मनश्छन्दो व्यचश्छन्दः सिन्धुश्छन्द समुद्रश्छन्दः सरिरं छन्दः ककुप्छन्दस्त्रिककुप्छन्दः काव्यं छन्दो अंकुपं छन्दोऽक्षरपङ्क्तिश्छन्दः पदपङ्क्तिश्छन्दो विष्टारपङ्क्तिश्छन्दः क्षुरो भ्रजश्छन्दः ॥४॥
आच्छच्छन्दः प्रच्छच्छन्दः संयच्छन्दो वियच्छन्दो बृहच्छन्दो रथन्तरंछन्दो निकायश्छन्दो विवधश्छन्दो गिरश्छन्दो भ्रजश्छन्दः सं स्तुप्छन्दोऽनुष्टुप्छन्द एवश्छन्दो वरिवश्छन्दो वयश्छन्दो वयस्कृच्छन्दो विष्पर्धाश्छन्दो विशालं छन्दश्छदिश्छन्दो दूरोहणं छन्दस्तन्द्रं छन्दो अंकांक छन्दः ॥५॥
रश्मिना स्त्याय सत्यं जिन्व प्रेतिना धर्मणा धर्म जिन्वान्वित्या दिवा दिवं जिन्व सन्धिनाऽन्तरिक्षेणान्तरिक्षं जिन्व प्रतिधिना पृथिव्या पृथिवीं जिन्व विष्टम्भेन वृष्ट्या वृष्टिं जिन्व प्रव्याऽह्नाऽहर्जिन्वानुया रात्र्या रात्री जिन्वो शिजा वसुभ्यो वसूञ्जिन्व प्रकेतेनादित्येभ्य आदित्याञ्जिन्व ॥६॥
तन्तुना रायस्पोषेण रायस्पोषं जिन्व सं सर्पेण श्रुताय श्रुतं जिन्वैडेनौषधीभिरोषधीर्जिन्वोत्तमेन तनूभिस्तनूर्जिन्व वयोधसाधीतेनाधीतं जिन्वाभिजिता तेजसा तेजो जिन्व ॥७॥

*evaśchhando varivaśchhandaḥ śambhūśchhandaḥ paribhūśchhanda āchchhachchhando manaśchhando vyachaśchhandaḥ sindhuśchhanda samudraśchhandaḥ sariraṁ chhandaḥ kakupchhandastrikakupchhandaḥ kāvyaṁ chhando aṁkupaṁ chhando'kṣarapaṅktiśchhandaḥ padapaṅktiśchhando viṣṭārapaṅktiśchhandaḥ kṣuro bhrajaśchhandaḥ ॥4॥*
*āchchhachchhandaḥ prachchhachchhandaḥ saṁyachchhando viyachchhando bṛhachchhando rathantaraṁchhando nikāyaśchhando vivadhaśchhando giraśchhando bhrajaśchhandaḥ saṁ stupchhando'nuṣṭupchhanda evaśchhando varivaśchhando*

*vayaśchhando vayaskṛchchhando viṣpardhāśchhando viśālaṁ*
*chhandaśchhadiśchhando dūrohaṇaṁ chhandastandraṁ*
*chhando aṁkāṁka chhandaḥ ॥5 ॥*
*raśminā styāya satyaṁ jinva pretinā dharmaṇā dharma jinvānvityā divā divaṁ jinva*
*sandhinā'ntarikṣeṇāntarikṣaṁ jinva pratidhinā pṛthivyā pṛthivīṁ jinva viṣṭambhena*
*vṛṣṭyā vṛṣṭiṁ jinva pravyā'hnā'harjinvānuyā rātrayā rātrī jinvo śijā vasubhyo*
*vasūñjinva praketenādityebhya ādityāñjinva ॥6 ॥*
*tantunā rāyaspoṣeṇa rāyaspoṣaṁ jinva saṁ sarpeṇa śrutāya śrutaṁ*
*jinvaiḍenauṣadhībhiroṣadhīrjinvottamena tanūbhistanūrjinva*
*vayodhasādhītenādhītaṁ*
*jinvābhijitā tejasā tejo jinva ॥7 ॥*

१५. विश्वेदेवाः (Viśvedevāḥ) - य. (Yv.)१५.१४

अधिपत्न्यसि बृहती दिग्विश्वे ते देवा अधिपतयो बृहस्पतिर्हेतीनां प्रतिधर्ता त्रिणवत्रयस्त्रिं शौ त्वा स्तोमौ
पृथिव्यांश्रयतां वैश्वदेवाग्निमारुते उक्थे अव्यथायै स्तभनीतां शाक्वररैवते
सामनी प्रतिष्ठित्या अन्तरिक्ष ऋषयस्त्वा प्रथमजा देवेषु दिवो मात्रया वरिम्णा प्रथन्तु विधर्ता
चायमधिपतिश्च ते त्वा सर्वे संविदाना नाकस्य पृष्ठे स्वर्गे लोके यजमानं च सादयन्तु ॥१४॥
*adhipatnyasi bṛhatī digviśve te devā adhipatayo bṛhaspatirhetīnāṁ pratidhartā*
*triṇavatrayastriṁ śau tvā stomau pṛthivyāṁśrayatāṁ vaiśvadevāgnimārute ukthe*
*avyathāyai stabhanītāṁ śākvararaivate*
*sāmanī pratiṣṭhityā antarikṣa ṛṣayastvā prathamajā deveṣu divo mātrayā varimṇā*
*prathantu vidhartā*
*chāyamadhipatiścha te tvā sarve saṁvidānā nākasya pṛṣṭhe svarge loke yajamānaṁ*
*cha sādayantu ॥14 ॥*

१६. शरद्दतुः (Śaradṛtuḥ) - य. (Yv.)१५.१८

अयमुत्तरात्संयद्वसुस्तस्य तार्क्ष्यश्चरिष्टनेमिश्च सेनानीग्रामण्यौ। विश्वाची च घृताची चाप्सरसावापो हेतिर्वातः
प्रहेतिस्तेभ्यो नमो अस्तु ते नोऽवन्तु ते नो मृडयन्तु ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां जम्भे दध्मः ॥१८॥
*ayamuttarātsaṁyadvasustasya tārkṣayaścharistanemiścha senānīgrāmaṇyau । viśvāchī*
*cha ghṛtāchī chāpsarasāvāpo hetirvātaḥ prahetistebhyo namo astu te no'vantu te no*
*mṛḍayantu te yaṁ dviṣmo yaścha no dveṣṭi tameṣāṁ jambhe dadhmaḥ ॥18 ॥*

१७. शिशिरर्तुः (Śiśirartuḥ) - य. (Yv.)१५.५७

तपश्च तपस्यश्च शैशिरावृतू अग्नेरन्तः श्लेषोऽसि कल्पेतां द्यावापृथिवी कल्पन्तामाप ओषधयः कल्पन्तामग्नयः
पृथङ्मम ज्यैष्ठ्याय सव्रताः। ये अग्नयः समनसोऽन्तरा द्यावापृथिवी इमे। शैशिरावृतू अभिकल्पमाना इन्द्रमिव
देवा अभिसंविशन्तु तया देवतयाऽङ्गिरस्वद्ध्रुवे सीदतम् ॥५७॥
*tapaścha tapasyaścha śaiśirāvṛtū agnerantaḥ śleṣo'si kalpetāṁ dyāvāpṛthivī*
*kalpantāmāpa Oṣadhayaḥ kalpantāmagnayaḥ pṛthaṅmama jyaiṣṭhyāya savratāḥ । ye*
*agnayaḥ samanaso'ntarā dyāvāpṛthivī ime । śaiśirāvṛtū abhikalpamānā indramiva*
*devā abhisaṁviśantu tayā devatayā'ṅgirasvaddhruve sīdatam ॥57 ॥*

१८. हेमन्तर्तुः (Hemantartuḥ) - य. (Yv.)१५.१९

अयमुपर्यर्वाग्वसुस्तस्य सेनजिच्च सुषेणश्च सेनानीग्रामण्यौ।
उर्वशी च पूर्वचित्तिश्चाप्सरसाववस्फूर्जन् हेतिर्विद्युत्प्रहेतिस्तेभ्यो नमो अस्तु ते नोऽवन्तु ते नो मृडयन्तु ते यं
द्विष्मो यश्च नो द्वेष्टि तमेषां जम्भे दध्मः ॥१९॥
*ayamuparyarvāgvasustasya senajichcha suṣeṇaścha senānīgrāmaṇyau ।*
*urvaśī cha pūrvachittiśchāpsarasāvavasphūrjan hetirvidyutprahetistebhyo namo astu*
*te no'vantu te no mṛḍayantu te yaṁ dviṣmo yaścha no dveṣṭi tameṣāṁ jambhe*
*dadhmaḥ ॥19 ॥*

## ३३७. परमेष्ठी वा कुत्सः (Parameṣṭhī Vā Kutsaḥ)

१. रुद्रः (Rudraḥ) - य. (Yv.)१६.१-३

नमस्ते रुद्र मन्यव ऽ उतो त ऽ इषवे नमः। बाहुभ्यामुत ते नमः ॥१॥
या ते रुद्र शिवा तनूरघोराऽपापकाशिनी। तया नस्तन्वा शन्तमया गिरिशन्ताभि चाकशीहि ।२।
यामिषुं गिरिशन्त हस्ते बिभर्ष्यस्तवे। शिवां गिरित्र तां कुरु मा हिं सीः पुरुषं जगत् ॥३॥

*namaste rudra manyava ' uto ta ' iṣave namaḥ । bāhubhyāmuta te namaḥ ॥1॥*
*yā te rudra śivā tanūraghorā'pāpakāśinī । tayā nastanvā śantamayā giriśantābhi chākaśīhi ।2।*
*yāmiṣuṁ giriśanta haste bibharṣyastave । śivāṁ giritra tāṁ kuru mā hiṁ sīḥ puruṣaṁ jagat ॥3॥*

## ३३८. परमेष्ठी प्रजापतिः (Parameṣṭhī Prajāpatiḥ)

१. अग्निः (Agniḥ) - य. (Yv.)२.३; ४; ७; ९; १४; ५; ८; ११; १७-१९; २३

य. (Yv.)२.३-४

गन्धर्वस्त्वा विश्वावसुः परिदधातु विश्वास्यारिष्ट्यै यजमानस्य परिधिरस्य ग्निरिडऽईडितः। इन्द्रस्य बाहुरसि दक्षिणो विश्वस्यारिष्ट्यै यजमानस्य परिधिरस्यग्निरिडऽईडितः। मित्रावरुणौ त्वोत्तरतः परिधत्तां ध्रुवेण धर्मणा विश्वस्यारिष्ट्यै यजमानस्य परिधिरस्यग्निरिड ऽ ईडितः ॥३॥
वीतिहोत्रं त्वा कवे द्युमन्तंसमिधीमहि। अग्ने बृहन्तमध्वरे ॥४॥

*gandharvastvā viśvāvasuḥ paridadhātu viśvāsyāriṣṭyai yajamānasya paridhirasya gniriḍa'īḍitaḥ । indrasya bāhurasi dakṣiṇo viśvasyāriṣṭyai yajamānasya paridhirasyagniriḍa'īḍitaḥ । mitrāvaruṇau tvottarataḥ paridhattāṁ dhruveṇa dharmaṇā viśvasyāriṣṭyai yajamānasya paridhirasyagniriḍa ' īḍitaḥ ॥3॥*
*vītihotraṁ tvā kave dyumantaṁsamidhīmahi । agne bṛhantamadhvare ॥4॥*

य. (Yv.)२.७

अग्ने वाजजिद् वाजं त्वा सरिष्यन्तं वाजजितंसम्मार्ज्मि।
नमो देवेभ्यः स्वधा पितृभ्यः सुयमे मे भूयास्तम् ॥७॥

*agne vājajid vājaṁ tvā sariṣyantaṁ vājajitaṁsammārjmi ।*
*namo devebhyaḥ svadhā pitṛbhyaḥ suyame me bhūyāstam ॥7॥*

य. (Yv.)२.९

अग्ने वेर्होत्रं वेर्दूत्यमवतां त्वां द्यावापृथिवीऽअव त्वं द्यावापृथिवी स्विष्टकृद्देवेभ्यऽ इन्द्र ऽ आज्येन हविषा भूत्स्वाहा सं ज्योतिषा ज्योतिः ॥९॥

*agne verhotraṁ verdūtyamavatāṁ tvāṁ dyāvāpṛthivī ' ava tvaṁ dyāvāpṛthivī sviṣṭakṛddevebhya' indra ' ājyena haviṣā bhūtsvāhā saṁ jyotiṣā jyotiḥ ॥9॥*

य. (Yv.)२.१४

एषा तेऽअग्ने समित्तया वर्धस्व चा च प्यायस्व। वर्धिषीमहि च वयमा च प्यासिषीमहि। अग्ने वाजजिद्वाजं त्वा ससृवां सं वाजजितंसम्मार्जि्म ॥१४॥

*eṣā te'agne samittayā vardhasva chā cha pyāyasva । vardhiṣīmahi cha vayamā cha pyāsiṣīmahi । agne vājajidvājaṁ tvā sasṛvāṁ saṁ vājajitaṁsammājirma ॥14॥*

य. (Yv.)२.५

समिदसि सूर्यस्त्वा पुरस्तात् पातु कस्याश्चिदभिशस्त्यै। सवितुर्बाहू स्थ ऽ ऊर्णम्रदसं त्वा स्तृणामि स्वासस्थं देवेभ्य ऽ आ त्वा वसवो रुद्रा ऽ आदित्याः सदन्तु ॥५॥

*samidasi sūryastvā purastāt pātu kasyāśchidabhiśastyai । saviturbāhū stha ' ūrṇabhradasaṁ tvā stṛṇāmi svāsasthaṁ devebhya ' ā tvā vasavo rudrā ' ādityāḥ sadantu ॥5॥*

य. (Yv.)२.८

अस्कन्नमद्य देवेभ्य ऽ आज्यंसंभ्रियासमंघ्रिणा विष्णो मा त्वावक्रमिषं वसुमतीमग्ने
ते च्छायामुपस्थेषं विष्णो स्थानमसीत ऽ इन्द्रो वीर्यमकृणोदूर्ध्वोऽध्वर ऽ आस्थात् ॥८॥

*askannamadya devebhya ' ājyaṁsaṁbhriyāsamaṁghriṇā viṣṇo mā tvāvakramiṣaṁ vasumatīmagne*
*te chchhāyāmupastheṣaṁ viṣṇo sthānamasīta ' indro vīryamakṛṇodūrdhvo'dhvara ' āsthāt //8 //*

य. (Yv.)२.११

उपहूतो द्यौष्पितोप मां द्यौष्पिता ह्वयतामग्निराग्नीध्रात् स्वाहा। देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम्। प्रतिगृह्णाम्यग्नेष्ट्वास्येन प्राश्नामि ॥११॥

*upahūto dyauṣpitopa māṁ dyauṣpitā hnayatāmagnirāgnīdhrāt svāhā / devasya tvā savituḥ prasave'śvinorbāhubhyāṁ pūṣṇo hastābhyām / pratigṛhṇāmyagneṣṭvāsyena prāśnāmi //11 //*

य. (Yv.)२.१७-१९

यं परिधिं पर्यधत्था ऽ अग्ने देवपणिभिर्गुह्यमानः।
तं तऽएतमनु जोषं भराम्येष मेत्त्वदपचेतयाताऽअग्नेः प्रियं पाथोऽपीतम् ॥१७॥
सं स्रवभागा स्थेषा बृहन्तः प्रस्तरेष्ठाः परिधेयाश्च देवाः।
इमां वाचमभि विश्वे गृणन्तऽआसद्यास्मिन् बर्हिषि मादयध्वंस्वाहा वाट् ॥१८॥
घृताची स्थो धुर्यौ पातंसुम्ने स्थः सुम्ने मा धत्तम्।
या नमश्च त उप च यास्य शिवे संतिष्ठस्व स्विष्टे मे संतिष्ठस्व ॥१९॥

*yaṁ paridhiṁ paryadhatthā ' agne devapaṇibhirguhyamānaḥ /*
*taṁ ta'etamanu joṣaṁ bharāmyeṣa mettvadapachetayātā'agneḥ priyaṁ pātho'pītam //17 //*
*saṁ sravabhāgā stheṣā bṛhantaḥ prastareṣṭhāḥ paridheyāścha devāḥ /*
*imāṁ vāchamabhi viśve gṛṇanta'āsadyāsmin barhiṣi mādayadhvaṁsvāhā vāṭ //18 //*
*ghṛtāchī stho dhuryau pātaṁsumne sthaḥ sumne mā dhattam /*
*yā namaścha ta upa cha yāsya śive saṁtiṣṭhasva sviṣṭe me saṁtiṣṭhasva //19 //*

य. (Yv.)२.२३

कस्त्वा विमुंचति स त्वा विमुंचति कस्मै त्वा विमुंचति तस्मै त्वा विमुंचति।
पोषाय रक्षसां भागोऽसि ॥२३॥

*kastvā vimuṁchati sa tvā vimuṁchati kasmai tvā vimuṁchati tasmai tvā vimuṁchati /*
*poṣāya rakṣasāṁ bhāgo'si //23 //*

२. अग्निवायू (Agnivāyū) - य. (Yv.)२.१९

घृताची स्थो धुर्यो पातंसुम्ने स्थः सुम्ने मा धत्तम्।
या नमश्च तऽ उप च यास्य शिवे सन्तिष्ठस्व स्विष्टे मे सतिष्ठस्व ॥१९॥

*ghṛtāchī stho dhuryo pātaṁsumne sthaḥ sumne mā dhattam /*
*yā namaścha ta' upa cha yāsya śive santiṣṭhasva sviṣṭe me satiṣṭhasva //19 //*

३. अग्निषोमौ, इन्द्राग्नी (Agniṣomau, Indrāgnī) - य. (Yv.)२.१५

अग्नीषोमयोरुज्जितिमनूज्जेषं वाजस्य मा प्रसवेन प्रोहामि। अग्नीषोमौ तमपनुदतां योऽस्मान् द्वेष्टि यं च वयं द्विष्मो वाजस्यैनं प्रसवेनापोहामि। इन्द्राग्न्योरुज्जितिमनूज्जेषं वाजस्य मा प्रसवेन प्रोहामि। इन्द्राग्नी तमपनुदतां योऽस्मान् द्वेष्टि यं च वयं द्विष्मो वाजस्यैनं प्रसवेनापोहामि ॥१५॥

*agnīṣomayorujjitimanūjjeṣaṁ vājasya mā prasavena prohāmi / agnīṣomau tamapanudatāṁ*
*yo'smān dveṣti yaṁ cha vayaṁ dviṣmo vājasyainaṁ prasavenāpohāmi / indrāgnyorujjitimanūjjeṣaṁ*
*vājasya mā prasavena prohāmi / indrāgnī tamapanudatāṁ yo'smān dveṣṭi yaṁ cha vayaṁ dviṣmo vājasyainaṁ prasavenāpohāmi //15 //*

४. अग्निसरस्वत्यौ (Agnisarasvatyau) - य. (Yv.)२.२०

अग्नेऽदव्धायोऽशीतम पाहि मा दिद्योः पाहि प्रसित्यै पाहि दुरिष्ट्यै पाहि दुरद्मन्याऽ अविषं नः पितुं कृणु। सुषदा योनौ स्वाहा वाडग्नये संवेशपतये स्वाहा सरस्वत्यै यशोभगिन्यै स्वाहा ॥२०॥

agne'davdhāyo'śītama pāhi mā didyoḥ pāhi prasityai pāhi duriṣṭyai pāhi duradmanyā' aviṣaṁ naḥ pituṁ kṛṇu । suṣadā yonau svāhā vāḍagnaye saṁveśapataye svāhā sarasvatyai yaśobhaginyai svāhā ॥20॥

५. अप्सवितारौ (Apsavitārau) - य. (Yv.)१.१२

पवित्रे स्थो वैष्णव्यौ सवितुर्वः प्रसव उत्पुनाम्यच्छिद्रेण पवित्रेण सूर्य्यस्य रश्मिभिः।
देवीरापो ऽ अग्रेगुवो ऽ अग्रेपुवो ऽ ग्र ऽ इममद्य यां नयताग्रे यापतिंसुधातुं
यापतिं देवयुवम् ॥१२॥

*pavitre stho vaiṣṇavyau saviturvaḥ prasava utpunāmyachchhidreṇa pavitreṇa sūryyasya raśmibhiḥ ।*
*devīrāpo ' agreguvo ' agrepuvo ' gra ' imamadya yāṁ nayatāgre yāpatiṁsudhātuṁ yāpatiṁ devayuvam ॥12॥*

६. इन्द्रः (Indraḥ) - य. (Yv.)२.१०

मयीदमिन्द्र ऽ इन्द्रियं दधात्वस्मान् रायो मघवानः सचन्ताम्।
अस्माकंसन्त्वाशिषः सत्या नः सन्त्वाशिष ऽ उपहूता पृथिवी मातोप मां पृथिवी
माता ह्वयतामग्निराग्नीध्रात् स्वाहा ॥१०॥

*mayīdamindra ' indriyaṁ dadhātvasmān rāyo maghavānaḥ sachantām ।*
*asmākaṁsantvāśiṣaḥ satyā naḥ santvāśiṣa ' upahūtā pṛthivī mātopa māṁ pṛthivī*
*mātā hnayatāmagnirāgnīdhrāt svāhā ॥10॥*

७. इन्द्र, अग्निः याः (Indra, Agniḥ Yāḥ) - य. (Yv.)१.१३

युष्मा ऽ इन्द्रोऽवृणीत वृत्रतूर्ये यूयमिन्द्रमवृणीध्वं वृत्रतूर्ये प्रोक्षिता स्थ।
अग्नये त्वा जुष्टं प्रोक्षाभ्यग्नीषोमाभ्यां त्वा जुष्टं प्रोक्षामि।
दैव्याय कर्मणे शुन्धध्वं देवयज्यायै यद्वोऽशुद्धाः पराजघ्नुरिदं वस्तच्छुन्धामि ।१३॥

*yuṣmā ' indro'vṛṇīta vṛtratūrye yūyamindramavṛṇīdhvaṁ vṛtratūrye prokṣitā stha ।*
*agnaye tvā juṣṭaṁ prokṣābhyagnīṣomābhyāṁ tvā juṣṭaṁ prokṣāmi ।*
*daivyāya karmaṇe śundhadhvaṁ devayajyāyai yadvo'śuddhāḥ parājaghnuridaṁ vastachchhundhāmi ।13॥*

८. द्यावापृथिवी (Dyāvāpṛthivī) - य. (Yv.)२.११

उपहूतो द्यौष्पितोप मां द्यौष्पिता ह्वयतामग्निराग्नीध्रात् स्वाहा।
देवस्य त्वा सवितुः प्रसवेऽफिनोर्बाहुभ्यां पूष्णो हस्ताभ्याम्।
प्रतिगृह्णाम्यग्नेष्ट्वास्येन प्राश्नामि ॥११॥

*upahūto dyauṣpitopa māṁ dyauṣpitā hnayatāmagnirāgnīdhrāt svāhā ।*
*devasya tvā savituḥ prasave'phinorbāhubhyāṁ pūṣṇo hastābhyām ।*
*pratigṛhṇāmyagneṣṭvāsyena prāśnāmi ॥11॥*

९. द्यावापृथिवी मित्रावरुणौ च अग्निः (Dyāvāpṛthivī Mitrāvaruṇau Cha Agniḥ) - य. (Yv.)२.१६

वसुभ्यस्तवा रुद्रेभ्यस्त्वादित्येभ्यस्त्वा संजानाथां द्यावापृथिवी मित्रावरुणौ त्वा वृष्ट्यावताम्।
व्यन्तु वयोक्तंरिहाणा मरुतां पृषतीर्गच्छ वशा पृश्निर्भूत्वा
दिवं गच्छ ततो नो वृष्टिमावह। चक्षुष्पा ऽ अग्नेऽसि चक्षुर्मे पाहि ॥१६॥

*vasubhyastavā rudrebhyastvādityebhyastvā saṁjānāthāṁ dyāvāpṛthivī mitrāvaruṇau tvā vṛṣṭyāvatām ।*
*vyantu vayoktaṁrihāṇā marutāṁ pṛṣatīrgachchha vaśā pṛśnirbhūtvā*
*divaṁ gachchha tato no vṛṣṭimāvaha । chakṣuṣpā ' agne'si chakṣurme pāhi ॥16॥*

१०. विद्युतौ (Vidyutau) - य. (Yv.)१.२४

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम्। आददेऽध्वरकृतं देवेभ्य इन्द्रस्य बाहुरसि दक्षिणः सहस्रभृष्टिः शततेजा वायुरसि तिग्मतेजा द्विषतो वधः ॥२४॥

*devasya tvā savituḥ prasave'śvinorbāhubhyāṁ pūṣṇo hastābhyām ।*
*ādade'dhvarakṛtaṁ devebhya indrasya bāhurasi dakṣiṇaḥ sahasrabhṛṣṭiḥ śatatejā vāyurasi tigmatejā dviṣato vadhaḥ ॥24 ॥*

११. प्रजापतिः (Prajāpatiḥ) - य. (Yv.)१.६

कस्त्वा युनक्ति स त्वा युनक्ति कस्मै त्वा युनक्ति तस्मै त्वा युनक्ति। कर्मणे वां वेषाय वाम्।६।

*kastvā yunakti sa tvā yunakti kasmai tvā yunakti tasmai tvā yunakti । karmaṇe vāṁ veṣāya vām ।6 ।*

१२. बृहस्पतिः (Bṛhaspatiḥ) - य. (Yv.)२.१३

मनो जूतिर्जुषतामाज्यस्य बृहस्पतिर्यामिमं तनोत्वरिष्टं यांसमिमं दधातु ।
विश्वे देवास ऽ इह मादयन्तामो३म्प्रतिष्ठ ॥१३॥

*mano jūtirjuṣatāmājyasya bṛhaspatiryāmimaṁ tanotvariṣṭaṁ yāṁsamimaṁ dadhātu ।*
*viśve devāsa ' iha mādayantāmo3mpratiṣṭha ॥13 ॥*

१३. याः (YĀḤ) - य. (Yv.)१.२; ७; १४; १५; २१; २७-३१; २.१; २; ५

य. (Yv.)१.२

वसोः पवित्रमसि द्यौरसि पृथिव्यसि मातरिश्वनो घर्मोऽसि विश्वधा ऽअसि।
परमेण धाम्ना दृं हस्व मा ह्वार्मा ते यापतिर्ह्वार्षीत्॥२॥

*vasoḥ pavitramasi dyaurasi pṛthivyasi mātariśvano gharmo'si viśvadhā 'asi ।*
*parameṇa dhāmnā dṛṁ hasva mā hnārmā te yāpatirhnārṣīt ॥2 ॥*

य. (Yv.)१.७

प्रत्युष्टंरक्षः प्रत्युष्टा ऽ अरातयो निष्टप्तं रक्षो निष्टप्ता ऽ अरातयः। उर्वन्तरिक्षमन्वेमि ॥७॥

*pratyuṣṭaṁrakṣaḥ pratyuṣṭā ' arātayeā niṣṭaptaṁ rakṣo niṣṭaptā ' arātayaḥ ।*
*urvantarikṣamanvemi ॥7 ॥*

य. (Yv.)१.१४

शर्मास्यवधूतंरक्षोऽवधूता ऽ अरातयोऽदित्यास्त्वगसि प्रति त्वादितिर्वेतु।
आद्रिरसि वानस्पत्यो ग्रावासि पृथुबुध्नः प्रति त्वादित्यास्त्वग्वेत्तु ॥१४॥

*śarmāsyavadhūtaṁrakṣo'vadhūtā ' arātayo'dityāstvagasi prati tvāditirvetu ।*
*ādrirasi vānaspatyo grāvāsi pṛthubudhnaḥ prati tvādityāstvagvettu ॥14 ॥*

य. (Yv.)१.१५

अग्नेस्तनूरसि वाचो विसर्जनं देववीतये त्वा गृह्णामि बृहद्ग्रावासि वानस्पत्यः
सऽइदं देवेभ्यो हविः शमीष्व सुशमि शमीष्व। हविष्कृदेहि हविष्कृदेहि ॥१५॥

*agnestanūrasi vācho visarjanaṁ devavītaye tvā gṛhṇāmi bṛhadgrāvāsi vānaspatyaḥ*
*sa'idaṁ devebhyo haviḥ śamīṣva suśami śamīṣva । haviṣkṛdehi haviṣkṛdehi ॥15 ॥*

य. (Yv.)१.२१

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम्।
सं वपासि समापऽओषधीभिः समोषधयो रसेन।
संरेवतीर्जगतीभिः पृच्यन्तां सं मधुमतीर्मधुमतीभिः पृच्यन्ताम्॥२१॥

*devasya tvā savituḥ prasave'śvinorbāhubhyāṁ pūṣṇo hastābhyām ।*
*saṁ vapāsi samāpa'Oṣadhībhiḥ samoṣadhayo rasena ।*
*saṁrevatīrjagatībhiḥ pṛchyantāṁ saṁ madhumatīrmadhumatībhiḥ pṛchyantām ॥21 ॥*

य. (Yv.)१.२७-३१

गायत्रेण त्वा छन्दसा परिगृह्णामि त्रैष्टुभेन त्वा छन्दसा परिगृह्णामि
जागतेन त्वा छन्दसा परिगृह्णामि।
सुक्ष्मा चासि शिवा चासि स्योना चासि सुषदा चास्यूर्जस्वती चासि पयस्वती च ॥२७॥

पुरा क्रूरस्य विसृपो विरप्शिन्नुदादाय पृथिवीं जीवदानुम।
यामैरयं श्चन्द्रमसि स्वधाभिस्तामु धीरासो ऽ अनुदिश्य यजन्ते।
प्रोक्षणीरासादय द्विषतो वधोऽसि ॥२८॥
प्रत्युष्टंरक्षः प्रत्युष्टा ऽ अरातयो निष्टप्तंरक्षो निष्टप्ता ऽ अरातयः।
अनिशतोऽसि सपत्नक्षिद्वाजिनं त्वा वाजेध्यायै सम्मार्जिम।
प्रत्युष्टंरक्षः प्रत्युष्टा ऽ अरातयो निष्टप्तंरक्षो निष्टप्ता ऽ अरातयः।
अनिशिताऽसि सपत्नक्षिद्वाजिनीं त्वा वाजेध्यायै सम्माजि्र्म ॥२९॥
अदित्यै रास्नासि विष्णोर्वेष्पोऽस्यूर्जे त्वाऽदब्धेन त्वा चक्षुषावपश्यामि।
अग्नेर्जिह्वासि सुहूर्देवेभ्यो धाम्ने धाम्ने मे भव यजुषे यजुषे ॥३०॥
सवितुस्त्वा प्रसव ऽ उत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः।
सवितुर्वः प्रसव ऽ उत्पुनाम्यच्छिद्रेण पवित्रेण सूर्य्यस्य रश्मिभिः।
तेजोऽसि शुक्रमस्यमृतमसि धाम नामासि प्रियं देवानामनाधृष्टं देवयजनमसि ॥३१॥

*gāyatreṇa tvā chhandasā parigṛhṇāmi traiṣṭubhena tvā chhandasā parigṛhṇāmi jāgatena tvā chhandasā parigṛhṇāmi |*
*sukṣamā chāsi śivā chāsi syonā chāsi suṣadā chāsyūrjasvatī chāsi payasvatī cha ||27 ||*
*purā krūrasya visṛpo virapśinnudādāya pṛthivīṁ jīvadānuma |*
*yāmairayaṁ śchandramasi svadhābhistāmu dhīrāso ' anudiśya yajante |*
*prokṣaṇīrāsādaya dviṣato vadho'si ||28 ||*
*pratyuṣṭaṁrakṣaḥ pratyuṣṭā ' arātayo niṣṭaptaṁrakṣo niṣṭaptā ' arātayaḥ |*
*aniśato'si sapatnakṣidvājinaṁ tvā vājedhyāyai sammārjima |*
*pratyuṣṭaṁrakṣaḥ pratyuṣṭā ' arātayo niṣṭptaṁrakṣo niṣṭaptā ' arātayaḥ |*
*aniśitā'si sapatnakṣidvājinīṁ tvā vājedhyāyai sammājirma ||29 ||*
*adityai rāsnāsi viṣṇorveṣpo'syūrje tvā'dabdhena tvā chakṣuṣāvapaśyāmi |*
*agnerjihnāsi suhūrdevebhyo dhāmne dhāmne me bhava yajuṣe yajuṣe ||30 ||*
*savitustvā prasava ' utpunāmyachchhidreṇa pavitreṇa sūryasya raśmibhiḥ |*
*saviturvaḥ prasava ' utpunāmyachchhidreṇa pavitreṇa sūryyasya raśmibhiḥ |*
*tejo'si śukramasyamṛtamasi dhāma nāmāsi priyaṁ devānāmanādhṛṣṭaṁ devayajanamasi ||31 ||*

य. (Yv.)२.१-२

कृष्णोऽस्याखरेष्ठोऽग्नये त्वा जुष्टं प्रोक्षामि वेदिरसि बर्हिषे त्वा जुष्टां प्रोक्षामि बर्हिरसि
स्रुग्भ्यस्त्वा जुष्टं प्रोक्षामि ॥१॥
अदित्यै व्युन्दनमसि विष्णो स्तुपोऽस्यूर्णम्रदसं त्वा स्तृणामि स्वासस्थां
देवेभ्यो भुवपतये स्वाहा भुवनपतये स्वाहा भूतानां पतये स्वाहा॥२॥

*kṛṣṇo'syākhareṣṭho'gnaye tvā juṣṭaṁ prokṣāmi vedirasi barhiṣe tvā juṣṭāṁ prokṣāmi barhirasi*
*srugbhyastvā juṣṭaṁ prokṣāmi ||1 ||*
*adityai vyundanamasi viṣṇo stupo'syūrṇamradasaṁ tvā stṛṇāmi svāsasthāṁ*
*devebhyo bhuvapataye svāhā bhuvanapataye svāhā bhūtānāṁ pataye svāhā ||2 ||*

य. (Yv.)२.५

समिदसि सूर्यस्त्वा पुरस्तात् पातु कस्याश्चिदभिशस्त्यै। सवितुर्बाहू स्थ ऽ ऊर्णम्रदसं त्वा
स्तृणामि स्वामस्थं देवेभ्य ऽ आ त्वा वसवो रुद्रा ऽ आदित्याः सदन्तु ॥५॥

*samidasi sūryastvā purastāt pātu kasyāśchidabhiśastyai | saviturbāhū stha ' ūrṇamradasaṁ tvā*
*stṛṇāmi svāmasthaṁ devebhya ' ā tvā vasavo rudrā ' ādityāḥ sadantu ||5 ||*

१४. याः अग्नि-सवितारौ (Yāḥ Agni-Savitārau) - य. (Yv.)१.२२

जनयत्यै त्वा संयौमीदमग्नेरिदमग्नीषोमयोरिषे त्वा घर्मोऽसि विश्वायुरुरुप्रथाऽ उरु
प्रथस्वोरु ते यापतिः प्रथताम् अग्निष्टे त्वचं मा हिं सीद्देवस्त्वा

सविता श्रपयतु वर्षिष्ठेऽधि नाके ॥२२॥
*janayatyai tvā saṁyaumīdamagneridamagnīṣomayoriṣe tvā gharmo'si viśvāyururuprathā' uru*
*prathasvoru te yāpatiḥ prathatām agniṣṭe tvachaṁ mā hiṁ sīddevastvā savitā śrapayatu varṣiṣṭhe'dhi nāke //22 //*

१५. विश्वेदेवाः (Viśvedevāḥ) - य. (Yv.)२.१८
सं स्रवभागा स्थेषा बृहन्तः प्रस्तरेष्ठाः परिधेयाश्च देवाः।
इमां वाचमभि विश्वे गृणन्तऽआसद्यास्मिन् बर्हिषि मादयध्वंस्वाहा वाट् ॥१८॥
*saṁ sravabhāgā stheṣā bṛhantaḥ prastareṣṭhāḥ paridheyāścha devāḥ /*
*imāṁ vāchamabhi viśve gṛṇanta'āsadyāsmin barhiṣi mādayadhvaṁsvāhā vāṭ //18 //*

१६. विष्णुः (Viṣṇuḥ) - य. (Yv.)१.४; ९; २.६; ८
य. (Yv.)१.४
सा विश्वायुः सा विश्वकर्मा सा विश्वधायाः ।
इन्द्रस्य त्वा भागंसोमेनातनच्मि विष्णो हव्यंरक्ष ॥४॥
*sā viśvāyuḥ sā viśvakarmā sā viśvadhāyāḥ /*
*indrasya tvā bhāgaṁsomenātanachmi viṣṇo havyaṁrakṣa //4 //*
य. (Yv.)१.९
अह्रुतमसि हविर्धानं दृंहस्व मा ह्वार्मा ते यापतिर्ह्वार्षीत् ।
विष्णुस्त्वा क्रमतामुरु वातायापहतंरक्षो यच्छन्तां पंच ॥९॥
*ahrutamasi havirdhānaṁ dṛṁhasva mā hnārmā te yāpatirhnārṣīt /*
*viṣṇustvā kramatāmuru vātāyāpahataṁrakṣo yachchhantāṁ paṁcha //9 //*
य. (Yv.)२.६
घृताच्यसि जुहूर्नाम्ना सेदं प्रियेण धाम्ना प्रियंसद ऽ आसीद
घृताच्यस्युपभृन्नाम्ना सेदं प्रियेण धाम्ना प्रियंसदऽ आसीद घृताच्यसि
ध्रुवा नाम्ना सेदं प्रियेण धाम्ना प्रियंसद ऽ आसीद प्रियेण धाम्ना प्रियंसदऽ आसीद।
ध्रुवा ऽ असदन्नृतस्य योनौ ता विष्णो पाहि पाहि यां पाहि यापतिं पाहि मां यान्यम् ॥६॥
*ghṛtāchyasi juhūrnāmnā sedaṁ priyeṇa dhāmnā priyaṁsada ' āsīda*
*ghṛtāchyasyupabhṛnnāmnā sedaṁ priyeṇa dhāmnā priyaṁsada' āsīda ghṛtāchyasi*
*dhruvā nāmnā sedaṁ priyeṇa dhāmnā priyaṁsada ' āsīda priyeṇa dhāmnā priyaṁsada' āsīda /*
*dhruvā ' asadannṛtasya yonau tā viṣṇo pāhi pāhi yāṁ pāhi yāpatiṁ pāhi māṁ yānyam //6 //*
य. (Yv.)२.८
अस्कन्नमद्य देवेभ्य ऽ आजयंसंभ्रियासमंघ्रिणा विष्णो मा त्वावक्रमिषं वसुमतीमग्ने
ते च्छायामुपम्थेषं विष्णो स्थानमसीत ऽ इन्द्रो वीर्यमकृणोदूर्ध्वोऽध्वर ऽ आस्थात् ॥८॥
*askannamadya devebhya ' ājayaṁsaṁbhriyāsamaṁghriṇā viṣṇo mā tvāvakramiṣaṁ vasumatīmagne*
*te chchhāyāmupamtheṣaṁ viṣṇo sthānamasīta ' indro vīryamakṛṇodūrdhvo'dhvara ' āsthāt //8 //*

१७. सविता (Savitā) - य. (Yv.)१.१६; २.१२
य. (Yv.)१.१६
कुक्कुटोऽसि मधुजिह्वऽइषमूर्जमावद त्वया वयंसंघातंसंघातं जेष्म
वर्षवृद्धमसि प्रति त्वा वर्षवृद्ध वेत्तु परापूतँ रक्षः परापूता अरातयोऽपहतँ रक्षो
वायुर्वो विविनक्तु देवो वः सविता हिरण्यपाणिः प्रतिगृभ्णात्वच्छिद्रेण पाणिना ॥१६॥
*kukkuṭo'si madhujihna'iṣamūrjamāvada tvayā vayaṁsaṁghātaṁsaṁghātaṁ jeṣma*
*varṣavṛddhamasi prati tvā varṣavṛddha vettu parāpūtaṁ̐ rakṣaḥ parāpūtā*

*arātayo'pahataṁ rakṣo*
*vāyurvo vivinaktu devo vaḥ savitā hiraṇyapāṇiḥ pratigṛbhṇātvachchhidreṇa pāṇinā ॥16 ॥*

य. (Yv.)२.१२

एतं ते देव सवितर्यां प्राहुर्बृहस्पतये ब्रह्मणे। तेन यामव तेन यापतिं तेन मामव ॥१२॥

*etaṁ te deva savitaryāṁ prāhurbṛhaspataye brahmaṇe । tena yāmava tena yāpatiṁ tena māmava ॥12 ॥*

## ३३९. परमेष्ठी प्रजापतिर्वा देवाः (Parameṣṭhī Prajāpatirvā Devāḥ)

१. रुद्राः (Rudrāḥ) - य. (Yv.)१६.४०-६६

नमः शंगवे च पशुपतये च नम ऽ उग्राय च भीमाय च नमोऽग्रेवधाय च दूरेवधाय च
नमो हन्त्रे च हनीयसे च नमो वृक्षेभ्यो हरिकेशेभ्यो नमस्ताराय ॥४०॥
नमः शम्भवाय च मयोभवाय च नमः शंकराय च
मयस्कराय च नमः शिवाय च शिवतराय च ॥४१॥
नमः पार्याय चावार्याय च नमः प्रतरणाय चोत्तरणाय च
नमस्तीर्थ्याय च कूल्याय च नमः शष्प्याय च फेन्याय च ॥४२॥
नमः सित्त्याय च प्रवाह्याय च नमः किं शिलाय च क्षयणाय च नमः कपर्दिने च
पुलस्तये च नम ऽ इरिण्याय च प्रपथ्याय च ॥४३॥
नमो व्रज्याय च गोष्ठ्याय च नमस्तल्प्याय च गोह्याय च
नमो हृदय्याय च निवेष्याय च नमः काट्याय च गह्वरेष्ठाय च ॥४४॥
नमः शुष्क्याय च हरित्याय च नमः पां सव्याय च रजस्याय च
नमो लोप्याय चोलप्याय च नम ऽ ऊर्व्याय च सूर्व्याय च ॥४५॥
नमः पर्णाय च पर्णशदाय च नम ऽ उद्गुरमाणाय चभिघ्नते च
नम ऽ आखिदते च प्रखिदते च नम ऽ इषुकृद्भ्यो धनुष्कृद्भ्यश्च वो नमो नमो वः किरिकेभ्यो
देवानांहृदयेभ्यो नमो विचिन्वत्केभ्यो नमो विक्षिणत्केभ्यो नम ऽ आनिर्हतेभ्यः ॥४६॥
द्रापे ऽ अन्धसस्पते दरिद्र नीललोहित।
आसां प्रजानामेषां पशूनां मा भेर्मा रोङ्मो च नः किंचनाममत् ॥४७॥
इमा रुद्राय तवसे कपर्दिने क्षयद्वीराय प्र भरामहे मतीः।
यथा शमसद् द्विपदे चतुष्पदे विश्वं पुष्टं ग्रामे ऽ अस्मिन्ननातुरम् ॥४८॥
या ते रुद्र शिवा तनूः शिवा विश्वाहा भेषजी ।
शिवा रुतस्य भेषजी तया नो मृड जीवसे ॥४९॥
परि नो रुद्रस्य हेतिर्वृणक्तु परि त्वेषस्य दुर्मतिरघायोः ।
अव स्थिरा मघवद्भ्यस्तनुष्व मीढ्वस्तोकाय तनयाय मृड ॥५०॥
मीढुष्टम् शिवतम शिवो नः सुमना भव। परमे वृक्ष ऽ आयुधं निधाय
कृत्तिं वसान ऽ आ चर पिनाकम्बिभ्रदा गहि ॥५१॥
विकिरिद्र विलोहित नमस्ते ऽ अस्तु भगवः ।
यास्ते सहस्रंहेतयोऽन्यमस्मन्नि वपन्तु ताः ॥५२॥
सहस्राणि सहस्रशो बाह्वोस्तव हेतयः । तासामीशानो भगवः पराचीना मुखा कृधि ॥५३॥
असंख्याता सहस्राणि ये रुद्रा ऽ अधि भूम्याम् ।
तेषांसहस्रयोजनेऽव धन्वानि तन्मसि ॥५४॥
अस्मिन् महत्यर्णवेऽन्तरिक्षे भवा ऽ अधि । तेषांसहस्रयोजनेऽव धन्वानि तन्मसि ॥५५॥
नीलग्रीवाः शितिकण्ठा दिवंरुद्रा ऽ उपश्रिताः । तेषांसहस्रयोजनेऽव धन्वानि तन्मसि ॥५६॥
नीलग्रीवाः शितिकण्ठाः शर्वा अधः क्षमाचराः । तेषांसहस्रयोजनेऽव धन्वानि तन्मसि ॥५७॥
ये वृक्षेषु शष्पिंजरा नीलग्रीवा विलोहिताः । तेषांसहस्रयोजनेऽव धन्वानि तन्मसि ॥५८॥
ये भूतानामधिपतयो विशिखासः कपर्दिनः । तेषांसहस्रयोजनेऽव धन्वानि तन्मसि ॥५९॥
ये पथां पथिरक्षय ऽ ऐलबृदा ऽ आ युर्युधः । तेषांसहस्रयोजनेऽव धन्वानि तन्मसि ॥६०॥
ये तीर्थानि प्रचरन्ति सृकाहस्ता निषंगिणः । तेषां सहस्रयोजनेऽव धन्वानि तन्मसि ॥६१॥

येऽन्नेषु विविध्यन्ति पात्रेषु पिबतो जनान् । तेषांसहस्रयोजनेऽव धन्वानि तन्मसि ॥६२॥
य ऽ एतावन्तश्च भूयां सश्च दिशो रुद्रा वितस्थिरे। तेषांसहस्रयोजनेऽव धन्वानि तन्मसि ॥६३॥
नमोऽस्तु रुद्रेभ्यो ये दिवि येषां वर्षमिषवः । तेभ्यो दश प्राचीर्दश दक्षिणा दश प्रतीचीर्दशोदीचीर्दशोर्ध्वाः ।
तेभ्यो नमो ऽ अस्तु ते नोऽवन्तु ते नो मृडयन्तु ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां जम्भे दध्मः ॥६४॥
नमोऽस्तु रुद्रेभ्यो योऽन्तरिक्षे येषां वात ऽ इषवः। तेभ्यो दश प्रचीर्दश दक्षिणा दश प्रतीचीर्दशोदीचीर्दशोर्ध्वाः
। तेभ्यो नमो ऽ अस्तु ते नोऽवन्तु ते नो मृडयन्तु ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां जम्भे दध्मः ॥६५॥
नमोऽस्तु रुद्रेभ्यो ये पृथिव्यां येषामन्नमिषवः ।
तेभ्यो दश प्राचीर्दश दक्षिणा दश प्रतीचीर्दशोदीर्चीर्दशोर्ध्वाः । तेभ्यो नमो ऽ अस्तु ते नोऽवन्तु ते नो मृडयन्तु
ते यं द्विष्मो यश्च नो द्वष्टि तमेषां जम्भे दध्मः ॥६६॥

*namaḥ śaṁgave cha paśupataye cha nama ' ugrāya cha bhīmāya cha*
*namo'grevadhāya cha dūrevadhāya cha*
*namo hantre cha hanīyase cha namo vṛkṣebhyo harikeśebhyo namastārāya //40 //*
*namaḥ śambhavāya cha mayobhavāya cha namaḥ śaṁkarāya cha*
*mayaskarāya cha namaḥ śivāya cha śivatarāya cha //41 //*
*namaḥ pāryāya chāvāryāya cha namaḥ prataraṇāya chottaraṇāya cha*
*namastīrthyāya cha kūlyāya cha namaḥ śaṣpyāya cha phenyāya cha //42 //*
*namaḥ siktyāya cha pravāhyāya cha namaḥ kiṁ śilāya cha kṣayaṇāya cha namaḥ kapardine cha*
*pulastaye cha nama ' iriṇyāya cha prapathyāya cha //43 //*
*namo vrajyāya cha goṣṭhyāya cha namastalpyāya cha gohyāya cha*
*namo hṛdayyāya cha niveṣyāya cha namaḥ kāṭyāya cha gahnareṣṭhāya cha //44 //*
*namaḥ śuṣkyāya cha harityāya cha namaḥ pāṁ savyāya cha rajasyāya cha*
*namo lopyāya cholaṣyāya cha nama ' ūrvyāya cha sūrvyāya cha //45 //*
*namaḥ parṇāya cha parṇaśadāya cha nama ' udguramāṇāya chabhighnate cha*
*nama ' ākhidate cha prakhidate cha nama ' iṣukṛdbhyo dhanuṣkṛdbhyaścha vo namo namo vaḥ kirikebhyo*
*devānāṁhṛdayebhyo namo vichinvatkebhyo namo vikṣiṇatkebhyo nama ' ānirhatebhyaḥ //46 //*
*drāpe ' andhasaspate daridra nīlalohita /*
*āsāṁ prajānāmeṣāṁ paśūnāṁ mā bhermā roṁmo cha naḥ kiṁchanāmamat //47 //*
*imā rudrāya tavase kapardine kṣayadvīrāya pra bharāmahe matīḥ /*
*yathā śamasad dvipade chatuṣpade viśvaṁ puṣṭaṁ grāme ' asminnanāturam //48 //*
*yā te rudra śivā tanṛḥ śivā viśvāhā bheṣajī /*
*śivā rutasya bheṣajī tayā no mṛḍa jīvase //49 //*
*pari no rudrasya hetirvṛṇaktu pari tveṣasya durmatiraghāyoḥ /*
*ava sthirā maghavadbhyastanuṣva mīḍhvastokāya tanayāya mṛḍa //50 //*
*mīḍhuṣṭam śivatama śivo naḥ sumanā bhava / parame vṛkṣa ' āyudhaṁ nidhāya*
*kṛttiṁ vasāna ' ā chara pinākambibhradā gahi //51 //*
*vikiridra vilohita namaste ' astu bhagavaḥ /*
*yāste sahasraṁhetayo'nyamasmanni vapantu tāḥ //52 //*
*sahasrāṇi sahasraśo bāhnostava hetayaḥ /*
*tāsāmīśāno bhagavaḥ parāchīnā mukhā kṛdhi //53 //*
*asaṁkhyātā sahasrāṇi ye rudrā ' adhi bhūmyām /*
*teṣāṁsahasrayojane'va dhanvāni tanmasi //54 //*
*asmin mahatyarṇave'ntarikṣe bhavā ' adhi /*
*teṣāṁsahasrayojane'va dhanvāni tanmasi //55 //*
*nīlagrīvāḥ śitikaṇṭhā divaṁrudrā ' upaśritāḥ /*
*teṣāṁsahasrayojane'va dhanvāni tanmasi //56 //*
*nīlagrīvāḥ śitikaṇṭhāḥ śarvā adhaḥ kṣamācharāḥ /*

*teṣāṁsahasrayojane'va dhanvāni tanmasi //57 //*
*ye vṛkṣeṣu śaṣpiṁjarā nīlagrīvā vilohitāḥ /*
*teṣāṁsahasrayojane'va dhanvāni tanmasi //58 //*
*ye bhūtānāmadhipatayo viśikhāsaḥ kapardinaḥ /*
*teṣāṁsahasrayojane'va dhanvāni tanmasi //59 //*
*ye pathāṁ pathirakṣaya ' ailabṛdā ' ā yuryudhaḥ /*
*teṣāṁsahasrayojane'va dhanvāni tanmasi //60 //*
*ye tīrthāni pracharanti sṛkāhastā niṣaṁgiṇaḥ /*
*teṣāṁ sahasrayojane'va dhanvāni tanmasi //61 //*
*ye'nneṣu vividhyanti pātreṣu pibato janān /*
*teṣāṁsahasrayojane'va dhanvāni tanmasi //62 //*
*ya ' etāvantaścha bhūyāṁ saścha diśo rudrā vitasthire /*
*teṣāṁsahasrayojane'va dhanvāni tanmasi //63 //*
*namo'stu rudrebhyo ye divi yeṣāṁ varṣamiṣavaḥ / tebhyo daśa prāchīrdaśa dakṣiṇā daśa pratīchīrdaśodīchīrdaśordhvāḥ / tebhyo namo ' astu te no'vantu te no mṛḍayantu te yaṁ dviṣmo yaścha no dveṣṭi tameṣāṁ jagbhe dadhmaḥ //64 //*
*namo'stu rudrebhyo yo'ntarikṣe yeṣāṁ vāta ' iṣavaḥ / tebhyo daśa prachīrdaśa dakṣiṇā daśa pratīchīrdaśodīchīrdaśordhvāḥ / tebhyo namo ' astu te no'vantu te no mṛḍayantu te yaṁ dviṣmo yaścha no dveṣṭi tameṣāṁ jambhe dadhmaḥ //65 //*
*namo'stu rudrebhyo ye pṛthivyāṁ yeṣāmannamiṣavaḥ /*
*tebhyo daśa prāchīrdaśa dakṣiṇā daśa pratīchīrdaśodīrchīrdaśordhvāḥ / tebhyo namo ' astu te no'vantu te no mṛḍayantu te yaṁ dviṣmo yaścha no dvaṣṭi tameṣāṁ jambhe dadhmaḥ //66 //*

### ३४०. पराशरः (Parāśaraḥ)

१. अग्निः (Agniḥ) - य. (Yv.)३३.११

आ यदिषे नृपतिं तेजऽआनट् शुचि रेतो निषिक्त द्यौरभाके ।
अग्निः शर्द्धमनवद्यं युवानंस्वाध्यं जनयत्सूदयश्च ॥११ ॥
*ā yadiṣe nṛpatiṁ teja'ānaṭ śuchi reto niṣikta dyaurabhāke /*
*agniḥ śarddhamanavadyaṁ yuvānaṁsvādhyaṁ janayatsūdayaścha //11 //*

### ३४१. पराशरः शात्त्यः (Parāśaraḥ Śāktyaḥ)

१. अग्निः (Agniḥ) - ऋ. (Rv.)१.६५.१-१०; १.६६.१-१०; १.६७.१-१०; १.६८.१-१०; १.६९.१-१०; १.७०.१-११; १.७१.१-१०; १.७२.१-१०; १.७३.१-१०

ऋ. (Rv.)१.६५.१-१०

पश्वा न तायुं गुहा चतन्तं नमो युजानं नमो वहन्तम् ॥ १ ॥
सजोषा धीराः पदेरनु ग्मन्नुप त्वा सीदन्विश्वे यजत्राः ॥ २ ॥
ऋतस्य देवा अनु व्रता गुर्भुवत्परिष्टिर्द्यौर्न भूम ॥ ३ ॥
वर्धन्तीमापः पन्वा सुशिश्विमृतस्य योना गर्भे सुजातम् ॥४ ॥
पुष्टिर्न रण्वा क्षितिर्न पृथ्वी गिरिर्न भुज्म क्षोदो न शंभु ॥५ ॥
अत्यो नाज्मन्त्सर्गप्रतक्तः सिन्धुर्न क्षोदः क ई वराते ॥६ ॥
जामिः सिन्धूनां भ्रातेव स्वस्रामिभ्यान्न राजा वनान्यत्ति ॥७ ॥
यद्वातजूतो वना व्यस्थादग्निर्ह दाति रोमा पृथिव्याः ॥८ ॥
श्वसित्यप्सु हंसो न सीदन् क्रत्वा चेतिष्ठो विशामुषर्भुत् ॥९ ॥
सोमो न वेधा ऋतप्रजातः पशुर्न शिश्वा विभुर्दूरेभाः ॥१० ॥
*paśvā na tāyuṁ guhā chatantaṁ namo yujānaṁ namo vahantam // 1 //*
*sajoṣā dhīrāḥ paderanu gmannupa tvā sīdanviśve yajatrāḥ // 2 //*
*ṛtasya devā anu vratā gurbhuvatpariṣṭidyaurna bhūma // 3 //*
*vardhantīmāpaḥ panvā suśiśvimṛtasya yonā garbhe sujātam //4 //*

*puṣṭirna raṇvā kṣitirna pṛthvī girirna bhujma kṣodo na śaṁbhu* //5 //
*atyo nājmantsargaprataktaḥ sindhurna kṣedaḥ ka ī varāte* //6 //
*jāmiḥ sindhūnāṁ bhrāteva svasrāmibhyānna rājā vanānyatti* //7 //
*yadvātajūto vanā vyasthādagnirha dāti romā pṛthivyāḥ* //8 //
*śrasityapsu haṁso na sīdan kratvā chetiṣṭho viśāmuṣarbhut* //9 //
*somo na vedhā ṛtaprajātaḥ paśurna śiśvā vibhurdūrebhāḥ* //10 //

ऋ. (Rv.)१.६६.१-१०

रयिर्न चित्रा सूरो न संदृगायुर्न प्राणो नित्यो न सूनुः ॥१॥
तक्वा न भूर्णिर्वना सिषक्ति पयो न धेनुः शुचिर्विभावा ॥२॥
दाधार क्षेममोको न रण्वो यवो न पक्वो जेता जनानाम् ॥३॥
ऋषिर्न स्तुभ्वा विक्षु प्रशस्तो वाजी न प्रीतो वयो दधाति ॥४॥
दुरोकशोचिः क्रतुर्न नित्यो जायेव योनावरं विश्वस्मै ॥५॥
चित्रो यदभ्राट्छ्वेतो न विक्षु रथो न रुक्मी त्वेषः समत्सु ॥६॥
सेनेव सृष्टामं दधात्यस्तुर्न दिद्युत्त्वेषप्रतीका ॥ ७ ॥
यमो ह जातो यमो जनित्वं जारः कनीनां पतिर्जनीनाम् ॥८॥
तं वश्चराथा वयं वसत्यास्तं न गावो नक्षन्त इद्धम् ॥९॥
सिन्धुर्न क्षेदः प्र नीचीरैनोन्नवन्त गावः स्वर्१दृशीके ॥१०॥

*rayirna chitrā sūro na saṁdṛgāyurna prāṇo nityo na sūnuḥ* //1 //
*takvā na bhūrṇirvanā siṣakti payo na dhenuḥ śuchirvibhāvā* //2 //
*dādhāra kṣemamoko na raṇvo yavo na pakvo jetā janānām* //3 //
*ṛṣirna stubhvā vikṣu praśasto vājī na prīto vayo dadhāti* //4 //
*durokaśochiḥ kraturna nityo jāyeva yonāvaraṁ viśvasmai* //5 //
*chitro yadabhrāṭchhveto na vikṣu ratho na rukmī tveṣaḥ samatsu* //6 //
*seneva sṛṣṭāmaṁ dadhātyasturna didyuttveṣapratīkā* // 7 //
*yamo ha jāto yamo janitvaṁ jāraḥ kanīnāṁ patirjanīnām* //8 //
*taṁ vaścharāthā vayaṁ vasatyāstaṁ na gāvo nakṣanta iddham* //9 //
*sindhurna kṣedaḥ pra nīchīrainonnavanta gāvaḥ sva1rdṛśīke* //10 //

ऋ. (Rv.) १.६७.१-१०

वनेषु जायुर्मर्तेषु मित्रो वृणीते श्रुष्टिं राजेवाजुर्यम् ॥१॥
क्षेमो न साधुः क्रतुर्न भद्रो भुवत्स्वाधीर्होता हव्यवाट् ॥२॥
हस्ते दधानो नृम्णा विश्वान्यमे देवान्धाद् गुहा निषीदन् ॥३॥
विदन्तीमत्र नरो धियंधा हृदा यत्तष्टान्मन्त्राँ अशंसन् ॥४॥
अजो न क्षां दाधार पृथिवीं तस्तम्भ द्यां मन्त्रेभिः सत्यैः ॥ ५ ॥
प्रिया पदानि पश्वे नि पाहि विश्वायुरग्ने गुहा गुहं गाः ॥६॥
य ई चिकेत गुहा भवन्तमा यः ससाद धारामृतस्य ॥ ७ ॥
वि ये चृतन्त्यृता सपन्त आदिद्वसूनि प्र ववाचास्मै ॥ ८ ॥
वि यो वीरुत्सु रोधन्महित्वोत प्रजा उत प्रसूष्वन्तः ॥ ९ ॥
चित्तिरपां दमे विश्वायुः सद्मेव धीराः संमाय चक्रुः ॥१०॥

*vaneṣu jāyurmarteṣu mitro vṛṇīte śruṣṭiṁ rājevājuryam* //1 //
*kṣemo na sādhuḥ kraturna bhadro bhuvatsvādhīrhotā havyavāṭ* //2 //
*haste dadhāno nṛmṇā viśvānyame devāndhād guhā niṣīdan* //3 //
*vidantīmatra naro dhiyaṁdhā hṛdā yattaṣṭānmantrāṁ̐ aśaṁsan* //4 //
*ajo na kṣāṁ dādhāra pṛthivīṁ tastambha dyāṁ mantrebhiḥ satyaiḥ* // 5 //
*priyā padāni paśve ni pāhi viśvāyuragne guhā guhaṁ gāḥ* //6 //
*ya ī chiketa guhā bhavantamā yaḥ sasāda dhārāmṛtasya* // 7 //
*vi ye chṛtantyṛtā sapanta ādidvasūni pra vavāchāsmai* // 8 //
*vi yo vīrutsu rodhanmahitvota prajā uta prasūṣvantaḥ* // 9 //
*chittirapāṁ dame viśvāyuḥ sadmeva dhīrāḥ saṁmāya chakruḥ* //10 //

ऋ. (Rv.)१.६८.१-१०

श्रीणन्नुप स्थाद्दिवं भुरण्युः स्थातुश्चरथमक्तून्व्यूर्णोत् ॥ १ ॥
परि यदेषामेको विश्वेषां भुवद्देवो देवानां महित्वा ॥२ ॥
आदित्ते विश्वे क्रतुं जुषन्त शुष्काद्यद्देव जीवो जनिष्ठाः ॥ ३ ॥
भजन्त विश्वे देवत्वं नाम ऋतं सपन्तो अमृतमेवैः ॥४ ॥
ऋतस्य प्रेषा ऋतस्य धीतिर्विश्वायुर्विश्वे अपांसि चक्रुः ॥ ५ ॥
यस्तुभ्यं दाशाद्यो वा ते शिक्षात्तस्मै चिकित्वान् रयिं दयस्व ॥६ ॥
होता निषत्तो मनोरपत्ये स चिन्न्वासां पती रयीणाम् ॥ ७ ॥
इच्छन्त रेतो मिथस्तनूषु सं जानत स्वैर्दक्षैरमूराः ॥ ८ ॥
पितुर्न पुत्राः क्रतुं जुषन्त श्रोषन्ये अस्य शासं तुरासः ॥ ९ ॥
वि राय और्णोद्दुरः पुरुक्षुः पिपेश नाकं स्तृभिर्दमूनाः ॥१० ॥

*śrīṇannupa sthāddivaṁ bhuraṇyuḥ sthātuścharathamaktūnvyūrṇot* // 1 //
*pari yadeṣāmeko viśveṣāṁ bhuvaddevo devānāṁ mahitvā* //2 //
*āditte viśve kratuṁ juṣanta śuṣkādyaddeva jīvo janiṣṭhāḥ* // 3 //
*bhajanta viśve devatvaṁ nāma ṛtaṁ sapanto amṛtamevaiḥ* //4 //
*ṛtasya preṣā ṛtasya dhītirviśvāyurviśve apāṁsi chakruḥ* // 5 //
*yastubhyaṁ dāśādyo vā te śikṣāttasmai chikitvān rayiṁ dayasva* //6 //
*hotā niṣatto manorapatye sa chinnvāsāṁ patī rayīṇām* // 7 //
*ichchhanta reto mithastanūṣu saṁ jānata svairdakṣeramūrāḥ* // 8 //
*piturna putrāḥ kratuṁ juṣanta śroṣanye asya śāsaṁ turāsaḥ* // 9 //
*vi rāya aurṇodduraḥ purukṣuḥ pipeśa nākaṁ stṛbhirdamūnāḥ* //10 //

ऋ. (Rv.)१.६९.१-१०

शुक्रः शुशुक्वाँ उषो न जारः पप्रा समीची दिवो न ज्योतिः ॥ १ ॥
परि प्रजातः क्रत्वा बभूथ भुवो देवानां पिता पुत्रः सन् ॥२ ॥
वेधा अदृप्तो अग्निर्विजानन्नूधर्न गोनां स्वाद्मा पितूनाम् ॥ ३ ॥
जने न शेव आहूर्यः सन्मध्ये निषत्तो रण्वो दुरोणे ॥४ ॥
पुत्रो न जातो रण्वो दुरोणे वाजी न प्रीतो विशो वि तारीत् ॥५ ॥
विशो यद्वहे नृभिः सनीळा अग्निर्देवत्या विश्वान्यश्याः ॥६ ॥
नकिष्ट एता व्रता मिनन्ति नृभ्यो यदेभ्यः श्रुष्टिं चकर्थ ॥७ ॥
तत्तु ते दंसो यदहन्त्समानैर्नृभिर्यद्युक्तो विवे रपांसि ॥८ ॥
उषो न जारो विभावोस्रः सांतरूपश्चिकेतदस्मै ॥ ९ ॥
त्मना वहन्तो दुरो व्यृण्वन्नवन्त विश्वे स्व१र्दृशीके ॥१० ॥

*śukraḥ śuśukvām̐ uṣo na jāraḥ paprā samīchī divo na jyotiḥ* // 1 //
*pari prajātaḥ kratvā babhūtha bhuvo devānāṁ pitā putraḥ san* //2 //
*vedhā adṛpto agnirvijānannūdharna gonāṁ svādmā pitūnām* // 3 //
*jane na śeva āhūryaḥ sanmadhye niṣatto raṇvo duroṇe* //4 //
*putro na jāto raṇvo duroṇe vājī na prīto viśo vi tārīt* //5 //
*viśo yadvahe nṛbhiḥ sanīḷā agnirdevatyā viśvānyaśyāḥ* //6 //
*nakiṣṭa etā vratā minanti nṛbhyo yadebhyaḥ śruṣṭiṁ chakartha* //7 //
*tattu te daṁso yadahantsamānairnṛbhiryadyukto vive rapāṁsi* //8 //
*uṣo na jāro vibhāvosraḥ sāāṁtarūpaśchiketadasmai* // 9 //
*tmanā vahanto duro vyṛṇvannavanta viśve sva1rdṛśīke* //10 //

ऋ. (Rv.)१.७०.१-११

वनेम पूर्वीरर्यो मनीषा अग्निः सुशोको विश्वान्यश्याः ॥१ ॥
आ दैव्यानि व्रता चिकित्वाना मानुषस्य जनस्य जन्म ॥२ ॥
गर्भो यो अपां गर्भो वनानां गर्भश्च स्थातां गर्भश्चरथाम् । ३ ॥
अद्रौ चिदस्मा अन्तर्दुरोणे विशां न विश्वो अमृतः स्वाधीः ॥४

स हि क्षपावाँ अग्नी रयीणां दाशद्यो अस्मा अरं सूक्तैः ॥ ५ ॥
एता चिकित्वो भूमा नि पाहि देवानां जन्म मर्ताश्च विद्वान् ॥ ६ ॥
वर्धान्यं पूर्वीः क्षपो विरूपाः स्थातुश्च रथमृतप्रवीतम् ॥ ७ ॥
अराधि होता स्व१र्निषत्तः कृण्वन्विश्वान्यपांसि सत्या ॥ ८ ॥
गोषु प्रशस्तिं वनेषु धिषे भरन्त विश्वे बलिं स्वर्णः ॥ ९ ॥
वि त्वा नरः पुरुत्रा सपर्यन्पितुर्न जिव्रेर्वि वेदो भरन्त ॥१० ॥
साधुर्न गृध्नुरस्तेव शूरो यातेव भीमस्त्वेषः समत्सु ॥ ११ ॥

*vanema pūrvīraryo manīṣā agniḥ suśoko viśvānyaśyāḥ //1 //*
*ā daivyāni vratā chikitvānā mānuṣasya janasya janma //2 //*
*garbho yeā apāṁ garbho vanānāṁ garbhaścha sthātāṁ garbhaścharathām / 3 //*
*adrau chidasmā antardurone viśāṁ na viśvo amṛtaḥ svādhīḥ //4*
*sa hi kṣapāvām̐ agnī rayīṇāṁ dāśadyo asmā araṁ sūktaiḥ // 5 //*
*etā chikitvo bhūmā ni pāhi devānāṁ janma martāścha vidvān // 6 //*
*vardhānyaṁ pūrvīḥ kṣapo virūpāḥ sthātuścha rathamṛtapravītam // 7 //*
*arādhi hotā sva1rniṣattaḥ kṛṇvanviśvānyapāṁsi satyā // 8 //*
*goṣu praśasiṁta vaneṣu dhiṣe bharanta viśve baliṁ svarṇaḥ // 9 //*
*vi tvā naraḥ purutrā saparyanpiturna jivrervi vedo bharanta //10 //*
*sādhurna gṛdhnurasteva śūro yāteva bhīmastveṣaḥ samatsu // 11 //*

ऋ. (Rv.)१.७१.१-१०

उप प्र जिन्वन्नुशतीरुशन्तं पतिं न नित्यं जनयः सनीळाः ।
स्वसारः श्यावीमरुषीजुष्रिंचत्रमुच्छन्तीमुषसं न गावः ॥१ ॥
वीळु चिद् दृळ्हा पितरो न उक्थैरद्रिं रुजन्नङ्गिरसो रवेण ।
चक्रुर्दिवो बृहतो गातुमस्मे अहः स्वर्विविदुः केतुमुस्राः ॥२ ॥
दधन्नृतं धनयन्नस्य धीतिमादिदर्यो दिधिष्वो३ विभृत्राः ।
अतृष्यन्तीरपसो यन्त्यच्छा देवांजन्म प्रयसा वर्धयन्तीः ॥३ ॥
मथीद्यदीं विभृतो मातरिश्वा गृहेगृहे श्येतो जेन्यो भूत् ।
आदीं राो न सहीयसे सचा सन्ना दूत्यं१भृगवाणो विवाय ॥४ ॥
महे यत्पित्र ई रसं दिवे करव त्सरपृशन्यश्चिकित्वान् ।
सृजदस्ता धृषता दिद्युमस्मै स्वायां देवो दुहितरि त्विषिं धात् ॥५ ॥
स्व आ यस्तुभ्यं दम आ विभाति नमो वा दाशादुशतो अनु द्यून् ।
वर्धे अग्ने वयो अस्य द्विबर्हा यासद्राया सरथं यं जुनासि ॥६ ॥
अग्निं विश्वा अभि पृक्षः सचन्ते समुद्रं न स्रवतः सप्त यह्वीः ।
न जामिभिर्वि चिकिते वयो नो विदा देवेषु प्रमतिं चिकित्वान् ॥७ ॥
आ यदिषे नृपतिं तेज आनट्छुचि रेतो निषिक्तं द्यौरभीके ।
अग्निः शर्धमनवद्यं युवानं स्वाध्यं जनयत्सूदयच्च ॥८ ॥
मनो न योऽध्वनः सद्य एत्येकः सत्रा सूरो वस्व ईशे ।
रजाना मित्रावरुणा सुपाणी गोषु प्रियममृतं रक्षमाणा ॥९ ॥
मा नो अग्ने सख्या प्रियाणि प्र मर्षिष्ठा अभि विदुष्कविः सन् ।
नभो न रूपं जरिमा मिनाति पुरा तस्या अभिशस्तेरधीहि ॥१० ॥

*upa pra jinvannuśatīruśantaṁ patiṁ na nityaṁ janayaḥ sanīḷāḥ /*
*svasāraḥ śyāvīmaruṣījuṣriṁchatramuchchhantīmuṣasaṁ na gāvaḥ //1 //*
*vīḷu chid dṛḷhā pitaro na ukthairadriṁ rujannaṅgiraso raveṇa /*
*chakrurdivo bṛhato gātumasme ahaḥ svarvividuḥ ketumusrāḥ //2 //*
*dadhannṛtaṁ dhanayannasya dhītimādidaryo didhiṣvo3 vibhṛtrāḥ /*
*atṛṣyantīrapaso yantyachchhā devāṁjanma prayasā vardhayantīḥ //3 //*
*mathīdyadīṁ vibhṛto mātariśvā gṛhegṛhe śyeto jenyo bhūt /*
*ādīṁ rāo na sahīyase sachā sannā dūtyaṁ1bhṛgavāṇo vivāya //4 //*

*mahe yatpitra ī rasaṁ dive karava tsarapṛśanyaśchikitvān* ।
*sṛjadastā dhṛṣatā didyumasmai svāyāṁ devo duhitari tviṣiṁ dhāt* ॥5॥
*sva ā yastubhyaṁ dama ā vibhāti namo vā dāśādusato anu dyūn* ।
*vardhe agne vayo asya dvibarhā yāsadrāyā sarathaṁ yaṁ junāsi* ॥6॥
*agiṁna viśvā abhi pṛkṣaḥ sachante samudraṁ na sravataḥ sapta yahnīḥ* ।
*na jāmibhirvi chikite vayo no vidā deveṣu pramatiṁ chikitvān* ॥7॥
*ā yadiṣe nṛpatiṁ teja ānaṭchhuchi reto niṣiktaṁ dyaurabhīke* ।
*agniḥ śardhamanavadyaṁ yuvānaṁ svādhyaṁ janayatsūdayachcha* ॥8॥
*mano na yo'dhvanaḥ sadya etyekaḥ satrā sūro vasva īśe* ।
*rajānā mitrāvaruṇā supāṇī goṣu priyamamṛtaṁ rakṣamāṇā* ॥9॥
*mā no agne sakhyā priyāṇi pra marṣiṣṭhā abhi viduṣkaviḥ san* ।
*nabho na rūpaṁ jarimā mināti purā tasyā abhiśasteradhīhi* ॥10॥

ऋ. (Rv.)१.७२.१-१०

नि काव्या वेधसः शश्वतस्कर्हस्ते दधानो नर्या पुरूणि ।
अग्निर्भुवद्रयिपती रयीणां सत्रा चक्राणो अमृतानि विश्वा ॥१॥
अस्मे वत्सं परि षन्तं न विन्दन्निच्छन्तो विश्वे अमृता अमूराः ।
श्रमयुवः पदव्यो धियंधास्तस्थुः पदे परमे चार्वग्नेः ॥२॥
तिस्रो यदग्ने शरदस्त्वामिच्छुचिं घृतेन शुचयः सपर्यान् ।
नामानि चिद्दधिरे यियान्यसूदयन्त तन्वः१ सुजाताः ॥३॥
आ रोदसी बृहती वेविदानाः प्र रुद्रिया जभ्रिरे यियासः ।
विदन्मर्तो नेमधिता चिकित्वानग्ं्न पदे परमे तस्थिवांसम् ॥४॥
संजनानां उप सीदन्नभिज्ञु पत्नीवन्तो नमस्यं नमस्यन् ।
रिरिक्वांसस्तन्वः कृण्वत स्वाः सखा सख्युर्निमिषि रक्षमाणाः ॥५॥
त्रिः सप्त यद्गुह्यानि त्वे इत्पदाविदन्निहिता यियासः ।
तेभी रक्षन्ते अमृतं सजोषाः पशूंच स्थातं चरथं च पाहि ॥६॥
विद्वाँ अग्ने वयुनानि क्षितीनां व्यानुषक्छुरुधो जीवसे धाः ।
अन्तर्विद्वाँ अध्वनो देवयानानतन्द्रो दूतो अभवो हविर्वाट् ॥७॥
स्वाध्यो दिव आ सप्त यह्वी रायो दुरो व्यृताा अजानन् ।
विदद्गव्यं सरमा दृळहमूर्व येना नु कं मानुषी भोजते विट् ॥८॥
आ ये विश्वा स्वपत्यानि तस्थुः कृण्वानासो अमृतत्वाय गातुम् ।
मह्वा महद्भिः पृथिवी वि तस्थे माता पुत्रैरदितिर्धायसे वेः ॥९॥
अधि श्रियं नि दधुश्चारुमस्मिन्दिवो यदक्षी अमृता अकृण्वन् ।
अध क्षरन्ति सिन्धवो न सृष्टाः प्र नीचीरग्ने अरुषीरजानन् ॥१०॥

*ni kāvyā vedhasaḥ śaśvataskarhaste dadhāno naryā purūṇi* ।
*agnirbhuvadrayipatī rayīṇāṁ satrā chakrāṇo amṛtāni viśvā* ॥1॥
*asme vatsaṁ pari ṣantaṁ na vindannichchhanto viśve amṛtā amūrāḥ* ।
*śramayuvaḥ padavyo dhiyaṁdhāstasthuḥ pade parame chārvagneḥ* ॥2॥
*tisro yadagne śaradastvāmichchhuchiṁ ghṛtena śuchayaḥ saparyān* ।
*nāmāni chiddadhire yiāyānyasūdayanta tanvaḥ1 sujātāḥ* ॥3॥
*ā rodasī bṛhatī vevidānāḥ pra rudriyā jabhrire yiāyāsaḥ* ।
*vidanmarto nemadhitā chikitvānagiṁna pade parame tasthivāṁsam* ॥4॥
*saṁjanānāṁ upa sīdannabhiāu patnīvanto namasyaṁ namasyan* ।
*ririkvāṁsastanvaḥ kṛṇvata svāḥ sakhā sakhyurnimiṣi rakṣamāṇāḥ* ॥5॥
*triḥ sapta yadguhyāni tve itpadāvidannihitā yiāyāsaḥ* ।
*tebhī rakṣante amṛtaṁ sajoṣāḥ paśūṁcha sthātaṁ charathaṁ cha pāhi* ॥6॥
*vidvām̐ agne vayunāni kṣitīnāṁ vyānuṣakchhurudho jīvase dhāḥ* ।
*antarvidvām̐ adhvano devayānānatandro dūto abhavo havirvāṭ* ॥7॥
*svādhyo diva ā sapta yahnī rāyo duro vyṛtāā ajānan* ।

*vidadgavyaṁ saramā dṛḷahamūrva yenā nu kaṁ mānuṣī bhojate viṭ ॥8॥*
*ā ye viśvā svapatyāni tasthuḥ kṛṇvānāso amṛtatvāya gātum ।*
*mahnā mahadbhiḥ pṛthivī vi tasthe mātā putrairaditirdhāyase veḥ ॥9॥*
*adhi śriyaṁ ni dadhuśchārumasmindivo yadakṣī amṛtā akṛṇvan ।*
*adha kṣaranti sindhavo na sṛṣṭāḥ pra nīchīragne aruṣīrajānan ॥10॥*

ऋ. (Rv.)१.७३.१-१०

रयिर्न यः पितृवित्तो वयोधाः सुप्रणीतिश्चिकितुषो न शासुः ।
स्योनशीरतिथिर्न प्रीणानो होतेव सद्म विधतो वि तारीत् ॥१॥
देवो न यः सविता सत्यमन्मा क्रत्वा निपाति वृजनानि विश्वा ।
पुरुप्रशस्तो अमतिर्न सत्य आत्मेव शेवो दिधिषाय्यो भूत् ॥२॥
देवो न यः पृथिवीं विश्वधाया उपक्षेति हितमित्रो न राजा ।
पुरः सदः शर्मसदो न वीरा अनवद्या पतिजुष्टेव नारी ॥३॥
तं त्वा नरो दम आ नित्यमिद्धमग्ने सचन्त क्षितिषु ध्रुवासु ।
अधि द्युम्नं नि दधुर्भूर्यस्मिन्भवा विश्वायुर्धरुणो रयीणाम् ॥४॥
वि पृक्षो अग्ने मघवानो अश्युर्वि सूरयो ददतो विश्वमायुः ।
सनेम वाजं समिथेष्वर्यो भागं देवेषु श्रवसे दधानाः ॥५॥
ऋतस्य हि धेनवो वावशानाः स्मदूध्नीः पीपयन्त द्युभक्ताः ।
परावतः सुमतिं भिक्षमाणा वि सिन्धवः समया सस्रुरद्रिम् ॥६॥
त्वे अग्ने सुमतिं भिक्षमाणा दिवि श्रवो दधिरे यियासः ।
नक्ता च चक्रुरुषसा विरूपे कृष्णं च वर्णमरुणं च सं धुः ॥७॥
यान् राये मर्तान्त्सुषूदो अग्ने ते स्याम मघवानो वयं च ।
छायेव विश्वं भुवनं सिसक्ष्यापप्रिवान्रोदसी अन्तरिक्षम् ॥८॥
अर्वद्भिरग्ने अर्वतो नृभिर्नृन्वीरैर्वीरान्वनुयामा त्वोताः ।
ईशानासः पितृवित्तस्य रायो वि सूरयः शतहिमा नो अश्युः ॥९॥
एता ते अग्न उचथानि वेधो जुष्टानि सन्तु मनसे हृदे च ।
शकेम रायः सुधुरो यमं तेऽधि श्रवो देवभक्तं दधानाः ॥१०॥

*rayirna yaḥ pitṛvitteā vayodhāḥ supraṇītiśchikituṣo na śāsuḥ ।*
*syonaśīratithirna prīṇāno hoteva sadma vidhato vi tārīt ॥1॥*
*devo na yaḥ savitā satyamanmā kratvā nipāti vṛjanāni viśvā ।*
*purupraśasto amatirna satya ātmeva śevo didhiṣāyyo bhūt ॥2॥*
*devo na yaḥ pṛthivīṁ viśvadhāyā upakṣeti hitamitreā na rājā ।*
*puraḥ sadaḥ śarmasado na vīrā anavadyā patijuṣṭeva nārī ॥3॥*
*taṁ tvā naro dama ā nityamiddhamagne sachanta kṣitiṣu dhruvāsu ।*
*adhi dyumnaṁ ni dadhurbhūryasminbhavā viśvāyurdharuṇo rayīṇām ॥4॥*
*vi pṛkṣo agne maghavāno aśyurvi sūrayo dadato viśvamāyuḥ ।*
*sanema vājaṁ samitheṣvaryo bhāgaṁ deveṣu śravase dadhānāḥ ॥5॥*
*ṛtasya hi dhenavo vāvaśānāḥ smadūdhnīḥ pīpayanta dyubhaktāḥ ।*
*parāvataḥ sumatiṁ bhikṣamāṇā vi sindhavaḥ samayā sasruradrim ॥6॥*
*tve agne sumatiṁ bhikṣamāṇā divi śravo dadhire yiāyāsaḥ ।*
*naktā cha chakruruṣasā virūpe kṛṣṇaṁ cha varṇamaruṇaṁ cha saṁ dhuḥ ॥7॥*
*yān rāye martāntsuṣūdo agne te syāma maghavāno vayaṁ cha ।*
*chhāyeva viśvaṁ bhuvanaṁ sisakṣayāpaprivānnodasī antarikṣam ॥8॥*
*arvadbhiragne arvato nṛbhinanvīrairvīrānvanuyāmā tvotāḥ ।*
*īśānāsaḥ pitṛvittasya rāyo vi sūrayaḥ śatahimā no aśyuḥ ॥9॥*
*etā te agna uchathāni vedho juṣṭāni santu manase hṛde cha ।*
*śakema rāyaḥ sudhuro yamaṁ te'dhi śravo devabhaktaṁ dadhānāḥ ॥10॥*

२. पवमानः सोमः (Pavamānaḥ Somaḥ) - सा. (Sv.) ५२५; ५२९; ५३४; ५४२; ८५९; ८६०; ८६१; १२५३-१२५५; १३५७-१३५९

सा. (Sv.) ५२५

तिस्रो वाच ईरयति प्र वह्निर्ऋतस्य धीतिं ब्रह्मणो मनीषाम् ।
गावो यन्ति गोपतिं पृच्छमानाः सोमं यन्ति मतयो वावशानाः ॥३ ॥
*tisro vācha īrayati pra vahnirṛtasya dhītiṁ brahmaṇo manīṣām /*
*gāvo yanti gopatiṁ pṛchchhamānāḥ somaṁ yanti matayo vāvaśānāḥ //3 //*

सा. (Sv.) ५२९

अक्रांत्समुद्रः प्रथमे विधर्म जनयन् प्रजा भुवनस्य गोपाः ।
वृषा पवित्रे अधि सानो अव्ये बृहत्सोमो वावृधे स्वानो अद्रिः ॥७ ॥
*akrāṁtsamudraḥ prathame vidharma janayan prajā bhuvanasya gopāḥ /*
*vṛṣā pavitre adhi sāno avye bṛhatsomo vāvṛdhe svāno adriḥ //7 //*

सा. (Sv.) ५३४

प्र ते धारा मधुमतीरसृग्रन्वारं यत्पूतो अत्येष्यव्यम् ।
पवमान पवसे धाम गोनां जनयत्सूर्यमपिन्वो अर्कैः ॥२ ॥
*pra te dhārā madhumatīrasṛgranvāraṁ yatpūto atyeṣyavyam /*
*pavamāna pavase dhāma gonāṁ janayatsūryamapinvo arkaiḥ //2 //*

सा. (Sv.) ५४२

महत्तत्सोमो महिषश्चकारपां यद्गर्भोऽवृणीत देवान् ।
अदधादिन्द्रे पवमान ओजोऽजनयत्सूर्ये ज्योतिरिन्दुः ॥१० ॥
*mahattatsomo mahiṣaśchakārapāṁ yadgarbho'vṛṇīta devān /*
*adadhādindre pavamāna Ojo'janayatsūrye jyotirinduḥ //10 //*

सा. (Sv.) ८५९-८६१

तिस्रो वाच ईरयति प्र वह्निर्ऋतस्य धीतिं ब्रह्मणो मनीषाम् ।
गावो यन्ति गोपतिं पृच्छमानाः सोमं यन्ति मतयो वावशानाः ॥१ ॥
सोमं गावो धेनवो वावशानाः सोमं विप्रा मतिभिः पृच्छमानाः ।
सोमः सुत ऋच्यते पुयमानः सोमे अर्कास्त्रिष्टुभः सं नवन्ते ॥२ ॥
एवा नः सोम परिषिच्यमान आ पवस्व पूयमानः स्वस्ति ।
इन्द्रमा विश बृहता मदेन वर्धया वाचं जनया पुरन्धिम् ॥३ ॥
*tisro vācha īrayati pra vahnirṛtasya dhītiṁ brahmaṇo manīṣām /*
*gāvo yanti gopatiṁ pṛchchhamānāḥ somaṁ yanti matayo vāvaśānāḥ //1 //*
*somaṁ gāvo dhenavo vāvaśānāḥ somaṁ viprā matibhiḥ pṛchchhamānāḥ /*
*somaḥ suta ṛchyate puyamānaḥ some arkāstriṣṭubhaḥ saṁ navante //2 //*
*evā naḥ soma pariṣichyamāna ā pavasva pūyamānaḥ svasti /*
*indramā viśa bṛhatā madena vardhayā vāchaṁ janayā purandhim //3 //*

सा. (Sv.) १२५३-१२५५

अक्रान्त्समुद्रः प्रथमे विधर्मन् जनयन्प्रजा भुवनस्य गोपाः ।
वृषा पवित्रे अधि सानो अव्ये बृहत्सोमो वावृधे स्वानो अद्रिः ॥१ ॥
मत्सि वायुमिष्टये राधसे नो मत्सि मित्रावरुणा पूयमानः ।
मत्सि शर्धो मारुतं मत्सि देवान्मत्सि द्यावापृथिवी देव सोम ॥२ ॥
महत्तत्सोमो महिषश्चकारापां यद्गर्भोऽवृणीत देवान् ।
अदधादिन्द्रे पवमान ओजोऽजनयत्सूर्ये ज्योतिरिन्दुः ॥३ ॥
*akrāntsamudraḥ prathame vidharman janayanprajā bhuvanasya gopāḥ /*
*vṛṣā pavitre adhi sāno avye bṛhatsomo vāvṛdhe svāno adriḥ //1 //*
*matsi vāyumiṣṭaye rādhase no matsi mitrāvaruṇā pūyamānaḥ /*
*matsi śardho mārutaṁ matsi devānmatsi dyāvāpṛthivī deva soma //2 //*
*mahattatsomo mahiṣaśchakārāpāṁ yadgarbho'vṛṇīta devān /*

*adadhādindre pavamāna Ojo'janayatsūrye jyotirinduḥ ॥3 ॥*

सा. (Sv.) १३५७-१३५९

आ जागृविर्विप्र ऋतं मतीनां सोमः पुनानो असदच्चमूषु ।
सपन्ति यं मिथुनासो निकासा अध्वर्यवो रथिरासः सुहस्ता ॥१ ॥
*ā jāgṛvirvapra ṛtaṁ matīnāṁ somaḥ punāno asadachchamūṣu ।*
*sapanti yaṁ mithunāso nikāsā adhvaryavo rathirāsaḥ suhastā ॥1 ॥*

## ३४२. परुच्छेपः (Paruchchhepaḥ)

१. इन्द्रः (Indraḥ) - अ. (Av.) २०.६७.१-३; २०.७२.१-३; २०.७५.१-३

अ. (Av.) २०.६७.१-३

वनोति हि सुन्वन् क्षयं परीणसः सुन्वानो हि ष्मा यजत्यव द्विषो देवानामव द्विषः ।
सुन्वान इत् सिषासति सहस्रा वाज्यवृतः । सुन्वानायेन्द्रो ददात्याभुवं रयिं ददात्याभुवम् ॥१ ॥
मो षु वो अस्मदभि तानि पौंस्या सना भूवन् द्युम्नानि मोत जारिषुरस्मत् पुरोत जारिषुः ।
यद् वश्चित्रं युगे युगे नव्यं घोषादमर्त्यम् ।
अस्मासु तन्मरुतो यच्च दुष्टरं दिधृता यच्च दुष्टरम् ॥२ ॥
अग्निं होतारं मन्ये दास्वन्तं वसुं सूनुं सहसो जातवेदसं विप्रं न जातवेदसम् ।
य ऊर्ध्वया स्वध्वरो देवो देवाच्या कृपा ।
घृतस्य विभ्राष्टिमनु वष्टि शोचिषाजुह्वानस्य सर्पिषः ॥३ ॥
*vanoti hi sunvan kṣayaṁ parīṇasaḥ sunvāno hi ṣmā yajatyava dviṣo devānāmava dviṣaḥ ।*
*sunvāna it siṣāsati sahasrā vājyavṛtaḥ ।*
*sunvānāyendro dadātyābhuvaṁ rayiṁ dadātyābhuvam ॥1 ॥*
*mo ṣu vo asmadabhi tāni pauṁsyā sanā bhūvan dyumnāni mota jāriṣurasmat purota jāriṣuḥ ।*
*yad vaśchitraṁ yuge yuge navyaṁ ghoṣādamartyam ।*
*asmāsu tanmaruto yachcha duṣṭaraṁ didhṛtā yachcha duṣṭaram ॥2 ॥*
*agiṁna hotāraṁ manye dāsvantaṁ vasuṁ sūnuṁ sahaso jātavedasaṁ vipraṁ na jātavedasam ।*
*ya ūrdhvayā svadhvaro devo devāchyā kṛpā ।*
*ghṛtasya vibhrāṣṭimanu vaṣṭi śochiṣājuhnānasya sarpiṣaḥ ॥3 ॥*

अ. (Av.) २०.७२.१-३

विश्वेषु हि त्वा सवनेषु तुंजते समानमेकं वृषमण्यवः पृथक् स्वः सनिष्यवः पृथक् ।
तं त्वा नावं न पर्षणिं शूषस्य धुरि धीमहि ।
इन्द्रं न यौश्चितयन्त आयव स्तोमेभिरिन्द्रमायवः ॥१ ॥
वि त्वा ततस्रो मिथुना अवस्यवो व्रजस्य साता गव्यस्य निः सृजः
सक्षन्त इन्द्र निः सृजः ।
यद् गव्यन्ता द्वा जना स्व१र्यन्ता समूहसि ।
आविष्करिक्रद् वृषणं सचाभुवं वज्रमिन्द्र सचाभुवम् ॥२ ॥
उतो नो अस्या उषसो जुषेत ह्य१र्कस्य बोधि हवीमभिः स्वर्षाता हविषो हवीमभिः ।
यदिन्द्र हन्तवे मृधो वृषा वज्रिंचिकेतसि ।
आ मे अस्य वेधसो नवीयसो मन्म श्रुधि नवीयसः ॥३ ॥
*viśveṣu hi tvā savaneṣu tuṁjate samānamekaṁ vṛṣamaṇyavaḥ pṛthak svaḥ saniṣyavaḥ pṛthak ।*
*taṁ tvā nāvaṁ na parṣaṇiṁ śūṣasya dhuri dhīmahi ।*
*indraṁ na yauśchitayanta āyava stomebhirindramāyavaḥ ॥1 ॥*
*vi tvā tatasro mithunā avasyaveā vrajasya sātā gavyasya niḥ sṛjaḥ*
*sakṣanta indra niḥ sṛjaḥ ।*
*yad gavyantā dvā janā sva1ryantā samūhasi ।*

*āviṣkarikrad vṛṣaṇaṁ sachābhuvaṁ vajramindra sachābhuvam ॥2॥*
*uto no asyā uṣaso juṣeta hya1rkasya bodhi havīmabhiḥ svarṣātā haviṣo havīmabhiḥ ।*
*yadindra hantave mṛdho vṛṣā vajriṁchiketasi ।*
*ā me asya vedhaso navīyaso manma śrudhi navīyasaḥ ॥3॥*

अ. (Av.) २०.७५.१-३

वि त्वा ततस्रे मिथुना अवस्यवो व्रजस्य साता गव्यस्य निः सृजः सक्षन्त इन्द्र निः सृजः ।
यद् गव्यन्ता द्वा जना स्व१र्यन्ता समूहसि।
आविष्करिक्रद् वृषणं सचाभुवं वज्रमिन्द्र सचाभुवम् ॥१।
विदुष्टे अस्य वीर्यस्य पूरवः पुरो यदिन्द्र शारदीरवातिरः सासहानो अवातिरः ।
शासस्तमिन्द्र मर्त्यमयज्युं शवसस्पते। महीममुष्णाः पृथिवीमिमा अपो मन्दसान इमा अपः ॥२॥
आदित् ते अस्य वीर्यस्य चर्किरन्मदेषु वृषन्नुशिजो यदाविथ सखीयतो यदाविथ ।
चकर्थ कारमेभ्यः पृतनासु प्रवन्तवे। ते अन्यामन्यां नद्यं सनिष्णत श्रवस्यन्तः सनिष्णत ॥३॥

*vi tvā tatasre mithunā avasyavo vrajasya sātā gavyasya niḥ sṛjaḥ sakṣanta indra niḥ sṛjaḥ ।*
*yad gavyantā dvā janā sva1ryantā samūhasi ।*
*āviṣkarikrad vṛṣaṇaṁ sachābhuvaṁ vajramindra sachābhuvam ॥1।*
*viduṣṭe asya vīryasya pūravaḥ puro yadindra śāradīravātiraḥ sāsahāno avātiraḥ ।*
*śāsastamindra martyamayajyuṁ śavasaspate । mahīmamuṣṇāḥ pṛthivīmimā apo mandasāna imā apaḥ ॥2॥*
*ādit te asya vīryasya charkiranmadeṣu vṛṣannuśijo yadāvitha sakhīyato yadāvitha ।*
*chakartha kāramebhyaḥ pṛtanāsu pravantave । te anyāmanyāṁ nadyaṁ saniṣṇata śravasyantaḥ saniṣṇata ॥3॥*

## ३४३. परुच्छेपो दैवोदासिः (Paruchchhepo Daivodāsiḥ)

१. अग्निः (Agniḥ) - ऋ. (Rv.)१.१२७.१-११; १.१२८.१-८; १.१३९.७; सा. (Sv.) ४६५; १८१३-१५

ऋ. (Rv.)१.१२७.१-११

अग्निं होतारं मन्ये दास्वन्तं वसुं सूनुं सहसो जातवेदसं विप्रं न जातवेदसम् ।
य ऊर्ध्वया स्वध्वरो देवो देवाच्या कृपा ।
घृतस्य विभ्राष्टिमनु वष्टि शोचिषजुह्वानस्य सर्पिषः ॥१॥
यजिष्ठं त्वा यजमाना हुवेम ज्येष्ठमंगिरसां विप्र मन्मभिर्विप्रेभिः शुक्र मन्मभिः ।
परिज्मानमिव द्यां होतारं चर्षणीनाम् ।
शोचिष्केशं वृषणं यमिमा विशः प्रावन्तु जूतये विशः ॥२॥
स हि पुरू चिदोजसा विरुक्मता दीद्यानो भवति द्रुहंतरः परशुर्न द्रुहंतरः ।
वीळु चिद्यस्य समृतौ श्रुवद्वनेव यत्स्थिरम् ।
निष्षहमाणो यमते नायते धन्वासहा नायते ॥३॥
द्दळहा चिदस्मा अनु दुर्यथा विदे तेजिष्ठाभिररणिभिर्दाष्ट्यवसेऽग्नये दाष्ट्यवसे ।
प्र यः पुरूणि गाहते तक्षद्वनेव शेचिषा ।
स्थिरा चिदन्ना नि रिणात्योजसा नि स्थिराणि चिदोजसा ॥४॥
तमस्य पृक्षमुपरासु धीमहि नक्तं ।
यः सुदर्शतरो दिवातरादप्रायुषे दिवातरात्। आदस्यायुर्ग्रभणवद्वीळु शर्म न सूनवे ।
भक्त मभक्तमवो व्यन्तो अजरा अग्नयो व्यन्तो अजराः ॥५॥
स हि शर्धो न मारुतं तुविष्वणिरप्नस्वतीषूर्वरास्विष्टनिरार्तनास्विष्टनिः ।
आदद्धव्यान्यादर्दियास्य केतुरर्हणा ।
अधसमास्य हर्षतो हृषीवतो विश्वे जुषन्त पन्थां नरः शुभे न पन्थाम् ॥६॥
द्विता यदीं कीस्तासो अभिद्यवो नमस्यन्त उपवोचन्त भृगवो मथ्नन्तो दाशा भृगवः ।
अग्निरीशे वसूनां शुचिर्यो धृणिरेषाम् ।

प्रियाँ अपिधीँर्वनिषीष्ट मेधिर आ वनिषीष्ट मेधिरः ॥७॥
विश्वासां त्वा विशां पतिं हवामहे सर्वासां समानं दंपतिं भुजे सत्यगिर्वाहसं भुजे ।
अतिथिं मानुषाणां पितुर्न यस्यासया ।
अमी च विश्वे अमृतास आ वयो हव्या देवेष्वा वयः ॥८॥
त्वमग्ने सहसा सहन्तमः शुष्मिन्तमो जायसे देवतातये रयिर्न देवतातये ।
शुष्मिन्तमो हि ते मदो द्युम्निन्तम उत क्रतुः ।
अध स्मा ते परि चरन्त्यजर श्रुष्टीवानो नाजर ॥९॥
प्र वो महे सहसा सहस्वत उषर्बुधे पशुषे नाग्नये स्तोमो बभूत्वग्नये ।
प्रति यदीं हविष्मान्विश्वासु क्षासु जोगुवे ।
अग्रे रेभो न जरत ऋषूणां जूर्णिर्होत ऋषूणाम् ॥१०॥
स नो नेदिष्ठं ददृशान आ भराग्ने देवेभिः सचनाः सुचेतुना महो रायः सुचेतुना ।
महि शविष्ठ नस्कृधि संचक्षे भुजे अस्यै ।
महि स्तोतृभ्यो मघवन्त्सुवीर्यं मथीरुग्रो न शवसा ॥११॥

*agniṁ hotāraṁ manye dāsvantaṁ vasuṁ sūnuṁ sahaso jātavedasaṁ vipraṁ na jātavedasam /*
*ya ūrdhvayā svadhvaro devo devāchyā kṛpā /*
*ghṛtasya vibhrāṣṭiṣmanu vaṣṭi śochiṣajuhnānasya sarpiṣaḥ //1 //*
*yajiṣṭhaṁ tvā yajamānā huvema jyeṣṭhamaṁgirasāṁ vipra manmabhirviprebhiḥ śukra manmabhiḥ /*
*parijmānamiva dyāṁ hotāraṁ charṣaṇīnām /*
*śochiṣkeśaṁ vṛṣaṇaṁ yamimā viśaḥ prāvantu jūtaye viśaḥ //2 //*
*sa hi purū chidojasā virukmatā dīdyāāno bhavati druhaṁtaraḥ paraśurna druhaṁtaraḥ /*
*vīḻu chidyasya samṛtau śruvadvaneva yatsthiram /*
*niṣṣahamāṇo yamate nāyate dhanvāsahā nāyate //3 //*
*dṛḻahā chidasmā anu duryathā vide tejiṣṭhābhiraraṇibhirdāṣṭyavase'gnaye dāṣṭyavase /*
*pra yaḥ purūṇi gāhate takṣadvaneva śechiṣā /*
*sthirā chidannā ni riṇātyojasā ni sthirāṇi chidojasā //4 //*
*tamasya pṛkṣamuparāsu dhīmahi naktaṁ /*
*yaḥ sudarśataro divātarādaprāyuṣe divātarāt / ādasyāyurgrabhaṇavadvīḻu śarma na sūnave /*
*bhakta mabhaktamavo vyanto ajarā agnayo vyanto ajarāḥ //5 //*
*sa hi śardho na mārutaṁ tuviṣvaṇirapnasvatīṣūrvarāsviṣṭanirārtanāsviṣṭaniḥ /*
*ādaddhavyānyādadiryāsya keturarhaṇā /*
*adhasamāsya harṣato hṛṣīvato viśve juṣanta panthāṁ naraḥ śubhe na panthām //6 //*
*dvitā yadīṁ kīstāso abhidyavo namasyanta upavochanta bhṛgavo mathnanto dāśā bhṛgavaḥ /*
*agnirīśe vasūnāṁ śuchiryo dhṛṇireṣām /*
*priyāṁ̐ apidhīṁ̐rvaniṣīṣṭa medhira ā vaniṣīṣṭa medhiraḥ //7 //*
*viśvāsāṁ tvā viśāṁ patiṁ havāmahe sarvāsāṁ samānaṁ daṁpatiṁ bhuje satyagirvāhasaṁ bhuje /*
*atithiṁ mānuṣāṇāṁ piturna yasyāsayā /*
*amī cha viśve amṛtāsa ā vayo havyā deveṣvā vayaḥ //8 //*
*tvamagne sahasā sahantamaḥ śuṣmintamo jāyase devatātaye rayirna devatātaye /*
*śuṣmintamo hi te mado dyumnintama uta kratuḥ /*
*adha smā te pari charantyajara śruṣṭīvāno nājara //9 //*
*pra vo mahe sahasā sahasvata uṣarbudhe paśuṣe nāgnaye stomo babhūtvagnaye /*
*prati yadīṁ haviṣmānviśvāsu kṣāsu joguve /*
*agre rebho na jarata ṛṣūṇāṁ jūrṇirhota ṛṣūṇām //10 //*

*sa no nediṣṭhaṁ dadṛśāna ā bharāgne devebhiḥ sachanāḥ suchetunā maho rāyaḥ suchetunā* ।
*mahi śaviṣṭha naskṛdhi saṁchakṣe bhuje asyai* ।
*mahi stotṛbhyo maghavantsuvīrya mathīrugro na śavasā* ॥11॥

ऋ. (Rv.)१.१२८.१-८

अयं जायत मनुषो धरीमणि होता यजिष्ठ उशिजामनु व्रतमग्निः स्वमनु व्रतम् ।
विश्वश्रुष्टिः सखीयते रयिरिव श्रवस्यते ।
अदब्धो होता नि षददिळस्पदे परिवीत इळस्पदे ॥१॥
तं यासाधमपि वातयामस्यृतस्य पथा नमसा हविष्मता देवताता हविष्मता ।
स न ऊर्जामुपाभृत्यया कृपा न जूर्यति ।
यं मातरिश्वा मनवे परावतो देवं भाः परावतः ॥२॥
एवेन सद्यः पर्येति पार्थिवं मुहुर्गी रेतो वृषभः कनिक्रदद्दधद्रेतः कनिक्रदत् ।
शतं चक्षाणो अक्षभिर्देवो वनेषु तुर्वणिः ।
सदो दधान उपरेषु सानुष्वग्निः परेषु सानुषु ॥३॥
स सुक्रतुः पुरोहितो दमेदमेऽग्निर्यासयाध्वरस्य चेतति क्रत्वा यास्य चेतति ।
क्रत्वा वेधा इषूयते विश्वा जातानि पस्पशे ।
यतो घृतश्रीरतिथिरजायत वह्निर्वेधा अजायत ॥४॥
क्रत्वा यदस्य तविषीषु पृंचतेऽग्नेरवेण मरुतां न भोज्येषिराय न भोज्या ।
स हि ष्मा दानमिन्वति वसूनां च मज्मना ।
स नस्त्रासते दुरितादभिह्रुतः शंसादघादभिह्रुतः ॥५॥
विश्वो विहाया अरतिर्वसुर्दधे हस्ते दक्षिणे तरणिर्न शिश्रथच्छ्रवस्यस्या न शिश्रथत् । विश्वस्मा इदिषुध्यते देवत्रा हव्यमोहिषे ।
विश्वस्मा इत्सुकृते वारमृण्वत्यग्निर्द्वारा व्यृण्वति ॥६॥
स मानुषे वृजने शन्तमो हितो३ग्निर्योषु जेन्यो न विश्पतिः प्रियो योषु विश्पतिः ।
स हव्या मानुषाणामिळा कृतानि पत्यते ।
स नस्त्रासते वरुणस्य धूर्तेर्महो देवस्य धूर्तेः ॥७॥
अग्निं होतारमीळते वसुधितिं प्रियं चेतिष्ठमरतिं न्येरिरे हव्यवाहं न्येरिरे ।
विश्वायुं विश्ववेदसं होतारं यजतं कविम् ।
देवासो रण्वमवसे वसूयवो गीर्भी रण्वं वसूयवः ॥८॥

*ayaṁ jāyata manuṣo dharīmaṇi hotā yajiṣṭha uśijāmanu vratamagniḥ svamanu vratam* ।
*viśvaśruṣṭiḥ sakhīyate rayiriva śravasyate* ।
*adabdho hotā ni ṣadadiḷaspade parivīta iḷaspade* ॥1॥
*taṁ yāsādhamapi vātayāmasyṛtasya pathā namasā haviṣmatā devatātā haviṣmatā* ।
*sa na ūrjāmupābhṛtyayā kṛpā na jūryati* ।
*yaṁ mātariśvā manave parāvato devaṁ bhāḥ parāvataḥ* ॥2॥
*evena sadyaḥ paryeti pārthivaṁ muhurgī reto vṛṣabhaḥ kanikradaddadhadretaḥ kanikradat* ।
*śataṁ chakṣāṇo akṣabhirdevo vaneṣu turvaṇiḥ* ।
*sado dadhāna upareṣu sānuṣvagniḥ pareṣu sānuṣu* ॥3॥
*sa sukratuḥ purohito damedame'gniryāsayādhvarasya chetati kratvā yāsya chetati* ।
*kratvā vedhā iṣūyate viśvā jātāni paspaśe* ।
*yato ghṛtaśrīratithirajāyata vahnirvedhā ajāyata* ॥4॥
*kratvā yadasya taviṣīṣu pṛṁchate'gneraveṇa marutāṁ na bhojyeṣirāya na bhojyā* ।
*sa hi ṣmā dānaminvati vasūnāṁ cha majmanā* ।
*sa nastrāsate duritādabhihrutaḥ śaṁsādaghādabhihrutaḥ* ॥5॥
*viśvo vihāyā aratirvasurdadhe haste dakṣiṇe taraṇirna śiśrathachchhravasyasyā na śiśrathat* । *viśvasmā idiṣudhyate devatrā havyamohiṣe* ।

*viśvasmā itsukṛte vāramṛṇvatyagnirdvārā vyṛṇvati ॥6॥*
*sa mānuṣe vṛjane śantamo hito3gniryoṣu jenyo na viśpatiḥ priyo yoṣu viśpatiḥ ।*
*sa havyā mānuṣāṇāmiḷā kṛtāni patyate ।*
*sa nastrāsate varuṇasya dhūrtermaho devasya dhūrteḥ ॥7॥*
*agiṁna hotāramīḷate vasudhitiṁ priyaṁ chetiṣṭhamaratiṁ nyerire havyavāhaṁ nyerire ।*
*viśvāyuṁ viśvavedasaṁ hotāraṁ yajataṁ kavim ।*
*devāso raṇvamavase vasūyavo gīrbhī raṇvaṁ vasūyavaḥ ॥8॥*

ऋ. (Rv.)१.१३९.७

ओ षू णो अग्ने शृणुहि त्वमीळितो देवेभ्यो ब्रवसि यियेभ्यो राजभ्यो यियेभ्यः ।
यद्ध त्यामंगिरोभ्यो धेनुं देवा अदत्तन।
वि तां दुह्रे अर्यमा कर्तरी सचाँ एष तां वेद मे सचा ॥७॥
*O ṣū ṇo agne śṛṇuhi tvamīḷito devebhyo bravasi yiāyebhyo rājabhyo yiāyebhyaḥ ।*
*yaddha tyāmaṁgirobhyo dhenuṁ devā adattana ।*
*vi tāṁ duhre aryamā kartarī sachāṁ̐ eṣa tāṁ veda me sachā ॥7॥*

सा. (Sv.) ४६५

अग्निं होतारं मन्ये दास्वन्तं वसोः सूनुं सहसो जातवेदसं विप्रं न जातवेदसम् ।
य ऊर्ध्वया स्वध्वरो देवो देवाच्या कृपा ।
धृतस्य विभ्राष्टिमनु शुक्रशोचिष आजुह्वानस्य सर्पिषः ॥९॥
*agniṁ hotāraṁ manye dāsvantaṁ vasoḥ sūnuṁ sahaso jātavedasaṁ vipraṁ na jātavedasam ।*
*ya ūrdhvayā svadhvaro devo devāchyā kṛpā ।*
*dhṛtasya vibhrāṣṭimanu śukraśochiṣa ājuhnāānasya sarpiṣaḥ ॥9॥*

सा. (Sv.) १८१३-१८१५

अग्निं होतारं मन्ये दास्वन्तं वसोः सूनुं सहसो जातवेदसं विप्रं न जातवेदसम् ।
य ऊर्ध्वया स्वध्वरो देवाच्या कृपा। घृतस्य विभ्राष्टिमनु शुक्रशोचिष अजुह्वानस्य सर्पिषः ॥१॥
यजिष्ठं त्वा यजमाना हुवेम ज्येष्ठमंगिरसां विप्र मन्मभिर्विप्रेभिः शुक्र मन्मभिः ।
परिज्मानमिव द्यां होतारं चर्षणीनाम्। शोचिष्केशं वृषणं यमिमा विशः प्रावन्तु जूतये विशः ॥२॥
स हि पुरू चिदोजसा विरुक्मता दीद्यानो भवति द्रुहन्तरः परशुर्न द्रुहन्तरः वीडु चिद्यस्य समृतौ श्रुवद्वनेव यत्स्थिरम्। निष्षहमाणो यमते नायते धन्वासहा नायते ॥३॥
*agniṁ hotāraṁ manye dāsvantaṁ vasoḥ sūnuṁ sahaso jātavedasaṁ vipraṁ na jātavedasam ।*
*ya ūrdhvayā svadhvaro devāchyā kṛpā । ghṛtasya vibhrāṣṭimanu śukraśochiṣa ajuhnānasya sarpiṣaḥ ॥1॥*
*yajiṣṭhaṁ tvā yajamānā huvema jyeṣṭhamaṁgirasāṁ vipra manmabhirviprebhiḥ śukra manmabhiḥ ।*
*parijmānamiva dyāṁ hotāraṁ charṣaṇīnām । śochiṣkeśaṁ vṛṣaṇaṁ yamimā viśaḥ prāvantu jūtaye viśaḥ ॥2॥*
*sa hi purū chidojasā virukmatā dīdyāno bhavati druhantaraḥ paraśurna druhantaraḥ vīḍu chidyasya samṛtau śruvadvaneva yatsthiram । niṣṣahamāṇo yamate nāyate dhanvāsahā nāyate ॥3॥*

२. अश्विनौ (Aśvinau) - ऋ. (Rv.)१.१३९.३-५

युवां स्तोमेभिर्देवयन्तो अश्विनाश्रावयन्त इव श्लोकमायवो युवां हव्याभ्या३ यवः। युवोर्विश्वा अधिश्रियः पृक्षश्च विश्ववेदसा। प्रुषायन्ते वां पवयो हिरण्यये रथे दस्रा हिरण्यये ॥३॥
अचेति द्रसा व्यु१ नाकमृण्वथो युंजते वां रथयुजो दिविष्टिष्वध्वस्मानो दिविष्टिषु।
अधि वां स्थाम वन्धुरे रथे दस्रा हिरण्यये।
पथेव यन्तावनुशसता रजोऽञ्जसा शासता रजः ॥४॥

शचीभिर्नः शचीवसू दिवा नक्तं दशस्यतम्।
मा वां रातिरुप दसत्कदा चनास्मद्रातिः कदा चन ॥५॥

*yuvāṁ stomebhirdevayanto aśvināśrāvayanta iva ślokamāyavo yuvāṁ havyābhyā3*
*yavaḥ । yuvorviśvā adhiśriyaḥ pṛkṣaścha viśvavedasā ।*
*pruṣāyante vāṁ pavayo hiraṇyaye rathe dasrā hiraṇyaye ॥3 ॥*
*acheti drasā vyu1 nākamṛṇvatho yuṁjate vāṁ rathayujo diviṣṭiṣvadhvasmāno diviṣṭiṣu ।*
*adhi vāṁ sthāma vandhure rathe dasrā hiraṇyaye ।*
*patheva yantāvanuśasatā rajo'ñjasā śāsatā rajaḥ ॥4 ॥*
*śachībhirnaḥ śachīvasū divā naktaṁ daśasyatam ।*
*mā vāṁ rātirupa dasatkadā chanāsmadrātiḥ kadā chana ॥5 ॥*

३. इन्द्रः (Indraḥ) - ऋ. (Rv.)१.१२९.१-११; १.१३०.१-१०; १.१३१.१-७; १.१३२.१-६; १.१३३.१-७; १.१३९.६; सा. (Sv.) ४५९

ऋ. (Rv.)१.१२९.१-११

यं त्वं रथमिन्द्र मेधसातयेऽपाका सन्तमिषिर प्रणयसि प्रानवद्य नयसि ।
सद्यश्चित्तमभिष्टये करो वशश्च वाजिनम् ।
सास्माकमनवद्य तूतुजान वेधसामिमां वाचं न वेधसाम् ॥१॥
स श्रुधि यः स्मा पृतनासु कासु चिद्दक्षाय्य इन्द्र भरहूतये नृभिरसि प्रतूर्तये नृभिः ।
यः शूरैः स्वः१ सनिता यो विप्रैर्वाजं तरुता।
तमीशानास इरधन्त वाजिनं पृक्षमत्यं न वाजिनम्॥२॥
दस्मो हि ष्मा वृषणं पिन्वसि त्वचं कं चिद्यावीररुं शूर मर्त्य परिवृणक्षि मर्त्यम् ।
इन्द्रोत तुभ्यं तद्दिवे तद्रुद्राय स्वयशसे। मित्राय वोचं वरुणाय सप्रथः सुमृळीकाय सप्रथः ॥३॥
अस्माकं व इन्द्रमुशमसीष्टये सखायं विश्वायुं प्रासहं युजं वाजेषु प्रासहं युजम् ।
अस्माकं ब्रह्मोतयेऽवा पृत्सुषु कासु चित् ।
नहि त्वा शत्रुः स्तरते स्तृणोषि यं विश्वं शत्रुं स्तृणोषि यम् ॥४॥
नि षू नमातिमतिं कयस्य चित्तेजिष्ठाभिररणिभिर्नोतिभिरुग्राभिरुग्रो तिभिः ।
नेषि णो यथा पुरानेनाः शूर मन्यसे। विश्वानि पूरोरप पर्षि वह्निरासा वह्निर्नो अच्छ ॥५॥
प्र तद्वोचेयं भव्यायेन्दवे हव्यो न य इषवान्मन्म रेजति रक्षोहा मन्म रेजति ।
स्वयं सो अस्मदा निदो वधैरजेत दुर्मतिम्। अव स्रवेदघशंसोऽवतरमव क्षुद्रमिव स्रवेत् ॥६॥
वनेम तद्धोत्रया चितन्त्या वनेम रयिं रयिवः सुवीर्यं रण्वं सन्तं सुवीर्यम् ।
दुर्मन्मानं सुमन्तुभिरेमिषा पृचीमहि। आ सत्याभिरिन्द्रं द्युम्नहूतिभिर्यजत्रं द्युम्नहूतिभिः ॥७॥
प्रप्रा वो अस्मे स्वयशो भिरूती परिवर्ग इन्द्रो दुर्मतीनां दरीमन्दुर्मतीनाम् ।
स्वयं सा रिषयध्यै या न उपेषे अत्रैः। हतेमसन्न वक्षति क्षिप्ता जूर्णिर्न वक्षति ॥८॥
त्वं न इन्द्र राया परीणसा याहि पथाँ अनेहसा पुरो याह्यरक्षसा ।
सचस्व नः पराक आ सचस्वास्तमीक आ।
पाहि नो दूरादारादभिष्टिभिः सदा पाह्यभिष्टिभिः ॥९॥
त्वं न इन्द्र राया तरूषसोग्रं चित्त्वा महिमा सक्षदवसे महे मित्रं नावसे ।
ओजिष्ठ त्रातरविता रथं कं चिदमर्त्य। अन्यमस्मद्रिरिषेः कं चिदद्रिवो रिरिक्षन्तं चिदद्रिवः।१०॥
पाहि न इन्द्र सुष्टुत स्रिधोऽवयाता सदमिद्दुर्मतीनां देवः सन्धुर्मतीनाम् ।
हन्ता पापस्य रक्षसस्त्राता विप्रस्य मावतः।
अधा हि त्वा जनिता जीजनद्वसो रक्षोहणं त्वा जीजनद्वसो॥११॥

*yaṁ tvaṁ rathamindra medhasātaye'pākā santamiṣira praṇayasi prānavadya nayasi ।*
*sadyaśchittamabhiṣṭaye karo vaśaścha vājinam ।*
*sāsmākamanavadya tūtujāna vedhasāmimāṁ vāchaṁ na vedhasām ॥1 ॥*
*sa śrudhi yaḥ smā pṛtanāsu kāsu chiddakṣāyya indra bharahūtaye nṛbhirasi pratūrtaye nṛbhiḥ ।*
*yaḥ śūraiḥ svaḥ1 sanitā yo viprairvājaṁ tarutā ।*

*tamīśānāsa iradhanta vājinaṁ pṛkṣamatyaṁ na vājinam ॥2 ॥*
*dasmo hi ṣmā vṛṣaṇaṁ pinvasi tvachaṁ kaṁ chidyāvīrararuṁ śūra martya parivṛṇakṣi martyam ।*
*indrota tubhyaṁ taddive tadrudrāya svayaśase । mitrāya vochaṁ varuṇāya saprathaḥ sumṛḻīkāya saprathaḥ ॥3 ॥*
*asmākaṁ va indramuśamasīṣṭaye sakhāyaṁ viśvāyuṁ prāsahaṁ yujaṁ vājeṣu prāsahaṁ yujam ।*
*asmākaṁ brahmotaye'vā pṛtsuṣu kāsu chit ।*
*nahi tvā śatruḥ starate stṛṇoṣi yaṁ viśvaṁ śatruṁ stṛṇoṣi yam ॥4 ॥*
*ni ṣū namātimatiṁ kayasya chittejiṣṭhābhiraraṇibhirnotibhirugrābhirugro tibhiḥ ।*
*neṣi ṇo yathā purānenāḥ śūra manyase । viśvāni pūrorapa parṣi vahnirāsā vahnirno achchha ॥5 ॥*
*pra tadvocheyaṁ bhavyāyendave havyo na ya iṣavānmanma rejati rakṣohā manma rejati ।*
*svayaṁ so asmadā nido vadhairajeta durmatim । ava sravedaghaśaṁso'vataramava kṣudramiva sravet ॥6 ॥*
*vanema taddhotrayā chitantyā vanema rayiṁ rayivaḥ suvīrya raṇvaṁ santaṁ suvīryam ।*
*durmanmānaṁ sumantubhiremiṣā pṛchīmahi । ā satyābhirindraṁ dyumnahūtibhiryajatraṁ dyumnahūtibhiḥ ॥7 ॥*
*praprā vo asme svayaśo bhirūtī parivarga indro durmatīnāṁ darīmandurmatīnām ।*
*svayaṁ sā riṣayadhyai yā na upeṣe atraiḥ । hatemasanna vakṣati kṣiptā jūrṇirna vakṣati ॥8 ॥*
*tvaṁ na indra rāyā parīṇasā yāhi pathām̐ anehasā puro yāhyarakṣasā ।*
*sachasva naḥ parāka ā sachasvāstamīka ā ।*
*pāhi no dūrādārādabhiṣṭibhiḥ sadā pāhyabhiṣṭibhiḥ ॥9 ॥*
*tvaṁ na indra rāyā tarūṣasograṁ chittvā mahimā sakṣadavase mahe mitraṁ nāvase ।*
*Ojiṣṭha trātaravitā rathaṁ kaṁ chidamartya ।*
*anyamasmadririṣeḥ kaṁ chidadrivo ririkṣantaṁ chidadrivaḥ ।10 ॥*
*pāhi na indra suṣṭuta sridho'vayātā sadamiddurmatīnāṁ devaḥ sandhurmatīnām ।*
*hantā pāpasya rakṣasastrātā viprasya māvataḥ ।*
*adhā hi tvā janitā jījanadvaso rakṣohaṇaṁ tvā jījanadvaso ॥11 ॥*

ऋ. (Rv.)१.१३०.१-१०

एन्द्र याह्युप नः परावतो नायमच्छा विदथानीव सत्पतिरस्तं राजेव सत्पतिः ।
हवामहे त्वा वयं प्रयस्वन्तः सुते सचा ।
पुत्रासो न पितरं वाजसातये महिष्ठं वाजसातये ॥१ ॥
पिबा सोममिन्द्र सुवानमद्रिभिः कोशेन सिक्तमवतं न वंसगस्तातृषाणो न वंसगः ।
मदाय हर्यताय ते तुविष्टमाय धायसे ।
आ त्वा यच्छन्तु हरितो न सूर्यमहा विश्वेव सूर्यम् ॥२ ॥
अविन्दद्दिवो निहितं गुहा निधिं वेर्न गर्भं परिवीतमश्मन्यनन्ते अन्तरश्मनि ।
व्रजं वज्री गवामिव सिषासन्नंगिरस्तमः ।
अपावृणोदिष इन्द्रः परीवृता द्वार इषः परीवृताः ॥३ ॥
दादृहाणो वज्रमिन्द्रो गभस्त्योः क्षद्मेव तिग्ममसनाय सं श्यदहिहत्याय सं श्यत् ।
संविव्यान ओजसा शवोभिरिन्द्र मज्मना ।
तष्टेव वृक्षं वनिनो नि वृश्चसि परश्वेव नि वृश्चसि ॥४ ॥
त्वं वृथा नद्य इन्द्र सर्तवेऽच्छा समुद्रमसृजो रथाँ इव वाजयतो रथाँ इव ।
इत ऊतीरयुंजत समानमर्थमक्षितम् ।
धेनूरिव मनवे विश्वदोहसो जनाय विश्वदोहसः ॥५ ॥

इमां ते वाचं वसूयन्त आयवो रथं न धीरः स्वपा अतक्षिषुः सुम्नाय त्वामतक्षिषः ।
शुम्भन्तो जेन्यं यथा वाजेषु विप्र वाजिनम् ।
अत्यमिव शवसे सातये धना विश्वा धनानि सातये ॥६॥
भिन्त्पुरो नवतिमिन्द्र पूरवे दिवो दासाय महि दाशुषे नृतो वज्रेण दाशुषे नृतो ।
अतिथिग्वाय शम्बरं गिरेरुग्रो अवाभरत् ।
महो धनानि दयमान ओजसा विश्वा धनान्योजसा ॥७॥
इन्द्रः समत्सु यजमानमार्यं प्रावद्विश्वेषु शतमूतिराजिषु स्वर्मीळ्हेष्वाजिषु ।
मनवे शासदव्रातान्त्वचं कृष्णामरन्धयत् ।
दक्षन्न विश्वं ततृषाणमोषति न्यर्शसानमोषति ॥८॥
सूरश्चक्रं प्र वृहज्जात ओजसा प्रपित्वे वाचमरुणो मुषायतीशान आ मुषायति ।
उशना यत्परावतोऽजगन्नूतये कवे ।
सुम्नानि विश्वा मनुषेव तुर्वणिरहा विश्वेव तुर्वणिः ॥९॥
स नो नव्येभिर्वृषकर्मन्नुक्थैः पुरां दर्तः पायुभिः पाहि शग्मैः ।
दिवोदासेभिरिन्द्र स्तवानो वावृधीथा अहोभिरिव द्यौः ॥१०॥

*endra yāhyupa naḥ parāvato nāyamachchhā vidathānīva satpatirastaṁ rājeva satpatiḥ* ।
*havāmahe tvā vayaṁ prayasvantaḥ sute sachā* ।
*putrāso na pitaraṁ vājasātaye mahiṣṭhaṁ vājasātaye* ॥1॥
*pibā somamindra suvānamadribhiḥ kośena siktamavataṁ na vaṁsagastātṛṣāṇo na vaṁsagaḥ* ।
*madāya haryatāya te tuviṣṭamāya dhāyase* ।
*ā tvā yachchhantu harito na sūryamahā viśveva sūryam* ॥2॥
*avindaddivo nihitaṁ guhā nidhiṁ verna garbha parivītamaśmanyanante antaraśmani* ।
*vrajaṁ vajrī gavāmiva siṣāsannaṁgiārastamaḥ* ।
*apāvṛṇodiṣa indraḥ parīvṛtā dvāra iṣaḥ parīvṛtāḥ* ॥3॥
*dādṛhāṇo vajramindro gabhastyoḥ kṣadmeva tigmamasanāya saṁ śyadahihatyāya saṁ śyat* ।
*saṁvivyāna Ojasā śavobhirindra majmanā* ।
*taṣṭeva vṛkṣaṁ vanino ni vṛśchasi paraśveva ni vṛśchasi* ॥4॥
*tvaṁ vṛthā nadya indra sartave'chchhā samudramasṛjo rathām̐ iva vājayato rathām̐ iva* ।
*ita ūtīrayuṁjata samānamarthamakṣitam* ।
*dhenūriva manave viśvadohaso janāya viśvadohasaḥ* ॥5॥
*imāṁ te vāchaṁ vasūyanta āyavo rathaṁ na dhīraḥ svapā atakṣiṣuḥ sumnāya tvāmatakṣiṣaḥ* ।
*śumbhanto jenyaṁ yathā vājeṣu vipra vājinam* ।
*atyamiva śavase sātaye dhanā viśvā dhanāni sātaye* ॥6॥
*bhintpuro navatimindra pūrave divo dāsāya mahi dāśuṣe nṛto vajreṇa dāśuṣe nṛto* ।
*atithigvāya śambaraṁ girerugro avābharat* ।
*maho dhanāni dayamāna Ojasā viśvā dhanānyojasā* ॥7॥
*indraḥ samatsu yajamānamārya prāvadviśveṣu śatamūtirājiṣu svarmīḻheṣvājiṣu* ।
*manave śāsadavrātāntvachaṁ kṛṣṇāmarandhayat* ।
*dakṣanna viśvaṁ tatṛṣāṇamoṣati nyarśasānamoṣati* ॥8॥
*sūraśchakraṁ pra vṛhajjāta Ojasā prapitve vāchamaruṇo muṣāyatīśāna ā muṣāyati* ।
*uśanā yatparāvato'jagannūtaye kave* ।
*sumnāni viśvā manuṣeva turvaṇirahā viśveva turvaṇiḥ* ॥9॥
*sa no navyebhirvṛṣakarmannukthaiḥ purāṁ dartaḥ pāyubhiḥ pāhi śagmaiḥ* ।
*divodāsebhirindra stavāno vāvṛdhīthā ahobhiriva dyauḥ* ॥10॥

ऋ. (Rv.)१.१३१.१-७

इन्द्राय हि द्यौरसुरो अनम्नतेन्द्राय मही पृथिवी वरीमभिर्द्युम्नसाता वरीमभिः ।
इन्द्र विश्वे सजोषसो देवासो दधिरे पुरः ।
इन्द्राय विश्वा सवनानि मानुषा रातानि सन्तु मानुषा ॥१॥
विश्वेषु हि त्वा सवनेषु तुंजते समानमेकं वृषमण्यवः पृथक् स्वः सनिष्यवः पृथक् ।
तं त्वा नावं न पर्षणि शूषस्य धुरि धीमहि ।
इन्द्र न यौश्चितयन्त आयवः स्तोमेभिरिन्द्रमायवः ॥२॥
वि त्वा ततस्रे मिथुना अवस्यवो व्रजस्य साता गव्यस्य निः सृजः सक्षन्त इन्द्र निःसृजः ।
यद्गव्यन्ता द्वा जना स्व१र्यन्ता समूहसि ।
आविष्करिक्रद्वृषणं सचाभुवं वज्रमिन्द्र सचाभुवम् ॥३॥
विदुष्टे अस्य वीर्यस्य पूरवः पुरो यदिन्द्र शारदीरवातिरः सासहानो अवातिरः ।
शासस्तमिन्द्र मर्त्यमयज्युं शवसस्पते ।
महीममुष्णाः पृथिवीमिमा अपो मन्दसान इमा अपः ॥४॥
आदित्ते अस्य वीर्यस्य चर्किरन्मदेषु वृषन्नुशिजो यदाविथ सखीयतो यदाविथ ।
चकर्थ कारमेभ्यः पृतनासु प्रवन्तवे ।
ते अन्यामन्यां नद्यं सनिष्णत श्रवस्यन्तः सनिष्णत ॥५॥
उतो नो अस्या उषसो जुषेत ह्य१र्कस्य बोधि हवीमभिः सवर्षाता हवीमभिः ।
यदिन्द्र हन्तवे मृधो वृषा वज्रिञ्चिकेतसि ।
आ मे अस्य वेधसो नवीयसो मन्म श्रुधि नवीयसः ॥६॥
त्वं तमिन्द्र वावृधानो अस्मयुरमित्रयन्तं तुविजात मर्त्य वज्रेण शूर मर्त्यम् ।
जहि यो नो अघायति शृणुष्व सुश्रवस्तमः ।
रिष्टं न यामन्नप भूतु दुर्मतिर्विश्वाप भूतु दुर्मति ॥७॥

*indrāya hi dyaurasuro anamnatendrāya mahī pṛthivī varīmabhirdyumnasātā varīmabhiḥ /*
*indra viśve sajoṣaso devāso dadhire puraḥ /*
*indrāya viśvā savanāni mānuṣā rātāni santu mānuṣā //1 //*
*viśveṣu hi tvā savaneṣu tuṁjate samānamekaṁ vṛṣamaṇyavaḥ pṛthak svaḥ saniṣyavaḥ pṛthak /*
*taṁ tvā nāvaṁ na parṣaṇi śūṣasya dhuri dhīmahi /*
*indra na yauśchitayanta āyavaḥ stomebhirindramāyavaḥ //2 //*
*vi tvā tatasre mithunā avasyavo vrajasya sātā gavyasya niḥ sṛjaḥ sakṣanta indra niḥsṛjaḥ /*
*yadgavyantā dvā janā sva1ryantā samūhasi /*
*āviṣkarikradvṛṣaṇaṁ sachābhuvaṁ vajramindra sachābhuvam //3 //*
*viduṣṭe asya vīryasya pūravaḥ puro yadindra śāradīravātiraḥ sāsahāno avātiraḥ /*
*śāsastamindra martyamayajyuṁ śavasaspate /*
*mahīmamuṣṇāḥ pṛthivīmimā apo mandasāna imā apaḥ //4 //*
*āditte asya vīryasya charkiranmadeṣu vṛṣannuśijo yadāvitha sakhīyato yadāvitha /*
*chakartha kāramebhyaḥ pṛtanāsu pravantave /*
*te anyāmanyāṁ nadyaṁ saniṣṇata śravasyantaḥ saniṣṇata //5 //*
*uto no asyā uṣaso juṣeta hya1rkasya bodhi havīmabhiḥ savarṣātā havīmabhiḥ /*
*yadindra hantave mṛdho vṛṣā vajriñchiketasi /*
*ā me asya vedhaso navīyaso manma śrudhi navīyasaḥ //6 //*
*tvaṁ tamindra vāvṛdhāno asmayuramitrayantaṁ tuvijāta martya vajreṇa śūra martyam /*
*jahi yo no aghāyati śṛṇuṣva suśravastamaḥ /*
*riṣṭaṁ na yāmannapa bhūtu durmatirviśvāpa bhūtu durmati //7 //*

ऋ. (Rv.)१.१३२.१-६

त्वया वयं मघवन्पूर्व्ये धन इन्द्रत्वोताः सासह्याम पृतन्यतो वनुयाम वनुष्यतः ।
नेदिष्ठे अस्मिन्नहन्यधि वोचा नु सुन्वते ।
अस्मिन्यो वि चयेमा भरे कृतं वाजयन्तो भरे कृतम् ॥१॥
स्वर्जेषे भर आप्रस्य वक्मन्युषर्बुधः स्वस्मिन्नंजसि क्राणस्य स्वस्मिन्नंजसि ।
अहन्निन्द्रो यथा विदे शीर्ष्णाशीर्ष्णोपवाच्यः ।
अस्मत्रा ते सध्र्यक् सन्तु रातयो भद्रा भद्रस्य रातयः ॥२॥
तत्तु प्रयः प्रत्नथा ते शशुक्वनं यस्मिन्यो वारमकृण्वत क्षयमृतस्य वारसि क्षयम् ।
वि तद्वोचेरध द्वितान्तः पश्यन्ति रश्मिभिः ।
स घा विदे अन्विन्द्रो गवेषणे बन्धुक्षिद्भ्यो गवेषणः ॥३॥
नू इत्था ते पूर्वथा च प्रवाच्यं यदंगिरोभ्योऽवृणोरप व्रजमिन्द्र शिक्षन्नप व्रजम् ।
ऐभ्यः समान्या दिशस्मभ्यं जेषि योत्सि च ।
सुन्वद्भ्यो रन्धया कं चिदव्रतं हृणायन्तं चिदव्रतम् ॥४॥
सं यज्जनान् क्रतुभिः शूर ईक्षयद्धने हिते तरुषन्त श्रवस्यवः प्र यक्षन्त श्रवस्यवः ।
तस्मा आयुः प्रजावदिद्बाधे अर्चन्त्योजसा ।
इन्द्र ओक्यं दिधिषन्त धीतयो देवाँ अच्छा न धीतयः ॥५॥
युवं तमिन्द्रापर्वता पुरोयुधा यो नः पृतन्यादप तंतमिद्धतं वज्रेण तंतमिद्धतम् ।
दूरे चत्ताय छन्त्सद्गहनं यदिनक्षत् ।
अस्माकं शत्रून्परि शूर विश्वतो दर्मा दर्षीष्ट विश्वतः ॥६॥

*tvayā vayaṁ maghavanpūrvye dhana indratvotāḥ sāsahyāma pṛtanyato vanuyāma vanuṣyataḥ ।*
*nediṣṭhe asminnahanyadhi vochā nu sunvate ।*
*asminyo vi chayemā bhare kṛtaṁ vājayanto bhare kṛtam ॥1॥*
*svarjeṣe bhara āprasya vakmanyuṣarbudhaḥ svasminnaṁjasi krāṇasya svasminnaṁjasi ।*
*ahannindro yathā vide śīrṣṇāśīrṣṇopavāchyaḥ ।*
*asmannā te sadhyrak santu rātayo bhadrā bhadrasya rātayaḥ ॥2॥*
*tattu prayaḥ pratnathā te śaśukvanaṁ yasminyo vāramakṛṇvata kṣayamṛtasya vārasi kṣayam ।*
*vi tadvocheradha dvitāntaḥ paśyanti raśmibhiḥ ।*
*sa ghā vide anvindro gaveṣaṇe bandhukṣidbhyo gaveṣaṇaḥ ॥3॥*
*nū itthā te pūrvathā cha pravāchyaṁ yadaṁgirobhyo'vṛṇorapa vrajamindra śikṣannapa vrajam ।*
*aibhyaḥ samānyā diśasmabhyaṁ jeṣi yotsi cha ।*
*sunvadbhyeā randhayā kaṁ chidavratam hṛṇāyantaṁ chidavratam ॥4॥*
*saṁ yajjanān kratubhiḥ śūra īkṣayaddhane hite taruṣanta śravasyavaḥ pra yakṣanta śravasyavaḥ ।*
*tasmā āyuḥ prajāvadidbādhe archantyojasā ।*
*indra Okyaṁ didhiṣanta dhītayo devām̐ achchhā na dhītayaḥ ॥5॥*
*yuvaṁ tamindrāparvatā puroyudhā yo naḥ pṛtanyādapa taṁtamiddhataṁ vajreṇa taṁtamiddhatam ।*
*dūre chattāya chhantsadgahanaṁ yadinakṣat ।*
*asmākaṁ śatrūnpari śūra viśvato darmā darṣīṣṭa viśvataḥ ॥6॥*

ऋ. (Rv.)१.१३३.१-७

उभे पुनामि रोदसी ऋतेन द्रुहो दहामि सं महीरन्द्राः ।
अभिव्लग्य यत्र हता अमित्रा वैलस्थानं परि तृळहा अशेरन् ॥१॥
अभिव्लग्या चिदद्रिवः शीर्षा यातुमतीनाम्। छिन्धि वटूरिणा पदा महावटूरिणा पदा ॥२॥
अवासां मघवंजहि शर्धो यातुमतीनाम्। वैलस्थानके अर्मके महावैलस्थे अर्मके ॥३॥

यासां तिस्रः पञ्चाशतोऽभिव्लंगैरपावपः। तत्सु ते मनायति तकत्सु ते मनायति ॥४॥
पिशंगभृष्टिमम्भृण पिशाचिमिन्द्र सं मृण। सर्व रक्षो नि बर्हय ॥५॥
अवर्मह इन्द्र दादृहि श्रुधी नः शुशोच हि द्यौः न भीषाँ अद्रिवो घृणान्न भीषाँ अद्रिवः ।
शुष्मिन्तमो हि शुष्मिभिर्वधैरुग्रेभिरीयसे ।
अपूरुषघ्नो अप्रतीत शूर सत्वभिस्त्रिसप्तैः शूर सत्वभिः ॥६॥
वनोति हि सुन्वन्क्षयं परीणसः सुन्वानो हि ष्मा यजत्यव द्विषो देवानामव द्विषः ।
सुन्वान इत्सिषासति सहस्रा वाज्यवृतः। सुन्वानायेन्द्रो ददात्याभुवं रयिं ददात्याभुवम् ॥७॥
*ubhe punāmi rodasī ṛtena druho dahāmi saṁ mahīrandriāḥ /*
*abhivlagya yatra hatā amitrā vailasthānaṁ pari tṛḷahā aśeran //1 //*
*abhivlagyā chidadrivaḥ śīrṣā yātumatīnām /*
*dhindhi vaṭūriṇā padā mahāvaṭūriṇā padā //2 //*
*avāsāṁ maghavaṁjahi śardho yātumatīnām /*
*vailasthānake armake mahāvailasthe armarke //3 //*
*yāsāṁ tisraḥ pachchāśato'bhivlaṁgairapāvapaḥ /*
*tatsu te manāyati takatsu te manāyati //4 //*
*piśaṁgabhṛṣṭimambhṛṇa piśāchimindra saṁ mṛṇa / sarva rakṣo ni barhaya //5 //*
*avarmaha indra dādṛhi śrudhī naḥ śuśocha hi dyauḥ na bhīṣāṁ adrivo ghṛṇānna bhīṣāṁ adrivaḥ /*
*śuṣmintamo hi śuṣmibhirvadhairugrebhirīyase /*
*apūruṣadhno apratīta śūra satvabhistrisaptaiḥ śūra satvabhiḥ //6 //*
*vanoti hi sunvankṣayaṁ parīṇasaḥ sunvāno hi ṣmā yajatyava dviṣo devānāmava dviṣaḥ /*
*sunvāna itsiṣāsati sahasrā vājyavṛtaḥ /*
*sunvānāyendro dadātyābhuvaṁ rayiṁ dadātyābhuvam //7 //*

ऋ. (Rv.)१.१३९.६

वृषन्निन्द्र वृषपाणास इन्दव इमे सुता अद्रिषुतास उद्भिदस्तुभ्यं सुतास उद्भिदः ।
ते त्वा मन्दन्तु दावने महे चित्राय राधसे ।
गीर्भिर्गिर्वाहः स्तवमान आ गहि सुमृळीको न आ गहि ॥६॥
*vṛṣannindra vṛṣapāṇāsa indava ime sutā adriṣutāsa udbhidastubhyaṁ sutāsa udbhidaḥ /*
*te tvā mandantu dāvane mahe chitrāya rādhase /*
*gīrbhirgirvāhaḥ stavamāna ā gahi sumṛḷīko na ā gahi //6 //*

सा. (Sv.) ४५९

एन्द्र याह्युप नः परावतो नायमच्छा विदथानीव सत्पतिरस्ता राजेव सत्पतिः ।
हवामहे त्वा प्रयस्वन्तः सुतेष्वा पुत्रासो न पितरं वाजसातये मंहिष्ठं वाजसातये ॥३॥
*endra yāhyupa naḥ parāvato nāyamachchhā vidathānīva satpatirastā rājeva satpatiḥ /*
*havāmahe tvā prayasvantaḥ suteṣvā putrāso na pitaraṁ vājasātaye maṁhiṣṭhaṁ vājasātaye //3 //*

४. इन्द्रः (सास्वा.साग्री.); अश्विनौ (सार्षेदी.ऋसर्व.१.१३९.५) (Indraḥ [Sas.Ssb.]; Aśvinau [Sad.Rss.1.139.5]) - सा. (Sv.) २८७

शचीभिर्नः शचीवसू दिवा नवतं दिशस्यतम्।
मा वां रातिरुपदसत्कदाचनास्मद्रातिः कदाचन ॥५॥
*śachībhirnaḥ śachīvasū divā navataṁ diśasyatam /*
*mā vāṁ rātirupadasatkadāchanāsmadrātiḥ kadāchana //5 //*

५. इन्द्राग्नी (Indrāgnī) - ऋ. (Rv.)१.१३९.९

दध्यङ् ह मे जनुषं पूर्वो अंगिराः प्रियमेधः कण्वो अत्रिर्मनुर्विदुस्ते मे पूर्वे मनुर्विदुः ।
तेषां देवेष्वायतिरस्माकं तेषु नाभ्यः। तेषं पदेन मह्या नमे गिरेन्द्राग्नी आ नमे गिरा ॥९॥

*dadhyaṁ ha me januṣaṁ pūrvo aṁgirāḥ priyamedhaḥ kaṇvo atrirmanurviduste me pūrve manurviduḥ* ।
*teṣāṁ deveṣvāyatirasmākaṁ teṣu nābhyaḥ । teṣaṁ padena mahyā name girendrāgnī ā name girā* ॥9॥

६. पूषा (Pūṣā) - ऋ. (Rv.)१.१३८.१-४

प्रप्र पूष्णस्तुविजातस्य शस्यते महित्वमस्य तवसो न तन्दते स्तोत्रमस्य न तन्दते ।
अर्चामि सुम्नयन्नहमन्त्यूतिं मयोभुवम्। विश्वस्य यो मन आयुयुवे मखो देव आयुयुवे मखः ॥१।
प्र हि त्वा पूषन्नजिरं न यामनि स्तोमेभिः कृण्व ऋणवो यथा मृध उष्ट्रो न पीपरो मृधः ।
हुवे यत्त्वा मयोभुवं देवं सख्याय मर्त्यः। अस्माकमांगूषान्द्युम्निनस्कृधि वाजेषु द्युम्निनस्कृधि ॥२।
यस्य ते पूषन्त्सख्ये विपन्यवः क्रत्वा चित्सन्तोऽवसा बुभुज्रिर इति क्रत्वा बुभुज्रिरे ।
तामनु त्वा नवीयसीं नियुतं राय ईमहे। अहेळमान उरुशंस सरी भव वाजेवाजे सरी भव ॥३॥
अस्या ऊ षु ण उप सातये भुवोऽहेळमानो ररिवाँ अजाश्व श्रवस्यतामजाश्व ।
ओ षु त्वा ववृतीमहि स्तोमेभिर्दस्म साधुभिः।
नहि त्वा पूषन्नतिमन्य आघृणे न ते सख्यमपह्नुवे ॥४॥

*prapra pūṣṇastuvijātasya śasyate mahitvamasya tavaso na tandate stotramasya na tandate* ।
*archāmi sumnayannahamantyūtiṁ mayobhuvam । viśvasya yo mana āyuyuve makho deva āyuyuve makhaḥ* ॥1।
*pra hi tvā pūṣannajiraṁ na yāmani stomebhiḥ kṛṇva ṛṇavo yathā mṛdha uṣṭora na pīparo mṛdhaḥ* ।
*huve yattvā mayobhuvaṁ devaṁ sakhyāya martyaḥ । asmākamāṁgūṣāndyumninaskṛdhi vājeṣu dyumninaskṛdhi* ॥2।
*yasya te pūṣantsakhye vipanyavaḥ kratvā chitsanto'vasā bubhujrira iti kratvā bubhujrire* ।
*tāmanu tvā navīyasīṁ niyutaṁ rāya īmahe । aheḷamāna uruśaṁsa sarī bhava vājevāje sarī bhava* ॥3॥
*asyā ū ṣu ṇa upa sātaye bhuvo'heḷamāno rarivām̐ ajāśva śravasyatāmajāśva* ।
*O ṣu tvā vavṛtīmahi stomebhirdasma sādhubhiḥ* ।
*nahi tvā pūṣannatimanya āghṛṇe na te sakhyamapahnuve* ॥4॥

७. बृहस्पतिः (Bṛhaspatiḥ) - ऋ. (Rv.)१.१३९.१०

होता यक्षद्वनिनो वन्त वार्यं बृहस्पतिर्यजति वेन उक्षभिः पुरुवारेभिरुक्षभिः ।
जगृभ्मा दूरआदिशं श्लोकमद्रेरध त्मना।
अधारयदररिन्दानि सुक्रतुः पुरू सद्मानि सुक्रतुः ॥१०॥

*hotā yakṣadvanino vanta vārya bṛhaspatiryajati vena ukṣabhiḥ puruvārebhirukṣabhiḥ* ।
*jagṛbhmā dūraādiśaṁ ślokamadreradha tmanā* ।
*adhārayadararindāni sukratuḥ purū sadmāni sukratuḥ* ॥10॥

८. मित्रावरुणौ (Mitrāvaruṇau) - ऋ. (Rv.)१.१३६.१-५; १.१३७.१-३; १.१३९.२

ऋ. (Rv.)१.१३६.१-५

प्र सु ज्येष्ठं निचिराभ्यां बृहन्नमो हव्यं मतिं भरता मृळयद्भ्यां स्वादिष्ठं मृळयद्भ्याम्।
ता सम्राजा घृतासुती योया उपस्तुता। अथैनोः क्षत्रं न कुतश्चनाधृषे देवत्वं नू चिदाधृषे ॥१॥
अदर्शि गातुरुरवे वरीयसी पन्था ऋतस्य समयंस्त रश्मिभिश्चक्षुर्भगस्य रश्मिभिः।
द्युक्षं मित्रस्य सादनमर्यम्णो वरुणस्य च। अथा दधाते बृहदुक्थ्यं१ वय उपस्तुत्यं बृहद्वयः ॥२॥
ज्योतिष्मतीमदितिं धारयत्क्षितिं स्वर्वतीमा सचेते दिवेदिवे जागृवांसा दिवेदिवे ।
ज्योतिष्मत्क्षत्रमाशाते आदित्या दानुनस्पती। मित्रस्तयोर्वरुणो यातयज्जनोऽर्यमा यातयज्जनः ।३।
अयं मित्राय वरुणाय शन्तमः सोमो भूत्ववपानेष्वाभगो देवो देवेष्वाभगः ।
तं देवासो जुषेरत विश्वे अद्य सजोषसः। तथा राजाना करथो यदीमह ऋतावाना यदीमहे ।४॥

यो मित्राय वरुणायाविधज्जनोऽनर्वाणं तं परि पातो अंहसो दाश्वासं मर्तमंहसः ।
तमर्यमाभि रक्षत्यृजूयन्तमनु व्रतम्। उक्थैर्य एनोः परिभूषति व्रतं स्तोमैराभूषति व्रतम् ॥५॥
*pra su jyeṣṭhaṁ nichirābhyāṁ bṛhannamo havyaṁ matiṁ bharatā mṛḷayadbhyāṁ svādiṣṭhaṁ mṛḷayadbhyām |*
*tā samrājā ghṛtāsutī yoyā upastutā | athainoḥ kṣatraṁ na kutaśchanādhṛṣe devatvaṁ nū chidādhṛṣe ||1 ||*
*adarśi gātururave varīyasī panthā ṛtasya samayaṁsta raśmibhiśchakṣurbhagasya raśmibhiḥ |*
*dyukṣaṁ mitrasya sādanamaryamṇo varuṇasya cha | athā dadhāte bṛhadukthyaṁ1 vaya upastutyaṁ bṛhadvayaḥ ||2 ||*
*jyotiṣmatīmaditiṁ dhārayatkṣitiṁ svarvatīmā sachete divedive jāgṛvāṁsā divedive |*
*jyotiṣmatkṣatramāśāte ādityā dānunaspatī | mitrastayorvaruṇo yātayajjano'ryamā yātayajjanaḥ |3 |*
*ayaṁ mitrāya varuṇāya śantamaḥ somo bhūtvavapāneṣvābhago devo deveṣvābhagaḥ |*
*taṁ devāso juṣerata viśve adya sajoṣasaḥ | tathā rājānā karatho yadīmaha ṛtāvānā yadīmahe |4 ||*
*yo mitrāya varuṇāyāvidhajjano'narvāṇaṁ taṁ pari pāto aṁhaso dāśvāsaṁ martamaṁhasaḥ |*
*tamaryamābhi rakṣatyṛjūyantamanu vratam | ukthairya enoḥ paribhūṣati vrataṁ stomairābhūṣati vratam ||5 ||*

ऋ. (Rv.)१.१३७.१-३

सुषुमा यातमद्रिभिर्गोश्रीता मत्सरा इमे सोमासो मत्सरा इमे ।
आ राजाना दिविस्पृशास्मत्रा गन्तमुप नः ।
इमे वां मित्रावरुणा गवाशिरः सोमाः शुक्रा गवाशिरः ॥१॥
इम आ यातमिन्दवः सोमासो दध्याशिरः सुतासो दध्याशिरः ।
उत वामुषसो बुधि साकं सूर्यस्य रश्मिभिः ।
सुतो मित्राय वरुणाय पीतये चारुऋर्ताय पीतये ॥२॥
तां वां धेनुं न वासरीमंशुं दुहन्त्यद्रिभिः सोमं दुहन्त्यद्रिभिः ।
अस्मत्रा गन्तमुप नोऽर्वांचा सोमपीतये ।
अयं वां मित्रावरुणा नृभिः सुतः सोम आ पीतये सुतः ॥३॥
*suṣumā yātamadribhirgośrītā matsarā ime somāso matsarā ime |*
*ā rājānā divispṛśāsmatrā gantamupa naḥ |*
*ime vāṁ mitrāvaruṇā gavāśiraḥ somāḥ śukrā gavāśiraḥ ||1 ||*
*ima ā yātamindavaḥ somāso dadhyāśiraḥ sutāso dadhyāśiraḥ |*
*uta vāmuṣaso budhi sākaṁ sūryasya raśmibhiḥ |*
*suto mitrāya varuṇāya pītaye chāruṛrtāya pītaye ||2 ||*
*tāṁ vāṁ dhenuṁ na vāsarīmaṁśuṁ duhantyadribhiḥ somaṁ duhantyadribhiḥ |*
*asmatrā gantamupa no'rvāṁchā somapītaye |*
*ayaṁ vāṁ mitrāvaruṇā nṛbhiḥ sutaḥ soma ā pītaye sutaḥ ||3 ||*

ऋ. (Rv.)१.१३९.२

यद्ध त्यन्मित्रावरुणावृतादध्याददाथे अनृतं स्वेन मन्युना दक्षस्य स्वेन मन्युना ।
युवोरित्थधि सद्मस्वपश्याम हिरण्ययम्। धीभिश्चन मनसा स्वेभिरक्षभिः सोमस्य स्वेभिरक्षभिः ॥२॥
*yaddha tyanmitrāvaruṇāvṛtādadhyādadāthe anṛtaṁ svena manyunā dakṣasya svena manyunā |*
*yuvoritthadhi sadmasvapaśyāma hiraṇyayam | dhībhiśchana manasā svebhirakṣabhiḥ somasya svebhirakṣabhiḥ ||2 ||*

९. मन्त्रोक्ता (Mantroktā) - ऋ. (Rv.)१.१३६.६-७

नमो दिवे बृहते रोदसीभ्यां मित्रावोचं वरुणाय मीळहुषे सुमृळीकाय मीळहुषे ।
इन्द्रमग्निमुप स्तुहि द्युक्षमर्यमणं भगम्। ज्योग्जीवन्तः प्रजया सचेमहि सोमस्योती सचेमहि ॥ ६ ॥
ऊती देवानां वयमिन्द्रवन्तो मंसीमहि स्वयशसो मरुद्भिः ।
अग्निर्मित्रो वरुणः शर्म यंसन् तदश्याम मघवानो वयं च ॥७ ॥

*namo dive bṛhate rodasībhyāṁ mitrāvochaṁ varuṇāya mīḷahuṣe sumṛḷīkāya mīḷahuṣe /*
*indramagnimupa stuhi dyukṣamaryamaṇaṁ bhagam / jyogjīvantaḥ prajayā sachemahi somasyotī sachemahi // 6 //*
*ūtī devānāṁ vayamindravanto maṁsīmahi svayaśaso marudbhiḥ /*
*agnirmitro varuṇaḥ śarma yaṁsan tadaśyāma maghavāno vayaṁ cha //7 //*

१०. मरुतः (Marutaḥ) - ऋ. (Rv.)१.१३९.८

मो षु वो असमदभि तानि पौंस्या सनाभूवन्द्युम्नानि मोत जारिषुरस्मत्पुरोत जारिषुः ।
यद्वश्चित्रं युगेयुगे नव्यं घोषादमर्त्यम्।
अस्मासु तन्मरुतो यच्च दुष्टरं दिधृता यच्च दुष्टरम् ॥८ ॥

*mo ṣu vo asamadabhi tāni pauṁsyā sanābhūvandyumnāni mota jāriṣurasmatpurota jāriṣuḥ /*
*yadvaśchitraṁ yugeyuge navyaṁ ghoṣādamartyam /*
*asmāsu tanmaruto yachcha duṣṭaraṁ didhṛtā yachcha duṣṭaram //8 //*

११. वायुः (Vāyuḥ) - ऋ. (Rv.)१.१३४.१-६; १.१३५.१-९

ऋ. (Rv.)१.१३४.१-६

आ त्वा जुवो रारहाणा अभि प्रयो वायो वहन्त्विह पूर्वपीतये सोमस्य पूर्वपीतये ।
ऊर्ध्वा ते अनु सूनृता मनस्तिष्ठतु जानती।
नियुत्वता रथेना याहि दावने वायो मखस्य दावने ॥१ ॥
मन्दन्तु त्वा मन्दिनो वायविन्दवोऽस्मत्क्राणासः सुकृता अभिद्यवो गोभिः क्राणा अभिद्यवः ।
यद्ध क्राणा इरध्यै दक्षं सचन्त ऊतयः। सध्रीचीना नियुतो दावने धिय उप ब्रुवत ई धियः ॥२ ॥
वायुर्युङ्क्ते रोहिता वायुररुणा वायू रथे अजिरा धुरि वोळहवे वहिष्ठा धुरि वोळहवे ।
प्र बोधया पुरन्धिं जार आ ससतीमिव। प्र चक्षय रोदसी वासयोषसः श्रवसे वासयोषसः ॥३ ॥
तुभ्यमुषासः शुचयः परावति भद्रा वस्त्रा तन्वते दंसु रश्मिषु चित्रा नव्येषु रश्मिषु ।
तुभ्यं धेनुः सबर्दुघा विश्वा वसूनि दोहते। अजनयो मरुतो वक्षणाभ्यो दिव आ वक्षणाभ्यः ॥४ ॥
तुभ्यं शुक्रासः शुचयस्तुरण्यवो मदेषूग्रा इषणन्त भुर्वण्यपामिषन्त भुर्वणि ।
त्वां त्सारी दसमानो भगमीट्टे तक्ववीये। त्वं विश्वस्माद्भुवनात्पासि धर्मणासुर्यात्पासि धर्मणा ।५ ।
त्वं नो वायवेषामपूर्व्यः सोमानां प्रथमः पीतिमर्हसि सुतानां पीतिमर्हसि ।
उतो विहुत्मतीनां विशां ववर्जुषीणाम्। विश्वा इत्ते धेनवो दुह्र आशिरं घृतं दुह्रत आशिरम् ॥६ ॥

*ā tvā juvo rārahāṇā abhi prayo vāyo vahantviha pūrvapītaye somasya pūrvapītaye /*
*ūrdhvā te anu sūnṛtā manastiṣṭhatu jānatī /*
*niyutvatā rathenā yāhi dāvane vāyo makhasya dāvane //1 //*
*mandantu tvā mandino vāyavindavo'smatkrāṇāsaḥ sukṛtā abhidyavo gobhiḥ krāṇā abhidyavaḥ /*
*yaddha krāṇā iradhyai dakṣaṁ sachanta ūtayaḥ / sadhīchīnā niyuto dāvane dhiya upa bruvata ī dhiyaḥ //2 //*
*vāyuryuṅtte rohitā vāyuraruṇā vāyū rathe ajirā dhuri voḷahave vahiṣṭhā dhuri voḷahave /*
*pra bodhayā purandhi jāra ā sasatīmiva / pra chakṣaya rodasī vāsayoṣasaḥ śravase vāsayoṣasaḥ //3 //*
*tubhyamuṣāsaḥ śuchayaḥ parāvati bhadrā vastrā tanvate daṁsu raśmiṣu chitrā navyeṣu raśmiṣu /*

*tubhyaṁ dhenuḥ savardudhā viśvā vasūni dohate । ajanayo maruto vakṣaṇābhyo diva ā vakṣaṇābhyaḥ ॥4 ॥*
*tubhyaṁ śukrāsaḥ śuchayasturaṇyavo madeṣūgrā iṣaṇanta bhurvaṇyapāmiṣanta bhurvaṇi ।*
*tvāṁ tsārī dasamāno bhagamīṭṭe takvavīye । tvaṁ viśvasmādbhuvanātpāsi dharmaṇāsuryātpāsi dharmaṇā ।5 ।*
*tvaṁ no vāyaveṣāmapūrvyaḥ somānāṁ prathamaḥ pītimarhasi sutānāṁ pītimarhasi । uto vihutmatīnāṁ viśāṁ vavarjuṣīṇām । viśvā itte dhenavo duhra āśiraṁ ghutaṁ duhrata āśiram ॥6 ॥*

ऋ. (Rv.)१.१३५.१-९

स्तीर्णं बर्हिरुप नो याहि वीतये सहस्रेण नियुता नियुत्वते शतिनीभिर्नियुत्वते ।
तुभ्यं हि पूर्वपीतये देवा देवाय येमिरे।
प्र ते सुतासो मधुमन्तो अस्थिरन्मदाय क्रत्वे अस्थिरन् ॥१॥
तुभ्यायं सोमः परिपूतो अद्रिभिः स्पार्हा वसानः परि कोशमर्षति शुक्रा वसानो अर्षति ।
तवायं भाग आयुषु सोमो देवेषु हूयते। वह वायो नियुतो याह्यस्मयुर्जुषाणो याह्यस्मयुः ॥२॥
आ नो नियुद्भिः शतिनीभिरध्वरं सहस्रिणीभिरुप याहि वीतये वायो हव्यानि वीतये ।
तवायं भाग ऋत्वियः सरश्मिः सूर्ये सचा। अध्वर्युभिर्भरमाणा अयंसत वायो शुक्रा अयंसत॥३॥
आ वां रथो नियुत्वान्वक्षदवसेऽभि प्रयांसि सुधितानि वीतये वायो हव्यानि वीतये ।
पिबतं मध्वो अन्धसः पूर्वपेयं हि वां हितम्।
वायवा चन्द्रेण राधसा गतमिन्द्रश्च राधसा गतम् ॥४॥
आ वां धियो ववृत्युरध्वराँ उपेममिन्दुं मर्मृजन्त वाजिनमाशुमत्यं न वाजिनम् ।
तेषां पिबतमस्मयू आ ना गन्तमिहोत्या। इन्द्रवायू सुतानामद्रिभिर्युवं मदाय वाजदा युवम् ॥५॥
इमे वां सोमा अप्स्वा सुता इहाध्वर्युभिर्भरमाणा अयंसत वायो शुक्रा अयंसत ।
एते वामभ्यसृक्षत तिरः पवित्रमाशवः। युवायवोऽति रोमाण्यव्यया सोमासो अत्यव्यया ॥६॥
अति वायो ससतो याहि शश्वतो यत्र ग्रावा वदति तत्र गच्छतं गृहमिन्द्रश्च गच्छतम् ।
वि सूनृता ददृशे रीयते घृतमा पूर्णया नियुता याथो अध्वरमिन्द्रश्च याथो अध्वरम् ॥७॥
अत्राह तद्वहेथे मध्व आहुतिं यमश्वत्थमुपतिष्ठन्त जायवोऽस्मे ते सन्तु जायवः ।
साकं गावः सुवते पच्यते यवो न ते वाय उप दस्यन्ति धेनवो नाप दस्यन्ति धेनवः ॥८॥
इमे ये ते सु वायो बाह्वोजसोऽन्तर्नदी ते पतयन्त्युक्षणो महि व्राधन्त उक्षणः ।
धन्विंचद्ये अनाशवो जीराश्चिदगिरौकसः। सूर्यस्येव रश्मयो दुर्नियन्त्वो हस्तयोर्दुर्नियन्त्वः॥९॥

*stīrṇa barhirupa no yāhi vītaye sahasreṇa niyutā niyutvate śatinībhirniyutvate ।*
*tubhyaṁ hi pūrvapītaye devā devāya yemire ।*
*pra te sutāso madhumanto asthiranmadāya kratve asthiran ॥1 ॥*
*tubhyāyaṁ somaḥ paripūto adribhiḥ spārhā vasānaḥ pari kośamarṣati śukrā vasāno arṣati ।*
*tavāyaṁ bhāga āyuṣu somo deveṣu hūyate । vaha vāyo niyuto yāhyasmayurjuṣāṇo yāhyyasmayuḥ ॥2 ॥*
*ā no niyudbhiḥ śatinībhiradhvaraṁ sahasriṇībhirupa yāhi vītaye vāyo havyāni vītaye ।*
*tavāyaṁ bhāga ṛtviyaḥ saraśmiḥ sūrye sachā ।*
*adhvaryubhirbharamāṇā ayaṁsata vāyo śukrā ayaṁsata ॥3 ॥*
*ā vāṁ ratho niyutvānvakṣadavase'bhi prayāṁsi sudhitāni vītaye vāyo havyāni vītaye ।*
*pibataṁ madhvo andhasaḥ pūrvapeyaṁ hi vāṁ hitam ।*
*vāyavā chandreṇa rādhasā gatamindraścha rādhasā gatam ॥4 ॥*
*ā vāṁ dhiyo vavṛtyuradhvarām̐ upemamînduṁ marmṛjanta vājinamāśumatyaṁ na vājinam ।*
*teṣāṁ pibatamasmayū ā nā gantamihotyā ।*
*indravāyū sutānāmadribhiryuvaṁ madāya vājadā yuvam ॥5 ॥*

*ime vāṁ somā apsvā sutā ihādhvaryubhirbharamāṇā ayaṁsata vāyo śukrā ayaṁsata /*
*ete vāmabhyasṛkṣata tiraḥ pavitramāśavaḥ /*
*yuvāyavo'ti romāṇyavyayā somāso atyavyayā //6 //*
*ati vāyo sasato yāhi śaśvato yatra grāvā vadati tatra gachchhataṁ gṛhamindraścha gachchhatam /*
*vi sūnutā dadṛśe rīyate ghṛtamā pūrṇayā niyutā yātho adhvaramindraścha yātho adhvaram //7 //*
*atrāha tadvahethe madhva āhutiṁ yamaśvatthamupatiṣṭhanta jāyavo'sme te santu jāyavaḥ /*
*sākaṁ gāvaḥ suvate pachyate yavo na te vāya upa dasyanti dhenavo nāpa dasyanti dhenavaḥ //8 //*
*ime ye te su vāyo bāhnojaso'ntarnadī te patayantyukṣaṇo mahi srādhanta ukṣaṇaḥ /*
*dhanviṁchadye anāśavo jīrāśchidagiraukasaḥ / sūryasyeva raśmayo durniyantvo hastayeārdurniyantvaḥ //9 //*

१२. विश्वेदेवाः (Viśvedevāḥ) - ऋ. (Rv.)१.१३९.१; ११; सा. (Sv.) ४६१

ऋ. (Rv.)१.१३९.१

अस्तु श्रौषट् पुरो अग्निं धिया दध आ नु तच्छर्धो दिवयं वृणीमह इन्द्रवायू वृणीमहे ।
यद्ध क्राणा विवस्वति नाभा सन्दायि नव्यसी ।
अध प्र सू न उप यन्तु धीतयो देवाँ अच्छा न धीतयः ॥१॥
*astu śrauṣaṭ puro agiṁna dhiyā dadha ā nu tachchhardho divayaṁ vṛṇīmaha indravāyū vṛṇīmahe /*
*yaddha krāṇā vivasvati nābhā sandāyi navyasī /*
*adha pra sū na upa yantu dhītayo devām̐ achchhā na dhītayaḥ //1 //*

ऋ. (Rv.)१.१३९.११

ये देवासो दिव्येकादश स्थ पृथिव्यामध्येकादश स्थ ।
अप्सुक्षितो महिनैकादश स्थ ते देवासो यामिमं जुषध्वम् ॥११॥
*ye devāso divyekādaśa stha pṛthivyāmadhyekādaśa stha /*
*apsukṣito mahinaikādaśa stha te devāso yāmimaṁ juṣadhvam //11 //*

सा. (Sv.) ४६१

अस्तु श्रौषट् पुरो अग्निं धिया दध आ नु त्यच्छर्द्धो दिव्यं वृणीमहे इन्द्रवायू वृणीमहे ।
यद्ध क्राणा विवस्वते नाभा सन्दाय नव्यसे ।
अध प्र नूनमुप यन्ति धीतयो देवाँ अच्छा न धीतयः ॥५॥
*astu śrauṣaṭ puro agiṁna dhiyā dadha ā nu tyachchharddho divyaṁ vṛṇīmahe indravāyū vṛṇīmahe /*
*yaddha krāṇā vivasvate nābhā sandāya navyase /*
*adha pra nūnamupa yanti dhītayo devām̐ achchhā na dhītayaḥ //5 //*

## ३४४. पर्वतः काण्वः (Parvataḥ Kāṇvaḥ)

१. इन्द्रः (Indraḥ) - ऋ. (Rv.)८.१२.१-३३; सा. (Sv.) ३८४; ३९४

ऋ. (Rv.)८.१२.१-३३

य इन्द्र सोमपातमो मदः शविष्ठ चेतति। येना हंसि न्यऽत्रिणं तमीमहे ॥१॥
येना दशग्वमध्रिगुं वेपयन्तं स्वर्णरम्। येना समुद्रमाविथा तमीमहे ॥२॥
इमं स्तोममभिष्टये घृतं न पूतमद्रिवः। येना नु सद्य ओजसा ववक्षिथ ॥४॥
इमं जुषस्व गिर्वणः समुद्र इव पिन्वते। इन्द्र विश्वाभिरूतिभिर्ववक्षिथ ॥५॥
यो नो देवः परावतः सखित्वनाय मामहे। दिवो न वृष्टिं प्रथयन्ववक्षिथ ॥६॥
ववक्षुरस्य केतव उत वज्रो गभस्त्योः। यत्सूर्यो न रोदसी अवर्धयत् ॥७॥
यदि प्रवृद्ध सत्पते सहस्रं महिषाँ अघः। आदित्त इन्द्रियं महि प्र वावृधे ॥८॥

इन्द्रः सूर्यस्य रश्मिभिर्न्यर्शसानमोषति। अग्निर्वनेव सासहिः प्र वावृधे ॥९॥
इयं त ऋत्वियावती धीतिरेति नवीयसी। सपर्यन्ती पुरुप्रिया मिमीत इत् ॥१०॥
गर्भो यास्य देवयुः क्रतुं पुनीत आनुषक्। स्तोमैरिन्द्रस्य वावृधे मिमीत इत् ॥११॥
सनिर्मित्रस्य पप्रथ इन्द्रः सोमस्य पीतये। प्राची वाशीव सुन्वते मिमीत इत् ॥१२॥
यं विप्रा उक्थवाहसोऽभिप्रमन्दुरायवः। घृतं न पिप्य आसन्यृतस्य यत् ॥१३॥
उत स्वराजे अदितिः स्तोममिन्द्राय जीजनत्। पृरुप्रशस्तमूतय ऋतस्य यत् ॥१४॥
अभि वह्नय ऊतयेऽनूषत प्रशस्तये। न देव विव्रता हरी ऋतस्य यत् ॥१५॥
यत्सोममिन्द्र विष्णवि यद्वा घ त्रित आप्त्ये। यद्वा मरुत्सु मन्दसे समिन्दुभिः ॥१६॥
यद्वा शक्र परावति समुद्रे अधि मन्दसे। अस्माकमित्सुते रणा समिन्दुभिः ॥१७॥
यद्वासि सुन्वतो वृधो यजमानस्य सत्पते। उक्थे वा यस्य रण्यसि समिन्दुभिः ॥१८॥
देवं देवं वोऽवस इन्द्रमिन्द्रं गृणीषणि। अध यााय तुर्वणे व्यानशुः ॥१९॥
योभिर्यावाहसं सोमेभिः सोमपातमम्। होत्राभिरिन्द्रं वावुधुर्व्यानशुः ॥२०॥
महीरस्य प्रणीतयः पूर्वीरुत प्रशस्तयः। विश्व वसूनि दाशुषे व्यानशु५ ॥२१॥
इन्द्रं वृत्राय हन्तवे देवासो दधिरे पुरः। इन्द्रं वाणीरनूषता समोजसे ॥२२॥
महान्तं महिना वयं स्तोमेभिर्हवनश्रुतम्। अर्कैरभि प्र णोनुमः समोजसे ॥२३॥
न यं विविक्तो रोदसी नान्तरिक्षाणि वज्रिणम्। अमादिदस्य तित्विषे समोजसः ॥२४॥
यद्रिन्द्र पृतनाज्ये देवास्त्वा दधिरे पुरः। आदित्ते हर्यता हरी ववक्षतुः ॥२५॥
यदा वृत्रं नदीवृतं शवसा वज्रिन्नवधीः। आदित्ते हर्यता हरी ववक्षतुः ॥२६॥
यदा ते विष्णुरोजसा त्रीणि पदा विचक्रमे। आदित्ते हर्यता हरी ववक्षतुः ॥२७॥
यदा ते हर्यता हरी वावृधाते दिवेदिवे। आदित्ते विश्वा भुवनानि येमिरे ॥२८॥
यदा ते मारुतीर्विशस्तुभ्यमिन्द्र नियेमिरे। आदित्ते विश्वा भुवनानि येमिरे ॥२९॥
यदा सूर्यममुं दिवि शुक्रं ज्योतिरधारयः। आदित्ते विश्वा भुवनानि येमिरे ॥३०॥
इमां त इन्द्र सुष्टुतिं विप्र इयर्ति धीतिभिः। जामिं पदेव पिप्रतीं प्राध्वरे ॥३१॥
यदस्य धामनि प्रिये समीचीनासो अस्वरन्। नाभा यास्य दोहना प्राध्वरे ॥३२॥
सुवीर्यं स्वश्व्यं सुगव्यमिन्द्र दद्धि नः। होतेव पूर्वचित्तये प्राध्वरे ॥३३॥

*ya indra somapātamo madaḥ śaviṣṭha chetati | yenā haṁsi nya1triṇaṁ tamīmahe ||1 ||*
*yenā daśagvamadhriguṁ vepayantaṁ svarṇaram |*
*yenā samudramāvithā tamīmahe ||2 ||*
*imaṁ stomamabhiṣṭaye ghṛtaṁ na pūtamadrivaḥ |*
*yenā nu sadya Ojasā vavakṣitha ||4 ||*
*imaṁ juṣasva girvaṇaḥ samudra iva pinvate | indra viśvābhirūtibhirvavakṣitha ||5 ||*
*yo no devaḥ parāvataḥ sakhitvanāya māmahe |*
*divo na vṛṣṭiṁ prathayanvavakṣitha ||6 ||*
*vavakṣurasya ketava uta vajro gabhastyoḥ | yatsūryo na rodasī avardhayat ||7 ||*
*yadi pravṛddha satpate sahasraṁ mahiṣām̐ aghaḥ |*
*āditta indriyaṁ mahi pra vāvṛdhe ||8 ||*
*indraḥ sūryasya raśmibhirnyarśasānamoṣati | agnirvaneva sāsahiḥ pra vāvṛdhe ||9 ||*
*iyaṁ ta ṛtviyāvatī dhītireti navīyasī | saparyantī purupriyā mimīta it ||10 ||*
*garbho yāsya devayuḥ kratuṁ punīta ānuṣak |*
*stomairindrasya vāvṛdhe mimīta it ||11 ||*
*sanirmitrasya papratha indraḥ somasya pītaye | prāchī vāśīva sunvate mimīta it ||12 ||*
*yaṁ viprā ukthavāhaso'bhipramandurāyavaḥ | ghṛtaṁ na pipya āsanyṛtasya yat ||13 ||*
*uta svarāje aditiḥ stomamindrāya jījanat | pṛrupraśastamūtaya ṛtasya yat ||14 ||*
*abhi vahnaya ūtaye'nūṣata praśastaye | na deva vivratā harī ṛtasya yat ||15 ||*
*yatsomamindra viṣṇavi yadvā gha trita āptye |*
*yadvā marutsu mandase samindubhiḥ ||16 ||*
*yadvā śakra parāvati samudre adhi mandase | asmākamitsute raṇā samindubhiḥ ||17 ||*
*yadvāsi sunvato vṛdho yajamānasya satpate |*

*ukthe vā yasya raṇyasi samindubhiḥ ॥18 ॥*
*devaṁ devaṁ vo'vasa indramindraṁ gṛṇīṣaṇi । adha yāāya turvaṇe vyānaśuḥ ॥19 ॥*
*yobhiryāvāhasaṁ somebhiḥ somapātamam ।*
*hotrābhirindraṁ vāvudhurvyānaśuḥ ॥20 ॥*
*mahīrasya praṇītayaḥ pūrvīruta praśastayaḥ । viśva vasūni dāśuṣe vyānaśu5 ॥21 ॥*
*indraṁ vṛtrāya hantave devāso dadhire puraḥ । indraṁ vāṇīranūṣatā samojase ॥22 ॥*
*mahāntaṁ mahinā vayaṁ stomebhirhavanaśrutam ।*
*arkairabhi pra ṇonumaḥ samojase ॥23 ॥*
*na yaṁ vivikto rodasī nāntarikṣāṇi vajriṇam । amādidasya titviṣe samojasaḥ ॥24 ॥*
*yadrindra pṛtanājye devāstvā dadhire puraḥ । āditte haryatā harī vavakṣatuḥ ॥25 ॥*
*yadā vṛtraṁ nadīvṛtaṁ śavasā vajrinnavadhīḥ । āditte haryatā harī vavakṣatuḥ ॥26 ॥*
*yadā te viṣṇurojasā trīṇi padā vichakrame । āditte haryatā harī vavakṣatuḥ ॥27 ॥*
*yadā te haryatā harī vāvṛdhāte divedive । āditte viśvā bhuvanāni yemire ॥28 ॥*
*yadā te mārutīrviśastubhyamindra niyemire । āditte viśvā bhuvanāni yemire ॥29 ॥*
*yadā sūryamamuṁ divi śukraṁ jyotiradhārayaḥ ।*
*āditte viśvā bhuvanāni yemire ॥30 ॥*
*imāṁ ta indra suṣṭutiṁ vipra iyarti dhītibhiḥ ।*
*jāmiṁ padeva pipratīṁ prādhvare ॥31 ॥*
*yadasya dhāmani priye samīchīnāso asvaran । nābhā yāsya dohanā prādhvare ॥32 ॥*
*suvīrya svaśvyaṁ sugavyamindra daddhi naḥ । hoteva pūrvachittaye prādhvare ॥33 ॥*

सा. (Sv.) ३८४

यत्सोममिन्द्र विष्णवि यद्वा घ त्रित आप्त्ये। यद्वा मरुत्सु मन्दसे समिन्दुभिः ॥४॥
*yatsomamindra viṣṇavi yadvā gha trita āptye ।*
*yadvā marutsu mandase samindubhiḥ ॥4 ॥*

सा. (Sv.) ३९४

य इन्द्र सोमपातमो मदः शविष्ठ चेतति। येना हंसि न्या३त्रिणं तमीमहे ॥४॥
*ya indra somapātamo madaḥ śaviṣṭha chetati ।*
*yenā haṁsi nyā3triṇaṁ tamīmahe ॥4 ॥*

## ३४५. पर्वतः नारदौ (Parvataḥ Nāradau)

१. पवमानः सोमः (Pavamānaḥ Somaḥ) - ऋ. (Rv.)९.१०५.१-६

तं वः सखायो मदाय पुनानमभि गायत। शिशुं न यौः स्वदयन्त गूर्तिभिः ॥१॥
सं वत्सइव मातृभिरिन्दुर्हिन्वानो अज्यते। देवावीर्मदो मतिभिः परिष्कृतः ॥२॥
अयं दक्षाय साधनोऽयं शर्धाय वीतये। अयं देवेभ्यो मधुमत्तमः सुतः ॥३॥
गोमन्न इन्दो अश्ववत्सुतः सुदक्ष धन्व। शुचिं ते वर्णमधि गोषु दीधरम् ॥४॥
स नो हरीणां पत इन्दो देवप्सरस्तमः। सखेव सख्ये नर्यो रुचे भव ॥५॥
सनेमि त्वमस्मदाँ अदेवं कं चिदत्रिणम्। साह्वाँ इन्दो परि बाधो अप द्वयुम् ॥६॥
*taṁ vaḥ sakhāyo madāya punānamabhi gāyata ।*
*śiśuṁ na yauḥ svadayanta gūrtibhiḥ ॥1 ॥*
*saṁ vatsaiva mātṛbhirindurhinvāno ajyate ।*
*devāvīrmado matibhiḥ pariṣkṛtaḥ ॥2 ॥*
*ayaṁ dakṣāya sādhano'yaṁ śardhāya vītaye ।*
*ayaṁ devebhyo madhumattamaḥ sutaḥ ॥3 ॥*
*gomanna indo aśvavatsutaḥ sudakṣa dhanva ।*
*śuchiṁ te varṇamadhi goṣu dīdharam ॥4 ॥*
*sa no harīṇāṁ pata indo devapsarastamaḥ ।*
*sakheva sakhye naryo ruche bhava ॥5 ॥*
*sanemi tvamasmadāṁ̐ adevaṁ kaṁ chidatriṇam ।*
*sāhnāṁ̐ indo pari bādho apa dvayum ॥6 ॥*

## ३४६. पर्वतनारदौ काण्वौ (Parvatanāradau Kāṇvau)

१. पवमानः सोमः (Pavamānaḥ Somaḥ) - सा. (Sv.) ५६८; ५६९; ५७४; ५७५; १०९८-११००; १६११-१६१३

सा. (Sv.) ५६८-५६९

सखाय आ नि षीदत पुनानाय प्र गायत। शिशुं न यौः परि भूषत श्रिये ॥३॥
तं वः सखायो मदाय पुनानमभि गायत। शिशु न हव्यैः स्वदयन्त गूर्तिभिः ॥४॥

*sakhāya ā ni ṣīdata punānāya pra gāyata । śiśuṁ na yauḥ pari bhūṣata śriye ॥3॥*
*taṁ vaḥ sakhāyo madāya punānamabhi gāyata । śiśu na havyaiḥ svadayanta gūrtibhiḥ ॥4॥*

सा. (Sv.) ५७४-५७५

गोमन्न इन्दो अश्ववत्सुतः सुदक्ष धनिव। शुचिं च वर्णमधि गोषु धारय ॥९॥
अस्मभ्यं त्वा वसुविदमभि वाणीरनूषत। गोभिष्टे वर्णमभि वासयामसि ॥१०॥

*gomanna indo aśvavatsutaḥ sudakṣa dhaniva । śuchiṁ cha varṇamadhi goṣu dhāraya ॥9॥*
*asmabhyaṁ tvā vasuvidamabhi vāṇīranūṣata । gobhiṣṭe varṇamabhi vāsayāmasi ॥10॥*

सा. (Sv.) १०९८-११००

तं वः सखायो मदाय पुनानमभि गायत। शिशुं न हव्यैः स्वदयन्त गूर्तिभिः ॥१॥
सं वत्स इव मातृभिरिन्दुर्हिन्वानो अज्यते। देवावीर्मदो मतिभिः परिष्कृतः ॥२॥
अयं दक्षाय साधनोऽयं शर्धाय वीतये। अयं देवेभ्यो मधुमत्तरः सुतः ॥३॥

*taṁ vaḥ sakhāyo madāya punānamabhi gāyata । śiśuṁ na havyaiḥ svadayanta gūrtibhiḥ ॥1॥*
*saṁ vatsa iva mātṛbhirindurhinvāno ajyate । devāvīrmado matibhiḥ pariṣkṛtaḥ ॥2॥*
*ayaṁ dakṣāya sādhano'yaṁ śardhāya vītaye । ayaṁ devebhyo madhumattaraḥ sutaḥ ॥3॥*

सा. (Sv.) १६११-१६१३

गोमन्न इन्दो अश्ववत्सुतः सुदक्ष धनिव। शुचिं च वर्णमधि गोषु धारय ॥१॥
स नो हरीणां पत इन्दो देवप्सरस्तमः। सखेव सख्ये नर्यो रुचे भव ॥२॥
सनेमि त्वस्मदा अदेवं कं चिदत्रिणम्। साह्वा इन्दो परि बाधो अप द्वयुम् ॥३॥

*gomanna indo aśvavatsutaḥ sudakṣa dhaniva । śuchiṁ cha varṇamadhi goṣu dhāraya ॥1॥*
*sa no harīṇāṁ pata indo devapsarastamaḥ । sakheva sakhye naryāo ruche bhava ॥2॥*
*sanemi tvasmadā adevaṁ kaṁ chidatriṇam । sāhnā indo pari bādho apa dvayum ॥3॥*

## ३४७. पर्वतनारदौ काण्वौ शिखण्डिन्यौ अप्सरसौ काश्यपौ वा (Parvatanāradau Kāṇvau Śikhaṇḍinyau Apsarasau Kāśyapau Vā)

१. पवमानः सोमः (Pavamānaḥ Somaḥ) - ऋ. (Rv.)९.१०४.१-६; सा. (Sv.) ११५७-११५९

ऋ. (Rv.)९.१०४.१-६

सखाय आ नि षीदत पुनानाय प्र गायत। शिशुं न यौः परि भूषत श्रिये ॥१॥
समी वत्सं न मातृभिः सृजता गयसाधनम्। देवाव्यं१ मदमभि द्विशवसम् ॥२॥
पुनाता दक्षसाधनं यथा शर्धाय वीतये। यथा मित्राय वरुणाय शंतमः ॥३॥
अस्मभ्यं त्वा वसुविदमभि वाणीरनूषत। गोभिष्टे वर्णमभि वासयामसि ॥४॥
स नो मदानां पत इन्दो देवप्सरा असि। सखेव सख्ये गातुवित्तमो भव ॥५॥
सनेमि कृध्य१स्मदा रक्षसं कं चिदत्रिणम्। अपादेवं द्वयुमंहो युयोधि नः ॥६॥

*sakhāya ā ni ṣīdata punānāya pra gāyata । śiśuṁ na yauḥ pari bhūṣata śriye ॥1॥*
*samī vatsaṁ na mātṛbhiḥ sṛjatā gayasādhanam । devāvyaṁ1 madamabhi dviśavasam ॥2॥*
*punātā dakṣasādhanaṁ yathā śardhāya vītaye । yathā mitrāya varuṇāya*

*śaṁtamaḥ //3 //*
*asmabhyaṁ tvā vasuvidamabhi vāṇīranūṣata / gobhiṣṭe varṇamabhi vāsayāmasi //4 //*
*sa no madānāṁ pata indo devapsarā asi / sakheva sakhye gātuvittamo bhava //5 //*
*sanemi kṛdhya1smadā rakṣasaṁ kaṁ chidatriṇam / apādevaṁ dvayumaṁho yuyodhi naḥ //6 //*

सा. (Sv.) ११५७-११५९

सखाय आ नि षीदत पुनानाय प्रगायत। शिशुं न यौः परि भूषत श्रिये ॥१॥
समी वत्सं न मातृभिः सृजता गयसाधनम्। देवाव्यं३मदमभि द्विशवसम् ॥२॥
पुनाता दक्षसाधनं यथा शर्धाय वीतये। यथा मित्राय वरुणाय शन्तमम् ॥३॥

*sakhāya ā ni ṣīdata punānāya pragāyata / śiśuṁ na yauḥ pari bhūṣata śriye //1 //*
*samī vatsaṁ na mātṛbhiḥ sṛjatā gayasādhanam / devāvyaṁ3madamabhi dviśavasam //2 //*
*punātā dakṣasādhanaṁ yathā śardhāya vītaye / yathā mitrāya varuṇāya śantamam //3 //*

## ३४८. पवित्रः (Pavitraḥ)

१. पवमानः सोमः (Pavamānaḥ Somaḥ) - ऋ. (Rv.)९.७३.१-९; ९.८३.१-५; सा. (Sv.) ८७५-७७

ऋ. (Rv.)९.७३.१-९

स्रक्वे द्रप्सस्य धमतः समस्वरन्नृतस्य योना समरन्त नाभयः ।
त्रीन्त्स मूर्ध्नो असुरश्चक्र आरभे सत्यस्य नावः सुकृतमपीपरन् ॥१॥
सम्यक् सम्यंचो महिषा अहेषत सिन्धोरूर्मावधि वेना अवीविपन् ।
मधोर्धाराभिर्जनयन्तो अर्कमित्प्रियामिन्द्रस्य तन्वमवीवृधन् ॥२॥
पवित्रवन्तः परि वाचमासते पितैषां प्रत्नो अभि रक्षति व्रतम् ।
महः समुद्रं वरुणस्तिरो दधे धीरा इच्छेकुर्धरुणेष्वारभम् ॥३॥
सहस्रधारेऽव ते समस्वरन्दिवो नाके मधुजिह्वा असश्चतः ।
अस्य स्पशो न नि मिषन्ति भूर्णयः पदेपदे पाशिनः सन्ति सेतवः ॥४॥
पितुर्मातुरध्या ये समस्वरन्नृचा शोचन्तः संदहन्तो अव्रता ।
इन्द्रद्विष्टामप धमन्ति मायया त्वचमस्क्निीं भूमनो दिवस्परि ॥५॥
प्रत्नान्मानादध्या ये समस्वरंछ्लोकयन्त्रासो रभसस्य मन्तवः ।
अपानक्षासो बधिरा असाहत ऋतस्य पन्थां न तरन्ति दुष्कृतः ॥६॥
सहस्रधारे वितते पवित्र आ वाचं पुनन्ति कवयो मनीषिणः ।
रुद्रास एषामिषिरासो अद्रुहः स्पशः स्वंचः सुदृशो नृचक्षसः ॥७॥
ऋतस्य गोपा न दभाय सुक्रतुस्त्री ष पवित्रा हृद्य१न्तरा दधे ।
विद्वान्त्स विश्वा भुवनाभि पश्यत्यवाजुष्टान्विध्यति कर्ते अव्रतान् ॥८॥
ऋतस्य तन्तुर्विततः पवित्र आ जिह्वाया अग्रे वरुणस्य मायया ।
धीराश्चित्तत्समिनक्षन्त आशतात्रा कर्तमव पदात्यप्रभुः ॥९॥

*srakve drapsasya dhamataḥ samasvarannṛtasya yonā samaranta nābhayaḥ /*
*trīntsa mūrdhno asuraśchakra ārabhe satyasya nāvaḥ sukṛtamapīparan //1 //*
*samyak samyaṁcho mahiṣā aheṣata sindhorūrmāvadhi venā avīvipan /*
*madhordhārābhirjanayanto arkamitpriyāmindrasya tanvamavīvṛdhan //2 //*
*pavitravantaḥ pari vāchamāsate pitaiṣāṁ pratno abhi rakṣati vratam /*
*mahaḥ samudraṁ varuṇastiro dadhe dhīrā ichchhekurdharuṇeṣvārabham //3 //*
*sahasradhāre'va te samasvarandivo nāke madhujihnā asaśchataḥ /*
*asya spaśo na ni miṣanti bhūrṇayaḥ padepade pāśinaḥ santi setavaḥ //4 //*
*piturmāturadhyā ye samasvarannṛchā śochantaḥ saṁdahanto avratā /*
*indradviṣṭāmapa dhamanti māyayā tvachamaskniīṁ bhūmano divaspari //5 //*
*pratnānmānādadhyā ye samasvaraṁchhlokayantrāso rabhasasya mantavaḥ /*

*apānakṣāso badhirā asāhata ṛtasya panthāṁ na taranti duṣkṛtaḥ //6 //*
*sahasradhāre vitate pavitra ā vāchaṁ punanti kavayo manīṣiṇaḥ /*
*rudrāsa eṣāmiṣirāso adruhaḥ spaśaḥ svaṁchaḥ sudṛśo nṛchakṣasaḥ //7 //*
*ṛtasya gopā na dabhāya sukratustrī ṣa pavitrā hṛdya1ntarā dadhe /*
*vidvāntsa viśvā bhuvanābhi paśyatyavājuṣṭānvidhyati karte avratān //8 //*
*ṛtasya tanturvitataḥ pavitra ā jihnāyā agre varuṇasya māyayā /*
*dhīrāśchittatsaminakṣanta āśatātrā kartamava padātyaprabhuḥ //9 //*

ऋ. (Rv.)९.८३.१-५

पवित्रं ते विततं ब्रह्मणस्पते प्रभुर्गात्राणि पर्येषि विश्वतः ।
अतप्तननूर्न तदामो अश्नुते श्रृतास इद्वहन्तस्तत्समाशत ॥१॥
तपोष्पवित्रं विततं दिवस्पदे शोचन्तो अस्य तन्तवो व्यस्थिरन् ।
अवन्त्यस्य पवीतारमाशवो दिवस्पृष्ठमधि तिष्ठन्ति चेतसा ॥२॥
अरूरुचदुषसः पृश्निरग्रिय उक्षा बिभर्ति भुवनानि वाजयुः ।
मायाविनो ममिरे अस्य मायया नृचक्षसः पितरो गर्भमा दधुः ॥३॥
गन्धर्व इत्था पदमस्य रक्षति पाति देवानां जनिमान्यद्भुतः ।
गृभ्णाति रिपुं निधया निधापतिः सुकृत्तमा मधुनो भक्षमाशत ॥४॥
हविर्हविष्मो महि सद्म दैव्यं नभो वसानः परि यास्यध्वरम् ।
राजा पवित्ररथो वाजमारुहः सहस्रभृष्टिर्जयसि श्रवो बृहत् ॥५॥

*pavitraṁ te vitataṁ brahmaṇaspate prabhurgātrāṇi paryeṣi viśvataḥ /*
*ataptananūrna tadāmo aśnute śṛtāsa idvahantastatsamāśata //1 //*
*tapoṣpavitraṁ vitataṁ divaspade śochanto asya tantavo vyasthiran /*
*avantyasya pavītāramāśavo divaspṛṣṭhamadhi tiṣṭhanti chetasā //2 //*
*arūruchaduṣasaḥ pṛśniragriya ukṣā bibharti bhuvanāni vājayuḥ /*
*māyāvino mamire asya māyayā nṛchakṣasaḥ pitaro garbhamā dadhuḥ //3 //*
*gandharva itthā padamasya rakṣati pāti devānāṁ janimānyadbhutaḥ /*
*gṛbhṇāti ripuṁ nidhayā nidhāpatiḥ sukṛttamā madhuno bhakṣamāśata //4 //*
*havirhaviṣmo mahi sadma daivyaṁ nabho vasānaḥ pari yāsyadhvaram /*
*rājā pavitraratho vājamāruhaḥ sahasrabhṛṣṭirjayasi śravo bṛhat //5 //*

सा. (Sv.) ८७५-७७

पवित्रं ते विततं ब्रह्मणस्पते प्रभुर्गात्राणि पर्येषि विश्वतः ।
अतप्ततनूर्न तदा मो अश्नुते श्रृतास इद्वहन्तः सं तदाशत ॥१॥
तपोष्पवित्रं विततं दिवस्पदेऽर्चन्तो अस्य तन्तवा व्यस्थिरन ।
अवन्त्यस्यपवितारमाशवो दिवः पृष्ठमधि रोहन्ति तेजसा ॥२॥
अरुरुचदुषसः पृश्निरग्रिय उक्षा मिमेति भुवनेषु वाजयुः ।
मायाविनो ममिरे अस्य मायया नृचक्षसः पितरो गर्भमा दधुः ॥३॥

*pavitraṁ te vitataṁ brahmaṇaspate prabhurgātrāṇi paryeṣi viśvataḥ /*
*ataptatanūrna tadā mo aśnute śṛtāsa idvahantaḥ saṁ tadāśata //1 //*
*tapoṣpavitraṁ vitataṁ divaspade'rchanto asya tantavā vyasthirana /*
*avantyasyapavitāramāśavo divaḥ pṛṣṭhamadhi rohanti tejasā //2 //*
*aruruchaduṣasaḥ pṛśniragriya ukṣā mimeti bhuvaneṣu vājayuḥ /*
*māyāvino mamire asya māyayā nṛchakṣasaḥ pitaro garbhamā dadhuḥ //3 //*

## ३४९. पवित्र आंगिरसौ (Pavitra Āṁgirasau)

१. पवमानः सोमः (Pavamānaḥ Somaḥ) - सा. (Sv.) ५६५; ५९६

सा. (Sv.) ५६५

पवित्रं ते विततं ब्रह्मणस्पते प्रभुर्गात्राणि पर्येषि विश्वतः ।
अतप्ततनूर्न तदामो अश्नुते श्रृतास इद्वहन्तः सं तदाशत ॥१२॥

*pavitraṁ te vitanaṁ brahmaṇaspate prabhurgātrāṇi paryeṣi viśvataḥ /*

*ataptatanūrna tadāmo aśnute śṛtāsa idvahantaḥ saṁ tadāśata //12 //*

सा. (Sv.) ५९६

अरूरुचदुषसः पृश्निरग्रिय उक्षा मिमेति भुवनेषु वाजयुः ।
मायाविनो ममिरे अस्य मायया नृचक्षसः पितरो गर्भमादधुः ॥२॥

*arūruchaduṣasaḥ pṛśniragriya ukṣā mimeti bhuvaneṣu vājayuḥ /*
*māyāvino mamire asya māyayā nṛchakṣasaḥ pitaro garbhamādadhuḥ //2 //*

## ३५०. पवित्र अंगिरसो वा वसिष्ठो वा उभौ वा (Pavitra Aṁgiraso Vā Vasiṣṭho Vā Ubhau Vā)

१. पवमानः सोमः (Pavamānaḥ Somaḥ) - ऋ. (Rv.)९.६७.२२; ९.६७.२८-३०

ऋ. (Rv.)९.६७.२२

पवमानः सो अद्य नः पवित्रेण विचर्षणिः । यः पोता स पुनातु नः ॥२२॥

*pavamānaḥ so adya naḥ pavitreṇa vicharṣaṇiḥ / yaḥ potā sa punātu naḥ //22 //*

ऋ. (Rv.)९.६७.२८-३०

प्र प्यायस्व प्र स्यन्दस्व सोम विश्वेभिरंशुभिः । देवेभ्य उत्तमं हविः ॥२८॥
उप प्रियं पनिप्नतं युवानमाहुतीवृधम् । अगन्म बिभ्रतो नमः ॥२९॥
अलाय्यस्य परशुर्ननाश तमा पवस्व देव सोम । आखुं चिदेव देव सोम ॥३०॥

*pra pyāyasva pra syandasva soma viśvebhiraṁśubhiḥ / devebhya uttamaṁ haviḥ //28 //*
*upa priyaṁ panipnataṁ yuvānamāhutīvṛdham / aganma bibhrato namaḥ //29 //*
*alāyyasya paraśurnanāśa tamā pavasva deva soma / ākhuṁ chideva deva soma //30 //*

२. पवमानाध्येता (Pavamānādhyetā) - सा. (Sv.) १२९८-१३०३

यः पावमानीरध्येत्यृषिभिः संभृतं रसम् । सर्व स पूतमश्नाति स्वदितं मातरिश्वना ॥१॥
पावमानीर्यो अध्येत्यृषिभिः संभृतं रसम् । तस्मै सरस्वती दुहे क्षीरं सर्पिर्मधूदकम् ॥२॥
पावमानीः स्वस्त्ययनीः सुदुघा हि घृतश्चुतः । ऋषिभिः संभृतो रसो ब्राह्मणोष्वमृतं हितम् ॥३॥
पावमानीर्दधन्तु न इमं लोकमथो अमुम् । कामान्त्समर्धयन्तु नो देवीर्देवैः समाहृताः ॥४॥
येन देवाः पवित्रेणात्मानं पुनते सदा । तेन सहस्रधारेण पावमानीः पुनन्तु नः ॥५॥
पावमानीः स्वस्त्ययनीस्ताभिर्गच्छति नान्दनम् । पुण्याँ श्च भक्षान्भक्षयत्यमृतत्वं च गच्छति ॥६॥

*yaḥ pāvamānīradhyetyṛṣibhiḥ saṁbhṛtaṁ rasam /*
*sarva sa pūtamaśnāti svaditaṁ mātariśvanā //1 //*
*pāvamānīryo adhyetyṛṣibhiḥ saṁbhṛtaṁ rasam /*
*tasmai sarasvatī duhe kṣīraṁ sarpirmadhūdakam //2 //*
*pāvamānīḥ svastyayanīḥ sudughā hi ghṛtaśchutaḥ /*
*ṛṣibhiḥ saṁbhṛto raso brāhmaṇoṣvamṛtaṁ hitam //3 //*
*pāvamānīrdadhantu na imaṁ lokamatho amum /*
*kāmāntsamardhayantu no devīrdevaiḥ samāhṛtāḥ //4 //*
*yena devāḥ pavitreṇātmānaṁ punate sadā /*
*tena sahasradhāreṇa pāvamānīḥ punantu naḥ //5 //*
*pāvamānīḥ svastyayanīstābhirgachchhati nāndanam /*
*puṇyāṁ̐ scha bhakṣānbhakṣayatyamṛtatvaṁ cha gachchhati //6 //*

३. पवमानी अध्येतृस्तुतिः (Pavamānī Adhyetṛstutiḥ) - ऋ. (Rv.)९.६७.३१-३२

यः पावमानीरध्येत्यृषिभिः संभृतं रसम् । सर्व स पूतमश्नाति स्वदितं मातरिश्वना ॥३१॥
पावमानीर्यो अध्येत्यृषिभिः संभृतं रसम् । तस्मै सरस्वती दुहे क्षीरं सर्पिर्मधूदकम् ॥३२॥

*yaḥ pāvamānīradhyetyṛṣibhiḥ saṁbhṛtaṁ rasam /*
*sarva sa pūtamaśnāti svaditaṁ mātariśvanā //31 //*
*pāvamānīryo adhyetyṛṣibhiḥ saṁbhṛtaṁ rasam /*
*tasmai sarasvatī duhe kṣīraṁ sarpirmadhūdakam //32 //*

## ३५१. पायुः (Pāyuḥ)

१. अग्निः (Agniḥ) - य. (Yv.)११.२६

परित्वाग्ने पुरं वयं विप्रंसहस्य धीमहि। धृषद्वर्णं दिवेदिवे हन्तारं भङ्गुरावताम् ॥२६॥

*paritvāgne puraṁ vayaṁ vipraṁsahasya dhīmahi /*
*dhṛṣadvarṇa divedive hantāraṁ bhaṅgurāvatām //26 //*

२. अग्निरक्षोहा (Agnirakṣohā) - ऋ. (Rv.)१०.८७.१-१५

रक्षोहणं वाजिनमा जिघर्मि मित्रं प्रथिष्ठमुप यामि शर्म ।
शिशानो अग्निः क्रतुभिः समिद्धः स नो दिवा स रिषः पातु नक्तम् ॥१॥
अयोदंष्ट्रो अर्चिषा यातुधानानुप स्पृश जातवेदः समिद्धः ।
आ जिह्वया मूरदेवान्रभस्व क्रव्यादो वृक्त्व्यपि धत्स्वासन् ॥२॥
उभेभयाविन्नुप धेहि दंष्ट्रा हिंस्रः शिशानोऽवरं परं च ।
उतान्तरिक्षे परि याहि राजंजम्भैः सं धेह्यभि यातुधानान् ॥३॥
यौरिषूः संनममानो अग्ने वाचा शल्याँ अशनिभिर्दिहानः ।
ताभिर्विध्य हृदये यातुधानान् प्रतीचो बाहून्प्रति भङ्ग्ध्येषाम् ॥४॥
अग्ने त्वचं यातुधानस्य भिन्धि हिंस्राशनिर्हरसा हन्त्वेनम् ।
प्र पर्वाणि जातवेदः शृणीहि क्रव्यात्क्रविष्णुर्वि चिनोतु वृक्णम् ॥५॥
यत्रेदानीं पश्यसि जातवेदस्तिष्ठन्तमग्न उत वा चरन्तम् ।
यद्वान्तरिक्षे पथिभिः पतन्तं तमस्ता विध्य शर्वा शिशानः ॥६॥
उतालब्धं स्पृणुहि जातवेद आलेभानादृष्टिभिर्यातुधानात् ।
अग्ने पूर्वो नि जहि शोशुचान आमादः क्ष्विंकास्तमदन्त्वेनीः ॥७॥
इह प्र ब्रूहि यतमः सो अग्ने यो यातुधानो य इदं कृणोति ।
तमा रभस्व समिधा यविष्ठ नृचक्षसश्चक्षुषे रन्धयैनम् ॥८॥
तीक्ष्णेनाग्ने चक्षुषा रक्ष यां प्राञ्चं वसुभ्यः प्र णय प्रचेतः ।
हिंस्रं रक्षांस्यभि शोशुचानं मा त्वा दभन्यातुधाना नृचक्षः ॥९॥
नृचक्षा रक्षः परि पश्य विक्षु तस्य त्रीणि प्रति शृणीह्यग्रा ।
तस्याग्ने पृष्टीर्हरसा शृणीहि त्रेधा मूलं यातुधानस्य वृश्च ॥१०॥
त्रिर्यातुधानः प्रसितिं त एत्वृतं यो अग्ने अनृतेन हन्ति ।
तमर्चिषा स्फूर्जयज्जातवेदः समक्षमेनं गृणते नि वृङ्धि ॥११॥
तदग्ने चक्षुः प्रति धेहि रेभे शफारुजं येन पश्यसि यातुधानम् ।
अथर्ववज्ज्योतिषा दैव्येन सत्यं धूर्वन्तमचितं न्योष ॥१२॥
यदग्ने अद्य मिथुना शपातो यद्वाचस्तृष्टं जनयन्त रेभाः ।
मन्योर्मनसः शरव्या३ जायते या तया विध्य हृदय यातुधानान् ॥१३॥
परा शृणीहि तपसा यातुधानान्पराग्ने रक्षो हरसा शृणीहि ।
परार्चिषा मूरदेवांछृणीहि परासुतृपो अभि शोशुचानः ॥१४॥
पराद्य देवा वृजिनं शृणन्तु प्रत्यगेनं शपथा यन्तु तृष्टाः ।
वाचस्तेनं शरव ऋच्छन्तु मर्मन्विश्वस्यैतु प्रसितिं यातुधानः ॥१५॥

*rakṣohaṇaṁ vājinamā jigharmi mitraṁ prathiṣṭhamupa yāmi śarma /*
*śiśāno agniḥ kratubhiḥ samiddhaḥ sa no divā sa riṣaḥ pātu naktam //1 //*
*ayodaṁṣṭro archiṣā yātudhānānupa spṛśa jātavedaḥ samiddhaḥ /*
*ā jihnayā mūradevānnabhasva kravyādo vṛktavyapi dhatsvāsan //2 //*
*ubhebhayāvinnupa dhehi daṁṣṭrā hiṁsraḥ śiśāno'varaṁ paraṁ cha /*
*utāntarikṣe pari yāhi rājaṁjambhaiḥ saṁ dhehyabhi yātudhānān //3 //*
*yauriṣūḥ saṁnamamāno agne vāchā śalyām̐ aśanibhirdihānaḥ /*
*tābhirvidhya hṛdaye yātudhānān pratīcho bāhūnprati bhaṅdhyeṣām //4 //*
*agne tvachaṁ yātudhānasya bhindhi hiṁsrāśanirharasā hantvenam /*
*pra parvāṇi jātavedaḥ śṛṇīhi kravyātkraviṣṇurvi chinotu vṛkṇam //5 //*

*yatredānīṁ paśyasi jātavedastiṣṭhantamagna uta vā charantam* ।
*yadvāntarikṣe pathibhiḥ patantaṁ tamastā vidhya śarvā śiśānaḥ* ॥6॥
*utālabdhaṁ spṛṇuhi jātaveda ālebhānādṛṣṭibhiryātudhānāt* ।
*agne pūrvo ni jahi śośuchāna āmādaḥ kṣaviṅkāstamadantvenīḥ* ॥7॥
*iha pra brūhi yatamaḥ so agne yo yātudhāno ya idaṁ kṛṇoti* ।
*tamā rabhasva samidhā yaviṣṭha nṛchakṣasaśchakṣuṣe randhayainam* ॥8॥
*tīkṣaṇenāgne chakṣuṣā rakṣa yāṁ prāchchaṁ vasubhyaḥ pra ṇaya prachetaḥ* ।
*hiṁsraṁ rakṣāṁsyabhi śośuchānaṁ mā tvā dabhanyātudhānā nṛchakṣaḥ* ॥9॥
*nṛchakṣā rakṣaḥ pari paśya vikṣu tasya trīṇi prati śṛṇīhyagrā* ।
*tasyāgne pṛṣṭīrharasā śṛṇīhi tredhā mūlaṁ yātudhānasya vṛścha* ॥10॥
*triryātudhānaḥ prasitiṁ ta etvṛtaṁ yo agne anṛtena hanti* ।
*tamarchiṣā sphūrjayajjātavedaḥ samakṣamenaṁ gṛṇate ni vṛṅdhi* ॥11॥
*tadagne chakṣuḥ prati dhehi rebhe śaphārujaṁ yena paśyasi yātudhānam* ।
*atharvavajjyotiṣā daivyena satyaṁ dhūrvantamachitaṁ nyoṣa* ॥12॥
*yadagne adya mithunā śapāto yadvāchastṛṣṭaṁ janayanta rebhāḥ* ।
*manyormanasaḥ śaravyā3 jāyate yā tayā vidhya hṛdaya yātudhānān* ॥13॥
*parā śṛṇīhi tapasā yātudhānānparāgne rakṣo harasā śṛṇīhi* ।
*parārchiṣā mūradevāṁchhṛṇīhi parāsutṛpo abhi śośuchānaḥ* ॥14॥
*parādya devā vṛjinaṁ śṛṇantu pratayagenaṁ śapathā yantu tṛṣṭāḥ* ।
*vāchastenaṁ śarava ṛchchhantu marmanviśvasyaitu prasitiṁ yātudhānaḥ* ॥15॥

## ३५२. पायुर् भरद्वाजः (Pāyur Bharadvājaḥ)

१. अग्निः (Agniḥ) - सा. (Sv.) ८०

सनादग्ने मृणसि यातुधानान्व त्वा रक्षांसि पुतनासु जिग्युः ।
अनु दह सहमूरान्कयादो मा ते हेत्या मुक्षत दैव्यायाः ॥८॥
*sanādagne mṛṇasi yātudhānānva tvā rakṣāṁsi putanāsu jigyuḥ* ।
*anu daha sahamūrānkayādo mā te hetyā mukṣata daivyāyāḥ* ॥8॥

२. अश्वाः (Aśvāḥ) - ऋ. (Rv.)६.७५.७

तीव्रान् घोषान् कृण्वते वृषपाणयोऽश्वा रथेभिः सह वाजयन्तः ।
अवक्रामन्तः प्रपदैरमित्रान् क्षिणन्ति शत्रूँरनपव्ययन्तः ॥७॥
*tīvrān ghoṣān kṛṇvate vṛṣapāṇayo'śvā rathebhiḥ saha vājayantaḥ* ।
*avakrāmantaḥ prapadairamitrān kṣiṇanti śatrūm̐ranapavyayantaḥ* ॥7॥

३. आर्त्नी (Ārtnī) - ऋ. (Rv.)६.७५.४

ते आचरन्ती समनेव योषा मातेव पुत्रं बिभृतामुपस्थे ।
अप शत्रून् विध्यतां संविदाने आर्त्नी इमे विष्फुरन्ती अमित्रान् ॥४॥
*te ācharantī samaneva yoṣā māteva putraṁ bibhṛtāmupasthe* ।
*apa śatrūn vidhyatāṁ saṁvidāne ārtnī ime visphurantī amitrān* ॥4॥

४. इषवः (Iṣavaḥ) - ऋ. (Rv.)६.७५.११; १२; १५.; १६; सा. (Sv.) १८६३

ऋ. (Rv.)६.७५.११-१२

सुपर्णं वस्ते मृगो अस्या दन्तो गोभिः सन्नद्धा पतति प्रसूता ।
यत्रा नरः सं च वि च द्रवन्ति तत्रास्मभ्यमिषवः शर्म यंसन् ॥११॥
ऋजीते परि वृङ्धि नोऽश्मा भवतु नस्तनूः । सोमो अधि ब्रवीतु नोऽदितिः शर्म यच्छतु ॥१२॥
*suparṇa vaste mṛgo asyā danto gobhiḥ sannaddhā patati prasūtā* ।
*yatrā naraḥ saṁ cha vi cha dravanti tatrāsmabhyamiṣavaḥ śarma yaṁsan* ॥11॥
*ṛjīte pari vṛṅdhi no'śmā bhavatu nastanūḥ* ।
*somo adhi bravītu no'ditiḥ śarma yachchhatu* ॥12॥

ऋ. (Rv.)६.७५.१५-१६

आलाक्ता या रुरुशीर्ष्ण्यथो यस्या अयो मुखम्। इदं पर्जन्य रेतस इष्वै देव्यै बृहन्नमः ॥१५॥

अवसृष्टा परा पत शरव्ये ब्रह्मसंशिते। गच्छामित्रान्प्र पद्यस्व मामीषां कं चनोच्छिषः ॥१६॥
*ālāktā yā rurusīrṣṇyatho yasyā ayo mukham /*
*idaṁ parjanya retasa iṣvai devyai bṛhannamaḥ //15 //*
*avasṛṣṭā parā pata śaravye brahmasaṁśite /*
*gachchhāmitrānpra padyasva māmīṣāṁ kaṁ chanochchhiṣaḥ //16 //*

सा. (Sv.) १८६३
अवसृष्टा परा पत शरव्ये ब्रह्मसंशिते। गच्छामित्रान्प्र पद्यस्व मामीषां कं च नोच्छिषः ॥३॥
*avasṛṣṭā parā pata śaravye brahmasaṁśite /*
*gachchhāmitrānpra padyasva māmīṣāṁ kaṁ cha nochchhiṣaḥ //3 //*

५. इषुधिः (Iṣudhiḥ) - ऋ. (Rv.)६.७५.५
बह्वीनां पिता बहुरस्य पुत्रश्चिश्चा कृणोति समनावगत्य ।
इषुधिः संकाः पृतनाश्च सर्वाः पृष्ठे निनद्धो जयति प्रसूतः ॥५॥
*bahnīnāṁ pitā bahurasya putraśchiśchā kṛṇoti samanāvagatya /*
*iṣudhiḥ saṁkāḥ pṛtanāścha sarvāḥ pṛṣṭhe ninaddho jayati prasūtaḥ //5 //*

६. कवचसोम वरुण (Kavachasoma Varuṇa) - ऋ. (Rv.)६.७५.१८
मर्माणि ते वर्मणा छादयामि सोमस्त्वा राजामृतेनानु वस्ताम् ।
उरोर्वरीयो वरुणस्ते कृणोतु जयन्तं त्वानु देवा मदन्तु ॥१८॥
*marmāṇi te varmaṇā chhādayāmi somastvā rājāmṛtenānu vastām /*
*urorvarīyo varuṇaste kṛṇotu jayantaṁ tvānu devā madantu //18 //*

७. ज्या (Jyā) - ऋ. (Rv.)६.७५.३
वक्ष्यन्तीवेदा गनीगन्ति कर्ण प्रियं सखायं परिषस्वजाना ।
योषेव शिङ्क्ते वितताधि धन्वंज्या इयं समने पारयन्ती ॥३॥
*vakṣayantīvedā ganīganti karṇa priyaṁ sakhāyaṁ pariṣasvajānā /*
*yoṣeva śiṅkte vitatādhi dhanvaṁjyā iyaṁ samane pārayantī //3 //*

८. देवा ब्रह्म च (Devā Brahma Cha) - ऋ. (Rv.)६.७५.१९
यो नः स्वो अरणो यश्च निष्ट्यो जिघांसति। देवास्तं सर्वे धूर्वन्तु ब्रह्म वर्म ममान्तरम् ॥१९॥
*yo naḥ svo araṇo yaścha niṣṭyo jighāṁsati /*
*devāstaṁ sarve dhūrvantu brahma varma mamāntaram //19 //*

९. धनुः (Dhanuḥ) - ऋ. (Rv.)६.७५.२
धन्वना गा धन्वनाजिं जयेम धन्वना तीव्राः समदो जयेम ।
धनुः शत्रोरपकामं कृणोति धन्वना सर्वाः प्रदिशो जयेम ॥२॥
*dhanvanā gā dhanvanājiṁ jayema dhanvanā tīvrāḥ samado jayema /*
*dhanuḥ śatrorapakāmaṁ kṛṇoti dhanvanā sarvāḥ pradiśo jayema //2 //*

१०. प्र्रतोदः (Prratodaḥ) - ऋ. (Rv.)६.७५.१३
आ जन्ति सान्वेषां जघनाँ उप जिघ्नते। अश्वाजनि प्रचेतसोऽश्वान्त्समत्सु चोदय ॥१३॥
*ā janti sānveṣāṁ jaghanāṁ̐ upa jighnate /*
*aśvājani prachetaso'śvāntsamatsu chodaya //13 //*

११. युद्धभूमि ब्रह्मणस्पतिर् अदितिश्च (लिंगोक्ता संग्रामाशिषः) (Yuddhabhūmi Brahmaṇaspatir Aditiścha (Liṁgoktā Saṁgrāmāśiṣaḥ) - ऋ. (Rv.)६.७५.१७
यत्र बाणाः संपतन्ति कुमारा विशिखा इव ।
तत्रा नो ब्रह्मणस्पतिरदितिः शर्म यच्छतु विश्वाहा शर्म यच्छतु ॥१७॥
*yatra bāṇāḥ saṁpatanti kumārā viśikhā iva /*
*tatrā no brahmaṇaspatiraditiḥ śarma yachchhatu viśvāhā śarma yachchhatu //17 //*

१२. रथः (Rathaḥ) - ऋ. (Rv.)६.७५.८
रथवाहनं हविरस्य नाम यत्रायुधं निहितमस्य वर्म ।

तत्रा रथमुप शग्मं सदेम विश्वाहा वयं सुमनस्यमानाः ॥८॥
*rathavāhanaṁ harivarasya nāma yatrāyudhaṁ nihitamasya varma* ।
*tatrā rathamupa śagmaṁ sadema viśvāhā vayaṁ sumanasyamānāḥ* ॥8॥

१३. रथगोपा (Rathagopā) - ऋ. (Rv.)६.७५.९

स्वादुषंसदः पितरो वयोधाः कृच्छ्रेश्रितः शक्तीवन्तो गभीराः ।
चित्रसेना इषुबला अमृध्राः सतोवीरा उरवो व्रातसाहाः ॥९॥
*svāduṣaṁsadaḥ pitaro vayodhāḥ kṛchchhreśritaḥ śaktīvanto gabhīrāḥ* ।
*chitrasenā iṣubalā amṛdhrāḥ satovīrā uravo vrātasāhāḥ* ॥9॥

१४. रश्मयः (Raśmayaḥ) - ऋ. (Rv.)६.७५.६

रथे तिष्ठन्नयति वाजिनः पुरो यत्रयत्र कामयते सुषारथिः ।
अभीशूनां महिमानं पनायत मनः पश्चादनु यच्छन्ति रश्मयः ॥६॥
*rathe tiṣṭhannayati vājinaḥ puro yatrayatra kāmayate suṣārathiḥ* ।
*abhīśūnāṁ mahimānaṁ panāyata manaḥ paśchādanu yachchhanti raśmayaḥ* ॥6॥

१५. लिङ्गोक्ताः (Liṅgoktāḥ) - ऋ. (Rv.)६.७५.१०.

ब्राह्मणासः पितरः सोम्यासः शिवे नो द्यावापृथिवी अनेहसा ।
पूषा नः पातु दुरिताद् ऋतावृधो रक्षा माकिर्नो अघशंस ईशत ॥१०॥
*brāhmaṇāsaḥ pitaraḥ somyāsaḥ śive no dyāvāpṛthivī anehasā* ।
*pūṣā naḥ pātu duritād ṛtāvṛdho rakṣā mākirno aghaśaṁsa īśata* ॥10॥

१६. वर्म (Varma) - ऋ. (Rv.)६.७५.१

जीमूतस्येव भवति प्रतीकं यद्वर्मी याति समदामुपस्थे ।
अनाविद्धया तन्वा जय त्वं स त्वा वर्मणो महिमा पिपर्तु ॥१॥
*jīmūtasyeva bhavati pratīkaṁ yadvarmī yāti samadāmupasthe* ।
*anāviddhayā tanvā jaya tvaṁ sa tvā varmaṇo mahimā pipartu* ॥1॥

१७. वर्म-सोम-वरुणाः (Varma-Soma-Varuṇāḥ) - सा. (Sv.) १८७०; १८७२

सा. (Sv.) १८७०

मर्माणि ते वर्मणा च्छादयामि सोमस्त्वा राजामृतेनानु वस्ताम् ।
उरोर्वरीयो वरुणस्ते कृणोतु जयन्तं त्वानु देवा मदन्तु ॥१॥
*marmāṇi te varmaṇā chchhādayāmi somastvā rājāmṛtenānu vastām* ।
*urorvarīyo varuṇaste kṛṇotu jayantaṁ tvānu devā madantu* ॥1॥

सा. (Sv.) १८७२

यो नः स्वोऽरणो यश्च निष्ट्यो जिघांसति ।
देवास्तं सर्वे धूर्वन्तु ब्रह्म वर्म मामान्तरं शर्म वर्म ममान्तरम् ॥३॥
*yo naḥ svo'raṇo yaścha niṣṭhyo jighāṁsati* ।
*devāstaṁ sarve dhūrvantu brahma varma māmāntaraṁ śarma varma mamāntaram* ॥3॥

१८. संग्रामाशिषः (Saṁgrāmāśiṣaḥ) - सा. (Sv.) १८६६

यत्र बाणः संपतन्ति कुमारु विशिखा इव ।
तत्र नो ब्रह्मणस्पतिरदितिः शर्म यच्छतु विश्वाहा शर्म यच्छतु ॥३॥
*yatra bāṇaḥ saṁpatanti kumāru viśikhā iva* ।
*tatra no brahmaṇaspatiraditiḥ śarma yachchhatu viśvāhā śarma yachchhatu* ॥3॥

१९. सारथिः (Sārathiḥ) - ऋ. (Rv.)६.७५.६

रथे तिष्ठन्नयति वाजिनः पुरो यत्रयत्र कामयते सुषारथिः ।
अभीशूनां महिमानं पनायत मनः पश्चादनु यच्छन्ति रश्मयः ॥६॥
*rathe tiṣṭhannayati vājinaḥ puro yatrayatra kāmayate suṣārathiḥ* ।
*abhīśūnāṁ mahimānaṁ panāyata manaḥ paśchādanu yachchhanti raśmayaḥ* ॥6॥

२०. हस्तघ्नः (Hastaghnaḥ) - ऋ. (Rv.)६.७५.१४.

अहिरिव भोगैः पर्येति बाहुं ज्याया हेतिं परिबाधमानः ।
हस्तघ्नो विश्वा वयुनानि विद्वान् पुमान्पुमांसं परि पातु विश्वतः ॥१४॥
*ahiriva bhogaiḥ paryeti bāhuṁ jyāyā hetiṁ paribādhamānaḥ /*
*hastaghno viśvā vayunāni vidvān pumānpumāṁsaṁ pari pātu viśvataḥ //14 //*

## ३५३. पावकाग्निः (Pāvakāgniḥ)

१. अग्निः (Agniḥ) - य. (Yv.)१२.१०६; १०८; १०९; १११

य. (Yv.)१२.१०६

अग्ने तव श्रवो वयो महि भ्राजन्ते ऽ अर्चयो विभावसो ।
बृहद्भानो शवसा वाज मुक्थ्यं दधासि दाशुषे कवे ॥१०६॥
*agne tava śravo vayo mahi bhrājante ' archayo vibhāvaso /*
*bṛhadbhāno śavasā vāja mukthyaṁ dadhāsi dāśuṣe kave //106 //*

य. (Yv.)१२.१०८-१०९

ऊर्जो नपाज्जातवेदः सुशस्तिभिर्मन्दस्व धीतिर्भिर्हितः ।
त्वे ऽ इषः संदधुर्भूरिवर्पसश्चित्रोतयो वामजाताः ॥१०८॥
इरज्यन्नग्ने प्रथयस्व जन्तुभिरस्मे रायो ऽ अमर्त्य ।
स दर्शतस्य वपुषो विराजसि पृणाक्षि सानसिं क्रतुम् ॥१०९॥
*ūrjo napājjātavedaḥ suśastibhirmandasva dhītirbhirhitaḥ /*
*tve ' iṣaḥ saṁdadhurbhūrivarpasaśchitrotayo vāmajātāḥ //108 //*
*irajyannagne prathayasva jantubhirasme rāyo ' amartya /*
*sa darśatasya vapuṣo virājasi pṛṇākṣi sānasiṁ kratum //109 //*

य. (Yv.)१२.१११

ऋतावानं महिषं विश्वदर्शतमग्निंसुम्नाय दधिरे पुरो जनाः ।
श्रुत्कर्णंसप्रथस्तमं त्वा गिरा दैव्यं मानुषा युगा॥१११॥
*ṛtāvānaṁ mahiṣaṁ viśvadarśatamagniṁsumnāya dadhire puro janāḥ /*
*śrutkarṇaṁsaprathastamaṁ tvā girā daivyaṁ mānuṣā yugā //111 //*

२. विद्वान् (Vidvān) - य. (Yv.)१२.१०७; ११०

य. (Yv.)१२.१०७

पावकवर्चाः शुक्रवर्चा ऽ अनूनवर्चा ऽ उदियर्षि भानुना ।
पुत्रो मातरा विचरन्नुपावसि पृणक्षि रोदसी ऽ उभे ॥१०७॥
*pāvakavarchāḥ śukravarchā ' anūnavarchā ' udiyarṣi bhānunā /*
*putro mātarā vicharannupāvasi pṛṇakṣi rodasī ' ubhe //107 //*

य. (Yv.)१२.११०

इष्कर्त्तारमध्वरस्य प्रचेतसं क्षयन्तंराधसो महः ।
रातिं वामस्य सुभगां महीमिषं दधासि सानसिंरयिम् ॥११०॥
*iṣkarttāramadhvarasya prachetasaṁ kṣayantaṁrādhaso mahaḥ /*
*rātiṁ vāmasya subhagāṁ mahīmiṣaṁ dadhāsi sānasiṁrayim //110 //*

## ३५४. पावकोऽग्निर् बार्हस्पत्यो वा गृहपतियविष्ठौ सहसः पुत्र-अन्यतरो वा (Pāvako'gnir Bārhaspatyo Vā Gṛhapatiyaviṣṭhau Sahasaḥ Putra-Anyataro Vā)

१. इन्द्रः (Indraḥ) - सा. (Sv.) ९५२-९५४

इन्द्र जुषस्व प्र वहा याहि शूर हरिह । पिबा सुतस्य मतिर्न मधोश्चकानश्चरुर्मदाय ॥१॥
इन्द्र जठरं नव्यं न पृणस्व मधोर्दिवो न।
अस्य सुतस्य स्वा३र्णोप त्वा मदाः सुवाचो अस्थुः ॥२॥
इन्द्रस्तुराषण्मित्रो न जघान वृत्रं यतिर्न । बिभेद वलं भृगुर्न ससाहे शत्रून्मदे सोमस्य ॥३॥
*indra juṣasva pra vahā yāhi śūra hariha / pibā sutasya matirna*

*madhośchakānaścharurmadāya ॥1 ॥*
*indra jaṭharaṁ navyaṁ na pṛṇasva madhordivo na ।*
*asya sutasya svā3rnopa tvā madāḥ suvācho asthuḥ ॥2 ॥*
*indrasturāṣaṇmitro na jaghāna vṛtraṁ yatirna ।*
*bibheda vatnaṁ bhṛgurna sasāhe śatrūnmade somasya ॥3 ॥*

## ३५५. पुनर्वत्सः काण्वः (Punarvatsaḥ Kāṇvaḥ)

१. मरुतः (Marutaḥ) - ऋ. (Rv.)८.७.१-३६

प्र यद्वस्त्रिष्टुभमिषं मरुतो विप्रो अक्षरत्। वि पर्वतेषु राजथ ॥१॥
यदंग तविषीयवो यामं शुभ्रा अचिध्वम्। नि पर्वता अहासत ॥२॥
उदीरयन्त वायुभिर्वाश्रासः पृश्निमातरः। धुक्षन्त पिप्युषीमिषम् ॥३॥
वपन्ति मरुतो मिहं प्र वेपयन्ति पर्वतान्। यद्यामं यान्ति वायुभिः ॥४॥
नि यद्यामाय वो गिरिर्नि सिन्धवो विधर्मणे। महे शुष्माय येमिरे ॥५॥
युष्माँ उ नक्तमूतये युष्मादिन्दवा हवामहे। युष्मान्प्रयत्यध्वरे ॥६॥
उदु त्यं अरुणप्सवश्चित्रा यामेभिरीरते। वाश्रा अधि ष्णुना दिवः ॥७॥
सृजन्ति रश्मिोजसा पन्थां सूर्याय यातवे। ते भानुभिर्वि तस्थिरे ॥८॥
इमां मे मरुतो गिरमिमं स्तोममृभुक्षणः। इमं मे वनता हवम् ॥९॥
त्रीणि सरांसि पृश्नयो दुदुह्रे वज्रिणे मधु। उत्सं कवन्धमुद्रिणम् ॥१०॥
मरुतो यद्ध वो दिवः सुम्नायन्तो हवामहे। आ तू न उप गन्तन ॥११॥
यूयं हि ष्ठा सुदानवो रुद्रा ऋभुक्षणो दमे। उत प्रचेतसो मदे ॥१२॥
आ नो रयिं मदच्युतं पुरुक्षुं विश्वधायसम्। इयर्ता मरुतो दिवः ॥१३॥
अधीव यद् गिरीणां यामं शुभ्रा अचिध्वम्। सुवानैर्मन्दध्व इन्दुभिः ॥१४॥
एतावतश्चिदेषां सुम्नं भिक्षेत मर्त्यः। अदाभ्यस्य मन्मभिः ॥१५॥
ये द्रप्साइव रोदसी धमन्त्यनु वृष्टिभिः। उत्सं दुहन्तो अक्षितम् ॥१६॥
उदु स्वानेभिरीरत् उद्रथैरुदु वायुभिः। उत्स्तोमैः पृश्निमातरः ॥१७॥
येनाव तुर्वशं यदुं येन कण्वं धनस्पृतम्। राये सु तस्य धीमहि ॥१८॥
इमा उ वः सुदानवो घृतं न पिप्युषीरिषः। वर्धान्काण्वस्य मन्मभिः ॥१९॥
क्व नूनं सुदानवो मदथा वृक्तबर्हिषः। ब्रह्मा को वः सपर्यति ॥२०॥
नहि ष्म यद्ध वः पुरा स्तोमेभिर्वृक्तबर्हिषः। शर्धँार् ऋतस्य जिन्वथ ॥२१॥
समु त्ये महतीरपः सं क्षोणी समु सूर्यम्। सं वज्रं पर्वशो दधुः ॥२२॥
वि वृत्रं पर्वशो ययुर्वि पर्वताँ अराजिनः। चक्राणा वृष्णि पौंस्यम् ॥२३॥
अनु त्रितस्य युध्यतः शुष्ममावन्नुत क्रतुम्। अन्विन्द्रं वृत्रतूर्ये ॥२४॥
विद्युद्धस्ता अभिद्यवः शिप्राः शीर्षन्हिरण्ययीः। शुभ्राः व्यंजन श्रिये ॥२५॥
उशना यत्परावत् उक्ष्णो रन्ध्रमयातन। द्यौर्न चक्रदद्भिया ॥२६॥
आ नो मखस्य दावनेऽश्वैर्हिरण्यपाणिभिः। देवास उप गन्तन ॥२७॥
यदेषां पृषती रथे प्रष्टिर्वहति रोहितः। यान्ति शुभ्रा रिणन्नपः ॥२८॥
सुषोमे शर्यणावत्यार्जीके पस्त्यावति। ययुर्निचक्रया नरः ॥२९॥
कदा गच्छाथ मरुत इत्था विप्रं हवमानम्। मार्डीकेभिर्नाधमानम् ॥३०॥
कद्ध नूनं कधप्रियो यदिन्द्रमजहातन। को वः सखित्व ओहते ॥३१॥
सहो षु णो वज्रहस्तैः कण्वासो अग्निं मरुद्भिः। स्तुषे हिरण्यवाशीभिः ।३२॥
ओ षु वृष्णः प्रयज्यूना नव्यसे सुविताय। ववृत्यां चित्रवाजान् ॥३३॥
गिरयश्चिन्नि जिहते पर्शानासो मन्यमानाः। पर्वताश्चिन्नि येमिरे ॥३४॥
आक्ष्णयावानो वहन्त्यन्तरिक्षेण पततः। धातारः स्तुवते वयः ॥३५॥
अग्निर्हि जानि पूर्व्यश्छन्दो न सूरो अर्चिषा। ते भानुभिर्वि तस्थिरे ॥३६॥

*pra yadvastriṣṭubhamiṣaṁ maruto vipro akṣarat । vi parvateṣu rājatha ॥1 ॥*
*yadaṁga taviṣīyavo yāmaṁ śubhrā achidhvam । ni parvatā ahāsata ॥2 ॥*
*udīrayanta vāyubhirvāśrāsaḥ pṛśnimātaraḥ । dhukṣanta pipyuṣīmiṣam ॥3 ॥*

*vapanti maruto miham pra vepayanti parvatān | yadyāmaṁ yānti vāyubhiḥ ||4 ||*
*ni yadyāmāya vo girirni sindhavo vidharmaṇe | mahe śuṣmāya yemire ||5 ||*
*yuṣmām̐ u naktamūtaye yuṣmādindavā havāmahe | yuṣmānprayatyadhvare ||6 ||*
*udu tyaṁ aruṇapsavaśchitrā yāmebhirīrate | vāśrā adhi ṣṇunā divaḥ ||7 ||*
*sṛjanti raśmiojasā panthāṁ sūryāya yātave | te bhānubhirvi tasthire ||8 ||*
*imāṁ me maruto giramimaṁ stomamṛbhukṣaṇaḥ | imaṁ me vanatā havam ||9 ||*
*trīṇi sarāṁsi pṛśnayo duduhre vajriṇe madhu | utsaṁ kavandhamudriṇam ||10 ||*
*maruto yaddha vo divaḥ sumnāyanto havāmahe | ā tū na upa gantana ||11 ||*
*yūyaṁ hi ṣṭhā sudānavo rudrā ṛbhukṣaṇo dame | uta prachetaso made ||12 ||*
*ā no rayiṁ madachyutaṁ purukṣuṁ viśvadhāyasam | iyartā maruto divaḥ ||13 ||*
*adhīva yad girīṇāṁ yāmaṁ śubhrā achidhvam | suvānairmandadhva indubhiḥ ||14 ||*
*etāvataśchideṣāṁ sumnaṁ bhikṣeta martyaḥ | adābhyasya manmabhiḥ ||15 ||*
*ye drapsāiva rodasī dhamantyanu vṛṣṭibhiḥ | utsaṁ duhanto akṣitam ||16 ||*
*udu svānebhirīrat udrathairudu vāyubhiḥ | utstomaiḥ pṛśnimātaraḥ ||17 ||*
*yenāva turvaśaṁ yaduṁ yena kaṇvaṁ dhanaspṛtam | rāye su tasya dhīmahi ||18 ||*
*imā u vaḥ sudānavo ghṛtaṁ na pipyuṣīriṣaḥ | vardhānkāṇvasya manmabhiḥ ||19 ||*
*kva nūnaṁ sudānavo madathā vṛktabarhiṣaḥ | brahmā ko vaḥ saparyati ||20 ||*
*nahi ṣma yaddha vaḥ purā stomebhirvṛktabarhiṣaḥ | śadham̐ār ṛtasya jinvatha ||21 ||*
*samu tye mahatīrapaḥ saṁ kṣoṇī samu sūryam | saṁ vajraṁ parvaśo dadhuḥ ||22 ||*
*vi vṛtraṁ parvaśo yayurvi parvatām̐ arājinaḥ | chakrāṇā vṛṣṇi pauṁsyam ||23 ||*
*anu tritasya yudhyataḥ śuṣmamāvannuta kratum | anvindraṁ vṛtratūrye ||24 ||*
*vidyuddhastā abhidyavaḥ śiprāḥ śīrṣanhiraṇyayīḥ | śubhrāḥ vyaṁjana śriye ||25 ||*
*uśanā yatparāvat ukṣaṇo randhramayātana | dyaurna chakradadbhiyā ||26 ||*
*ā no makhasya dāvane'śvairhiraṇyapāṇibhiḥ | devāsa upa gantana ||27 ||*
*yadeṣāṁ pṛṣatī rathe praṣṭirvahati rohitaḥ | yānti śubhrā riṇannapaḥ ||28 ||*
*suṣome śaryaṇāvatyārjīke pastyāvati | yayurnichakrayā naraḥ ||29 ||*
*kadā gachchhātha maruta itthā vipraṁ havamānam |*
*mārḍīkebhirnādhamānam ||30 ||*
*kaddha nūnaṁ kadhapriyo yadindramajahātana | ko vaḥ sakhitva Ohate ||31 ||*
*saho ṣu ṇo vajrahastaiḥ kaṇvāso agiṁna marudbhiḥ | stuṣe hiraṇyavāśībhiḥ |32 ||*
*O ṣu vṛṣṇaḥ prayajyūnā navyase suvitāya | vavṛtyāṁ chitravājān ||33 ||*
*girayaśchinni jihate parśānāso manyamānāḥ | parvatāśchinni yemire ||34 ||*
*ākṣaṇayāvāno vahantyantarikṣeṇa patataḥ | dhātāraḥ stuvate vayaḥ ||35 ||*
*agnirhi jāni pūrvyaśchhando na sūro archiṣā | te bhānubhirvi tasthire ||36 ||*

## ३५६. पुरुः आत्रेयः (Puruḥ Ātreyaḥ)

१. अग्निः (Agniḥ) - सा. (Sv.) ८८

बृहद्वयो हि भानवेऽर्चा देवायाग्नये। यं मित्रं न प्रशस्तये मर्तासो दधिरे पुरः ॥८॥
*bṛhadvayo hi bhānave'rchā devāyāgnaye | yaṁ mitraṁ na praśastaye martāso dadhire puraḥ ||8 ||*

## ३५७. पुरुमीढः (Purumīḍhaḥ)

१. वायुः (Vāyuḥ) - य. (Yv.)२७.३०

वायो शुक्रो ऽ अयामि ते मध्वो ऽ अग्रं दिविष्टिषु ।
आ योहि सोमपीतये स्पार्हो देव नियुत्वता ॥३०॥
*vāyo śukro ' ayāmi te madhvo ' agraṁ diviṣṭiṣu |*
*ā yohi somapītaye spārho deva niyutvatā ||30 ||*

### ३५८. पुरुमीढ-अजमीढौ (Purumīḍha-Ajamīḍhau)

१. अश्विनौ (Aśvinau) - अ. (Av.) २०.१४३.१-७

तं वां रथं वयमद्या हुवेम पृथुज्रयमश्विना संगतिं गोः ।
यः सूर्यां वहति वन्धुरायुर्गिर्वाहसं पुरुतमं वसूयुम् ॥१॥
युवं श्रियमश्विना देवता तां दिवो नपाता वनथः शचीभिः ।
युवोर्वारभि पृक्षः सचन्ते वहन्ति यत् ककुहासो रथे वाम् ॥२॥
को वामद्या करते रातहव्य ऊतये वा सुतपेयाय वार्कैः ।
ऋतस्य वा वनुषे पूर्व्याय नमो येमानो अश्विना ववर्तत् ॥३॥
हिरण्ययेन पुरुभू रथेनेमं यां नासत्योप यातम् ।
पिबाथ इन्मधुनः सोम्यस्य दधथो रत्नं विधते जनाय ॥४॥
आ नो यातं दिवो अच्छा पृथिव्या हिरण्ययेन सुवृता रथेन ।
मा वामन्ये नि यमन् देवयन्तः सं यद् ददे नाभिः पूर्व्या वाम् ॥५॥
नू नो रयिं पुरुवीरं बृहन्तं दस्रा मिमाथामुभयेष्वस्मे ।
नरो यद् वामश्विना स्तोममावन्त्सधस्तुतिमाजमीढासो अग्मन् ॥६॥
इहेह यद् वां समना पपृक्षे सेयमस्मे सुमतिर्वाजरत्ना ।
उरुष्यतं जरितारं युवं ह श्रितः कामो नासत्या युवद्रिक् ॥७॥

*taṁ vāṁ rathaṁ vayamadyā huvema pṛthujrayamaśvinā saṁgatiṁ goḥ /*
*yaḥ sūryā vahati vandhurāyurgirvāhasaṁ purutamaṁ vasūyum //1//*
*yuvaṁ śriyamaśvinā devatā tāṁ divo napātā vanathaḥ śachībhiḥ /*
*yuvorvārabhi pṛkṣaḥ sachante vahanti yat kakuhāso rathe vām //2//*
*ko vāmadyā karate rātahavya ūtaye vā sutapeyāya vārkaiḥ /*
*ṛtasya vā vanuṣe pūrvyāya namo yemāno aśvinā vavartat //3//*
*hiraṇyayena purubhū rathenemaṁ yāṁ nāsatyopa yātam /*
*pibātha inmadhunaḥ somyasya dadhatho ratnaṁ vidhate janāya //4//*
*ā no yātaṁ divo achchhā pṛthivyā hiraṇyayena suvṛtā rathena /*
*mā vāmanye ni yaman devayantaḥ saṁ yad dade nābhiḥ pūrvyā vām //5//*
*nū no rayiṁ puruvīraṁ bṛhantaṁ dasrā mimāthāmubhayeṣvasme /*
*naro yad vāmaśvinā stomamāvantsadhastutimājamīḍhāso agman //6//*
*iheha yad vāṁ samanā papṛkṣe seyamasme sumatirvājaratnā /*
*uruṣyataṁ jaritāraṁ yuvaṁ ha śritaḥ kāmo nāsatyā yuvadrik //7//*

२. इन्द्रवायू (Indravāyū) - य. (Yv.)३३.१९

गाव ऽ उपावतावतं मही यास्य रप्सुदा। उभा कर्णा हिरण्यया ॥१९॥
*gāva ' upāvatāvataṁ mahī yāsya rapsudā / ubhā karṇā hiraṇyayā //19//*

### ३५९. पुरुमीळ्हौ अजमीळ्हौ सौहोत्रौ (Purumīḻahau Ajamīḻahau Sauhotrau)

१. अश्विनौ (Aśvinau) - ऋ. (Rv.)४.४३.१-७; ४.४४.१-७

ऋ. (Rv.)४.४३.१-७

क उ श्रवत्कतमो यियानां वन्दारु देवः कतमो जुषाते ।
कस्येमां देवीममृतेषु प्रेष्ठां हृदि श्रेषाम सुष्टुतिं सुहव्याम् ॥१॥
को मृळाति कतम आगमिष्ठो देवानामु कतमः शंभविष्ठः ।
रथं कमाहुर्द्रवदश्वमांशु यं सूर्यस्य दुहितावृणीत ॥२॥
मक्षू हि ष्मा गच्छथ ईवतो द्यूनिन्द्रो न शक्तिं परितक्म्यायाम् ।
दिव आजाता दिव्या सुपर्णा कया शचीनां भवथः शचिष्ठा ॥३॥
का वां भूदुपमातिः कया न आश्विना गमथो हूयमाना ।
को वां महश्चित्त्यजसो अभीक उरुष्यतं माध्वी दस्रा न ऊती ॥४॥
उरु वां रथः परि नक्षति द्यामा यत्समुद्रादभि वर्तते वाम् ।
मध्वा माध्वी मधु वा प्रुषायन्यत्सीं वां पृक्षो भुरजन्त पक्वाः ॥५॥

सिन्धुर्ह वां रसया सिंचदश्वन्घृणा वयोऽरुषासः परि ग्मन् ।
तदू षु वामजिरं चेति यानं येन पती भवथः सूर्यायाः ॥६॥
इहेह यद्वां समना पपृक्षे सेयमस्मे सुमतिर्वाजरत्ना ।
उरुष्यतं जरितारं युवं ह श्रितः कामो नासत्या युवद्रिक् ॥७॥
*ka u śravatkatamo yiāyānāṁ vandāru devaḥ katamo juṣāte* ।
*kasyemāṁ devīmamṛteṣu preṣṭhāṁ hṛdi śreṣāma suṣṭutiṁ suhavyām* ॥1॥
*ko mṛḷāti katama āgamiṣṭho devānāmu katamaḥ śaṁbhaviṣṭhaḥ* ।
*rathaṁ kamāhurdravadaśvamāṁśu yaṁ sūryasya duhitāvṛṇīta* ॥2॥
*makṣū hi ṣmā gachchhatha īvato dyūnindro na śaktiṁ paritakmyāyām* ।
*diva ājātā divyā suparṇā kayā śachīnāṁ bhavathaḥ śachiṣṭhā* ॥3॥
*kā vāṁ bhūdupamātiḥ kayā na āśvinā gamatho hūyamānā* ।
*ko vāṁ mahaśchittyajaso abhīka uruṣyataṁ mādhvī dasrā na ūtī* ॥4॥
*uru vāṁ rathaḥ pari nakṣati dyāmā yatsamudrādabhi vartate vām* ।
*madhvā mādhvī madhu vā pruṣāyanyatsīṁ vāṁ pṛkṣo bhurajanta pakvāḥ* ॥5॥
*sindhurha vāṁ rasayā siṁchadaśvanghṛṇā vayo'ruṣāsaḥ pari gman* ।
*tadū ṣu vāmajiraṁ cheti yānaṁ yena patī bhavathaḥ sūryāyāḥ* ॥6॥
*iheha yadvāṁ samanā papṛkṣe seyamasme sumatirvājaratnā* ।
*uruṣyataṁ jaritāraṁ yuvaṁ ha śritaḥ kāmo nāsatyā yuvadrik* ॥7॥

ऋ. (Rv.)४.४४.१-७

तं वा रथं वयमद्या हुवेम पृथुज्रयमश्विना संगतिं गोः ।
यः सूर्या वहति बन्धुरायुर्गिर्वाहंस पुरुतमं वसूयुम् ॥१॥
युवं श्रियमश्विना देवता तां दिवो नपाता वनथः शचीभिः ।
युवोर्वपुरभि पृक्षः सचन्ते वहन्ति यत्ककुहासो रथे वाम् ॥२॥
को वामद्या करते रातहव्य ऊतये वा सुतपेयाय वार्कैः ।
ऋतस्य वा वनुषे पूर्व्याय नमो येमानो अश्विना ववर्तत् ॥३॥
हिरण्ययेन पुरुभु रथेनेमं यां नासत्योप यातम् ।
पिबाथ इन्मधुनः सोम्यस्य दधथो रत्नं विधते जनाय ॥४॥
आ नो यातं दिवो अच्छा पृथिव्या हिरण्ययेन सुवृता रथेन ।
मा वामन्ये नि यमन्देवयन्तः सं यद्ददे नाभिः पूर्व्या वाम् ॥५॥
नू नो रयिं पुरुवीरं बृहन्तं दस्रा मिमाथामुभयेष्वस्मे ।
नरो यद्वामश्विना स्तोममावन्त्सघस्तुतिमाजमीळहासो अग्मन् ॥६॥
इहेह यद्वां समना पपृक्षे सेयमस्मे सुमतिर्वाजरत्ना ।
उरुष्यतं जरितारं युवं ह श्रितः कामो नासत्या युद्रिक् ॥७॥
*taṁ vā rathaṁ vayamadyā huvema pṛthujrayamaśvinā saṁgatiṁ goḥ* ।
*yaḥ sūryā vahati bandhurāyurgirvāhaṁsa purutamaṁ vasūyum* ॥1॥
*yuvaṁ śriyamaśvinā devatā tāṁ divo napātā vanathaḥ śachībhiḥ* ।
*yuvorvapurabhi pṛkṣaḥ sachante vahanti yatkakuhāso rathe vām* ॥2॥
*ko vāmadyā karate rātahavya ūtaye vā sutapeyāya vārkaiḥ* ।
*ṛtasya vā vanuṣe pūrvyāya namo yemāno aśvinā vavartat* ॥3॥
*hiraṇyayena purubhu rathenemaṁ yāṁ nāsatyopa yātam* ।
*pibātha inmadhunaḥ somyasya dadhatho ratnaṁ vidhate janāya* ॥4॥
*ā no yātaṁ divo achchhā pṛthivyā hiraṇyayena suvṛtā rathena* ।
*mā vāmanye ni yamandevayantaḥ saṁ yaddade nābhiḥ pūrvyā vām* ॥5॥
*nū no rayiṁ puruvīraṁ bṛhantaṁ dasrā mimāthāmubhayeṣvasme* ।
*naro yadvāmaśvinā stomamāvantsaghastutimājamīḷahāso agman* ॥6॥
*iheha yadvāṁ samanā papṛkṣe seyamasme sumatirvājaratnā* ।
*uruṣyataṁ jaritāraṁ yuvaṁ ha śritaḥ kāmo nāsatyā yudrik* ॥7॥

## ३६०. पुरुरवा ऐळः (Pururavā Aiḷaḥ)

१. उर्वशी (Urvaśī) - ऋ. (Rv.)१०.९५.१; ३; ६; ८-१०; १२; १४; १७

ऋ. (Rv.)१०.९५.१

हये जाये मनसा तिष्ठ घोरे वचांसि मिश्रा कृणवावहै नु ।
न नौ मन्त्रा अनुदितास एते मयस्करन्परतरे चनाहन् ॥१॥

*haye jāye manasā tiṣṭha ghore vachāṁsi miśrā kṛṇavāvahai nu /*
*na nau mantrā anuditāsa ete mayaskaranparatare chanāhan //1 //*

ऋ. (Rv.)१०.९५.३

इषुर्न श्रिय इषुधेरसना गोषाः शतसा न रंहिः ।
अवीरे क्रतौ वि दविद्युतन्नोरा न मायुं चितयन्त धुनयः ॥३॥

*iṣurna śriya iṣudherasanā goṣāḥ śatasā na raṁhiḥ /*
*avīre kratau vi davidyutannorā na māyuṁ chitayanta dhunayaḥ //3 //*

ऋ. (Rv.)१०.९५.६

या सुजूर्णिः श्रेणिः सुम्नआपिर्ह्रदेचक्षुर्न ग्रन्थिनी चरण्युः ।
ता अंजयोऽरुणयो न सस्रुः श्रिये गावो न धेनवोऽनवन्त ॥६॥

*yā sujūrṇiḥ śreṇiḥ sumnaāpirhradechakṣurna granthinī charaṇyuḥ /*
*tā aṁjayo'ruṇayo na sasruḥ śriye gāvo na dhenavo'navanta //6 //*

ऋ. (Rv.)१०.९५.८-१०

सचा यदासु जहतीष्वत्कममानुषीषु मानुषो निषेवे ।
अप स्म मत्तरसन्ती न भुज्युस्ता अत्रसन्नथस्पृशो नाश्वाः ॥८॥
यदासु मर्तो अमृतासु निस्पृक्सं क्षेणीभिः क्रतुभिर्न पृङ्क्ते ।
ता आतयो न तन्वः शुम्भत स्वा अश्वासो न क्रीळयो दन्दशानाः ॥९॥
विद्युन्न या पतन्ती दविद्योद्भरन्ती मे अप्या काम्यानि ।
जनिष्टो अपो नर्यः सुजातः प्रोर्वशी तिरत दीर्घमायुः ॥१०॥

*sachā yadāsu jahatīṣvatkamamānuṣīṣu mānuṣeā niṣeve /*
*apa sma mattarasantī na bhujyustā atrasannathaspṛśo nāśvāḥ //8 //*
*yadāsu marto amṛtāsu nispṛksaṁ kṣeṇībhiḥ kratubhirna pṛṅkte /*
*tā ātayo na tanvaḥ śumbhata svā aśvāso na krīḷayo dandaśānāḥ //9 //*
*vidyunna yā patantī davidyodbharantī me apyā kāmyāni /*
*janiṣṭo apo naryaḥ sujātaḥ prorvaśī tirata dīrghamāyuḥ //10 //*

ऋ. (Rv.)१०.९५.१२

कदा सूनुः पितरं जात इच्छाच्चक्रन्नाश्रु वर्तयद्विजानान् ।
को दम्पती समनसा वि यूयोदध यदग्निः श्वशुरेषु दीदयत् ॥१२॥

*kadā sūnuḥ pitaraṁ jāta ichchhāchchakrannāśru vartayadvijānān /*
*ko dampatī samanasā vi yūyodadha yadagniḥ śvaśureṣu dīdayat //12 //*

ऋ. (Rv.)१०.९५.१४

सुदेवो अद्य प्रपतेदनावृत्परावतं परमां गन्तवा उ ।
अधा शयीत निर्ऋतेरुपस्थेऽधैनं वृका रभसासो अद्युः ॥१४॥

*sudevo adya prapatedanāvṛtparāvataṁ paramāṁ gantavā u /*
*adhā śayīta nirṛterupasthe'dhainaṁ vṛkā rabhasāso adyuḥ //14 //*

ऋ. (Rv.)१०.९५.१७

अन्तरिक्षप्रां रजसो विमानीमुप शिक्षाम्युर्वशीं वसिष्ठः ।
उप त्वा रातिः सुकृतस्य तिष्ठान्नि वर्तस्व हृदयं तप्यते मे ॥१७॥

*antarikṣaprāṁ rajaso vimānīmupa śikṣāmyurvaśīṁ vasiṣṭhaḥ /*
*upa tvā rātiḥ sukṛtasya tiṣṭhānni vartasva hṛdayaṁ tapyate me //17 //*

## ३६१. पुरुहन्मा (Puruhanmā)

१. इन्द्रः (Indraḥ) - ऋ. (Rv.)८.७०.१-१५; अ. (Av.) २०.८१.१-२; २०.९२.१६-२१; २०.१०५.४-५

ऋ. (Rv.)८.७०.१-१५

यो राजा चर्षणीनां याता रथेभिरध्रिगुः। विश्वासां तरुता पृतनानां ज्येष्ठो यो वृत्रहा गृणे ॥१॥
इन्द्रं तं शुम्भ पुरुहन्मन्नवसे यस्य द्विता विधर्तरि।
हस्ताय वज्रः प्रति धायि दर्शतो महो दिवे न सूर्यः ॥२॥
नकिष्टं कर्मणा नशद्यश्चकार सदावृधम्। इन्द्र न यौर्विश्वगूर्तमृभ्वसमधृष्टं धृष्णवोजसम् ॥३॥
अषाळ्हमुग्रं पृतनासु सासहि यस्मिन्महीरुरुज्रयः ।
सं धेनवो जायमाने अनोनवुर्द्यावः क्षामो अनोनवुः ॥४॥
यद् द्याव इन्द्र ते शतं शतं भूमीरुत स्युः।
न त्वा वज्रिन्त्सहस्रं सूर्या अनु न जातमष्ट रोदसी ॥५॥
आ पपाथ महिना वृष्ण्या वृषन्विश्वा शविष्ठ शवसा ।
अस्माँ अव मघवन्गोमति व्रजे वज्रिञ्चित्राभिरूतिभिः ॥६॥
न सीमदेव आपदिषं दीर्घायो मर्त्यः। एतग्वा चिद्य एतशा युयोजते हरी इन्द्रो युयोजते ॥७॥
तं वो महो महाय्यमिन्द्रं दानाय सक्षणिम्। यो गाधेषु य आरणेषु हव्यो वाजेष्वस्ति हव्यः ॥८॥
उदू षु णो वसो महे मृशस्व शूर राधसे। उदू षु मह्यै मघवन्मघत्तय उदिन्द्र श्रवसे महे ॥९॥
त्वं न इन्द्र ऋतयुस्त्वानिदो नि तृम्पसि।
मध्ये वसिष्व तुविनृम्णोर्वोर्नि दासं शिश्नथो हथैः ॥१०॥
अन्यव्रतममानुषमयज्वानमदेवयुम् । अव स्वः सखा दधुवीत पर्वतः सुघ्नाय दस्युं पर्वतः ॥११॥
त्वं न इन्द्रासां हस्ते शविष्ठ दावने। धानानां न सं गृभायास्मयुर्द्विः सं गृभायास्मयुः ॥१२॥
सखायः क्रतुमिच्छत कथा राधाम शरस्य। उपस्तुतिं भोजः सूरिर्यो अह्रयः ॥१३॥
भूरिभिः समह ऋषिभिर्बर्हिष्मद्भिः स्तविष्यसे। यदित्थमेकमेकमिच्छर वत्सान्परादद ः ॥१४॥
कर्णगृह्या मघवा शौरदेव्यो वत्सं नास्त्रिभ्य आनयत्। अजां सूरिर्न धातवे ॥१५॥

*yo rājā charṣaṇīnāṁ yātā rathebhiradhriguḥ / viśvāsāṁ tarutā pṛtanānāṁ jyeṣṭho yo vṛtrahā gṛṇe //1 //*
*indraṁ taṁ śumbha puruhanmannavase yasya dvitā vidhartari /*
*hastāya vajraḥ prati dhāyi darśato maho dive na sūryaḥ //2 //*
*nakiṣṭaṁ karmaṇā naśadyaśchakāra sadāvṛdham / indra na yaurviśvagūrtamṛbhvasamadhṛṣṭaṁ dhṛṣṇvojasam //3 //*
*aṣāḷahamugraṁ pṛtanāsu sāsahi yasminmahīrurujrayaḥ /*
*saṁ dhenavo jāyamāne anonavurdyāvaḥ kṣāmo anonavuḥ //4 //*
*yad dyāva indra te śataṁ śataṁ bhūmīruta syuḥ /*
*na tvā vajrintsahasraṁ sūryā anu na jātamaṣṭa rodasī //5 //*
*ā papātha mahinā vṛṣṇyā vṛṣanviśvā śaviṣṭha śavasā /*
*asmām̐ ava maghavangomati vraje vajriñchitrābhirūtibhiḥ //6 //*
*na sīmadeva āpadiṣaṁ dīrghāyo martyaḥ /*
*etagvā chidya etaśā yuyojate harī indro yuyojate //7 //*
*taṁ vo maho mahāyyamindraṁ dānāya sakṣaṇim /*
*yo gādheṣu ya āraṇeṣu havyo vājeṣvasti havyaḥ //8 //*
*udū ṣu ṇo vaso mahe mṛśasva śūra rādhase /*
*udū ṣu mahyai maghavanmaghattaya udindra śravase mahe //9 //*
*tvaṁ na indra ṛtayustvānido ni tṛmpasi /*
*madhye vasiṣva tuvinṛmṇorvorni dāsaṁ śiśnatho hathaiḥ //10 //*
*anyavratamamānuṣamayajvānamadevayum /*
*ava svaḥ sakhā dadhuvīta parvataḥ sughnāya dasyuṁ parvataḥ //11 //*
*tvaṁ na indrāsāṁ haste śaviṣṭha dāvane /*

*dhānānāṁ na saṁ gṛbhāyāsmayurdviḥ saṁ gṛbhāyāsmayuḥ ॥12॥*
*sakhāyaḥ kratumichchhata kathā rādhāma śarasya ।*
*upastutiṁ bhojaḥ sūriryo ahrayaḥ ॥13॥*
*bhūribhiḥ samaha ṛṣibhirbarhiṣmadbhiḥ staviṣyase ।*
*yaditthamekamekamichchhara vatsānparādadaḥ ॥14॥*
*karṇagṛhyā maghavā śauradevyo vatsaṁ nāstribhya ānayat ।*
*ajāṁ sūrirna dhātave ॥15॥*

अ. (Av.) २०.८१.१-२

यद् द्याव इन्द्र ते शतं शतं भूमीरुत स्युः ।
न त्वा वज्रिन्त्सहस्रं सूर्या अनु न जातमष्ट रोदसी ॥१॥
आ पप्राथ महिना वृष्ण्या वृषन् विश्वा शविष्ठ शवसा ।
अस्माँ अव मघवन् गोमति व्रजे वज्रिञ्चित्राभिरूतिभिः ॥२॥
*yad dyāva indra te śataṁ śataṁ bhūmīruta syuḥ ।*
*na tvā vajrintsahasraṁ sūryā anu na jātamaṣṭa rodasī ॥1॥*
*ā paprātha mahinā vṛṣṇyā vṛṣan viśvā śaviṣṭha śavasā ।*
*asmām̐ ava maghavan gomati vraje vajriñchitrābhirūtibhiḥ ॥2॥*

अ. (Av.) २०.९२.१६-२१

यो राजा चर्षणीनां याता रथेभिरध्रिगुः । विश्वासां तरुता पृतनानां ज्येष्ठो यो वृत्रहा गृणे ॥१६॥
इन्द्रं तं शुम्भ पुरुहन्मन्नवसे यस्य द्विता विधर्तरि ।
हस्ताय वज्रः प्रति धायि दर्शता महो दिवे न सूर्यः ।१७॥
नकिष्टं कर्मणा नशद् यश्चकार सदावृधम् ।
इन्द्रं न यौर्विश्वगूर्तमृभ्वसमधृष्टं धृष्ण्वोजसम् ॥१८॥
अषाळ्हमुग्रं पृतनासु सासहिं यस्मिन् महीरुरुज्रयः ।
सं धेनवो जायमाने अनोनवुर्द्यावः क्षामो अनोनवुः ॥१९॥
यद् द्याव इन्द्र ते शतं शतं भूमीरुत स्युः ।
न त्वा वज्रिन्त्सहस्रं सूर्या अनु न जातमष्ट रोदसी ॥२०॥
आ पप्राथ महिना वृष्ण्या वृषन् विश्वा शविष्ठ शवसा ।
अस्माँ अव मघवन् गोमति व्रजे वज्रिञ्चित्राभिरूतिभिः ॥२१॥
*yo rājā charṣaṇīnāṁ yātā rathebhiradhriguḥ ।*
*viśvāsāṁ tarutā pṛtanānāṁ jyeṣṭho yo vṛtrahā gṛṇe ॥16॥*
*indraṁ taṁ śumbha puruhanmannavase yasya dvitā vidhartari ।*
*hrastāya vajraḥ prati dhāyi darśatā maho dive na sūryaḥ ।17॥*
*nakiṣṭaṁ karmaṇā naśad yaśchakāra sadāvṛdham ।*
*indraṁ na yaurviśvagūrtamṛbhvasamadhṣṭaṁ dhṛṣṇvojasam ॥18॥*
*aṣāḷhamugraṁ pṛtanāsu sāsahiṁ yasmin mahīrurujrayaḥ ।*
*saṁ dhenavo jāyamāne anonavurdyāāvaḥ kṣāmo anonavuḥ ॥19॥*
*yad dyāva indra te śataṁ śataṁ bhūmīruta syuḥ ।*
*na tvā vajrintsahasraṁ sūryā anu na jātamaṣṭa rodasī ॥20॥*
*ā paprātha mahinā vṛṣṇyā vṛṣan viśvā śaviṣṭha śavasā ।*
*asmām̐ ava maghavan gomati vraje vajriñchitrābhirūtibhiḥ ॥21॥*

अण्२०ण्१०५ण्४.५

यो राजा चर्षणीनां याता रथेभिरध्रिगुः ।
विश्वासां तरुता पृतनानां ज्येष्ठो यो वृत्रहा गृणे ॥४॥
इन्द्रं तं शुम्भ पुरुहन्मन्नवसे यस्य द्विता विधर्तरि ।
हस्ताय वज्रः प्रति धायि दर्शतो महो दिवो न सूर्यः ॥५॥
*yo rājā charṣaṇīnāṁ yātā rathebhiradhriguḥ ।*
*viśvāsāṁ tarutā pṛtanānāṁ jyeṣṭho yo vṛtrahā gṛṇe ॥4॥*
*indraṁ taṁ śumbha puruhanmannavase yasya dvitā vidhartari ।*

*hrastāya vajraḥ prati dhāyi darśato maho divo na sūryaḥ //5 //*

## ३६२. पुरुहन्मा आंगिरसः (Puruhanmā Āṁgirasaḥ)

१. इन्द्रः (Indraḥ) - सा. (Sv.) २४३; २६८; २७३; २७८; ८६२-८६३; ९३३-९३४; ११५५-११५६

सा. (Sv.) २४३

नकिष्टं कर्मणा नशद्यश्चकार सदावृधम्। इन्द्रं न यौर्विश्वगूर्तमृभ्वसमधृष्टं धृष्णुमोजसा ॥१॥

*nakiṣṭaṁ karmaṇā naśadyaśchakāra sadāvṛdham /*
*indraṁ na yaurviśvagūrtamṛbhvasamadhṛṣṭaṁ dhṛṣṇumojasā //1 //*

सा. (Sv.) २६८

न सीमदेव आप तदिषं दीर्घायो मर्त्यः। एतग्वा चिद्य एतशो युयोजत इन्द्रो हरी युयोजते ॥६।

*na sīmadeva āpa tadiṣaṁ dīrghāyo martyaḥ /*
*etagvā chidya etaśeā yuyojata indro harī yuyojate //6 /*

सा. (Sv.) २७३

यो राजा चर्षणीनां याता रथेभिरध्रिगुः। विश्वासां तरुता पृतनानं ज्येष्ठं यो वृत्रहा गृणे ॥१॥

*yo rājā charṣaṇīnāṁ yātā rathebhiradhriguḥ /*
*viśvāsāṁ tarutā pṛtanānaṁ jyeṣṭhaṁ yo vṛtrahā gṛṇe //1 //*

सा. (Sv.) २७८

यद्द्याव इन्द्र ते शतं शतं भूमीरुत स्युः।
न त्वा वज्रिन्त्सहस्रं सूर्या अनु न जातमष्ट रोदसी ॥६॥

*yaddyāva indra te śataṁ śataṁ bhūmīruta syuḥ /*
*na tvā vajrintsahasraṁ sūryā anu na jātamaṣṭa rodasī //6 //*

सा. (Sv.) ८६२-८६३

यद्याव इन्द्र ते शतं शतं भूमीरुत स्युः ।
न त्वा वज्रिन्त्सहस्रं सूर्या अनु न जातमष्ट रोदसी ॥१॥
आ पप्राथ महिना वृष्ण्या वृषन्विश्वा शविष्ठ शवसा ।
अस्माँ अव मघवन् गोमति व्रजे वज्रिं चित्राभिरूतिभिः ॥२॥

*yadyāva indra te śataṁ śataṁ bhūmīruta syuḥ /*
*na tvā vajrintsahasraṁ sūryā anu na jātamaṣṭa rodasī //1 //*
*ā paprātha mahinā vṛṣṇyā vṛṣanviśvā śaviṣṭha śavasā /*
*asmām̐ ava maghavan gomati vraje vajriṁ chitrābhirūtibhiḥ //2 //*

सा. (Sv.) ९३३-९३४

यो राजा चर्षणीनां याता रथेभिरध्रिगुः ।
विश्वासां तरुता पृतनानां ज्येष्ठं यो वृत्रहा गृणे ॥१॥
इन्द्रं तं शुम्भ पुरुहन्मन्नवसे यस्य द्विता विधर्त्तरि ।
हस्तेन वज्रः प्रति धायि दर्शतो महाँ देवो न सूर्यः ॥२॥

*yo rājā charṣaṇīnāṁ yātā rathebhiradhriguḥ /*
*viśvāsāṁ tarutā pṛtanānāṁ jyeṣṭhaṁ yo vṛtrahā gṛṇe //1 //*
*indraṁ taṁ śumbha puruhanmannavase yasya dvitā vidharttari /*
*hastena vajraḥ prati dhāyi darśato mahām̐ devo na sūryaḥ //2 //*

सा. (Sv.) ११५५-११५६

न किष्टं कर्मणा नशद्यश्चकार सदावृधम् ।
इन्द्रं न यौर्विश्वगूर्तमृभ्वसमधृष्टं धृष्णुमोजसा ॥१॥
अषाढमुग्रं पृतनासु सासहिं यस्मिन्महीरुरुज्रयः ।
सं धेनवो जायमाने अनोनवुर्द्यावः क्षामीरनोनवुः ॥२॥

*na kiṣṭaṁ karmaṇā naśadyaśchakāra sadāvṛdham /*
*indraṁ na yaurviśvagūrtamṛbhvasamadhṛṣṭaṁ dhṛṣṇumojasā //1 //*
*aṣāḍhamugraṁ pṛtanāsu sāsahiṁ yasminmahīrurujrayaḥ /*

*saṁ dhenavo jāyamāne anonavurdyāvaḥ kṣāmīranonavuḥ //2 //*

## ३६३. पुरोधाः (Purodhāḥ)

१. अग्निः (Agniḥ) - य. (Yv.)११.१७

अन्वग्निरुषसामग्रमख्यदन्वहानि प्रथमो जातवेदाः ।
अनु सूर्यस्य पुरुत्रा च रश्मीननु द्यावापृथिवी ऽ आततन्थ ॥१७॥
*anvagniruṣasāmagramakhyadanvahāni prathamo jātavedāḥ /*
*anu sūryasya purutrā cha raśmīnanu dyāvāpṛthivī ' ātatantha //17 //*

## ३६४. पुष्टिगुः (Puṣṭiguḥ)

१. इन्द्रः (Indraḥ) - अ. (Av.) २०.५१.३-४

प्र सु श्रुतं सुराधसमर्चा शक्रमभिष्टये ।
यः सुन्वते स्तुवते काम्यं वसु सहस्रेणेव मंहते ॥३॥
शतानीका हेतयो अस्य दुष्टरा इन्द्रस्य समिषो महीः ।
गिरिर्न भुज्मा मघवत्सु पिन्वते यदीं सुता अमन्दिषुः ॥४॥
*pra su śrutaṁ surādhasamarchā śakramabhiṣṭaye /*
*yaḥ sunvate stuvate kāmyaṁ vasu sahasreṇeva maṁhate //3 //*
*śatānīkā hetayeā asya duṣṭarā indrasya samiṣo mahīḥ /*
*girirna bhujmā maghavatsu pinvate yadīṁ sutā amandiṣuḥ //4 //*

## ३६५. पुष्टिगुः काण्वः (Puṣṭiguḥ Kāṇvaḥ)

१. इन्द्रः (Indraḥ) - ऋ. (Rv.)८.५०.१-१०

प्र सु श्रुतं सुराधसमर्चा शक्रमभिष्टये ।
यः सुन्वते स्तुवते काम्यं वसु सहस्रेणेव मंहते ॥१॥
शतानीका हेतयो अस्य दुष्टरा इन्द्रस्य समिषो महीः ।
गिरिर्न भुज्मा मघवत्सु पिन्वते यदीं सुता अमन्दिषुः ॥२॥
यदीं सतास इन्दवोऽभि प्रियममन्दिषुः ।
आपो न धायि सवनं म आ वसो दुघाइवोप दाशुषे ॥३॥
अनेहसं वो हवमानमूतये मध्वः क्षरन्ति धीतयः ।
आ त्वा वसो हवमानास इन्दव उप स्तोत्रेषु दधिरे ॥४॥
आ नः सोमे स्वध्वर इयानो अत्यो न तोशते ।
यं ते स्वदावन्त्स्वदन्ति गूर्तयः पौरे छन्दयसे हवम् ॥५॥
प्र वीरमुग्रं विविचिं धनस्पृतं विभूतिं राधसो महः ।
उद्रीव वज्रिन्नवतो वसुत्वना सदा पीपेथ दाशुषे ॥६॥
यद्ध नूनं परावति यद्वा पृथिव्यां दिवि ।
युजान इन्द्र हरिभिर्महेमत ऋष्व ऋष्वेभिरा गहि ॥७॥
रथिरासो हरयो ये ते अस्रिध ओजो वातस्य पिप्रति ।
येभिर्नि दस्युं मनुषो निघोषयो येभिः स्वः परीयसे ॥८॥
एतावतस्ते वसो विद्याम शूर नव्यसः ।
यथा प्राव एतशं कृत्व्ये धने यथा वशं दशव्रजे ॥९॥
यथा कण्वे मघवन् मेधे अध्वरे दीर्घनीथे दमूनसि ।
यथा गोशर्ये असिषासो अद्रिवो मयि गोत्रं हरिश्रियम् ॥१०॥
*pra su śrutaṁ surādhasamarchā śakramabhiṣṭaye /*
*yaḥ sunvate stuvate kāmyaṁ vasu sahasreṇeva maṁhate //1 //*
*śatānīkā hetayo asya duṣṭarā indrasya samiṣo mahīḥ /*
*girirna bhujmā maghavatsu pinvate yadīṁ sutā amandiṣuḥ //2 //*
*yadīṁ satāsa indavo'bhi priyamamandiṣuḥ /*
*āpo na dhāyi savanaṁ ma ā vaso dughāivopa dāśuṣe //3 //*
*anehasaṁ vo havamānamūtaye madhvaḥ kṣaranti dhītayaḥ /*

*ā tvā vaso havamānāsa indava upa stotreṣu dadhire //4 //*
*ā naḥ some svadhvara iyāno atyo na tośate /*
*yaṁ te svadāvantsvadanti gūrtayaḥ paure chhandayase havam //5 //*
*pra vīramugraṁ vivichiṁ dhanaspṛtaṁ vibhūtiṁ rādhaso mahaḥ /*
*udrīva vajrinnavato vasutvanā sadā pīpetha dāśuṣe //6 //*
*yaddha nūnaṁ parāvati yadvā pṛthivyāṁ divi /*
*yujāna indra haribhirmahemata ṛṣva ṛṣvebhirā gahi //7 //*
*rathirāso harayo ye te asridha Ojo vātasya piprati /*
*yebhirni dasyuṁ manuṣo nighoṣayo yebhiḥ svaḥ parīyase //8 //*
*etāvataste vaso vidyāma śūra navyasaḥ /*
*yathā prāva etaśaṁ kṛtvye dhane yathā vaśaṁ daśavraje //9 //*
*yathā kaṇve maghavan medhe adhvare dīrghanīthe damūnasi /*
*yathā gośarye asiṣāso adrivo mayi gotraṁ hariśriyam //10 //*

## ३६६. पूरणः (Pūraṇaḥ)

१. इन्द्रः (Indraḥ) - अ. (Av.) २०.९६.१-५

तीव्रस्याभिवयसो अस्य पाहि सर्वरथा वि हरी इह मुंच ।
इन्द्र मा त्वा यजमानासो अन्ये नि रीरमन् तुभ्यमिमे सुतासः ॥१॥
तुभ्यं सुतास्तुभ्यमु सोत्वासस्त्वां गिरः श्वात्र्या आ ह्वयन्ति ।
इन्द्रेदमद्य सवनं जुषाणो विश्वस्य विद्वाँ इह पाहि सोमम् ॥२॥
य उशता मनसा सोामस्मै सर्वहृदा देवकामः सुनोति ।
न गा इन्द्रस्तस्य परा ददाति प्रशस्तमिच्चारुमस्मै कृणोति ॥३॥
अनुस्पष्टो भवत्येषा अस्य यो अस्मै रेवान् न सुनोति सोमम् ।
निररत्नौ मघवा तं दधाति ब्रह्मद्विषो हन्त्यनानुदिष्टः ॥४॥
अश्वायन्तो गव्यन्तो वाजयन्तो हवामहे त्वोपगन्तवा उ ।
आभूषन्तस्ते सुमतौ नवायां वयमिन्द्र त्वा शुनं हुवेम ॥५॥
*tīvrasyābhivayaso asya pāhi sarvarathā vi harī iha muṁcha /*
*indra mā tvā yajamānāso anye ni rīraman tubhyamime sutāsaḥ //1 //*
*tubhyaṁ sutāstubhyamu sotvāsastvāṁ giraḥ śvātrayā ā hnayanti /*
*indredamadya savanaṁ juṣāṇo viśvasya vidvām̐ iha pāhi somam //2 //*
*ya uśatā manasā soāmasmai sarvahṛdā devakāmaḥ sunoti /*
*na gā indrastasya parā dadāti praśastamichchārumasmai kṛṇoti //3 //*
*anuspaṣṭo bhavatyeṣeā asya yo asmai revān na sunoti somam /*
*niraratnau maghavā taṁ dadhāti brahmadviṣo hantyanānudiṣṭaḥ //4 //*
*aśvāyanto gavyanto vājayanto havāmahe tvopagantavā u /*
*ābhūṣantaste sumatau navāyāṁ vayamindra tvā śunaṁ huvema //5 //*

२. यक्ष्मनाशनम् (Yakṣmanāśanam) - अ. (Av.) २०.९६.६-१०

मुंचामि त्वा हविषा जीवनाय कमाातयक्ष्मादुत राजयक्ष्मात्।
ग्राहिर्जग्राह यद्येतदेनं तस्या इन्द्राग्नी प्र ममुक्तमेनम् ॥६॥
यदि क्षितायुर्यदि वा परेतो यदि मृत्योरन्तिकं नीत एव।
तमा हरामि निर्ऋतेरुपस्थादस्पार्शमेनं शतशारदाय ॥७॥
सहस्राक्षेण शतवीर्येण शतायुषा हविषाहार्षमेनम् ।
इन्द्रो यथैनं शरदो नयात्यति विश्वस्य दुरितस्य पारम् ॥८॥
शतं जीव शरदो वर्धमानः शतं हेमन्तांछतमु वसन्तान् ।
शतं त इन्द्रो अग्निः सविता बृहस्पतिः शतायुषा हविषाहार्षमेनम् ॥९॥
आहार्षमविदं त्वा पुनरागाः पुनर्णवः ।
सर्वाङ्ग सर्व ते चक्षुः सर्वमायुश्च तेऽविदम् ॥१०॥
*muṁchāmi tvā haviṣā jīvanāya kamāātayakṣamāduta rājayakṣamāt /*

*grāhirjagrāha yadyetadenaṁ tasyā indrāgnī pra mamuktamenam ॥6॥*
*yadi kṣitāyuryadi vā pareto yadi mṛtyorantikaṁ nīta eva ।*
*tamā harāmi nirṛterupasthādaspārśamenaṁ śataśāradāya ॥7॥*
*sahasrākṣeṇa śatavīryeṇa śatāyuṣā haviṣāhārṣamenam ।*
*indro yathainaṁ śarado nayātyati viśvasya duritasya pāram ॥8॥*
*śataṁ jīva śarado vardhamānaḥ śataṁ hemantāṁchhatamu vasantān ।*
*śataṁ ta indro agniḥ savitā bṛhaspatiḥ śatāyuṣā haviṣāhārṣamenam ॥9॥*
*āhārṣamavidaṁ tvā punarāgāḥ punarṇavaḥ ।*
*sarvāṅga sarva te chakṣuḥ sarvamāyuścha te'vidam ॥10॥*

## ३६७. पूरणो वैश्वामित्रः (Pūraṇo Vaiśvāmitraḥ)

१. इन्द्रः (Indraḥ) - ऋ. (Rv.)१०.१६०.१-५

तीव्रास्याभिवयसो अस्य पाहि सर्वरथा वि हरी इह मुंच ।
इन्द्र मा त्वा यजमानासो अन्ये नि रीरमन्तुभ्यमिमे सुतासः ॥१॥
तुभ्यं सुतास्तुभ्यमु सोत्वासस्त्वां गिरः श्वात्र्या आ ह्वयन्ति ।
इन्द्रेदमद्य सवनं जुषाणो विश्वस्य विद्वाँ इह पाहि सोमम् ॥२॥
य उशता मनसा सोमस्मै सर्वहृदा देवकामः सुनोति ।
न गा इन्द्रस्तस्य परा ददाति प्रशस्तमिच्चारुमस्मै कृणोति ॥३॥
अनुस्पष्टो भवत्येषो अस्य यो अस्मै रेवान्न सुनोति सोमम् ।
निररत्नौ मघवा तं दधाति ब्रह्मद्विषो हन्त्यनानुदिष्टः ॥४॥
अश्वायन्तो गव्यन्तो वाजयन्तो हवामहे त्वोपगन्तवा उ ।
आभूषन्तस्ते सुमतौ नवायां वयमिन्द्र त्वा शुनं हुवेम ॥५॥
*tīvrāsyābhivayaso asya pāhi sarvarathā vi harī iha muṁcha ।*
*indra mā tvā yajamānāso anye ni rīramantubhyamime sutāsaḥ ॥1॥*
*tubhyaṁ sutāstubhyamu sotvāsastvāṁ giraḥ śvātrayā ā hnayanti ।*
*indredamadya savanaṁ juṣāṇo viśvasya vidvāṁ̐ iha pāhi somam ॥2॥*
*ya uśatā manasā somasmai sarvahṛdā devakāmaḥ sunoti ।*
*na gā indrastasya parā dadāti praśastamichchārumasmai kṛṇoti ॥3॥*
*anuspaṣṭo bhavatyeṣo asya yo asmai revānna sunoti somam ।*
*nararatnau maghavā taṁ dadhāti brahmadviṣo hantyanānudiṣṭaḥ ॥4॥*
*aśvāyanto gavyanto vājayanto havāmahe tvopagantavā u ।*
*ābhūṣantaste sumatau navāyāṁ vayamindra tvā śunaṁ huvema ॥5॥*

## ३६८. पूरुर् आत्रेयः (Pūrur Ātreyaḥ)

१. अग्निः (Agniḥ) - ऋ. (Rv.)५.१६.१-५; ५.१७.१-५

ऋ. (Rv.)५.१६.१-५

बृहद्वयो हि भानवेऽर्चा देवायाग्नये । यं मित्रं न प्रशस्तिभिर्मर्तासो दधिरे पुरः ॥१॥
स हि द्युभिर्जनानां होता दक्षस्य बाह्वोः । वि हव्यमग्निरानुषग्भगो न वारमृण्वति ॥२॥
अस्य स्तोमे मघोनः सख्ये वृद्धशोचिषः । विश्वा यस्मिन्तुविष्वणि समर्ये शुष्ममादधुः ॥३॥
अधा ह्यग्न एषां सुवीर्यस्य मंहना । तमिद्यह्वं न रोदसी परि श्रवो बभूवतुः ॥४॥
नू न एहि वार्यमग्ने गृणान आ भर ।
ये वयं ये च सूरयः स्वस्ति धामहे सचोतैधि पृत्सु नो वृधे ॥५॥
*bṛhadvayo hi bhānave'rchā devāyāgnaye ।*
*yaṁ mitraṁ na praśastibhirmartāso dadhire puraḥ ॥1॥*
*sa hi dyubhirjanānāṁ hotā dakṣasya bāhnoḥ ।*
*vi havyamagnirānuṣagbhago na vāramṛṇvati ॥2॥*
*asya stome maghonaḥ sakhye vṛddhaśechiṣaḥ ।*
*viśvā yasmintuviṣvaṇi samarye śuṣmamādadhuḥ ॥3॥*
*adhā hyagna eṣāṁ suvīryasya maṁhanā ।*

*tamidyahnaṁ na rodasī pari śravo babhūvatuḥ ॥4॥*
*nū na ehi vāryamagne gṛṇāna ā bhara ।*
*ye vayaṁ ye cha sūrayaḥ svasti dhāmahe sachotaidhi pṛtsu no vṛdhe ॥5॥*

ऋ. (Rv.)५.१७.१-५

आ यौर्देव मर्त्य इत्था तव्यांसमतये । अग्निं कृते स्वध्वरे पुरुरीळीतावसे ॥१॥
अस्य हि स्वयशस्तर आसा विधर्मन्मन्यसे। तं नाकं चित्रशोचिषं मन्द्रं परो मनीषया ॥२॥
अस्य वासा उ अर्चिषा य आयुक्त तुजा गिरा। दिवो न यस्य रेतसा बृहच्छोचन्त्यर्चयः ॥३॥
अस्य क्रत्वा विचेतसो दस्मस्य वसु रथ आ। अध विश्वासु हव्योऽगिनर्विक्षु प्र शस्यते ॥४॥
नू न इद्धि वार्यमासा सचन्त सूरयः ।
ऊजो नपादभिष्टये पाहि शग्धि स्वस्तये उतैधि पृत्सु नो वृधे ॥५॥

*ā yaurdeva martya itthā tavyāṁsamataye । agniṁ kṛte svadhvare pururīḷītāvase ॥1॥*
*asya hi svayaśastara āsā vidharmanmanyase ।*
*taṁ nākaṁ chitraśochiṣaṁ mandraṁ paro manīṣayā ॥2॥*
*asya vāsā u archiṣā ya āyukta tujā girā ।*
*divo na yasya retasā bṛhachchhochantyarchayaḥ ॥3॥*
*asya kratvā vichetaso dasmasya vasu ratha ā ।*
*adha viśvāsu havyo'ginarvikṣu pra śasyate ॥4॥*
*nū na iddhi vāryamāsā sachanta sūrayaḥ ।*
*ūjo napādabhiṣṭaye pāhi śagdhi svastaye utaidhi pṛtsu no vṛdhe ॥5॥*

## ३६९. पृथुर् वैन्यः (Pṛthur Vainyaḥ)

१. इन्द्रः (Indraḥ) - ऋ. (Rv.)१०.१४८.१-५; सा. (Sv.) ३१६

ऋ. (Rv.)१०.१४८.१-५

सुष्वाणास इन्द्र स्तुमसि त्वा ससवांसश्च तुविनृम्ण वाजम् ।
आ नो भर सुवितं यस्य चाकन्त्मना तना सनुयाम त्वोताः ॥१॥
ऋष्वस्त्वमिन्द्र शूर जातो दासीर्विशः सूर्येण सह्याः ।
गुहा हितं गुह्यं गूळहमप्सु बिभृमसि प्रस्रवणे न सोमम् ॥२॥
अर्यो वा गिरो अभ्यर्च विद्वानृषीणां विप्रः सुमतिं चकानः ।
ते स्याम ये रणयन्त सोमैरेनोत तुभ्यं रथेळह भक्षैः ॥३॥
इमा ब्रह्मेन्द्र तुभ्यं शंसि दा नृभ्यो नृणां शूर शवः ।
तेभिर्भव सक्रतुर्येषु चाकन्नुत त्रायस्व गृणत उत स्तीन् ॥४॥
श्रुधी हवमिन्द्र शूर पृथ्या उत स्तवसे वेन्यस्यार्कैः ।
आ यस्ते योनि घृतवन्तमस्वारूर्मिर्न निम्नैर्द्रवयन्त वक्वाः ॥५॥

*suṣvāṇāsa indra stumasi tvā sasavāṁsaścha tuvinṛmṇa vājam ।*
*ā no bhara suvitaṁ yasya chākantmanā tanā sanuyāma tvotāḥ ॥1॥*
*ṛṣvastvamindra śūra jāto dāsīrviśaḥ sūryeṇa sahyāḥ ।*
*guhā hitaṁ guhyaṁ gūḷhamapsu bibhṛmasi prasravaṇe na somam ॥2॥*
*aryo vā giro abhyarcha vidvānṛṣīṇāṁ vipraḥ sumatiṁ chakānaḥ ।*
*te syāma ye raṇayanta somairenota tubhyaṁ ratheḷaha bhakṣaiḥ ॥3॥*
*imā brahmendra tubhyaṁ śaṁsi dā nṛbhyo nṛṇāṁ śūra śavaḥ ।*
*tebhirbhava sakraturyeṣu chākannuta trāyasva gṛṇata uta stīn ॥4॥*
*śrudhī havamindra śūra pṛthyā uta stavase venyasyārkaiḥ ।*
*ā yaste yoni ghṛtavantamasvārūrmirna nimnairdravayanta vakvāḥ ॥5॥*

सा. (Sv.) ३१६

सुष्वाणास इन्द्र स्तुमसि त्वा सनिष्यन्तश्चित्तुविनृम्ण वाजम् ।
आ नो भर सुवितं यस्य कोना तना त्मना सह्याम त्वोताः ॥४॥

*suṣvāṇāsa indra stumasi tvā saniṣyantaśchittuvinṛmṇa vājam ।*
*ā no bhara suvitaṁ yasya konā tanā tmanā sahyāma tvotāḥ ॥4॥*

## ३७०. पृश्नयो अजाः (Pṛśnayo Ajāḥ)

१. पवमानः सोमः (Pavamānaḥ Somaḥ) - ऋ. (Rv.)९.८६.२१-३०; सा. (Sv.) ८२३

ऋ. (Rv.)९.८६.२१-३०

अयं पुनान उषसो वि रोचयदयं सिन्धुभ्यो अभवदु लोककृत् ।
अयं त्रिः सप्त दुदुहान आशिरं सोमो हृदे पवते चारु मत्सरः ॥२१॥
पवस्व सोम दिव्येषु धामसु सृजान इन्दो कलशे पवित्र आ ।
सीदन्निन्द्रस्य जठरे कनिक्रदन्नृभिर्यतः सूर्यमारोहयो दिवि ॥२२॥
अद्रिभिः सुतः पवसे पवित्र आँ इन्दविन्द्रस्य जठरेष्वाविशन् ।
त्वं नृचक्षा अभवो विचक्षण सोम गोत्रमंगिरेभ्योऽवृणोरप ॥२३॥
त्वां सोम पवमानं स्वाध्योऽनु विप्रासो अमदन्नवस्यवः ।
त्वां सुपर्ण आभरद्दिवस्परीन्दो विश्वाभिर्मतिभिः परिष्कृतम् ॥२४॥
अव्ये पुनानं परि वार ऊर्मिणा हरिं नवन्ते अभि सप्त धेनवः ।
अपामुपस्थे अध्यायवः कविमृतस्य योना महिषा अहेषत ॥२५॥
इन्दुः पुनानो अति गाहते मृधो विश्वानि कृण्वन्त्सुपथानि यज्यवे ।
गाः कृण्वानो निर्णिजं हर्यतः कविरत्यो न क्रीळन्परि वारमर्षति ॥२६॥
असश्चतः शतधारा अभिश्रियो हरिं नवन्तेऽव ता उदन्युवः ।
क्षिपो मृजन्ति परि गोभिरावृतं तृतीये पृष्ठे अधि रोचने दिवः ॥२७॥
त्वेमाः प्रजा दिव्यस्य रेतसस्त्वं विश्वस्य भुवनस्य राजसि ।
अथेदं विश्वं पवमान ते वशे त्वमिन्दो प्रथमो धामधा असि ॥२८॥
त्वं समुद्रो असि विश्ववित्कवे तवेमाः पंच प्रदिशो विधर्मणि ।
त्वं द्यां च पृथिवीं चाति जाभ्रिषे तव ज्योतींषि पवमान सूर्यः ॥२९॥
त्वं पवित्रे रजसो विधर्मणि देवेभ्यः सोम पवमान पूयसे ।
त्वामुशिजः प्रथमा अगृभ्णत तुभ्येमा विश्वा भुवनानि येमिरे ॥३०॥

*ayaṁ punāna uṣaso vi rochayadayaṁ sindhubhyo abhavadu lokakṛt /*
*ayaṁ triḥ sapta duduhāna āśiraṁ somo hṛde pavate chāru matsaraḥ //21//*
*pavasva soma divyeṣu dhāmasu sṛjāna indo kalaśe pavitra ā /*
*sīdannindrasya jaṭhare kanikradannṛbhiryataḥ sūryamārohayo divi //22//*
*adribhiḥ sutaḥ pavase pavitra āṁ indavindrasya jaṭhareṣvāviśan /*
*tvaṁ nṛchakṣā abhavo vichakṣaṇa soma gotramaṁgirebhyo'vṛṇorapa //23//*
*tvāṁ soma pavamānaṁ svādhyo'nu viprāso amadannavasyavaḥ /*
*tvāṁ suparṇa ābharaddivasparīndo viśvābhirmatibhiḥ pariṣkṛtam //24//*
*avye punānaṁ pari vāra ūmiṇā hariṁ navante abhi sapta dhenavaḥ /*
*apāmupasthe adhyāyavaḥ kavimṛtasya yonā mahiṣā aheṣata //25//*
*induḥ punāno ati gāhate mṛdho viśvāni kṛṇvantsupathāni yajyave /*
*gāḥ kṛṇvāno nirṇijaṁ haryataḥ kaviratyo na krīḻanpari vāramarṣati //26//*
*asaśchataḥ śatadhārā abhiśriyo hariṁ navante'va tā udanyuvaḥ /*
*kṣipo mṛjanti pari gobhirāvṛtaṁ tṛtīye pṛṣṭhe adhi rochane divaḥ //27//*
*tvemāḥ prajā divyasya retasastvaṁ viśvasya bhuvanasya rājasi /*
*athedaṁ viśvaṁ pavamāna te vaśe tvamindo prathamo dhāmadhā asi //28//*
*tvaṁ samudro asi viśvavitkave tavemāḥ paṁcha pradiśo vidharmaṇi /*
*tvaṁ dyāṁ cha pṛthivīṁ chāti jābhriṣe tava jyotīṁṣi pavamāna sūryaḥ //29//*
*tvaṁ pavitre rajaso vidharmaṇi devebhyaḥ soma pavamāna pūyase /*
*tvāmuśijaḥ prathamā agṛbhṇata tubhyemā viśvā bhuvanāni yemire //30//*

सा. (Sv.) ८२३

अयं पुनान उषसो अरोचयदयं सिन्धुभ्यो अभवदु लोककृत् ।
अयं त्रिः सप्त दुदुहान आशिरं सोमो हृदे पवते चारु मत्सरः ॥३॥

*ayaṁ punāna uṣaso arochayadayaṁ sindhubhyo abhavadu lokakṛt /*

*ayaṁ triḥ sapta duduhāna āśiraṁ somo hṛde pavate chāru matsaraḥ //3 //*

**३७१. पृषध्रः काण्वः (Pṛṣadhraḥ Kāṇvaḥ)**

१. अग्नि सूर्यो (Agni Sūryo) - ऋ. (Rv.)८.५६.५

अचेत्यग्निश्चिकितुर्हव्यवाट् स सुमद्रथः ।
अग्निः शुक्रेण शेचिषा बृहत्सूरो अरोचत दिवि सूर्यो अरोचत ॥५॥
*achetyagniśchikiturhavyavāṭ sa sumadrathaḥ /*
*agniḥ śukreṇa śechiṣā bṛhatsūro arochata divi sūryo arochata //5 //*

२. प्रस्कण्वस्य दानस्तुतिः (Prraskaṇvasya Dānastutiḥ) - ऋ. (Rv.)८.५६.१-४

प्रति ते दस्यवे वृक राधे अदर्श्यह्रयम्। द्यौर्न प्रथिना शवः ॥१॥
दश मह्यं पौतक्रतः सहस्रा दस्यवे वृकः। नित्याद्रायो अमंहत ॥२॥
शतं मे गर्दभानां शतमूर्णावतीनाम्। शतं दासाँ अति स्रजः ॥३॥
तत्रो अपि प्राणीयत पूतक्रतायै व्यक्ता। अश्वानामिन्न यूथ्याम् ॥४॥
*prati te dasyave vṛka rādhe adarśyahrayam / dyaurna prathinā śavaḥ //1 //*
*daśa mahyaṁ pautakrataḥ sahasrā dasyave vṛkaḥ / nityādrāyo amaṁhata //2 //*
*śataṁ me gardabhānāṁ śatamūrṇāvatīnām / śataṁ dāsāṁ̐ ati srajaḥ //3 //*
*tatro api prāṇīyata pūtakratāyai vyaktā / aśvānāminna yūthyām //4 //*

**३७२. पृषध्रः काण्वः (साग्री.सास्वा.ऋसर्व..८.५६.५); वामदेवः (सार्षेदी.) (Pṛṣadhraḥ Kāṇvaḥ [Ssb.Sas.Rss..8.56.5); Vāmadevaḥ [Sad.])**

१. अग्निः (साग्री.सास्वा.सार्षेदी.) अग्नि सूर्यो (ऋसर्व.) - सा. (Sv.) ४४७ (Agniḥ [Ssb.Sas.Sad.] Agni Sūryo [Rss.]) - SĀ. (Sv.) 447)

अचेत्यग्निश्चिकितिर्हव्यवाड् न सुमद्रथः ॥१॥
*achetyagniśchikitirhavyavāḍ na sumadrathaḥ //1 //*

**३७३. पौर आत्रेयः (Paura Ātreyaḥ)**

१. अश्विनौ (Aśvinau) - ऋ. (Rv.)५.७३.१-१०; ५.७४.१-१०

ऋ. (Rv.)५.७३.१-१०

यदद्य स्थः परावति यदर्वावत्यश्विना। यद्वा पुरू पुरुभुजा यदन्तरिक्ष आ गतम् ॥१॥
इह त्या पुरुभूतमा पुरू दंसांसि बिभ्रता। वरस्या याम्यध्रिगू हुवे तुविष्टमा भुजे ॥२॥
ईर्मान्यद्वपुषे वपुश्चक्रं रथस्य येमथुः। पर्यन्या नाहुषा युगा मह्ना रजांसि दीयथः ॥३॥
तदू षु वामेना कृतं विश्वा यद्वामनु ष्टवे। नाना जातावरेपसा समस्मे बन्धुमेयथुः ॥४॥
आ यद्वां सूर्या रथं तिष्ठद्रघुष्यदं सदा। परि वामरुषा वयो घृणा वरन्त आतपः ॥५॥
युवोरत्रिश्चिकेतति नरा सुम्नेन चेतसा। घर्मं यद्वामरेपसं नासत्यास्ना भुरण्यति ॥६॥
उग्रो वां ककुहो ययिः शृण्वे यामेषु संतनिः। यद्वां दंसोभिरश्विनात्रिर्नरावववर्तति ॥७॥
मध्व ऊ षु मधूयुवा रुद्रा सिषक्ति पिप्युषी। यत्समुद्राति पर्षथः पक्वाः पृक्षो भरन्त वाम् ॥८॥
सत्यमिद्वा उ अश्विना युवामाहुर्मयोभुवा। ता यामन्यामहूतमा यामन्ना मृळयत्तमा ॥९॥
इमा ब्रह्माणि वर्धनाश्विभ्यां सन्तु शंतमा। या तक्षाम रथाँ इवावोचाम बृहन्नमः ॥१०॥
*yadadya sthaḥ parāvati yadarvāvatyaśvinā /*
*yadvā purū purubhujā yadantarikṣa ā gatam //1 //*
*iha tyā purubhūtamā purū daṁsāṁsi bibhratā /*
*varasyā yāmyadhrigū huve tuviṣṭamā bhuje //2 //*
*īrmānyadvapuṣe vapuśchakraṁ rathasya yemathuḥ /*
*paryanyā nāhuṣā yugā mahnā rajāṁsi dīyathaḥ //3 //*
*tadū ṣu vāmenā kṛtaṁ viśvā yadvāmanu ṣṭave /*
*nānā jātāvarepasā samasme bandhumeyathuḥ //4 //*
*ā yadvāṁ sūryyā rathaṁ tiṣṭhadraghuṣyadaṁ sadā /*
*pari vāmaruṣā vayo ghṛṇā varanta ātapaḥ //5 //*
*yuvoratriśchiketati narā sumnena chetasā /*

*gharma yadvāmarepasaṁ nāsatyāsnā bhuraṇyati ॥6 ॥*
*ugro vāṁ kakuho yayiḥ śṛṇve yāmeṣu saṁtaniḥ ।*
*yadvāṁ daṁsobhiraśvinātrirnarāvavartati ॥7 ॥*
*madhva ū ṣu madhūyuvā rudrā siṣakti pipyuṣī ।*
*yatsamudrāti parṣathaḥ pakvāḥ pṛkṣo bharanta vām ॥8 ॥*
*satyamidvā u aśvinā yuvāmāhurmayobhuvā ।*
*tā yāmanyāmahūtamā yāmannā mṛḷayattamā ॥9 ॥*
*imā brahmāṇi vardhanāśvibhyāṁ santu śaṁtamā ।*
*yā takṣāma rathām̐ ivāvochāma bṛhannamaḥ ॥10 ॥*

ऋ. (Rv.)५.७४.१-१०

कूष्ठो देवावश्विनाद्या दिवो मनावसू। तच्छवथो वृषण्वसू अत्रिर्वामा विवासति ॥१॥
कुह त्या कुह नु श्रुता दिवि देवा नासत्या। कस्मिन्ना यतथो जने को वां नदीनां सचा ॥२॥
कं याथः कं ह गच्छथः कमच्छा युंजाथे रथम्। कस्य ब्रह्माणि रण्यथो वयं वामुश्मसीष्टये ।३॥
पौरं चिद्ध्युदप्रुतं पौर पौराय जिन्वथः। यदीं गृभीततातये सिंहमिव द्रुहस्पदे ॥४॥
प्र च्यवानाज्जुजुरुषो वव्रिमत्कं न मुंचथः। युवा यदी कृथः पुनरा काममृण्वे वध्वः ॥५॥
अस्ति हि वामिह स्तोता स्मसि वां संदृशि श्रिये। नू श्रुतं म आ गतमवोभिर्वाजिनीवसू ॥६॥
को वामद्य पुरूणामा वव्ने मर्त्यानाम्। को विप्रो विप्रवाहसा को यौर्वाजिनीवसू ॥७॥
आ वां रथो रथानां येष्ठो यात्वश्विना। पुरू चिदस्मयुस्तिर आङ्गूषो मर्त्येष्वा ॥८॥
शमू षु वां मधूयुवास्माकमस्तु चर्कृतिः। अर्वाचीना विचेतसा विभिः श्येनेव दीयतम् ॥९॥
अश्विना यद्ध कर्हि चिच्छुश्रूयातमिमं हवम्। वस्वीरू षु वां भुजः पृंचन्ति सु वां पृचः ॥१०॥

*kūṣṭho devāvaśvinādyā divo manāvasū ।*
*tachchhavatho vṛṣaṇvasū atrirvāmā vivāsati ॥1 ॥*
*kuha tyā kuha nu śrutā divi devā nāsatyā ।*
*kasminnā yatatho jane ko vāṁ nadīnāṁ sachā ॥2 ॥*
*kaṁ yāthaḥ kaṁ ha gachchhathaḥ kamachchhā yuṁjāthe ratham ।*
*kasya brahmāṇi raṇyatho vayaṁ vāmuśmasīṣṭaye ।3 ॥*
*pauraṁ chiddhyudaprutaṁ paura paurāya jinvathaḥ ।*
*yadīṁ gṛbhītatātaye siṁhamiva druhaspade ॥4 ॥*
*pra chyavānājjujuruṣo vavrimatkaṁ na muṁchathaḥ ।*
*yuvā yadī kṛthaḥ punarā kāmamṛṇve vadhvaḥ ॥5 ॥*
*asti hi vāmiha stotā smasi vāṁ saṁdṛśi śriye ।*
*nū śrutaṁ ma ā gatamavobhirvājinīvasū ॥6 ॥*
*ko vāmadya purūṇāmā vavne martyānām ।*
*ko vipro vipravāhasā ko yaurvājinīvasū ॥7 ॥*
*ā vāṁ ratho rathānāṁ yeṣṭho yātvaśvinā ।*
*purū chidasmayustira āṅgūṣo martyeṣvā ॥8 ॥*
*śamū ṣu vāṁ madhūyuvāsmākamastu charkṛtiḥ ।*
*arvāchīnā vichetasā vibhiḥ śyeneva dīyatam ॥9 ॥*
*aśvinā yaddha karhi chichchhuśrūyātamimaṁ havam ।*
*vasvīrū ṣu vāṁ bhujaḥ pṛṁchanti su vāṁ pṛchaḥ ॥10 ॥*

## ३७४. प्रगाथः (Pragāthaḥ)

१. इन्द्रः (Indraḥ) - अ. (Av.) २०.८५.१-२

मा चिदन्यद् वि शंसत सखायो मा रिषण्यत ।
इन्द्रमित् स्तोता वृषणं सचा सुते मुहुरुक्था च शंसत ॥१॥
अवक्रक्षिणं वृषभं यथाजुरं गां न चर्षणीसहम् ।
विद्वेषणं संवननोऽभयंकरं मंहिष्ठमुभयाविनम् ॥२॥

*mā chidanyad vi śaṁsata sakhāyo mā riṣaṇyata ।*
*indramit stotā vṛṣaṇaṁ sachā sute muhurukthā cha śaṁsata ॥1 ॥*

*avakrakṣiṇaṁ vṛṣabhaṁ yathājuraṁ gāṁ na charṣaṇīsaham /*
*vidveṣaṇaṁ saṁvanano'bhayaṁkaraṁ maṁhiṣṭhamubhayāvinam //2 //*

२. महेन्द्रः (Mahendraḥ) - य. (Yv.)३३.५०

अस्मे रुद्रा मेहना पर्वतासो वृत्रहत्ये भरहूतौ सजोषाः ।
यः शं सते स्तुवते धायि पज्र ऽ इन्द्रज्येष्ठा ऽ अस्माँश्ऽ अवन्तु देवाः ॥५० ॥
*asme rudrā mehanā parvatāso vṛtrahatye bharahūtau sajoṣāḥ /*
*yaḥ śaṁ sate stuvate dhāyi pajra ' indrajyeṣṭhā ' asmāṁś' avantu devāḥ //50 //*

## ३७५. प्रगाथः काण्वः (Pragāthaḥ Kāṇvaḥ)

१. अश्विनौ (Aśvinau) - ऋ. (Rv.)८.१०.१-६

यत्स्थो दीर्घप्रसद्मनि यद्वादो रोचने दिवः । यद्वा समुद्रे अध्याकृते गृहेऽत आ यातमश्विना ॥१॥
यद्वा यां मनवे संमिमिक्षथुरेवेत्काण्वस्य बोधतम् ।
बृहस्पतिं विश्वन्देवाँ अहं हुव इन्द्राविष्णू अश्विनावाशुहेषसा ॥२॥
त्या न्व१श्विना हुवे सुदंससा गृभे कृता । ययोरस्ति प्र णः सख्यं देवेष्वध्याप्यम् ॥३॥
ययोरधि प्र याा असूरे सन्ति सूरयः ।
ता यास्याध्वरस्य प्रचेतसा स्वधाभिर्या पिबतः सोम्यं मधु ॥४॥
यदद्याश्विनावपाग्यत्प्राक्स्थो वाजिनीवसू ।
यद् द्रुह्यव्यनवि तुर्वशे यदौ हुवे वामथ मा गतम् ॥५॥
यदन्तरिक्षे पतथः पुरुभुजा यद्वेमे रोदसी अनु ।
यद्वा स्वधाभिरधितिष्ठथो रथमत आ यातमश्विना ॥६॥
*yatstho dīrghaprasadmani yadvādo rochane divaḥ /*
*yadvā samudre adhyākṛte gṛhe'ta ā yātamaśvinā //1 //*
*yadvā yāṁ manave saṁmimikṣathurevetkāṇvasya bodhatam /*
*bṛhaspatiṁ viśvandevāṁ ahaṁ huva indrāviṣṇū aśvināvāśuheṣasā //2 //*
*tyā nva1śvinā huve sudaṁsasā gṛbhe kṛtā /*
*yayorasti pra ṇaḥ sakhyaṁ deveṣvadhyāpyam //3 //*
*yayoradhi pra yāā asūre santi sūrayaḥ /*
*tā yāsyādhvarasya prachetasā svadhābhiryā pibataḥ somyaṁ madhu //4 //*
*yadadyāśvināvapāgyatprākstho vājinīvasū /*
*yad druhyavyanavi turvaśe yadau huve vāmatha mā gatam //5 //*
*yadantarikṣe patathaḥ purubhujā yadveme rodasī anu /*
*yadvā svadhābhiradhitiṣṭhatho rathamata ā yātamaśvinā //6 //*

२. इन्द्रः (Indraḥ) - ऋ. (Rv.)८.६२.१-१२; ८.६३.१-११; ८.६४.१-१२; ८.६५.१-१२; सा. (Sv.) १४२; १३५४-१३५६

ऋ. (Rv.)८.६२.१-१२

प्रो अस्मा उपस्तुतिं भरता यज्जुजोषति ।
उक्थैरिन्द्रस्य माहिनं वयो वर्धन्ति सोमिनो भद्रा इन्द्रस्य रातयः ॥१॥
अयुजो अस्मो नृभिरेकः कृष्टीरयास्यः ।
पूर्वीरति प्र वावृधे विश्व जातान्योजसा भद्रा इन्द्रस्य रातयः ॥२॥
अहितेन चिदर्वता जीरदानुः सिपासति ।
प्रवाच्यमिन्द्र तत्त्व वीर्याणि करिष्यतो भद्रा इन्द्रस्य रातयः ॥३॥
आ याहि कृणवाम त इन्द्र ब्रह्माणि वर्धना ।
येभिः शविष्ठ चाकनो भद्रमिह श्रवस्यते भद्रा इन्द्रस्य रातयः ॥४॥
धृषतश्चिद्धृषन्मनः कृणोषीन्द्र यत्तवम् ।
तीव्रैः सोमैः सपर्यतो नमोभिः प्रतिभूषतो भद्रा इन्द्रस्य रातयः ॥५॥
अव चष्ट ऋचीषमोऽवताँ इव मानुषः ।
जुष्टी दक्षस्य सोमिनः सखायं कुणुते युजं भद्रा इन्द्रस्य रातयः ॥६॥

विश्वे त इन्द्र वीर्यं देवा अनु क्रतुं ददुः ।
भुवो विश्वस्य गोपतिः पुरुष्टुत भद्रा इन्द्रस्य रातयः ॥७॥
गृणे तदिन्द्र ते शव उपमं देवतातये ।
यद्धंसि वृत्रमोजसा शचीपते भद्रा इन्द्रस्य रातयः ॥८॥
समनेव वपुष्यतः कृणवन्मानुषा युगा ।
विदे तदिन्द्रश्चेतनमध श्रुतो भद्रा इन्द्रस्य रातयः ॥९॥
उज्जातमिन्द्र ते शव उत्त्वामुत्त्व क्रतुम् ।
भूरिगो भूरि वावृधुर्मघवन्तव शर्मणि भद्रा इन्द्रस्य रातयः ॥१०॥
अहं च त्वं च वृत्रहन्त्सं युज्याव सनिभ्य आ ।
अरातीवा चिदद्रिवोऽनु नौ शूर मंसते भद्रा इन्द्रस्य रातयः ॥११॥
सत्यमिद्वा उ तं वयमिन्द्रं स्तवाम नानृतम् ।
महाँ असुन्वतो वधो भूरि ज्योतींषि सुन्वतो भद्रा इन्द्रस्य रातयः ॥१२॥

*pro asmā upastutiṁ bharatā yajjujoṣati ।*
*ukthairindrasya māhinaṁ vayo vardhanti somino bhadrā indrasya rātayaḥ ॥1॥*
*ayujo asmo nṛbhirekaḥ kṛṣṭīrayāsyaḥ ।*
*pūrvīrati pra vāvṛdhe viśva jātānyojasā bhadrā indrasya rātayaḥ ॥2॥*
*ahitena chidarvatā jīradānuḥ sipāsati ।*
*pravāchyamindra tattva vīryāṇi kariṣyato bhadrā indrasya rātayaḥ ॥3॥*
*ā yāhi kṛṇavāma ta indra brahmāṇi vardhanā ।*
*yebhiḥ śaviṣṭha chākano bhadramiha śravasyate bhadrā indrasya rātayaḥ ॥4॥*
*dhṛṣataśchiddhṛṣanmanaḥ kṛṇoṣīndra yattavam ।*
*tīvraiḥ somaiḥ saparyato namobhiḥ pratibhūṣato bhadrā indrasya rātayaḥ ॥5॥*
*ava chaṣṭa ṛchīṣamo'vatām̐ iva mānuṣaḥ ।*
*juṣṭvī dakṣasya sominaḥ sakhāyaṁ kuṇute yujaṁ bhadrā indrasya rātayaḥ ॥6॥*
*viśve ta indra vīrya devā anu kratuṁ daduḥ ।*
*bhuvo viśvasya gopatiḥ puruṣṭuta bhadrā indrasya rātayaḥ ॥7॥*
*gṛṇe tadindra te śava upamaṁ devatātaye ।*
*yaddhaṁsi vṛtramojasā śachīpate bhadrā indrasya rātayaḥ ॥8॥*
*samaneva vapuṣyataḥ kṛṇavanmānuṣā yugā ।*
*vide tadindraśchetanamadha śruto bhadrā indrasya rātayaḥ ॥9॥*
*ujjātamindra te śava uttvāmuttva kratum ।*
*bhūrigo bhūri vāvṛdhurmaghavantava śarmaṇi bhadrā indrasya rātayaḥ ॥10॥*
*ahaṁ cha tvaṁ cha vṛtrahantsaṁ yujyāva sanibhya ā ।*
*arātīvā chidadrivo'nu nau śūra maṁsate bhadrā indrasya rātayaḥ ॥11॥*
*satyamidvā u taṁ vayamindraṁ stavāma nānṛtam ।*
*mahām̐ asunvato vadho bhūri jyotīṁṣi sunvato bhadrā indrasya rātayaḥ ॥12॥*

ऋ. (Rv.)८.६३.१-११

स पूर्व्यो महानां वेनः क्रतुभिरानजे। यस्य द्वारा मनुष्पिता देवेषु धिय आनजे ॥१॥
दिवो मानं नोत्सदन्त्सोमपृष्ठासो अद्रयः। उक्था ब्रह्म च शंस्या ॥२॥
स विद्वाँ अंगिरोभ्य इन्द्रो गा अवृणोदप। स्तुषे तदस्य पौंस्यम् ॥३॥
स प्रत्नथा कविवृध इन्द्रो वाकस्य वक्षणिः। शिवो अर्कस्य होमन्यस्मत्रा गन्त्ववसे ॥४॥
आदू नु ते अनु क्रतुं स्वाहा वरस्य यज्यवः। श्वत्रकर्मा अनूषतेन्द्र गोत्रस्य दावने ॥५॥
इन्द्रे विश्वानि वीर्या कृतानि कर्त्वानि च। यमर्का अध्वरं विदुः ॥६॥
यत्पांचजन्यया विशेन्द्रे घोषा असृक्षत। अस्तृणाद् बर्हणा विपो३ र्यो मानस्य स क्षयः ॥७॥
इयमु ते अनुष्टुतिश्चकृषे तानि पौंस्या। प्रावश्चक्रस्य वर्तनिम् ॥८॥
अस्य वृष्णो व्योदन उरु क्रमिष्ट जीवसे। यवं न पश्व आ ददे ॥९॥
तद्दधाना अवस्यवो युष्माभिर्दक्षपितरः। स्याम मरुत्वतो वृधे ॥१०॥
वळ्त्वियाय धाम्न ऋक्वभिः शूर नोनुमः। जेषमेन्द्र त्वया युजा ॥११॥

*sa pūrvyo mahānāṁ venaḥ kratubhirānaje /*
*yasya dvārā manuṣpitā deveṣu dhiya ānaje //1 //*
*divo mānaṁ notsadantyasomapṛṣṭhāso adrayaḥ / ukthā brahma cha śaṁsyā //2 //*
*sa vidvāṁ aṁgirobhya indro gā avṛṇodapa / stuṣe tadasya pauṁsyam //3 //*
*sa pratnathā kavivṛdha indro vākasya vakṣaṇiḥ /*
*śivo arkasya homanyasmatrā gantvavase //4 //*
*ādū nu te anu kratuṁ svāhā varasya yajyavaḥ /*
*śvatrakarmā anūṣatendra gotrasya dāvane //5 //*
*indre viśvāni vīryā kṛtāni kartvāni cha / yamarkā adhvaraṁ viduḥ //6 //*
*yatpāṁchajanyayā viśendre ghoṣā asṛkṣata /*
*astṛṇād barhaṇā vipo3 ryo mānasya sa kṣayaḥ //7 //*
*iyamu te anuṣṭutiśchakṛṣe tāni pauṁsyā / prāvaśchakrasya vartanim //8 //*
*asya vṛṣṇo vyodana uru kramiṣṭa jīvase / yavaṁ na paśva ā dade //9 //*
*taddadhānā avasyavo yuṣmābhirdakṣapitaraḥ / syāma marutvato vṛdhe //10 //*
*vaḷṛtviyāya dhāmna ṛkvabhiḥ śūra nonumaḥ / jeṣamendra tvayā yujā //11 //*

ऋ. (Rv.)८.६४.१-१२

उत्त्वा मन्दन्तु स्तोमाः कृणुष्व राधो आद्रिवः। अव ब्रह्मद्विषो जहि ॥१॥
पदा पणीँ रराधसो नि बाधस्व महाँ असि। नहि त्वा कश्चन प्रति ॥२॥
त्वमीशिषे सुतानामिन्द्र त्वमसुतानाम्। त्वं राजा जनानाम् ॥३॥
एहि प्रेहि क्षयो दिव्या३ घेषंचर्षणीनाम्। ओभे पृणासि रोदसी ॥४॥
त्यं चित्पर्वतं गिरिं शतवन्तं सहस्रिणम्। वि स्तोतृभ्यो रुरोजिथ ॥५॥
वयमु त्वा दिवा सुते वयं नक्तं हवामहे। अस्माकं काममा पृण ॥६॥
क्व१ स्य वृषभो युवा तुविग्रीवो अनानतः। ब्रह्मा कस्तं सपर्यति ॥७॥
कस्य स्वित्सवनं वृषा जुजुष्वाँ अव गच्छति। इन्द्र क उ स्विदा चके ॥८॥
कं ते दाना असक्षत वृत्रहन्कं सुवीर्या। उक्थे क उ स्विदन्तमः ॥९॥
अयं ते मानुषे जने सोमः पुरुषु सूयते। तस्येहि प्र द्रवा पिब ॥१०॥
अयं ते शर्यणावति सुषोमायामधि प्रियः। आर्जीकीये मदिन्तमः ॥११॥
तमद्य राधसे महे चारुं मदाय घृष्वये। एहीमिन्द्र द्रवा पिब ॥१२॥

*uttvā mandantu stomāḥ kṛṇuṣva rādho ādrivaḥ / ava brahmadviṣo jahi //1 //*
*padā paṇīṁ rarādhaso ni bādhasva mahāṁ asi / nahi tvā kaśchana prati //2 //*
*tvamīśiṣe sutānāmindra tvamasutānām / tvaṁ rājā janānām //3 //*
*ehi prehi kṣayo divyā3 gheṣaṁcharṣaṇīnām / Obhe pṛṇāsi rodasī //4 //*
*tyaṁ chitparvataṁ giriṁ śatavantaṁ sahasriṇam / vi stotṛbhyo rurojitha //5 //*
*vayamu tvā divā sute vayaṁ naktaṁ havāmahe / asmākaṁ kāmamā pṛṇa //6 //*
*kva1 sya vṛṣabho yuvā tuvigrīvo anānataḥ / brahmā kastaṁ saparyati //7 //*
*kasya svitsavanaṁ vṛṣā jujuṣvāṁ ava gachchhati / indra ka u svidā chake //8 //*
*kaṁ te dānā asakṣata vṛtrahankaṁ suvīryā / ukthe ka u svidantamaḥ //9 //*
*ayaṁ te mānuṣe jane somaḥ puruṣu sūyate / tasyehi pra dravā piba //10 //*
*ayaṁ te śaryaṇāvati suṣomāyāmadhi priyaḥ / ārjīkīye madintamaḥ //11 //*
*tamadya rādhase mahe chāruṁ madāya ghṛṣvaye /*
*ehīmindra dravā piba //12 //*

ऋ. (Rv.)८.६५.१-१२

यदिन्द्र प्रागपागुदङ्न्यग्वा हूयसे नृभिः। आ याहि तूयमाशुभिः ॥१॥
यद्वा प्रस्रवणे दिवो मादयासे स्वर्णरे। यद्वा समुद्रे अन्धसः ॥२॥
आ त्वा गीर्भिर्महामुरुं हुवे गामिव भोजसे। इन्द्र सोमस्य पीतये ॥३॥
आ त इन्द्र महिमानं हरयो देव ते महः। रथे वहन्तु बिभ्रतः ॥४॥
इन्द्र गृणीष उ स्तुषे महाँ उग्र ईशानकृत्। एहि नः सुतं पिब ॥५॥
सुतावन्तस्त्वा वयं प्रयस्वन्तो हवामहे। इदं नो बर्हिरासदे ॥६॥

यच्चिद्धि शश्वतामसीन्द्र साधारणस्त्वम्। तं त्वा वयं हवामहे ॥७॥
इदं ते सोम्यं मध्वधुक्षन्नद्रिभिर्नरः। जुषाण इन्द्र तत्पिब ॥८॥
विश्वाँ अर्यो विपश्चितोऽति ख्यस्तूयमा गहि। अस्मे धेहि श्रवो बृहत् ॥९॥
दाता मे पृषतीनां राजा हिरण्यवीनाम्। मा देवा मघवा रिषत् ॥१०॥
सहस्रे पृषतीनामधिश्चन्द्रं बृहत्पृथु। शुक्रं हिरण्यमा ददे ॥११॥
नपातो दुर्गस्य मे सहस्रेण सुराधसः। श्रवो देवेष्वक्रत ॥१२॥

*yadindra prāgapāgudaṁnyagvā hūyase nṛbhiḥ I ā yāhi tūyamāśubhiḥ II1 II*
*yadvā prasravaṇe divo mādayāse svarṇare I yadvā samudre andhasaḥ II2 II*
*ā tvā gīrbhirmahāmuruṁ huve gāmiva bhojase I indra somasya pītaye II3 II*
*ā ta indra mahimānaṁ harayo deva te mahaḥ I rathe vahantu bibhrataḥ II4 II*
*indra gṛṇīṣa u stuṣe mahām̐ ugra īśānakṛt I ehi naḥ sutaṁ piba II5 II*
*sutāvantastvā vayaṁ prayasvanto havāmahe I idaṁ no barhirāsade II6 II*
*yachchiddhi śaśvatāmasīndra sādhāraṇastvam I taṁ tvā vayaṁ havāmahe II7 II*
*idaṁ te somyaṁ madhvadhukṣannadribhirnaraḥ I juṣāṇa indra tatpiba II8 II*
*viśvām̐ aryo vipaśchito'ti khyastūyamā gahi I asme dhehi śravo bṛhat II9 II*
*dātā me pṛṣatīnāṁ rājā hiraṇyavīnām I mā devā maghavā riṣat II10 II*
*sahasre pṛṣatīnāmadhiśchandraṁ bṛhatpṛthu I śukraṁ hiraṇyamā dade II11 II*
*napāto durgasya me sahasreṇa surādhasaḥ I śravo deveṣvakrata II12 II*

सा. (Sv.) १४२;

क्व ३स्य वृषभो युवा तुविग्रीवो अनानतः। ब्रह्मा कस्तं सपर्यति ॥८॥

*kva 3sya vṛṣabho yuvā tuvigrīvo anānataḥ I brahmā kastaṁ saparyati II8 II*

सा. (Sv.) १३५४-१३५६

उ त्वा मदन्तु सोमाः कृणुष्व राधो अद्रिवः। अव ब्रह्मद्विषो जहि ॥१॥
पदा पणीनराधसो नि बाधस्व महाँ असि। न हि त्वा कश्च न प्रति ॥२॥
त्वमीशिषे सुतानामिन्द्र त्वमसुतानाम्। त्वं राजा जनानाम् ॥३॥

*u tvā madantu somāḥ kṛṇuṣva rādho adrivaḥ I ava brahmadviṣo jahi II1 II*
*padā paṇīnarādhaso ni bādhasva mahām̐ asi I na hi tvā kaścha na prati II2 II*
*tvamīśiṣe sutānāmindra tvamasutānām I tvaṁ rājā janānām II3 II*

३. देवाः (Devāḥ) - ऋ. (Rv.)८.६३.१२

अस्मे रुद्रा मेहना पर्वतासो वृत्रहत्ये भरहूतौ सजोषाः ।
यः शंसते स्तुवते धायि पज्र इन्द्रज्येष्ठा अस्माँ अवन्तु देवाः ॥१२॥

*asme rudrā mehanā parvatāso vṛtrahatye bharahūtau sajoṣāḥ I*
*yaḥ śaṁsate stuvate dhāyi pajra indrajyeṣṭhā asmām̐ avantu devāḥ II12 II*

४. सोमः (Somaḥ) -ऋ. (Rv.)८.४८.१-१५

स्वादोरभक्षि वयसः सुमेधाः स्वाध्यो वरिवोवित्तरस्य ।
विश्वे यं देवा उत मर्त्यासो मधु ब्रुवन्तो अभि संचरन्ति ॥१॥
अन्तश्च प्रागा अदितिर्भवास्यवयाता हरसो दैव्यस्य ।
इन्दविन्द्रस्य सख्यं जुषाणः श्रौष्टीव धुरमनु राय ऋध्याः ॥२॥
अपाम सोममृता अभूमागन्म ज्योतिरविदाम देवान् ।
किं नूनमस्मान्कृणवदरातिः किमु धूर्तिरमृत मर्त्यस्य ॥३॥
शं नो भव हृद आ पीत इन्दो पितेव सोम सूनवे सुशेवः ।
सखेव सख्य उरुशंस धीरः प्र ण आयुर्जीवसे सोम तारीः ॥४॥
इमे मा पीता यशस उरुष्यवो रथं न गावः समनाह पर्वसु ।
ते मा रक्षन्तु विस्रसश्चरित्रादुत मा स्रामाद्यवयन्त्विन्दवः ॥५॥
अग्निं न मा मथितं सं दिदीपः प्र चक्षय कृणुहि वस्यसो नः ।
अथा हि ते मद आ सोम मन्ये रेवाँ इव प्र चरा पुष्टिमच्छ ॥६॥
इषिरेण ते मनसा सुतस्य भक्षीमहि पित्र्यस्येव रायः ।

सोम राजन् प्र ण आयूंषि तारीरहानीव सूर्यो वासराणि ॥७॥
सोम राजन् मृळया नः स्वस्ति तव स्मसि व्रत्या३ स्तस्य विद्धि ।
अलर्ति दक्ष उत मन्युरिन्दो मा नो अर्यो अनुकामं परा दाः ॥८॥
त्वं हि नस्तन्वः सोम गोपा गात्रेगात्रे निषसत्था नृचक्षाः ।
यत्ते वयं प्रमिनाम व्रतानि स नो मृळ सुषखा देव वस्यः ॥९॥
ऋदूदरेण सख्या सचेय यो मा न रिष्येद्धर्यश्व पीतः ।
अयं यः सोमो न्यधाय्यस्मे तस्मा इन्द्रं प्रतिरमेम्यायुः ॥१०॥
अप त्या अस्थुरनिरा अमीवा निरत्रसन्तमिषीचीरभैषुः ।
आ सोमो अस्माँ अरुहद्विहाया अगन्म यत्र प्रतिरन्त आयुः ॥११॥
यो न इन्दुः पितरो हृत्सु पीतोऽमर्त्यो मर्त्याँ आविवेश ।
तस्मै सोमाय हविषा विधेम मृळीके अस्य सुमतौ स्याम ॥१२॥
त्वं सोम पितृभिः संविदानोऽनु द्यावापृथिवी आ ततन्थ ।
तस्मै त इन्दो हविषा विधेम वयं स्याम पतयो रयीणाम् ॥१३॥
त्रातारो देवा अधि वोचता नो मा नो निद्रा ईशत मोत जल्पिः ।
वयं सोमस्य विश्वह प्रियासः सुवीरासो विदथमा वदेम ॥१४॥
त्वं नः सोम विश्वतो वयोधास्त्वं स्वर्विदा विशा नृचक्षाः ।
त्वं न इन्द ऊतिभिः सजोषाः पाहि पश्चातादुत वा पुरस्तात् ॥१५॥

*svādorabhakṣi vayasaḥ sumedhāḥ svādhyo varivovittarasya ।*
*viśve yaṁ devā uta martyāso madhu bruvanto abhi saṁcharanti ॥1॥*
*antaścha prāgā aditirbhavāsyavayātā haraso daivyasya ।*
*indavindrasya sakhyaṁ juṣāṇaḥ śrauṣṭīva dhuramanu rāya ṛdhyāḥ ॥2॥*
*apāma somamamṛtā abhūmāganma jyotiravidāma devān ।*
*kiṁ nūnamasmānkṛṇavadarātiḥ kimu dhūrtiramṛta martyasya ॥3॥*
*śaṁ no bhava hṛda ā pīta indo piteva soma sūnave suśevaḥ ।*
*sakheva sakhya uruśaṁsa dhīraḥ pra ṇa āyurjīvase soma tārīḥ ॥4॥*
*ime mā pītā yaśasa uruṣyavo rathaṁ na gāvaḥ samanāha parvasu ।*
*te mā rakṣantu visrasaścharitrāduta mā srāmādyavayantvindavaḥ ॥5॥*
*agiṁna na mā mathitaṁ saṁ didīpaḥ pra chakṣaya kṛṇuhi vasyaso naḥ ।*
*athā hi te mada ā soma manye revāṁ iva pra charā puṣṭimachchha ॥6॥*
*iṣireṇa te manasā sutasya bhakṣīmahi pitrayasyeva rāyaḥ ।*
*soma rājan pra ṇa āyūṁṣi tārīrahānīva sūryo vāsarāṇi ॥7॥*
*soma rājan mṛḻayā naḥ svasti tava smasi vratyā3 stasya viddhi ।*
*alarti dakṣa uta manyurindo mā no aryo anukāmaṁ parā dāḥ ॥8॥*
*tvaṁ hi nastanvaḥ soma gopā gātregātre niṣasatthā nṛchakṣāḥ ।*
*yatte vayaṁ pramināma vratāni sa no mṛḻa suṣakhā deva vasyaḥ ॥9॥*
*ṛdūdareṇa sakhyā sacheya yo mā na riṣyeddharyaścha pītaḥ ।*
*ayaṁ yaḥ somo nyadhāyyasme tasmā indraṁ pratiramemyāyuḥ ॥10॥*
*apa tyā asthuranirā amīvā niratrasantamiṣīchīrabhaiṣuḥ ।*
*ā somo asmāṁ aruhadvihāyā aganma yatra pratiranta āyuḥ ॥11॥*
*yo na induḥ pitaro hṛtsu pīto'martyo matṁryā āviveśa ।*
*tasmai somāya haviṣā vidhema mṛḻīke asya sumatau syāma ॥12॥*
*tvaṁ soma pitṛbhiḥ saṁvidāno'nu dyāvāpṛthivī ā tatantha ।*
*tasmai ta indo haviṣā vidhema vayaṁ syāma patayo rayīṇām ॥13॥*
*trātāro devā adhi vochatā no mā no nidrā īśata mota jalpiḥ ।*
*vayaṁ somasya viśvaha priyāsaḥ suvīrāso vidathamā vadema ॥14॥*
*tvaṁ naḥ soma viśvato vayodhāstvaṁ svarvidā viśā nṛchakṣāḥ ।*
*tvaṁ na inda ūtibhiḥ sajoṣāḥ pāhi paśchātāduta vā purastāt ॥15॥*

**३७६. प्रगाथः काण्वः (साग्री. सास्वा. ऋसर्व.८.६४.१); गाधः (सार्षेदी.) (Pragāthaḥ Kāṇvaḥ [Ssb.**

Sas. Rss.8.64.1); Gādhaḥ [SAD.])

१. इन्द्रः (Indraḥ) - सा. (Sv.) १९४

उत्त्वा मन्दन्तु सोमाः कृणुष्व राधो अद्रिवः । अव ब्रह्मद्विषो जहि ॥१॥
*uttvā mandantu somāḥ kṛṇuṣva rādho adrivaḥ / ava brahmadviṣo jahi //1 //*

## ३७७. प्रगाथो घौरः काण्वः (Pragātho Ghauraḥ Kāṇvaḥ)

१. इन्द्रः (Indraḥ) - सा. (Sv.) २४२; ३९१; १३६०-१३६१

सा. (Sv.) २४२

मा चिदन्यद्वि शंसत सखायो मा रिषण्यत ।
इन्द्रमित्स्तोता वृषणं सचा सुते मुहुरुक्था च शंसत ॥१०॥
*mā chidanyadvi śaṁsata sakhāyo mā riṣaṇyata /*
*indramitstotā vṛṣaṇaṁ sachā sute muhurukthā cha śaṁsata //10 //*

सा. (Sv.) ३९१

गृणे तदिन्द्र ते शव उपमां देवतातये । यद्धंसि वृत्रमोजसा शचीपते ॥१॥
*gṛṇe tadindra te śava upamāṁ devatātaye / yaddhaṁsi vṛtramojasā śachīpate //1 //*

सा. (Sv.) १३६०-१३६१

मा चिदन्यद्वि शंसत सखायो मा रिषण्यत ।
इन्द्रमित्स्तोता वृषणं सचा सुते मुहुरुक्था च शंसत ॥१॥
अवक्रक्षिण वृषभं यथा जुवं गां न चर्षणीसहम् ।
विद्वेषणं संवननमुभयंकरं मंहिष्ठमुभयाविनम् ॥२॥
*mā chidanyadvi śaṁsata sakhāyo mā riṣaṇyata /*
*indramitstotā vṛṣaṇaṁ sachā sute muhurukthā cha śaṁsata //1 //*
*avakrakṣiṇa vṛṣabhaṁ yathā juvaṁ gāṁ na charṣaṇīsaham /*
*vidveṣaṇaṁ saṁvananamubhayaṁkaraṁ maṁhiṣṭhamubhayāvinam //2 //*

## ३७८. प्रगाथो घौरः काण्वो वा (Pragātho Ghauraḥ Kāṇvo Vā)

१. इन्द्रः (Indraḥ) - ऋ. (Rv.)८.१.१-२९

मा चिदन्यद्वि शंसत सखायो मा रिषण्यत ।
इन्द्रमित्स्तोता वृषणं सचा सुते मुहुरुक्था च शंसत ॥१॥
अवक्रक्षिणं वृषभं यथाजुरं गां न चर्षणीसहम् ।
विद्वेषणं संवननोभयंकरं मंहिष्ठमुभयाविनम् ॥२॥
यच्चिद्धि त्वा जना इमे नाना हवन्त ऊतये ।
अस्माकं ब्रह्मेदमिन्द्र भूतु तेऽहा विश्वा च वर्धनम् ॥३॥
वि तर्तूर्यन्ते मघवन् विपश्चितोऽर्यो विपो जनानाम् ।
उप क्रमस्व पुरुरूपमा भर वाजं नेदिष्ठमूतये ॥४॥
महे चन त्वामद्रिवः परा शुल्काय देयाम् ।
न सहस्राय नायुताय वज्रिवो न शताय शतामघ ॥५॥
वस्याँ इन्द्रासि मे पितुरुत भ्रातुरभुंजतः ।
माता च मे छदयथः समा वसो वसुत्वनाय राधसे ॥६॥
क्वेयथ कवेदासि पुरुत्रा चिद्धि ते मनः ।
मलर्षि युध्म खजकृत पुरन्दर प्र गायत्रा अगासिषुः ॥७॥
प्रास्मै गायत्रमर्जत वावातुर्यः पुरन्दरः ।
याभिः काण्वस्योप बर्हिरासदं यासद्वज्री भिनत्पुरः ॥८॥
ये ते सन्ति दशग्विनः शतिनो ये सहस्रिणः ।
अश्वासो ये ते वृषणो रघुद्रुवस्तेभिर्नस्तूयमा गहि ॥९॥
आ त्व१द्य सबर्दुघां हुवे गायत्रवेपसम् ।
इन्द्रं धेनुं सुदुघामन्यामिषमुरुधारामरंकृतम् ॥१०॥

यत्तुदत् सूर एतशं वंकू वातस्य पर्णिना ।
वहत् कुत्समार्जुनेयं शतक्रतुः त्सरद् गन्धर्वमस्तृतम् ॥११॥
य ऋते चिदभिश्रिषः पुरा जत्रुभ्य आतृदः ।
संधाता सन्धिं मघवा पुरूवसुरिष्कर्ता विह्रुतंपुनः ॥१२॥
मा भूम निष्ट्याइवेन्द्र त्वदरणा इव ।
वनानि न प्रजहितान्यद्रिवो दुरोषासो अमन्महि ॥१३॥
अमन्महीदनाशवोऽनुग्रासश्च वृत्रहन् ।
सकृत्सु ते महता शूर राधसानु स्तोमं मुदीमहि ॥१४॥
यदि स्तोमं मम श्रवदस्माकमिन्द्रमिन्दवः ।
तिरः पवित्रं ससृवांस आशवो मन्दन्तु तुग्र्यवृधः ॥१५॥
आ त्व१द्य सधस्तुतिं वावातुः सख्युरा गहि ।
उपस्तुतिर्मघोनां प्र त्वावत्वधा ते वश्मि सुष्टुतिम् ॥१६॥
सोता हि सोममद्रिभिरेमेनमप्सु धावत ।
गव्या वस्त्रेव वासयन्त इन्नरो निर्धुक्षन्वक्षणाभ्यः ॥१७॥
अध ज्मो अध वा दिवो बृहतो राचनादधि ।
अया वर्धस्व तन्वा गिरा ममा जाता सुक्रतो पृण ॥१८॥
इन्द्राय सु मदिन्तमं सोमं सोता वरेण्यम् ।
शक्र एणं पीपयद्विश्वया धिया हिन्वानं न वाजयुम् ॥१९॥
मा त्वा सोमस्य गल्दया सदा याचन्नहं गिरा ।
भूर्णिं मृग्रं न सवनेषु चुक्रुधं क ईशानं न याचिषत् ॥२०॥
मदेनेषितं मदमुग्रमुग्रेण शवसा ।
विश्वेषां तरुतारं मदच्युतं मदे हि ष्मा ददाति नः ॥२१॥
शेवारे वार्या पुरु देवो मर्ताय दाशुषे ।
स सुन्वते च स्तुवते च रासते विश्वगूर्तो अरिष्टुतः ॥२२॥
एन्द्र याहि मत्स्व चित्रेण देव राधसा ।
सरा न प्रास्युदरं सपीतिभिरा सोमेभिरुरु स्फिरम् ॥२३॥
आ त्वा सहस्रमा शतं शुक्ता रथे हिरण्यये ।
ब्रह्मयुजो हरय इन्द्र केशिनो वहन्तु सोमपीतये ॥२४॥
आ त्वा रथे हिरण्यये हरी मयूरशेप्या ।
शितिपृष्ठा वहतां मध्वो अन्धसो विवक्षणस्य पीतये ॥२५॥
पिबा त्व१स्य गिर्वणः सुतस्य पूर्वपा इव ।
परिष्कृतस्य रसिन इयमासुतिश्चरुर्मदाय पत्यते ॥२६॥
य एको अस्ति दंसना महाँ उग्रो अभि व्रतैः ।
गमत्स शिप्री न स योषदा गमद्धवं न परि वर्जति ॥२७॥
त्वं पुरं चरिष्ण्वं वधैः शुष्णस्य सं पिणक् ।
त्वं भा अनु चरो अध द्विता यदिन्द्र हव्यो भुवः ॥२८॥
मम त्वा सूर उदिते मम मध्यन्दिने दिवः ।
मम प्रपित्वे अपिशर्वरे वसवा स्तोमासो अवृत्सत ॥२९॥

*mā chidanyadvi śaṁsata sakhāyo mā riṣaṇyata /*
*indramitstotā vṛṣaṇaṁ sachā sute muhurukthā cha śaṁsata //1//*
*avakrakṣiṇaṁ vṛṣabhaṁ yathājuraṁ gāṁ na charṣaṇīsaham /*
*vidveṣaṇaṁ saṁvananobhayaṁkaraṁ maṁhiṣṭhamubhayāvinam //2//*
*yachchiddhi tvā janā ime nānā havanta ūtaye /*
*asmākaṁ brahmedamindra bhūtu te'hā viśvā cha vardhanam //3//*
*vi tartūryante maghavan vipaśchito'ryo vipo janānām /*
*upa kramasva pururūpamā bhara vājaṁ nediṣṭhamūtaye //4//*
*mahe chana tvāmadrivaḥ parā śulkāya deyām /*

*na sahasrāya nāyutāya vajrivo na śatāya śatāmagha //5 //*
*vasyām̐ indrāsi me pituruta bhrāturabhuṁjataḥ /*
*mātā cha me chhachhayathaḥ samā vaseā vasutvanāya rādhase //6 //*
*kveyatha kavedāsi purutrā chiddhi te manaḥ /*
*malarṣi yudhma khajakṛta purandara pra gāyatrā agāsiṣuḥ //7 //*
*prāsmai gāyatramarjata vāvāturyaḥ purandaraḥ /*
*yābhiḥ kāṇvasyopa barhirāsadaṁ yāsdvajrī bhinatpuraḥ //8 //*
*ye te santi daśagvinaḥ śatino ye sahasriṇaḥ /*
*aśvāso ye te vṛṣaṇo raghudruvastebhirnastūyamā gahi //9 //*
*ā tva1dya sabardughāṁ huve gāyatravepasam /*
*indraṁ dhenuṁ sudughāmanyāmiṣamurudhārāmaraṁkṛtam //10 //*
*yattudat sūra etaśaṁ vaṁkū vātasya parṇinā /*
*vahat kutsamārjuneyaṁ śatakratuḥ tsarad gandharvamastṛtam //11 //*
*ya ṛte chidabhiśriṣaḥ purā jatrubhya ātṛdaḥ /*
*saṁdhātā saniṁdha maghavā purūvasuriṣkartā vihrutaṁpunaḥ //12 //*
*mā bhūma niṣṭyāivendra tvadaraṇā iva /*
*vanāni na prajahitānyadrivo duroṣāso amanmahi //13 //*
*amanmahīdanāśavo'nugrāsaścha vṛtrahan /*
*sakṛtsu te mahatā śūra rādhasānu stomaṁ mudīmahi //14 //*
*yadi stomaṁ mama śravadasmākamindramindavaḥ /*
*tiraḥ pavitraṁ sasṛvāṁsa āśavo mandantu tugryavṛdhaḥ //15 //*
*ā tva1dya sadhastutiṁ vāvātuḥ sakhyurā gahi /*
*upastutirmaghonāṁ pra tvāvatvadhā te vaśmi suṣṭutim //16 //*
*sotā hi somamadribhiremenamapsu dhāvata /*
*gavyā vastreva vāsayanta innaro nirdhukṣanvakṣaṇābhyaḥ //17 //*
*adha jmo adha vā divo bṛhato rāchanādadhi /*
*ayā vardhasva tanvā girā mamā jātā sukrato pṛṇa //18 //*
*indrāya su madintamaṁ somaṁ sotā vareṇyam /*
*śakra eṇaṁ pīpayadviśvayā dhiyā hinvānaṁ na vājayum //19 //*
*mā tvā somasya galdayā sadā yāchannahaṁ girā /*
*bhūrṇi mṛgra na savaneṣu chukrudhaṁ ka īśānaṁ na yāchiṣat //20 //*
*madeneṣitaṁ madamugramugreṇa śavasā /*
*viśveṣāṁ tarutāraṁ madachyutaṁ made hi ṣmā dadāti naḥ //21 //*
*śevāre vāryā puru devo martāya dāśuṣe /*
*sa sunvate cha stuvate cha rāsate viśvagūrto ariṣṭutaḥ //22 //*
*endra yāhi matsva chitreṇa deva rādhasā /*
*sarā na prāsyudaraṁ sapītibhirā somebhiruru sphiram //23 //*
*ā tvā sahasramā śataṁ śuktā rathe hiraṇyaye /*
*brahmayujo haraya indra keśino vahantu somapītaye //24 //*
*ā tvā rathe hiraṇyaye harī mayūraśepyā /*
*śitipṛṣṭhā vahatāṁ madhvo andhaso vivakṣaṇasya pītaye //25 //*
*pibā tva1sya girvaṇaḥ sutasya pūrvapā iva /*
*pariṣkṛtasya rasina iyamāsutiścharurmadāya patyate //26 //*
*ya eko asti daṁsanā mahām̐ ugro abhi vrataiḥ /*
*gamatsa śiprī na sa yoṣadā gamaddhavaṁ na pari varjati //27 //*
*tvaṁ puraṁ chariṣṇvaṁ vadhaiḥ śuṣṇasya saṁ piṇak /*
*tvaṁ bhā anu charo adha dvitā yadindra havyo bhuvaḥ //28 //*
*mama tvā sūra udite mama madhyandine divaḥ /*
*mama prapitve apiśarvare vasavā stomāso avṛtsata //29 //*

## ३७९. प्रचेताः (Prachetāḥ)

१. दुःस्वप्नघ्नम् (Duḥsvapnaghnam) - ऋ. (Rv.)१०.१६४.१-५; अ. (Av.) २०.९६.२४

ऋ. (Rv.)१०.१६४.१-५

अपेहि मनसस्पतेऽप क्राम परश्चर। परो निर्ऋत्या आ चक्ष्व बहुधा जीवतो मनः ॥१॥
भद्रं वै वरं वृणते भद्रं युंजन्ति दक्षिणम्। भद्रं वैवस्वते चक्षुर्बहुत्रा जीवतो मनः ॥२॥
यदाशसा निः शसाभिशमोपारिम जाग्रतो यत्स्वपन्तः ।
अग्निर्विश्वान्यप दुष्कृतान्यजुष्टान्यारे अस्मद्दधातु ॥३॥
यदिन्द्र ब्रह्मणस्पतेऽभिद्रोहं चरामसि। प्रचेता न आंगिरसो द्विषतां पात्वंहसः ॥४॥
अजैष्माद्यासनाम चाभूनागसो वयम् ।
जाग्रत्स्वप्नः संकल्पः पापो यं द्विष्मस्तं स ऋच्छतु यो नो द्वेष्टि तमृच्छतु॥५॥

*apehi manasaspate'pa krāma paraśchara |*
*paro nirṛtyā ā chakṣava bahudhā jīvato manaḥ ||1 ||*
*bhadraṁ vai varaṁ vṛṇate bhadraṁ yuṁjanti dakṣiṇam |*
*bhadraṁ vaivasvate chakṣurbahutrā jīvato manaḥ ||2 ||*
*yadāśasā niḥ śasābhiśamopārima jāgrato yatsvapantaḥ |*
*agnirviśvānyapa duṣkṛtānyajuṣṭānyāre asmaddadhātu ||3 ||*
*yadindra brahmaṇaspate'bhidrohaṁ charāmasi |*
*prachetā na āṁgiraso dviṣatāṁ pātvaṁhasaḥ ||4 ||*
*ajaiṣmādyāsanāma chābhūnāgaso vayam |*
*jāgratsvapnaḥ saṁkalpaḥ pāpo yaṁ dviṣmastaṁ sa ṛchchhatu yeā no dveṣṭi tamṛchchhatu ||5 ||*

अ. (Av.) २०.९६.२४

अपेहि मनसस्पते पक्राम परश्चर। परो निर्ऋत्या आ चक्ष्व बहुधा जीवतो मनः ॥२४॥

*apehi manasaspate pakrāma paraśchara |*
*paro nirṛtyā ā chakṣava bahudhā jīvato manaḥ ||24 ||*

## ३८०. प्रजापतिः (Prajāpatiḥ)

१. अग्निः (Agniḥ) - य. (Yv.)३.४; १२.११७; २०.१४; २२; २२.३; १६; १९

य. (Yv.)३.४

उप त्वाग्ने हविषमतीर्घृताचीर्यन्तु हर्यत। जुषस्व समिधो मम ॥४॥

*upa tvāgne haviṣamatīrghṛtāchīryantu haryata | juṣasva samidho mama ||4 ||*

य. (Yv.)१२.११७

अग्निः प्रियेषु धामसु कामो भूतस्य भव्यस्य। सम्राडेको विराजति ॥११७॥

*agniḥ priyeṣu dhāmasu kāmo bhūtasya bhavyasya | samrāḍeko virājati ||117 ||*

य. (Yv.)२०.१४

यद्देवा देवहेडनं देवासश्चकृमा वयम्। अग्निर्मा तस्मादेनसो विश्वान्मुंचत्वं हसः ॥१४॥

*yaddevā devaheḍanaṁ devāsaśchakṛmā vayam | agnirmā tasmādenaso viśvānmuṁchatvaṁ hasaḥ ||14 ||*

य. (Yv.)२०.२२

अपो ऽ अद्यान्वचारिषंरसेन समसृक्ष्महि ।
पयस्वानग्न ऽ आगमं तं मा संसृज वर्चसा प्रजया च धनेन च॥२२॥

*apo ' adyānvachāriṣaṁrasena samasṛkṣamahi |*
*payasvānagna ' āgamaṁ taṁ mā saṁsṛja varchasā prajayā cha dhanena cha ||22 ||*

य. (Yv.)२२.३

अभिधा ऽ असि भुवनमसि यन्तासि धर्त्ता।
स त्वमग्निं वैश्वानरंसप्रथसं गच्छ स्वाहाकृतः ॥३॥

*abhidhā' asi bhuvanamasi yantāsi dharttā |*

*sa tvamagniṁ vaiśvānaraṁsaprathasaṁ gachchha svāhākṛtaḥ //3 //*

य. (Yv.)२२.१६

स हव्यवाडमर्त्य ऽ उशिग्दूतश्चनोहितः । अग्निर्धिया समृण्वति ॥१६ ॥

*sa havyavāḍamartya ' uśigdūtaśchanohitaḥ / agnirdhiyā samṛṇvati //16 //*

य. (Yv.)२२.१९

विभूर्मात्रा प्रभूः पित्राश्वोऽसि हयोऽस्यत्योऽसि मयोऽस्यर्वासि सप्तिरसि वाज्यसि वृषासि नृम्णाऽअसि।
युयुर्नामासि शिशुर्नामास्यादित्यानां पत्वान्विहि देवाऽआशापाला ऽ एतं देवेभ्योऽश्वं मेधाय
प्रोक्षितं रन्तिरिह रमतामिह धृतिरिह स्वधृतिः स्वाहा ॥१९ ॥

*vibhūrmātrā prabhūḥ pitrāśvo'si hayo'syatyo'si mayo'syarvāsi saptirasi vājyasi vṛṣāsi nṛmṇā'asi / yuyurnāmāsi śiśurnāmāsyādityānāṁ patvānvihi devā'āśāpālā ' etaṁ devebhyo'śvaṁ medhāya*
*prokṣitaṁ rantiriha ramatāmiha dhṛtiriha svadhṛtiḥ svāhā //19 //*

२. अग्नि-अब्-बृहस्पतयः (Agni-Ab-Bṛhaspatayaḥ) - य. (Yv.)४.७

आकूत्यै प्रयुजेऽग्नये स्वाहा मेधायै मनसेऽग्नये स्वाहा दीक्षायै तपसेऽग्नये स्वाहा सरस्वत्यै पूष्णेऽग्नये स्वाहा।
आपो दोवीर्बृहतीर्विश्वशम्भुवो द्यावापृथिवी ऽ उरो ऽ अन्तरिक्ष।
बृहस्पतये हविषा विधेम स्वाहा ॥७ ॥

*ākūtyai prayuje'gnaye svāhā medhāyai manase'gnaye svāhā dīkṣāyai tapase'gnaye svāhā sarasvatyai pūṣṇe'gnaye svāhā / āpo dovīrbṛhatīrviśvaśambhuvo dyāvāpṛthivī ' uro ' antarikṣa / bṛhaspataye haviṣā vidhema svāhā //7 //*

३. अग्नि वायुसूर्याः (Agni Vāyusūryāḥ) - य. (Yv.)३.५

भूर्भुवः स्व र्द्यौरिव भूम्ना पृथिवीव वरिम्णा ।
तस्यास्ते पृथिवी देवयजनि पृष्ठेऽग्निमन्नादमन्नाद्यायादधे ॥५ ॥

*bhūrbhuvaḥ sva rdyauriva bhūmnā pṛthivīva varimṇā /*
*tasyāste pṛthivī devayajani pṛṣṭhe'gnimannādamannādyāyādadhe //5 //*

४. अग्नि सूर्यौः (Agni Sūryauḥ) - य. (Yv.)३.९

अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहा सूर्यो ज्योतिर्ज्योतिः सूर्य्यः स्वाहा। अग्निर्वर्च्चो ज्योतिर्वर्च्चः स्वाहा सूर्यो वर्च्चो ज्योतिर्वर्च्चः स्वाहा। ज्योतिः सूर्य्यः सूर्य्यो ज्योतिः स्वाहा ॥९ ॥

*agnirjjyotirjjyotiragniḥ svāhā sūryo jyotirjjyotiḥ sūryyaḥ svāhā / agnirvarchcho jyotirvarchchaḥ svāhā sūryo varchcho jyotirvarchchaḥ svāhā / jyotiḥ sūryyaḥ sūryyo jyotiḥ svāhā //9 //*

५. अग्न्यादयः (Agnyādayaḥ) - य. (Yv.)२२.६; २७; २३.१७; २४.६; ९; १२; १४; १६; २३; ३४; २५.४

य. (Yv.)२२.६

अग्नये स्वाहा सोमाय स्वाहापां मोदाय स्वहा सवित्रे स्वाहा वायवे स्वाहा विष्णवे स्वाहेन्द्राय स्वाहा बृहस्पतये स्वाहा मित्राय स्वाहा वरुणाय स्वाहा ॥६ ॥

*agnaye svāhā somāya svāhāpāṁ modāya svahā savitre svāhā vāyave svāhā viṣṇave svāhendrāya svāhā bṛhaspataye svāhā mitrāya svāhā varuṇāya svāhā //6 //*

य. (Yv.)२२.२७

अग्नये स्वाहा सोमाय स्वाहेन्द्राय स्वाहा पृथिव्यै स्वाहान्तरिक्षाय स्वाहा दिवे स्वाहा दिग्भ्यः
स्वहाशाभ्यः स्वाहोर्व्यै दिशे स्वाहा र्वाच्यै दिशे स्वाहा ॥२७ ॥

*agnaye svāhā somāya svāhendrāya svāhā pṛthivyai svāhāntarikṣāya svāhā dive svāhā digbhyaḥ*
*svahāśābhyaḥ svāhorvyai diśe svāhā rvāchyai diśe svāhā //27 //*

य. (Yv.)२३.१७

अग्निः पशुरासीत्तेनायजन्त स ऽ एतं लोकमजयद्यस्मिन्नग्निः स ते लोको भविष्यति तं जेष्यसिपिबैता ऽ अपः।
वायुः पशुरासीत्तेनायजन्त स ऽ एतं लोकमजयद्यस्मिन्वायुः स ते लोको

भविष्यति तं जेष्यसि पिबैता ऽ अपः । सूर्य्यः पशुरासीत्तेनायजन्त स ऽ एतं
लोकमजयद्यस्मिन्त्सूर्य्यः सते लोको भविष्यति तं जेष्यसि पिबैता ऽ अपः ॥१७॥
*agniḥ paśurāsīttenāyajanta sa ' etaṁ lokamajayadyasminnagniḥ sa te loko bhaviṣyati taṁ jeṣyasipibaitā ' apaḥ | vāyuḥ paśurāsīttenāyajanta sa ' etaṁ lokamajayadyasminvāyuḥ sa te loko*
*bhaviṣyati taṁ jeṣyasi pibaitā ' apaḥ | sūryyaḥ paśurāsīttenāyajanta sa ' etaṁ lokamajayadyasmintsūryyaḥ sate loko bhaviṣyati taṁ jeṣyasi pibaitā ' apaḥ ॥17॥*

य. (Yv.)२४.६
कृष्णग्रीवाऽआग्नेयाः शितिभ्रवो वसूनांरोहिता रुद्राणां श्वेता ऽ अवरोकिण ऽ आदित्यानां नभोरूपाः पार्जन्याः ॥६॥
*kṛṣṇagrīvā'āgneyāḥ śitibhravo vasūnāṁrohitā rudrāṇāṁ śvetā ' avarokiṇa ' ādityānāṁ nabhorūpāḥ pārjanyāḥ ॥6॥*

य. (Yv.)२४.९
कृष्णग्रीवाऽआग्नेया बभ्रवः सौम्याः श्वेता वायव्याऽअविताऽअदित्यै सरूपा
धात्रे वत्सतर्यो देवानां पत्नीभ्यः ॥९॥
*kṛṣṇagrīvā'āgneyā babhravaḥ saumyāḥ śvetā vāyavyā'avitā'adityai sarūpā dhātre vatsataryo devānāṁ patnībhyaḥ ॥9॥*

य. (Yv.)२४.१२
त्र्यवयो गायत्र्यै पंचावयस्त्रिष्टुभे दित्यवाहो जगत्यै त्रिवत्सा ऽ अनुष्टुभे
तुर्यवाह ऽ उष्णिहे ॥१२॥

य. (Yv.)२४.१४
कृष्णग्रीवा ऽ आग्नेया बभ्रवः सौम्या ऽ उपध्वस्ताः सावित्रा वत्सतर्यः सारस्वत्यः श्यामाः पौष्णाः पृश्नयो मारुता बहुरूपा वैश्वदेवा वशा द्यावापृथिवीयाः ॥१४॥
*kṛṣṇagrīvā ' āgneyā babhravaḥ saumyā ' upadhvastāḥ sāvitrā vatsataryaḥ sārasvatyaḥ śyāmāḥ pauṣṇāḥ pṛśnayo mārutā bahurūpā vaiśvadevā vaśā dyāvāpṛthivīyāḥ ॥14॥*

य. (Yv.)२४.१६
अग्नेऽनीकवते प्रथमजानालभते मरुद्भ्यः सान्तपनेभ्यः सवात्यान् मरुद्भ्यो गृहमेधिम्यो बष्किहान् मरुद्भ्यः क्रीडिभ्यः सं सृष्टान् मरुद्भ्यः स्वतवद्भ्योऽनुसृष्टान् ॥१६॥
*agne'nīkavate prathamajānālabhate marudbhyaḥ sāntapanebhyaḥ savātyān marudbhyo gṛhamedhimyo baṣkihān marudbhyaḥ krīḍibhyaḥ saṁ sṛṣṭān marudbhyaḥ svatavadbhyo'nusṛṣṭān ॥16॥*

य. (Yv.)२४.२३
अग्नये कुटरूनालभते वनस्पतिभ्य ऽ उलूकानग्नीषोमाभ्यां चाषानश्विभ्यां मयूरान् मित्रावरुणाभ्यांकपोतान् ॥२३॥
*agnaye kuṭarūnālabhate vanaspatibhya ' ulūkānagnīṣomābhyāṁ chāṣānaśvibhyāṁ mayūrān mitrāvaruṇābhyāṁkapotān ॥23॥*

य. (Yv.)२४.३४
सुपर्णः पार्जन्यऽआतिर्वाहसो दर्विदा ते वायवे बृहस्पतये वाचस्पतये पैंगराजोऽलजऽआन्तरिक्षः
प्लवो मद्गुर्मत्स्यस्ते नदीपतये द्यावापृथिवीयः कूर्मः ॥३४॥
*suparṇaḥ pārjanya'ātirvāhaso darvidā te vāyave bṛhaspataye vāchaspataye paiṁgarājo'laja'āntarikṣaḥ*
*plavo madgurmatsyaste nadīpataye dyāvāpṛthivīyaḥ kūrmaḥ ॥34॥*

य. (Yv.)२५.४
अग्नेः पक्षतिर्वायोर्निपक्षतिरिन्द्रस्य तृतीया सोमस्य चतुर्थ्यदित्यै पंचमीन्द्राण्यै
षष्ठीमरुतांसप्तमी बृहस्पतेरष्टम्यर्यम्णो नवमी धातुर्दशमीन्द्रस्यैकादशी
वरुणस्य द्वादशी यमस्य त्रयोदशी ॥४॥
*agneḥ pakṣatirvāyornipakṣatirindrasya tṛtīyā somasya chaturthyadityai*

*paṁchamīndrāṇyai*
*ṣaṣṭhīmarutāṁsaptamī bṛhaspaterāṣṭamyaryamṇo navamī*
*dhāturdaśamīndrasyaikādaśī*
*varuṇasya dvādaśī yamasya trayodaśī ||4 ||*

६. अतिमृत्युः (Atimṛtyuḥ) - अ. (Av.) ४.३५.१-७

यमोदनं प्रथमजा ऋतस्य प्रजापतिस्तपसा ब्रह्मणेऽपचत् ।
यो लोकानां विधृतिर्नाभिरेषात् तेनौदनेनाति तराणि मृत्युम् ॥१॥
येनातरन् भूतकृतोऽति मुत्युं यमन्वविन्दन् तपसा श्रमेण ।
यं पपाच ब्रह्मणे ब्रह्म पूर्व तेनौदनेनाति तराणि मृत्युम् ॥२॥
यो दाधार पृथिवीं विश्वभोजसं यो अन्तरिक्षमापृणाद् रसेन ।
यो अस्तभ्नाद् दिवमूर्ध्वो महिम्ना तेनौदनेनाति तराणि मृतयुम् ॥३॥
यस्मानमासा निर्मितास्त्रिंशदराः संवत्सरो यस्मान्निर्मितो द्वादशारः ।
अहोरात्रा यं परियन्तो नापुस्तेनौदनेनाति तराणि मृत्युम् ॥४॥
यः प्राणदः प्राणदवान् बभूव यस्मै लोका घृतवन्तः क्षरन्ति ।
ज्योतिष्मतीः प्रदिशो यस्य सर्वास्तेनौदनेनाति तराणि मृत्युम् ॥५॥
यस्मात् पक्वादमृतं सम्बभूव यो गायया अधिपतिर्बभूव ।
यस्मिन् वेदा निहिता विश्वरूपास्तेनौदनेनाति तराणि मृतयुम् ॥६॥
अव बाधे द्विषन्तं देवपीयुं सपत्ना ये मेऽप ते भवन्तु ।
ब्रह्मौदनं विश्वजितं पचामि श्रृण्वन्तु मे श्रद्दधानस्य देवाः ॥७॥

*yamodanaṁ prathamajā ṛtasya prajāpatistapasā brahmaṇe'pachat /*
*yo lokānāṁ vidhṛtirnābhireṣāt tenaudanenāti tarāṇi mṛtyum ||1 ||*
*yenātaran bhūtakṛto'ti mutyuṁ yamanvavindan tapasā śrameṇa /*
*yaṁ papācha brahmaṇe brahma pūrva tenaudanenāti tarāṇi mṛtyum ||2 ||*
*yo dādhāra pṛthivīṁ viśvabhojasaṁ yo antarikṣamāpṛṇād rasena /*
*yo astabhnād divamūrdhvo mahimnā tenaudanenāti tarāṇi mṛtayum ||3 ||*
*yasmānamāsā nirmitāstriṁśadarāḥ saṁvatsaro yasmānnirmito dvādaśāraḥ /*
*ahorātrā yaṁ pariyanto nāpustenaudanenāti tarāṇi mṛtyum ||4 ||*
*yaḥ prāṇadaḥ prāṇadavān babhūva yasmai lokā ghṛtavantaḥ kṣaranti /*
*jyotiṣmatīḥ pradiśo yasya sarvāstenaudanenāti tarāṇi mṛtyum ||5 ||*
*yasmāt pakvādamṛtaṁ sambabhūva yo gāyayā adhipatirbabhūva /*
*yasmin vedā nihitā viśvarūpāstenaudanenāti tarāṇi mṛtayum ||6 ||*
*ava bādhe dviṣantaṁ devapīyuṁ sapatnā ye me'pa te bhavantu /*
*brahmaudanaṁ viśvajitaṁ pachāmi śṛṇvantu me śraddadhānasya devāḥ ||7 ||*

७. अध्यापकः (Adhyāpakaḥ) - य. (Yv.)२३.३९; ४२; २०.१३

य. (Yv.)२३.३९

कस्त्वा छ्यति कस्त्वा विशास्ति कस्ते गात्राणि शम्यति। क ऽ उ ते शमिता कविः ॥३९॥
*kastvā chhyati kastvā viśāsti kaste gātrāṇi śamyati / ka ' u te śamitā kaviḥ ||39 ||*

य. (Yv.)२३.४२

दैव्या ऽ अध्वर्य्यवस्त्वा च्छ्यन्तु वि च शासतु ।
गात्राणि पर्वशस्ते सिमाः कृणवन्तु शम्यन्तीः ॥४२॥
*daivyā ' adhvaryyavastvā chchhyantu vi cha śāsatu /*
*gātrāṇi parvaśaste simāḥ kṛṇavantu śamyantīḥ ||42 ||*

य. (Yv.)२०.१३

लोमानि प्रयतिर्मम त्वङ् म ऽ आनतिरागतिः ।
मां सं म ऽ उपनतिर्वस्वस्थि मज्जा म ऽ आनतिः ॥१३॥
*lomāni prayatirmama tvaṅ ma ' ānatirāgatiḥ /*
*māṁ saṁ ma ' upanatirvasvasthi majjā ma ' ānatiḥ ||13 ||*

८. अन्तरिक्षादयः (Antarikṣādayaḥ) - य. (Yv.)२४.१०

कृष्णा भौमा धम्रा ऽ आन्तरिक्षा बृहन्तो दिव्याः शबला वैद्युताः सिध्मास्तारकाः ॥१०॥

*kṛṣṇā bhaumā dhamrā ' āntarikṣā bṛhanto divyāḥ śabalā vaidyutāḥ sidhmāstārakāḥ* ॥10॥

९. अबोषध्यौ (Aboṣadhyau) - य. (Yv.)४.१

एदमगन्म देवयजनं पृथिव्या यत्र देवासो ऽ अजुषन्त विश्वे ।
ऋक्सामाभ्यांसन्तरन्तो यजुर्भी रायस्पोषेण समिषा मदेम।
इमा ऽ आपः शमु मे सन्तु देवीः। ओषधे त्रायस्व स्वधिते मैनंहिं सीः ॥१॥

*edamaganma devayajanaṁ pṛthivyā yatra devāso ' ajuṣanta viśve* ।
*ṛksāmābhyāṁsantaranto yajurbhī rāyaspoṣeṇa samiṣā madema* ।
*imā ' āpaḥ śamu me santu devīḥ* । *Oṣadhe trāyasva svadhite mainaṁhiṁ sīḥ* ॥1॥

१०. अश्व्यादयः (Aśvyādayaḥ) - य. (Yv.)२४.३; २७.९

य. (Yv.)२४.३

शुद्धबालः सर्वशुद्धवालो मणिवालस्त ऽ आश्विनाः श्येतः श्येताक्षोऽरुणास्ते रुद्राय
पशुपतये कर्णा यामा ऽ अवलिप्ता रौद्रा नभोरूपाः पार्जन्याः ॥३॥

*śuddhabālaḥ sarvaśuddhavālo maṇivālasta ' āśvināḥ śyetaḥ śyetākṣo'ruṇāste rudrāya*
*paśupataye karṇā yāmā ' avaliptā raudrā nabhorūpāḥ pārjanyāḥ* ॥3॥

य. (Yv.)२७.९

अमुत्रभूयादध यद्यमस्य बृहस्पते ऽ अभिशस्तेरमुंचः ।
प्रत्यौहतामश्विना मृत्युमस्माद्देवानामग्ने भिषजा शचीभिः ॥९॥

*amutrabhūyādadha yadyamasya bṛhaspate ' abhiśasteramuṁchaḥ* ।
*pratyauhatāmaśvinā mṛtyumasmāddevānāmagne bhiṣajā śachībhiḥ* ॥9॥

११. अश्विनौ (Aśvinau) - अ. (Av.) २.३०.२

सं चेन्नयाथो अश्विना कामिना सं च वक्षथः। सं वां भगासो अग्मत सं चित्तानि समुव्रता ॥२॥

*saṁ chennayātho aśvinā kāminā saṁ cha vakṣathaḥ* ।
*saṁ vāṁ bhagāso agmata saṁ chittāni samuvratā* ॥2॥

१२. अस्तुतमणिः (Astutamaṇiḥ) - अ. (Av.) १९.४६.१-७

प्रजापतिष्ट्वा बध्नात् प्रथममस्तृतं वीर्याय कम् ।
तत् ते बध्नाम्यायुषे वर्चस ओजसे च बलाय चास्तृतस्त्वाभि रक्षतु ॥१॥
ऊर्ध्वस्तिष्ठतु रक्षन्नप्रमादमस्तृतेमं मा त्वा दभन् पणयो यातुधानाः ।
इन्द्रइव दस्यूनव धूनुष्व पृतन्यतः सर्वांछत्रून् वि षहस्वास्तृतस्त्वाभि रक्षतु ॥२॥
शतं च न प्रहरन्तो निघ्नन्तो न तस्तिरे ।
तस्मिन्निन्द्रः पर्यदत्त चक्षुः प्राणमथो बलमस्तृतस्त्वाभि रक्षतु ॥३॥
इन्द्रस्य त्वा वर्मणा परि धापयामो यो देवानामधिराजो बभूव ।
पुनस्त्वा देवाः प्र णयन्तु सर्वेऽस्तृतस्त्वाभि रक्षतु ॥४॥
अस्मिन् मणावेकशतं वीर्याणि सहस्रं प्राणा अस्मिन्नस्तृते ।
व्याघ्रः शत्रूनभि तिष्ठ सर्वान् यस्त्वा पृतन्यादधरः सो अस्त्वस्तृतस्त्वाभि रक्षतु ॥५॥
घृतादुल्लुप्तो मधुमान् पयस्वान्त्सहस्रप्राणः शतयोनिर्वयोधाः ।
शंभूश्च मयोभूश्चोर्जस्वांश्च पयस्वांश्चास्तृतस्त्वाभि रक्षतु ॥६॥
यथा त्वमुत्तरोऽसो असपत्नः सपत्नहा ।
सजातानामसद् वशी तथा त्वा सविता करदस्तृतस्त्वाभि रक्षतु ॥७॥

*prajāpatiṣṭvā badhnāt prathamamastṛtaṁ vīryāya kam* ।
*tat te badhnāmyāyuṣe varchasa Ojase cha balāya chāstṛtastvābhi rakṣatu* ॥1॥
*ūrdhvastiṣṭhatu rakṣannapramādamastṛtemaṁ mā tvā dabhan paṇayo yātudhānāḥ* ।
*indraiva dasyūnava dhūnuṣva pṛtanyataḥ sarvāṁchhatrūn vi ṣahasvāstṛtastvābhi rakṣatu* ॥2॥

*śataṁ cha na praharanto nighnanto na tastire ।*
*tasminnindraḥ paryadatta chakṣuḥ prāṇamatho balamastṛtastvābhi rakṣatu ॥3 ॥*
*indrasya tvā varmaṇā pari dhāpayāmo yo devānāmadhirājo babhūva ।*
*punastvā devāḥ pra ṇayantu sarve'stṛtastvābhi rakṣatu ॥4 ॥*
*asmin maṇāvekaśataṁ vīryāṇi sahasraṁ prāṇā asminnastṛte ।*
*vyāghraḥ śatrūnabhi tiṣṭha sarvān yastvā pṛtanyādadharaḥ so astvastṛtastvābhi rakṣatu ॥5 ॥*
*ghṛtādullupto madhumān payasvāntsahasraprāṇaḥ śatayonirvayodhāḥ ।*
*śaṁbhūścha mayobhūścherjasvāṁścha payasvāṁśchāstṛtastvābhi rakṣatu ॥6 ॥*
*yathā tvamuttaro'so asapatnaḥ sapatnahā ।*
*sajātānāmasad vaśī tathā tvā savitā karadastṛtastvābhi rakṣatu ॥7 ॥*

१३. आपः (Āpaḥ) - य. (Yv.)४.२; २०.१९-२०

य. (Yv.)४.२

आपो अस्मान्मातरः शुन्धयन्तु घृतेन नो घृतप्वः पुनन्तु। विश्वंहि रिप्रं
प्रवहन्ति देवीरुदिदिाभ्यः शुचिरा पूत एमि। दीक्षात्पसोस्तनूरसि तां त्वा
शिवांशग्मां परि दधे भद्रं वर्ण पुष्यन् ॥२ ॥
*āpo asmānmātaraḥ śundhayantu ghṛtena no ghṛtapvaḥ punantu । viśvaṁhi ripraṁ*
*pravahanti devīrudidiābhyaḥ śuchirā pūta emi । dīkṣātpasostanūrasi tāṁ tvā*
*śivāṁśagmāṁ pari dadhe bhadraṁ varṇa puṣyan ॥2 ॥*

य. (Yv.)२०.१९-२०

समुद्रे ते हृदयमप्स्वन्तः सं त्वा शिन्त्वोषधीरुतापः।
सुमित्रिया न आप ओषधयः सन्तु दुर्मित्रियास्तस्मै सन्तु योऽस्मान्द्वेष्टि यं च वयं द्विष्मः ॥१९ ॥
द्रुपदादिव मुमुचानः स्विन्नः स्नातो मलादिव। पूतं पवित्रेणेवाज्यमापः शुन्धन्तु मैनसः ॥२० ॥
*samudre te hṛdayamapsvantaḥ saṁ tvā śintvoṣadhīrutāpaḥ ।*
*sumitriyā na āpa Oṣadhayaḥ santu durmitriyāstasmai santu yo'smāndveṣṭi yaṁ cha vayaṁ dviṣmaḥ ॥19 ॥*
*drupadādiva mumuchānaḥ svinnaḥ snāto malādiva ।*
*pūtaṁ pavitreṇevājyamāpaḥ śundhantu mainasaḥ ॥20 ॥*

१४. आयुरादयः (Āyurādayaḥ) - य. (Yv.)२२.३३

आयुर्योन कल्पतांस्वाहा प्राणो योन कल्पतांस्वाहाऽपानो योन कल्तांस्वाहा व्यानो योन कल्पतां स्वाहो दानो योन कल्पतां स्वाहा समानो योन कल्पतांस्वाहा चक्षुर्योन कल्पतांस्वाहा श्रोत्रं योन कल्पतां स्वाहा वाग्योन कल्पतांस्वाहा मनो योन कल्पतांस्वाहाऽऽत्मा योन कल्तां स्वाहा ब्रह्मा योन कल्पतांस्वाहा ज्योतिर्योन कल्पतांस्वाहा स्वर्योन कल्पतां स्वाहा पृष्ठे योन कल्पतांस्वाहा याो योन कल्पतां स्वाहा ॥३३ ॥
*āyuryona kalpatāṁsvāhā prāṇo yona kalpatāṁsvāhā'pāno yona kaltāṁsvāhā vyāno yona kalpatāṁ svāho dāno yona kalpatāṁ svāhā samāno yona kalpatāṁsvāhā chakṣuryona kalpatāṁsvāhā śrotraṁ yona kalpatāṁ svāhā vāgyona kalpatāṁsvāhā mano yona kalpatāṁsvāhā''tmā yona kaltāṁ svāhā brahmā yona kalpatāṁsvāhā jyotiryona kalpatāṁsvāhā svaryona kalpatāṁ svāhā pṛṣṭhe yona kalpatāṁsvāhā yāo yona kalpatāṁ svāhā ॥33 ॥*

१५. इन्द्रः (Indraḥ) - ऋ. (Rv.)३.३८.१-१०; य. (Yv.)२०.२८; ३१; २३.७; २७.२२ ; २८.९; ११

ऋ. (Rv.)३.३८.१-१०

अभि तष्टेव दीधया मनीषामत्यो न वाजी सुधुरो जिहानः ।
अभि प्रियाणि मर्मृशत्पराणि कवीँरिच्छामि संदृशे सुमेधाः ॥१ ॥
इनोत पृच्छ जनिमा कवीनां मनोधृतः सुकृतस्तक्षत द्याम् ।
इमा उ ते प्रण्यो३ वर्धमानामनोवाता अध नु धर्मणि ग्मन् ॥२ ॥
नि षीमिदत्र गुह्या दधाना उत क्षत्राय रोदसी समंजन् ।
सं मात्राभिर्ममिरे येमुरुर्वी अन्तर्मही समृते धायसे धुः ॥३ ॥

आतिष्ठन्तं परि विश्वे अभूषिंछ्रयो वसानश्चरति स्वरोचिः ।
महत्तद्वृष्णो असुरस्य नामा विश्वरूपो अमृतानि तस्थो ॥४॥
असूत पूर्वो वृषभो ज्यायानिमा अस्य शुरुधः सन्ति पूर्वीः ।
दिवो नपाता विदथस्य धीभिः क्षत्रं राजाना प्रदिवो दधाथे ॥५॥
त्रीणि राजाना विदथे पुरूणि परि विश्वानि भूषथः सदांसि ।
अपश्यमत्र मनसा जगन्वान्व्रते गन्धर्वाँ अपि वायुकेशान् ॥६॥
तदिन्नवस्य वृषभस्य धेनोरा नामभिर्ममिरे सक्म्यं गोः ।
अन्यदन्यदसुर्य१ वसाना नि मायिनो ममिरे रूपमस्मिन् ॥७॥
तदिन्नवस्य सवितुर्नकिर्मे हिरण्ययीममतिं यामशिश्रेत् ।
आ सुष्टुती रोदसी विश्वमिन्वे अपीव योषा जनिमानि वव्रे ॥८॥
युवं प्रत्नस्य साधथो महो यद्दैवी स्वस्तिः परि णः स्यातम् ।
गोपाजिह्वस्य तस्थुषो विरूपा विश्वे पश्यन्ति मायिनः कृतानि ॥९॥
शुनं हुवेम मघवानमिन्द्रमस्मिन्भरे नृतमं वाजसातौ ।
शृण्बन्तमुग्रमूतये समत्सु घ्नन्तं वृत्राणि संजितं धनानाम् ॥१०॥

*abhi taṣṭeva dīdhayā manīṣāmatyo na vājī sudhuro jihānaḥ /*
*abhi priyāṇi marmṛśatparāṇi kavīm̐richchhāmi saṁdṛśe sumedhāḥ //1 //*
*inota pṛchchha janimā kavīnāṁ manodhṛtaḥ sukṛtastakṣata dyām /*
*imā u te praṇyo3 vardhamānāmanovātā adha nu dharmaṇi gman //2 //*
*ni ṣīmidatra guhyā dadhānā uta kṣatrāya rodasī samaṁjan /*
*saṁ mātrābhirmamire yemururvī antarmahī samṛte dhāyase dhuḥ //3 //*
*ātiṣṭhantaṁ pari viśve abhūṣiṁchhrayo vasānaścharati svarochiḥ /*
*mahattadvṛṣṇo asurasya nāmā viśvarūpo amṛtāni tastho //4 //*
*asūta pūrvo vṛṣabho jyāyānimā asya śurudhaḥ santi pūrvīḥ /*
*divo napātā vidathasya dhībhiḥ kṣatraṁ rājānā pradivo dadhāthe //5 //*
*trīṇi rājānā vidathe purūṇi pari viśvāni bhūṣathaḥ sadāṁsi /*
*apaśyamatra manasā jaganvānvrate gandharvām̐ api vāyukeśān //6 //*
*tadinnvasya vṛṣabhasya dhenorā nāmabhirmamire sakmyaṁ goḥ /*
*anyadanyadasurya1 vasānā ni māyino mamire rūpamasmin //7 //*
*tadinnvasya saviturnakirme hiraṇyayīmamatiṁ yāmaśiśret /*
*ā suṣṭutī rodasī viśvaminve apīva yoṣā janimāni vavre //8 //*
*yuvaṁ pratnasya sādhatho maho yaddaivī svastiḥ pari ṇaḥ syātam /*
*gopājihnasya tasthuṣo virūpā viśve paśyanti māyinaḥ kṛtāni //9 //*
*śunaṁ huvema maghavānamindramasminbhare nṛtamaṁ vājasātau /*
*śṛṇbantamugramūtaye samatsu ghnantaṁ vṛtrāṇi saṁjitaṁ dhanānām //10 //*

य. (Yv.)२०.२८

सिंचन्ति परि षिंचन्त्युत्सिंचन्ति पुनन्ति च। सुरायै बभ्रवै मदे किन्त्वो वदति किन्त्वः ॥२८॥

*siṁchanti pari ṣiṁchantyutsiṁchanti punanti cha / surāyai babhrvai made kintvo vadati kintvaḥ //28 //*

य. (Yv.)२०.३१

अध्वर्यो ऽ अद्रिभिः सुतं सोमं पवित्र ऽ आ नय। पुनीहीन्द्राय पातवे ॥३१॥

*adhvaryo ' adribhiḥ sutaṁ somaṁ pavitra ' ā naya / punīhīndrāya pātave //31 //*

य. (Yv.)२३.७

यद्वातो ऽ अपो ऽ अगनीगन्प्रियामिन्द्रस्य तन्वम्।
एतंस्तोतरनेन पथा पुनरश्वमावर्त्तयासि नः ॥७॥

*yadvāto ' apo ' aganīganpriyāmindrasya tanvam /*
*etaṁstotaranena pathā punaraśvamāvarttayāsi naḥ //7 //*

य. (Yv.)२७.२२

अग्ने स्वाहा कृणुहि जातवेद ऽ इन्द्राय हव्यम्। विश्वे देवा हविरिदं जुषन्ताम् ॥२२॥

*agne svāhā kṛṇuhi jātaveda ' indrāya havyam । viśve devā haviridaṁ juṣantām ॥22॥*

य. (Yv.)२८.९

होता यक्षत्त्वष्टारमिन्द्रं देवं भिषजंसुयजं घृताश्रियम् ।

पुरुरूपंसुरेतसं मघोनमिन्द्राय त्वष्टा दधदिन्द्रियाणि वेत्ववाज्यस्य होतर्यज ॥९॥

*hotā yakṣattvaṣṭāramindraṁ devaṁ bhiṣajaṁsuyajaṁ ghṛtāśriyam ।*

*pururūpaṁsuretasaṁ maghonamindrāya tvaṣṭā dadhadindriyāṇi vetvavājyasya hotaryaja ॥9॥*

य. (Yv.)२८.११

होता यक्षदिन्द्रंस्वाहाज्यस्य स्वाहा मेदसः स्वाहा स्तोकानांस्वाहा

स्वाहाकृतीनां स्वाहा हव्यसूक्तीनाम्।

स्वाहा देवा ऽ आज्यपा जुषाणा ऽ इन्द्र ऽ आज्यस्य व्यन्तु होतर्यज ॥११॥

*hotā yakṣadindraṁsvāhājyasya svāhā medasaḥ svāhā stokānāṁsvāhā*

*svāhākṛtīnāṁ svāhā havyasūktīnām ।*

*svāhā devā ' ājyapā juṣāṇā ' indra ' ājyasya vyantu hotaryaja ॥11॥*

१६. इन्द्रादयः (Indrādayaḥ) - य. (Yv.)२२.५; २४.७ , १५ , २५.३ , ५ , ८

य. (Yv.)२२.५

प्रजापतये त्वा जुष्टं प्रोक्षामीन्द्राग्निभ्यां त्वा जुष्टं प्रोक्षामि वायवे त्वा जुष्टं प्रोक्षामि

विश्वेभ्यस्त्वा देवेभ्यो जुष्टं प्रोक्षामि सर्वेभ्यस्त्वा देवेभ्यो जुष्टं प्रोक्षामि। यो अर्वन्तं

जिघांं सति तमभ्यमीति वरुणः। परो मर्तः परः श्वा ॥५॥

*prajāpataye tvā juṣṭaṁ prokṣāmīndrāgnibhyāṁ tvā juṣṭaṁ prokṣāmi vāyave tvā juṣṭaṁ prokṣāmi*

*viśvebhyastvā devebhyo juṣṭaṁ prokṣāmi sarvebhyastvā devebhyo juṣṭaṁ prokṣāmi । yo arvantaṁ*

*jighāṁ sati tamabhyamīti varuṇaḥ । paro martaḥ paraḥ śvā ॥5॥*

य. (Yv.)२४.७

उन्नतऽऋषभो वामनस्तऽ ऐन्द्रावैष्णवा ऽ उन्नतः शितिबाहुः शितिपृष्ठस्त ऽ ऐन्द्राबार्हस्पत्याः

शुकरूपा वाजिनाः कल्माषा ऽ आग्निमारुताः श्यामाः पौष्णाः ॥७॥

*unnata'ṛṣabho vāmanasta' aindrāvaiṣṇavā ' unnataḥ śitibāhuḥ śitipṛṣṭhasta ' aindrābārhaspatyāḥ*

*śukarūpā vājināḥ kalmāṣā ' āgnimārutāḥ śyāmāḥ pauṣṇāḥ ॥7॥*

य. (Yv.)२४.१५

उक्ताः संचरा ऽ एता ऽ ऐन्द्राग्नाः कृष्णा वारुणाः पृश्नयो मारुताः कायास्तूपराः ॥१५॥

*uktāḥ saṁcharā ' etā ' aindrāgnāḥ kṛṣṇā vāruṇāḥ pṛśnayo mārutāḥ kāyāstūparāḥ ॥15॥*

य. (Yv.)२५.३

मशकान् केशैरिन्द्रंस्वपसा वहेन बृहम्पतिंशकुनिसादेन कूर्म्मांछफैराक्रमणं स्थूराभ्यामृक्षलाभिः कपिंजलांजवं जङ्घाभ्यामध्वानं बाहुभ्यां जाम्बीलेनारण्यमग्निमतिरुग्भ्यां पूषणं दोर्भ्यामश्विना वं साभ्यांरुद्रंरोराभ्याम् ॥३॥

*maśakān keśairindraṁsvapasā vahena bṛhampatiṁśakunisādena*

*kūrmmāṁchhaphairākramaṇaṁ sthūrābhyāmṛkṣalābhiḥ kapiṁjalāṁjavaṁ*

*jaṅghābhyāmadhvānaṁ bāhubhyāṁ jāmbīlenāraṇyamagnimatirugbhyāṁ pūṣaṇaṁ*

*dorbhyāmaśvinā vaṁ sābhyāṁrudraṁrorābhyām ॥3॥*

य. (Yv.)२५.५

इन्द्राग्न्योः पक्षतिः सरस्वत्यै निपक्षतिर्मित्रस्य तृतीयापां चतुर्थी निर्ऋत्यै पंचम्यग्नीषोमयोः षष्ठी सर्पाणांसप्तमी

विष्णोरष्टमी पूष्णो नवमी त्वष्टुर्दशमीन्द्रस्यैकादशी
वरुणस्य द्वादशी यम्यै त्रयोदशी द्यावापृथिव्योर्दक्षिणं पार्श्व विश्वेषां देवानामुत्तरम् ॥५॥
*indrāgnyoḥ pakṣatiḥ sarasvatyai nipakṣatirmitrasya tṛtīyāpāṁ chaturthī nirṛtyai paṁchamyagnīṣomayoḥ ṣaṣṭhī sarpāṇāṁsaptamī viṣṇoraṣṭamī pūṣṇo navamī tvaṣṭurdaśamīndrasyaikādaśī*
*varuṇasya dvādaśī yamyai trayodaśī dyāvāpṛthivyordakṣiṇaṁ pārśva viśveṣāṁ devānāmuttaram //5 //*

य. (Yv.)२५.८

इन्द्रस्य क्रोडोऽदित्यै पाजस्यं दिशां जत्रवोऽदित्यै भसज्जीमूतान् हृदयौपशेनान्तरिक्षं पुरीतता नभ उदर्येण चक्रवाकौ मतस्नाभ्यां दिवं वृक्काभ्यां गिरीन् प्लाशिभिरुपलान् प्लीह्ना वल्मीकान्
क्लोमभिर्ग्लौभिर्गुल्मान् हिराभिः स्रवन्तीर्ह्रदान् कुक्षिभ्यांसमुद्रमुदरेण वैश्वानरं भस्मना ॥८॥
*indrasya kroḍo'dityai pājasyaṁ diśāṁ jatravo'dityai bhasajjīmūtān hṛdayaupaśenāntarikṣaṁ purītatā nabha udaryeṇa chakravākau matasnābhyāṁ divaṁ vṛkkābhyāṁ girīn plāśibhirupalān plīhnā valmīkān*
*klomabhirglaubhirgulmān hirābhiḥ sravantīrhradān kukṣibhyāṁsamudramudareṇa vaiśvānaraṁ bhasmanā //8 //*

१७. इन्द्राग्नादयः (Indrāgnādayaḥ) - य. (Yv.)२४.८; १७

य. (Yv.)२४.८

एता ऐन्द्राग्ना द्विरूपा अग्नीषोमीया वामना अनड्वाह आग्नावैष्णवा वशा
मैत्रावरुण्योऽन्यत एन्यो मैत्र्यः ॥८॥
*etā aindrāgnā dvirūpā agnīṣomīyā vāmanā anaḍvāha āgnāvaiṣṇavā vaśā*
*maitrāvaruṇyo'nyata enyo maitrayaḥ //8 //*

य. (Yv.)२४.१७

उक्ताः संचरा एता ऐन्द्राग्नाः प्राश्रृंगाः माहेन्द्रा बहुरूपा वैश्वकर्मणाः ॥१७॥
*uktāḥ saṁcharā etā aindrāgnāḥ prāśṛṁgāḥ māhendrā bahurūpā vaiśvakarmaṇāḥ //17 //*

१८. ईश्वरः (Īśvaraḥ) - य. (Yv.)२३.५० , ६४-६५ , २५.११-१२

य. (Yv.)२३.५०

अपि तेषु त्रिषु पदेष्वस्मि येषु विश्वं भुवनमा विवेश। सद्यः पर्येमि पृथिवीमुत
द्यामेकेनांगेनः दिवोअस्य पृष्ठम् ॥५०॥
*api teṣu triṣu padeṣvasmi yeṣu viśvaṁ bhuvanamā viveśa / sadyaḥ paryemi pṛthivīmuta*
*dyāmekenāṁgenaḥ divoasya pṛṣṭham //50 //*

य. (Yv.)२३.६४-६५

होता यात्प्रजापतिंसोमस्य महिम्नः । जुषतां पिबतु सोमंहोतर्यज ॥६४॥
प्रजापते न त्वदेतान्यन्यो विश्वा रूपाणि परि ता बभूव ।
यत्कामास्ते जुहुमस्तन्नोऽ अस्तु वयंस्याम पतयो रयीणाम् ॥६५॥
*hotā yātprajāpatiṁsomasya mahimnaḥ / juṣatāṁ pibatu somaṁhotaryaja //64 //*
*prajāpate na tvadetānyanyo viśvā rūpāṇi pari tā babhūva /*
*yatkāmāste juhumastanno' astu vayaṁsyāma patayo rayīṇām //65 //*

य. (Yv.)२५.११-१२

यः प्राणतो निमिषतो महित्वैक ऽ इद्राजा जगतो बभूव ।
य ऽ ईशे ऽ अस्य द्विपदश्चतुष्पदः कस्मै देवाय हविषा विधेम ॥११॥
यस्येमे हिमवन्तो महित्वा यस्य समुद्रंरसया सहाहुः ।
यस्येमाः प्रदिशो यस्य बाहू कस्मै देवाय हविषा विधेम ॥१२॥
*yaḥ prāṇato nimiṣato mahitvaika ' idrājā jagato babhūva /*

*ya ' īśe ' asya dvipadaśchatuṣpadaḥ kasmai devāya haviṣā vidhema ॥11 ॥*
*yasyeme himavanto mahitvā yasya samudraṁrasayā sahāhuḥ ।*
*yasyemāḥ pradiśo yasya bāhū kasmai devāya haviṣā vidhema ॥12 ॥*

१९. उपदेशकाः (Upadeśakāḥ) - य. (Yv.)२०.११

त्रया देवा ऽ एकादश त्रयस्त्रिं शाः सुराधसः ।
बृहस्पतिपुरोहिता देवस्य सवितुः सवे। देवा देवैरवन्तु मा ॥११ ॥
*trayā devā ' ekādaśa trayastriṁ śāḥ surādhasaḥ ।*
*bṛhaspatipurohitā devasya savituḥ save । devā devairavantu mā ॥11 ॥*

२०. ओषधिः (Oṣadhiḥ) - अ. (Av.) २.३०.३-४

यत् सुपर्णा विवक्षवो अनमीवा विवक्षवः। तत्र मे गच्छताद्धवं शल्यइव कुल्मलं यथा ॥३ ॥
यदन्तरं तद् बाह्यं यद् बाह्यं तदन्तरम्। कन्यानां विश्वरूपाणां मनो गृभायौषधे ॥४ ॥
*yat suparṇā vivakṣavo anamīvā vivakṣavaḥ । tatra me gachchhatāddhavaṁ śalyaiva kulmalaṁ yathā ॥3 ॥*
*yadantaraṁ tad bāhyaṁ yad bāhyaṁ tadantaram । kanyānāṁ viśvarūpāṇāṁ mano gṛbhāyauṣadhe ॥4 ॥*

२१. गणपतिः (Gaṇapatiḥ) - य. (Yv.)२३.१९

गणानां त्वा गणपतिंहवामहे प्रियाणां त्वा प्रियपतिंहवामहे निधीनां त्वा निधि पतिंहवामहे वसो मम।
आहमजानि गर्भधमा त्वमजासि गर्भधम् ॥१९ ॥
*gaṇānāṁ tvā gaṇapatiṁhavāmahe priyāṇāṁ tvā priyapatiṁhavāmahe nidhīnāṁ tvā nidhi patiṁhavāmahe vaso mama । āhamajāni garbhadhamā tvamajāsi garbhadham ॥19 ॥*

२२. जलादयः (Jalādayaḥ) - य. (Yv.)२२.२५

अद्भ्यः स्वाहा वार्भ्यः स्वाहोदकाय स्वाहा तिष्ठन्तीभ्यः स्वाहा स्रवन्तीभ्यः स्वाहा स्यन्दमानाभ्यः
स्वाहा कूप्याभ्यः स्वाहा सूद्याभ्यः स्वाहा धार्याभ्यः स्वाहार्णवाय स्वाहा समुद्राय स्वाहा
सरिराय स्वाहा ॥२५ ॥
*adbhyaḥ svāhā vārbhyaḥ svāhodakāya svāhā tiṣṭhantībhyaḥ svāhā sravantībhyaḥ svāhā syandamānābhyaḥ svāhā kūpyābhyaḥ svāhā sūdyābhyaḥ svāhā dhāryābhyaḥ svāhārṇavāya svāhā samudrāya svāhā sarirāya svāhā ॥25 ॥*

२३. जिज्ञासुः (Jijñāsuḥ) - य. (Yv.)२३.९ , ११ , ४५ , ४७

य. (Yv.)२३.९

कः स्विदेकाकी चरति क ऽ उ स्विज्जायते पुनः ।
किं स्विद्धिमस्य भेषजं किम्वावपनं महत् ॥९ ॥
*kaḥ svidekākī charati ka ' u svijjāyate punaḥ ।*
*kiṁ sviddhimasya bheṣajaṁ kimvāvapanaṁ mahat ॥9 ॥*

य. (Yv.)२३.११

का स्विदासीत्पूर्वाचित्तिः किंस्विदासीद् बृहद्वयः ।
का स्विदासीत्पिलिप्पिला का स्विदासीत्पिशंगिला ॥११ ॥
*kā svidāsītpūrvāchittiḥ kiṁsvidāsīd bṛhadvayaḥ ।*
*kā svidāsītpilippilā kā svidāsītpiśaṁgilā ॥11 ॥*

य. (Yv.)२३.४५

कः स्विदेकाकी चरति क ऽ उ स्विज्जायते पुनः ।
किं स्विद्धिमस्य भेषजं किम्वावपनं महत् ॥४५ ॥
kaḥ svidekākī charati ka ' u svijjāyate punaḥ ।
kiṁ sviddhimasya bheṣajaṁ kimvāvapanaṁ mahat ॥45 ॥

य. (Yv.)२३.४७

किं स्वित्सूर्य्यसमं ज्योतिः किंसमुद्रसमंसरः ।

किं स्वित्पृथिव्यै वर्षीयः कस्य मात्रा न विद्यते ॥४७॥
*kiṁ svitsūryyasamaṁ jyotiḥ kiṁsamudrasamaṁsaraḥ /*
*kiṁ svitpṛthivyai varṣīyaḥ kasya mātrā na vidyate //47//*

२४. दम्पती (Dampatī) - अ. (Av.) २.३०.५
एयमगन् पतिकामा जनिकामोऽहमागमम्। अश्वः कनिक्रदद् यथा भगेनाहं सहागमम् ॥५॥
*eyamagan patikāmā janikāmo'hamāgamam / aśvaḥ kanikradad yathā bhagenāhaṁ sahāgamam //5//*

२५. दिशः (Diśaḥ) - य. (Yv.)२२.२४
प्राच्यै दिशे स्वहार्वाच्यै दिशे स्वाहा दक्षिणायै दिशे स्वाहार्वाच्यै दिशे स्वाहा प्रतीच्यै दिशे स्वाहार्वाच्यै दिशे स्वाहोदीच्यै दिशे स्वाहार्वाच्यै दिशे स्वाहोर्ध्वायै दिशे स्वाहार्वाच्यै दिशे स्वाहावाच्यै दिशे स्वाहार्वाच्यै दिशे स्वाहा ॥२४॥
*prāchyai diśe svahārvāchyai diśe svāhā dakṣiṇāyai diśe svāhārvāchyai diśe svāhā pratīchyai diśe svāhārvāchyai diśe svāhodīchyai diśe svāhārvāchyai diśe svāhordhvāyai diśe svāhārvāchyai diśe svāhāvāchyai diśe svāhārvāchyai diśe svāhā //24//*

२६. द्यावापृथिव्यादयो मन्त्रोक्ताः (Dyāvāpṛthivyādayo Mantroktāḥ) - अ. (Av.) ७.१०२.१
नमस्कृतय द्यावापृथिवीभ्यामन्तरिक्षाय मृत्यवे। मेक्षाम्यूर्ध्वस्तिष्ठन् मा मा हिंसिषुरीश्वराः ॥१॥
*namaskṛtaya dyāvāpṛthivībhyāmantarikṣāya mṛtyave / mekṣāmyūrdhvastiṣṭhan mā mā hiṁsiṣurīśvarāḥ //1//*

२७. द्यौरित्यादयः (Dyaurityādayaḥ) - य. (Yv.)२५.२३
अदितिर्द्यौरदितिरन्तरिक्षमदितिर्माता स पिता स पुत्रः ।
विश्वे देवा ऽ अदितिः पंच जना ऽ अदितिर्जातमदितिर्जनित्वम् ॥२३॥
*aditirdyauraditirantarikṣamaditirmātā sa pitā sa putraḥ /*
*viśve devā ' aditiḥ paṁcha janā ' aditirjātamaditirjanitvam //23//*

२८. नक्षत्रादयः (Nakṣatrādayaḥ) - य. (Yv.)२२.२८
नक्षत्रेभ्यः स्वाहा नक्षत्रियेभ्यः स्वाहाहोरात्रेभ्यः स्वाहार्धमासेभ्यः स्वाहा मासेभ्यः स्वाह ऽ ऋतुभ्यः स्वाहार्त्तवेभ्यः स्वाहा संवत्सराय स्वाहा द्यावापृथिवीभ्यांस्वाहा चन्द्राय स्वाहा सूर्याय स्वाहा रश्मिभ्यः स्वाहा वसुभ्यः स्वाहा रुद्रेभ्यः स्वाहादित्येभ्यः स्वाहा मरुद्भ्यः स्वाहा विश्वेभ्यो देवेभ्यः स्वाहा मूलेभ्यः स्वाहा शाखाभ्यः स्वाहा वनस्पतिभ्यः स्वाहा पुष्पेभ्यः स्वाहा
*फलेभ्यः स्वाहौषधीभ्यः स्वाहा ॥२८॥*
*nakṣatrebhyaḥ svāhā nakṣatriyebhyaḥ svāhāhorātrebhyaḥ svāhārdhamāsebhyaḥ svāhā māsebhyaḥ svāha ' ṛtubhyaḥ svāhārttavebhyaḥ svāhā saṁvatsarāya svāhā dyāvāpṛthivībhyāṁsvāhā chandrāya svāhā sūryāya svāhā raśmibhyaḥ svāhā vasubhyaḥ svāhā rudrebhyaḥ svāhādityebhyaḥ svāhā marudbhyaḥ svāhā viśvebhyo devebhyaḥ svāhā mūlebhyaḥ svāhā śākhābhyaḥ svāhā vanaspatibhyaḥ svāhā puṣpebhyaḥ svāhā phalebhyaḥ svāhauṣadhībhyaḥ svāhā //28//*

२९. न्यायधीशः (Nyāyadhīśaḥ) - य. (Yv.)२३.२१
उत्सक्थ्या ऽ अव गुदं धेहि समिञ्ज चारया वृषन्। य स्त्रीणां जीवभोजनः ॥२१॥
*utsakthyā ' ava gudaṁ dhehi samiñja chārayā vṛṣan / ya strīṇāṁ jīvabhojanaḥ //21//*

३०. परमात्मा (Paramātmā) - य. (Yv.)४.४; २५.१३
य. (Yv.)४.४
चित्पतिर्मा पुनातु वाक्पतिर्मा पुनातु देवो मा सविता पुनात्वच्छिद्रेण पवित्रेण सूर्य्यस्य रश्मिभिः।तस्य ते पवित्रपते पवित्रपूतस्य यत्कामः पुने तच्छकेयम् ॥४॥
*chitpatirmā punātu vākpatirmā punātu devo mā savitā punātvachchhidreṇa pavitreṇa sūryyasya raśmibhiḥ /tasya te pavitrapate pavitrapūtasya yatkāmaḥ pune tachchhakeyam //4//*

य. (Yv.)२५.१३

य ऽ आत्मदा बलदा यस्य विश्व ऽ उपासते प्रशिषं यस्य देवाः ।
यस्य च्छायामृतं यस्य मृत्युः कस्मै देवाय हविषा विधेम ॥१३॥
*ya ' ātmadā baladā yasya viśva ' upāsate praśiṣaṁ yasya devāḥ /*
*yasya chchhāyāmṛtaṁ yasya mṛtyuḥ kasmai devāya haviṣā vidhema //13 //*

३१. परमेश्वरः (Parameśvaraḥ) - य. (Yv.)२३.१-५; ५२

य. (Yv.)२३.१-५

हिरण्यगर्भः समवर्त्तताग्रे भूतस्य जातः पतिरेक ऽ आसीत् ।
स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम ॥१॥
उपयामग्रहीतोऽसि प्रजापतेय त्वा जुष्टं गृह्णाम्येष ते योनिः सूर्य्यस्ते महिमा ।
यस्तेऽहन्त्सवंत्सरे महिमा सम्बभूव यस्ते वायावन्तरिक्षे महिमा सम्बभूव यस्ते दिवि सूर्य्ये महिमासम्बभूव तस्मै ते महिम्ने प्रजापतये स्वाहा देवेभ्यः ॥२॥
यः प्राणतो निमिषतो महित्वैक ऽ इद्राजा जगतो बभूव ।
य ऽ ईशे ऽ अस्य द्विपदश्चतुष्पदः कस्मै देवाय हविषा विधेम ॥३॥
उपयामगृहीतोऽसि प्रजापतये त्वा जुष्टं गृह्णाम्येष ते योनिश्चन्द्रमास्ते महिमा ।
यस्ते रात्रो संवत्सरे महिमा सम्बभूव यस्ते पृथिव्यामग्नौ महिमा सम्बभूव यस्ते नक्षत्रेषु चन्द्रमसिमहिमा सम्बभूव तस्मै ते महिम्ने प्रजापतये देवेभ्यः स्वाहा ॥४॥
युंजन्ति ब्रध्नमरुषं चरन्तं परि तस्थुषः। रोचन्ते रोचना दिवि ॥५॥
*hiraṇyagarbhaḥ samavarttatāgre bhūtasya jātaḥ patireka ' āsīt /*
*sa dādhāra pṛthivīṁ dyāmutemāṁ kasmai devāya haviṣā vidhema //1 //*
*upayāmagrahīto'si prajāpateya tvā juṣṭaṁ gṛhṇāmyeṣa te yoniḥ sūryyaste mahimā /*
*yaste'hantsavaṁtsare mahimā sambabhūva yaste vāyāvantarikṣe mahimā sambabhūva yaste divi sūryye mahimāsambabhūva tasmai te mahimne prajāpataye svāhā devebhyaḥ //2 //*
*yaḥ prāṇato nimiṣato mahitvaika ' idrājā jagato babhūva /*
*ya ' īśe ' asya dvipadaśchatuṣpadaḥ kasmai devāya haviṣā vidhema //3 //*
*upayāmagṛhīto'si prajāpataye tvā juṣṭaṁ gṛhṇāmyeṣa te yoniśchandramāste mahimā / yaste rātro saṁvatsare mahimā sambabhūva yaste pṛthivyāmagnau mahimā sambabhūva yaste nakṣatreṣu chandramasimahimā sambabhūva tasmai te mahimne prajāpataye devebhyaḥ svāhā //4 // yuṁjanti bradhnamaruṣaṁ charantaṁ pari tasthuṣaḥ / rochante rochanā divi //5 //*

य. (Yv.)२३.५२

पंचस्वन्तः पुरुष ऽ आ विवेश तान्यन्तः पुरुषे ऽ अर्पितानि ।
एतत्त्वात्र प्रतिमन्वानोऽ अस्मि न मायया भवस्युत्तरो मत् ॥५२॥
*paṁchasvantaḥ puruṣa ' ā viveśa tānyantaḥ puruṣe ' arpitāni /*
*etattvātra pratimanvāno' asmi na māyayā bhavasyuttaro mat //52 //*

३२. पितरः (Pitaraḥ) - य. (Yv.)१९.३६; २४.१८

य. (Yv.)१९.३६

पितृभ्यः स्वधायिभ्यः स्वधा नमः पितामहेभ्यः स्वधायिभ्यः स्वधा नमः प्रपितामहेभ्यः स्वधायिभ्यः स्वधा नमः। अक्षन् पितरोऽमीमदन्त पितरोऽतीतृप्यन्त पितरः पितरः शुन्धध्वम् ॥३६॥
*pitṛbhyaḥ svadhāyibhyaḥ svadhā namaḥ pitāmahebhyaḥ svadhāyibhyaḥ svadhā namaḥ prapitāmahebhyaḥ svadhāyibhyaḥ svadhā namaḥ / akṣan pitaro'mīmadanta pitaro'tītṛṣpanta pitaraḥ pitaraḥ śundhadhvam //36 //*

य. (Yv.)२४.१८

ध्रूमा बभ्रुनीकाशाः पितृणांसोमवतां बभ्रवो धूम्रनीकाशाः पितृणां बर्हिषदां
कृष्णा बभ्रुनीकाशाः पितृणामग्निष्वात्तानां कृष्णाः पृषन्तस्त्रैयम्बकाः ॥१८॥
*dhrūmā babhunīkāśāḥ pitṝṇāṁsomavatāṁ babhravo dhūmranīkāśāḥ pitṝṇāṁ*

*barhiṣadāṁ kṛṣṇā babhunīkāśāḥ pitṝṇāmagniṣvāttānāṁ kṛṣṇāḥ pṛṣantastraiyambakāḥ ॥18॥*

३३. पुरुषेश्वरः (Puruṣeśvaraḥ) - य. (Yv.)२३.५१

केष्वन्तः पुरुष ऽ आ विवेश कान्यन्तः पुरुषे अर्पितानि ।
एतद् ब्रह्मन्नुप वल्हामसि त्वा किंस्विन्नः प्रति वोचास्यत्र ॥५१॥
*keṣvantaḥ puruṣa ' ā viveśa kānyantaḥ puruṣe arpitāni ।*
*etad brahmannupa valhāmasi tvā kiṁsvinnaḥ prati vochāsyatra ॥51॥*

३४. पूषादयः (Pūṣādayaḥ) - य. (Yv.)२५.७ , ९

य. (Yv.)२५.७

पूषणं वनिष्ठनान्धाहीन्त्स्थूलगुदया सर्पान् गुदाभिर्विह्नुत ऽ आन्त्रैरपो वस्तिना वृषणमाण्डाभ्यां वाजिनंशेपेन प्रजांरेतसा चाषान् पित्तेन प्रदरान् पायुना कूश्मांछकपिण्डैः ॥७॥
*pūṣaṇaṁ vaniṣṭhanāndhāhīntsthūlagudayā sarpān gudābhirvihnuta ' āntrairapo vastinā vṛṣaṇamāṇḍābhyāṁ vājinaṁśepena prajāṁretasā chāṣān pittena pradarān pāyunā kūśmāṁchhakapiṇḍaiḥ ॥7॥*

य. (Yv.)२५.९

विधृति नाभ्या घृतंरसेनापो यूष्णा मरीची र्विप्रुड्भिर्नीहारमूष्मणा
शीनं वसया प्रुष्वा ऽ अश्रुभिर्ह्रादुनीर्दूषीकाभिरस्ना रक्षां सि चित्राण्यंगैर्नक्षत्राणि रूपेण पृथिवीं त्वचा जुम्बकाय स्वाहा ॥९॥
*vidhṛti nābhyā ghṛtaṁrasenāpo yūṣṇā marīchī rvipruḍbhirnīhāramūṣmaṇā*
*śīnaṁ vasayā pruṣvā ' aśrubhirhrādunīrdūṣīkābhirasnā rakṣāṁ si*
*chitrāṇyaṁgairnakṣatrāṇi rūpeṇa pṛthivīṁ tvachā jumbakāya svāhā ॥9॥*

३५. प्रजाः (Prajāḥ) - य. (Yv.)२३.३४, ३५, ४०, ४१

य. (Yv.)२३.३४-३५

द्विपदा याश्चतुष्पदास्त्रिपदा याश्च षट्पदाः ।
विच्छन्दा याश्च सच्छन्दाः सूचीभिः शम्यन्तु त्वा ॥३४॥
महानम्न्यो रेवत्यो विश्वा आशाः प्रभूवरीः । मैघीर्विद्युतो वाचः सूचीभिः शम्यन्तु त्वा ॥३५॥
*dvipadā yāśchatuṣpadāstripadā yāścha ṣaṭpadāḥ ।*
*vichchhandā yāścha sachchhandāḥ sūchībhiḥ śamyantu tvā ॥34॥*
*mahānamnyo revatyo viśvā āśāḥ prabhūvarīḥ । maighīrvidyuto vāchaḥ sūchībhiḥ śamyantu tvā ॥35॥*

य. (Yv.)२३.४०-४१

ऋतवस्त ऽ ऋतुथा पर्व शमितारो वि शासतु ।
संवत्सरस्यतेजसा शमीभिः शम्यन्तु त्वा ॥४०॥
अर्द्धमासाः परूं षि ते मासा ऽ आ च्छ्यन्तु शम्यन्तः ।
अहोरात्राणि मरुतो विलिष्टंसूदयन्तु ते ॥४१॥
*ṛtavasta ' ṛtuthā parva śamitāro vi śāsatu ।*
*saṁvatsarasyatejasā śamībhiḥ śamyantu tvā ॥40॥*
*arddhumāsāḥ parūṁ ṣi te māsā ' ā chchhyantu śamyantaḥ ।*
*ahorātrāṇi maruto viliṣṭaṁsūdayantu te ॥41॥*

३६. प्रजापतिः (Prajāpatiḥ) - य. (Yv.)२३.२८; २४.१

य. (Yv.)२३.२८

यदस्या अं हुभेद्याः कृधु स्थूलमुपातसत् । मुष्काविदस्या एजतो गोशफे शकुलाविव ॥२८॥
*yadasyā aṁ hubhedyāḥ kṛdhu sthūlamupātasat । muṣkāvidasyā ejato gośaphe śakulāviva ॥28॥*

य. (Yv.)२४.१

अश्वस्तूपरो गोमृगस्ते प्राजापःयाः कृष्णग्रीव आग्नेयो रराटे पुरस्तात्सारस्वती मेष्यधस्ताद्धराश्विनावधोरामौ बाह्वोः

सौमापोष्णः श्यामो नाभ्यांसौर्ययामौ श्वेतश्च कृष्णश्च पार्श्वयोस्त्वाष्ट्रौ
लोमशसक्थौ सक्थ्योर्वायव्यः श्वेतः पुच्छ इन्द्राय स्वपस्याय वेहद्वेष्णवो वामनः ॥१ ॥
*aśvastūparo gomṛgaste prājāpaḥyāḥ kṛṣṇagrīva āgneyo rarāṭe purastātsārasvatī meṣyadhastāddharāśvināvadhorāmau bāhnoḥ saumāpoṣṇaḥ śyāmo nābhyāṁsauryayāmau śvetaścha kṛṣṇaścha pārśvayostvāṣṭrau lomaśasakthau sakthyorvāyavyaḥ śvetaḥ puchchha indrāya svapasyāya vehadveṣṇavo vāmanaḥ ॥1 ॥*

३७. प्रजापत्यादयः (Prajāpatyādayaḥ) - य. (Yv.)२ २.२०; २३.२९; ३१

य. (Yv.)२२.२०

काय स्वाहा कस्मै स्वाहा कतमस्मै स्वाहा स्वाहाऽऽधिमाधीताय स्वाहा मनः प्रजापतये स्वाहा
चित्तं विाातायादित्यै स्वाहा ऽदित्यै मह्यै स्वाहाऽदित्यै सुमृडीकायै स्वाहा सरस्वत्यै स्वाहा
सरस्वत्यै पावकायै स्वाहा सरस्वत्यै बृहत्यै स्वाहा पूष्णे स्वाहा पूष्णे प्रपथ्याय स्वाहा।
पूष्णे नरन्धिपाय स्वाहा त्वष्ट्रे स्वाहा त्वष्ट्रे तुरीपाय स्वाहा त्वष्ट्रे पुरुरूपाय स्वाहा विष्णवे
स्वाहा विष्णवे निभूयपाय स्वाहा विष्णवे शिपिविष्टाय स्वाहा ॥२० ॥
*kāya svāhā kasmai svāhā katamasmai svāhā svāhā''dhimādhītāya svāhā manaḥ prajāpataye svāhā chittaṁ viāātāyādityai svāhā 'dityai mahyai svāhā'dityai sumṛdīkāyai svāhā sarasvatyai svāhā sarasvatyai pāvakāyai svāhā sarasvatyai bṛhatyai svāhā pūṣṇe svāhā pūṣṇe prapathyāya svāhā । pūṣṇe narandhipāya svāhā tvaṣṭre svāhā tvaṣṭre turīpāya svāhā tvaṣṭre pururūpāya svāhā viṣṇave svāhā viṣṇave nibhūyapāya svāhā viṣṇave śipiviṣṭāya svāhā ॥20 ॥*

य. (Yv.)२३.२९

यद्देवासो ललामगुं प्र विष्टीमिनमाविषुः। सक्थ्ना देदिश्यते नारी सत्यस्याक्षिभूवो यथा ॥२९॥
*yaddevāso lalāmaguṁ pra viṣṭīminamāviṣuḥ । sakthnā dediśyate nārī satyasyākṣibhūvo yathā ॥29 ॥*

य. (Yv.)२३.३१

यद्धरिणो यवमत्ति न पुष्टं बहु मन्यते। शूद्रो यदर्यायै जारो न पोषमनु मन्यते ॥३१॥
*yaddhariṇo yavamatti na puṣṭaṁ bahu manyate । śūdro yadaryāyai jāro na poṣamanu manyate ॥31 ॥*

३८. प्रयत्नवन्तो जीवादयः (Prayatnavanto Jīvādayaḥ) - य. (Yv.)२२.८

यते स्वाहा धावते स्वाहोद्द्रावाय स्वाहोद्द्रुताय स्वाहा शूकाराय स्वाहा शूकृताय स्वाहा निषण्याय स्वाहोत्थिताय
स्वाहा जवाय स्वाहा बलाय स्वाहा विवर्तमानाय स्वाहा विवृत्ताय स्वाहा
विधून्वानाय स्वाहा विधूताय स्वाहा शूश्रूषमाणाय स्वाहा श्रृण्वते स्वाहेक्षमाणाय स्वाहेक्षिताय
स्वाहा वीक्षिताय स्वाहा निमेषाय स्वाहा यदत्ति तस्मै स्वाहा यत् पिबति तस्मै स्वाहा
यन्मूत्रं करोति तस्मै स्वाहा कुर्वते स्वाहा कृताय स्वाहा ॥८॥
*yate svāhā dhāvate svāhoddrāvāya svāhoddrutāya svāhā śūkārāya svāhā śūkṛtāya svāhā niṣaṇyāya svāhotthitāya svāhā javāya svāhā balāya svāhā vivartamānāya svāhā vivṛttāya svāhā vidhūnvānāya svāhā vidhūtāya svāhā śūśrūṣamāṇāya svāhā śṛṇvate svāhekṣamāṇāya svāhekṣitāya svāhā vīkṣitāya svāhā nimeṣāya svāhā yadatti tasmai svāhā yat pibati tasmai svāhā yanmūtraṁ karoti tasmai svāhā kurvate svāhā kṛtāya svāhā ॥8 ॥*

३९. प्रष्ट्रसमाधातारौ (Praṣṭrasamādhātārau) - य. (Yv.)२३.४९

पृच्छामि त्वा चितये देवसख यदि त्वमत्र मनसा जगन्थ।
येषु विष्णुस्त्रिषु पदेष्वेष्टस्तेषु विश्व भुवनमा विवेशाँ३ऽ ॥४९॥
*pṛchchhāmi tvā chitaye devasakha yadi tvamatra manasā jagantha ।*
*yeṣu viṣṇustriṣu padeṣveṣṭasteṣu viśva bhuvanamā viveśāṁ̐3' ॥49 ॥*

४०. प्रष्ठा (Prasthā) - य. (Yv.)२३.५३ , ५५ , ५७ , ५९ ,६१

य. (Yv.)२३.५३

का स्विदासीत्पूर्वचित्तिः किं स्विदासीद् बृहद्वयः ।
का स्विदासीत्पिलिप्पिला का स्विदासीत्पिशंगिला ॥५३ ॥
*kā svidāsītpūrvachittiḥ kiṁ svidāsīd bṛhadvayaḥ /*
*kā svidāsītpilippilā kā svidāsītpiśaṁgilā //53 //*

य. (Yv.)२३.५५

का ऽ ईमरे पिशंगिला का ऽ ई कुरुपिशंगिला ।
क ऽ ईमास्कन्दमर्षति क ऽ ई पन्थां वि सर्पति ॥५५ ॥
*kā ' īmare piśaṁgilā kā ' ī kurupiśaṁgilā /*
*ka ' īmāskandamarṣati ka ' ī panthāṁ vi sarpati //55 //*

य. (Yv.)२३.५७

कत्यस्य विष्ठा कत्यक्षराणि कति होमासः कतिधा समिद्धः ।
यास्य त्वा विदथा पृच्छमत्र कति होतार ऽ ऋतुशो यजन्ति ॥५७ ॥
*katyasya viṣṭhā katyakṣarāṇi kati homāsaḥ katidhā samiddhaḥ /*
*yāsya tvā vidathā pṛchchhamatra kati hotāra ' ṛtuśo yajanti //57 //*

य. (Yv.)२३.५९

को अस्य वेद भुवनस्य नाभिं को द्यावापृथिवी अन्तरिक्षम् ।
कः सूर्यस्य वेद बृहतो जनित्रं को वेद चन्द्रमसं यतोजा ॥५९ ॥
*ko asya veda bhuvanasya nābhiṁ ko dyāvāpṛthivī antarikṣam /*
*kaḥ sūryasya veda bṛhato janitraṁ ko veda chandramasaṁ yatojā //59 //*

य. (Yv.)२३.६१

पृच्छामि त्वा परमन्तं पृथिव्याः पृच्छामि यत्र भुवनस्य नाभिः ।
पृच्छामि त्वा वृष्णो अश्वस्य रेतः पृच्छामि वाचः परमं व्योम ॥६१ ॥
*pṛchchhāmi tvā paramantaṁ pṛthivyāḥ pṛchchhāmi yatra bhuvanasya nābhiḥ /*
*pṛchchhāmi tvā vṛṣṇo aśvasya retaḥ pṛchchhāmi vāchaḥ paramaṁ vyoma //61 //*

४१. प्राणादयः (Prāṇādayaḥ) - य. (Yv.)२२.७ , २३; २३.१८; २५.२

य. (Yv.)२२.७

हिंकाराय स्वाहा हिंककृताय स्वाहा क्रन्दते स्वाहाऽवक्रन्दाय स्वाहा प्रोथते स्वाहा प्रप्रोथाय
स्वाहा गन्धाय स्वाहा घ्रातायस्वाहा निविष्टाय स्वाहोपविष्टाय स्वाहा सन्दिताय स्वाहा वल्गते स्वाहासीनाय
स्वाहा शयानाय स्वाहा स्वपते स्वहा जाग्रतें स्वाहा कूजते स्वाहा प्रबुद्धाय स्वाहा
विजृम्भमाणाय स्वाहा विचृताय स्वाहा सं हानाय स्वहोपस्थिताय स्वाहाऽयनाय स्वाहा
प्रायणाय स्वाहा ॥७ ॥
*hiṁkārāya svāhā hiṁkakṛtāya svāhā krandate svāhā'vakrandāya svāhā prothate svāhā*
*praprothāya svāhā gandhāya svāhā ghrātāyasvāhā niviṣṭāya svāhopaviṣṭāya svāhā*
*sanditāya svāhā valgate svāhāsīnāya svāhā śayānāya svāhā svapate svahā jāgrateṁ*
*svāhā kūjate svāhā prabuddhāya svāhā vijṛmbhamāṇāya svāhā vichṛtāya svāhā saṁ*
*hānāya svahopasthitāya svāhā'yanāya svāhā prāyaṇāya svāhā //7 //*

य. (Yv.)२२.२३

प्राणाय स्वाहापानाय स्वाहा व्यानाय स्वाहा चक्षुषे स्वाहा श्रोत्राय स्वाहा
वाचे स्वाहा मनसे स्वाहा ॥२३ ॥
*prāṇāya svāhāpānāya svāhā vyānāya svāhā chakṣuṣe svāhā śrotrāya svāhā*
*vāche svāhā manase svāhā //23 //*

य. (Yv.)२३.१८

प्राणाय स्वाहापानाय स्वाहा व्यानाय स्वाहा ।
अम्बे ऽ अम्बिकेऽम्बालिके न मा नयति कश्चन ।

समस्त्यश्वकः सुभद्रिकां काम्पीलवासिनीम् ॥१८॥
*prāṇāya svāhāpānāya svāhā vyānāya svāhā /*
*ambe ' ambike'mbālike na mā nayati kaśchana /*
*samastyaśvakaḥ subhadrikāṁ kāmpīlavāsinīm //18 //*

य. (Yv.)२५.२

वातं प्राणेनापानेन नासिके ऽ उपयाममधरेणौष्ठेन सदुत्तरेण प्रकाशेनान्तरमनूकाशेन बाह्यं निवेष्यं मूर्ध्ना स्तनयित्नुं निर्बाधेनाशनिं मस्तिष्केण विद्युतं कनीनकाभ्यां कर्णाभ्यां श्रोत्रं श्रोत्राभ्यां कर्णौ तेदनीमधरकण्ठेनापः शुष्ककण्ठेन चित्तं मन्याभिरदितिंशीर्ष्णा निर्ऋतिं निर्जर्जल्येन शीर्ष्णा संक्रोशैः प्राणान् रेष्माणं स्तुपेन ॥२॥
*vātaṁ prāṇenāpānena nāsike ' upayāmamadhareṇauṣṭhena saduttareṇa prakāśenāntaramanūkāśena bāhyaṁ niveṣyaṁ mūrdhnā stanayitnuṁ nirbādhenāśaniṁ mastiṣkeṇa vidyutaṁ kanīnakābhyāṁ karṇābhyāṁ śrotraṁ śrotrābhyāṁ karṇau tedanīmadharakaṇṭhenāpaḥ śuṣkakaṇṭhena chittaṁ manyābhiraditiṁśīrṣṇā nirṛtiṁ nirjarjalyena śīrṣṇā saṁkrośaiḥ prāṇān reṣmāṇaṁ stupena //2 //*

४२. बृहस्पतिः (Bṛhaspatiḥ) - य. (Yv.)२८.१०

होता यक्षद्वनस्पतिंशमितारंशतक्रतुं धियो जोष्टारमिन्द्रियम्।
मध्वा समंजन् पाथिभिः सुगेभिः स्वदाति यां मधुना घृतेन वेत्वाज्यस्य होतर्यज ॥१०॥
*hotā yakṣadvanaspatiṁśamitāraṁśatakratuṁ dhiyo joṣṭāramindriyam /*
*madhvā samaṁjan pāthibhiḥ sugebhiḥ svadāti yāṁ madhunā ghṛtena vetvājyasya hotaryaja //10 //*

४३. ब्रह्मा (Brahmā) - य. (Yv.)२३.१४

सं शितो रश्मिना रथः सं शितो रश्मिना हयः।
संशितो अप्स्वप्सुजा ब्रह्मा सोमपुरोगवः ॥१४॥
*saṁ śito raśminā rathaḥ saṁ śito raśminā hayaḥ /*
*saṁśito apsvapsujā brahmā somapurogavaḥ //14 //*

४४. ब्रह्मादयः (Brahmādayaḥ) - य. (Yv.)२३.१३; ४८

य. (Yv.)२३.१३

वायुष्ट्वा पचतैरवत्वसितग्रीवश्छागैर्न्यग्राधश्चमसैः शल्मलिर्वृद्ध्या ।
एष स्य राथ्यो वृषा पड्भिश्चतुर्भिरेदगन्ब्रह्माकृष्णश्च नोऽवतु नमोऽग्नये ॥१३॥
*vāyuṣṭvā pachatairavatvasitagrīvaśchhāgairnyagrādhaśchamasaiḥ śalmalirvṛddhyā /*
*eṣa sya rāthyo vṛṣā paḍbhiśchaturbhiredaganbrahmākṛṣṇaścha no'vatu namo'gnaye //13 //*

य. (Yv.)२३.४८

ब्रह्म सूर्यसमं ज्योतिर्द्यौः समुद्रसमंसरः ।
इन्द्रः पृथिव्यै वर्षीयान् गोस्तु मात्रा न विद्यते ॥४८॥
*brahma sūryasamaṁ jyotirdyauḥ samudrasamaṁsaraḥ /*
*indraḥ pṛthivyai varṣīyān gostu mātrā na vidyate //48 //*

४५. भूमिः (Bhūmiḥ) - य. (Yv.)२३.२४-२५

माता च ते पिता च तेऽग्रं वृक्षस्य रोहतः। प्रतिलामीति ते पिता गभे मुष्टिमतं सयत् ॥२४॥
माता च ते पिता च तेऽग्रे वृक्षस्य क्रीडतः। विवक्षतऽइव ते मुखं ब्रह्मन्मा त्वं वदो बहु ॥२५।
*mātā cha te pitā cha te'graṁ vṛkṣasya rohataḥ / pratilāmīti te pitā gabhe muṣṭimataṁ sayat //24 //*
*mātā cha te pitā cha te'gre vṛkṣasya krīḍataḥ / vivakṣata'iva te mukhaṁ brahmanmā tvaṁ vado bahu //25 /*

४६. भूम्यादयः (Bhūmyādayaḥ) - य. (Yv.)२३.२६

ऊर्ध्वामेनामुच्छ्रापय गिरौ भारंहरन्निव। अथास्यै मध्यमेधतांशीते वाते पुनन्निव ॥२६॥

*ūrdhvāmenāmuchchhrāpaya girau bhāraṁharanniva / athāsyai madhyamedhatāṁśīte vāte punanniva //26 //*

४७. मनः (Manaḥ) - अ. (Av.) २.३०.१

यथेदं भूम्या अधि तृणं वातो मथायति ।
एवा मथ्नामि ते मनो यथा मां कामिन्यसो यथा मन्नापगा असः ॥१॥
*yathedaṁ bhūmyā adhi tṛṇaṁ vāto mathāyati /*
*evā mathnāmi te mano yathā māṁ kāminyaso yathā mannāpagā asaḥ //1 //*

४८. मन्त्रोक्ता (Mantroktā) - अ. (Av.) ६.११.३

प्रजापतिरनुमतिः सिनीवाल्यचीक्लृपत्। स्त्रैषूयमन्यत्र दधत् पुमांसमु दधदिह ॥३॥
*prajāpatiranumatiḥ sinīvālyachīklṛpat / straiṣūyamanyatra dadhat pumāṁsamu dadhadiha //3 //*

४९. मरुतः (Marutaḥ) - य. (Yv.)३.४४-४५

प्रघासिनो हवामहे मरुतश्च रिशादसः। करम्भेण सजोषसः ॥४४॥
यद् ग्रामे यदरणये यत् सभायां यदिन्द्रिये। यदेनश्चकृमा वयमिदं तदवयजामहे स्वाहा ॥४५॥
*praghāsino havāmahe marutaścha riśādasaḥ / karambheṇa sajoṣasaḥ //44 //*
*yad grāme yadaraṇaye yat sabhāyāṁ yadindriye / yadenaśchakṛmā vayamidaṁ tadavayajāmahe svāhā //45 //*

५०. मारुतादयः (Mārutādayaḥ) - य. (Yv.)२४.४; २५.६

य. (Yv.)२४.४

पृश्निस्तिरश्चीनपृश्निरूर्ध्वपृश्निस्ते मारुताः फल्गूर्लोहितोर्णी पलक्षी ताः सारस्वत्यः प्लीहाकर्णः
शुणठाकर्णोऽध्यालोहकर्णस्ते त्वाष्ट्राः कृष्णग्रीवः शितिकक्षोऽञ्जिसक्थस्तऽऐन्द्राग्नाः
कृष्णाञ्जिरल्पाञ्जिर्महाञ्जिस्त ऽ उषस्या ॥४॥
*pṛśnistiraśchīnapṛśnirūrdhvapṛśniste mārutāḥ phalgūrlohitorṇī palakṣī tāḥ sārasvatyaḥ plīhākarṇaḥ*
*śuṇaṭhākarṇo'dhyālohakarṇaste tvāṣṭrāḥ kṛṣṇagrīvaḥ*
*śitikakṣo'ñjisakthasta'aindrāgnāḥ*
*kṛṣṇāñjiralpāñjirmahāñjista ' uṣasyā //4 //*

य. (Yv.)२५.६

मरुतांस्कन्धा विश्वेषां देवानां प्रथमा कीकसा रुद्राणां द्वितीयादित्यानां
तृतीया वायोः पुच्छमग्नीषोमयोर्भासदौ क्रुंचौ श्रोणिभ्यामिन्द्राबृहस्पती ऽ ऊरुभ्यां
मित्रावरुणावल्गाभ्यामाक्रमणंस्थूराभ्यां बलं कुष्ठाभ्याम् ॥६॥
*marutāṁskandhā viśveṣāṁ devānāṁ prathamā kīkasā rudrāṇāṁ dvitīyādityānāṁ*
*tṛtīyā vāyoḥ puchchhamagnīṣomayorbhāsadau kruṁchau śroṇibhyāmindrābṛhaspatī ' ūrubhyāṁ*
*mitrāvaruṇāvalgābhyāmākramaṇaṁsthūrābhyāṁ balaṁ kuṣṭhābhyām //6 //*

५१. मासाः (Māsāḥ) - य. (Yv.)२२.३१

मधवे स्वाहा माधवाय स्वाहा शुक्राय स्वाहा शुचये स्वाहा नभसे स्वाहा नभस्याय स्वाहोषाय
स्वाहोर्जाय स्वाहा सहसे स्वाहा सहस्याय स्वाहा तपसे स्वाहा तपस्याय
स्वाहां हसस्पतये स्वाहा ॥३१॥
*madhave svāhā mādhavāya svāhā śukrāya svāhā śuchaye svāhā nabhase svāhā nabhasyāya svāhoṣāya svāhorjāya svāhā sahase svāhā sahasyāya svāhā tapase svāhā tapasyāya svāhāṁ hasaspataye svāhā //31 //*

५२. मित्रादयः (Mitrādayaḥ) - य. (Yv.)२३.३३

गायत्री त्रिष्टुब्जगत्यनुष्टुप्पङ्क्त्या सह। बृहत्युष्णिहा ककुप्सूचीभिः शम्यन्तु तवा ॥३३॥
*gāyatrī triṣṭubjagatyanuṣṭuppaṅktyā saha /*
*bṛhatyuṣṇihā kakupsūchībhiḥ śamyantu tavā //33 //*

५३. मेघः (Meghaḥ) - य. (Yv.)४.३

महीनां पयोऽसि वर्च्चोदा ऽ असि वर्च्चो मे देहि।
वृत्रस्यासि कनीनकश्चक्षुर्दा ऽ असि चक्षुर्मे देहि ॥३ ॥
*mahīnāṁ payo'si varchchodā ' asi varchcho me dehi ।*
*vṛtrasyāsi kanīnakaśchakṣurdā ' asi chakṣurme dehi ॥3 ॥*

५४. याः (Yāḥ) - य. (Yv.)४.५ , ६; २२.३४; २५.१४ , २७

य. (Yv.)४.५-६

आ वो देवास ऽ ईमहे वामं प्रयत्यध्वरे। आ वो देवास ऽ आशिषो यियासो हवामहे ॥५॥
स्वाहा यां मनसः स्वाहोरोरन्तरिक्षात् स्वाहा द्यावापृथिवीभ्यां स्वाहा वातादारभे स्वाहा ॥६॥
*ā vo devāsa ' īmahe vāmaṁ prayatyadhvare । ā vo devāsa ' āśiṣo yiāyāso havāmahe ॥5 ॥ svāhā yāṁ manasaḥ svāhororantarikṣāt svāhā dyāvāpṛthivībhyāṁ svāhā vātādārabhe svāhā ॥6 ॥*

य. (Yv.)२२.३४

एकस्मै स्वाहा द्वाभ्यांस्वाहा शताय स्वाहैकशताय स्वाहा। व्युष्ट्यै स्वाहा स्वर्गाय स्वाहा ॥३४॥
*ekasmai svāhā dvābhyāṁsvāhā śatāya svāhaikaśatāya svāhā । vyuṣṭyai svāhā svargāya svāhā ॥34 ॥*

य. (Yv.)२५.१४

आ नो भ्रदाः क्रतवो यन्तु विश्वतोऽदब्धासोऽअपरीतास ऽ उद्भिदः ।
देवा नो यथा सदमिद्वृधे ऽ आसन्नप्रायुवो रक्षितारो दिवेदिवे ॥१४॥
*ā no bhradāḥ kratavo yantu viśvato'dabdhāso'aparītāsa ' udbhidaḥ ।*
*devā no yathā sadamidvṛdhe ' āsannaprāyuvo rakṣitāro divedive ॥14 ॥*

य. (Yv.)२५.२७

यद्धविष्यमृतुशो देवयानं त्रिर्मानुषाः पर्यश्वं नयन्ति ।
अत्रा पूष्णः प्रथमो भाग ऽ एति यां देवेभ्यः प्रतिवेदयन्नजः ॥२७॥
*yaddhaviṣyamṛtuśo devayānaṁ trirmānuṣāḥ paryaśvaṁ nayanti ।*
*atrā pūṣṇaḥ prathamo bhāga ' eti yāṁ devebhyaḥ prativedayannajaḥ ॥27 ॥*

५५. राजा (Rājā) - य. (Yv.)२०.७; २३.३० , ३२ , ४३ , ४४

य. (Yv.)२०.७

बाहू मे बलमिन्द्रियंहस्तौ मे कर्म वीर्यम्। आत्मा क्षत्रमुरो मम ॥७॥
*bāhū me balamindriyaṁhastau me karma vīryam । ātmā kṣatramuro mama ॥7 ॥*

य. (Yv.)२३.३०

यद्धरिणो यवमत्ति न पुष्टं पशु मन्यते। शूद्रा यदर्यजारानपोषाय धनाययित ॥३०॥
*yaddhariṇo yavamatti na puṣṭaṁ paśu manyate । śūdrā yadaryajārānapoṣāya dhanāyayita ॥30 ॥*

य. (Yv.)२३.३२

दधिक्राव्णो ऽ अकारिषं जिष्णोरश्वस्य वाजिनः ।
सुरभि नो मुखा करत्प्र ण ऽ आयूं षि तारिषत् ॥३२॥
*dadhikrāvṇo ' akāriṣaṁ jiṣṇoraśvasya vājinaḥ ।*
*surabhi no mukhā karatpra ṇa ' āyūṁ ṣi tāriṣat ॥32 ॥*

य. (Yv.)२३.४३-४४

द्यौस्ते पृथिव्यन्तरिक्षं वायुश्छिद्रं पृणातु ते। सूर्यस्ते नक्षत्रैः सह लोकं कृणोतु साधुया॥४३॥
शं ते परेभ्यो गात्रेभ्यः शमस्त्ववरेभ्यः। शमस्थभ्यो मज्जभ्यः शम्वस्तु तन्वै तव ॥४४॥
*dyauste pṛthivyantarikṣaṁ vāyuśchhidraṁ pṛṇātu te । sūryaste nakṣatraiḥ saha lokaṁ kṛṇotu sādhuyā ॥43 ॥*
*śaṁ te parebhyo gātrebhyaḥ śamastvavarebhyaḥ । śamasthabhyo majjabhyaḥ śaṁvastu tanvai tava ॥44 ॥*

५६. राजप्रजाः (Rājaprajāḥ) - य. (Yv.)२३.२०, २२, २३, ३१

य. (Yv.)२३.२०

ता ऽ उभौ चतुरः पदः संप्रसारयाव स्वर्गे लोके प्रोर्णुवाथां वृषा वाजी रेतोधा रेतो दधातु ।२० ।

*tā ' ubhau chaturaḥ padaḥ saṁprasārayāva svarge loke prorṇuvāthāṁ vṛṣā vājī retodhā reto dadhātu ।20 ।*

य. (Yv.)२३.२२-२३

यकासकौ शकुन्तिकाहलगिति वंचति । आहन्ति गभे पसो निगल्गलीति धारका ॥२२ ।
यकोऽसकौ शकुन्तक ऽ आहलगिति वंचति ।
विवक्षतऽइव ते मुखमध्वर्यो मा नस्त्वमभि भाषथाः ॥२३ ॥

*yakāsakau śakuntikāhalagiti vaṁchati । āhanti gabhe paso nigalgalīti dhārakā ॥22 ।*
*yako'sakau śakuntaka ' āhalagiti vaṁchati ।*
*vivakṣata'iva te mukhamadhvaryo mā nastvamabhi bhāṣathāḥ ॥23 ॥*

य. (Yv.)२३.३१

यद्धरिणो यवमत्ति न पुष्टं बहु मन्यते । शूद्रो यदर्यायै जारो न पोषमनु मन्यते ॥३१ ॥

*yaddhariṇo yavamatti na puṣṭaṁ bahu manyate । śūdro yadaryāyai jāro na poṣamanu manyate ॥31 ॥*

५७. रुद्रः (Rudraḥ) - य. (Yv.)१६.६-१४

असौ यस्ताम्रो ऽ अरुण ऽ उत बभ्रुः सुमंगलः ।
ये चैनंरुद्रा ऽ अभितो दिक्षु श्रिताः सहस्रशोऽवैषांहेड ऽ ईमहे ॥६ ॥
असौ योऽवसर्पति नीलग्रीबो विलोहितः ।
उतैनं गोपा ऽ अदृश्रन्नदृश्रन्नुदहाय्यः स दृष्टो मृडयाति नः ॥७ ॥
नमोऽस्तु नीलग्रीवाय सहस्राक्षाय मीढुषे ।
अथो ये ऽ अस्य सत्वानोऽहं तेभ्योऽकरं नमः ॥८ ॥
प्रमुंच धन्वनस्त्वमुभयोरार्त्न्योर्ज्याम् । याश्च ते हस्त ऽ इषवः ऽ परा ता भगवो वप ॥९ ॥
विज्यं धनुः कपर्दिनो विशल्यो बाणावां श्ऽउत ।
अनेशन्नस्य याऽइषवऽआभुरस्य निषङ्गधिः ॥१० ॥
वा ते हेतिर्मीढुष्टम हस्ते बभूव ते धनुः । तयास्मान्विश्वतस्त्वमयक्ष्मया परि भुज ॥११ ॥
परि ते धन्वनो हेतिरस्मान्वृणक्तु विश्वतः । अथो यऽइषुधिस्तवारेऽअस्मन्निधेहि तम् ॥१२ ॥
अवतत्य धनुष्ट्वंसहस्राक्ष शतेषुधे । निशीर्य्य शल्यानां मुखा शिवो नः सुमना भव ॥१३ ॥
नमस्तऽ आयुधायानातताय धृष्णवे । उभाभ्यामुत ते नमो बाहुभ्यां तव धन्वने ॥१४ ॥

*asau yastāmro ' aruṇa ' uta babhruḥ sumaṁgalaḥ ।*
*ye chainaṁrudrā ' abhito dikṣu śritāḥ sahasraśo'vaiṣāṁheḍa ' īmahe ॥6 ॥*
*asau yo'vasarpati nīlagrībo vilohitaḥ ।*
*utainaṁ gopā ' adṛśrannadṛśrannudahāyyaḥ sa dṛṣṭo mṛḍayāti naḥ ॥7 ॥*
*namo'stu nīlagrīvāya sahasrākṣāya mīḍhuṣe ।*
*atho ye ' asya satvāno'haṁ tebhyo'karaṁ namaḥ ॥8 ॥*
*pramuṁcha dhanvanastvamubhayorārtnyorjyām ।*
*yāścha te hasta ' iṣavaḥ ' parā tā bhagavo vapa ॥9 ॥*
*vijyaṁ dhanuḥ kaparddino viśalyo bāṇāvāṁ ś'uta ।*
*aneśannasya yā'iṣava'ābhurasya niṣaṅgadhiḥ ॥10 ॥*
*vā te hetirmīḍhuṣṭama haste babhūva te dhanuḥ ।*
*tayāsmānviśvatastvamayakṣamayā pari bhuja ॥11 ॥*
*pari te dhanvano hetirasmānvṛṇakktu viśvataḥ ।*
*atho ya'iṣudhistavāre'asmannidhehi tam ॥12 ॥*
*avatatya dhanuṣṭvaṁsahasrākṣa śateṣudhe ।*
*niśīryya śalyānāṁ mukhā śivo naḥ sumanā bhava ॥13 ॥*
*namasta' āyudhāyānātatāya dhṛṣṇave ।*

*ubhābhyāmuta te namo bāhubhyāṁ tava dhanvane //14 //*

५८. रुद्राः (Rudrāḥ) - य. (Yv.)१६.३४

नमो वन्याय च कक्षयाय च नमः श्रवाय च प्रतिश्रवाय च
नमऽआशुषेणाय चाशुरथाय च नमः शूराय चावभेदिने च ॥३४॥

*namo vanyāya cha kakṣayāya cha namaḥ śravāya cha pratiśravāya cha*
*nama'āśuṣeṇāya chāśurathāya cha namaḥ śūrāya chāvabhedine cha //34 //*

५९. रेतः (Retaḥ) - अ. (Av.) ६.११.१-२

शमीमश्वत्थ आरूढस्तत्र पुंसुवनं कृतम्। तद् वै पुत्रस्य वेदनं तत् स्त्रीष्वा भरामसि ॥१॥
पुंसि वै रेतो भवति तत् स्त्रियामनु षिच्यते। तद् वै पुत्रस्य वेदनं तत् प्रजापतिरब्रवीत्॥२॥

*śamīmaśvattha ārūḍhastatra puṁsuvanaṁ kṛtam / tad vai putrasya vedanaṁ tat strīṣvā bharāmasi //1 //*
*puṁsi vai reto bhavati tat striyāmanu ṣichyate / tad vai putrasya vedanaṁ tat prajāpatirabravīt //2 //*

६०. लिंगोक्ता (Liṁgoktā) - य. (Yv.)२०.१७; ३४; ३५; २२.२२, २९

य. (Yv.)२०.१७

यद् ग्रामे यदरण्ये यत्सभायां यदिन्द्रिये ।
यच्छूद्रे यदर्ये यदेनश्चकृमा वयं यदेकस्याधि धर्मणि तस्यावयजनमसि ॥१७॥

*yad grāme yadaraṇye yatsabhāyāṁ yadindriye /*
*yachchhūdre yadarye yadenaśchakṛmā vayaṁ yadekasyādhi dharmaṇi tasyāvayajanamasi //17 //*

य. (Yv.)२०.३४; ३५

प्राणपा मे अपानपाश्चक्षुष्पाः श्रोत्रपाश्च मे। वाचा मे विश्वभेषजा मनसोऽसि विलायकः॥३४॥
अश्विनकृतस्य ते सरस्वतिकृतस्येन्द्रेण सुत्राम्णा कृतस्य। उपहूत उपहूतस्य भक्षयामि॥३५॥

*prāṇapā me apānapāśchakṣuṣpāḥ śrotrapāścha me / vāchā me viśvabheṣajā manaso'si vilāyakaḥ //34 //*
*aśvinakṛtasya te sarasvatikṛtasyendreṇa sutrāmṇā kṛtasya / upahūta upahūtasya bhakṣayāmi //35 //*

य. (Yv.)२२.२२

आ ब्रह्मन् ब्राह्मणो ब्रह्मवर्चसी जायतामा राष्ट्रे राजन्यः शूरऽइषव्योऽतिव्याधी महारथो जायतां दोग्ध्रीं धेनुर्वोढानड्वानाशुः सप्तिः पुरन्धिर्योषा जिष्णु रथेष्ठाः सभेयो युवास्य यजमानस्य वीरो जायतां निकामे-निकामे नः पर्जन्यो वर्षतु फलवत्यो नऽओषधयः पच्यन्तां
योगक्षेमो नः कल्पताम्॥२२॥

*ā brahman brāhmaṇo brahmavarchasī jāyatāmā rāṣṭre rājanyaḥ śūra'iṣavyo'tivyādhī mahāratho jāyatāṁ dogdhrīṁ dhenurvoḍhānaḍvānāśuḥ saptiḥ purandhiryoṣā jiṣṇu ratheṣṭhāḥ sabheyo yuvāsya yajamānasya vīro jāyatāṁ nikāme-nikāme naḥ parjanyo varṣatu phalavatyo na'Oṣadhayaḥ pachyantāṁ*
*yogakṣemo naḥ kalpatām //22 //*

य. (Yv.)२२.२९

पृथिव्यै स्वहान्तरिक्षाय स्वाहा दिवे स्वहा सूर्य्याय स्वाहा चन्द्राय स्वाहा नक्षत्रेभ्यः स्वाहाद्भ्यः स्वाहौषधीभ्यः स्वाहा वनस्पतिभ्यः स्वाहा परिग्लवेभ्यः स्वाहा चराचरेभ्यः स्वाहा सरीसृपेभ्यः
स्वाहा ॥२९॥

*pṛthivyai svahāntarikṣāya svāhā dive svahā sūryyāya svāhā chandrāya svāhā nakṣatrebhyaḥ svāhādbhyaḥ*
*svāhauṣadhībhyaḥ svāhā vanaspatibhyaḥ svāhā pariglavebhyaḥ svāhā charācharebhyaḥ svāhā sarīsṛpebhyaḥ*
*svāhā //29 //*

६१. वरुणः (Varuṇaḥ) - य. (Yv.)२०.१८

यदापोऽअघ्न्याऽ इति वरुणेति शषामहे ततो वरुण नो मुंच। अवभृथ निचुम्पुण निचेरुरसि
निचुम्पुणः। अव देवैर्देवकृतमेनोऽयक्ष्यव मर्त्यैर्मर्त्यकृतं पुरुरव्णो देव रिषस्पाहि ॥१८॥
*yadāpo'adhnyā' iti varuṇeti śaṣāmahe tato varuṇa no muṁcha । avabhṛtha nichumpuṇa nicherurasi*
*nichumpuṇaḥ । ava devairdevakṛtameno'yakṣayava martyairmartyakṛtaṁ pururavṇo deva riṣaspāhi ॥18॥*

६२. वसन्तादयः (Vasantādayaḥ) - य. (Yv.)२४.११ , २०

य. (Yv.)२४.११

धूमान वसन्तायालभते श्वेतान् ग्रीष्माय कृष्णान् वर्षाभ्योऽरुणांछरदे पृषतो
हेमन्ताय पिशङ्गाञ्छिशिराय ॥११॥
*dhrūmāna vasantāyālabhate śvetān grīṣmāya kṛṣṇān varṣābhyo'ruṇāṁchharade pṛṣato*
*hemantāya piśaṅgāñchhiśirāya ॥11॥*

य. (Yv.)२४.२०

वसन्ताय कपिंजलानालभते ग्रीष्माय कलविंकान् वर्षाभ्यस्तित्तिरींछरदे वर्त्तिका
हेमन्ताय ककराञ्छिशिराय विककरान् ॥२०॥
*vasantāya kapiṁjalānālabhate grīṣmāya kalaviṁkān varṣābhyastittirīṁchharade varttikā*
*hemantāya kakarāñchhiśirāya vikakarān ॥20॥*

६३. वस्वादयः (Vasvādayaḥ) - य. (Yv.)२२.३०

असवे स्वाहा वसवे स्वाहा विभुवे स्वहा विवस्वते स्वाहा गाणश्रिये स्वाहा
गणपतये स्वाहाभिुवे स्वाहाधिपतये स्वाहा शूषाय स्वाहा सं सर्पाय
स्वाहा चन्द्राय स्वाहा ज्योतिषे स्वाहा मालिम्लुचाय स्वाहा दिवा पतये स्वाहा ॥३०॥
*asave svāhā vasave svāhā vibhuve svahā vivasvate svāhā gāṇaśriye svāhā*
*gaṇapataye svāhābhiuve svāhādhipataye svāhā śūṣāya svāhā saṁ sarpāya*
*svāhā chandrāya svāhā jyotiṣe svāhā mālimluchāya svāhā divā pataye svāhā ॥30॥*

६४. वाजादयः (Vājādayaḥ) - य. (Yv.)२२.३२

वाजाय स्वाहा प्रसवाय स्वाहापिजाय स्वाहा क्रतवे स्वाहा स्वः स्वाहा मूर्ध्ने स्वाहा
व्यश्नुविने स्वाहान्त्याय स्वाहान्त्याय भौवनाय स्वाहा भुवनस्य पतये स्वाहाधिपतये स्वाहा
प्रजापतेय स्वाहा ॥३२॥
*vājāya svāhā prasavāya svāhāpijāya svāhā kratave svāhā svaḥ svāhā mūrdhne svāhā*
*vyaśnuvine svāhāntyāya svāhāntyāya bhauvanāya svāhā bhuvanasya pataye*
*svāhādhipataye svāhā prajāpateya svāhā ॥32॥*

६५. वायुः (Vāyuḥ) - य. (Yv.)२०.१५

यदि दिवा यदि नक्तमेनां सि चकृमा वयम् ।
वायुर्मा तस्मादेनसो विश्वन्मुंचत्वं हसः ॥१५॥
*yadi divā yadi naktamenāṁ si chakṛmā vayam ।*
*vāyurmā tasmādenaso viśvanmuṁchatvaṁ hasaḥ ॥15॥*

६६. वाय्वादयः (Vāyvādayaḥ) - य. (Yv.) २३.८

वसवस्त्वांजन्तु गायत्रेण छन्दसा रुद्रास्त्वांजन्तु त्रेष्टुभेन छन्दसादित्यास्त्वांजन्तु जागतेन छन्दसा । भूर्भुवः
स्वर्लाजी३ञ्छाची३न्यव्ये गव्यऽएतदन्नमत्त देवाऽएतदन्नमद्धि प्रजापते ॥८॥
*vasavastvāṁjantu gāyatreṇa chhandasā rudrāstvāṁjantu treṣṭubhena*
*chhandasādityāstvāṁjantu jāgatena chhandasā । bhūrbhuvaḥ*
*svarlājī3ṁchhāchī3nyavye gavya'etadannamatta devā'etadannamaddhi prajāpate ॥8॥*

६७. वातादयः (Vātādayaḥ) - य. (Yv.)२ २.२६

वाताय स्वाहा धूमाय स्वाहाभ्राय स्वाहा मेधाय स्वाहा विद्योतमानाय स्वाहा स्तनयते स्वाहावस्फूर्जते स्वाहा वर्षते स्वाहाववर्षते स्वाहोग्रं वर्षते स्वाहा शीघ्रं वर्षते स्वाहोद्गृह्णते स्वाहोद्गृहीताय स्वाहा प्रुष्णते स्वाहा शीकायते स्वाहा प्रुष्वाभ्यः स्वाहा ह्रादुनीभ्यः स्वाहा नीहाराय स्वाहा ॥२६॥

*vātāya svāhā dhūmāya svāhābhrāya svāhā medhāya svāhā vidyotamānāya svāhā stanayate svāhāvasphūrjate svāhā varṣate svāhāvavarṣate svāhograṁ varṣate svāhā śīghraṁ varṣate svāhodgṛhṇate svāhodgṛhītāya svāhā pruṣṇate svāhā śīkāyate svāhā prruṣvābhyaḥ svāhā hrādunībhyaḥ svāhā nīhārāya svāhā //26 //*

६८. विद्युदादयः (Vidyudādayaḥ) - य. (Yv.)२३.१२

द्यौरासीत्पूर्वचित्तिरश्वऽआसीद् बृहद्वयः। आविरासीत्पिलिप्पिला रात्रिरासी त्पिशङ्गिला ॥१२॥

*dyaurāsītpūrvachittiraśva'āsīd bṛhadvayaḥ / āvirāsītpilippilā rātrirāsī tpiśaṅgilā //12 //*

६९. विद्वान् (Vidvān) - य. (Yv.)२३.१५

स्वयं वाजिँस्तन्वं कल्पयस्व स्वयं यजस्व स्वयं जुषस्व। महिमा तेऽन्येन न सन्नशे ॥१५॥

*svayaṁ vājism̐tanvaṁ kalpayasva svayaṁ yajasva svayaṁ juṣasva / mahimā te'nyena na sannaśe //15 //*

७०. विद्वांसः (Vidvāṁsaḥ) - य. (Yv.)२३.२९ ,३३; २५.१५; २७.२१

य. (Yv.)२३.२९

यद्देवासो ललामगुं प्र विष्टीमिनमाविषुः। सक्थ्ना देदिश्यते नारी सत्यस्याक्षिभुवो यथा ॥२९॥

*yaddevāso lalāmaguṁ pra viṣṭīminamāviṣuḥ / sakthnā dediśyate nārī satyasyākṣibhuvo yathā //29 //*

य. (Yv.)२३.३३

गायत्री त्रिष्टुब्जगत्यनुष्टुप्पङ्क्त्या सह। बृहत्युष्णिहा ककुप्सूचीभिः शम्यन्तु त्वा ॥३३॥

*gāyatrī triṣṭubjagatyanuṣṭuppaṅktyā saha / bṛhatyuṣṇihā kakupsūchībhiḥ śamyantu tvā //33 //*

य. (Yv.)२५.१५

देवानां भद्रा सुमति ऋर्जूयतो देवानांरातिरभि नो निवर्त्तताम् ।
देवानां सख्यमुपसेदिमा वयं देवा नऽआयुः प्रतिरन्तु जीवसे ॥१५॥

*devānāṁ bhadrā sumati ṛrjūyato devānāṁrātirabhi no nivarttatām /*
*devānāṁ sakhyamupasedimā vayaṁ devā na'āyuḥ pratirantu jīvase //15 //*

य. (Yv.)२७.२१

वनस्पतेऽव सृजा रराणस्त्मना देवेषु। अग्निर्हव्यंशमिता सूदयाति ॥२१॥

*vanaspate'va sṛjā rarāṇastmanā deveṣu / agnirhavyaṁśamitā sūdayāti //21 //*

७१. विराजादयः (Virājādayaḥ) - य. (Yv.)२४.१३

पष्ठवाहो विराजऽउक्षाणो बृहत्याऽऋषभाः ककुभेऽनड्वाहः पङ्क्त्यै धेनवोऽतिच्छन्दसे ॥१३॥

*paṣṭhavāho virāja'ukṣāṇo bṛhatyā'ṛṣabhāḥ kakubhe'naḍvāhaḥ paṅktyai dhenavo'tichchhandase //13 //*

७२. विश्वेदेवाः (Viśvedevāḥ) - य. (Yv.)२०.१२; २२.४; २४.५; २५.१६; २७.८

य. (Yv.)२०.१२

प्रथमा द्वितीयैर्द्वितीयास्तृतीयैस्तृतीयाः सत्येन सत्यं योन यो यजुर्भिर्यजूं षि सामभिः सामान्यृग्भिरृर्चः पुरोऽनुवाक्याभिः पुरोऽनुवाक्या याज्याभिर्याज्या वषड्कारैर्वषड्काराऽआहुतिभिराहुतयो मे कामान्त्समर्धयन्तु भूः स्वाहा ॥१२॥

*prathamā dvitīyairdvitīyāstṛtīyaistṛtīyāḥ satyena satyaṁ yona yo yajurbhiryajūṁ ṣi sāmabhiḥ sāmānyṛgbhirṛchaḥ puro'nuvākyābhiḥ puro'nuvākyā yājyābhiryājyā vaṣaṭkārairvaṣaṭkārā'āhutibhirāhutayo me kāmāntsamardhayantu bhūḥ svāhā //12 //*

य. (Yv.)२२.४

स्वगा त्वा देवेभ्यः प्रजापतये ब्रह्मन्नश्वं भन्त्स्यामि देवेभ्यः प्रजापतये तेन राध्यासम्।
तं बधान देवेभ्यः प्रजापतये तेन राध्नुहि ॥४॥

*svagā tvā devebhyaḥ prajāpataye brahmannaśvaṁ bhantsyāmi devebhyaḥ prajāpataye tena rādhyāsam / taṁ badhāna devebhyaḥ prajāpataye tena rādhnuhi //4 //*

य. (Yv.)२४.५

शिल्पा वैश्वदेव्यो रोहिण्यस्त्र्यवयो वाचेऽविताऽ आदित्यै सरूपा धात्रे वत्सतर्यो
देवानां पत्नीभ्यः ॥५॥

*śilpā vaiśvadevyo rohiṇyastrayavayo vāche'vitā' ādityai sarūpā dhātre vatsataryo devānāṁ patnībhyaḥ //5 //*

य. (Yv.)२५.१६

तान् पूर्वया निविदा हूमहे वयं भगं मित्रमदितिं दक्षमस्रिधम् ।
अर्यमणं वरुणंसोममश्विना सरस्वती नः सुभगा मयस्करत् ॥१६॥

*tān pūrvayā nividā hūmahe vayaṁ bhagaṁ mitramaditiṁ dakṣamasridham /*
*aryamaṇaṁ varuṇaṁsomamaśvinā sarasvatī naḥ subhagā mayaskarat //16 //*

य. (Yv.)२७.८

बृहस्पते सवितर्बोधयैनंसं शितं चित्सन्तरांसं शिशाधि ।
वर्धयैनं महते सौभगाय विश्व एनमनु मदन्तु देवाः ॥८॥

*bṛhaspate savitarbodhayainaṁsaṁ śitaṁ chitsantarāṁsaṁ śiśādhi /*
*vardhayainaṁ mahate saubhagāya viśva enamanu madantu devāḥ //8 //*

७३. सभापतिः (Sabhāpatiḥ) - य. (Yv.)२०.४-६, ८

य. (Yv.)२०.४-६

कोऽसि कतमोऽसि मस्मै त्वा काय त्वा। सुश्नलोक सुमंगल सत्यराजन् ॥४॥
शिरो मे श्रीर्यशो मुखं त्विषिः केशाश्च श्मश्रूणि ।
राजा मे प्राणोऽ अमृतंसम्राट् चक्षुर्विराट् श्रोत्रम् ॥५॥
जिह्वा मे भद्रं वाङ् महो मनो मन्युः स्वराड् भामः ।
मोदाः प्रमोदाऽअंगलीरंगानि मित्रं मे सहः ॥६॥

*ko'si katamo'si masmai tvā kāya tvā / suśnaloka sumaṁgala satyarājan //4 //*
*śiro me śrīryaśo mukhaṁ tviṣiḥ keśāścha śmaśrūṇi /*
*rājā me prāṇo' amṛtaṁsamrāṭ chakṣurvirāṭ śrotram //5 //*
*jihnā me bhadraṁ vāṅ maho mano manyuḥ svarāḍ bhāmaḥ /*
*modāḥ pramodā'aṁgalīraṁgāni mitraṁ me sahaḥ //6 //*

य. (Yv.)२०.८

पृष्ठीर्मेराष्ट्रमुदग्मं सौ ग्रीवाश्च श्रोणी। ऊरूऽअरत्नी जानुनी विशो मेऽङ्गानि सर्वतः ॥८॥

*pṛṣṭhīrmerāṣṭramudagmaṁ sau grīvāścha śroṇī / ūrū'aratnī jānunī viśo me'ṅgāni sarvataḥ //8 //*

७४. सभासदः (Sabhāsadaḥ) - य. (Yv.)२३.३८

कुविदंग यवमन्तो यविंचद्यथा दान्त्यनुपूर्व वियूय ।
इहेहैषां कृणुहि भोजनानि ये बर्हिषो नमऽउक्तिं यजन्ति ॥३८॥

*kuvidaṁga yavamanto yaviṁchadyathā dāntyanupūrva viyūya /*
*ihehaiṣāṁ kṛṇuhi bhojanāni ye barhiṣo nama'uktiṁ yajanti //38 //*

७५. सभेशः (Sabheśaḥ) - य. (Yv.)२०.१ , २ , ९ , १०

य. (Yv.)२०.१-२

क्षत्रस्य योनिरसि क्षत्रस्य नाभिरसि। मा त्वा हिं सीन्मा मा हिं सीः ॥१॥
निषसाद धृतव्रतो वरुणः पस्त्यास्वा। साम्राज्याय सुक्रतुः। मृत्योः पाहि विद्योत्पाहि ॥२॥

*kṣatrasya yonirasi kṣatrasya nābhirasi / mā tvā hiṁ sīnmā mā hiṁ sīḥ //1 //*
*niṣasāda dhṛtavrato varuṇaḥ pastyāsvā / sāmrājyāya sukratuḥ / mṛtyoḥ pāhi vidyotpāhi //2 //*

य. (Yv.)२०.९-१०

नाभिर्मे चित्तं विाानं पायुर्मेऽपचितिर्भि सत्। आनन्दनन्दावाण्डौ मे भगः सौभाग्यं पसः ।
जंघाभ्यां पद्भ्यां धर्मोऽस्मि विशि राजा प्रतिष्ठितः ॥९॥
प्रति क्षत्रे प्रति तिष्ठामि राष्ट्रे प्रत्यश्वेषु प्रति तिष्ठामि गोषु। प्रत्यंगेषु प्रति तिष्ठाम्यात्मन्
प्रति प्राणेषु प्रति तिष्ठामि पुष्टे प्रति द्यावापृथिव्योः प्रति तिष्ठामि यो ॥१०॥

*nābhirme chittaṁ viāānaṁ pāyurme'pachitirbhi sat / ānandanandāvāṇḍau me bhagaḥ saubhāgyaṁ pasaḥ / jaṁghābhyāṁ padbhyāṁ dharmo'smi viśi rājā pratiṣṭhitaḥ //9 // prati kṣatre prati tiṣṭhāmi rāṣṭre pratyaśveṣu prati tiṣṭhāmi goṣu / pratyaṁgeṣu prati tiṣṭhāmyātman prati prāṇeṣu prati tiṣṭhāmi puṣṭe prati dyāvāpṛthivyoḥ prati tiṣṭhāmi yo //10 //*

७६. समाधाता (Samādhātā) - य. (Yv.)२३.५४ , ५६; ६०; ६२-६३

य. (Yv.)२३.५४

द्यौरासीत्पूर्वचित्तिरश्वऽआसीद् बृहद्वयः। अविरासीत्पिलिप्पिला रात्रिरासीत्पिशंगिला ॥५४॥

*dyaurāsītpūrvachittiraśva'āsīd bṛhadvayaḥ / avirāsītpilippilā rātrirāsītpiśaṁgilā //54 //*

य. (Yv.)२३.५६

अजारे पिशंगिला श्वाविल्कुरुपिशंगिला। शशऽआस्कन्दमर्षत्यहिः पन्थां वि सर्पति ॥५६॥

*ajāre piśaṁgilā śvāvitkurupiśaṁgilā / śaśa'āskandamarṣatyahiḥ panthāṁ vi sarpati //56 //*

य. (Yv.)२३.६०

वेदाहमस्य भुवनस्य नाभिं वेद द्यावापृथिवी अन्तरिक्षम् ।
वेद सूर्यस्य बृहतो जनित्रमथो वेद चन्द्रमसं यतोजाः ॥६०॥

*vedāhamasya bhuvanasya nābhiṁ veda dyāvāpṛthivī antarikṣam /*
*veda sūryasya bṛhato janitramatho veda chandramasaṁ yatojāḥ //60 //*

य. (Yv.)२३.६२-६३

इयं वेदिः परो अन्तः पृथिव्या अयं याो भुवनस्य नाभिः ।
अयंसोमो वृष्णो अश्वस्य रोतो ब्रह्मायं वाचः परमं व्योम ॥६२॥
सुभूः स्वयम्भूः प्रथमोऽन्तर्महत्यर्णवे। दधे ह गर्भमृत्वियं यतो जातः प्रजापतिः ॥६३॥

*iyaṁ vediḥ paro antaḥ pṛthivyā ayaṁ yāo bhuvanasya nābhiḥ /*
*ayaṁsomo vṛṣṇo aśvasya roto brahmāyaṁ vāchaḥ paramaṁ vyoma //62 //*
*subhūḥ svayambhūḥ prathamo'ntarmahatyarṇave / dadhe ha garbhamṛtviyaṁ yato jātaḥ prajāpatiḥ //63 //*

७७. समिधा (Samidhā) - य. (Yv.)२३.५८

षडस्य विष्ठाः शतमक्षराण्यशीतिर्होमाः समिधो ह तिस्रः ।
यास्य ते विदथा प्र ब्रवीमि सप्त होतारऽऋतुशो यजन्ति ॥५८॥

*ṣaḍasya viṣṭhāḥ śatamakṣarāṇyaśītirhomāḥ samidho ha tisraḥ /*
*yāsya te vidathā pra bravīmi sapta hotāra'ṛtuśo yajanti //58 //*

७८. सरस्वत्यादयः (Sarasvatyādayaḥ) - य. (Yv.)२५.१

शादं दद्भिरवकांदन्तमूलैर्मृदं बर्स्वैस्तेगान्दं ष्ट्राभ्यां सरस्वत्याऽअग्रजिह्नं जिह्नायाऽउत्सादमवक्रन्देन तालु वाजंहनुभ्यामपऽआस्येन वृषणमाण्डाभ्यामादित्याँ श्मश्रुभिः पन्थानं भ्रूभ्यां द्यावापृथिवी वर्त्तोभ्यां विद्युतं कनीनकाभ्यां शुक्लाय स्वाहा कृष्णाय स्वाहा पार्याणि पक्ष्माण्यवार्याऽइक्षवोऽवार्याणि पक्ष्माणि पार्याऽइक्षवः ॥१॥

*śādaṁ dadbhiravakāṁdantamūlairmṛdaṁ barsvaistegāndaṁ ṣṭrābhyāṁ sarasvatyā'agrajihnaṁ jihnāyā'utsādamavakrandena tālu vājaṁhanubhyāmapa'āsyena*

*vṛṣaṇamāṇḍābhyāmādityām̐ śmaśrubhiḥ panthānaṁ bhrūbhyāṁ dyāvāpṛthivī varttobhyāṁ vidyutaṁ kanīnakābhyāṁ śuklāya svāhā kṛṣṇāya svāhā pāryāṇi pakṣamāṇyavāryā'ikṣavo'vāryāṇi pakṣamāṇi pāryā'ikṣavaḥ //1 //*

७९. सविता (Savitā) - य. (Yv.)११.१-११

युंजानः प्रथमं मनस्तत्त्वाय सविता धियः। अग्नेर्ज्योतिर्निचाय्य पृथिव्याऽअध्याभरत् ॥१॥
युक्तेन मनसा वयं देवस्य सवितुः सवे। स्वर्ग्याय शक्त्या ॥२॥
युक्त्वाय सविता देवान्स्वर्य्यतो धिया दिवम्।
बृहज्ज्योतिः करिष्यतः सविता प्रसुवाति तान ॥३॥
युंजते मनऽउत युंजते धियो विप्रा विप्रस्य बृहतो विपश्चितः ।
वि होत्रा दधे वयुनाविदेकऽइन्मही देवस्य सवितुः परिष्टुतिः ॥४॥
युजे वां ब्रह्म पूवर्य नमोभिर्वि श्लोकऽएतु पथ्येव सूरेः ।
श्रृणवन्तु विश्वेऽअमृतस्य पुत्राऽआ ये धामानि दिव्यानि तस्थुः ॥५॥
यस्य प्रयाणमन्वन्यऽइद्ययुर्देवा देवस्य महिमानमोजसा ।
यः पार्थिवानि विममे सऽएतशो रजां सि देवः सविता महित्वना ॥६॥
देव सवितः प्रसुव यां प्रसुव यापतिं भगाय ।
दिव्यो गन्धर्वः केतपूः केतन्नः पुनातु वाचस्पतिर्वाचं नः स्वदतु ॥७॥
इमं नो देव सवितर्यां प्रणय देवाव्यंसखिविदंसत्राजितं धनजितंस्वर्जितम् ।
ऋचा स्तोमंसमर्ध य गायत्रेण रथन्तरं बृहद्गायत्रवर्त्तनि स्वाहा ॥८॥
देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम्।
आददे गायत्रेण छन्दसांगिरस्वत्पृथिव्याः सधस्थादग्निं पुरीष्यमंगिरस्वदाभर
त्रैष्टुभेन छन्दसांगिरस्वत् ॥९॥
अभ्रिरसि नार्यसि त्वया वयमग्निंशकेम खनितुंसधस्थ आ। जागतेन छन्दसांगिरस्वत् ॥१०॥
हस्तऽआधाय सविता बिभ्रदभ्रिं हिरण्ययीम् ।
अग्नेर्ज्योतिर्निचाय्य पृथिव्याऽअध्याभरदानुष्टुभेन छन्दसांगिरस्वत्॥११॥

*yuṁjānaḥ prathamaṁ manastattvāya savitā dhiyaḥ / agnerjyotirnichāyya pṛthivyā'adhyābharat //1 //*
*yuktena manasā vayaṁ devasya savituḥ save / svargyāya śaktyā //2 //*
*yuktvāya savitā devāntsvaryyato dhiyā divam /*
*bṛhajjyotiḥ kariṣyataḥ savitā prasuvāti tāna //3 //*
*yuṁjate mana'uta yuṁjate dhiyo viprā viprasya bṛhato vipaśchitaḥ /*
*vi hotrā dadhe vayunāvideka'inmahī devasya savituḥ pariṣṭutiḥ //4 //*
*yuje vāṁ brahma pūvarya namobhirvi śloka'etu pathyeva sūreḥ /*
*śṛṇavantu viśve'amṛtasya putrā'ā ye dhāmāni divyāni tasthuḥ //5 //*
*yasya prayāṇamanvanya'idyayurdevā devasya mahimānamojasā /*
*yaḥ pārthivāni vimame sa'etaśo rajāṁ si devaḥ savitā mahitvanā //6 //*
*deva savitaḥ prasuva yāṁ prasuva yāpatiṁ bhagāya /*
*divyo gandharvaḥ ketapūḥ ketannaḥ punātu vāchaspatirvāchaṁ naḥ svadatu //7 //*
*imaṁ no deva savitaryāṁ praṇaya devāvyaṁsakhividaṁsatrājitaṁ dhanajitaṁsvarjitam /*
*ṛchā stomaṁsamardha ya gāyatreṇa rathantaraṁ bṛhadgāyatravarttani svāhā //8 //*
*devasya tvā savituḥ prasave'śvinorbāhubhyāṁ pūṣṇo hastābhyām /*
*ādade gāyatreṇa chhandasāṁgirasvatpṛthivyāḥ sadhasthādagniṁ purīṣyamaṁgirasvadābhara treṣṭubhena chhandasāṁgirasvat //9 //*
*abhrirasi nāryasi tvayā vayamagniṁśakema khanituṁsadhastha ā / jāgatena chhandasāṁgirasvat //10 // hasta'ādhāya savitā bibhradabhriṁ hiraṇyayīm /*
*agnerjyotirnichāyya pṛthivyā'adhyābharadānuṣṭubhena chhandasāṁgirasvat //11 //*

८०. सूर्यः (Sūryaḥ) - य. (Yv.)३.१०; २०.१६; ३३.७४

य. (Yv.)३.१०

सजूर्देवेन सवित्रा सजू रात्र्येन्द्रवत्या। जुषाणोऽअग्निर्वेतु स्वाहा ।
सजूर्देवेन सवित्रा सजूरुष्षसेन्द्रवत्या। जुषाणः सूर्य्यो वेतु स्वाहा ॥१०॥
*sajūrdevena savitrā sajū rātrayendravatyā / juṣāṇo'agnirvetu svāhā /*
*sajūrdevena savitrā sajūruṣṣasendravatyā / juṣāṇaḥ sūryyo vetu svāhā //10 //*

य. (Yv.)२०.१६

यदि जाग्रद्यदि स्वप्नऽएनां सि चकृमा वयम्।
सूर्यो मा तस्मादेनसो विश्वान्मुंचत्वं हसः ॥१६॥
*yadi jāgradyadi svapna'enāṁ si chakṛmā vayam /*
*sūryo mā tasmādenaso viśvānmuṁchatvaṁ hasaḥ //16 //*

य. (Yv.)३३.७४

तिरश्चीनो विततो रश्मिरेषामधः स्विदासी३दुपरि स्विदासी३त् ।
रेतोधाऽआसन्महिमानऽआसन्त्स्वधाऽअवस्तात्प्रयतिः परस्तात् ॥७४॥
*tiraśchīno vitato raśmireṣāmadhaḥ svidāsī3dupari svidāsī3t /*
*retodhā'āsanmahimāna'āsantsvadhā'avastātprayatiḥ parastāt //74 //*

८१. सूर्यादयः (Sūryādayaḥ) - य. (Yv.)२३.१०; ४६

य. (Yv.)२३.१०

सूर्यऽएकाकी चरति चन्द्रमा जायते पुनः। अग्निर्हिमस्य भेषजं भूमिरावपनं महत् ॥१०॥
*sūrya'ekākī charati chandramā jāyate punaḥ /*
*agniārhimasya bheṣajaṁ bhūmirāvapanaṁ mahat //10 //*

य. (Yv.)२३.४६

सूर्यऽएकाकी चरति चन्द्रमा जायते पुनः। अग्निर्हिमस्य भेषजं भूमिरावपनं महत् ॥४६॥
*sūrya'ekākī charati chandramā jāyate punaḥ /*
*agniārhimasya bheṣajaṁ bhūmirāvapanaṁ mahat //46 //*

८२. सोमः (Somaḥ) - य. (Yv.)१९.१

स्वाद्वीं त्वा स्वादुना तीव्रा तीव्रेणामृताममृतेन। मधुमतीं मधुमता सृजामि सं सोमेन । सोमोऽस्यश्विभ्यां पच्यस्व सरस्वत्यै पच्यस्वेन्द्राय सुत्राम्णे पच्यस्व ॥१॥
*svādvīṁ tvā svādunā tīvrā tīvreṇāmṛtāmamṛtena / madhumatīṁ madhumatā sṛjāmi saṁ somena / somo'syaśvibhyāṁ pachyasva sarasvatyai pachyasvendrāya sutrāmṇe pachyasva //1 //*

८३. सोमादयः (Somādayaḥ) - य. (Yv.)२३.३२ ; २४.२

य. (Yv.)२३.३२

दधिक्रावणोऽअकारिषं जिष्णोरश्वस्य वाजिनः ।
सुरभि नो मुखा करत्प्रणाऽआयूं षि तारिषत् ॥३२॥
*dadhikrāvaṇo'akāriṣaṁ jiṣṇoraśvasya vājinaḥ /*
*surabhi no mukhā karatpraṇā'āyūṁ ṣi tāriṣat //32 //*

य. (Yv.)२४.२

रोहितो धूम्ररोहितः कर्कन्धुरोहितस्ते सौम्या बभ्रुररुणबभुः शुकबभ्रुस्ते वारुणाः शितिरन्ध्रोऽन्यतः शितिरन्ध्रः समन्तशितिरन्ध्रस्ते सावित्राः शितिबाहुरन्यतः शितिबाहुः समन्तशितिबाहुस्ते बार्हस्पत्याः पृषती क्षुद्रपृषती स्थूलपृषती ता मैत्रावरुणयः ॥२॥
*rohito dhūmrarohitaḥ karkandhurohitaste saumyā babhruraruṇababhuḥ śukababhruste vāruṇāḥ śitirandhro'nyataḥ śitirandhraḥ samantaśitirandhraste sāvitrāḥ śitibāhuranyataḥ śitibāhuḥ samantaśitibāhuste bārhaspatyāḥ pṛṣatī kṣudrapṛṣatī sthūlapṛṣatī tā maitrāvaruṇayaḥ //2 //*

८४. स्त्रियः (Striyaḥ) - य. (Yv.)२३.३६-३७

नार्य्यस्ते पत्न्यो लोम विचिन्वन्तु मनीषया ।
देवानां पत्न्यो दिशः सूचीभिः शम्यन्तु त्वा ॥३६॥
रजता हरिणीः सीसा युजो युज्यन्ते कर्मभिः ।
अश्वस्य वाजिनस्त्वचि सिमाः शम्यन्तु शम्यन्तीः ॥३७॥
*nāryyaste patnyo loma vichinvantu manīṣayā* ।
*devānāṁ patnyo diśaḥ sūchībhiḥ śamyantu tvā* ॥36॥
*rajatā hariṇīḥ sīsā yujo yujyante karmabhiḥ* ।
*aśvasya vājinastvachi simāḥ śamyantu śamyantīḥ* ॥37॥

८५. श्री (Śrī) - य. (Yv.)२३.२६-२७

ऊर्ध्वामेनामुच्छ्रापय गिरौ भारंहरन्निव । अथास्यै मध्यमेधतांशीते वाते पुनन्निव ॥२६॥
ऊर्ध्वमेनमुच्छ्रयताद् गिरौ भारंहरन्निव । अथास्य मध्यमेजतु शीते वाते पुनन्निव ॥२७॥
*ūrdhvāmenāmuchchhrāpaya girau bhāraṁharanniva* । *athāsyai*
*madhyamedhatāṁśīte vāte punanniva* ॥26॥
*ūrdhvamenamuchchhrayatād girau bhāraṁharanniva* ।
*athāsya madhyamejatu śīte vāte punanniva* ॥27॥

८६. हिरण्यगर्भः (Hiraṇyagarbhaḥ) - य. (Yv.)२५.१०

हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेकऽआसीत् ।
स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम ॥१०॥
*hiraṇyagarbhaḥ samavartatāgre bhūtasya jātaḥ patireka'āsīt* ।
*sa dādhāra pṛthivīṁ dyāmutemāṁ kasmai devāya haviṣā vidhema* ॥10॥

**३८१. प्रजापतिः (साग्री.सास्वा.) इन्द्रः प्रजापतिः विष्णु र्विश्वामित्रो वा (सार्षेदी.) (Prajāpatiḥ [Ssb.Sas.] Indraḥ Prajāpatiḥ Viṣṇu Rviśvāmitro Vā [Sad.])**

१. इन्द्रः त्रैलोक्यात्मा (साग्री.सास्वा.); इन्द्रः (सार्षेदी.) (Indraḥ Trailokyātmā [Ssb.Sas.]; Indraḥ [Sad.])- सा. (Sv.) ६४१-६५०

विदा मघवन् विदा गातुमनुशंसिषो दिशः। शिक्षा शचीनां पते पूर्वीणां पुरूवसो ॥१॥
आभिषद्वमभिष्टिभिः स्वाऽ३र्न्नांशुः। प्रचेतन प्रचेतयेन्द्र द्युम्नाय न इषे ॥२॥
एवा हि शक्रो राये वाजाय वज्रिवः ।
शविष्ठ वज्रिन्नृंजसे मंहिष्ठ वज्रिन्नृंजसे। आ याहि पिब मत्स्व ॥३॥
विदा राये सुवीर्य भवो वाजानां पतिर्वशाँ अनु। मंहिष्ठ वज्रिन्नृंजसे यः शविष्ठः शूराणाम् ॥४।
यो मंहिष्ठो मघोनमंशुर्न्न शोचिः। चिकित्वो अभि नो नयेंद्रो विदे तमु स्तुहि ॥५॥
ईशे हि शक्रस्तमूतये हवामहे जेतारमपराजितम्।
स नः स्वर्षदति द्विषः क्रतुश्छन्द ऋतं बृहत् ॥६॥
इन्द्र धनस्य सातये हवामहे जेतारमपराजितम्।
स नः स्वर्षदति द्विषः स नः स्वर्षदति द्विषः ।७॥
पूर्वस्य यत्ते अद्रिवोंऽशुर्मदाय। सुम्न आ धेहि नो वसो पूर्तिः शविष्ठ शस्यते ।
वशी हि शक्रो नूनं तन्नव्यं संन्यसे ॥८॥
प्रभो जनस्य वृत्रहन्त्समर्येषु ब्रवावहै। शूरो यो गोषु गच्छति सखा सुशेवो अद्वयुः ॥९॥
एवाह्योऽ३ऽ३व। एवां ह्यग्ने। एवाहीन्द्र। एवा हि पूषन्। एवा हि देवाः ॥१०॥
*vidā maghavan vidā gātumanuśaṁsiṣo diśaḥ* ।
*śikṣā śachīnāṁ pate pūrvīṇāṁ purūvaso* ॥1॥
*ābhiṣatvamabhiṣṭibhiḥ svā'3rnnāśuḥ* ।
*prachetana prachetayendra dyumnāya na iṣe* ॥2॥
*evā hi śakro rāye vājāya vajrivaḥ* ।
*śaviṣṭha vajrinnṛṁjase maṁhiṣṭha vajrinnṛṁjase* । *ā yāhi piba matsva* ॥3॥
*vidā rāye suvīrya bhavo vājānāṁ patirvaśām̐ anu* ।

*maṁhiṣṭha vajrinnṛṁjase yaḥ śaviṣṭhaḥ śūrāṇām ॥4 ।*
*yo maṁhiṣṭho maghonamaṁśurnna śochiḥ ।*
*chikitvo abhi no nayeṁdro vide tamu stuhi ॥5 ॥*
*īśe hi śakrastamūtaye havāmahe jetāramaparājitam ।*
*sa naḥ svarṣadati dviṣaḥ kratuśchhanda ṛtaṁ bṛhat ॥6 ॥*
*indra dhanasya sātaye havāmahe jetāramaparājitam ।*
*sa naḥ svarṣadati dviṣaḥ sa naḥ svarṣadati dviṣaḥ ।7 ॥*
*pūrvasya yatte adrivoṁ'śurmadāya । sumna ā dhehi no vaso pūrtiḥ śaviṣṭha śasyate ।*
*vaśī hi śakro nūnaṁ tannavyaṁ saṁnyase ॥8 ॥*
*prabho janasya vṛtrahantsamaryeṣu bravāvahai ।*
*śūro yo goṣu gachchhati sakhā suśevo advayuḥ ॥9 ॥*
*evāhyo'3'3va । evāṁ hyagne । evāhīndra । evā hi pūṣan । evā hi devāḥ ॥10 ॥*

### ३८२. प्रजापतिः परमेष्ठी (Prajāpatiḥ Parameṣṭhī)

१. भाववृत्तम् (Bhāvavṛttam) - ऋ. (Rv.)१०.१२९.१-७

नासदासीन्नो सदासीत्तदानीं नासीद्रजो नो व्योमा परो यत् ।
किमावरीवः कुह कस्य शर्मन्नम्भः किमासीद्गहनं गभीरम् ॥१॥
न मृत्युरासीदमृतं न तर्हि न रात्र्या अह्न आसीत्प्रकेतः ।
आनीदवातं स्वधया तदेकं तस्माद्धान्यन्न परः किं चनास ॥२॥
तम आसीत्तमसा गूळ्हमग्रेऽप्रकेतं सलिलं सर्वमा इदम् ।
तुच्छ्येनाभ्वपिहितं यदासीत्तपसस्तन्महिनाजायतैकम् ॥३॥
कामस्तदग्रे समवर्तताधि मनसो रेतः प्रथमं यदासीत् ।
सतो बन्धुमसति निरविन्दन्हृदि प्रतीष्या कवयो मनीषा ॥४॥
तिरश्चीनो विततो रश्मिरेषामधः स्विदासी३दुपरि स्विदासी३त् ।
रेतोधा आसन्महिमान आसन्त्स्वधा अवस्तात्प्रयतिः परस्तात् ॥५॥
को अद्धा वेद क इह प्र वोचत्कुत आजाता कुत इयं विसृष्टिः ।
अर्वाग्देवा अस्य विसर्जनेनाथा को वेद यत आबभूव ॥६॥
इह विसृष्टिर्यत आबभूव यदि वा दधे यदि वा न ।
यो अस्याध्यक्षः परमे व्योमन्त्सो अंग वेद यदि वा न वेद ॥७॥

*nāsadāsīnno sadāsīttadānīṁ nāsīdrajo no vyomā paro yat ।*
*kimāvarīvaḥ kuha kasya śarmannambhaḥ kimāsīdgahanaṁ gabhīram ॥1 ॥*
*na mṛtyurāsīdamṛtaṁ na tarhi na rātrayā ahna āsītpraketaḥ ।*
*ānīdavātaṁ svadhayā tadekaṁ tasmāddhānyanna paraḥ kiṁ chanāsa ॥2 ॥*
*tama āsīttamasā gūḻahamagre'praketaṁ salilaṁ sarvamā idam ।*
*tuchchhyenābhvapihitaṁ yadāsīttapasastanmahinājāyataikam ॥3 ॥*
*kāmastadagre samavartatādhi manaso retaḥ prathamaṁ yadāsīt ।*
*sato bandhumasati niravindanhṛdi pratīṣyā kavayo manīṣā ॥4 ॥*
*tiraśchīno vitato raśmireṣāmadhaḥ svidāsī3dupari svidāsī3t ।*
*retodhā āsanmahimāna āsantsvadhā avastātprayatiḥ parastāt ॥5 ॥*
*ko addhā veda ka iha pra vochatkuta ājātā kuta iyaṁ visṛṣṭiḥ ।*
*arvāgdevā asya visarjanenāthā ko veda yata ābabhūva ॥6 ॥*
*iha visṛṣṭiryata ābabhūva yadi vā dadhe yadi vā na ।*
*yo asyādhyakṣaḥ parame vyomantso aṁga veda yadi vā na veda ॥7 ॥*

२. याः (Yāḥ) - य. (Yv.)१.२; ७; १४; १५; २१; २७-३१

वसोः पवित्रमसि द्यौरसि पृथिव्यसि मातरिश्वनो घर्मोऽसि विश्वधा असि ।
परमेण धाम्ना दृंहस्व मा ह्वार्मा ते यज्ञपतिर्ह्वार्षीत ॥२॥
प्रत्युष्टंरक्षः प्रत्युष्टा अरातयो निष्टप्तं क्षो निष्टप्ता अरातयः । उर्वन्तरिक्षमन्वेमि ॥७॥
शर्मास्यवधूतं रक्षोऽवधूता अरातयोऽदित्यास्त्वगसि प्रति त्वादितिर्वेत्तु ।

अद्रिरसि वानस्पत्यो ग्रावाऽसि पृथुबुध्नः प्रति त्वाऽदित्यास्त्वग्वेत्तु ॥१४॥
अग्नेस्तनूरसिवाचो विसर्जनं देववीतयेत्वा गृह्णामि बृहद्ग्रावाऽसि वानस्पत्यः स इदं
देवेभ्यो हविः शमीष्व सुशमि शमीष्व। हविष्कृदेहि हविष्कृदेहि ॥१५॥
देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम्।
सं वपामि समाप ओषधीभिः समोषधयो रसेन।
सं रेवतीर्जगतीभिः पृच्यन्तांसं मधुमतीर्मधुमतीभिः पृच्यन्ताम् ॥२१॥
गायत्रेण त्वा छन्दसा परिगृह्णामि त्रैष्टुभेन त्वा छन्दसा परिगृह्णामि
जागतेन त्वा छन्दसा परिगृह्णामि।
सुक्ष्मा चासि शिवा चासि स्योना चासि सुषदा चास्यूर्जस्वती चासि पयस्वती च ॥२७॥
पुरा क्रूरस्य विसृपो विरप्शिन्नुदादाय पृथिवीं जीवदानुम्।
यामैरयँश्चन्द्रमसि स्वधाभिस्तामु धीरासो अनुदिश्य यजन्ते।
प्रोक्षणीरासादय द्विषतो वधोऽसि ॥२८॥
प्रत्युष्टंरक्षः प्रत्युष्टा अरातयो निष्टप्तंरक्षो निष्टप्ता अरातयः।
अनिशितोऽसि सपत्नक्षिद्वाजिनं त्वा वाजेध्यायै सम्मार्ज्मि।
प्रत्युष्टं रक्षः प्रत्युष्टा अरातयो निष्टप्तंरक्षो निष्टप्ता अरातयः ।
अनिशितोऽसि सपत्नक्षिद्वाजिनीं त्वा वाजेध्यायै सम्मार्ज्मि ॥२९॥
आदित्यै रास्नासि विष्णोर्वेष्पोऽस्यूर्जे त्वाऽदब्धेन त्वा चक्षुषावपश्यामि ।
अग्नेर्जिह्वासि सुहूर्देवेभ्यो धाम्ने धाम्ने मे भव यजुषे यजुषे ॥३०॥
सवितुस्त्वा प्रसव उत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः ।
सवितुर्वः प्रसव उत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः ।
तेजोऽसि शुक्रमस्यमृतमसि धाम नामासि प्रियं देवानामनाधृष्टं देवयजनमसि ॥३१॥

*vasoḥ pavitramasi dyaurasi pṛthivyasi mātariśvano gharmo'si viśvadhā asi /*
*parameṇa dhamnā dṛṁhasva mā hnārmā te yāpatirhnārṣīta //2 //*
*pratyuṣṭaṁrakṣaḥ pratyuṣṭā arātayo niṣṭaptaṁ kṣo niṣṭaptā arātayaḥ /*
*urvantarikṣamanvemi //7 //*
*śarmāsyavadhūtaṁ rakṣo'vadhūtā arātayo'dityāstvagasi prati tvāditirvettu /*
*adrirasi vānaspatyo grāvā'si pṛthubudhnaḥ prati tvā'dityāstvagvettu //14 //*
*agnestanūrasivācho visarjanaṁ devavītayetvā gṛhṇāmi bṛhadgrāvā'si vānaspatyaḥ sa*
*idaṁ devebhyo haviḥ śamīṣva suśami śamīṣva / haviṣkṛdehi haviṣkṛdehi //15 //*
*devasya tvā savituḥ prasave'śvinorbāhubhyāṁ pūṣṇo hastābhyām /*
*saṁ vapāmi samāpa Oṣadhībhiḥ samoṣadhayo rasena /*
*saṁ revatīrjagatībhiḥ pṛchyantāṁsaṁ madhumatīrmadhumatībhiḥ pṛchyantām //21 //*
*gāyatreṇa tvā chhandasā parigṛhṇāmi traiṣṭubhena tvā chhandasā parigṛhṇāmi*
*jāgatena tvā chhandasā parigṛhṇāmi /*
*sukṣamā chāsi śivā chāsi syonā chāsi suṣadā chāsyūrjasvatī chāsi payasvatī cha //27 //*
*purā krūrasya visṛpo virapśinnudādāya pṛthivīṁ jīvadānum /*
*yāmairayaṁ̐śchandramasi svadhābhistāmu dhīrāso anudiśya yajante /*
*prokṣaṇīrāsādaya dviṣato vadho'si //28 //*
*pratyuṣṭaṁrakṣaḥ pratyuṣṭā arātayo niṣṭaptaṁrakṣo niṣṭaptā arātayaḥ /*
*aniśito'si sapatnakṣidvājinaṁ tvā vājedhyāyai sammārjmi /*
*pratyuṣṭaṁ rakṣaḥ pratyuṣṭā arātayo niṣṭaptaṁrakṣo niṣṭaptā arātayaḥ /*
*aniśito'si sapatnakṣidvājinīṁ tvā vājedhyāyai sammārjmi //29 //*
*ādityai rāsnāsi viṣṇorveṣpo'syūrje tvā'dabdhena tvā chakṣuṣāvapaśyāmi /*
*agnerjihnāsi suhūrdevebhyo dhāmne dhāmne me bhava yajuṣe yajuṣe //30 //*
*savitustvā prasava utpunāmyachchhidreṇa pavitreṇa sūryasya raśmibhiḥ /*
*saviturvaḥ prasava utpunāmyachchhidreṇa pavitreṇa sūryasya raśmibhiḥ /*
*tejo'si śukramasyamṛtamasi dhāma nāmāsi priyaṁ devānāmanādhṛṣṭaṁ*
*devayajanamasi //31 //*

## ३८३. प्रजापतिर्वाच्यः (Prajāpatirvāchyaḥ)

१. पवमानः सोमः (Pavamānaḥ Somaḥ) - ऋ. (Rv.)९.८४.१-५

पवस्व देवमादनो विचर्षणिरप्सा इन्द्राय वरुणाय वायवे ।
कृधी नो अद्य वरिवः स्वस्तिमदुरुक्षितौ गृणीहि दैव्यं जनम् ॥१॥
आ यस्तस्थौ भुवनान्यमर्त्यो विश्वानि सोमः परि तान्यर्षति ।
कृण्वन्त्संचृतं विचृतमभिष्टय इन्दुः सिषक्त्युषसं न सूर्यः ॥२॥
आ यो गोभिः सृज्यत ओषधीष्वा देवानां सुम्न इषयन्नुपावसुः ।
आ विद्युता पवते धारया सुत इन्द्रं सोमो मादयन्दैव्यं जनम् ॥३॥
एष स्य सोमः पवते सहस्रजिद्धिन्वानो वाचमिषिरामुषर्बुधम् ।
इन्दुः समुद्रमुदियर्ति वायुभिरेन्द्रस्य हार्दि कलशेषु सीदति ॥४॥
अभि त्यं गावः पयसा पयोवृधं सोमं श्रीणन्ति मतिभिः स्वर्विदम् ।
धनंजयः पवते कृत्व्यो रसो विप्रः कविः काव्येना स्वर्चनाः ॥५॥

*pavasva devamādano vicharṣaṇirapsā indrāya varuṇāya vāyave /*
*kṛdhī no adya varivaḥ svastimadurukṣitau gṛṇīhi daivyaṁ janam //1 //*
*ā yastasthau bhuvanānyamartyo viśvāni somaḥ pari tānyarṣati /*
*kṛṇvantsaṁchṛtaṁ vichṛtamabhiṣṭaya induḥ siṣaktyuṣasaṁ na sūryaḥ //2 //*
*ā yo gobhiḥ sṛjyata Oṣadhīṣvā devānāṁ sumna iṣayannupāvasuḥ /*
*ā vidyutā pavate dhārayā suta indraṁ somo mādayandaivyaṁ janam //3 //*
*eṣa sya somaḥ pavate sahasrajiddhinvāno vāchamiṣirāmuṣarbudham /*
*induḥ samudramudiyarti vāyubhirendrasya hārdi kalaśeṣu sīdati //4 //*
*abhi tyaṁ gāvaḥ payasā payovṛdhaṁ somaṁ śrīṇanti matibhiḥ svarvidam /*
*dhanaṁjayaḥ pavate kṛtvyo raso vipraḥ kaviḥ kāvyenā svarchanāḥ //5 //*

## ३८४. प्रजापतिर् वैश्वामित्रः (साग्री. ५५३) प्रजापतिः (ऋसर्व.) (Prajāpatir Vaiśvāmitraḥ [Ssb. 553) Prrajāpatiḥ [Rss.])

१. पवमानः सोमः (Pavamānaḥ Somaḥ) - ऋ. (Rv.)९.१०१.१३-१६

प्र सुन्वानस्यान्धसो मर्तो न वृत तद्वचः ।
अप श्वानमराधसं हता मखं न भृगवः ॥१३॥
आ जामिरत्के अव्यत भुजे न पुत्र ओण्योः
सरज्जारो न योषणां वरो न योनिमासदम् ॥१४॥
स वीरो दक्षसाधनो वि यस्तस्तम्भ रोदसी ।
हरिः पवित्रे अव्यत वेधा न योनिमासदम् ॥१५॥
अव्यो वारेभिः पवते सोमो गव्ये अधि त्वचि ।
कनिक्रदद्वृषा हरिरिन्द्रस्याभ्येति निष्कृतम् ॥१६॥

*pra sunvānasyāndhaso marto na vṛta tadvachaḥ /*
*apa śvānamarādhasaṁ hatā makhaṁ na bhṛgavaḥ //13 //*
*ā jāmiratke avyata bhuje na putra Oṇyoḥ*
*sarajjāro na yoṣaṇāṁ varo na yonimāsadam //14 //*
*sa vīro dakṣasādhano vi yastastambha rodasī /*
*hariḥ pavitre avyata vedhā na yonimāsadam //15 //*
*avyo vārebhiḥ pavate somo gavye adhi tvachi /*
*kanikradadvṛṣā haririndrasyābhyeti niṣkṛtam //16 //*

## ३८५. प्रजापतिर् वैश्वामित्रो वाच्यो वा (Prajāpatir Vaiśvāmitro Vāchyo Vā)

१. अग्निः (Agniḥ) - ऋ. (Rv.)३.५५.२-१०

मो षू णो अत्र जुहुरन्त देवा मा पूर्वे अग्ने पितरः पदाः ।
पुराण्योः सद्मनोः केतुरन्तर्महद्देवानामसुरत्वमेकम् ॥२॥
वि मे पुरुत्रा पतयन्ति कामाः शम्यच्छा दीद्ये पूर्व्याणि ।

समिद्धे अग्नावृतमिद्वदेम महद्देवानामसुरत्वमेकम् ॥३॥
समानो राजा विभृतः पुरुत्रा शये शयासु प्रयुतो वनानुः ।
अन्या वत्सं भरति क्षेति माता महद्देवानामसुरत्वमेकम् ॥४॥
आक्षित्पूर्वास्वपरा अनूरुत्सद्यो जातासु तरुणीष्वन्तः ।
अन्तर्वतीः सुवते अप्रवीता महदेवानामसुरत्वमेकम् ॥५॥
शयुः परस्तादध नु द्विमाताबन्धनश्चरति वत्स एकः ।
मित्रस्य ता वरुणस्य व्रतानि महद्देवानामसुरत्वमेकम् ॥६॥
द्विमाता होता विदथेषु सम्राळन्वग्रं चरति क्षेति बुध्नः ।
प्र रण्यानि रण्यवाचो भरन्ते महद्देवानामसुरत्वमेकम् ॥७॥
शूरस्येव युध्यतो अन्तमस्य प्रतीचीनं दद्दशे विश्वमायत् ।
अन्तर्मतिश्चरति निष्षिधं गोर्महद्देवानामसुरत्वमेकम् ॥८॥
नि वेवेति पलितो दूत आस्वन्तर्महांश्चरति रोचनेन ।
वपूंषि बिभ्रदभि नो वि चष्टे महद्देवानामसुरत्वमेकम् ॥९॥
विष्णुर्गोपाः परमं पाति पाथः प्रिया धामान्यमृता दधानः ।
अग्निष्टा विश्वा भुवनानि वेद महद्देवानामसुरत्वमेकम् ॥१०॥

*mo ṣū ṇo atra juhuranta devā mā pūrve agne pitaraḥ padāḥ /*
*purāṇyoḥ sadmanoḥ keturantarmahaddevānāmasuratvamekam //2 //*
*vi me purutrā patayanti kāmāḥ śamyachchhā dīdye pūrvyāṇi /*
*samiddhe agnāvṛtamidvadema mahaddevānāmasuratvamekam //3 //*
*samāno rājā vibhṛtaḥ purutrā śaye śayāsu prayuto vanānuḥ /*
*anyā vatsaṁ bharati kṣeti mātā mahaddevānāmasuratvamekam //4 //*
*ākṣitpūrvāsvaparā anūrutsadyo jātāsu taruṇīṣvantaḥ /*
*antarvatīḥ suvate apravītā mahadevānāmasuratvamekam //5 //*
*śayuḥ parastādadha nu dvimātābandhanaścharati vatsa ekaḥ /*
*mitrasya tā varuṇasya vratāni mahaddevānāmasuratvamekam //6 //*
*dvimātā hotā vidatheṣu samrāḻanvagraṁ charati kṣeti budhnaḥ /*
*pra raṇyāni raṇyavācho bharante mahaddevānāmasuratvamekam //7 //*
*śūrasyeva yudhyato antamasya pratīchīnaṁ dadṛśe viśvamāyat /*
*antarmatiścharati niṣṣidhaṁ gormahaddevānāmasuratvamekam //8 //*
*ni veveti palito dūta āsvantarmahāṁścharati rochanena /*
*vapūṁṣi bibhradabhi no vi chaṣṭe mahaddevānāmasuratvamekam //9 //*
*viṣṇurgopāḥ paramaṁ pāti pāthaḥ priyā dhāmānyamṛtā dadhānaḥ /*
*agniṣṭā viśvā bhuvanāni veda mahaddevānāmasuratvamekam //10 //*

२. अहोरात्रौ (Ahorātrau) - ऋ. (Rv.)३.५५.११

नाना चक्राते यम्या३ वपूंषि तयोरन्यद्रोचते कृष्णमन्यत् ।
श्यावी च यदरुषी च स्वसारौ महद्देवानामसुरत्वमेकम् ॥११॥

*nānā chakrāte yamyā3 vapūṁṣi tayoranyadrochate kṛṣṇamanyat /*
*śyāvī cha yadaruṣī cha svasārau mahaddevānāmasuratvamekam //11 //*

३. इन्द्रः पर्जन्यात्मा त्वष्टा वा अग्निश्च (Indraḥ Parjanyātmā Tvaṣṭā Vā Agniścha) - ऋ. (Rv.)३.५५.१७-२२

यदन्यासु वृषभो रोरवीति सवो अन्यस्मिन्यूथे नि दधाति रेतः ।
स हि क्षपावान्त्स भगः स राजा महद्देवानामसुरत्वमेकम् ॥१७॥
वीरस्य नु स्वश्व्यं जनासः प्र नु वोचाम विदुरस्य देवाः ।
षोळहा युक्ताः पंचपंचा वहन्ति महद्देवानामसुरत्वमेकम्॥१८॥
देवस्त्वष्टा सविता विश्वरूपः पुपोष प्रजाः पुरुधा जजान ।
इमा च विश्वा भुवनान्यस्य महद्देवानामसुरत्वमेकम् ॥१९॥
मही समैरच्चम्वा समीची उभे ते अस्य वसुना न्यृष्टे ।

श्रृण्वे वीरो विन्दमानो वसूनि महद्देवानामसुरत्वमेकम् ॥२०॥
इमां च नः पृथिवीं विश्वधाया उप क्षेति हितमित्रो न राजा ।
पुरःसदः शर्मसदो न वीरा महद्देवानामसुरत्वमेकम् ॥२१॥
निष्षिध्वरीस्त ओषधीरुतापो रयिं त इन्द्र पृथिवी बिभर्ति ।
सखायस्ते वामभाजः स्याम महद्देवानामसुरत्वमेकम् ॥२२॥

*yadanyāsu vṛṣabho roravīti savo anyasminyūthe ni dadhāti retaḥ /*
*sa hi kṣapāvāntsa bhagaḥ sa rājā mahaddevānāmasuratvamekam //17 //*
*vīrasya nu svaśvyaṁ janāsaḥ pra nu vochāma vidurasya devāḥ /*
*ṣoḷahā yuktāḥ paṁchapaṁchā vahanti mahaddevānāmasuratvamekam //18 //*
*devastvaṣṭā savitā viśvarūpaḥ pupoṣa prajāḥ purudhā jajāna /*
*imā cha viśvā bhuvanānyasya mahaddevānāmasuratvamekam //19 //*
*mahī samairachchamvā samīchī ubhe te asya vasunā nyṛṣṭe /*
*śṛṇve vīro vindamāno vasūni mahaddevānāmasuratvamekam //20 //*
*imāṁ cha naḥ pṛthivīṁ viśvadhāyā upa kṣeti hitamitro na rājā /*
*puraḥsadaḥ śarmasado na vīrā mahaddevānāmasuratvamekam //21 //*
*niṣṣidhvarīsta Oṣadhīrutāpo rayiṁ ta indra pṛthivī bibharti /*
*sakhāyaste vāmabhājaḥ syāma mahaddevānāmasuratvamekam //22 //*

४. उषा (Uṣā) - ऋ. (Rv.)३.५५.१

उषसः पूर्वा अध यद्व्यूषुर्महद्वि जो अक्षरं पदे गोः ।
व्रता देवानामुप नु प्रभूषन्महद्देवानामसुरत्वमेकम् ॥१॥

*uṣasaḥ pūrvā adha yadvyūṣurmahadvi jo akṣaraṁ pade goḥ /*
*vratā devānāmupa nu prabhūṣanmahaddevānāmasuratvamekam //1 //*

५. दिशः (Diśaḥ) - ऋ. (Rv.)३.५५.१६

आ धेनवो धुनयन्तामशिश्वीः सबर्दुघाः शशया अप्रदुग्धाः ।
नव्यानव्या युवतयो भवन्तीर्महद्देवानामसुरत्वमेकम् ॥१६॥

*ā dhenavo dhunayantāmaśiśvīḥ sabardughāḥ śaśayā apradugdhāḥ /*
*navyānavyā yuvatayo bhavantīrmahaddevānāmasuratvamekam //16 //*

६. रोदसी (Rodasī) - ऋ. (Rv.)३.५५.१२-१४

माता च यत्र दुहिता च धेनू सबर्दुधे धापयेते समीची ।
ऋतस्य ते सदसीळे अन्तर्महद्देवानामसुरत्वमेकम् ॥१२॥
अन्यस्या वत्सं रिहती मिमाय कया भुवा नि दधे धेनुरूधः ।
ऋतस्य सा पयसापिन्वतेळा महद्देवानामसुरत्वमेकम् ॥१३॥
पद्या वस्ते पुरुरूपा वपूंष्यूर्ध्वा तस्थौ त्र्यविं रेरिहाणा ।
ऋतस्य सद्म वि चरामि विद्वान्महद्देवानामसुरत्वमेकम् ॥१४॥

*mātā cha yatra duhitā cha dhenū sabardudhe dhāpayete samīchī /*
*ṛtasya te sadasīḷe antarmahaddevānāmasuratvamekam //12 //*
*anyasyā vatsaṁ rihatī mimāya kayā bhuvā ni dadhe dhenurūdhaḥ /*
*ṛtasya sā payasāpinvateḷā mahaddevānāmasuratvamekam //13 //*
*padyā vaste pururūpā vapūṁṣyūrdhvā tasthau trayaviṁ rerihāṇā /*
*ṛtasya sadma vi charāmi vidvānmahaddevānāmasuratvamekam //14 //*

७. रोदसी द्युनिशौ वा (Rodasī Dyuniśau Vā) - ऋ. (Rv.)३.५५.१५

पदे इव निहिते दस्मे अन्तस्तयोरन्यद् गुह्यमाविरन्यत् ।
सध्रीचीना पथ्या३ सो विषूची महद्देवानामसुरत्वमेकम् ॥१५॥

*pade iva nihite dasme antastayoranyad guhyamāviranyat /*
*sadhrīchīnā pathyā3 so viṣūchī mahaddevānāmasuratvamekam //15 //*

८. विश्वेदेवाः (Viśvedevāḥ) - ऋ. (Rv.)३.५४.१-२२ ; ३.५६.१-८

ऋ. (Rv.)३.५४.१-२२

इमं महे विदथ्याय शूषं शंकृत्व ईड्याय प्र जभ्रुः ।
श्रृणोतु नो दम्येभिरनीकैः शुणोत्वग्निर्दिव्यैरजस्रः ॥१॥
महि महे दिवे अर्चा पृथिव्यै कामो म इच्छंचरति प्रजानन् ।
ययोर्ह स्तोमे विदथेषु देवाः सपर्यवो मादयन्ते सचायोः ॥२॥
युवोर्ऋतं रोदसी सत्यमस्तु महे षु णः सुविताय प्र भूतम् ।
इदं दिवे नमो अग्ने पृथिव्यै सपर्यामि प्रयसा यामि रत्नम् ॥३॥
उतो हि वां पूर्व्या आविविद्र ऋतावरो रोदसी सत्यवाचः ।
नरश्चिद्वां समिथे शूरसातौ ववन्दिरे पृथिवी वेविदानाः ॥४॥
को अद्धा वेद क इह प्र वोचद्देवाँ अच्छा पथ्या३का समेति ।
दद्दश्र एषामवमा सदांसि परेषु या गुह्येषु व्रतेषु ॥५॥
कविर्नृचक्षा अभि षीमचष्ट ऋतस्य योना विघृते मदन्ती ।
नाना चक्राते सदनं यथा वेः समानेन क्रतुना संविदाने ॥६॥
समान्या वियुते दूरेअन्ते ध्रुवे पदे तस्थतुर्जागरूके ।
उत स्वसारा युवती भवन्ती आदु ब्रुवाते मिथुनानि नाम ॥७॥
विश्वेदेते जनिमा सं विविक्तो महो देवान्बिभ्रती न व्यथेते ।
एजद् ध्रुवं पत्यते विश्वमेकं चरत्पतत्रि विषुणं वि जातम् ॥८॥
सना पुराणमध्येम्यारान्महः पितुर्जनितुर्जामि तन्नः ।
देवासो यत्र पनितार एवैरुरौ पथि व्युते तस्थुरन्तः ॥९॥
इमं स्तोमं रोदसी प्र ब्रवीम्यृदूदराः श्रृणवन्नग्निजिह्वाः ।
मित्रः सम्राजो वरुणो युवान आदित्यासः कवयः पप्रथानाः ॥१०॥
हिरण्यपाणिः सविता सुजिह्वस्त्रिरा दिवो विदथे पत्यमानः ।
देवेषु च सवितः श्लोकमश्रेरादस्मभ्यमा सुव सर्वतातिम् ॥११॥
सुकृत्सुपाणिः स्ववाँ ऋतावा देवस्त्वष्टावसे तानि नो धात् ।
पूषण्वन्त ऋभवो मादयध्वमूर्ध्वग्रावाणो अध्वरमतष्ट ॥१२॥
विद्युद्रथा मरुत ऋष्टिमन्तो दिवो मर्या ऋतजाता अयासः ।
सरस्वती श्रृणवन्यियासो धाता रयिं सहवीरं तुरासः ॥१३॥
विष्णुं स्तोमासः पुरुदस्ममर्का भगस्येव कारिणो यामनि ग्मन् ।
उरुक्रमः ककुहो यस्य पूर्वीर्न मर्धन्ति युवतयो जनित्रीः ॥१४॥
इन्द्रो विश्वैर्वीर्यैः३ पत्यमान उभे आ पप्रौ रोदसी महित्वा ।
पुरन्दरो वृत्रहा धृष्णुषेणः संगभ्या न आ भरा भूरि पश्वः ॥१५॥
नासत्या मे पितरा बन्धुपृच्छा सजात्यमश्विनोश्चारु नाम ।
युवं हि स्थे रयिदौ नो रयीणां दात्रं रक्षेथे अकवैरदब्धा ॥१६॥
महत्तद्वः कवयश्चरु नाम यद्ध देवा भवथ विश्व इन्द्रे ।
सख ऋभुभिः पुरुहूत प्रियेभिरिमां धियं सातये तक्षता नः ॥१७॥
अर्यमा णो अदितिर्यियासोऽदब्धानि वरुणस्य व्रतानि ।
युयोत नो अनपत्यानि गन्तोः प्रजावान्नः पशुमाँ अस्तु गातुः ॥१८॥
देवानां दूतः पुरुध प्रसूतोऽनागान्नो वोचतु सर्वताता ।
शुणोतु नः पृथिवी द्यौरुतापः सूर्यो नक्षत्रैरुर्व१न्तरिक्षम् ॥१९॥
श्रृण्वन्तु नो वृषणः पर्वतासो ध्रुवक्षेमास इळया मदन्तः ।
आदित्यैर्नो अदितिः श्रृणोतु यच्छन्तु नो मरुतः शर्म भद्रम् ॥२०॥
सदा सुगः पितुमाँ अस्तु पन्था मध्वा देवा ओषधीः सं पिपृक्त ।
भगो मे अग्ने सख्ये न मृध्या उद्रायो अश्यां सदनं पुरुक्षोः ॥२१॥
स्वदस्व हव्या समिषो दिदीह्यस्मद्र्य१क्सं मिमीहि श्रवांसि ।
विश्वाँ अग्ने पृत्सु तांजेषि शत्रूनहा विश्वा सुमना दीदिही नः ।२२॥

*imaṁ mahe vidathyāya śūṣaṁ śaṁkṛtva īḍyāya pra jabhruḥ /*
*śṛṇotu no damyebhiranīkaiḥ śuṇotvagnirdivyairajasraḥ //1 //*
*mahi mahe dive archā pṛthivyai kāmo ma ichchhaṁcharati prajānan /*
*yayorha stome vidatheṣu devāḥ saparyavo mādayante sachāyoḥ //2 //*
*yuvoṛrtaṁ rodasī satyamastu mahe ṣu ṇaḥ suvitāya pra bhūtam /*
*idaṁ dive namo agne pṛthivyai saparyāmi prayasā yāmi ratnam //3 //*
*uto hi vāṁ pūrvyā āvividra ṛtāvaro rodasī satyavāchaḥ /*
*naraśvidvāṁ samithe śūrasātau vavandire pṛthivī vevidānāḥ //4 //*
*ko addhā veda ka iha pra vochaddevāṁ̐ achchhā pathyā3kā sameti /*
*dadṛśra eṣāmavamā sadāṁsi pareṣu yā guhyeṣu vrateṣu //5 //*
*kavirnṛchakṣā abhi ṣīmachaṣṭa ṛtasya yonā vighṛte madantī /*
*nānā chakrāte sadanaṁ yathā veḥ samānena kratunā saṁvidāne //6 //*
*samānyā viyute dūreante dhruve pade tasthaturjāgarūke /*
*uta svasārā yuvatī bhavantī ādu bruvāte mithunāni nāma //7 //*
*viśvedete janimā saṁ vivikto maho devānbibhratī na vyathete /*
*ejad dhruvaṁ patyate viśvamekaṁ charatpatatri viṣuṇaṁ vi jātam //8 //*
*sanā purāṇamadhyemyārānmahaḥ piturjaniturjāmi tannaḥ /*
*devāso yatra panitāra evairurau pathi vyute tasthurantaḥ //9 //*
*imaṁ stomaṁ rodasī pra bravīmyṛdūdarāḥ śṛṇavannagnijihnāḥ /*
*mitraḥ samrājo varuṇo yuvāna ādityāsaḥ kavayaḥ paprathānāḥ //10 //*
*hiraṇyapāṇiḥ savitā sujihnastrirā divo vidathe patyamānaḥ /*
*deveṣu cha savitaḥ ślokamaśrerādasmabhyamā suva sarvatātim //11 //*
*sukṛtsupāṇiḥ svavāṁ̐ ṛtāvā devastvaṣṭāvase tāni no dhāt /*
*pūṣaṇvanta ṛbhavo mādayadhvamūrdhvagrāvāṇo adhvaramataṣṭa //12 //*
*vidyudrathā maruta ṛṣṭimanto divo maryā ṛtajātā ayāsaḥ /*
*sarasvatī śṛṇavanyiāyāso dhātā rayiṁ sahavīraṁ turāsaḥ //13 //*
*viṣṇuṁ stomāsaḥ purudasmamarkā bhagasyeva kāriṇo yāmani gman /*
*urukramaḥ kakuho yasya pūrvīrna mardhanti yuvatayo janitrīḥ //14 //*
*indro viśvairvīryai3ḥ patyamāna ubhe ā paprau rodasī mahitvā /*
*purandaro vṛtrahā dhṛṣṇuṣeṇaḥ saṁgabhyā na ā bharā bhūri paśvaḥ //15 //*
*nāsatyā me pitarā bandhupṛchchhā sajātyamaśvinoścāru nāma /*
*yuvaṁ hi sthe rayidau no rayīṇāṁ dātraṁ rakṣethe akavairadabdhā //16 //*
*mahattadvaḥ kavayaścharu nāma yaddha devā bhavatha viśva indre /*
*sakha ṛbhubhiḥ puruhūta priyebhirimāṁ dhiyaṁ sātaye takṣatā naḥ //17 //*
*aryamā ṇo aditiryiāyāso'dabdhāni varuṇasya vratāni /*
*yuyota no anapatyāni gantoḥ prajāvānnaḥ paśumāṁ̐ astu gātuḥ //18 //*
*devānāṁ dūtaḥ purudha prasūto'nāgānno vochatu sarvatātā /*
*śuṇotu naḥ pṛthivī dyaurutāpaḥ sūryo nakṣatrairurva1ntarikṣam //19 //*
*śṛṇvantu no vṛṣaṇaḥ parvatāso dhruvakṣemāsa iḷayā madantaḥ /*
*ādityairno aditiḥ śṛṇotu yachchhantu no marutaḥ śarma bhadram //20 //*
*sadā sugaḥ pitumāṁ̐ astu panthā madhvā devā Oṣadhīḥ saṁ pipṛkta /*
*bhago me agne sakhye na mṛdhyā udrāyo aśyāṁ sadanaṁ purukṣoḥ //21 //*
*svadasva havyā samiṣo didīhyasmadrya1ksaṁ mimīhi śravāṁsi /*
*viśvaṁ̐ agne pṛtsu tāṁjeṣi śatrūnahā viśvā sumanā dīdihī naḥ /22 //*

ऋ. (Rv.)३.५६.१-८

वि मे पुरुत्रा पतयन्ति कामाः शम्यच्छा दीद्ये पूर्व्याणि ।
समिद्धे अग्नावृतमिद्वदेम महद्देवानामसुरत्वमेकम् ॥३॥
न ता मिनन्ति मायिनो न धीरा व्रता देवानां प्रथमा ध्रुवाणि ।
न रोदसी अद्रुहा वेद्याभिर्न पर्वता निनमे तस्थिवांसः ॥१॥

षड् भाराँ एको अचरन्बिभर्त्यृतं वर्षिष्ठमुप गाव आगुः ।
तिस्रो महीरुपरास्तस्थुरत्या गुहा द्वे निहिते दर्श्येका ॥२॥
त्रिपाजस्यो वृषभो विश्वरूप उत त्र्युधा पुरुध प्रजावान् ।
त्र्यनीकः पत्यते माहिनावान्त्स रेतोधा वृषभः शश्वतीनाम् ॥३॥
अभीक आसां पदवीरबोध्यादित्या नामह्वे चारु नाम ।
आपश्चिदस्मा अरमन्त देवीः पृथग्व्रजन्तीः परि षीमवृंजन् ॥४॥
त्री षधस्था सिन्धवस्त्रिः कवीनामुत त्रिमाता विदथेषु सम्राट् ।
ऋतावरीर्योषणास्तिस्रो अप्यास्त्रिरा दिवो विदथे पत्यमानाः ॥५॥
त्रिरा दिवः सवितर्वार्याणि दिवेदिव आ सुव त्रिर्नो अह्नः ।
त्रिधातु राय आ सुवा वसूनि भग त्रातर्धिषणे सातये धाः ॥६॥
त्रिरा दिवः सविता सोषवीति राजाना मित्रावरुणा सुपाणि ।
आपश्चिदस्य रोदसी चिदुर्वी रत्न भिक्षन्त सवितुः सवाय ॥७॥
त्रिरुत्तमा दूणशा रोचनानि त्रयो राजन्त्यसुरस्य वीराः ।
ऋतावान इषिरा दूळभासस्त्रिरा दिवो विदथे सन्तु देवाः ॥८॥

*vi me purutrā patayanti kāmāḥ śamyachchhā dīdye pūrvyāṇi /*
*samiddhe agnāvṛtamidvadema mahaddevānāmasuratvamekam //3 //*
*na tā minanti māyino na dhīrā vratā devānāṁ prathamā dhruvāṇi /*
*na rodasī adruhā vedyābhirna parvatā niname tasthivāṁsaḥ //1 //*
*ṣaḍ bhārāṁ̐ eko acharanbibhartyṛtaṁ varṣiṣṭhamupa gāva āguḥ /*
*tisro mahīruparāstasthuratyā guhā dve nihite darśyekā //2 //*
*tripājasyo vṛṣabho viśvarūpa uta trayudhā purudha prajāvān /*
*trayanīkaḥ patyate māhināvāntsa retodhā vṛṣabhaḥ śaśvatīnām //3 //*
*abhīka āsāṁ padavīrabodhyādityā nāmahne chāru nāma /*
*āpaśchidasmā aramanta devīḥ pṛthagvrajantīḥ pari ṣīmavṛṁjan //4 //*
*trī ṣadhasthā sindhavastriḥ kavīnāmuta trimātā vidatheṣu samrāṭ /*
*ṛtāvarīryoṣaṇāstisro apyāstrirā divo vidathe patyamānāḥ //5 //*
*trirā divaḥ savitarvāryāṇi divediva ā suva trirno ahnaḥ /*
*tridhātu rāya ā suvā vasūni bhaga trātardhiṣaṇe sātaye dhāḥ //6 //*
*trirā divaḥ savitā soṣavīti rājānā mitrāvaruṇā supāṇi /*
*āpaśchidasya rodasī chidurvī ratna bhikṣanta savituḥ savāya //7 //*
*triruttamā dūṇaśā rochanāni trayo rājantyasurasya vīrāḥ /*
*ṛtāvāna iṣirā dūḷabhāsastrirā divo vidathe santu devāḥ //8 //*

**३८६. प्रजापतिर् वैश्वामित्रो वाच्यो वा (साग्री.सास्वा.) प्रजापतिः (सार्षेदी.ऋसर्व.) (Prajāpatir Vaiśvāmitro Vāchyo Vā [Ssb.Sas.] Prajāpatiḥ [Sad. Rss.])**

१. पवमानः सोमः (Pavamānaḥ Somaḥ) - सा. (Sv.) ५५३; ७७४; १३८६-१३८८

सा. (Sv.) ५५३

प्र सुन्वानायान्धसो मर्तो न वष्ट तद्वचः। अप श्वानमराधसं हता मखं न भृगवः ॥९॥

*pra sunvānāyāndhaso marto na vaṣṭa tadvachaḥ / apa śvānamarādhasaṁ hatā makhaṁ na bhṛgavaḥ //9 //*

सा. (Sv.) ७७४

प्र सुन्वानायान्धसो मर्तो न वष्ट तद्वचः। अप श्वानमराधसं हता मखं न भृगवः ॥३॥

*pra sunvānāyāndhaso marto na vaṣṭa tadvachaḥ / apa śvānamarādhasaṁ hatā makhaṁ na bhṛgavaḥ //3 //*

सा. (Sv.) १३८६-१३८८

प्र सुन्वानायान्धसो मर्तो न वष्ट तद्वचः। अप श्वानमराधसं हता मखं न भृगवः ॥१॥
आ जामिरत्के अव्यत भुजे न पुत्र ओण्योः। सरज्जारो न योषणां वरो न योनिमासदम् ॥२॥
स वीरो दक्षसाधनो वि यस्तस्तम्भ रोदसी। हरिः पवित्रे अव्यत वेधा न योनिमासदम् ॥३॥

*pra sunvānāyāndhaso marto na vaṣṭa tadvachaḥ । apa śvānamarādhasaṁ hatā makhaṁ na bhṛgavaḥ ॥1॥*
*ā jāmiratke avyata bhuje na putra Oṇyoḥ । sarajjāro na yoṣaṇāṁ varo na yonimāsadam ॥2॥*
*sa vīro dakṣasādhano vi yastastambha rodasī । hariḥ pavitre avyata vedhā na yonimāsadam ॥3॥*

## ३८७. प्रजापत्यो याः (Prajāpatyo Yāḥ)

१. ऋषयः (Ṛṣayaḥ) - य. (Yv.)३४.४९

सहस्तोमाः सहच्छन्दसऽआवृतः सहप्रमाऽ अषयः सप्त दैव्याः ।
पूर्वेषां पन्थामनुदृश्य धीराऽअन्वालेभिरे रथ्यो न रश्मीन् ॥४९॥
*sahastomāḥ sahachchhandasa'āvṛtaḥ sahapramā' aṣayaḥ sapta daivyāḥ ।*
*pūrveṣāṁ panthāmanudṛśya dhīrā'anvālebhire rathyo na raśmīn ॥49॥*

## ३८८. प्रजावान् प्राजापत्यः (Prajāvān Prājāpatyaḥ)

१. अन्वृचं यजमान-यजमान पत्नी-अहोरात्राशिषः (Anvṛchaṁ Yajamāna-Yajamāna Patnī-Ahorātrāśiṣaḥ) - ऋ. (Rv.)१०.१८३.१-३

अपश्यं त्वा मनसा चेकितानं तपसो जातं तपसो विभूतम् ।
इह प्रजामिह रयिं रराणः प्र जायस्व प्रजया पुत्रकाम ॥१॥
अपश्यं त्वा मनसा दीध्यानां स्वायां तनू ऋत्व्ये नाधमानाम् ।
उप मामुच्चा युवतिर्बभूयाः प्र जायस्व प्रजया पुत्रकामे ॥२॥
अहं गर्भमदधामोषधीष्वहं विश्वेषु भुवनेष्वन्तः ।
अहं प्रजा अजनयं पृथिव्यामहं जनिभ्यो अपरीषु पुत्रान् ॥३॥
*apaśyaṁ tvā manasā chekitānaṁ tapaso jātaṁ tapaso vibhūtam ।*
*iha prajāmiha rayiṁ rarāṇaḥ pra jāyasva prajayā putrakāma ॥1॥*
*apaśyaṁ tvā manasā dīdhyānāṁ svāyāṁ tanū ṛtvye nādhamānām ।*
*upa māmuchchā yuvatirbabhūyāḥ pra jāyasva prajayā putrakāme ॥2॥*
*ahaṁ garbhamadadhāmoṣadhīṣvahaṁ viśveṣu bhuvaneṣvantaḥ ।*
*ahaṁ prajā ajanayaṁ pṛthivyāmahaṁ janibhyo aparīṣu putrān ॥3॥*

## ३८९. प्रतर्दनः काशिराजः (Pratardanaḥ Kāśirājaḥ)

१. इन्द्रः (Indraḥ) - ऋ. (Rv.)१०.१७९.२

श्रातं हविरो ष्विन्द्र प्र याहि जगाम सूरो अध्वनो विमध्यम् ।
परि त्वासते निधिभिः सखायः कुलपा न व्राजपतिं चरन्तम् ॥२॥
*śrātaṁ haviro ṣvindra pra yāhi jagāma sūro adhvano vimadhyam ।*
*pari tvāsate nidhibhiḥ sakhāyaḥ kulapā na vrājapatiṁ charantam ॥2॥*

## ३९०. प्रतर्दनो दैवोदासिः (Pratardano Daivodāsiḥ)

१. पवमानः सोमः (Pavamānaḥ Somaḥ) - ऋ. (Rv.)९.९६.१-२४; सा. (Sv.) ५२७; ५३२; ५३३; ९४३-९४५; ११७५-११७७

ऋ. (Rv.)९.९६.१-२४

प्र सेनानीः शूरो अग्रे रथानां गव्यन्नेति हर्षते अस्य सेना ।
भद्रान्कृण्वन्निन्द्रहवान्त्सखिभ्य आ सोमो वस्त्रा रभसानि दत्ते ॥१॥
समस्य हरिं हरयो मृजन्त्यश्वहयैरनिशितं नमोभिः ।
आ तिष्ठति रथमिन्द्रस्य सखा विद्वाँ एना सुमतिं यात्यच्छ ॥२॥
स नो देव देवताते पवस्व महे सोम प्सरस इन्द्रपानः ।
कृण्वन्नपो वर्षयन्द्यामुतेमामुरोरा नो वरिवस्या पुनानः ॥३॥
अजीतयेऽहतये पवस्व स्वस्तये सर्वतातये बृहते ।
तदुशन्ति विश्व इमे सखायस्तदहं वश्मि पवमान सोम ॥४॥

सोमः पवते जनिता मतीनां जनिता दिवो जनिता पृथिव्याः ।
जनिताग्नेर्जनिता सूर्यस्य जनितेन्द्रस्य जनितोत विष्णोः ॥५॥
ब्रह्मा देवानां पदवीः कवीनामृषिर्विप्राणां महिषो मृगाणाम् ।
श्येनो गृध्राणां स्वधितिर्वनानां सोमः पवित्रमत्येति रेभन् ॥६॥
प्रावीविपद्वाच ऊर्मिं न सिन्धुर्गिरः सोमः पवमानो मनीषाः ।
अन्तः पश्यन्वृजनेमावराण्या तिष्ठति वृषभो गोषु जानन् ॥७॥
स मत्सरः पृत्सु वन्वन्नवातः सहस्ररेता अभि वाजमर्ष ।
इन्द्रायेन्दो पवमानो मनीष्यं१शोरूर्मिमीरय गा इषण्यन् ॥८॥
परि प्रियः कलशे देववात इन्द्राय सोमो रण्यो मदाय ।
सहस्रधारः शतवाज इन्दुर्वाजी न सप्तिः समना जिगाति ॥९॥
स पूर्व्यो वसुविज्जायमानो मृजानो अप्सु दुदुहानो अद्रौ ।
अभिशस्तिपा भुवनस्य राजा विदद्गातुं ब्रह्मणे पूयमानः ॥१०॥
त्वया हि नः पितर सोम पूर्वे कर्माणि चक्रुः पवमान धीराः ।
वन्वन्नवातः परिधीँरपोर्णु वीरेभिरश्वैर्मघवा भवा नः ॥११॥
यथापवथा मनवे वयोधा अमित्रहा वरिवोविद्धविष्मान् ।
एवा पवस्व द्रविणं दधान इन्द्रे सं तिष्ठ जनयायुधानि ॥१२॥
पवस्व सोम मधुमाँ ऋतावापो वसानो अधि सानो अव्ये ।
अव द्रोणानि घृतवान्ति सीद मदिन्तमो मत्सर इन्द्रपानः ॥१३॥
वृष्टिं दिवः शतधारः पवस्व सहस्रसा वाजयुर्देववीतौ ।
सं सिन्धुभिः कलशे वावशानः समुस्रियाभिः प्रतिरन्न आयुः ॥१४॥
एष स्य सोमो मतिभिः पुनानोऽत्यो न वाजी तरतीदरातीः ।
पयो न दुग्धमदितेरिषिरमुर्विव गातुः सुयमो न वोळहा ॥१५॥
स्वायुधः सोतृभिः पूयमानोऽभ्यर्ष गुह्यं चारु नाम ।
अभि वाजं सप्तिरिव श्रवस्याभि वायुमभि गा देव सोम ॥१६॥
शिशुं जज्ञानं हर्यतं मृजन्ति शुम्भन्ति वह्निं मरुतो गणेन ।
कविर्गीर्भिः काव्येना कविः सन्त्सोमः पवित्रमत्येति रेभन् ॥१७॥
ऋषिमना य ऋषिकृत्स्वर्षाः सहस्रणीथः पदवीः कवीनाम् ।
तृतीयं धाम महिषः सिषासन्त्सोमो विराजमनु राजति ष्टुप् ॥१८॥
चमूषच्छ्येनः शकुनो विभृत्वा गोविन्दुर्द्रप्स आयुधानि बिभ्रत ।
अपामूर्मिं सचमानः समुद्रं तुरीयं धाम महिषो विवक्ति ॥१९॥
मर्यो न शुभ्रस्तन्वं मृजानोऽत्यो न सृत्वा सनये धनानाम् ।
वृषेव यूथा परि कोशमर्षन्कनिक्रदच्चम्वो३रा विवेश ॥२०॥
पवस्वेन्दो पवमानो महोभिः कनिक्रदत्परि वाराण्यर्ष ।
क्रीळंचम्वो३रा विश पूयमान इन्द्रं ते रसो मदिरो ममत्तु ॥२१॥
प्रास्य धारा बृहतीरसृग्रन्नक्तो गोभिः कलशाँ आ विवेश ।
साम कृण्वन्त्सामन्यो विपश्चित्क्रन्दन्नेत्यभि सख्युर्न जामिम् ॥२२॥
अपघ्नन्नेषि पवमान शत्रून्प्रियां न जारो अभिगीत इन्दुः ।
सीदन्वनेषु शकुनो न पत्वा सोमः पुनानः कलशेषु सत्ता ॥२३॥
आ ते रुचः पवमानस्य सोम योषेव यन्ति सुदुघाः सुधाराः ।
हरिरानीतः पुरुवारो अप्स्वचिक्रदत्कलशे देवयूनाम् ॥२४॥

*pra senānīḥ śūro agre rathānāṁ gavyanneti harṣate asya senā /*
*bhadrānkṛṇvannindrahavāntsakhibhya ā somo vastrā rabhasāni datte //1//*
*samasya hari harayo mṛjantyaśvahayairaniśitaṁ namobhiḥ /*
*ā tiṣṭhati rathamindrasya sakhā vidvām̐ enā sumatiṁ yātyachchha //2//*
*sa no deva devatāte pavasva mahe soma psarasa indrapānaḥ /*
*kṛṇvannapo varṣayandyāmutemāmurorā no varivasyā punānaḥ //3//*
*ajītaye'hataye pavasva svastaye sarvatātaye bṛhate /*

*taduśanti viśva ime sakhāyastadahaṁ vaśmi pavamāna soma* ॥4॥
*somaḥ pavate janitā matīnāṁ janitā divo janitā pṛthivyāḥ* ।
*janitāgnerjanitā sūryasya janitendrasya janitota viṣṇoḥ* ॥5॥
*brahmā devānāṁ padavīḥ kavīnāmṛṣirviprāṇāṁ mahiṣo mṛgāṇām* ।
*śyeno gṛdhrāṇāṁ svadhitirvanānāṁ somaḥ pavitramatyeti rebhan* ॥6॥
*prāvīvipadvācha ūrmi na sindhurgiraḥ somaḥ pavamāno manīṣāḥ* ।
*antaḥ paśyanvṛjanemāvarāṇyā tiṣṭhati vṛṣabho goṣu jānan* ॥7॥
*sa matasaraḥ pṛtsu vanvannavātaḥ sahasraretā abhi vājamarṣa* ।
*indrāyendo pavamāno manīṣyaṁ1śorūrmimīraya gā iṣaṇyan* ॥8॥
*pari priyaḥ kalaśe devavāta indrāya somo raṇyo madāya* ।
*sahasradhāraḥ śatavāja indurvājī na saptiḥ samanā jigāti* ॥9॥
*sa pūrvyo vasuvijjāyamāno mṛjāno apsu duduhāno adrau* ।
*abhiśastipā bhuvanasya rājā viddagātuṁ brahmaṇe pūyamānaḥ* ॥10॥
*tvayā hi naḥ pitara soma pūrve karmāṇi chakruḥ pavamāna dhīrāḥ* ।
*vanvannavātaḥ paridhīm̐raporṇu vīrebhiraśvairmaghavā bhavā naḥ* ॥11॥
*yathāpavathā manave vayodhā amitrahā varivoviddhaviṣmān* ।
*evā pavasva draviṇaṁ dadhāna indre saṁ tiṣṭha janayāyudhāni* ॥12॥
*pavasva soma madhumām̐ ṛtāvāpo vasāno adhi sāno avye* ।
*ava droṇāni ghṛtavānti sīda madintamo matsara indrapānaḥ* ॥13॥
*vṛṣṭiṁ divaḥ śatadhāraḥ pavasva sahasrasā vājayurdevavītau* ।
*saṁ sindhubhiḥ kalaśe vāvaśānaḥ samusriyābhiḥ pratiranna āyuḥ* ॥14॥
*eṣa sya somo matibhiḥ punāno'tyo na vājī taratīdarātīḥ* ।
*payo na dugdhamaditeriṣiramurviva gātuḥ suyamo na voḻahā* ॥15॥
*svāyudhaḥ sotṛbhiḥ pūyamāno'bhyarṣa guhyaṁ chāru nāma* ।
*abhi vājaṁ saptiriva śravasyābhi vāyumabhi gā deva soma* ॥16॥
*śiśuṁ jāānaṁ haryataṁ mṛjanti śumbhanti vahniṁ maruto gaṇena* ।
*kavirgībhiḥ kāvyenā kaviḥ santsomaḥ pavitramatyeti rebhan* ॥17॥
*ṛṣimanā ya ṛṣikṛtsvarṣāḥ sahasraṇīthaḥ padavīḥ kavīnām* ।
*tṛtīyaṁ dhāma mahiṣaḥ siṣāsantsomo virājamanu rājati ṣṭup* ॥18॥
*chamūṣachhyenaḥ śakuno vibhṛtavā govindurdrapsa āyudhāni bibhrata* ।
*apāmūrmi sachamānaḥ samudraṁ turīyaṁ dhāma mahiṣo vivakti* ॥19॥
*maryo na śubhrastanvaṁ mṛjāno'tyo na sṛtvā sanaye dhanānām* ।
*vṛṣeva yūthā pari kośamarṣankanikradachchamvo3rā viveśa* ॥20॥
*pavasvendo pavamāno mahobhiḥ kanikradatpari vārāṇyarṣa* ।
*krīḻaṁchamvo3rā viśa pūyamāna indraṁ te raso madiro mamattu* ॥21॥
*prāsya dhārā bṛhatīrasṛgrannatto gobhiḥ kalaśām̐ ā viveśa* ।
*sāma kṛṇvantsāmanyo vipaśchitkrandannetyabhi sakhyurna jāmim* ॥22॥
*apaghnanneṣi pavamāna śatrūnpriyāṁ na jāro abhigīta induḥ* ।
*sīdanvaneṣu śakuno na patvā somaḥ punānaḥ kalaśeṣu sattā* ॥23॥
*ā te ruchaḥ pavamānasya soma yoṣeva yanti sudughāḥ sudhārāḥ* ।
*harirānītaḥ puruvāro apsvachikradatkalaśe devayūnām* ॥24॥

सा. (Sv.) ५२७

सोमः पवते जनिता मतीनां जनिता दिवो जनिता पृथिव्याः ।
जनिताग्नेर्जनिता सूर्यस्य जनितेन्द्रस्य जनितोत विष्णोः ॥५॥
*somaḥ pavate janitā matīnāṁ janitā divo janitā pṛthivyāḥ* ।
*janitāgnerjanitā sūryasya janitendrasya janitota viṣṇoḥ* ॥5॥

सा. (Sv.) ५३२-५३३

पवस्व सोम मधुमाँ ऋतावापो वसानो अधि सानो अव्ये ।
अव द्रोणानि घृतवन्ति रोह मदिन्तमो मत्सर इन्द्रपानः ॥१०॥

प्र सेनानिः शूरो अग्रे रथानां गव्यन्नेति हर्षते अस्य सेना ।
भद्रान् कृण्वन्निन्द्रहवांत्सखिभ्य आ सोमो वस्त्रा रभसानि दत्ते ॥११॥
*pavasva soma madhumām̐ ṛtāvāpo vasāno adhi sāno avye /*
*ava droṇāni ghṛtavanti roha madintamo matsara indrapānaḥ //10 //*
*pra senāniḥ śūro agne rathānāṁ gavyanneti harṣate asya senā /*
*bhadrān kṛṇvannindrahavāṁtsakhibhya ā somo vastrā rabhasāni datte //11 //*

सा. (Sv.) ९४३-९४५

सोमः पवते जनिता मतीनां जनिता दिवो जनिता पृथिव्याः ।
जनिताग्नेर्जनिता सूर्यस्य जनितेन्द्रस्य जनितोत विष्णोः ॥१॥
ब्रह्मा देवानां पदवीः कवीनामृषिर्विप्राणां महिषो मृगाणाम् ।
श्येनो गृध्राणां स्वधितिर्वनानां सोमः पवित्रमत्येति रेभन् ॥२॥
प्रावीविपद्वाच ऊर्मि न सिन्धुर्गिर स्तोमान्पवमानो मनीषाः ।
अन्तः पश्यन्वृजनेमावराण्या तिष्ठति वृषभो गोषु जानन् ॥३॥
*somaḥ pavate janitā matīnāṁ janitā divo janitā pṛthivyāḥ /*
*janitāgnerjanitā sūryasya janitendrasya janitota viṣṇoḥ //1 //*
*brahmā devānāṁ padavīḥ kavīnāmṛṣirviprāṇāṁ mahiṣo mṛgāṇām /*
*śyeno gṛdhrāṇāṁ svadhitirvanānāṁ somaḥ pavitramatyeti rebhan //2 //*
*prāvīvipadvācha ūrmi na sindhurgira stomānpavamāno manīṣāḥ /*
*antaḥ paśyanvṛjanemāvarāṇyā tiṣṭhati vṛṣabho goṣu jānan //3 //*

सा. (Sv.) ११७५-११७७

शिशुं जाानं हर्यतं मृजन्ति शुम्भन्ति विप्रं मरुतो गणेन ।
कविर्गीर्भिः काव्येन कविः सन्त्सोमः पवित्रकत्येति रेभन् ॥१॥
ऋषिमना य ऋषिकृत्स्वर्षाः सहस्रनीथः पदवीः कवीनाम् ।
तृतीयं धाम महिषः सिषासन्त्सोमो विराजमनु राजति ष्टुप् ॥२॥
चमूषच्छ्येनः शकुनो विभृत्वा गोविन्दुर्द्रप्स आयुधानि बिभ्रत् ।
अपामूर्मि सचमानः समुद्रं तुरीयं धाम महिषो विवक्ति ॥३॥
*śiśuṁ jāānaṁ haryataṁ mṛjanti śumbhanti vipraṁ maruto gaṇena /*
*kavirgīrbhiḥ kāvyena kaviḥ santsomaḥ pavitrakatyeti rebhan //1 //*
*ṛṣimanā ya ṛṣikṛtsvarṣāḥ sahasranīthaḥ padavīḥ kavīnām /*
*tṛtīyaṁ dhāma mahiṣaḥ siṣāsantsomo virājamanu rājati ṣṭup //2 //*
*chamūṣachchhyenaḥ śakuno vibhṛtvā govindurdrapsa āyudhāni bibhrat /*
*apāmūrmi sachamānaḥ samudraṁ turīyaṁ dhāma mahiṣo vivakti //3 //*

## ३९१. प्रत्यङ्गिरसः (Pratyaṅgirasaḥ)

१. मन्त्रोक्ताः (Mantroktāḥ) - अ १०.१.१-३२

यो कल्पयन्ति वहतौ वधूमिव विश्वरूपां हस्तकृतां चिकित्सवः। सारादेत्वप नुदाम एनाम्॥१॥
शीर्षण्वती नस्वती कर्णिनी कृत्याकृता संभृता विष्वरूपा। सारादेत्वप नुदाम एनाम् ॥२॥
शूद्रकृता राजकृता स्त्रीकृता ब्रह्मभिः कृता। जाया पत्या नुत्तेव कर्तारं बन्ध्वृच्छतु ॥३॥
अनयाहमोषध्या सर्वाः कृत्या अदूदुषम्। यां क्षेत्रे चक्रुर्या गोषु यां वा ते पुरुषेषु ॥४॥
अघमस्त्वघकृते शपथः शपथीयते। प्रत्यक् प्रतिग्रहिण्मो यथा कृत्याकृतं हनत् ॥५॥
प्रतीचीन आंगिरसोऽध्यक्षे नः पुरोहितः। प्रतीचीः कृत्या आकृत्याऽमून् कृत्याकृतो जहि ॥६॥
यस्त्वोवाच परेहीति प्रतिकूलमुदय्यम्। तं कृत्येऽभिनिवर्तस्व माऽस्मानिच्छो अनागसः ॥७॥
यस्ते परूंषि संदधौ रथस्येवर्भुर्धिया। तं गच्छ तत्र तेऽयनमाातस्तेऽयं जनः ॥८॥
ये त्वा कृत्वाऽऽलेभिरे विद्वला अभिचारिणः ।
शंभवी३दं कृत्यादूषणं प्रतिवर्त्म पुनःसरं तेन त्वा स्नपयामसि ॥९॥
यद् दुर्भगां प्रस्नपितां मृतवत्सामुपेयिम। अपैतु सर्व मत् पापं द्रविणं मोप तिष्ठतु ॥१०॥
यत् ते पितृभ्यो ददतो यो वा नाम जगृहुः ।
संदेश्या३त् सर्वस्मात् पापादिमा मुंचन्तु त्वौषधीः ॥११॥

देवैनसात् पियान्नामग्राहात् संदेश्यादभिनिष्कृतात् ।
मुंचन्तु त्वा वीरुधो वीर्येण ब्रह्मण ऋग्भिः पयस ऋषीणाम् ॥१२॥
यथा वातश्च्यावयति भूम्या रेणुमन्तरिक्षाच्चाभ्रम्। एव मत् सर्व दुर्भूतं ब्रह्मनुत्तमपायति ॥१३॥
अप क्राम नानदती विनद्धा गर्दभीवः कतृन् नक्षस्वेतो नुत्ता ब्रह्मणा वीर्यावता ॥१४॥
अयं पन्थाः कृत्येति त्वा नयामोऽभिप्रहितां प्रति त्वा प्र हिण्मः ।
तेनाभि याहि भंजत्यनस्वतीव वाहिनी विश्वरूपा कुरूटिनी ॥१५॥
पराक् ते ज्योतिरपथं ते अर्वागन्यत्रास्मदयना कृणुष्व ।
परेणेहि नवतिं नाव्या३ अति दुर्गाः स्रोत्या मा क्षणिष्ठाः परेहि ॥१६॥
वात इव वृक्षान् नि मृणीहि पादय मा गामश्वं पुरुषमुच्छिष एषाम् ।
कतृन् निवृत्येतः कृत्येऽप्रजास्त्वाय बोधय ॥१७॥
यां ते बर्हिषि यां श्मशाने क्षेत्रे कृत्यां वलगं वा निचख्नुः ।
अग्नौ वा त्वा गार्हपतयेऽभिचेरुः पाकं सन्तं धीरतरा अनागसम् ॥१८॥
उपाहृतमनुबुद्धं निखातं वैरं त्सार्यन्वविदाम कर्त्रम् ।
तदेतु यत आभृतं तत्राश्व इव वि वर्ततां हन्तु कृत्याकृतः प्रजाम् ॥१९॥
स्वायसा असयः सन्ति नो गृहे विद्मा ते कृत्ये यतिधा परूंषि ।
उत्तिष्ठैव परेहीतोऽज्ञाते किमिहेच्छसि ॥२०॥
ग्रीवास्ते कृत्ये पादौ चापि कर्त्स्यामि निर्द्रव।
इन्द्राग्नी अस्मान् रक्षतां यौ प्रजानां प्रजापती॥२॥
सोमो राजाधिपा मृडिता च भूतस्य नः पतयो मृडयन्तु ॥२२॥
भवाशर्वावस्यतां पापकृते कृत्याकृते। दुष्कृते विद्युतं देवहेतिम् ॥२३॥
यद्येयथ द्विपदी चतुष्पदी कृत्याकृता संभृता विश्वरूपा ।
सेतो३ऽष्टापदी भूत्वा पुनः परेहि दुच्छुने ॥२४॥
अभ्य१क्ताक्ता स्वरंकृता सर्व भरन्ती दुरितं परेहि।
जानीहि कृत्ये कर्तारं दुहितेव पितरं स्वम्॥२५॥
परेहि कृत्ये मा तिष्ठो विद्धस्येव पदं नय। मृगः स मृगयुस्त्वं न त्वा निकर्तुमर्हति ॥२६॥
उत हन्ति पूर्वासिनं प्रत्यादायापर इष्वा। उत पूर्वस्य निघ्नतो नि हन्त्यपरः प्रति ॥२७॥
एतद्धि श्रृणु मे वचोऽथेहि यत एयथ। यस्त्वा चकार तं प्रति ॥२८॥
अनागोहत्या वै भीमा कृत्ये मा नो गामश्वं पुरुषं वधीः ।
यत्रयत्रासि निहिता ततस्त्वोत्थापयामसि पर्णाल्लघीयसी भव ॥२९॥
यदि स्थ तमसाऽऽवृता जालेनाभिहिता इव।
सर्वाः संलुप्येतः कृत्याः पुनः कर्त्रे प्र हिण्मसि ॥३०॥
कृत्याकृतो वलगिनोऽभिनिष्कारिणः प्रजाम्।
मृणीहि कृत्ये मोच्छिषोऽमून् कृत्याकृतो जहि ॥३१॥
यथा सूर्यो मुच्यते तमसस्परि रात्रिं जहातयुषसश्च केतून् ।
एवाहं सर्व दुर्भूतं कर्त्र कृत्याकृता कृतं हस्तीव रजो दुरितं जहामि ॥३२॥

*yo kalpayanti vahatau vadhūmiva viśvarūpāṁ hastakṛtāṁ chikitsavaḥ |*
*sārādetvapa nudāma enām ||1 ||*
*śīrṣaṇvatī nasvatī karṇinī kṛtyākṛtā saṁbhṛtā viṣvarūpā |*
*sārādetvapa nudāma enām ||2 ||*
*śūdrakṛtā rājakṛtā strīkṛtā brahmabhiḥ kṛtā |*
*jāyā patyā nutteva kartāraṁ bandhvṛchchhatu ||3 ||*
*anayāhamoṣadhyā sarvāḥ kṛtyā adūduṣam |*
*yāṁ kṣetre chakruryā goṣu yāṁ vā te puruṣeṣu ||4 ||*
*aghamastvaghakṛte śapathaḥ śapathīyate |*
*pratyak pratigrahiṇmo yathā kṛtyākṛtaṁ hanat ||5 ||*
*pratīchīna āṁgiraso'dhyakṣe naḥ purohitaḥ |*
*pratīchīḥ kṛtyā ākṛtyā'mūn kṛtyākṛto jahi ||6 ||*

*yastvovācha parehīti pratikūlamudayyam |*
*taṁ kṛtye'bhinivartasva mā'smānichchho anāgasaḥ ||7 ||*
*yaste parūṁṣi saṁdadhau rathasyevarbhurdhiyā |*
*taṁ gachchha tatra te'yanamāātaste'yaṁ janaḥ ||8 ||*
*ye tvā kṛtvā''lebhire vidvalā abhichāriṇaḥ |*
*śaṁbhavī3daṁ kṛtyādūṣaṇaṁ prativartma punaḥsaraṁ tena tvā snapayāmasi ||9 ||*
*yad durbhagāṁ prasnapitāṁ mṛtavatsāmupeyima |*
*apaitu sarva mat pāpaṁ draviṇaṁ mopa tiṣṭhatu ||10 ||*
*yat te pitṛbhyo dadato yo vā nāma jagṛhuḥ |*
*saṁdeśyā3t sarvasmāt pāpādimā muṁchantu tvauṣadhīḥ ||11 ||*
*devainasāt piyānnāmagrāhāt saṁdeśyādabhiniṣkṛtāt |*
*muṁchantu tvā vīrudho vīryeṇa brahmaṇa ṛgbhiḥ payasa ṛṣīṇām ||12 ||*
*yathā vātaśchyāvayati bhūmyā reṇumantarikṣāchchābhram |*
*eva mat sarva durbhūtaṁ brahmanuttamapāyati ||13 ||*
*apa krāma nānadatī vinaddhā gardabhīvaḥ katṛn nakṣasveto nuttā brahmaṇā vīryāvatā ||14 ||*
*ayaṁ panthāḥ kṛtyeti tvā nayāmo'bhiprahitāṁ prati tvā pra hiṇmaḥ |*
*tenābhi yāhi bhaṁjatyanasvatīva vāhinī viśvarūpā kurūṭinī ||15 ||*
*parāk te jyotirapathaṁ te arvāganyatrāsmadayanā kṛṇuṣva |*
*pareṇehi navatiṁ nāvyā3 ati durgāḥ srotyā mā kṣaṇiṣṭhāḥ parehi ||16 ||*
*vāta iva vṛkṣān ni mṛṇīhi pādaya mā gāmaśvaṁ puruṣamuchchhiṣa eṣām |*
*katṛn nivṛtyetaḥ kṛtye'prajāstvāya bodhaya ||17 ||*
*yāṁ te barhiṣi yāṁ śmaśāne kṣetre kṛtyāṁ valagaṁ vā nichakhnuḥ |*
*agnau vā tvā gārhapataye'bhicheruḥ pākaṁ santaṁ dhīratarā anāgasam ||18 ||*
*upāhṛtamanubuddhaṁ nikhātaṁ vairaṁ tsāryanvavidāma kartram |*
*tadetu yata ābhṛtaṁ tatrāśva iva vi vartatāṁ hantu kṛtyākṛtaḥ prajām ||19 ||*
*svāyasā asayaḥ santi no gṛhe vidyā te kṛtye yatidhā parūṁṣi |*
*uttiṣṭhaiva parehīto'ājñāte kimihechchhasi ||20 ||*
*grīvāste kṛtye pādau chāpi kartsyāmi nirdrava |*
*indrāgnī asmān rakṣatāṁ yau prajānāṁ prajāpatī ||2 ||*
*somo rājādhipā mṛḍitā cha bhūtasya naḥ patayo mṛḍayantu ||22 ||*
*bhavāśarvāvasyatāṁ pāpakṛte kṛtyākṛte | duṣkṛte vidyutaṁ devahetim ||23 ||*
*yadyeyatha dvipadī chatuṣpadī kṛtyākṛtā saṁbhṛtā viśvarūpā |*
*seto3'ṣṭāpadī bhūtvā punaḥ parehi duchchhune ||24 ||*
*abhya1ktāktā svaraṁkṛtā sarva bharantī duritaṁ parehi |*
*jānīhi kṛtye kartāraṁ duhiteva pitaraṁ svam ||25 ||*
*parehi kṛtye mā tiṣṭho viddhasyeva padaṁ naya |*
*mṛgaḥ sa mṛgayustvaṁ na tvā nikartumarhati ||26 ||*
*uta hanti pūrvāsinaṁ pratyādāyāpara iṣvā |*
*uta pūrvasya nighnato ni hantyaparaḥ prati ||27 ||*
*etaddhi śṛṇu me vacho'thehi yata eyatha | yastvā chakāra taṁ prati ||28 ||*
*anāgohatyā vai bhīmā kṛtye mā no gāmaśvaṁ puruṣaṁ vadhīḥ |*
*yatrayatrāsi nihitā tatastvotthāpayāmasi parṇāllaghīyasī bhava ||29 ||*
*yadi stha tamasā''vṛtā jālenābhihitā iva |*
*sarvāḥ saṁlupyetaḥ kṛtyāḥ punaḥ kartre pra hiṇmasi ||30 ||*
*kṛtyākṛto valagino'bhiniṣkāriṇaḥ prajām |*
*mṛṇīhi kṛtye mochchhiṣo'mūn kṛtyākṛto jahi ||31 ||*
*yathā sūryo muchyate tamasaspari rātriṁ jahātayuṣasaścha ketūn |*
*evāhaṁ sarva durbhūtaṁ kartra kṛtyākṛtā kṛtaṁ hastīva rajo duritaṁ jahāmi ||32 ||*

## ३९२. प्रतिक्षत्रः (Pratikṣatraḥ)

१. विश्वेदेवाः (Viśvedevāḥ) - य. (Yv.)३३.४८

अग्नऽइन्द्र वरुण मित्र देवाः शर्द्धः प्र यन्त मारुतोत विष्णो ।
उभा नासत्या रुद्रोऽअध ग्नाः पूषा भगः सरस्वती जुषन्त ॥४८॥
*agna'indra varuṇa mitra devāḥ śarddhaḥ pra yanta mārutota viṣṇo /*
*ubhā nāsatyā rudro'adha gnāḥ pūṣā bhagaḥ sarasvatī juṣanta //48 //*

## ३९३. प्रतिक्षत्र आत्रेयः (Pratikṣatra Ātreyaḥ)

१. देवपत्न्यः (Devapatnyaḥ) - ऋ. (Rv.)५.४६.७-८

देवानां पत्नीरुशतीरवन्तु नः प्रावन्तु नस्तुजये वाजसातये ।
याः पार्थिवासो या अपामपि व्रते ता नो देवीः सुहवाः शर्म यच्छत ॥७॥
उत ग्ना व्यन्तु देवपत्नीरिन्द्राण्य१ग्नाय्यश्विनीराट् ।
आ रोदसी वरुणानी शृणोतु व्यन्तु देवीर्य ऋतुर्जनीनाम् ॥८॥
*devānāṁ patnīruśatīravantu naḥ prāvantu nastujaye vājasātaye /*
*yāḥ pārthivāso yā apāmapi vrate tā no devīḥ suhavāḥ śarma yachchhata //7 //*
*uta gnā vyantu devapatnīrindrāṇya1gnāyyaśvinīrāṭ /*
*ā rodasī varuṇānī śṛṇotu vyantu devīrya ṛturjanīnām //8 //*

२. विश्वेदेवाः (Viśvedevāḥ) - ऋ. (Rv.)५.४६.१-६

हयो न विद्वाँ अयुजि स्वयं धुरि तां वहामि प्रतरणीमवस्युवम् ।
नास्या वश्मि वमुचं नावृतं पुनर्विद्वान्पथः पुरएत ऋजु नेषति ॥१॥
अग्न इन्द्र वरुण मित्र देवाः शर्धः प्र यन्त मारुतोत विष्णो ।
उभा नासत्या रुद्रो अध ग्नाः पूषा भगः सरस्वती जुषन्त ॥२॥
इन्द्राग्नी मित्रावरुणादितिं स्वः पृथिवी द्यां मरुतः पर्वताँ अपः ।
हुवे विष्णुं पूषणं ब्रह्मणस्पतिं भगं नु शंसं सवितारमूतये ॥३॥
उत नो विष्णुरुत वातो अस्रिधो द्रविणोदा उत सोमो मयस्करत् ।
उत ऋभव उत राये नो अश्विनोत त्वष्टोत विभ्वानु मंसते ॥४॥
उत त्यन्नो मारुतं शर्ध आ गमद्दिविक्षयं यजतं बर्हिरासदे ।
बृहस्पतिः शर्म पूषोत नो यमद्वरूथ्यं१ वरुणो मित्रो अर्यमा ॥५॥
उत त्ये नः पर्वतासः सुशस्तयः सुदीतयो नद्य१ स्त्रामणे भुवन् ।
भगो विभक्ता शवसावसा गमदुरुव्यचा अदितिः श्रोतु मे हवम् ॥६॥
*hayo na vidvām̐ ayuji svayaṁ dhuri tāṁ vahāmi prataraṇīmavasyuvam /*
*nāsyā vaśmi vamuchaṁ nāvṛtaṁ punarvidvānpathaḥ puraeta ṛju neṣati //1 //*
*agna indra varuṇa mitra devāḥ śardhaḥ pra yanta mārutota viṣṇo /*
*ubhā nāsatyā rudro adha gnāḥ pūṣā bhagaḥ sarasvatī juṣanta //2 //*
*indrāgnī mitrāvaruṇāditiṁ svaḥ pṛthivī dyāṁ marutaḥ parvatām̐ apaḥ /*
*huve viṣṇuṁ pūṣaṇaṁ brahmaṇaspatiṁ bhagaṁ nu śaṁsaṁ savitāramūtaye //3 //*
*uta no viṣṇuruta vāto asridho draviṇodā uta somo mayaskarat /*
*uta ṛbhava uta rāye no aśvinota tvaṣṭota vibhvānu maṁsate //4 //*
*uta tyanno mārutaṁ śardha ā gamaddivikṣayaṁ yajataṁ barhirāsade /*
*bṛhaspatiḥ śarma pūṣota no yamadvarūthyaṁ1 varuṇo mitro aryamā //5 //*
*uta tye naḥ parvatāsaḥ suśastayaḥ sudītayo nadya1 strāmaṇe bhuvan /*
*bhago vibhaktā śavasāvasā gamaduruvyachā aditiḥ śrotu me havam //6 //*

## ३९४. प्रतिप्रभ आत्रेयः (Pratiprabha Ātreyaḥ)

१. विश्वेदेवा (Viśvedevā) - ऋ. (Rv.)५.४९.१-५

देवं वो अद्य सवितारमेषे भगं च रत्नं विभजन्तमायोः ।
आ वां नरा पुरुभुजा ववृत्यां दिवेदिवे चिदश्विना सखीयन् ॥१॥
प्रति प्रयाणमसुरस्य विद्वान्त्सूक्तैर्देवं सवितारं दुवस्य ।

उप ब्रुवीत नमसा विजानंज्येष्ठं च रत्नं विभजन्तमायोः ॥२॥
अदत्रया दयते वार्य्याणि पूषा भगो अदितिर्वस्त उस्रः ।
इन्द्रो विष्णुर्वरुणो मित्रो अग्निरहानि भद्रा जनयन्त दस्माः ॥३॥
तन्नो अनर्वा सविता वरूथं तत्सिन्धव इषयन्तो अनु ग्मन् ।
उप यद्वोचे अध्वरस्य होता रायः स्याम पतयो वाजरत्नाः ॥४॥
प्र ये वसुभ्य ईवदा नमो दुर्य्ये मित्रे वरुणे सूक्तवाचः ।
अवैत्वभ्वं कृणुता वरीयां दिवस्पृथिव्योरवसा मदेम ॥५॥

*devaṁ vo adya savitārameṣe bhagaṁ cha ratnaṁ vibhajantamāyoḥ /*
*ā vāṁ narā purubhujā vavṛtyāṁ divedive chidaśvinā sakhīyan //1 //*
*prati prayāṇamasurasya vidvāntsūktairdevaṁ savitāraṁ duvasya /*
*upa bruvīta namasā vijānaṁjyeṣṭhaṁ cha ratnaṁ vibhajantamāyoḥ //2 //*
*adatrayā dayate vāryyāṇi pūṣā bhago aditirvasta usraḥ /*
*indro viṣṇurvaruṇo mitro agnirahāni bhadrā janayanta dasmāḥ //3 //*
*tanno anarvā savitā varūthaṁ tatsindhava iṣayanto anu gman /*
*upa yadvoche adhvarasya hotā rāyaḥ syāma patayo vājaratnāḥ //4 //*
*pra ye vasubhya īvadā namo duryye mitre varuṇe sūktavāchaḥ /*
*avaitvabhvaṁ kṛṇutā varīyāṁ divaspṛthivyoravasā madema //5 //*

## ३९५. प्रतिभानुर् आत्रेयः (Pratibhānur Ātreyaḥ)

१. विश्वेदेवाः (Viśvedevāḥ) - ऋ. (Rv.)५.४८.१-५

कदु प्रियाय धाम्ने मनामहे स्वक्षत्राय स्वयशसे महे वयम् ।
आमेन्यस्य रजसो यदभ्र आँ अपो वृणाना वितनोति मायिनी ॥१॥
ता अत्नत वयुनं वीरवक्षणं समान्या वृतया विश्वमा रजः ।
अपो अपाचीरपरा अपेजते प्र पूर्वाभिस्तिरते देवयुर्जनः ॥२॥
आ ग्रावभिरहन्येभिरक्तुभिर्वरिष्ठं वज्रमा जिघर्ति मायिनि ।
शतं वा यस्य प्रचरन्त्स्वे दमे संवर्तयन्तो वि च वर्तयन्नहा ॥३॥
तामस्य रीतिं परशोरिव प्रत्यनीकमख्यं भुजे अस्य वर्पसः ।
सचा यदि पितुमन्तमिव क्षयं रत्नं दधाति भरहूतये विशे ॥४॥
स जिह्वया चतुरनीक ऋञ्जते चारु वसानो वरुणो यतन्नरिम् ।
न तस्य विद्म पुरुषत्वता वयं यतो भगः सविता दाति वार्यम् ॥५॥

*kadu priyāya dhāmne manāmahe svakṣatrāya svayaśase mahe vayam /*
*āmenyasya rajaso yadabhra āṁ̐ apo vṛṇānā vitanoti māyinī //1 //*
*tā atnata vayunaṁ vīravakṣaṇaṁ samānyā vṛtayā biśvamā rajaḥ /*
*apo apāchīraparā apejate pra pūrvābhistirate devayurjanaḥ //2 //*
*ā grāvabhirahanyebhiraktubhirvariṣṭhaṁ vajramā jigharti māyini /*
*śataṁ vā yasya pracharantsve dame saṁvartayanto vi cha vartayannahā //3 //*
*tāmasya rītiṁ paraśeriva pratyanīkamakhyaṁ bhuje asya varpasaḥ /*
*sachā yadi pitumantamiva kṣayaṁ ratnaṁ dadhāti bharahūtaye viśe //4 //*
*sa jihnayā chaturanīka ṛṁjate chāru vasāno varuṇo yatannarim /*
*na tasya vidma puruṣatvatā vayaṁ yato bhagaḥ savitā dāti vāryam //5 //*

## ३९६. प्रतिरथ आत्रेयः (Pratiratha Ātreyaḥ)

१. विश्वेदेवाः (Viśvedevāḥ) - ऋ. (Rv.)५.४७.१-७

प्रयुंजती दिव एति ब्रुवाणा मही माता दुहितुर्बोधयन्ती ।
आविवासन्ती युवतिर्मनीषा पितृभ्य आ सदने जोहुवाना ॥१॥
अजिरासस्तदप इर्यमाना आतस्थिवांसो अमृतस्य नाभिम् ।
अनन्तास उरवो विश्वतः सीं परि द्यावापृथिवी यन्ति पन्थाः ॥२॥
उक्षा समुद्रो अरुषः सुपर्णः पूर्वस्य योनिं पितुराविवेश ।
मध्ये दिवो निहित पृश्निरश्मा वि चक्रमे रजस्पात्यन्तौ ॥३॥

चत्वार ई बिभ्रति क्षेमयन्तो दश गर्भं चरसे धापयन्ते ।
त्रिधातवः परमा अस्य गावो दिवश्चरन्ति परि सद्यो अन्तान् ॥४॥
इदं वपुर्निवचनं जनासश्चरन्ति यन्नद्यस्तस्थुरापः ।
द्वे यदीं बिभृतो मातुरन्ये इहेह जाते यम्या३ सबन्धू ॥५॥
वि तन्वते धियो अस्मा अपांसि वस्त्रा पुत्राय मातरो वयन्ति ।
उपप्रक्षे वृषणो मोदमाना दिवस्पथा वध्वो यन्त्यच्छ ॥६॥
तदस्तु मित्रावरुणा तदग्ने शं योरस्मभ्यमिदमस्तु शस्तम् ।
अशीमहि गाधमुत प्रतिष्ठां नमो दिवे बृहते सादनाय ॥७॥

*prayuṁjatī diva eti bruvāṇā mahī mātā duhiturbodhayantī /*
*āvivāsantī yuvatirmanīṣā pitṛbhya ā sadane johuvānā //1 //*
*ajirāsastadapa iryamānā ātasthivāṁso amṛtasya nābhim /*
*anantāsa uravo viśvataḥ sīṁ pari dyāvāpṛthivī yanti panthāḥ //2 //*
*ukṣā samudro aruṣaḥ suparṇaḥ pūrvasya yoniṁ piturāviveśa /*
*madhye divo nihita pṛśniraśmā vi chakrame rajaspātyantau //3 //*
*chatvāra ī bibhrati kṣemayanto daśa garbha charase dhāpayante /*
*tridhātavaḥ paramā asya gāvo divaścharanti pari sadyo antān //4 //*
*idaṁ vapurnivachanaṁ janāsaścharanti yannadyastasthurāpaḥ /*
*dve yadīṁ bibhṛto māturanye iheha jāte yamyā3 sabandhū //5 //*
*vi tanvate dhiyo asmā apāṁsi vastrā putrāya mātaro vayanti /*
*upaprakṣe vṛṣaṇo modamānā divaspathā vadhvo yantyachchha //6 //*
*tadastu mitrāvaruṇā tadagne śaṁ yorasmabhyamidamastu śastam /*
*aśīmahi gādhamuta pratiṣṭhāṁ namo dive bṛhate sādanāya //7 //*

## ३९७. प्रमोचनः (Pramochanaḥ)

१. दूर्वा, शालाः (Dūrvā, Śālāḥ) - अ. (Av.) ६.१०६.१-३

आयने ते परायणे दूर्वा रोहतु पुष्पिणी। उत्सो वा तत्र जायंता ह्रदो वा पुण्डरीकवान् ॥१॥
अपामिदं न्ययनं समुद्रस्य निवेशनम्। मध्ये ह्रदस्य नो गृहाः पराचीना मुखा कृधि ॥२॥
हिमस्य त्वा जरायुणा शाले परि व्ययामसि। शतीह्रदा हि नो भुवोग्निष्कृणोतु भेषजम् ॥३॥

*āyane te parāyaṇe dūrvā rohatu puṣpiṇī /*
*utso vā tatra jāyaṁtā hrado vā puṇḍarīkavān //1 //*
*apāmidaṁ nyayanaṁ samudrasya niveśanam /*
*madhye hradasya no gṛhāḥ parāchīnā mukhā kṛdhi //2 //*
*himasya tvā jarāyuṇā śāle pari vyayāmasi /*
*śatīhradā hi no bhuvogniṣkṛṇotu bheṣajam //3 //*

## ३९८. प्रथो वासिष्ठः (Pratho Vāsiṣṭhaḥ)

१. विश्वेदेवाः (Viśvedevāḥ) - ऋ. (Rv.)१०.१८१.१; सा. (Sv.) ५९९

ऋ. (Rv.)१०.१८१.१

प्रथश्च यस्य सप्रथश्च नामानुष्टुभस्य हविषो हविर्यत् ।
धातुर्द्युतानात्सवितुश्च विष्णो रथन्तरमा जभारा वसिष्ठः ॥१॥

*prathaścha yasya saprathaścha nāmānuṣṭubhasya haviṣo haviryat /*
*dhāturdyutānātsavituścha viṣṇo rathantaramā jabhārā vasiṣṭhaḥ //1 //*

सा. (Sv.) ५९९

प्रथश्च यस्य सप्रथश्च नामानुष्टुभस्य हविषा हविर्यत् ।
धातुर्द्युतानात्सवितुश्च विष्णो रथन्तरमा जभारा वसिष्ठः ॥५॥

*prathaścha yasya saprathaścha nāmānuṣṭubhasya haviṣā haviryat /*
*dhāturdyutānātsavituścha viṣṇo rathantaramā jabhārā vasiṣṭhaḥ //5 //*

## ३९९. प्रन्धीमुश्यावाश्विः (Prandhīmuśyāvāśviḥ)

१. पवमानः सोमः (Pavamānaḥ Somaḥ) - ऋ. (Rv.)९.१०१.१-३

पुरोजिती वो अन्धसः सुताय मादयित्नवे। अप श्वानं श्नथिष्टन सखायो दीर्घजिह्व्यम् ॥१॥
यो धारया पावकया परिप्रस्यन्दते सुतः। इन्दुरश्वो न कृत्व्यः ॥२॥
तं दुरोषमभी नरः सोमं विश्वाच्या धिया। यां हिन्वन्त्यद्रिभिः ॥३॥

*purojitī vo andhasaḥ sutāya mādayitnave /*
*apa śvānaṁ śnathiṣṭana sakhāyo dīrghajihnyam //1 //*
*yo dhārayā pāvakayā pariprasyandate sutaḥ / induraśvo na kṛtvyaḥ //2 //*
*taṁ duroṣamabhī naraḥ somaṁ viśvāchyā dhiyā / yāṁ hinvantyadribhiḥ //3 //*

## ४००. प्रभूवसुः (Prrabhūvasuḥ)

१. पवमानः सोमः (Pavamānaḥ Somaḥ) - ऋ. (Rv.)९.३५.१-६; ९.३६.१-६

ऋ. (Rv.)९.३५.१-६

आ नः पवस्व धारया पवमान रयिं पृथुम्। यया ज्योतिर्विदासि नः ॥१॥
इन्द्रो समुद्रमीङ्खय पवस्व विश्वमेजय। रायो धर्ता न ओजसा ॥२॥
त्वया वीरेण वीरवोऽभि ष्याम पृतन्यतः। क्षरा णो अभि वार्यम् ॥३॥
प्र वाजमिन्दुरिष्यति सिषासन्वाजसा ऋषिः। व्रता विदान आयुधा ॥४॥
तं गीर्भिर्वाचमीङ्खयं पुनानं वासयामसि। सोमं जनस्य गोपतिम् ॥५॥
विश्वो यस्य व्रते जनो दाधार धर्मणस्पतेः। पुनानस्य प्रभूवसोः ॥६॥

*ā naḥ pavasva dhārayā pavamāna rayiṁ pṛthum / yayā jyotirvidāsi naḥ //1 //*
*indro samudramīṅkhaya pavasva viśvamejaya / rāyo dhartā na Ojasā //2 //*
*tvayā vīreṇa vīravo'bhi ṣyāma pṛtanyataḥ / kṣarā ṇo abhi vāryam //3 //*
*pra vājaminduriṣyati siṣāsanvājasā ṛṣiḥ / vratā vidāna āyudhā //4 //*
*taṁ gīrbhirvāchamīṅkhayaṁ punānaṁ vāsayāmasi / somaṁ janasya gopatim //5 //*
*viśvo yasya vrate jano dādhāra dharmaṇaspateḥ / punānasya prabhūvasoḥ //6 //*

ऋ. (Rv.)९.३६.१-६

असर्जि रथ्यो यथा पवित्रे चम्वोः सुतः। कार्ष्मन्वाजी न्यक्रमीत् ॥१॥
स वह्निः सोम जागृविः पवस्व देववीरति। अभि कोशं मधुश्चुतम् ॥२॥
स नो ज्योतींषि पूर्व्य पवमान वि रोचय। क्रतवे दक्षाय नो हिनु ॥३॥
शुम्भमान ऋतायुभिर्मृज्यमानो गभस्त्योः। पवते वारे अव्यये ॥४॥
स विश्वा दाशुषे वसु सोमो दिव्यानि पार्थिवा। पवतामान्तरिक्ष्या ॥५॥
आ दिवस्पृष्ठमश्वयुर्गव्ययुः सोम रोहसि। वीरयुः शवसस्पते ॥६॥

*asarji rathyo yathā pavitre chamvoḥ sutaḥ / kārṣmanvājī nyakramīt //1 //*
*sa vahniḥ soma jāgṛviḥ pavasva devavīrati / abhi kośaṁ madhuśchutam //2 //*
*sa no jyotīṁṣi pūrvya pavamāna vi rochaya / kratave dakṣāya no hinu //3 //*
*śumbhamāna ṛtāyubhirmṛjyamāno gabhastyoḥ / pavate vāre avyaye //4 //*
*sa viśvā dāśuṣe vasu somo divyāni pārthivā / pavatāmāntarikṣayā //5 //*
*ā divaspṛṣṭhamaśvayurgavyayuḥ soma rohasi / vīrayuḥ śavasaspate //6 //*

## ४०१. प्रभूवसुर् आंगिरसः (Prabhūvasur Āṁgirasaḥ)

१. इन्द्रः (Indraḥ) - ऋ. (Rv.)५.३५.१-८; ५.३६.१-६

ऋ. (Rv.)५.३५.१-८

यस्ते साधिष्ठोऽवस इन्द्र क्रतुष्टमा भर। अस्मभ्यं चर्षणीसहं सस्निं वाजेषु दुष्टरम् ॥१॥
यदिन्द्र ते चतस्रो यच्छूर सन्ति तिस्रः। यद्वा पंच क्षितीनायवस्तत्सु न आ भर ॥२॥
आ तेऽवो वरेण्यं वृषन्तमस्य हूमहे। वृषजूतिर्हि जिषे अभूभिरिन्द्र तुर्वणिः ॥३॥
वृषा ह्यसि राधसे जिषे वृष्णि ते शवः। स्वक्षत्रं ते धृषन्मनः सत्राहमिन्द्र पौंस्यम् ॥४॥
त्वं तमिन्द्र मर्त्यममित्रयन्तमद्रिवः। सर्वरथा शतक्रतो नि याहि शवसस्पते ॥५॥

त्वामिद्वृत्रहन्तम् जनासो वृक्तबर्हिषः। उग्रं पूर्वीषु पूर्व्यं हवन्ते वाजसातये ॥६॥
अस्माकमिन्द्र दुष्टरं पुरोयावानमाजिषु। सयावानं धनेधने वाजयन्तमवा रथम् ॥७॥
अस्माकमिन्द्रेहि नो रथमवा पुरंध्या। वयं शविष्ठ वार्य दिवि श्रवो दधीमहि दिवि स्तोमं मनामहे ।८।
*yaste sādhiṣṭho'vasa indra kratuṣṭamā bhara /*
*asmabhyaṁ charṣaṇīsahaṁ sasiṁna vājeṣu duṣṭaram //1 //*
*yadindra te chatasro yachchhūra santi tisraḥ /*
*yadvā paṁcha kṣitīnāyavastatsu na ā bhara //2 //*
*ā te'vo vareṇyaṁ vṛṣantamasya hūmahe /*
*vṛṣajūtirhi jiāṣa abhūbhirindra turvaṇiḥ //3 //*
*vṛṣā hyasi rādhase jiāṣe vṛṣṇi te śavaḥ /*
*svakṣatraṁ te dhṛṣanmanaḥ satrāhamindra pauṁsyam //4 //*
*tvaṁ tamindra martyamamitrayantamadrivaḥ /*
*sarvarathā śatakrato ni yāhi śavasaspate //5 //*
*tvāmidvṛtrahantam janāso vṛktabarhiṣaḥ /*
*ugraṁ pūrvīṣu pūrvya havante vājasātaye //6 //*
*asmākamindra duṣṭaraṁ puroyāvānamājiṣu /*
*sayāvānaṁ dhanedhane vājayantamavā ratham //7 //*
*asmākamindrehi no rathamavā puraṁdhyā /*
*vayaṁ śaviṣṭha vārya divi śravo dadhīmahi divi stomaṁ manāmahe /8 /*

ऋ. (Rv.)५.३६.१-६

स आ गमदिन्द्रो यो वसूनां चिकेतद्दातुं दामनो रयीणाम् ।
धन्वचरो न वंसगस्तृषाणश्चकमानः पिबतु दुग्धमंशुम् ॥१॥
आ ते हनू हरिवः शुर शिप्रे रुहत्सोमो न पर्वतस्य पृष्ठे ।
अनु त्वा राजन्नर्वतो न हिन्वन् गीर्भिर्मदेम पुरुहूत विश्वे ॥२॥
चक्रं न वृत्तं पुरुहूत वेपते मनो भिया मे अमतेरिदद्रिवः ।
रथादधि त्वा जरिता सदावृध कुविन्नु स्तोषन्मघन्पुरूवसुः ॥३॥
एष ग्रावेव जरिता त इन्द्रेयर्ति वाचं बृहदाशुषणः ।
प्र सव्येन मघवन् यंसि रायः प्र दक्षिणिद्धरिवो मा वि वेनः ॥४॥
वृषा त्वा वृषणं वर्धतु द्यौर्वृषा वृषभ्यां वहसे हरिभ्याम् ।
स नो वृषा वृषरथः सुशिप्र वृषक्रतो वृषा वज्रिन्भरे धाः ॥५॥
यो रोहितौ वाजिनौ वाजिनीवान्त्रिभिः शतैः सचमानावदिष्ट ।
यूने समस्मै क्षितयो नमन्तां श्रुतरथाय मरुतो दुवोया ॥६॥
*sa ā gamadindro yo vasūnāṁ chiketaddātuṁ dāmano rayīṇām /*
*dhanvacharo na vaṁsagastṛṣāṇaśchakamānaḥ pibatu dugdhamaṁśum //1 //*
*ā te hanū harivaḥ śura śipre ruhatsomo na parvatasya pṛṣṭhe /*
*anu tvā rājannarvato na hinvan gīrbhirmadema puruhūta viśve //2 //*
*chakraṁ na vṛttaṁ puruhūta vepate mano bhiyā me amateridadrivaḥ /*
*rathādadhi tvā jaritā sadāvṛdha kuvinnu stoṣanmaghanpurūvasuḥ //3 //*
*eṣa grāveva jaritā ta indreyarti vāchaṁ bṛhadāśuṣaṇaḥ /*
*pra savyena maghavan yaṁsi rāyaḥ pra dakṣiṇiddharivo mā vi venaḥ //4 //*
*vṛṣā tvā vṛṣaṇaṁ vardhatu dyaurvṛṣā vṛṣabhyāṁ vahase haribhyām /*
*sa no vṛṣā vṛṣarathaḥ suśipra vṛṣakrato vṛṣā vajrinbhare dhāḥ //5 //*
*yo rohitau vājinau vājinīvāntribhiḥ śataiḥ sachamānāvadiṣṭa /*
*yūne samasmai kṣitayo namantāṁ śrutarathāya maruto duvoyā //6 //*

२. पवमानः सोमः (Pavamānaḥ Somaḥ) - सा. (Sv.) ४९०

असर्जि रथ्यो यथा पवित्रे चम्वोः सुतः। कार्ष्मन्वाजी न्यक्रमीत् ॥४॥
*asarji rathyo yathā pavitre chamvoḥ sutaḥ / kārṣmanvājī nyakramīt //4 //*

## ४०२. प्रयस्वन्त आत्रेयाः (Prayasvanta Ātreyāḥ)

१. अग्निः (Agniḥ) - ऋ. (Rv.)५.२०.१-४

यमग्ने वाजसातम त्वं चिन्मन्यसे रयिम्। तं नो गीर्भिः श्रवाय्यं देवत्रा पनया युजम् ॥१॥
ये अग्ने नेरयन्ति ते वृद्धा उग्रस्य शवसः। उप द्वेषो अप ह्वरोऽन्यव्रतस्य सश्चिरे ॥२॥
होतारं त्वा वृणीमहेऽग्ने दक्षस्य साधनम्। योषु पूर्व्य गिरा प्रयस्वन्तो हवामहे ॥३॥
इत्था यथा त ऊतये सहसावन् दिवेदिवे ।
राय ऋताय सुक्रतो गोभिः स्याम सध्मादो वीरैः स्याम सधमादः ॥४॥

*yamagne vājasātama tvaṁ chinmanyase rayim /*
*taṁ no gīrbhiḥ śravāyyaṁ devatrā panayā yujam //1 //*
*ye agne nerayanti te vṛddhā ugrasya śavasaḥ /*
*upa dveṣo apa hnaro'nyavratasya saśchire //2 //*
*hotāraṁ tvā vṛṇīmahe'gne dakṣasya sādhanam /*
*yoṣu pūrvya girā prayasvanto havāmahe //3 //*
*itthā yathā ta ūtaye sahasāvan divedive /*
*rāya ṛtāya sukrato gobhiḥ syāma sadhmādo vīraiḥ syāma sadhamādaḥ //4 //*

## ४०३. प्रयोगो भार्गवः (Prayogo Bhārgavaḥ)

१. अग्निः (Agniḥ) - सा. (Sv.) १३; १८; १९; २१; १०७; ११०; ९४६-९४८

सा. (Sv.) १३

उप त्वा जामयो गिरो देदिशतीर्हविष्कृतः। वायोरनीके अस्थिरन् ॥३॥

*upa tvā jāmayo giro dediśatīrhaviṣkṛtaḥ / vāyoranīke asthiran //3 //*

सा. (Sv.) १८-१९

और्वभृगुवच्छुचिमप्नवानवदा हुवे। अग्निं समुद्रवाससम् ॥८॥
अग्निमिन्धानो मनसा धियं सचेत मर्त्यः। अग्निमिन्धे विवस्वभिः ॥९॥

*aurvabhṛguvachchhuchimapnavānavadā huve / agniṁ samudravāsasam //8 //*
*agnimindhāno manasā dhiyaṁ sacheta martyaḥ / agnimindhe vivasvabhiḥ //9 //*

सा. (Sv.) २१

अग्निं वो वृधन्तमध्वराणां पुरूतमम्। अच्छा नप्त्रे सहस्वते ॥१॥

*agniṁ vo vṛdhantamadhvarāṇāṁ purūtamam / achchhā napnne sahasvate //1 //*

सा. (Sv.) १०७

प्र मंहिष्ठाय गायत ऋताव्ने बृहते शुक्रशोचिषे। उपस्तुतासो अग्नये ॥१॥

*pra maṁhiṣṭhāya gāyata ṛtāvne bṛhate śukraśochiṣe / upastutāso agnaye //1 //*

सा. (Sv.) ११०

मा नो हृणीथा अतिथिं वसुरग्निः पुरुप्रशस्त एषः। यः सुहोता स्वध्वरः ॥४॥

*mā no hṛṇīthā atithiṁ vasuragniḥ purupraśasta eṣaḥ / yaḥ suhotā svadhvaraḥ //4 //*

सा. (Sv.) ९४६-९४८

अग्निं वो वृधन्तमध्वराणां पुंरूतमम्। अच्छा नप्त्रे सहस्वते ॥१॥
अयं यथा न आभुवत्त्वष्टा रूपेव तक्ष्या। अस्य क्रत्वा यशस्वतः ॥२॥
अयं विश्वा अभि श्रियोऽग्निर्देवेषु पत्यते। आ वाजैरुप नो गमत् ॥३॥

*agniṁ vo vṛdhantamadhvarāṇāṁ puṁrūtamam / achchhā napnne sahasvate //1 //*
*ayaṁ yathā na ābhuvattvaṣṭā rūpeva takṣayā / asya kratvā yaśasvataḥ //2 //*
*ayaṁ viśvā abhi śriyo'gnirdeveṣu patyate / ā vājairupa no gamat //3 //*

४०४. प्रयोगो भार्गवः पावकोऽग्निर् बार्हस्पत्यो वा गृहपतियविष्ठौ सहसः पुत्रो वा अन्यतरो वा (Prayogo Bhārgavaḥ Pāvako'gnir Bārhaspatyo Vā Gṛhapatiyaviṣṭhau Sahasaḥ Putro Vā Anyataro Vā)

१. अग्निः (Agniḥ) - ऋ. (Rv.)८.१०२.१-२२ ; सा. (Sv.) १५७०-१५७२

ऋ. (Rv.)८.१०२.१-२२

त्वमग्ने बृहद्वयो दधासि देव दाशुषे। कविर्गृहपतिर्युवा ॥१॥
स न ईळानया सह देवाँ अग्ने दुवस्युवा। चिकिद्विभानवा वह ॥२॥
त्वया ह स्विद्युजा वयं चोदिष्ठेन यविष्ठ्य। अभि ष्मो वाजसातये ॥३॥
और्वभृगुवच्छुचिमप्नवानवदा हुवे। अग्निं समुद्रवाससम् ॥४॥
हुवे वातस्वनं कविं पर्जन्यक्रन्द्यं सहः। अग्निं समुद्रवाससम् ॥५॥
आ सवं सवितुर्यथा भगस्येव भुजिं हुवे। अग्निं समुद्रवाससम् ॥६॥
अग्निं वो वृधन्तमध्वराणां पुरूतमम्। अच्छा नप्त्रे सहस्वते ॥७॥
अयं यथा न आभुवत्त्वष्टा रूपेव तक्ष्या। अस्य क्रत्वा यशस्वतः ॥८॥
अयं विश्वा अभि श्रियोऽग्निर्देवेषु पत्यते। आ वाजैरुप नो गमत् ॥९॥
विश्वेषामिह स्तुहि होतॄणां यशस्तमम्। अग्निं योषु पूर्व्यम् ॥१०॥
शीरं पावकशोचिषं ज्येष्ठो यो दमेष्वा। दीदाय दीर्घश्रुत्तमः ॥११॥
तमर्वन्तं न सानसिं गृणीहि विप्र शुष्मिणम्। मित्रं न यातयज्जनम् ॥१२॥
उप त्वा जामयो गिरो देदिशतीर्हविष्कृतः। वायोरनीके अस्थिन् ॥१३॥
यस्य त्रिधात्ववृतं बर्हिस्तस्थावसंदिनम्। आपश्चिन्नि दधा पदम् ॥१४॥
पदं देवस्य मीळ्हुषोऽनाधृष्टाभिरूतिभिः। भद्रा सूर्य इवोपदृक् ॥१५॥
अग्ने घृतस्य धीतिभिस्तेपानो देव शोचिषा। आ देवान्वक्षि यक्षि च ॥१६॥
तं त्वाजनन्त मातरः कविं देवासो अंगिरः। हव्यवाहममर्त्यम् ॥१७॥
प्रचेतसं त्वा कवेऽग्ने दूतं वरेण्यम्। हव्यवाहं नि षेदिरे ॥१८॥
नहि मे अस्त्यघ्न्या न स्वधितिर्वनन्वति। अथैतादृग्भरामि ते ॥१९॥
यदग्ने कानि कानि चिदा ते दारूणि दध्मसि। ता जुषस्व यविष्ठ्य ॥२०॥
यदत्त्युपजिह्विका यद्वम्रो अतिसर्पति। सर्वं तदस्तु ते घृतम् ॥२१॥
अग्निमिन्धानो मनसा धियं सचेत मर्त्यः। अग्निमीधे विवस्वभिः ॥२२॥

*tvamagne bṛhadvayo dadhāsi deva dāśuṣe | kavigṛhapatiryuvā ||1||*
*sa na īḻānayā saha devām̐ agne duvasyuvā | chikidvibhānavā vaha ||2||*
*tvayā ha svidyujā vayaṁ chodiṣṭhena yaviṣṭhya | abhi ṣmo vājasātaye ||3||*
*aurvabhṛguvachchhuchimapnavānavadā huve | agiṁna samudravāsasam ||4||*
*huve vātasvanaṁ kaviṁ parjanyakrandyaṁ sahaḥ | agiṁna samudravāsamam ||5||*
*ā savaṁ savituryathā bhagasyeva bhujiṁ huve | agiṁna samudravāsasam ||6||*
*agiṁna vo vṛdhantamadhvarāṇāṁ purūtamam | achchhā naptre sahasvate ||7||*
*ayaṁ yathā na ābhuvattvaṣṭā rūpeva takṣayā | asya kratvā yaśasvataḥ ||8||*
*ayaṁ viśvā abhi śriyo'gnirdeveṣu patyate | ā vājairupa no gamat ||9||*
*viśveṣāmiha stuhi hotṝṇāṁ yaśastamam | agiṁna yoṣu pūrvyam ||10||*
*śīraṁ pāvakaśochiṣaṁ jyeṣṭho yo dameṣvā | dīdāya dīrghaśruttamaḥ ||11||*
*tamarvantaṁ na sānisiṁ gṛṇīhi vipra śuṣmiṇam | mitraṁ na yātayajjanam ||12||*
*upa tvā jāmayo giro dediśatīrhaviṣkṛtaḥ | vāyoranīke asthin ||13||*
*yasya tridhātvavṛtaṁ barhistasthāvasaṁdinam | āpaśchinni dadhā padam ||14||*
*padaṁ devasya mīḻahuṣo'nādhṛṣṭābhirūtibhiḥ | bhadrā sūrya ivopadṛk ||15||*
*agne ghṛtasya dhītibhistepāno deva śochiṣā | ā devānvakṣi yakṣi cha ||16||*
*taṁ tvājananta mātaraḥ kaviṁ devāso aṁgiraḥ | havyavāhamamartyam ||17||*
*prachetasaṁ tvā kave'gne dūtaṁ vareṇyam | havyavāhaṁ ni ṣedire ||18||*
*nahi me astyaghnyā na svadhitirvananvati | athaitādṛgbharāmi te ||19||*
*yadagne kāni kāni chidā te dārūṇi dadhmasi | tā juṣasva yaviṣṭhya ||20||*

*yadattyupajihnikā yadvamro atisarpati । sarva tadastu te ghṛtam ॥21॥*
*agnimindhāno manasā dhiyaṁ sacheta martyaḥ । agnimīdhe vivasvabhiḥ ॥22॥*

सा. (Sv.) १५७०-१५७२

उपत्वा जामयो गिरो देदिशतीर्हविष्कृतः। वायोनरीके अस्थिरन् ॥१॥
यस्य त्रिधातववृतं बर्हिस्तस्थावसन्दिनम्। आपश्चिन्नि दधा पदम् ॥२॥
पदं देवस्य मीढुषोऽनाधृष्आभिरूतिभिः। भद्रा सूर्य इवोपदृक् ॥३॥
*upatvā jāmayo giro dediśatīrhaviṣkṛtaḥ । vāyonarīke asthiran ॥1॥*
*yasya tridhātavavṛtaṁ barhistasthāvasandinam । āpaśchinni dadhā padam ॥2॥*
*padaṁ devasya mīḍhuṣo'nādhṛṣābhirūtibhiḥ । bhadrā sūrya ivopadṛk ॥3॥*

## ४०५. प्रशोचनः (Praśochanaḥ)

१. इन्द्राग्नी, सोमः, इन्द्रश्च (Indrāgnī, Somaḥ, Indraścha) - अ. (Av.) ६.१०४.१-२

आदानेन संदानेनामित्राना द्यामसि। अपाना ये चैषां प्राणा असुनासून्त्समच्छिदन् ॥१॥
इदमादानमकरं तपसेन्द्रेण संशितम्। अमित्रा येऽत्र नः सन्ति तानग्न आ द्या त्वम् ॥२॥
*ādānena saṁdānenāmitrānā dyāmasi ।*
*apānā ye chaiṣāṁ prāṇā asunāsūntsamachchhidan ॥1॥*
*idamādānamakaraṁ tapasendreṇa saṁśitam ।*
*amitrā ye'tra naḥ santi tānagna ā dyā tvam ॥2॥*

## ४०६. प्रस्कण्वः (Praskaṇvaḥ)

१. अग्निः (Agniḥ) - य. (Yv.)११.३७; ३३.१५

य. (Yv.)११.३७

सं सीदस्व महाँश्ऽअसि शोचस्व देववीतमः ।
वि धूममग्नेऽअरुषं मियेध्य सृज प्रशस्त दर्शतम् ॥३७॥
*saṁ sīdasva mahām̐ś'asi śochasva devavītamaḥ ।*
*vi dhūmamagne'aruṣaṁ miyedhya sṛja praśasta darśatam ॥37॥*

य. (Yv.)३३.१५

श्रुधि श्रुत्कर्ण वह्निभिर्देवैरग्ने सयावभिः ।
आ सीदन्तु बर्हिषि मित्रोऽ अर्य्यमा प्रातर्यावाणोऽअध्वरम् ॥१५॥
*śrudhi śrutkarṇa vahnibhirdevairagne sayāvabhiḥ ।*
*ā sīdantu barhiṣi mitro' aryyamā prātaryāvāṇo'adhvaram ॥15॥*

२. अश्विनौ (Aśvinau) - य. (Yv.)३४.२८

उभा पिबतमाश्विनोभा नः शर्म यच्छतम्। अविद्रियाभिरूतिभिः ॥२८॥
*ubhā pibatamāśvinobhā naḥ śarma yachchhatam । avidriyābhirūtibhiḥ ॥28॥*

३. इन्द्रः (Indraḥ) - अ. (Av.) ७.४४.१; २०.५१.१-२

अ. (Av.) ७.४४.१

उभा जिग्यथुर्न परा जयेथे न परा जिग्ये कतरश्चनैनयोः ।
इन्द्रश्च विष्णो यदपस्पृधेथां त्रेधा सहस्रं वि तदैरयेथाम् ॥१॥
*ubhā jigyathurna parā jayethe na parā jigye kataraśchanainayoḥ ।*
*indraścha viṣṇo yadapaspṛdhethāṁ tredhā sahasraṁ vi tadairayethām ॥1॥*

अ. (Av.) २०.५१.१-२

अभि प्र वः सुराधसमिन्द्रमर्च यथा विदे ।
यो जरितृभ्यो मघवा पुरूवसुः सहस्रेणेव शिक्षति ॥१॥
शतानीकेव प्र जिगाति धृष्णुया हन्ति वृत्राणि दाशुषे ।
गिरेरिव प्र रसा अस्य पिन्विरे दत्राणि पुरुभोजसः ॥२॥
*abhi pra vaḥ surādhasamindramarcha yathā vide ।*
*yo jaritṛbhyo maghavā purūvasuḥ sahasreṇeva śikṣati ॥1॥*

*śatānīkeva pra jigāti dhṛṣṇuyā hanti vṛtrāṇi dāśuṣe* ।
*gireriva pra rasā asya pinvire datrāṇi purubhojasaḥ* ॥2 ॥

४. ईर्ष्यापनयनम् (Īrṣyāpanayanam) - अ. (Av.) ७.४५.१-२

जनाद् विश्वजनीनात् सिन्धुतस्पयाभृतम्। दूरात् त्वा मन्य उद्भृतमीर्ष्याया नाम भेषजम् ॥१ ॥
अग्नेरिवास्य दहतो दावस्य दहतः पृथक्। एतामेतस्येर्ष्यामुद्नाग्निमिव शमय ॥२ ॥
*janād viśvajanīnāt sindhutaspayābhṛtam* ।
*dūrāt tvā manya udbhṛtamīrṣyāyā nāma bheṣajam* ॥1 ॥
*agnerivāsya dahato dāvasya dahataḥ pṛthak* ।
*etāmetasyerṣyāmudnāgnimiva śamaya* ॥2 ॥

५. पवमानः सोमः (Pavamānaḥ Somaḥ) - ऋ. (Rv.)९.९५.१-५

कनिक्रन्ति हरिरा सृज्यमानः सीदन्वनस्य जठरे पुनानः ।
नृभिर्यतः कृणुते निर्णिजं गा अतो मतीर्जनयत स्वधाभिः ॥१ ॥
हरिः सृजानः पथ्यामृतस्येयर्ति वाचमरितेव नावम् ।
देवो देवानां गुह्यानि नामाविष्कृणोति बर्हिषि प्रवाचे ॥२ ॥
अपामिवेदूर्मयस्तर्तुराणाः प्र मनीषा ईरते सोममच्छ ।
नमस्यन्तीरुप च यन्ति सं चा च विशन्त्युशतीरुशन्तम् ॥३ ॥
तं मर्मृजानं महिषं न सानावंशुं दुहन्त्युक्षणं गिरिष्ठाम् ।
तं वावशानं मतयः सचन्ते त्रितो बिभर्ति वरुणं समुद्रे ॥४ ॥
इष्यन्वाचमुपवक्तेव होतुः पुनान इन्दो वि ष्या मनीषाम् ।
इन्द्रश्च यत्क्षयथः सौभगाय सुवीर्यस्य पतयः स्याम ॥५ ॥
*kanikranti harirā sṛjyamānaḥ sīdanvanasya jaṭhare punānaḥ* ।
*nṛbhiryataḥ kṛṇute nirṇijaṁ gā ato matīrjanayata svadhābhiḥ* ॥1 ॥
*hariḥ sṛjānaḥ pathyāmṛtsyeyarti vāchamariteva nāvam* ।
*devo devānāṁ gṛhyāni nāmāviṣkṛṇoti barhiṣi pravāche* ॥2 ॥
*apāmivedūrmayastarturāṇāḥ pra manīṣā īrate somamachchha* ।
*namasyantīrupa cha yanti saṁ chā cha viśantyuśatīruśantam* ॥3 ॥
*taṁ marmṛjānaṁ mahiṣaṁ na sānāvaṁśuṁ duhantyukṣaṇaṁ giriṣṭhām* ।
*taṁ vāvaśānaṁ matayaḥ sachante trito bibharti varuṇaṁ samudre* ॥4 ॥
*iṣyanvāchamupavakteva hotuḥ punāna indo vi ṣyā manīṣām* ।
*indraścha yatkṣayathaḥ saubhagāya suvīryasya patayaḥ syāma* ॥5 ॥

६. मन्त्रोक्ताः (Mantroktāḥ) - अ. (Av.) ७.३९.१

दिव्यं सुपर्णं पयसं बृहन्तमपां गर्भं वृषभोषधीनाम् ।
अभीपतो वृष्ट्या तर्पयन्तमा नो गोष्ठे रयिष्ठां स्थापयाति ॥१ ॥
*divyaṁ suparṇa payasaṁ bṛhantamapāṁ garbha vṛṣabhoṣadhīnām* ।
*abhīpato vṛṣṭyā tarpayantamā no goṣṭhe rayiṣṭhāṁ sthāpayāti* ॥1 ॥

७. राजादयो गृहपतयः (Rājādayo Gṛhapatayaḥ) - य. (Yv.)८.४०

अदृश्रमस्य केतवो वि रश्मयो जनाँ२ऽअनु। भ्राजन्तो अग्नयो यथा ।
उपयामगृहीतोऽसि सूर्य्याय त्वा भ्राजायैष ते योनिः सूर्य्याय त्वा भ्राजाय ।
सूर्य्य भ्राजिष्ठ भ्राजिष्ठस्त्वं देवेष्वसि भ्राजिष्ठोऽहं मनुष्येषु भूयासम् ॥४० ॥
*adṛśramasya ketavo vi raśmayeā janām̐ś'anu* । *bhrājanto agnayo yathā* ।
*upayāmagṛhīto'si sūryyāya tvā bhrājāyaiṣa te yoniḥ sūryyāya tvā bhrājāya* ।
*sūryya bhrājiṣṭha bhrājiṣṭhastvaṁ deveṣvasi bhrājiṣṭho'haṁ manuṣyeṣu bhūyāsam* ॥40 ॥

८. वाक् (Vāk) - अ. (Av.) ७.४३.१

शिवास्त एका अशिवास्त एकाः सर्वा बिभर्षि सुमनस्यमानः ।
तिस्रो वाचो निहिता अन्तरस्मिन् तासामेका वि पपातानु घोषम् ॥१ ॥

*śivāsta ekā aśivāsta ekāḥ sarvā bibharṣi sumanasyamānaḥ /*
*tisro vācho nihitā antarasmin tāsāmekā vi papātānu ghoṣam //1 //*

९. विद्वान् (Vidvān) - य. (Yv.)३३.३३

दैव्यावध्वर्यूऽआ गतंरथेन सूर्यत्वचा। मध्वा यांसमंजाथे।
तं प्रत्नथा। अयं वेनः। चित्रं देवानाम्॥३३॥
*daivyāvadhvaryū'ā gataṁrathena sūryatvachā / madhvā yāṁsamaṁjāthe /*
*taṁ pratnathā / ayaṁ venaḥ / chitraṁ devānām //33 //*

१०. श्येनः (Śyenaḥ) - अ. (Av.) ७.४१.१-२

अति धन्वान्यत्यपस्ततर्द श्येनो नृचक्षा अवसानदर्शः ।
तरन् विश्वान्यबरा रजांसीन्द्रेण सख्या शिव आ जगम्यात् ॥१॥
श्येनो नृचक्षा दिव्यः सुपर्णः सहस्रपाच्छतयोनिर्वयोधाः ।
स नो नि यच्छाद् वसु यत् पराभृतमस्माकमस्तु पितृषु स्वधावत् ॥२॥
*ati dhanvānyatyapastatarda śyeno nṛchakṣā avasānadarśaḥ /*
*taran viśvānyabarā rajāṁsīndreṇa sakhyā śiva ā jagamyāt //1 //*
*śyeno nṛchakṣā divyaḥ suparṇaḥ sahasrapāchchhatayonirvayodhāḥ /*
*sa no ni yachchhād vasu yat parābhṛtamasmākamastu pitṛṣu svadhāvat //2 //*

११. सरस्वान् (Sarasvān) - अ. (Av.) ७.४०.१-२

यस्य व्रतं पशवो यन्ति सर्वे यस्य व्रत उपतिष्ठन्त आपः ।
यस्य व्रते पुष्टपतिर्निविष्टस्तं सरस्वन्तमवसे हवामहे ॥१॥
आ प्रत्यंचं दाशुषे दाश्वांसं सरस्वन्तं पुष्टपतिं रयिष्ठाम् ।
रायस्पोषं श्रवस्युं वसाना इह हुवेम सदनं रयीणाम् ॥२॥
*yasya vrataṁ paśavo yanti sarve yasya vrata upatiṣṭhanta āpaḥ /*
*yasya vrate puṣṭapatirniviṣṭastaṁ sarasvantamavase havāmahe //1 //*
*ā pratyaṁchaṁ dāśuṣe dāśvāṁsaṁ sarasvantaṁ puṣṭapatiṁ rayiṣṭhām /*
*rāyaspoṣaṁ śravasyuṁ vasānā iha huvema sadanaṁ rayīṇām //2 //*

१२. सूर्यः (Sūryaḥ) - य. (Yv.)७.४१; ८.४१; २०.२१; ३३.३१; ३२ ; ३६; अ. (Av.) २०.४७.१३-२१

य. (Yv.)७.४१

उद त्यं जातवेदसं देवं वहन्ति केतवः। दृशे विश्वाय सूर्य्यंस्वाहा ॥४१॥
*uda tyaṁ jātavedasaṁ devaṁ vahanti ketavaḥ / dṛśe viśvāya sūryyaṁsvāhā //41 //*

य. (Yv.)८.४१

उदु त्यं जातवेदसं देवं वहन्ति केतवः। दृशे विश्वाय विश्वाय सूर्य्यम् ।
उपयामगृहीतोऽसि सूर्य्याय त्वा भ्राजायैष ते योनिः सूर्य्याय त्वा भ्राजाय ॥४१॥
*udu tyaṁ jātavedasaṁ devaṁ vahanti ketavaḥ / dṛśe viśvāya viśvāya sūryyam /*
*upayāmagṛhīto'si sūryyāya tvā bhrājāyaiṣa te yoniḥ sūryyāya tvā bhrājāya //41 //*

य. (Yv.)२०.२१

उद्वयं तमसस्परि स्वः पश्यन्तऽउत्तरम्। देवं देवत्रा सूर्यमगन्म ज्योतिरुत्तमम् ॥२१॥
*udvayaṁ tamasaspari svaḥ paśyanta'uttaram / devaṁ devatrā sūryamaganma jyotiruttamam //21 //*

य. (Yv.)३३.३१-३२

उदु त्यं जातवेदसं देवं वहन्ति केतवः। दृशे विश्वाय सूर्य्यम् ॥३१॥
येना पावक चक्षसा भुरएयन्तं जनाँश्ऽ अनु। त्वं वरुण पश्यसि ॥३२॥
*udu tyaṁ jātavedasaṁ devaṁ vahanti ketavaḥ / dṛśe viśvāya sūryyam //31 //*
*yenā pāvaka chakṣasā bhuraeyantaṁ janāṁś' anu / tvaṁ varuṇa paśyasi //32 //*

य. (Yv.)३३.३६

तरणिविश्वदर्शतो ज्योतिष्कृदसि सूर्य्य। विश्वमा भासि रोचनम् ॥३६॥

*taraṇiviśvadarśato jyotiṣkṛdasi sūryya । viśvamā bhāsi rochanam ॥36 ॥*

अ. (Av.) २०.४७.१३-२१

उदु त्यं जातवेदसं देवं वहन्ति केतवः। दृशे विश्वाय सूर्यम् ॥१३ ॥
अप त्ये तायवो यथा नक्षत्रा यन्त्यक्तुभिः। सूराय विश्वचक्षसे ॥१४ ॥
अदृश्रन्नस्य केतवो वि रश्मयो जनाँ अनु। भ्राजन्तो अग्नयो यथा ॥१५ ॥
तरणिर्विश्वदर्शतो ज्योतिष्कृदसि सूर्य। विश्वमा भासि रोचन ॥१६ ॥
प्रत्यङ् देवानां विशः प्रत्यङ्ङुदेषि मानुषीः। प्रत्यङ् विश्वं स्वर्दृशे ॥१७ ॥
येना पावक चक्षसा भुरण्यन्तं जनाँ अनु। त्वं वरुण पश्यसि ॥१८ ॥
वि द्यामेषि रजस्पृथ्वहर्मिमानो अक्तुभिः पश्यंजन्मानि सूर्य ॥१९ ॥
सप्त त्वा हरितो रथे वहन्ति देव सूर्य। शोचिष्केशं विचक्षणम् ॥२० ॥
अयुक्त सप्त शुन्ध्युवः सूरो रथस्य नप्त्यः। ताभिर्याति स्वयुक्तिभिः ॥२१ ॥

*udu tyaṁ jātavedasaṁ devaṁ vahanti ketavaḥ । dṛśe viśvāya sūryam ॥13 ॥*
*apa tye tāyavo yathā nakṣatrā yantyaktubhiḥ । sūrāya viśvachakṣase ॥14 ॥*
*adṛśrannasya ketavo vi raśmayo janām̐ anu । bhrājanto agnayo yathā ॥15 ॥*
*taraṇirviśvadarśato jyotiṣkṛdasi sūrya । viśvamā bhāsi rochana ॥16 ॥*
*pratyaṅ devānāṁ viśaḥ pratayaṅṅudeṣi mānuṣīḥ । pratyaṅ viśvaṁ svardṛśe ॥17 ॥*
*yenā pāvaka chakṣasā bhuraṇyantaṁ janām̐ anu । tvaṁ varuṇa paśyasi ॥18 ॥*
*vi dyāāmeṣi rajaspṛthvaharmimāno aktubhiḥ paśyaṁjanmāni sūrya ॥19 ॥*
*sapta tvā harito rathe vahanti deva sūrya । śochiṣkeśaṁ vichakṣaṇam ॥20 ॥*
*ayukta sapta śundhyuvaḥ sūro rathasya naptyaḥ । tābhiryāti svayuktibhiḥ ॥21 ॥*

१३. सोमारुद्रौः (Somārudrauḥ) - अ. (Av.) ७.४२.१-२

सोमारुद्रा वि बृहतं विषूचीममीवा या नो गयमाविवेश ।
बाधेथां दूरं निर्ऋतिं पराचैः कृतं चिदेनः प्र मुमक्तमस्मत् ॥१ ॥
सोमारुद्रा युवमेतान्यस्मद् विश्वा तनूषु भेषजानि धत्तम् ।
अव स्यतं मुंचतं यन्नो असत् तनूषु बद्धं कृतमेनो अस्मत् ॥२ ॥

*somārudrā vi bṛhataṁ viṣūchīmamīvā yā no gayamāviveśa ।*
*bādhethāṁ dūraṁ nirṛti parāchaiḥ kṛtaṁ chidenaḥ pra mumaktamasmat ॥1 ॥*
*somārudrā yuvametānyasmad viśvā tanūṣu bheṣajāni dhattam ।*
*ava syataṁ muṁchataṁ yanno asat tanūṣu baddhaṁ kṛtameno asmat ॥2 ॥*

## ४०७. प्रस्कण्वः काण्वः (Praskaṇvaḥ Kāṇvaḥ)

१. अग्निः (Agniḥ) - ऋ. (Rv.)१.४४.१-१४; सा. (Sv.) ३१; ४०; ५०; ९६; १७८०-१७८१

ऋ. (Rv.)१.४४.१-१४

अग्ने विवस्वदुषसश्चित्रं राधो अमर्त्य । आदाशुषे जातवेदो वहा त्वमद्या देवाँ उषर्बुधः ॥१ ॥
जुष्टो हि दूतो असि हव्यवाहनोऽग्ने रथीरध्वराणाम् । सजूरश्विभ्यामुषसा सुवीर्यमस्मे धेहि श्रवो बृहत् ॥२ ॥
अद्या दूतं वृणीमहे वसुमग्निं पुरुप्रियम् । धूमकेतुं भाऋजीकं व्युष्टिषु यज्ञानामध्वरश्रियम् ॥३ ॥
श्रेष्ठं यविष्ठमतिथिं स्वाहुतं जुष्टं जनाय दाशुषे । देवाँ अच्छा यातवे जातवेदसमग्निमीळे व्युष्टिषु ॥४ ॥
स्तविष्यामि त्वामहं विश्वस्यामृत भोजन । अग्ने त्रातारममृतं मियेध्य यजिष्ठं हव्यवाहन ॥५ ॥
सुशंसो बोधि गृणते यविष्ठ्य मधुजिह्वः स्वाहुतः । प्रस्कण्वस्य प्रतिरन्नायुर्जीवसे नमस्या दैव्यं जनम् ॥६ ॥
होतारं विश्ववेदसं सं हि त्वा विश इन्धते । स आ वह पुरुहूत प्रचेतसोऽग्ने देवाँ इह द्रवत् ॥७ ॥
सवितारमुषसमश्विना भगमग्निं व्युष्टिषु क्षपः । कण्वासस्त्वा सुतसोमास इन्धते हव्यवाहं स्वध्वर ॥८ ॥
पतिर्ह्यध्वराणामग्ने दूतो विशामसि । उषर्बुध आ वह सोमपीतये देवाँ अद्य स्वर्दृशः ॥९ ॥
अग्ने पूर्वा अनूषसो विभावसो दीदेथ विश्वदर्शतः । असि ग्रामेष्वविता पुरोहितोऽसि योषु मानुषः ॥१० ॥
नि त्वा यास्य साधनमग्ने होतारमृत्विजम् । मनुष्वदेव धीमहि प्रचेतसं जीरं दूतममर्त्यम् ॥११ ॥
यद्देवानां मित्रमहः पुरोहितोऽनतरो यासि दूत्यम् । सिन्धोरिव प्रस्वनितास ऊर्मयोऽग्नेर्भ्राजन्ते अर्चयः ॥१२ ॥
श्रुधि श्रुत्कर्ण वह्निभिर्देवैरग्ने सयावभिः । आ सीदन्तु बर्हिषि मित्रो अर्यमा प्रातर्यावाणो अध्वरम् ॥१३ ॥
शृण्वन्तु स्तोमं मरुतः सुदानवोऽग्निजिह्वा ऋतावृधः । पिबतु सोमं वरुणो धृतव्रतोऽश्विभ्यामुषसा सजूः ॥१४ ॥

*agne vivasvaduṣasaśchitraṁ rādho amartya* ।
*ādāśuṣe jātavedo vahā tvamadyā devāṁ̐ uṣarbudhaḥ* ॥1॥
*juṣṭo hi dūto asi havyavāhano'gne rathīradhvarāṇām* ।
*sajūraśvibhyāmuṣasā suvīryamasme dhehi śravo bṛhat* ॥2॥
*adyā dūtaṁ vṛṇīmahe vasumagiṁna purupriyam* ।
*dhūmaketuṁ bhārjīkaṁ vyuṣṭiṣu yāānāmadhvaraśriyam* ॥3॥
*śreṣṭhaṁ yaviṣṭhamatithi svāhutaṁ juṣṭaṁ janāya dāśuṣe* ।
*devāṁ̐ achchhā yātave jātavedasamagnimīḷe vyuṣṭiṣu* ॥4॥
*staviṣyāmi tvāmahaṁ viśvasyāmṛta bhojana* ।
*agne trātāramamṛtaṁ miyedhya yajiṣṭhaṁ havyavāhana* ॥5॥
*suśaṁso bodhi gṛṇate yaviṣṭhya madhujihnaḥ svāhutaḥ* ।
*praskaṇvasya pratirannāyurjīvase namasyā daivyaṁ janam* ॥6॥
*hotāraṁ viśvavedasaṁ saṁ hi tvā viśa indhate* ।
*sa ā vaha puruhūta prachetaso'gne devāṁ̐ iha dravat* ॥7॥
*savitāramuṣasamiśvinā bhagamagiṁna vyuṣṭiṣu kṣapaḥ* ।
*kaṇvāsastvā sutasomāsa indhate havyavāhaṁ svadhvara* ॥8॥
*patirhyadhvarāṇāmagne dūto viśāmasi* ।
*uṣarbudha ā vaha somapītaye devāṁ̐ adya svardṛśaḥ* ॥9॥
*agne pūrvā anūṣaso vibhāvaso dīdetha viśvadarśataḥ* ।
*asi grāmeṣvavitā purohito'si yoṣu mānuṣaḥ* ॥10॥
*ni tvā yāsya sādhanamagne hotāramṛtvijam* ।
*manuṣvaddeva dhīmahi prachetasaṁ jīraṁ dūtamamartyam* ॥11॥
*yaddevānāṁ mitramahaḥ purohito'nataro yāsi dūtyam* ।
*sindhoriva prasvanitāsa ūrmayo'gnerbhrājante archayaḥ* ॥12॥
*śrudhi śrutkarṇa vahnibhirdevairagne sayāvabhiḥ* ।
*ā sīdantu barhiṣi mitro aryamā prātaryāvāṇo adhvaram* ॥13॥
*śṛṇvantu stomaṁ marutaḥ sudānavo'gnijihnā ṛtāvṛdhaḥ* ।
*pibatu somaṁ varuṇo dhṛtavrato'śvibhyāmuṣasā sajūḥ* ॥14॥

सा. (Sv.) ३१-४०

उदु त्यं जातवेदसं देवं वहन्ति केतवः। दृशे विश्वाय सूर्यम् ॥११॥
अग्ने विवस्वदुषसश्चित्रं अमर्त्य। आ दाशुषे जातवेदो वहा त्वमद्या देवाँ उषर्बुधः ॥६॥
श्रुधि श्रुत्कर्ण वह्निभिर्देवैरग्ने सयावदभिः। आ सीदतु बर्हिषि मित्रा अर्यमा प्रातर्यावभिरध्वरे ।६।
त्वमग्ने वसूं रिह रुद्राँ आदित्याँ उत। यजा स्वध्वरं जनं मनुजातं घृतप्रुषम् ॥६॥
अग्ने विवस्वदुषसश्चित्रं राधो अमर्त्य। आ दाशुषे जातवेदो वहा त्वमद्या देवाँ उषर्बुधः ॥१॥
जुष्टो हि दूतो असि हव्यवाहनोऽग्ने रथीरध्वराणाम् । सजूरश्विभ्यामुषसा सुवीर्यमस्मे धेहि श्रवो बृहत्॥२॥
*udu tyaṁ jātavedasaṁ devaṁ vahanti ketavaḥ । duśe viśvāya sūryam* ॥11॥
*agne vivasvaduṣasaśchitraṁ amartya* ।
*ā dāśuṣe jātavedo vahā tvamadyā devāṁ̐ uṣarbudhaḥ* ॥6॥
*śrudhi śrutkarṇa vahnibhirdevairagne sayāvadabhiḥ* ।
*ā sīdatu barhiṣi mitreā aryamā prātaryāvabhiradhvare* ।6।
*tvamagne vasūṁ riha rudrāṁ̐ ādityāṁ̐ uta* ।
*yajā svadhvaraṁ janaṁ manujātaṁ ghṛtapruṣam* ॥6॥
*agne vivasvaduṣasaśchitraṁ rādho amartya* ।
*ā dāśuṣe jātavedo vahā tvamadyā devāṁ̐ uṣarbudhaḥ* ॥1॥
*juṣṭo hi dūto asi havyavāhano'gne rathīradhvarāṇām* ।
*sajūraśvibhyāmuṣasā suvīryamasme dhehi śravo bṛhat* ॥2॥

२. अग्निर् देवाश्च (Agnir Devāścha) - ऋ. (Rv.)१.४५.१-१०

त्वमग्ने वसूँरिह रुद्राँ आदित्याँ उत। यजा स्वध्वरं जनं मनुजातं घृतप्रुषम् ॥१॥

श्रुष्टीवानो हि दाशुषे देवा अग्ने विचेतसः। तान्रोहिदश्व गिर्वणस्त्रयस्त्रिंशतमा वह ॥२॥
प्रियमेधवदत्रिवज्जातवेदो विरूपवत्। अंगिरस्वन्महिव्रत प्रस्कण्वस्य श्रुधी हवम् ॥३॥
महिकेरव ऊतये प्रियमेधा अहूषत। राजन्तमध्वराणामग्निं शुक्रेण शोचिषा ॥४॥
घृताहवन सन्त्येमा उ षु श्रुधी गिरः। याभिः कण्वस्य सूनवो हवन्तेऽवसे त्वा ॥५॥
त्वां चित्रश्रवस्तम हवन्ते विक्षु जन्तवः। शोचिष्केशं पुरुप्रियाग्ने हव्याय वोळहवे ॥६॥
नि त्वा होतारमृत्विजं दधिरे वसुवित्तमम्। श्रुत्कर्ण सप्रथस्तमं विप्रा अग्ने दिविष्टिषु ॥७॥
आ त्वा विप्रा अचुच्यवुः सुतसोमा अभि प्रयः। बृहद्भा बिभ्रतो हविरग्ने मर्ताय दाशुषे ॥८॥
प्रातर्यावणः सहस्कृत सोमपेयाय सन्त्व। इहाद्य दैव्यं जनं बर्हिरा सादया वसो ॥९॥
अर्वांचं दैव्यं जनमग्ने यक्ष्व सहूतिभिः। अयं सोमः सुदानवस्तं पात तिरोअह्न्यम् ॥१०॥
*tvamagne vasūm̐riha rudrām̐ ādityām̐ uta |*
*yajā svadhvaraṁ janaṁ manujātaṁ ghṛtapruṣam ||1 ||*
*śruṣṭīvāno hi dāśuṣe devā agne vichetasaḥ |*
*tānrohidaśva girvaṇastrayastriṁśatamā vaha ||2 ||*
*priyamedhavadatrivajjātavedo virūpavat |*
*aṁgirasvanmahivrata praskaṇvasya śrudhī havam ||3 ||*
*mahikerava ūtaye priyamedhā ahūṣata |*
*rājantamadhvarāṇāmagiṁna śukreṇa śochiṣā ||4 ||*
*ghṛtāhavana santyemā u ṣu śrudhī giraḥ |*
*yābhiḥ kaṇvasya sūnavo havante'vase tvā ||5 ||*
*tvāṁ chitraśravastama havante vikṣu jantavaḥ |*
*śochiṣkeśaṁ purupriyāgne havyāya voḷahave ||6 ||*
*ni tvā hotāramṛtvijaṁ dadhire vasuvittamam |*
*śrutkarṇa saprathastamaṁ viprā agne diviṣṭiṣu ||7 ||*
*ā tvā viprā achuchyavuḥ sutasomā abhi prayaḥ |*
*bṛhadbhā bibhrato haviragne martāya dāśuṣe ||8 ||*
*prātaryāvaṇaḥ sahaskṛta somapeyāya santva |*
*ihādya daivyaṁ janaṁ barhirā sādayā vaso ||9 ||*
*arvāṁchaṁ daivyaṁ janamagne yakṣava sahūtibhiḥ |*
*ayaṁ somaḥ sudānavastaṁ pāta tiroahnyam ||10 ||*

३. अश्विनौ (Aśvinau) - ऋ. (Rv.)१.४६.१-१५; १.४७.१-१०; सा. (Sv.) १७२८-१७३०

ऋ. (Rv.)१.४६.१-१५

एषो उषा अपूर्व्या व्युच्छति प्रिया दिवः। स्तुषे वामश्विना बृहत् ॥१।
या दस्रा सिन्धुमातरा मनोतरा रयीणाम्। धिया देवा वसुविदा ॥२॥
वच्यन्ते वां ककुहासो जूर्णायामधि विष्टपि। यद्वां रथो विभिष्पतात् ॥३॥
हविषा जारो अपां पिपर्ति पपुरिर्नरा। पिता कुटस्य चर्षणिः ॥४॥
आदारो वां मतीनां नासत्या मतवचसा। पातं सोमस्य धृष्णुया ॥५॥
या नः पीपरदश्विना ज्योतिष्मती तमस्तिरः। तामस्मे रासाथामिषम् ॥६॥
आ नो नावा मतीनां यातं पाराय गन्तवे। युंजाथामश्विना रथम् ॥७॥
अरित्रं वां दिवस्पृथु तीर्थे सिन्धूनां रथः। धिया युयुज्र इन्दवः ॥८॥
दिवस्कण्वास इन्दवो वसु सिन्धुनां पदे। स्वं वव्रिं कुह धित्सथः ॥९॥
अभूदु भा उ अंशवे हिरण्यं प्रति सूर्यः। व्यख्यज्जिह्वयासितः ॥१०॥
अभूदु पारमेतवे पन्थ ऋतस्य साधुया। अदर्शि वि स्रुतिर्दिवः ॥११॥
तत्तदिदश्विनोरवो जरिता प्रति भूषति। मदे सोमस्य पिप्रतोः ॥१२॥
वावसाना विवस्वति सोमस्य पीत्या गिरा। मनष्वच्छंभू आ गतम् ॥१३॥
युवोरुषा अनु श्रियं परिज्मनोरुपाचरत्। ऋचा वनथो अक्तुभिः ॥१४॥
उभा पिबतमश्विनोभा नः शर्म यच्छतम्। अविद्रियाभिरूतिभिः ॥१५॥
*eṣo uṣā apūrvyā vyuchchhati priyā divaḥ | stuṣe vāmaśvinā bṛhat ||1 |*

*yā dasrā sindhumātarā manotarā rayīṇām । dhiyā devā vasuvidā ॥2 ॥*
*vachyante vāṁ kakuhāso jūrṇāyāmadhi viṣṭapi । yadvāṁ ratho vibhiṣpatāt ॥3 ॥*
*haviṣā jāro apāṁ piparti papurirnarā । pitā kuṭasya charṣaṇiḥ ॥4 ॥*
*ādāro vāṁ matīnāṁ nāsatyā matavachasā । pātaṁ somasya dhṛṣṇuyā ॥5 ॥*
*yā naḥ pīparadaśvinā jyotiṣmatī tamastiraḥ । tāmasme rāsāthāmiṣam ॥6 ॥*
*ā no nāvā matīnāṁ yātaṁ pārāya gantave । yuṁjāthāmaśvinā ratham ॥7 ॥*
*aritraṁ vāṁ divaspṛthu tīrthe sindhūnāraṁ rathaḥ । dhiyā yuyujra indavaḥ ॥8 ॥*
*divaskaṇvāsa indavo vasu sindhunāṁ pade । svaṁ vavriṁ kuha dhitsathaḥ ॥9 ॥*
*abhūdu bhā u aṁśave hiraṇyaṁ prati sūryaḥ । vyakhyajjihnayāsitaḥ ॥10 ॥*
*abhūdu pārametave pantha ṛtasya sādhuyā । adarśi vi srutirdivaḥ ॥11 ॥*
*tattadidaśvinoravo jaritā prati bhūṣati । made somasya pipratoḥ ॥12 ॥*
*vāvasānā vivasvati somasya pītyā girā । manaṣvachchhaṁbhū ā gatam ॥13 ॥*
*yuvoruṣā anu śriyaṁ parijmanorupācharat । ṛchā vanatho aktubhiḥ ॥14 ॥*
*ubhā pibatamaśvinobhā naḥ śarma yachchhatam । avidriyābhirūtibhiḥ ॥15 ॥*

ऋ. (Rv.)१.४७.१-१०

अयं वां मधुमत्तमः सुतः सोम ऋतावृधा ।
तमश्विना पिबतं तिरोअह्न्यं धत्तं रत्नानि दाशुषे ॥१ ॥
त्रिवन्धुरेण त्रिवृता सुपेशसा रथेना यातमश्विना ।
काण्वासो वां ब्रह्मकृण्वन्त्यध्वरे तेषां सु श्रृणुतं हवम् ॥२ ॥
अश्विना मधुमत्तमं पातं सोममृतावृधा ।
अथाद्य दस्रा वसु बिभ्रता रथे दाश्वांसमुप गच्छतम् ॥३ ॥
त्रिषधस्थे बर्हिषि विश्ववेदसा मध्वा यां मिमिक्षतम् ।
कण्वासो वां सुतसोमा अभिद्यवो युवां हवन्ते अश्विना ॥४ ॥
याभिः कण्वमभिष्टिभिः प्रावतं युवमश्विना ।
ताभिः ष्व१स्माँ अवतं शुभस्पती पातं सोममृतावृधा ॥५ ॥
सुदासो दस्रा वसु बिभ्रता रथे पृक्षो वहतमश्विना ।
रयिं समुद्रादुत वा दिवस्पर्यस्मे धत्तं पुरुस्पृहम् ॥६ ॥
यन्नासत्या परावति यद्वा स्थो अधि तुर्वशे ।
अतो रथेन सुवृता न आ गतं साकं सूर्यस्य रश्मिभिः ॥७ ॥
अर्वांचा वां सप्तयोऽध्वरश्रियो वहन्तु सवनेदुप ।
इषं पृंचन्ता सुकृते सुदानव आ बर्हिः सीदतं नरा ॥८ ॥
तेन नासत्या गतं रथेन सूर्यत्वचा ।
येन शश्वदूहथुर्दाशुषे वसु मध्वः सोमस्य पीतये ॥९ ॥
उक्थेभिरर्वागवसे पुरूवसू अर्कैश्च नि ह्वयामहे ।
शश्वत्कण्वानां सदसि प्रिये हि कं सोमं पपथुरश्विना ॥१० ॥

*ayaṁ vāṁ madhumattamaḥ sutaḥ soma ṛtāvṛdhā ।*
*tamaśvinā pibataṁ tiroahnyaṁ dhattaṁ ratnāni dāśuṣe ॥1 ॥*
*trivandhureṇa trivṛtā supeśasā rathenā yātamaśvinā ।*
*kāṇvāso vāṁ brahmakṛṇvantyadhvare teṣāṁ su śṛṇṛtaṁ havam ॥2 ॥*
*aśvinā madhumattamaṁ pātaṁ somamṛtāvṛdhā ।*
*athādya dasrā vasu bibhratā rathe dāśchāṁsamupa gachchhatam ॥3 ॥*
*triṣadhasthe barhiṣi viśvavedasā madhvā yāṁ mimikṣatam ।*
*kaṇvāso vāṁ sutasomā abhidyavo yuvāṁ havante aśvinā ॥4 ॥*
*yābhiḥ kaṇvamabhiṣṭibhiḥ prāvataṁ yuvamaśvinā ।*
*tābhiḥ ṣva1smām̐ avataṁ śubhaspatī pātaṁ somamṛtāvṛdhā ॥5 ॥*
*sudāso dasrā vasu bibhratā rathe pṛkṣo vahatamaśvinā ।*
*rayiṁ samudrāduta vā divasparyasme dhattaṁ puruspṛham ॥6 ॥*
*yannāsatyā parāvati yadvā stho adhi turvaśe ।*

*ato rathena suvṛtā na ā gataṁ sākaṁ sūryasya raśmibhiḥ //7 //*
*arvāṁchā vāṁ saptayo'dhvaraśriyo vahantu savanedupa /*
*iṣaṁ pṛṁchantā sukṛte sudānava ā barhiḥ sīdataṁ narā //8 //*
*tena nāsatyā gataṁ rathena sūryatvachā /*
*yena śaśvadūhathurdāśuṣe vasu madhvaḥ somasya pītaye //9 //*
*ukthebhirarvāgavase purūvasū arkaiścha ni hnayāmahe /*
*śaśvatkaṇvānāṁ sadasi priye hi kaṁ somaṁ papathuraśvinā //10 //*

सा. (Sv.) १७२८-१७३०

एषो उषा अपूर्व्या व्युच्छति प्रिया दिवः। स्तुषे वामश्विना बृहत् ॥१॥
या दस्रा सिन्धुमातरा मनोतरा रयीणाम्। धिया देवा वसुविदा ॥२॥
वच्यन्ते वां ककुहासो जुर्णायामधि विष्टपि। यद्वां रथो विभिष्पतात् ॥३॥

*eṣo uṣā apūrvyā vyuchchhati priyā divaḥ / stuṣe vāmaśvinā bṛhat //1 //*
*yā dasrā sindhumātarā manotarā rayīṇām / dhiyā devā vasuvidā //2 //*
*vachyante vāṁ kakuhāso jurṇāyāmadhi viṣṭapi / yadvāṁ ratho vibhiṣpatāt //3 //*

४. इन्द्रः (Indraḥ) - ऋ. (Rv.)८.४९.१-१०; सा. (Sv.) ८११-८१२

ऋ. (Rv.)८.४९.१-१०

अभि प्र वः सुराधसमिन्द्रमर्च यथा विदे ।
यो जरितृभ्यो मघवा पुरूवसुः सहस्रेणेव शिक्षति ॥१॥
शतानीकेव प्र जिगाति धृष्णुया हन्ति वृत्राणि दाशुषे ।
गिरेरिव प्ररसा अस्य पिन्विरे दत्राणि पुरुभोजसः ॥२॥
आ त्वा सुतास इन्दवो मदा य इन्द्र गिर्वणः ।
आपो न वज्रिन्नन्वोक्यं१ सरः पृणन्ति शूर राधसे ॥३॥
अनेहसं प्रतरणं विवक्षणं मध्वः स्वादिष्ठमीं पिब ।
आ यथा मन्दसानः किरासि नः प्र क्षुद्रेव त्मना धृषत् ॥४॥
आ नः स्तोममुप द्रवद्धियानो अश्वो न सोतृभिः ।
यं ते स्वधावन्त्स्वदयन्ति धेनव इन्द्र कण्वेषु रातयः ॥५॥
उग्रं न वीरं नमसोप सोदिम विभूतिमक्षितावसुम् ।
उद्रीव वज्रिन्नवतो न सिंचते क्षरन्तीन्द्र धीतयः ॥६॥
यद्ध नूनं यद्वा यो यद्वा पृथिव्यामधि ।
अतो नो यामाशुभिर्महेमत उग्र उग्रेभिरा गहि ॥७॥
अजिरासो हरयो ये त आशवो वाताइव प्रसक्षिणः ।
येभिरपत्यं मनुषः परीयसे येभिर्विश्वं स्वर्दृशे ॥८॥
एतावतस्त ईमह इन्द्र सुम्नस्य गोमतः ।
यथा प्रावो मघवन् मेध्यातिथिं यथा नीपातिथिं धने ॥९॥
यथा कण्वे मघवन्त्रसदस्यवि यथा पक्थे दशव्रजे ।
यथा गोशर्ये असनोऋर्जिश्वनीन्द्र गोमद्धिरण्यवत् ॥१०॥

*abhi pra vaḥ surādhasamindramarcha yathā vide /*
*yo jaritṛbhyo maghavā purūvasuḥ sahasreṇeva śikṣati //1 //*
*śatānīkeva pra jigāti dhṛṣṇuyā hanti vṛtrāṇi dāśuṣe /*
*gireriva prarasā asya pinvire datrāṇi purubhojasaḥ //2 //*
*ā tvā sutāsa indavo madā ya indra girvaṇaḥ /*
*āpo na vajrinnanvokyaṁ1 saraḥ pṛṇanti śūra rādhase //3 //*
*anehasaṁ prataraṇaṁ vivakṣaṇaṁ madhvaḥ svādiṣṭhamīṁ piba /*
*ā yathā mandasānaḥ kirāsi naḥ pra kṣudreva tmanā dhṛṣat //4 //*
*ā naḥ stomamupa dravaddhiyāno aśvo na sotṛbhiḥ /*
*yaṁ te svadhāvantsvadayanti dhenava indra kaṇveṣu rātayaḥ //5 //*
*ugraṁ na vīraṁ namasopa sodima vibhūtimakṣitāvasum /*

*udrīva vajrinnavato na siṁchate kṣarantīndra dhītayaḥ //6 //*
*yaddha nūnaṁ yadvā yo yadvā pṛthivyāmadhi /*
*ato no yāmāśubhirmahemata ugra ugrebhirā gahi //7 //*
*ajirāso harayo ye ta āśavo vātāiva prasakṣiṇaḥ /*
*yebhirapatyaṁ manuṣaḥ parīyase yebhirviśvaṁ svardṛśe //8 //*
*etāvatasta īmaha indra sumnasya gomataḥ /*
*yathā prāvo maghavan medhyātithiṁ yathā nīpātithiṁ dhane //9 //*
*yathā kaṇve maghavantrasadasyavi yathā pakthe daśavraje /*
*yathā gośarye asanoṛrjiśvanīndra gomaddhiraṇyavat //10 //*

सा. (Sv.) ८११-८१२

अभि प्र वः सुराधसमिन्द्रमर्च यथा विदे ।
यो जरितृभ्यो मघवा पुरूवसुः सहस्रेणेव शिक्षति ॥१॥
शतानीकेव प्र जिगाति धृष्णुया हन्ति वृत्राणि दाशुषे ।
गिरेरिव प्र रसा अस्य पिन्विरे दत्राणि पुरुभेजसः ॥२॥
*abhi pra vaḥ surādhasamindramarcha yathā vide /*
*yo jaritṛbhyo maghavā purūvasuḥ sahasreṇeva śikṣati //1 //*
*śatānīkeva pra jigāti dhṛṣṇuyā hanti vṛtrāṇi dāśuṣe /*
*gireriva pra rasā asya pinvire datrāṇi purubhejasaḥ //2 //*

५. इन्द्रः (साग्री.सास्वा.सार्षेदी.); अश्विनौ (ऋसर्व.१.४७.१) - सा. ३०६ (Indraḥ [Ssb.Sas.Sad.]; Aśvinau [Rss.1.47.1]) - Sv. 306)

अयं वां मधुमत्तमः सुतः सोमो दिविष्टिषु। तमश्विना पिबतं तिरोअह्न्यं धत्तं रत्नानि दाशुषे ।४।
*ayaṁ vāṁ madhumattamaḥ sutaḥ somo diviṣṭiṣu / tamaśvinā pibataṁ tiroahnyaṁ dhattaṁ ratnāni dāśuṣe /4 /*

६. इन्द्रः (Indraḥ) (साग्री.सास्वा.); सविता (सार्षेदी.) - सा. (Sv.) १७८

एषो उषा उपूर्व्या व्युच्छति प्रिया दिवः। स्तुषे वामश्विना बृहत् ॥४॥
*eṣo uṣā upūrvyā vyuchchhati priyā divaḥ / stuṣe vāmaśvinā bṛhat //4 //*

७. उषाः (Uṣāḥ) - ऋ. (Rv.)१.४८.१-१६; १.४९.१-४; सा. (Sv.) ३६७

ऋ. (Rv.)१.४८.१-१६

सह वामेन न उषो व्युच्छा दुहितर्दिवः ।
सह द्युम्नेन न बृहता विभावरि राया देवि दास्वती ॥१॥
अश्वावतीर्गोमतीर्विश्वसुविदो भूरि च्यवन्त वस्तवे ।
उदीरय प्रति मा सूनृता उषश्चोद राधो मघोनाम् ॥२॥
उवासोषा उच्छाच्च नु देवी जीरा रथानाम् ।
ये अस्या आचरणेषु दध्रिरे समुद्रे न श्रवस्यवः ॥३॥
उषो ये ते प्र यामेषु युंजते मनो दानाय सूरयः ।
अत्राह तत्कण्व एषां कण्वतमो नाम गृणाति नृणाम् ॥४॥
आ घा योषेव सूनर्युषा याति प्रभुंजती ।
जरयन्ती वृजनं पद्वदीयत उत्पातयति पक्षिणः ॥५॥
वि या सृजति समनं व्यर्थिनः पदं न वेत्योदती ।
वयो नकिष्टे पप्तिवांस आसते व्युष्टौ वाजिनीवति ॥६॥
एषायुक्त परावतः सूर्यस्योदयनादधि ।
शतं रथेभिः सुभगोषा इयं वि यातयभि मानुषान् ॥७॥
विश्वमस्या नानाम चक्षसे जगज्ज्योतिष्कृणोति सूनरी ।
अप द्वेषो मघोनी दुहिता दिव उषा उच्छदप स्रिधः ॥८॥
उष आ भाहि भानुना चन्द्रेण दुहितर्दिवः ।
आवहन्ती भूर्यस्मभ्यं सौभगं व्युच्छन्ती दिविष्टिषु ॥९॥

विश्वस्य हि प्राणनं जीवनं त्वे वि यदुच्छसि सूनरि ।
सा नो रथेन बृहता विभावरि श्रुधि चित्रमघे हवम् ॥१०॥
उषो वाजं हि वंस्व यश्चित्रो मानुषे जने ।
तेना वह सुकृतो अध्वराँ उप ये त्वा गृणन्ति वह्नयः ॥११॥
विश्वान्देवाँ आ वह सोमपीतयेऽन्तरिक्षादुषस्त्वम् ।
सास्मासु धा गोमदश्वावदुक्थ्य१मुषो वाजं सुवीर्यम् ॥१२॥
यस्या रुशन्तो अर्चयः प्रति भद्रा अदृक्षत ।
सा नो रयिं विश्ववारं सुपेशसमुषा ददातु सुग्म्यम् ॥१३॥
ये चिद्धि त्वामृषयः पूर्व ऊतये जुहूरेऽवसे महि ।
सा नः स्तोमाँ अभि गृणीहि राधसोषः शुक्रेण शोचिषा ॥१४॥
उषो यदद्य भानुना वि द्वारावृणवो दिवः ।
प्र नो यच्छतादवृकं पृथु च्छर्दिः प्र देवि गोमतीरिषः ॥१५॥
सं नो राया बृहता विश्वपेशसा मिमिक्ष्वा समिळाभिरा ।
सं द्युम्नेन विश्वतुरोषो महि सं वाजैर्वाजिनीवति ॥१६॥

*saha vāmena na uṣo vyuchchhā duhitardivaḥ /*
*saha dyumnena na bṛhatā vibhāvari rāyā devi dāsvatī //1 //*
*aśvāvatīrgomatīrviśvasuvido bhūri chyavanta vastave /*
*udīraya prati mā sūnṛtā uṣaśchoda rādho maghonām //2 //*
*uvāsoṣā uchchhāchcha nu devī jīrā rathānām /*
*ye asyā ācharaṇeṣu dadhrire samudre na śravasyavaḥ //3 //*
*uṣo ye te pra yāmeṣu yuṁjate mano dānāya sūrayaḥ /*
*atrāha tatkaṇva eṣāṁ kaṇvatamo nāma gṛṇāti nṛṇām //4 //*
*ā ghā yoṣeva sūnaryuṣā yāti prabhuṁjatī /*
*jarayantī vṛjanaṁ padvadīyata utpātayati pakṣiṇaḥ //5 //*
*vi yā sṛjati samanaṁ vya1rthinaḥ padaṁ na vetyodatī /*
*vayeā nakiṣṭe paptivāṁsa āsate vyuṣṭau vājinīvati //6 //*
*eṣāyukta parāvataḥ sūryasyodayanādadhi /*
*śataṁ rathebhiḥ subhagoṣā iyaṁ vi yātayabhi mānuṣān //7 //*
*viśvamasyā nānāma chakṣase jagajjyotiṣkṛṇoti sūnarī /*
*apa dveṣo maghonī duhitā diva uṣā uchchhadapa sridhaḥ //8 //*
*uṣa ā bhāhi bhānunā chandreṇa duhitardivaḥ /*
*āvahantī bhūryasmabhyaṁ saubhagaṁ vyuchchhantī diviṣṭiṣu //9 //*
*viśvasya hi prāṇanaṁ jīvanaṁ tve vi yaduchchhasi sūnari /*
*sā no rathena bṛhatā vibhāvari śrudhi chitramaghe havam //10 //*
*uṣo vājaṁ hi vaṁsva yaśchitro mānuṣe jane /*
*tenā vaha sukṛto adhvarām̐ upa ye tvā gṛṇanti vahnayaḥ //11 //*
*viśvāndevām̐ ā vaha somapītaye'ntarikṣāduṣastvam /*
*sāsmāsu dhā gomadaśvāvadukthya1muṣo vājaṁ suvīryam //12 //*
*yasyā ruśanto archayaḥ prati bhadrā adṛkṣata /*
*sā no rayiṁ viśvavāraṁ supeśasamuṣā dadātu sugmyam //13 //*
*ye chiddhi tvāmṛṣayaḥ pūrva ūtaye juhūre'vase mahi /*
*sā naḥ stomām̐ abhi gṛṇīhi rādhasoṣaḥ śukreṇa śochiṣā //14 //*
*uṣo yadadya bhānunā vi dvārāvṛṇavo divaḥ /*
*pra no yachchhatādavṛkaṁ pṛthu chchhardiḥ pra devi gomatīriṣaḥ //15 //*
*saṁ no rāyā bṛhatā viśvapeśasā mimikṣavā samiḻābhirā /*
*saṁ dyumnena viśvaturoṣo mahi saṁ vājairvājinīvati //16 //*

ऋ. (Rv.)१.४९.१-४

उषो भद्रेभिरा गहि दिवश्चिद्रोचनादधि। वहन्त्वरुणप्सव उप त्वा सोमिनो गृहम् ॥१॥

सुपेशसं सुखं रथं यमध्यस्था उषस्त्वम्। तेना सुश्रवसं जनं प्रावाद्य दुहितर्दिवः ॥२॥
वयश्चित्ते पतत्रिणो द्विपच्चतुष्पदर्जुनि। उषः प्रारन्नृतूँरनु दिवो अन्तेभ्यस्परि ॥३॥
व्युच्छती हि रश्मिभिर्विश्वमाभासि रोचनम्। तां त्वामुषर्वसूयवो गीर्भिः कण्वा अहूषत ॥४॥

*uṣo bhadrebhirā gahi divaśchidrochanādadhi | vahantvaruṇapsava upa tvā somino gṛham ||1||*
*supeśasaṁ sukhaṁ rathaṁ yamadhyasthā uṣastvam | tenā suśravasaṁ janaṁ prāvādya duhitardivaḥ ||2||*
*vayaśchitte patatriṇo dvipachchatuṣpadarjuni | uṣaḥ prārannṛtūm̐ranu divo antebhyaspari ||3||*
*vyuchchhatī hi raśmibhirviśvamābhāsi rochanam | tāṁ tvāmuṣarvasūyavo gīrbhiḥ kaṇvā ahūṣata ||4||*

सा. (Sv.) ३६७

वयश्चित्ते पतत्रिणो द्विपाच्चतुष्पादर्जुनि। उषः प्रारन्नृतूं रनु दिवो अन्तेभ्यस्परि ॥८॥
*vayaśchitte patatriṇo dvipāchchatuṣpādarjuni | uṣaḥ prārannṛtūṁ ranu divo antebhyaspari ||8||*

८. पवमानः सोमः (Pavamānaḥ Somaḥ) - सा. (Sv.) ५३०; ५४४

सा. (Sv.) ५३०

कनिक्रन्ति हरिरा सृज्यमानः सीदन्वनस्य जठरे पुनानः ।
नृभिर्यतः कृणुते निर्णिजं गामतो मतिं जनयत स्वधाभिः ॥८॥
अपामिवे दूर्म यस्तर्तुराणाः प्र मनीषा ईरते सोममच्छ ।
नमस्यन्तीरुप च यन्ति सं चाच विशन्त्युशतीरुशन्तम् ॥१२॥
*kanikranti harirā sṛjyamānaḥ sīdanvanasya jaṭhare punānaḥ |*
*nṛbhiryataḥ kṛṇute nirṇijaṁ gāmato matiṁ janayata svadhābhiḥ ||8||*
*apāmive dūrma yastarturāṇāḥ pra manīṣā īrate somamachchha |*
*namasyantīrupa cha yanti saṁ chācha viśantyuśatīruśantam ||12||*

९. सूर्यः (Sūryaḥ) - ऋ. (Rv.)१.५०.१-१३; सा. (Sv.) ६३३-६४०

ऋ. (Rv.)१.५०.१-१३

अदु त्यं जातवेदसं देवं वहन्ति केतवः। द्दशे विश्वाय सूर्यम् ॥१॥
अप त्ये तायवो यथा नक्षत्रा यन्त्यक्तुभिः सूराय विश्वचक्षसे ॥२॥
अदुश्रमस्य केतवो वि रश्मयो जनाँ अनु। भ्राजन्तो अग्नयो यथा ॥३॥
तरणिर्विश्वदर्शतो ज्योतिष्कृदसि सूर्य। विश्वमा भासि रोचनम् ॥४॥
प्रत्यङ् देवानां विशः प्रत्यङ्ङुदेषि मानुषान्। प्रत्यङ् विश्वं स्वर्दृशे ॥५॥
येना पावक चक्षसा भुरण्यन्तं जनाँ अनु। त्वं वरुण पश्यसि ॥६॥
वि द्यामेषि रजस्पृथ्वहा मिमानो अक्तभिः। पश्यंजन्मानि सूर्य ॥७॥
सप्त त्वा हरितो रथे वहन्ति देव सूर्य। शोचिष्केशं विचक्षण ॥८॥
अयुक्त सप्त शुन्ध्युवः सूरो रथस्य नप्त्यः। ताभिर्याति स्वयुक्तिभिः ॥९॥
उद्वयं तमसस्परि ज्योतिष्पश्यन्त उत्तरम्। देवं देवत्रा सूर्यमगन्म ज्योतिरुत्तमम् ॥१०॥
उद्यन्नद्य मित्रमह आरोहन्नुत्तरां दिवम्। हृद्रोगं मम सूर्य हरिमाणं च नाशय ॥११॥
शुकेषु मे हरिमाणं रोपणाकासु दध्मसि। अथो हारिद्रवेषु मे हरिमाणं नि दध्मसि ॥१२॥
उदगादयमादित्यो विश्वेन सहसा सह। द्विषन्तं मह्यं रन्धयन्मो अहं द्विषते रधम् ॥१३॥
*adu tyaṁ jātavedasaṁ devaṁ vahanti ketavaḥ | ddaśe viśvāya sūryam ||1||*
*apa tye tāyavo yathā nakṣatrā yantyaktubhiḥ sūrāya viśvachakṣase ||2||*
*aduśramasya ketavo vi raśmayo janām̐ anu | bhrājanto agnayo yathā ||3||*
*taraṇirviśvadarśato jyotiṣkṛdasi sūrya | viśvamā bhāsi rochanam ||4||*
*pratyaṅ devānāṁ viśaḥ pratyaṅṅudeṣi mānuṣān | pratyaṅ viśvaṁ svardṛśe ||5||*
*yenā pāvaka chakṣasā bhuraṇyantaṁ janām̐ anu | tvaṁ varuṇa paśyasi ||6||*
*vi dyāmeṣi rajaspṛthvahā mimāno aktabhiḥ | paśyaṁjanmāni sūrya ||7||*

*sapta tvā harito rathe vahanti deva sūrya । śochiṣkeśaṁ vichakṣaṇa ॥8॥*
*ayukta sapta śundhyuvaḥ sūro rathasya naptyaḥ । tābhiryāti svayuktibhiḥ ॥9॥*
*udvayaṁ tamasaspari jyotiṣpaśyanta uttaram ।*
*devaṁ devatrā sūryamaganma jyotiruttamam ॥10॥*
*udyannadya mitramaha ārohannuttarāṁ divam ।*
*hṛdrogaṁ mama sūrya harimāṇaṁ cha nāśaya ॥11॥*
*śukeṣu me harimāṇaṁ ropaṇākāsu dadhmasi ।*
*atho hāridraveṣu me harimāṇaṁ ni dadhmasi ।12॥*
*udagādayamāditiyo viśvena sahasā saha ।*
*dviṣantaṁ mahyaṁ randhayanmo ahaṁ dviṣate radham ॥13॥*

सा. (Sv.) ६३३-६४०

अप त्ये तायवो यथा नक्षत्रा यन्त्यक्तुभिः। सूराय विश्वचक्षसे ॥७॥
अदृश्रन्नस्य केतवो वि रश्मयो जनाँ अनु। भ्राजन्तो अग्नयो यथा ॥८॥
तरणिर्विश्वदर्शतो ज्योतिष्कृदसि सूर्य। विश्वमाभासि रोचनम् ॥९॥
प्रत्यङ् देवानां विशः प्रतयङ्ङुदेषि मानुषान्। प्रत्यङ् विश्वं स्वर्दृशे ॥१०॥
येना पावक चक्षसा भुरण्यन्तं जनाँ अनु। त्वं वरुणं पश्यसि ॥११॥
उद्द्यामेषि रजः पृथ्वहा मिमानो अक्तुभिः। पश्यंजन्मान सूय ॥१२॥
अयुक्त सप्त शुन्ध्युवः सूरो रथस्य नप्यः। ताभिर्याति स्वयुक्तिभिः ॥१३॥
सप्त त्वा हरितो रथे वहन्ति देव सूर्य। शोचिष्केशं विचक्षण ॥१४॥

*apa tye tāyavo yathā nakṣatrā yantyaktubhiḥ । sūrāya viśvachakṣase ॥7॥*
*adṛśrannasya ketavo vi raśmayo janām̐ anu । bhrājanto agnayo yathā ॥8॥*
*taraṇirviśvadarśato jyotiṣkṛdasi sūrya । viśvamābhāsi rochanam ॥9॥*
*pratyaṅ devānāṁ viśaḥ pratayaṅṅudeṣi mānuṣān । pratyaṅ viśvaṁ svardṛśe ॥10॥*
*yenā pāvaka chakṣasā bhuraṇyantaṁ janām̐ anu । tvaṁ varuṇaṁ paśyasi ॥11॥*
*uddyāmeṣi rajaḥ pṛthvahā mimāno aktubhiḥ । paśyaṁjanmāna sūya ॥12॥*
*ayukta sapta śundhyuvaḥ sūro rathasya napyaḥ । tābhiryāti svayuktibhiḥ ॥13॥*
*sapta tvā harito rathe vahanti deva sūrya । śochiṣkeśaṁ vichakṣaṇa ॥14॥*

**४०८. प्रस्कण्वः काण्वः (साग्री.सास्वा.सार्षेदी.); कण्वो घौरः (ऋसर्व.१.३७.१०) (Praskaṇvaḥ Kāṇvaḥ [Ssb.Sas.Sad.]; Kaṇvo Ghauraḥ [Rss.1.37.10])**

१. मरुतः (Marutaḥ) - सा. (Sv.) २२१

उदु त्ये सुनवो गिरः काष्ठा योष्वत्नत। वाश्रा अभियातवे ॥८॥
*udu tye sunavo giraḥ kāṣṭhā yoṣvatnata । vāśrā abhiā yātave ॥8॥*

**४०९. प्रस्कण्वः काण्वः (साग्री. सास्वा. ऋसर्व. ८.४९.१); वालखिल्याः (सार्षेदी.) (Praskaṇvaḥ Kāṇvaḥ [Ssb. Sas. Rss. 8.49.1]; Vālakhilyāḥ [Sad.])**

१. इन्द्रः (INDRAḤ) - सा. (Sv.) २३५

अभि प्र वः सुराधसमिन्द्रमर्च यथा विदे। यो जरितृभ्यो मघवा पुरूवसुः सहस्रेणेव शिक्षति॥३॥
*abhi pra vaḥ surādhasamindramarcha yathā vide । yo jaritṛbhyo maghavā purūvasuḥ sahasreṇeva śikṣati ॥3॥*

**४१०. प्रादुराक्षिः (Prādurākṣiḥ)**

१. वैश्वानरः (Vaiśvānaraḥ) - य. (Yv.)२६.६

ऋतावानं वैश्वानरमृतस्य ज्योतिषस्पतिम्। अजस्रं घर्ममीमहे ।
उपयामगृहीतोऽसि वैश्वानराय त्वैष ते योनिर्वैश्वानराय त्वा॥६॥
*ṛtāvānaṁ vaiśvānaramṛtasya jyotiṣaspatim । ajasraṁ gharmamīmahe ।*
*upayāmagṛhīto'si vaiśvānarāya tvaiṣa te yonirvaiśvānarāya tvā ॥6॥*

## ४११. प्रियमेध: (Priyamedha)

१. इन्द्रः (Indraḥ) - अ. (Av.) २०.२२.४-६; २०.९२.१-१२

अ. (Av.) २०.२२.४-६

अभि प्र गोपतिं गिरेन्द्रमर्च यथा विदे। सूनुं सत्यस्य सत्पतिम् ॥४॥
आ हरयः ससृज्रिरेऽरुषीरधि बर्हिषि। यत्राभि संनवामहे ॥५॥
इन्द्राय गाव आशिरं दुदुह्रे वज्रिणे मधु। यत् सीमुपह्वरे विदत् ॥६॥

*abhi pra gopatiṁ girendramarcha yathā vide I sūnuṁ satyasya satpatim II4 II*
*ā harayaḥ sasṛjrire'ruṣīradhi barhiṣi I yatrābhi saṁnavāmahe II5 II*
*indrāya gāva āśiraṁ duduhre vajriṇe madhu I yat sīmupahnare vidat II6 II*

अ. (Av.) २०.९२.१-१२

अभि प्र गोपतिं गिरेन्द्रमर्च यथा विदे। सूनुं सत्यस्य सत्पतिम् ॥१॥
आ हरयः ससृज्रिरेऽरुषीरधि बर्हिषि। यत्राभि संनवामहे ॥२॥
इन्द्राय गाव आशिरं दुदुह्रे वज्रिणे मधु। यत् सीमुपह्वरे विदत् ॥३॥
उद् यद् ब्रध्नस्य विष्टपं गृहमिन्द्रश्च गन्वहि । मध्वः पीत्वा सचेवहि त्रिः सप्त सख्युः पदे ॥४॥
अर्चत प्रार्चत प्रियमेधासो अर्चत। अर्चन्तु पुत्रका उत पुरं न धृष्ण्वर्चत ॥५॥
अव स्वराति गर्गरो गोधा परि सनिष्वणत्। पिंगा परि चनिष्कददिन्द्राय ब्रह्मोद्यतम् ॥६॥
आ यत् पतन्त्येन्यः सुदुघा अनपस्फुरः। अपस्फुरं गृभायत सोममिन्द्राय पातवे ॥७॥
अपादिन्द्रो अपादग्निर्विश्वे देवा अमत्सत । वरुण इदिह क्षयत् तमापो अभ्यनूषत वत्सं संशिश्वरीरिव ॥८॥
सुदेवो असि वरुण यस्य ते सप्त सिन्धवः। अनुक्षरन्ति काकुदं सूर्म्यं सुशिरामिव ॥९॥
यो व्यतीँरफाणयत् सुयुक्ताँ उप दाशुषे। तक्वो नेता तदिद् वपुरुपमा यो अमुच्यत ॥१०॥
अतीदु शक्र ओहत इन्द्रो विश्वा अति द्विषः। भिनत् कनीन ओदनं पच्यमानं परो गिरा ॥११॥
अर्भको न कुमारकोऽधि तिष्ठन्नवं रथम्। स पक्षन्महिषं मृगं पित्रे मात्रे विभुक्रतुम् ॥१२॥

*abhi pra gopatiṁ girendramarcha yathā vide I sūnuṁ satyasya satpatim II1 II*
*ā harayaḥ sasṛjrire'ruṣīradhi barhiṣi I yatrābhi saṁnavāmahe II2 II*
*indrāya gāva āśiraṁ duduhre vajriṇe madhu I yat sīmupahnare vidat II3 II*
*ud yad bradhnasya viṣṭapaṁ gṛhamindraścha ganvahi I*
*madhvaḥ pītvā sachevahi triḥ sapta sakhyuḥ pade II4 II*
*archata prārchata priyamedhāso archata I*
*archantu putrakā uta puraṁ na dhṛṣṇvarchata II5 II*
*ava svarāti gargaro godhā pari saniṣvaṇat I*
*piṁgā pari chaniṣkadadindrāya brahmodyatam II6 II*
*ā yat patantyenyaḥ sudughā anapasphuraḥ I*
*apasphuraṁ gṛbhāyata somamindrāya pātave II7 II*
*apādindro apādagnirviśve devā amatsata I*
*varuṇa idiha kṣayat tamāpo abhyanūṣata vatsaṁ saṁśiśvarīriva II8 II*
*sudevo asi varuṇa yasya te sapta sindhavaḥ I*
*anukṣaranti kākudaṁ sūrmya suśirāmiva II9 II*
*yo vyatīm̐raphāṇayat suyuktām̐ upa dāśuṣe I*
*takvo netā tadid vapurupamā yo amuchyata II10 II*
*atīdu śakra Ohata indro viśvā ati dviṣaḥ I*
*bhinat kanīna Odanaṁ pachyamānaṁ paro girā II11 II*
*arbhako na kumārako'dhi tiṣṭhannavaṁ ratham I*
*sa pakṣanmahiṣaṁ mṛgaṁ pitre mātre vibhukratum II12 II*

२. पवमानः सोमः (Pavamānaḥ Somaḥ) - ऋ. (Rv.)९.२८.१-६

एष वाजी हितो नृभिर्विश्वविन्मनसस्पतिः। अव्यो वारं वि धावति ॥१॥
एष पवित्रे अक्षरत् सोमो देवेभ्यः सुतः। विश्वा धामान्याविशन् ॥२॥
एष देवः शुभायतेऽधि योनावमर्त्यः। वृत्रहा देववीतमः ॥३॥

एष वृषा कनिक्रदद्दशभिर्जामिभिर्यतः। अभि द्रोणानि धावति ॥४॥
एष सूर्यमरोचयत् पवमानो विचर्षणिः। विश्वा धामानि विश्ववित् ॥५॥
एष शुष्म्यदाभ्यः सोमः पुनानो अर्षति। देवावीरघशंसहा ॥६॥
*eṣa vājī hito nṛbhirviśvavinmanasaspatiḥ / avyo vāraṁ vi dhāvati //1 //*
*eṣa pavitre akṣarat somo devebhyaḥ sutaḥ / viśvā dhāmānyāviśan //2 //*
*eṣa devaḥ śubhāyate'dhi yonāvamartyaḥ / vṛtrahā devavītamaḥ //3 //*
*eṣa vṛṣā kanikradaddaśabhirjāmibhiryataḥ / abhi droṇāni dhāvati //4 //*
*eṣa sūryamarochayat pavamāno vicharṣaṇiḥ / viśvā dhāmāni viśvavit //5 //*
*eṣa śuṣmyadābhyaḥ somaḥ punāno arṣati / devāvīraghaśaṁsahā //6 //*

## ४१२. प्रियमेध आंगिरसः (Priyamedha Āṅgirasaḥ)

१. इन्द्रः (Indraḥ) - सा. (Sv.) ३५४; ३६०; ३६२; ३६४; १४८९-१४९१; १५१२; १७७१-१७७३

सा. (Sv.) ३५४
आ त्वा रथं यथोतये सुम्नाय वर्तयामसि। तुविकूर्मिमृतीषहमिन्द्रंशविष्ठ सत्पतिम् ॥३॥
*ā tvā rathaṁ yathotaye sumnāya vartayāmasi /*
*tuvikūrmimṛtīṣahamindraṁśaviṣṭha satpatim //3 //*

सा. (Sv.) ३६०
प्रप्र वस्त्रिष्टुभमिषं वन्दद्वीरायेन्दवे। धिया वो मेधसातय पुरन्ध्या विवासति ॥१॥
*prapra vastriṣṭubhamiṣaṁ vandadvīrāyendave /*
*dhiyā vo medhasātaya purandhyā vivāsati //1 //*

सा. (Sv.) ३६२
अर्चत प्रार्चता नरः प्रियमेधासो अर्चत। अर्चन्तु पुत्रका उत पुरमिद् धृष्ण्वर्चत ॥३॥
*archata prārchatā naraḥ priyamedhāso archata /*
*archantu putrakā uta puramid dhṛṣṇvarchata //3 //*

सा. (Sv.) ३६४
विश्वानरस्य वस्पतिमनानतस्य शवसः। एवैश्च चर्षणीनामूती हुवे रथानाम् ॥५॥
*viśvānarasya vaspatimanānatasya śavasaḥ /*
*evaiścha charṣaṇīnāmūtī huve rathānām //5 //*

सा. (Sv.) १४८९-१४९१
अभि प्र गोपतिं गिरेन्द्रमर्च यथा विदे। सूनुं सत्यस्य सत्पतिम् ॥१॥
आ हरयः ससृज्रिरेऽरुषीरधि बर्हिषि। यत्राभि संनवामहे ॥२॥
इन्द्राय गाव आशिरं दुदुह्रे वज्रिणे मधु। यत्सीमुपह्वरे विदत् ॥३॥
*abhi pra gopatiṁ girendramarcha yathā vide / sūnuṁ satyasya satpatim //1 //*
*ā harayaḥ sasṛjrire'ruṣīradhi barhiṣi / yatrābhi saṁnavāmahe //2 //*
*indrāya gāva āśiraṁ duduhre vajriṇe madhu / yatsīmupahnare vidat //3 //*

सा. (Sv.) १५१२
नदं व ओदतीनां नदं योयुवतीनाम्। पतिं वो अघ्न्यानां धेनूनामिषुध्यसि ॥१॥
*nadaṁ va Odatīnāṁ nadaṁ yoyuvatīnām /*
*patiṁ vo aghnyānāṁ dhenūnāmiṣudhyasi //1 //*

सा. (Sv.) १७७१-१७७३
आ त्वा रथं यथोतये सुम्नाय वर्तयामसि। तुविकूर्मिमृतीषहमिन्द्रं शविष्ठं सत्पतिम् ॥१॥
तुविशुष्म तुविक्रतो शचीवो विश्वया मते। आ पप्राथ महित्वना ॥२॥
यस्य ते महिना महः परि ज्मायन्तमीयतुः। हस्ता वज्रं हिरण्ययम् ॥३॥
*ā tvā rathaṁ yathotaye sumnāya vartayāmasi /*
*tuvikūrmimṛtīṣahamindraṁ śaviṣṭhaṁ satpatim //1 //*
*tuviśuṣma tuvikrato śachīvo viśvayā mate / ā paprātha mahitvanā //2 //*
*yasya te mahinā mahaḥ pari jmāyantamīyatuḥ / hastā vajraṁ hiraṇyayam //3 //*

२. पवमानः सोमः (Pavamānaḥ Somaḥ) - सा. (Sv.) १२८०-८३; १२८६-१२९१

सा. (Sv.) १२८०-८३

एष वाजी हितो नृभिर्विश्वविन्मनसस्पतिः। अव्यं वारं वि धावति ॥१॥
एष पवित्रे अक्षरत्सोमो देवेभ्यः सुतः। विश्वा धामान्याविशन् ॥२॥
एष देवः शुभायतेऽधि योनावमर्त्यः। वृत्रहा देववीतमः ॥३॥
एष वृषा कनिक्रदद्दशभिर्जामिभिर्यतः। अभि द्रोणानि धावति ॥४॥

*eṣa vājī hito nṛbhirviśvavinmanasaspatiḥ / avyaṁ vāraṁ vi dhāvati //1//*
*eṣa pavitre akṣaratsomo devebhyaḥ sutaḥ / viśvā dhāmānyāviśan //2//*
*eṣa devaḥ śubhāyate'dhi yonāvamartyaḥ / vṛtrahā devavītamaḥ //3//*
*eṣa vṛṣā kanikradaddaśabhirjāmibhiryataḥ / abhi droṇāni dhāvati //4//*

सा. (Sv.) १२८६-१२९१

एष कविरभिष्टुतः पवित्रे अधि तोशते। पुनानो घ्नन्नप द्विषः ॥१॥
एष इन्द्राय वायवे स्वर्जित्परि षिच्यते। पवित्र दक्षसाधनः ॥२॥
एष नृभिर्वि नीयते दिवो मूर्धा वृषाः सुतः। सोमो वनेषु विश्ववित् ॥३॥
एष गव्युरचिक्रदत्पवमानो हिरण्ययुः। इन्दुः सत्राजिदस्तृतः ॥४॥
एष शुष्म्यसिष्यददन्तरिक्षे वृषा हरिः। पुनान इन्दुरिन्द्रमा ॥५॥
एष शुष्म्यदाभ्यः सोमः पुनानो अर्षति। देवावीरघशंसहा ॥६॥

*eṣa kavirabhiṣṭutaḥ pavitre adhi tośate / punāno ghnannapa dviṣaḥ //1//*
*eṣa indrāya vāyave svarjitpari ṣichyate / pavitra dakṣasādhanaḥ //2//*
*eṣa nṛbhirvi nīyate divo mūrdhā vṛṣāḥ sutaḥ / somo vaneṣu viśvavit //3//*
*eṣa gavyurachikradatpavamāno hiraṇyayuḥ / induḥ satrājidastṛtaḥ //4//*
*eṣa śuṣmyasiṣyadadantarikṣe vṛṣā hariḥ / punāna indurindramā //5//*
*eṣa śuṣmyadābhyaḥ somaḥ punāno arṣati / devāvīraghaśaṁsahā //6//*

**४१३. प्रियमेध आंगिरसः (साग्री.३५४ य. ३६०); प्रियमेधः (ऋसर्व.) (Priyamedha Āṁgirasaḥ [Ssb.354; Yv. 360]; Priyamedhaḥ [Rss.])**

१. इन्द्रः (Indraḥ) -ऋ. (Rv.)८.६८.१-१३; ८.६९.१-१०; १३-१८

ऋ. (Rv.)८.६८.१-१३

आ त्वा रथं यथोतये सुम्नाय वर्तयामसि। तुविकूर्मिमृतीषहमिन्द्र शविष्ठ सत्पते ॥१॥
तुविशुष्म तुविक्रतो शचीवो विश्वया मते। आ पप्राथ महित्वना ॥२॥
यस्य ते महिना महः परि ज्मायन्तमीयतुः। हस्ता वज्रं हिरण्ययम् ॥३॥
विश्वानरस्य वस्पतिमनानस्य शवसः। एवैश्च चर्षणीनामूती हुवे रथानाम् ॥४॥
अभिष्टये सदावृधं स्वर्मीळ्हेषु यं नरः। नाना हवन्त ऊतये ॥५॥
परोमात्रमृचीष ममिन्द्रमुग्रं सुराधसम्। ईशानं चिद्वसूनाम् ॥६॥
तं तमिद्राधसे मह इन्द्रं चोदामि पीतये। यः पूर्व्यामनुष्टुतिमीशे कृष्टीनां नृतुः ॥७॥
न यस्य ते शवसान सख्यमानंश मर्त्यः। नकिः शवांसि ते नशत् ॥८॥
त्वोतासस्त्वा युजाप्सु सूर्ये महद्धनम्। ज्येम पृत्सु वज्रिवः ॥९॥
तं त्वा योभिरीमहे तं गीर्भिर्गिर्वणस्तम्। इन्द्र यथा चिदाविथ वाजेषु पुरुमाय्यम् ॥१०॥
यस्यते स्वादु सख्यं स्वाद्वी प्रणीतिरद्रिवः। यो वितन्तसाय्यः ॥११॥
उरु णस्तन्वे३ तन उरु क्षयाय नस्कृधि। उरु णो यन्धि जीवसे ॥१२॥
उरुं नृभ्य उरुं गव उरुं रथाय पन्थाम्। देववीतिं मनामहे ॥१३॥

*ā tvā rathaṁ yathotaye sumnāya vartayāmasi /*
*tuvikūrmimṛtīṣahamindra śaviṣṭha satpate //1//*
*tuviśuṣma tuvikrato śachīvo viśvayā mate / ā paprātha mahitvanā //2//*
*yasya te mahinā mahaḥ pari jmāyantamīyatuḥ / hastā vajraṁ hiraṇyayam //3//*
*viśvānarasya vaspatimanānasya śavasaḥ / evaiścha charṣaṇīnāmūtī huve rathānām //4//*
*abhiṣṭaye sadāvṛdhaṁ svarmīḷaheṣu yaṁ naraḥ / nānā havanta ūtaye //5//*

*paromātramṛchīṣa mamindramugraṁ surādhasam । īśānaṁ chidvasūnām ॥6 ॥*
*taṁ tamidrādhase maha indraṁ chodāmi pītaye ।*
*yaḥ pūrvyāmanuṣṭutimīśe kṛṣṭīnāṁ nṛtuḥ ॥7 ॥*
*na yasya te śavasāna sakhyamānaṁśa martyaḥ । nakiḥ śavāṁsi te naśat ॥8 ॥*
*tvotāsastvā yujāpsu sūrye mahaddhanam । jyema pṛtsu vajrivaḥ ॥9 ॥*
*taṁ tvā yobhirīmahe taṁ gīrbhirgirvaṇastam ।*
*indra yathā chidāvitha vājeṣu purumāyyam ॥10 ॥*
*yasyate svādu sakhyaṁ svādvī praṇītiradrivaḥ । yāo vitantasāyyaḥ ॥11 ॥*
*uru ṇastanve3 tana uru kṣayāya naskṛdhi । uru ṇo yandhi jīvase ॥12 ॥*
*uruṁ nṛbhya uruṁ gava uruṁ rathāya panthām । devavītiṁ manāmahe ॥13 ॥*

ऋ. (Rv.) ८.६९.१-१०

पप्र वस्त्रिष्टुभमिषं मन्दद्वीरायेन्दवे। धियो वो मेधसातये पुरन्ध्या विवासति ॥१॥
नदं व ओदतीनां नदं योयुवतीनाम्। पतिं वो अघ्न्यानां धेनूनामिषुध्यसि ॥२॥
ता अस्य सूददोहसः सोमं श्रीणन्ति पृश्नयः। जन्मन्देवानां विशस्त्रिष्वा रोचने दिवः ॥३॥
अभि प्र गोपतिं गिरेन्द्रमर्च यथा विदे। सूनुं सत्यस्य सत्पतिम् ॥४॥
आ हरयः ससृज्रिरेऽरुषीरधि बर्हिषि। यत्राभि संनवामहे ॥५॥
इन्द्राय गाव आशिरं दुदुह्रे वज्रिणे मधु। यत्सीमुपह्वरे विदत् ॥६॥
उद्यद् ब्रध्नस्य विष्टपं गृहमिन्द्रश्च गन्वहि। मध्वः पीत्वा सचेवहि त्रिः सप्त सख्युः पदे ॥७॥
अर्चत प्रार्चत प्रियमेधासो अर्चत। अर्चन्तु पुत्रका उत पुरं न धृष्ण्वर्चत ॥८॥
अव स्वराति गर्गरो गोधा परि सनिष्वणत्। पिङ्गा परि चनिष्कददिन्द्राय ब्रह्मोद्यतम् ॥९॥
आ यत्पतन्त्येन्यः सुदुधा अनपस्फुरः। अपस्फुरं गृभायत सोममिन्द्राय पातवे ॥१०॥

*papra vastriṣṭubhamiṣaṁ mandadvīrāyendave ।*
*dhiyo vo medhasātaye purandhyā vivāsati ॥1 ॥*
*nadaṁ va Odatīnāṁ nadaṁ yoyuvatīnām ।*
*patiṁ vo adhnyānāṁ dhenūnāmiṣudhyasi ॥2 ॥*
*tā asya sūdadohasaḥ somaṁ śrīṇanti pṛśnayaḥ ।*
*janmandevānāṁ viśastriṣvā rochane divaḥ ॥3 ॥*
*abhi pra gopatiṁ girendramarcha yathā vide । sūnuṁ satyasya satpatim ॥4 ॥*
*ā harayaḥ sasṛjrire'ruṣīradhi barhiṣi । yatrābhi saṁnavāmahe ॥5 ॥*
*indrāya gāva āśiraṁ duduhre vajriṇe madhu । yatsīmupahnare vidat ॥6 ॥*
*udyad bradhnasya viṣṭapaṁ gṛhamindraścha ganvahi ।*
*madhvaḥ pītvā sachevahi triḥ sapta sakhyuḥ pade ॥7 ॥*
*archata prārchata priyamedhāso archata ।*
*archantu putrakā uta puraṁ na dhṛṣṇvarchata ॥8 ॥*
*ava svarāti gargaro godhā pari saniṣvaṇat ।*
*piṅgā pari chaniṣkadadindrāya brahmodyatam ॥9 ॥*
*ā yatpatantyenyaḥ sududhā anapasphuraḥ ।*
*apasphuraṁ gṛbhāyata somamindrāya pātave ॥10 ॥*

ऋ. (Rv.)८.६९.१३-१८

यो व्यतींरफाणयत् सुयुक्ताँ उप दाशुषे । तक्वो नेता तदिद्वपुरुपमा यो अमुच्यत ॥१३॥
अतीदु शक्र ओहत इन्द्रो विश्वा अति द्विषः। भिनत्कनीन ओदनं पच्यमानं परो गिरा ॥१४॥
अर्भको न कुमारकोऽधि तिष्ठन्नवं रथम्। स पक्षन्महिषं मृगं पित्रे मात्रे विभुक्रतुम् ॥१५॥
आ तू सुशिप्र दंपते रथं तिष्ठा हिरण्ययम्। अध द्युक्षं सचेवहि सहस्रपादमरुषं स्वस्तिगामनेहसम् ॥१६॥
तं घेमित्था नमस्विन उप स्वराजमासते। अर्थं चिदस्य सुधितं यदेतव आवर्तयन्ति दावने ॥१७॥
अनु प्रत्नस्योकसः प्रियमेधास एषाम्। पूर्वामनु प्रयतिं वृक्तबर्हिषो हितप्रयस आशत ॥१८॥

*yo vyatīṁraphāṇayat suyuktām̐ upa dāśuṣe ।*
*takvo netā tadidvapurupamā yo amuchyata ॥13 ॥*
*atīdu śakra Ohata indro viśvā ati dviṣaḥ ।*

*bhinatkanīna Odanaṁ pachyamānaṁ paro girā //14 //*
*arbhako na kumārako'dhi tiṣṭhannavaṁ ratham /*
*sa pakṣanmahiṣaṁ mṛgaṁ pitre mātre vibhukratum //15 //*
*ā tū suśipra daṁpate rathaṁ tiṣṭhā hiraṇyayam /*
*adha dyukṣaṁ sachevahi sahasrapādamaruṣaṁ svastigāmanehasam //16 //*
*taṁ ghemitthā namasvina upa svarājamāsate /*
*artha chidasya sudhitaṁ yadetava āvartayanti dāvane //17 //*
*anu pratnasyokasaḥ priyamedhāma eṣām /*
*pūrvāmanu prayatiṁ vṛktabarhiṣo hitaprayasa āśata //18 //*

२. ऋक्षाश्वमेधयोर् दानस्तुतिः - ऋ. (Rv.)८.६८.१४-१९

उप मा षड् द्वाद्वा नरः सोमस्य हर्ष्या। तिष्ठन्ति स्वादुरातयः ॥१४॥
ऋज्राविन्द्रोत आ ददे हरी ऋक्षस्य सूनवि। आश्वमेधस्य रोहिता ॥१५॥
सुरथाँ आतिथिग्वे स्वभीशूँरार्क्षे। आश्वमेधे सुपेशसः ॥१६॥
षळश्वाँ आतिथिग्व इन्द्रोते वधूमतः। सचा पूतक्रतौ सनम् ॥१७॥
ऐषु चेतद्वृषण्वत्यन्तऋज्रेष्वरुषी। स्वभीशुः कशावती ॥१८॥
न युष्मे वाजबन्धवो निनित्सुश्चन मर्त्यः। अवद्यमधि दीधरत् ॥१९॥
*upa mā ṣaḍ dvādvā naraḥ somasya harṣyā / tiṣṭhanti svādurātayaḥ //14 //*
*ṛjrāvindrota ā dade harī ṛkṣasya sūnavi / āśvamedhasya rohitā //15 //*
*surathām̐ ātithigve svabhīśūm̐rārkṣe / āśvamedhe supeśasaḥ //16 //*
*ṣaḷaśvām̐ ātithigva indrote vadhūmataḥ / sachā pūtakratau sanam //17 //*
*aiṣu chetadvṛṣaṇvatyantaṛjreṣvaruṣī / svabhīśuḥ kaśāvatī //18 //*
*na yuṣme vājabandhavo ninitsuśchana martyaḥ / avadyamadhi dīdharat //19 //*

३. वरुणः (Varuṇaḥ) - ऋ. (Rv.)८.६९.११२; १२

ऋ. (Rv.)८.६९.११२

अपादिन्द्रो अपादग्निर्विश्वे देवा अमत्सत ।
वरुण इदिह क्षयत्तमापो अभ्यनूषत वत्सं संशिश्वरीरिव ॥११॥
*apādindro apādagnirviśve devā amatsata /*
*varuṇa idiha kṣayattamāpo abhyanūṣata vatsaṁ saṁśiśvarīriva //11 //*

ऋ. (Rv.)८.६९.१२

सुदेवो असि वरुण यस्य ते सप्त सिन्धवः। अनुक्षरन्ति काकुदं सूर्म्यं सुषिरामिव ॥१२॥
*sudevo asi varuṇa yasya te sapta sindhavaḥ / anukṣaranti kākudaṁ sūrmya suṣirāmiva //12 //*

४. विश्वेदेवाः (Viśvedevāḥ) - ऋ. (Rv.)८.६९.१११

अपादिन्द्रो अपादग्निर्विश्वे देवा अमत्सत ।
वरुण इदिह क्षयत्तमापो अभ्यनूषत वत्सं संशिश्वरीरिव ॥११॥
*apādindro apādagnirviśve devā amatsata /*
*varuṇa idiha kṣayattamāpo abhyanūṣata vatsaṁ saṁśiśvarīriva //11 //*

**४१४. प्रियमेध आंगिरसः (साग्री. सास्वा. सार्षेदी.); प्रियमेध अभिप्रपाच्यः (Priyamedha Āṁgirasaḥ [Ssb. Sas. Sad.]; Priyamedha Abhiprapāchyaḥ)**

१. इन्द्रः (Indraḥ) - सा. (Sv.) १६८

अभि प्र गोपतिं गिरेन्द्रमर्च यथा विदे। सूनुं सत्यस्य सत्पतिम् ॥४॥
*abhi pra gopatiṁ girendramarcha yathā vide / sūnuṁ satyasya satpatim //4 //*

**४१५. प्रियमेध आंगिरसः (प्रथमः पादः); नृमेध आंगरिसः (त्रयःपादाः) (Priyamedha Āṁgirasaḥ [first quarter]; Nṛmedha Āṁgarisaḥ [three quarters])**

१. पवमानः सोमः (Pavamānaḥ Somaḥ) - सा. (Sv.) १२८४

एष सूर्यमरोचयत्पवमानो अधि द्यवि। पवित्रे मत्सरो मदः ॥५॥

*eṣa sūryamarochayatpavamāno adhi dyavi | pavitre matsaro madaḥ ||5 ||*

**४१६. प्रियमेधाः (Priyamedhāḥ)**

१. आपः (Āpaḥ) - य. (Yv.)१२.५५; १५.६०

य. (Yv.)१२.५५

ताऽअस्य सूददोहसः सोमं श्रीणन्ति पृश्नयः। जन्मन्देवानां विशस्त्रिष्वा रोचने दिवः ॥५५॥

*tā'asya sūdadohasaḥ somaṁ śrīṇanti pṛśnayaḥ | janmandevānāṁ viśastriṣvā rochane divaḥ ||55 ||*

य. (Yv.)१५.६०

ताऽअस्य सूददोहसः सोमं श्रीणन्ति पृश्नयः। जन्मन्देवानां विशस्त्रिष्वा रोचने दिवः ॥६०॥

*tā'asya sūdadohasaḥ somaṁ śrīṇanti pṛśnayaḥ | janmandevānāṁ viśastriṣvā rochane divaḥ ||60 ||*

**४१७. बन्धुः (Bandhuḥ)**

१. मनः (Manaḥ) - य. (Yv.)३.५३-५५

मनो न्वाह्वामहे नाराशं सेन स्तोमेन। पितृणां च मन्मभिः ॥५३॥
आ नऽएतु मनः पुनः क्रत्वे दक्षाय जीवसे। ज्योक् च सूयंर् दृशे ॥५४॥
पुनर्नः पितरो मनो ददातु दैव्यो जनः। जीवं व्रातंसचेमहि ॥५५॥
*mano nvāhnāmahe nārāśaṁ sena stomena | pitṝṇāṁ cha manmabhiḥ ||53 ||*
*ā na'etu manaḥ punaḥ kratve dakṣāya jīvase | jyok cha sūyaṁr dṛśe ||54 ||*
*punarnaḥ pitaro mano dadātu daivyo janaḥ | jīvaṁ vrātaṁsachemahi ||55 ||*

२. रुद्रः (Rudraḥ) - य. (Yv.)३.५७-५९

एष ते रुद्र भागः सह स्वस्राम्बिकया तं जुषस्व स्वाहा । एष ते रुद्र भागऽआखुस्ते पशुः ॥५७॥
अव रुद्रमदीमह्यव देवं त्र्यम्बकम् ।
यथा नो वस्यसस्करद्यथा नः श्रेयस्करद्यथा नो व्यवसाययात् ॥५८॥
भेषजमसि भेषजं गवेऽश्वाय पुरुषाय भेषजम्। सुखं मेषाय मेष्यै ॥५९॥
*eṣa te rudra bhāgaḥ saha svasrāmbikayā taṁ juṣasva svāhā | eṣa te rudra bhāga'ākhuste paśuḥ ||57 ||*
*ava rudramadīmahyava devaṁ trayambakam |*
*yathā no vasyasaskaradyathā naḥ śreyaskaradyathā no vyavasāyayāt ||58 ||*
*bheṣajamasi bheṣajaṁ gave'śvāya puruṣāya bheṣajam | sukhaṁ meṣāya meṣyai ||59 ||*

३. सोमः (Somaḥ) - य. (Yv.)३.५६

वयंसोम व्रते तव मनस्तनूषु विभ्रतः। प्रजावन्तः सचेमहि ॥५६॥
*vayaṁsoma vrate tava manastanūṣu vibhrataḥ | prajāvantaḥ sachemahi ||56 ||*

**४१८. बन्धुः सुबन्धुः श्रुतबन्धुर् विप्रबन्धुश्च गौपायनाः (Bandhuḥ Subandhuḥ Śrutabandhur Viprrabandhuścha Gaupāyanāḥ)**

१. अग्निः (Agniḥ) - ऋ. (Rv.)५.२४.१-४

अग्ने त्वं नो अन्तम उत त्राता शिवो भवा वरूथ्यः ॥१॥
वसुरग्निर्वसुश्रवा अच्छा नक्षि द्युमत्तमं रयिं दाः ॥२॥
स नो बोधि श्रुधी हवमुरुष्या णो अघायतः समस्मात् ॥३॥
तं त्वा शोचिष्ठ दीदिवः सुम्नाय नूनमीमहे सखिभ्यः ॥४॥
*agne tvaṁ no antama uta trātā śivo bhavā varūthyaḥ ||1 ||*

*vasuragnirvasuśravā achchhā nakṣi dyumattamaṁ rayiṁ dāḥ //2 //*
*sa no bodhi śrudhī havamuruṣyā ṇo aghāyataḥ samasmāt //3 //*
*taṁ tvā śochiṣṭha dīdivaḥ sumnāya nūnamīmahe sakhimyaḥ //4 //*

२. असमाती राजा (Asamātī Rājā) - ऋ. (Rv.)१०.६०.१-४

आ जनं त्वेषंदृशं माहीनानामुपस्तुतम्। अगन्म बिभ्रतो नमः ॥१॥
अस्मातिं नितोशनं त्वेषं निययिनं रथम्। भजेरथस्य सत्पतिम् ॥२॥
यो जनान्महिषाँ इवातितस्थौ पवीरवान्। उतापवीरवान्युधा ॥३॥
यस्येक्ष्वाकुरुप व्रते रेवान्मराय्येधते। दिवीव पंच कृष्टयः ॥४॥
इन्द्र क्षत्रासमातिषु रथप्रोष्ठेषु धारय। दिवीव सूर्यं दृशे ॥५॥
*asmātiṁ nitośanaṁ tveṣaṁ niyayinaṁ ratham / bhajerathasya satpatim //2 //*
*yo janānmahiṣām̐ ivātitasthau pavīravān / utāpavīravānyudhā //3 //*
*yasyekṣavākurupa vrate revānmarāyyedhate / divīva paṁcha kṛṣṭayaḥ //4 //*
*indra kṣatrāsamātiṣu rathaproṣṭheṣu dhāraya / divīva sūrya dṛśe //5 //*

३. असुनीतिः (Asunītiḥ) - ऋ. (Rv.)१०.५९.५-६

असुनीते मनो अस्मासु धारय जीवातवे सु प्र तिरा न आयुः ।
रारन्धि न सूर्यस्य सन्दृशि घृतेन त्वं तन्वं वर्धयस्व ॥५॥
असुनीते पुनरस्मासु चक्षुः पुनः प्राणमिह नो धेहि भोगम् ।
ज्योक् पश्येम सूर्यमुच्चरन्तमनुमते मृळया नः स्वस्ति ॥६॥
*asunīte mano asmāsu dhāraya jīvātave su pra tirā na āyuḥ /*
*rārandhi na sūryasya sandṛśi ghṛtena tvaṁ tanvaṁ vardhayasva //5 //*
*asunīte punarasmāsu chakṣuḥ punaḥ prāṇamiha no dhehi bhogam /*
*jyok paśyema sūryamuchcharantamanumate mṛḷayā naḥ svasti //6 //*

४. इन्द्रः (Indraḥ) - ऋ. (Rv.)१०.६०.५

इन्द्र क्षत्रासमातिषु रथप्रोष्ठेषु धारय। दिवीव सूर्यं दृशे ॥५॥
*indra kṣatrāsamātiṣu rathaproṣṭheṣu dhāraya / divīva sūrya dṛśe //5 //*

५. द्यावापृथिव्यौ (Dyāvāpṛthivyau) - ऋ. (Rv.)१०.५९.९; १०२

अव द्वके अव त्रिका दिवश्चरन्ति भेषजा ।
क्षमा चरिष्ण्वेककं भरतामप यद्रपो द्यौः पृथिवि क्षमा रपो मो षु ते किं चनाममत् ॥९॥
समिन्द्रेरय गामनड्वाहं य आवहदुशीनराण्या अनः ।
भरतामप यद्रपो द्यौः पृथिवि क्षमा रपो मो षु ते किं चनाममत् ॥१०॥
*ava dvake ava trikā divaścharanti bheṣajā /*
*kṣamā chariṣṇvekakaṁ bharatāmapa yadrapo dyauḥ pṛthivi kṣamā rapo mo ṣu te kiṁ chanāmamat //9 //*
*samindreraya gāmanaḍvāhaṁ ya āvahaduśīnarāṇyā anaḥ /*
*bharatāmapa yadrapo dyauḥ pṛthivi kṣamā rapo mo ṣu te kiṁ chanāmamat //10 //*

६. द्यावापृथिव्याविन्द्रश्च (Dyāvāpṛthivyāvindraścha) - ऋ. (Rv.)१०.५९.१०१

समिन्द्रेरय गामनड्वाहं य आवहदुशीनराण्या अनः ।
भरतामप यद्रपो द्यौः पृथिवि क्षमा रपो मो षु ते किं चनाममत् ॥१०॥
*samindreraya gāmanaḍvāhaṁ ya āvahaduśīnarāṇyā anaḥ /*
*bharatāmapa yadrapo dyauḥ pṛthivi kṣamā rapo mo ṣu te kiṁ chanāmamat //10 //*

७. निऋर्तिः (Nirṛtiḥ) - ऋ. (Rv.)१०.५९.१-३

प्र तार्यायुः प्रतरं नवीयः स्थातारेव क्रतुमता रथस्य ।
अध च्यवान् उत्तवीत्यर्थ परातरं सु निऋर्तिर्जिहीताम् ॥१॥
सामन्नु राये निधिमन्न्वन्नं करामहे सु पुरुध श्रवांसि ।
ता नां विश्वानि जरिता ममत्तु परातरं सु निऋर्तिर्जिहीताम् ॥२॥
अभी ष्वर्यः पौंस्यैर्भवेम द्यौर्न भूमिं गिरयो नाज्रान् ।

ता नो विश्वानि जरिता चिकेत परातरं सु निर्ऋतिर्जिहीताम् ॥३॥
*pra tāryāyuḥ prataraṁ navīyaḥ sthātāreva kratumatā rathasya* ।
*adha chyavān uttavītyartha parātaraṁ su nirṛtirjihītām* ॥1॥
*sāmannu rāye nidhimannvannaṁ karāmahe su purudha śravāṁsi* ।
*tā nāṁ viśvāni jaritā mamattu parātaraṁ su nirṛtirjihītām* ॥2॥
*abhī ṣva1ryaḥ pauṁsyairbhavema dyaurna bhūmiṁ girayo nājrān* ।
*tā no viśvāni jaritā chiketa parātaraṁ su nirṛtirjihītām* ॥3॥

८. निर्ऋतिः सोमश्च (Nirṛtiḥ Somaścha) - ऋ. (Rv.)१०.५९.४

मो षु णः सोम मृत्यवे परा दाः पश्येम नु सूर्यमुच्चरन्तम् ।
द्युभिर्हितो जरिमा सू नो अस्तु परातरं सु निर्ऋतिर्जिहीताम् ॥४॥
*mo ṣu ṇaḥ soma mṛtyave parā dāḥ paśyema nu sūryamuchcharantam* ।
*dyubhirhito jarimā sū no astu parātaraṁ su nirṛtirjihītām* ॥4॥

९. मन आवर्त्तनम् (Mana Āvarttanam) - ऋ. (Rv.)१०.५८.१-१२

यत्ते यमं वैवस्वतं मनो जगाम् दूरकम्। तत्त आ वर्तयामसीह क्षयाय जीवसे ॥१॥
यत्ते दिवं यत्पृथिवीं मनो जगाम् दूरकम्। तत्त आ वर्तयामसीह क्षयाय जीवसे ॥२॥
यत्ते भूमिं चतुर्भृष्टि मनो जगाम दूरकम्। तत्त आ वर्तयामसीह क्षयाय जीवसे ॥३॥
यत्ते चतस्रः प्रदिशो मनो जगाम दूरकम्। तत्त आ वर्तयामसीह क्षयाय जीवसे ॥४॥
यत्ते समुद्रमर्णवं मनो जगाम दूरकम्। तत्त आ वर्तयामसीह क्षयाय जीवसे ॥५॥
यत्ते मरीचीः प्रवतो मनो जगाम दूरकम्। तत्त आ वर्तयामसीह क्षयाय जीवसे ॥६॥
यत्ते अपो यदोषधीर्मनो जगाम दूरकम्। तत्त आ वर्तयामसीह क्षयाय जीवसे ॥७॥
यत्ते सूर्य यदुषसं मनो जगाम दूरकम्। तत्त आ वर्तयामसीह क्षयाय जीवसे ॥८॥
यत्ते पर्वतान्बृहतो मनो जगाम दूरकम्। तत्त आ वर्तयामसीह क्षयाय जीवसे ॥९॥
यत्ते विश्वमिदं जगन्मनो जगाम दूरकम्। तत्त आ वर्तयामसीह क्षयाय जीवसे ॥१०॥
यत्ते पराः परावतो मनो जगाम दूरकम्। तत्त आ वर्तयामसीह क्षयाय जीवसे ॥११॥
यत्ते भूतं च भव्यं च मनो जगाम दूरकम्। तत्त आ वर्तयामसीह क्षयाय जीवसे ॥१२॥
*yatte yamaṁ vaivasvataṁ mano jagām dūrakam* ।
*tatta ā vartayāmasīha kṣayāya jīvase* ॥1॥
*yatte divaṁ yatpṛthivīṁ mano jagām dūrakam* ।
*tatta ā vartayāmasīha kṣayāya jīvase* ॥2॥
*yatte bhūmiṁ chaturbhṛṣṭi mano jagāma dūrakam* ।
*tatta ā vartayāmasīha kṣayāya jīvase* ॥3॥
*yatte chatasraḥ pradiśo mano jagāma dūrakam* ।
*tatta ā vartayāmasīha kṣayāya jīvase* ॥4॥
*yatte samudramarṇavaṁ mano jagāma dūrakam* ।
*tatta ā vartayāmasīha kṣayāya jīvase* ॥5॥
*yatte marīchīḥ pravato mano jagāma dūrakam* ।
*tatta ā vartayāmasīha kṣayāya jīvase* ॥6॥
*yatte apo yadoṣadhīrmano jagāma dūrakam* ।
*tatta ā vartayāmasīha kṣayāya jīvase* ॥7॥
*yatte sūrya yaduṣasaṁ mano jagāma dūrakam* ।
*tatta ā vartayāmasīha kṣayāya jīvase* ॥8॥
*yatte parvatānbṛhato mano jagāma dūrakam* ।
*tatta ā vartayāmasīha kṣayāya jīvase* ॥9॥
*yatte viśvamidaṁ jaganmano jagāma dūrakam* ।
*tatta ā vartayāmasīha kṣayāya jīvase* ॥10॥
*yatte parāḥ parāvato mano jagāma dūrakam* ।
*tatta ā vartayāmasīha kṣayāya jīvase* ॥11॥
*yatte bhūtaṁ cha bhavyaṁ cha mano jagāma dūrakam* ।

*tatta ā vartayāmasīha kṣayāya jīvase ॥12॥*

१०. लिङ्गोक्ताः (Liṅgoktāḥ) - ऋ. (Rv.)१०.५९.७

पुनर्नो असुं पृथिवी ददातु पुनर्द्यौर्देवी पुनरन्तरिक्षम् ।
पुनर्नः सोमस्तन्वं ददातु पुनः पूषा पथ्यां३ या स्वस्तिः ॥७॥
punarno asuṁ pṛthivī dadātu punardyaurdevī punarantarikṣam ।
punarnaḥ somastanvaṁ dadātu punaḥ pūṣā pathyāṁ3 yā svastiḥ ॥7॥

११. विश्वेदेवाः (Viśvedevāḥ) - ऋ. (Rv.)१०.५७.१-६

मा प्र गाम पथो वयं मा याादिन्द्र सोमिनः। मान्तः स्थुर्नो अरातयः ॥१॥
यो यास्य प्रसाधनस्तन्तुर्देवेष्वाततः। तमाहुतं नशीमहि ॥२॥
मनो न्वा हुवामहे नाराशंसेन सोमेन। पितृणां च मन्मभिः ॥३॥
आ त एतु मनः पुनः क्रत्वे दक्षाय जीवसे। ज्योक् च सूर्य दृशे ॥४॥
पुनर्नः पितरो मनो ददातु दैव्यो जनः। जीवं व्रातं सचेमहि ॥५॥
वयं सोम व्रते तव मनस्तनू षु बिभ्रतः। प्रजावन्तः सचेमहि ॥६॥
*mā pra gāma patho vayaṁ mā yāādindra sominaḥ । māntaḥ sthurno arātayaḥ ॥1॥*
*yo yāsya prasādhanastanturdeveṣvātataḥ । tamāhutaṁ naśīmahi ॥2॥*
*mano nvā huvāmahe nārāśaṁsena somena । pitṝṇāṁ cha manmabhiḥ ॥3॥*
*ā ta etu manaḥ punaḥ kratve dakṣāya jīvase । jyok cha sūrya dṛśe ॥4॥*
*punarnaḥ pitaro mano dadātu daivyo janaḥ । jīvaṁ vrātaṁ sachemahi ॥5॥*
*vayaṁ soma vrate tava manastanū ṣu bibhrataḥ । prajāvantaḥ sachemahi ॥6॥*

१२. सुबन्धोर् जीविताह्वानम् (Subandhor Jīvitāhvānam) - ऋ. (Rv.)१०.६०.७-११

अयं मातायं पितायं जीवातुरागमत् ।
इदं तव प्रसर्पणं सुबन्धवेहि निरिहि ॥७॥
यथा युगं वरत्रया नह्यन्ति धरुणाय कम् ।
एवा दाधार ते मनो जीवातवे न मृत्यवेऽथो अरिष्टतातये ॥८॥
यथेयं पृथिवी मही दाधारेमान्वनस्पतीन् ।
एवा दाधार ते मनो जीवातवे न मृत्यवेऽथो अरिष्टतातये ॥९॥
यमादहं वैवस्वतात्सुबन्धोर्मन आभरम् ।
जीवातवे न मृत्यवेऽथो अरिष्टतातये ॥१०॥
न्यग्वातोऽव वाति न्यक्तपति सूर्यः ।
नीचीनमघ्न्या दुहे न्यग्भवतु ते रपः ॥११॥
*ayaṁ mātāyaṁ pitāyaṁ jīvāturāgamat ।*
*idaṁ tava prasarpaṇaṁ subandhavehi nirihi ॥7॥*
*yathā yugaṁ varatrayā nahyanti dharuṇāya kam ।*
*evā dādhāra te mano jīvātave na mṛtyave'tho ariṣṭatātaye ॥8॥*
*yatheyaṁ pṛthivī mahī dādhāremānvanaspatīn ।*
*evā dādhāra te mano jīvātave na mṛtyave'tho ariṣṭatātaye ॥9॥*
*yamādahaṁ vaivasvatātsubandhormana ābharam ।*
*jīvātave na mṛtyave'tho ariṣṭatātaye ॥10॥*
*nya1gvāto'va vāti nyaktapati sūryaḥ ।*
*nīchīnamaghnyā duhe nyagbhavatu te rapaḥ ॥11॥*

१३. हस्तः (Hastaḥ) - ऋ. (Rv.)१०.६०.१२

अयं मे हस्तो भगवानयं मे भगवत्तरः। अयं मे विश्वभेषजोऽयं शिवाभिमर्शनः ॥१२॥
*ayaṁ me hasto bhagavānayaṁ me bhagavattaraḥ । ayaṁ me viśvabheṣajo'yaṁ śivābhimarśanaḥ ॥12॥*

**४१९. बन्धुः सुबन्धुः श्रुतबन्धुः विप्रबन्धुश्च क्रमेण गौपायना लौपायना वा (साग्री. सास्वा.); बन्धुः सुबन्धुः श्रुतबन्धुः विप्रबन्धुश्च गौपायना (ऋसर्व.); वर्द्धु गौपायनः (सार्षेदी.) (Bandhuḥ Subandhuḥ**

**Śrutabandhuḥ Viprabandhuścha krameṇa Gaupāyanā Laupāyanā vā [Ssb. Sas.]; Bandhuḥ Subandhuḥ Śrutabandhuḥ Viprabandhuścha Gaupāyanā [Sad.]; Vardghu Gaupāyanaḥ [Sad.])**

१. अग्निः (Agniḥ) - सा. (Sv.) ४४८

अग्ने त्वं ना अन्तम उत त्राता शिवो भुवो वरूथ्यः ॥२॥

*agne tvaṁ nā antama uta trātā śivo bhuvo varūthyaḥ //2 //*

४२०. **बन्धुः सुबन्धुः श्रुतबन्धुः विप्रबन्धुश्च क्रमेण गौपायना लौपायना वा (साग्री. सास्वा.); बन्धुःसुबन्धुः श्रुतबन्धुः विप्रबन्धुश्च गौपायना (ऋसर्व.); वामदेव (सार्षेदी.) (Bandhuḥ Subandhuḥ Śrutabandhuḥ Viprabandhuścha krameṇa Gaupāyanā Laupāyanā vā [Ssb. Sas.]; Bandhuḥ Subandhuḥ Śrutabandhuḥ Viprabandhuścha Gaupāyanā [Sad.]; Vardghu Gaupāyanaḥ [Sad.])**

१. अग्निः (सार्षेदी.); इन्द्रः (सास्वा. साग्री. ऋसर्व.) (Agniḥ [Sad.]; Indraḥ [Sas. Ssb. Rss.] - सा. (Sv.) ४५०

विश्वस्य प्र स्तोभ पुरो वा सन्यदिवेह नूनम् ॥४॥

*viśvasya pra stobha puro vā sanyadiveha nūnam //4 //*

२. इन्द्रः (सास्वा. साग्री.); अग्निः (सार्षेदी.) (Indraḥ [Sas. Ssb.]; Agniḥ [Sad.]- सा. (Sv.) ४४९

भगो न चित्रो अग्निर्महोनां दधाति रत्नम् ॥३॥

*bhago na chitreā agnirmahonāṁ dadhāti ratnam //3 //*

४२१. **बन्धुः सुबन्धुः श्रुतबन्धुः विप्रबन्धुः क्रमेण गौपायना लौपायना वा (Bandhuḥ Subandhuḥ Śrutabandhuḥ Viprabandhuḥ Krameṇa Gaupāyanā Laupāyanā Vā)**

१. अग्निः (Agniḥ) - सा. (Sv.) ११०७-११०९

अग्ने त्वं नो अन्तम उत त्राता शिवो भवा वरूथ्यः ॥१॥
वसुरग्निर्वसुश्रवा अच्छा नक्षि द्युमत्तमो रयिं दाः ॥२॥
तं त्वा शोचिष्ठ दीदिवः सुम्नाय नूनमीमहे सखिभ्यः ॥३॥

*agne tvaṁ no antama uta trātā śivo bhavā varūthyaḥ //1 //*
*vasuragnirvasuśravā achchhā nakṣi dyumattamo rayiṁ dāḥ //2 //*
*taṁ tvā śochiṣṭha dīdivaḥ sumnāya nūnamīmahe sakhibhyaḥ //3 //*

४२२. **बभ्रुर् आत्रेयः (Babhrur Ātreyaḥ)**

१. इन्द्रः ऋणंचय (Indraḥ Ṛṇaṁchaya) - ऋ. (Rv.)५.३०.१-१५

क्व१स्य वीरः को अपश्यदिन्द्रं सुखरथमीयमानं हरिभ्याम् ।
यो राया वज्री सुतसोममिच्छन्तदोको गन्ता पुरुहूत ऊती ॥१॥
अवाचचक्षं पदमस्य सस्वरुग्रं निधातुरन्वायमिच्छन् ।
अपृच्छमन्याँ उत ते म आहुरिन्द्र नरो बुबुधाना अशेम ॥२॥
प्र नु वयं सुते या ते कृतानीन्द्र ब्रवाम यानि नो जुजोषः ।
वेददविद्वांछृणवच्च विद्वान्वहतेऽयं मघवा सर्वसेनः ॥३॥
स्थिरं मनश्चकृषे जात इन्द्र वेषीदेको युधये भूयसश्चित् ।
अश्मानं चिच्छवसा दिद्युतो वि विदो गवामूर्वमुस्रियाणाम् ॥४॥
परो यत्त्वं परम आजनिष्ठाः परावति श्रुत्यं नाम बिभ्रत् ।
अतश्चिदिन्द्रादभयन्त देवा विश्वा अपो अजयद्दासपत्नीः ॥५॥
तुभ्येदेते मरुतः सुशेवा अर्चन्त्यर्कं सुन्वन्त्यन्धः ।
अहिमोहानमप आशयानं प्र मायाभिर्मायिनं सक्षदिन्द्रः ॥६॥
वि षू मृधो जनुषा दानमिन्वन्नहन्गवा मघवन्त्संचकानः ।
अत्रा दासस्य नमुचेः शिरो यदवर्तयो मनवे गातुमिच्छन् ॥७॥

युजं हि मामकृथा आदिदिन्द्र शिरो दासस्य नमुचेर्मथायन् ।
अश्मानं चित्स्वर्य१ वर्तमानं प्र चक्रियेव रोदसी मरुद्भ्यः ॥८॥
स्त्रियो हि दास आयुधानि चक्रे किं मा करन्नबला अस्य सेनाः ।
अन्तर्ह्यख्यदुभे अस्य धेने अथोप प्रैद्युधये दस्युमिन्द्रः ॥९॥
समत्र गावोऽभितोऽनवन्तेहेह वत्सैर्वियुता यदासन् ।
सं ता इन्द्रो असृजदस्य शाकैर्यदीं सोमासः सुषुता अमन्दन् ॥१०॥
यदीं सोमा बभ्रुधूता अमन्दन्नरोरवीद्वृषभः सादनेषु ।
पूरंदरः पपिवाँ इन्द्रो अस्य पुनर्गवामददादुस्रियाणाम् ॥११॥
भद्रमिदं रुशमा अग्ने अक्रन्गवां चत्वारि ददतः सहस्रा ।
ऋणंचयस्य प्रयता मघानि प्रत्यग्रभीष्म नृतमस्य नृणाम् ॥१२॥
सुपेशसं माव सृजन्त्यस्तं गवां सहस्रै रुशमासो अग्ने ।
तीव्रा इन्द्रमममन्दुः सुतासोऽक्तोर्व्युष्टौ परितक्म्यायाः ॥१३॥
औच्छत्सा रात्री परितक्म्या याँ ऋणंचये राजनि रुशमानाम् ।
अत्यो न वाजी रघुरज्यमानो बभ्रुश्चत्वार्यसनत्सहस्रा ॥१४॥
चतुः सहस्रं गव्यस्य पश्वः प्रत्यग्रभीष्म रुशमेष्वग्ने ।
घर्मश्चित्तप्तः प्रवृजे य आसीदयस्मयस्तम्वादाम विप्राः ॥१५॥

*kva1sya vīraḥ ko apaśyadindraṁ sukharathamīyamānaṁ haribhyām /*
*yeā rāyā vajrī sutasomabhichchhantadoko gantā puruhūta ūtī //1 //*
*avāchachakṣaṁ padamasya sasvarugraṁ nidhāturanvāyamichchhan /*
*apṛchchhamanyām̐ uta te ma āhurindra naro bubudhānā aśema //2 //*
*pra nu vayaṁ sute yā te kṛtānīndra bravāma yāni no jujoṣaḥ /*
*vedadavidvāṁchhṛṇavachcha vidvānvahate'yaṁ maghavā sarvasenaḥ //3 //*
*sthiraṁ manaśchakṛṣe jāta indra veṣīdeko yudhaye bhūyasaśchit /*
*aśmānaṁ chichchhavasā didyuto vi vido gavāmūrvamusriyāṇām //4 //*
*paro yattvaṁ parama ājaniṣṭhāḥ parāvati śrutyaṁ nāma bibhrat /*
*ataśchidindrādabhayanta devā viśvā apo ajayaddāsapatnīḥ //5 //*
*tubhyedete marutaḥ suśevā archantyarka sunvantyandhaḥ /*
*ahimohānamapa āśayānaṁ pra māyābhirmāyaniṁ sakṣadindraḥ //6 //*
*vi ṣū mṛdho januṣā dānaminvannahangavā maghavantsaṁchakānaḥ /*
*atrā dāsasya namucheḥ śiro yadavartayo manave gātumichchhan //7 //*
*yujaṁ hi māmakṛthā ādidindra śiro dāsasya namuchermathāyan /*
*aśmānaṁ chitsvarya1 vartamānaṁ pra chakriyeva rodasī marudbhyaḥ //8 //*
*striyo hi dāsa āyudhāni chakre kiṁ mā karannabalā asya senāḥ /*
*antarhyakhyadubhe asya dhene athopa praidyudhaye dasyumindraḥ //9 //*
*samatra gāvo'bhito'navanteheha vatsairviyutā yadāsan /*
*saṁ tā indro asṛjadasya śākairyadīṁ somāsaḥ suṣutā amandan //10 //*
*yadīṁ somā babhrudhūtā amandannaroravīdvṛṣabhaḥ sādaneṣu /*
*pūraṁdaraḥ papivām̐ indro asya punargavāmadadādusriyāṇām //11 //*
*bhadramidaṁ ruśamā agne akrangavāṁ chatvāri dadataḥ sahasrā /*
*ṛṇaṁchayasya prayatā maghāni pratyagrabhīṣma nṛtamasya nṛṇām //12 //*
*supeśasaṁ māva sṛjantyastaṁ gavāṁ sahasrai ruśamāso agne /*
*tīvrā indramamamanduḥ sutāso'ktorvyuṣṭau paritakmyāyāḥ //13 //*
*auchchhatsā rātrī paritakmyā yām̐ ṛṇaṁchaye rājani ruśamānām /*
*atyo na vājī raghurajyamāno babhruśchatvāryasanatsahasrā //14 //*
*chatuḥ sahasraṁ gavyasya paśvaḥ pratyagrabhīṣma ruśameṣvagne /*
*gharmaśchiktaptaḥ pravṛje ya āsīdayasmayastamvādāma viprāḥ //15 //*

## ४२३. बभ्रुपिङ्गलः (Babhrupiṅgalaḥ)

१. बलासः (Balāsaḥ) - अ. (Av.) ६.१४.१-३

अस्थिस्रंसं परुः स्रंसमास्थितं हृदयामयम्। बलासं सर्व नाशयांगेष्ठा यश्च पर्वसु ॥१॥
निर्बलासं बलासिनः क्षिणोमि मुष्करं यथा। छिनद्म्यस्य बन्धनं मूलमुर्वार्वाइव ॥२॥
निर्बलासेतः प्र पताशुंगः शिशुको यथा। अथो इटइव हायनोऽप द्राह्यवीरहा ॥३॥
*asthisraṁsaṁ paruḥ sraṁsamāsthitaṁ hṛdayāmayam । balāsaṁ sarva nāśayāṁgeṣṭhā yaścha parvasu ॥1॥*
*nirbalāsaṁ balāsinaḥ kṣiṇomi muṣkaraṁ yathā । chhinadmyasya bandhanaṁ mūlamurvārvāiva ॥2॥*
*nirbalāsetaḥ pra patāśuṁgaḥ śiśuko yathā । atho iṭaiva hāyano'pa drāhyavīrahā ॥3॥*

## ४२४. बरुः सर्वहरिर् वा (Baruḥ Sarvaharir Vā)

१. इन्द्रः (Indraḥ) - अ. (Av.) २०.३०.१-५; २०.३१.१-५; २०.३२.१-३

अ. (Av.) २०.३०.१-५

प्र ते महे विदथे शंसिषं हरी प्र ते वन्वे वनुषो हर्यतं मदम् ।
घृतं न यो हरिभिश्चारु सेचत आ त्वा विशन्तु हरिवर्पसं गिरः ॥१॥
हरिं हि योनिमभि ये समस्वरन् हिन्वन्तो हरी दिव्यं यथा सदः ।
आ यं पणन्ति हरिभिर्न धेनव इन्द्राय शषं हरिवन्तमर्चत ॥२॥
सो अस्य वज्रो हरितो य आयसो हरिर्निकामो हरिरा गभस्त्योः ।
द्युम्नी सुशिप्रो हरिमन्युसायक इन्द्रे नि रूपा हरिता मिमिक्षिरे ॥३॥
दिवि न केतुरधि धायि हर्यतो विव्यचद् वज्रो हरितो न रंह्या ।
तुददहिं हरिशिप्रो य आयसः सहस्रशोका अभवद्धरिंभरः ॥४॥
त्वंत्वमहर्यथा उपस्तुतः पूर्वेभिरिन्द्र हरिकेश यज्वभिः ।
त्वं हर्यसि तव विश्वमुक्थ्य१ मसामि राधो हरिजात हर्यतम् ॥५॥
*pra te mahe vidathe śaṁsiṣaṁ harī pra te vanve vanuṣo haryataṁ madam ।*
*ghṛtaṁ na yo haribhiśchāru sechata ā tvā viśantu harivarpasaṁ giraḥ ॥1॥*
*hariṁ hi yonimabhi ye samasvaran hinvanto harī divyaṁ yathā sadaḥ ।*
*ā yaṁ paṇanti haribhirna dhenava indrāya śaṣaṁ harivantamarchata ॥2॥*
*so asya vajro harito ya āyaso harirnikāmo harirā gabhastyoḥ ।*
*dyumnī suśipro harimanyusāyaka indre ni rūpā haritā mimikṣire ॥3॥*
*divi na keturadhi dhāyi haryato vivyachad vajro harito na raṁhyā ।*
*tudadahiṁ hariśipro ya āyasaḥ sahasraśokā abhavaddhariṁbharaḥ ॥4॥*
*tvaṁtvamaharyathā upastutaḥ pūrvebhirindra harikeśa yajvabhiḥ ।*
*tvaṁ haryasi tava viśvamukthya1 masāmi rādho harijāta haryatam ॥5॥*

अ. (Av.) २०.३१.१-५

ता वज्रिणं मन्दिनं स्तोम्यं मद इन्द्रंरथे वहतो हर्यता हरी ।
पुरूण्यस्मै सवनानि हर्यत इन्द्राय सोमा हरयो दधन्विरे ॥१॥
अरं कामाय हरयो दधन्विरे स्थिराय हिन्वन् हरयो हरी तुरा ।
अर्वद्भिर्यो हरिभिर्जोषमीयते सो अस्य कामं हरिवन्तमानशे ॥२॥
हरिश्मशारुर्हरिकेश आरसस्तुरस्पेये यो हरिपा अवर्धत ।
अर्वद्भिर्यो हरिभिर्वाजिनीवसुरति विश्वा दुरिता पारिषद्धरी ॥३॥
स्रुवेव यस्य हरिणी विपेततुः शिप्रे वाजाय हरिणी दविध्वतः ।
प्र यत् कृते चमसे मर्मृजद्धरी पीत्वा मदस्य हर्यतस्यान्धसः ॥४॥
उत स्म सद्म हर्यतस्य पस्त्यो३रत्यो न वाजं हरिवाँ अचिक्रदत् ।
मही चिद्धि धिषणाहर्यदोजसा बृहद् वयो दधिषे हर्यतश्चिदा ॥५॥
*tā vajriṇaṁ mandinaṁ stomyaṁ mada indraṁrathe vahato haryatā harī ।*
*purūṇyasmai savanāni haryata indrāya somā harayo dadhanvire ॥1॥*

*araṁ kāmāya harayo dadhanvire sthirāya hinvan harayo harī turā |*
*arvadbhiryo haribhirjoṣamīyate seā asya kāmaṁ harivantamānaśe ||2 ||*
*hariśmaśārurharikeśa ārasasturaspeye yo haripā avardhata |*
*arvadbhiryo haribhirvājinīvasurati viśvā duritā pāriṣaddharī ||3 ||*
*sruveva yasya hariṇī vipetatuḥ śipre vājāya hariṇī davidhvataḥ |*
*pra yat kṛte chamase marmṛjaddharī pītvā madasya haryatasyāndhasaḥ ||4 ||*
*uta sma sadma haryatasya pastyo3ratyo na vājaṁ harivām̐ achikradat |*
*mahī chiddhi dhiṣaṇāharyadojasā bṛhad vayo dadhiṣe haryataśchidā ||5 ||*

अ. (Av.) २०.३२.१-३

आ रोदसी हर्यमाणो महित्वा नव्यंनव्यं हर्यसि मनम नु प्रियम् ।
प्र पस्त्यमसुर हर्यतं गोराविष्कृधि हरये सूर्याय ॥१॥
आ त्वा हर्यन्तं प्रयुजो जनानां रथे वहन्तु हरिशिप्रमिन्द्र ।
पिबा यथा प्रतिभृतस्य मध्वो हर्यन् यां सधमादे दशोणिम् ॥२॥
अपाः पूर्वेषां हरिवः सुतानामथो इदं सवनं केवलं ते ।
ममद्धि सोमं मधुमन्तमिन्द्र सत्रा वृषंजठर आ वृषस्व ॥३॥
*ā rodasī haryamāṇo mahitvā navyaṁnavyaṁ haryasi manama nu priyam |*
*pra pastyamasura haryataṁ gorāviṣkṛdhi haraye sūryāya ||1 ||*
*ā tvā haryantaṁ prayujo janānāṁ rathe vahantu hariśipramindra |*
*pibā yathā pratibhṛtasya madhvo haryan yāṁ sadhamāde daśoṇim ||2 ||*
*apāḥ pūrveṣāṁ harivaḥ sutānāmatho idaṁ savanaṁ kevalaṁ te |*
*mamaddhi somaṁ madhumantamindra satrā vṛṣaṁjaṭhara ā vṛṣasva ||3 ||*

## ४२५. बरुः सर्वहरिर्वा ऐन्द्रः (Baruḥ Sarvaharirvā Aindraḥ)

१. हरिस्तुतिः (Haristutiḥ) - ऋ. (Rv.)१०.९६.१-१३

प्र ते महे विदथे शंसिषं हरी प्र ते वन्वे वनुषो हर्यतं मदम् ।
घृतं न यो हरिभिश्चारु सेचत आ त्वा विशन्तु हरिवर्पसं गिरः ॥१॥
हरिं हि योनिमभि ये समस्वरन्हिन्वन्तो हरी दिव्यं यथा सदः ।
आ यं पृणन्ति हरिभिर्न धेनव इन्द्राय शूषं हरिवन्तमर्चत ॥२॥
सो अस्य वज्रो हरितो य आयसो हरिर्निकामो हरिरा गभस्त्योः ।
द्युम्नी सुशिप्रो हरिमन्युसायक इन्द्रे नि रूपा हरिता मिमिक्षिरे ॥३॥
दिवि न केतुरधि धायि हर्यतो विव्यचद्वज्रो हरितो न रंह्या ।
तुददहिं हरिशिप्रो य आयसः सहस्रशोका अभवद्धरिंभरः ॥४॥
त्वं त्वमहर्यथा उपस्तुतः पूर्वेभिरिन्द्र हरिकेश यज्वभिः ।
त्वं हर्यसि तव विश्वमुक्थ्य१ मसामि राधो हरिजात हर्यतम् ॥५॥
ता वज्रिणं मन्दिनं स्तोम्यं मद इन्द्रं रथे वहतो हर्यता हरी ।
पुरूण्यस्मै सवनानि हर्यत इन्द्राय सोमा हरयो दधन्विरे ॥६॥
अरं कामाय हरयो दधन्विरे स्थिराय हिन्वन्हरयो हरी तुरा ।
अर्वद्भिर्यो हरिभिर्जोषमीयते सो अस्य कामं हरिवन्तमानशे ॥७॥
हरिश्मशारुर्हरिकेश आयसस्तुरस्पेये यो हरिपा अवर्धत ।
अर्वद्भिर्यो हरिभर्वाजिनीवसुरति विश्वा दुरिता पारिषद्धरी ॥८॥
स्रुवेव यस्य हरिणी विपेततुः शिप्रे वाजाय हरिणी दविध्वतः ।
प्र यत्कृते चमसे मर्मृजद्धरी पीत्वा मदस्य हर्यतस्यान्धसः ॥९॥
उत स्म सद्म हर्यतस्य पस्त्यो३ रत्यो न वाजं हरिवाँ उचिक्रदत् ।
मही चिद्धि धिष्णाहर्यदोजसा बृहद्वयो दधिषे हर्यतश्चिदा ॥१०॥
आ रोदसी हर्यमाणो महित्वा नव्यंनव्यं हर्यसि मन्म नु प्रियम् ।
प्र पस्त्यमसुर हर्यतं गोरविष्कृधि हरये सूर्याय ॥११॥
आ त्वा हर्यन्तं प्रयुजो जनानां रथे वहन्तु हरिशिप्रमिन्द्र ।
पिबा यथा प्रतिभृतस्य मध्वो हर्यन्यां सधमादे दशोणिम् ॥१२॥

अपाः पूर्वेषां हरिवः सुतानामथो इदं सवनं केवलं ते ।
ममद्धि सोमं मधुमन्तमिन्द्र सत्रा वृषंजठर आ वृषस्व ॥१३॥

*pra te mahe vidathe śaṁsiṣaṁ harī pra te vanve vanuṣo haryataṁ madam /*
*ghṛtaṁ na yo haribhiśchāru sechata ā tvā viśantu harivarpasaṁ giraḥ //1 //*
*hariṁ hi yonimabhi ye samasvaranhinvanto harī divyaṁ yathā sadaḥ /*
*ā yaṁ pṛṇanti haribhirna dhenava indrāya śūṣaṁ harivantamarchata //2 //*
*so asya vajro harito ya āyaso harirnikāmo harirā gabhastyoḥ /*
*dyumnī suśipro harimanyusāyaka indre ni rūpā haritā mimikṣire //3 //*
*divi na keturadhi dhāyi haryato vivyachadvajro harito na raṁhyā /*
*tudadahiṁ hariśipro ya āyasaḥ sahasraśokā abhavaddhariṁbharaḥ //4 //*
*tvaṁ tvamaharyathā upastutaḥ pūrvebhirindra harikeśa yajvabhiḥ /*
*tvaṁ haryasi tava viśvamukthya1 masāmi rādho harijāta haryatam //5 //*
*tā vajriṇaṁ mandinaṁ stomyaṁ mada indraṁ rathe vahato haryatā harī /*
*purūṇyasmai savanāni haryata indrāya somā harayo dadhanvire //6 //*
*araṁ kāmāya harayo dadhanvire sthirāya hinvanharayo harī turā /*
*arvadbhiryo haribhirjoṣamīyate so asya kāmaṁ harivantamānaśe //7 //*
*hariśmaśārurharikeśa āyasasturaspeye yo haripā avardhata /*
*arvadbhiryo haribharvājinīvasurati viśvā duritā pāriṣaddharī //8 //*
*sruveva yasya hariṇī vipetatuḥ śipre vājāya hariṇī davidhvataḥ /*
*pra yatkṛte chamase marmṛjaddharī pītvā madasya haryatasyāndhasaḥ //9 //*
*uta sma sadma haryatasya pastyo3 ratyo na vājaṁ harivām̐ uchikradat /*
*mahī chiddhi dhiṣṇāharyadojasā bṛhadvayo dadhiṣe haryataśchidā //10 //*
*ā rodasī haryamāṇo mahitvā navyaṁnavyaṁ haryasi manma nu priyam /*
*pra pastyamasura haryataṁ goraviṣkṛdhi haraye sūryāya //11 //*
*ā tvā haryantaṁ prayujo janānāṁ rathe vahantu hariśipramindra /*
*pibā yathā pratibhṛtasya madhvo haryanyāṁ sadhamāde daśoṇim //12 //*
*apāḥ pūrveṣāṁ harivaḥ sutānāmatho idaṁ savanaṁ kevalaṁ te /*
*mamaddhi somaṁ madhumantamindra satrā vṛṣaṁjaṭhara ā vṛṣasva //13 //*

## ४२६. बादरायणिः (Bādarāyaṇiḥ)

१. अग्न्यादयो मन्त्रोक्ताः (Agnyādayo Mantroktāḥ) - अ. (Av.) ७.१०९.१-७

इदमुग्राय बभ्रवे नमो यो अक्षेषु तनूवशी ।
घृतेन कलिं शिक्षामि स नो मृडातीदृशे ॥१॥
घृतमप्सराभ्यो वह त्वमग्ने पांसूनक्षेभ्यः सिकता अपश्च ।
यथाभागं हव्यदातिं जुषाणा मदन्ति देवा उभयानि हव्या ॥२॥
अप्सरसः सधमादं मदन्ति हविर्धानमन्तरार सूर्य च ।
ता मे हस्तौ सं सृजन्तु घृतेन सपत्नं मे कितवं रन्धयन्तु ॥३॥
आदिनवं प्रतिदीव्ने घृतेनास्माँ अभि क्षर ।
वृक्षमिवाशन्या जहि यो अस्मान् प्रतिदीव्यति ॥४॥
यो नो द्युवे धनमिदं चकार यो अक्षाणां ग्लहनं शेषणं च ।
से नो देवो हविरिदं जुषाणो गन्धर्वेभिः सधमादं मदेम ॥५॥
संवसव इति वो नामधेयमुग्रंपश्या राष्ट्रभृतो ह्य१क्षाः ।
तेभ्यो व इन्दवो हविषा विधेम वयं स्याम पतयो रयीणाम् ॥६॥
देवान् यन्नाथितो हुवे ब्रह्मचर्य यदूषिम ।
अक्षान् यद् बभ्रूनालभे ते नो मृडन्त्वीदृशे ॥७॥

*idamugrāya babhrave namo yo akṣeṣu tanūvaśī /*
*ghṛtena kaliṁ śikṣāmi sa no mṛḍātīdṛśe //1 //*
*ghṛtamapsarābhyo vaha tvamagne pāṁsūnakṣebhyaḥ sikatā apaścha /*
*yathābhāgaṁ havyadātiṁ juṣāṇā madanti devā ubhayāni havyā //2 //*

*apsarasaḥ sadhamādaṁ madanti havirdhānamantarāra sūrya cha* ।
*tā me hastau saṁ sṛjantu ghṛtena sapatnaṁ me kitavaṁ randhayantu* ॥3॥
*ādinavaṁ pratidīvne ghṛtenāsmām̐ abhi kṣara* ।
*vṛkṣamivāśanyā jahi yo asmān pratidīvyati* ॥4॥
*yo no dyuve dhanamidaṁ chakāra yo akṣāṇāṁ glahanaṁ śeṣaṇaṁ cha* ।
*se no devo haviridaṁ juṣāṇo gandharvebhiḥ sadhamādaṁ madema* ॥5॥
*saṁvasava iti vo nāmadheyamugraṁpaśyā rāṣṭrabhṛto hya1kṣāḥ* ।
*tebhyo va indavo haviṣā vidhema vayaṁ syāma patayo rayīṇām* ॥6॥
*devān yannāthito huve brahmacharya yadūṣima* ।
*akṣān yad babhrūnālabhe te no mṛḍantvīdṛśe* ॥7॥

२. अप्सरा (Apsarā) - अ. (Av.) ४.३८.१-४

उद्भिन्दतीं सञ्जयन्तीमप्सरां साधुदेविनीम्। ग्लहे कृतानि कृण्वानामप्सरां तामिह हुवे ॥१॥
विचिन्वतीमाकिरन्तीमप्सरां साधुदेविनीम्। ग्लहे कृतानि गृह्णानामप्सरां तामिह हुवे ॥२॥
यायैः परिनृत्यत्याददाना कृतं ग्लहात् ।
सा नः कृतानि सीषती प्रहामाप्नोतु मायया। सा नः पयस्वत्यैतु मा नो जैषुरिदं धनम् ॥३॥
या अक्षेषु प्रमोदन्ते शुचं क्रोधं च बिभ्रती। आनन्दिनीं प्रमोदिनीमप्सरां तामिह हुवे ॥४॥
*udbhindatīṁ sañjayantīmapsarāṁ sādhudevinīm* ।
*glahe kṛtāni kṛṇvānāmapsarāṁ tāmiha huve* ॥1॥
*vichinvatīmākirantīmapsarāṁ sādhudevinīm* ।
*glahe kṛtāni gṛhṇānāmapsarāṁ tāmiha huve* ॥2॥
*yāyaiḥ parinṛtyatyādadānā kṛtaṁ glahāt* ।
*sā naḥ kṛtāni sīṣatī prahāmāpnotu māyayā* ।
*sā naḥ payasvatyaitu mā no jaiṣuridaṁ dhanam* ॥3॥
*yā akṣeṣu pramodante śuchaṁ krodhaṁ cha bibhratī* । *ānandinīṁ pramodinīmapsarāṁ tāmiha huve* ॥4॥

३. अप्सरसः (Apsarasaḥ) - अ. (Av.) ४.३७.३-५

नदीं यन्त्वप्सरसोऽपां तारमवश्वसम् । गुल्गलूः पीला नलद्यौ३क्षगन्धिः प्रमन्दनी ।
तत् परेताप्सरसः प्रतिबुद्धा अभूतन ॥३॥
यत्राश्वत्था न्यग्रोधा महावृक्षाः शिखण्डिनः । तत् परेतासप्रसः प्रतिबुद्धा अभूतन ॥४॥
यत्र वः प्रेंखा हरिता अर्जुना उत यत्राघाटाः कर्कर्ययः संवदन्ति।
तत् परेताप्सरसः प्रतिबुद्धा अभूतन् ॥५॥
*nadīṁ yantvapsaraso'pāṁ tāramavaśvasam* ।
*gulgalūḥ pīlā naladyau3kṣagandhiḥ pramandanī* ।
*tat paretāpsarasaḥ pratibuddhā abhūtana* ॥3॥
*yatrāśvatthā nyagrodhā mahāvṛkṣāḥ śikhaṇḍinaḥ* ।
*tat paretāsaprasaḥ pratibuddhā abhūtana* ॥4॥
*yatra vaḥ preṁkhā haritā arjunā uta yatrāghāṭāḥ karkaryayaḥ saṁvadanti* ।
*tat paretāpsarasaḥ pratibuddhā abhūtan* ॥5॥

४. अरिनाशनम् (Arināśanam) - अ. (Av.) ७.५९.१

यो नः शपादशपतः शपतो यश्च नः शपात्। वृक्षइव विद्युता हत आ मूलादनु शुष्यतु ॥१॥
*yo naḥ śapādaśapataḥ śapato yaścha naḥ śapāt* ।
*vṛkṣaiva vidyutā hata ā mūlādanu śuṣyatu* ॥1॥

५. ओषधिः (अज श्रृंगी) (Oṣadhiḥ (Aja Śṛṁgī) - अ. (Av.) ४.३७.१-२; ६; १०

अ. (Av.) ४.३७.१-२

त्वया पूर्वमथर्वाणो जघ्नू रक्षांस्योषधे। त्वया जघान कश्यपस्त्वया कण्वो अगस्त्यः ॥१॥
त्वया वयमप्सरसो गन्धर्वांश्चातयामहे। अजश्रृंग्यज रक्षः सर्वान् गन्धेन नाशयः ॥२॥
*tvayā pūrvamatharvāṇeā jaghnū rakṣāṁsyoṣadhe* ।

*tvayā jaghāna kaśyapastvayā kaṇvo agastyaḥ //1 //*
*tvayā vayamapsaraso gandharvāśchātayāmahe /*
*ajaśṛṁgyaja rakṣaḥ sarvān gandhena nāśayaḥ //2 //*

अ. (Av.) ४.३७.६

एयमगन्नोषधीनां वीरुधां वीर्यावती। अजशृंग्यराटकी तीक्ष्णशृंगी व्यृ षतु ॥६॥
*eyamagannoṣadhīnāṁ vīrudhāṁ vīryāvatī /*
*ajaśṛṁgyarāṭakī tīkṣaṇaśṛṁgī vyṛ ṣatu //6 //*

अ. (Av.) ४.३७.१०

अवकादानभिशोचानप्सु ज्योतय मामकान्। पिशाचान् सर्वानोषधे प्र मृणीहि सहस्व च ॥१०॥
*avakādānabhiśochānapsu jyotaya māmakān /*
*piśāchān sarvānoṣadhe pra mṛṇīhi sahasva cha //10 //*

६. गन्धर्वाप्सरसः (Gandharvāpsarasaḥ) - अ. (Av.) ४.३७.७-९; ११; १२

अ. (Av.) ४.३७.७-९

आनृत्यतः शिखण्डिनो गन्धर्वस्याप्सरापतेः। भिन्द्मिमुष्कावपि यामि शेपः ॥७॥
भीमा इन्द्रस्य हेतयः शतमृष्टीरयस्मयीः। ताभिर्हविरदान् गन्धर्वानवकादान् व्यृषतु ॥८॥
भीमा इन्द्रस्य हेतयः शतमृष्टीर्हिरण्ययीः। ताभिर्हविरदान् गन्धर्वानवकादान् व्यृषतु ॥९॥
*ānṛtyataḥ śikhaṇḍino gandharvasyāpsarāpateḥ / bhindmimuṣkāvapi yāmi śepaḥ //7 //*
*bhīmā indrasya hetayaḥ śatamṛṣṭīrayasmayīḥ /*
*tābhirhaviradān gandharvānavakādān vyṛṣatu //8 //*
*bhīmā indrasya hetayaḥ śatamṛṣṭīrhiraṇyayīḥ /*
*tābhirhaviradān gandharvānavakādān vyṛṣatu //9 //*

अ. (Av.) ४.३७.११-१२

श्वेवैकः कपिरिवैकः कुमारः सर्वकेशकः ।
प्रियो दृशइव भूत्वा गन्धर्वः सचते स्त्रियस्तमितो नाशयामसि ब्रह्मणा वर्यावता ॥११॥
जाया इद् वो अप्सरससो गन्धर्वाः पतयो यूयम्। अप धावतामर्त्या मर्त्यान् मा सचध्वम् ॥१२॥
*śvevaikaḥ kapirivaikaḥ kumāraḥ sarvakeśakaḥ /*
*priyo dṛśaiva bhūtvā gandharvaḥ sachate striyastamito nāśayāmasi brahmaṇā rvāryāvatā //11 //*
*jāyā id vo apsarasaso gandharvāḥ patayo yūyam / apa dhāvatāmartyā martyān mā sachadhvam //12 //*

७. वाजिनीवान् ऋषभः (Vājinīvān Ṛṣabhaḥ) - अ. (Av.) ४.३८.५-७

सूर्यस्य रश्मीननु याः संचरन्ति मरीचीवांया अनुसंचरन्ति ।
यासामृषभो दूरतो वाजिनीवान्त्सद्यः सर्वान् लोकान् पर्यैति रक्षन् ।
स न ऐतु होममिमं जुषाणो३न्तरिक्षेण सह वाजिनीवान् ॥५॥
अन्तरिक्षेण सह वाजिनीवन् कर्की वत्सामिह रक्ष वाजिन् ।
इमे ते स्तोका बहुला एह्यर्वाङ्यिं ते कर्कीह ते मनोऽस्तु ॥६॥
अन्तरिक्षेण सह वाजिनीवन् कर्की वत्सामिह रक्ष वाजिन् ।
अयं घासो अयं व्रज इह वत्सां नि बध्नीमः। यथानाम व ईश्महे स्वाहा ॥७॥
*sūryasya raśmīnanu yāḥ saṁcharanti marīchīvāṁyā anusaṁcharanti /*
*yāsāmṛṣabho dūrato vājinīvāntsadyaḥ sarvān lokān paryaiti rakṣan /*
*sa na aitu homamimaṁ juṣāṇo3ntarikṣeṇa saha vājinīvān //5 //*
*antarikṣeṇa saha vājinīvan karkī vatsāmiha rakṣa vājin /*
*ime te stokā bahulā ehyarvāṅyiṁ te karkīha te mano'stu //6 //*
*antarikṣeṇa saha vājinīvan karkī vatsāmiha rakṣa vājin /*
*ayaṁ ghāso ayaṁ vraja iha vatsāṁ ni badhnīmaḥ / yathānāma va īśmahe svāhā //7 //*

४२७. **बाहुवृक्तः आत्रेयः (Bāhuvṛktaḥ Ātreyaḥ)**

१. मित्रावरुणौ (Mitrāvaruṇau) - ऋ. (Rv.)५.७१.१-३; ५.७२.१-३

ऋ. (Rv.)५.७१.१-३

आ नो गन्तं रिशादसा वरुण मित्र बर्हणा। उपेमं चारुमध्वरम् ॥१॥
विश्वस्य हि प्रचेतसा वरुण मित्र राजथः। ईशाना पिप्यतं धियः ॥२॥
उप नः सुतमा गतं वरुण मित्र दाशुषः। अस्य सोमस्य पीतये ॥३॥
*ā no gantaṁ riśādasā varuṇa mitra barhaṇā | upemaṁ chārumadhvaram ||1||*
*viśvasya hi prachetasā varuṇa mitra rājathaḥ | īśānā pipyataṁ dhiyaḥ ||2||*
*upa naḥ sutamā gataṁ varuṇa mitra dāśuṣaḥ | asya somasya pītaye ||3||*

ऋ. (Rv.)५.७२.१-३

आ मित्रे वरुणे वयं गीर्भिर्जुहुमो अत्रिवत्। नि बर्हिषि सदतं सोमपीतये ॥१॥
व्रतेन स्थो ध्रुवक्षेमा धर्मणा यातयज्जना। नि बर्हिषि सदतं सोमपीतये ॥२॥
मित्रश्च नो वरुणश्च जुषेतां यामिष्टये। नि बर्हिषि सदतां सोमपीतये ॥३॥
*ā mitre varuṇe vayaṁ gīrbhirjuhumo atrivat | ni barhiṣi sadataṁ somapītaye ||1||*
*vratena stho dhruvakṣemā dharmaṇā yātayajjanā | ni barhiṣi sadataṁ somapītaye ||2||*
*mitraścha no varuṇaścha juṣetāṁ yāmiṣṭaye | ni barhiṣi sadatāṁ somapītaye ||3||*

४२८. **बार्हस्पत्यः शम्युः - द्र.शम्युः (Bārhaspatyaḥ Śamyuḥ - Seeśamyuḥ)**

४२९. **बिन्दुः (Binduḥ)**

१. पवमानः सोमः (Pavamānaḥ Somaḥ) - ऋ. (Rv.)९.३०.१-६

प्र धारा अस्य शुष्मिणो वृथा पवित्रे अक्षरन्। पुनानो वाचमिष्यति ॥१॥
इन्दुर्हियानः सोतृभिर्मृज्यमानः कनिक्रदत्। इयर्ति वग्नुमिन्द्रियम् ॥२॥
आ नः शुष्मं नृषाह्यं वीरवन्तं पुरुस्पृहम्। पवस्व सोम धारया ॥३॥
प्र सोमो अति धारया पवमानो असिष्यदत्। अभि द्रोणान्यासदम् ॥४॥
अप्सु त्वा मधुमत्तमं हरिं हिन्वन्त्यद्रिभिः। इन्दविन्द्राय पीतये ॥५॥
सुनोता मधुमत्तमं सोममिन्द्राय वज्रिणे। चारुं शर्धाय मत्सरम् ॥६॥
*pra dhārā asya śuṣmiṇo vṛthā pavitre akṣaran | punāno vāchamiṣyati ||1||*
*indurhiyānaḥ sotṛbhirmṛjyamānaḥ kanikradat | iyarti vagnumindriyam ||2||*
*ā naḥ śuṣmaṁ nṛṣāhyaṁ vīravantaṁ puruspṛham | pavasva soma dhārayā ||3||*
*pra somo ati dhārayā pavamāno asiṣyadat | abhi droṇānyāsadam ||4||*
*apsu tvā madhumattamaṁ hari hinvantyadribhiḥ | indavindrāya pītaye ||5||*
*sunotā madhumattamaṁ somamindrāya vajriṇe | chāruṁ śardhāya matsaram ||6||*

४३०. **बिन्दुः पूतदक्षो वा (ऋसर्व.); बिन्दुः पूतदक्षो वा आंगिरसः (सास्वा.) (Binduḥ Pūtadakṣo Vā [Rss.]; Binduḥ Pūtadakṣo Vā Āṁgirasaḥ [Sas.])**

१. मरुतः (Marutaḥ) - ऋ. (Rv.)८.९४.१-१२; सा. (Sv.) १४९; १७४; १७८५-८७

ऋ. (Rv.)८.९४.१-१२

गौर्धयति मरुतां श्रवस्युर्माता मघोनाम्। युक्ता वह्नी रथानाम् ॥१॥
यस्या देवा उपस्थे व्रता विश्वे धारयन्ते। सूर्यामासा दृशे कम् ॥२॥
तत्सु नो विश्वे अर्य आ सदा गृणन्ति कारवः। मरुतः सोमपीतये ॥३॥
अस्ति सोमो अयं सुतः पिबन्त्यस्य मरुतः। उत स्वराजो अश्विना ॥४॥
पिबन्ति मित्रो अर्यमा तना पूतस्य वरुणः। त्रिषधस्थस्य जावतः ॥५॥
उतो न्वस्य जोषमाँ इन्द्रः सुतस्य गोमतः। प्रातर्होतेव मत्सति ॥६॥
कदत्विषन्त सूरयस्तिर आप इव स्रिधः। अर्षन्ति पूतदक्षसः ॥७॥
कद्वो अद्य महानां देवानामवो वृणे। त्मना च दस्मवर्चसाम् ॥८॥
आ ये विश्वा पार्थिवानि पप्रथन् रोचना दिवः। मरुतः सोमपीतये ॥९॥
त्यान्नु पूतदक्षसो दिवो वो मरुतो हुवे। अस्य सोमस्य पीतये ॥१०॥

त्यान्नु ये वि रोदसी तस्तभुर्मरुतो हुवे। अस्य सोमस्य पीतये ॥११॥
त्यं नु मारुतं गणं गिरिष्ठां वृषणं हुवे। अस्य सोमस्य पीतये ॥१२॥
*gaurdhayati marutāṁ śravasyurmātā maghonām । yuktā vahnī rathānām ॥1॥*
*yasyā devā upasthe vratā viśve dhārayante । sūryāmāsā dṛśe kam ॥2॥*
*tatsu no viśve arya ā sadā gṛṇanti kāravaḥ । marutaḥ somapītaye ॥3॥*
*asti somo ayaṁ sutaḥ pibantyasya marutaḥ । uta svarājo aśvinā ॥4॥*
*pibanti mitro aryamā tanā pūtasya varuṇaḥ । triṣadhasthasya jāvataḥ ॥5॥*
*uto nvasya joṣamāṁ̐ indraḥ sutasya gomataḥ । prātarhoteva matsati ॥6॥*
*kadatviṣanta sūrayastira āpa iva sridhaḥ । arṣanti pūtadakṣasaḥ ॥7॥*
*kadvo adya mahānāṁ devānāmavo vṛṇe । tmanā cha dasmavarchasām ॥8॥*
*ā ye viśvā pārthivāni paprathan rochanā divaḥ । marutaḥ somapītaye ॥9॥*
*tyānnu pūtadakṣaso divo vo maruto huve । asya somasya pītaye ॥10॥*
*tyānnu ye vi rodasī tastabhurmaruto huve । asya somasya pītaye ॥11॥*
*tyaṁ nu mārutaṁ gaṇaṁ giriṣṭhāṁ vṛṣaṇaṁ huve । asya somasya pītaye ॥12॥*

सा. (Sv.) १४९
गौर्धयति मरुतां श्रवस्युर्माता मघोनाम्। युक्ता वह्नी रथानाम् ॥५॥
*gaurdhayati marutāṁ śravasyurmātā maghonām । yuktā vahrī rathānām ॥5॥*

सा. (Sv.) १७४
अस्ति सामो अयं सुतः पिबन्त्यस्य मरुतः। उत स्वराजो अश्विना ॥१०॥
*asti sāmo ayaṁ sutaḥ pibantyasya marutaḥ । uta svarājo aśvinā ॥10॥*

सा. (Sv.) १७८५-१७८७
अस्ति सोमो अयं सुतः पिबन्त्यस्य मरुतः। उत स्वराजो अश्विना ॥१॥
पिबन्ति मित्रो अर्यमा तना पूतस्य वरुणः। त्रिषधस्थस्य जावतः ॥२॥
उतो न्वस्य जोषमा इन्द्रः सुतस्य गोमतः। प्रातर्होतेव मत्सति ॥३॥
*asti somo ayaṁ sutaḥ pibantyasya marutaḥ । uta svarājo aśvinā ॥1॥*
*pibanti mitro aryamā tanā pūtasya varuṇaḥ । triṣadhasthasya jāvataḥ ॥2॥*
*uto nvasya joṣamā indraḥ sutasya gomataḥ । prātarhoteva matsati ॥3॥*

## ४३१. बुधः (Budhaḥ)

१. विश्वेदेवा ऋत्विक् स्तुतिर् वाः (Viśvedevā Ṛtvik Stutir Vāḥ) - अ. (Av.) २०.१३७.२
कपृन्नरः कपृथमुद् दधातन चोदयत खुदत वाजसातये ।
निष्टिग्र्यः पुत्रमा च्यावयोतय इन्द्रं सबाध इह सोमपीतये ॥२॥
*kapṛnnaraḥ kapṛthamud dadhātana chodayata khudata vājasātaye ।*
*niṣṭigryaḥ putramā chyāvayotaya indraṁ sabādha iha somapītaye ॥2॥*

## ४३२. बुधगविष्ठिरौ आत्रेयौ (Budhagaviṣṭhirau Ātreyau)

१. अग्निः (Agniḥ) - ऋ. (Rv.)५.१.१-१२; सा. (Sv.) ७३; १७४६-१७४८
ऋ. (Rv.)५.१.१-१२
अबोध्यग्निः समिधा जनानां प्रति धेनुमिवायतीमुषासम् ।
यह्वा इव प्र वयामुज्जिहानाः प्र भानवः सिस्रते नाकमच्छ ॥१॥
अबोधि होता यजथाय देवानूर्ध्वो अग्निः सुमनाः प्रातरस्थात् ।
समिद्धस्य रुशददर्शि पाजो महान्देवस्तमसो निरमोचि ॥२॥
यदीं गणस्य रशनामजीगः शुचिरङ्क्ते शुचिभिर्गोभिरग्निः ।
आद्दक्षिणा युजयते वाजयन्त्युत्तानामूर्ध्वो अधयज्जुहूभिः ॥३॥
अग्निमच्छा देवयतां मनांसि चक्षूंषीव सूर्ये सं चरन्ति ।
यदीं सुवाते उषसा विरूपे श्वेतो वाजी जायते अग्रे अह्नाम् ॥४॥
जनिष्ट हि जेन्यो अग्रे अह्नां हितो हितेष्वरुषो वनेषु ।
दमेदमे सप्त रत्ना दधानोऽग्निर्होता नि षसादा यजीयान् ॥५॥

अग्निर्होता न्यसीदद्यजीयानुपस्थे मातुः सुरभा उ लोके ।
युवा कविः पुरुनिष्ठ ऋतावा धर्ता कृष्टीनामुत मध्य इद्धः ॥६॥
प्र णु त्यं विप्रमध्वरेषु साधुमग्निं होतारमीळते नमोभिः ।
आ यस्ततान् रोदसी ऋतेन नित्यं मृजन्ति वाजिनं घृतेन ॥७॥
मार्जाल्यो मृज्यते स्वे दमूनाः कविप्रशस्तो अतिथिः शिवो नः ।
सहस्रशृंगो वृषभस्तदोजा विश्वाँ अग्ने सहसा प्रस्यन्यान् ॥८॥
प्र सद्यो अग्ने अत्येष्यन्यानाविर्यस्मै चारुतमो बभूथ ।
ईळेन्यो वपुष्यो विभावा प्रियो विशामतिथिर्मानुषीणाम् ॥९॥
तुभ्यं क्षितयो यविष्ठ बिलिमग्ने अन्तित ओत दूरात् ।
आ भन्दिष्ठस्य सुमतिं चकिद्धि बृहत्ते अग्ने महि शर्म भद्रम् ॥१०॥
आद्य रथं भानुमो भानुमन्तमग्ने तिष्ठ यजतेभिः समन्तम् ।
विद्वान्पथीनामुर्व१न्तरिक्षमेह देवान्हविरद्याय वक्षि ॥११॥
अवोचाम कवये मेध्याय वचो वन्दारु वृषभाय वृष्णे ।
गविष्ठिरो नमसा स्तोममग्नौ दिवीव रुक्ममुरुव्यंचमश्रेत् ॥१२॥

*abodhyagniḥ samidhā janānāṁ prati dhenubhivāyatīmuṣāsam* ।
*yahnā iva pra vayāmujjihānāḥ pra bhānavaḥ sisrate nākamachchha* ॥1॥
*abodhi hotā yajathāya devānūrdhvo agniḥ sumanāḥ prātarasthāt* ।
*samiddhasya ruśadadarśi pājo mahāndevastamaso niramochi* ॥2॥
*yadīṁ gaṇasya raśanāmajīgaḥ śuchiraṅkte śuchibhirgobhiragniḥ* ।
*āddakṣiṇā yujayate vājayantyuttānāmūrdhvo adhayajjuhūbhiḥ* ॥3॥
*agnimachchhā devayatāṁ manāṁsi chakṣūṁṣīva sūrye saṁ charanti* ।
*yadīṁ suvāte uṣasā virūpe śveto vājī jāyate agre ahnām* ॥4॥
*janiṣṭa hi jenyo agre ahnāṁ hito hiteṣvaruṣo vaneṣu* ।
*damedame sapta ratnā dadhāno'gnirhotā ni ṣasādā yajīyān* ॥5॥
*agnirhotā nyasīdadyajīyānupasthe mātuḥ surabhā u loke* ।
*yuvā kaviḥ puruniṣṭha ṛtāvā dhartā kṛṣṭīnāmuta madhya iddhaḥ* ॥6॥
*pra ṇu tyaṁ vipramadhvareṣu sādhumagiṁna hotāramīḷate namobhiḥ* ।
*ā yastatān rodasī ṛtena nityaṁ mṛjanti vājinaṁ ghṛtena* ॥7॥
*mārjālyo mṛjyate sve damūnāḥ kavipraśasto atithiḥ śivo naḥ* ।
*sahasraśṛṁgo vṛṣabhastadojā viśvām̐ agne sahasā prasyanyān* ॥8॥
*pra sadyo agne atyeṣyanyānāviryasmai chārutamo babhūtha* ।
*īḷenyo vapuṣyo vibhāvā priyo viśāmatithirmānuṣīṇām* ॥9॥
*tubhyaṁ kṣitayo yaviṣṭha bilimagne antita Ota dūrāt* ।
*ā bhandiṣṭhasya sumatiṁ chakiddhi bṛhatte agne mahi śarma bhadram* ॥10॥
*ādya rathaṁ bhānumo bhānumantamagne tiṣṭha yajatebhiḥ samantam* ।
*vidvānpathīnāmurva1ntarikṣameha devānhaviradyāya vakṣi* ॥11॥
*avochāma kavaye medhyāya vacho vandāru vṛṣabhāya vṛṣṇe* ।
*gaviṣṭhiro namasā stomamagnau divīva rukmamuruvyaṁchamaśret* ॥12॥

सा. (Sv.) ७३

अबोध्यग्निः समिधा जनानां प्रति धेनुमिवायतीमुषासम् ।
यह्वा इव प्र वयामुज्जिहानाः प्र भानवः सिस्रते नाकमच्छ ॥१॥

*abodhyagniḥ samidhā janānāṁ prati dhenumivāyatīmuṣāsam* ।
*yahnā iva pra vayāmujjihānāḥ pra bhānavaḥ sisrate nākamachchha* ॥1॥

सा. (Sv.) १७४६-१७४८

अबोध्यग्निः समिधा जनानां प्रति धेनुमिवायती मुषासम् ।
यह्वा इव प्र वयामुज्जिहानाः प्र भानवः सस्रते नाकमच्छ ॥१॥
अबोधि होता यजथाय देवनूर्ध्वो अग्निः सुमनाः प्रातरस्थात् ।
समिद्धस्य रुशददर्शि पाजो महान् देवस्तमसो निरमोचि ॥२॥

यदीं गणस्य रशनामजीगः शुचिरङ्क्ते शुचिभिर्गोभिरग्निः ।
आद्दक्षिणा युज्यते वाजयंत्युत्तानामूर्ध्वो अधयज्जुहूभिः ॥३॥
*abodhyagniḥ samidhā janānāṁ prati dhenumivāyatī muṣāsam* ।
*yahnā iva pra vayāmujjihānāḥ pra bhānavaḥ sasrate nākamachchha* ॥1॥
*abodhi hotā yajathāya devanūrdhvo agniḥ sumanāḥ prātarasthāt* ।
*samiddhasya ruśadadarśi pājo mahān devastamaso niramochi* ॥2॥
*yadīṁ gaṇasya raśanāmajīgaḥ śuchiraṅkte śuchibhirgobhiragniḥ* ।
*āddakṣiṇā yujyate vājayaṁtyuttānāmūrdhvo adhayajjuhūbhiḥ* ॥3॥

## ४३३. बुधः सौम्यः (Budhaḥ Saumyaḥ)

१. विश्वेदेवा ऋत्विजो वा (Viśvedevā Ṛtvijo Vā) - ऋ. (Rv.)१०.१०१.१-१२

उद्बुध्यध्वं समनसः सखायः समग्निमिन्ध्वं बहवः सनीळाः ।
दधिक्रामग्निमुषसं च देवीमिन्द्रावतोऽवसे नि ह्वये वः ॥१॥
मन्द्रा कृणुध्वं धिय आ तनुध्वं नावमरित्रपरणीं कृणुध्वम् ।
इष्कृणुध्वमायुधारं कुणुध्वं प्रांचं यां प्र णयता सखायः ॥२॥
युनक्त सीरा वि युगा तनुध्वं कृते योनौ वपतेह बीजम् ।
गिरा च श्रुष्टिः सभरा असन्नो नेदीय इत्सृण्यः पक्वमेयात् ॥३॥
सीरा युंजन्ति कवयो युगा वि तन्वते पृथक्। धीरा देवेषु सुम्नया ॥४॥
निराहावान्कृणोतन सं वरत्रा दधातन। सिंचामहा अवतमुद्रिणं वयं सुषेकमनुपक्षितम् ॥५॥
इष्कृताहावभवतं सुवरत्रं सुषेचनम्। उद्रिणं सिंचे अक्षितम् ॥६॥
प्रीणीताश्वान्हितं जयाथ स्वस्तिवाहं रथमित्कृ ध्वम् ।
द्राणाहावमवतमश्मचक्रमंसत्रकोशं सिंचता नृपाणम् ॥७॥
व्रजं कृणुध्वं स हि वो नृपाणो वर्म सीव्यध्वं बहुला पृथूनि ।
पुरः कुणुध्वमायसीरधृष्टा मा वः सुस्रोच्चमसो दृंहता तम् ॥८॥
आ वो धियं यियां वर्त ऊतये देवा देवीं यजतां यियामिह ।
सा नो दुहीयद्यवसेव गत्वी सहस्रधारा मयसा मही गौः ॥९॥
आ तू षिंच हरिमीं द्रोरुपस्थे वाशीभिस्तक्षताश्मन्मयीभिः ।
परि ष्वजध्वं दश कक्ष्याभिरुभे धुरौ प्रति वह्निं युनक्त ॥१०॥
उभे द्युरौ वह्निरापिब्दमानोऽन्तर्योनेव चरति द्विजानिः ।
वनस्पतिं वन आस्थापयध्वं नि षू दधिध्वमखनन्त उत्सम् ॥११॥
कपृन्नरः कपृथमुद्दधातन चोदयत खुदत वाजसातये ।
निष्टिग्र्यः पुत्रमा च्यावयोतय इन्द्रं सबाध इह सोमपीतये ॥१२॥
*udbudhyadhvaṁ samanasaḥ sakhāyaḥ samagnimindhvaṁ bahavaḥ sanīḻāḥ* ।
*dadhikrāmagnimuṣasaṁ cha devīmindrāvato'vase ni hnaye vaḥ* ॥1॥
*mandrā kṛṇudhvaṁ dhiya ā tanudhvaṁ nāvamaritraparaṇīṁ kṛṇudhvam* ।
*iṣkṛṇudhvamāyudhāraṁ kuṇudhvaṁ prāṁchaṁ yāṁ pra ṇayatā sakhāyaḥ* ॥2॥
*yunakta sīrā vi yugā tanudhvaṁ kṛte yonau vapateha bījam* ।
*girā cha śruṣṭiḥ sabharā asanno nedīya itsṛṇyaḥ pakvameyāt* ॥3॥
*sīrā yuṁjanti kavayo yugā vi tanvate pṛthak* । *dhīrā deveṣu sumnayā* ॥4॥
*nirāhāvānkṛṇotana saṁ varatrā dadhātana* ।
*siṁchāmahā avatamudriṇaṁ vayaṁ suṣekamanupakṣitam* ॥5॥
*iṣkṛtāhāvabhavataṁ suvaratraṁ suṣechanam* । *udriṇaṁ siṁche akṣitam* ॥6॥
*prīṇītāśvānhitaṁ jayātha svastivāhaṁ rathamitkṛ dhvam* ।
*drāṇāhāvamavatamaśmachakramaṁsatrakośaṁ siṁchatā nṛpāṇam* ॥7॥
*vrajaṁ kṛṇudhvaṁ sa hi vo nṛpāṇo varma sīvyadhvaṁ bahulā pṛthūni* ।
*puraḥ kuṇudhvamāyasīradhṛṣṭā mā vaḥ susrochchamaso dṛṁhatā tam* ॥8॥
*ā vo dhiyaṁ yiāyāṁ varta ūtaye devā devīṁ yajatāṁ yiāyāmiha* ।
*sā no duhīyadyavaseva gatvī sahasradhārā mayasā mahī gauḥ* ॥9॥

*ā tū ṣiṁcha harimīṁ drorupasthe vāśībhistakṣatāśmanmayībhiḥ /*
*pari ṣvajadhvaṁ daśa kakṣayābhirubhe dhurau prati vahni yunakta //10 //*
*ubhe dyurau vahnirāpibdamāno'ntaryoneva charati dvijāniḥ /*
*vanaspatiṁ vana āsthāpayadhvaṁ ni ṣū dadhidhvamakhananta utsam //11 //*
*kapṛnnaraḥ kapṛthamuddadhātana chodayata khudata vājasātaye /*
*niṣṭigryaḥ putramā chyāvayotaya indraṁ sabādha iha somapītaye //12 //*

## ४३४. बृहद्दिवः (Bṛhaddivaḥ)

१. महेन्द्रः (Mahendraḥ) - य. (Yv.)३३.८०

तदिदास भुवनेषु ज्येष्ठं यतो जाऽउग्रस्त्वेषनृम्णः ।
सद्यो जानो नि रिणाति शत्रूननु यं विश्वे मदन्त्यूमाः ॥८०॥
*tadidāsa bhuvaneṣu jeyaṣṭhaṁ yato jā'ugrastveṣanṛmṇaḥ /*
*sadyo jāāno ni riṇāti śatrūnanu yaṁ viśve madantyūmāḥ //80 //*

## ४३५. बृहद्दिवोऽथर्वा (Bṛhaddivo'tharvā)

१. इन्द्रः (Indraḥ) - अ. (Av.) २०.१०७.४-१२

तदिदास भुवनेषु ज्येष्ठं यतो जा उग्रस्त्वेषनृम्णः ।
सद्यो जाानो नि रिणाति शत्रूननु यदेनं मदन्ति विश्व ऊमाः ॥४॥
वावृधानः शवसा भूर्योजाः शत्रुर्दासाय भियसं दधाति ।
अव्यनच्च व्यनच्च सस्नि सं ते नवन्त प्रभृता मदेषु ॥५॥
त्वे क्रतुमपि पृंचन्ति भूरि द्विर्यदेते त्रिर्भवन्त्यूमाः ।
स्वादोः स्वादीयः स्वादुना सृजा समदः सु मधु मधुनाभि योधीः ॥६॥
यदि चिन्नु त्वा धना जयन्तं रणेरणे अनुमदन्ति विप्राः ।
ओजीयः शुष्मिन्त्स्थिरमा तनुष्व मा त्वा दभन् दुरेवासः कशोकाः ॥७॥
त्वया वयं शाशद्महे रणेषु प्रपश्यन्तो युधेन्यानि भूरि ।
चोदयामि त आयुधा वचोभिः सं ते शिशामि ब्रह्मणा वयांसि ॥८॥
नि तद् दधिषेऽवरे परे च यस्मिन्नाविथावसा दुरोणे ।
आ स्थापयत मातरं जिगत्नुमत इन्वत कर्वराणि भूरि ॥९॥
स्तुष्व वर्ष्मन् पुरुवर्त्मानं समृभ्वाणमिनतममाप्त्यमाप्त्यानाम् ।
आ दर्शति शवसा भूर्योजाः प्र सक्षति प्रतिमानं पृथिव्याः ॥१०॥
इमा ब्रह्म बृहद्दिवः कृणवदिन्द्राय शूषमग्रियः स्वर्षाः ।
महो गोत्रस्य क्षयति स्वराजा तुरश्चिद् विश्वमर्णवत् तपस्वान् ॥११॥
एवा महान् बृहद्दिवो अथर्वावोचत् स्वां तन्वमिन्द्रमेव ।
स्वसारौ मातरिभ्वरी अरिप्रे हिन्वन्ति चैने शवसा वर्धयन्ति च ॥१२॥
*tadidāsa bhuvaneṣu jyeṣṭhaṁ yato jā ugrastveṣanṛmṇaḥ /*
*sadyo jāāno ni riṇāti śatrūnanu yadenaṁ madanti viśva ūmāḥ //4 //*
*vāvṛdhānaḥ śavasā bhūryojāḥ śatrurdāsāya bhiyasaṁ dadhāti /*
*avyanachcha vyanachcha sasni saṁ te navanta prabhṛtā madeṣu //5 //*
*tve kratumapi pṛṁchanti bhūri dviryadete trirbhavantyūmāḥ /*
*svādoḥ svādīyaḥ svādunā sṛjā samadaḥ su madhu madhunābhi yodhīḥ //6 //*
*yadi chinnu tvā dhanā jayantaṁ raṇeraṇe anumadanti viprāḥ /*
*Ojīyaḥ śuṣmintsthiramā tanuṣva mā tvā dabhan durevāsaḥ kaśokāḥ //7 //*
*tvayā vayaṁ śāśadmahe raṇeṣu prapaśyanto yudhenyāni bhūri /*
*chodayāmi ta āyudhā vachobhiḥ saṁ te śiśāmi brahmaṇā vayāṁsi //8 //*
*ni tad dadhiṣe'vare pare cha yasminnāvithāvasā duroṇe /*
*ā sthāpayata mātaraṁ jigatnumata invata karvarāṇi bhūri //9 //*
*stuṣva varṣman puruvartmānaṁ samṛbhvāṇaminatamamāptyamāptyānām /*
*ā darśati śavasā bhūryojāḥ pra sakṣati pratimānaṁ pṛthivyāḥ //10 //*
*imā brahma bṛhaddivaḥ kṛṇavadindrāya śūṣamagriyaḥ svarṣāḥ /*

*maho gotrasya kṣayati svarājā turaśchid viśvamarṇavat tapasvān //11 //*
*evā mahān bṛhaddivo atharvāvochat svāṁ tanva1mindrameva /*
*svasārau mātaribhvarī aripre hinvanti chaine śavasā vardhayanti cha //12 //*

२. विश्वेदेवाः (Viśvedevāḥ) - अ. (Av.) ५.३.६; ९; १०

अ. (Av.) ५.३.६

दैवीः षडुर्वीरुरु नः कृणोत विश्वे देवास इह मादयध्वम् ।
मा नो विददभिभा मो अशस्तिर्मा नो विदद् वृजिना द्वेष्या या ॥६॥
*daivīḥ ṣaḍurvīruru naḥ kṛṇota viśve devāsa iha mādayadhvam /*
*mā no vidadabhibhā mo aśastirmā no vidad vṛjinā dveṣyā yā //6 //*

अ. (Av.) ५.३.९

धाता विधाता भुवनस्य यस्पतिर्देवः सविताभिमातिषाहः ।
आदित्या रुद्रा अश्विनोभा देवाः पान्तु यजमानं निरृथात् ॥९॥
*dhātā vidhātā bhuvanasya yaspatirdevaḥ savitābhimātiṣāhaḥ /*
*ādityā rudrā aśvinobhā devāḥ pāntu yajamānaṁ nirṛthāt //9 //*

अ. (Av.) ५.३.१०

ये नः सपत्ना अप ते भवन्त्विन्द्राग्निभ्यामव बाधामह एनान् ।
आदित्या रुद्रा उपरिस्पृशो न उग्रं चेत्तारमधिराजमक्रत ॥१०॥
*ye naḥ sapatnā apa te bhavantvindrāgnibhyāmava bādhāmaha enān /*
*ādityā rudrā uparispṛśo na ugraṁ chettāramadhirājamakrata //10 //*

## ४३६. बृहद्दिव आथर्वणः (Bṛhaddiva Ātharvaṇaḥ)

१. इन्द्रः (Indraḥ) - ऋ. (Rv.)१०.१२०.१-९; सा. (Sv.) १४८३-१४८५

ऋ. (Rv.)१०.१२०.१-९

तदिदास भुवनेषु ज्येष्ठं यतो जा उग्रस्त्वेषनृम्णः ।
सद्यो जाानो नि रिणाति शत्रूननु यं विश्वे मदन्त्यूमाः ॥१॥
वावृधानः शवसा भूर्योजाः शत्रुर्दासाय भियसं दधाति ।
अव्यनच्च व्यनच्च सस्नि सं ते नवन्त प्रभृता मदेषु ॥२॥
त्वे क्रतुमपि वृंजन्ति विश्वे द्विर्यदेते त्रिर्भवन्त्यूमाः ।
स्वादोः स्वादीयः स्वादुना सृजा समदः सु मधु मधुनाभि योधीः ॥३॥
इति चिद्धि त्वा धना जयन्तं मदेमदे अनुमदन्ति विप्राः ।
ओजीयो धृष्णो स्थिरमा तनुष्व मा त्वा दभन्यातुधाना दुरेवाः ॥४॥
त्वया वयं शाशद्महे रणेषु प्रपश्यन्तो युधेन्यानि भूरि ।
चोदयामि त आयुधा वचोभिः सं ते शिशामि ब्रह्मणा वयांसि ॥५॥
स्तुषेय्यं पुरुवर्पसमृभ्वमिनतममाप्त्यमाप्त्यानाम् ।
आ दर्शते शवसा सप्त दानून्प्र साक्षते प्रतिमानानि भूरि ॥६॥
नि तद्दधिषेऽवरं परं च यस्मिन्नाविथावसा दुरोणे ।
आ मातरा स्थापयसे जिगत्नू अत इनोषि कर्वरा पुरूणि ॥७॥
इमा ब्रह्म बृहद्दिवो विवक्तीन्द्राय शूषमग्रियः स्वर्षाः ।
महो गोत्रस्य क्षयति स्वराजो दुरश्च विश्वा अवृणोदप स्वाः ॥८॥
एवा महान्बृहद्दिवो अथर्वावोचत्स्वां तन्व१मिन्द्रमेव ।
स्वसारो मातरिभ्वरीररिप्रा हिन्वन्ति च शवसा वर्धयन्ति च ॥९॥
*tadidāsa bhuvaneṣu jyeṣṭhaṁ yato jā ugrastveṣanṛmṇaḥ /*
*sadyo jāāno ni riṇāti śatrūnanu yaṁ viśve madantyūmāḥ //1 //*
*vāvṛdhānaḥ śavasā bhūryojāḥ śatrurdāsāya bhiyasaṁ dadhāti /*
*avyanachcha vyanachcha sasni saṁ te navanta prabhṛtā madeṣu //2 //*
*tve kratumapi vṛṁjanti viśve dviryadete trirbhavantyūmāḥ /*
*svādoḥ svādīyaḥ svādunā sṛjā samadaḥ su madhu madhunābhi yodhīḥ //3 //*

*iti chiddhi tvā dhanā jayantaṁ mademade anumadanti viprāḥ /*
*Ojīyo dhṛṣṇo sthiramā tanuṣva mā tvā dabhanyātudhānā durevāḥ //4 //*
*tvayā vayaṁ śāśadmahe raṇeṣu prapaśyanto yudhenyāni bhūri /*
*chodayāmi ta āyudhā vachobhiḥ saṁ te śiśāmi brahmaṇā vayāṁsi //5 //*
*stuṣeyyaṁ pururvapasamṛbhvaminatamamāptyamāptyānām /*
*ā darśate śavasā sapta dānūnpra sākṣate pratimānāni bhūri //6 //*
*ni taddadhiṣe'varaṁ paraṁ cha yasminnāvithāvasā duroṇe /*
*ā mātarā sthāpayase jigatnū ata inoṣi karvarā purūṇi //7 //*
*imā brahma bṛhaddivo vivaktīndrāya śūṣamagriyaḥ svarṣāḥ /*
*maho gotrasya kṣayati svarājo duraścha viśvā avṛṇodapa svāḥ //8 //*
*evā mahānbṛhaddivo atharvāvochatsvāṁ tanva1mindrameva /*
*svasāro mātaribhvarīrariprā hinvanti cha śavasā vardhayanti cha //9 //*

सा. (Sv.) १४८३-१४८५

तदिदास भुवनेषु ज्येष्ठं यतो जा उग्रस्त्वेषनृम्णः ।
सद्यो जाानो नि रिणाति शत्रूननु यं विश्वे मदन्त्यूमाः ॥१॥
वावृधानः शवसा भूर्योजाः शत्रुर्दासाय भियसं दधाति ।
अव्यनच्च व्यनच्च सस्नि सं ते नवन्त प्रभृता मदेषु ॥२॥
त्वे क्रतुमपि वृंजन्ति विश्वे द्विर्यदेते त्रिर्भवन्त्यूमाः ।
स्वादोः स्वादीयः स्वादुना सृजा समदः सु मधु मधुनाभि योधीः ॥३॥

*tadidāsa bhuvaneṣu jyeṣṭhaṁ yato jā ugrastveṣanṛmṇaḥ /*
*sadyo jāāno ni riṇāti śatrūnanu yaṁ viśve madantyūmāḥ //1 //*
*vāvṛdhānaḥ śavasā bhūryojāḥ śatrurdāsāya bhiyasaṁ dadhāti /*
*avyanachcha vyanachcha sasni saṁ te navanta prabhṛtā madeṣu //2 //*
*tve kratumapi vṛṁjanti viśve dviryadete trirbhavantyūmāḥ /*
*svādoḥ svādīyaḥ svādunā sṛjā samadaḥ su madhu madhunābhi yodhīḥ //3 //*

## ४३७. बृहदुक्थो वामदेवः (Bṛhaduktho Vāmadevaḥ)

१. इन्द्रः (Indraḥ) - य. (Yv.)२८.१-३; ५-६

य. (Yv.)२८.१-३

होता यक्षत्समिधेन्द्रमिडस्पदे नाभा पृथिव्याऽअधि ।
दिवो वषमन्त्समिध्यतऽओजिष्ठश्चर्षणीसहां वेत्वाज्यस्य होतर्यज ॥१॥
होता यक्षत्तनूनपातमूतिभिर्जेतारमपराजितम् ।
इन्द्र देवंस्वर्विदं पथिभिर्मधुमत्तमैर्नराशं सेन तेजसा वेत्वाज्यस्य होतर्यज ॥२॥
होता यक्षदिडाभिरिन्द्रमीडितमाजुह्वानममर्त्यम् ।
देवो देवैः सवीर्यो वज्रहस्तः पुरन्दरो वेत्वाज्यस्य होतर्यज ॥३॥

hotā yakṣatsamidhendramiḍaspade nābhā pṛthivyā'adhi ।
*divo vaṣamantsamidhyata'Ojiṣṭhaścharṣaṇīsahāṁ vetvājyasya hotaryaja //1 //*
*hotā yakṣattanūnapātamūtibhirjetāramaparājitam /*
*indra devaṁsvarvidaṁ pathibhirmadhumattamairnarāśaṁ sena tejasā vetvājyasya hotaryaja //2 //*
*hotā yakṣadiḍābhirindramīḍitamājuhnānamamartyam /*
*devo devaiḥ savīryo vajrahastaḥ purandaro vetvājyasya hotaryaja //3 //*

य. (Yv.)२८.५-६

होता यक्षदोजो न वीर्यंसहो द्वारऽइन्द्रमवर्द्धयन्।
सुप्रायणाऽअस्मिन् यो वि श्रयन्तामृतावृधो द्वारऽइन्द्राय मीढुषे व्यन्त्वाज्यस्य होतर्यज ॥५॥
होता यक्षदुषेऽइन्द्रस्य धेनू सुदुघे मातरा मही ।
स्वातरौ न तेजसा वत्समिन्द्रमवर्द्धतां वीतामाज्यस्य होतर्यज ॥६॥

*hotā yakṣadojo na vīryaṁsaho dvāra'indramavarddhayan /*

*suprāyaṇā'asmin yo vi śrayantāmṛtāvṛdho dvāra'indrāya mīḍhuṣe vyantvājyasya hotaryaja ॥5॥*
*hotā yakṣaduṣe'indrasya dhenū sudughe mātarā mahī ।*
*svātarau na tejasā vatsamindramavarddhatāṁ vītāmājyasya hotaryaja ॥6॥*

२. रुद्रः (Rudraḥ) - य. (Yv.)२८.४

होता यक्षद् बर्हिषीन्द्रं निषद्वरं वृषभं नर्यापसम् ।
वसुभी रुद्रैरादित्यैः सयुग्भिर्बर्हिरासदद्वेत्वाज्यस्य होतर्यज ॥४॥
*hotā yakṣad barhiṣīndraṁ niṣadvaraṁ vṛṣabhaṁ naryāpasam ।*
*vasubhī rudrairādityaiḥ sayugbhirbarhirāsadadvetvājyasya hotaryaja ॥4॥*

## ४३८. बृहदुक्थो वामदेव्यः (Bṛhaduktho Vāmadevyaḥ)

१. अग्निः (Agniḥ) - सा. (Sv.) ६५; य. (Yv.)२९.१-५; ११

सा. (Sv.) ६५

इदं त एकं पर ऊ त एकं तृतीयेन ज्योतिषा सं विशस्व ।
संवेशनस्तन्वे ३चारुरेधि प्रियो देवानां परमे जनित्रे ॥३॥
*idaṁ ta ekaṁ para ū ta ekaṁ tṛtīyena jyotiṣā saṁ viśasva ।*
*saṁveśanastanve 3chāruredhi priyo devānāṁ parame janitre ॥3॥*

य. (Yv.)२९.१-५

समिद्धोऽअंजन् कृदरं मतीनां घृतमग्ने मधुमत् पिन्वमानः ।
वाजी वहन्वाजिनं जातवेदो देवानां वक्षि प्रियमा सधस्थम् ॥१॥
घृतेनांजन्त्सं पथो देवयानान् प्रजा नन्वाज्यप्येतु देवान् ।
अनु त्वा सप्ते प्रदिशः सचन्तांस्वधामस्मै यजमानाय धेहि ॥२॥
ईड्यश्चासि वन्द्यश्च वाजिन्नाशुश्चासि मेध्यश्च सप्ते ।
अग्निष्ट्वा देवैर्वसुभिः सजोषाः प्रीतं वह्निं वहतु जातवेदाः ॥३॥
स्तीर्णं बर्हिः सुष्टरीमा जुषाणोरु पृथु प्रथमानं पृथिव्याम् ।
देवेभिर्युक्तमदितिः सजोषाः स्योनं कृण्वाना सुविते दधातु ॥४॥
एताऽउ वः सुभगा विश्व रूपा वि पक्षोभिः श्रयमाणाऽउदातैः ।
ऋष्वाः सतीः कवषः शुम्भमाना द्वारो देवीः सुप्रायणा भवन्तु ॥५॥
*samiddho'aṁjan kṛdaraṁ matīnāṁ ghṛtamagne madhumat pinvamānaḥ ।*
*vājī vahanvājinaṁ jātavedo devānāṁ vakṣi priyamā sadhastham ॥1॥*
*ghṛtenāṁjantsaṁ patho devayānān prajā nanvājyapyetu devān ।*
*anu tvā sapte pradiśaḥ sachantāṁsvadhāmasmai yajamānāya dhehi ॥2॥*
*īḍyaśchāsi vandyaścha vājinnāśuśchāsi medhyaścha sapte ।*
*agniṣṭvā devairvasubhiḥ sajoṣāḥ prītaṁ vahni vahatu jātavedāḥ ॥3॥*
*stīrṇa barhiḥ suṣṭarīmā juṣāṇoru pṛthu prathamānaṁ pṛthivyām ।*
*devebhiryuktamaditiḥ sajoṣāḥ syonaṁ kṛṇvānā suvite dadhātu ॥4॥*
*etā'u vaḥ subhagā viśva rūpā vi pakṣobhiḥ śrayamāṇā'udātaiḥ ।*
*ṛṣvāḥ satīḥ kavaṣaḥ śumbhamānā dvāro devīḥ suprāyaṇā bhavantu ॥5॥*

य. (Yv.)२९.११

प्रजापतेस्तपसा वावृधानः सद्यो जातो दधिषे यामग्ने ।
स्वाहाकृतेन हविषा पुरोगा याहि साध्या हविरदन्तु देवाः ॥११॥
*prajāpatestapasā vāvṛdhānaḥ sadyo jāto dadhiṣe yāmagne ।*
*svāhākṛtena haviṣā purogā yāhi sādhyā haviradantu devāḥ ॥11॥*

२. अश्विनौ (Aśvinau) - य. (Yv.)२९.७

प्रथमा वांसरथिना सुवर्णा देवौ पश्यन्तौ भुवनानि विश्वा ।
अपिप्रयं चोदना वां मिमाना होतारा ज्योतिः प्रदिशा दिशन्ता ॥७॥
*prathamā vāṁsarathinā suvarṇā devau paśyantau bhuvanāni viśvā ।*

*apiprayaṁ chodanā vāṁ mimānā hotārā jyotiḥ pradiśā diśantā //7 //*

३. इन्द्रः (Indraḥ) - सा. (Sv.) ३२५; १७८२-१७८४; य. (Yv.)२८.८

सा. (Sv.) ३२५

विधुं दद्राणं समने बहूनां युवानं सन्तं पलितो जगार ।
देवस्य पश्य काव्यं महित्वाद्या ममार स ह्यः समान ॥३॥

*vidhuṁ dadrāṇaṁ samane bahūnāṁ yuvānaṁ santaṁ palito jagāra /*
*devasya paśya kāvyaṁ mahitvādyā mamāra sa hyaḥ samāna //3 //*

सा. (Sv.) १७८२-१७८४

विधुं दद्राणं समने बहूनां युवानं सन्तं पलितो जगार ।
देवस्य पश्य काव्यं महित्वाद्या ममार स ह्यः समान ॥१॥
शाक्मना शाको अरुणः सुपर्ण आ यो महः शूरः सनादनीडः ।
यच्चिकेत सत्यमित्तन्न मोघं वसु स्पार्हमुत जेतोत दाता ॥२॥
ऐभिर्ददे वृष्ण्या पौंस्यानि येभिरौक्षद्वृत्रहत्याय वज्री ।
ये कर्मणः क्रियमाणस्य मह्न ऋते कर्ममुदजायन्त देवाः ॥३॥

*vidhuṁ dadrāṇaṁ samane bahūnāṁ yuvānaṁ santaṁ palito jagāra /*
*devasya paśya kāvyaṁ mahitvādyā mamāra sa hyaḥ samāna //1 //*
*śākmanā śāko aruṇaḥ suparṇa ā yo mahaḥ śūraḥ sanādanīḍaḥ /*
*yachchiketa satyamittanna moghaṁ vasu spārhamuta jetota dātā //2 //*
*aibhirdade vṛṣṇyā pauṁsyāni yebhiraukṣadvṛtrahatyāya vajrī /*
*ye karmaṇaḥ kriyamāṇasya mahna ṛte karmamudajāyanta devāḥ //3 //*

य. (Yv.)२८.८

होता यक्षत्तिस्रो देवीर्न भेषजं त्रयस्त्रिधातवोऽपसऽइडा सरस्वती भारती महीः।
इन्द्रपत्नीर्हविष्मतीर्व्यन्त्वाज्यस्य होतर्यज ॥८॥

*hotā yakṣattisro devīrna bheṣajaṁ trayastridhātavo'pasa'iḍā sarasvatī bhāratī mahīḥ /*
*indrapatnīrhaviṣmatīrvyantvājyasya hotaryaja //8 //*

४. त्वष्टा (Tvaṣṛā) - य. (Yv.)२९.९

त्वष्टा वीरं देवकामं जजान त्वष्टुरर्वा जायतऽआशुरश्वः ।
त्वष्टेदं विश्वं भुवन जजान बहोः कर्त्तारमिह यक्षि होतः ॥९॥

*tvaṣṭā vīraṁ devakāmaṁ jajāna tvaṣṭurarvā jāyata'āśuraśvaḥ /*
*tvaṣṭedaṁ viśvaṁ bhuvana jajāna bahoḥ karttāramiha yakṣi hotaḥ //9 //*

५. मनुष्याः (Manuṣyāḥ) - य. (Yv.)२९.६

अन्तरा मित्रावरुणा चरन्ती मुखं यानामभि संविदाने ।
उषासा वांसहिरण्ये सुशिल्पेऽऋतस्य योनाविह सादयामि ॥६॥

*antarā mitrāvaruṇā charantī mukhaṁ yāānāmabhi saṁvidāne /*
*uṣāsā vāṁsahiraṇye suśilpe'ṛtasya yonāviha sādayāmi //6 //*

६. सरस्वती (Sarasvatī) - य. (Yv.)२९.८

आदित्यैर्नो भारती वष्टु यांसरस्वती सह रुद्रैर्नऽआवीत् ।
इडोपहूता वसुभिः सजोषा यां नो देवीरमृतेषु धत्त ॥८॥

*ādityairno bhāratī vaṣṭu yāṁsarasvatī saha rudrairna'āvīt /*
*iḍopahūtā vasubhiḥ sajoṣā yāṁ no devīramṛteṣu dhatta //8 //*

७. सूर्यः (Sūryaḥ) - य. (Yv.)२९.१०

अश्वो घृतेन त्मन्या समक्तऽउप देवां श्ऽ ऋतुशः पाथऽएतु ।
वनस्पतिर्देवलोकं प्रजा नन्नग्निना हव्या स्वदितानि वक्षत् ॥१०॥

*aśvo ghṛtena tmanyā samakta'upa devāṁ ś' ṛtuśaḥ pātha'etu /*
*vanaspatirdevalokaṁ prajā nannagninā havyā svaditāni vakṣat //10 //*

## ४३९. बृहन्मतिर् आंगिरसः (Bṛhanmatir Āṁgirasaḥ)

१. पवमानः सोमः (Pavamānaḥ Somaḥ) - सा. (Sv.) ४८८; ८९८-९०३; ९२४-९२६

सा. (Sv.) ४८८

पुनानो अक्रमीदभि विश्वा मृधो विचर्षणिः । शुम्भन्ति विप्रं धीतिभिः ॥२ ॥

*punāno akramīdabhi viśvā mṛdho vicharṣaṇiḥ / śumbhanti vipraṁ dhītibhiḥ //2 //*

सा. (Sv.) ८९८-९०३

आशुरर्ष बृहन्मते परि प्रियेण धाम्ना । यत्रा देवा इति ब्रुवन् ॥१ ॥
परिष्कृण्वन्ननिष्कृतं जनाय यातयन्निषः । वृष्टिं दिवः परि स्रव ॥२ ॥
अयं स या दिवस्परि रघुयामा पवित्र आ । सिन्धेरूर्मा व्यक्षरत् ॥३ ॥
सुत एति पवित्र आ त्विषिं दधान ओजसा । विचक्षाणो विरोचयन् ॥४ ॥
आविवासन्परावतो अथो अर्वावतः सुतः । इन्द्राय सिच्यते मधु ॥५ ॥
समीचीना अनूषत हरिं हिन्वन्त्यद्रिभिः । इन्दुमिन्द्राय पीतये ॥६ ॥

*āśurarṣa bṛhanmate pari priyeṇa dhāmnā / yatrā devā iti bruvan //1 //*
*pariṣkṛṇvannaniṣkṛtaṁ janāya yātayanniṣaḥ / vṛṣṭiṁ divaḥ pari srava //2 //*
*ayaṁ sa yā divaspari raghuyāmā pavitra ā / sindherūrmā vyakṣarat //3 //*
*suta eti pavitra ā tviṣiṁ dadhāna Ojasā / vichakṣāṇo virochayan //4 //*
*āvivāsanparāvato atho arvāvataḥ sutaḥ / indrāya sichyate madhu //5 //*
*samīchīnā anūṣata hariṁ hinvantyadribhiḥ / indumindrāya pītaye //6 //*

सा. (Sv.) ९२४-९२६

पुनानो अक्रमीदभि विश्वा मृधो विचर्षणिः । शुम्भन्ति विप्रं धीतिभिः ॥१ ॥
या योनिमरुणो रुहद्गमदिन्द्रो वृषा सुतम् । ध्रुवे सदसि सीदतु ॥२ ॥
नू नो रयिं महामिन्दोऽस्मभ्यं सोम विश्वतः । आ पवस्व सहस्रिणम् ॥३ ॥

*punāno akramīdabhi viśvā mṛdho vicharṣaṇiḥ / śumbhanti vipraṁ dhītibhiḥ //1 //*
*yā yonimaruṇo ruhadgamadindro vṛṣā sutam / dhruve sadasi sīdatu //2 //*
*nū no rayiṁ mahāmindo'smabhyaṁ soma viśvataḥ / ā pavasva sahasriṇam //3 //*

## ४४०. बृहस्पतिः (Bṛhaspatiḥ)

१. अश्वः (Aśvaḥ) - य. (Yv.)९.६

अप्स्वन्तरमृतमप्सु भेषजमपामुत प्रशस्तिष्वश्वा भवत वाजिनः ।
देवीरापो यो वऽऊर्मिः प्रतूर्तिः ककुन्मान् वाजसास्तेनायं वाजंसेत् ॥६ ॥

*apsvantaramṛtamapsu bheṣajamapāmuta praśastiṣvaśvā bhavata vājinaḥ /*
*devīrāpo yo va'ūrmiḥ pratūrtiḥ kakunmān vājasāstenāyaṁ vājaṁset //6 //*

२. आपः (Āpaḥ) - अ. (Av.) १०.६.३

यत् त्वा शिक्वः परावधीत् तक्षा हस्तेन वास्या ।
आपस्त्वा तस्माज्जीवलाः पुनन्तु शुचयः शुचिम् ॥३ ॥

*yat tvā śikvaḥ parāvadhīt takṣā hastena vāsyā /*
*āpastvā tasmājjīvalāḥ punantu śuchayaḥ śuchim //3 //*

३. इन्द्रः (Indraḥ) - य. (Yv.)९.२-३

ध्रुवसदं त्वा नृषदं मनःसदमुपयामगृहीतोऽसीन्द्राय त्वा जुष्टं गृह्णाम्येष ते योनिरिन्द्राय त्वा जुष्टतमम् । अप्सुषदं त्वा घृतसदं व्योमसदमुपयामगृहीतोऽसीन्द्राय त्वा जुष्टं गृह्णाम्येष ते योनिरिन्द्राय त्वा जुष्टमम् । पृथिविसदं त्वाऽन्तरिक्षसदं दिविसदं देवसदं नाकसदमुपयामगृहीतोऽसीन्द्राय त्वा जुष्टं गृह्णाम्येष ते योनिरिन्द्राय त्वा जुष्तमम् ॥२ ॥

अपांरसमुद्वयसंसूर्य्ये सन्तंसमाहितम् । अपां रसस्य यो रसस्तं वो
गृह्णाम्युत्तममुपयामगृहीतोऽसीन्द्राय त्वा जुष्टं गृह्णाम्येष ते योनिरिन्द्रायवा जुष्टतमम् ॥३ ॥

*dhruvasadaṁ tvā nṛṣadaṁ manaḥsadamupayāmagṛhīto'sīndrāya tvā juṣṭaṁ gṛhṇāmyeṣa te yonirindrāya tvā juṣṭatamam / apsuṣadaṁ tvā ghṛtasadaṁ*

*vyomasadamupayāmagṛhīto'sāīndrāya tvā juṣṭaṁ gṛhṇāmyeṣa te yonirindrāya tvā juṣṭamam । pṛthivisadaṁ tvā'ntarikṣasadaṁ divisadaṁ devasadaṁ nākasadamupayāmagṛhīto'sīndrāya tvā juṣṭaṁ gṛhṇāmyeṣa te yonirindrāya tvā juṣṭamam ॥2 ॥*

*apāṁrasamudvayasaṁsūryye santaṁsamāhitam । apāṁ rasasya yo rasastaṁ vo gṛhṇāmyuttamamupayāmagṛhīto'sīndrāya tvā juṣṭaṁ gṛhṇāmyeṣa te yonirindrāyavā juṣṭatamam ॥3 ॥*

४. इन्द्रा बृहस्पतिः (Indrā Bṛhaspatiḥ) - य. (Yv.)९.१०-१२

देव्याहंसवितुः सवे सत्यसवसो बृहस्पतेरुत्तमं नाकंरुहेयम् ।
देवस्याहंसवितुः सवे सत्यसवसऽइन्द्रस्योत्तमं नाकंरुहेयम् ।
देवस्याहंसवितुः सवे सत्यप्रसवसो बृहस्पतेरुत्तमं नाकमरुहम् ।
देवस्याहंसवितुः सवे सत्यप्रसवसऽइन्द्रस्योत्तमं नाकमरुहम् ॥१० ॥
बृहस्पते वाजं जय बृहस्पतये वाचं वदत बृहस्पतिं वाजं जापयत ।
इन्द्र वाजं जयेन्द्राय वाचं वदतेन्द्रं वाजं जापयत ॥११ ॥
एषा वः सा सत्या संवागभूद्यया बृहस्पतिं वाजमजीजपताजीजपत
बृहस्पतिं वाजं वनस्पतयो विमुच्यध्वम् ।
एषा वः सा सत्या संवागभूद्ययेन्द्रं वाजमजीजपताजीजपतेन्द्रं
वाजं वनस्पतयो विमुच्यध्वम् ॥१२ ॥

*devyāhaṁsavituḥ save satyasavaso bṛhaspateruttamaṁ nākaṁruheyam ।*
*devasyāhaṁsavituḥ save satyasavasa'indrasyottamaṁ nākaṁruheyam ।*
*devasyāhaṁsavituḥ save satyaprasavaso bṛhaspateruttamaṁ nākamaruham ।*
*devasyāhaṁsavituḥ save satyaprasavasa'indrasyottamaṁ nākamaruham ॥10 ॥*
*bṛhaspate vājaṁ jaya bṛhaspataye vāchaṁ vadata bṛhaspatiṁ vājaṁ jāpayata ।*
*indra vājaṁ jayendrāya vāchaṁ vadatendraṁ vājaṁ jāpayata ॥11 ॥*
*eṣā vaḥ sā satyā saṁvāgabhūdyayā bṛhaspatiṁ vājamajījapatājījapata*
*bṛhaspatiṁ vājaṁ vanaspatayo vimuchyadhvam ।*
*eṣā vaḥ sā satyā saṁvāgabhūdyayendraṁ vājamajījapatājījapatendraṁ*
*vājaṁ vanaspatayo vimuchyadhvam ॥12 ॥*

५. एक रुद्रः (Eka Rudraḥ) - य. (Yv.)१६.५

अध्यवोचदाधिवक्ता प्रथमो दैव्यो भिषक् अहीँश्च सर्वांजम्भयन्त्सर्वाश्च
यातुधान्योऽधराचीः परा सुव ॥५ ॥

*adhyavochadādhivaktā prathamo daivyo bhiṣak ahīśṁcha*
*sarvāṁjambhayantsarvāścha*
*yātudhānyo'dharāchīḥ parā suva ॥5 ॥*

६. प्रजापतिः (Prajāpatiḥ) - य. (Yv.)९.८

वातरं हा भव वाजिन् युज्मानऽइन्द्रस्येव दक्षिणः श्रियैधि ।
युंजन्तु त्वा मरुतो विश्ववेदसऽआ ते त्वष्टा पत्सु जवं दधातु ॥८ ॥

*vātaraṁ hā bhava vājin yujmāna'indrasyeva dakṣiṇaḥ śriyaidhi ।*
*yuṁjantu tvā maruto viśvavedasa'ā te tvaṣṭā patsu javaṁ dadhātu ॥8 ॥*

७. राजधर्मराजादयः (Rājadharmarājādayaḥ) - य. (Yv.)९.४

ग्रहाऽऊर्जाहुतयो व्यन्तो विप्राय मतिम् ।
तेषां विशिप्रियाणां वोऽहमिषमूर्जं समग्रभमुपयामगृहीतोऽसीन्द्राय
त्वा जुष्टं गृह्णाम्येष ते योनिरिन्द्राय त्वा जुष्टतमम् ।
स्मपृचौ स्थः सं मा भद्रेण पृङ्क्तं विपृचौ स्थो वि मा पाप्मना पृङ्क्तम् ॥४ ॥

*grahā'ūrjāhutayo vyanto viprāya matim ।*
*teṣāṁ viśipriyāṇāṁ vo'hamiṣamūrjaṁ samagrabhamupayāmagṛhīto'sīndrāya*
*tvā juṣṭaṁ gṛhṇāmyeṣa te yonirindrāya tvā juṣṭatamam ।*

*smapṛchau sthaḥ saṁ mā bhadreṇa pṛṅktaṁ vipṛchau stho vi mā pāpmanā pṛṅktam* ॥4॥

८. वनस्पतिः , फालमणिः (Vanaspatiḥ , Phālamaṇiḥ) - अ. (Av.) १०.६.१-२; ४-३४

अ. (Av.) १०.६.१-२

अरातीयोर्भ्रातृव्यस्य दुर्हार्दो द्विषतः शिरः। अपि वृश्चाम्योजसा ॥१॥
वर्म मह्यमयं मणिः फालाज्जातः करिष्यति। पूर्णो मन्थेन मागमद् रसेन सह वर्चसा ॥२॥
*arātīyorbhrātṛvyasya durhārdo dviṣataḥ śiraḥ । api vṛśchāmyojasā* ॥1॥
*varma mahyamayaṁ maṇiḥ phālājjātaḥ kariṣyati । pūrṇo manthena māgamad rasena saha varchasā* ॥2॥

अ. (Av.) १०.६.४-३४

हिरण्यस्रगयं मणिः श्रद्धां यां महो दधत्। गृहे वसतु नोऽतिथिः ॥४॥
तस्मै घृतं सुरां मध्वन्नमन्नं क्षदामहे ।
स नः पितेव पुत्रेभ्यःश्रेयः श्रेयश्चिकित्सतु भूयोभूयः श्वःश्वो देवेभ्यो मणिरेत्य ॥५॥
यमबध्नाद् बृहस्पतिर्मणिं फालं घृतश्चुतमुग्रं खदिरमोजसे ।
तमग्निः प्रत्यमुंचत सो अस्मै दुह आज्यं भूयोभूयः श्वःश्वस्तेन त्वं द्विषतो जहि ॥६॥
यमबध्नाद् बृहस्पतिर्मणि फालं घृतश्चुतमुग्रं खदिरमोजसे ।
तमिन्द्रः प्रत्यमुंचतौजसे वीर्याय कम् ।
सो अस्मै बलमिद् दुहे भूयोभूयः श्वःश्वस्तेन त्वं द्विषतो जहि ॥७॥
यमबध्नाद् बृहस्पतिर्मणिं फालं घृतश्चुतमुग्रं खदिरमोजसे ।
तं सोमः प्रत्यमुंचत महे श्रोत्राय चक्षसे ।
सो अस्मै वर्च इद् दुहे भूयोभूयः श्वःश्वस्तेन त्वं द्विषतो जहि ॥८॥
यमबध्नाद् बृहस्पतिर्मणिं फालं घृतश्चुतमुग्रं खदिरमोजसे ।
तं सूर्यः प्रत्यमुंचत तेनेमा अजयद् दिशः ।
सो अस्मै भूतिमिद् दुहे भूयोभूयः श्वःश्वस्तेन त्वं द्विषतो जहि ॥९॥
यमबध्नाद् बृहस्पतिर्मणि फालं घृतश्चुतमुग्रं खदिरमोजसे ।
तं विभ्रच्चन्द्रमा मणिमसुराणां पुरोऽजयद् दानवानां हिरण्ययीः ।
सो अस्मै श्रियमिद् दुहे भूयोभूयः श्वःश्वस्तेन त्वं द्विषतो जहि ॥१०॥
यमबध्नाद् बृहस्पतिर्वाताय मणिमाशवे ।
सो अस्मै वाजिनं दुहे भूयोभूयः श्वःश्वस्तेन त्वं द्विषतो जहि ॥११॥
यमबध्नाद् बृहस्पतिर्वाताय मणिमाशवे। तेनेमां मणिना कृषिमश्विसनावभि रक्षतः ।
स भिषग्भ्यां महो दुहे भूयोभूयः श्वःश्वस्तेन त्वं द्विषतो जहि ॥१२॥
यमबध्नाद् बृहस्पतिर्वाताय मणिमाशवे। तं बिभ्रत् सविता मणिं तेनेदमजयत् स्वः ।
सो अस्मै सूनृतां दुहे भूयोभूयः श्वःश्वस्तेन त्वं द्विषतो जहि ॥१३॥
यमबध्नाद् बृहस्पतिर्वाताय मणिमाशवे। तमापो बिभतीर्मणिं सदा धवन्त्यक्षिताः ।
स आभ्योऽमृतमिद् दुहे भूयोभूयः श्वःश्वस्तेन त्वं द्विषतो जहि ॥१४॥
यमबध्नाद् बृहस्पतिर्वाताय मणिमाशवे। तं राजा वरुणो मणिं प्रत्यमुंचत शंभुवम् ।
सो अस्मै सत्यमिद् दुहे भूयोभूयः श्वःश्वस्तेन त्वं द्विषतो जहि ॥१५॥
यमबध्नाद् बृहस्पतिर्वाताय मणिमाशवे। तं देवा बिभ्रतो मणिं सर्वाँल्लोकान् युधाजयन् ।
स एभ्यो जितिमिद् दुहे भूयोभूयः श्वःश्वस्तेन त्वं द्विषतो जहि ॥१६॥
यमबध्नाद् बृहस्पतिर्वाताय मणिमाशवे। तमिमं देवता मणिं प्रत्यमुंचन्त शंभुवम् ।
स आभ्यो विश्वमिद् दुहे भूयोभूयः श्वःश्वस्तेन त्वं द्विषतो जहि ॥१७॥
ऋतवस्तमबध्नतार्तवास्तमबध्नत। संवत्सरस्तं बद्ध्वा सर्व भूतं वि रक्षति ॥१८॥
अन्तर्देशा अबध्नत प्रदिशस्तमबध्नत। प्रजापतिसृष्टो मणिर्द्विषतो मेऽधराँ अकः ॥१९॥
अथर्वाणो अबध्नताथर्वणा अबध्नत ।
तैर्मेदिनो अंगिरसो दस्यूनां बिभिदुः पुरस्तेन त्वं द्विषतो जहि ॥२०॥
तं धाता प्रत्यमुंचत स भूतं व्यकल्पयत्। तेन त्वं द्विषतो जहि ॥२१॥

यमबध्नाद् बृहस्पतिर्देवेभ्यो असुरक्षितिम्। स मायं मणिरागमद् रसेन सह वर्चसा ॥२२॥
यमबध्नाद् बृहस्पतिर्देवेभ्यो असुरक्षितिम् ।
स मायं मणिरागमत् सह गोभिरजाविभरन्नेन प्रजया सह ॥२३॥
यमबध्नाद् बृहस्पतिर्देवेभ्यो असुरक्षितिम् ।
स मायं मणिरागमत् सह व्रीहियवाभ्यां महसा भूत्या सह ॥२४॥
यमबध्नाद् बृहस्पतिर्देवेभ्यो असुरक्षितिम् ।
स मायं मणिरागमन्मधोर्घृतस्य धारया कीलालेन मणिः सह ॥२५॥
यमबध्नाद् बृहस्पतिर्देवेभ्यो असुरक्षितिम् ।
स मायं मणिमागमदूर्जया पयसा सह द्रविणेन श्रिया सह ॥२६॥
यमबध्नाद् बृहस्पतिर्देवेभ्यो असुरक्षितिम् ।
स मायं मणिरागमत् तेजसा त्विष्या सह यशसा कीर्त्यासह ॥२७॥
यमबध्नाद् बृहस्पतिर्देवेभ्यो असुरक्षितिम्। स मायं मणिरागमत् सर्वाभिर्भूतिभिः सह ॥२८॥
तामिमं देवता मणिं मह्यं ददतु पुष्टये। अभिभुं क्षत्रवर्धनं सपत्नदम्भनं मणिम् ॥२९॥
ब्रह्मणा तेजसा सह प्रति मुंचामि मे शिवम्। असपत्नः सपत्नहा सप्त्नान् मेऽधराँ अकः ॥३०॥
उत्तरं द्विषतो मामयं मणिष्कृणोतु देवजाः ।
यस्य लोका इमे त्रयः पयो दुग्धमुपासते। स मायमधि रोहतु मणिः श्रैष्ठ्याय मूर्धतः ॥३१॥
यं देवाः पितरो मनुष्या अपजीवन्ति सर्वदा। स मायमधि रोहतु मणिः श्रैष्ठ्याय मूर्धतः ॥३२॥
यथा बीजमुर्वरायां कृष्टे फालेन रोहति। एवा मयिं प्रजा पशवोऽन्नमन्नं वि रोहतु ॥३३॥
यस्मै त्वा यावर्धन मणे प्रत्यमुंचं शिवम्। तं त्वं शतदक्षिण मणे श्रैष्ठ्याय जिन्वतात् ॥३४॥
*hiraṇyasragayaṁ maṇiḥ śraddhāṁ yāṁ maho dadhat / gṛhe vasatu no'tithiḥ //4 //*
*tasmai ghṛtaṁ surāṁ madhvannamannaṁ kṣadāmahe /*
*sa naḥ piteva putrebhyaḥśreyaḥ śreyaśchikitsatu bhūyobhūyaḥ śvaḥśvo devebhyo maṇiretya //5 //*
*yamabadhnād bṛhaspatirmaṇiṁ phālaṁ ghṛtaśchatutamugraṁ khadiramojase /*
*tamagniḥ pratyamuṁchata so asmai duha ājyaṁ bhūyobhūyaḥ śvaḥśvastena tvaṁ dviṣato jahi //6 //*
*yamabadhnād bṛhaspatirmaṇi phālaṁ ghṛtaśchutamugraṁ khadiramojase /*
*tamindraḥ pratyamuṁchataujase vīryāya kam /*
*so asmai balamid duhe bhūyobhūyaḥ śvaḥśvastena tvaṁ dviṣato jahi //7 //*
*yamabadhnād bṛhaspatirmaṇiṁ phālaṁ ghṛtaśchutamugraṁ khadiramojase /*
*taṁ somaḥ pratyamuṁchata mahe śrotrāya chakṣase /*
*so asmai varcha id duhe bhūyobhūyaḥ śvaḥśvastena tvaṁ dviṣato jahi //8 //*
*yamabadhnād bṛhaspatirmaṇiṁ phālaṁ ghṛtaśchutamugraṁ khadiramojase /*
*taṁ sūryaḥ pratyamuṁchata tenemā ajayad diśaḥ /*
*so asmai bhūtimid duhe bhūyobhūyaḥ śvaḥśvastena tvaṁ dviṣato jahi //9 //*
*yamabadhnād bṛhaspatirmaṇi phālaṁ ghṛtaśchutamugraṁ khadiramojase /*
*taṁ vibhrachchandramā maṇimasurāṇāṁ puro'jayad dānavānāṁ hiraṇyayīḥ /*
*so asmai śriyamid duhe bhūyobhūyaḥ śvaḥśvastena tvaṁ dviṣato jahi //10 //*
*yamabadhnād bṛhaspatirvātāya maṇimāśave /*
*so asmai vājinaṁ duhe bhūyobhūyaḥ śvaḥśvastena tvaṁ dviṣato jahi //11 //*
*yamabadhnād bṛhaspatirvātāya maṇimāśave /*
*tenemāṁ maṇinā kṛṣimaśvisanāvabhi rakṣataḥ /*
*sa bhiṣagbhyāṁ maho duhe bhūyobhūyaḥ śvaḥśvastena tvaṁ dviṣato jahi //12 //*
*yamabadhnād bṛhaspatirvātāya maṇimāśave /*
*taṁ bibhrat savitā maṇiṁ tenedamajayat svaḥ /*
*so asmai sūnṛtāṁ duhe bhūyobhūyaḥ śvaḥśvastena tvaṁ dviṣato jahi //13 //*
*yamabadhnād bṛhaspatirvātāya maṇimāśave /*
*tamāpo bibhatīrmaṇiṁ sadā dhavantyakṣitāḥ /*

*sa ābhyo'mṛtamid duhe bhūyobhūyaḥ śvaḥśvastena tvaṁ dviṣato jahi //14 //*
*yamabadhnād bṛhaspatirvātāya maṇimāśave /*
*taṁ rājā varuṇo maṇiṁ pratyamuṁchata śaṁbhuvam /*
*so asmai satyamid duhe bhūyobhūyaḥ śvaḥśvastena tvaṁ dviṣato jahi //15 //*
*yamabadhnād bṛhaspatirvātāya maṇimāśave /*
*taṁ devā bibhrato maṇiṁ sarvām̐llokān yudhājayan /*
*sa ebhyo jitimid duhe bhūyobhūyaḥ śvaḥśvastena tvaṁ dviṣato jahi //16 //*
*yamabadhnād bṛhaspatirvātāya maṇimāśave /*
*tamimaṁ devatā maṇiṁ pratyamuṁchanta śaṁbhuvam /*
*sa ābhyo viśvamid duhe bhūyobhūyaḥ śvaḥśvastena tvaṁ dviṣato jahi //17 //*
*ṛtavastamabadhnatārtavāstamabadhnata /*
*saṁvatsarastaṁ baddhvā sarva bhūtaṁ vi rakṣati //18 //*
*antardeśā abadhnata pradiśastamabadhnata /*
*prajāpatisṛṣṭo maṇirdviṣato me'dharām̐ akaḥ //19 //*
*atharvāṇo abadhnatātharvaṇā abadhnata /*
*tairmedino aṁgiraso dasyūnāṁ bibhiduḥ purastena tvaṁ dviṣato jahi //20 //*
*taṁ dhātā pratyamuṁchata sa bhūtaṁ vyakalpayat / tena tvaṁ dviṣato jahi //21 //*
*yamabadhnād bṛhaspatirdevebhyo asurakṣitim /*
*sa māyaṁ maṇirāgamad rasena saha varchasā //22 //*
*yamabadhnād bṛhaspatirdevebhyo asurakṣitim /*
*sa māyaṁ maṇirāgamat saha gobhirajāvibharannena prajayā saha //23 //*
*yamabadhnād bṛhaspatirdevebhyo asurakṣitim /*
*sa māyaṁ maṇirāgamat saha vrīhiyavābhyāṁ mahasā bhūtyā saha //24 //*
*yamabadhnād bṛhaspatirdevebhyo asurakṣitim /*
*sa māyaṁ maṇirāgamanmadhorghṛtasya dhārayā kīlālena maṇiḥ saha //25 //*
*yamabadhnād bṛhaspatirdevebhyo asurakṣitim /*
*sa māyaṁ maṇimāgamadūrjayā payasā saha draviṇena śriyā saha //26 //*
*yamabadhnād bṛhaspatirdevebhyo asurakṣitim /*
*sa māyaṁ maṇirāgamat tejasā tvṣyiā saha yaśasā kīrtyāsaha //27 //*
*yamabadhnād bṛhaspatirdevebhyo asurakṣitim /*
*sa māyaṁ maṇirāgamat sarvābhirbhūtibhiḥ saha //28 //*
*tāmimaṁ devatā maṇiṁ mahyaṁ dadatu puṣṭaye /*
*abhibhuṁ kṣatravardhanaṁ sapatnadambhanaṁ maṇim //29 //*
*brahmaṇā tejasā saha prati muṁchāmi me śivam /*
*asapatnaḥ sapatnahā saptnān me'dharām̐ akaḥ //30 //*
*uttaraṁ dviṣato māmayaṁ maṇiṣkṛṇotu devajāḥ /*
*yasya lokā ime trayaḥ payo dugdhamupāsate /*
*sa māyamadhi rohatu maṇiḥ śraiṣṭhyāya mūrdhataḥ //31 //*
*yaṁ devāḥ pitaro manuṣyā apajīvanti sarvadā /*
*sa māyamadhi rohatu maṇiḥ śraiṣṭhyāya mūrdhataḥ //32 //*
*yathā bījamurvarāyāṁ kṛṣṭe phālena rohati /*
*evā mayiṁ prajā paśavo'nnamannaṁ vi rohatu //33 //*
*yasmai tvā yāvardhana maṇe pratyamuṁchaṁ śivam /*
*taṁ tvaṁ śatadakṣiṇa maṇe śreṣṭhyāya jinvatāt //34 //*

९. वीरः (Vīraḥ) - य. (Yv.)९.९

जवो यस्ते वाजिन्निहितो गुहा यः श्येने परीत्तोऽअचरच्च वाते ।
तेन नो वाजिन् बलवान् बलेन वाजजिच्च भव समने च पारयिष्णुः ।
वाजिनो वाजजितो वाजंसरिष्यन्तो बृहस्पतेर्भागमवजिघ्रत ॥९॥
*javo yaste vājinnihito guhā yaḥ śyene parītto'acharachcha vāte /*

*tena no vājin balavān balena vājajichcha bhava samane cha pārayiṣṇuḥ /*
*vājino vājajito vājaṁsariṣyanto bṛhaspaterbhāgamavajighrata //9 //*

१०. सविता (Savitā) - य. (Yv.)९.५; १३

इन्द्रस्य वज्रोऽसि वाजसास्त्वयाऽयंवाजंसेत् ।
वाजस्य नु प्रसवे मातरं महीमदितिं नाम वचसा करामहे ।
यस्यामिदं विश्वं भुवनमाविवेश तस्यां नो देवः सविता धर्म सविषत् ॥५॥
देवस्याहंसवितुः सवे सत्यप्रसवसो बृहस्पतेर्वाजजितो वाजं जेषम् ।
वाजिनो वाजजितोऽध्वन स्कभ्नुवन्तो योजना मिमानाः काष्ठां गच्छत ॥१३॥
*indrasya vajro'si vājasāstvayā'yaṁvājaṁset /*
*vājasya nu prasave mātaraṁ mahīmaditiṁ nāma vachasā karāmahe /*
*yasyāmidaṁ viśvaṁ bhuvanamāviveśa tasyāṁ no devaḥ savitā dharma saviṣat //5 //*
*devasyāhaṁsavituḥ save satyaprasavaso bṛhaspatervājajito vājaṁ jeṣam /*
*vājino vājajito'dhvana skabhnuvanto yojanā mimānāḥ kāṣṭhāṁ gachchhata //13 //*

११. सेनापतिः (Senāpatiḥ) - य. (Yv.)९.७

वातो वा मनो वा गन्धर्वाः सप्तविं शतिः। तेऽअग्रेऽश्वमयुंजँस्तेऽअस्मिन् जवमादधुः ॥७॥
*vāto vā mano vā gandharvāḥ saptaviṁ śatiḥ /*
*te'agre'śvamayuṁjaṁste'asmin javamādadhuḥ //7 //*

## ४४१. बृहस्पतिर् नकुलो वा (साग्री.सास्वा.); वामदेवः (सार्षेदी.) (Bṛhaspatir Nakulo Vā [Ssb.Sas.]; Vāmadevaḥ [Sad.])

१. इन्द्रः (Indraḥ) - सा. (Sv.) ३२१

ब्रह्म जाानं प्रथमं पुरस्ताद्वि सीमतः सुरुचो वेन आवः ।
स बुध्न्या उपमा अस्य विष्ठाः सतश्च योनिमसतश्च विवः ॥९॥
*brahma jāānaṁ prathamaṁ purastādvi sīmataḥ surucho vena āvaḥ /*
*sa budhnyā upamā asya viṣṭhāḥ sataścha yonimasataścha vivaḥ //9 //*

## ४४२. बृहस्पतिर् वा लौक्य अदितिर् वा दाक्षायणी (Bṛhaspatir Vā Laukya Aditir Vā Dākṣāyaṇī)

१. देवाः (Devāḥ) - ऋ. (Rv.)१०.७२.१-९

देवानां नु वयं जाना प्र वोचाम विपन्यया। उक्थेषु शस्यमानेषु यः पश्यादुत्तरे युगे ॥१॥
ब्रह्मणस्पतिरेता सं कर्मारइवाधमत्। देवानां पूर्व्ये युगेऽसतः सदजायत ॥२॥
देवानां युगे प्रथमेऽसतः सदजायत। तदाशा अन्वजायन्त तदुत्तानपदस्परि ॥३॥
भूर्जा उत्तानपदो भुव आशा अजायन्त। अदितेर्दक्षो अजायत दक्षाद्वदितिः परि ॥४॥
अदितिर्ह्यजनिष्ट दक्ष या दुहिता तव। तां देवा अन्वजायन्त भद्रा अमृतबन्धवः ॥५॥
यद्देवा अदः सलिले सुसंरब्धा अतिष्ठत। अत्रा वो नृत्यतामिव तीव्रो रेणुरपायत ॥६॥
यद्देवा यतयो यथा भुवनान्यपिन्वत। अत्रा समुद्र आ गूळहमा सूर्यमजभर्तन ॥७॥
अष्टौ पुत्रासो अदितेर्ये जातास्तन्व१स्परि। देवाँ उप प्रैत्सप्ताभिः परा मार्ताण्डमास्यत् ॥८॥
सप्तभिः पुत्रैरदितिरुप प्रैत्पूर्व्य युगम्। प्रजायै मृत्यवे त्वत्पुनर्मार्ताण्डमाभरत् ॥९॥
*devānāṁ nu vayaṁ jānā pra vochāma vipanyayā /*
*uktheṣu śasyamāneṣu yaḥ paśyāduttare yuge //1 //*
*brahmaṇaspatiretā saṁ karmāraivādhamat /*
*devānāṁ pūrvye yuge'sataḥ sadajāyata //2 //*
*devānāṁ yuge prathame'sataḥ sadajāyata / tadāśā anvajāyanta taduttānapadaspari //3 //*
*bhūrjā uttānapado bhuva āśā ajāyanta / aditerdakṣo ajāyata dakṣādvaditiḥ pari //4 //*
*aditirhyajaniṣṭa dakṣa yā duhitā tava /*
*tāṁ devā anvajāyanta bhadrā amṛtabandhavaḥ //5 //*
*yaddevā adaḥ salile susaṁrabdhā atiṣṭhata /*
*atrā vo nṛtyatāmiva tīvro reṇurapāyata //6 //*
*yaddevā yatayo yathā bhuvanānyapinvata /*

*atrā samudra ā gūḻahamā sūryamajabhartana* //7 //
*aṣṭau putrāso aditerye jātāstanva1spari* /
*devām̐ upa praitsaptābhiḥ parā mārtāṇḍamāsyat* //8 //
*saptabhiḥ putrairaditirupa praitpūrvya yugam* /
*prajāyai mṛtyave tvatpunarmārtāṇḍamābharat* //9 //

## ४४३. ब्रह्म स्वयम्भूः - द्र. स्वयम्भूर् ब्रह्म (Brahma Svayambhūḥ - See Svayambhūr Brahma)